Akalaṅka, Akalaṅka and Anantavīrya

# Siddhiviniścaya

— Siddhiviniścayavṛtti — Siddhiviniścayaṭīkā

SARIT

SARIT

# Contents

Contents i

I श्रीमद्भट्टाकलङ्कदेवविरचित-सिद्धिविनिश्चयस्य :र-विभद्रपादोपज़ीवि-अनन्तवीर्याचार्यविनिर्मिता सिद्धिविनिश्चयटीका आलोकाख्यटिप्पणसहिता ३

१ प्रत्यक्षसिद्धिः ५

द्वितीयः प्रस्तावः : २ सविकल्पसिद्धिः १५१

तृतीयः प्रस्तावः: ३. प्रमाणान्तरसिद्धिः २१६

चतुर्थः प्रस्तावः : ४. जीवसिद्धिः २७८

पञ्चमः प्रस्तावः : ५ वादसिद्धिः ३८१

षष्ठः प्रस्तावः : ६ हेतुलक्षणसिद्धिः ४५४

सप्तमः प्रस्तावः : ७ शास्त्रसिद्धिः ५४१

अष्टमः प्रस्तावः : ८ सर्वज्ञसिद्धिः ६४२

नवमः प्रस्तावः : ९ शब्दसिद्धिः ७२६

दशमः प्रस्तावः : १० अर्थनयसिद्धिः ८१६

एकादशमः प्रस्तावः : ११ शब्दनयसिद्धिः ८५२

द्वादशमः प्रस्तावः : १२ निक्षेपसिद्धिः ९०५

दातुः लेखकस्य च प्रशस्तिः ९२२

The TEI Header ९२३

श्रीमद्भट्टाकलङ्कस्य पातु पुण्या सरस्वती ।
अनेकान्तमरुन्मार्गे चन्द्रलेखायितं यया ॥§ 2
--शुभचन्द्रः

1/mkj

# Part I

[

श्रीमद्भट्टाकलङ्कदेवविरचित-सिद्धिविनिश्चयस्य :रविभद्रपादोप-जीवि-अनन्तवीर्याचार्यविनिर्मिता सिद्धिविनिश्चयटीका आलोकाख्यटिप्पणसहिता]श्रीमद्भट्टाकलङ्कदेवविरचित-सिद्धिविनिश्चयस्य : रविभद्रपादोपजीवि-अनन्तवीर्याचार्यविनिर्मिता सिद्धिविनिश्चयटीका आलोकाख्यटिप्पणसहिता

# १ प्रत्यक्षसिद्धिः

॥ ओँ नमोऽर्हते ॥ § 3

...1 अ क ल ङ्क जिनं भक्त्या गुरुं देवीं सर[स्व]तीम् ।
नत्वा टीकां प्रवक्ष्यामि शुद्धां सि द्धि वि नि श्च ये ॥ १ ॥§ 5

...2 अ क ल ङ्क वचः काले कलौ न कलयापि यत् ।
नृषु लभ्यं क्वचिल्लब्ध्वा तत्रैवास्तु मतिर्मम ॥ २ ॥§ 7

...3 दे व स्याऽ न न्त वी र्यो ऽपि पदं व्यक्तं तु सर्वतः ।
न जानीते ऽक ल ङ्क स्य चित्रमेतत् परं भुवि ॥ ३ ॥§ 9

...4 अ क ल ङ्क वचोऽम्भोधेः सूक्तरत्नानि यद्यपि ।
गृह्यन्ते बहुभिः स्वैरं सद्रत्नाकर एव सः ॥ ४ ॥§ 11

...5 सर्वधर्म[स्य]नैरात्म्यं कथयन्नपि सर्वथा ।
ध र्म की र्तिः पदं गच्छेदाकल[ङ्कं] कथं ननु ॥ ५ ॥§ 13

शास्त्रस्यादौ तदविघ्नप्रसिद्धिप्रथनादिकं फलमभिसमीक्ष्य **सर्वज्ञम्** इत्यादि मङ्गलमाह-- § 14

...1 सर्वज्ञं सर्वतत्त्वार्थस्याद्वादन्यायदेशिनम् ।
श्रीवर्धमानमभ्यर्च्य वक्ष्ये सि द्धि वि नि श्च य म् ॥ १ ॥§ 16

---

४ क] लेशेन ।
६ न] अनन्तशक्तियुक्तोऽपि, पक्षे ग्रन्थकारः ।
६ प] वाक्यम् ।
६ व्य] स्पष्टम् ।
९ स्वैर] स्वैरं
११ ध] बौद्धाचार्यः ।
१३ माह] अकलङ्कदेवः ।

अस्यायमर्थः--**सर्वज्ञम्** सर्ववेदिनम्, **अभ्यर्च्य** अर्चित्वा । ननु प्रतिभासाद्वैतादन्यस्याभावात् तदेव सर्वम्, तज्जानातीति सर्वज्ञः स्वरूपज्ञः, तमभ्यर्च्य इति प्राप्तम् इति चेत्; अत्राह--**श्रीवर्धमानम्** इति । **श्रीः** अशेषतत्त्वार्थज्ञानादिसम्पद् इह गृह्यते, सा पूर्वापूर्वपर्यायपरित्यागाऽजहद्वृत्त्युत्तरपर्यायोपादानेन **वर्धमाना** उपरमविरहेण प्रवर्त्तमाना यस्य स

...1 अकलङ्कं नमस्कृत्य तुलनार्थावबोधकम् ।
आलोकाख्यमहं वक्ष्ये महेन्द्रष्टिप्पणं सुधीः ॥ १ ॥§ 19

तथोक्तस्तम् इति । कामचारेण विशेषणविशेष्यभाव इति श्रीशब्दस्य विशेषणाभिधायित्वम् अन्यस्य विशेषाभिधायित्वम्, वर्धमानाक्षरनित्यादिवत्, इतरथा वर्धमानशब्दस्य पूर्वनिपातः श्रीशब्दस्य परनिपातः स्यात् । एवं वा सविशेषणस्य पूर्वनिपातात् । नन्वेवंविशेषणेऽपि न यथोक्तदोषनिवृत्तिः । नहि स्वपक्षविशेषणमात्रात् परपक्षो निवर्तते अतिप्रङ्गात् अपि तु न्यायात्, ततः स एव उच्यतामिति चेत्; अत्राह--**सर्वतत्त्वार्थस्याद्वादन्यायदेशिनम्** इति । **सर्वे तत्त्वार्थाः** जीवादयः तेषां **स्याद्वादः** अनेकान्तः, *विषयिशब्दस्य विषये उपचारात्, तस्य **न्यायो** ग्राहकं प्रत्यक्षादिप्रमाणम्, तद्दिसति कथयति इत्येवं शीलं **तद्देशिनम्** इति । एतदुक्तं भवति--तदुपदेशे मांसचक्षुषः के अन्ये इति भगवानेचतदुपदेष्टा जातः, तदुपदेशाच्च केवलं वयं व्याधूताज्ञानतमःस स्वं परं च तद्वर्त्मनि वर्तयितुं समर्थाः । तथाहि— दृश्यप्राप्ययोरिव

---

१ न] प्रतिभासाद्वैतवादी प्रज्ञाकरः प्राह ।
२ त] प्रतिभासाद्वैतमेव । परमार्थतः तदद्वैतावबोधादेव प्रमाणं भगवानपि न सर्वार्थपरिज्ञानतः । सर्वार्थपरिज्ञानं तु लोकव्यवहारेण सांवृतमेव । तथा चोक्तम्--अद्वयं यानमुत्तमम् ।--प्र॰ वार्तिकाल॰ २ । ७ ।
४ पू] तुलना— पूर्वाकारपरित्यागाऽजहद्वृत्तोत्तराकारान्वयप्रत्ययविषयस्योपादानत्वप्रतीतेः ।--अष्टस॰ पृ॰ ६५ । परापरस्वभावपरिहारावाप्तिस्थितिलक्षणोऽर्थः--प्रमाणसं॰ पृ॰ १२३ ।
४ र्याय] पूर्वपर्याय
९ म्] वर्धमानशब्दस्य ।
९ विशेषा] ष्या
९ नि] मि
१४ *] विषयी स्याद्वादो वाचकत्वात् विषयश्च अनेकान्तः तद्वाच्यत्वात् ।
१५ ये] अनेकान्ते ।
१५ द्दिस] श
१६ देशे] चर्मलोचनाः ।
१७ वानेच] व
१८ मःस] तमसः

विचारा[त्] दृश्यमात्रेऽपि विज्ञप्तिरूपे मत्योदधिस्तम्भादिभागानां नैकत्वमित्यतमः परमाणव एवा वशिष्यन्ते, तत्र चैकपरमाणुवेदनेन अन्येषामनुपलम्भेन सन्तानान्तरवदसत्त्वात् तस्य च स्वात्मनेति कस्य क्षणिकत्वदर्शनम् ? येनोच्यते--**यद्यथावभासते** *इत्यादि ? **यदवभासते तज्ज्ञानम्** *इत्यादि च । कस्य वा प्रतिभासाद्वैतता येनेदमप्युच्यते--**यद्यद्वैतेन तोषोऽस्ति मुक्त एवाऽसि सर्वथा ।** प्र° वार्तिकाल° २ । ३७ *इत्यादि ? § 20

यदि पुनः एकानेकविकल्पशून्यं तदिष्यते; तर्हि प्रतिभासाऽसून्य मेवेष्य ताम् । नहि परमाण्वाकारैस्तच्छून्यं चित्राद्वैतमाभाति अतीताऽनागतप- 3/mkj
र्यायैरेकात्मवत् । ग्राहकाभाव उभयत्राद्य नीलाद्याकारैस्तदिष्यते; तर्हि मेचकमणिदर्शनसमये नीलाद्याकाराणां परस्परमदर्शने सन्तानान्तराणामिव अभावः । दर्शने ऐक्यम् । निराकारवादोऽन्यथा भवेत् । तेषां त- /ms
था[ऽ]दर्शनेऽपि सत्त्वे न परलोकादिनिषेधैकान्त इति कथुमु — **तेन स्वरूपवदन्यदस्तीति तदेव सर्वमिति तज्ज्ञानन् सर्वज्ञः** इति । § 21

---

१ दृ] निर्विकल्पकदर्शनविषयभूते ।
१ म] बुद्ध्या । उदधिश्च स्तम्भादयश्च तेषां भागानाम् । तुलना--अथ नानात्वे बुद्धीनां प्रतिपरमाणु तावत्यो बुद्धय इति परमाणुग्रहणप्रसङ्गोऽनेकप्रतिपत्त्यप्रसङ्गश्च परस्परमप्रतिपत्तेरभावात् [[?]] च खलु स्वसंविदितानां नानात्वप्रतिपत्तिः सन्तानान्तरस्यापि प्रतिभासप्रसङ्गात्... ...--प्र° वार्तिकाल° ३ । ११ । नन्वेवं नीलवेदनस्यापि प्रतिपरमाणु भेदात् नीलाणुसंवेदनैः परस्परं भिन्नैः भवितव्यं...--अष्टस° पृ° ७७ । तथाहि नीले प्रवृत्तं ज्ञानं पीतादौ न प्रवर्तते इति पीतादेः सन्तानान्तरवदभावः । पीतादौ च प्रवृत्तं तन्नीले न प्रवर्तते इत्यस्याप्यभावस्तद्वत् । नीलकुवलयसूक्ष्मांशे च प्रवृत्तिमज्ज्ञानं नेतरांशनिरीक्षणे क्षममिति तदंशानामप्यभावः संविदितांशस्य चावशिष्टस्य स्वयमनंशस्याप्रतिभासनात् सर्वाभावः ।--प्रमेयक° पृ° १७ ।
१ त्योद्] द्
२ मः] त्यन्त्याः
२ नेन] परमाणूनाम् ।
३ त] एकपरमाणोः ।
३ नेति] निरंशस्य प्रतिभासाभावात् स्वयमभावः ।
४ *] यद् यथा भासते ज्ञानं तत्तथैवानुभूयते ।--प्र° वा° ३ । २२२ । तुलना--तथा यद् यथावभासते तत् तथैव सत् इत्यभ्युपगन्तव्यं यथा नीलकुवलयं नीलतयावभासमानं तेनैव रूपेण सत्, क्षणपरिगतेनैव रूपेण अवभासन्ते च सर्वे भावाः इत्यनुमानतोऽपि । [[पूर्वपक्षे]]--न्यायकुमु° पृ° ३७८ ।
४ *] तुलना--तथाहि--यदवभासते तज्ज्ञानमेव यथा सुखादि, अवभासन्ते च भावा इति । [[पूर्वपक्षे]]— न्यायकुमु° पृ° ११७ । प्रमेयक° पृ° ८३ । युक्त्यनु° टी° पृ° ४५
६ *] न परलोको नेहलोको न परलोकबाधनं [[--साधनं--पाठान्तरम्]] न सन्देहो न महाभूतपरिणतिरित्यादि विज्ञप्तिमात्रकमेव । अथापि व्यवहारादेतत्; एवं परलोकोऽपीति । यद्यद्वैतेन तोषोऽस्ति मुक्त एवासि सर्वथा । वर्तते व्यवहारश्चेत् परलोकोऽपि चिन्त्यताम् ॥ ३१८ ॥--प्र° वार्तिकाल° पृ° ५७ ।
७ ते] भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः । यस्मादेकमनेकञ्च रूपं तेषां न विद्यते ॥--प्र° वा° ३ । ४६० । यदेकानेकस्वभावं न भवति न तत्परमार्थसत् यथा व्योमकमलम् एकानेकस्वभावं च न भवति विज्ञानम् ।--तर्कभा° मो° पृ° ३८ ।
७ तिभासाऽसून्य] भासोऽशून्य
९ त्राद्य] त्र । अथ
९ ते] तच्छून्यमिष्यते ।
११ तेषां] नीलाद्याकाराणाम् ।
१२ थुमु] कथमुक्तं
१२ तेन] व्यवहारेण ।
१३ द] परलोकाद्यपि ।

स्यान्मतम्--न्यायोन्यं तदाकाराणां दर्शनं नाप्यदर्शनमिति; तदपि न सूक्तं * स्वरूपेऽपि तथा प्रसङ्गात् । तस्य दर्शनान्नेति चेत्; अन्यविविक्तदर्शने उक्तो दोषः । अथ तेन अन्यस्य अदर्शनम्; कथं तद् अन्यविविक्ततामात्म-नोऽवैति ? कथं प्रकृतिपुरुषादीनामदर्शने नीलादेस्तद्विविक्तताप्रतीतिः, कथं वा सुखादेः आत्मशून्यतावित्तिः, यतो नैरात्म्यदर्शनम् ? *तेषां दर्शने सुस्थितमद्वैतम् ! अदर्शनादेव तदभाव इति चेत्; किमिदं तददर्शनम् ? दर्शननिवृत्तिरिति; कथमप्रतीता सा अस्ति प्रकृत्यादिवत् ? नीलादिदर्शनं तददर्शनमिति चेत्; कथमन्यदर्शनम् अन्यादर्शनं विरोधात् ? अन्य-विविक्तरूपत्वाच्चेत्; प्रकृत्यादीनामदर्शने केयं *तद्विविक्तताऽस्य ? अन्यथा वीतादीनामदर्शनेऽपि नीलस्य तद्विविक्तताप्रतीतिरिति कथन्न प्रकृतो दोषः ? ननु च अनीलव्यावृत्तिर्नीलम्, अनीलाभावे कथं तद्व्यावृत्तिः, एवं पीतादौ वक्तव्यमिति चेत् ? तर्हि अस्वसंवेदनव्यावृत्तिः स्वसंवेदनं तस्याऽस्वसंवेदन-स्याभावे तदपि माभूत् । स्वरूपमेतदिति चेत्; नीलादिकमपि तथैवास्तु । तन्न नीलाद्याकारैस्तच्चित्रमिति । भवतु वा, तथापि मेचके नीलादीनामिव नीलमात्रेऽपि तद्विभागःचिन्तायां तदवस्थो दोषः । ननु यत एव चित्रैकज्ञान-/ms वन्नीलमात्रमपि न घटते तत एव तदपि परमार्थतो माभूत् मरीचिकातोय-वत् **मायामरीचिप्रतिभासवदसत्त्वेऽप्यदोषः** प्र॰ वार्तिकाल॰ ३ । २११ इति वचनादिति चेत्; आस्तां तावदेतत् । अथ नीलमात्रं स्वभागैरेकमिष्यते; तथा मेचकमपि नीलादिभिरेकमिष्यताम् । इष्यत एव **चित्रप्रतिभासाप्येकैव बुद्धिर्बाह्यचित्रविलक्षणत्वात्** प्र॰ वार्तिकाल॰ ३ । २२० इत्यादि वचनादिति चेत्; तथा सति न केवलं दृश्यप्राप्ययोः अपि तु संसारेतरावस्थयोर-विच्छेदेन कथञ्चित्तादात्म्यं सिद्धमिति साधूक्तम्--**श्रीवर्धमानम्** इति । एव-मन्येऽप्येकान्ताः प्रहन्तव्याः । निरूपयिष्यते चैतत् यथास्थानम् । § 22

इदमपरं व्याख्यानम्--**श्रियो**पलक्षितं **वर्धमानं** पश्चिमतीर्थकरम् **अभ्य-र्च्य** । कथम्भूतम् ? **सर्वज्ञम्** साक्षात्कृताशेषपदार्थं । *ननु स एव कुतः

१ न्यायोन्यं] नान्योऽन्यं
२ *] क्तं
२ त] स्वरूपस्य ।
३ तेन] स्वरूपेण ।
४ प्र] सांख्याभिमत ।
५ *] अन्येषां प्रकृतिपुरुषादीनाम् ।
६ नादेव] तेषां प्रकृतिपुरुषादीनामभावः ।
७ निवृत्तिरिति] चेत्; ।
७ सा] दर्शननिवृत्तिः ।
९ *] प्रकृत्यादिविविक्तता ।
९ ताऽस्य] नीलादेः ।
१० वी] पी
१० स्य] पीतादिविविक्तता ।
१३ स्याभावे] स्वसंवेदनमपि ।
१५ द्विभागः] ग
१५ स्थो] अभावप्रसङ्गः ।
१५ नु] प्रज्ञाकरगुप्तः प्राह ।
१६ पि] नीलमात्रमपि ।
२० इत्यादि] शक्यविवेचनं चित्रमनेकमशक्यविवेचनाश्च बुद्धेर्नीलादयः...--प्र॰ वार्तिकाल॰ ।
२१ तु] संसारमुक्तावस्थाव्यापी एक आत्मा सिद्ध इत्यर्थः ।
२५ दार्थं] र्थम्
२५ *] मीमांसकः प्राह ।

**सिद्धः स तु सर्वज्ञ इत्यपि** तत्त्वसं° श्लो° ३२३० धर्मसत्तासिद्धेर्धर्मिप्रतिपत्तिनान्तरीयकत्वादिति चेत्; अत्राह--**सर्वतत्त्वार्थस्याद्वादन्यायदेशिनम्** इति । **सर्वतत्त्वार्थदेशिनम्** इति वचनात् तत्सत्त्वमुक्तमिति गम्यते, वचनस्य वक्तृसत्त्वाऽव्यभिचारात् । न वेदेन व्यभिचारः; पक्षीकरणादिति । निरूपयिष्यते [चै] तत् । **स्याद्वादन्यायदेशिनम्** इत्यभिधानात् तत्सर्वज्ञत्वमिति च । तमभ्यर्च्य । किमिति ? अत्राह--**वक्ष्ये सि द्धि वि नि श्च य म्** । **सिद्धिः** प्रमाणम् । § 23 4/mkj

ननु सिद्धिः [प्रमाणस्य फलम्] **प्रमाणस्य फलं साक्षात् सिद्धिः** सिद्धिवि° १ । ३ इति वक्ष्यमाणत्वादत्रैव तत्कथं सा प्रमाणमिति चेत् ? एतदुत्तरत्र निरूपयिष्यते । **विशब्दः** अतिशयप्रकर्षद्वैविध्यनाना त्वेषु वर्तमानो गृह्यते । तत्र अतिशये तावत् अन्यस्यापि जीवादितत्त्वस्य **निश्चयं वक्ष्ये** सिद्धेस्तु सातिशयं वक्ष्ये । कोऽस्या[अ]तिशयः सकलप्रमेयव्यवस्थाहेतुत्वम्, यद्वक्ष्यते--**सिद्धं यन्न परापेक्ष्यम्** सिद्धिवि° १ । २४ इत्यादि । तथा प्रकर्षे; तस्याः प्रकृष्टं निश्चयं विनिश्चयं वक्ष्ये । कोऽस्य प्रकर्षः ? सौगतादिकल्पिततन्निश्चयादाधिक्यम् । तथा द्वैविध्ये; द्विविधं निश्चयं तस्या वक्ष्ये प्रत्यक्षपरोक्षभेदेन किञ्चत् स्वतः किञ्चित् परतः प्रमाणम् इत्यनेन वा भेदेन, स्वपरविषयद्वैविध्येन, व्यवहिताव्यवहितफलद्वैविध्येन वा । तथैव नानात्वे; नाना निश्चयं वक्ष्ये स्वरूपसंख्याविषयफलविप्रतिपत्तिनिरासनानात्वेन । § 24 /ms

ननु च नयादीनामपि विनिश्चयोऽत्र प्रतिपादयिष्यते तत्कथमुच्यते सिद्धेः प्रमाणस्य इति चेत्; न; तेषां श्रुतभेदेन तत्रैवान्तर्भावात् । तदुक्तम्--**उपयोगौ श्रुतस्य द्वौ प्रमाणनयभेदतः** । लघी° श्लो° ६२ न च प्रमाणस्य उपयोगोऽप्रमाणम्; विरोधात्, **प्रमाणनयैरधिगमः** त° सू° १ । ६ इत्यस्य व्याघाताच्च । प्रमाणैरधिगमवत् तर्हि वक्तव्यमिति चेत्; न; विकलादेशस्यापि *तद्भेदत्वप्रतिपादनार्थं तथावचनमित्यदोषः । ततः प्रमेयनिर्णयहेतुत्वात्

---

१ स] नरः कोऽप्यस्ति सर्वज्ञः स तु सर्वज्ञ इत्यपि । साधनं यत्प्रयुज्येत प्रतिज्ञामात्रमेव तत् ॥ श्लोकोऽयं कुमारिलनाम्ना तत्त्वसंग्रहे पृ° ८४१ किञ्चित् पाठभेदेन वर्तते । द्रष्टव्यम्--न्यायावता° वा° वृ° पृ° ५५ ।

१ ध] धर्मः सर्वज्ञत्वम् ।

३ त] सर्वज्ञत्वाधारस्य आत्मनः सत्त्वम् ।

४ वेदेन] अपौरुषेयेण ।

५ च] प्रतिपादितम् ।

९ त्रैव] दन्यैव[[भिन्नैव ।]]

९ सा] सिद्धिः ।

१४ कोऽस्य] निश्चयस्य ।

१६ ण] तुलना--प्रामाण्यं तु स्वतःसिद्धमभ्यासात् परतोऽन्यथा ।--प्रमाणप° पृ° ६३ । परीक्षामु° १ । १३ ।

१८ स्व] तुलना--चतुर्विधा चात्र विप्रतिपत्तिः संख्यालक्षणगोचरफलविषया ।--न्यायबि° १ । २ । प्रमाणसमु° टी° पृ° ४ ।

१९ योऽत्र] ग्रन्थे ।

२० भेदेन] प्रमाण एव ।

२० म्] उपयोगौ श्रुस्य द्वौ स्याद्वादनयसंज्ञितौ । स्याद्वादः सकलादेशो नयो विकलसंकथा ॥ अनेकान्तात्मकार्थकथनं स्याद्वादः...प्रमाणं स्याद्वादः ।--लघी° स्व° श्लो° ६२ ।

२३ त्] मः

२४ स्यापि] नयस्य ।

२४ *] प्रमाणभेदत्व ।

प्रमाणनयानां प्रमाणत्वे समानेऽपि सकलादेशात् नयनिवार्यमाण प्रमाणशब्दः तत्रैव प्रवर्तते उत्कलितपुंस्केषु विशेषेषु गोशब्दवत् । यद्वक्ष्यते-- § 25

/ms
*स्यात्प्रमाणात्मकत्वेऽपि प्रमाणप्रभवो नयः ।
विचारो निर्णयोपायः परीक्ष्येत्यवगम्यताम् ॥§ 27
सिद्धिवि॰ प्रस्ता॰ १० इति । § 28
5/mkj

प्रमाणाच्च नयस्य भेदैकान्ते प्र मा ण सं ग्र हा दौ **प्रमाणे इति संग्रहः** प्रमाणसं॰ श्लो॰ २ इत्यभिधाय पुनर्णयादिप्रणयनमयुक्तं तेनासंग्रहात् । ततो यथा अन्यत्र प्रमाणात् नयादिपरिग्रहः तथा अत्रापि, इति सर्वं सुस्थम् । § 29

ननु सिद्धिः अधिगतिः प्रमाणफलम्, तस्या विनिश्चयं निर्णयात्मकत्वं वक्ष्ये इति व्याख्याने को दोषः येनेदं नाश्रितमिति चेत् ? सर्वार्थसंग्रहः । एवं हि फलविप्रतिपत्तिनिरास एव संगृहीतो न सर्वान् प्रतिवादिनः प्रति स्वरूपादिविप्रतिपत्तिनिरासः, ततः पूर्वमेव व्याख्यानम् । § 30

अथ किमर्थमिदमुच्यते--**वक्ष्ये सिद्धिविनिश्चयम्** इति ? सम्बन्धाभिधेय-प्रयोजनप्रतिपादनार्थम् । तथाहि--**सिद्धि**पदेन शास्त्रस्य अभिधेयम् प्रमाणम् उक्तम् निरभिधेयाऽशक्यानानुष्ठेयाशङ्कानिवारणार्थम् । **विनिश्चयम्** इत्यनेन प्रयोजनम्, निष्प्रयोजनत्वारेकाप्रतिषेधार्थम् । शास्त्रस्य अभिधेयेन वाच्य-वाचकलक्षणः प्रयोजनेन च सह साध्यसाधनलक्षणः सम्बन्धोऽपि अर्थ-

१ य] ये
१ माण] णे
२ ब्दः] सकलादेशे एव ।
६ दौ] आदिपदेन लघीयस्त्रयन्यायविनिश्चयौ ग्राह्यौ । तथाहि--प्रत्यक्षं विशदं ज्ञानं मुख्यसंव्यवहारतः । परोक्षं शेषविज्ञानं प्रमाणे इति संग्रहः ॥--लघी॰ श्लो॰ ३ । न्यायवि॰ श्लो॰ ४६९ ।
७ युक्तं] प्रमाणेन ।
८ त्र] प्रमाणसंग्रहादौ ।
११ येनेदं] कैश्चित्कृतं व्याख्यानम् ।
१३ म्] युक्तम् ।
१४ स] सिद्धार्थं सिद्धसम्बन्धं श्रोता श्रोतुं प्रवर्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥ यावत्प्रयोजनेनास्य सम्बन्धो नाभिधीयते । असम्बद्धप्रलापित्वात् भवेत्तावदसङ्गतिः ॥ तस्माद् व्याख्याङ्गमिच्छद्भिः सहेतुः सप्रयोजनः । शास्त्रावतारसम्बन्धो वाच्यो नान्योऽस्ति निष्फलः ॥--मी॰ श्लो॰ प्रतिज्ञासू॰ श्लो॰ १७, २०, २५ । सम्बन्धाद्यनुबन्धचतुष्टयस्य व्यस्तसमस्तरूपेण चर्चा निम्नलिखितग्रन्थेषु द्रष्टव्या--माध्यमिकवृ॰ पृ॰ ३ । हेतुबि॰ टी॰ पृ॰ १ । न्यायबि॰ टी॰ पृ॰ ५ । बोधिचर्या॰ पं॰ पृ॰ ५ । वादन्यायटी॰ पृ॰ १ । तत्त्वसं॰ पं॰ पृ॰ २ । सम्बन्धवा॰ पृ॰ ७ । मा॰ गौडपा॰ शा॰ भा॰ पृ॰ ४ । न्यायवा॰ ता॰ पृ॰ ४ । न्यायम॰ पृ॰ ६ । त॰ । श्लो॰ पृ॰ ३ । न्यायकुमु॰ पृ॰ २० । प्रमेयक॰ पृ॰ २ । सन्मति॰ टी॰ पृ॰ २६९ । शास्त्रदी॰ पृ॰ ४ । स्या॰ रत्ना॰ पृ॰ १४ । जैनतर्कवा॰ पृ॰ ११ । रत्नाकराव॰ पृ॰ ५ ।
१६ म्] अनुक्तेषु तु प्रतिपत्तृभिः निष्प्रयोजनमभिधेयं संभाव्येतास्य प्रकरणस्य काकदन्तपरीक्षाया इव । अशक्यानुष्ठानं वा ज्वरहरतक्षकचूडारत्नालङ्कारोपदेशवत्, अनभिमतं वा प्रयोजनं मातृविवाहक्रमोपदेशवत् ।--न्यायबि॰ टी॰ पृ॰ १४ ।

तोऽनेनोक्तो वेदितव्यः । तथावदसदादिमादिवाक्यसमताचोद्यं निरस्तम् । ननु शास्त्रवद् अभिधेयस्यापि प्रयोजनं पृथगेव वक्तव्यम् काकदन्तवद-प्रयोजनाशङ्कानिषेधार्थं यथा अन्यत्रोक्तम्--**प्रमाणाधीनत्वात् प्रमेयव्यवस्थायाः तद्व्युत्पादनार्थमिदमुच्यते** इति चेत्; न; सिद्धिशब्देनैव तदप्युक्तम् । य-स्मादयं प्रमाणफलवाचिनं सिद्धिशब्दमुपचारात् प्रवर्तयति तस्मादुक्तमेव /ms फलम्, मुख्यादृते उपचारा[भावा] दिति । § 31

किमर्थमादौ अभिधेयादिकमुच्यते इति चेत् ? श्रोतृप्रवृत्त्यर्थम् । ***कृषीवलादिवत् अर्थसन्देहात् प्रेक्षापूर्वकारिणोऽपि तद्वाक्यात् प्रवर्त्तन्ते** 6/mkj इत्येके । **सन्देहात् प्रवृत्तौ किमन्यत्रापि प्रमाणान्वेषणेन** इति प्र ज्ञा क र गु प्तः । **तद्वाक्याद् अभिधेयादौ श्रद्धाकुतूहलोत्पादः, ततः प्रवृत्तिः** इति केचित् स्वयूथ्याः । तान् प्रति अपरे प्राहुः--यदि न तद्वचनं प्रमाणम्; कथं ततः श्रद्धाद्युत्पादेऽपि प्रेक्षावतां प्रवृत्तिः ? इतरथा यतः कुतश्चित् स्यात् । प्रमाणं चेत्; न तत् प्रत्यक्षम्, वचनत्वात् । नाप्यनुमानम्; वचनस्य अर्थाप्रतिबन्धात् । अत एव नाऽऽगमोऽपि । तत्र ततः प्रवृत्तिरिति; तत्र प्रत्यक्षवत् शब्दस्यापि प्रमाणत्वोपपत्तेर्वक्ष्यमाणत्वाददोषः । § 32

---

१ दादिमादि] तथा च दशदाडिमादि
१ वाक्य] तस्मात् प्रयोजनरहितं वाक्यं तदर्थो वा न तत् प्रेक्षावता आरभ्यते कर्तुं प्रतिपादयितुं वा, तद्यथा दशदाडिमादिवाक्यम् ।--हेतुबि° टी° पृ° २ ।
३ प्र] तुलना--प्रमेयसिद्धिः प्रमाणाद्धि--सांख्यका° ४ । उक्तं च प्रमाणाधीनो हि प्रमेयाधिगमः--प्र° वार्तिकाल° पृ° ३४० ।
५ माणा] ण
७ म्] तस्मात् श्रोतृजनप्रवृत्त्यर्थः प्रयोजनादिवाक्योपन्यासः इति स्थितम् ।--तत्त्वसं° प° पृ° ६ । तच्च श्रोतृजनप्रवृत्त्यर्थमिति केचित्--हेतुबि° टी° पृ° १ । तच्च श्रोतृप्रवृत्त्यर्थमिति कश्चित् न्यायावता° वा° वृ° पृ° १ ।
८ *] संशयेनापि प्रवृत्तिदर्शनात् यथा कृषीवलादीनाम्--तत्त्वसं° प° पृ° ६ ।
९ इत्येके] धर्मोत्तरादयः । अश्रुते प्रकरणे कथितान्यपि न निश्चीयन्ते । उक्तेषु त्वप्रमाणकेष्वप्यभिधेयादिषु संशय उत्पद्यते । संशयाच्च प्रवर्तन्ते । अर्थसंशयोऽपि हि प्रवृत्त्यङ्गं प्रेक्षावताम् ।--न्यायबि° टी° पृ° २ । आदिवाक्यादेव श्रोतुः शास्त्रप्रयोजनपरिज्ञानमर्थसंशयाच्च श्रवणे प्रवृत्तिः ।--न्यायम° पृ° ६ ।
१० प्तः] उपेयार्थितया सर्वः प्रवर्तननिवर्तने । करोति पुरुषस्तस्य सन्देहश्चेत् कथं प्रमा ॥... ...तत उपायनिश्चये सति कृषीवलादिवत् प्रामाणिकाः प्रवर्त्तन्ताम् ।(?")--प्र° वार्तिकाल° पृ° २६ ।
११ यूथ्याः] तुलना--श्रद्धाकुतूहलोत्पादनार्थं तदित्येके; तदप्यनेनैव निरस्तम्; तस्य प्र-माणत्वाप्रमाणत्वपक्षयोस्तदुत्पादकत्वाऽयोगात् । --त° श्लो° पृ° ४ ।
११ अ] तुलना--यच्च श्रोतुः प्रवृत्त्यङ्गं श्रद्धाद्युत्पादनं बुद्धेः । व्यावर्णितमसन्दिग्धमादिवाक्यप्रयोजनम् ॥ तदप्याप्तोक्तितश्चेत्स्यात् वाक्यमेतद् वृथा भवेत् । आप्ताज्ञयैव श्रद्धादेः संभवादादिवाक्यवत् ॥ अन्यथा ह्यादिवाक्येऽपि श्रद्धाद्युत्पत्तिकारणम् । वाक्यान्तरं प्रतीक्ष्यं स्यादनवस्थानदुःखदम् ॥ अनाप्तवचनत्वेऽस्य बालोन्मत्तादिवाक्यवत् । श्रद्धाकुतूहलोत्पत्तिरतः संभाव्यते कथम् ॥--न्यायवि° वि° प्र° पृ° ५५ ।
१४ त्र] तन्न;

अथवा, शास्त्रार्थस्य संग्रहवाक्यमेतत्, अस्मान्निबन्धनस्थानादत्वा आदाय व्याख्यायन्त इति । § 33

तत्र स्वरूपनिश्चयं प्रमाणस्य तावत् दर्शयन्नाह--**सिद्धिश्चेत्** इत्यादि । § 34

…2 सिद्धिश्चेदुपलब्धिमात्रमविसंवादैकहेतोर्विना,
निर्णीतेः क्षणिकादिसिद्धिरनुमा न स्यात् स्वयं सर्वथा ।
निर्णीतिर्यदि निर्विकल्पमखिलं न स्यात् प्रमाणं स्वतः,
तस्याश्चेज्जननात् प्रमाणमत एवास्तु स्वतो निर्णयः ॥ २ ॥§ 38

**सिद्धिः** प्रमाणं तत्र फलोपचारात्, कथञ्चित्तादात्म्यनिबन्धनस्वप्रमाणफलयोरुपचारः । तयोस्तर्हि कथञ्चित्तन्वित् कदाचित् प्रमाणेन फलं कदाचित् फलेन वा प्रमाणं वायदिस्यते यथा मृद्धटयोः तथातत्वे मृदियं घटः घट वा मृदिति । किमर्थः स इति चेत् ? अन्यमतएवप्रतिषेधार्थः । अन्येषां हि
7/mkj दर्शनं फलात् स्वपरग्रहणलक्षणाद् अन्यदेव अचेतनं सन्निकर्षादि प्रमाणम् इति, तन्निषेधार्थः । तथाहि--न प्रमाणं सन्निकर्षादि अचेतनत्वात् घटादिवत्
/ms । न प्रदी पादिना व्यभिचारः; तस्यापि पक्षीकरणात् । अथ अव्यपदेश्याव्यभिचारिव्यवसायात्मकघटादिज्ञानहेतुत्वात् प्रमाणं प्रदीपादिः; तन्न

१ शा] तुलना--स चायं शास्त्रार्थसंग्रहोऽनूद्यते नापूर्वो विधीयते इति ।--न्यायभा० ४ । २ । १ । अत एव शास्त्रार्थप्रतिज्ञाप्रतिपादनपरः आदिवाक्योपन्यासः इत्याद्यपि प्रतिक्षिप्तम्--सन्मति० टी० पृ० १७२ । स्या० रत्ना० पृ० १९ ।
१ न] अस्मात् खलु अर्था आदाय आदाय व्याख्यायन्ते ।--हेतुबि० टीकालो० पृ० २४३ ।
१ त्वा] स्थानादर्था
८ स्व] श्व
९ न्वित्] कथञ्चित्तदिति
१० ते] चापदिश्यते
१० त्वे] कथञ्चित्तादात्म्ये ।
१० ट] घटो
११ स] उपचारः ।
११ ति] मतप्रति
११ अ] नैयायिकादीनाम् । अक्षस्य अक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम् । वृत्तिस्तु सन्निकर्षो ज्ञानं वा । यदा सन्निकर्षः तदा ज्ञानं प्रमितिः, वदा ज्ञानं तदा हानोपादानबुद्धयः फलम् ।--न्यायभा० १ । १ । ३ । इन्द्रियार्थसन्निकर्षस्य करणभावान्नाऽकरणा प्रमाणोत्पत्तिः ।--न्यायवा० पृ० ६ ।
१३ न] सन्निकर्षादिरज्ञानस्य प्रामाण्यमनुपपन्नमर्थान्तरवत्--लघी० स्व० १ । ३ । ज्ञानं प्रमाणं नाज्ञानमिन्द्रियार्थसन्निकर्षादि ।--प्र० वा० मनोरथ० पृ० ३ ।
१४ अथ] तस्मात् कर्तृकर्मव्यतिरिक्तमव्यभिचारादिविशेषणकार्थप्रमाजनकं कारकं करणमुच्यते, तदेव च तृतीयया व्यपदिशन्ति दीपेन पश्यामि चक्षुषा निरीक्षे लिङ्गेन बुध्ये शब्देन जानामि मनसा निश्चिनोमि इति ।--न्यायम० पृ० १४ ।

युक्तम्; प्रामाण्यवत् प्रदीपादीनां तत्ज्ञानहेतुत्वस्यापि परं प्रत्यसिद्धेः । न घटादिज्ञानस्य हेतुः प्रदीपादिः, तत्परिच्छेद्यत्वात्, यद् यस्य परिच्छेद्यं न तत् तस्य जनकं यथा ईश्वरज्ञानस्य परिच्छेद्यः सदसद्वर्गो न तज्जनकः, घटज्ञानपरिच्छेद्यश्च प्रदीपादिः, घटेन सहैवैकस्मिन् विज्ञाने तस्य प्रतिभासनात् । अथ ईश्वरज्ञानं चेन्न विषयेण जन्यते, अन्यथा तेन तत्परिच्छेदायोगात्; न तर्हि तत्सहभाविनां तेन ग्रहणम् अकारणत्वात्, तथा च **सर्वः सदसद्वर्गः कस्यचिद् एकप्रत्यक्षविषयः अनेकत्वाद् अङ्गुलिसमूहवत्** इति व्याहन्यते । अजनकानामपि तेषां तेन ग्रहणं नान्येषाम् इति किंकृतो विभागः ? ननु च प्रदीपादेर्घटज्ञानं प्रत्यकारणत्वे तदभावेऽपि तत् स्यादिति चेत्; दृष्टत्वाददोषः । दृष्टं खलु केषाञ्चिद्व्रातिशेषाणाम् अञ्जनादिसंस्कृतलोचनानां वा तदभावेऽपि रूपज्ञानम् । न च यदभावेऽपि यद् भवति तत्तस्य कार्यम् अतिप्रसङ्गात् । निराकरिष्यते च चक्षुषः तैजसत्वम् । यदि च प्रदीपाद्यभावे न रूपज्ञानम्; कथं तर्हि तमःपटलावलोकनम् ? *ज्ञानानुत्पत्तिरेव तमो [ना]न्यदिति चेत्; आस्तां तावदेतत् । § 39

स्मान्मतम्--यदा दीपाद्यभावेऽपि रूपज्ञानं तदा अस्य अन्यत् कारणमस्तु, यदा तु दीपादिभावे तदा तदेव, अन्यथा सत्यस्वप्ने चक्षुषोऽभावेऽपि तज्ज्ञानं, दृष्टमिति सर्वदा तद कारणम् अतीन्द्रिय इति, **इन्द्रिय मनसी** /ms
**तत्कारणम्** लघी॰ स्व॰ श्लो॰ ५४ **अतीन्द्रियप्रत्यक्षम्** लघी॰ स्व॰ श्लो॰

१ त] तज्
१ प] जैनं प्रति ।
१ न] आलोकोऽपि न कारणं परिच्छेद्यत्वादर्थवत् ।--लघी॰ स्व॰ श्लो॰ ५५ । परीक्षामु॰ २ । ६ । प्रमाणमी॰ १ । १ । २५ ।
४ विज्ञाने] प्रदीपितोऽयं घट इत्याकारकविज्ञाने ।
४ स्य] प्रदीपस्य ।
५ चेन्न] चेन्न इति पदं व्यर्थमत्र ।
५ तेन] ईश्वरज्ञानेन ।
५ त] विषयपरिच्छेदायोगात् ।
६ तेन] ईश्वरज्ञानेन ।
६ त्वात्] समसमयवर्तिनां कार्यकारणभावाऽभावात् ।
७ इति] तुलना--सदसद्वर्गः कस्यचिदेकज्ञानालम्बनोऽनेकत्वात् पञ्चाङ्गुलवत् इत्यत्र... ...(?")--प्रमेयक॰ पृ॰ १४२ । सन्मति॰ टी॰ पृ॰ ४७७ ।
८ पि] सहभाविनामपि ।
८ तेन] ईश्वरज्ञानेन ।
८ नान्येषाम्] खरविषाणादीनाम् ।
९ त्वे] प्रदीपाभावेऽपि ।
१० केषाञ्चिद्व्राति] त्प्राणिवि
१० शेषाणाम्] मार्जारादीनाम् ।
११ वा] प्रदीपाद्यभावेऽपि ।
१३ म्] नहि तमः चक्षुर्ज्ञानप्रतिषेधकं तमोविज्ञानाभावप्रङ्गात् ।--लघी॰ स्व॰ श्लो॰ ५६ ।
१३ *] तमसो निष्पत्त्यनभिक्लृप्तेः । रूपवत्त्वेन हि तमो द्रव्यं स्यात्, तच्चानेकद्रव्यारब्धं सच्चाक्षुषं भवेत् । न च द्रव्याणि सन्ति, सन्ति चेद्दिवाप्यारभेरन् अन्धानामिव नीलिमाभिमानः नभस एवेत्युक्तम् । --प्रक॰ प॰ पृ॰ १४३ । तन्त्रह॰ पृ॰ २१ । आलोकज्ञानाभावस्तम इति प्रभाकराः परिभावयन्ति । प्रम॰ सेतु॰ पृ॰ ४२ । न्यायकुमु॰ पृ॰ ६६३ ।
१७ क्षुषोऽभावेऽपि] रूपज्ञानम् ।
१७ दा] चक्षुः ।
१७ इन्द्रिय] ततः सुभाषितम्--इन्द्रियमनसी कारणं विज्ञानस्य अर्थो विषयः ।--लघी॰ स्व॰ श्लो॰ ५४ ।

६१ इति च विरुध्यते इति; तदपि न सारम्; यदि खलु घटादिना सह दृश्यमानोऽपि दीपादिः तज्ज्ञानस्य हेतुः, तर्हि घटादिरपि प्रदीपादिज्ञान- 8/mkj हेतुरिति चक्षुरिव रूपप्रकाशनात् तैजसः स्यात् । प्रत्यक्षादिबाधनमन्यत्रापि । यदि पुनः केवलोऽपि प्रदीपादिः समुपलभ्यते इति न घटादिः तज्ज्ञान-हेतुः; प्रदीपादिरपि घटादिज्ञानस्य हेतुर्न स्यात् तस्यापि केवलस्य उपलम्भ इत्युक्तम् । यथैव च केषाञ्चित् प्रदीपाद्यालोकमन्तरेण न घटादिरूपज्ञानं तथा केषाञ्चिन्नक्तञ्चराणाम् अन्धकारमन्तरेणापि न तज्ज्ञानमिति तदपि त-द्धेतुरिति **तैजसं चक्षुः रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपवत्** । प्र० व्यो० पृ० २५६ इत्यस्य अनेन व्यभिचारः । अथ [न] अन्धकारः तद्धेतुः; आलोकोऽपि न भवेदिति प्रदीपवत् इत्यस्य निदर्शनस्य साधन-शून्यता । तन्न प्रदीपादिना व्यभिचारः । ननु न वेदनत्वेन प्रामाण्यं व्याप्तं येन तदभावे न भवेत्, अपि तु यथार्थज्ञान[जन]कत्वेन । तच्च प्रदीपादिप-रिहारेण सन्निकर्षादावस्तीति स प्रमाणमस्तु इति चेत्; न; सन्निकर्षस्य ज्ञानं प्रति हेतुत्वस्य निषेत्स्यमानत्वात् । केवलमिन्द्रियमवशिष्यते । तदपि न प्रमाणम्; तद्धेतुत्वेऽपि विचेतनत्वात् घटादिवदिति चर्चितं प्र मा ण सं ग्र ह भा ष्ये । ततः प्रमाणे फलोपचारः ततो भिन्नप्रमाणनिषेधव्य इति सूक्तम् । § 40

/ms ततः **सिद्धिः** प्रमाणम् । **चेत्** यदि । किं तत् ? इत्याह--**उपलब्धि मात्रम्** इति । उपलभ्यते अनया वस्तुतत्त्वमिति उपलब्धिः अर्थादुत्पन्ना तदाकारा च बुद्धिः सैव तन्मात्रम् । कथं तत्प्रमाणमिति ? अत्राह--**अविसंवादैकहेतोः** इत्यादि । अविसंवादः अर्थतथाभावः तस्य एकः प्रधानभूतः एकसंख्यायुक्तो वा हेतुः कारणं या **निर्णीतिः** यथार्थो विकल्पः तस्या **विना** तामन्तरेण । एतदुक्तं भवति--तदकिञ्चित्करं संशयकरं विपर्ययकरं यथार्थनिर्णयकरं चेति चत्वारः पक्षाः । तत्र उत्तरपक्षे **तस्याश्चेज्जननात्** इत्यादिदूषणमभिधास्यते इति । अन्यत्र पक्षत्रये **यदि प्रमाणमि**ति । तत्र दूषणमाह--**क्षणिकादिसिद्धिः** इत्यादि । क्षणिक इति भावप्रधानो निर्देशः । ततः क्षणिकत्वम् आदिर्य-स्य ज्ञानत्वादेः साधनादभिन्नस्य तत्तथोक्तम्, तस्य सिद्धिः प्रमाणम् **अनुमा**

१ इति] अतीन्द्रियप्रत्यक्षं पुनः व्यवसायात्मकं स्फुटमवितथमतीन्द्रियमव्यवधानं लोकोत्तरमात्मार्थविषयम् ।--लघी० स्व० श्लो० ६१ ।
४ त] प्रदीपादिज्ञानहेतुः ।
५ पि] घटस्यापि ।
५ म्भ] म्भात्
७ पि] तमोऽपि ।
९ द्ध] तच्च तैजसं रूपादिषु मध्ये नियमेन रूपव्यञ्जकत्वात् । यद्यत् रूपादिषु मध्ये नियमेन रूपव्यञ्जकं तत्तैजसं यथा प्रदीपम्, तथा च रूपादिषु मध्ये नियमेन रूपव्यञ्जकं चक्षुः तस्मात्तैजसमिति ।--प्रश० व्यो० पृ० २५६ । तैजसत्वं तु तस्य रूपादिषु मध्ये नियमेन रूपस्यैवाभिव्यञ्जकत्वात् प्रदीपवत् ।--प्रश० कन्द० पृ० ४० । प्रश० किरणा० पृ० ७३ । वैशे० उप० पृ० १२८ ।
११ त्वेन] ज्ञानत्वेन ।
१५ द्धेतुत्वेऽपि] तेषामिन्द्रियाणां ज्ञानहेतुत्वेऽपि ।
१५ त्वात्] विगतचेतनत्वात्, अचेतनत्वादित्यर्थः ।
१६ व्य] धार्थः

अनुमानं **न स्यात्** तत्साधकं न भवेत्, प्रत्यक्षमेव स्यात् नीलादिवत्तस्यापि तत एव प्रतीतेः सर्वथा सारूप्यात् । कस्य ? इत्यत्राह--**स्वयम्** आत्मनो बौद्धस्य । *तत्र समारोपव्यवच्छेदकरणात् स्यादिति चेत्; अत्राह--[सर्वथा] सर्वेण क्षणिकादिसाधनप्रकारेण वा अन्येनापि समारोपव्यवच्छेदप्रकारेणापि **न स्यात्** इति सम्बन्धः । कुतः ? *तदव्यवच्छेदकत्वात् । तथाहि--न समारोपव्यवच्छेदकृद् अनुमानम् अविकल्पकत्वात् प्रत्यक्षवत् । अविकल्पकत्वं च ***सर्वचित्तचैत्तानाम् आत्मसंवेद[नं]प्रत्यक्षमविकल्पकम्** न्यायबि० १ । १० इत्यभिधानात् । अथैतन्नेष्यते तर्हि तद्वत् सर्वचेतसाम् आत्मसंवेदनं सविकल्पकं भवेत् । तत्र दूषणं वक्ष्यते--**निर्णीतिर्यदि** इत्यादि । § 41

9/mkj, /ms

ननु च अभ्यासदशायां भाविनि प्रवर्तकं प्रत्यक्षमविकल्पकमपि समारोपव्यवच्छेदकम्, अतोऽनैकान्तिको हेतुरिति चेत्; न; तदा नीलादौ स्वयमेव तदभावात् । क्षणक्षयादौ तु साऽस्त्येव कथमन्यथा प्रत्यक्षमविसंवादि तदा स्यादिति यत्किञ्चिदेतत् । § 42

ननु भवतु स्वरूपे तन्निर्विकल्पकम् अर्थे तु विकल्पकम्, अतो भावासिद्धो हेतुरिति चेत्; किं पुनस्तस्य तात्त्विकं रूपद्वयमस्ति ? तथा चेत्; तद्वत् क्रमेणापि एकस्य रूपद्वयसंभवात् न क्षणिकज्ञानं नीत्वादिज्ञानवत् समारोप इति कथं तद्व्यवच्छेदकरणात् तत्प्रमाणम् ? अथ कल्पितं तत्र तस्य सविकल्पकं रूपम्; सुस्थितं तर्हि भागासिद्धत्वम्, कृतकत्वस्याप्येवं भागासिद्धत्वप्रसङ्गात्, वेदे कल्पनया अकृतकत्वस्य भावात् शब्दमात्रस्य अनित्यत्वसाधने । कथं वा तत् कल्पितं समारोपं व्यवच्छिन्द्यात् ? नहि माणवके अग्नित्वं कल्पितं शीतं व्यवच्छिनत्ति । तद्व्यवच्छेदोऽपि तादृश एवेति चेत्; ततः तत्प्रमाणत्वमपि तादृशं प्रसक्तमिति कुतः परस्य तत्त्वव्यवस्था ? प्रतिभासाद्वैतस्य तत एव [सिद्धिरिति] चेत्; तिष्ठतु तावदेतत् । ततोऽनुमानगतसविकल्पकस्वभावात् तद्व्यवच्छेदम् इत्यता स तात्त्विकोऽभ्युपगन्तव्य इति स एव दोषः समारोपाभावलक्षणः । वक्ष्यते च--**प्रतिभासैक्यनियमे** सिद्धिवि० १ । ११ इत्यादि । § 43

१ स्यापि] क्षणिकत्वस्यापि ।
२ त] प्रत्यक्षादेव ।
३ *] नीलादौ ।
५ *] समारोपाऽव्यवच्छेदकत्वात् ।
७ *] चित्तमर्थमात्रग्राहि, चैत्ता विशेषावस्थाग्राहिणः सुखादयः... ...नास्ति सा काचित् चित्तावस्था यस्यामात्मनः संवेदनं प्रत्यक्षं न स्यात् ।--न्यायबि० टी० पृ० ६४ ।
१३ भावात्] समारोपव्यवच्छेदाभावात्
१३ सा] अभ्यासावस्था ।
१५ त] अनुमानम् ।
१६ भावा] भागा
१७ ए] आत्मादेः ।
१७ ज्ञानं] ने
१७ नीत्वा] ला
१८ स] नित्यत्वादिसमारोपः ।
१९ त्र] अर्थरूपे अनुमानस्य ।
२१ त] अनुमानम् ।
२३ स्य] बौद्धस्य ।
२५ त] समारोपव्यवच्छेदम् ।
२५ ता] इच्छता

/ms भवतु वा अनुमानं कीदृशमपि तथापि नातः समारोपनाशः; *तस्याऽहेतुत्वोपगमात् । अथ अनुमानसन्निधानात् पूर्वसमारोपक्षणस्य उत्तरसमारोपोत्पादने असमर्थस्य भावात् पूर्वस्य स्वयमेव तत्क्षणस्य नाशाद् उत्तरस्य कारणाभावेन अनुत्पादात् एवमुच्यते--अनुमानेन समारोपो नाशितः इति प्रदीपेनेव तमः; तर्हि कुतश्चिद्देशसन्निधानात् यथार्थसुत्त्यादिविकल्पे सति पूर्वपूर्वरजतादिसमारोपक्षणानाम् उत्तरोत्तरतत्क्षणोत्पादने असमर्थानामुदयात् तथा स प्रमाणं किन्न स्यात् यतो द्वे एव प्रमाणे स्याताम् ? तदुक्तम्-- § 44

*समारोपव्यवच्छेदान्नन्वस्त्यधिगतेरपि ।
तत्पृष्ठभाविनो युक्ता विकल्पस्य प्रमाणतां ॥ इति ।§ 46

तन्न समारोपव्यवच्छेदादनुमानं प्रमाणम् । दर्शनानिर्णीतार्थनिर्णयात् स्यादिति चेत्; अत्राह--**निर्णीतिर्यदि** इत्यादि । अस्यायमर्थः--अनुमान दर्शनानिर्णीतक्षणिकादिनिर्णीतेर्यतस्ततो **यदि** चेत् क्षणिकादिसिद्धिरिति सम्बन्धः । अत्र दूषणमाह--**निर्विकल्पम्** इत्यादि । **निर्विकल्पम्** अविकल्पकं दर्शन**मखिलं** चतुर्विधमपि **न स्यात्** न भवेत् प्रमाणम् **स्वतो** बौद्धस्य । 10/mkj अत्रायमभिप्रायः--यथा दत्तेनानिर्णीतस्य क्षणिकादिनिर्णयात् तत्र अनुमानं प्रमाणं न दर्शनं तथा तेन अनिर्णीतस्य नीलादेर्निर्णयात्तत्र विकल्प एव तत्पृष्ठभावी प्रमाणं स्यात् न दर्शनमिति सौगतामाम् उपलब्धिमात्रं चेत् प्रमाणम् क्षणिकाद्यनुमानं न स्यात् अर्थनिर्णीति[ः] निर्विकल्पमखिलं न /ms भवे दितीतः सरदतः पाश इति प्राप्तम् । § 47

ननु **यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता** इति नीलादिक्षणिकादिविकल्पानुमानजननात् प्रमाणमविकल्पकमिति ध र्मो त्त र- प्र ज्ञा क र गु प्तौ; तत्राह--**तस्याश्चेत्** इत्यादि । तस्याः विकल्पानुमानयोर्निर्णीते**श्चेत्** यदि

---

१ *] नाशस्य निर्हेतुकत्वस्वीकरात् ।
३ मेव] समारोपक्षणस्य ।
४ नाशाद्] समारोपस्य ।
५ सु] शु
७ स] शुक्त्यादिविकल्पः ।
१२ अनुमान] नात्
१५ च] इन्द्रियमानसस्वसंवेदनयोगिप्रत्यक्षलक्षणम् ।
१६ त्तेना] दर्शनेना
१६ णिकादिनि] देर्नि
१७ तेन] दर्शनेन ।
१७ त्र] नीलादौ ।
२० तः] सर इतः
२१ य] यस्मिन् नीलाद्यंशे ।
२१ येदेनां] विकल्पबुद्धिम् ।
२१ त्रैवास्य] निर्विकल्पस्य ।
उद्धृतोऽयम्--प्रमेयक० पृ० ३५ । सन्मति० टी० पृ० ५१२ । न्यायवि० वि० प्र० पृ० ५२३ । शास्त्रवा० टी० पृ० १५१ ।
२२ ध] तस्मादध्यवसायं कुर्वदेव प्रत्यक्षं प्रमाणं भवति ।--न्यायबि० टी० १ । २१ ।
२२ प्र] प्रत्यक्षं सन्निहितरूपादिमात्रग्राहि विकल्पान्तरेणैकत्वाध्यवसाये सति प्रवर्तकम्--प्र० वार्तिकाल० पृ० २१६ । तुलना--अविकल्पमपि ज्ञानं विकल्पोत्पत्तिशक्तिमत् । निःशेपव्यवहाराङ्गं तद्द्वारेण भवत्यतः ॥--तत्त्वसं० श्लो० १३०६ ।

**जननात्** प्रमाणम् अविकल्पकम् इति सम्बन्धः । **अत एव** यत एव निर्णीतिजननादविकल्पमपि प्रमाणं न स्वतः **अतो**ऽस्मादेव कारणाद् **अस्तु** भवतु **स्वत** आत्मैव **निर्णयो** विकल्पः अनुमानाख्यः, यद्बलाद् दर्शनस्य प्रमाणता वरं तस्यैव सास्तु इति भावः । § 48

अथवा अनभ्यासे दृश्यरूपलिङ्गक्षमनुमानं प्राप्ये रूपादौ अभ्यासे निर्विकल्पकमध्यक्षम्, न चान्या दशाऽस्ति यस्यां विकल्पः प्रमाणं स्यात्, स एव चेष्यते जैनैः, तत्कथमुच्यते--**वक्ष्ये सिद्धिविनिश्चयम्** सिद्धिवि° १ । १ अस्यामाशङ्कायामाह--**सिद्धिश्चेद्** इत्यादि । अस्यायमर्थः--**सिद्धिः** प्रमाणं **चेत्** यदि **उपलब्धिमात्रं** पूर्वापराकारशून्यं मध्यदर्शनमात्रम् उपलब्धिमात्रम् । अत्र दूषणमाह--**क्षणिकादिसिद्धिः** इत्यादि । क्षणिकग्रहणं साधनादभिन्नसाध्यलक्षणम्, आदिशब्देन अग्न्यादीनां परिग्रहः, तेषां **सिद्धिः** प्रमाणम् **अनुमानंस्यात्**--नोत्पद्येत **स्वयम्** आत्मनैव गृहीतग्राहित्वेन । एतदुक्तं भवति--**यथा दृश्यप्राप्ययोर्भेदः तथा दृश्यस्य दर्शनस्य च प्रत्यवयवं भेदात् न कस्यचिद्दर्शनम्** इत्युक्तं प्र मा ण सं ग्र हा ल ङ्का रे । तथा पक्षाद्यभावान्नानुमानमिति नाभ्यास्योयतः तत्र प्रत्यक्षं प्रमाणम्, अनुमानस्यैव अभ्यासोपगमात् । संवृत्या स्यादिति चेत् अत्राह--**सर्वथा** परमार्थप्रकारेणेव संवृतिप्रकारेणापि न स्यात् कस्यचिदत्रभवस्याभावे /ms संवृतिविकल्पाभावात् *तत्पूर्वकत्वादस्य । कदामानं स्यात् ? इत्यत्राह--**विना निर्णीतेः** स्थूलैकसादृश्यदर्शनं निर्णीतिः तामन्तरेण । कथंभूतायाः ? इत्यत्राह--**अविसंवादैकहेतोः** इति । पक्षहेतुदृष्टान्तानां याथात्म्येन प्रतिपत्तिरविसंवादः, तस्य एकहेतोः पक्षादिप्रतिपत्तेर्विकल्पात्मकत्वादिति भावः । भवतु दृश्यस्य सभेदस्य ग्रहणात् तत्र सविकल्पकं दर्शनं प्रमाणं न पूर्वापरको ट्योरिति चेत्; अत्राह--**निर्णीतिर्यदि** इत्यादि मध्यक्षणस्य सभेदस्य 11/mkj ग्रहणात् तत्र निर्णीतिः सविकल्पकं दर्शनं यदि प्रमाणम्; अत्र दूषणम्--**अविकल्पमखिलम्** अभ्यासजमपि न केवलमन्यत् **स्याद्** भवेत् **अप्रमाणं स्वतो बौद्धस्य** अक्रमेणैव क्रमेणापि सभेदभावंभवाद् इति भावः । ननु च स्वरूपे पररूपे वा अक्रमेण क्रमेण[वा]स्वलक्षणदर्शनमविकल्पकम्, त-

---

३ अनुमानाख्यः] प्रमाणम् ।
४ त] विकल्पस्यैव ।
५ वा] यत्र भाविगतिस्तत्रानुमानं मानमिष्यते । वर्तमानेऽतिमात्रेण वृत्तावध्यक्षमानता ॥--प्र° वार्तिकाल° पृ° २१८ ।
५ म] जम
५ रूपादौ] प्रमाणम् ।
१२ नं] न
१५ नाभ्यास्यो] सो
१५ त्र] अभ्यासे ।
१६ संवृत्या] कल्पनया । प्रमाणमन्तरेण प्रतीत्यभिमानमात्रं संवृतिः--प्र° वार्तिकाल° ३ । ५ । असद्रूपपदार्थालम्बना हि संवृतिः तत्त्वसंवरणात् ।--प्र° वार्तिकाल° पृ° २०३ ।
१७ त्र] दनु
१८ *] अनुभवपूर्वकत्वात् ।
१८ स्य] संवृतिविकल्पस्य ।
१८ दामानं] कदाऽनुमा न
२६ मेणैव] णेव
२६ वाद्] अभेदसंभवात्

त्पृष्ठभाविनी तु विकल्पबुद्धिः अनुमानादिव्यवहारमारचयति, तद्वशात् तत् प्रमाणमिति चेत्; अत्राह--**तस्याश्चेद्** इत्यादि । गतार्थमेतत् । § 49

अथचेत्कमिदम् अवतार्य एवं व्याख्येयम्--अप्रमाणव्यवच्छेदत्वं प्रमाणलक्षणमुच्यते । न च व्यवच्छेद्यमप्रमाणमस्ति । द्विचन्द्रादिदर्शनमस्तीति चेत्; कुतस्तदप्रमाणम् ? बाध्यमानत्वात्; न; सर्वथा तदयोगादिति, जाग्रद्दर्शनवद् द्विचन्द्रादिदर्शनमपि प्रणं * न वा किञ्चिदिति व्यवच्छेद्याभावात् /ms **वक्ष्ये सिद्धिविनिश्चयम्** इत्यन- र्थकमिति चेत्; अत्राह--**सिद्धिश्चेद्** इत्यादि । **सिद्धिः** प्रमाणं **चेद्** यदि **उपलब्धिमात्रम्** बुद्धिसामान्यम् । कथं तत् प्रमाणम् ? इत्याह--**अविसंवादैकहेतोः** इत्यादि । गतार्थमेतदपि । इदमत्र तात्पर्यम्--अविसंवादिनी बुद्धिः प्रमाणं नान्या इति विभागमनपेक्ष्य तन्मात्रं यदि प्रमाणमिति; अत्र दूषणमाह--**क्षणिकादिसिद्धिः** इत्यादि । क्षणिक आदिर्यस्य पराभ्युपगततत्त्वस्य तत्तथोक्तम् तस्य सिद्धिः तत्सम्बन्धनीयं प्रमाणमनुमानं स्यात् । अयमभिप्रायः--यदि ज्ञानमात्रं प्रमाणं तर्हि नीलादाविव स्थूलादावपि प्रत्यभिज्ञानादि प्रमाणमिति तेन बाधितविषयत्वात् शब्दादौ क्षणिकाद्यनुमान प्रमाणम् । न च एकत्र परस्य अनेकप्रमाणम् अर्थवत्, अनभ्युपगमात् । अथ बाध्यमानत्वान्न स्थूलादिज्ञानं प्रमाणम्; तर्हि अबाधितं ज्ञानं प्रमाणयितव्यम्, न सर्वम् । तथा चेत्; अत्राह--**निर्णीतिर्यदि** इत्यादि । अबाधिता प्रतीतिः **अविसंवादैकहेतुः निर्णीतिर्यदि** प्रमाणम् **निर्विकल्पं** विकल्पात् निर्णीतिभेदान्निष्क्रान्त संवेदनमात्रम् **अखिलं** निरवशेषं **न स्यात् प्रमाणं स्वतो** बौद्धस्य किन्तु संवेदनविशेषः स्यादिति प्रतिज्ञाहानिः तस्य । § 50

अत्राह वैशेषिकादिः--न निर्णीतिः, अपि तु तद्धेतुत्वात् सन्निकर्षादिः प्रमाणमिति चेत्; अत्राह उत्तरम्--**तस्या** निर्णीतेश्**चेत् जननाद् अन्यत्** प्रमाणम् **अत एव** अस्तु **स्वतः** स्वयमेव **निर्णयः**--यस्य हि भावात् परनिरपेक्षा सिद्धिः तदेव प्रमाणं युक्तम् । निर्णीतिभावाच्च *तथा तत्सिद्धिः, /ms *तदभावे अन्यभावेऽपि तदभावात्, अन्यथा चक्षुषो रूपवद् रसादिसिद्धिरपि, *संयुक्तसमवेतसम्बन्धस्याविशेषादिति मन्यते । § 51

१ व] रच
१ त] निर्विकल्पकम् ।
३ म्] अथवेत्थमिदम्
५ त] बाध्यमानत्वायोगात् ।
६ *] प्रमाणं
१० त] बुद्धिमात्रम् ।
१२ नुमानं] मा[[अनुमा--अनुमानं प्रमाणं न स्यादित्यर्थः ।]] न
१५ त्र] बौद्धस्य ।
१५ अ] एकस्मिन् प्रमेये अनेकप्रमाणानां प्रवृत्त्यनभ्युपगमात् ।
१९ न्निष्क्रान्त] न्तं
२० विशेषः] प्रमाणम् ।
२२ निर्णीतिः] प्रमाणम् ।
२२ त] निर्णीतिजनकत्वात् ।
उपलब्धिहेतुश्च प्रमाणम्--न्यायभा० २ । १ । ११ ।
२३ त्] सन्निकर्षादि ।
२५ *] परनिरपेक्षा ।
२६ *] निर्णीत्यभावे ।
२६ भावे] सन्निकर्षादिसद्भावेऽपि ।
२६ भावेऽपि] सिद्ध्यभावात् ।
२७ पि] स्यादिति सम्बन्धः ।
२७ *] चक्षुःसंयुक्ते घटे रसस्यापि समवायात् ।

यदि व, य एवमाह प्रमाभङ्गवादी प्र ज्ञा क र गु प्तं--**न प्रतिभासाद्वैतात् परं तत्त्व मस्ति, इति न तत्र किञ्चित् प्रमाणम्, तदद्वैतस्य च स्वसंवेद-** 12/mkj **नाध्यक्षसिद्धत्वात् न तत्र विप्रतिपत्तिरप्रतिपत्तिर्वा यत्तन्निरासार्थं प्रमाणलक्षण-प्रणयनम् । अतो व्यर्थमेतदक्ष** इत्यादि; तत्राह--**सिद्धिश्चेत्** । इदमत्र चिन्त्य-ते--सर्वविकल्पातीतप्रतिभासो वा तत्र प्रमाणं स्यात्, घटमहं वेद्मि इत्यादि प्रतिभासो वा ? तत्र प्रथमपक्षं दूषयन्नाह--**सिद्धिः प्रमाणं चेत्** यद्येकानेक-त्वादिभेदशून्यं प्रतिभासमात्रम् **उपलब्धिमात्रम्** उपलम्भनम् उपलब्धिः, सैव तन्मात्रम् । यदुक्तम्--**प्रतिभासः प्रतिभास एवेति कथं तत्प्रमाणम् ?** इति; अत्राह--घटमहं वेद्मि इत्यादि प्रतीतिः **निर्णीतिः** तस्या **विना** तामन्तरेण तदभावः । कथम्भूतायाः ? **अविसंवादैकहेतोः** अविप्रतिपत्तेरेकस्य हेतोः । भवत्वेवं को दोष इति चेत्; अत्राह--**क्षणिकादिसिद्धिः** क्षणिक आदिर्यस्य सारूप्यसन्तानान्तरादेः तस्य सिद्धिः प्रमाणं पराभ्युपगताऽ**नुमा न स्यात् स्वयं** सौगतस्य तद्वत् पुरुषोपलब्धिरनिवारणेन तया बाधनादिति मन्यते । संवृत्या सा प्रमाणमिति चेत्; अत्राह--**सर्वथा** परमार्थप्रकारेणेव संवृतिप्रकारेणापि न स्यात्, तद्वत् नित्येश्वराद्यनुमानमपि प्रमाणं स्यादिति निरूपयिष्यते । निर्णीतिरेव तर्हि प्रमाणमिति चेत्; अत्राह--**निर्णीतिः** स्वपरव्यवसायात्मिका बुद्धिः यदि प्रमाणम् **निर्विकल्पम्**--अहमिति ज्ञानं ग्राहकं ग्राह्यो घ- /ms टादिः तद्व्यवसायः फलम् इति विकल्पो भेदः तस्मान्निष्क्रान्तम् अद्वयवेदनं **न स्यात् प्रमाणं स्वतः** स्वरूपेण । ततो यदुक्तम्--**प्रमाणमविसंवादिज्ञानम् इत्यादि व्यवहारेण प्रमाणलक्षणमुक्तम्, अज्ञातार्थप्रकाशो वेति परमार्थेन, प्रमाणान्तरेण अज्ञातस्य अद्वयप्रतिभासार्थस्य आत्मवेदनस्य एवमभिधानात्** । इति; तन्निरस्तम् । शेषं पूर्ववत् व्याख्येयम् । ननु च यदि नीलादिः अर्थतर्द्धिभ तद्व्यतिरेकेण तद्ग्राहकमस्ति अनुपलम्भात्, शरीरसुखादेः प्रमेय-त्वेन तदग्राहकत्वमिति कथं निर्णीतिः प्रमाणमिति चेत्; न; *आत्तोत्तरस्य अनन्तरं च [व]क्ष्यमाणत्वात् । § 52

---

१ प्तं] प्तः
२ इति] परमार्थश्चाद्वैतरूपता, तत्प्रकाशनमेव प्रमाणम् । तथा च प्रत्ययादिस्वरूपस्य स्वतो गतिरिति --प्र० वार्तिकाल० २ । ५ । पृ० ३० । विचार्यमाणं सकलं विशीर्यते नाद्वैतादपरं तत्त्वमस्ति ।--प्र० वार्तिकाल० २ । ६ । पृ० ३१ ।
२ त] प्रतिभासाद्वैतस्य ।
४ क्ष] त्--अध्यक्ष
५ त्र] प्रतिभासाद्वैते ।
१२ नुमा] अनुमा--अनुमानं न स्यात् ।
१३ ब्धिर] ब्धेर
१३ त] नित्यैकब्रह्मरूपपुरुषोपलब्ध्या ।
१५ स्यात्] क्षणिकादिसिद्धिः ।
१९ तो] अज्ञातार्थप्रकाशो वा--अथवेदं प्रमाणलक्षणम्, प्रकाश्यतेऽनेनेति प्रकाशः, अज्ञातस्यार्थस्य प्रकाशकं ज्ञानं प्रमाणम् । अथवा अर्थशब्देन परमार्थ उच्यते । अज्ञातार्थप्रकाश इति परमार्थप्रकाश इत्यर्थः । परमार्थश्चाद्वैतरूपता, तत्प्रकाशनमेव प्रमाणम् । तथा च प्रत्ययादिस्वरूपस्य स्वतो गतिरिति, उक्तश्च प्रामाण्यं व्यवहारेणेति । तत्र पारमार्थिकप्रमाणलक्षणमेतत्, पूर्वं तु सांव्यवहारिकस्य ।--प्र० वार्तिकाल० पृ० ३० ।
२३ र्द्धिभ] अर्थः न
२३ तिरेकेण] नीलादिग्राहकम् ।
२४ *] दत्तोत्तरस्य ।

का पुनरियं सिद्धिः प्रमाणात्मनि या उपचारात् प्रवर्तत इति चेत्; अत्राह--**प्रमाणस्य** इत्यादि । § 53

...3 *प्रमाणस्य फलं साक्षात् सिद्धिः स्वार्थविनिश्चयः ।
प्रतिपत्तुरपेक्ष्यं यत् प्रमाणं न तु पूर्वकम् ॥ ३ ॥§ 55

स्ववृत्तिः--यथास्वं प्रमेयस्य व्यवसायो यतस्तदेव स्वतः प्रमाणम् । ज्ञानं 13/mkj प्रमाणम् अन्यतः प्रवृत्तौ अविसंवादनियमायोगात् । तद्धेतुत्वं पुनः सन्निकर्षादिवन्न दर्शनस्य । अभ्रान्तत्वेऽपि सर्वथा निर्णयवशात् प्रामाण्यसिद्धेः कथञ्चित् तदात्मकत्वं तत्त्वबुद्धेरभ्युपगन्तव्यम् । अन्यथा तदफलमसाधनमसतो न विशेष्येत । अकिञ्चित्करसंशयविपर्ययव्यवच्छेदेन निर्णयात्मकत्वं नान्यथा । अनधिगतार्थाधिगन्तृ विज्ञानं प्रमाणमित्यपि केवलमनिर्णीतार्थनिर्णीतिरभिधीयते, अन्यथा अतिप्रसङ्गात् । अधिगतमात्रस्य विसंवादकस्य साधनान्तरापेक्ष्यगोचरस्य साधकतमत्वानुपपत्तेः । तदनधिगतस्वलक्षणाधिगतावपि दृष्टे प्रमाणान्तराप्रवृत्तिप्रसङ्गात् । समानभूतसमारोपव्यवच्छेदे संवृत्यनुमानयोर्न कश्चिद्विशेषः । साक्षादनुभवादुत्पत्तिः महानपराधः । प्रतिपत्तुरुत्तरं प्रमाणं तत्साधनभावात् न तु पूर्वकम्, अनुमानेऽप्येवं प्रसङ्गात् । § 56

**प्रमाणस्य** करणविशेषस्य यत् **फलं साक्षाद्** अव्यवहितं न व्यवहितं हानादिबुद्धिलक्षणम् । तत् किम् ? इत्यत्राह--**सिद्धिः** इति । सिद्धिशब्दवाच्यम् । ननु तत्र आचार्याणां विप्रतिपत्तिदर्शनात् किं तत्फलमिति पृष्ट इव तद्दर्शयन्नाह--**स्वार्थविनिश्चयः** इति । स्वं च विज्ञानस्वरूपम् अर्थश्च घटादिः, यदि वा, स्वोऽर्थः स्वग्रहणयोग्यो भावः तयोः तस्य वा विनिश्चयोऽकिञ्चित्करत्वादिव्यवच्छेदेन तद्ग्रहणम् । द्वितीयव्याख्यानेन घटाद्यर्थाग्राहिणीनां सुखादिवित्तीनामपि स्वरूपार्थनिश्चायकत्वेन प्रमाणत्वमुक्तं वेदितव्यम् । ननु न नीलादिव्यतिरेकेण अपरमस्ति यस्य स्वार्थविनिश्चयः फ/ms लं स्यात् । नीलादिरेवेति चेत्; न; तस्य स्वनिश्चयेऽपि अर्थनिश्चयाभावात् ततोऽन्यस्य अर्थस्याभावात् स्वार्थविनिश्चयः इत्यनुपपन्नम् । (?')अथ द्वितीयं व्याख्यानमाश्रित्य एतद्युक्तमित्युच्यते; न; तत्र विज्ञप्तिवादो भ[व]तोऽनिष्टं स्यात्, नीलादेः स्वग्राहकत्वेन ज्ञानतापत्तेः । शरीरसुखादि ततः परम्, *तस्य स्वरूपवत् नीलादावपि प्रवृत्तेरयमदोष इति चेत्; न; शरीरस्य नीलादिवत् प्रमेयत्वात्, सुखादेश्च नीलादिग्राहकत्वानभ्युपगमात् न

३ *] तुलना--अत एवोक्तम्--प्रमाणस्य साक्षात्फलं सिद्धिः स्वार्थविनिश्चयः ।--प्रमाणनि॰ पृ॰ २ ।
१८ नु] फले ।
२१ त्वा] आदिपदेन संशयविपर्ययौ ग्राह्यौ ।
२३ स्ति] ग्राहकम् ।
२४ त] नीलादेः ।
२७ सुखादि] नीलादेः ।
२८ *] शरीरसुखादेः ।

*स्वार्थेत्यादि युक्तमिति चेत्; न; अहमहमिकया प्रतीयमानायाः संवित्तेः ततोऽन्यस्याः अयत्माये नीलादौ कः समाश्वासः सुखादौ वा ? यत इदं स्यात्--**नीलादि ज्ञानं प्रतिभासमानत्वात् सुखादिवत्** इति । नन्वस्तु अहम्प्रत्ययः; स तु स्थूलोऽहं कृशोऽहम् इति शरीरसामानाधिकरण्येन प्रतीतेर्न शरीराद् भिद्यते अपि तु तदेव,* *तस्य च नीलाद्यग्राहकत्वमुक्तमिति चेत्; न; चार्वाकमतचर्वणे चर्वणमस्य भविष्यति इति किमत्रैवोत्सुकिमन ? भवत्वयं ततो भिन्नः; तथापि कथं नीलादेर्ग्राहक इति चेत्; कथं स्वरूपस्य ? *तत्र तस्य प्रतिभासाच्चेत्; नीलादेरप्यत एव ग्राहकोऽस्तु, तथा च लौकिकी प्रतीतिः--नीलमहं वेद्मि पीतमहं वेद्मि इति । ततो यदुक्तम्--**यदि समानकालस्य नीलादेः ग्राहकः; नीलादिः तस्य स्यात् अविशेषात्** *इति; 14/mkj तन्निरस्तम् । यदि हि समानकालत्वादेकस्य धर्मः सर्वस्य स्यात्; तर्हि चित्रे नीलाकारवत् नीलता पीताद्याकारेऽपि स्यात् पीताद्या कारता वा नीले, /ms ततः कथं चित्रं नाम, यतः **चित्रं चित्रमेव** इति भवेत् ? प्रत्यक्षबाधा अन्यत्रापि । न खलु यथा ग्राहकता अहम्प्रत्यये प्रत्यक्षतः प्रतीयते तथा तं ** प्रतीयते । यथा वा नीलादेर्ग्राह्यता तथा तं प्रति तत्प्रत्ययस्य सा इति, अन्यथाऽविवादात् सौगतमेव सकलमिति शास्त्रप्रणयनमनर्थकम् । § 57

स्यान्मतम्--न नीलादितत्प्रत्ययाभ्याम् अन्या ग्राह्यता ग्राहकता च प्रतीयते; नन्वेवं तयोः स्वरूपग्रहणमपि दुर्लभम्, अत्रापि न तत्स्वरूपादन्या ग्राह्यता ग्राहकता वा, न च तदभावे तद्ग्रहणम् । यदि पुनः स्वप्रकाशरूपत्वात् स्वग्रहणम्; तर्हि अहम्प्रत्ययस्य परप्रकाशनरूपत्वात् परग्रहणमस्तु, नीलादेश्च परप्रकाश्यरूपत्वात् परेण ग्रहणम् । न वै जैनेन स्वभावभूतयोग्यतायाः अन्या ग्राह्यता ग्राहकता वा अभ्युपगम्यते । तदुक्तम्-- § 58

*स्वहेतुजनितोऽप्यर्थः स्वयं ग्राह्यो यथा मतः ।

---

१ *] स्वार्थविनिश्चय इति ।
२ संवित्तेः] नीलादेर्भिन्नाया इति ।
२ त्माये] अभावे
२ त] यथा च न सुखादि व्यतिरेकेणापरं विज्ञानं तथा नीलादिव्यतिरेकेणापि--प्र° वार्तिकाल° ३ । ३८७ ।
४ यः] नीलादेः परः ।
५ *] शरीरस्वरूपमेव ।
५ *] शरीरस्य च ।
६ न] त्सुक्येन
७ यं] शरीरादेः ।
८ *] अहम्प्रत्यये ।
८ त्र] स्वरूपस्य ।
८ त] प्रतिभासादेव ।
१० नीलादिः] अहम्प्रत्ययस्य ग्राहकः ।
१० *] तुलना--(?")समकालश्चेत्तर्हि यथा ज्ञानमर्थस्य ग्राहकम् एवमर्थोऽपि ज्ञानस्य ग्राहकः स्यात् । समसमयभावित्वाविशेषात् । [[पूर्वपक्षः]]--स्या° रत्ना° पृ° १६२ । प्रमेयक° पृ° ८५ ।
१५ *] तत्र
१५ *] नीलादौ ।
१५ ता] प्रतीयते ।
१५ त] अहम्प्रत्ययस्य ।
१५ सा] ग्राह्यता ।
१८ त] नीलादितत्प्रत्यययोः ।
१९ त] ग्राह्यग्राहकतयोरभावे ।
२० प] परस्य ग्रहणम्, अर्थात् परग्राहकत्वमस्तु ।

तथा ज्ञानं स्वहेतूत्थं स्वयं तद्ग्राहकं मतम् ॥ लघी° श्लो° ५९§ 60

एतेनेदमपि प्रत्यक्षं यदुक्तं परेण--**यदि नीलादेः स्वभावभूतगृहीतिकरणात् संप्रत्ययो ग्राहकः; तर्हि तेन स एव जनितः स्यात् इति तस्य [ज्ञानता] ज्ञानकार्यत्वात् उत्तरज्ञानवत् । अथ अर्थान्तरगृहीतिकरणावर्थस्य न किञ्चित् कृतमिति न तेन ग्रहणम् । गृहीत्या पुनर्गृहीतिकरणे अनवस्थानम्** । इति । कथम् ? स्वरूपग्रहेऽप्यस्य समत्वात् । तथाहि--स्वरूपस्य गृहीतिकरणाद् विज्ञानं चेद् ग्राहकम्; *तत्तस्य जनकं स्यात् न ग्राहकम्,
/ms न चैतद् युक्तम्, स्वात्मनि क्रियाविरोधात् । ततो भिन्नायः तस्याः करणाददोषश्चेत्; स्वरूपस्य न किञ्चित् कृतमिति कथं तेन ग्रहणम् ? तया पुनर्गृहीतिकरणे अनवस्थानम् । साक्षात् स्वरूपग्रहणम् अर्थेऽपि । ननु स्वग्रहणशक्त्या अर्थग्रहणे तयोरैक्यम् । अन्यथा चेत्; एकस्य शक्तिद्वयम्, तदपि अन्येन तद्द्वयेन वेद्यते इत्यनवस्था स्यादिति चेत्; इदमपि वक्ष्यमाणेन चित्रैकज्ञानेन सुपरिहारमिति तिष्ठतु तावत् । § 61

ननु यदुक्तम्--नीलादेर्ग्रहणे अहम्प्रत्ययस्य योग्यताऽस्ति न तस्य तत्प्र-
15/mkj त्ययग्रहणे इति; तत्रेदं चिन्त्यते--अर्थग्रहणकार्यदर्शनात् तत्र योग्यतास्ति इति गम्यते, न तस्याः तद्ग्रहणम्, कार्यानुमेयत्वात्तस्याः । अथ तत एव सा गम्यते इति मतिः; तर्हि ततो योग्यतासिद्धिः अतश्च तत्सिद्धिरिति अन्योन्यसंश्रय इति चेत्; उच्यते--**यथा सुतीक्ष्णोऽपि असिः नात्मानं छिनत्ति तथा**

२ क्षं] प्रत्युक्तं
३ तेन] संप्रत्ययेन ।
३ स] नीलादिरेव जनितः, यतो हि तस्य स्वभावभूता गृहीतिस्तेन जन्यते ।
३ इति] नीलादेः ।
४ अथ] भिन्नगृहीत्युत्पादने च ।
४ णाव] द
५ तेन] संप्रत्ययेन ।
६ इति] तुलना--अथ गृहीतिकरणादर्थस्य ज्ञानं ग्राहकम्, ननु सा अर्थादर्थान्तरम् अनर्थान्तरं वा तेन क्रियते ? अर्थान्तरत्वे अर्थस्य न किञ्चित्कृतमिति कथं तेनास्य ग्रहणम् ? तस्येयमिति सम्बन्धासिद्धिश्च । तयाप्यस्य गृहीत्यन्तरकरणेऽनवस्था । अनर्थान्तरत्वे तु तत्करणे अर्थ एव तेन क्रियते इत्यस्य ज्ञानता ज्ञानकार्यत्वात् उत्तरज्ञानवत् ।--प्रमेयक° पृ° ८५ ।
७ *] विज्ञानं स्वरूपस्य ।
८ भिन्नायः] गृहीतेः ।
११ नु] स्वार्थग्रहणात्मकज्ञानपक्षे ।
११ त] स्वार्थयोः ।
१४ न] नीलादेः ।
१५ त] प्रत्यये ।
१६ त] योग्यतायाः ।
१६ त] तेन अर्थग्रहणेन ग्रहणम् ।
१६ त] अर्थग्रहणादेव ।
१८ य] तुलना--ननु नीलं कथमात्मरूपं प्रकाशयति ? न हि प्रकाश्या घटादयः प्रदीपादिना स्वप्रकाशकाः, आत्मनि क्रिया विरुध्यते । न हि सैवासिधारा तयैव छिद्यते । अत्र परिहारः--प्रकाशमानस्तादात्म्यात् स्वरूपस्य प्रकाशकः । यथा प्रकाशोऽभिमतस्तथा धीरात्मवेदिनी ॥ ३३० ॥ अवेद्यवेदकाकारा...स्वात्मनि क्रियाविरोध इति कुतः प्रमाणादवगतम् ? न हि दृष्टान्तमात्रादर्थस्य प्रसिद्धिः । समीहितस्य विपर्ययेऽपि दृष्टान्तस्य प्रदीपस्य संभवात् । यदि घटः प्रदीपेन बाह्यात्मना प्रकाश्यते, प्रदीपोऽपि तथाभूतेनापरेणेति न पर्यनुयोगः...वस्तुस्वभाव एष इति का वात्र क्षतिः ? अथ स्वात्मनि क्रियाविरोध इति; उच्यते--यदा स्वरूपन्तत्तस्य तदा कैव विरोधिता । स्वरूपेण विरोधे हि सर्वमेव प्रलीयते ॥ न हि स्वेनैव रूपेण

**ज्ञानं न [स्वं] परिच्छिनत्ति स्वात्मन्यर्थक्रियाविरोधात्** इत्यत्र यदुक्तम् **ज्ञानम् आत्मानं परिच्छिनत्ति तथाशक्तिः नासिः छिनत्ति विपर्ययात्** इति; तत्राप्यस्य समत्वात् । तद्यथा स्वग्रहणात् तच्छक्तिसिद्धिः कार्यानुमेयत्वात्तस्याः न पुनः ततस्तद्ग्रहणसिद्धिः । स्वग्रहणसिद्धेः तत्सिद्धिरिति चेत्; अन्योन्यसंश्रयः--शक्तिसिद्धेस्तद्ग्रहणसिद्धिः तस्याः तच्छक्तिसिद्धिरिति । अथ स्वग्रहणं प्रत्यक्षतः सिद्धम्, तत् कुतः इति चोद्ये स्वशक्तितः इत्युत्तरमुच्यते न पुनः तस्याः तत्सिद्धिः; तदेतदन्यत्र समं न चेति चिन्त्यम् । भवतु स्वरूपवत् नीलादेरपि तेन ग्रहणं को दोष इति चेत् ? अयम्-- **यदवभासतेतज्ज्ञानं यथा सुखादि** /ms **अवभासते च नीलादिः** इत्यत्र स्वस्य स्वेनैव अवभासस्य सुखादौ ज्ञानत्वेन व्याप्ततया दृष्टस्य नीलादावदर्शनाद् असिद्धो हेतुः स्यादिति, इतरथा स्वसंवेदनात्मकत्वेन तस्य ज्ञानान्तरत्वात् सर्वज्ञज्ञानवत् वादिप्रतिवादिभ्याम-विषयीकरणात् तौ प्रति आश्रयासिद्धता स्यात् । अर्थान्तरस्यापि ज्ञानस्य मतः तस्य *ताभ्यां ग्रहणं नार्थस्य सतः इति किंकृतो विभागः ? अथ चित्रैकज्ञानमतमवलम्ब्य अहम्प्रत्यय[स्य] नीलाद्याकारैकत्वमिष्यते यदि; तर्हि स्वभावादिभिन्नोऽप्यहम्प्रत्ययः कदाचिद् योग्यतया नीलादिना एकत्वमुपयाति तयैव तद्ग्राहकत्वमुपयाति तयैव तद्ग्राहकः स्यात् । तदनभ्युपगमे पुनरिदं भवेत् श्रोत्रियो न चाण्डल्या दर्शनमिच्छामि स्पर्शं त्विच्छामि इति । § 62

16/mkj

स्यान्मतम्--तत्प्रत्ययेन नीलादभिन्नस्य ग्रहणेऽपि कथम् अर्थता गम्यते ? प्रतिभासादिति चेत्; स्वप्नादिदृष्टा[नामपि] स्यादिति तज्ज्ञानमपि प्रमाणमेव । [तथा] च किं प्रमाणलक्षणप्रणयनेन व्यवच्छेद्याभावात् । दुष्टकार-

---

कस्यचिद्विरोधः । तथा चेन्न किञ्चिद्भवेत् स्वेन रूपेणेति सकलमस्तंगतं भवेत् । छेदस्तु पुनर्विशिष्टोत्पादनं न च तेनैव तस्योत्पादनम् । अयमेवार्थः स्वात्मनि क्रियाविरोध इति । स्वप्रकाशरूपं तु तस्य स्वरूपं न तेनैव विरुध्यते...--प्र॰ वार्तिकाल॰ पृ॰ ३५३--५४ । अत्र केचिदाहुः न चित्तचैत्तानां स्वसंवेदनं घटते स्वात्मनि कारित्वविरोधात् । न हि सुशिक्षितोऽपि बटुः स्वस्कन्धमारोढुं शक्नोति । न हि तीक्ष्णाऽप्यसिधारा आत्मानं छिनत्ति । न हि सुप्रज्वलितोऽपि वह्निस्कन्ध आत्मानं दहति तथा चित्तचैत्तमपि कथमात्मानं प्रत्येतु ?...अत्रोच्यते न कर्मकर्तृभावेन वद्यवदकत्वं ज्ञाने वर्ण्यते । किं तर्हि ? व्यवस्थाप्यव्यवस्थापकभावेन । यथा प्रदीप आत्मानमात्मना प्रकाशते तथा ज्ञानमपि जडपदार्थविलक्षणं स्वहेतोरेव प्रकाशस्वभावमुपजायमानं स्वसंवेदनं व्यवस्थाप्यते ।--तर्कभा॰ मो॰ पृ॰ ९--१० ।

२ क्तिः] क्तेः

४ त] स्वग्रहणशक्तेः ।

६ त] स्वशक्तेः ।

७ चेति] वेति

८ तेन] अहम्प्रत्ययेन ।

११ त] नीलादेः ।

१३ तः] सतः

१३ स्य] नीलादेः ।

१३ *] वादिप्रतिवादिभ्याम् ।

१६ त] तयैव तद्ग्राहकत्वमुपयाति इति निरर्थकं भाति ।

१७ श्रोत्रियो] वदति यदहम् ।

२० प्र] बोधमात्रसंगमो हि स्वप्नेतरप्रत्ययसंभवी समान एव सर्वत्र--प्र॰ वार्तिकाल॰ पृ॰ ४ ।

२० त] स्वप्नदृष्टार्थज्ञानमपि ।

णजनितदर्शनविषयत्वान्नेति चेत्; दर्शनं तत्तथेति कुतः ? अर्थविषयत्वात्; अन्योऽन्यसंश्रयः--सिद्धे हि तथादर्शने तद्विषयस्य अनर्थत्वम्, अतः तथा दर्शनमिति । बाधितप्रत्ययगोचरत्वान्नेत्यपि नोत्तं तस्य हि बाधनं नोदयकाले स्वरूपापहारः; तदा तत्प्रतीतेः । अन्यदा तु नश्वरत्वेन स्वयमेव नास्ति केन तद्बाधनम् ? दैवरक्ता हि किंशुकाः, न तत्र नः प्रयासः । /ms नापि विषयापहारः; तस्यापि दर्शनात् । न च विषयापहारः प्रमाणधर्मः अपि तु नराधिपस्य । अथ न विषयस्यापहारो बाधनम्, अपि तु तस्य सतः प्रतिभासज्ञापनम्; तदपि न सुन्दरम्; यतो यद्यसौ असन्; कथं प्रतिभासः खरशृङ्गवत् ? अथ प्रतिभासः; कथमसन् ? जाग्रद्दृष्टो घटादिरपि तथैव स्यात् । धिङ् मिथ्यैतद् वितर्कितं नायं घटादिः किन्त्वन्यदेतत् इति प्रत्ययानुत्पत्तेर्नेति चेत्; ननु मरीचिकायां जलदपिनो झटिति मरणे देशान्तरगमने वा[न]स प्रत्ययो जायते इति तज्जलं सत्यं स्यात् । सत्यपि च अर्थविशेषे क्वचित् स प्रत्ययो दृष्टः । अयमपि प्रत्ययो यद्यसदर्थः; कथमन्यस्य असदर्थतां ज्ञापयति, अतिप्रसङ्गात् । सदर्थश्चेत्; पूर्ववत् प्रसङ्गोऽनवस्था च । किञ्च, अयं प्रत्ययः पूर्वप्रत्ययसमानविषयश्चेत्; न तस्य कथञ्चिदपि बाधकः, अन्यथा सर्वेषाम् एकार्थज्ञानानामन्योन्यं बाध्यबाधकभावेभवेत् । भिन्नविषयश्चेत्; सुतरां न तस्य बाधकः, इतरथा घटज्ञानं पटज्ञानस्य बाधकमस्तु । नेति प्रत्ययानुत्पत्तेर्नेति चेत्; स एव प्रत्ययः कुतो न जायते ? एकाधिकरणत्वाभावात्; रजतशुक्तिकाप्रत्ययोः कथमेकाधिकरणत्वम्, प्रमाणाभावात् ? पूर्वोत्तरप्रत्ययाभ्यां तदप्रतीतेः इति क्षणभङ्गे चर्चितमेतत् । तन्न बाध्यमानज्ञानगोचरत्वात् स्वप्नदृष्टनीलाद्यनर्थत्वम् । विसंवादिदर्शनगोचरत्वादिति चेत्; न दृष्टार्थप्राप्तिः अविसंवादः, सा स्वप्नेऽपि दृश्यते । अथ असौ अर्थ एव न भवति अनर्थक्रियाकारित्वात्;

---

१ अर्थ] अनर्थ

३ त्वान्ने] न स्वप्नदृष्टार्थज्ञानं प्रमाणम् ।

३ नोत्तं] त्तरम्;

३ त] स्वप्नदृष्टार्थज्ञानस्य । न तावज्ज्ञानान्तरेणाभावः स्वप्नज्ञानस्यान्यस्य वा केनचित् क्रियते, तत्काले तस्य स्वयमेव नाशात् । न चाक्षिनिमीलनान्नष्टे ज्ञाने बाध्यता प्रतीयते ।--प्र॰ वार्तिकाल॰ पृ॰ ४ ।

५ क्ता] दैवरक्ता हि किंशुका केन रज्यन्ते नाम --प्रमेयक॰ पृ॰ ७५ । दैवरक्ता हि किंशुकाः क एनानधुना रञ्जयति ।--प्र॰ वार्तिकाल॰ पृ॰ ३७४ । दैवरक्ता हि किंशुकस्तवकावतंसकाः ।--प्र॰ वार्तिकाल॰ पृ॰ ५८४ ।

६ ना] अन्येन नहि ज्ञानेन तस्य विषयापहारोऽसत्ताज्ञापनलक्षणो बाधः । न च स्वविषये प्रवृत्तमन्यविषयापहारं रचयितुमलम्, स्वविषय[[ज्ञान]] स्वविषयस्य रूपसाधनं हि ज्ञानानां धर्मः । परविषयापहरणं तु नराधिपधर्मः ।--प्र॰ वार्तिकाल॰ पृ॰ ३५९ ।

८ त] स्वप्नदृष्टस्य ।

८ म्] प्रतिभासमात्रमेतत् इति ज्ञापनम् ।

१० त] असन् स्यात् ।

११ त्तेर्नेति] न घटादिरसन् किन्तु सत्यः ।

११ पिनो] जलार्थिनोऽपि

१७ भावे] वो

१९ भावात्] चेत् ।

२० त] पूर्वेण उत्तरस्य उत्तरेण च पूर्वस्याज्ञानात् नैकाधिकरणत्वप्रतीतिरिति भावः ।

२३ असौ] स्वप्नदृष्टः ।

अर्थक्रियापि तत्र दृश्यते जलादिकार्यस्य स्नानादेर्दर्शनात् । अथ जाग्रतात् /ms दर्शनात् सा अर्थक्रियैव न भवति; तर्हि अन्यापि न स्यात् सुप्तेनाऽदर्शनात् । किञ्च, यदि अर्थक्रिया असती; कथम् अतोऽन्यस्य सत्त्वम् ? सती 17/mkj स्वतश्चेत्; भावोऽपि तथैव सन्निति किं तदपेक्षणेन ? अन्यतश्चेत्; अनवस्था स्यात् । ततो यत्किञ्चिदेतदिति चेत्; अत्र प्रतिविधीयते-- § 63

जाग्रद्दशावत्; स्वप्नेऽपि बहिरर्थोऽस्तु, किं वा स्वप्नदशावत् अन्यदापि समान् दुभय तु सदेहः *, सर्वविकल्पातीतता वा यथा स्यादिति जाग्र-त्-स्वप्नदशयोः अविशेषचोदनेयम् ? तत्र प्रथमपक्षे स्वप्नदशायामपि बहिर-र्थसिद्धेः तज्ज्ञानमपि प्रमाणमिति तल्लक्षणप्रणयनमयुक्तं व्यवच्छेद्याभावादिति । [अस्मिन्] मते को दोषः ? नापरः प्रमाणप्रमेयाऽनिषेधात् । परस्य मते को दोषः ? सकलस्वमतविलोपात् विज्ञप्तिमात्रादेः असिद्धेः । किञ्च, स्वप्नादिज्ञानवद् ईश्वराद्यनुमानादिकमपि स्वप्रतिभासिनाऽर्थेन अर्थवदिति त-न्निषेधवचनं प्र ज्ञा क र स्य गुप्तविगोपकम् । अथ दुष्टलिङ्गादिकारणज-नितत्वात् तन्निर्विषयम्; पश्यत अस्य वाच्यं ध्यं * स्वयमेव स्वस्वप्नादिज्ञाने दुष्टकारणारब्धत्वं निराकृत्य अत्र अभ्युपगच्छतः । § 64

एतेन इदमपि प्रत्युक्तम् तौन **न तदनुमानाद्यर्थवत् स्वपरिच्छिन्नाद-न्यस्य प्रापकत्वात्** इति; स्वप्नादावपि तथा प्रसङ्गात् । तन्न प्र ज्ञा क र स्य किञ्चिद् अनर्थज्ञानम् । तदुक्तम्-- § 65

*बहिरङ्गार्थतैकान्ते प्रमाणाभासनिह्नवात् ।
सर्वेषामर्थसिद्धिः स्यात् विरुद्धार्थाभिधायिनाम् ॥§ 67 /ms

आप्तमी॰ श्लो॰ ८१ इति । § 68

अपसिद्धान्तश्चास्य निग्रहस्थानं स्यात् । अथ मदीयोऽयं सिद्धान्त इति न दोषः; न; अस्य मीमांसकसिद्धान्तस्य हि सर्वं सालम्बनं ज्ञानम् इति मतम् । अयं तु विशेषः--क्वचिल्लौकिकः क्वचिदलौकिकोऽर्थ आल-म्बनम् इत्येके । सर्वत्र लौकिको आलोवा कस्मान्नेति चेत् ? अथ परस्य मरीचिकाजलम् अन्यजलवत् कस्मान्न स्नानादिकृत् ? स्वकारणात् तथोत्पत्तेरिति चेत्; किं पुनरस्य कारणम् ? अदृढवासनेति चेत्; स-र्वत्र एकरूपा वासना अन्यद्वा कुतो न ? तथाऽप्रतीतेरिति चेत्; अत एव तर्हि न सर्वो लौकिकोऽलौकिको वाऽर्थः । अथ जाग्रत्क्रियासम-

---

२ नात्] जाग्रतेन सा अर्थक्रिया न क्रियते अतः सा अर्थक्रियैव न भवति ।
२ र्हि] जाग्रद्दृष्टार्थक्रियापि अर्थक्रिया न स्यात् ।
७ *] स मा भूत्, भवतु सन्देहः
९ सिद्धेः] स्वप्नज्ञानमपि ।
९ मिति] प्रमाणलक्षण ।
१२ दिति] ईश्वराद्यनुमाननिषेधवचनम् ।
द्रष्टव्यम्--प्र॰ वार्तिकाल॰ पृ॰ ३२ ।
१४ त्वात्] ईश्वराद्यनुमानम् ।
१४ *] वान्ध्यम्
१५ निराकृत्य] ईश्वराद्यनुमाने ।
१६ तौन] यदुक्तं तेन
२५ आलोवा] अलौकिको वा
२६ अथ] बौद्धस्य ।
२९ वाऽर्थः] आलम्बनम् ।

त्वात् स्वप्नार्थक्रिया लौकिकी, तत्कार्यर्थोऽपि तथाविध एवेति मतिः; तर्हि **यत् सत् तत्सर्वं क्षणिकं यथा घटः, संश्च शब्दः** हेतुबि° पृ° ५५ इति क्षणिकत्वप्रतिपत्त्यर्थक्रियासमत्वात् नित्येश्वरादिप्रतिपत्तिरप्यर्थक्रिया इति तत्कारणकलापोऽप्यर्थः स्यात् । यदि पुनः इयमर्थक्रिया न भवति; स्वप्नेऽपि न स्यात् । तथा जाग्रद्दशाभाविन्यपि न स्यादिति चेत्; क्षणिकादिसिद्धिरपि न स्यादिति सर्वाऽविशेषचोदना । § 69

स्वप्ने विपरीतख्यातिः अन्यदेशादिस्थस्य अन्यदेशादितया प्रतिभासनात् इत्यपरे । सर्वत्र सैव कुतो नेति चेत् ? न; तथाऽप्रतीतेः । नहि यथा
18/mkj, /ms लोके आदित्योऽन्यदेशोऽपि प्रातः पर्वत सँल्लग्नतयेव प्रतिभा तीति प्रतिपद्यते, तथा पर्वतोऽप्यन्यदेशस्तद्देशतया प्रतिभातीति प्रतिपद्यते इति । यदि पुनरयं निर्बन्धः सर्वत्र सैवास्तु इति; तर्हि यथा अनुमानस्य अस्पष्टः सामान्याकारो बाह्ये स्वलक्षण आरोपात् प्रतिभाति, अन्यथा ततः तत्र प्रवृत्तिर्न स्यात्, तथा सर्वत्र ज्ञाने स्वसंवेदनरूपता अन्यस्य तत्र आरोपिता प्रतिभाति अन्यत्र अरोपिता प्रतिभाति अन्यत्रापि अन्यस्य इत्यनवस्था । असत्त्वव्यातिरित्यन्ये; तदनन्तरं निरूपयिष्यते । तन्न प्रथमपक्षः । § 70

*द्वितीयेऽपि स्वप्ने बहिरर्थाभावमुपलभ्य अन्यत्र तदभावसाधने इदमनुमानमाश्रितं स्यात्— **निरालम्बनाः सर्वप्रत्ययाः प्रत्ययत्वात् स्वप्नप्रत्ययवत्** प्र° वार्तिकाल° ३ । ३३१ इति । तत्रेदं चिन्त्यते--प्रत्ययत्वं यदि साकल्येन स्वसाध्येन व्याप्तं न; कथमतः साध्यसिद्धिः अतिप्रसङ्गात् ? व्याप्तं चेत्; कथमप्रतीतं तत्तथा ? तत्प्रतीतिश्चेत् निरालम्बना; स एव दोषः, *अन्यथा अनयैव हेतोर्व्यभिचारः । एतेन अनुमानमपि चिन्तितम् । अथ नानुमानं सर्वप्रत्ययलंब नत्वविषयत्वात् प्रमाणम् अपि तु समारोपव्यवच्छेदात्; भवेदेवं यदि अन्यतः प्रमाणात् तत् प्रतिपन्नं स्यात्, न चैवमिति निरूपयिष्यते । अपि च, यथा सौगतः *स्वप्न[नि]दर्शनेन न सर्वत्र बहिरर्थाभावं साधयति तथा अन्योऽपि यदि ग्राह्याकारनिदर्शनेन संवेदनाभावं साधयेत् कथं संवेदनमात्रसिद्धिः यतस्तत्र सौगतस्य आस्था स्यात् ? § 71

१ थाविध] लौकिक एव ।
४ ण] ईश्वरादिः ।
४ पुनः] नित्येश्वरादिप्रतिपत्तिः ।
७ प्ने] तुलना--अस्तु तर्हि विपरीतख्यातिः पूर्वकालमेव दृश्यते तत्कालतया...--प्र° वार्तिकाल° पृ° १९५ ।
८ रे] जैनादयः । विपरीतख्यातिस्तस्मादाश्रयणीया मतिमद्भिः ।--न्यायम° पृ° १७३ । न्यायकुमु° पृ° ६६ ।
१० या] आदित्यदेशतया ।
१० ते] पद्येत
१२ था] अनुमानात् ।
१२ त्र] स्वलक्षणे ।
१४ तिभाति] अन्यत्र आरोपिता प्रतिभाति वाक्यमेतन्निरर्थकम् ।
१५ व्याति] असत्ख्याति
१६ *] स्वप्नदशावत् जाग्रद्दशायामपि अर्थो नास्तीत्यस्मिन् विकल्पे ।
१६ भ्य] जाग्रदवस्थायाम् ।
२० था] साकल्येन स्वसाध्यव्याप्तं प्रतिपन्नमिति भावः ।
२० *] सालम्बनत्वे ।
२२ त्व] प्रत्ययानालम्बनत्व
२३ माणात्] अनुमानम् ।
२४ *] स्वप्नदृष्टान्तेन ।
२४ न] न इति निरर्थकम् ।
२५ था] जैनादिः ।

अथ तदपि तथास्तु; तथाहि--*यद्विसदर्शन दशावसेयं न तत् परमार्थ- /ms सत् यथा कामलिना उपलब्धमिन्दुद्वयम्, विसदर्शनावसेयं च संवित्त्यादीति । अत्रापि परमार्थसत्त्वादन्यत्, तदभावमात्रं वा साध्येत ? तत्र द्वितीय-विकल्पस्य प्रथमचतुर्थष्यविकल्पे चर्चा भविष्यति । प्रथमविकल्पे तु पूर्ववद् दोषः । *न च सर्वविभ्रमे विभ्रमसिद्धिः अतिप्रसङ्गात् । § 72

ननु[न]परमार्थतः कस्यचित् केनचिद् व्याप्तिरिष्यते, नापि कुतश्चित् किञ्चित् साध्यते, अपि तु यथा व्यवहारेण बहिरर्थवादिना एकत्र अग्नेर्धूम-दर्शनात् सर्वत्र सर्वदा तत एव स नान्यतः, धूमदर्शनाच्च अग्निरनुमीयते तथा प्रकृतमन्येन अनुष्ठीयत इति चेत्; उक्तमत्र **सर्वेषामर्थसिद्धिः** आप्त-मी° श्लो° ८१ स्यादिति । शक्यं हि तैरपि वक्तुम्--नास्माभिः केनचित् कस्यचित् व्याप्तिः साध्यते, किन्तु घटादौ बुद्धिमत्कारणत्ववादिना कार्यत्वादेः सहभावदर्शनात्, *अन्यत्र तद्दर्शनात् साध्यमनुमीयते । तथा च **पक्षधर्मः** हेतुबि° श्लो° १ इत्यादि लिङ्गलक्षणमवाच्यम् निवर्त्याभावात् । अथ तथा पारमार्थिकी साध्यसिद्धिर्न स्यादिति मतिः; सा अन्य त्रापि समाना । 19/mkj यदि तत्र सा न पारमार्थिकी; किं तर्हि पारमार्थिकम् ? [सं]वेदनाद्वैतं चेत्; न; द्वयप्रतिभासप्रतिपादनात् । तन्नायमपि पक्षो युक्तः । § 73

तृतीयविकल्पे नैकान्तेन अर्थनिषेधः, पाक्षिकस्य तद्भावस्य अनिषेधात् । नहि स्थाणुर्वाऽयं पुरुषो वा इति सन्देहे पुरुषो न भवति इति निश्च- /ms योऽस्ति, विरोधात् । ननु भवत्वेवम्; तथापि किं तेन अप्रवृत्तिहेतुना ? प्रवृत्त्यर्थं हि बहिरर्थ इष्यते इति चेत्; कथं भवतः संवित्तिमात्रे प्रवृत्तिः ? बहिरर्थसन्देहे तत्रापि सन्देहात् । कथं वा अर्थे सन्देहः ? तत्प्रतिभासस्य तदभावेऽपि स्वप्नादौ दर्शनादिति चेत्; एवं [तदा] *तदभाव एव युक्तो न सन्देहः, कथमन्यथा किञ्चित् प्रत्यक्षं स्वसंवेदनं निर्विकल्पस्वोप लभ्य सर्वत्र तथैव स्यात् ? अत्रापि सन्देह एव युक्तः । कुतो वा स्वप्ने बहिरर्थाभावसिद्धिः ? स्वयमनभ्युपगमात्, बाध्यबाधकभावनिषेधविरोधात् । पराभ्युपगमादिति चेत्; न; अतिप्रसङ्गात् । यथैव हि परेण तत्र तस्य असत्त्वमभ्युपगतं तथा क्षणिकत्वप्रकारादेरपि इति सर्वत्र क्षणिकत्वादावपि सन्देहः स्यात् । अथ

---

१ *] यद् विसंवादिदर्शनविषयम् ।
४ वि] र्थवि
५ *] विभ्रमे विभ्रमे तेषां विभ्रमोऽपि न सिद्ध्यति ।--न्यायवि° १ । ५४ ।
७ वादिना] महानसादौ ।
८ दा] अग्नेरेव धूमः ।
१० हि] नैयायिकादिभिरपि । विवादास्पदं बोधाधारकारणं कार्यत्वात्, यद्यत् कार्यं तत्तद् बोधाधारकारणं यथा घटादि...--प्रश° व्यो° पृ° ३८२ ।
१२ *] तनुकरणभुवनादिषु ।
१३ इ] पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः । अविनाभावनियमाद्धेत्वाभासास्ततोऽपरे ॥--हेतुबि° श्लो° १ । प्र° वा° ३ । १
१९ तेन] बहिरर्थेन ।
२१ न्देहे] संवित्तिमात्रेऽपि ।
२२ स्य] अर्थाभावेऽपि ।
२२ एवं] स्वप्नसमये ।
२२ *] अर्थाभावः ।
२३ स्वोप] ल्पश्चोप
२६ रेण] स्वप्ने ।
२६ त्र] बहिरर्थस्य ।
२७ पि] असत्त्वमभ्युपगतम् ।

स्वप्नेऽपि सन्देहः; स कुतो जातः ? तददर्शनादिति चेत्; कथमदर्शनम् ? दर्शने अतिप्रसङ्गात् । तस्य तद्व्यभिचाराच्चेत्; किं पुनरिदमुभयत्र दृष्टं येनैवम् ? तथा चेत्; नैकान्तेन अर्थाभावः, तन्नायमपि विकल्पो युक्तः । § 74

चतुर्थविकल्पेऽपि यथा बहिः सदसत्त्वविकल्पातीतता तथा वेदनेऽपि स्वपरवेदनविकल्पातीतता स्यादिति न किञ्चित् स्यात् । अथ परनिरपेक्ष-स्वसंवेदनस्य वेदनस्य प्रतीतेर्नायं दोषः; कथमदोषः, यतः स्वसंवेदनेऽपि
/ms सदसत्त्वविकल्पाती ततायाम् अर्थवन्न तत्सिद्धिः, इतरथा अर्थानिषेध । किञ्च, अन्यस्मिन् पक्षे **प्रमाणमविसंवादि ज्ञानम् इत्यादि व्यवहारेण अज्ञातार्थप्रकाशो वा इति परमार्थेन प्रमाणलक्षणम्** प्र° वार्तिकाल° इति विहन्यते, उभयत्राविशेषात् । तदयम् अन्तर्बहिरविशेषं ब्रुवन्नेव स्वसंवेदनाद्वैतं वदतीति कथं स्वस्थः ? अथ स्वसंवेदने परमार्थसदिष्यते बहिरर्थपरिहारेण; तर्हि अन्येनापि स्वप्नदृष्टपरिहारेण अन्यदा दृष्टः तथा सन्निष्यतामिति स्थितम्--अर्थविनिश्चयः प्रमाणस्य फलम् इति । स्वनिश्चयः पुनः **अङ्गीकृतात्मसंवित्तेः** सिद्धिवि° १ । १९ इत्यादौ **सिद्धं यन्न परापेक्षम्** सिद्धिवि° १ । २४ इत्यादौ च निरूपयिष्यते । § 75

भवत्वेवं ततः किं स्यादिति चेत् ? अत्राह--**प्रतिपत्तुः** इत्यादि । स्वं च अर्थं च प्रतिपद्यते विषयीकरोतीति प्रतिपत्ता पुरुषः तस्य **अपेक्ष्यं** तेन अपेक्ष्यते स्वपरप्रतिपत्तौ **यत्** ज्ञानं **तदेव प्रमाणम्** । **ननु** नैव **पूर्वकं** तत्कारणं निर्विकल्पकदर्शनं सन्निकर्षादि वा, पूर्वशब्दस्य कारणवाचित्वात् । नहि अन्यतः तत्फलनिष्पत्तौ अन्यत् प्रमाणम्, अतिप्रसङ्गात् । *ननु
20/mkj सुखादि नीलादिज्ञानव्यक्तिव्यतिरेकेण नापरः प्रतिपत्ता अस्ति, तत् कथमुच्यते प्रतिपत्तुः इति चेत् ? न; जीवसिद्धिप्रकरणे अस्य उत्तरनिरूपणं भविष्यति किमौत्सुक्येन ? § 76

/ms का[रिका]याः पूर्वार्धस्य सुगमत्वात् उत्तरार्धस्य सयुक्तिकमर्थं दर्शयन्नाह— **यथास्वम्** इत्यादि । अस्यायमर्थः--**प्रमेयस्य** घटादेः **व्यवसायो** विनिश्चयः नाधिगतिमात्रम् दृष्टे प्रमाणान्तरावृत्तिप्रसङ्गात् । **यतो** यदाश्रित्य यस्माद्वा भवति इत्यध्याहारः **तदेव** नान्यत् प्रमाणम् । **पक्षधर्मतानिश्चयः क्वचित् प्रत्यक्षतः** इत्यत्र यदुक्तं ध र्मो त्त रे ण--**यत्रैव जनयेदेनां त-**

---

८ न्न] संवेदनसिद्धिः ।
८ अर्थानिषेध] धः
१० इति] द्रष्टव्यम् पृ° १२ टि° ७ ।
११ म्] संवेदनाद्वैतवादी ।
१२ ने] नं
१३ र्हि] जैनादिनापि ।
१३ हारेण] जाग्रदवस्थायाम् ।
१९ नु] नतु
२१ *] प्रतिभासाद्वैतवादी प्रज्ञाकरः प्राह । तुलना--तस्मात् सुखादिनीलादिव्यतिरिक्तमपरमिह जगति संवेदनं नास्तीति सुखादिवत् स्वसंवेदनं नीलादिकमपि इति युक्त एष निर्णयः ।--प्र° वार्तिकाल° ३ । ५०८ ।
२८ ना] सन्निकर्षादि ।
२९ इ] तुलना--पक्षधर्मश्च यथास्वं प्रमाणेन निश्चितः--प्र° वा° स्व° पृ° १८ । तत्र पक्षधर्मस्य साध्यधर्मिणि प्रत्यक्षतोऽनुमानतो वा प्रसिद्धिः--हेतुबि° पृ° ५३ ।
२९ य] यस्मिन् नीलाद्यंशे ।
२९ येदेनां] सविकल्पबुद्धिम् ।

**त्रैवास्य प्रमाणता** इति तद् व्येति, एतद् एवकारेण दर्शयन्ति । न हि प्रमेयव्यवसायः तदाश्रित्य ततो वा भवति इति, यद्वक्ष्यते अत्रैव--**अभेदात् सदृशस्मृत्याम्** सिद्धिवि° १ । ७ इत्यादि । भवतु वा निर्विकल्पदर्शनात् तद्व्यवसायः, तथापि तन्न प्रमाणमिति दर्शयन्नाह--**स्वतः** इति । [स्वतः] स्वात्मनो न परम्परया विकल्पजननात्, उक्तदोषात् ***तस्याश्चेद्** सिद्धिवि° १ । २ इत्यादिकाद् वक्ष्यमाणकाच्च **अनुमानेऽप्येवं प्रसङ्गात्** इत्यस्मात् । एतेन सन्निकर्षादिरपि चिन्तितः । यदि तर्हि स्वतो यतः प्रमेयव्यवसायः तत् प्रमाणम्, परोक्ष-ज्ञानानुरप्रत्यक्ष-प्रधानपरिणामज्ञानतः [न] स्वतः सदेव प्रमाणं स्यात्; इत्यत्राह--**यथास्वम्** इति । स्वशब्दोऽयं ज्ञानात्मवाचक इति, तस्य अनतिक्रमेण **यथास्वं** स्वव्यवसायेन सह तद्व्यवसायो यत इत्यर्थः ।

§ 77

*अन्ये तु अन्यतावतार्य एतद् व्याचक्षते--यदि तद्व्यवसायो यतो भवति तदेव प्रमाणम् सर्व[ज्ञ]ज्ञानमेव प्रमाणं स्यादिति; अत्राह--**यथास्वम्** इति /ms
। यद्यस्य ज्ञानस्य स्वग्रहणयोग्यं तस्य अनतिक्रमेण इति । तत्र प्रमातुं शक्यं योग्यं **स्वप्रमेयम्** इत्यनेन गतेः । ननु मा भूत् तज्ज्ञानं प्रमाणम्, रस्यात् तारानिकरमिव चैतन्यस्वभावे पुंसि प्रमेयस्य अवभासनात् स एव प्रमाणमिति चेत्; अत्राह--**ज्ञानम्** इति । **मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम्** त° सू° १ । ९ **तत्प्रमाणम्** न पुमान् तस्य प्रमातृत्वात् नित्य[त्व]प्रतिषेधाच्च । ननु तद्व्यवसायफलं न ज्ञानं प्रमाणम् अपि तु *स्वकारणार्थाकारमिति चेत्; न; जलाद्यारोपहेतोर्मरीचिकादिदर्शनस्यापि प्रमाणतापत्तेः, ततोऽपि *सम्यग्ज्ञानपूर्विका सकलपुरुषार्थसिद्धिः स्यादिति मरीचिकाद्यर्थिनो...दिप्रसर्पणादिति गानुसरणमयुक्तं स्यात् न चैवं तदनुसरणमयुक्तम् स्यात् । न चैवं तदनुसरणदर्शनात् । अथ जलादिज्ञानमेव नापरं तत्समानकालभावि पूर्वकालभावि वा मरीचिकादिदर्शनम्; किं पुनरिदं प्रमादभाषितम्--**नो** 21/mkj
**चेद् भ्रान्तिनिमित्तेन** प्र° वा° ३ । ४३ इत्यादि । तथा नीलादिविक-

---

१ त्रैवास्य] निर्विकल्पस्य ।
२ त] निर्विकल्पदर्शनात् ।
२ अत्रैव] ग्रन्थे ।
४ त] प्रमेयनिश्चयः ।
८ प] परोक्षज्ञानवादिनो मीमांसकाः, ज्ञानान्तरप्रत्यक्षज्ञानवादिनो नैयायिकाः, प्रधानपरिणामज्ञानवादिनः सांख्याः ।
८ ज्ञानानुर] नान्तर
१२ *] टीकाकाराः ।
१२ ता] थाऽ
१२ दि] स्वपरव्यवसायः ।
१५ स्यात्] सरस्यां
१६ स] पुरुष एव ।
१९ त] तद्व्यवसायः प्रमेयनिश्चयः फलं यस्य तत् ।
१९ *] स्वकारणभूतस्य अर्थस्य आकारधारकं यज्ज्ञानं तत्प्रमाणमित्यर्थः ।
२० त] मरीचिकादर्शनादपि ।
२१ *] तुलना--सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति...--न्यायबि° १ । १ ।
२२ स्यात्] ?
२२ न] न चैवं तदनुसरणमयुक्तं स्यात् इति व्यर्थमत्र पुनर्लिखितम् ।
२५ इ] नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम् । शुक्तौ वा रजताकारः रूपसाधर्म्यदर्शनात् ॥--प्र° वा° ३ । ४३ ।

ल्पात् त्त्राक्  नापि सह निरंशदर्शनमिति इदमपि प्रपादप्रभाषितम्— **मनसोर्युगपद्वृत्तेः** प्र० वा० २ । १३३ इत्यादि । भवतु तद्धेतुस दर्शनम्, न तु तत्प्रमाणम् अप्रवृत्तिहेतुत्वात्, अन्यत् प्रमाणं विपर्यायादिति चेत्; अत्राह--**अन्यत** इत्यादि । स्वार्थविनिश्चयफलाद् यदन्यत् परस्तं ततो  या /ms **प्रवृत्ति**सत्यां  विषयभूतायां यो**ऽविसंवादो**ऽविप्रतिपत्तिः तस्य **नियमेन** अवश्यंभावेन **अयोगात्** । न हि लौकिकाः प्रतिपरमाणुभिन्ननिरंशदर्शनाद् वयं प्रवृत्ताः प्रवर्त्तामहे प्रवर्तिष्यामहे इति प्रतिपद्यन्ते । अभ्यासावस्थायामपि स्थूलस्यैकस्य तद्ग्रहणावयवव्यापिनो जलादेर्दर्शनात् । ननु तत्फलादपि न दृश्यमाने प्रवृत्तिः; अनुभूयमानत्वात्, नापि भाविनि अप्रतिभासनादिति चेत्; न; पशूनामपि तृणादौ प्रवृत्तिदर्शनात् । निरूपयिष्यते चैतत् **व्यवसायात्मनो दृष्टेः** सिद्धिवि० १ । ५ इत्यादौ । भवतु श  दर्शनात् प्रवृत्तिः तथापि तन्न प्र[माण]म्; अन्यथा मरीचिकाजलज्ञानमपि स्यात् । अविसंवादि प्रमाणमिति चेत्; अत्राह--**अन्यत** इत्यादि । **अन्यतो**ऽविकल्पदर्शनात् **प्रवृत्तौ** सत्यां यो**ऽविसंवादः** दृष्टार्थप्राप्तिः तस्य **नियमेन अयोगो** निरंशक्षणिकपरमाणुदर्शनात् स्थूलैकस्थिरप्राप्तेः । ननु व्यवसायफलादपि प्रवृत्तौ न दृष्टस्य प्राप्तिरस्ति तत्काले तदत्ययादिति चेत्; न; चित्रैकज्ञानवत् दृश्यप्राप्ययोः कथञ्चिदेकत्वस्याविरोधादिति । करिष्यते अत्र...स्नः **पश्यन् स्वलक्षणान्येकम्** सिद्धिवि० १ । १० इत्यादौ । § 78

ननु माभूत् क्षणिकनिरंशत्वादौ तदविसंवादः, दृश्य-प्राप्ययोः एकत्वारोप्यन्नीलादौ स्यादिति चेत्; अत्राह--**अन्यत** इत्यादि । **अन्यत** इति /ms व्याख्यातार्थम्, **प्रवृत्तौ** इति च, अनन्तरम् **अविसंवादस्य यो नियमः** सर्वत्र दर्शनगोचरे भावः तस्या**ऽयोगात्** नीलादौ योगो न पूर्वापरक्षणविवेके । व्यवहारिणं प्रति तत्रापि तदविसंवादेन अभ्यासे प्रत्यक्षं भाविनि प्रमाणं भवेत्, अन्यथा प्रतिपन्नव्यभिचारस्य शङ्के पीतज्ञानं प्राप्ये संस्थाने प्रमाणमिति व्यर्थकमिदमनुमानं नाम--**एवं प्रतिभासो यः** प्र० वार्तिकाल० पृ० ५

---

१ त्राक्] न प्राक्

२ इ] मनसोर्युगपद्वृत्तेः सविकल्पाविकल्पयोः । विमूढो लघुवृत्तेर्वा तयोरैक्यं व्यवस्यति ॥--प्र० वा० २ । १३३ ।

२ द्धेतुस] स्त

४ तो] परस्ततो

५ त्यां] स्तस्यां

८ पि] स्वार्थविनिश्चयफलादपि ।

११ श] वा

१६ त] प्रवृत्तिकाले ।

१६ त] क्षणिकत्वेन तद्विनाशात् ।

१७ स्नः] प्रश्नः

१९ त] निर्विकल्पकदर्शनस्य अविसंवादः ।

२० त्वारोप्य] पा

२१ च] व्याख्यातार्थम् ।

इत्यादि । भवतु तत्रैवः तद्योगः तत्रैव प्र[मा]णं स्यात् नान्यत्र इत्येकस्य प्रमाणेतरभावः । व्यवहारतः सोऽप्यस्तु इति चेत्; किं पुनरिदं व्यवहाराद-न्यत्र चिन्तितम्--**प्रत्यक्षं कल्पनापोढम्** प्र० वा० २ । १२३ इत्यादि । तथा चेत्; *चातुर्विध्यकथनमयुक्तम् परमार्थ[तः]तदसंभवात् । अतोऽयुक्तमेत-त्— **न ह्याभ्यामर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां विसंवाद्यते** इति 22/mkj । **अभ्यासे भाविनि प्रवर्त्तकत्वात् प्रत्यक्षं प्रमाणम्** इति च । ननु मा भूत् दर्शनं साक्षात् प्रवर्तकम् अविसंवादकं वा, तथापि तथाविधविकल्प-जननात् तदपि तथाविधमिति चेत्; अत्राह--**तद्धेतुत्वम्** इत्यादि । ननु च **तस्याश्चेत् जननात्** सिद्धिवि० १ । २ इत्यादिना **प्रमेयव्यवसायः स्वतो यतः तदेव ज्ञानम्** सिद्धिवि० १ । ४ इत्यन्तेन अयमर्थ उक्तः, तत् किमनेनेति चेत्; न; [समा]ध्यन्तरप्रतिपादनार्थत्वाददामः । तथाहि--**तस्य** यथोक्तस्य विकल्पस्य **हेतुः** कारणम् तस्य भावः तत्त्वं **दर्शनस्य** यन्नत् **सन्निकर्ष आदिर्यस्य** इन्द्रियादेः तस्येव **तद्वत्** । एतदुक्तं भवति--यथा चक्षुःश्रोत्रम-नसाम् अप्राप्यकारित्वात् तज्ज्ञानं प्रति सन्निकर्षस्य सत्यस्वप्रज्ञानं प्रति /ms इन्द्रियस्य अकारणत्वात् न तत्र सन्निकर्षादेर्मानता अपि तु ज्ञानस्यैव तथा यत् सत् तत्सर्वं क्षणिकम् इति व्याप्तिज्ञानं प्रति न दर्शनस्य कारणता तत्र तदभावात् न तत्र तत् प्रमाणम् अपि तु विकल्प एव । अथ दर्शनमस्ति; तर्हि ततः सर्वस्य दर्शनात् सर्वस्य सर्वदर्शित्वमनुपायसिद्धम्, कथमन्यथा तस्य क्षणिकत्वेन व्यप्तिप्रतिपत्तिः--**द्विष्ठसम्बन्धप्रतिपत्तिः** प्र० वार्तिकाल० २

---

१ इ] पीतशङ्खादिविज्ञानं तु न प्रमाणमेव तथार्थक्रियावाप्तेरभावात् । संस्थानमात्रार्थक्रियाप्रसिद्धावन्यदेव ज्ञानं प्रमाणमनुमानं तथाहि प्रतिभास एवम्भूतो यः स न संस्थानवर्जितः । एवमन्यत्र दृष्टत्वादनुमानं तथा च तत् ॥ येन कदाचिद् व्यभिचार उपलब्धः स यथाभिप्रेते विसंवादाद् विसंवाद्यत एव । यस्तु व्यभिचारसंवेदी स विचार्य प्रवर्तते संस्थानमात्रं तावत् प्राप्यते परत्र सन्देहो विपर्ययो वा । ततोऽनुमानं संस्थाने संशयः परत्रेति प्रत्ययद्वयमेतत् प्रमाणमप्रमाणं च ।--प्र० वार्तिकाल० पृ० ५ ।

१ त्रैवः] यत्रैव

१ द्योगः] अविसंवादसद्भावः ।

३ इ] प्रत्यक्षेणैव सिद्ध्यति । प्रत्यात्मवेद्यः सर्वेषां विकल्पो नामसंश्रयः ॥ इति शेषः ।

४ *] तच्चतुर्विधम्--न्यायबि० १ । ७ । इन्द्रियमानसस्वसंवेदनयोगिप्रत्यक्षभेदात् ।

५ ह्या] प्रत्यक्षानुमानाभ्याम् । उद्धृतमिदम्--तत्त्वोप० पृ० २९ । सन्मति० टी० पृ० ४६८ । न्यायवि० वि० प्र० पृ० २५६, ५३२ ।

६ इ] तुलना--यत्रात्यन्ताभ्यासादविकल्पयतोऽपि प्रवर्तनं तत्र प्रत्यक्षं प्रमाणम् ।--प्र० वार्तिकाल० पृ० २१८ ।

७ त] अविसंवादिप्रवर्तकविकल्पोत्पादकत्वात् ।

८ त] प्रत्यक्षमपि ।

९ इत्यादिना] इति प्रारभ्य ।

१० न्तेन] इति पर्यन्तेन ।

११ दामः] ददोषः

१२ त्] यत्तत्

१४ अ] सन्निकर्ष विनापि ज्ञानोत्पादकत्वात् । अप्राप्तान्यक्षिमनःश्रोत्राणि--अभिध० को० १ । ४३ ।

१५ ता] प्रमाणता ।

१६ त] व्याप्तिविषये ।

१७ त] निर्विकल्पदर्शनस्याभावात् सर्वविषयत्वाद् व्याप्तेः

१७ त्र] निर्विकल्पदर्शनम् ।

१७ स्ति] सर्वोपसंहारवति व्याप्तिविषये ।

१९ त] सर्वस्य ।

। १ इत्यादि वचनात् । प्रादेशिकी न च व्याप्तिः । अथेयमपि नेष्यते; कथमनुमा नं यतो द्वे प्रमाणे स्याताम् ? व्यवहारेण तदङ्गीकरणात् अशेषश्चेत्; तर्हि व्यवहारेण उपगतेर्यथा प्राप्ये भाविनि प्रमाणमुपगतं तथा तत्र अभ्युपगन्तव्यं तदर्था मार्गभावना व्यर्था, तद्भावनाया अनुमानरूपायाः तस्य प्रागपि भावात् । संवृतिविकल्पश्चेत्; सिद्धं सन्निकर्षादिवत् तस्य तं प्रत्यव्यापिहेतुत्वम् । ततो यथा सन्निकर्षादिपरिहारेण सर्वत्र दर्शनामेव अतः प्रमाणं तथा अत एव दर्शनपरिहारेण विकल्प एव प्रमाणम् । § 79

अथवा यदुक्तं प्र ज्ञा क रे ण--**भाविनि प्रवर्त्तकत्वात् साक्षाद् अभ्यासे दर्शनं प्रमाणम् अनभ्यासे तत्रानुमानजननात्** इति; तत्राह--**तद्धेतुत्वं पुनः** इत्यादि । **तस्य** अनुमानविकल्पस्य **हेतोर्दर्शन**स्य भावः **तत्त्वं पुनः** इति उभयत्र पक्षान्तरसमुच्चये सन्निकर्षादेरिव तद्वदिति । यथैव हि इन्द्रियार्थ- /ms सन्निकर्षादिः अनुमानस्य न हेतुः तथा दर्शनमपि । यदि पुनरचेतनत्वात् नेन्द्रियादि तद्धेतुः; कथं दर्शनस्य चेतनत्वम् ? स्वतः प्रतिभासनाच्चेत्; न; शरीरसुखादिनीलादिव्यतिरेकेण परेण तत्प्रतिभासानभ्युपगमात्, शरीरादिप्रतिभासस्य विकल्पकत्वमिति निरूपयिष्यते इति परस्य पाशारज्जू । अथ 23/mkj अन्यस्य अभ्युपगमाच्चे तनत्वम्; सुखादेः अचेतनत्वं तथा स्यात् सांख्येन तदभ्युपगमात् । तन्न दर्शनं सन्निकर्षादिवत् अनुमानविकल्पकारणमिति स्थितम् । § 80

तत्तु अभ्रान्तत्वात् सर्वत्र दर्शनमेव प्रमाणं न विकल्पो विपर्ययादिति चेत्; अत्राह--**अभ्रान्तत्वेऽपि** इत्यादि । अस्यायमर्थः--तद्दर्शनं स्थूलस्तम्भाद्याकारेण अभ्रान्तं चेत्; **दूरस्थितविरलकेशेषु स्थूलप्रतिभासेन व्यभिचारात् न तथा प्रतिभासाद् अवयविसिद्धिः** *इत्यस्य **सर्वमालम्बने भ्रान्तम्** प्र° वार्तिकाल° ३ । १९६ इत्यस्य च व्याघातः । कल्पनापोढत्वं च दुर्लभं तस्य सवि[कल्प]कत्वात् । अथ तेन भ्रान्तम्; अन्यस्य अभ्रान्तस्य अभावाद् अभ्रान्तमिति अनर्थकत्वान्न वाच्यम् । अथ व्यवहारेण तदुक्तम्;

---

१ इ] नैकरूपप्रवेदनात् । द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम् ॥ इति शेषः ।

३ अशे] अदो

४ त] क्षणिकत्वादौ ।

४ र्था] नैरात्म्यमार्ग ।

६ ना] न

९ इ] तुलना--यत्र भाविगतिस्तत्रानुमानं मानमिष्यते । वर्तमानेऽतिमात्रेण वृत्तावध्यक्षमानता ॥--प्र° वार्तिकाल° पृ° २१८ ।

१४ प] बौद्धेन । दृष्टव्यम्--पृ° १९ टि° १४ ।

१६ अथ] जैनस्य ।

१६ माच्चे] दर्शनस्येति शेषः ।

१९ त्तु] [[बौद्धः ।]]ननु

२२ *] यथैव केशा दवीयसि देशेऽसंसक्ता अपि घनसन्निवेशावभासिनः परमाणवोऽपि तथेति न विरोधः ।--प्र° वार्तिकाल° पृ° २९६, २८७ । परस्परविविक्ताणु प्रथमप्रतिभासनम् । विकल्पकात्तु विज्ञानात् घनाकारावभासिता ॥--प्र° वार्तिकाल° पृ° ३३६ ।

२४ भं] दर्शनस्य ।

२४ तेन] आलम्बनेन ।

२५ अभावाद्] प्रत्यक्षलक्षणे अभ्रान्तमिति पदम् ।

२५ हारेण] अभ्रान्तमिति पदमुक्तम् ।

विषयस्तस्य वक्तव्यः ? जायत्संभादिः इति चेत्; उक्तमत्र--कल्पनापोढत्वं दुर्लभमिति परस्य निकटे सङ्कटप्रवेशः इति **स न लभते** तत्त्वविवेचनविकटाटवीम् । *यदि तु तन्न तस्य तत्राभ्रान्तत्वं नाम । अभ्युपगम्य उच्यते **अभ्रान्तत्वेऽपि, अन्यतः** इत्यनेन लब्धतापरिणामेन सम्बन्धाद् अन्यस्य /ms इति गम्यते । कथं तत्का इत्यत्राह--**सर्वथा** इति । नीलादिप्रकारेणेव पूर्वोत्तरक्षणविवेकादिप्रकारेणापि **सर्वथा** । तस्मिन् सति किम् ? इत्यत्राह --**निर्णयवशात् प्रामाण्यसिद्धेः** अन्यस्य प्रमाणत्वस्थितेः कारणात् **तत्त्वात्मकत्वं** निर्णयात्मकत्वं **तत्त्वसिद्धेः** अभ्रान्तबुद्धेः प्रमाणस्य **अभ्युपगन्तव्यम्** । कथं प्रामाण्यसिद्धिः ? इत्यत्राह--**कथञ्चित्** इति । **कथञ्चित्** नीलादिप्रकारेण न प्रतिक्षणपरिणामादिप्रकारेण, तत्र व्यवहारिणो दर्शनव्यवहाराभावात् । न दि स यस्यन् प्रतिक्षणपरिणामादिकं पश्यामि इति मन्यते, तदनुमानवैकल्यप्राप्तेः, तद्व्यवहारसमारोपयोर्विरोधात् न तद्व्यवच्छेदकरणात् तदर्थवत् । अथ व्यवहारमुल्लङ्घ्य तेनापि प्रकारेण तत्सिद्धिरिष्यते गतमिदम्--**प्रामाण्यं व्यवहारेण** प्र° वा° १ । ४ इत्यादि । न च परमार्थप्रतिभासाद्वैते क्षणभङ्गादिसंभवः; सर्वविकल्पातीतत्वेन तदभ्युपगमात् । ततो यथा व्यवहारेण क्षणभङ्गादभ्युपगमः तथा तेनैव तत्र दर्शनम प्रमाणयितव्यमिति साधूक्तम्--**कथञ्चिदिति** । नन्वयमर्थः **अन्यतः** इत्यादेः तृतीयव्याख्यानेन दर्शितः तत् किमनेनेति चेत्; न; पूर्वं **प्रमाणमविसंवादि** प्र° वा° १ । १ इत्यस्यापेक्षया, इदानीं **कल्पनापोढमभ्रान्तम्** न्यायबि° १ । ४ इत्यस्यापेक्षया इत्यदोषः । उभयमप्येतत् निर्णये नान्यत्र इति मन्यते । § 81

ननु यदि तत्त्वसिद्धिः तदात्मकत्वं न स्यात् को दोष इति चेत् ? अत्राह--**अभ्यसे** * त्यादि । तत्त्वसिद्धेर्निर्णयात्मकत्वप्रकाराद् अन्येन अविकल्पकत्वप्रकारेण **अन्यथा तदफलम् अन्यतः** इत्येतदनुवर्त्तमानं वात्तमिह संपद्यते 24/mkj । तदन्यदफलम् अविद्यमानप्रयोजनं क्वचिदनुपयोगात् । अत एव **असाधनमप्रमाणम्** । एतदपि कुतः ? इत्यत्राह--**असतः** खरविषाणादे **र्न विशेष्येत** न भिद्येत यतोऽन्यथा इत्यनेन सम्बन्धः । § 82

---

१ त्संभादिः ] जाग्रत्स्तम्भादिः
२ त्वं ] जाग्रत्स्तम्भादिविषयत्वे हि तस्य विकल्पकत्वं स्यादिति भावः ।
२ टे ] विकट
३ *] यदि तु इत्यधिकं भाति ।
४ ता ] ता इति षष्ठीविभक्तेः संज्ञा ।
५ त्का ] तथा
७ त्त्वा ] तदा
११ दि ] हि
११ न् ] पश्यन्
११ त ] क्षणिकत्वानुमान ।
१२ वैक ] फ
१२ न ] समारोपव्यवच्छेद ।
१५ त ] प्रतिभासाद्वैतस्वीकारात् । ननु सर्वप्रत्ययप्रलय एवायं प्रवर्तते नात्र प्रतीतेरुदयः ।--प्र° वार्तिकाल° पृ° २९३ ।
१६ ङ्गाद ] द्य
१६ था ] व्यवहारेणैव ।
१६ म ] नं
२१ सिद्धिः ] द्धेः
२१ त ] निर्णयात्मकत्वम् ।
२२ *] अन्यथे
२३ वात्त ] [[वा इति प्रथमाविभक्तेः संज्ञा । वान्तं प्रथमान्तमित्यर्थः । अन्यतः इति पञ्चम्यन्तं पदं अन्यत् इति प्रथमान्तरूपेणात्र सम्बद्ध्यते इति भावः ।]]वान्त

ननु निर्णयात्मकत्वं नाम स्वार्थ ग्रहणात्मकत्वमिति चेत्, तदसंभाव्यमिति चेत्; अत्राह— **अकिञ्चित्कर** इत्यादि । न किञ्चित् करोतीति अकिञ्चित्क-रम् स्वापादिदर्शनं **सिद्धं यन्न परापेक्ष्यम्** सिद्धिवि° १ । २४ इत्यादि कारिकावृत्तौ प्रतिपादयिष्यमाणं **संशयः** स्थाणुर्वा पुरुषो वेति ज्ञानम्, **विप-र्ययः** स्थाणौ पुरुष इति तत्र वा स्थाणुरिति वेदनं तौ करोतीति इति **तत्करम्,** पुनर्द्वन्द्वः तयोः **व्यवच्छेदेन** निरासेन **निर्णयात्मकत्वम् नान्यथा ।**
§ 83

ननु तद्व्यवच्छेदो नीलाद्यपेक्षायाम् अविकल्पदर्शनेऽप्यस्तीति चेत्; अत्राह--**अन्यथा** इत्यादि । येन प्रकारेण नीलादौ तद्व्यवच्छेद इति भावः, ततः *__तदात्मकत्वं तत्त्वसिद्धेः अभ्युपगन्तव्यम्__ इति स्थितम् । § 84

ननु च **अज्ञातार्थप्रकाशो वा प्रमाणम्** प्र° वा° १ । ५ इति वचनात् अगृहीतग्रहणाद् दर्शनमेव प्रमाणं न विकल्पो विपर्ययादिति चेत्; अत्राह-
/ms -**अनधिगत** इत्यादि । प्रमाणान्तरेण अप्रकाशि तोऽनधिगतः स चासौ **अर्थश्च** तस्य **अधिगन्तृ** परिच्छेदकं यद् **विज्ञानं** तत् **प्रमाणम् इत्यपि** एव-मपि न केवलं पूर्वप्रकारेण **केवलम्** अन्यानपेक्षा **अनिर्णीतार्थस्य निर्णीतिः अभिधीयते** । अस्यानभ्युपगमे दूषणमाह--**अन्यथा** इत्यादि । उक्तप्रकाराद् अन्यप्रकारेण **अन्यथा** अनधिगतार्थाधिगन्तृ दर्शनमेव प्रमाणमित्यभिधीयते न निर्णयज्ञानमिति मन्यते । **अतिप्रसङ्गात्** नीलादाविव क्षणभङ्गादावपि द-र्शनस्यैव प्रमाणत्वात् तदनुमानमनर्थकं स्यादिति **अतिप्रसङ्गात् अनिर्णीतार्थ-निर्णीतिः अभिधीयत** इति पदघटना । § 85

नन्वयमर्थः **दृष्टे प्रमाणान्तरावृत्तिप्रसङ्गात्** इत्येतेन प्रतिपादयिष्यते त-त्किमनेन ? तस्माद् अन्यथा व्याख्यायते--स्थिरस्थूलस्वगुणावयवात्मकघ-टादिनिर्णीतिरेव अनधिगतार्थाधिगन्त्री प्रतीयते । तद् यदि ततोऽन्यद् अन-धिगतार्थाधिगन्तृ प्रमाणं कल्प्यते तर्हि तस्मादप्यन्यत् तथाविधं तस्मादप्यन्यत् इत्यनवस्था **अतिप्रसङ्गः** तस्माद् **अनिर्णीतार्थनिर्णीतिः अभिधीयते** । § 86

यत्पुनरुक्तम्--**तत्प्रमाणम्** इति । तत्र प्रमीयते अनेन तत् प्रमाणम्, करणकारकम्, तच्च स्वार्थपरिच्छित्तिक्रियां प्रति साधकतममेव युक्तम् । न चेत्कं दर्शयन्नाह--* **अधिगतमात्रस्य** इत्यादि । **स्वकारणार्थाकारदर्शनमात्रस्य** । कथंभूतस्य ? इत्याह— **विसंवादकस्य** निरंशानेकक्षणिकपरमाणुदर्शने
/ms, 25/mkj स्थूलैकस्थिरघटादिप्रापकत्वेन विप्रलम्भ कस्य **साधकतमत्वाऽनुपपत्तेः** कारणात् तन्निर्णीतिरभिधीयते । **विसंवादकस्य** इत्येतद्विशेषणमपि हेतुर्द्रष्ट-व्यः । ततोऽयमर्थो भवति--अधिगतिमात्रं स्वार्थप्रतिपत्तिं प्रति न साधकत-

५ इति] पुरुषे ।
५ इति] इतिपदं द्विर्लिखितमत्र ।
९ नीलादौ] संशयादिव्यवच्छेदः ।
१० *] निर्णयात्मकत्वम् ।
१२ ल्पो] गृहीतग्राहित्वात् ।
१३ अ] अत एवानधिगतविषयं प्रमाणम्--न्यायबि° टी° पृ° १९ ।
१९ त्वात्] सर्वं क्षणिकमित्यनुमानम् ।
२१ ङ्गात्] ज्ञात्
२८ *] न चेत् कदर्थयन्नाह--

मं विसंवादकत्वात् इन्दुद्वयदर्शनवदिति न प्रमाणम् । अतः सैवाभिधीयते । पुनरपि हेत्वन्तरमाह--**साधनान्तरे**त्यादि । अधिगतिमात्रसाधनाद् अन्यत् नीलादौ विकल्पज्ञानं क्षणिकादादनुमानं तदन्तरं तस्य **अपेक्ष्यते** [य]स्य **गोचरस्य** विषय[स्य] । क्वचित् **साधनान्तरापेक्ष्यगोचरस्य** इति पाठसूत्रापि साधनान्तरमपेक्ष्यत इति तदपेक्षो गोचरो यस्य तस्य **साधकतमत्वाऽनुपपत्तेः** तन्निर्णीतिः अभिधीयते । अत्रापि पूर्ववत् **साधने**त्यादि विशेषणमपि हेतुर्द्रष्टव्यः । तद्यथा--अधिगतमात्रं तत्त्वप्रतिपत्तौ न साधकतमं साधनान्तरापेक्षागोचरत्वात् सन्निकर्षादिवत् । ततः सूक्तम्--**अनिर्णीतिरभिधीयते** इति । § 87

ननु निर्णीतेरनधिगतसामान्यार्थाधिगमेऽपि अनधिगतस्वलक्षणाधिगमाभावात् अनधिगमाभावात् **अनधिगतार्थाधिगन्तृ प्रमाणम्** इत्यनेन साऽभिधीयते । तत्र अर्थशब्देन स्वलक्षणाभिधानात् ततो दर्शनमेव अभिधीयत इति चेत्; अत्राह--**तद्** इत्यादि । तेन अधिगतिमात्रेण **अनधिगतस्य** ज्ञानान्तरेण अविषयीकृतस्य **स्वलक्षणस्य** अर्थक्रियासम र्थार्थरूपस्य **अधिगतावपि** परिच्छित्तावपि । अपिशब्दोऽभ्युपगमसूचकः । न खलु अन्येन अधिगतम् अन्यद्वा स्वलक्षणमधिगच्छद् दर्शनं प्रतीयते । तस्यां किं प्राप्तम् ? इत्यत्राह--**दृष्टे दर्शनेन** विषयीकृते नीलादाविव क्षणभङ्गे **प्रमाणान्तरस्य** अनुमानस्य गृहीतग्राहित्वभयाद् **अप्रवृत्तिप्रसङ्गात्** कारणात्तन्निर्णीतिः अभिधीयते । एवं हि अनिश्चितनीलक्षीणकत्वयोर्निश्चयाद् विकल्पानुमानयोः अपूर्वार्थता लभ्यते इति भावः । ननु मा भूद् अनिश्चितक्षणभङ्गनिश्चयात् प्रमाणान्तरं तत्र वृत्तिमत्, अपि तु क्षणिके अक्षणिकज्ञानसमारोपव्यवच्छेदकरणात् स्यादिति चेत्; अत्राह--**समान** इत्यादि । **समाने** सदृशे अत्र **भूते** दर्शनेन दृष्टे यः **समारोपः** विपर्ययज्ञानविशेषः तस्य **व्यवच्छेदे** निरासे *ं**संवृत्यनुमानयोः** दर्शनोत्तरविकल्पानुमानयोः **न कश्चिद् विशेषः** भेदः । अनुमानं चेत्; संवृतिरपि प्रमाणं स्यादित्यर्थः । § 88 /ms

ननु यथा क्षणिके अक्षणिकत्वसमारोपो नैवं नीले अनीलत्वसमारोपो यत्तद्व्यच्छेदाय **समान** इत्याद्युच्यते इति चेत्; अयमत्राभिप्रायः--यथा पूर्वापरक्षणयोः तद्व्याप्तायासमारोपव्यवच्छेदादनुमानमर्थवत् तथा मध्यक्षणे स्थूलैकरूपे **सञ्चितालम्बनाः पञ्च विज्ञानकायाः** इत्यनेन परमाणुदर्शनारोपव्यव-

३ नीलादौ] नीलमिदमित्याकारं विकल्पज्ञानम् ।
३ णिकादाद] दाव
३ नुमानं] सर्वं क्षणिकं सत्त्वादित्यादि ।
३ स्य] तत्
४ रापेक्ष्य] क्ष
४ सू] स्त
८ रापेक्षा] क्ष्य
११ अ] अनधिगमाभावात् इति निरर्थकं भाति ।
१२ नेन] तन्निर्णीतिः ।
१२ धानात्] अनधिगतार्थाधिगन्तृ पदेन ।
२१ रं] क्षणिके ।
२४ *] संवृतिर्विकल्पः ।
२५ चेत्] प्रमाणम् ।
२८ द्व्याप्ताया] त[[तस्मिन् व्याप्तः यः एकत्वारोपलक्षणः समारोपः ।]]द्व्याप्त
२९ इ] सञ्चितालम्बनाः पञ्च विज्ञानकायाः इति सिद्धान्तः ।--प्र॰ वा॰ मनो॰ २ । १९४ ।

च्छेदात् संवृतिरपि अर्थवती स्यादिति । मरीचिकायां तोयसमारोपव्य- /ms वच्छेदाद्वा तयोः विशेषं दर्शयन्नाह परः— **साक्षात्** इत्यादि । **साक्षाद्** अव्यवधानेन **अनुभवाद्** दर्शनाद् **उत्पत्तिः** नार्थात्संवृतेः इति अनुभवान्कृत् 26/mkj प्रवृत्तिविषयानुकरणात् न तस्या भिन्नो व्यापार इति मन्यते । अत्रोत्तर- माह--**महानपराधः** । उपहासपदमेतत्, अल्पीयसोऽप्यपराधस्य अभावेऽपि अभिधानात् । ततः तदुत्पत्तौ नितरामर्थविषयत्वसिद्धेः अनुमितेरिव अर्थप्र- तिबन्धाद् एकविषयत्वञ्च न विरोधि सर्वज्ञेतरज्ञानवत् सन्तानविरोधिसर्वज्ञोत- रज्ञानवत् । सन्तानभेदोऽत्रापि व्यवहारश्च । **प्रतिपत्तुः** इत्याद्युपसंहरन्नाह-- **प्रतिपत्तुः** इत्यादि । **उत्तरं** विकल्पज्ञानं **प्रमाणं तस्य** उत्तरस्य **साधनभावात्** हेतुत्वात्, ननु नैव **पूर्वकं** सन्निकर्षदर्शनादि प्रमाणमिति । कुत एतत् ? इत्यत्राह--**अनुमानेऽपि** इत्यादि । न केवलं विकल्पे किन्तु **अनुमानेऽपि एवम्** उक्तवत् **प्रसङ्गात्** तत्रापि साधनावभास्येव ज्ञानं तत्कारणं प्राप्ये प्रमाणं स्यात् नानुमानम् । प्रमेयाविषयीकरणम् अन्यत्रापि इति भावः ।
§ 89

यदुक्तं प्र ज्ञा क रे ण--**अभ्यासे दर्शनमविकल्पकम् अन्यदा अनुमानं प्रवर्त्तकत्वात् प्रमाणम्** । **निर्णीतिः पुनः क्वचिदप्यनुपयोगात् पक्षान्तरासंभ- वादप्रमाणता** । इति । § 90

तत्र अनभ्यासे सति अभ्यास इति अनभ्यासे निर्णीतेः उपयोगं दर्श- यन्नाह--**व्यवसायात्मन** इत्यादि । § 91

...4 व्यवसायात्मनो दृष्टेः संस्कारः स्मृतिरेव वा ।
दृष्टे दृष्टसजातीये नान्यथा क्षणिकादिवत् ॥ ४ ॥§ 93

दर्शनाभ्यासपाटवप्रकरणादेः दृष्टसजातीयसंस्कारस्मृतिप्रबोधे स्वभावव्य- वसायमन्तरेण क्षणभङ्गादावपि लिङ्गानुसरणमनुपपन्नं तदविशेषान्नीलादिवत् ।
§ 94

२ च्छेदाद्वा] संवृत्यनुमानयोः ।
४ वान्कृत्] वानुकृत
७ स] सन्तानविरोधिसर्वज्ञोतरज्ञानवत् इति द्विरुक्तं भाति, निरर्थकश्च ।
१५ य] हेयोपादेयविषये प्रवर्तकं हि प्रमाणमुच्यते । तत्र च प्रवर्तने धीरेव प्रधानम् । यद्यपि नाम भाव्यर्थो न प्रतिपन्नस्तथापि तत्र प्रवर्तनात् प्रमाणं यथानुमानस्याग्रहणेऽपि [[प्रामाण्यं]] न ह्यनुमाने वस्तुस्वरूपस्वीकार इति प्रतिपादयिष्यते । न च चक्षुरादिकात् प्रवर्तते ज्ञानमन्तरेण, विकल्पमन्तरेणापि बुद्ध्या अभ्यासात् प्रवर्तते । ततो हेयोपादेयविषये धीरेव पूर्विका प्रवर्तनात् प्रमाणं न विकल्पादयः । यत्र तु नाभ्यासस्तत्र अनुमानमेव [न] प्रत्यभिज्ञानादयोऽतो नातिप्रसङ्गः ।--प्र॰ वार्तिकाल॰ पृ॰ २२, २१८ ।
२० व्य] उद्धृतोऽयम्— प्रमाणप॰ पृ॰ ५४ । व्यवसायात्मनो दृष्टेः संस्कारः इत्यंशः न्यायवि॰ वि॰ प्र॰ पृ॰ ४९३, ५२१ ।

अस्यायमर्थः--सुखसाधनस्य सुखसच पूर्वं या **दृष्टिः** तस्याः **संस्कारः** स्मृतिबीजम् आत्मपरिणमो जायते इत्यध्याहारः । **स्मृतिर्वा** स्मरणं च /ms दृष्टेर्जायते इति । ननु दृष्टिः * संस्कारः, ततः स्मृतिर्न दृष्टिः इति चे[त्; न;] उत्तरदृष्टेः संस्कारसहकारिणः तदुद्भवाददोषः । नन्वेकोऽयं दृष्टिशब्दः कथममुमर्थं प्रतिपादयति ? आवृत्त्याभिसम्बन्धाद् एकस्या दृष्टेः उभयत्र व्यापाराद् भेदावगतिः । क्व पुनः स्मृतिः तद्धेतुश्च दृष्टिः प्रवर्तत इति चेत् ? अत्राह— **दृष्ट** इति । संस्कारहेतुदृष्ट्या विषयीकृतो दृष्टोऽर्थ उच्यते । तत्र उत्तरा दृष्टिः तत्कार्यभूता स्मृतिः प्रवर्तते, कथमन्यथा अयं मया दृष्टः इति प्रतीतिः ? अनेन पूर्वोत्तरदर्शनसंस्कारस्मृतीनाम् एकविषयत्वं दर्शयति । तथा **दृष्टसजातीये** दृष्टश्चासौ उत्तरव्यक्त्यपेक्षया सजातीयश्च तत्र **संस्कारः** । स कुतः ? इत्यत्राह--**दृष्टेः** इति । यत्र संस्कारः । तद्दर्शनात् तत्रैव च स्मृतिः । सापि कुतः ? इत्यत्राह--**दृष्टेः** इति । सा क्व ? इत्यत्राह--**सजातीये** दृष्टेन पूर्वदर्शनविषयेण सजातीये सदृशे उत्तरस्व- 27/mkj व्यक्तिविशेषे । एतदुक्तं भवति--एकदा जलव्यक्तिं स्नानादिहेतुमुपलब्धवतः तत्राहितसंस्कारस्य पुनः तत्सदृशव्यक्तिदर्शनात् तत्समाने दृष्टे **स्मृतिः** इति । अनेन पूर्वोत्तरदर्शनसंस्कारस्मृतीनां सदृशविषयत्वं कथयति । § 95

अन्ये तु **दृष्टे संस्कारः दृष्टजातीये स्मृतिः** इति व्याचक्षते । तेनायमर्थो लभ्यते न वेति चिन्त्यम् । § 96

किञ्च, यदि दृष्टे संस्कारः, स्मृत्यापि तत्रैव भवितव्यम् **अनुभूते स्मृतिः** इति वचनात् । नहि पूर्वसमुद्रदर्शनाहितसंस्कारस्य तत्सदृशे पश्चिमसमुद्रे स्मृतिर्युक्ता । कथंभूतायाः दृष्टेः ? इत्यत्राह--**व्यवसायात्मनो** निर्ण- /ms यात्मिकाया एव । कुत एतत् ? इत्यत्राह--**नान्यथा** अन्येन निर्विकल्पकप्रकारेण या दृष्टिः तस्याः न संस्कारः स्मृतिर्वा । क्वेव ? इत्यत्राह--**क्षणिकादिवत्** । आदिशब्देन निरंशत्वादिपरिग्रहः, तत्रेव तद्वदिति । ननु च तस्याः संस्कारः स्मृतिरेव इति वक्तव्यम्, किं **वा**शब्देन, तमन्तरेण समुच्चयगतेः ? न; अनुक्तसमुच्चयार्थत्वाददोषः । अनुक्तं हि अनेन प्रत्यभिज्ञोहानुमानादिकं समुच्चीयते । ततोऽयमर्थो लभ्यते--पूर्वसुखसाधनदर्शनाहितसंस्कारस्य पुनस्तस्य तत्समानस्य वा दर्शनाद् दृष्टे स्मृतिः, ततस्तदेवेदं तेन सदृशमिति वा प्रत्यभिज्ञानम्, ततोऽपि पूर्ववद् एतत् सुखसाधनस-

---

१ स] स्य
३ दृ] दर्शनात् ।
३ *] ष्टेः
३ दृष्टिः] [[साक्षात् स्मृतिरुत्पद्यते ।]]ष्टेः
५ दृष्टेः] दृष्टिशब्दस्य ।
१७ अ] व्याख्यातारः ।
१९ त] दृष्ट एवार्थे ।
२० इ] अनुभूते हि स्मृतिः--हेतुबि° टीकालो° पृ° २६९ । तदित्याकाराऽनुभूतार्थविषया स्मृतिः--प्रमाणप° पृ° ६९ । अनुभूतविषयासंप्रमोषः स्मृतिः— योगसू° १ । ११ ।
२५ त] दृष्टेः ।
२६ त्वाद] वा शब्दस्य ।
२८ स्य] पुंसः ।
२८ त] स्मृतेरनन्तरम् ।

मर्थम् इति तर्कः, अस्मादपि अनुमेये प्रवर्तमानस्य सुखप्राप्तिर्भविष्यति इत्यनुमानम्, ततः प्रवृत्तिः अर्थप्राप्तिरिति । वक्ष्यते च-- § 97

*अक्षज्ञानैरनुस्मृत्य प्रत्यभिज्ञाय चिन्तयन् ।
आभिमुख्येन तद्भेदान् विनिश्चित्य प्रवर्तते ॥ सिद्धिवि॰ १ ।
२८ इति ।§ 99

ननु च यदुक्तं सुखस्य तत्साधनस्य च दृष्टेः संस्कार इति; तत्रेदं चिन्त्यते--इदं सुखसाधनम् अस्माद् इदं सुखम् इति कुतः प्रतीयते ? न तावत् तत्साधनदर्शनात्; तत्काले सुखानुद नुत्पन्नं च निंतेन गृह्यते । नापि सुखदर्शनात्; अस्यापि समये तत्साधनात्ययात् । नापि तत्समुदायेन; क्रमभाविनोः तदभावात् । पूर्वोत्तरकालभाविदर्शनमेकं विप्रतिषिद्धम्, सर्व-
/ms वस्तुनः क्षणिकत्वात् । अथ अस्माद् इदमु त्पद्यते इति आत्मा प्रतिपद्यते; सोऽपि यदि सत्तामात्रेण,...तव्य इति [सुप्तमूर्च्छितादिष्वपि] प्रसङ्गः । अथ दर्शनपर्यायात्; पूर्ववत् प्रसङ्गः । तन्न सुखतत्कारणयोः दर्शनात् तद्भावसिद्धिः । नाप्यनुमानात्; तस्य तत्पूर्वकत्वेन तदभावे अभावात् । एतेन पूर्वदर्शनादेः उत्तरोत्तरसंस्कारादिजन्मप्रतिपत्तिः निरस्तेति । § 100

अत्र प्रतिविधीयते--सुखसाधनदर्शनस्य तद्ग्रहणाभिमुख्यमजहत एव सुखग्रहणपरिणामोपपत्तेः अप्रतिषेधः । वक्ष्यते चैतदत्रैव द्वितीयप्रस्तावे-- **पूर्वपूर्वस्य स्वविषयग्रहणानुबन्धमजहत एव उत्तरोत्तरं प्रति साधकतमत्वात्**
28/mkj **स्मार्तज्ञानवत्** । सिद्धिवि॰ २ । १५ इति । न चेदमप्रातीतिकम्, अस्माद्भावात् मे सुखभावः इति प्रतीतेः । तदपलापे स्तम्भादिदर्शनमपि दुर्निरीक्षं प्रसजतीति प्रतिपादयिष्यते । युगपदेकमनेकाकारं व्याप्नोति जानातीति वा, न क्रमेण इति परमगहनमेतत् ! ततः सिद्धा सुखतत्साधनयोर्हेतुफलभाव-प्रतीतिः । एतेन दर्शनादिसंस्कारादीनामपि सा चिन्तिता । § 101

यत्पुनरुक्तम्--पूर्वोत्तरदर्शनसंस्कारस्मृतीनाम् एकविषयत्वं कुतः प्रतीयते इति ? तदप्येतेन नोत्सृष्टम् । § 102

ननु भवत्वेवम्, तथापि प्रवृत्तिकाले सुखाप्रतिपत्तौ कथं तत्र दृश्यमानस्य हेतुता प्रतीयेत यतस्तव प्रवृत्तिः स्यात्, प्रतिपत्तौ वा न प्रवृत्तिः

६ कुत] प्रमाणात् ।
७ सुखानुद] नुत्पादात्, अ
७ निं] न
८ त] सुखसाधनविनाशात् ।
९ भाविनोः] समुदायासंभवात् ।
१२ नात्] प्रत्यक्षप्रमाणात् ।
१३ त] प्रत्यक्षपूर्वकत्वेन ।
१५ त] आत्मनः ।
१६ त्तेः] अयुक्तः प्रतिषेधः ।
२० म] चित्रज्ञानम् ।
२१ मेण] क्रमेण एकः आत्मा नानापर्यायान् न व्याप्नोति न वा जानाति इति कथनं परमाश्चर्यकरम् ।
२२ सा] कारणकार्यभावप्रतिपत्तिः ।
२४ म्] पूर्वोत्तरपर्यायव्यापिना आत्मना तत्प्रतिपत्तिसंभवादिति भावः ।
२५ त] सुखे ।
२६ स्य] जलाद्यर्थस्य ।
२६ व] स्तत्र

तदैव सुखप्राप्तेः । * अथ प्रवृत्त्युत्तरकालं सुखप्रतिपत्तिः तर्हि तत्साधनप्रतिपत्तौ प्रवृत्तिः तस्याश्च सुखवत् प्रवृत्तिः स्यात्  प्रतिपत्तौ वा न प्रवृत्तिः /ms तदैव सुखप्राप्तेः अथ प्रवृत्त्युत्तरकालं सुखप्रतिपत्तिः; तर्हि तत्साधनप्रतिपत्तौ प्रवृत्तिः, तस्याश्च सुखप्रतिपत्त्या तत्साधनप्रतिपत्तिः इत्यन्योन्यसमाश्रयः । अथ सुखसाधनस्य पूर्वस्य तत्सदृशस्य वा पुनर्दर्शनादेवं भवति इदं सुखसाधनं तत्त्वात् पूर्वसदृशत्वात् पूर्ववत् इति ततः प्रवृत्तिः । नन्विदमनुमानम्, तच्चेत् सुखं न प्रत्येति, कथं तत् प्रति कस्यचित् कारणतामवैति ? कार्यप्रतिपत्तिनान्तरीयकत्वात् कारणताप्रतिपत्तेः । प्रत्येति चेत्; उक्तमत्र प्रवृत्तिर्न स्यादिति । यदि पुनर्न सिद्धतया अपि तु साध्यतया तत् प्रत्येति; तर्हि साध्यतया असतः, तस्य च प्रतीतिरित्यतिसाहसम्, इति कस्यचित् सुखसाधनस्याप्रतिपत्तेर्न तत्र [प्र]वृत्तिः । सुख इति चेत्; न; तस्य दर्शनेतरविकल्पद्वये पूर्ववत् प्रसङ्गः । तन्न कुतश्चित् प्रवृत्तिरिति किं **व्यवसात्मनः** इत्यादिना इति चेत्; अत्रोच्यते--दृश्यदर्शनेन पूर्वोत्तरक्षणयोरदर्शने ताभ्यां तस्य कुतस्तृद्यत्ताप्रतिपत्तिः यतः प्रत्यक्षसिद्धा क्षणिकता स्यादिति नेदं सुभाषितम्--**यद् यथावभासते तत्तथैव परमार्थसद् व्यवहारावतारि यथा नीलं नीलतया भासमानं तथैव तद्व्यवहारावतारि, [अव]भासन्ते च भावाः क्षणिकतया ।** इति । अथ दृश्यदर्शनेन तयोर्दर्शनम्; दृश्यसमकालता तथैव पराभ्युपगमात् । *तयोरपि पुनः अन्याभ्यां पूर्वोत्तरक्षणाभ्यां ऋद्यत्ताप्रतिपत्तौ अन्ययोरपि तेन दर्शनं पुनः तयोरपि  ततोऽन्याभ्यां ऋद्यत्ताप्रतिपत्तौ द- /ms र्शनं तेन तयोरित्येककालता सकलसन्तानक्षणानामिति नित्यताप्रतिपत्तिवत् क्षणिकताप्रतिपत्तावपि युगपत् जन्ममरणावधिदशाप्रतिपत्तिरिति तदैव जातो मृतश्च स्यात् । अथ दृश्यस्य दर्शनेन यथास्वकालं तयोर्दर्शनम्; सुखस्यापि तथैव दर्शनमिति न दृश्ये तत्साधने प्रवृत्तिविरोधः । § 103

29/mkj

१ *] एतच्चिह्नान्तर्गतः पाठः पुनरुक्तो भाति ।
४ त] प्रवृत्तेश्च ।
५ स्य] जलादेः ।
६ इति] प्रतीतिः ।
७ थं] सुखं प्रति ।
७ चित्] जलाद्यर्थस्य ।
८ कार्य] र्य
९ दिति] तदैव सुखप्राप्तेः ।
९ या] निष्पाद्यतया ।
११ त्र] सुखसाधने ।
१४ ता] पूर्वोत्तराभ्याम् ।
१४ स्य] मध्यक्षणस्य ।
१४ त्ता] रहितताप्रतिपत्तिः, उतृदिर हिंसायामिति रौधादिधातोः निष्पन्नमिदं गणकार्यस्यानित्यत्वात् ।
१७ इति] द्रष्टव्यम्--पृ° २ टि° १० ।
१७ दृ] मध्यक्षणप्रत्यक्षेण ।
१७ त] पूर्वोत्तरक्षणयोः प्रत्यक्षम् ।
१७ दृ] तर्हि पूर्वोत्तरयोः वर्तमानक्षणापत्तिः ।
१८ *] पूर्वोत्तरयोरपि ।
१८ णाभ्यां] त्रुट्यत्ता क्षणिकता, रहितता वा ।
१८ द्य] त्रुट्य
१९ तेन] मध्यक्षणदर्शनेन ।
१९ द्य] त्रुट्य
२२ म्] पूर्वस्य पूर्वस्मिन् क्षणे उत्तरस्य च उत्तरक्षणे ।
२३ थैव] भविष्यति निष्पाद्यत्वेन ।

स्यान्मतम्--पूर्वोत्तरक्षणाभ्यां मध्यक्षणस्य ऋद्यत्ता स्वभावभूता, ततः तयोरदर्शनेऽपि *तद्दर्शनादेव प्रतीयते; तर्हि तस्य सुखहेतुता तथा किन्न प्रतीयते सुखादर्शनेऽपि ? नहि सापि ततो भिन्ना । नन्वेवं सर्वस्यापि भावदर्शनादेव तत्प्रतीतेः सुखार्थिनो दुःखसाधने प्रवृत्तिः सुखहेतोर्वा निवृत्तिः भ्रान्त्या न स्यादिति चेत्; न; ऋद्यत्ताप्रतिपत्तावपि ससमानमिति तदनुमान[मन]र्थकम् । समारोपकल्पनम् अन्यत्रापि । तथा सति कथं सुख[सा] धने प्रवृत्तिरिति चेत् ? ऋद्यत्तायां कथम् ? समारोपव्यवच्छेदात्; प्रकृते समः समाधिः । यथैव च घटादौ सत्त्वादेः क्षणिकत्वेन व्याप्तिदर्शनादन्यत्र ततः ऋद्यत्ता अनुमीयते तथा आकारविशेषस्य पूर्वसुखहेतुत्वेन व्याप्ततया दृष्टस्य पुनः क्वचिद् दर्शनात् सुखहेतुता अनुमीयताम् । ननु उक्तमत्र अनुमानेन सुखाप्रतिपत्तौ कथं तद्धेतुताप्रतिपत्तिः ? प्रतिपत्तौ न प्रवृत्तिरिति चेत्; इदमप्युक्तम्--तेन पूर्वोत्तरक्षणाविषयीकरणे कथं तत्सम्बन्धिनी ऋद्यत्ता मध्यक्षणस्य प्रतीयते यतः समारोपो निवर्तेत । /ms *तद्विषयीकरणे च एकक्षणभाविता सन्तानस्य इति । § 104

एतेन एतदपि निरस्तं यदुक्तं परेण--**यद्यपि दृश्यस्य सुखादर्शनेऽपि तद्धेतुता प्रतीयते तवापि निश्चेतुं न शक्यते** इति; कथम् ? ऋद्यत्तायामपि समानत्वात् । भवतु वा तदनिश्चयः तथापि को दोषः ? तद्दर्शनं प्रवृत्तिहेतुर्न स्यादिति । कथं ऋद्यत्तादर्शनमनिश्चितम् अनुमानहेतुः, येन **यद् यथावभासते** इत्यादि सूक्तम् ? एतदनिश्चितम् अनुमानस्य कारणं न पूर्वं प्रवृत्तेरिति महती प्रेक्षाकारिता ! यदि च, कार्यानवधारणक्षणे अस्य कारणतानवधारणम्; तर्हि कथं प्राप्यानवधारणे दृश्यस्य ततो विवेकावधारणम्, येनात्र पक्षत्रयमुत्थापितम्--**दृश्यप्राप्ययोः एकत्वाध्यवसायिनं प्रति प्राप्ये प्रत्यक्षं प्रमाणम्, अन्यं प्रति तदाभासम्, अवधारितविवेकं प्रति अनुमानम्** इति ? व्यवहारेण तदुत्थापितमिति चेत्; तेनैव कार्यानवधारणेऽपि कारणतावधारणमिति कारणे प्रवृत्तिसंभवादलं भाविनि प्रवृत्त्या, एकान्ते तदर्थेन कारणत्वोपवर्णनेन वा, व्यवहारविपर्ययात् । परमार्थेऽपि चित्रैकज्ञानाद्वैतरूपे

१ द्य] त्रुट्य
१ तः] पूर्वोत्तरयोः ।
२ *] मध्यदर्शनादेव ।
२ र्हि] जलादिसाधनस्य ।
२ था] साधनस्वभावभूता, अतः साधनज्ञानादेव प्रतीयताम् ।
३ सापि] साधनात् ।
४ नादेव] सुखसाधनत्वप्रतीतेः ।
५ द्य] त्रुट्य
५ त] क्षणिकतानुमानम् ।
७ द्य] त्रुट्य
९ त्र] शब्दादौ ।
९ द्य] त्रुट्य
९ त्ता] क्षणिकता ।
९ पूर्व] पूर्वं
१३ द्य] त्रुट्य
१४ *] मध्यक्षणदर्शनेन पूर्वोत्तरयोः विषयीकरणे च ।
१५ नेऽपि] सुखहेतुता ।
१६ वा] था
१६ द्य] त्रुट्य
१७ त] साधनदर्शनम् ।
१८ द्य] त्रुट्य
१९ ए] त्रुट्यत्तादर्शनम् ।
१९ न] जलादिसाधनदर्शनम् ।
२४ तेनैव] व्यवहारेणैव ।

नीलाकारः पीताद्याकारान् अनात्मसात्कुर्वन्नपश्यन् वा यथा तत्साधारणीं बोधरूपतामात्मसात्करोति पश्यति वा तथा कार्यानवधारणेऽपि कारणतावधारणं कारणदर्शनेन । सर्वविकल्पातीतेऽपि तस्मिन् इदमेव वक्तव्यम्; तथाहि--कारणत्वादिविकल्पानां प्रतिपत्तौ कस्यचित् तद्विविक्तताविवित्तिः । /ms
नहि अप्रतिपन्नमशकस्य नेह मशकाः सन्ति इति निर्णीतिरस्ति । तथा चेत्; सुस्थितं तदद्वैतम् ! अप्रतिपत्तौ चेत्; प्रकृतमनुषङ्गि । ततो यथा कस्यचित् तद्विविक्तस्य दर्शनात् तद्भाव[व्य] वहारः तथा आकारविशेष- 30/mkj
दर्शनात् हेतुताव्यवहारोऽपि साध्यते इति सूक्तं **व्यवसायात्मन** इत्यादि ।

§ 105

ननु यदुक्तम्--**नान्यथा क्षणिकादिवत्** इति; तत्र यदि नाम निर्विकल्पदृष्टेः क्षणिकादौ संस्कारादिर्न जायते, तथापि नीलादौ जायते दृष्टत्वात् । न च दृष्टमन्यथा कर्तुं शक्यम् । न च दर्शनम् इत्येव सर्वत्र स्वगोचरे संस्कारादिहेतुः; अन्यथा व्यवसायात्मकमपि तथा इति गृहीतप्रघट्टकादिविस्मरणादि न भवेत् । अथ तत् दर्शनपाटवादिकमपेक्षते; प्रकृतमपि तथैव अपेक्षते इति तदभावान्न क्षणिकादौ संस्कारादिः, अन्यत्र तु अस्ति विपर्ययादिति चेत्; अत्रोत्तरमाह**दर्शने**त्यादि । प्रतिपत्तिगौरव **दर्शनपाटव**मिति । *तच्च संस्कारादिकार्ये सामर्थ्यम्, मुहुर्मुहुः चेतसि परिमलनम् **अभ्यासः**, तौ आदी यस्य **प्रकरणादेः** स तथोक्तः तस्मात् **दृष्टसजातीयसंस्कारस्मृतिप्रबोधे दृष्टः** पूर्वदर्शनगोचरः स चासौ **सजातीयश्च** सदृशः उत्तरविशेषेण, उपलक्षणमेतत्, ततः तेनैकोऽपि दृष्ट इत्युच्यते, तत्र **संस्कारश्च स्मृतिश्च** तयोः **प्रबोधे** उत्पादे अभ्युपगम्यमाने । किमन्तरेण ? इत्यत्राह--**स्वभावव्यवसायमन्तरेण दर्शनस्य स्वरूपभूतनिर्णयम-**

---

३ स्मिन्] अद्वैते ।
५ त] कारणत्वादिविकल्पप्रतिपत्तिश्चेत् ।
६ प्र] यथा कारणत्वादिविकल्पानामप्रतिपत्तावपि तद्विविक्तताप्रतिपत्तिस्तथा कार्यानवधारणेऽपि कारणतावधारणं स्यात् ।
१३ पि] ज्ञानम् ।
१३ त] संस्कारादिहेतुः स्यात् ।
१३ प्र] प्रघट्टकं प्रकरणम् ।
१४ त] व्यवसायात्मकं ज्ञानम् ।
१४ प्र] निर्विकल्पकदर्शनम् ।
१५ त] पाटवादिकमपेक्षते ।
१५ अ] नीलादौ ।
१६ अस्ति] पाटवाभ्यासादिसद्भावात् ।
१६ चेत्] तुलना--येषां तु पुनरभ्यासपाटवादयो निश्चयस्य हेतवः सन्ति ते महामतिशक्तयः...--प्र० वार्तिकाल० पृ० २४० । यथा दृष्टस्याकारोऽभ्यासपाटवादिप्रत्ययान्तरसापेक्षो विशेषस्तस्य ग्रहणात् । न हि दृष्टमित्येव विकल्पेन गृह्यते; दर्शनाऽविशेषात् सर्वाकारेषु विकल्पोदयप्रसङ्गात्, अपि तु कश्चिदेव अभ्यासादिप्रत्ययापेक्ष इत्याकारग्रहणेनाचष्टे ।--हेतुबि० टी० पृ० २६ । यथानुभवमभ्यासपाटवादिप्रत्ययान्तरसहकारिणां विकल्पानामुदयात् ।--हेतुबि० टी० पृ० २२ । अथ मतम् अभ्यासप्रकरणबुद्धिपाटवार्थित्वेभ्यो निर्विकल्पकादपि दर्शनान्नीलादौ संस्कारः स्मरणं चोत्पद्यते न पुनः क्षणिकादौ तदभावात् ।--प्रमाणप० पृ० ५४ । प्रमेयक० पृ० ३३ । स्या० र० पृ० ८४ ।
१६ व] वं
१७ *] पाटवञ्च । पाटवं तीक्ष्णता बुद्धेः इति, प्रकरणात् आदिशब्दात् प्रत्यासत्तितारतम्यादेर्ग्रहणम्--हेतुबि० टीकालो० पृ० २७१ ।

/ms न्तरेण **संस्कारस्मृति** वचनमप्युपलक्षणमिति प्रत्यभिज्ञानादिपरिग्रहः । तत्र किं स्यात् ? इत्यत्राह--**क्षणभङ्गादावपि** आदिशब्देन स्वर्गप्रापणसामर्थ्यादिपरिग्रहः, न केवलं नीलादौ इति अपिशब्दार्थः, **लिङ्गानुसरणं** हेत्वाश्रयणम् उक्त**मनुपपन्नं** प्रत्यक्षत एव तत्सिद्धेरिति मन्यते । कुत एतत् ? इत्यत्राह--**तदविशेषात्** तस्य दनपाटवादेः अविशेषात् क्षणभङ्गादावपि । निदर्शनमाह--**नीलादिवत्** तत्रैव तद्वदिति । नहि दर्शनं स्वविषये पाटवेतरात्मकं तदप्रसंगात् । अभ्यासोऽपि मुहुर्मुहुः क्षणिकदर्शनस्य तद्विकल्पस्य वा वृत्तिः सौगतानां विद्यते, तथा अर्थित्वादयोऽपि । न च तत्र तत्प्रबोधः । तन्न तत्कार्यम् । प्रयोगश्चात्र--यस्मिन्नविकलेऽपि यन्न भवति तन्न तत्कार्यम्, यथा अविकलेऽपि चक्रादौ अभवन् पटो न तत्कार्यः, अविकलेऽपि च दर्शनपाटवाभ्यासादौ न भवति क्षणिकादौ संस्कारादि[ः]इति । विपर्ययप्रयोगः— यस्मिन्नविकले यद् भवति तत् तस्य कार्यम्, यथा अविकले चक्रादौ भवन् घटः तस्य कार्यः, भवति च निर्णयेऽविकले संस्कारादिः 31/mkj इति । ननु दर्शनपाटवादेः इत्यस्तु किमभ्यासग्रहणमिति चेत्; उभयत्र आदिशब्दसम्बन्धार्थम्--दर्शनपाटवादेः अभ्यासादेः इति । तेन एकत्र आदिशब्देन दर्शनप्रतिबन्धकस्य गुणान्तरारोपस्य **नो चेद् भ्रान्तिनिमित्तेन** प्र० /ms वा० ३ । ४३ इत्यादिना प्रतिपादितस्य वैकल्यं गृह्यते । यद्वक्ष्यते अत्रैव--**दर्शनपाटवाद्यविशेषेऽपि** इत्यादि । परत्र आदिशब्देन अर्थित्वादिपरिग्रहः । यदि वा, सर्वत्र अभ्यासस्य प्राधान्यप्रदर्शनार्थम् अभ्यासग्रहणम् । यदुक्तं परेण--**अभ्यासे प्रत्यक्षम् अनभ्यासे अनुमानं प्रमाणम्** इति । तत्र क्षणभङ्गादाविव नीलादावपि अभ्यासविरहे कुतः संस्कारादिः यतोऽनुमानम् ? एवं तर्हि दृष्टसजातीयसंस्कारादिप्रबोधे इति वक्तव्यं नार्थः स्मृतिग्रहणेनेति चेत्; तत् क्रियते उत्तरार्थम् । तत्र हि स्मृतिरेव प्रधानतया चिन्त्ययिष्यते **अभेदात् सदृशस्मृत्याम्** सिद्धिवि० १ । ६ इत्यादौ । अनेन व्यतिरेकमुखेन कारिकार्थो विवृतः । § 106

इममेवार्थं समर्थयमा[नः] प्राह--**आधत्ताम्** इत्यादि । § 107

...5 आधत्तां क्षणिकैकान्तस्वार्थसंवित् पटीयसी ।

५ न] दर्शन
६ त्रैव] तत्रैव[[नीलादौ इव ।]]
६ पा] नीलादौ पाटवम् क्षणिकादौ च अपाटवमिति ।
७ संगात्] अतिप्रसङ्गात्
८ त] क्षणिकादौ ।
८ त] संस्कारस्मृतिप्रबोधः ।
९ त] अभ्यासपाटवादिकार्यम् ।
१४ स्तु] किमर्थम् ।
१५ ए] दर्श नपाटवे ।
१६ गु] क्षणिकत्वादौ नित्यत्वाद्यारोपस्य ।
१७ इ] संयोज्येत गुणान्तरम् । शुक्तौ वा रजताकारः रूपसाधर्म्यदर्शनात् ॥ इति शेषः ।
१८ प] अभ्यासे ।
२० इ] द्रष्टव्यम्--पृ० २२ टि० १७ ।

सदाभ्यासात्स्मृतिं सापि दृष्टसंकलनादिकम् ॥ ५ ॥§ 109

सदृशापरोत्पत्तिविप्रलम्भान्नावधारयतीत्यसमञ्जसम्; सर्वथा सादृश्यासंभवात् । वैलक्षण्यानवधारणे अतिप्रसङ्गः । तद्विकल्पकारणव्यतिरेक इत्यपि तादृगेव । स्वार्थदृष्टिस्मृत्योः स्वभावव्यवसायाभावे कुतः संकलनाज्ञानं यतः सङ्केतस्मृत्यादयः ? निर्विकल्पकदृष्टावपि सजातीयाध्यवसायादिः सुप्तप्रबुद्धवच्चेत्; न; अर्थदर्शनभावेऽपि तदनुषङ्गात् । § 110

ननु अयमर्थोऽनन्तरकारिकावृत्तावुक्तः । न च पुनस्तस्यैवाभिधाने स एव समर्थितो नाम अतिप्रसङ्गात् किन्तु अन्यस्माद्धेतोः, स चात्र नोक्तः, तस्मात् उक्तार्थोऽनन्तरश्लोकोऽयम् इत्य न न्त वी र्यः । अस्यायमर्थः-- **आधत्तमादव्यक्ता क्षणिकैकानु स्वार्थसंविद्** इति । क्षणिक इति भावप्रधानो निर्देशः, ततः क्षणिकत्वम् एकः असहायः अन्तो धर्मो ययोः स्वार्थयोः तयोः संवित् दृष्टिः । कथम्भूता ? इत्यत्राह--**पटीयसी** पटुतरा । कदा ? इत्यत्राह--**सदा** सर्वकालम् । कुतः ? **अभ्यासात्** । किम् ? इत्यत्राह--**स्मृतिविकल्पम्** । स्मृतिः किं कुर्यात् ? इत्यत्राह--**सापि** स्मृतिरपि **दृष्टसंकलनादिकम्** दृष्टस्य पूर्वदर्शनेन विषयीकृतस्य उत्तरपर्यायेण सह एकत्वेन सादृश्येन वा समीचीनं कलनं निर्णयनं येन तत् संकलनं /ms
प्रत्यभिज्ञानम्, आदिशब्देन तर्कादिकं गृह्यते तद् **आधत्ताम्** इति । § 111

यदुक्तम्--**क्षणभङ्गादावपि लिङ्गानुसरणमयुक्तं तदविशेषात्** इति; तत्राह--**परादर्शन** * इत्यादि । विवृतार्थमेतत् । **सदृशस्य** पूर्वेण समानजातीयस्य **अपरस्य** क्षणस्य या **उत्पत्तिः** उत्पत्तिविषयं दर्शनम् उत्पत्तिः विषयिणि *विषयशब्दोपचारात् । न खलु तदुत्पत्तिरेव विप्रलम्भहेतुः, सर्वदा प्रसङ्गात् । तया **विप्रलम्भः** *गुणान्तरारोपः तस्मा**न्नावधारयति** न निश्चिनोति 32/mkj
क्षणभङ्गादिकम् इति विभक्तिपरिणामेन सम्बन्धः । तत्र संस्कारादिमान भवति जनः इत्यर्थः । तस्य उत्तरमाह--**इत्यसमञ्जसम्** इत्यादि । **इत्येवं** परमतम् **असमञ्जसम्** अयुक्तम् । कुत एतत् ? इत्यत्राह--**सर्वथा** सर्वप्र-

८ स्माद्धेतोः ] समर्थितेन भाव्यम् ।
८ स ] हेतुः ।
९ न्त ] अनन्तवीर्योऽयं प्रकृतटीकाकारात् रविभद्रपादोपजीविनोऽनन्तवीर्याद् भिन्न एव भाति ।
१० क्ता ] आधत्तां
१० णिकैकानु ] न्त
१८ म् ] पृ० ३० प० १४ ।
१९ * ] सदृशापरोत्पत्तिदर्शन
२० यिणि ] उत्पत्तिविषयके दर्शने ।
२१ * ] उत्पत्ति ।
२१ हेतुः ] किन्तु उत्पत्तिविषयकं दर्शनम् ।
२२ * ] स्थिरस्थूलादिभ्रमः ।
२३ संस्कारादिमान ] न्न
२५ प ] सदृशापरोत्पत्तिविप्रलब्धो वा, सदृशे हि तदेवेदमिति बुद्धिर्यमजे ।...अत्रापि सदृशापरोत्पत्तिविप्रलब्धो लूनपुनर्जातकेशनखादिवत्...--प्र० वार्तिकाल० २ । २०९ । तस्मात् सदृशापरभावनिबन्धन एवायं केशकदलीस्तम्बादिष्विव आकारसाम्यतामात्रापहृतहृदयानां भ्रान्त एव तत्त्वाध्यवसायो मन्तव्यः... पृ० ८६ सदृशापरभावग्रहकृतश्च

कारेण **सादृश्यासंभवात्,** पूर्वोत्तरक्षणयोः सारूप्यसंभवनाया अपि विरहात् । तथाहि--पूर्वपूर्वनित्यसमारोपक्षणाद् उत्तरोत्तरसमारोपक्षणो यदि सर्वात्मना सदृशो जायते तेन तर्हि पूर्वतत्क्षणवत् उत्तरस्यापि उत्तरतत्क्षणोत्पादनस्य सामर्थ्यम्, एवमुत्तरोत्तरस्येति आसंसारं न क्षणोपरमः । नहि अनुनानेन पूर्वस्मिन् समर्थे उत्तरं कार्यं निवारयितुं शक्यते, तस्मिन् सति अवश्यंभावात् । नापि तत्सामर्थ्यम्; सतो निवारणायोगात् । § 112

*तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता ।
निरंशत्वाटधिकिसास्यकस्तां क्षपयितुं क्षमः ॥§ 114

प्र॰ वा॰ २ । २२ § 115

/ms एवं सर्वभावेषु वाच्यम् । तथा सति चरमक्षणाभावः स्यादिति चेत्; अयमपरोऽस्य दोषोऽस्तु । तन्न पूर्वोत्तरतत्समारोपक्षणयोः तत्त्वे नैव उत्तरकार्यजननसामर्थ्येनापि सादृश्यम् । अपि च, यथा पूर्वस्य उत्तरं प्रति कारणत्वम्, एवं चेत् *तस्यापि तत्प्रति कारणत्वम्; युक्तं सर्वात्मना सादृश्यम् । न चैवम्, आत्मनि अर्थक्रियाविरोधात् । अथ पूर्वस्मात् तत्समारोपक्षणात् क्षणक्षयानुमानसहायाद् अपरोऽपरजनने असमर्थोऽसमर्थतरोऽसमर्थतमो जायते; तर्हि [न] *तत्समारोपत्वेन सादृश्यम् उक्तप्रकारेण । अन्यथा छितिति निरंशवादहानिः । एवं सर्वत्र योज्यम् । ततः सूक्तम्--**सर्वथा** इत्यादि । एतदुक्तं भवति निरंशैकान्ते सदृशापरोत्पत्त्यभावेन विप्रलम्भाभावात् तदवधारणं स्यादिति । § 116

ननु मा भूत् पूर्वापरयोः समानधर्मान्वयः सादृश्यं वैलक्षण्यानवधारणं तु स्यादिति चेत्; अत्राह--**वैलक्षण्य** इत्यादि । **वैलक्षण्यं** पूर्वोत्तरयोः वैसदृश्यंतस्य **अनवधारणे अतिप्रसङ्गः** । तथाहि— तदनवधारणं प्रसज्यप्रतिषेधरूपम्,

---

अर्वाग्दर्शनानामेकत्वविभ्रमो लूनपुनर्जातिष्विव नखकेशादिष्विति किन्नेष्यते । पृ॰ १२० सदृशापरमावतिबन्धनं चैकतया प्रत्यभिज्ञानं लूनपुनर्जातिष्विव केशनखादिषु इत्यत्र विरोधाभावादिति ।--हेतुबि॰ टी॰ पृ॰ १३६ । तुल्येत्यादिना भदन्तशुभगुप्तस्य परिहारमाशङ्कते--तुल्यापरक्षणोत्पादाद्यथा नित्यत्वविभ्रमः । अविच्छिन्नसजातीयग्रहे चेत्स्थूलविभ्रमः ॥--तत्त्वसं॰ श्लो॰ १९७२ ।

३ त्] समारोपक्षणवत् ।

५ पू] कारणभूतसमारोपक्षणे ।

५ का] समारोपान्तरक्षणम् ।

६ म्] निवारयितुं शक्यते ।

८ धिकिसास्य] नित्यत्वादचिकित्स्यस्य

१० त] सामर्थ्यनिवारणाभावे ।

११ रोऽस्य] बौद्धस्य ।

११ त्वे] पूर्वक्षणवर्तित्व-उत्तरक्षणवर्तित्व-रूपभिन्नस्वभावत्वे ।

१३ चेत्] यदि ।

१३ *] उत्तरस्यापि ।

१३ स्यापि] पूर्वं प्रति ।

१५ हायाद्] द्वितीयः समारोपक्षणः ।

१५ ने] तृतीयसमारोपक्षणजनने ।

१६ *] तयोः पूर्वोत्तरयोः समानसमारोपत्वेनापि सादृश्यं नास्ति इत्यर्थः ।

१७ तिति] भवति

१८ म्भाभावात्] क्षणिकत्वावधारणं प्रत्यक्षत एव स्यात् ।

पर्युदासरूपं वा स्यात् ? प्रथमपक्षे तदवधारणाभावमात्रमनवधारणं कथं सादृश्यं विप्रलम्भहेतुर्वा ? अन्यथा खरशृङ्गादिकमपि स्यात् । द्वितीयेऽपि किं तद् वैलक्षण्यावधा रणाद् अन्यत् यत् तद[न]वधारणशब्दवाच्यं स्यात् 33/mkj ? स्वलक्षणमिति चेत्; घटकपालादौ प्रसङ्गः, तथा च ततो विप्रलम्भात् न तत्र संस्कारस्मृतिप्रबोधः । अथ एकत्वावधारणं तदनवधारणम्; तर्हि सदृश्याद् विप्रलम्भः इति किमुक्तं स्यात् एकत्वावधारणाद् एकत्वावधार- /ms णं विप्रलम्भः इति । न च तदेव तस्यैव कारणम्; विरोधात् । तदपि च एकत्वावधारणं कुतो भवति ? सदृशापरदर्शनादिति चेत्; न; सर्वथा सादृश्यासंभवात् अतिप्रसङ्गः, अनवस्था च । § 117

किञ्च, **क्षणभङ्गादावपि लिङ्गानुसरणमयुक्तम्** इति वदता तदनवधारणमेव चोदितम्; तत्र तदनवधारणसुत्तरं साध्यसममिति न सादृश्यमिदमपि युक्तम् । § 118

पुनरप्याह परः--**तद्** इत्यादि । **तस्य** वैलक्षण्यस्य **विकल्पो** निश्चयः तस्य **कारणं** तस्य **व्यतिरेको**ऽभावः सादृश्यम् । अत्रोत्तरमाह--**इत्यपि** इत्यादि । न केवलं पूर्वं किन्तु एतदपि **तादृगेव** पूर्वसमानमेव, दर्शनपाटवाभ्यासादेः तत्कारणभावात् सर्वथा तद्विकल्पकारणव्यतिरेकासंभवादिति मन्यते । यद्यस्मात् सादृश्यान्नावधारयति तदपि तादृगेव इति । § 119

एवम् अविकल्पस्य प्रतिबन्ध-वैकल्यविकलस्यापि दर्शनस्य क्षणभङ्गादौ संस्काराद्यहेतुत्ववत् नीलादावपि तदभिधाय इदानीं प्रकारान्तरेणापि तदभिधातुकामः प्राह--**स्वार्थ** इत्यादि । **स्वं** च **अर्थश्च** तयोः **दृष्टिश्च स्मृतिश्च** तयोः **स्वभावस्य** स्वरूपस्य स्वभाव एव वा **व्यवसायः** तस्य **अभावे** । ननु भवतु दृष्टेस्तदभावः नतु स्मृतेः, तस्याः व्यवसायस्वभावत्वादिति चेत्; न; तस्या अपि स्वभावे व्यवसायाभावे अर्थेऽपि स दुर्घटः एवमध्यं च फक्किकाया आदौ स्वभावग्रहणम्, अन्यथा व्यवसायेत्याद्युच्येत । अर्थे तत्र /ms तस्या व्यवसाय इष्यते; दृष्टेरपि तथैव स्यात् । **दृष्टिस्मृत्योः** इति सहवचनं च तयोः तुल्यधर्मताप्रतिपादनार्थम् । इतश्च परस्य निर्विकल्पिका स्मृतिः तथाविधानुभवकार्यत्वात् उत्तरानुभवक्षणवत् । तस्मिन् सति किं जातमिति चेत् ? अत्राह--**कुतः** इत्यादि । **कुतो** न कुतश्चित् **संकलनाज्ञानम्** तदेवेदं तेन सदृशम् इति वा प्रत्यभिज्ञानं व्यवतिष्ठते, अत्रापि उक्तन्यायस्य संभवात्

---

१ क्षे] वैलक्षण्याबधारणाभावमात्रम् ।
९ सा] पूर्वोत्तरक्षणयोः ।
११ रं] णं सुतरां
११ मिद] वैलक्षण्यानवधारणमपि ।
१३ र] बौद्धः ।
१९ वैक] कारणान्तराणां विकलता ।
२० त] संस्काराद्यहेतुत्वमभिधाय ।
२३ भाव] स्वभावव्यवसायाभावः ।
२४ स्या] स्मृतेरपि ।
२४ स्व] स्वभावे सर्वं ज्ञानं निर्विकल्पकमिति तत्सिद्धान्तात् ।
२४ स] व्यवसायः ।
२४ च] मर्थं च
२६ त] स्मृतेः ।
२७ स्य] बौद्धस्य ।
२८ त] निर्विकल्यानुभव ।

। कथम्भूतं तत् ? इत्यत्राह--**यत** इत्यादि । **यतो** यस्मात् संकलनाज्ज्ञानात् **सङ्केतस्मृत्यादयः** आदिशब्देन अभिलापयोजनादिपरिग्रहः, कारणाभावात् तदभावः स्यादिति मन्यते । एतदुक्तं भवति--पूर्वं सङ्केतविषयस्यार्थस्य दर्शनम्, पुनः तस्य तज्जातीयस्य च दर्शनात् तस्य स्मृतिः, ततोऽपि तदेवेदं तेन सदृशम् इति वा संकलनम्, ततोऽपि सङ्केतस्मृतिः, तस्याः पुरोवर्तिनि शब्दयोजनम्, अतोऽपि घटोऽयं पटोऽयम् इति विकल्पं ज्ञानम्, तत् सर्वं न स्यादिति । ननु च यथा मेघात् जलं प्रदीपात् कज्जलं विजातीयाद् भवति, तथा सर्वत्र अविकल्पाद्दर्शनात् व्यवहारेण स्वरूपे अविकल्पकम् अन्यत्र विपरीतं स्मृत्यादिकं स्यात् । एतदेवाह--**निर्विकल्प** इत्यादिना । **विकल्पान्निष्क्रान्ता** सा चासौ **दृष्टिश्च** तस्यामपि सत्यां **सजातीयाव्यवसायादिः** आदिशब्देन 34/mkj संकलनादिपरिग्रहः । अत्र निदर्शनमाह--**सुप्तप्रबु द्धवत्** इति । पूर्वं सुप्तः /ms पश्चात् प्रबुद्धः सन्तानः स इव तद्वत् । एतदुक्तं भवति--यथा सुप्तपश्चात्तः प्रबुद्धावस्था तथा प्रकृतमपि इति । अत्रेदं विचार्यते--कोऽयं सुप्तो नाम ? स्वप्नदर्शी निद्राक्रान्त इति चेत्; न तस्य प्रकृतसमत्वा । दर्शीति चेत्; तस्य यदि निर्विकल्पं दर्शनम्, अतोऽपि प्रबुद्धः तथाविधदर्शनवान्; न प्रकृतस्य तद्भवति । स्मृत्यादिमान्; साध्यसमता । न च परेण तस्य दर्शनमिष्यते अचेतनत्वोपगमात् । अथ चेतनारहितं सुप्तमित्युच्यते, न तस्मात् प्रबुद्धः, जाग्रद्दशातः तदभ्युपगमात् । कथं परसम्बन्धिनिदर्शनमेतत् प्रदर्शितमिति चेत् ? न; अन्यथा व्याख्यानात्--सुप्त इव सुप्तः स्वलक्षणासाक्षात्करणात् सुगतस्यानुमानदर्शः विशेषः प्रबुद्ध इव प्रबुद्धः सर्वदर्श्यवस्थाभेदः, ततो न दोषः, परेणापि अनुमानात् सुगतत्वोपगमात् । चेच्छब्दः पराभिप्रायसूचकः । अस्योत्तरमाह--**नार्थ** इत्यादि । नेति पूर्वपक्षनिषेधे । **अर्थदर्शनभावेऽपि** न

---

४ त] पूर्वदृष्टस्य ।
८ म्] अर्थरूपे ।
८ त्र] निश्चयात्मकम् ।
१० व] याध्यव
१२ श्चात्तः] सुप्तस्य पश्चात्
१४ त्वा] त्वम्
१५ न] सुप्तस्य ।
१६ स्मृत्यादिमान्] चेत् ।
१६ स्य] सुप्तस्य ।
१८ त] जाग्रद्दशाभाविचेतसः प्रबोधचेतस उत्पत्तिस्वीकारात् । गाढसुप्तस्य विज्ञानं प्रबोधे पूर्ववेदनात् । जायते व्यवधानेन कालेनेति विनिश्चितम् ॥--प्र० वार्तिकाल० पृ० ६८ ।
१८ प] बौद्धमतप्रसिद्धमुदाहरणम् ।
२० र्शः] सुगतस्य अ[[सुगतत्वप्राप्तिप्राक्कालभाविनी श्रुतमयी चिन्तामयी च भावना अत्र क्रमशः परार्थानुमानस्वार्थानुमानरूपा ग्राह्या ।]]नुमानदशा
२१ मा] न भावनामात्रत एव योगी भवति, अपि तु श्रुतमयेन ज्ञानेन अर्थान् गृहीत्वा युक्तिचिन्तामयेन व्यवस्थाप्य भावयतां तन्निष्पत्तौ यदवितथविषयं तदेव प्रमाणं तद्युक्ता योगिनः ।--प्र० वार्तिकाल० ३ । २८५ । यादृशो योगिनां भावनाक्रमो विनिश्चिये श्रुतमयेत्यादिनाऽभिहितः...--न्यायबि० ध० पृ० ६८ । वृत्तस्थः श्रुतचिन्तावान् भावनायां प्रयुज्यते । धियः श्रुतादिप्रभवा नामोभयार्यगोचराः ॥...श्रुतमयी प्रज्ञा हि आप्तप्रमाणजो निश्चयः, चिन्तामयी प्रज्ञा युक्तिनिध्यानजो निश्चयः...--अभिध० को० ६ । ५ ।

केवलं [तदभावे] **तदनुषङ्गात्** सजातीयाव्यवसायाद्यनुषङ्गात् । कुत एतत् ? इत्यत्राह--**अभेदात्** इत्यादि । § 120

...6 अभेदात् सदृशस्मृत्यामर्थाकल्पधियां न किम् ।
संस्कारा विनियम्येरन् यथास्वं सन्निकर्षिभिः ॥ ६
॥§ 122

वस्तुस्वभावोऽयं यत् संस्कारः स्मृतिबीजमादधीत । ततः सहकारिकारणवशात् स्मृतिबीजप्रबोधः स्यात् । तत्र इन्द्रियार्थसन्निकर्षापेक्षिणः तत्प्रबोधस्य अविकल्पकल्पनायां पूर्वं पश्चाच्च दर्शनमनर्थकम् । § 123

क्रमेण यौगपद्येन च सादृश्यैकत्वयोः विकल्पबुद्धिः **सदृशस्मृतिः** परमतापेक्षया उच्यते । परस्य हि मतम्--परमाणव एकार्थक्रियाकारिणः अतत्सन्तानपरावृत्ताः स्वसमानाः परम्परया तस्या हेतवः, **तस्यां** कर्त्तव्यायाम् **अभेदाद्** अविशेषात् । केषाम् ? इत्यत्राह— **अर्थाकल्पधियाम्** । अर्थाश्च अकल्पधियश्च तासाम् इति । एतदुक्तं भवति--यथा अनुभवात् निरंशात् /ms
सदृशस्मृतिसंभवः तथा अर्थादेव तथाविधात् सोऽस्तु इति । न चेदमत्र चोद्यम्--*अर्थदर्शनपूर्विका स्मृतिः सा कथं तदभावे भवेत् ? अन्यथा सर्वत्र तदनुषङ्ग इति । कथम् ? यदि हि दर्शनगोचरे स्वलक्षणे जायते स्मृतिः तदा तत्पूर्विकेति स्यात्, न चैवं सामा न्यविषयत्वात्, नैवं तस्याः 35/mkj
एवमर्थं च **सदृशस्मृत्याम्** इत्युक्तम् । तथापि तत्पूर्विका चेत्; नीलस्मृतिः पीतदर्शनपूर्विका स्यात् । § 124

अत्राह परः--नार्थदर्शनादेव केवलादुपादानात् सजातीयस्मृतिर्येनाऽयं दोषः, अपि तु पूर्वसदृशस्मृत्याहितवासनातः उत्तरतत्स्मृतिजन्म, दर्शनं तु तद्वासनाप्रबोधहेतुत्वात् तद्धेतुः इत्युच्यते, अत एव सदृशाकारः तत्र न विरुध्यते इति; तं [प्र]त्याह--**न किम्** इत्यादि । **संस्काराः** पूर्वपूर्वविकल्पाहितवासना **विनियम्येरन्** उत्तरोत्तरनियतार्थसदृशस्मृतिजनने नियताः क्रियेरन्, **किं न** अपि तु विनियम्येरन्नेव, प्रतिषेधद्वयेन प्रकृतार्थगतेः । कैः ? इत्यत्राह--**यथास्वम्** इत्यादि । **सन्निकर्षः** योग्यदेशावस्थानम् न

---

१ याव्य] याध्य
३ अ] उद्धृतोऽयम्--न्यायवि॰ वि॰ प्र॰ पृ॰ ५२० ।
१३ त] निरंशात् ।
१३ थाविधात्] सदृशस्मृतिसंभवोऽस्तु ।
१४ *] पूर्वानुभवाभ्यासान्वयव्यतिरेकानुविधायिनी स्मृतिः--प्र॰ वार्तिकाल॰ पृ॰ ६१० ।
१४ त] दर्शनाभावे ।
१६ दा] अर्थपूर्विका ।
१९ रः] बौद्धः ।
१९ नादेव] निर्विकल्पात् ।
२१ द्धेतुः] स्मृतिहेतुः ।
२१ त] स्मृतौ ।

संयोगादिः तस्य निषेत्स्यमानत्वात्, स विद्यते येषाम् अर्थेन्द्रियाणां ते **सन्निकर्षिणः** तैः इति । यो यस्य संस्कारस्य प्रबोधनपटुः सन्निकर्षी तस्य अनतिक्रमेण यथास्वम् इति । तन्न क्वचिदर्थे दर्शनस्य उपयोग इति मन्यते । § 125

/ms पूर्वस्य कारिकाद्वयस्य व्याख्यानम् कृत्वा सुगमत्वात्, उत्तरस्य अक्षरद्वयाधिकस्य व्याख्यानं कुर्वन्नाह--**वस्तुस्वभावोऽयम्** इत्यादि । वस्तुनः पदार्थस्य स्वभावोऽयं स्वरूपमिदं **यद्य**स्मात्तश्च भावाद् **व्यवसायो** विकल्पः **स्मृतिबीजम्** स्मरणनिमित्तं संस्कारम् **आदधीत व्यवसायात्मनो दृष्टेः** सिद्धिवि० १ । ४ इत्यादौ चिन्तितमेतत् । तन्न युक्तमेतत्— **वस्तुस्वभावोऽयं यदनुभवः पटीयान् स्मृतिबीजमादधीत** । इति । ततः किं स्यादिति चेत् ? अत्राह--**ततः** तस्मात् **स्मृतिबीजप्रबोध** प्रकृष्टः संशयादिरहितो बोधः सदृशस्मृतिः **स्याद्** भवेत् । किं तत एव उतान्यतोऽपि ? इत्यत्राह--**सह[कारि]कारणवशात्** इति । तेन स्मृतिबीजेन सह करोति सदृशस्मृति[मिति]**सहकारि** तच्च **तत्कारणं** च इन्द्रियार्थादि तस्य **वशात्** । अनेन परप्रसिद्ध्या सदृशस्मृतेः प्रत्यक्षत्वे निमित्तं दर्शयति । प्रकृतमुपसंहरन्नाह--**तत्र** इत्यादि । **तत्र** तस्मिन् संभवे सति कस्य **तत्प्रबोधस्य** सदृशस्मृतिप्रबोधस्य । कथंभूतस्य ? **इन्द्रियार्थसन्निकर्षापेक्षिणः** इन्द्रियार्थयोः सन्निकर्षमपेक्षते इत्येवंशीलस्य, किम् ? **अविकल्पकल्पनायां** पूर्वं पश्चाच्च **दर्शनमनर्थकम्** इति । § 126

ननु भवत्वेवं तथापि सदृशस्मृतेर्न वैशद्यम्, तदुक्तम्—

> *न विकल्पानुविद्धस्य स्पष्टार्थप्रतिभासिता ।
> स्वप्नेऽपि स्मर्यते स्मार्त्तं न च तत्तादृगर्थदृग् ॥ प्र० वा० २ । २८३ इति ।§ 129

/ms विशदं च ज्ञानं भवतामध्यक्षमिति चेत्; अत्राह--**वैशद्यम्** इत्यादि । § 130

...7 वैशद्यमत एव स्यात् व्यवसायात्मनः स्मृतेः ।
असंस्कारप्रमोषे हि संज्ञानं नापि पश्यताम् ॥ ७ ॥§ 132

---

१ संयोगादिः ] आदिपदेन संयुक्तसमवाय-संयुक्तसमवेतसमवाय-समवाय-समवेतसमवाय-विशेषणविशेष्यभावा ग्राह्याः ।
१ स ] सन्निकर्षः ।
३ स्य ] निर्विकल्पस्य ।
७ श्च ] त्तत्त्व
११ बोध ] धः
२१ विक ] सविकल्पस्य ।

व्यवसायात्मनः संस्कारप्रबोधस्य कारणसामग्र्या स्वतो वैशद्यमनुभवतः को विरोधः ? § 133

36/mkj

**वैशद्यं** स्पाष्टम् **अत एव** इन्द्रियार्थसन्निकर्षापेक्षित्वादेव **स्याद्** भवेत् । कस्य ? **व्यवसायात्मनः स्मृतेः** इति । ननु संस्काराद् वासनाऽपरनाम्नः तत्स्मृतेः संभवे निर्विषया सा भवेत्, वैशद्येऽपि कामाद्युपप्लुतज्ञानवदिति चेत्; अत्राह--**असंस्कार** इत्यादि । न संस्कारस्य प्रमोषः **असंस्कारप्रमोषः** संस्कारसद्भावः तस्मिन् **हि स्फुटम् अत एव** इत्येतदत्रापि सम्बन्धनीयम् **[सं] ज्ञानं समीचीनं** संशयादिरहितम् ज्ञानम् । एतदुक्तं भवति— संस्कारमात्रभावि निर्विषयम्, न चेदं तथा, अर्थादेरपि कारणस्य प्रतिपादनात् । दृश्यते हि तथाविधं समीचीनं स्वभ्यस्ते क्षणभङ्गादिवत् जलादौ । ननु न वैशद्यं व्यवसायात्मनः स्मृतेः किन्तु दर्शनस्य तत्राध्यारोपात् न तस्या इति व्यपदिशति । तदुक्तम्-- § 134

*मनसोर्युगपद्वृत्तेः सविकल्पाऽविकल्पयोः ।
विमूढो लघुवृत्तेर्वा तयोरैक्यं व्यवस्यति ॥ प्र° वा° २ ।
१३३ § 136

इति चेत्; अत्राह--**नापि पश्यताम्** इति । **अत एव** इत्येतदत्रापि अनुवर्तनीयम् । ततोऽयमर्थो भवति--यत एव इन्द्रियार्थसन्निकर्षापेक्षी तत्प्रबोधः किमविकल्पकल्पनया ? अत एव यस्य तां स्वलक्षणं विषयीकुर्वतां दर्शनानां **नापि** नैवम् अवैशद्यमिति । इदमत्र तात्पर्यम्--यथा जपाकुसुमेषु रक्तत्वं तथा यदि दर्शनेषु वैशद्यं विनिश्चितं स्यात् तदा अन्यत्र तदध्यारोपात् प्रतिभातीति शक्यं वक्तुं नान्यथा अतिप्रसङ्गादिति । § 137 /ms

कारिकार्थं विवृण्वन्नाह--**व्यवसायात्मन** इत्यादि । [व्यवसायात्मनः] निर्णयस्वभावस्य **संस्कारप्रबोधस्य** संस्कारस्य वासनापराभिधानस्य यः प्रकृष्टः समीचीनो बोधः चेतनापरिणामः तस्य अक्षार्थसन्निकर्षापेक्षया **स्वतो** न याचितकमण्डनन्यायेन दर्शनानां सम्बन्धि **वैशद्यम् अनुभवतः** स्वीकुर्वतः **को विरोधः** न कश्चित् । कुत एतत् ? इत्यत्राह--**कारणसामग्या** इत्यादि । सुगमम् । परापेक्षया इदमुक्तम् । *भावतः पुनः आवारणधिगपाद् वैशद्यमिति । § 138

५ त] सदृशस्मृतेः ।
५ सा] स्मृतिः ।
९ न] स्मरणादिकम् ।
११ त] स्मृतौ ।
११ न] न इति निरर्थकमत्र ।
११ स्या] स्मृतेः ।
१६ त] संस्कारप्रबोधः ।
१७ तां] पश्यतां
१९ अ] विकल्पे ।
१९ त] र्निविकल्पारोपात् ।
२६ प] बौद्धापेक्षया ।
२६ *] परमार्थतस्तु ।
२६ पाद्]
[[ज्ञानावरणक्षय-क्षयोपशमाभ्यामेव ज्ञाने वैशद्यं भवति ।]]आवरणविगमाद्

ननु स्वार्थयोश्चेत् प्रत्यक्षं सविकल्पकं स्वाभिधानसंसृष्टयोरेव ग्राहकं स्यात्, तदभिधानयोरपि स्वाभिधानसंसृष्टयोः इत्येवं युगपदनेकाभिधानप्रतीतिप्रसङ्गः अनुभवविरुद्धः । प्रयोगश्चात्र--[यत्] सविकल्पकं ज्ञानं तदभिधानसंसृष्टार्थग्राहकं यथा नीलमिदमिति ज्ञानम्, सविकल्पकं च प्रत्यक्षमिति चेत्; अयुक्तमेतत्; अनैकान्तिकत्वात् हेतोरिति दर्शयन्नाह--**सदृश** इत्यादि । § 139

...8 सदृशस्वार्थाभिलापादितस्मृतिर्नाप्यभिलापिनी ।
तावतैवाविकल्पत्वे तुच्छा धीः स्याद्विकल्पिका ॥ ८
‖§ 141

किञ्चित्केनचिद्विशिष्टं गृह्यमाणं विशेषणविशेष्यतत्सम्बन्धादिग्रहणमन्तरेण न भवितुमर्हति । ततः प्रत्यक्षसदृशार्थाभिधानस्मृतिरनभिलापिनी 37/mkj अभिलापादिविषया सिद्धा । तदन्याभिलापापेक्षणे अनवस्थाप्रसङ्गात् । अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पनेति विशेषणाददोषश्चेत् स्वार्थसन्निकर्षनिर्भासविशेषवैकल्यव्यतिरेकेण न तद्विशेषणार्थमुत्प्रेक्षामहे । ततः किम् ? § 142

**सदृशः** सन्निहितेन समानः सङ्केतसमयभावी **स्वश्च अर्थश्च** तस्य **अभिलापः** अभिधानम् **आदिर्यस्य** विशेषणविशेष्यसम्बन्धलोकस्थित्यादेः स तथोक्तः तस्य, **नापि** नैव **अभिलापिनी** शब्दवती, परपक्षनिक्षिप्तदोषप्रसङ्गः /ms न्यायस्य समानत्वात् । अत एव अर्थाभिलापग्रहणं युगपद् अर्थाभिलापः अभिलाप प्रतिभासप्रतिपादनार्थम् । अनवस्था च स्मर्यमाणाभिलापेऽपि स्मृतस्य तस्य योजनात्, तत्रापि स्मृतस्येति । ततः अनैकान्तिको हेतुः । नाऽनैकान्तिकः तस्या अविकल्पकत्वात् **अभिलापवती प्रतीतिः कल्पना । ततोऽन्या अविकल्पिका** । इत्यपरः । तस्य उत्तरमाह--**तावतैव** इत्यादि । **तावतैव** अनभिलापित्वमात्रेणैव **अविकल्पकत्वे** अङ्गीक्रियमाणे **तत्स्मृतेः** इति विभक्तिपरिणामेन सम्बन्धः । नुल्या **तुच्छा** नीरूपा **धीः** बुद्धिः **स्याद्** भवेत् **विकल्पिका** कल्पनैव न स्यादित्यर्थः । एतदुक्तं भवति--यदा तदभिलापस्मृतिः अविकल्पिका तदा कल्पनापोढत्वात् प्रत्यक्षैव स्यात्--**कल्पनापोढं प्रत्यक्षम्** प्र॰ समु॰ पृ॰ ८ इति वचनात् । स्वलक्षणविषयत्वाच्च । स्व-

१ नु] बौद्धः ।
१९ अभिलाप] अर्थाभिलाप
२० स्य] अभिलापस्य ।
२१ त] अभिलापस्मृतेः अविकल्पकत्वेन शब्दशून्यत्वात्, अतो नापरशब्दापेक्षा ।
२१ ना] विशेषणादिसम्बन्धवस्तुप्रतिभासा प्रतीतिः कल्पना--प्र॰ वार्तिकाल॰ पृ॰ २४५ । वाच्यवाचकाकारसंसर्गवती प्रतीतिः कल्पना ।--प्र॰ वा॰ मनो॰ १ । १२५ । अभिलापिनी प्रतीतिः कल्पना--तत्त्वसं॰ श्लो॰ १२१४ ।
२४ नु] व्यर्थमेतत् ।
२४ त्या] ?
२७ म्] प्रत्यक्षं कल्पनापोढम्--न्यायप्र॰ पृ॰ ७ ।
२७ त्वाच्च] प्रत्यक्षा स्यात् ।

लक्षणगोचरमध्यक्षम्, ततो न तद्विषयस्य अभिधानस्य दृष्टे योजनमिति नीलमिदम् इत्यादि विकल्पाभावः इति प्रत्यक्षलक्षणे कल्पनापोढपदमनर्थकं व्यवच्छेद्याभावात् । माभूदयं दोषः इति तत्स्मृतिः अनभिलापिन्यपि सविकल्पिका अभ्युपगन्तव्येति स एव दोषः । § 143

एतेनेदमपि निरस्तं यदुक्तं परेण--**न सोऽस्ति प्रत्ययः** वाक्यप० १ । १२४ इत्यादि । § 144

कारिकां विवृण्वन्नाह--**किञ्चिद्** इत्यादि । **किञ्चिद्** देवदत्तादिकं **केनचित्** दण्डादिना **विशिष्टं गृह्यमाणं विशेषणं** दण्डादि **विशेष्यं** देवदत्तादि तयोः **सम्बन्धः** संयोगादिः **आदि-** शब्देन लोकव्यवस्थादिपरिग्रहः तेषां **ग्रहणं** सङ्केतकाले प्रतिपत्तिः **तदन्तरेण न भवितुमर्हति** किन्तु तस्मिन् सति भवति /ms
। तदुक्तं परेण-- § 145

*विशेषणं विशेष्यं च सम्बन्धं लौकिकीं स्थितिम् ।
गृहीत्वा संकलय्यैतत् तथा प्रत्येति नान्यथा ॥ प्र० वा० २ । १४५ इति ।§ 147

ततः किं जातम् ? इत्यत्राह--**तत** इत्यादि । यत एवं **ततः** तस्मात् **प्रत्यक्षः** पुरोवर्त्ती तेन **सदृशोऽर्थः** सङ्केतकालदृष्टः तस्य **अभिधानस्य** वाचकस्य **स्मृतिः अनभिलापिनी** अभिलापसंसर्गरहिता **अभिलापादिविषया सिद्धा** 38/mkj
। तदनभ्युपगमे दोषमाह--**तद्** इत्यादि । **तस्य** स्मर्यमाणस्य अभिलापस्य योऽन्योऽभिलापः तस्य **अपेक्षणे** अङ्गीक्रियमाणे **अनवस्थाप्रसङ्गाद्** अनभिलापिनी सिद्धेति । एतदुक्तं भवति--यदि अभिलापवती प्रतीतिः कल्पना तर्हि तद्विपरीता अकल्पना इति **स्वल्पा धीः स्याद् विकल्पिका** इति । § 148

एतत् परिहरन्नाह परः--**अभिलाप** इत्यादि । अभिलप्यते येन यो वा असौ **अभिलापः** शब्दसामान्यम् अर्थसामान्यं च, तेन अर्थस्य तस्य वा शब्देन **संसर्गो** योजनम् तस्मै **योग्यः प्रतिभासो** यस्याः सा तथोक्ता **प्रतीतिः** संवित्तिः कल्पना **इत्येवं विशेषणात्** कारणाद् **अदोषः स्वल्पा धीः स्यात् विकल्पिका** इत्यस्य दोषस्य अभावः । प्रत्यक्षसदृशाभिलापस्मृतेरपि कल्पनात्मकत्वादिति । **इत्येवं चेत्** शब्दः पराभिप्रायसूचकः । अत्राह आचार्यः—**स्वार्थ** इत्यादि । स्वं च अर्थश्च स्वस्य वा अर्थः तस्य वा **सन्निकर्ष** इन्द्रियेण

१ म्] तस्य विषयः स्वलक्षणम्--न्यायबि० १ । १२ ।
३ कं] व्यवच्छेद्यस्य विकल्पस्य अभावात् ।
३ इति] अभिलापस्मृतिः ।
३ त्स्मृतिः] शब्दरहिता अपि ।
५ रेण] शब्दाद्वैतवादिना ।
५ यः] ...लोके यः शब्दानुगमादृते ।
अनुविद्धमिवाभाति सर्वं शब्दे प्रतिष्टितम् ॥ इति शेषः ।
२२ र] बौद्धः ।
अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना ।--न्यायबि० १ । ५ ।
२३ तेन] शब्दसामान्येन ।
२३ स्य] अर्थसामान्यस्य ।

/ms सम्बन्धः तेन **जनितः** स चासौ **निर्भासविशेषश्च** निरंशपरमाणुनिर्भासः तस्य **वैकल्यम्** अभावः, पर्युदासापेक्षया स्थूलैकप्रतिभास एव तद्वैकल्यं **तद्व्यतिरेकेण** तदपहाय **न तद्विशेषणार्थं** विशेषणाभिधानाभिधेयम् **उत्प्रेक्षामहे** इति किन्तु तदेव पश्यामः । **ततः किम्** ततः तस्मात् तद्विशेषणार्थात् **किं** दूषणमित्यपरः । § 149

अत्र आचार्यः प्राह--**पश्यन्** इत्यादि । § 150

...9 पश्यन् स्वलक्षणान्येकं स्थूलमक्षणिकं स्फुटम् ।
यद्व्यवस्यति वैशद्यं तद्विद्धि सदृशस्मृतेः ॥ ९ ॥§ 152

स्वलक्षणानि स्वयमभिमतक्षणक्षयपरमाणुलक्षणानि पश्यतोऽपि केवलमेको हि ज्ञानसन्निवेशी स्थवीयानाकारः परिस्फुटमवभासते । यदि तुभ्यं रोचते । प्रकृतसदृशस्मृतेरिव अव्यापृताक्षबुद्धावप्रतिभासनात् । शब्दैश्च सदृशाकारमशब्दं स्मरत्येव । तस्याश्च प्रामाण्यं युक्तम् । न हि तयाऽर्थं परिच्छिद्य अर्थक्रियायां विसंवाद्यते । अनधिगतार्थाधिगन्तृत्वाभावादयुक्तम्, इत्यत्रोक्तम् । तत्समुच्चयलक्षणे प्रमाणे अन्यतरस्यापि प्रामाण्यासंभवात् । तदशाब्दमविसंवादकं सदृशस्मरणमस्ति संहृतसकलविकल्पावस्थायां तथैव प्रतिभासनात् । तदर्थदर्शनमुपनिपत्य स्वतः स्मृतिं जनयत् नानात्मनान्तरीयकमाकारं पुरस्कर्तुं युक्तं तदर्थवत् । तद्दर्शनं नासाधारणैकान्तगोचरं व्यापृताक्षस्य कदाचित् क्वचित्तथैवाप्रतीतेः । नहि बहिरन्तर्वा जातुचिदसहायमाकारं पश्यामो यथा व्यावर्ण्यते तथैवानिर्णयात् । नानावयवरूपाद्यात्मन एकस्य परिणामिनो घटादेः बहिः संप्रतीतेः अन्तः चित्तैकाकारस्य एकस्य चित्रस्येव । न च तद्विपरीतार्थप्रकाशकं किञ्चिज्ज्ञानमस्ति यत् प्रकृतं भ्रान्तं स्यात् । न हि तदेकान्ते स्वसदसत्समये अर्थक्रियासंभवः । तथा सति कथमक्षणिकत्वे क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् तीरादर्शिशकुनिन्यायेन
39/mkj ततः सत्त्वं निवर्तमानं क्षणिकत्वे अवतिष्ठते इति सतः साकल्येन क्षणभङ्गसिद्धिः ? तत्रैव ताभ्यां तद्विरोधात् । ततो यत् सत् तत्सर्वमनेकान्तात्मकम् । तदेकान्तस्यासत्त्वम् उपलब्धिलक्षणप्राप्तावनुपलभ्यमानत्वात् । अन्यथाऽप्रमेयत्वम् । § 153

परस्परविलक्षणानि निरंशक्षणानि **स्वलक्षणानि पश्यन्** सौगतः अन्यो वा जिनः * अनेन **सञ्चितालम्बनाः पञ्च विज्ञानकायाः** इति परस्य सिद्धान्तो दर्शितः । किमर्थमिति चेत् ? § 154

---

७ प] उद्धृतोऽयम्--न्यायबि० वि० प्र० पृ० ९८ ।

२८ णानि] यस्यार्थस्य सन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासभेदः तत् स्वलक्षणम् । तदेव परमार्थसत् ।--न्यायबि० १ । १३, १४ ।

२९ *] जनः

२९ इ] रूपवेदनाविज्ञानादयः । पञ्चसञ्चयस्यालम्बात्--प्रमाणसमु० श्लो० १७ ।

*प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति ।
प्रत्यात्मवेद्यः सर्वेषां विकल्पो नामसंश्रयः ॥ प्र० वा० २ ।
१२३ § 156

इत्यस्य **एकम्** इत्यादिना वक्ष्यमाणेन प्रत्यक्षेण बाधाप्रदर्शनार्थम्; तथाहि-- § 157

प्रत्यक्षं कल्पनापोढं प्रत्यक्षेण निराकृतम् ।
प्रत्यात्मवेद्यं सर्वेषां जात्यन्तरमिह स्फुटम् ॥§ 159

तद्यथा--**स्थूलं** महत्त्वोपेतं घटादिकं **व्यवस्यति** निश्चिनोति सौगतो जनो वा न सूक्ष्मं परमाणुरूपम् **एकं** युगपदनेकावयवगुणसाधारणम् । अनेन अक्रमानेकान्तो दर्शितः । **अक्षणिकं** पूर्वापरकोटिसंघटितशरीरं मृत्पिण्डादिषु कथञ्चिन्मृदेकत्वदर्शनात् । अनेन क्रमाऽनेकान्तः । ननु व्यवस्यति तथाभूतं तत्तु कल्पनामितिकल्पितत्वात् अपरिस्फुटमिति चेत्; अत्राह--**स्फुटम्** इति । **स्फुटं** विशदमिति । ततो निराकृतमेतत् यदुक्तं--प्र ज्ञा क रे ण **अस्थूलाऽनेकापेक्षया तत् स्थूलमेकम् इति न पारमार्थिकम् । न हि वस्तुस्वभावाः परापेक्षया भवन्ति अतिप्रसङ्गात् ।** इति । कथम् ? /ms
स्फुटत्वाभावप्रसङ्गात् । तथैव तत्, न परापेक्षमेतत्, स्वयं स्थूलस्यैव बिल्वकपित्थादेः सर्षपापेक्षया स्थूलताव्यवहारः । न हि तथाऽपरिणतम् अन्यापेक्षया तद् भवति अतिप्रसङ्गात् । **यत्** यस्मात् **वैशद्यं विद्धि** जानीहि **सदृशस्मृतेः** व्यवसायात्मनो दृष्टेः सम्बन्धीति । § 160

ननु यदि **प्रत्यक्षं कल्पनापोढम्** प्र० वा० २ । १२३ इत्यादेर्निषेधार्थम् **एकम्** इत्यादि वचनम्; तर्हि **एकं स्थूलम्** इत्यनेन **अक्षिणकम्** इत्यनेन वा तन्निराक्रियत इत्युभयवचनमनर्थकमिति चेत्; न; क्रमाऽक्रमानेकान्तयोः समानबलताप्रतिपादनार्थत्वात् तद्वचनस्य । तथाहि--यथैव प्र ज्ञा क र स्य मध्यक्षणदर्शनं पूर्वोत्तरक्षणौ द्रष्टुमसमर्थमिति न तयोः तेन एकत्वं हेतुफलभावमन्यं वा सम्बन्धं प्रत्येतुमर्हति **द्विष्ठसंबन्धसंवित्तिः** प्र० 40/mkj

५ त्य] तुलना--प्रत्यक्षं कल्पनापोढं प्रत्यक्षादिनिराकृतम् ।--न्यायवि० १ । १५४ ।
६ जा] कथञ्चित् नित्यानित्यात्मकम् ।
९ अ] युगपदनेकद्रव्यव्यापकस्कन्धविषयकः स्थूलत्वग्राहकः ।
१० माऽनेकान्तः] दर्शितः । क्रमशः परापरपर्यायव्याप्येकद्रव्यविषयकः स्थिरत्वग्राहकः ।
११ नामिति] मति
१२ दुक्तं] परमार्थसन्तोऽवयवाः संवृतिसन्नवयवीति...--प्र० वार्तिकाल० पृ० ५५५ । पृ० १८७ ।
१४ न्ति] सत्तां स्वीकुर्वन्ति ।
१५ त] तथा परिणतमेव तत् भवति न परापेक्षया तथाऽपरिणतं तद् भवितुमर्हति, व्यवहार एव हि परापेक्षया भवति न स्वरूपम् ।
२३ योः] पूर्वोत्तरयोः ।
२३ तेन] मध्यक्षणेन ।
२४ संवित्तिः] नैकरूपप्रवेदनात् । द्वयोः स्वरूपग्रहणे सति सम्बन्धवेदनम् । इति शेषः ।

वार्तिकाल° २ । १ इत्यादि वचनात्, नापि सत्त्वम् अद्वैतोपगमात् । तथा मध्यक्षणस्य पूर्वसूक्ष्मनिरंशैकांशग्रहणे मग्नं न तद् इतरभावत्वाक्षितुं क्षमते इति तेषामपि सैव वार्त्ता स्यात् । न च तदंशज्ञान सामान्यवत् इति सर्वशून्यताप्रसङ्गः । स मा भूदिति स्तम्भज्ञानमेकमभ्युपगन्तव्यम्, तच्च मध्यभागे प्रवर्तमानं तद्ग्रहणानुबन्धमजहदेव ऊर्ध्वाधस्तर्यग्भागेषु यथा /ms प्रवर्तते तथा मृत्पिण्डे प्रवर्तमानं तद्ग्रहणानुबन्धमजहदेव क्रमेण शिविकादीनि अवस्यतीति सिद्धम्--**अक्षणिकं स्फुटं व्यवस्यति** इति । शेषं परस्य दुश्चेष्टितं प्रहन्तव्यं दिशाऽनया । § 161

पूर्वकारिकायां **सदृशे**त्यादिना परकीयस्य हेतोः अनैकान्तिकत्वं दर्शितम्, **तावतैव** इत्यादिना **कल्पनापोढम्** प्र° वा° २ । १२३ इति लक्षणस्य व्यवच्छेद्याभावः, अनेन श्लोकेन तदसंभवः इति विभागः । § 162

कारिकां विवृण्वन्नाह--**स्वलक्षणानि** इत्यादि । **स्वलक्षणानि** कथम्भूतानि ? **[स्व]यम्** आत्मना सौगतेन न जैनेन नैयायिकादिना वा **अभिमतः** अङ्गीकृतो यः **क्षणे क्षणे क्षयः** नासौ निरन्वयो न परिणामलक्षणः षट्कोणस्थानलक्षणो वा, तेन उपलक्षिता ये **परमाणवः ते लक्षणं** स्वरूपं येषां तानि तथोक्तानि । तानि किम् ? इत्यत्राह--**पश्यतोऽपि** वीक्ष्यमाणस्यापि सौगतस्य न केवलमपश्यतः **केवलम् एको हि ज्ञानसन्निवेशःस्थवीयान् आकारः परिस्फुटमवभासत** इति । ननु तथाविधानि स्वलक्षणानि पश्यतः तथाविध आकारोऽवभासते इति विरुद्धमेतत् । नहि नीलं पश्यतः पीतं तथाऽवभासते इति वचन[म]विरुद्ध[म्] इति चेत्; न; अर्थापरिज्ञानात् । अयं हि अस्यार्थः--**सञ्चितालम्बनाः पञ्च विज्ञानकायाः** इति परस्य राद्धान्तः । तत्र च यावन्तः परमाणवो न तावन्त्येव तदाकारानुकारीणि ज्ञानानि, *सन्तानान्तरवद् भेदात् समूहादिप्रतीतिविलोपात्, एकं तेषां ज्ञानं ग्राहकमभ्युपगन्तव्यम् /ms । तच्च अन्योऽन्यविविक्तानेकपरमाण्वर्पिताकारानुकरणाद् **एव** मुच्यते, **एकः** अनेकपरमाण्वर्पितभिन्नाकारसाधारणः । **हि** इति यस्मादर्थे, यस्मादेवं **तदविसंवादकं सदृशस्मरणमस्ति** इत्यनेन सम्बन्धः । अत्रापि **तत्** इत्येतत्

---

१ म्] प्रत्येतुमर्हति । विचार्यमाणं सकलं विशीर्यते नाद्वैतादपरं तत्त्वमस्ति ।--प्र° वार्तिकाल° पृ° ३१ ।
२ द्] दर्शनम् ।
२ इत] पूर्वोत्तरादि ।
३ त्वाक्षितुं] भावान् वीक्षितुं
३ स्यात्] असत्त्वं स्यादित्यर्थः ।
३ ज्ञान] नं
४ त्] इतरनिरपेक्षं सत् स्वरूपं लभते, इति अस्तित्वविहीनमित्यर्थः । अथवा सामान्यवत्--सामान्यम् अस्तित्वं तद्वत् अस्तित्वशालि इत्यर्थः ।
४ भूदिति] स्थूलस्कन्धज्ञानम् ।
५ च्च] स्तम्भज्ञानमेकम् ।
९ हेतोः] अभिधानसंसृष्टार्थग्राहकत्वे साध्ये सविकल्पकत्वादिति हेतोः ।
११ श्लोकेन] क्षणिकस्वलक्षणग्राहकनिर्विकल्पप्रत्यक्षासंभवः ।
१७ न्निवेशः] शी
१८ नु] क्षणक्षयपरमाणुलक्षणानि ।
२१ इति] बौद्धस्य । द्रष्टव्यम्— पृ° ३९ टि° २ ।
२२ *] विभिन्नपुरुषज्ञानवत् ।
२४ च्च] परस्परविभिन्न ।
२४ एव] एक

तस्मादर्थे द्रष्टव्यः । कथम्भूतोऽसौ ? इत्यत्राह--**ज्ञानसन्निवेशो** भेदविवक्षया परमाणुभिरर्पिता ज्ञानस्य आकारा **ज्ञानानि सम्यक्** कथञ्चित्तादात्म्येन निवेष्टुं शीलः **सन्निवेशी** । पुनरपि कथम्भूतः ? इत्यत्राह--**स्थवीयान्** स्थूलतरः । ननु कारिकायाम् **स्थूलं व्यवस्यति** इति वचनात् नातिसायिकस्य श्रुतिः वृत्तौ तु सास्ति तत्कथं वृत्तिकारिकयोः साङ्गत्यमिति चेत् ? अयमभिप्रायः- 41/mkj
-सौगतापेक्षया मध्यक्षणः स्थूलः एकस्यानेकभावव्याप्तेः, स एव जैनापेक्षया अतिशयेन स्थूलः सावयवः पूर्वोत्तरक्षणव्याप्तेः । ततः प्रकृत्य आदौ **स्थूलम्** इति व्याख्यातम् । तेन **अक्षणिकम्** इति व्याख्यानं । *तेनाक्षणिकमिति । कोऽसौ ? इत्यत्राह--कृतोः वस्तुस्वभावः । कथमवभासते ? इत्यत्राह— **परिस्फुटम्** इति, क्रियाविशेषणमेतत् । ननु यदि मम स्वलक्षणानि क्षणिकपरमाणुलक्षणानि पश्यतः तथाविध आकारोऽवभासते कथं तथा न जानानि ? कथमन्यथा यत् सत् तत्सर्वमनेकान्तात्मकम् इति वक्ष्यमाणकमनुमानमर्थवत् ? इतरा क्षणक्षयेऽपि पक्षे तदनुमानमनर्थकं न स्यादिति चेत्; अत्राह--जानासौष्ठवप्रदर्शनार्थः **यदि तुभ्यं** **सौगताय** **रोचते** दिण्डिक रागं परित्यज्य यदि तत्र रुचिं कुरुषे स्वयमेव । न चैवम्, तस्मात् रुचिक- /ms
रणार्थमनुमानमिति मन्यते । ननु ज्ञानसन्निवेशी स्थवीयानाकारोऽवभासते, किन्तु तज्ज्ञानस्य अनक्षजत्वात्, अक्षजं ज्ञानं स्वार्थपरिस्फुटम्, *अभिधानजनतिस्वर्गादिविकल्पप्रतिभासाऽविशेषाच्च न परिस्फुटमवभासत इति चेत्; अत्राह--**प्रकृत** इत्यादि । **प्रकृता** प्रमाणस्य उत्पादेः अधिकृता या **सदृशस्मृतिः** तस्यातिवा **अव्यापृताक्षस्य** अर्थग्रहणं प्रति अव्यापृताभ्येक्षणियस्य या **बुद्धिः** विकल्पिका तस्याम् **अप्रतिभासनात्** एकस्य ज्ञानसन्निवेशिनः स्थवीयसत्स्वाकारस्य इति तापरिणामेन सम्बन्धः । एतदुक्तं भवति--यथा

---

१ न्निवेशो ] शी
४ स्य ] नातिशायिकस्य[[अतिशयवाचिनः प्रत्ययस्य ।]]
५ तु ] अतिशयेन स्थूल इति स्थवीयान् इत्यत्र अतिशयार्थस्य श्रुतिः वृत्तौ वर्तते ।
८ तेन ] एतेन
८ व्याख्यानं ] व्याख्यातम्
८ * ] तेनाक्षणिकमिति द्विर्लिखितम् ।
९ कृतोः ] आकारः
१० म ] बौद्धस्य ।
१२ जानानि ] तथा नाभ्यनुजानाति[[परः ।]]
१२ क ] जैनो नाभ्यनुजानाति अतएव ।
१३ इ ] इतरस्य बौद्धस्य । कथमन्यथा इति अत्रापि योज्यम् ।
१३ रा ] रस्य
१३ त ] क्षणक्षयानुमानम् ।
१४ जाना ] ज्ञाना
१५ दिण्डिक ] डिण्डिक[[डिण्डिकरागम्--परेणोक्ते तस्योपरि मयाऽवश्यमयुक्ततया निष्फलमभिधानीयम् इत्यस्थानाभिनिवेशम्--हेतुबि॰ टी॰ पृ॰ ७१ ।]]
१७ स्य ] विकल्पज्ञानस्य ।
१७ अ ] इन्द्रियजं निर्विकल्पज्ञानम् ।
१७ * ] शब्दजनित ।
१८ र्गादि ] विकल्पप्रतिभासतुल्यत्वात् ।
१९ उत्पादेः ] दे
२० स्यातिवा ] तस्या इव
२१ स्य ] अव्यापृतानि अक्षाणि यस्य तस्य
२२ स्य ] स्थवीयसः आकारस्य
२२ इति ] ता इति षष्ठीविभक्तेः संज्ञा जैनेन्द्रव्याकरणे ।

प्रकृतसदृशस्मृतौ तदाकारस्य प्रतिभासनं तथा यद्यव्यापृतेन्द्रियविकल्पबुद्धौ स्यात् युक्तमेतत्, न चैवम्, *एकत्र स्फुटतया अन्यत्र विपर्ययेण प्रतिभासनात् । **शब्देश्च** कारणभूतैर्बुद्धावप्रतिभासनात् । **च** शब्दो भिन्नप्रक्रमः । ततः किं जातम् ? इत्यत्राह--**सदृशाकारम्** इत्यादि । **सदृशः** साधारणः युगपत्क्रमभाविभागे स्वाकारो * यस्य तम् **अशब्दं** शब्दरर्वमर्थं **स्मरत्येव** निश्चिनोत्येव । § 163

*ननु भवतु प्रकृतसदृशस्मृतौ तथाविधाकारस्य तथाभासनम् तथापि सा प्रमाणं माभूद् दूरस्थितविरलकेशादौ तथाविधाकाराभावेऽपि तदवभासदर्शनादिति चेत्; इत्यत्राह--**तस्याश्च** इत्यादि । **तस्या** एव प्रकृतसदृशस्मृतेरेव **प्रामाण्यं युक्तम्** उपपन्नम् । **न हिः** यस्मात् **तया** प्रकृतसदृशस्मृत्या **अर्थं** सदृशाकारं वस्तु **परिच्छिद्य प्रवर्तमानः अर्थस्य क्रियायां** प्राप्तौ **विसंवाद्यते** दूरस्थितविरलकेशादिषु स्थूलैकाकारवद् विप्रलम्भं नार्हति । भवतु अविसंवादिनीयं तथापि नास्याः प्रामाण्यं दर्शनदृष्टविषयत्वात् । एतदेवाह--**अनधिगतार्थाधिगन्तृत्वाभावाद् अयुक्तमिति,** दर्शनेन अनधिगतोऽपरिच्छिन्नो योऽर्थः तस्य अधिगन्तृत्वाद् **अयुक्तं** प्रामाण्यमिति; अत्रोत्तरमाह--**अत्रोक्तम्** इति । **अत्र** पूर्वपक्षे **उक्तम्** उत्तरम् **अनधिगत** सिद्धिवि° पृ° २४ इत्यादि । § 164

/ms (beside line "दृशस्मृतेरेव प्रामाण्यं युक्तम्…"); 42/mkj (beside line "। एतदेवाह--…")

**प्रमाणमविसंवादिज्ञानम्**प्र° वा° १ । ३ इत्यादि **अन्यतः प्रवृत्तौ अविसंवादनियमाऽयोगात्** सिद्धिवि° वृ° १ । ३ इत्यनेन **अज्ञातार्थ** प्र° वा° १ । ७ *इत्यादि च **अनधिगतार्थाधिगन्तृ प्रमाणमित्यपि** सिद्धिवि° वृ° १ । ३ इत्यादिना च प्रत्येकपक्षे निराकृत्य समुत्तरम् अनधिगतेत्यादि प्रमाणमविसंवादिज्ञानामित्यादि अन्यतः प्रवृत्तावविसंवादनियमायोगात् समुदायपक्षे निराकुर्वन्नाह--**तत्समुच्चय** इत्यादि । तयोः **प्रमाणमविसंवादिज्ञानम्** प्र° वा° १ । ३ **अज्ञातार्थप्रकाशो वा** प्र° वा° १ । ७ इत्येतयोः **समुच्चयः** समुदायः स एव **लक्षणं** प्रमाणस्य यस्य तस्मिन् **प्रमाणे** अङ्गीक्रियमाणे प्रत्यक्षनुमानयोर्मध्ये **अन्यतरस्य** प्रत्यक्षस्य अनुमानस्य वा **अपि**शब्दाद् द्वयोरपि **प्रामाण्यासंभवात्, तस्याश्च प्रामाण्यं युक्तम्**इति सम्बन्धः । त-

/ms (beside line "द्वयोरपि प्रामाण्यासंभवात्…")

१ स्मृतौ] एकस्थूलाकारस्य ।
१ बुद्धौ] इन्द्रियव्यापारशून्यस्य पुंसः वासनाजन्यविकल्पज्ञाने ।
२ *] इन्द्रियजन्यविकल्पबुद्धौ ।
२ त्र] मानसकल्पनाज्ञाने ।
५ *] भागेषु आकारो
५ र्थं] रहितमर्थं
७ *] बौद्धः ।
७ स्य] स्फुटं प्रतिभासनम् ।
८ थापि] स्मृतिः ।
१३ अविसंवादिनीयं] स्मृतिः ।
१३ नास्याः] स्मृतेः ।
१३ त्वात्] अनु भूतविषयत्वात् स्मृतेः ।
१५ न्तृत्वाद्] त्वाभावात्
२० *] अज्ञातार्थप्रकाशो वा--प्र° वा° ।
२१ निराकृत्य] एतच्चिह्नान्तर्गतः पाठो द्विर्लिखितः ।
२६ माणे] तस्मादनधिगतार्थविषयं प्रमाणमित्यपि अनधिगते स्वलक्षणे इति विशेषणीयम् ।--हेतुबि° पृ° ५३ । तत्राप्यविसंवादग्रहणात् ।--प्र° वार्तिकाल° पृ° ३० । तस्मादुभयमपि परस्परसापेक्षमेव लक्षणं बोद्धव्यम् ।— प्र° वा° मनो° १ । ८ ।

थाहि--परस्य प्रत्यक्षे अज्ञातार्थप्रकाशोऽस्ति न तु अविसंवादः, तत्र स्वार्थयोः विप्रतिपत्तिविषयत्वात् । अनुमाने अविसंवादोऽस्ति न पुनः अज्ञातार्थप्रकाशः, व्याप्तिग्राहकज्ञानगृहीतगोचरत्वात् । वक्ष्यते चैतत्— **साकल्येनादितो व्याप्तिः** सिद्धिवि० ३ । ३ इत्यादिना । § 165

प्रकृतमुपसंहरन्नाह--**तद्** इत्यादि । यत एवं **तत्** तस्मात् **अशाब्द-म्** शब्दानाम् इदं शाब्दं तत्कार्यमिति यावत्, न शाब्दम् अक्षजमित्यर्थः । **अविसंवादकं** स्वयम् अध्यवसितार्थप्रापकं **सदृशस्मरणं** युगपत् क्रम-भाविभागसाधारणाकारज्ञानं परप्रसिद्धा सदृशस्मरणम् उच्यते **अस्ति** विद्यते । ननु चेदं नाक्षजं किन्तु मानसं संहृतसकलविकल्पावस्थायाम् अक्षज-स्य अन्यथा दर्शनादिति चेत्; अत्राह--**संहृत** इत्यादि । **संहृताः सकला विकल्पा** यस्याम् **अवस्थायां** तस्यामपि न केवलम् अन्यस्यां *‌**तथैव** उक्तप्रकारेणैव **प्रतिभासनात्** स्वार्थयोः इति । ननु यदि सा अवस्था; कथं तथैव प्रतिभासनम् ? तच्चेत्; न साऽवस्था, तथाप्रतिभासस्य विक-ल्पात्मकत्वादिति चेत्; सत्यम्, तथापि ततोऽन्यस्य विकल्पस्य अभावात् **संहृत** इत्यादि वचनम् । अथवा परापेक्षया इदमभिधानमित्यदोषः । प-रेण हि याऽसौ तदवस्था उपवर्णिता **संहृत्य सर्वतश्चिन्ताम्** प्र० वा० २ । १२४ *इत्यादिना, तस्यामपि तथैव प्रतिभासनादिति । अनेन सैव नास्ति इत्युच्यते । ततो निराकृतमेतत् यदुक्तं परेण--**यद् उपलब्धिलक्षणप्राप्तं यत्र** /ms **नोपलभ्यते तत् तत्र नास्ति यथा प्रदेशविशेषे घटः, उपलब्धिलक्षणप्राप्ताश्च कल्पनाः संहृताशेषविकल्पावस्थायां दर्शने नोपलभ्यन्ते** इति । कथम् ? प्रत्यक्षबाधितत्वात् पक्षस्य । तथैव प्रतिभासनं हि कल्पनात्मकमात्मानं 43/mkj प्रतिपदम् आत्मनि विपरीतकल्पनां प्रतिहन्तीति संहृताशेषविकल्पावस्थायां दर्शनस्य कल्पनाविरहसिद्धौ यत् साधनमुक्तं परेण--**या कल्पना यस्मिन् काले विद्यते सा तत्कालसम्बन्धिनी पुनः स्मर्यते, यथा गोदर्शनकालस-म्बन्धिनी अश्वकल्पना, न च संहृताशेषविकल्पावस्थाभाविनी पुनः स्मर्यते सा** । इति । तदुक्तम्-- § 166

*पुनर्विकल्पयन् किञ्चिद् आसीन्मे कल्पनेदृशी ।
इति वेत्ति न पूर्वोक्तावस्थायाम् इन्द्रियाद् गतौ ॥ प्र० वा० २ । १२५ इति ।§ 168

१ स्य] बौद्धस्य ।
१ त्र] निर्विकल्पप्रत्यक्षे ।
११ *] परिस्फुटरूपेण ।
१२ स्था] विद्यते ।
१३ त] स्थिरस्थूलादिरूपेण ।
१५ प] बौद्ध ।
१७ *] स्तिमितेनान्तरात्मना । स्थितोऽपि चक्षुषा रूपमीक्षते साऽक्षजा मतिः । इति शेषः ।
२२ नि] निर्विकल्पकरूपाम् ।
२३ रेण] बौद्धेन ।

तत्रोत्तरमाह--**तदर्थदर्शनम्** इत्यादि । **दर्शनम्** अविकल्पार्थदर्शनं कर्तृ **उपनिपत्य** उपढौक्य स्वकार्यजन्मन्यव्यवहितं भूत्वा न पुनः सङ्केतस्मृतिजननेन । अन्यथा इदं दूषणं स्यात्-- § 169

*यः प्रागजनको बुद्धेः उपयोगाऽविशेषतः ।
स पश्चादपि तेन स्यादर्थापायेऽपि नेत्रधीः ॥§ 171

अस्यायमर्थः--यः अविकल्पो बोधः प्राक् स्वसत्तासमये अजनको बुद्धेः /ms सदृशस्मृतेः स उपयोगाविशेषतः व्यापाराविशेषतः स पश्चादपि सङ्केतस्मृत्युत्तरकालमपि ते सौगतस्य न स्यात् जनकः । ततः किं स्यात् ? इत्यत्राह--अर्थस्य अविकल्पबोधलक्षणस्य अपायेऽपि अभावेऽपि नेत्रधीः अक्षजविकल्पबुद्धिः । ततो न युक्तमेतत्--**यत्रैव जनयेदेनाम्** इत्यादि । ततः सूक्तम्--**उपनिपत्य** इति । **स्वतः** आत्मनैव न वासनाप्रबोधद्वारेण **संस्कारा विनियम्येरन्** सिद्धिवि° १ । ६ इति दोषात् **स्मृतिं** स्मरणम् **जनयद्** उत्पादयत् **नानात्मनान्तरीयकम् आत्मनि** तदर्थदर्शनस्वरूपे **अविद्यमानमाकारं** सामान्यरूपं **न पुरस्कर्तुं** स्मृतेः अग्रे दर्शयितुं **युक्तम्** उपपन्नम् । अत्र निदर्शनमाह--**तदर्थवत्** । तस्य दर्शनस्य अर्थो निरंशस्वलक्षणं **तदर्थः** स इव तद्वदिति । यथा तदर्थ उपनिपत्य स्वतो दर्शयन् नानात्मनान्तरीयकमाकारं पुरस्कर्तुं युक्तः तथा दर्शनमपि इति । अन्यथा अर्थादेव सामान्यावभासिनो ज्ञानस्य उदयाद् इदमयुक्तं स्यात्--**तद्धि अर्थसामर्थ्यम्** इत्यादि । § 172

यत् पुनरत्रोक्तं प्र ज्ञा क र गु प्ते न--**नेदं स्वतन्त्रं साधनम् अपि तु प्रसङ्गसाधनम् । तयाहि--बहिरर्थग्राहकं चेद् दर्शनं परेणेष्यते तस्मादुत्पन्नं तदाकारानुकारि च अभ्युपगन्तव्यम्, अन्यथा तदयोगादिति निरंशाऽर्थानुकारित्वात् निर्विकल्पकं सिद्धम्** । इति; तदनेन अपास्तम्; यत्र हि /ms, 44/mkj व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयकः प्रदर्श्यते तत्प्रसङ्गसाधनम् । न चेह तदस्ति आकारान्तरानुकारित्वस्याप्यविरोधात् । अर्थसिद्धिर्न

---

३ नेन] अन्यथा भवितुमर्हति ।
४ यः] उद्धृतोऽयम्--तत्त्वोप° पृ° ४० । न्यायम° पृ° ८६ । न्यायवा° ता° पृ° १३६ । अष्टस° पृ° १२२ । सन्मति° टी° पृ° ५२५ ।
९ अ] अर्थशब्देन अर्थविषयकं निर्विकल्पकज्ञानं ग्राह्यम् ।
१० इ] तत्रैवास्य प्रमाणता इति शेषः । द्रष्टव्यम्--पृ° १० टि° ३ ।
१७ अ] यद्यविद्यमानमाकारमुपदर्शयेत् ।
१८ भासिनो] विकल्पस्य
१९ म्] ?
१९ इ] तदुक्तम्—
तद्ध्यर्थसामर्थ्येनोत्पद्यमानं तद्रूपमेवानुकुर्यात्--हेतुबि° टी° पृ° १९५ । तथाहि--अर्थस्य सामर्थ्येन समुद्भवात् इत्याह--तद्धि अर्थस्य सामर्थ्येनात्पद्यमानं तद्रूपमेवानुकुर्यात् ।--प्र° वार्तिकाल° पृ° २७८ ।
२४ कः] न अन्तरा भवतीति नान्तरीयकम् अविनाभावीत्यर्थः ।
२५ म्] प्रसङ्गसाधनं परस्येष्टा अनिष्टापादनात् ।...साध्यसाधनयोर्व्याप्यव्यापकभावसिद्धौ व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयकः व्यापकाभावो वा व्याप्याभावाविनाभावी इत्येतत्प्रदर्शनफलम् ।— प्रमेयक° पृ° ५४४ । प्रश° कन्द° पृ° ४३ ।

स्यादिति चेत्; तथैव अविकल्पसिद्धिरपि । न चैवं नीलादिविकल्पस्य गृहीतग्राहित्वम्, इति न युक्तम् **अज्ञातार्थ** प्र॰ वा॰ १ । ७ इत्यादि । यदा चैवं व्यवहारी वदति यथा मम ज्ञानादनुत्पन्नः अतदाकारानुकारी वा अर्थः तस्य कारणम्, तथा अर्थादनुत्पन्नम् अतदाकारं ज्ञानं तस्य ग्राहकम्; तदापि कथं प्रसङ्गसाधनम् ? ततः स्थितम्--**तदर्थवत्** इति । तथा च यथा दर्शनं तदर्थाज्जायमानम् अविकल्पकम्, तथा तद्दर्शनादुत्पद्यमानं स्मरणमपि इति विकल्पवार्तापि गता, इति न युक्तमेतत्--**पुनर्विकल्पयन् किञ्चिद् आसीन्मे कल्पनेदृशी । इति वेत्ति** प्र॰ वा॰ २ । २२५ इति । न चा स्मृतौ संहृताशेषविकल्पावस्थाप्यस्ति, कल्पनापि तदा तथैव अन्यथा भवेत् । अथ सामान्यावभासि स्मरणमिष्यते; दर्शनमपि तथैष्यतामिति कथं तदवस्थाभाविनी कल्पना न स्मर्यते इति भावः । § 173

उपसंहरन्नाह--**तद्दर्शनम्** इत्यादि । यत एवं **तत्** तस्मात् **दर्शनं** प्रत्यक्षं **न असाधारणैकान्तगोचरम्** असाधारण एकः असहायः अन्तो धर्मो गोचरो यस्य तत् तथोक्तम् न । कुत एतत् ? इत्याह--**व्यापृताक्षस्य** इत्यादि । व्यापृतानि ज्ञानजनने प्रणिहितानि अक्षाणि इन्द्रियाणि यस्य तस्य **कदाचित्** संहृताशेषविकल्पावस्थायाम् अन्यदशायां वा **क्वचिद्** बहिरन्तर्वा **तथैव** /ms असाधारणगोचरप्रकारेणैव **अप्रतीतेः** दर्शनस्य इति पदघटना । एतदेव भावयन्नाह— न हि इत्यादि । **हिः** यस्मात् **न बहिरन्तर्वा जातुचित्** कदाचित् **असहायं** प्रत्यनीकधर्मरहितम् **आकारं** वस्तुस्वरूपं **पश्यामः यथा** येन प्रकारेण **व्यावर्ण्यते** कथ्यते **परैः** इत्यध्याहारः । कुत एतत् ? इत्यत्राह--**तथैवाऽनिर्णयात् [तथैव]** वर्णितप्रकारेण **अनिर्णयात्** अनिश्चयात् । निर्णीतं च गृहीतमुच्यते इति मन्यते । एतदपि कुतः ? इत्यत्राह--**नानावयवरूपाद्यात्मनः** इत्यादि । घट आदिर्यस्य शरीरादेः स **घटादिः** तस्य । कथम्भूतस्य ? **अर्थस्य** न ज्ञानस्य । कुत एतत् ? **बहिः** ज्ञानादन्यत्र देशे **संप्रतीतेः** निर्णयात् **एकस्य** न परमाणुसंचयरूपस्य **असहायमाकारं नहि पश्यामः** इति सम्बन्धः । § 174

एवमपि च अवयवगुणेभ्यो भिन्नस्य तस्य संप्रतीतेः नैयायिकादिमतसिद्धिरिति चेत्; अत्राह--**नानावयवरूपाद्यात्मन** इति । नाना अवयवाश्च रूपादयश्च आत्मानो यस्य स तथोक्तः, ते चलाश्च अचलाश्च आवृताश्च अनावृताश्च रक्ताश्च तद्विपरीताश्च नष्टा[श्चा]ऽनष्टाश्च अवयवाः नानावयवाः, **तदात्मनः** इति वचनात् चलैः पाण्यादिभिः चलः विपरीतैः अचलः स इत्युक्तं भवति । कथमेकस्तथेति चेत् ? तथासंप्रतीतेः इति ब्रूमः । नहि पाण्याद्यवयवचलने स न चलति इत्यत्रापि तथासंप्रतीतेरन्यत् शरणमस्ति । *इयमेव

३ अ] ज्ञानाकाराननुकारी ।
४ त] ज्ञानस्य ।
४ स्य] अर्थस्य ।
७ पि] अविकल्पकं स्यात् ।
९ चा] न वा
११ त] संहृताशेषविकल्पावस्था ।
२० रैः] बौद्धैः ।
२७ त] अवयविनो द्रव्यस्य वा ।
३३ स] अवयवी ।
३३ *] अवयवचलनेऽपि अवयवी न चलतीत्याकारिका ।

/ms, 45/mkj प्रतीतिः, नेतरेति चेत्; न; एकदेशचलनेऽपि लोके शरीरं चलति इति व्यवहारदर्शनात्, तथाहि--यदा किमयं मृत उत जीवति इति क्वचित् सन्देहः, तदा जीवति अयं हस्तचलनेऽपि शरीरं चलयति यतः इति व्यवहारदर्शनात् । अवयवक्रियायाः अवयविनि उपचारात् तथाव्यवहारः, अश्वक्रियायाः पुरुषे उपचारात् पुरुषो याति इति व्यवहारवदिति चेत्; तर्हि न अवयवेऽपि परमार्थतः क्रिया स्यात्, तत्रापि परक्रियोपचारात् तथा व्यवहारात् । अस्खलत्प्रत्ययः उभयत्र समानः । एकस्य चलेतररूपत्वमयुक्तं विरोधादिति चेत्; न; स्वरूपेण विरोधासिद्धेः । नहि यद् यस्य स्वरूपं तत् तेन विरुध्यते, सर्वभावेषु तथात्वापत्तेः । तत्स्वरूपं च तथाप्रतीतेः । § 175

योऽप्याह परः--**पाण्यवयवे चलति न शरीरं चलति । कुतः ? कारणविशेषात् क्रियाविशेषसिद्धेः । यः खलु अवयवस्य अङ्गुल्यादेः अल्पस्य क्रियाहेतुः प्रयत्नः नासौ महतः शरीरस्य क्रियाहेतुः, न वै यावान् संयोगः तृणमपसारयति तावाङ्क्लिष्टमिति । नच अङ्गुल्यवयवे चलति शरीरं चलति इति प्रत्ययोऽस्ति** । इति; सोऽप्यनेन निरस्तः; न खलु अङ्गुल्यवयवे चलति तत्समवेतमपरमचलं स्वरूपं पश्यामः, तत्र नाट्याकारप्रतीतिविरहात् । तथापि तत्कल्पने अचलावयवेषु चलमवयविरूपं कल्पनीयं स्यात् । प्रत्यक्षविरोधः अन्यत्रापि न दण्डवारितः । § 176 /ms

यत्पुनरुक्तं तेनैव--**यदि अवयवसंकर्मसमानकालम् अवयविनि कर्म स्याद् अपि तर्हि अङ्गुल्यवयवे चलति शरीरं चलतीति प्रत्ययः स्यात् । किं कारणम् ? असति देशव्यवधाने उपलभ्याधारसमवेतस्य कर्मणः प्रत्यक्षत्वात्, न चैवम् अङ्गुल्यवयवे चलति चलति शरीरमिति प्रत्ययः ।** इति; तदपि न युक्तम्; उक्तोत्तरत्वात्, हस्तचलनेऽपि शरीरं चलयति इति व्यवहारदर्शनात् इति । किञ्च, अवयवात्मकत्वे अवयविनः अवयवस्य पाण्यादेः आकाशादिभ्यो विभागे नियमेन विभागः, तैर्वा संयोगे संयोगः सिद्धो भवति न भेदे । न हि हस्तस्य कुतश्चिद् विभागे केनचिद्वा संयोगे

---

३ ति] चलति

६ त] अवयवेऽपि ।

७ अ] अवयवक्रियायाम् अबाधितप्रत्ययः प्रमाणमिति चेत् ।

१० रः] वैशेषिकः ।

तुलना--अवयविसद्भावे तु बाधकं प्रमाणमस्ति । तथाहि--पाणौ कम्पवति तदाश्रितं शरीरं न कम्पते, पादे वा कम्पमाने तद्गतं शरीरं न कम्पते इत्येकस्य विरुद्धधर्मताप्रसङ्गः; तदसङ्गतम्; पाणौ कम्पमाने शरीरकम्पस्यावश्यम्भावनियमाभावात् । यदा पाणिमात्रं चालयितुं कारणं भवति तदा तन्मात्रं चलति न शरीरं कारणाभावात् । यदा तु शरीरस्यापि चलनकारणं भवेत् तदा शरीरं चलत्येव नास्याचलनमस्तीति कुतो विरोधः ?--प्रश॰ कन्द॰ पृ॰ ४१-४२ ।

१३ तावाङ्क्लिष्ट] तावान् काष्ठ

१५ त] शरीरे ।

१५ नाट्याकार] शरीरं नृत्यति इत्याकारप्रतीत्यभावप्रसङ्गात् ।

१८ तेनैव] वैशेषिकेण ।

१८ सं] सत्

२२ ति] चलति

चलतः अचलस्य स युक्तः । अथ विभागज विभागोपपत्तौ संयोगज- 46/mkj संयोगोपपत्तेः अयमदोषः । कुत एतत् ? कारणेन वियोगिना संयोगिना वा कार्यमवश्यं वियुज्यते संयुज्यते वा यथा तन्त्वादिसंयोगिना तुर्यादिना पटादिरिति चेत्; स्यादेतदेवं यदि कार्यकारणयोः कथञ्चिदैक्यं स्यात्, इतरथा कुम्भकारकारणेनापि वियोगिना संयोगिना वा केनचित् सर्वं घटादि तत्कार्यं वियुज्येत संयुज्येत वा । समवायिकारणेन इति विशेषणादयमदोषः, कथमदाः कार्यकारणभेदैकान्ते समवायीतरकारणविभागकारणाभावात् । समवायः तत्कारणमिति चेत्; न; तस्य निषेधस्यमानत्वात् **प्रत्यक्षं सविक-** /ms **ल्पकं च** सिद्धिवि° २ । २६ इत्यादिना । अनिषेधेऽपि यथा विवक्षितयोः कार्यकारणयोः अन्तराले समवायः; तथा घटादिकुम्भकारयोरपि । अथ सम्बन्धाऽविशेषेऽपि कुतश्चित् प्रत्यासत्तेः किञ्चित् कस्यचित् समवायि केनचित् [संयुज्यमानेन] वियुज्यमानेन[वा] संयुज्यते वियुज्यते वा क्वचित्; तर्हि तस्या एव कस्यचित् केनचित् तादात्म्यसिद्धेः किं समवायेन विभागजविभागेन संयोगजसंयोगेन च ? पाण्यादेश्च कुतश्चित् केनचिद् विभागात् संयोगाद्वा न परं शरीरस्य विभाग संयोग वा पश्यामः । तथापि तत्कल्पने एकमेव न किञ्चित् स्यात् । अथ पाणिशरीरयोरपि भेदः; कुतः ?

---

१ तः] क्रियाशीलस्य ।
१ स्य] शरीरस्य ।
१ स] संयोगः विभागो वा ।
१ ज] विभागजस्तु द्विविधः कारणविभागात् कारणाकारणविभागाच्च । कारणविभागात्तावत् कार्याविष्टे कारणे कर्मोत्पन्नं यदा तस्य अवयवान्तराद् विभागं करोति न तदा आकाशादिदेशात्, यदा तु आकाशादिदेशाद्विभागं करोति न तदा अवयवान्तरादिति स्थितिः । अतः अवयवकर्म अवयवान्तरादेव विभागमारभते । ततो विभागाच्च द्रव्यारम्भकसंयोगविनाशः, तस्मिन् विनष्टे कारणाभावात् कार्याभाव इत्यवयविविनाशः । तदा कारणयोर्वर्तमानो विभागः कार्यविनाशविशिष्टं कालं स्वतन्त्रं वा अवयवमपेक्ष्य सक्रियस्यैवावयवस्य कार्यसंयुक्तादाकाशादिदेशात् विभागमारभते न निष्क्रियस्य, कारणाभावादुत्तर-संयोगानुत्पत्तावनुपभोग्यत्वप्रसङ्गः । न तु तदवयवकर्म आकाशादिदेशाद् विभागं करोति तदारम्भकालातीतत्वात् । प्रदेशान्तरसंयोगं तु करोत्येव अकृतसंयोगस्य कर्मणः कालात्ययाभावात् । कारणाकारणविभागादपि कथम् ? यदा हस्ते कर्मोत्पन्नमवयवान्तराद् विभागमकुर्वद् आकाशादिदेशेभ्यो विभागानारभ्य प्रदेशान्तरे संयोगानारभते तदा ते कारणाकारणविभागाः कर्म यां दिशं प्रति कार्यारम्भाभिमुखं तामपेक्ष्य कार्याकार्यविभागानारभन्ते, तदनन्तरं कारणाकारणसंयोगाच्च कार्याकार्यसंयोगाविति ।--प्रश॰ भा॰ पृ॰ ६७--६८ ।
२ वियोगिना] कारणसंयोगिना ह्यकारणेन कार्यमवश्यं संयुज्यते इति न्यायः--प्रश॰ भा॰ पृ॰ ४८५ । कारणसंयोगिना कार्यं संयुज्यते--प्रश॰ कन्द॰ पृ॰ १४९ ।
३ तुर्यादिना] पटसंयुक्ततुरीवत्--प्रश॰ कन्द॰ पृ॰ १४९ ।
५ कु] निमित्तभूतेनापि ।
७ दाः] मदोषः ?
८ मान] त्स्यमान
९ कं] ल्पं
१० योः] तन्तुपटयोः ।
१३ स्या] प्रत्यासत्तेः ।
१५ प] भिन्नम् ।
१५ विभाग] गं
१५ संयोग] गं
१५ श्यामः] तुलना— एकदेशाश्रयत्वे तु यदेकस्माद् विभागकृत् । तदेवान्यत इत्यस्ति न विभागो विभागजः ॥--न्यायम॰ पृ॰ १२३ ।

विभागभेदात्; अन्योऽन्यसंश्रयः--पाणिशरीरयोः भेदसिद्धेः विभागभेदसिद्धिः, अस्याश्च प्रकृतसिद्धिरिति । नापि पाण्याकाशयोः परिणामविशेषव्यतिरेकेण परस्तयोर्विभागोऽस्ति यः शरीराकाशविभागकारणं स्यात्, अन्यथा कारण-विभागात् कार्यविभागात्, कार्यविभागस्य *तदन्तरं तयोरेकताभयात् स्यात्, तत्रापि तदन्तरमित्यनवस्था । स्वरूपमेव ततस्तस्य विभक्तमिति चेत्; अन्य-त्रापि तदस्तु । किञ्च, यदि आकाशादिना संयुक्ते प्रतीयमाने एव शरीरे ततः पाण्यादिविभागप्रतीतिः स्यात्, युक्तमेतत्-- **पाण्याकाशविभागात् श-** /ms **रीराकाश-विभागः ततः शरीराकाशसंयोगनिवृत्तिः** । इति । न चैवम्, तथा क्रमानुपलक्षणात्, पाण्याकाशविभागकाल एव शरीराकाशविभागदर्शनात् । नहि कश्चित् खादिना संयुक्त एव शरीरे मम ततः पाण्यादिकं विभक्तमिति मन्यते । उत्पलपत्रशतवेधवद् आशुवृत्तेः तदनुपलक्षणमिति चेत्; भवेदेवं य-दि तत्पत्राणां स्वरूपदेशभेदवत् तद्विभागानां स्वरूपकालभेदः कुतश्चित् सिद्धः स्यात्, न चैवम्, प्रतीतिबाधनात् । § 177

यत्पुनरुक्तं परेण--**पाण्याकाशयोर्विभागात् तत्संयोगविनाशः** इति; तन्न सुन्दरम्; संयोगे सति विभागानुत्पादात् तद्विरोधिनि । यथैव हि संयोग-विरोधिनि विभागे समुत्पन्ने संयोगो नश्यति तथा विभागविरोधिनि संयोगे 47/mkj स्थिते विभागो नोत्पद्यते । न हि शीतविरोधिनि पावके स्थिते शीतोत्पादादिः । संयोगे विनष्टे तदुत्पाद इति चेत्; कुतस्तर्हि तद्विनाशः ? विभागादिति चेत्; अन्योन्यसंश्रयः--सति संयोगविनाशे विभागोत्पादः, तस्माच्च तद्विनाश इति । अथ दृश्यत एव संयोगे सत्येव विभागोत्पादः, न दृष्टेऽनुपपन्नं नाम इति चेत्; न; तथाप्रतीतिविरहात् । संयोगविनाशात्मकविभागप्र-तीतेश्चसंयोगविनाशः, विभागः इति नाम्नि भेदः नार्थे । विभागाभावे कुत-स्तन्नाश इति चेत् ? तन्नाशाभावे कुतो विभागः ? स्वकारणात् कर्मण इति /ms चेत्; तासोऽपि स्वकारणात् इति ब्रूमो द्रव्यादेरिति यद्वक्ष्यते-- § 178

*अनादिनिधनं द्रव्यम् उत्पित्सु [स्थास्नु] नश्वरम् ।
स्व
तोऽन्यतो विवर्तेत क्रमाद्धेतु फलात्मना ॥ सिद्धिवि॰ ३ । २१
इति ।§ 180

न च अन्योन्यापसरद्वस्तुव्यतिरेकेण परं कर्म, यद् विभागस्य अन्यस्य वा कारणं स्यात्, इतरथा उत्क्षेपणादिक्षयोत्पत्तावपि यदि द्रव्यं स्वभावतो न

१ भेदात्] चेत् ।
२ प] अवस्थाविशेष ।
४ *] विभागान्तरम् ।
५ त्रापि] विभागान्तरम् ।
१० श्चित्] आकाशादिना ।
१० म] खादेः ।
१८ त] संयोगविनाशः ।
१९ त] विभागाच्च ।
२३ न्नाश] संयोगनाशः ।
२३ ण] क्रियातः ।
२४ तासोऽपि] नाशोऽपि
२७ र] गमनशील ।
२७ अ] संयोगस्य ।
२८ णादिक्ष] क्रि

चलति न तर्हि तस्य कुतश्चिद् विभागः संयोगो वा देशान्तरादिना, अविशेषेण सर्वस्य प्रसङ्गात् । अथ यस्यैव तदिति मतिः; कस्य ? समवायसम्बन्धः आकाशादेरपि । तत्सम्बन्धस्य तत्राप्यविशेषात् । एष यः चलयति इति प्रतीयते तस्य तदिति; न; स्वयमचलति तत्प्रतीत्ययोगात् भ्रान्तताप्रसङ्गात् । स्वयं चलति चेत्; तर्हि द्रव्यस्वरूपविशेष एव क्रिया न परा, इति न युक्तमेतत्--**एकद्रव्यमगुणं संयोगविभागेषु कारणमनपेक्षमिति कर्मलक्षणम्** । वैशे° सू° १ । १ । १७ इति विफलम् ***कार्यविरोधि कर्म** वैशे° सू° १ । १ । १४ इति च । एतेन आकाशशरीरयोर्विभागात् तत्संयोगविनाशो व्याख्यातः । § 181

यत् पुनरेतत्--**उत्तराकाशपाणिसंयोगात् शरीराकाशसंयोगः** । इति; तदपि न प्रातीतिकम्; नहि पूर्वं शरीररहितस्य पाणेः आकाशेन संयोगः, पश्चात् शरीरस्य इति प्रतीतिरस्ति । आशुवृत्त्या यौगपद्यविभ्रमोऽपि निरस्तः । अपि च, यदि गगनादिभ्यो वियुज्यमाने पाणौ शरीरं वियुज्यते, तैः संयुज्यमाने तस्मिन् तत् संयुज्यते वा; तर्हितेभ्योऽवियुज्यमानेषु पादादिषु /ms
तदैव तन्न वियुज्यते इति युगपत् तत् संयुक्तमन्यथा च स्यात् । § 182

स्यान्मतम्--सर्वात्मना तद् वियुक्तमेव, किन्तु आकाशादिभिः संयुज्यमानेषु पादादिषु आशु *तत्संयोग इति तत्संयुक्तप्रतिपत्त्यविच्छेद इति; तन्न निरूपिताभिधानम्; अन्यथाप्यविरोधात् । न हि एकं चलावयवापेक्षया चलम् अन्यथा अचलम्, तथा विभक्त-संयुक्तावयवापेक्षया संयुक्तं विभक्तं च विरुद्धम्, सचलैकरूपवत् । अथ एतदपि नेष्यते; कथं तर्हि **गुणाश्च गुणान्तरम्** वैशे° सू° १ । १ । १० इत्यत्र सूत्रे अन्तरशब्दस्य उक्तं प्रयोजनमिदं शोभते--**कार्यकारणगुणयोः क्वचित् जात्यन्तरत्वज्ञापनार्थत्वाददोषः । कथम् ? यथा शुक्लाशुक्लैः तन्तुभिरारब्धस्य पटस्य रूपं कारणरूपेभ्यो जात्यन्तरमिति । का पुनः तत्र रूपे जातिः ? चित्रत्वमिति ब्रूमः । विशेषान-** 48/mkj
**वधारणात्, यस्त्वा सौरूप विशेषः शुक्लत्वादिः सोऽस्मात् नावधार्यते इति । न चेदमरूपं द्रव्यम् उपलब्धिप्रसङ्गात् वायुवत् । उपलभ्यमानत्वाच्च तन्तुवत् रूपाधिकरणम्** । इति । § 183

एतेन यदुक्तम्-- § 184

---

३ त] व्यापित्वात् समवायस्य ।
३ ति] चलति
४ त] कर्म ।
४ ति] चलनक्रियारहिते ।
६ विभागेषु] संयोगविभागेष्वनपेक्षकारणमिति--वैशे° सू° । संयोगविभागेष्वनपेक्षं कारणमिति--नयचक्रवृ° पृ° ३० ।
७ इति] विफलमिति निरर्थकम् ।
७ *] कार्यं विरोधि यस्येति बहुव्रीहिः--वैशे° उप° पृ° २१ ।
८ योर्विभागात्] शरीराकाशसंयोग ।
१५ दैव] शरीरम् ।
१५ त्] शरीरम् ।
१७ *] शरीरसंयोगः ।
२५ सौरूप] यश्चासौ रूप
२६ उप] अनुप
२६ ङ्गात्] रूपसमवायस्य चाक्षुषप्रत्यक्षहेतुत्वात् ।

*चित्रं तदेकमिति चेत्, इदं चित्रतरं महत् । प्र॰ वा॰ २ । २०० इति; § 185

एतदपि प्रत्याख्यातम्; चित्रशब्दस्य अनेकार्थविषयत्वानभ्युपगमात् । क्व तर्हि वर्तते इति चेत् ? एकस्मिन् शबले रूपे वर्तते इति । तथा च प्रतिभासः--शबलो गौः शबलः खलु अश्व इति । कथम् ? यदि हि /ms शुक्लाशुक्लैः तन्तुभिर्जनिते पटे नीलादीनि रूपाणि भिन्नानि बहूनि वर्तन्ते; अपि तर्हि **कर्माणि बहूनि युगपदेकस्मिन् द्रव्ये ण वर्तन्ते, सजातीयत्वे समानेन्द्रियग्राह्यत्वे एकद्रव्यत्वे च सति अविभुद्रव्यवृत्तित्वात् रूपवत्** । इत्यत्र निदर्शनस्य साध्यविकलता । अथैकम्; नीलादयः क्व वर्तन्ते ? द्रव्ये चेत्; प्रकृतो दोषः । तद्रूप इति चेत्; केन सम्बन्धेन ? संयोगेनेति चेत्; तद्रूपनीलाद्योः द्रव्यत्वम् । समवायेनेति चेत्; तद्रूपस्य द्रव्यत्वं नीलादिसमवायिकारणत्वात् । विशेषणीभावेनेति चेत्; रूपादयोऽपि द्रव्ये तेनैव वर्तन्त इति समवायाभावः । नीलादीनां द्रव्यादिषु अनन्तर्भावात् पदार्थान्तरत्वम् । तादात्म्येन चेत्; सिद्धं शबलैकरूपवत् इति । ततः स्थितम्--चलाचलसंयुक्तासंयुक्तत्वप्रतिपादनार्थम् **एकस्य नानावयवात्मनः** इति वचनम्, दृशोः अवयवैः अदृशोश्च * दृश्येतरात्मकत्वप्रतिपादनार्थं च । § 186

नन्वेवम् एकतन्त्ववयवग्रहणेऽपि पटो गृह्येत, न चैवम्, *भूयोऽवयवेन्द्रियसन्निकर्षसहायस्य अययवीन्द्रियसन्निकर्षस्य अवयव्युपलम्भकृत्त्वादिति चेत्; स्यादेतदेवं यदि अवयवअवयविनोभेदैकान्तः, स तु नेतीति निरूपितम् । एवं च न अवयवेन्द्रियसन्निकर्षोऽन्यः, अन्योऽवयवीन्द्रियसन्निकर्षः, येनोच्यते--भूयोऽवयवेन्द्रियसन्निकर्षसहायस्य अवयवीन्द्रियसन्निकर्षस्य /ms अवयव्युपलम्भकत्वात् इति; साहाय्यस्य भेदनिबन्धनत्वात् । यदि च, अवयविन इन्द्रियसन्निकर्षोऽस्ति; कुतस्तत्र ज्ञानं नोत्पद्यते ? कथमन्य-

२ अ] अनेकरूपविषयत्वास्वीकारात् ।
३ ते] चित्रशब्दः ।
६ ण] न
६ न्ते] तुलना--एकदा एकस्मिन् द्रव्ये एकमेव कर्म वर्तते, एकं कर्म एकत्रैव द्रव्ये वर्तते ।--प्रश॰ कन्द॰ पृ॰ २९० । अविभुनि द्रव्ये समानेन्द्रियग्राह्याणां विशेषगुणानामसमवायादिति व्याहन्यते--प्रश॰ व्यो॰ पृ॰ २२० ।
८ अथैक] चित्रं रूपम् ।
९ दोषः] ऊक्तानुमाने निदर्शनस्य साध्यविकलता ।
९ द्रूप] चित्ररूपे ।
१० म्] द्रव्ययोरेव संयोगात् ।
१० त] चित्ररूपस्य ।
११ त्वात्] द्रव्यस्यैव समवायिकारणत्वात् ।
११ तेनैव] विशेषणीभावेनैव वर्तन्ताम् ।
१३ सिद्धं] चित्रैकरूपवदिति दृष्टान्तः ।
१५ दृशोः] दृश्यैः
१५ *] अदृश्यैश्च
१६ म्] अवयवात्मक-अवयविस्वीकारे ।
१६ *] भूयोऽवयवेन्द्रियसन्निकर्षानुगृहीतेन अवयवीन्द्रियसन्निकर्षेण ग्रहणात् ।--प्रश॰ व्यो॰ पृ॰ ४६ । इदं तस्य वृत्तं येषामिन्द्रियसन्निकर्षाद् ग्रहणमवयवानां तैः सह गृह्यते येषामवयवानां व्यवधानादग्रहणं तैः सह न गृह्यते ।--न्यायभा॰ २ । १ । ३२ ।
१८ विनोभे] नोर्भे
२२ त्र] अवयविनि ।

था समन्धकारादौ अवयविज्ञानम्, नहि तत्र भूयोऽवयवेन्द्रियसन्निकर्षोऽस्ति सालोकादिप्रदेशवत्, इतरथा तज्ज्ञानेऽस्पष्टता व्यवहारो न स्यात् । अव- 49/mkj यवाऽग्रहणकृतः स इति परस्य दर्शनम् । अथेन्द्रियसन्निकर्षोऽपि तस्य नेष्यते; एकावयवस्यापि न स्यादिति तस्यापि न ग्रहणम् । ततोऽयुक्त- मेतत्--**एकतन्तुवीरणसंयोगात् पटकटसंयोगः** इति; तद्ग्रहणोपायाभावात् । अथ ते शे ष्यते तत्सन्निकर्षः; पटस्यापि स्यात् **कारणसंयोगिना कार्यमवश्यं संयुज्यते** प्रश॰ भा॰ पृ॰ ६४ इति वचनात्, अन्यथा वीरणेनापि न स्यात् । किंच, एकतन्त्ववयवेन्द्रियसन्निकर्षोऽपि यदि तद्भूयोऽवयवेन्द्रियसन्निकर्ष- सहाय एव तन्तूपलम्भकः; तर्हि तदवयवेन्द्रियसन्निकर्षोऽपि तद्भूयोऽवय- वेन्द्रियसन्निकर्षसहाय एव तदवयवोपलम्भकः, एवं यावत्परमाणवः । न च तेषामिन्द्रियसन्निकर्ष इति सर्वाग्रहणम् । यदि च एकावयवेन्द्रियसन्निकर्षात् तत्र ज्ञानं न स्यात्; तर्हि जलमग्नकरिणः करमात्रदर्शनात् करी तिष्ठत्य- त्र इति प्रतीतिर्न स्यात्, इष्यते च परेण । ततः साधूक्तम्--दृश्यावयवैः दृश्यात्मनः विपरीतैः विपरीतात्मनः इत्यस्य प्रदर्शनार्थम् **नानावयवात्मनः** /ms इति वचनमिति, तथा आवृतैः आवृतात्मनः विपरीतैर्विपरीतात्मन इत्यस्य च । § 187

*नन्वेकस्या[ऽऽवृता]नावृतत्वानुपपत्तेः अयुक्तमेतत् । न खलु एक- स्मिन्नवयवे पाण्यादौ आवरणे सत्यपि शरीरस्य आवरणमस्ति महत्त्वात् । न हि यावान् आवारकद्रव्यसंयोगः अवयवमावृणोति तावान् अवयविनं तस्य महत्त्वात्तु पुनरन्य एकावारकद्रव्यसंयोगविशेष आवृणोति यथा प्रतिश- रादिसंयोगविशेषः कुड्यमिति । अवयवावारकं तु द्रव्यम् अवयविना संयुक्तं नाऽऽवृणोति अमहत्त्वात् संयोगविशेषाभावाच्च, यथा कौपीनप्रच्छादकमल्पं

३ स] समन्धकारादौ अस्पष्टताव्यवहारः

३ त] अवयविनः ।

४ त] एकावयवस्यापि ।

६ शे] अथ ने

६ त] एकावयवेन्द्रियसन्निकर्षः ।

१० त] एकावयवोपलम्भकः ।

१० वः] यावन्तः परमाणुरूपा अवयवाः सन्ति तावतां सन्निकर्षः आवश्यकः ।

१२ त] अवयविनि ।

१२ क] शुण्डा ।

१५ आ] एकं चलं चलैर्नान्यैः नष्टं नष्टैर्न चापरैः । आवृतैरावृतं रूपं रक्तं रक्तैर्विलोक्यते ॥--प्रमाणसं॰ पृ॰ १०२ । न्यायवि॰ २ । २७१ ।

१७ *] न तावदेकस्यावयविनो ग्रहणाग्रहणे; अवयवावरणेऽपि तस्य कतिपयावयवावस्थानस्य ग्रहणादेव । न च बह्ववयवावस्थानस्य ग्रहणे इव तादृशस्थौल्यानवभासादनवभासोऽवयविन इति साम्प्रतम्; परिमाणभेदो हि स्थौल्यमवयविधर्मः । न च तस्य तादृशस्यानवभासे अवयवी अनवभासितो भवति, तस्य ततोऽन्यत्वात्, तस्मादिन्द्रियसन्निकर्षमात्रादवयविनो ग्रहणम् । इन्द्रियेणार्थस्य इन्द्रियावयवैरर्थस्य इन्द्रियेणार्थावयवानाम् इन्द्रियावयवैरर्थावयवानां सन्निकर्षात् परिमाणभेदग्रहणमिति सामग्रीभेदादवय- वितत्परिमाणभेदयोर्ग्रहणाग्रहणे उपपद्येते ।--न्यायवा॰ ता॰ पृ॰ ३८४ । एकावयवावरणे अवयव्यावरणस्याभावात् । स ह्येकोऽनेकेषु अनावृतेतरकतिपयावयवग्रहणेन गृह्यते तस्य सर्वत्राभिन्नत्वात् ।--प्रश॰ कन्द॰ पृ॰ ४२ ।

२० विनं] अवयविनः ।

वासः यथा वा परिधानवास इति । समग्रावयव्युपलब्धिप्रसङ्ग इति चेत्; *समग्राऽसमग्र इतिशब्दयोः भेदविषयत्वात्, अवयविनस्तु अभिन्नत्वात् । न खलु अवयवी समग्रो नाप्यसमग्रः, तस्य एकत्वात् । अपि भवान् गृह्यमाणस्य अवयविनः किमगृहीतं मन्यते येनायमकृत्स्नो गृह्यत इत्याचष्टे ? आवृतोऽवयवो न गृह्यत इति चेत्; न गृह्यतां नाम, अवयवी तु गृह्यते 50/mkj ततोऽन्यत्वात् । इयांस्तु विशेषः--येषामव यवानाम् इन्द्रियसन्निकर्षः तैः सहोपलभ्यते, येषां पुनः आवृतत्वान्नेन्द्रियसन्निकर्षः तैः सह नोपलभ्यत इति चेत्; उच्यते--शबलैकरूपवद् आवृताऽनावृतैकावयव्युपपत्तेर्नाऽयुक्तमेतत् । § 188

/ms यत्पुनरुक्तम्--नहि यावा[नावा]रकसंयोगोऽवयवमावृणोति तावान् अवयविनम् इति; तदपि न सूक्तम्; **कारणसंयोगिना हि कार्यमवश्यं संयुज्यते** प्रश॰ भा॰ पृ॰ ६४ इति वचनादवयववद् अवयविनोऽप्यावारक-संयोगोऽस्ति । तस्य चोत्पत्तौ अवयवी समवायिकारणमिति सर्वात्मना स तत्कारणं चेत्; तत् सर्वत्र तत्संयोगप्रतिपत्तिरिति कथन्न तावानेव तत्संयोगः तदावारको न स्यात् येनोच्यते--अवयविनं पुनः अन्य एव आवारकद्रव्य-संयोगविशेष आवृणोति इति । अथ न सर्वात्मना किन्तु एकदेशेन; सांशत्व-मवयविनः । ननु चोक्तम्--समग्राऽसमग्रशब्दयोर्भेदविषयत्वाद् अवयविनस्तु अभिन्नत्वात् तदनुपपत्तिरिति; सत्यमुक्तम्, किन्तु तदभिन्नत्वात् इति वदता तस्य एकं स्वरूपमङ्गीकृतम् । तेनैव चेत् संयोगसमवायिकारणम्; तत्र संयोगः समवेतः प्रतिभातीति न तद्रहितं तद्रूपमस्ति इति नोक्तदोषपरिहारः । § 189

यच्चान्यदुक्तम्--अपि च भवान् गृहमाणस्य अवयविनः इत्यादि; त-त्राप्युच्यते--अवयविस्वरूपं न गृह्यते नावयवस्वरूपम् । एवं कथञ्चिदवय-वाऽवयविनोस्तादात्म्यात्, अन्यथा आवारकजलादिमध्ये दृश्यभागस्य अव-यविनः स्तम्भादेः सन्देहो न स्यात्--किमस्ति किं वा नेति, कियान् वा समस्ति ? इति । § 190

---

१ ल्पं] अल्पस्य आवारकम् ।
१ वास] अधिकस्यावारकं विशेषसंयोगसद्भावात् ।
२ *] एकस्मिन् भेदाभावात् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११ ॥-कृत्स्नमिति अनेकस्याशेषाभिधानम्, एकदेश इति नानात्वे कस्यचिदभिधानम्, ताविमौ कृत्स्नैकदेशशब्दौ भेदविषयौ नैकस्मिन्नवयविनि उपपद्येते भेदाभावादिति ।--न्यायभा॰ ४ । २ । ११ ।
६ ते] अवयवात् ।
६ विशेषः] यत्तु बहुतरावयवग्रहणवत् स्थूलप्रतीतिर्न भवति तद् भूयोऽवयवप्रचयग्रहणस्य परिमाणप्रकर्षप्रतीतिहेतोरभावात् । यत्र तु भूयसामवयवानामावरणम् अल्पतरावयवग्रहणं च तत्रावयविनो न ग्रहणम्, यथा जलनिमग्नस्य शिरोमात्रदर्शनात् । --प्रश॰ कन्द॰ पृ॰ ४२ ।
६ तैः] अवयवैः ।
१३ त] संयोगस्य ।
१३ स] अवयवी ।
१८ त] सांशत्वानुपपत्तिः ।
१९ त] अवयविनः ।
१९ तेनैव] स्वरूपेण ।
१९ त] एकस्वरूपे अवयविनि ।
२० त] संयोगरहितम् ।

यच्चान्यत्--इयांस्तु विशेषः इत्यादि; तदप्येतेन निराकृतम्; यथैव हि आवृतावयवा इन्द्रियैरसन्निकृष्टा नोपलभ्यन्ते तत्सहितश्च अवयवी, तथा आवारकसंयुक्तः केवलोऽपि नोपलभ्यते । ततः स्थितम्--आवृतावयवापेक्षया /ms आवृतात्मनोऽन्यापेक्षया अन्यथाभूतस्य इत्यस्य प्रतिपादनार्थम् **नानावयवात्मनः** इति वचनम् । तथा नष्टैः नष्टात्मनोऽनष्टैरनष्टात्मनः इत्यस्य च प्रतिपादनार्थम् । § 191

ननु च नष्टा अवयवाः त एव ये निष्क्रियावयवेभ्योऽन्ये देशान्तरादिसंयोगिनो विच्छिन्नाः यथा पादादिभ्यो हस्तादयः, नच तेषु शरीरावयवी विद्यते प्राक्तनः पादादिषु येनोच्यते--अविनष्टावयवापेक्षया अविनष्टः इति, अन्यथा निष्क्रियावयवेभ्य इव आकाशादिभ्यः चित्रपाण्यादिविभागो न भवेत् । तदुक्तम्--**द्रव्याश्रय्यगुणवान् संयोगविभागेषु अकारणमनपेक्ष इति गुणलक्षणम्** वैशे० १ । १ । १६ इत्यत्र सूत्रे कैश्चित् **तथा कारणयोः वंशदलयोः विभागो विभागमभिनिर्वर्तयिष्यन् वंशविनाशमपेक्षते । कस्मात् ? अविनष्टे वंशे अस्वातन्त्र्यात् । स्वतन्त्रावयववृत्तिर्विभागो विभागमारभते न कार्यबद्धावयववृत्तिः, एतच्च यथा सुबद्धं भवति तथा अग्रे वक्ष्यामः इति, तदुच्यते--कारणयोर्वंशदलयोः विभागात् सक्ते यस्य अवयवस्य वंशदलस्य आकाशादिभ्यो विभागः** इति चेत्; स्यान्मतं संयोगो * सक्रियस्य 51/mkj अवयवस्य वंशदलस्य आकाशादिभ्यो विभागः स क्रियाज इति न द्रव्यारम्भकसंयोगविरोधिविभागारम्भकस्य कर्मणः । [यानि] द्रव्यानारम्भकसंयोगविरोधि- *विभागारम्भकाणि कर्माणि न तानि द्रव्यानारम्भकसंयोग- /ms विरोधिनं विभागमारभन्ते यथा नृत्यतः अवयवकर्माणि, तथेहापि छेदनभेदनतक्षणकर्मणामपि आकाशादिभ्यो विभागजनकत्वे द्रव्यारम्भकसंयोगविरोधिविभागारम्भकत्वं न स्यात् । अस्ति च, तस्मादिदमुच्यते--छेदनपाटनतक्षणकर्माणि स्वाश्रयस्य आकाशादिभ्यो न विभागमारभन्ते द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वात्; *यानि पुनः स्वाश्रयस्य आकाशादिभ्यो विभागमारभन्ते न तानि द्रव्यारम्भकसंयोगविरोधिनं विभागमारभन्ते यथा नृत्यतः अवयवकर्माणि इति । *उभयसंयोगित्वाद् उभाभ्यां वियुज्यते इति चेत्; स्यान्मतं यथाऽयं सक्रियोऽवयवः अवयवान्तरेण संयुज्य-

२ त] आवृतावयवविशिष्टश्च ।
२ वी] उपलभ्यते ।
३ लोऽपि] अवयवी ।
६ म्] नानावयवात्मनः इति वचनम् ।
१६ क्ते] क्रि
१७ *] गात्
१८ न] द्रव्योत्पादक ।
१९ णः] सकाशात् भवति ।
२० *] आकाशादिदेशविभाग ।
२० व्याना] द्रव्यार
२१ विरोधिनं] अववयविभागम् ।
२४ स्य] द्रव्यस्य ।
२५ *] तुलना--कर्मोत्पन्नं यदा तस्यावयवस्य अवयवान्तराद् द्रव्यारम्भकसंयोगविनाशकं विभागं करोति न तदा द्रव्यविरुद्धाद् आकाशादिदेशाद्विभागं करोति । यदा चाकाशादिदेशात्; न तदा अवयवान्तरादिति स्थितिनियमः ।--प्रश० कन्द० पृ० १५५ ।
२७ *] आकाशादिदेश--अवयवान्तर-एतदुभयसंयोगित्वात् ।

ते तथा आकाशादिभिरपि, तस्माद् यथा अवयवान्तरेण संयुक्तत्वात् तेन वियुज्यते तथा आकाशादिभिरपि संयुक्तत्वात् तेभ्योऽपि वियुज्यते इति; न; अनेकान्तात् । नायमेकान्तः-हस्तावयवे उत्पन्नं कर्म *स्वाश्रयस्य सर्वसंयोगिभ्यो विभागमारभत इति, किं तर्हि कुतश्चिदेव इदम्, दृष्टत्वात् । दृष्टं खलु अङ्गुलिकर्म अङ्गुलिद्रव्यस्य आकाशादिभ्यो विभागमारभते न अवयवान्तराद् द्रव्यारम्भकसंयोगविरोधिनं विभागमारभत इति तथेद[मपि] पाटनाद्यवयवकर्म अवयवान्तराद् द्रव्यारम्भकसंयोगविरोधिनं विभागमारभते /ms नाकाशादिभ्यः इति तस्माद् उभाभ्यां वियुज्यते इति अयुक्तमुक्तमिति । कुतः पुनरयं विशेष इति चेत् ? कारणविशेषात् । § 192

स्यान्मतम्--हस्ताद्यवयववृत्तित्वाऽविशेषेऽपि सति कानिचित् कर्माणि स्वाश्रयस्य आकाशादिभ्यो विभागमारभन्ते कानिचित् पुनः अवयवान्तराद् द्रव्यारम्भकसंयोगविरोधिनं विभागमारभन्त इति किंकृतोऽयं विभागः इति ? कारणविशेषात् क्रियाकारणविशेषादयं विशेषः । तदुक्तम्— **नोदनविशेषात् उदसनविशेषः** । वैशे० सू० ५ । १ । १० इति । **तत्र कार्याविष्टे कारणे कर्म उत्पन्नं अवयवान्तराद् विभागमारभते, विभागाद् द्रव्यारम्भकसंयोगनिवृत्तिः, ततः कार्यद्रव्यं निवर्तते, तस्मिन् निवृत्ते कारणयोर्वर्तमानो विभागः सक्रियावयवस्य आकाशादिभ्यो विभागमारभते** प्रश० भा० पृ० ६८ इति । को हेतु रिति चेत् ? स्यान्मतं कार्यद्रव्यनिवृत्तौ कारणयोर्वर्तमानाद् विभागात् सक्रियावयवस्य आकाशादिभ्यो विभाग उपजायते न पुनः पूर्वम् इत्यत्र को हेतुरिति ? कार्यद्रव्यविनाशसहचरितत्वं हेतुः; यदि सति कार्यद्रव्ये सक्रियावयवस्य आकाशादिभ्यो विभाग उपजायेत, नैवं तर्हि तस्य कार्यद्रव्यविनाशसहचरितत्वं *न स्याद् अङ्गुल्याकाशविभागवदिति चेत्; अत्र प्रतिविधीयते-- § 193

52/mkj, /ms यत्तावदुक्तम्--कारणयोर्वंशदलयोर्विभागो विभागमभिनिर्वर्तयिष्यन् वंशविनाशमपेक्षते इत्यादि; तत्र अङ्गुल्यवयवे छेदक्रियातः अवयवान्तराद्विभागात् संयोगविनाशे सति यदि अवयविनः शरीरस्य विनाशः तर्हि तदवयवच्छेदनकर्मादिमात्रत एव शरीरस्य नाशे तद्गुणानां नाशात् तदवयव्युपलम्भविकलतदारम्भकपादाद्यवयवानामेव उपलम्भः स्यात् । न चैवम्, *तच्छेदनात् प्राक् पश्चात् तत्समकालं च तदेवेदं शरीरम् इति प्रतीतेः । *इतरथा छिन्नाङ्गुलिरपि स एवायंमदीयः पुत्रः इत्यादि व्यवहारविलोपप्रसङ्गः । ननु च एकावयवसंयोगविनाशे पूर्वद्रव्यनिवृत्तौ पुनः अवस्थितसंयोगेभ्योऽवयवेभ्यो अन्यद्रव्यमुपजायते अतोऽयमदोष इति चेत्; *कोशपानैरेव केव-

---

३ *] हस्तस्य ।
१० कानिचित्] हलनचलनादिरूपाणि ।
११ न्ते] उत्पाटनादिरूपाणि ।
१४ विशेषात्] दूरोत्क्षेपण ।
१८ इति] द्रष्टव्यम्--पृ ४५ टि० १० ।
२२ *] न इति निरर्थकमत्र ।
२७ नाशे] अवयविभूतशरीरगुणानाम् ।
२८ *] अवयवछेदनात् ।
२९ *] यदि शरीरविनाशः स्यात् तदा ।
३२ *] मद्यं पीत्वेव अयं विश्वासयोग्यः यत् तत्र अन्यत् शरीरमुत्पन्नमिति ।

लमर्थोऽयं प्रत्येयः, न प्रतीतेः, सर्वदैकत्वप्रतीत्युपलम्भात् । भ्रान्तेयमेकत्वप्रतीतिरिति चेत्; न; बाधकाभावात् । अथ पूर्वद्रव्यविनाशे द्रव्यान्तरोत्पत्तिरेव बाधिकेति चेत्; सा कुतः सिद्धा ? तत्प्रतीतेर्विभ्रमाच्चेत्; अन्योन्यसंश्रयः-- सिद्धायां द्रव्यान्तरोत्पत्तौ तत्प्रतीतेर्विभ्रमः, तस्माच्च तत्सिद्धिरिति । यदि च, सर्वदा शरीरस्य एकत्वे प्रतीयमाने एकावयवसंयोगविनाशे पूर्वद्रव्यनिवृत्तौ पुनः अवस्थितसंयोगेभ्योऽवयवेभ्योऽन्यद्रव्यमुपजायते इतीष्यते; तर्हि सह क्रमेण च वरं परमाणव एव अभ्युपगताः, तथा च अवयव्यादिसाधनप्रयासाद् भवन्तो मुच्येरन् । स्थूलैकप्रतीत्या बाधनमन्यत्रापि । § 194

किंच, अङ्गुल्यवयवे चलति आवृते शरीरं न चलति नाप्याव्रिय- /ms
ते तथा प्रतीतेः इत्यभ्युपगम्य एकावयवसंयोगविनाशे अवयविनाशः सर्वथाऽभ्युपगच्छन् कथं सुस्थः ? तथाप्रतीतेः समानत्वात् । अपि च, यदि नाम एकावयवसंयोगविनाशः किमायातं येन ततो भिन्नस्य अवयविनो विनाशः अतिप्रसङ्गात् ? न ह्यवश्यं कारणनाशाद् उत्पन्नं कार्यं नश्यति अत्रपरिणामिकारणविनाशः । न च संयोगः परिणामिकारणं परस्य अन्यथाऽभ्युपगमात् । असमवायिकारणविनाशादपि तन्नाशः तथाप्रतीतेरिति चेत्; न, एकावयवसंयोगविनाशेऽपि कार्यद्रव्यस्य कथञ्चिदवस्थानस्य प्रतीतेः । § 195

एतेन भेदनादिभ्यः एकावयवस्य अवयवान्तराद् विभागेन संयोगनाशात् पूर्वावयविविनाशः प्रत्याख्यातः; नहि कर्णैकावयवस्य भेदने शरीरस्य तन्त्वेकावयवस्य पाटने पटस्य वंशस्य स्वल्पत्तकुतक्षणे विनाशः प्रतीयते । ननु कार्यद्रव्याऽविनाशकवंशक्रिया[याः अ]वयवस्य आकाशादिभ्यो विभागः अस्वातन्त्र्यात् । स्वतन्त्रावयववृत्तिर्हि विभागः सक्रियावयवस्य आकाशादिभ्यो विभागभारमते । कस्मादिति चेत् ? कार्यद्रव्यविनाशसहचरितस्य आकाशादिभ्यो विभागस्य तदवयवे दर्शनादिति चेत्; तस्य तर्हि अवयवान्तराद्विभागः कार्यद्रव्ये अविनष्टे किं प्रतीयते ? अप्रतीते एकोऽस्ति नापर इति किं /ms
कृतो विभागः ? § 196

स्यान्मतम्--अवयवात्तद्विभागः कार्यनाशान्यथानुपपत्त्या अनुमीयमानः पूर्वमप्यस्ति नाकाशादिभ्य इति; न; तदवयवान्तरादिव आकाशादिभ्योऽपि तदविभागे कार्यविनाशात् । § 197

२ तीतिरिति ] तदेवेदं शरीरमिति ।
७ ताः ] परमाणुष्वेव शरीरादिप्रतीतिर्भविष्यति ।
१२ येन ] अवयवात् ।
१४ अत्र ] अन्यत्र
१४ विनाशः ] शात्
१४ स्य ] वैशेषिकस्य ।
१५ मात् ] संयोगस्यअसमवायिकारणत्वस्वीकारात् ।
१५ न्नाशः ] कार्यनाशः ।
२० कु ] स्वल्पत्वक्
२७ द्विभागः ] द्रव्यारम्भकसंयोगविरोधिविभागः ।
२९ कार्य ] र्या

ननु यदि पूर्वं *तदन्तरान्न तद्विभागः; कथमाकाशादिभ्यः ? कार- 53/mkj णाभावे कार्यानुत्प त्तेरिति चेत्; स्यादेतदेवं यदि अवयवकर्मणः तदन्तरादिव आकाशादिभ्यः तद्विभागो न स्यात् । एकस्मात् कर्मणः कथमनेको विभाग इति चेत् ? कथम् आकाशकालदिगात्मादिभ्यो युगपत् *तस्य बहवो विभागाः तैर्वा संयोगाः, येनेदम् **संयोगविभागानां कर्म** वैशे० सू० १ । १ । २० इत्यत्र बहुवचनस्य प्रयोजनमुक्तं शोभेत । एकावयववृत्तिकर्मणः अवयवाभ्यां द्वौ विभागौ अवयवेभ्यः बह्वो विभागाः, न च आकाशादिभ्यः इति स्वरुचिविरचितमेतत् । § 198

*स्यान्मतम्--छेदनादिकर्म सक्रियावयवस्य आकाशादिभ्यो विभागं नारभते द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वात् । यत् पुनः तदवयवस्य आकाशादिभ्यो विभागमारभते न तद् द्रव्यारम्भकसंयोगविरोधिनं विभागमारभते यथा नृत्यतोऽवयवकर्म इति; नायं हेतु; असिद्धत्वात्, संयोगविनाशस्यैव विभागत्वादिति चिन्तितमेतत् । न च छेदनादेः परं प्रति द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वं सर्वथा सिद्धम् अवयविनाशप्रस- /ms ङ्गात् इति च । यदि च नृत्यतोऽवयवकर्म सक्रियावयवस्य आकाशादिभ्यो विभागहेतुः, अवयवान्तरविभागहेतुर्न दृष्टः इति छेदादिरपि तद्वत् तदहेतुः प्रकल्प्यते; तर्हि कारणयोर्वंशदलयोर्वर्तमानो विभागो निष्क्रियावयवस्य आकाशादिविभागहेतुर्न दृष्टः इति सक्रियस्यापि तथैव कल्प्यताम् अविशेषात् । प्रमाणबाधनं प्रकृतेऽपि । § 199

किंच, **संयोगविभागानां कर्म कारणं सामान्यम्** वैशे० सू० १ । १ । २० इति वचनात् नृत्यतोऽवयवकर्माणि हस्ताद्यवयवानाम् अन्योऽन्यतो विभागं किन्नारभन्ते ? एवं सति ततः संयोगविनाशात् नृत्यतोऽवयविनो विनाशः स्यादिति चेत्; न; **एकावयवसंयोगविनाशे पूर्वद्रव्यनिवृत्तौ पुनः**

१ पूर्वं] र्वं
१ *] अवयवान्तरात् ।
४ *] अवयवस्य ।
५ विभागा] संयोगविभागवेगानां कर्म सामान्यम् ॥ २० ॥ कारणमित्यनुषङ्गः । यत्र द्रव्ये कर्मोत्पन्नं तेन समं यावद्द्रव्यं संयुक्तमासीत् तावत् संख्याकान् विभागान् जनयित्वा तावतः संयोगानपि पुनरन्यत्र जनयति...--वैशे० उप० १ । १ । २० ।
९ *] कार्येणाविष्टं व्याप्तमारब्धकार्यमिति यावत् तस्मिन् कारणे कर्मोत्पन्नं न कारणमात्रे यदा अवयवान्तराद्विभागं द्रव्यारम्भकसंयोगविरोधिनं करोति न तदा आकाशादिदेशात्, यदा त्वाकाशादिदेशान्न तदा अवयवान्तराद्विशिष्टं विभागमिति स्थितिः विभागजविभागचिन्तायाः प्रतिज्ञाता ।--प्रश० व्यो० पृ० ४९९ । न्यायवा० ता० टी० पृ० २५० । आकाशविभागकर्तृत्वं कर्मणो द्रव्यारम्भकसंयोग-विरोधिविभागानारम्भकत्वेन व्याप्तम् । द्रव्यारम्भकसंयोगविरोधिविभागानारम्भकत्व-विरुद्धं च द्रव्यारम्भकसंयोगविरोधिविभागोत्पादकत्वम् । अतो यत्रेदमुपलभ्यते तत्र द्रव्यारम्भकसंयोगविरोधिविभागानुत्पादकत्वे निवर्तमाने तद्व्याप्तम् आकाशविभागकर्तृत्वमपि निवर्तते यथा वह्निव्यावृत्तौ धूमव्यावृत्तिः ।--प्रश० कन्द० पृ० १५६ ।
१३ नादेः] जैनं प्रति ।
१५ च] चिन्तितम् ।
१७ हेतुः] अवयवान्तरविभागाहेतुः ।
२२ ति] परस्परविभागे ।

**अवस्थितसंयोगेभ्योऽवयवेभ्यः अन्यद्रव्यमुपजायते** इत्यभिधानात् पुनः प्रवृत्तिकर्मविशेषेभ्यः संयोगविशेषतोऽन्यद् द्रव्यं स्यात् । *अविच्छिन्नप्रतिपत्तिश्च आशुवृत्तेरिति । एवं सति किं लब्धमिति चेत् ? **छेदनादिकर्म सक्रियावयवस्य आकाशादिभ्यो विभागं नारभते द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वात् । यत् पुनः तस्य *ततो विभागमारभते न तत् तज्जनकं यथा नृत्यतोऽवयवकर्म** । इति प्लवते, वैधर्म्यदृष्टान्तविलोपात् । ततो यथा सक्रियावयवस्य अवयवान्तरात् क्रियातो विभागः तथा तत्त्वाद् आकाशादिभ्यः । नच अनैकान्तिकोयं हेतुः; तथाहि--*अङ्गुल्याकाशविभागाद् हस्ताकाशविभागो भवति न तु क्रियाजः इति । अनेकान्त इति चेत्; उक्तमत्र अङ्गुलिचलने हस्तस्यापि कथञ्चित् चलनम्, आकाशादिभ्यः तद्विभागे हस्तस्यापि तदेव विभागः, अन्यथा पृथक्सिद्धिः स्यादिति । ननु च यद्ययं सक्रियस्य अवयवस्य गगनादिभ्यो विभागः क्रियाजः स्यात्; तदपि तर्हि क्रियानन्तरमुत्पद्येत, आद्यावयवविभागवत्, न चोत्पन्नः । तदुक्तम्— **कुरुन्दारकोऽसि केन तदत्सरभ्रंसात्** । इति । कर्मणा यस्मिन्नवसरे विभागः कर्त्तव्यम्सोऽस्य नष्ट इति चेत्; न सत्यमेतत्; विभागेऽप्य[स्य] समानत्वात् । शक्यं हि वक्तुं यद्ययं विभागात् स्यात् विभागः तदनन्तरमुत्पद्येत, न चैवम्, क्षि[अवयव]विभागात् संयोगविनाशः तस्माच्च द्रव्यविनाशः पुनर्विभागः इत्यङ्गीकरणात् । कर्मानन्तरम् अवयवान्तराकाशादिभ्यश्च विभागः; इतरथा न कुतश्चित् तदनन्तरं भवेत् । तन्न कर्णाद्येकावयवच्छेदनादिभ्यः सर्वात्मना पूर्वदृष्टविनाशो युक्तः । § 200

54/mkj, /ms

यत्पुनरुक्तम्--**अवयवेषु कर्माणि ततो विभागः तेभ्यः संयोगविनाशः ततो द्रव्यविनाशः** प्रश० भा० पृ० ४६ *इति; तदपि न परीक्षाक्षमम्; अवयवेभ्यो भिन्नानां कर्मणामुत्पत्तावपि तत्स्वरूपचलनाऽभावाद् अतिप्रसङ्गात् । न तेषां ततोऽपि विभागभावः, भावेऽपि तत एव न ततः तत्संयोगविनाशः । यद्यप्ययं भवेत् तथापि संयोगाद् भिन्न इति संयोगस्य /ms
**तदवस्थस्य अवस्थानानु कार्यस्य नासौ नाम** । § 201

२ व्यं] उत्पन्नं भवेत् ।
२ *] स एवायमिति एकत्वप्रतिपत्तिश्च ।
५ स्य] सक्रियावयवस्य ।
५ *] आकाशादेः ।
५ त्] द्रव्यारम्भकसंयोगविरोधिविभागजनकम् ।
८ *] यथा अङ्गुल्याकाशादिविभागात् हस्ताकाशविभागः...--प्रश० व्यो० पृ० ५०९ ।
९ क्रियाजः] तः
११ था] अङ्गुलिहस्तयोः ।
१४ भ्रंसात्] तदवसरभ्रंशात्
१५ म्] व्यः
१६ विभागः] विभागानन्तरमेव ।
२० ना] पूर्वदृष्टशरीरविनाशः ।
२२ *] कर्माण्युत्पद्यन्ते, तेभ्यो विभागाः, विभागेभ्यः संयोगविनाशाः, संयोगविनाशेभ्यश्च कार्यद्रव्यं विनश्यति ।--प्रश० भा० ४६ ।
२३ त] अवयवस्वरूप ।
२३ नाऽभावाद्] भिन्नद्रव्यक्रियातः अन्यत्र चलनस्वीकारे ।
२४ तेषां] अवयवानाम् ।
२४ तोऽपि] कर्मणोऽपि ।
२४ भावेऽपि] भिन्नत्वादेव ।
२५ यं] विनाशः ।
२६ स्थानानु] नान्न
२६ नासौ] नाशो

एतेन संयोगविरोधित्वं कर्मणः प्रत्याख्यातम् । यद् येन नाश्यते तत् तस्य विरोधि, न च संयोगेन नाश्यते कर्म । *ततो नाशभावेऽपि कर्मणो न किञ्चित् जायते । नचेयं प्रणालिका परस्य प्रतीतिगोचरचारिणी--पूर्वम् एषु  कर्म, ततो विभागः, तस्मात् संयोगविनाशः, ततो ऽपि द्रव्यविनाशः, एतस्माच्च तदाश्रितरूपादिनाशः; किन्तु दण्डादिपातानन्तरं घटादिनाश एव *तद्गोचरचारी । ततः स्थितम्--नष्टावयवैर्नष्टः अन्यैः अनष्टोऽवयवी इत्यस्य ज्ञापनार्थं **नानावयवात्मनः** इति वचनम् । § 202

एतेनेदमपि प्रत्युक्तम् यदुक्त--**द्रव्याणि द्रव्यान्तरमारभन्ते** वैशे॰ सू॰ १ । १ । १० इति; **द्रव्यं च तदन्तरं च कारणद्रव्येभ्योऽन्यत् कार्यद्रव्यम्** इति; कथम् ? एकान्तेन तेभ्यः तदन्यत्वनिषेधात् । कथञ्चित् पक्षे समवायवैयर्थ्यात् । § 203

यत् पुनरेतत्--**द्रव्ये च द्रव्याणि च तदन्तरमारभन्ते** ते; नवैकस्य ततोः संयोगः, अनेकवृत्तित्वाद् अस्य । तदवयवानां संयोग इति चेत्; न तेन
55/mkj तन्तुद्रव्यमुत्पादितम् ।  न च येष्वेकं द्रव्यं यदेव अवयवेषु समवेतं तदेव तेषु अपरं समवैति इति चेत्; न; स्कन्धादपि स्कन्धोत्पत्तेः अप्रतिषेधात्, मृत्पिण्डादेः शिवकाद्युत्पत्तिदर्शनात् । नहि शिवकाद्युत्पत्तेः पूर्वं तदारम्भकाः क्रियासंयोगभाजो भागाः प्रतीताः । § 204

/ms स्यादेतत्--शिवकादयः  संयुक्तावयवारब्धाः कार्यद्रव्यत्वात् पटादिवत् इति; तन्न; *एकत्र तथाभावदर्शनात् सर्वत्र तद्भावकल्पने [लोह] लेख्यं वज्रं पार्थिवत्वात् काष्ठवत् इत्याद्यपि स्यात् । प्रत्यक्षबाधनान्नेति चेत्; किं पुनः शिवकादीनाम् आरम्भका अवयवाः ततः प्राक् प्रत्यक्षतः सिद्धा येन तद्बाधनं न भवेत् । किंच, तन्तवः कथं पटस्य जनकाः ? तद्भावे भावाद् अभावेऽभावादिति चेत्; अत एव मृत्पिण्डोऽपि शिवकादिकारणमस्तु । ननु मृत्पिण्डविनाशे शिवकभावः, अन्यथा तत्कालेऽपि तद्दर्शनं भवेत् पटकाले तन्तुदर्शनवदिति चेत्; न; मृत्पिण्डस्य शिवकारणामात् । न च तन्तवोऽपि प्राक्तनस्वभावपरिकरिततनवः पटे दृश्यन्ते तदापि अपरापरपटोत्पत्तिप्रसङ्गात् । तदुक्तं न्या य वि नि श्च ये-- § 205

**कारणस्याऽक्षये तेषां कार्यस्योपरमः कथम् ?**न्यायवि॰ १ । १०३ इति । § 206

---

२ *] संयोगात् ।
३ णालिका] वैशेषिकस्य ।
४ एषु] पूर्वमवयवेषु
६ *] प्रतीतिगोचरचारी ।
१० तेभ्यः] कारणद्रव्येभ्यः कार्यद्रव्यस्य भिन्नत्वनिषेधात् ।
१३ तोः] ततः
१३ अस्य] संयोगस्य ।
१९ *] पटादौ ।
२० इ] क्वचिन्न नियमो दृष्ठा पार्थिवाल्लोहलेख्यवत् ॥--बहुषु पार्थिवेषु काष्ठपाषाणादिषु लोहलेख्यत्वदर्शनेऽपि पार्थिव एव वज्रे अलोहलेख्यत्वदर्शनेऽपि पार्थिव एव...--प्र॰ वा॰ मनो॰ ४ । २४० ।
२४ था] शिवककालेऽपि ।
२४ त्कालेऽपि] मृत्पिण्डदर्शनम् ।
२५ कार] काकारपरि
२६ वोऽपि] पूर्वपर्यायविशिष्टाः ।

*नानुपरतः, पटेन प्रतिवद्धास्तन्तवः पटान्तरं नारभन्ते । तदुक्तं परेण-- **तन्तवः पटमारभ्य पटेन प्रतिबन्धात् पटान्तरं नारभन्ते** इति; तत्रेदं चिन्त्यते; पेटन कारणस्य स्वरूपापहारः, शक्त्यपहारः, व्यापारापहारः, कार्यद्रव्योत्पत्तिनिषेधो वा तदन्तरजनने प्रतिबन्धः स्यात् ? तत्र नाद्यः पक्षः; कार्यकालेऽपि कारणसत्त्वोपगमात् । नापि द्वितीयः; नित्यस्य *तदयोगात् । तदुक्तं कैश्चित्-- § 207

*तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता ।
नित्यत्वादचिकित्स्यस्य कस्तां क्षपयितुं क्षमः ॥ प्र० वा० २ । २२ इति ।§ 209

*अत एव तृतीयोऽपि न युक्तः; शक्तैकस्वभावस्य सतः अवश्यं /ms
कार्यजन्मनि व्यापारात् । चतुर्थः पुनः अत्यन्तमसंभवी; *प्रति शक्तेन कारणेन क्रियमाणायाः कार्योत्पत्तेर्निषेधाऽयोगात् । ततः पटकालेऽपि समवायि-असमवायि-निमित्तानां तन्तु-संयोगेश्वरादीनां सद्भावात् पटान्तरोत्पत्तिः स्यात् । अन्यथेदमयुक्तम्--**निवृत्ते तत्पटे अवस्थितसंयोगात् पटान्तरमारभन्ते** । इति । न च अकिञ्चित्करस्य म  पेक्षणीयेति । § 210

एतेनेदमपि निरस्तं यदुक्तं परेण--**तथा पटोऽपि रूपादीनारभ्य रूपादिवत्त्वाद् रूपान्तरं नारभते । एवं कर्मकर्मकारणं मुसलादिप्रतिबन्धात् तदन्तरं नारभते**इत्यादि । कथम् ? सति समर्थे कारणे केनचित् प्रतिबन्धाऽयोगात् । तस्त्पक्ष  पूर्वस्वभावाः तन्तवः पटे अभ्युपगन्तव्या इति परिणामसिद्धिः । तथा च एकमपि द्रव्यं तदन्तरारम्भकमिति  सिद्धम् । द्रव्याणि द्रव्यान्त- 56/mkj
राणि आरभन्ते इत्येवं वक्तव्यम्, तेन [द्रव्यान्तरं] द्रव्यान्तरे द्रव्यान्तराणि यथासंभवं द्रव्याणि आरभन्ते इति लभ्यते । यथैव हि अनेकं द्रव्यम् एकं द्रव्यमारभमाणं दृश्यते तथा एकमपि द्रव्यम् एकं द्रव्यम् द्वे बहूनि द्रव्याणि आरभमाणमुपलभ्यते, यथैको घटो द्वे बहूनि वा कपालद्रव्याणि । ननु तेषां विभाग एव केवलं जायते न तानि, पूर्वमेव तद्भावात् । एवं घटोऽपि मृत्पिण्डावस्थायां कल्प्यताम् । *उपम्लार्थक्रिया- व्यपदेशादिविरहः /ms

---

१ *] किन्तु उपरत एव ।
४ त] पटान्तरजनने ।
४ का] पटकालेऽपि ।
५ का] तन्तुसत्त्वस्वीकारात् ।
५ *] शक्त्यपहाराभावात् अन्यथा अनित्यत्वापत्तिः ।
९ *] नित्यत्वादेव ।
१० *] प्रति इति निरर्थकं भाति ।
१४ स्य] संयोगस्य ।
१४ म] सत्ताऽ
१६ र्म] न
१६ न्धात्] कर्मान्तरम् ।
१८ क्ष] ततस्त्यक्त
१९ व्यं] द्रव्यान्तरारम्भकम् ।
२२ व्य] कर्तृ । परापेक्षयदेमुक्तम् ।
२४ तेषां] कपालानाम् ।
२४ ता] कपालानि ।
२५ *] कपालानाम् ।
२५ म्ला] मा

अन्यत्रापि । ततः साधूक्तम्--**नानावयवात्मनो घटादेः बहिः संप्रतीतेः** इति, तथा **नानारूपादिस्वभावस्य ।** § 211

अथ रूपादेः ततो भेदात् कथं तदात्मन इति युक्तमिति ? तन्न; प्रतीतिविरोधात् । अपि च गुणगुणिनोर्भेदैकान्ते नियमेन घटादेर्देशान्तरप्राप्तौ रूपादेः तत्प्राप्तिर्न स्यात् । न चात्र विभागजो विभागः संयोगजो वा संयोगः; **द्रव्याश्रयी अगुणवान् गुणः** वैशे° सू° १ । १ । १६ इति वचनात् । कृतोत्तरश्चायं पक्षः । न च रूपादेः स्वयं देशान्तरप्राप्तिनिमित्ता क्रिया समस्ति; द्रव्यत्वप्राप्तेः, **क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम्** वैशे° सू° १ । १ । १५ इति वचनात् । ततो घटादेः रूपाद्यात्मकत्वमभ्युपगन्तव्यम् । *एवमिति चेत्; तर्हि रूपाद्यात्मनामेव कारणद्रव्यान्तरारम्भो न रूपादिनिरपेक्षणाम्, नापि रूपादिरहितः तदारम्भः । *ततोय एव द्रव्याणां द्रव्यान्तरारम्भः स एव गुणानां गुणान्तरारम्भः इति न युक्तमेतत्--**गुणाश्च गुणान्तरम्** वैशे° सू° १ । १ । १० इति । § 212

यत्पुनरेतदुक्तं परेण--**घटरूपाद्युत्पत्तौ घटः समवायिकारणं कपालगता रूपादयोऽसमवायिकारणम्** । इति; तदप्येतेन निरस्तम्; नहि रूपाद्युत्पत्तेः पूर्वं घटो रूपादिरहितः कुतश्चिन् मानात् प्रसिद्धो यः समवायिकारणं स्यात्, तदभावात् कपालरूपादेः असमवायिकारणत्वञ्चानुपपन्नम् । ततः स्थितमेतत्--**नानारूपाद्यात्मनः** इति । § 213

/ms पुनरपि कथंभूतस्य ? **परिणामिनः** नवपुराणादिविवर्ताः परिणामाः तद्वत इति । चिन्तयिष्यते चैतत् । ननु नानावयवव्यतिरेकेण नापरः तदात्मा घटादिः संप्रतीयते, नापि रूपादिव्यतिरेकेण; तद्ग्रहणोपायाऽभावात् । तथाहि--चक्षुषा रूपं श्रोत्रेण शब्दः घ्राणेन गन्धः रसनेन रसः स्पर्शनेन स्पर्शः संप्रतीयते तथाप्रतीतेः, न च अपरं गुणिरूपं तत्र प्रतिभासनमवधार्यते, न चेन्द्रियान्तरं तद्ग्राहकमस्ति; तत् कस्य एवं तदात्मनो घटादेः संप्रतीतेः इत्युच्यतामिति चेत् ? अत्राह--**अन्तः चित्रैकाकारस्य वा** इत्यादि । **चित्तस्य**
57/mkj **ज्ञानस्य एकस्य[अ]** * साधारणस्य नीलाद्याकारस्य । अत एव आह-

१ अ] घटावस्थायां कपालस्वीकारेऽपि अर्थक्रियाव्यापदेशादयो न सन्तीति भावः ।
३ त] घटादेः ।
३ त] रूपाद्यात्मनः ।
५ त] देशान्तरप्राप्तिः ।
५ चात्र] रूपादौ ।
६ संयोगः] सम्भवति ।
६ इति] द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्--वैशे° सू° ।
७ क्षः] गुणगुणिनोर्भेदैकान्तलक्षणः ।
१० *] घटरूपाद्योः परस्परं तादात्म्ये ।
११ हितः] घटाद्यारम्भः ।
११ *] पृथगारम्भाभावात् ।
१२ त्] द्रव्याणि द्रव्यान्तरभारभन्ते गुणाश्च गुणान्तरम्--वैशे° सू° ।
२३ रं] गुणिस्वरूपम् ।
२३ त] प्रत्यक्षे ।
२४ स्य] कमाश्रित्य ।
२५ वा] स्येव
२६ *] मृत्पिण्डावस्थायाम् घटस्य उपमा--उपमानम्, अर्थक्रिया--जलाहरणादि, व्यपदेशः घट इति संज्ञा, आदि पदेन लक्षणगुणादयो न दृश्यन्ते अतः तत्काले घटसत्त्वं नास्ति ।

-**चित्रस्य** शबलस्य संशयादिज्ञानस्य अर्थाऽनर्थविषयतया शबलस्य, इव शब्दो यथार्थः--यथा चित्तस्य ईदृशस्य अन्तः, तथा उक्तप्रकारस्य घटादेः संप्रतीतेः इति । अन्ये **चित्रस्यैव** इति पठन्ति, तेषां कारिकोपात्तोऽय-मर्थो भवति न वेति चिन्त्यमेतत् । अस्माकं तु एवशब्दपठनान्न दोषः । **प्रतिभासैक नियम** सिद्धिवि° १ । १० इत्यादिना समर्थयिष्यमाणो दृष्टान्तोऽत्र स्तवितो **न सूचितस्य पात्रस्य प्रवेशो निर्ग्रमो वा** इति न्यायात् । नन्वस्ति तादृशस्य बहिरन्तर्वा प्रतिभासः, स तु भ्रान्तः । तदुक्तं प्र ज्ञा क रे ण--**मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽप्यदोषः** । प्र° वार्तिकाल° ३ । २११ इति चेत्; अत्राह--नचेत्यादि । **न च** नैव **तस्माद्** उक्ताद-र्थात् यः **विपरीतार्थः** तस्य **प्रकाशकं किञ्चित्** प्रत्यक्षमनुमानं वा **ज्ञानमस्ति यस्माज्ज्ञानात् प्रकृतमर्थतत्त्वं भ्रान्तं स्यात्** । प्रतिभासमानविपरीतार्थज्ञानेन हि बाधितं भ्रान्तम् इति व्यवह्रियते यथा एकचन्द्रज्ञानेन चन्द्रद्वयमिति म-न्यते । ननु यत एव तद्विपरीतार्थप्रकाशकं न किञ्चित् ज्ञानमस्ति अत एव प्रकृतमर्थतत्त्वं न भ्रान्तम्(?') इत्यपरः, तेन एवंवदता विभ्रमेतरविवेक एव निरस्तः स्यात् न क्रमाऽक्रमाऽनेकान्तः । तथा च क्षणभङ्गादिसाधने प्रत्यक्षमनवसरम् । तदभ्युपगमे प्रकृतमर्थतत्त्वं भ्रान्तमभ्युपगन्तव्यम्, तच्च तद्विपरीतार्थप्रकाशके ज्ञाने सति, इति कथं न बाधकभावः ? न च तद-स्ति । कथमिति चेत् ? अत्राह--**नहि** इत्यादि । **हिः** यस्मात् **तदेकान्ते** स चासौ एकान्तश्च तदेकान्तः तस्मिन् निरंशक्षणिकपरमाणुलक्षणस्वलक्षणैकान्ते **स्वसदसत्समये** स्व आत्मीयः स्वस्य वा सौगतस्य सत्समयः परमार्थसमयः असत्समयोऽपरमार्थसमयः व्यवहारसमय इति यावत् । तदुक्तम्-- § 214

*द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ माध्यमिक° का° २४ । ८ इति ।§ 216

तत्र अस्य सौगतकल्पितज्ञानाद्वये **वस्तुनः क्रिया** अनुभवः तस्याः **संभ-वो न** इति । तथाहि--तस्य सत्समयो यथा पूर्वोत्तरक्षणाभ्यां मध्यक्षणस्य विवेकैकान्तः, तथा मध्यक्षणेऽपि स्तम्भादिसर्वभागानाम् अन्योऽन्यत इति परमार्थसञ्चयमात्रं तत्त्वमिति; तत्र एकपरमाणुपर्यवसितं दर्शनं न परमाण्व- /ms

२ था] यथा इत्यस्मिन् अर्थे प्रयुक्तः ।
३ अ] व्याख्याकाराः ।
४ एव] इव
५ तिभासैक] क्य
६ वितो] सूचितः
६ मो] निर्गमो
७ ता] घटादेः ।
१४ त्त्वं] क्षणक्षयादिलक्षणम् ।
१४ रः] बौद्धः ।
१४ विवेक] इदं भ्रान्तम् इदञ्चाभ्रान्तमिति विवेको भेदः ।
१६ त] क्षणभङ्गादिसाधने प्रत्यक्षस्यानुपयोगस्वीकारे ।
१६ त] भ्रान्तत्वञ्च ।
२६ त] विवेकैकान्तः भेद इति यावत् ।
२७ इति] परमार्थानाम् स्वलक्षणपरमाणूनां सञ्चयमात्रमेव तत्त्वम् ।

न्तराणि ईक्षितुं क्षमते; एकस्य अनेकार्थविषयत्वाऽयोगात्, मध्यक्षणदर्शनस्य पूर्वापरक्षणविषयत्वायोगवत् समदोषत्वात् । तथा च परलोकप्रख्याति । एकपरमाणुपर्यवसितं च दर्शनं पुरुषाद्वैतमाकर्षतीति निरूपयिष्यते । तन्न स्वसत्समये अर्थक्रियासंभवः । नाप्यसत्समये; तत्र दृश्यप्राप्ययोरेकत्वे 58/mkj प्रत्यक्षप्रामाण्योपगमात् । भवतु तद संभव इति चेत्; अत्राह--**तथा सति** इत्यादि । **तथा** तेन स्वसदसत्समये इत्यनेन प्रकारेण तदेकान्ते अर्थक्रियासुसंभवे **सति कथं** नैव **अक्षणिकत्वे** वस्तुनः कालत्रयानुयायित्वे **क्रमयौगपद्याभ्यां** क्रमेण यौगपद्येन वा **अर्थस्य** क्षणिकत्वलक्षणस्य **क्रिया** अनुभवः तस्याः **विरोधात्** । तथाहि--एकदा उपलब्धस्य पुनः पुनः उपलम्भे क्रमेणार्थक्रिया । न च पूर्वोपलम्भेन पुनः पुनः तस्यैव उपलम्भ इति प्रतीयते, तत्काले उत्तरदर्शनानां तद्दृश्यस्य च अभावेन दर्शनाभावात् । नापि उत्तरदर्शनेसावेन पूर्वोपलब्धं प्रतीयते इति प्रतीयते; तत्कालेऽपि /ms पूर्वदर्शनदृश्यरूप योरभावात् । न तत्समुदायेन; क्रमभाविनोः तदसंभवात् । उभयकालवर्ति तज्ज्ञानमेकं न युक्तम्; उक्तदोषात् । पूर्वेण उत्तरेण वा दर्शनेन परस्य पूर्वस्य वा ग्रहणे सर्वग्रहणमविशेषादिति, तस्याः विरोधः । तथा साक्षादशेषपूर्वापरस्वभावानुभवो यौगपद्येन अर्थक्रिया । तत्र चानाद्यनन्तस्वभावस्य एकक्षणे प्रतिभासनात् तदेव क्षणिकत्वमिति तस्या विरोधः [त] स्मात् **सतोऽनुभूयमानस्य साकल्येन क्षणभङ्गसिद्धिः** । कुत एतत् ? इत्यत्राह--**तत्रैव** इत्यादि । **तत्रैव** तस्मिन्नेव तदेकान्ते न अक्षणिकत्वे इति एवकारार्थः, तत्र तदविरोधस्य तृतीयपरिच्छेदे प्रतिपादयिष्यमाणत्वात् । **ताभ्यां** क्रमयौगपद्याभ्यां **तद्विरोधात्** अर्थक्रियाविरोधात् । तथाहि--न तावत् निरंशक्षणिकपरमाणुलक्षणस्वलक्षणार्थस्य क्रमेण क्रिया अनुभवः;

---

२ ख्याति] परलोकं प्रत्याख्याति[[परलोको हि इहजन्मान्त्यचित्तस्य परजन्माद्यचित्तेन सहैक्यप्रतिपत्तिगम्यः । सैव च न संभवति इति तत्प्रत्याख्यानमेव जातमिति भावः ।]]

५ त्वे] प्रत्यक्षविषयभूतो ह्यर्थः प्रत्यक्षमुत्पाद्य क्षणिकत्वात् विनश्यति । अतः यत् दृश्यं भवति प्रत्यक्षस्य न तत् प्राप्यते इति अन्यद् दृष्टं प्राप्तञ्चान्यदिति विसंवादि प्रत्यक्षं स्यात् इत्याशङ्कायां समाहितम्--यत् दृश्य-प्राप्यक्षणयोः एकत्वमारोप्य यद् दृष्टं तदेव प्राप्तमिति एकत्वाध्यवसायकृतस्तत्र अविसंवादः । अतः प्रत्यक्षप्रामाण्यसमर्थनाय स्वासत्कालीनार्थक्रिया कथञ्चिदभ्युपगतैव सौगतेन इति भावः ।

७ वे] याया असंभवे

११ त] पूर्वोपलम्भकाले ।

१२ नेसावेन] र्शनेन

१२ त] उत्तरदर्शनकालेऽपि ।

१३ भाविनोः] पूर्वोत्तरयोः ।

१५ त] अर्थक्रियायाः ।

१६ त] यौगपद्यपक्षे ।

१७ नात्] उत्तरक्षणे च कर्तुं योग्यस्याभावात् अर्थक्रियाया अभाव एव ।

१७ त] अर्थक्रियायाः ।

१९ त] क्षणिकैकान्ते ।

२० त] नित्यपक्षे ।

२० त्र] अर्थक्रियाविरोधाभावस्य ।

अक्षणिकत्वप्रसङ्गात्, *तस्य तल्लक्षणत्वात् । नापि यौगपद्येन; *योगिदर्शनप्रभृतितदनुभवकार्याणाम् एकपरमाण्वाकारदर्शनदेशकालस्वभावसाङ्कर्येण तद्वदसिद्धेः, *अन्यथा युगपदशेषदेशानां दर्शनेऽपि न कालसाङ्कर्यं भवेत् । *ननु न यथोक्तपरमाणुलक्षणं स्वलक्षणमिष्यते, नापि युगपदनेकानुभवकारि येनायं दोषः स्यात्, अपि तु यथा[व]भासम्, **यद् यथावभासते तत् तथैव परमार्थसत्** इत्यादि वचनादिति चेत्; अत्राह--**ततो यत्सत्** इत्यादि । न यथोक्तपरमाणुरूपं तत्त्वम्, अपि तु यथाप्रतिभासम् इति योऽयं /ms
परस्य अभ्युपगमः **तस्मात् यत् सत्** उपलम्भगोचरचारि **उपलम्भः सत्ता** प्र° वार्तिकाल° ३ । ५४ इति वचनात्, **तत् सर्वम् अनेकान्तात्मकं** गत्यन्तराभावात् तस्य । § 217

अथवा, यदुक्तम्--न च तद्विपरीतार्थप्रकाशकम् इत्यादि; तत्र उक्तनीत्या प्रत्यक्षं यद्यपि नास्ति तथापि यत् सत् तत्सर्वं क्षणिकं यथा घटः तथा च विवादाधिकरणम् इत्यनुमानं स्यादिति चेत्; अत्राह--**नहि** इत्यादि । **नहि तदेकान्ते** क्षणिकैकान्ते **स्वसदसत्समये** सदसद् इति भावप्रधानो 59/mkj
निर्देशः । ततोऽयमर्थः--स्वसत्त्वसमये स्वाऽसत्त्वसमये च **अर्थस्य** कार्यस्य **क्रिया** करणं तस्याः **संभवः** एकत्र अनाद्यनन्तसन्तानस्य एकक्षणपर्यवसानम्, अन्यत्र कारणाभावेन कार्यानुदय इति मन्यते । § 218

ननु च जाग्रद्विज्ञानादिकं स्वसत्त्वशून्येऽपि समये प्रबोधादिकार्यं जनयति तत्कथमुच्यते स्वाऽसत्समये अर्थक्रियाऽसंभव इति चेत्; न; पूर्वं

---

१ *] अक्षणिकत्वस्य ।
१ स्य] एकस्यानेकक्षणव्यापित्वरूपक्रमेण अर्थक्रियाकारित्वादिति भावः ।
१ *] योगिदर्शने ते सर्वे पूर्वोत्तरकालवर्त्तिनः परमाणवः प्रतिभान्ति अतः विषयकारणतावादिनां सर्वेषां तदनुभवरूपकार्याणाम् वर्तमानपरमाणुकार्यभूतअनुभवेन सह एकदेशता एककालता च स्यात्, एतच्च साङ्कर्य्यमसिद्धम् ।
३ *] एवं न स्यात्तदा नित्यपक्षेऽपि यौगपद्येन अर्थक्रियाप्रसाधने कालसाङ्कर्य्यापत्तिः कथं दीयते ?
४ *] प्रतिभासाद्वैतवादी प्राह ।
१५ स्व] तुलना--सत्येव कारणे यदि कार्यम्; त्रैलोक्यमेकक्षणवर्ति स्यात्, कारणक्षणकाल एव सर्वस्य उत्तरोत्तरक्षणसन्तानस्य भावात्, ततः सन्तानाभावात् पक्षान्तरासंभवाच्च ।...यदि पुनरसत्येव कारणे कार्यम्; तदा कारणक्षणात् पूर्वं पश्चाच्च अनादिरनन्तश्च कालः कार्यसहितः स्यात् कारणाभावाविशेषात् । --अष्टश°, अष्टस° पृ° १८७ ।
१६ ए] सत्समयपक्षे ।
१६ ए] द्वितीयः क्षणः स्वसत्समये अर्थात् द्वितीयक्षणे एव तृतीयमुत्पादयति अतः तृतीयस्य द्वितीयक्षणे स्थितिः । एवं द्वितीयस्य स्वकारण-प्रथमक्षणकाले इति उत्तरोत्तरकार्याणां प्रथमक्षणे एव स्थित्यापत्तिः ।
१७ अ] असत्समये इति पक्षे ।
१८ न] व्यवहितकारणवादी प्रज्ञाकरः प्राह । अविद्यमानस्य करणमिति कोऽर्थः ? तदनन्तरभाविनी तस्य सत्ता । तदेतदानन्तर्यमुभयापेक्षयापि समानम् । न चानन्तर्यमेव तत्त्वे निबन्धनं व्यवहितस्यापि कारणत्वात् । तथाहि--गाढसुप्तस्य विज्ञानं प्रबोधे पूर्ववेदनात् । जायते व्यवधानेन कालेनेति विनिश्चितम् ॥...तस्मादन्वयव्यतिरेकानुविधायित्वं निबन्धनम् । कार्यकारणभावस्य तद्भाविन्यपि विद्यते ॥--प्र° वार्तिकाल° पृ° ६८ ।

तस्मिन् समर्थे अजातं पुनस्तदभावे जायमानं स्वयमेव कथं तत्कार्यम् ? तेन जन्यमानत्वादिति चेत्; कथमसत् तत् तस्य जनकं खरविषाणवत् ? स्वोत्पत्तिकाले सदिति चेत्; तदैव तत्कार्यमस्तु तज्जननशक्तेः तदैव भावात् । अथ ईदृशी तच्छक्तिः यतः कालान्तरे कार्यं तथैव दर्शनात्, यथा दृश्यते तथैव तदिति चेत्; न; नित्यादपि पूर्वं समर्थात् *पुनः कार्यं न /ms विरुध्येत । अथ नित्यात् तथा कार्यं जायमानं न दृश्यते; नित्यादर्शनात् । क्षणिकादर्शनात् ततोऽपि न दृश्यते । नहि जाग्रद्विज्ञानस्य अन्यस्य वा क्षणिकत्वं प्रमाणनिश्चितम् । ततः सूक्तम्--**नहीत्यादि** । भवत्वेवं को दोष इति चेत् ? अत्राह--**तथा सति** इत्यादि । **तथा सति तत्र** अर्थक्रियाऽसम्भवे सति **कथम्** ***अक्षणिकत्वे क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् तीरादर्शिशकुनिन्यायेन ततः सत्त्वं निवर्तमानं क्षणिकत्वे अवतिष्ठते** । इति न्यायात् **सतो**ऽर्थक्रियाकारिणः **साकल्येन क्षणभङ्गसिद्धिः** ? नैव । कुत एतत् ? इति चेत् ? अत्राह--**तत्रैव** इत्यादि । **तत्रैव** तदेकान्त एव **ताभ्यां** क्रमयौगपद्याभ्यां **तद्विरोधात्** अर्थक्रियाविरोधात् । ननु च जाग्रद्विज्ञानं क्षणिकमपि सहोच्छ्वासादि--शरीराकारादिविशेषकार्यमुपजनयति, क्रमेण च उच्छ्वासप्रबोधादि, तत्कथमुच्यते **तत्रैव** इत्यादि इति चेत्; न; उक्तमत्र तत्क्षणिकत्वाऽनिश्चयात् । अपि च, क्षणिकादक्रमेण कार्यसंभवे **नाक्रमात्** 60/mkj **क्रमिणो भावाः** प्र० वा० १ । ४५ इत्यादि विरुध्येत ततो यत्किञ्चिदेतत् । § 219

उपसंहारमाह--**तत** इत्यादि । यत एवं **स्वलक्षणानि स्वयमभिमत-क्षणक्षयपरमाणुलक्षणानि पश्यतोऽपि एको हि ज्ञानसन्निवेशी स्थवीयान् आकारः परिस्फुटमवभासते तदेकान्ते स्वसदसत्समये अर्थक्रियाऽसंभवश्च ततः** तस्मात् **यत् सत् तत् सर्वम् अनेकान्तात्मकम्** इति । साध्यान्तरमाह--**तदेकान्तस्य** इत्यादिना । ततः इत्यनुवर्तते **तत** उक्तान्न्यायात् **तदेकान्तस्य** /ms क्षणिकैकान्तस्य **असत्त्वम्** अविद्यमानत्वम् । कदा ? इत्यत्राह--**उपलब्धिल-**

१ स्मिन्] जाग्रद्विज्ञाने ।
१ भावे] जाग्रद्विज्ञानाभावे ।
२ त] जाग्रद्विज्ञानम् ।
३ देव] जाग्रद्विज्ञानकाल एव ।
५ थैव] अभ्युपगन्तव्यमिति ।
५ *] पश्चात् यथाकालम् ।
६ विरुध्येत] तथैव तच्छक्तिसंभवात् ।
१० *] यत् सत् तत् क्षणिकमेव अक्षणिकत्वे अर्थक्रियाविरोधात् तल्लक्षणवस्तुत्वं हीयते ।--हेतुबि० पृ० ५४ । यदि न सर्वं सत् कृतकं वा प्रतिक्षणविनाशि स्यात्, अक्षणिकस्य क्रमयौगपद्याभ्यामर्थक्रियाऽयोगात् अर्थक्रियासामर्थ्यलक्षणमतो निवृत्तमित्यसदेव स्यात् ।--वादन्या० पृ० ६--८ ।
११ विरोधात्] यथा किल वहनारूढैः वाणिग्भिः शकुनिर्मुच्यते अपि नाम तीरं द्रक्ष्यतीति । स यदा सर्वतः पर्यटंस्तीरं नासादयति तदा वहनमेवागच्छतीति तद्वदेतदपि द्रष्टव्यम्--हेतुबि० टी० पृ० ११३ ।
११ त] नित्यात् ।
१५ पि] सह युगपत् ।
१७ मेण] युगपत् ।
१८ विरुध्येत] यथैव अक्रम-नित्यकारणात् क्रमेण कार्योत्पत्तिर्विरुद्धा तथैव--क्रमिकारणात् अक्रमेण कार्योत्पत्तिरपि विरुद्धैवेति भावः ।

**क्षणप्राप्तौ** प्रत्ययान्तरसाकल्यं स्वभावविशेषश्च उपलब्धेः लक्षणं तत्प्राप्तौ । एवं मन्यते--तदेकान्तोऽसन् उपलब्धिलक्षणप्राप्तत्वे सति **अनुपलभ्यमानत्वात् ।** ननु यदि तदेकान्तः क्वचित् कदाचित् उपलम्भगोचरः कथमेकान्तेन तदभावः अतिप्रसङ्गात् ? एकान्तेन च तदभाव इति इष्यते । अथ क्वचित् कदाचित् स तथा नेष्यते; तर्हि असिद्धो हेतुः, विशेषणाऽसिद्धेरिति चेत्; न; अन्यथा अभिप्रायात् । नेदं साधनं स्वतन्त्रसाधनाभिप्रायेण प्रयुक्तम्, अपि तु प्रसङ्गसाधनाभिप्रायेण । तथा हि--तदेकान्तो दृश्यश्चेदिष्यते, तर्हि दृश्यस्य सतोऽनुपलम्भात् असत्त्वम् । अदृश्यश्चेत्; अप्रमेयत्वं प्रमाणाऽविषयत्वेन व्यवहारानुपयोगित्वात् । एतेन आश्रयासिद्धिचोदनमप्ययुक्तम् इत्युक्तम् । एतदेव दर्शयन्नाह--**अन्यथा अप्रमेयत्वम्** इति । प्रसङ्गसाधने हि पक्षद्वयोत्थापनं नान्यत्र युक्तम् **उपलब्धिलक्षणप्राप्तौ** इति वचनाच्च प्रसङ्गसाधनम्, अदृश्यादर्शनस्यापि स्वयं गमकत्वोपगमात् । § 220

ननु यदुक्तम्--**अन्तः चित्रकारस्येव एकस्य चित्तस्य** इति; तदयुक्तम्; तस्यापि तथाऽनभ्युपगमात् । तदुक्तम्-- § 221

*किं स्यात् सा चित्रतैकस्यां न स्यात्तस्यां मतावपि ।
यदीदं स्वयमर्थेभ्यो रोचते तत्र के वयम् ॥ प्र० वा० २ ।
२१०§ 223

इति चेत्; तत्रेदं चिन्त्यते--सौत्रान्तिकस्य योगाचारस्य माध्यमिकस्य वा मतमपेक्ष्य इदमुच्येत ? प्रथमपक्षे दूषणमाह--**प्रतिभासैक्यनियम** इत्यादि । § 224 /ms

61/mkj

---

१ प्र] उपलब्धिलक्षणप्राप्तिः उपलम्भप्रत्ययान्तरसाकल्यं स्वभावविशेषश्च । उपलम्भप्रत्ययान्तरसाकल्यमिति ज्ञानस्य घटोऽपि जनकः अन्ये च चक्षुरादयः, घटाद् दृश्यादन्ये हेतवः प्रत्ययान्तराणि तेषां साकल्यं सन्निधिः ।...यः स्वभावः सत्सु अन्येषूपलम्भप्रत्ययेषु सन् प्रत्यक्ष एव भवति स स्वभावविशेषः ।--न्यायबि० २ । १४--१५ ।

२ त] क्षणिकैकान्तः ।

३ त] क्षणिकैकान्तः ।

५ त] उपलम्भगोचरः ।

५ विशेष] उपलब्धिलक्षणप्राप्तत्वे सति इत्यसिद्धेः ।

७ त] क्षणिकैकान्तः ।

१० प] सत्-असत् इति ।

१४ त] चित्रज्ञानस्यापि ।

१४ त] एकं सत् अनेकाकाररूपतया ।

१७ इ] ननु यदि सा चित्रता बुद्धावेकस्यां स्यात्, तया च चित्रमेकं द्रव्यं व्यवस्थाप्येत तदा किं दूषणं स्यात् ? आह--न स्यात्तस्यां मतावपि, न केवलं द्रव्ये तस्यां मतावपि एकस्यां न स्याच्चित्रता । कथम् ? अनेकपुरुषप्रतीतिवत् । कथं तर्हि प्रतीतिरित्याह--यदीदं स्वयमर्थेभ्यो रोचते तत्र के वयम्--यदीदम् अताद्रूप्येऽपि ताद्रूप्यप्रथनम् अर्थानां भासमानानां नीलादीनां स्वयम्--अपरप्रेरणया रोचते तत्र तथाप्रतिभासे के वयमसहमानाः अपि निषेद्धुम् । अवस्तु च प्रतिभासते चेति व्यक्तमालीक्यम्--प्र० वा० मनो० ।

...10 प्रतिभासैक्यनियमे धीर्न स्यादेकाभिलापिनीम् ।
प्रतिभासप्रतीतिं [वा] दधत्येवान्यथात्मनः ॥ १०

‖§ 226

यद्ययमेकान्तः अन्तर्बहिर्वा विरुद्धधर्माध्यासे नैकत्वं स्यादिति कथं बहिरर्थविभ्रमचेतसां स्वसंवेदनम् ? कस्यचित् प्रमाणतदाभासस्वभावसाङ्कर्ये चित्तस्य कथं प्रतिभासभेदादिनैकत्वं निराक्रियेत ? सविकल्पकनिर्विकल्पयोः कथञ्चिदेकत्वे सुखदुःखयोरपि तथैव कथन्न भवेत् ? तदयमेकान्तमवलम्ब्य बहिरन्तर्मुखनिर्भासविभ्रमेतरविकल्पेतरचेतःस्वभावमनेकान्तनान्तरीयकं प्रतिपद्यमानः तद्द्वेषी तत्कारी चेति उपेक्षामर्हति । § 227

अत्र द्वौ प्रतिभासशब्दौ तत्र आद्यः संवेदनवाची अन्यो विषयाकारवाची । ततोऽयमर्थः संपद्यते--**प्रतिभासस्य** संवेदनस्य **ऐक्यनियमे** निरंशत्वनियमे अङ्गीक्रियमाणे **धीः** बुद्धिः **एकैव न स्यात्** किन्तु अनेका स्यात् । किं कुर्वती ? **दधती** । किम् ? **प्रतिभासप्रतीतिं** विषयाकारगृहीतिम् । कथंभूताम् ? **अभिलापिनीम्** अभिधानवतीम् । कथम् ? **अन्यथा** अन्येन प्रकारेण । कुतोऽन्यथा ? **आत्मनः** स्वरूपप्रतीतेः सकाशात् **अन्यथा** अभिलापिनीम् । एतदुक्तं भवति--आत्मनः प्रतीतिम् **सर्वचित्तचैत्तानाम् आत्मसंवेदनं प्रत्यक्षं निर्विकल्पकम्** न्यायबि॰ १ । १० इति अ[न]भिलापिनीं प्रतिभासप्रतीतिं तिमिराशुभ्रमणनौयानसंक्षोभाद्याहितविभ्रमाम् इत्यभिलापिनीं विभ्राणा धीः एकैव न स्याद् अनेकैव स्यादिति । तथाहि--बहिरर्थविभ्रमचेतसाम् अन्यैव स्वसंवेदनात् केशोण्डुकादिप्रतीतिः एकस्या भ्रान्तेतराकारद्वयाऽयोगात् । न च सा ज्ञानरूपा अस्ति; अतिप्रसङ्गात् । तच्चेतःस्वसंवेदनेन तज्ज्ञाने नास्य विभ्रमः तदाकारानुकरणात्, नीलाकारानुकरणे नीलतावत् । तदाकारस्य ततो भेदे स एव दोषः अनवस्था च । अतदाकारानुकरणे न तेन
/ms तज्ज्ञानम्, इतरथा निराकारदर्शनम् । तस्याः स्वसंवेदनाभ्युपगमे एकस्य रूपद्वयभयात् स्वसंवेदनात् पुनरपि तत्प्रतीतिरन्याऽभ्युपगन्तव्या । न च साऽज्ञातरूपाऽस्ति इति चोद्ये तस्मिन्नेव उत्तरे स एव दोषः अनवस्था च । तदेवं केशोण्डुकादिप्रतीतेः अनुपलम्भेन असत्त्वात् तन्निवृत्त्यर्थम् अभ्रान्तग्रह-

---

१७ तीतिं] तिमिरमक्ष्णोविप्लवः, इन्द्रियगतमिदं विभ्रमकारणम् । आशुभ्रमणम् अलातादेः । मन्दं हि भ्राम्यमाणे अलातादौ न चक्रभ्रान्तिरुत्पद्यते, तदर्थम् आशुग्रहणेन विशेष्यते भ्रमणम् । एतच्च विषयगतं विभ्रमकारणम् । नावा गमनं नौयानम् । गच्छन्त्यां नावि स्थितस्य गच्छद्वृक्षादिभ्रान्तिरुत्पद्यते इति यानग्रहणम् । एतच्च बाह्याश्रयस्थितं विभ्रमकारणम् । संक्षोभो वातपित्तश्लेष्मणाम् । वातादिषु हि क्षोभं गतेषु ज्वलितस्तम्भादिभ्रान्तिरुत्पद्यते । एतच्च अध्यात्मगतं विभ्रमकारणम् ।--न्यायबि॰ टी॰ १ । ६ ।

१९ नात्] निरालम्बे नभसि केशाकारा उण्डुकाकारा च प्रतीतिः ।

१९ द्व] अर्थरूपे भ्रान्तं स्वरूपे च अभ्रान्तमिति द्वावाकारौ ।

२० रूपा] साऽज्ञातरूपा

णं प्रत्यक्षलक्षणे कृतमनर्थकम् । व्यवहारेण तत्कारणाददोष इति चेत्; तर्हि तेनैव **सर्वचित्त** न्यायबि° १ । १० इत्याद्यभिधानाद् एकस्य रूपद्वयप्राप्तिः । भवतु इति चेत्; तथा क्रमेणापि एकस्य सा इति तेन क्षणभङ्गसाधनमनवसरम् । न चैतदिष्यते परेण इति साधूक्तम्--**प्रतिभासैक्यनियम** इत्यादि । इदं च व्याख्यानं शास्त्रकारस्याप्यभिमतं न ममैव, वृत्तौ **यद्ययमेकान्त** इत्यादेर्वक्ष्यमाणत्वात् । § 228

62/mkj

इदमपरं व्याख्यानम्--**प्रतिभासैक्यनियमे धीर्विकल्पिकाः** बुद्धिः, **धीः** इति सामान्यवचनात् कथमियं लभ्यते इति चेत् ? अनन्तरवक्ष्यमाणगच्छाद् अन्यस्याः तदसंभवात् । सा **एकैव न स्यात्, स्यात्** इत्यनेन वा अनागतेन सम्बन्धात् । किं कुर्वती ? **दधती** । किम् ? **प्रतिभासप्रतीतिं** विषयाकारसंवित्तिम् । कथम्भूताम् ? **अभिलापिनीम्** अभिलापसंसर्गयोग्याम् **अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना** । न्यायबि° १ । ५ इति वचनात् । पुनरपि किं दधती ? **आत्मनः** । किंस्वरूपस्य ? **अन्यथा** अनभिलापिनीं प्रतीतिम् । तथा चोक्तम्-- § 229 /ms

*अशक्यसमयो ह्यात्मा सुखादीनामनन्यभाक् ।
तेन तेषां स्वसंवित्तिः नाभिलापानुषङ्गिनी ॥ प्र° वा° २ । २४९ इति ।§ 231

एतदुक्तं भवति--यथा आवृतात् अनावृतं चलाद् अचलं रक्ताद् अरक्तं कृतकाद् अकृतकं रूपमेकान्तेन अन्यत् तथा अनभिलापिन्याः स्वप्रतीतेः अभिलापिनी प्रतिभासप्रतीतिरपि अन्या इति । न च सा अनुपलब्धा अस्ति; अतिप्रसङ्गात् । स्वत एव तदुपलब्धौ तस्याः स्वसंवेदनमविकल्पकम्, अन्यथा प्रकृतमपि न भवेत् । एवं चेत् स एव दोषः--ततः सा भिन्ना इति । पुनरपि स्वत एव तदुपलब्धौ प्रकृतो दोषः । अनुपलब्धौ अनवस्था च । प्रकृतसंवेदनेन तदुपलब्धौ तस्य तदात्मकत्वे तस्य सविकल्पकत्वं तस्या वा निर्विकल्पकत्वम् । अतदात्मकत्वे तत उत्पन्नेन तदाकारानुकारिणा वा

१ ल] कल्पनापोढमभ्रान्तं प्रत्यक्षम्न्यायबि° १ । ४ इत्यत्र ।
२ ए] केशोण्डुकादिज्ञानस्य ।
३ सा] रूपद्वयप्राप्तिः ।
४ ते] बौद्धेन ।
५ मैव] टीकाकारस्य ।
८ मियं] विकल्पिका ।
९ च्छाद्] माणस्याच्छब्दाद्
१६ ङ्गिनी] णी
१६ इति] ...रागादीनामनन्यभाक् । तेषामतः स्वसंवित्तिर्नाभिजल्पानुषङ्गिणी ॥ --प्र° वा° । ...नीलादीनामनन्यभाक् तेषामतश्च संवित्ति...--तत्त्वसं° पृ° ३७८ । प्रकृतपाठः— विधिवि° टी° पृ° १९० । शा° भा° भामती २ । २ । २४ । ...नामादीनामनन्यमाक् । तेषामतो न चान्यत्वं कथञ्चिदुपपद्यते ।--सन्मति° टी° पृ° १८५ । ...तथा मतो न वाच्यत्वं कथञ्चिदुपपद्यते ।--तत्त्वसं° प° पृ° २९० ।
१८ त्] भिन्नम् ।
२० स्याः] अभिलापिन्याः प्रतीतेः ।
२३ त] अभिलापिन्याः प्रतीतेः ।

तेन तदुपलब्धौ तस्य सविकल्पकत्वम् । किंच, विकल्पस्य बुद्धिस्वसंवेदनात् तस्याः पूर्ववत्त्वं पुनरपि तस्याः स्वसंवेदनोपगमे समानश्चर्चः, अनवस्था । तदनुपगमे वा अर्थाऽविशेषात् न सा बुद्धेः आकारः स्यात् । तदेवं प्रतीतेः अनुपलम्भेन असत्त्वात् न कल्पना नाम **अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना** न्यायबि° १ । ५ इत्यस्य लक्षणस्याऽभावात्, इति तन्निवृत्त्यर्थं कल्पनापोढपदञ्च अनर्थकम् । § 232

एतेन **नहि इमाः कल्पना अप्रतिसंविदिता एव उदयन्ते व्ययन्ते च यतः**
/ms **सत्योऽपि अनुपलक्षिताः स्युः** । इति

*सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थितेः ।
स्वभावपरभावाभ्यां यस्माद् व्यावृत्तिभागिनः ॥§ 235

ततो यतो यतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः ।
जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ॥§ 237

ततो यो येन धर्मेण विशेषः संप्रतीयते ।
न स शक्यः ततोऽन्येन तेन भिन्ना व्यवस्थितिः ॥ प्र° वा° ३ । ३९-४१§ 239

63/mkj इत्यादिकं च प्रकरणं निरस्तम् । कथम् ? कल्पनानामभावे तासामुदयव्ययौ लक्षणं **व्यावृत्तिनिबन्धना जातिभेदाः प्रकल्प्यन्ते** इति च श्रद्धामात्रमतोपि दुर्लभमिति नानित्यत्वसत्त्वयोः साध्यसाधनभावः, अभेदात् । संवृतेः अयं स्यादिति चेत्; ननु संवृतिः विकल्पबुद्धिरेव सा च नास्ति, तत एव चायम् अति  विरुद्धमेतत् । स्वप्नवद् भ्रान्तेरिति चेत्; न; तत्रापि यदीयं निर्विकल्पिका; न ततो युक्तः । अन्यथा अन्यदापि तत एवेति व्याहतमेतत्--**सर्व एवायम्** आ° दिग्नागः इत्यादि । विकल्पिका चेत्; स एव दोषः--सैव नास्ति तत एव चायम् इति विरुद्धमेतत् । ततोऽस्य दोषस्य परिहारार्थं बहिरर्थेतरयोः चित्रेतरात्मकं सविकल्पेतरात्मकं वा एकं ज्ञानं सौत्रान्तिकेनापि अभ्युपगन्तव्यमिति कुतोऽस्य क्वचिन्निरंशैकान्तसिद्धिः इत्यभिप्रायः । § 240

१७ तो ] त्रतोऽ
१८ अ ] साध्यसाधनभावः ।
१८ संवृतिः ] प्रमाणमन्तरेण प्रतीत्यभिमानमात्रं संवृतिः । पृ° १८३ संवृतिर्नाम विकल्पविज्ञानम् अधिमुक्तिमाह अनादिवासनातः पृ° १८५ संवृत्यास्तीति भ्रान्तजनापेक्षया अस्तीति पृ° ३७७--प्र° वार्तिकाल° ।
१८ सा ] संवृतिः ।
१९ चाय ] साध्यसाधनभावः ।
१९ अति ] इति
२० दीयं ] भ्रान्तिः ।
२० तो ] भ्रान्तेः ।
२० अ ] जाग्रद्दशायामपि ।
२० त ] भ्रान्तेरेव ।
२१ इत्या ] तथा च अनुमानानुमेयव्यवहारोऽयं सर्वो हि बुद्धिपरिकल्पितः बुद्ध्यारूढेन धर्मधर्मिभेदेनेत्युक्तम्--आचार्यदिग्नागेनाप्ये तदुक्तमित्याह तथा चेत्यादि— प्र° वा° स्व°, टी° पृ° २४ ।

कारिकां विवृण्वन्नाह--**यद्ययम्** इत्यादि । **यदि च अयम्** अनन्तरमुच्यमानः **एकान्तोऽवश्यंभावः अन्तः** चेतसि **बहिर्**घटादौ, **वा** इति समुच्चयो, **विरुद्धधर्माध्यासे** सति **नैकत्वं स्याद्** भवेत् । **इति** शब्दः पूर्वपक्षसमाप्तौ । /ms अत्र दूषणमाह--**कथम्** इत्यादि । **बहिरर्थे** शुक्लशङ्खादौ **विभ्रमः** पीतादिप्रतीतिलक्षणः येषां **चेतसां** विज्ञानानां तानि तथोक्तानि तेषां **कथं स्वसंवेदनं प्रत्यक्षम् ?** नैव स्यादिति चिन्तितमेतत् । *एतेन पर्वतादित्यादेः संलग्नतादौ विभ्रमचेतसां कथं पर्वतादिग्रहणं प्रत्यक्षमिति द्रष्टव्यम् । **कस्यचित्** इत्यादिना परमतमाशङ्कते--**कस्यचित्**--तिमिराशुभ्रमणनौयानसंक्षोभाद्याहितविभ्रमस्य **प्रमाणतदाभासस्वभावसाङ्कर्ये** प्रमाणं यः स्वभावः स्वसंवेदनलक्षणः तदभासो द्विचन्द्रादिग्रहणरूपो यः स्वभावः तयोः साङ्कर्य्ये कथञ्चित्तादाम्ये **चित्तस्य** ज्ञानस्य अङ्गीक्रियमाणे दूषणमाह--**कथम्** इत्यादि । **कथं** न कथञ्चित् । केन ? इत्याह--**प्रतिभासभेद आदिर्**यस्य विरुद्धधर्माध्यासकारणदेशकालार्थक्रियादिभेदस्य स तथोक्तः तेन **एकत्वं निराक्रियेत ? चित्तस्य** इत्येतदत्रापि योज्यं मध्ये करणात्, **चित्तस्य** आत्मन इत्यर्थः ।

§ 241

एतेन एतदपि निरस्तं यदुक्तं वैशेषिकादिना--**अयम् इति ऊर्ध्वतासामान्यविशिष्टस्य धर्मिणोऽवधारणम् निर्णयः, स्थाणुर्वा पुरुषो वा इति विशेषानवधारणं संशयः [न] एकएव प्रत्ययः एकस्य अवधारणाऽनवधारणात्मकत्वानुपपत्तिः** इति चेत्; 64/mkj, /ms दृष्टत्वादप्रतिषेधः । दृष्टमिदम् एकं ज्ञानं सामान्यविशिष्टवस्तुनः अवधारणात्मकं सत् विशेषानवधारणात्मकमिति । अनेन विपर्ययोऽपि व्याख्यातः । *सोऽपि हि सामान्यविशिष्टस्य वस्तुनोऽवधारणात्मकः सन् विशेषे विपर्ययः यथा स्थाणौ पुरुषः इति प्रत्यय इति । कथम् ? यदि संशयविपर्ययेतरस्वभावमेकं ज्ञानमिष्यते; तर्हि सामान्यविशेषात्मकं तथैव सर्वं स्यात्, अन्यथा अयमिति स्थाणुरिति पुरुष इति च प्रत्ययाः परस्परपरिहारस्थितितनव इति न संशयादिव्यवस्था । § 242

व्याख्याता एकेनार्थेन कारिका, द्वितीयेनेदानीं व्याख्यायते--**सविकल्पनिर्विकल्पयोः** चेतःस्वभावयोः इति मन्यते । कस्य ? **चित्तस्य** इत्यनुवर्तते । तयोः **कथञ्चिदेकत्वे** अङ्गीक्रियमाणे । तत्र दूषणमाह--**सुखदुःखयोरपि तथैव**

२ यो] ये
६ *] पर्वतशिखरे आदित्यः समुदेति इत्यादौ ।
१८ यः] तत्र संशयस्तावद्वस्तुस्वरूपानवधारणात्मकः प्रत्ययः । अनवधारणात्मकश्च प्रत्ययश्चेति व्याहन्यते; न व्याघातः स्वरूपावधारणात् । स्वरूपमस्य अवधार्यते अस्ति मे संशयज्ञानमिति वस्तुस्वरूपं तु नानेन परिच्छिद्यते ।— न्यायवा॰ पृ॰ १२ । अयं हि सामान्यविशिष्टधर्म्युपलम्भेन धर्मविशेषानुपलम्भविरुद्धोभयविशेषस्मरणसहकारिणा जन्यमान इति सामान्यविशिष्टं धर्मिणमवधारयन् स्थाणुर्वा पुरुषो वेति विशेषमनवधारयन् अनवधारणात्मकः प्रत्ययश्च स्यात् । दृष्टं हि यत्र विलक्षणसामग्री तत्र कार्यमपि विलक्षणमेव यथा प्रत्यभिज्ञानम् ।--प्रश॰ कन्द॰ पृ॰ १७६ ।
२१ *] विपर्ययोऽपि ।
२५ व] स्वतन्त्रस्वरूपाः ।

तेनैव प्रकारेण **कथं न भवेद्** भवेदेव कथञ्चिदेकत्वमिति । कुत एतत् ? **प्रतिभास** इत्यादि । चर्चितमेतत् । यदुक्तं ध र्मो त्त रा दि ना-- **कल्पनापोढमभ्रान्तं प्रत्यक्षम्** न्यायबि° १ । ४ इत्यत्र **लौकिकी भ्रान्तिः केशोण्डुकादिप्रतीतिरूपा, *कल्पना च जात्यादिविशिष्टग्रहणात्मिका** । तदनेन चर्चितम्, **कस्यचित् चित्तस्य** इति वचनात् । स हि कस्यचित् चित्तस्य भवति न पूर्वस्य, अन्यथा कल्पनारहितस्य भ्रान्तस्य वा संभवात् लक्षणमसंभवि स्यात् प्रत्यक्षस्य । यच्चोक्तं तेनैव-- **शास्त्रीया च सकलालम्ब-** /ms **नप्रतीतिः सर्वमालम्बने भ्रान्तम् इति राद्धान्तात् ग्राह्यग्राहकाकारप्रतीतंसर्वं ज्ञानं कल्पना** इति च । कथमिदमवगम्यते अविशेषेण अभिधानात् ? **सा हि सर्वविज्ञानसाधारणी, तस्या ग्रहणे न किञ्चिद्विज्ञानं कल्पनापोढमभ्रान्तं वा लभ्येत** इत्यभिधानात् । तन्निराकुर्वन्नाह--**तदयम्** इत्यादि । **तद्** इत्ययं निपातः सः इत्यस्यार्थे वर्तते । ततोऽयमर्थः— सोऽयं ध र्मो त्त रा दिः **एकान्तं** क्षणिकनिरंशपरमाणुतत्त्वमात्रम् **अवलम्ब्य** । किम् ? इत्यत्राह— **बहिः** इत्यादि । **बहिश्च अन्तश्च मुखं निर्भासो यस्य विभ्रमेतर-** 65/mkj **विकल्पेतरचेतःस्वभावस्य** स तथोक्तः । एतदुक्तं भवति--बहिर्मुखो विभ्रमः चेतः **सर्वमालम्बने भ्रान्तम्** प्र° वार्तिकाल° ३ । १९६ इति वचनात्, **अन्तर्मुख** इतरोऽविभ्रमः **चेतःस्वभावः**, तथा बहिर्मुखो **विकल्पः** तत्स्वभावः

---

४ भ्रान्तिः ] केशोण्ड्रकादिविज्ञाननिवृत्त्यर्थमिदं कृतम् ।— तत्त्वसं° श्लो° १३१२ । तैमिरिकाणामिव केशोण्डुकाद्याभासं विनाप्यर्थसत्त्वादिति ।--मध्यान्तवि° पृ° १५ । केशोण्डुकं यथा मिथ्या गृह्यन्ते तैमिरैर्जनैः ।--लङ्कावतार° पृ° २७४ । केशोण्डुका नाम पक्षिणः ये केशमूलान्युत्पाटयन्ति ।--शिक्षासमु° पृ° ७० । यथा चिरकालीनाध्ययनादिखिन्नस्य अस्थितस्य नीललोहितादिगुणविशिष्टः केशोण्ड्रकाख्यः कश्चिन्नयनाग्रे परिस्फुटति । अथवा करसंमृदितलोचनरश्मिषु येयं केशपिण्डावस्था स केशोण्ड्रकः ।--शास्त्रदी° युक्ति° पृ° ९१ ।

४ *] अथ कल्पना च कीदृशी चेदाह--नामजात्यादियोजना । यदृच्छाशब्देषु नाम्ना विशिष्टोऽर्थ उच्यते डित्थ इति । जातिशब्देन जात्या गौरयमिति । गुणशब्देन गुणेन शुक्ल इति । क्रियाशब्देषु क्रियया पाचक इति । द्रव्यशब्देषु द्रव्येण दण्डी विषाणी इति ।--प्रमाणसमु° टी° पृ° १२ । न्यायप्र° वृ° पृ° ३५ । जात्यादिसंसृष्टं तु मनोज्ञानं कल्पना इत्यन्ये कथयन्ति ।--न्यायबि° टी° टि° पृ° २१ । पूर्वापरमनुसन्धाय शब्दसंयुक्ताकारा प्रतीतिरन्तर्जल्पाकारा वा कल्पना ।--तर्कभा° मो° पृ° ७ ।

६ वा ] चा

८ राद्धान्ता ] सर्वमालम्बने भ्रमः ।... परमार्थतस्तु सकलमालम्बने भ्रान्तमेव--प्र° वार्तिकाल° पृ° २८० । उद्धृतोऽयम्--सन्मति° टी° पृ° ५१२ । न्यायवि° वि° प्र° पृ° ३२०, ४६७ ।

९ इति ] योगाचारमतेन च तथागतज्ञानमद्वयं मुक्त्वा सर्वं ज्ञानं ग्राह्यग्राहकत्वेन विकल्पितं कल्पना ।--न्यायबि° टी° टि° पृ° २१ । तस्मादनादितथाभूतानुमानपरम्पराप्रवृत्तमनुमानमाश्रित्य बहिरर्थकल्पनायां ग्राह्यग्राहकसंवेदनकल्पनाप्रवृत्तेः ग्राह्यादिकल्पना, परमार्थतः संवेदनमेवाविभागमिति स्थितम् ।--प्र° वार्तिकाल° पृ° ३९८ ।

१० सा ] कल्पना ।

**ग्राह्य** प्र॰ वा॰ ३ । ५३० इत्याद्यभिधानात् अन्तर्मुख **इतरो**ऽविकल्पः **सर्वचित्त** न्यायवि॰ १ । १० इत्याद्युक्तेः । तं कथम्भूतम् ? इत्यत्राह-- **अनेकान्तनान्तरीयकं प्रतिपद्यमानः तद्** दुष्यते अनेकान्त**द्वेषी तत्कारी च** अनेकान्तकारी च **इति** हेतोः **उपेक्षाम्** अवज्ञाम् **अर्हति** । § 243

ननु नाऽसौ तद्वेषी तत्कारी च, सर्वदा बुद्धेः एकस्याः चित्रायाः अभिन्नयोगक्षेमत्वेनोपगमात्, एकान्तस्य तु बहिः । तदुक्तं ध र्म की र्ति ना-- § 244

*नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक् ।
अशक्यदर्शनस्तं हि पतत्यर्थे विवेचयन् ॥§ 246

यद्यथा भासते ज्ञानं तत्तथैवानुभूयते ।
इति नामैकभावः स्यात् चित्राकारस्य चेतसि ॥ प्र॰ वा॰ २ । २२०-२१§ 248

प्र ज्ञा क र गु प्ते ना प्युक्तम्-- *(?")**चित्रकाराप्येकैव बुद्धिः बाह्यचित्रविलक्षणत्वात् । शक्यविवेचनं हि बाह्यं चित्रम्, अशक्यविवेचनास्तु बुद्धेः नीलादय आकाराः** प्र॰ वार्तिकाल॰ ३ । २२० इति चेत्; अत्राह--**अन्तर्बहिर्मुखाभादि** इत्यादि । § 249 /ms

...11 अन्तर्बहिर्मुखाभादि नाक्रमं संवेदिनम् ।
भिनत्ति चेत्क्रमाधीनं भिन्द्यादेव सुखादिकम् ॥ ११ ॥§ 251

बहिरन्तर्मुखविभ्रमेतरविकल्पाविकल्पप्रमाणेतरत्वादि परस्पर[विभिन्नं] संविदं न भिनत्ति चेत् अवयविनं कथमाक्षिपेत् [हर्षादयो वा कथमात्मानं] यतो नैरात्म्यसिद्धिः ? एकत्राभिन्नविषयेऽपि अभिलापसंसर्गयोग्यायोग्यप्रतिभासयोः संप्लवप्रवर्तनं कथन्नेच्छेत् ? वस्तुनः स्वभावभेदस्य वस्त्वभेदकत्वात् । § 252

---

१ इ] रूपादेश्चेतसश्चैवमविशुद्धधियं प्रति । ग्राह्यलक्षणचिन्तेयमचिन्त्या योगिनां गतिः ॥— प्र॰ वा॰ ३ । ५३० । अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥--प्र॰ वा॰ ३ । ३५४ ।

२ चित्त] सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षम्--न्यायबि॰ १ । १० ।

३ ते] द्विषतीति

५ बुद्धेः] बुद्धेः

६ योग] अलब्धधर्मानुवृत्तिर्योगः, लब्धधर्मानुवृत्तिः क्षेमः ।--प्र॰ वा॰ स्व॰ टी॰ १ । २४ । प्रतिक्षणं विषयपरिच्छेदलक्षणो योगः तदर्थक्रियानुष्ठानलक्षणश्च क्षेमः परिपालनरूपः ।--हेतुबि॰ टी॰ पृ॰ ३७ ।

**अन्तर्बहिश्च मुखं** यस्या सा भा ग्राह्यग्राहकप्रतिभास **आदिर्यस्य** प्रमाणेतरत्वादेः तत् तथोक्तं तत् कर्तृ, **संविदं न भिनत्ति,** तत्सद्भावेऽपि एकैव संविदिति यावत् । **चेद्** यदि । कथंभूतम् ? **अक्रमम्** संविदा सह उत्पत्तिविनाशानुभवाऽननुभववत् । अनेन अभिन्नयोगक्षेमत्वं दर्शितम् । अत्र दूषणं तदयमुपेक्षामर्हति । इदमत्र तात्पर्यम्--यदि अन्तर्बहिर्मुखाभादि अक्रमत्वात् संविदं न भिनत्ति तर्हि एकक्षणभाव्यशेषज्ञानजातमपि न भिनत्ति 66/mkj इति एकज्ञानमशेषम् एकदा जगत्, पुनरपि तथा पुनरपि तथैवेति एकसन्तानमात्रमपि, इति **परस्मै परार्थानुमानम्** न्यायबि॰ ३ । १ इत्ययुक्तम्; परस्य अभावात् । § 253

एतेन नानाविज्ञानसन्तानवादी योगाचारोऽपि चिन्तितो द्रष्टव्य इति । § 254

स्यान्मतम्--नाक्रमत्वाद् अन्तर्बहिर्मुखाभादिना संविद् ऐक्यमनुभवति येनायं दोषः स्यात्, अपि तु कथञ्चित्तादात्म्येनावभासनादिति; अत्रोत्तरमाह--**न क्रमाधीनं भिन्द्यादेव सुखादिकं** क्रमायत्तं सुखम् आदिर्यस्य दुःखादेः तत् तथोक्तम्, तन्न भिन्द्यादेव संविदम्, क्रमभाविसुखाद्यात्मिका एका संवित् /ms स्यात् तथाभासादिति मन्यते । तथा च परस्य क्षणप्रत्यभिज्ञा भङ्गसाधन[मन]वसरम् । § 255

कारिकां विवृण्वन्नाह--**बहिरि**त्यादि । **बहिश्च अन्तश्च मुखं** येषां तानि च तानि **विभ्रमेतरविकल्पाविकल्पप्रमाणेतरत्वानि** च तथोक्तानि **आदिर्यस्य** ग्राह्यादिनीलाद्याकारनिकुरुम्बस्य तत्तथोक्तम् । कथंभूतं तत् ? इत्याह--**परस्पर** इत्यादि । तत् किं कुर्यात् ? इत्याह--**संविदं** बुद्धिं **न भिनत्ति चेद्** यदि । एतदुक्तं भवति--**बहिर्मुखो विभ्रमः सर्वमालम्बने भ्रान्तम्** प्र॰ वार्तिकाल॰ ३ । १९६ इति वचनात्, **अन्तर्मुख इतरोऽविभ्रमः सर्वचित्त** न्यायबि॰ १ । १० इत्याद्युक्तेः । एतेन **विकल्पाऽविकल्पौ** व्याख्यातौ । **प्रमाणेतरत्वे** पुनः बहिर्मुखे शब्दक्षणिकत्वाद्यपेक्षया चन्द्रद्वित्वाद्यपेक्षया च, अन्तर्मुखे च सच्चेतनस्वर्गप्रापणादिसामर्थ्यापेक्षया । तदेतद् विभ्रमादिकं ग्राह्यादिकं च एकसंविदात्मकमिति । ननु च विभ्रमेतरावेव प्रमाणेतरत्वे तत्किमर्थम् इत्यदोषः [?] । अत्रोत्तरम्--**हर्षे**त्यादि सुगमम् । अत्र अयम[भिप्रायः ?]भिनत्ति [?] इति; तदनेन निरस्तम्; एकात्महर्षादौ साम्यात् । भवत्वेवम्; तथापि को दोष इति चेत् ? न कश्चित्, केवलम् **यद् यथावभासते तत्तथैव परमार्थसद्व्यवहारावतारि यथा नीलं नीलतया अवभासमानं तथैव**

---

६ पि] परस्परं संविदं न भिनत्ति ।
७ पु] पुनः द्वितीयादिक्षणभाविज्ञानजातमपि परस्परं संविदं न भिनत्ति इति एकसन्तानमात्रमापतितमिति भावः ।
९ स्य] प्रतिपाद्यभूतस्य सन्तानान्तरस्य ।
२५ या] प्रमाणत्वम् ।
२५ या] अप्रमाणत्वम् ।
२६ स] सत्त्वचेतनत्वाद्यपेक्षया प्रमाणत्वम्, स्वर्गप्रापणशक्त्याद्यपेक्षया अप्रमाणत्वम् इति ग्राह्यम् ।

**तद्व्यवहारावतारि, प्रतिभासन्ते च क्षणिकतया सर्वे भावाः** इत्यत्र पक्षस्य प्रत्यक्षबाधनं हेतोश्च आश्रयासिद्धिः, **यतो नैरात्म्यसिद्धिः** नैव नैरात्म्यसिद्धिः अपि तु सात्मसिद्धिरिति । § 256

अनेन **सात्मकं जीवच्छरीरं प्राणादिमत्त्वात्** न्यायबि० ३ । ९७ /ms इत्यत्र यदुक्तं परेण--**प्राणादिसत्त्वस्य क्वचित् सात्मके दर्शनात् तदभावेऽपि भावाशङ्काऽनिवृत्तेः अनेकान्तिकत्वम्, विज्ञानसन्तान एव भावाद् विरुद्धत्वं च** इति; तन्निरस्तमिति दर्शयति । कथम् ? यदि उक्तन्यायेन तत्र दृष्टमपि न दृष्टम् अन्यत्र दृष्टं वोच्यते; तर्हि अग्निमति धूमवत्त्वं दृष्टम् तत्रादृष्टम् अन्यत्र दृष्टं वा कल्प्यताम् । § 257

67/mkj

यत्पुनरुक्तम्-- § 258

*यः पश्यत्यात्मानं तस्यात्मनि भवति सास्वतः ।
स्नेहात् सुखेषु तृष्यति तृष्णा दोषं तिरस्कुरुते ॥ प्र० वा० १ । २१९ इत्यादि ;§ 260

तदप्यनेन निरस्तम्; यदि हि क्रमाऽक्रमानेकान्तचित्तात्मनि दृष्टे अवश्यं स्नेहादिः संसारस्य; न कदाचित् सौगतस्य मुक्तिः सर्वदा तस्यैव दर्शनात् । ननु अक्रमेणेव क्रमेणापि चित्तमेकं चित्रमस्तु न बाह्यमिति चेत्; अत्राह--**अवयविनम्** इत्यादि । **कथमाक्षिपेत्** निराकुर्यात् । ननु चैकत्र अवयवे गुणे वा प्रवृत्तमिन्द्रियं नाऽवयवान्तरं गुणान्तरं वेक्षितुं क्षमते, कथमतः तत्साधारणरूपस्य ग्रहणम्, न च तदात्मकम् अन्यथा वा तदुपलभ्यते इति चेत्; अत्राह--**एकत्र** इत्यादि । **एकत्र अभिन्ने विषयेऽपि** ग्राह्येऽपि न केवलं चित्ते विषयिणि **संप्लवप्रवर्तनं कथं नेच्छेत् ?** इच्छेदेव सौगतादिः । कयोः ? इत्याह--**अभिलापसंसर्गयोग्यम्** अनेकविशेषसाधारणं सामान्यं **तदयोग्यो** विशेषः तयोः **प्रतिभासौ** तयोः, इति चित्तवद् विषयेऽपि सामान्यविशेषप्रतिभासादित्यभिप्रायः । तथा लौकिकी प्रतीतिः यमहं पश्यामि तमेव /ms स्पृशामि, यमहमद्राक्षं तमेव स्पृशामि इति च । § 261

---

१ इ] द्रष्टव्यम्— पृ० २ टि० १० ।
५ इ] नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गात्--न्यायवा० पृ० १२३ ।
५ स्य] मत्त्वस्य
७ इति] साध्येतरयोरतो निश्चयाभावात् ॥ १०८ ॥...नच सात्मकानात्मकाभ्यां परः प्रकारः संभवति । ततः प्राणादिमत्त्वाद् धर्मिणि जीवच्छरीरे संशय आत्मभावाभावयोरित्यनैकान्तिकः प्राणादिरिति ।--न्यायवि० टी० पृ० २२२ ।
७ त] सात्मके ।
७ पि] प्राणादिमत्त्वम् ।
८ त्र] विज्ञानसन्ताने ।
८ म्] अग्निमति ।
११ तः] शाश्वतः स्नेहः
१३ नि] कथञ्चित् नित्यानित्यात्मकचित्तसन्तानरूपे आत्मनि ।
१४ स्य] कारणं स्यात्तदा ।
१४ स्यैव] चित्तात्मन एव ।
१४ नात्] सर्वज्ञत्वात् सुगतस्य ।
१५ अ] युगपदिव ।
१८ स्य] नानावयवात्मनोऽनेकगुणात्मकस्य च अवयविनः ।
२३ मेव] पदार्थम् ।

अथवा, **अभिलापसंसर्गयोग्यायोग्ययोः प्रतिभासयोः** इति व्याख्येयम् । तदुक्तं न्या य वि नि श्च ये-- § 262

*आत्मनाऽनेकरूपेण न्यायवि॰ १ । ९ इत्यादि ।§ 263

एवं तर्हि अभिलापसंसर्गयोग्यस्वभावाक्रान्तम् अन्यत् तद्विपरीतस्वभावाक्रान्तश्च अन्यद्वस्तु स्याद् अन्यथा क्वचिदपि तद्भेदो न स्यादिति चेत्; अत्राह--**वस्तुन** इत्यादि । अत्रैवं मन्यते--द्वौ भेदौ वस्तुनः स्वभावभूतौ यथा ज्ञानस्य विभ्रमेतरत्वादिः, अन्यश्च यथा ज्ञानान्तरस्य, स एव तत्र **वस्तुनः स्वभावः** स्वरूपयो **भेदः** तस्य **वस्तुनः अभेदकत्वात्** कथमाक्षिपेत् इति ? तन्न सौत्रान्तिकमते **किं स्यात्** प्र॰ वा॰ २ । २१० इत्यादि युक्तम् । § 264

यत्पुनरेतद् योगाचारस्य मतम्-- § 265

*अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ प्र॰ वा॰ २ । ३५४
इति ;§ 267

तत्रापि तन्न युक्तमिति दर्शयन्नाह--**भागीव** इत्यादि । § 268

...12 भागीव भाति चेत्किन्नासत्क्रमः क्रमवानिव ।
लक्ष्यतेऽभागबुद्ध्यात्मा बहिरन्तर्मुखादिभिः ॥ १२
॥§ 270

68/mkj

अत्र स्वयम् अविभागोऽपि बुद्ध्यात्मा भागीव भाति इत्येकं दर्शनम्, तदनन्तरभाविनी विकल्पिका बुद्धिः तमन्यथाप्रतिभासमपि सभागमिव व्यवस्यति इत्यपरम् । तत्र प्रथमं दर्शयित्वा तावद् दूषयति--**न** विद्यते **भागो** यस्य स चासौ **बुद्ध्यात्मा** च बुद्धिरेव । स किम् ? इत्याह— **भाति** । क इव ? **भागीव** । कैः ? इत्याह--**बहिरन्तर्मुखादिभिः** आदिशब्देन
/ms संवित्तिपरिग्रहः । तदुक्तं परेण **ग्राह्यग्राहकसंवित्तिभेदवान्** प्र॰ वा॰ २

---

३ इत्यादि] ...बहिरर्थस्य तादृशः । विचित्रं ग्रहणं व्यक्तं विशेषणविशेष्यभाक् ॥ इति शेषः ।
४ त्] भिन्नम् ।
५ स्याद्] विरुद्धधर्माध्यासेऽपि भेदाभावे ।
५ द्भेदो] वस्तुभेदः ।
७ स्य] बाह्ये विभ्रमरूपस्यापि स्वरूपेऽविभ्रमात्मनः ।
८ रूप] पे
९ इ] किं स्यात् सा चित्रतैकस्यां न स्यात्तस्यां मतावपि । यदीदं स्वयमर्थेभ्यो रोचते तत्र के वयम् ॥--प्र॰ वा॰ २ । २१० ।

। ३५४ इति **चेद्** यदि; दूषणम्--**अक्रमः** सुखादिक्रमरहितः **अविभाग बुद्ध्यात्मा किन्न क्रमवान् इव** सुखादिक्रमवानिव **भाति** इति संबुद्धौ । ग्राह्यग्राहकसंवित्तिभेदवत् सुखादिभेदोऽपि न तात्त्विक इति तत्संवेदनस्य प्रत्यक्षत्वदर्शनवर्णनमनर्थकम् । ननु यद्यसौ क्रमवान् प्रतिभाति क इवार्थः ? न हि नीलं नीलतया प्रतिभासमानं नीलमिव युक्तम् । अथ तथा न प्रतिभाति, तथापि क इवार्थः ? न खलु नीलमपीततयाऽवभासमानं पीतमिव भवितुमर्हतीति चेत्; तर्हि यदि ग्राह्यग्राहकसंवित्तिभेदवत् प्रतिभाति क इवार्थः ? अन्यथापि क इवार्थ इति समानम् । § 271

किञ्च, यदि अविभागः प्रमाणतः स कदाचित् प्रतिपन्नः स्यात्; तदा अन्यदा सविभागदर्शनात् सविभाग इव इति युक्तो व्यवहारः, अजलस्य मरीचिकाचक्रस्य क्वदाचिद्दर्शनात् तत्र जलमिव इति व्यवहारवत् । न चैवमिति निरूपयिष्यते अनन्तरमेव **स्वयमद्वयस्य द्वयनिर्भासप्रतीतेः** इत्यनेन । तथा च निराकृतमेतत्-- § 272

*अविभागोऽपि प्र॰ वा॰ २ । ३५४ इत्यादि ।§ 273

*मन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः ।
अन्यथैवाऽवभासन्ते तद्रूपरहिता अपि ॥§ 275

तथैवाऽदर्शनात्तेषामनुपप्लुतचक्षुषाम् ।
दूरे यथा वा मरुषु महामाल्यादि दृश्यते ॥§ 277

यथादर्शनमेवेयं मानमेयफलस्थितिः । /ms
क्रियतेऽविद्यमानापि ग्राह्यग्राहकसंविदाम् ॥ प्र॰ वा॰ २ ।
३५५-५७ इति[च];§ 279

कथम् ? दृष्टान्तदार्ष्टान्तिकयोः असाम्यात् । न हि यथा अनुपप्लुतचक्षुषां मृच्छकलादिदर्शनमन्यथा तथा बुद्ध्यात्म दर्शनमिति । न च दृष्टान्तमात्राद-भिमतार्थः सिद्धिमुपगच्छति, अन्यथा सर्वं सर्वस्य सिध्येत् तदविशेषात् । एतेनैतदपि निरस्तम्-- § 280

१ अविभाग] अभाग
२ संबुद्धौ] सम्बन्धः
३ त] सुखादिसंवेदनस्य ।
४ सौ] अविभागबुद्ध्यात्मा ।
१० अ] जलरहितस्य ।
११ त] मरीचिकाचक्रे ।
१६ अ] सुवर्णादिरूपेण ।
१८ हामाल्यादि] महानल्पोऽपि
२२ था] सुवर्णादिरूपात् भिन्नतया मृच्छकलादित्वेनैव ।
२२ मिति] अविभागरूपेण न कदाचिदपि भवतीति भावः ।

*अन्यथैकस्य भावस्य नानारूपावभासिनः ।
सत्यं कथं स्युराकाराः तदेकत्वस्य हानितः ॥ प्र° वा° २ ।
३५८ इति ;§ 282

दृश्यमानस्य नानारूपावभासतः सत्यताविरहात्, परमार्थस्य च दर्शनविरहान्न 69/mkj किञ्चित् स्यात्, इति **यथादर्शनमेवेयं मानमेयफलस्थितिः** आहो यथातत्त्वम् इति कुतो निश्चयः ? § 283

स्यान्मतम्--न क्रमभाविसुखादिव्यतिरिक्तेभावाबुद्ध्यात्मा अनुभूयते, केवलं क्रमजन्मसुखादिवेदनात्, कथं स क्रमवानिव भाति इत्युच्यते ? अन्यथा खरविषाणं तथा भाति इति; ग्राह्याकारव्यतिरिक्तोऽपि नाऽनुभूयते नीलादिकमहं वेद्मि इति सर्वदा प्रतीतेः इति समानम् । तदाकारकल्पने सन्तानान्तरवत् प्रसङ्गः । यत्पुनरेतत्प्रसङ्गः । § 284

यत्पुनरेतत्--प्र ज्ञा क र गु प्त स्य प्र ति भा सा द्वै त सि द्धि प्र क र णे चोद्यम्— **यद्यसौ क्रमवानवभासमानोऽपि क्रमवानिव भातीत्युच्यते तर्हि असन् सन्निव अचेतनश्चेतन इव भातीति किन्नोच्यते ?** इति; तदपि प्रकृते भवति न वेति चिन्त्यम् । तन्न प्रथमं दर्शनम् । § 285

द्वितीयं दूषयति दर्शयित्वा--**भागीव भाति वुद्ध्यात्मा बहिरन्तर्मुखादिभिः** /ms **लक्ष्यते** निरंशदर्शनपृष्ठभाविविकल्पेन निश्चीयते **चेद्** यदि । अत्र दूषणम्--**अक्रमः किन्न क्रमवानिव लक्ष्यते** तेनैव विकल्पेनाव्यवसीयते इति ? न्यायस्य समानत्वात् सर्वस्य । § 286

किञ्च, विकल्पोऽपि तथा तं व्यवसन् ग्राह्यग्राहकसंवित्तिभेदवान् भवति न वेति चक्षुषी निमील्य उन्मील्य वा चिन्तय तावत् । यदि स कुतश्चित् तथा भवति; तद्यश्चि * एव बुद्ध्यात्मा तत एव तथा भवतु इति किं विकल्पकल्पनया ? तत्रापि पुनस्तथा कल्पने अनवस्था । न च परस्य विकल्पो नाम इत्युक्तम् । तन्न द्वितीयमपि दर्शनं श्रेयः । § 287

कारिकायाः सुगमत्वाद् व्याख्यानमकृत्वा यद्यप्यभागबुद्ध्यात्मा भागीव क्रमवानिव वा भाति लक्ष्यते वा तथापि सौगतस्य पुरुषाद्वैतवादिनो वा मतं सिध्येत् न जैनस्य । [न] हि तथाभासनात् स तथैव भवति, न

---

३ दृ] दर्शनविपयीभूतस्य संवेदनस्य ।
३ स] असत्यत्वात् ।
३ प] अद्वयस्य अविभागिनः ।
६ तिरिक्तेभावा] क्तोऽभाग
७ स] अविभागबुद्ध्यात्मा ।
८ इ] चेत् ।
९ त] ग्राह्याकारकल्पने ।
१० ङ्गः] ग्राह्याकारः ग्राहकाकारः संविदाकारश्च भिन्नसन्तानः स्यात् ।
१० य] यत्पुनरेतत्प्रसङ्गः इति द्विर्लिखितम् ।
१२ सौ] विकल्पः ।
१७ ल्पेनाव्य] नाध्य
१९ न्] स्यन्
२० स] विकल्पः ।
२१ त] ग्राह्यग्राहकादिभेदवान् ।
२१ *] तद्वत् स
२६ त] भागीव क्रमवानिव वा ।
२६ त] भागी क्रमवान् वा ।

खलु जलमिव मरीचिकाचक्रं जलमेव भवति इति चोद्यं मनसि निधाय दूषयन्नाह--**[तत्र] सद्भिः** इत्यादि । § 288

...13 तत्र सद्भिरसद्भिश्च एकत्वं कस्यचिद्यदि ।
तथैव किन्नानेकान्तः क्रमवद्भिरक्रमात्मनः ॥ १३
॥§ 290

इदमत्र तात्पर्यम्--**भागीव** इति वचनात् तत्र बुद्ध्यात्मनि भासमाना अपि ग्राह्यादयो भागा न परमार्थसन्तः, असन्तोऽपि न बुद्ध्यात्मनो भिन्ना एव । **वित्तेर्विषयनिर्भास** [सिद्धिवि॰] इत्यादि वक्ष्यमाणदोषात् । ततः ते ततः कथञ्चिदभिन्ना अभ्युपगन्तव्या इति । § 291

नन्वेवमपि **असद्भिः** इति वक्तव्यम् न्याय्यत्वात् किं **सद्भिः** इत्यनेन विपर्ययादिति चेत्; सत्यम्; तथापि **यद् यथावभासतेतत्तथैव परमार्थस-द्व्यवहारावतारि यथा नीलं नीलतयावभासमानं तथैव तद्व्यवहारावतारि, अवभासन्ते च क्षणिकतया सर्वे भावाः** इत्यभिधाय यदि ग्राह्यग्राहक-संवित्तिभागवत्तया भासमानोऽपि बुद्ध्यात्मा तथैव परमार्थसन्न भवेत्; तेनैव हेतोर्व्यभिचारः स्यात्, तस्मात् तथैवपरमार्थसन् इति प्र ज्ञा क र स्य प्रदर्शनार्थम् **सद्भिः** इति वचनं व्याख्यातम् [इति] तात्पर्यार्थः । § 292 /ms 70/mkj

शब्दार्थो व्याख्यायते--**सद्भिः** विद्यमानैः सच्चेतनादिवद् **असद्भिः** अविद्य-मानैः मरीचिकातोयादिवत् [चेति] समुच्चये । कैः ? इत्याह--**बहिरित्यादि** । **आदिशब्दः** संवित्तिग्रहणार्थः । तैः किम् ? इत्याह **यदि** इत्यादि । **कस्यचित्** इति सामान्यवचनं पूर्वस्य विकल्पस्य च बुद्ध्यात्मनः संग्रहार्थम्, **एकत्वं** सिध्येत् । अत्र दूषणम् **तथैव** इत्यादि । **[तथैव]** तेनैव प्रकारेण सुखदुःखादिभिः क्रमवद्भिः **सद्भिः असद्भिर्वा किन्न अक्रमात्मनः** सिद्धिः स्याद् एकत्वस्य इति मन्यते । ततः किं सिद्धम् ? इत्याह--**अनेकान्त** इत्यादि । उभयथापि सद्भिर्वा एकत्वप्रकारेण असद्भिरपि एकत्वे एकस्य विभ्रमेतरत्व-सिद्धिः नैरात्म्यसिद्धेरभावः । § 293

एवं परस्य अनिष्टसिद्धिं प्रदर्श्य अधुना अत्रैव पूर्वपक्षे इष्टाभावं कथ-यन्नाह--**प्रत्यक्षम्** इत्यादि । § 294

...14 प्रत्यक्षमविभागं चेच्चित्तं भागीव किं बहिः ।

---

१ क्रं] भासमानम् ।
१२ इ] द्रष्टव्यम्--पू॰ २ टि॰ १० ।
१३ तेनैव] बुद्ध्यात्मनैव ।
१४ थैव] ग्राह्यग्राहकादिभेदवत्त्वेन ।
२५ प] बौद्धस्य । प्रत्यक्षं कल्पनापोढम्--प्र॰ समु॰ श्लो॰

## नान्तस्तदेव प्रत्यक्षं कल्पनापोढमञ्जसा ॥ १४ ॥§ 296

कल्पनापोढस्याभ्रान्तस्यापि विकल्पभ्रान्तिसंभवे प्रत्यक्षतदाभासयोः किं कारणमाश्रित्य भेदं लक्षयेदिति प्रत्यक्षस्य लक्षणान्तरं शक्यं वक्तुम्, चन्द्रमेकं पश्यतोऽपि द्विचन्द्रभ्रान्तिः मानसी स्वयमविभागबुद्धौ कल्पनारचितग्राह्यग्राहकसंवित्तिभेदसंवेदनवत् । बहिरप्यनुमानादिनिर्णयज्ञानं सविकल्पकमिव कुतश्चित् प्रतिभाति । तन्न प्रत्यक्षपरोक्षविषयव्यवस्था, प्रमाणेतरव्यवस्थाऽभावे तत्त्वेतरव्यवस्थाऽयोगात् । § 297

**अविभागं भागीव** सिवानिव **भाति चेत्** यदि **चित्तं** ज्ञानम् । अत्र /ms दूषणमाह--**अन्तः** स्वरूपे **तदेव** चित्तं **प्रत्यक्षं कल्पनापोढं** कल्पनापोढत्वात् तदपि अभ्रान्तत्वात् यत् परेणोक्तं **न लक्ष्यते** इति पूर्वकारिकाक्रियापदेन सम्बन्धः । **अञ्जसा** परमार्थेन[न]केवलम् इच्छयैव लक्ष्यत इत्यर्थः । निरंशस्य सांशतया अवभासंते विभ्रमस्य सदाकारसाधारणतया च कल्पनायाः व कल्पनाया स्वभावादसिद्धो हेतुः इत्यभिप्रायः । § 298

ननु च प्रथमं दर्शनम् अविभागमेव आत्मानं पश्यति तदनन्तरभाविविकल्पस्तु तत्सभागमिव व्यवस्यति ततोऽयमदोष इति चेत्; अत्राह- 71/mkj -**किं बहिरि** [ति] **न** इत्येतदत्रापि सम्बन्ध नीयं मध्ये करणात् । ततोऽयमर्थः **बहिः** चन्द्रादौ चित्तं सर्वे **किन्न प्रत्यक्षं कल्पनापोढम्** अभ्रान्तं लक्ष्यते किन्तु लक्ष्यत एव । § 299

कारिकां विवृण्वन्नाह--**प्रत्यक्ष** इत्यादि । **प्रत्यक्षं** च **तदाभासं** च तयोः । **किम्** न किञ्चिद् वत **कारणं** निमित्तम् **आश्रित्य भेदं लक्षयेत्** ? आकस्मिकं लक्षयेद् इत्यर्थः । कदा ? इत्यत्राह--**कल्पना** इत्यादि । **कल्पनापोढस्य अभ्रान्तस्यापि चित्तम्** इत्यनुवर्तमानं जात तापरिणामम् इह सम्बध्यते चित्तस्य इति । **अपिशब्दः** पराभ्युपगमसूचकः । **विकल्पभ्रान्तिसंभवे** एकस्य सदसदाकारसाधारणस्य भावात् **विकल्पस्य** निरंशस्य सांशतया अवभासभावाद् **भ्रान्तेश्च संभवे** सति । एतदुक्तं भवति--प्रत्यक्ष- /ms त्वस्य कल्पनापोढाऽभ्रान्तत्वे व्यापके, ते च स्वविरुद्धकल्पना-भ्रान्तिव्याप्त सर्वज्ञानेभ्यो व्यावर्तमाने स्वव्याप्यं प्रत्यक्षत्वमादाय निवर्त्तेते इति न प्रत्यक्षं नाम, तदभावे न तदाभासं तदपेक्षत्वादस्य, **इति** तर्हि कल्पनापोढभ्रान्तत्वाऽभावेऽपि **प्रत्यक्षस्य लक्षणान्तर**स्मात् * **शक्यं वक्तुं** प्रतिपादयितुम् । किम् ? इत्याह--**चन्द्रम्** इत्यादि । **चन्द्र**ग्रहणम् **एक**ग्रहणं वा उपलक्षणं तेन संख करितुरगादिशुक्लतद्देशादिग्रहणं तं **पश्यतोऽपि** चक्षुर्ज्ञानेन

८ सिवानिव] भागवानिव
१० प] कल्पनापोढमभ्रान्तं
प्रत्यक्षम्--न्यायबि° १ । ४ ।
१२ भासंते] सने
१२ व] व कल्पनाया इति पुनरुक्तम् ।
१४ द] निर्विकल्पम् ।
१४ आ] स्वरूपम् ।
१७ र्वे] सर्वं
२० त] बाह्य
२२ ता] ता इति षष्ठी ।
२८ त] प्रत्यक्षाभावे ।
२८ त] प्रत्यक्षाभासम् ।
२८ नापोढ] ढाऽ
२९ *] न्तरमस्मात्
३१ संख] शङ्ख

साक्षात्कुर्वतोऽपि न केवलम् अपश्यतः । किम् ? इत्याह--**द्विचन्द्रभ्रान्तिः** इति । अत्रापि **द्विचन्द्र**ग्रहणम् उपलक्षणनिमिति स्वापादौ देशादिग्रहणं तस्य **भ्रान्तिः** अन्यथाग्रहणम्, सा च **मानसी** इति द्रष्टव्या । तं पश्यतोऽन्यस्याऽसंभवात् । कस्य इव ? इत्यत्राह--**स्वयम्** इत्यादि । **स्वयम्** आत्मनः **अविभागा** निरंशा या **बुद्धिः** तस्यां **कल्पनारचिता [ग्राह्य] ग्राहकसंवित्तिभेदाः** तेषां **संवेदनस्य** इव **तद्वत्** इति । एतदुक्तं भवति--यथा अविमागबुद्धिं पश्यतोऽपि ग्राह्यग्राहकसंवित्तिभेदसंवेदनं भ्रान्तिः मानसी तथा प्रकृताऽपि इति । तस्मात् **प्रत्यक्षे**त्यादि स्थितम् । पूर्वं प्रत्यक्षाभावात् तदाभासभेदं न लक्षयेत् इत्युक्तम्, इदानीं तदाभासाऽभावात् प्रत्यक्षमिदं न लक्षयेत् इत्युच्यते । ततो निराकृतमेतत्-- § 300

**त्रिविधं कल्पनाज्ञानम् आश्रयोपप्लवोद्भवम् ।
अविकल्पकमेकं च प्रत्यक्षाभं चतुर्विधम् ॥ प्र॰ वा॰ २ ।
२८८ इति ।§ 302

कथम् ? प्रत्यक्षाभस्य विकल्पस्य कस्यचिदभावात् । ननु द्विचन्द्रभ्रान्तिः मानसी चेत्; किमिदानीमिन्द्रियज्ञानम् ? यद् इन्द्रियस्य भावाऽभावाभ्यां भावाऽभाववत् तत्तस्येति चेत्; द्विचन्द्रादिज्ञानम् अत एव तस्य अस्तु । तस्य विकारे यद् विकारवत् तत्तस्येति चेत्; एतदपि अनेन नोत्सृष्टम् । तदुक्तम्-- § 303 /ms

72/mkj

**किञ्चेन्द्रियं य [द] क्षाणां भावाभावानुरोधि चेत् ।
तत्तुल्यं विक्रियावच्चेत् सा चेयं न किमिष्यते ॥ प्र॰ वा॰ २ ।
२९६§ 305

---

२ निमिति ] क्षणमिति
३ प ] इन्द्रियप्रत्यक्षेण विषयीकुर्वतः ।
४ तो ] इन्द्रियभ्रान्तेः ।
११ *] त्रिविधं कल्पनाज्ञानं प्रत्यक्षाभं मरीचिकायां जलाध्यवसायि भ्रान्तिज्ञानम् संवृत्तौ विसंवादिव्यवसायसांवृतज्ञानम् पूर्वदृष्टैकत्वकल्पनाप्रवृत्तं लिङ्गानुमेयादिज्ञानम् । अविकल्पकं चैकम् प्रत्यक्षाभम् । कीदृशम् ? आश्रयस्य इन्द्रियस्य उपप्लवः तिमिराद्युपघातः तस्माद् भवो यस्य तत्तथा । एवञ्च चतुर्विधञ्च प्रत्यक्षाभासम् ।--प्र॰ वा॰ मनो॰ ।
१३ न ] तुलना--यदि तावत् मानसमेतत् द्विचन्द्रादिज्ञानमिन्द्रियभावाभावानुरोधि न स्यात् ।--प्र॰ वार्तिकाल॰ पृ॰ ३३६ ।
१५ त ] इन्द्रियस्य ।
१८ *] किम्वैन्द्रियं-यदक्षाणां...सैवेयं किन्निषिध्यते ।...(?")तिमिरज्ञानं भ्रममनिच्छतोऽपि किं कीदृशमैन्द्रियज्ञानमिष्यते ? यदक्षाणां भावाभावयोरनुरोधि स्वभावाभावाभ्यामनुवर्तकं तदैन्द्रियमिति चेत्; तत इन्द्रियभावाभावानुरोधित्वं तैमिरिकज्ञानस्यापि तुल्यम् । न हि इन्द्रियव्यापारमन्तरेण तैमिरिकज्ञानमुत्पद्यते । इन्द्रियविकारेण विक्रियावज्ज्ञानमैन्द्रियं चेत्; द्विचन्द्रादिज्ञानानां तिमिरादीन्द्रियविकारेण विक्रिया । सैवेयम् अभूतार्थोपदर्शनात्मिका भ्रान्तत्वनिमित्तमुक्ताऽस्माभिः किं निषिध्यते ?--प्र॰ वा॰ मनो॰

किञ्च, द्विचन्द्रादिभ्रान्तिर्मानसी चेत्; तर्हि सर्पादिभ्रान्तिवत् इन्द्रिय विकृतावपि निवर्तेत, अक्षविप्लवे निवृत्तेऽपि वा न निवर्तेत । एतदप्युक्तम्--
§ 306

*सर्पादिभ्रान्तिवच्चास्याः स्यादक्षविकृतावपि ।
निवृत्तिर्न निवर्तेत निवृत्तेऽप्यक्षविप्लवे ॥ प्र० वा० २ । २९७ § 308

अपि च, सर्पादिभ्रान्तिवद् एतस्याः शब्दैः तद्वाचकैः अन्यसन्ताने समर्पणं पूर्वदृष्टद्विचन्द्रादिस्मरणापेक्षणम् अपरिस्फुटप्रतिभासनञ्च स्यात् । तथा चोक्तम्-- § 309

*कदाचिदन्यसन्ताने तथैवार्प्येत वाचकैः ।
दृष्टस्मृतिमपेक्षेत न भासेत परिस्फुटम् ॥ प्र० वा० २ । २९८ § 311

इति चेत्; तन्न; अस्य प्रकृतेऽपि समानत्वात् । तथाहि--ग्राह्यग्राहकसंवित्तिभेदसंवेदनं भ्रान्तिश्चेत् मानसी; किम् इदानीमिन्द्रियज्ञानम् ? इन्द्रियभावा[भावा]नुरोधि चेत्; तत्तुल्यमितरत्रापि । एवं शेषमपि वक्तव्यम् । तथापि इयं मानसी; तथा द्विचन्द्रादिभ्रान्तिरपि स्यादिति मन्यते । § 312

एतेन एतदपि निरस्तं यदुक्तं परेण--**निरालम्बनाः सर्वे प्रत्ययाः प्रत्ययत्वात् स्वप्नप्रत्ययवत्** प्र० वार्तिकाल० ३ । ३३१ इति; कथम् ? वादिनं
/ms प्रति दृष्टान्तस्य साध्यविकलत्वात् । अथ प्रतिवादिनं प्रति न तस्य तद्विकलतेत्यदोषः; तर्हि प्रतिवादिनोऽनुसरणे न अविभागबुद्ध्यात्मसंवेदनसिद्धिः ।
§ 313

एवम् **अविकल्पकमेकं च प्रत्यक्षम्** प्र० वा० २ । २८८ इत्येतत् निराकृत्य **त्रिविधं कल्पनाज्ञानं प्रत्यक्षाभम्** प्र० वा० २ । २८८ इत्येतत् निराकुर्वन्नाह--**बहिः** इत्यादि । अन्तः परेण अनुमानादेः अविकल्पकत्वमिष्यते इति **बहिर्ग्रहणम्**, तत्रापि कल्पनापोढम् । किं तत् ? इत्याह--**अनुमानादिनिर्णयज्ञानम्** इति । आदिशब्देन भ्रान्तिसंवृति सज्ज्ञानादिपरिग्र-

---

१ स] यथा रज्जौ सर्पादिभ्रान्तिः मानसी इन्द्रियविकारे सत्यपि मानसविमर्शात् निवर्तते ।
६ स्याः] द्विचन्द्रादिभ्रान्तेः ।
७ अ] इन्द्रियस्य अकारणत्वात् स्पष्टप्रतिभासो न स्यात् ।
१४ इ] ग्राह्यग्राहकसंवित्तिभेदसंवेदनरूपा भ्रान्तिः ।
१६ इ] अत एव सर्वे प्रत्यया अनालम्बनाः प्रत्ययत्वात् स्वप्नप्रत्ययवदिति प्रमाणस्य परिशुद्धिः— प्र० वार्तिकाल० पृ० ३५९ ।
२० म्] क्षाभं
२२ अ] स्वरूपे ।
२२ प] बौद्धेन ।
२३ त] बहिरपि ।
२४ स] सज्

हः । प्रत्यक्षवत् यदि अनुमानादि अविकल्पकम्; *तद्गृहीतेऽपि समारोपः स्यादिति तन्निरासार्थं निर्णयज्ञानं **सविकल्पकमिव** मानसविकल्प इव **कुतश्चिद्** विकल्पवशात् **प्रतिभाति** इति निराकृतमेतत्--**भ्रान्ति[ः] संवृतिसं** 73/mkj **ज्ञानम्** प्र° समु° १ । ८ इत्यादि । तथाव्यवहाराभावः अन्यत्रापि समानः । § 314

***द्विविधो हि अर्थः प्रत्यक्षः परोक्षश्च, तत्र यो ज्ञानप्रतिभासं स्वान्वयव्यतिरेकावनुकारयति स प्रत्यक्षोऽर्थः अन्यः परोक्षः** इत्येतदिदानीं दूषयन्नाह--**तन्न** इत्यादि । **तत्** तस्मात् उक्तन्यायात् **न प्रत्यक्षव्यवस्था** कल्पनापोढस्याऽभ्रान्तस्य विकल्पभ्रान्तिसंभवे न प्रत्यक्षार्थो लक्षणाभावादिति मन्यते । नापि **परोक्षविषयव्यवस्था** तैमिरिकं प्रति परोक्षत्वेन अभिमतस्य एकचन्द्रादेः आनुमानिकं च प्रति पावकादेः स्वप्रत्यक्षत्वादिति भावः । ततो निराकृतमेतत्--**प्रमाणं द्विविधं मेयद्वैविध्यात्** प्र° वा° २ । १ इति; हेतोरसिद्धत्वात् । अत्रैव धर्मिणोऽसिद्धिं दर्शयन्नाह--**प्रमाणेत्यादि** । **प्र-** /ms **माणमविसंवादि ज्ञानम् इतरद्** अप्रमाणम् तयो**र्व्यवस्थाने** , एतदपि कुतः ? इत्यत्राह--**तत्त्वेतर** इत्यादि । **तत्त्वं** परमार्थाद्वयं ज्ञानम् **इतरः** अपरमार्थो द्विचन्द्रादिः **तयोर्व्यवस्थाऽयोगात्** उक्तन्यायेन तन्नि [षेधात्] । § 315

[तन्न] योगाचारमतेऽपि **किं स्यात्** प्र° वा° २ । २१० इत्यादि युक्तम् । केवलं **मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽप्यदोषः** प्र° वार्तिकाल° ३ । २११ इत्येतत् **तदेतन्नूनमायातम्** प्र° वा° २ । २०९ इत्यादि च माध्यमिकस्य दर्शनमवशिष्यते, तत्रापि तन्न युक्तमिति दर्शयन्नाह--**आत्मसंवेदनम्** इत्यादि । § 316

...15 आत्मसंवेदनं भ्रान्तेरभ्रान्तं भाति भेदिवत् ।
प्रत्यक्षं तैमिरं चान्द्रं किन्नानेकान्तविद्विषाम् ॥ १५ ॥§ 318

---

१ *] अनुमानगृहीतेऽपि ।
३ संवृतिसं] सज्
४ इ] भ्रान्तिः
संवृतिसज्ज्ञानमनुमानानुमानिकम् । स्मरणं चाभिलाषश्चेत्यक्षाभासं सतैमिरम् ॥ ८ ॥ मरीचिकादिषु जलादिकल्पनाद् भ्रमज्ञानं प्रत्यक्षाभासम् । संवृतिसत्यं हि स्वस्मिन् अर्थान्तरमारोप्य तत्स्वरूपकल्पनात् प्रत्यक्षाभासम् । अनुमानं तत्फलं च पूर्वानुभवकल्पनात् न प्रत्यक्षम् ।--प्र° समु° वृ° १ । ८ ।
६ *] न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य संभवः ।--प्र° वा° ३ । ६३ । यस्यार्थस्य सन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासभेदः तत् स्वलक्षणम् । अन्यत् सामान्यलक्षणम् ।--न्यायबि° १ । १३, १७ ।
१३ त्वात्] सामान्यविशेषात्मन एकस्यैव प्रमेयत्वात् ।
१४ म्] प्रमाणमविसंवादिज्ञानम् ।--प्र° वा° २ । १ ।
१४ स्थाने] स्थाऽभावे
१९ इ] इदं वस्तुबलायातं यद्वदन्ति विपश्चितः । यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा ॥--प्र° वा° ।

न हि भ्रान्तेः स्वसंवेदनं भ्रान्तं युक्तम्, तदप्रत्यक्षत्वे विषयवत्स्वभावासिद्धिप्रसङ्गात् । नापि तत् सर्वथा अभ्रान्तमेव स्वयमद्वयस्यापि द्वयनिर्भासप्रतीतेः । यदि पुनः इदं प्रत्यक्षमेव तिमिराभ्युपहतचक्षुषां किन्न स्यात् ? तद्...। § 319

**भ्रान्तेः** अन्तर्बहिर्विभ्रमस्य **यदात्मनः** स्वरूपस्य **संवेदनं** ग्रहणं तदभावे अर्थवत् तदसिद्धेरिति मन्यते । तत् **अभ्रान्तम्** अवितथम्, काक्वा व्याख्येयमेतत् । यदीति वा अध्याहार्यम्, अन्यथा भ्रान्तेरसिद्धिः । अत्र दूषणमाह--**भाति भेदिवत् । भाति** चकास्ति तत्संवेदनं **भेदी** चित्रपतङ्गादिः तेन समानं **तद्वत्** । एतदुक्तं भवति--यथा चित्रपतङ्गादिः एकानेकरूपतया भाति तथा तत्संवेदनमपि विभ्रमेतरैकानेकरूपतया इति । केषां तदित्थम् ? इत्यत्राह--**अनेकान्तविद्विषाम्** विभ्रमैकान्तवादिनाम् । अत्रैव दोषान्तरमाह--**प्रत्यक्षम्** इत्यादि । चन्द्रस्य इदं चन्द्रविषयं **चान्द्रम्** । किं सर्वम् ? न, **तैमिरं** 74/mkj तिमिरग्रहणं भ्रान्ति कारणोपलक्षणम्, तस्माद् आगतम् द्विचन्द्रादिज्ञानमिति यावत् । तत् किम् ? इत्याह--**प्रत्यक्षं भेदिवत् भाति** च कथञ्चित् /ms प्रत्यक्षमित्यर्थः । केषाम् ? **अनेकान्तविद्विषाम्** एव । तथा च यदुक्तं तैरेव--**यद्वभासते न तत् सत् यथा द्विचन्द्रादि, अवभासते च ज्ञानघटादि** इति; तन्निरस्तम्; सर्वथा विभ्रमस्य दृष्टान्तेऽपि न सिद्धिरिति भावः । § 320

***एकानेकत्वाद्यशेषविकल्पशून्यं स्वसंवेदनमात्रनिष्ठं तत्त्वम्** इत्यपरः माध्यमिकः । तं प्रति आह--**आत्मसंवेदनम्** इत्यादि । **भ्रान्तेर्नीलादिबुद्धे** स्मार्थ **निरालम्बनाः स्वरूपालम्बनाः प्रत्ययाः** प्र० वार्तिकाल० पृ० ३६५ इत्यभिधानात् **आत्मसंवेदनं** स्वरूपग्रहणम् **अभ्रान्तम्** विभ्रमाकारशून्यम् अन्यथा सकलविकल्पशून्यताऽसिद्धेरिति मन्यते । अत्र दूषणम् **भ्रान्ति** तदात्मसंवेदनं प्रतिभासते **भेदिना** चित्रपतङ्गादिना समानमिति । एतदुक्तं भवति--सर्वविकल्पातीतत्वेन निरंशस्य ग्राह्याकारैः सांशस्य इव भासनात् कथं तदभ्रान्तम् यतः प्रकृतमर्थतत्त्वं सिध्येत् ? तथापि प्रत्यक्षत्वे दूषणमाह— **प्रत्यक्षं** तदात्मसंवेदनम् **तैमिरं चान्द्रं** द्विचन्द्रादिविषयं ज्ञानम् **किन्न** प्रत्यक्षम् अपि तु प्रत्यक्षमेव । केषाम् ? इत्यत्राह--**स्याद्वादविद्विषां** सर्वविकल्पातीतैकान्तवादिनाम् । तथा च **यद् विशददर्शनावभासि न तत् परमार्थसत् यथा द्विचन्द्रादि, तदवभासि च जाग्रत्स्तम्भादि** । इत्यत्र वादिनो दृष्टान्ते साध्यहीनता इत्यभिप्रायः । § 321

---

६ काक्वा] काकु इति प्रश्नपद्धतौ ।
१३ का] आशुभ्रमणनौयानसंक्षोभादिकारणानामुपलक्षणम्
।
१७ स्य] द्विचन्द्रादौ ॥
१८ *] भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः । यस्मादेकमनेकं च रूपं तेषां न विद्यते ॥--प्र० वा० ३ । ४६० ।
२० स्मार्थ] रयमर्थः
२१ इ] ततो निरालम्बनाः सर्व एव प्रत्ययाः स्वप्नप्रत्ययवदिति कोऽर्थः ? स्वरूपालम्बनाः ।पृ० ३६५निरालम्बनशब्दस्य स्वांशालम्बाभिधेयता ।--प्र० वार्तिकाल० पृ० ३७२ ।
२२ भ्रान्ति] भाति
२७ विद्विषां] अनेकान्तविद्विषाम्
२९ वा] माध्यमिकस्य ।

कारिकां विवृण्वन्नाह--**नहि** इत्यादि । **भ्रान्तेः** बहिरन्तर्विभ्रमैकान्तस्य **स्वस्य** स्वरूपस्य **संवेदनं** ग्रहणं **नहि भ्रान्तम्** शक्यं **युक्त**मुपपन्नम् किन्तु अभ्रान्तमेव युक्तम् इति अनेकान्तसिद्धिः । अस्यानभ्युपगमे दूषणमाह--**तद्** /ms इत्यादि । **तस्य** भ्रान्तिस्वसंवेदनस्य **अप्रत्यक्षत्वे** भ्रान्तत्वे इत्यर्थः **विषयवत्** घटादिवत् **स्वभावासिद्धिप्रसङ्गात्** भ्रान्तिस्वरूपासिद्धिप्रसङ्गात् । तदुक्तं न्या य वि नि श्च ये-- § 322

*विभ्रमे विभ्रमे तेषां विभ्रमोऽपि न सिध्यति न्यायवि° १ ।
५४ इति ।§ 323

द्वितीयमर्थं कथयन्नाह--**नापि** इत्यादि । पक्षान्तरसूचकः **आपिशब्दः** **सर्वथा** सर्वात्मना तत् भ्रान्तेः आत्मसंवेदनम् **अभ्रान्तमेव** । **नापि** न केवलं सर्वथा **न भ्रान्तमेव** । कुत एतत् ? इत्यत्राह--**स्वयम्** इत्यादि । **स्वयम्** आत्मना सौगतोपगमाद् **अद्वयस्यापि तकं** *वेदनस्यापि सर्वविकल्पातीतस्य **द्वयनिर्भासप्रतीतेः** संवेदनग्राह्याकारैः एकानेकाकारप्रतीतेः । ननु च यदि नीलादिशरीरसुखादि ग्राह्यम् न ततोऽपरं [ग्राहकं] ग्रहणं वा प्रतीयते । अथ तद् ग्राहकम्; नापरं ग्राह्यं ग्रहणं वा इति तद्युक्तं **स्वयम्** इत्यादि 75/mkj इति चेत्; तन्न अहं नीलादिकं वेद्मि इति प्रतीतेरपलापे सर्वापलापप्रसङ्गात् । § 324

एतेन एतदपि निरस्तं तदुक्तं परेण--**यन्निमित्तमस्ति अयं ग्राह्याकारः अयं ग्राहकाकारः अयं संवेदनाकार इति व्यवस्था, तस्य चेद् भेदः तर्हि तेषामपि भेद एव इति नैकं *तदात्मकं युक्तम्, अन्यथा न तद्व्यवस्था** । इति; कथम् ? एवं प्रतिभागं विचारणे सर्वस्य परमाणुगमने न सन्तानान्तरसिद्धिः सकलशून्यतामात्रम् अत्राणं वा । अत एव एकानेकरूप- /ms विकल्पशून्यप्रतिभासमात्रमपि न युक्तम् । ततः प्रतिभासमात्रमभ्युपगच्छता नीलमहं वेद्मि इत्येकं ज्ञानमभ्युपगन्तव्यमिति सूक्तम्--**स्वयम्** इत्यादि । तथापि तदभ्रान्तमभ्युपगच्छतो दूषणमाह--**यदि पुनः** इत्यादि । **इदम्** अद्वयं द्वयनिर्भासवत् संवेदनं **यदि पुनः प्रत्यक्षमेव** संविदपि नाप्रत्यक्षम् इति एवकारार्थः । **तिमिराभ्युपहतचक्षुषां किन्न स्यात् ?** स्यादेव संवेदनं प्रत्यक्षमेव चन्द्रादिविषयम् । कुत एतत् ? इत्यत्राह--**तद्** इत्यादि । सुगमम् । पूर्वव्याख्यानेऽपि एतदेव योज्यम् । अयं तु विशेषः तत्र कथञ्चिद् इति

---

९ मेव] स्वरूपे सर्वमभ्रान्तं पररूपे विपर्ययः ।--प्र° वार्तिकाल° पृ° ३७२ ।
११ *] स्वसं
१३ त] नीलादिसुखादितः । तुलना— तस्मान्न नीलादिव्यतिरेकेण बोधो बुद्धिरिति निरूप्यते । नीलान्न व्यतिरेकेण विषयिज्ञानमीक्षते । ज्ञानपृष्ठेन भेदस्तु कल्पनाशिल्पिनिर्मितः ॥--प्र° वार्तिकाल° पृ° ४०६ । नहि सितासितादिव्यतिरेकेण ग्राहकादिता प्रतिभासमानोपलभ्यते ।--प्र° वार्तिकाल° पृ° ३७२ ।
१९ *] ग्राह्याद्यात्मकम् ।

। तन्न माध्यमिकदर्शनेऽपि **किं स्यात्** प्र° वा° २ । २१० इत्याद्युपपन्नम् । § 325

उक्तमर्थमुपसंहृत्य दर्शयन्नाह--**स्वार्थस्वलक्षणम्** इत्यादि । § 326

...16 स्वार्थस्वलक्षणं ज्ञानं लक्षयेत् परिणामि च ।
अन्तर्बहिश्च तत्क्वेदं प्रत्यक्षं कृतलक्षणम् ॥ १६ ॥ § 328

अन्तः स्वलक्षणस्य परमार्थतो द्वयनिर्भासप्रतीतेः बहिरेकस्य स्थवीयसः प्रतिभासनात् । तदेकं स्थवीयांसं परिणामिनमाकारं सकललोकसाक्षिकमभ्रान्तं सन्दर्शयन्ती बुद्धिः अनेकान्तसिद्धिः स्वयमेकान्तं निराकरोतीति किन्नश्चिन्तया ? § 329

**स्व**स्वलक्षण**मर्थ**स्वलक्षणं च **स्वं** स्वग्रहणयोग्यं वा **अर्थस्वलक्षणं** कर्मतापन्नं **ज्ञानं** कर्तृ **परिणामि च** उक्तन्यायेन **लक्षयेत्** निश्चिनुयात् पराभ्यु[पगत]परिणामं च इत्युक्तम् । **क्व** ? इत्यत्राह--**अन्तर्बहिश्च** इति । **अन्तः** स्वस्वलक्षणम् **बहिः** अर्थस्वलक्षणम् । ततः किं जातम् ? इत्यत्राह--**तत् क्वेदम्** इत्यादि । यत एवं **तत्** तस्मात् **क्व** [क्व]चित् बहिरन्तर्वा **इदं** सौगतेन उच्यमानम् किम् ? **प्रत्यक्षम्** । कथंभूतम् ? **कृतलक्षणं कल्पनापोढमभ्रान्तम्** न्यायबि° १ । ४ इति कृतं लक्षणं यस्य तत् तथोक्तम्, क्वचिदपि इति । यदि वा, **प्रत्यक्षं** दर्शनग्राह्यं वस्तु **कृतलक्षणं** निश्चितस्वरूपं **क्व** इति व्याख्येयम् । § 330

/ms कारिकां विवृण्वन्नाह--**अन्तः** इत्यादि । **अन्तःस्वलक्षणस्य** ज्ञानस्वलक्षणस्य **द्वयनिर्भासप्रतीतेः** एकानेकाकारप्रतीतेः । किम् ? **परमार्थतो** न विपर्यासात् अन्यथाभूतस्य अन्यथाग्रहणात् । **बहिः एकस्य** इत्यनेन **सञ्चितालम्बनाः पञ्च विज्ञानकायाः** इति परस्य मतं न युक्तमिति दर्शयति । 76/mkj **स्थवीयसः** इत्यनेन निरंशपरमाणुमात्रं तत्त्वम् इति निराचष्टे **प्रतिभासनात्** इत्यतः तस्य विकल्पविषयत्वम् । ततः किम् ? इत्यत्राह--**तदेकम्** इत्यादि । **तस्य** अन्तर्बहिःस्वलक्षणस्य **एकम्** अनेकरूपसाधारणं **स्थवीयांसम्** अत एव **परिणामिनम्** विवक्षितेतरपर्यायवन्तम् **आकारं** लक्षणं **सकललोकसाक्षिकम्** अभ्रान्तं **सन्दर्शयन्ती बुद्धिः अनेकान्तसिद्धिः** [अनेकान्ता सिद्धिः] निर्णीतिः यस्या सा तथोक्ता स्वयं वा तस्य सिद्धिः । सा किं करोति ? इत्यत्राह--**स्वयम्** इत्यादि । **स्वयम्** आत्मनैव न परेण **एकान्तं निराक-**

---

१ इ] ...सा चित्रतैकस्यां न स्यात्तस्यां मतावपि । यदीदं स्वयमर्थेभ्यो रोचते तत्र के वयम् ।--प्र° वा° । १० ।
२२ स्य] बौद्धस्य । द्रष्टव्यम्--पृ° २५ टि°
२३ ष्टे] निराकरोति ।
२४ म्] निराचष्टे इति सम्बन्धः ।

**रोति,** अनेकान्तसिद्धेः एकान्तनिषेधात्मकत्वादिति मन्यते । **इति** हेतोः **किं** नः अस्माकम् **चिन्तया** एकान्तनिषेधार्थपरीक्षयेति ? § 331

ननु कथमेकान्तं सा निराकरोति एकान्तविषयानुमानेन बाधितत्वादिति चेत् ? अत्राह— **ज्ञानम्** इत्यादि । § 332

...17 ज्ञानं स्वार्थबलोद्भूतं स्वलक्षणविलक्षणम् ।
सामान्यलक्षणं सिद्धिरनेकान्तात्तथेक्षणात् ॥ १७
॥§ 334

यथा अन्तर्बहिर्वा परपरिकल्पितलक्षणं स्वलक्षणं प्रत्यक्षलक्षणं न पुष्णाति तथैव सामान्यम् । क्वचित्...द्रव्य... ...। § 335

**ज्ञानं स्व**ग्राह्यस्य **अर्थस्य** न लिङ्गादेः **बलेन उद्भूतम्** उत्पन्नम् अध्यक्षम् इति यावत् । यथा **स्वलक्षणविलक्षणं** निरंशक्षणिकपरमाणुग्रहणपराङ्मुखं तथा **सामान्यलक्षणं** सामान्यं लक्ष्यते यस्य येन वा तत्तथोक्तं ज्ञानम् /ms अनुमानम् इति यावत् **स्वलक्षणविलक्षणम्** इति सम्बन्धः । तथा च कुतः तेन तद्बुद्धेर्वा इति भावः । यथातथाशब्दावन्तरेणापि प्रतिवस्तूपमालङ्काराश्रयाणादयमर्थो लभ्यते । कुतस्तर्हि तत्त्वसिद्धिः ? इत्यत्राह--**सिद्धिः** तत्त्वस्य आत्मलाभः निर्णीतिर्वा **अनेकान्ताद्** अनेकान्तमाश्रित्य तेन हेतुना वा । कुतः ? **तथेक्षणात्** अनेकान्तप्रकारेण सर्वस्य दर्शनादिति । § 336

कारिकां विवृण्वन्नाह--**यथा** इत्यादि । **यथा** येन प्रकारेण **अन्तर्बहिर्वा स्वलक्षणं** कर्मतापन्नं **प्रत्यक्षलक्षणम्** अध्यक्षप्रमाणं कर्तृ **न पुष्णाति** न गृह्णाति । कथंभूतं तत् ? इत्याह--**परपरिकल्पितं** सौगतकल्पितं **तथैव सामान्यं** *विषयिणि विषयशब्दोपचारात् अनुमानं तत् **पुष्णाति** इति । **परपरिकल्पितम्** इत्येतदत्रापि योज्यम् । कुत एतत् ? इत्यत्राह--**द्रव्य** इत्यादि सुगमम् । तत्त्वं न पुष्णातीति । § 337

अथवा, अन्यथा कारिकेयमवतार्यते--यदि सौगतकल्पितमविकल्पकं दर्शनं न क्वचिदस्ति तर्हि इदमस्तु-- § 338

*अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥ मी॰ श्लो॰ प्रत्यक्ष॰ श्लो॰ ११२§ 340

77/mkj

---

३ सा] बुद्धिः अनेकान्तसिद्धिः
२० *] सामान्यविषयके अनुमाने ।
२० विष] सामान्य ।
२० त्] तन्न
२४ स्तु] मीमांसकाभिमतम् ।

इति चेत्; अत्राह--**ज्ञानम्** इत्यादि । अत्रापि प्रतिवस्तूपमालङ्काराश्रयणात् यथा **ज्ञानं स्वार्थस्य** निरंशक्षणिकपरमाणुरूपस्य **बलेन उद्भूतम्** अविकल्पं दर्शनम् **स्वलक्षणविलक्षणं** स्वग्राह्यपराङ्मुखं तथा **सामान्यलक्षणं** /ms सामान्यविषयं **स्वलक्षणविलक्षणं** स्वविषयग्रहणपराङ्मुखम् । उभयत्र लक्ष्यत इति लक्षणम् इति व्युत्पत्तेरयमर्थः । कुत एतत् ? इत्याह--**सिद्धिः** निर्णीतिः स्वलक्षणस्य सामान्यस्य **अनेकान्ताद्** अनेकान्तमाश्रित्य **तथेक्षणात्** तथा वा दर्शनात् । § 341

**यथा** इत्यादिना कारिकार्थमाह--**यथा अन्तर्बहिर्वा स्वलक्षणं परपरिकल्पितं** सौगतकल्पितं न प्रमाणसिद्धं कर्तृ **प्रत्यक्षलक्षणं कल्पनापोढमभ्रान्तम्** न्यायबि॰ १ । ४ इत्यध्यक्षस्वरूपं कर्मतापन्नं **न पुष्णाति** तत्र स्वरूपासमर्पकत्वात्, तथैव परपरिकल्पितं **सामान्यं** तन्न पुष्णाति इति । कुत एतत् ? इत्यत्राह--**क्वचित्** इत्यादि । एतदपि कुतः ? इत्यत्राह--**द्रव्य** इत्यादि । § 342

इतश्च सामान्यलक्षणमनुमानादि परस्य स्वलक्षणविलक्षणमिति दर्शयन्नाह--**अङ्गीकृता** इत्यादि । § 343

...18 अङ्गीकृतात्मसंवित्तेरविकल्पोपवर्णनम् ।
अनुमाद्यात्माऽविकल्पेनार्थस्याविकल्पनात् ॥ १८ ॥§ 345

स्वानुभवमन्तरेण बुद्धेर्न स्वार्थानुभवः । यथा ज्ञानसत्तामात्रेण अर्थानुभवे न सर्वस्य सर्वदर्शित्वं संभवति तथैव अनिश्चितस्वानुभवसत्तामात्रेणापि अर्थनिश्चये तन्निश्चय इति सर्वस्य सर्वनिश्चय इति यः स्वभावो निश्चयेन न निश्चीयते स कथं तद्विषयः स्यात् बहिरर्थवत् यतः प्रत्यक्षमविकल्पकं भवेत् ? परतः संवेदने वा अनवस्थादेः । § 346

**अङ्गीकृता** नैयायिकादिनिरासेन अभ्युपगता सौगतेन **आत्मसंवित्तिः** सर्वचित्तचैत्तानां स्वरूपगृहीतिः तस्या **अविकल्पोपवर्णनं** निर्विकल्पत्वादि, **अनुमानादिः** तस्यात्मा स्वरूपं तस्य **अविकल्पो** निर्विकल्पकत्वं तेन **अर्थस्य** क्षणक्षयादेः **अविकल्पनाद्** अनिश्चयात् अविषयीकरणात् । **तत्र यः स्वभावो निश्चयैर्न निश्चीयते स कथं तेषां विषयः स्यात्** । इत्यभिधानात् इति कथं तैः अनेकान्तसिद्धेः बुद्धेः बाधनमिति भावः । § 347

कारिकां विवृण्वन्नाह--**स्वानुभव** इत्यादि । **स्वानुभवं** स्वरूपग्रहण**मन्तरेण** /ms **बुद्धे द्वनिस्या *र्थस्य** घटादेः **अनुभवो** ग्रहणं **यथा** येन **ज्ञानसत्तामात्रेण**

७ वा ] तथैव
२४ नं ] सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षम् ।--न्यायबि॰ १ । १० ।
२५ अनुमानादिः ] मादिः
३० * ] र्न स्वा

**अर्थानुभवे** सन्तानान्तरज्ञानसत्तामात्रापेक्षयादि तदनुभवे **सर्वस्य सर्वदर्शित्व-म्** **इति** प्रकारेण **न संभवति तथैव** तेनैव **अनिश्चितस्वानुभवसत्तामात्रेण अर्थनिश्चये** सन्तानान्तरज्ञानतन्मात्रेणापि **तन्निश्चय इति सर्वस्य सर्वनिश्चय इति** प्रकारेण स्वनिश्चयमन्तरेण स्वार्थनिश्चयो न तुसंभवति इति सम्बन्धः । तथा च अनुमानम्--यत्र यस्य यदनिश्चितस्वरूपं ज्ञानं तत्र तस्य तदपेक्षया न परमार्थतो निश्चितव्यवहारः यथा घटादौ देवदत्तस्य यज्ञदत्तज्ञानापेक्षया न तथा तद्व्यवहारः, अनिश्चितस्वरूपं च सौगतस्य सर्वत्र सर्वविकल्पज्ञानमिति । अथ स्वविकल्पस्य विषयीकरणम् अन्यस्य विप- 78/mkj
र्ययः ततोऽयमदोष इति चेत्; अत्राह--**यः स्वभावः** इत्यादि । **यः स्वभावो** यत्स्वरूपं **निश्चयैर्न निश्चीयते स** स्वभावः **कथं** नैव **तेषां** निश्चयानां **विषयः स्याद्** भवेत् । अत्र दृष्टान्तमाह— **बहिरर्थ** इव **तद्वत्** इति । तथा च प्रयोगः--न स्वरूपं निश्चयानां विषयः तैः तदनिश्चयात् बहिरर्थवत् । अस्य तद्विषयत्वे स्वलक्षणगोचरत्वं तेषामनिष्टं[स्यात्] । स्यान्मतम्--स्वरूपस्य दर्शनं बहिरर्थस्य ततो विशेष इति; न; अनिश्चितस्य क्षणिकत्ववद् दर्शनमिति कुतः ? सिद्धं फलं दर्शयन्नाह— **यत** इत्यादि । **यतः** तस्य तद्विषयत्वात् **प्रत्यक्षमविकल्पं** सर्वचित्तचैत्तानाम् आत्मसंवेदनं **भवेत्** । /ms
**यत** इति वा आक्षेपे, नैव भवेत् । अथ निश्चयानां स्वभावः निश्चयान्तरैर्निश्चीयत इत्यदोषः; तत्राप्याह--**परतः** इत्यादि । **परतः** अनुभवान्तरात् निश्चयान्तराच्च **संवेदने** निश्चये **वा** निश्चयानाम् **अनवस्थादेः** आदिशब्देन अविशेष्यविशेषणस्याविशेषः सौगतवैशेषिकयोरिति । ततो यथा वैशेषिकस्य अनुभवाभावेन प्रत्यक्षादेरभावात् **प्रत्यक्षानुमानागमबाधितकर्मनिर्देशानन्तर-प्रयुक्तो हेतुः कालात्ययापदिष्टः** इत्ययुक्तम्, तथा सौगतस्य **अनिराकृतः** न्यायबि॰ ३ । ४० इत्यपि, कस्यचित् निराकरणाभावादिति भावः । § 348

ननु सौगतस्य अन्यस्य वा एकान्तवादिनो [न] क्वचित् प्रत्यक्षं कृतलक्षणम्, तद्वा स्वलक्षणं सामान्यलक्षणं वा न पुष्णाति । कथम्भूतं तर्हि तत् कीदृशं वा स्वलक्षणं सामान्यलक्षणं वा पुष्णाति इति चेत् ? अत्राह--**प्र-त्यक्षम्** इत्यादि । § 349

...19 प्रत्यक्षं विशदं ज्ञानं प्रसन्नाक्षेतरादिषु ।

१ स] आत्मान्तर ।
१ यादि] यापि
३ त] अर्थनिश्चयः ।
१२ तैः] निश्चयैः ।
१३ अ] निश्चयस्य ।
१३ त] स्वरूपविषयत्वे ।
२२ दिष्टः] प्रत्यक्षागमविरुद्धः कालात्ययायदिष्टः--न्यायकलि॰ पृ॰ १५ । न्यायकुमु॰ पृ॰ ३२० टि॰ ७ ।
२३ पि] न युक्तम् । स्वरूपेणैव स्वयमिष्टोऽनिराकृतः पक्षः--न्यायबि॰ ।
२५ त] प्रत्यक्षं वा ।
२५ त्] प्रत्यक्षम् ।

**यथा यत्राविसंवादस्तथा तत्र प्रमाणता ॥ १९ ॥**§ 351

प्रत्यनीकधर्मसाधारणसंवित्त्वप्रमितेः असाकल्यसंभवे विषयस्वलक्षणेऽपि किन्न भवेत् इति किमाश्रित्य तत्राप्रमाणत्वम् ? प्रसन्नाक्षबुद्धेः सर्वथा संवादिनियमायोगात् किन्न प्रमाणमपि । दृष्टे प्रमाणान्तरावृत्तेः । उपप्लुताक्षाणामपि विनैव लिङ्गलिङ्गिसम्बन्धप्रतिपत्त्या अर्थं परिच्छिद्य प्रवृत्तावविसंवाददर्शनात् । तावता च प्रामाण्यसिद्धेः । § 352

अत्रायमर्थः--यदा केनचित् चक्षुरादिसामग्र्यनुपचरितं प्रत्यक्षं प्रमाणमिष्यते तदा तत्र प्रसङ्गसाधनसामर्थ्यात् ज्ञानत्वमापाद्यते, तथाविधप्रत्यक्षप्रमाणस्य ज्ञानत्वेन व्याप्तेः । किमर्थमिति चेत् ? तदनभ्युपगच्छतः प्रसङ्गविपर्ययात्, तज्ज्ञानं प्रत्यक्षं प्रमाणं यथा स्यादिति । यदा तु केनचिद् अविशदं व्याप्त्यादिज्ञानं प्रत्यक्षमिष्यते तदा ज्ञानं विशदं प्रत्यक्षमिति साध्यते वक्ष्यमाणप्रमाणान्तरसद्भावाऽन्यथानुपपत्तेः । **ज्ञानम्** इति एकवचनं जात्य-
/ms पेक्षया सर्वविशद ज्ञानपरिग्रहार्थम् । कुत एतत् ? इत्यत्राह--**प्रसन्नाक्षेतरादिषु** प्रसन्नाक्षाः पुरुषा इतरे अप्रसन्नाक्षाः, आदिशब्देन आसन्न-आस-
79/mkj न्नतरादिपुरुषपरिग्रहः, तेन यथा येन प्रकारेण यत्र विषये विशदं तथा तेन प्रकारेण तत्र विषये प्रत्यक्षम् इति सम्बन्धः, इतरत्र तदेव पमाक्षमित्यभिप्रायः । न केवलं प्रत्यक्षम् अपि तु **यथा** येन प्रकारेण **यत्र** प्रसन्नाक्षेतरादिषु ज्ञानेषु मध्ये यस्मिन् ज्ञाने **अविसंवादो** वर्णनं **तथा** तेन प्रकारेण **तत्र** ज्ञाने **प्रमाणता** । अनेन एतत् कथयति--सर्वं संसारिज्ञानं स्वगोचरे विशदमविशदं प्रमाणमन्यथा च इत्यनेकान्तः, तथा तत्साध्यमपि तदेव पुष्णाति इति । अथ कोऽयमविसंवादो नाम ? स्वार्थव्यवसायः **नातः परोऽविसंवादः** इति वचनादिति चेत्; स्वप्नादौ प्रसङ्गात् । तत्रापि हि स्वार्थव्यवसायलक्षणस्य अविसंवादस्य भावात् विज्ञानं प्रमाणमिति प्रमाणेतरप्रविभागविलोपः । § 353

स्यान्मतम्--न तत्र स्वार्थौ; बाध्यमानत्वात्, अतो न तद्व्यवसायलक्षणोऽविसंवाद इति । ननु किमिदं बाध्यमानत्वम् ? तद् यदि प्रतिभासकाले ज्ञानान्तरेण बाधकेन स्वरूपापहारः असत्त्वज्ञापनं वा; तर्हि अश्रद्धेयम् ।

---

१ ता] तुलना--यद्यथैवाविसंवादि प्रमाणं तत्तथा मतम् ।--लघी॰ श्लो॰ २२ । उद्धृतमिदम्--त॰ श्लो॰ पृ॰ १७० । अष्टस॰ पृ॰ १६३ । सन्मति॰ टी॰ पृ॰ ५९५ ।

८ था] अनुपचरित ।

१६ मा] परो

१८ नं] अवञ्चनम्

२२ त] स्वप्नादावपि ।

२५ त] स्वप्नादौ ।

२५ स्वा] वस्तुतः स्वार्थौ ।

२५ त] स्वार्थव्यवसाय ।

२६ न] तुलना— कोऽयं बाधो नाम--परेण विषयाभावज्ञापनं स यदीष्यते । स्वार्थे प्रवृत्तिमज्ञानमभावं ज्ञापयेत् कथम् ॥ न तावज्ज्ञानान्तरेणाभावः स्वप्नज्ञानस्यान्यस्य वा केनचित् क्रियते तत्काले तस्य स्वयमेव नाशात् । नाक्षिनिमीलनान्नष्टे ज्ञाने बाध्यता प्रतीयते । अन्येन न हि ज्ञानेन तस्य विषयापहारोऽसत्ताज्ञापनलक्षणो बाधः... विजातीयविद्युत्पत्तिर्यदि बाधकमुच्यते । घटज्ञाने पटज्ञानं बाधकं किन्न युक्तिमत्...तस्माद् यथा जाग्रत्प्रत्ययः स्वप्नप्रत्ययस्य बाधकः तथा विपर्ययोऽपि केवलग्रहणादिति न्याय एषः ।--प्र॰ वार्तिकाल॰ पृ॰ ४--७ ।

नहि ज्ञानस्य इतरस्य वा स्वरूपमपहर्तुं शक्यम्, प्रतिभासमानस्य अप्रतिभासप्रसङ्गात् । नापि असत्त्वज्ञापनम्; जाग्रत्स्तम्भादौ प्रसङ्गात् । यदि पुनस्तत्र मिथ्या वितर्कितमेतत् इति प्रत्ययाऽभावान्नायं दोष इति मतिः, सापि न युक्ता असत्येऽपि कदाचिद्भावात् सत्येऽप्यभावात् । प्रत्ययस्यापि /ms सदर्थत्वे समानो दोषः; अनवस्था च । अथ कालान्तरे; तदा असतः सर्वथा कोऽपहारः अन्यद्वा । तन्न स्वार्थव्यवसायोऽविसंवादः । उपलब्धस्य पुनःपुनरुपलब्धिः फलेन वाऽभिसम्बन्धः स इति चेत्; न; तस्य क्षणिकत्वान्नाशेन *तदसंभवात्, स्वप्ने भावाच्च । ततो न क्वचिद् अविसंवाद इति ।

§ 354

अत्र प्रतिविधीयते--एवं हि सर्वप्रतिभासाऽविशेषे प्रमाणेतरप्रविभागाऽभावाद् अर्थवत् कुतः स्वसंवेदनमात्रसिद्धिः, यतः प्रतिभासाद्वैतमन्यद्वा स्यात् ? प्रतिभासात्सिद्धौ; बहिरर्थसिद्धिः । *अत एव अत्र स्वप्नेऽपि तत्सिद्धेर्हि विभ्रमेतरवियोगः, *अपरत्र बहिरर्थसिद्धेः असौगतं जगत् स्यात् । प्रतिभासविशेषः अन्यत्रापि न वार्यते । ननु बुद्धेः स्वसंवेदनमस्तु प्रतिभासनात् नान्तर्बहिरर्थो विपर्ययात् घटादीनामपि स्वसंवेदनात्मकत्वादिति चेत्; तर्हि **यद्ग्राह्यतया ज्ञानवपुषि प्रतिभाति तदसत् तैमिरिककेशादिवत्, तत्र प्रतिभाति च तथा जाग्रद्धटादिकम्** इत्यत्र वादिनोऽसिद्धो हेतुः । प्रतिवादिनः सिद्ध इति चेत्; न; प्रमाणतः तत्सिद्धौ द्वयोरपि सिद्धः, प्रमाणस्य क्वचित् 80/mkj पक्षपातेतरयोः अयोगात् । अभ्युपगमात् तत्सिद्धौ न ततः कस्यचित् साध्यसिद्धिः अतिप्रसङ्गात्, इतरथा सौगतप्रसिद्धेन उत्पादविनाशात्मत्वेन घटवत् सुखादौ अचेतनत्वं साधयन् सांख्यः ध र्म की र्ति ना किमिति प्रतिक्षिप्तः ? प्रसङ्गसाधनत्वाददोषः, तथाहि— जाग्रद्धटादीनां ग्राह्यत्वेन अवभास- /ms नं चेदङ्गीक्रियते बहिरर्थवादिना, तर्हि तेषां तैमिरिकोपलब्धकेशादिवदस-

---

३ स्त] जाग्रत्स्तम्भादौ ।
७ स] अविसंवादः ।
७ स्य] प्रथमज्ञानस्य ।
८ *] पुनः पुनरुपलम्भस्य फलेन वाभिसम्बन्धस्याभावात् ।
१० तिभासाऽविशेषे] व्यवहारमात्रमेवेदं स्वप्नास्वप्नभेदो नाम तथा प्रमाणाप्रमाणभेद इति हि वक्ष्यते ।--प्र॰ वार्तिकाल॰ पृ॰ ५ ।
१२ तिभासात्सिद्धौ] स्वसंवेदनमात्रसिद्धौ ।
१२ *] प्रतिभासमात्रादेव ।
१३ वियोगः] विभ्रमेतरविभागाभावः ।
१३ *] जाग्रदवस्थायाम् ।
१६ त] ज्ञाने ।
१७ प्र] जैनादिकस्य ।
१८ प्र] तुलना--यदि प्रमाणतः सिद्धं नानात्मसिद्धं नाम, परस्येव आत्मनोऽपि वादिनः सिद्धत्वात्, प्रमाणसिद्धस्य सर्वेपामविप्रतिपत्तिविषयत्वात्...यत् प्रमाणमन्तरेण सिद्धं तत् परस्यापि न सिद्धम् ।--अष्टश॰, अष्टस॰ पृ॰ ३६--३७ ।
१९ अ] परस्य अभ्युपगमात् ।
१९ त] हेतुसिद्धौ ।
२१ न्] सुखादयोऽचेतनाः उत्पत्तिमत्त्वात् घटादिवत् इत्यादिना ।
२१ तिक्षिप्तः] कश्चिद् बहिःस्थितानेव सुखादीनप्रचेतनान् । ग्राह्यानाह न तस्यापि सकृद्युक्तो द्वयग्रहः ॥--प्र॰ वा॰ २ । २६८ इत्यादिना । अचेतनाः सुखादयः इति साध्ये उत्पत्तिमत्त्वमनित्यत्वं वा सांख्यस्य स्वयं वादिनोऽसिद्धम् ।--न्यायबि॰ ३ । ६० । प्र॰ वार्तिकाल॰ पृ॰ ४७० ।
२३ तेषां] घटादीनाम् ।

त्वमभ्युपगन्तव्यम्, इतरथा न कस्यचिदित्येकान्त इति चेत्; न; अस्य प्रसङ्गसाधनलक्षणाऽभावात् । यत्र हि व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयकः प्रदर्श्यते तत् प्रसङ्गसाधनम् । न चैतदत्रास्ति । स्वसंवेदनैकान्ते वादिप्रतिवादिनोः स्वप्नादावपि स्तम्भादीनां ग्राह्यत्वेन प्रतिभासाऽसिद्धेः कस्याऽसत्त्वेन व्याप्तिः यदभ्युपगम इतराभ्युपगमनान्तरीयकः प्रदर्श्येत ? परस्य सिद्धं सर्वमेतदिति चेत्; उक्तमत्र प्रमाणतस्तत्सिद्धौ उभयोः सिद्धम्, इतरथा परस्यापि न सिद्धम् इति । यदा च कश्चिद् गुडं विषं मारणात्मकं वा अभ्युपगम्य पुनर्मोहात् शर्करादिकमपि विषम् इत्यवगच्छति, स किं विदुषैवं वक्तव्यः--यदि *तत् विषम् इत्यभ्युपगच्छति तर्हि तन्न खाद येन म्रियसे, उक्तो भक्षयित्वा किं म्रियते वा ? ततः सिद्धं हेतुमभ्युपगच्छता अभ्युपगन्तव्य एव बहिरर्थप्रतिभासः इत्ययुक्तं विपर्ययादिति । § 355

अपि च, घटादीनां कुतः स्वसंवेदनात्मकत्वम् ? **यदवभासते तज्ज्ञानं यथा सुखादि, अवभासन्ते च घटादयः, जडस्य प्रतिभासाऽयोगात्** इत्यनुमानादिति चेत्; उच्यते--जडस्य प्रतिभासाऽयोगः तत्र प्रतिभासाभावः । तत्र यद्ययं जडं कश्चित् विपक्षं न प्रतिपद्यते; कथं तत्र साधनाभावमवैति ? /ms नहि अप्रतिपन्नभूतलस्य अत्र भूतले घटो नास्ति इति निश्चयो भवति, अन्यथा **क्वचिद् देशविशेषे प्रतिपत्तृप्रत्यक्षे** इति च वावा न जाघटीति । यथा च जडेऽप्रतिपन्नेऽपि तत्र प्रकृतसाधनाभावनिश्चयः तथा सर्वज्ञे अनुपलब्धेऽपि तत्र वक्तृत्वादिसाधनाभावः कथन्न निश्चीयते ? यत इदमनुमानम्--सुगतः सर्वज्ञः परमवीतरागो वा न भवति वक्तृत्वात् रथ्यापुरुषवत्(?') इति । अथवा, यद्यपि जडं किञ्चिन्नोपलभ्यते तत्र तथापि साधनाभावनिश्चयः तदभावादिति । कुत एतत् ? अनुपलम्भादिति चेत्; किं 81/mkj पुनः सर्वज्ञोपलम्भोऽस्ति ? *सोऽयम् अनुपलम्भमात्रात् सर्वज्ञाभावमनिच्छन् तत एव जडाभावमिच्छति इति स्वेच्छावृत्तिः, सर्वज्ञवत् जडस्यापि

३ कः] अन्तरा विना भवतीति अन्तरीयकः विनाभावी, न अन्तरीयकः नान्तरीयकः अविनाभावीत्यर्थः ।
५ प] प्रतिवादिनः ।
६ उ] वादिप्रतिवादिनोः ।
६ इ] प्रमाणतः सिद्ध्यभावे ।
७ था] प्रतिवादिनोऽपि ।
९ *] शर्करादिकम् ।
१० उक्तो] एवं कथितो वा ।
११ यादिति] न बहिरर्थो विपर्ययात् इति ।
१३ इ] यदेव दृश्यते तदेवाभ्युपगम्यते । तथाहि प्रतिभासात्तद्गतमेव नीलमवभासते नापरं ततः प्रतिभासव्यतिरेकेण न प्रमाणम् ततो नाभ्युपगमः ।--प्र॰ वार्तिकाल॰ पृ॰ ३८९ ।
१४ त] जडे ।
१५ य] पतिभासाद्वैतवादी ।
१५ त्र] जडे ।
१७ इति] तत्रानुपलब्धिर्यथा न प्रदेशविशेषे क्वचिद् घटः = क्वचिदिति प्रतिपत्तृप्रत्यक्षे क्वचिदेव प्रदेशे इति--न्यायबि॰, टी॰ २ । १३ ।
१७ वावा] वचो
१८ प्र] प्रतिभासमानत्वात् इति ।
१९ ना] न
२० म्] मीमांसकोक्तं न भवेत् ।
२२ त] जडाभावात् ।
२३ *] बौद्धः । सर्वज्ञो वक्ता नोपलभ्यते, इत्येवम्प्रकारस्यानुपलम्भस्य अदृश्यात्मविषयत्वेन सन्देहहेतुत्वात् ।--न्यायबि॰ ३ । ७० ।
२४ त] अनुपलम्भमात्रात् न तु दृश्यानुपलम्भात् ।

केनचिदुपलम्भाऽविरोधात् । ततो ध र्म की र्त्ति ना यदुक्तम् [तदयुक्तम्]
§ 356

*यस्याऽदर्शनमात्रेण व्यतिरेकः प्रसाध्यते ।
तस्य संशयहेतुत्वात् शेषवत्तदुदाहृतम् ॥ प्र० वा० ३ । १३
इति ।§ 358

तदभ्युपगच्छता अदृष्टे जडे न साधनाभावोऽभ्युपगन्तव्यः । प्र ज्ञा क र गु प्त स्तु **तत्कार्ये कारणे वाऽप्रतिपन्ने न कारणकार्यभावनिश्चयः परचैतन्ये वाऽविषयीकृते न तस्य स्वदृष्टे वृत्तिः निश्चीयते** इति वदन् जडेऽदृष्टेऽपि हेत्वभावं प्रत्येति इति कथमनुन्मत्तः ? ननु तस्मिन्नप्रतिपन्नेऽपि स्वतो वा परतो वा जडस्य प्रतिभासः स्यात् इत्यादिविचारात् साधनाऽभावः प्रतीयते इति चेत्; उच्यते--यद्ययं न प्रमाणम्, कथमतः क्वचित् कस्यचित् विधिप्रतिषेधयोः सिद्धिः अतिप्रसङ्गात् ? प्रमाण त्वेऽपि न प्रत्यक्षम्; परामर्शात्मकत्वाद् विचारस्य, तद्विपरीतत्वाच्च अध्यक्षस्य । भवतु वा तथापि न तत् स्वयमविषयीकृते विपक्षे साधनाभावमवैति तथाविधे अन्यथा परलोकादौ तत्सन्तानाभावमवैति इति यदुक्तं ध र्म की र्त्ति ना वि नि श्च ये **तदेव तत्र नास्ति, तत एव तदभावसिद्धिः इत्ययुक्तम्** इति प्लवते । नाप्यनुमानम्; अलिङ्गजत्वात् । अपि च, **यावान् कश्चित् प्रतिषेधः स सर्वोऽनुपलब्धेः, अप्रतिषिद्धोपलम्भस्याभावासिद्धेः** इति वचनात्, तत्र तदभावः अनुपलम्भात् प्रत्येयः । एवं चेत्तर्हि यद्ययं विकारः अनुमानात्मकः स्वभावानुपलम्भजनित इष्यते; युक्तं प्रतिभासस्य पक्षयोर्घटादिसुखाद्योः उपलब्धस्य ततः क्वचिज्जडे विपक्षे अभावसाधनम्, किन्तु जडस्य निषेध्यविविक्तस्य प्रतिपत्तिरभ्युपगन्तव्या तस्या एव तदनुपलम्भात्मकत्वात् घटविविक्तभूतलप्रतिपत्तेः घटानुपलम्भात्मकत्ववत् । न च सेष्यते परेण । अथ च स्वभावविरुद्धहेतुः जनितः; तर्हि कः तद्विरुद्धो हेतुः ? जडत्वमिति चेत्; तदप्रतिपत्तौ कस्य तेन विरोधः प्रतीयताम् ? अन्यथा अदृश्यात्मनामेव तेषां तद्विरुद्धानां च सिद्धिः असिद्धिर्वा वेदितव्या ***अन्येषां विरोधकार्यकारणभावाभावासिद्धेः** न्यायबि० २ । ४७ इत्यस्य विरोधः । § 359

/ms

---

४ हेतुत्वात्] सन्दिग्धविपक्षव्यावृत्तिकत्वं शेषवदुच्यते प्रतिबन्धाभावादित्यर्थः ।--प्र० मनोरथ० ।
८ त] जडे ।
१० द्य] विचारः ।
१२ त्वाच्च] निर्विकल्पकत्वेन अविचारकत्वात् ।
१३ त] अविषयीकृते ।
१७ व] यावान् कश्चित् प्रतिषेधः स सर्वोऽनुपलब्धेः--प्र० वार्तिकाल० पृ० ५२०, ६३८ ।
१८ विकारः] चारः
२० स्य] निषेध्यः प्रतिभासः ।
२१ व्या] प्रतिभासविविक्तजडप्रतिपत्तेरेव ।
२१ एव] प्रतिभासानुपलम्भात्मकत्वादिति भावः ।
२३ ज] तुज
२५ *] अदृश्यात्मनामेव ।

ननु च सुखादौ प्रतिभासो ज्ञानत्वेन व्याप्तः प्रतिपन्नः, ज्ञानत्वविरुद्धं च जाड्यम्, ततोऽस्मान्निवर्त्तमानं ज्ञानत्वं स्वव्याप्यं प्रतिभासमादाय निवर्तत
/ms इति व्यापकानु पलब्धिजनितोऽयम् इत्यपि वार्त्तम्; अतिप्रसङ्गो हि एवं स्यात् । शक्यं हि वक्तुं क्वचिद् रथ्यापुरुषे वक्तृत्वादेः असर्वज्ञत्वं व्यापकं प्र-
82/mkj तिपन्नं सर्वज्ञत्वेन विरुद्धम्, अतः तन्निवर्तमानं स्वव्याप्यं वक्तृत्वादिकमादाय निवर्तत इति वक्तुरसर्वज्ञत्वसिद्धिरिति । ततो यथा न वक्तृत्वादेः असर्वज्ञत्वेन व्याप्तिः तथा न ज्ञानत्वेन प्रतिभासस्य । अथ जडेन विरोधादस्य तेन व्याप्ति; तर्हि अन्योऽन्यसंश्रयः--सिद्धे हि जडेन अस्य विरोधे तेन व्याप्तिः, अस्यां च सिद्धायां तेन विरोधः सिध्यति इति । ततो वक्तृत्वादिवत् शेषवानयं हेतुरिति स्थितम् । अथ प्रतिपद्यते किञ्चित् जडम्; तेनैव प्रतिभासात् इत्यस्य हेतोर्व्यभिचारः । मा वा भूदयं दोषः, तथापि अतो हेतोर्जायमान-मनुमानं स्वतोऽर्थान्तरं साध्यं न चेद् विषयीकरोति; कथं तत्र प्रमाणम् अतिप्रसङ्गात् ? **भ्रान्तिरपि सम्बन्धतः प्रमा** *इति चेत्; नन्वत्र हेतुसाध्ययोः तादात्म्यलक्षणः सम्बन्धः हेत्वनुमानयोः कार्यकारणलक्षणः, अन्यस्यासंभवात् । ततः किम् ? यथैव योग्यतया हेतुः अनुमानं स्वसमानकालमन्यथाभूतं वा जनयति तथैव ज्ञानम् अर्थं तथाविधं यदि गृह्णाति को विरोधः सर्व-स्य समत्वात् ? अथात्र कश्चित् कार्यकारणभावलक्षणः अन्यो वा सम्बन्धो नेष्यते; तर्हि-- § 360

*लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि ।
प्रतिबन्धात् तदाभासशून्ययोरप्यवञ्चनम् ॥ प्र० वा० २ । ८२
इति प्लवते ।§ 362

व्यवहारेण तदभिधानाददोष इति चेत्; कोऽयं व्यवहारो नाम ? स-
/ms म्बन्धा- भावेऽपि तद्विकल्प इति चेत्; कथं तद्दर्शितात् सम्बन्धात् अनुमानं प्रेक्षकारिणः कुर्वन्तु ? कृताद्वा भावतः साध्यमनुमिन्वन्तु ? सर्वतः ईश्व-राद्यनुमानात् सर्वस्य स्वार्थसिद्धिप्रसङ्गात् तत्कल्पनायाः सर्वत्राऽविशेषात् । यथैव च सोगतेन व्यवहारनिमित्तमग्न्याद्यनुमानं स्वमतसिद्धये वन्विकुलमिव * कक्षीक्रियते तथैव ईश्वरादिवादिनापि सौगतानुमानम् । तन्न साध्यसम्ब-न्धात् तदनुमानं प्रमाणम् । § 363

---

५ अतः] असर्वज्ञत्वम् ।
७ स्य] प्रतिभासस्य ।
७ तेन] ज्ञानत्वेन ।
९ शेष] सन्दिग्धविपक्षव्यावृत्तिक इत्यर्थः ।
१३ *] भ्रान्तिरपि च वस्तुसम्बन्धेन प्रमाणमेव--प्र० वार्तिकाल० ३ । १७५ । तदाह न्यायवादी--भ्रान्तिरपि सम्बन्धतः प्रमा ।--न्यायबि० धर्मो० पृ० ७८ । उद्धृतमिदम्--भ्रान्तिरपि अर्थसम्बन्धतः प्रमा--तत्त्वोप० पृ० ३० । सन्मति० टी० पृ० ४८१ । अतस्मिंस्तद्ग्रहो भ्रान्तिरपि सन्धानतः प्रमा--षड्० बृह० पृ० ४१ ।
१५ न्य] भिन्नकालं वा ।
२२ त] सम्बन्धकल्पना ।
२२ त] व्यवहारदर्शितात् ।
२३ भा] परमार्थतः ।
२४ त] व्यवहारात् सम्बन्धकल्पनायाः ।
२६ *] निष्फलमेव

एतेन समारोपव्यवच्छेदकरणात् तत्तत्र प्रमाणम् *इति निरस्तम्; स्व-समानासमानकालसमारोपव्यवच्छेदकरणवद् विज्ञानस्य अर्थग्रहणं न वि-रुध्येत । § 364

यत्पुनरुक्तं परेण--**अनुमानं सहकारिकारणं प्राण पूर्वः समारोपक्षणः स्वकार्यं तत्क्षणम् उत्तरतत्क्षणजनने अक्षमं जनयति** । इति; तदप्येतेन दूषितम्; कार्यकारणभाववद् ग्राह्यग्राहकभावसिद्धेः । संवृत्या ततस्तत्त-थेति चेत्; तत एव जडस्यापि प्रतिभासाभावात् प्रत्यक्षतः पक्षबाधा किन्न स्यात् ? परमार्थतः तद्व्यवच्छेदकरणमपि दुर्लभम् । संवृतिसिद्धेन तत्करणेन अनुमानं प्रमाणं न तया सिद्धेन घटादिनाड्य ग्राहिप्रत्यक्षेण पक्षबाधनमिति किं कृतो विभागः ? अथ अनुमानेन अस्य प्रत्यक्षस्य बाधनात् नानेन 83/mkj पक्षबाधनम्; अनेनाप्यनुमानस्य बाधनात् न तेन तद्व्यवच्छेदकरणमिति समानम् । ततो घटादिज्ञानत्वे अनुमानमिच्छता प्रमाणं तद्विषयमभ्युप-गन्तव्यम् । तत्स्वतो भिन्नं भावतोऽनुभवति न ज्ञानान्तरं जडमर्थमिति /ms स्वेच्छाविरचितदर्शनप्रदर्शनमात्रम् । § 365

ततो निराकृतमेतत्--**यदि भिन्नकालो ज्ञानेन अर्थोऽवगम्यते; अविशेषाद् एकस्य तथाविधाशेषार्थावगमप्रसङ्गः । अथ समकालः; सम्ब-न्धाभावात् किं केनावगम्यते ? नीलादिना वा ज्ञानमवगम्येत । गृहीतिक-रणाद् विज्ञानं तस्य ग्राहकमिति चेत्; न; अस्याः ततोऽभेदे ज्ञानं नीलादिः त[ज्ञ]न्यत्वाद् उत्तरज्ञानवत् । भेदे ज्ञानं नीलादिः गृहीति च परस्पराऽस-म्बद्धं त्रितयमिति किं केन गृह्यते ? पुनस्तयापि तदन्तरकरणे अनवस्था** । इत्यादि । कथम् ? प्रकृतेऽपि समत्वात् । यदि पुनस्तदनुमानं प्रमाणं नेष्यते; कुतः प्रकृततत्त्वसिद्धिः ? प्रत्यक्षात् इत्यपि नोत्तरम्; ततो विवाद-स्यानिवृत्तेः । ननु यथा सुखादयोऽविद्यमानावेदकाः प्रतिभासमानाः प्रत्यक्ष-सिद्धस्वसंवेदना उच्यन्ते तथा घटादय इति चेत्; यद्येवं लभ्येत, कृतं स्यात्, तत्तु न लभ्यम्, घटमहं वेद्मि, पटमहं वेद्मि इति अहमहमिकया प्रतीय-मानप्रत्ययवेद्यतया सर्वदा तेषाम् अकरासवात् । न च तथावभासनादन्यत् स्वसंवेदनेऽपि शरणमस्ति । *परदुर्णयः प्रागेव चिन्तितः । तदेवं स्वसंवेदनव-

१ *] प्रत्यक्षानन्तरोद्भूतसमारोपनिवारणात् । इष्टं तु लैङ्गिकं ज्ञानं प्रमाणम्...--तत्त्वसं० श्लो० १३०२ ।
४ प्राण] प्राप्य
५ कार्यं] समारोपक्षणम् ।
५ म्] तृतीयसमारोपक्षण ।
७ त] संवृत्या एव ।
७ तिभासा] स
८ त] समारोपव्यवच्छेदकरणेन ।
९ त] संवृत्या सिद्धेन ।
९ टादिनाड्य] जाड्य
१३ तो] स्वस्मात् ।
१३ ज] अनुभवति ।
१६ अ] भिन्नकालत्वाविशेषात् ।
१७ म्येत] इत्यतिप्रसङ्गः ।
१८ अस्याः] गृहीतेः ।
१८ त] नीलादेः ।
१९ च] श्च
२० त] गृहीत्यन्तरकरणे ।
२२ त] प्रत्यक्षात् ।
२३ मानावे] नवे
२३ काः] न विद्यते भिन्नो वेदको येषां ते, स्वसंविदिता इति यावत् ।
२६ तेषाम्] घटादीनाम् ।
२६ वात्] अवभासनात्
२७ *] परस्य दुर्णयः दुरभिप्रायः ।

त् ग्राह्याकारस्यापि प्रतिभासभावात् स्वप्नेतरग्राह्याकारयोरिव तयोः समानः सर्वथा धर्मभावोऽस्तु । तथापि स्वसंवेदनस्यैव परमार्थत्वे जाग्रद्ग्राह्याकार /ms एव परमार्थः तथा स्यादिति स्वार्थव्यवसायोऽविसंवादः नातिव्यापकः । **दृष्टस्य पुनः प्राप्तिरविसंवादः** । इत्यत्र यदुक्तम्--**क्षणिकत्वेन नाशात् न तस्य तत्प्राप्तिः** इति; तत् **प्रतिभासैक्यनियमे** सिद्धिवि° १ । १० इत्यादिना निरस्तम् । § 366

यच्चाप्युक्तम्--दृष्टस्य प्राप्तिः स्वप्नेऽप्यस्तीति तत्रापि दर्शनं प्रमाणं स्यादिति; तत् ग्राह्यप्रतिभासेऽपि समम् । ततः सूक्तम्--**यथा यत्राविसंवादः तथा तत्र प्रमाणता** इति । § 367

**विशदम्** इति प्रत्यक्षविशेषणमयुक्तं निवर्त्याभावात् । सामान्येऽनुमानादि दूरपादपादौ अवयविज्ञानमपि विशदं स्वविषयग्रहणलक्षणत्वात्, वैशद्यव्यवहारः पुनः विशेषावयवाग्रहणकृतः(?') इत्येके । ध्यामलिताकारस्य नीलाद्याकारवत् बुद्ध्याकारत्वेन वस्तुत्वात् न *तदपेक्षया किञ्चिद् विज्ञानमविशदम्, बाह्यं तु न तस्य विषयः इति न तत्र तदविशदमन्यथा वा । एतेन अर्थाकारत्वमस्य चिन्तितम्; अनर्थाकारत्वे न तत्र ज्ञानं प्रमाणं विसंवादकत्वात् अतः **अविसंवादः** इत्येवास्तु इत्यपरे । § 368

अत्रोच्यते--विशेषावयवाग्रहणाद् गृहीतेऽप्यस्पष्टताव्यवहारः इत्ययुक्तम्; 84/mkj न खलु अन्य स्याग्रहणे अन्यत्र तद्व्यवहारः, इतरथा घटाग्रहणे गृहीते पटे तद्व्यवहारः स्यात् । जातितद्वतोः अवयवावयविनोश्च भेदैकान्ते सम्बन्धाभावात् । ततो मण्याद्यन्तरितसूत्रादिवत् स्वत एवाविशदं ज्ञानमित्युन्नेयम् ॥ § 369

यत्पुनरेतत्--ध्यामलिताकारस्य इत्यादि; तत्र न सारम्; सारूप्याऽभावात् । तत्प्रतिज्ञायाः प्रत्यक्षबाधनात् । अहमहमिकया अर्थग्राहिणो /ms ज्ञानस्य निराकारस्य स्वसंवेदनाध्यक्षसिद्धत्वात्, न चासौ आकारः तत्र प्रतिभासाद् बहिर्युक्तः, तत एव अनुगताकारोऽपि स्यादित्यसौगतमशेषम् । एवमपि यथा चन्द्रादिद्वित्वादावसति विशदं ज्ञानं तथा तदाकारेऽपि इति न किञ्चिदविशदं नामेति चेत्; तत् न चन्द्रादौ द्वित्वादिवद् धर्मिणापि विसदगत्र नु धर्निण्यष्य विशदम् । न चैतावता न कस्यचिद् ग्रहणम्; अनुमानात् तत्त्वसिद्धिप्रसङ्गात्, तथा च कुतो हेतुफलभावाद्यभावसिद्धिर्यतः प्रतिभासाद्वैतम् ? अनुपलम्भादिति चेत्; किमयं तत्प्रतिबद्धः क्वचित् प्रतिपन्नो येनैवं स्यात् ? तथा चेत्; कथमनुमानं प्रमाणं नेष्टं स्यात् ? तदिच्छति, तत्त्वविषयं न इति विरुद्धम् । ततोऽविशदानुमाननिवृत्त्यर्थं **विशद**ग्रहणम् । तथा यावान्

७ स्तीति] स्वप्नदृष्टार्थेऽपि ।
११ त्वात्] वैशद्यस्य ।
११ वै] अवै
१३ *] ध्यामलिताकारापेक्षया ।
१८ लु] विशेषावयवस्य ।
१८ अ] गृहीते ।
१९ हारः] अस्पष्टताव्यवहारः ।
२६ ति] अविद्यमाने ।
२८ ष्य] धर्मिण्यविशदम् अत्र तु धर्मिण्यप्य
३० किम] अनुपलम्भः ।
३० द्धः] अभावाविनाभावीति ।

कश्चिद् धूमवान् प्रदेशः स सर्वोऽप्यग्निवान् इत्यादि व्याप्तिज्ञाननिवृत्त्यर्थं च । नहि तद् विशदम्, अनुमानप्रतिभासाविशिष्टप्रतिभासत्वात् । तथापि तथा तदभ्युपगमे न किञ्चिदविशदं भवेत् । § 370

एतेन अकस्माद् धूमदर्शनाद् अग्निरत्रे वि  ज्ञानं चिन्तितम् । § 371

मनोऽक्षार्थसन्निकर्षजत्वादविशदमपि व्याप्तिज्ञानं प्रत्यज्ञानं  प्रत्यक्षम् इत्येके । कुतः पुनः तत्तज्ञानं ज्ञानम्  इन्द्रियार्थसन्निकर्षजं * ज्ञानत्वात् चक्षुरादिजनितरूपादिज्ञानवदिति चेत्; न; अनुमानादिज्ञानेन व्यभिचारात् । अस्यापि पक्षीकरणे कुतः अध्यक्षाद् भेदः ? **प्रत्यक्षाऽनुमानोपमानशब्दाः प्रमाणम्** न्यायसू° १ । १ । ३ इति यतः *संख्या व्यवतिष्ठेत /ms । अथ इन्द्रियस्य अर्थेन साक्षात्सम्बन्धमन्तरेण भावात् ततोऽस्य भेदः; तथा व्याप्तिज्ञानस्यापि स्यात् । नहि तदपि तस्य अतीतानागतवर्त्तमानार्थेन तथा सम्बन्धात् जायते, विरोधात् । सम्बन्धसम्बन्धः *अन्यत्रापि न वार्यते । लिङ्गादिहेतुत्वाद् भेदे दृष्टसाधर्म्यात् साध्यसाधनमुपमानं प्रमाणान्तरं स्यात्, दूरादिज्ञानं च सर्वस्मादध्यक्षत इति निरूपयिष्यते । ततो वैशद्यादेव ततोऽस्य भेद इति सूक्तम्--**विशदमेव ज्ञानं प्रत्यक्षम्** इति । § 372

मा वा भूदस्य तन्निवर्त्त्यम्, तथापि **इन्द्रियार्थसन्निकर्षोत्पन्नम्** न्यायसू° १ । १ । ४ *इत्यादेः परकीयस्य प्रतिषेधार्थम् अध्यक्षस्य **विशदम्** इति विशेषणम् । *तल्लक्षणे हि  सुखादिसंवेदनमध्यक्षं न भवेत् 85/mkj तल्लक्षणविरहात् । अप तदपि इन्द्रियार्थसन्निकर्षजं तत्त्वात् चक्षुरादिजनितरूपादिज्ञानवत् इत्युच्यते; तन्न; तथाप्रतीतिविरोधात् । न खलु पूर्वमुत्पन्नैः सुखादिभिः इन्द्रियस्य सन्निकर्षे तत्संवेदनमुपजायते इति प्रतीतिरस्ति, यूनः कान्तासमागमे संवेदनस्य आह्लादनाकारात्मनः तथानुभवात्, *स्व-

२ त] व्याप्तिज्ञानम् ।
४ वि] त्रेति
४ ज्ञानं] अविशदमपि प्रत्यक्षमिति प्रज्ञाकरमतम्--एतच्चानुमानज्ञानं क्वचिद्व्रत्यक्षं क्वचित्तु प्रत्यक्षमेव अकस्माद् धूमादग्निप्रतिपत्तौ । नहि पूर्वानुभूतकल्पनास्ति ।--प्र° वार्तिकाल° ३ । २८८ ।
५ प्र] प्रत्यज्ञानं इति द्विर्लिखितम् ।
५ ज्ञानं] ?
६ इत्येके] नैयायिकाः । सामान्यलक्षणाप्रत्यासत्त्या धूमत्वेन अखिलधूमानाम् अग्नित्वेन च निखिलाग्नीनामलौकिकार्थसन्निकर्षेण ज्ञानसम्भवात् ।
६ म्] तज्ञा नं प्रत्यक्षम् ? प्रत्यक्षं तज्ज्ञानम्
६ *] ज
७ अनुमानादिज्ञानेन] तदपि परम्परया इन्द्रियार्थसन्निकर्षजम् ।
९ *] प्रमाणसंख्या ।
१० भावात्] अनुमानस्य ।
१० त] प्रत्यक्षात् ।
१२ त] साक्षात् ।
१२ न्धः] परम्परासम्बन्धः ।
१२ *] अनुमानेऽपि ।
१४ त] पृथक् प्रमाणं स्यादिति भावः ।
१७ *] अव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति शेषः ।
१८ *] सन्निकर्षात्मकप्रत्यक्षलक्षणे ।
१९ पि] सुखादिसंवेदनमपि ।
२१ र्षे] सुखादिसंवेदनम् ।
२२ नः] स्वसंविदितस्य ।
२२ *] अतः ।

संवेदनाध्यक्षबाधितः परपक्षः । हेतुश्च सुखादिसंवेदनवेदनेन व्यभिचारी । तस्यापि पक्षीकरणे अनवस्थादिप्रसङ्गः इति प्रतिपादयिष्यते । कथम् ? **सिद्धंयन्न परापेक्षम्** सिद्धिवि० १ । २३ इत्यादिना । एतेन सत्यस्वप्रज्ञानं व्याख्यातम् । ***सदसद्वर्गः कस्यचिदेकज्ञानालम्बनम् अनेकत्वात् पञ्चाङ्गुल-**
/ms **वत्** इत्यादिना अनुमितमध्यक्षं परलक्षणेन कथमनुगृहीतम् ? इन्द्रियार्थ सन्निकर्षजत्वादिति चेत्; कथमशेषं सदसद्वर्गं युगपद् विषयीकरोति ? न खलु मनसः अन्यस्य चेन्द्रियस्य युगपत् सर्वार्थसन्निकर्षोऽस्ति विप्रतिषेधात् । सम्बन्धः प्राणभृन्मात्रस्य, ततः तस्यापि तज्ज्ञानं भवेत् । विशिष्टादिष्टसह-कारिनियमकल्पनावि पापीयसी; *भेदैकान्ते समवायाऽविशेषतः अदृष्ट-स्यापि नियमाऽसिद्धेः । तन्न इन्द्रियार्थसन्निकर्षजं तज्ज्ञानमिति कथन्न प्रकृतो दोषः ? चक्षुर्जनितं रूपज्ञानं च इन्द्रियार्थसन्निकर्षमन्तरेण भावात् इति प्र-तिपादयिष्यते **पश्यत्येव हि सान्तरम्** सिद्धिवि० ४ । १ इत्यादिना ।
§ 373

यत्पुनरेतत्--**संप्रयोग** मी० द० १ । १ । ४ *इत्यादि; तदप्येतेन नोत्सृष्टम् । § 374

इन्द्रियवृत्तिः प्रत्यक्षम् इति सांख्यः; सोऽप्यनेन कृतोत्तरो द्रष्टव्यः; स्व-संवेदनादौ तदसंभवात् । किञ्च, तैमिरिके तद्वृत्तिर्यदि प्रत्यक्षम्; तदाभास-विलोपः । यथार्थज्ञानहेतुरिति चेत्; न; तथाविशेषणाभावात् । अचेतनं प्रत्यक्षमन्यद्वा प्रमाणं न इति चर्चितम् । ततः साधूक्तम्— **प्रत्यक्षं विशदं ज्ञानम्** इति । ननु च-- § 375

---

४ *] सद्वर्गः द्रव्यगुणकर्माणि सत्तासम्बन्धित्वात् । असद्वर्गशब्देन सामान्यविशेषसमवायाः ग्राह्याः ।
५ म] सर्वज्ञप्रत्यक्षम् ।
५ क्षं] नैयायिकोक्तसन्निकर्षजरूपप्रत्यक्षलक्षणेन ।
७ चे] वे
८ न्धः] आत्मा सर्वार्थैः संयुक्तः, आत्मसंयुक्तं मनः इन्द्रियाणि च अतः परम्परासम्बन्धः सर्वार्थैः स्यात् ।
८ न्धः] सम्बन्धसम्बन्धः
८ विशिष्टादि] दृ
९ नावि] पि
९ *] अदृष्टात्मनोः सर्वथा भेदे ।
९ भेदैकान्ते] समवायस्य च व्यापकत्वात् सर्वात्मभिः तत्सम्बन्धहेतुः स्यादिति भावः ।
१० जं] सर्वज्ञज्ञानम् ।
१४ *] सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ।--मी० द० १ । १ । ४ ।
१६ इति] इन्द्रियप्रणालिकया बाह्यवस्तूपरागात् सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षम्--योगद० व्यासभा० पृ० २७ । विषयैश्चित्तसंयोगात् बुद्धीन्द्रियप्रणालिकात् । प्रत्यक्षं साम्प्रतं ज्ञानं विशेषस्यावधारकम् ॥ २३ ॥--योगकारिका ।
१७ तैमिरिके] तुलना--श्रोत्रादिवृत्तिः भ्रान्तेऽपि न हि नाम न विद्यते । न च ज्ञानं विना वृत्तिः श्रोत्रादेरुपपद्यते ॥--प्र० वार्तिकाल० पृ० ३४० । श्रोत्रादिवृत्तिः प्रत्यक्षं यदि तैमिरिकादिषु । प्रसङ्गः किमतद्वृत्तिस्तद्विकारानुकारिणी ॥--न्यायवि० १ । १६५ । प्र० समु० पृ० ६४ । तत्त्वोप० पृ० ६१ । न्यायवा० पृ० ४३ । न्यायवा० ता० टी० पृ० १५५ । २३३ । न्यायम० पृ० १०० । त० श्लो० पृ० १८७ । नयचक्र वृ० पृ० १०७ । षड्द० बृह० पृ० ४१ । प्रमेयक० पृ० १९ । प्रमाणमी० पृ० २४ ।

*एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो न दृष्टो भागः स्याद् यः प्रमाणैः परीक्ष्यते ॥ प्र॰ वा॰ ३ । ४२§ 377

86/mkj

इति न्यायात् प्रमितस्याऽप्रमिताम स्याभावात् कथमुच्यते--**यथा यत्राऽविसंवादः तथा तत्र प्रमाणता** इति चेत्; अत्राह--**प्रत्यनीक** इत्यादि । **प्रत्यनीका** अन्योन्यं विरुद्धा ये **धर्मा** विभ्रमेतर-विकल्पेतर-संशयेतर-ग्राह्य-ग्राहकसंवित्त्यादयः ते **का** * साधारणी या **संवित्** तस्याः **स्वप्रमितेः** /ms स्वपरिच्छित्तेः **असाकल्यसंभवे** खण्डशः संभवे अङ्गीक्रियमाणे । एतदुक्तं भवति--विरुद्धधर्माध्यासभयाद् एकस्य प्रमितेतररूपद्वयं नेष्यते, स च तदध्यासः अन्यथापि जात इति परं तस्याः स्वप्रमितेः असाकल्यसंभवोऽभ्युपेयः तस्मिन् वा इति । किम् इत्याह--**विषयस्वलक्षणेऽपि** । द्विविधो विषयः सामान्यं स्वलक्षणं च । तस्मात् सामान्ये कल्पिते तदभावेऽपि न सौगतस्य दोष इति स्वलक्षणग्रहणं तत्रापि, न केवलम् उक्तसंविदः **किन्न भवेत् इति किम्** निमित्त**माश्रित्य** नाना विसंवाद **प्रमाणत्वम्** तिमिरादिज्ञानस्य कथञ्चित् चन्द्रत्वादिना संवादात् किन्न प्रमाणमिति, न केवलमप्रमाणमेव । यदि च कथञ्चिद् विसंवादात् तदप्रमाणमेव; तर्हि परस्य न किञ्चित् प्रमाणं स्यादिति दर्शयन्नाह--**प्रसन्न** इत्यादि । **प्रसन्नानि** निर्दोषाणि करणभूतानि **अक्षाणि** यस्याः **बुद्धेः** तस्या अपि न केवलं तिमिरबुद्धेः **सर्वथा** सर्वेण नीलादिना इव क्षणक्षयादिप्रकारेण **संवादिनियमाऽयोगात्** कारणात् **किन्न** कथञ्चित् संवादात् **प्रमाणमपि** भवेदिति । कुतस्तन्नियमाऽयोग इति चेत् ? अत्राह--**दृष्टे प्रमाणान्तरावृत्तेः** । दृष्टे दर्शनेन विषयीकृते शब्दादौ धर्मिणि **प्रमाणान्तरस्य** क्षणक्षयाद्यनुमानस्य **आ** समन्तात् **वृत्तेः** तन्नियमाऽयोगः ततः तद् इति पदघटनात् । इदमत्र तात्पर्यम्--यदि दर्शनं शब्दत्वादिवत् /ms नाशादावपि संवादकम्, तर्हि तदनुमानं संवृतिवदप्रमाणम् । अथ विसंवादकम्; तत्रास्तु प्रकृतवद् अप्रमाणमेवेति धर्माद्यसिद्धेः कुतः प्रमाणान्तरवृत्तिः ? अस्ति च, ततः प्रकृतमिति । § 378

अत्राह--प्र ज्ञा क र गु प्तः--**यत एव दृष्टे प्रमाणान्तरवृत्तिः अत एव शब्दादिवत् क्षणक्षयादेरपि दर्शनम्, अन्यथा दर्शनस्य क्षणिकत्वानुमानेन तस्य**

---

३ मिताम] तभाग
६ *] **तेष्वेका**
८ त] विरुद्धधर्माध्यासः ।
१० यः] यदाह--नहि
स्वसामान्यलक्षणाभ्यामपरं प्रमेयमस्ति ।
स्वलक्षणविषयं प्रत्यक्षं
सामान्यलक्षणविषयमनुमानमिति ।--प्र॰
वार्तिकाल॰ पृ॰ १६९ ।
स्वसामान्यलक्षणाभ्यां भिन्नलक्षणं प्रमेयान्तरं
नास्ति ।--प्र॰ समु॰ वृ॰ पृ॰ ४ ।
११ त] अविसंवादाभावेऽपि ।
१३ नाना] तत्र
१३ विसंवाद] दात् अ
१३ स्य] नश्च
१५ त] तिमिरादिजन्यद्विचन्द्रादिज्ञानम् ।
२३ नुमानं] विकल्पज्ञानवत्
गृहीतग्राहित्वादप्रमाणं स्यात् ।

**वा दर्शनेन बाधनं स्यात्** । इति; तस्य विप्लुताक्षः शुक्लं शङ्खं पीतं पश्यन् प्रतिपन्नव्यभिचारो यदैवं करोति शुक्लोऽयं शङ्खत्वात् पूर्वदृष्टशङ्खवत् इति, तदा तद्दर्शनं शङ्खत्ववत् शुक्लतामपि पश्येत् । शक्यं हि वक्तुं यत एव विप्लुताक्षदर्शने दृष्टे प्रमाणान्तरं शुक्लताविषयं प्रवर्तते तत एव तत् शुक्लतामवैति, अन्यथा तद्दर्शनेन प्रमाणान्तरस्य अनेन वा तस्य बाधनं भवेत् । न चैवम् । न हिमालो * डाकिन्या भक्ष्यते । अथ पीततामात्रे तस्याने[न] बाधनमिष्यते; न; सर्वात्मना धर्माद्यसिद्धिप्रसङ्गात्, तथा प्रकृतेऽपि इष्यतामिति साधूक्तम्--**प्रसन्ने**त्यादि । § 379

यत्पुनराह स एव--अप्रतिपन्नव्यभिचारः तैमिरिकः तज्ज्ञानात् प्रवर्तमानो 87/mkj विसंवाद्यते इति न कथञ्चिदपि तत्प्रत्यक्षम्, प्रतिपन्नव्यभिचारस्तु प्रतिभासोऽयम् अभिमतसंस्थानवान् पूर्वदृष्टैवंप्रतिभासवत् इति पर्यालोच्य प्रवर्त्तते इत्यनुमानमेव तत्राविसंवादकम् । तदुक्तम्-- § 380

*ममैवं प्रतिभासो यः न स संस्थानवर्जितः ।
/ms एवमन्यत्र दृष्टत्वात् अनुमानं तथा सति ॥ प्र॰ वार्तिकाल॰
पृ॰ ५ इति ।§ 382

तत्रोत्तरम्--**उपप्लुताक्षाणामपि** इत्यादि । **उपप्लुताक्षाणां** न केवलं विपरीतानां **विनैव लिङ्गलिङ्गिसम्बन्धप्रतिपत्त्या** लिङ्गं प्रतिभासविशेषः लिङ्गि संस्थानवत्त्वम् तयोः सम्बन्धः तादात्म्यं तेषां प्रतिपत्तिः तामन्तरेण **अर्थं परिच्छिद्य प्रवृत्तौ** सत्याम् **अविसंवाददर्शनात्** । न खलु विप्लुताक्षः सर्वे सर्वदा **ममैवम्** इत्याद्यनुतिष्ठन्तः समुपलभ्यन्ते । तथापि तदभ्युपगमे तिमिरज्ञानाऽनुमानयोः विभ्रमं प्रति अविशेषाद् अनुमानप्रतिभासेऽपि **ममैवं प्रतिभासः** इत्यादि कल्पनायाम् अनवस्थाप्रसङ्गे नानुमान व्यवहारिजनानुरोधादनुमानमविसंवादकमिच्छन् तत एव तिमिरज्ञानं कथञ्चित्तथा नेच्छतीति स्वेच्छावृत्तिः । भवतु तदप्यविसंवादकं प्रमाणं तु न इति चेत्; अत्राह--**तावता च** अविसंवाददर्शनादेव **प्रामाण्यसिद्धेः** कारणात् कथञ्चित् प्रमाणमपि भवेत् इति स्थितम्--**यथा यत्र** इत्यादि । शेषं सुगमत्वादव्याख्यातम् । § 383

एवं तावत् **चित्रप्रतिभासाप्येकैव बुद्धिः बाह्यचित्रविलक्षणत्वात्** प्र॰ वार्तिकाल॰ ३ । २२० इति वचनात् चित्रमेकं ज्ञानमभ्युपगच्छतः संविदः

---

६ *] हिमालयो
९ राह] येन न कदाचिद् व्यभिचार उपलब्धः स यथाभिप्रेते विसंवादात् विसंवाद्यत एव । यस्तु व्यभिचारसंवेदी स विचार्य प्रवर्तते । संस्थानमात्रं तावत् प्राप्यते, परत्र संदेहो विपर्ययो वा ततोऽनुमानं संस्थाने...--प्र॰ वार्तिकाल॰ २ । १ ।
१६ रीतानां] प्रसन्नेन्द्रियाणाम् ।
१८ विप्लुताक्षः] क्षाः
२१ नानुमान] नम्[[प्रमाणं स्यात् ।]] ।
२२ न्] व्यवहारिजनानुरोधादेव ।
२३ था] अविसंवादकम् ।

स्वप्रमितेरसाकल्यसंभव उक्तः । इदानीम् **अविभागोऽपि बुद्ध्यात्मा** प्र॰ वा॰ २ । ३५४ इत्यादि वचनात् तदनभ्युपगच्छतस्तं दर्शयन्नाह--[वित्तेः इत्यादि] § 384

...20 वित्तेः विषयनिर्भासविवेकानुपलम्भतः ।
विज्ञातायाः क्वचित्सिद्धो विरुद्धाकारसंभवः ॥ २०
॥§ 386

बहिरन्तर्मुखनिर्भासादिविरुद्धधर्माभ्युपगमे तस्या विषयनिर्भासविवेकपरमार्थप्रतीतावपि कथञ्चिदनेकान्तसिद्धिः । दूरदूरतरादिव्यापृतचक्षुषां च वस्तुसत्तामात्राविसंवादात् तद्भेदाप्रतिपत्तौ च तत्प्रमितिसाधनं समञ्जसम् । यतो यावदपि उपलम्भमन्तरेण प्रमाणान्तरावृत्तेरसंव्यवहारप्रसङ्गात् । यत्पुनरन्यत्-- आरामं तस्य पश्यन्ति न तं पश्यति कश्चन बृहदा॰ ४ । ३ । १४ इति; तत्रापि समानोऽयं प्रसङ्गः । केवलं समयान्तरप्रवेशः । § 387

**वित्तेः** बुद्धेः । कथंभूतायाः ? **विज्ञातायाः** स्वसंवेदनाध्यक्षगृहीताया अन्यथा तद्भावासिद्धेः सम्बन्धी **विषयो** ग्राह्यो घटादिः तस्य स एव वा **निर्भास** /ms
आकारः तस्य **विवेको** बुद्धेः सकाशाद् अन्यत्वं तस्याऽ**नुपलम्भो** यः तस्मात् ततः **क्वचित्** तैमिरिकोपलब्धे चन्द्रादौ **सिद्धो** निश्चितो **विरुद्धस्य** दृश्यचन्द्रत्वाद्याकारापेक्षया प्रत्यनीकस्य अदृश्यैकत्वादेः **आकारस्य संभवः** । अत्रायमभिप्रायः--यद्ययं स्थवीयान् घटाद्याकारस्य न्नितरो वा वित्तेः आत्मभूतः; तर्हि चित्रैका सा भवेत्, तत्र चोक्तो दोषः । अथासन्नमा त्मभूतः 88/mkj
ततः सीद्यद्या त्मनो भेदमवैति कुतस्तदाकारा भ्रान्तिः यतः **यदवभासते [तत्] ज्ञानम् यथा सुखादि, अवभासते च स्तम्भादिनीलादिकम्** इत्यत्र आश्रयासिद्धिर्न स्यात् । नहि पीततारहिते शुक्ले शङ्खे प्रतिभासमाने पीतताविभ्रमो युक्तः । अथ तं नावैति; सिद्धः स्वप्रमितेरसाकल्यसंभवः इति । § 388

कारिकां विवृण्वन्नाह--**बहिरन्तर्मुख** इत्यादि । अत्र **आदिशब्देन** संवेदनविकल्पेतरादिपरिग्रहः, स एव **निर्भास** आकारः स एव च **विरुद्धो धर्मः** तस्य **अनभ्युपगमेऽपि** न केवलमभ्युपगमे **तस्याः** वित्तेः **विषयनिर्भासस्य** घटाद्याकारस्य संबन्धी यः **विवेकः** स एव **परमार्थः** तस्याः **प्रतीतावपि कथञ्चित्** सचेतनादिरूपेण संवेदनात् **अनेकान्तसिद्धिः** । एवंतावद् दृश्येतरवित्तिनिदर्शनेन सौगतप्रसिद्धेन विषयस्वलक्षणे प्रमितेरसाकल्यसंभव उक्तः ।

---

२ नात्] चित्रज्ञानमस्वीकुर्वतः ।
१२ अ] स्वसंवेदनाभावे ।
१७ रो] रः सन् इतरो
१८ सा] संवित्तिः ।
१९ भूतः] अथ असन्नात्मभूतः
१९ द्या] सा यद्या
२७ स्याः] तस्य
२८ स] सत्त्वेन चेतनत्वेन वेत्यादिरूपेण ।

/ms इदानीं तं प्रति लोकप्रसिद्धेन दृश्येतरबाह्यनिदर्शनेन स उच्यते **दूरे**त्यादिना । अत्र **आदिशब्देन** [दूरतर]दूरतमपरिग्रहः, तत्र **व्यापृतचक्षुषां** पुसां **वस्तुनो** वृक्षादेः **सत्तैव तन्मात्रं** तस्य **अविसंवादात्** कारणात् **तस्या** असाकल्य-प्रमितेः **साधनं समञ्जसं** युक्तम् । कस्मिन् सत्यपि ? इत्यत्राह--**तस्य** वस्तुसत्तामात्रस्य ये **भेदा** विशेषा वृक्षादयः तेषाम**प्रतिपत्तावपि** न केवलं प्रतिपत्तौ । **च** शब्दः अपिशब्दार्थः । एददुक्तं भवति--यथा दूरदूरतरादौ प्रत्य-क्षेण विशेषाग्रहणेऽपि तत्सत्तामात्रग्रहणं तथा प्रकृतेऽपि दृश्येतरत्वं स्यादिति । **यतः** इत्यादिना एतदेव भावयति--**यतः** यस्माद् **यावदपि** यत्परिमाणस्य पूर्वमुपलम्भो मयोक्तः तत्परिमाणस्य यथा भवति नाधिकस्य, तथा परेणापि उच्यते यदा तदा यावत् तावदपि यथा भवति तथा **उपलम्भः तमन्त-रेण प्रमाणान्तरस्य** अनुमानस्य **अवृत्तेः** अप्रवृत्तेः हेतोः **असंव्यवहारप्रसङ्गात्** कारणात् **तत्प्रमितिसाधनं समञ्जसम्** इति सम्बन्धः । एतदुक्तं भवति--दूर-दूरतरादौ यथा तद्भेदाऽप्रतीतिः तथा चेद् वस्तुसत्तामात्रस्याप्यप्रतीतिः तर्हि तत्र व्यापृतचक्षुषामन्धतैव स्यात् । न खलु सामान्यविशेषावन्तरेण तत्त्वमस्ति
/ms यत् तत्रावभासेत । तथा च विशेषमात्रमिदं सत्तामात्रं केनचिद् विशेषेण तद्वत्त्वात् पूर्वदृष्टतन्मात्रवद् इति तदवृत्तिः, तस्या च तत्र तदप्रवृत्तिः, न चैव-म्, प्रवृत्तिदर्शनात् । ननु भेदवत् तन्मात्रस्यापि न तत्र प्रतीतिः, अभेदाद्यात् प्रतीतिः सा भ्रान्ता, तत एव प्रमाणान्तरवृत्तिः **ममैवं प्रतिभासो यः** प्र° वार्तिकाल° २ । १ इत्यादि इति चेत्; उक्तमत्र--तत्र व्यापृतचक्षुषां व-स्तुसत्तामात्राविसंवाददर्शनात् । तथापि तद्विभ्रमे न किञ्चिदभ्रान्तं स्यात् ।
§ 389

अथवा, सौगतं प्रति दृश्येतरबुद्धिदृष्टान्तसद्भावादस्तु स्वप्रमितेर्विषयस्वल-क्षणे असाकल्यसंभवो नैयायिकं प्रति विपर्ययादिति चेत्; अत्राह--**दूरे**त्यादि । तत्र **व्यापृतचक्षुपाम्** इत्यनेन वस्तुसत्तामात्रविषयं प्रत्यक्षं दर्शयति, **व-स्तु** द्रव्यादि तस्य **सत्तामात्राविसंवादात् तत्प्रमितिसाधनम्** असाकल्यप्र-मितिसाधनं **समञ्जसं** युक्तम् । कस्मिन् सत्यपि ? इत्यत्राह--**तद्भेदाप्रतिपत्तौ**
89/mkj **च** तस्य तन्मात्रस्य भेदो द्रव्याद्याधारपेक्ष्याधे यत्वविशेषः तस्याप्रति पत्ताव-पि । नहि आधाराऽग्रहणे तदपेक्षमाधेयत्वम् आत्मभूतमपि प्रत्येतुं शक्यम् । ननु तद्भेदवत् तन्मात्रस्याप्यप्रतीतिरिति चेत्; अत्राह--**यत** इत्यादि । सामान्यप्रत्यक्षत्वे उभयविशेषाणां तद्विपरीतविशेषाणां वा स्मृतौ संशयादिः,
/ms तद्व्यवच्छेदार्थं च प्रमाणान्तरं प्रवर्त्तते । तन्मात्राऽप्रत्यक्षे तु दुर्लभमेतत् ततोऽ**संव्यवहारप्रसङ्गात् तत्प्रमितिसाधनं समञ्जसम्** इति । § 390

---

१४ त] दूरदूरतरादौ ।
१६ त्वात्] विशेषवत्त्वात् ।
१६ स्या] तस्यां
१७ त] सत्तामात्रस्यापि ।
१८ अभेदाद्यात्] दाध्यवसायात्
२७ पेक्ष्याधे] रमपेक्ष्य आधे
२९ व] विशेषवत् ।
३० सा] सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः--वैशे° सू° २ । २ । १७ ।

किञ्च, अयं स्थाणुः पुरुषो वा ? पुरुष एव इति वा संशयादिज्ञानम् एकधर्मिणि अर्थविषयम् अन्यत्र विपरीतमभ्युपगच्छन् दृश्येतररूपमेकभियोग कथं न स्वर चेष्टितः ? § 391

साम्प्रतं सौगतादिदोषं पुरुषाद्यद्वैतमतेऽपि समानमित्यस्य प्रदर्शनार्थं तदेव दर्शयति **यत्पुनः** इत्यादिना । **यन्मतं पुनः** सौगतादिमताद् **अन्यत्** । किम् **तदागमं** * चेतनादिभेदादोयं **तस्य** पुरुषादेः **पश्यन्ति** द्रष्टारः **न** तं पुरुषादिमद्वैतरूपं **कश्चन** तेषां तद्दृष्टृणां कश्चित् **पश्यति** । **इति** शब्दः आद्यर्थः । तेन-- § 392

*गुणानां परमं रूपं न दृष्टिपथमृच्छति ।
यत्तु दृष्टिपथप्राप्तं तन्मायेव सुतुच्छकम् ॥§ 394

**नित्यः सन्मात्रदेहः विविधकृतिरिह द्रव्यमेकः पदार्थः,
यत्तत्कुक्षिं प्रविष्टा जलमहीवायवः प्राणिनश्च ।
एको देशोऽस्य तिर्यक्सुरनरनरकेष्वस्ति सांसारिकत्वम्,
देशोऽन्यः तस्य नित्यः शिवसुखमतुलं प्रास्नुतेसौद्धिरूपः ॥§ 398

इत्यादेर्ग्रहणम् । तत्रापि यत् तन्मतं **यत्** इत्यनेन निर्दिष्टं **तत्र** इत्यनेन परामृश्यते । न केवलं सौगतादिमते अपि तु **तत्रापि** सर्वोऽप्युक्तदोषः अ क ल ङ्क दे व स्य प्रत्यक्षतया मनसि प्रतिभातीति तम् **अयम्** इत्यनेन निर्दिशति । **समानः** साधारण[ः] **प्रसङ्गो** दोषः । तथाहि— यदुक्तं सौगतं प्रति **नहि बहिरन्तर्वा जातुचिदसाहायमाकारं पश्यामः यथा व्यावर्ण्यते** /ms
**तथैवाऽनिर्णयात्** । सिद्धिवि° १ । १० इत्यादि, त[द]त्रापि समानम् । § 399

यत्पुनरेतत् **एकान्तस्य उपलब्धिलक्षणप्राप्तौ असत्त्वम् अन्यथा स्यादप्रमेयत्वम्** सिद्धिवि° १ । ९ इति तदपि, तथा **प्रतिभासैक्यनियमे** सिद्धिवि° १ । १० इत्यादि चेत् [दूषणम् ।च] **तस्यारामम्** बृहदा° ४ । ३ ।

१ अ] नैयायिकादिः ।
२ भियोग] कं नाभ्युपगच्छति इति
३ र] स्वैर
६ *] तत् ? आरामं
६ नादिभेदादोयं] भेदमारामं
८ आ] प्रकारार्थः ।
९ गु] सांख्यानां मतमिदम् । कारिकेयं निम्नलिखितग्रन्थेषु समुद्धृताऽस्ति--तथा च शास्त्रानुशासनम्--गुणानां...--योगभा° ४ । १३ । षष्टितन्त्रशासनस्यानुशिष्टिः--गुणानां ...--योगभा° तत्त्ववै° ४ । १३ । भगवान् वार्षगण्यः--गुणानां...--शा° भा° भामती पृ° ३५२ । नयचक्रवृ° पृ° ६३ । तत्त्वोप° पृ° ८० । गुणानां सुमहद्रूपम्...--प्र° वार्तिकाल° ४ । १२ । लघी° स्व° पृ° १४ । अष्टस° पृ° १४४ ।
९ णानां] सत्त्वरजस्तमसाम् ।
९ रूपं] उत्कृष्टं रूपं प्रधानम् ।
१० त्तु] विकाररूपं महदादि ।
११ *] अद्वैतवादी ।
१२ ही] ह्यग्नि
१४ प्रास्नुतेसौ] सोऽ

१४ इति वचनात् तदारामयोः कथञ्चिदेकत्वे विभ्रमेतरविकल्पेतरादीनाम् 90/mkj आकाराणां तेन एकत्वाभ्युपगमस्य अवश्यम्भावात् । अथ **एक एव हि भूतात्मा** ब्र॰ बि॰ ११ इत्यादेः **यथा विशुद्धमाकाशम्** बृहदा॰ भा॰ वा॰ ३ । ५ । ४३ इत्यादेश्च श्रुतेः अविभागोऽपि ब्रह्मा भागीव लक्ष्यत इत्युच्यते; तर्हि **सद्भि[रसद्भि]र्वा** सिद्धिवि॰ १ । १३ इत्यादि समानम् । शक्यं हि वक्तुम्--यदि सद्भिः असद्भिर्वा चेतनेतराद्याकारैः कस्यचिद् ब्रह्मणः एकत्वं तथैव बहिरन्तर्मुखादिभिः तत् किन्न कस्यचिद् बुद्ध्यात्मनः सिध्येत् । यदि पुनः विद्येतरयोः एकत्वविरोधात् तस्माद् आगमो भिन्न इष्यते; तर्हि तदप्रत्यक्षत्वे इदं समानम्--**तदप्रत्यक्षत्वे विषयवत् स्वभावासिद्धिप्रसङ्गात्** सिद्धिवि॰ १ । १५ इत्यादि । तथा च तदागमयोरप्रतिभासनात् सकलशून्यता इति ।
§ 400

स्यान्मतम्--*आरामस्य स्वतो दर्शनम्; स्वसंवेदनग्राह्याकारवत् प्रसङ्गः । यदा तु आरामविविक्तमात्मानमसौ पश्यति; तदा विभ्रमाभावः । नेति चेत्; आयातमिदं समानम्--**वित्तेः** इत्यादि । तदेवं समाने प्रसङ्गे बुद्धिब्र- /ms ह्मात्मनोः त्यागाभ्युपगमाविशेषेण इति मन्यते । ननु किमु ते समानः, यावता बुद्ध्यभ्युपगमे क्षणयस्तत्तनान्तर साधने महान् प्रयासः न पुनः ब्र- ह्मोपगमे तत्र तदभावाऽभ्युपगमादिति चेत्; अत्राह--**केवलम्** इत्यादि । सुगमम् । अयमत्राभिप्रायः--तत्प्रतिभासतया बुद्धिमेकाम् अनभ्युपगच्छ- तोऽपि **समयान्तरप्रवेशः** परस्य इति । § 401

एवं ***ततः किम्** इत्यादिना ग्रन्थेन जातिगुणक्रियात्मिकाम् अध्यक्षे कल्पनां प्रसाध्य, साम्प्रतं यदुक्तं परेण--**न ह्यर्थे शब्दाः सन्ति तदात्मानो वा येन तस्मिन् प्रतिभासमाने तेऽपि प्रतिभासेरन्** इत्यत्र **यद् यत्र नास्ति तस्मिन् अवभासमाने तन्नाऽवभासते यथा रूपे रसः, नास्ति च अर्थे शब्दः** इति; तत्र पराभ्युपगमेन हेतोः व्यभिचारं दर्शयन्नाह--**स्थूलम्** इत्यादि ।
§ 402

१ नात्] ब्रह्मतद्विवर्तयोः ।
३ इत्यादेः] एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥— त्रि॰ ता॰ ५ । १२ ।
४ इ] ...तिमिरोपप्लुतो जनः । संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥ तथेदममलं ब्रह्म निर्विकारमविद्यया कलुषत्वमिवापन्नं भेदरूपं प्रपश्यति ॥--बृहदा॰ भा॰ वा॰ ३ । ५ । ४३, ४४ ।
७ र्मुखादिभिः] एकत्वम् ।
८ मो] आरामो
१० दाग] रा
१२ *] पर्यायस्य ।
१६ ता] सौगताभिमत ।
१६ मे] क्षणक्षयश्च सन्तानान्तरं च, तयोः साधने क्रियमाणे ।
१६ र] क्षणक्षयसन्तानान्तर
२१ रेण] बौद्धेन ।
२२ न्] उद्धृतमिदम्--न्यायप्र॰ वृ॰ पृ॰ ३५ । अष्टस॰ पृ॰ ११८ । न्यायवि॰ वि॰ प्र॰ पृ॰ १३२ ।

...21 स्थूलमेकासदाकारं परमाणुषु पश्यताम् ।
स्वलक्षणेषु पुनस्तेषु शब्दः किन्नावभासते ॥ २१
॥§ 404

शब्दवत् दृश्यमानस्वलक्षणानां तदनात्मतायां कथं तत्र स्थवीयानाकारोऽन्वयी अवभासते रसादिवत् ? यतोऽयं शब्दयोजनारहितमर्थं पश्येत् । § 405

**स्थूलं** महत्वोपेतं **एकम्** अनेकावयवगुणसाधारणम् आकारम् पराभ्युपगमेन **असन्तम्** अविद्यमानं **स्वलक्षणेषु** । कथंभूतेषु ? **परमाणुषु पश्यतां** सौगतानाम् । **पुनः** इति पक्षान्तरसूचकः, तेषां **तेषु शब्दः किन्नावभासते** अवभासत एव असत्त्वाऽविशेषात् । तथा च **पश्यन्नयम् अशब्दमर्थस्य पश्यति** इति दुर्लभम् । § 406

ननु च मरीचिकादौ यथा जलाद्याकार एव असंप्रतिभाति ननुरागाकारः तथा तेषु स्थूलाकार एव प्रतिभाति न शब्दाकारः, प्रतिनियतत्वाद् 91/mkj भ्रान्तीनाम् । तथा दर्शनादिति चेत्; नैतदस्ति; यतः न खलु तेषु कदाचित् क्वचिदसतः स्थूलाकारस्य प्रतिभासदर्शनात् सर्वत्र सर्वदा तेनैव प्रतिभासितव्यम्, तथा शब्दाकारस्य तथा प्रति भासदर्शनात् तेन न प्रतिभासितव्यम् /ms इति निश्चयोऽस्ति, कस्यचिद् उपलशकलविशेषे कदाचिदसतो रजताकारस्य प्रतिभासदर्शनेऽपि तत्रैव पर्यायेण कनकोपयोगिनोऽसतः कनकाकारस्य प्रतिभासदर्शनात्, तेषु शब्दाकारोऽपि प्रत्यभात् प्रतिभात्यत्र प्रतिभास्यति इति शङ्का न निवर्तत इति **तद्धि अर्थसामर्थ्यादुपजायमानम् अर्थस्यैव आकारम् अनुकरोति न शब्दादेः** इति प्राकृतमेतत् । § 407

अन्ये तु मन्यन्ते--चक्षुरादिना रूपादिपरमाणुषु नेन्द्रियान्तरविषयस्या सतोऽपि ग्रहणम्, अदर्शनात् । न वै विभ्रमदशायामपि चक्षुषि गन्धः प्रतिभाति इन्द्रियान्तरवैफल्यं वधिराभावश्च स्यात् इति; तन्न युक्तम्; असर्वदर्शिनोऽदर्शनमात्रेण तथानिश्चयाऽयोगात्, अन्यथा तत एव सर्वरसादीनाम् एकाध्यक्षेण ग्रहणासिद्धेरसर्वज्ञं जगत् स्यात् । मनोक्षविषयस्य स्थूलस्य अनेकावयवगुणसाधारणत्वेन सामान्यस्य एकस्याकारस्य अक्षान्तरे चक्षुरादिकेऽपि प्रतिभासाभ्युपगमात् परेण अनेकान्तः चेत  नेन्द्रियान्तरवैफल्यं निरस्त-

---

११ असंप्र] असन्प्र
१२ नुरागा] नतुरगा
१२ तेषु] परमाणुषु खलक्षणेषु ।
१६ चिद्] पुरुषस्य ।
१७ प] क्रमशः ।
१७ योगि] कनकार्थिनः कस्यचित् ।
१८ तेषु] स्वलक्षणेषु ।
२० इति]
तदुक्तम्--तद्ध्यर्थसामर्थ्येनोपजायमानं तद्रूपमेवानुकुर्यात् ।--हेतुबि° टी° पृ° ११५ । प्र° वार्तिकाल° पृ° २७८ ।
२० प्रा] असङ्गतमेतत्, प्राकृतमेतत् ग्राम्यार्थे प्रयुज्यते, असंस्कृतमित्यर्थः ।
२१ स्या] गन्धादेः ।
२१ स्या] स्य
२४ त] अदर्शनमात्रादेव ।
२५ क्षेण] अतीन्द्रियेण ।
२५ ज्ञं] सर्वज्ञशून्यम् ।
२५ नोक्ष] ऽक्ष
२७ चेत] चेत्;

म्; अन्यथा समान्यस्य चक्षुरादिना ग्रहणे अनुमानवैयर्थ्यमापद्येत तस्य सामान्यविषयत्वात् **अन्यत् सामान्यं सोऽनुमानविषयः** न्यायबि॰ १ । १६, १७ इति वचनात् । § 408

यत्पुनरुक्तम्--वधिराऽभावः स्यात् इति; तदपि न दोषाय; *कस्यचित् तत्प्रतिभासोपगमात्, तस्यावाधिर्येऽपि न सर्वस्य तत् *सोऽपि वा /ms वधिरोऽस्तु श्रवणेन शब्दाऽग्रहणात् । ननु प्रतिभातु शब्दोऽपि तेषु, नैतावता शब्दकल्पना अध्यक्षे, असता तेन तदयोगादिति चेत्; तर्हि अभिलापसंसर्गयोग्यप्रतिभासात् कल्पना क्वचिज् ज्ञाने न स्यात्, *सोऽपि तत्र अन्यत्र वा न परमार्थसन् । अथवा, यथा परमाणुरूपतायां स्थूलाकारोऽसन् न स्वरूपेण बाधकाभावात् तथा शब्दोऽपि इत्यदोषः । § 409

यत्पुनरुक्तं परेण-- § 410

*अर्थोपयोगेऽपि पुनः स्मार्त्तं शब्दानुयोजनम् ।
*अक्षधीर्यद्यपेक्षेत सोऽर्थो व्यवहितो भवेत् ॥ *इति ;§ 412

तदप्यनेन दूषितम्; स्थूलाकारवत् तेषु शब्दाकारस्यापि अस्मृतस्य अवभासाविरोधात् । § 413

92/mkj

**शब्दवत्** इत्यादिना कारिकां विवृणोति--**शब्दस्य इव दृश्यमानानि** प्रत्यक्षीक्रियमाणानि यानि **स्वलक्षणानि** परमाणुलक्षणानि [तेषाम्]**तदनालतायाम्** अतत्स्वभावतायाम् अङ्गीक्रियमाणायाम् आकारस्य स्थवीयसः स **कथं तत्र आकारः स्थवीयान् अन्वयी अवभासते,** नैव । अत्र निदर्शनमाह--**रसादिकमिव** । यथा रसादिकं परस्परमनात्मतायां तत्र परस्परात्मनि नावभासते तथा प्रकृतमपि इति, तस्य आकारस्य प्रतिभाससंभवे स्वलक्षणेषु शब्दः किन्नावभासते ? **यतः** यस्माद् अनवभासाद् **अयं** सौगतो लोको वा **शब्दयोजनारहितमर्थं पश्येत्** । **यतः** इति वा आक्षेपे, नैव पश्येत् । तदेवं व्यवसायात्मके ज्ञाने प्रमाणे सति सुस्थितमेतत्--**प्रमाणस्य फलं साक्षात्** इत्यादि । § 414

---

१ द्येत] अनुमानस्य ।
४ *] सर्वज्ञस्य ।
५ *] सर्वज्ञोऽपि ।
७ तेन] शब्देन ।
८ चिज्] बालकस्य अव्युत्पन्नसङ्केतस्य ।
८ *] अभिलापसंसर्गयोग्यप्रतिभासोऽपि ।
१३ *] निर्विकल्पकप्रत्यक्षम् ।
१३ वेत्] स्मार्तेन शब्दानुयोजनेन, तथा च साक्षात् स्वलक्षणरूपादर्थात् इन्द्रियज्ञानं न स्यात् ।
१३ *] उद्धृतोऽयम्--तत्त्वोप॰ पृ॰ ४० । अष्टस॰ पृ॰ १२२ । न्यायवा॰ ता॰ टी॰ पृ॰ १३६ । न्यायम॰ प्र॰ पृ॰ ८६ । सन्मति॰ टी॰ पृ॰ ५२५ ।
१४ तेषु] स्वलक्षणेषु तद्ग्राहिषु इन्द्रियप्रत्यक्षेषु वा ।
१८ ता] नात्मता
१८ याम्] स्थूलात्मकताभावे ।
२१ स्य] स्थवीयसः ।
२५ इत्यादि] सिद्धिवि॰ १ । ३ ।

अत्रापरः प्राह--स्वार्थयोरभावाद् भ्रान्तत्वाद्वा कस्य का सिद्धिः यतः तस्याः कस्यचित् प्रमाणस्य भावात् तत्सूक्तं स्यात् इति; *तं प्रत्याह--**ब्रुवन्** इत्यादि । § 415 /ms

...22 ब्रुवन् प्रत्यक्षमभ्रान्तं बहिरन्तरसंभवम् ।
अनुमानबलादध्यक्षमनात्मज्ञस्तथागतः ॥ २२ ॥§ 417

स्वभावनैरात्म्यं सर्वथा सर्वभावानां ब्रुवन् प्रत्यक्षमभ्रान्तं लक्षयन् कथमनुन्मत्तः ? कुतश्च यथादर्शनमेव मानमेयफलस्थितिः न पुनः यथातत्त्वमिति स्वयमबुद्ध्येत बोधयति वा प्रमाणादेरभावात् । यथा यथार्थाः चिन्त्यन्ते विशीर्यन्ते तथा तथा इति मिथ्याज्ञानान्न प्रतिपत्तुमर्हति समयान्तरवत् । कथञ्चिद्याथात्म्यप्रतिपत्तिमन्तरेण यथादर्शनमेव क्षणिकभ्रान्तैकान्तचित्तसन्तानान्तराणि स्वभावनैरात्म्यं वेत्यादि ब्रुवतः शौद्धोदनेस्तावदयं प्रज्ञापराधः कथमिति सविस्मयं सकरुणं नश्चेतः । सन्त्यस्यापि अनुवक्तार इति कमन्यदनात्मज्ञतायाः । यथादर्शनं चित्तं बहिर्मुखाकारं परमार्थैकसंवेदनं स्वयमभ्युपयतः परमात्मसिद्धिरेव किन्न भवेत् ? तत्त्वमक्रमं सकलविकल्पातीतं यथादर्शनं मिथ्याव्यवस्थामवतरति, तत्त्वमिथ्यास्वभावयोरेकत्वमभ्युपगन्तव्यम् । तस्मिंश्च सामान्यविशेषात्मकत्वं बहिरन्तश्च परिणामि किन्न लक्ष्यते ? सर्वथा अनेकान्तसिद्धेरनिवारणात् । § 418

**बहिरन्तरसंभवम्** । कथम्भूतम् ? **प्रत्यक्षं** प्रमाणप्रमितं स्वयं तत्प्रतीतौ तथागतस्य प्रत्यक्षैकप्रमाणात्मकत्वेन प्रमाणान्तराभावात् इति मन्यते । कुत एतदिति चेत् ? अत्राह— **अभ्रान्तं** विभ्रमरहितं यतः, तथाविधस्यैव प्रत्यक्षत्वात्, इतरथा मरीचिकाजलवत् कथं प्रत्यक्षं तत् ? किं कुर्वन् ? इत्याह--**ब्रुवन्** विनेयसत्त्वान् प्रति कथयन् । कुतः ? **अनुमानबलात्** त्रिरूपलिङ्गसामर्थ्यात् । वचनमात्रात् तेषां तत्प्रतिपत्त्ययोगात्, प्रमाणान्तरं वा स्यादिति भावः । अत्रापि **अभ्रान्तम्** इति क्रियाविशेषणत्वेन सम्बन्धनीयम्, अभ्रान्तं यथा कुर्वन् इति । कोऽसौ ? इत्याह--**तथागतः** सुगतः । कथम्भूतः ? इत्याह--**अनात्मज्ञः** आत्मानं स्वस्वरूपम् उन्मत्तवत् न जानाति इत्यनात्मज्ञः । कथम् ? **अध्यक्षम्** स्पष्टं यथा भवति । तथाहि--यदि सर्वाभावः; न तर्हि प्रत्यक्षमपि, इति कुतस्तस्य तत्प्रतिपत्तिः यतः तं परं प्रति 93/mkj

---

२ *] अभाववादिनं विभ्रमवादिनं वा ।
१० मेव] प्र° वा° २ । ३५७ ।
१२ श्चेतः] तुलना--तत्र शौद्धोदनेरेव कथं प्रज्ञापराधिनी बभूवेति वयं तावद् बहुविस्मयमास्महे ॥ तत्राद्यापि जडाः सक्तास्तमसो नापरं परम् ।--न्यायवि° १ । ५२, ५३ । अष्टश°, अष्टस° पृ° ११६ । आचार्यस्तस्यैव तावदिदमीदृशं प्रज्ञास्खलितं कथं वृत्तमिति सविस्मयानुकम्पं नश्चेतः । तदपरेऽप्यनुवदन्तीति निर्दयाक्रान्तभुवनं धिग्व्यापकं तमः ।--वादन्या° टी° पृ° ५१ ।
२५ न्] ब्रुवन्
२८ त] बहिरन्तरर्थाभावस्य प्रतिपत्तिः ।

ब्रूयात् । अथ प्रत्यक्षमस्ति; न सर्वथाऽभावः । अस्यापि ततो व्यतिरेके तद्रूपताव्यतिरेके सम्बन्धाऽसिद्धेः, न तस्य ग्रहणम् । तदुत्पत्तिसारूप्यकल्पने; न सर्वशून्यता इति । तथा, परप्रतिपादनोपायलिङ्गवचनभावाभावयोः अनिवृत्तः प्रसङ्गः । यदि च ज्ञानं भ्रान्तम्; कथं प्रत्यक्षम् ? ततः तस्य सिद्धिर्वा विषयवत् । एवं वचनादावपि वक्तव्यम् । § 419

/ms **स्वभाव** इत्यादिना कारिकार्थमाह--**स्वभावनैरात्म्यं** रूपरहितत्वम् **सर्वथा** पररूपादिना इव स्वरूपादिनापि **सर्वभावानां** चेतनेतरवस्तूनां **ब्रुवन्** विनेयसत्त्वान् प्रति कथयन् **प्रत्यक्षं** तद्विषयम् आत्मनि विशदं ज्ञानम् **अभ्रान्तं** विभ्रमरहितम् ***लक्षयन् कथमनुन्मत्तः ?** सुगतः अन्यो वा उन्मत्त एव । यत्पुनरुक्तं परेण-- § 420

*यथादर्शनमेवेयं मानमेयव्यवस्थितिः ।
क्रियतेऽविद्यमानापि ग्राह्यग्राहकसंविदाम् ॥ प्र० वा० २ ।
३५७ इति; § 422

तत्राह--**कुतश्च** इत्यादि । **कुतः** न कुतश्चित् । च शब्दः पूर्वसमुच्चयार्थः । **यथादर्शनमेव**--यथाप्रतिभासमेव **मानमेयफलव्यवस्थितिः न पुनः यथातत्त्वम्** न तु परमार्थाऽनतिक्रमेण **इत्येवम् स्वयम्** आत्मना **अवबुध्येत** पायं **बोधयति वा** । कुत एतत् ? इत्यात्राह--**प्रमाणादेरभावात्** स्वावबोधे अध्यक्षस्य परावबोधे अनुमानस्य प्रमाणस्य आदिशब्देन वचनस्य अभावात् । भावे वा स्ववचनविरोध इति मन्यते । § 423

ननु च न प्रमाणबलात् स्वभावनैरात्म्यं **यथादर्शनमेव** इत्यादि वा कश्चित् प्रतिपद्यते प्रतिपादयति वा येनायं दोषः स्यात्; अपि तु विचारात् । तदुक्तम्-- § 424

**तदेतन्नूनमायातं यद्वदन्ति विपश्चितः ।
यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा ॥ प्र० वा० २ ।
२०९ § 426

इति चेत्; अत्राह--**यथा यथा** इत्यादि । **यथा यथा** येन अवयवावयविबाह्येतरसत्येतरादिप्रकारेण [चिन्त्यन्ते] विचार्यन्ते **अर्था** भावा **तथा**
/ms **तथा विशीर्यन्ते** शून्या भवन्ति **इत्येवं मिथ्याज्ञानात् न प्रतिपत्तुमर्हति,**

---

१ तिरेके] भेदे ।
४ योः] लिङ्गवचनयोः भावः सद्भावश्चेत्; न सर्वशून्यता । अभावश्चेत्; कथं ताभ्याम् परस्य प्रतिपत्तिरिति भावः ।
४ त] प्रत्यक्षात् ।
४ त] सर्वाभावस्य ।
८ म्] स्वस्वरूपे ।
९ *] कल्पनापोढमभ्रान्तं प्रत्यक्षम्न्यायबि०
१ । ४ इत्यादिना लक्षयन् ।
११ मेवेयं] मानमेयफलस्थितिः--प्र० वा० ।
१६ पायं] प्रतिपाद्यं
२२ *] इदं वस्तुबलायातम्--प्र० वा० ।

विचारस्यास्य प्रत्यक्षानुमानत्वेन प्रमाणत्वाभावात् मिथ्याज्ञानत्वमिति भावः । ननु च सर्वस्य तत्त्वव्यवस्थापने अयं विचार एव परं शरणं परमार्थतः प्रमाणादेरभावादिति चेत्; अत्राह--**समयान्तरवत्** इति । समयान्तराणि नित्यादिदर्शनानि तथैव तद्वत् इति । यथा अयं सुगतोऽन्यो वा तेष्वपि मिथ्याज्ञानात् न किञ्चित् प्रतिपत्तुमर्हति तथा स्वसमयेऽपि इति दृष्टान्तार्थः । § 427

94/mkj

अधुना **यथादर्शनमेव** इत्याद्युक्त्वा भावतः सौत्रान्तिकादिसमयभेदेन क्षणक्षयादिकं वदतः सुगतस्य प्रज्ञापराधं दर्शयन्नाह--**कथञ्चिद्** इत्यादि । **कथञ्चित्** केनापि प्रत्यक्षप्रकारेण अनुमानप्रकारेण वा **याथात्म्यप्रतिपत्तिर्या तामन्तरेण यथादर्शनमेव इत्यादि** वचनं **ब्रुवतः** कथयतः । कानि ? **क्षणिकभ्रान्तैकान्तचित्तसन्तानान्तराणि । क्षणिक**ग्रहणं सौत्रान्तिकमततत्त्वोपलक्षणार्थम्, तेन सर्वसंसारेतरवर्त्मवित्तिः गृह्यते । **भ्रान्तैकान्त**वचनम् **यद् विशददर्शनपथावतारि न तत् परमार्थसत् यथा तैमिरिकोपलब्धं केशादि** इत्यस्य माध्यमिकविशेषस्य मतसंग्रहार्थम् **चित्तं** च **तत्सन्तानान्तराणि** इति कथनं योगाचारस्य, तेषां द्वन्द्वः तानि इति । न केवलं तान्येव किन्तु **स्वभावनैरात्म्यं** वा सकलशून्यत्वं **वा ब्रुवतः** । कस्य किं जातम् ? इत्यत्राह--**शौद्धोदनेः** इत्यादि । **शौद्धोदनेः** सुगतस्यैव नान्यस्य **तावदयं प्रज्ञापराधः** /ms **कथं** केन प्रकारेण जातः इत्यध्याहारः **इति** हेतोः **सविस्मयं** साश्चर्यं **सकरुणंसदयं नः** अस्माकं **चेतः । विधूतकल्पनाजाल** प्र° वा° १ । १ *इत्यादि विशेषणस्य कारणमन्तरेणैव स जात इत्यभिप्रायः । साम्प्रतं तदनुसारिणां तदपराधं दर्शयन्नाह--**सन्ति** इत्यादि । **सन्ति अस्यापि** प्रज्ञापराधवतोऽपि **अनु** पश्चात् **वक्तारः** तदुक्तं समर्थयितारः **इति किम् अन्यद् अनात्मज्ञतायाः** सैव इति । § 428

ननु च ग्राह्याकारं स्वप्नेतरसाधारणम् अविचारितरमणीयमुद्दिश्य **यथादर्शनमेव** प्र° वा° २ । ३५७ इत्याद्युक्तम् । तथाह--प्र ज्ञा क र गु प्तः **प्रमाणमविसंवादि ज्ञानम् इत्यादि प्रमाणलक्षणं व्यवहारेण** प्र° वार्तिकाल° २ । ५ एतदेवाह--**यथादर्शनम्** इत्यादि । **यथादर्शनं** प्रमाणादिरूपेण अविचारितरमणीयम् । किं तत् ? इत्यत्राह--**चित्तं** ज्ञानम् । कथंभूतम् ? **बहिर्मुखाकारं** तेन रूपेण तत्तथेति मन्यते । स्वरूपसंवेदनं तूद्दिश्य परमार्थत एव प्रमाणादिरूपम् । तथा चाह स एव **अज्ञातार्थप्र-**

१ स्यास्य] प्रत्यक्षत्वेन अनुमानत्वेन वा प्रमाणत्वाभावे मिथ्याज्ञानत्वमेव आपद्येत ।
४ थैव] तथेव
४ पि] मतान्तरेषु ।
१५ स्य] मतसंग्रहार्थम् ।
१७ नेः] शुद्धोदनस्य अपत्यं शौद्धोदनिः तस्य बुद्धस्येत्यर्थः ।
१९ *] विधूतकल्पनाजालगम्भीरोदारमूर्तये । नमः समन्तभद्राय समन्तस्फुरणत्विषे ॥ इत्यत्र ।
३० एव] प्रज्ञाकरगुप्तः तत्र पारमार्थिकप्रमाणलक्षणमेतत् पूर्वं तु सांव्यवहारिकस्य--प्र° वार्तिकाल° ।

**काशो वा इत्येतल्लक्षणं परमार्थेन प्रमाणान्तरेण अज्ञातस्य संवेदनाद्वैतस्य प्रकाशनात्** प्र° वार्तिकाल° २ । ५ एतदप्याह— **परमार्थ** इत्यादिना । **परमार्थो** वस्तुभूतम् **एकम्** अखण्डम् **संवेदनं** स्वसंवेदनाकारो यस्य तत् तथोक्तम् **चित्तम्** इति सम्बन्धः । ततः **प्रमाणादेरभावात्** इत्यसिद्धमिति भावः परस्य । अत्रोत्तरमाह--**स्वयम्** इत्यादि । **स्वयम्** इत्यादिना **अभ्युप-** /ms **यतः** अभ्युपगच्छतः तथाविधं **चित्तं** सौगतस्य **परमात्मसिद्धिरेव** परमस्य अनेकान्तरूपस्य आत्मनो जीवस्य उक्तन्यायेन सिद्धिरेव न सन्देहादि **किन्न भवेत्** स्यादेव । **परमार्थसिद्धिरेव** इति वा पाठो द्रष्टव्यः । अत्रायमर्थः--यथा प्रतिभासाविशेषेऽपि संवेदनबहिर्मुखाकारयोः परमार्थतः सत्येतरव्यवस्था तथा तदविशेषेऽपि स्वप्नेतरबहिर्मुखाकारयोरपीति निर्णीतप्रायमेतत् । § 429

स्यान्मतम्, सौत्रान्तिकादिदर्शनभेदः संवेदनग्राह्याकारयोः सत्येतरभेदश्च व्यवहारेण न परमार्थतः तथागतेनोक्तः ततोऽयमदोषः । तथा चोक्तम्-- § 430

95/mkj

*द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ माध्य° का° पृ° ४०२ इति । § 432

यदि वा, पूर्वपक्षार्थं तत्तेनोक्तम्, पुनः प्रतिषेधविधानात् । तदुक्तम्-- § 433

*सर्वमस्तीति वक्तव्यमादौ तत्त्वगवेषिणा ।
पश्चादवगतार्थस्य भावग्राहो निवर्त्तते ॥ इति । § 435

शब्दविकल्पातीतं तु तत्त्वमिति । तदेवाह--**तत्त्वम्** इत्यादिना । **तत्त्वं** सविदः परमार्थस्वरूपम् **अक्रमम्** कालादिक्रमरहितम् । पुनरपि कथम्भूतम् ? इत्यत्राह--**सकलविकल्पातीतम्** । नित्याऽनित्य-सत्याऽसत्य-स्वपर-ग्राह्य-ग्राहकसंवेदन-एकानेकादिभावादयः सकलविकल्पाः तान् अतीतम् । कथं तत्तथेति चेत् ? अत्राह--**यथा** इत्यादि । दर्शनस्य प्रतिभासस्य अनतिक्रमेण /ms **यथादर्शनम्** । अत्र दूषणं दर्शयन्नाह-- **मिथ्या** इत्यादि । **मिथ्याव्यवस्थाम्** असत्यामवस्थितिम् **अवतरति** । कथमिति चेत् ? उच्यते--अक्रमत्वं सकलविकल्पातीतत्वं यदि तस्य भावतोऽस्ति; कथं सकलविकल्पातीतम् ? तयोरेव विकल्पत्वात् । अथ नास्ति; तथापि कथं तदतीतम् ? तदतीतत्व-

---

१९ भा] बाह्यार्थोऽस्तीति ग्राहः अभिनिवेशः । उद्धृतोऽयम्--न्यायवि° वि° द्वि° पृ° १७ ।
२३ ल्पाः] तुलना--यद्भावस्वपरभावसत्यासत्यशाश्वतोच्छेदनित्यानित्यसुखदुःखशुच्यशुच्यात्मानात्मशून्याशून्यलक्ष्यलक्षणैकत्वान्यत्वोत्पादनिरोधादयो विशेषाः तस्य न संभवन्ति ।--बोधिच° प° पृ° ३६६ ।
२८ त] अक्रमत्वसकलविकल्पातीतयोः ।
२८ त] सकलविकल्पातीतत्व ।

निषेधे सकलविकल्पप्रसक्तेः, अभावनिषेधस्य विध्यात्मकत्वात् । अथवा, यदुक्तं [न] तन्नित्यं तथोपलम्भवैधुर्यात् । एकं हि कालत्रयानुयायि नित्यम्, तस्य कुतश्चिदनुपलम्भ इति तत्र तदक्षा *वोऽपि । यथैव हि मध्यक्षणे क्षीणकुक्षि प्रत्यक्षं न पूर्वोत्तरक्षणौ ईक्षितुं क्षमते तथा नीलावलोकनान्नीलं न शुक्लादिकमाम् , एवं नीलमात्रांशेष्वपि तावच्चिन्त्यम् यावत् मध्यक्षणवत् प्रतिपरमाणुनियतसंविदां सिद्धिः, तत्र च एकपरमाणुवेदनेनान्यासामुपलम्भेन सन्तानान्तरसमता, तद्वेदनमपि विवादगोचरचारीति किन्नाम तत्त्वं यद् अक्रमं सकलविकल्पातीतं भवेत् । एवम् अनित्यं तन्न भवति इत्यत्रापि चिन्त्यम् । यथा खलु पूर्वोत्तरक्षणयोरदर्शने न सत्त्वं नापि ताभ्यां विवेको मध्यक्षणस्य क्षणिकत्वं प्रत्येतुं शक्यं तथा नीलादितदंशानां सत्त्वं विवेको वा प्रत्येतुं कथं शक्यो यतः सकलविकल्पातीतं तत्त्वं भवेत् । § 436

एतेन एकानेकविकल्पशून्यत्वं परीक्षितम्, न्यायस्य समत्वात् । तथापि तत्त्वकल्पने तत् **मिथ्या[व्य]वस्थामवतरति इति** हेतोः संवेदनलक्षणो यः **तत्त्वस्वभावः** स्थिरस्थूलादि ग्राह्याकारलक्षणश्च **मिथ्यास्वभावः** तयो**रेकत्वम्** /ms
**अभ्युपगन्तव्यम्** । **तस्मिंश्च** तत्त्वमिथ्यास्वभावैकत्वे अभ्युपगम्यमाने **सामान्यविशेषात्मकम्** । क्व ? **बहिरन्तश्च** । कथम् ? **यथादर्शनं** दर्शनाऽनतिक्रमेण । कथम्भूतम् ? **परिणामि** तत् **किन्नलक्ष्यते** ? लक्ष्यत एव तत्त्वमिति । ननु घटाद्याकार एव संवेदनं न तस्मात् तदन्यद् ग्राह्याकारो वा तत्कथं तत्त्वमिथ्यास्वभावैकत्वमिति चेत् ? अत्राह--**सर्वथा** इत्यादि । **सर्वथा** सर्वेण 96/mkj
तत्त्वमिथ्यास्वभावैकत्वेन घटाद्याकारस्य संवेदनेन अन्येन च उक्तेन प्रकारेण **अनेकान्तसिद्धेरनिवारणात्** कारणसामान्य इत्यादि लक्ष्यते इति । § 437

एवं तावत् सिद्धिः अर्थनिश्चयः साक्षात् प्रमाणस्य फलं प्रसाध्य, अधुना सिद्धिः स्वनिनिश्चयः तथा तत्फलं समर्थयमानः प्राह--**सिद्धम्** इत्यादि । § 438

...23 सिद्धं यन्न परापेक्षं सिद्धौ स्वपररूपयोः ।
तत्प्रमाणं ततो नान्यदविकल्पमचेतनम् ॥ २३
॥§ 440

प्रमातृप्रमितिप्रमेयप्रमाणानां साकल्येन प्रमेयत्वं सदृशं रूपम्, तत्रैतावान् विशेषः स्वतः सिद्धं प्रमाणम् । सिद्धिः अविप्रतिपत्तिः, अव्युत्प-

---

३ *] भा
५ माम्] मात्राम्
६ नेनान्यासामु] सामनु
७ ता] सन्तानान्तरवदभाव इत्यर्थः ।
९ नापि] पूर्वोत्तराभ्याम् ।
१२ एतेन] निःस्वभावा अमी भावाः तत्त्वतः स्वपरोदिताः । एकानेकस्वभावेन वियोगात् प्रतिबिम्बवत् ॥--बोधिच० प० पृ० ३४८ ।
१८ एव] रमेव
२३ यः] साक्षात् ।
२६ म्] उद्धृतोऽयम्--न्यायवि० वि० प्र० पृ० ९८ ।

त्तिसंशयविपर्यासलक्षणाज्ञाननिवृत्तिः प्रमितिः । तद्यतः सम्पद्यते तत्प्रमाणम् । तत्पुनः यावतोः स्वभावपरभावयोः साधनमन्यानपेक्षं प्रमात्मत्वात् न पुनः स्वसंविन्मात्रं निर्णयरहितम् अतिप्रसङ्गात् । सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षं हिताहितप्राप्तिपरिहारसमर्थमिच्छतां स्वापप्रबोधयोः को विशेषः संभाव्यते यतः स्वापादौ सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिर्न भवेत् । न हि स्वापादौ चित्तचैतसिकानामभावं प्रतिपद्यमानान् प्रमाणमस्ति । न च तेषां तदा आत्मसंवेदनं मुक्त्वा सतां लक्षणान्तरमस्ति यतः प्रत्यक्षलक्षणं ततो निवर्तेत । स्वापादिस्वसंवेदनस्य जाग्रच्चित्तचैतसिकक्षणक्षयादिस्वसंवेदनस्य च कश्चिद् विशेषं संप्रेक्षामहे यतस्तदनुपलक्षितमास्ते । साक्षात् संप्रतिपत्तिभावाविशेषात् । तथा च स्वार्थविषयं प्रमाणमिति जाग्रद्विज्ञानक्षणक्षयादिस्वभावसंवित्तेः प्रत्यक्षात्मनोऽपि यद्यप्रमाणत्वं न तर्हि संवित्तेः प्रत्यक्षता । यदि पुनः संवित्तिस्तथैव सत्यपि प्रत्यक्षं न स्यात् प्रमाणं वा प्रमाणलक्षणं ततोऽन्यथैव व्यवस्थापनीयं यदतिव्यापकं न भवेत् । तथा च सर्वं स्वभावे परभावे वा कथञ्चिदेव प्रमाणं न सर्वथा । चक्षुरादिज्ञानस्यापि सर्वथा परतः प्रामाण्ये कुतस्ततोऽर्थं परिच्छिद्य प्रवर्तमानस्य पुनरविसंवादः ? क्षणक्षयादौ विसंवादेऽपि नीलादौ प्रमाणत्वे मृगतृष्णादिज्ञानस्यापि सलिलादिविसंवादिनः कथञ्चित्प्रमाणत्वं परीक्षायाः प्रतिष्ठापयितुं युक्तम्, अन्यथा तद्दर्शिनः सुप्तत्वाविशेषप्रसङ्गात् । यथैव हि परतः प्रमाण्यैकान्ते अनवस्थानादप्रतिपत्तिः तथैव सर्वज्ञानानां स्वतः स्वभावानिश्चयैकान्ते । ततः सर्वज्ञानानां स्वरूपव्यवसायात्मकत्वं चित्तचैतसिकानां निर्विकल्पप्रत्यक्षलक्षणं निराकरोत्येव । स्वसंवेदनमन्तरेण अर्थग्रहणानुपपत्तिवत् स्वरूपव्यवसायमन्तरेण विषयव्यवसायानुपपत्तिश्चोक्ता । तन्नायमेकान्तः संवित्तिः सर्वा संवित्स्वभावापि सती स्वरूपं वेदयत्येव वेदयति भ्रान्तेरभावप्रसङ्गात्, व्यवसायात्मकत्वाद्वा स्वरूपं सर्वथा व्यवस्यति । तथा च स्वार्थानुभवेतरस्वभावलक्षणं स्वपररूपव्यवसायेतरस्वभावं वा बिभ्राणं विज्ञानं तदन्तरेण न कथञ्चिदुपपनीपद्येत । तन्नाविकल्पदर्शनं प्रमाणं स्वयमनुभूतस्वभावस्यापि सर्वथा अननुभूतकल्पत्वात् चेतनत्वेऽपि सुषुप्तादिवत् । [97/mkj] स्वविषयीकृते वस्तुनि तदन्तरापेक्षित्वात् तदपेक्षणीयस्यैव प्रामाण्यम्, तत्कारणत्वेऽपि सन्निकर्षादिवत् मुख्यतः प्रमाणतानुपपत्तेः । उपचारतः सन्निकर्षादेः व्यपदेशाविघातात् । यतः प्रभृति प्रेक्षापूर्विका पुरुषप्रवृत्तिः तस्य मुख्यतः प्रमाणत्वोपपत्तिः । स्वेक्षितेऽन्यानपेक्षस्य अविसंवादैकभवनस्य विकल्पविषयस्य च तत्त्वतः, यतोऽयमस्खलद्वृत्तिः हिताहितप्राप्तिपरिहारयोः सङ्करव्यतिकरव्यतिरेकेण प्रवर्तेत । अतस्तद्द्वेषी तत्कारी चेत्युपेक्षामर्हति । § 441

**सिद्धं** निश्चितं **यत्** तत् प्रमाणं न पुनः मीमांसक-सांख्यकल्पितं परोक्षं ज्ञानमिति मन्यते । क्व प्रमाणम् ? इत्यत्राह--**सिद्धौ** निर्णीतौ कर्त्तव्यायाम् नाऽधिगतिमात्रे, क्षणक्षयाद्यनुमानवैफल्यप्रसङ्गादिति भावः । ननु निश्चयान्त-

३६ ल्य ] क्षणक्षयस्य अधिगतिस्तु

रेण निश्चितं निर्विकल्पकं वा सविकल्पकं वा स्वसंवेदनं तत् प्रमाणम्, अतः सिद्धसाधनमिति चेत्; अत्राह--**न परापेक्षम्** इति । तत्सिद्धौ यत् परापेक्षं न भवति अपि तु स्वतः सिद्धमिति । **ततः** तस्माद् उक्ताद**न्यत् न प्रमाणम्** । किं तत् ? इत्यत्राह-- **अविकल्पमचेतनम्** च स्वसंवेदनशून्यं /ms घटादिप्रख्यं यद् विज्ञानम् इति । § 442

कारिकां विवृण्वन्नाह--**प्रमातृप्रमिति** इत्यादि । **प्रमाता** चेतनः परिणामी वक्ष्यमाणो जीवः **प्रमितिः** स्वार्थविनिश्चयः अज्ञाननिवृत्तिः साक्षात् प्रमाणस्य फलं **प्रमेयं** घटादिवस्तु तेषां **साकल्येन** अनवयवेन **प्रमेयत्वं** प्रमाणविषयत्वं **सदृशं रूपं** साधारणः स्वभावः **प्रमाणस्य च** निर्णयज्ञानस्य च अन्यथा तत्सत्ताऽसिद्धिरिति भावः । एवं तर्हि सर्वेषां प्रमेयत्वात् प्रमेयपदेनैव वचनात् किमर्थं प्रमात्रादीनां पृथगुपादानमिति चेत् ? प्रमेयशब्दस्य घटादावेव प्रवृत्त्यर्थम् । ततोऽयमर्थो लभ्यते--प्रमात्रादीनां प्रमातृत्वादिवत् प्रमेयत्वमप्यस्ति, प्रमेयस्य तु तदेव इति यदुक्तं परेण--**प्रदीपादयः प्रमेया अपि ज्ञानहेतुत्वात् प्रमाणमपि** इति; तन्निरस्तम् । प्रमीयते संशयादिव्यवच्छेदेन मीयते वस्तुतत्त्वं येन तत्प्रमाणम् । न च प्रदीपादिना तथा किञ्चित् मीयते, ज्ञानकल्पनावैफल्यप्रसङ्गात् । तद्धेतुत्वेन तत्प्रमाणत्वे घटादिरपिस्त्वं प्रमाणं भवेत् तदविशेषात् **अर्थवत् अर्थसहकारिव्यवसायात्मकाऽव्यपदेश्याऽव्यभिचारिज्ञानजनने प्रमाणम्** इति वचनात् । **प्रमेयादर्थान्तरं प्रमाणम्** इत्यपि वचनात् नायं दोष इति चेत्; तर्हि तत एव प्रमात्रादीनां प्रमातृत्वादि दुर्लभम् । तथापि तेषां तत्त्वे प्रमेयस्य प्रमाणत्वमनिवार्यम् । एवमर्थं च /ms **तेषां प्रमेयत्वं सदृशं रूपम्** इत्युक्तम् । ततो यथा घटादीनां ज्ञानहेतुत्वेऽपि न प्रमाणत्वं तथा प्रदीपादेरपि किन्तु प्रमेयत्वमेव इति तथा तदुपादानमिति । § 443

स्यादेतत्--सिद्धं परानपेक्षं प्रमाणम् इति प्रस्तुते किमर्थमप्रस्तुतं प्रमेयत्वं तेषु प्रस्तूयत इति चेत् ? उच्यते--**प्रमातृप्रमेयाभ्यामर्थान्तरं प्रमाणम्** इत्यभिधानात् प्रमाणवत् प्रमातृप्रमितिभ्यामपि ततो भिन्नाभ्यां भवितव्यम् । न चैवम्, अनुपलम्भेन तदसत्त्वादिति न सूक्तमे तत्--**चतसृष्वेवंविधासु** 98/mkj **तत्त्वं परिसमाप्यते यदुत प्रमाता प्रमितिः प्रमेयं प्रमाणमिति** न्यायभा° पृ° १ । अथ प्रमेयमपि तच्चतुष्टयं तथेष्यते; **प्रमातृप्रमेयाभ्यामर्थान्तरं प्रमाणम्**

---

निर्विकल्पकप्रत्यक्षादेव जाता अतः तदेव तत्र प्रमाणमिति नानुमानस्य आवश्यकतेति भावः ।

१३ देव] प्रमेयत्वमेव ।

१४ इ] प्रदीपप्रकाशो घटाद्युपलब्धिसाधनस्याङ्गत्वात् प्रमाणम्--न्यायवा° २ । १ । १९ ।

१६ त] ज्ञानहेतुत्वेन ।

१६ पिस्त्वं] रप्येवं

१७ त] तद्धेतुत्वाविशेषात् ।

२० त] प्रमात्रादित्वे ।

२६ इ] साधकतमं प्रमाणं न तु प्रमातृप्रमेये--न्यायवा° पृ° ६ । प्रमातृप्रमेयव्यवच्छेदार्थं फलाद्भेदज्ञापनार्थश्च साधनग्रहणम् ।--न्यायसा° पृ° २ । करणव्युत्पत्तेश्च कर्तृकर्मविलक्षणमेतद् वेदितव्यम् । --न्यायकलि° पृ° १ ।

इत्यस्य व्याघातः, इत्यस्य प्रतिपादनार्थं प्रस्तूयते । अथवा यदुक्तम्--**ज्ञानं स्वतोऽर्थान्तरेणैव ज्ञानेन वेद्यते प्रमेयत्वात् घटादिवत्** इति; तत्र यथा घटादिकं प्रमेयत्वे सति भिन्नेनैव ज्ञानेन वेद्यमानं दृष्टं तथा प्रमात्रा[द्य]पि । ततो घटादिनिदर्शनेन यद्वत् प्रमेयत्वात् तज्ज्ञानं तदन्तरेणैव विषयीक्रियते इति साध्यते तद्वत् तत एव प्रमातापि तदन्तरेणैव विषयीक्रियते इति साध्यतामविशेषात्, तदन्तरमपि तदन्तरेणैवेत्यनवस्थानान्न कस्यचित् प्रमातुः /ms प्रतिपत्तिः इत्यभावः । अथ तदविशेषे प्रमाता स्वयमेव आत्मानं प्रमिणोति; तर्हि ज्ञानं ज्ञानान्तरेणैव ज्ञायते प्रमेयत्वात् इत्यस्य तेनैव व्यभिचार इत्यस्य कथनार्थं तत् प्रस्तूयते । § 444

एवमपि **प्रमातृप्रमितिप्रमेयप्रमाणानां साकल्येन प्रमेयत्वं सदृशं रूपम्** इति वक्तव्ये किमर्थम् **प्रमाणस्य च** इति प्रथग् वचनमिति चेत् ? स्वतः सिद्धत्वेन प्रमेयादस्य प्राधान्यख्यापनार्थम् । एतदेव दर्शयन्नाह--**तत्रैतावान्** इत्यादि । **तत्र** तेषु प्रमात्रादिषु मध्ये प्रमाणस्य **विशेषः** भेदः **एतावान्** अधिकः **स्वतः सिद्धं प्रमाणम्** । ननु प्रमातापि स्वतः सिद्ध इति चेत्; सत्यम्; अतएव नैवमवधारणीयम् प्रमाणमेव इति, किन्तु स्वतःसिद्धमेव इति । **सिद्धं** निर्णीतम् अधिगतमिति । ततो निरस्तमेतत्--**परोक्षा हि नो बुद्धिः प्रत्यक्षोऽर्थः, स हि बहिर्देशसम्बद्धः प्रत्यक्षमनुभूयते, ज्ञाते त्वनुमानादवगच्छति** शाबरभा० १ । १ । ५ इति । कथम् ? येन हि साक्षात् प्रमेयं परिच्छिद्यते तत्प्रमाणम्, न च परोक्षबुद्ध्या तथा किञ्चित् परिच्छिद्यते, इतरथा सन्तानान्तरबुद्ध्यापि परिच्छिद्यते इति सर्वदर्शित्वम् । आत्मबुद्ध्या इति नोत्तरम्; परोक्षायां तथा निश्चयविरहात् । न खलु आत्मनि ज्ञानमस्ति परत्र च इति श्रोत्रियस्य निश्चयोऽस्ति । § 445

स्यान्मतम्--मम *अर्थापरोक्षताजननात् मयि इति निश्चय इति; तदपि न सुन्दरम्; यतः अर्थापरोक्षता तज्जनितापि केन प्रतीयते ? न तावदर्थेन; /ms अचेनत्वादस्य अर्थान्तरवत् । नापि बुद्ध्या; तस्याः परोक्षत्वात्, अतिप्रसङ्गात् । अत एव नात्मनापि । तन्न अर्थापरोक्षता उत्पन्ना प्रत्येतुं शक्या । किंच, मम सा इत्यपि कुतः ? मदीयबुद्धिजन्यत्वादिति चेत्; अन्योन्यसंश्रयः--सिद्धे हि तस्या मदीयबुद्धिजन्यत्वे मम सा इति निश्चीयते,

---

१ म्] विवादाध्यासिताः प्रत्ययान्तरेणैव बेद्याः प्रत्ययत्वात् । एवं प्रमेयत्वगुणत्वसत्त्वादयोऽपि प्रत्ययान्तरवेद्यत्वहेतवः प्रयोक्तव्याः ।--विधिवि० न्यायकणि० पृ० २६७ । ज्ञानान्तरसंवेद्यं संवेदनं वेद्यत्वात् घटादिवत्--प्रश० व्यो० पृ० ५२९ ।
४ त] ज्ञानान्तरेणैव ।
५ त] प्रमात्रन्तरेणैव ।
८ तेनैव] प्रमात्रा ।
१२ स्य] प्रमाणस्य ।
१९ त] साक्षात् ।
२० इ] परम्परया, अथवा परोक्षरूपेण ।
२० ते] द्येत
२१ त] इयम् आत्मबुद्धिरिति ।
२२ च] वा
२२ स्य] मीमांसकस्य ।
२३ म] मीमांसकस्य ।
२३ *] अर्थविषयकप्रत्यक्षताजननात् ।
२४ ता] ज्ञानजनितापि ।
२७ म] अर्थापरोक्षता ।
२८ हि] अर्थपरो क्षतायाः ।

तन्निश्चये च तन्मदीयबुद्धिजन्यत्वनिश्चयः इति । मम सा इति निश्चयेऽपि न मदीयबुद्धिजन्यत्वनिश्चयः, अन्यसम्बन्धिकारणजन्यानामपि मम इति निश्चयदर्शनात् अन्यव्यानात्  मम विषापहारादिवत् इति । तन्न **प्रत्यक्षोऽर्थः** शावरभा० १ । १ । ५ इत्यादि सूक्तम् । § 446

99/mkj

एतेन **ज्ञाते त्वनुमानादवगच्छति** शाबरभा० १ । १ । ५ इति निरस्तम्; अर्थज्ञातत्वस्य हेतोरसिद्धेः । अपि च, तज्ज्ञातत्वं क्व बुद्धौ प्रतिबद्धं प्रतिपन्नं येन ततस्तदनुमानम् ? अथ अर्थप्रत्यक्षता कादाचित्कत्वात् कस्यचित् कार्यम्; कारणस्य ततः त[द्] बुद्धिः इति नाम क्रियते इति; क्रियताम्, यदि चक्षुरादिव्यतिरिक्तं तत्कारणं व्यवस्थापयितुं शक्येत । इदं तु युक्तम्--चक्षुरादिव्यापारानन्तरं तद्भावात् तदेव तत्कारणम्, चक्रादिव्यापारानन्तरं यथा घटस्य भावात् चक्रादि कारणम् । चक्षुरादेरेव तन्नाम इति चेत्; किं पुनरेतद्बालभाषितम्--**सत्सम्प्रयोगे यद् बुद्धिजन्म तत् प्रत्यक्षम्** मी० द० १ । १ । ४ इति ? तन्न अर्थप्रत्यक्षताया बुद्धेरनुमानम्, उक्तन्यायेन परबुद्धेरपि तत्कारणत्वेस्व बुद्धेश्च । किं च तदनुमानम् ? अर्थापत्तिबुद्धिरेव । तस्या स्व  परोक्षत्वे तदेव  चोद्यमनवस्था च । तन्न श्रोत्रियमतं सूक्तम् /ms
। § 447

एतेन **इन्द्रियाणि अर्थमालोचयन्ति अहङ्कारोऽभिमन्यते मनः संकल्पयति बुद्धिरध्यवस्यति पुरुषश्चेतयते ॥** इति चिन्तितम् । पुरुषस्य परोक्षत्वे न तस्य बुद्धिः अन्यद्वा, प्रयुक्तन्यायस्य समानत्वात् । § 448

तर्हि ज्ञानान्तरग्राह्यत्वात् सिद्धं तदिति चेत्; अत्राह--**स्वत** इति । अत्रायमभिप्रायः--यथा खलु मीमांसकस्य परोक्षज्ञानग्राह्योऽर्थो न सिद्धो भवतीति ज्ञानान्तरं कल्पितं तथा परोक्षज्ञानग्राह्यं ज्ञानमपि न सिध्यतीति तत्रापि तदन्तरं कल्पनीयम्, अन्यथा द्वितीयमपि ज्ञानं न कल्पनीयं भवेत्, तथा च अनवस्था[ना]त् **स्वज्ञानं तदन्तरेणैव गृह्यते प्रमेयत्वात् घटादिवत्** इत्यत्र धर्मिहेतुदृष्टान्तासिद्धिः । अथ तज्ज्ञानं स्वतःसिद्धमिष्यते; तर्हि धर्म्यादिग्राहकप्रमाणबाधितत्वात् कालात्ययापदिष्टो हेतुः स्यात् । § 449

यत्पुनरुक्तं परेण--**ज्ञाने ज्ञानान्तरेण वेद्ये मम घटादिदृष्टान्तोऽस्ति न स्ववेद्ये जैनस्य** इति; तन्न; अस्य दृष्टान्त एव नास्ति, भवतः पुनः सक-

---

२ पि ] पुत्रादीनाम् ।
३ व्यानात् ] [[अन्येन मन्त्रप्रयोगे कृते यथा अन्यस्य विपापहारो भवति, तत्रापि मम इति प्रत्ययो भवतीत्यर्थः ।]]अन्यध्यानात्
७ त ] ज्ञातत्वात् इति हेतोः ।
९ त ] अर्थप्रत्यक्षताकारणम् ।
१० त ] चक्षुराद्येव ।
१४ त्वेस्व ] णत्वं स्व
१५ स्व ] श्च
१८ इति ] सांख्यमतम् । एवं बुद्ध्यहङ्कारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा--चक्षू रूपं पश्यति मनः सङ्कल्पयति अहङ्कारोऽभिमानयति बुद्धिरध्यवस्यति ।--सांख्यका० माठर० का० ३० ।
२३ नीयं ] न व्यवस्थापयितुं शक्यते ।
२४ इत्य ] द्रष्टव्यम्--पृ० ९८ टि० १ ।
२८ अस्य ] जैनस्य तु केवलम् ।
२८ भ ] मीमांसकस्य ।

लानुमानसामग्र्यभावः । किञ्च, भवतोऽपि नीलं नीलम् इत्यत्र न कश्चिद् दृष्टान्तः । प्रत्यक्षसिद्धेः  किं तेन इत्यपि समानम् । यथा खलु नीले नीलतया न लोकस्य विवादः तथा अहमहमिकया प्रतीयमाने ज्ञाने स्वसंवेदनेऽपि । यदि पुनरयं निर्बन्धः--अनुमानमन्तरेण न तत्सिद्धिः, *तदपि न /ms दृष्टान्तमन्तरेण इति; सोऽपि न, सात्मकं जीवच्छरीरं प्राणादि मत्त्वात्(?') इत्यादिवत् अर्थज्ञानं स्वग्रहणात्मकम् अर्थग्रहणात्मकत्वात्, यत् पुनः स्वग्रहणात्मकं न भवति तद् अर्थग्रहणात्मकमपि न भवति यथा अर्थान्तरम् इत्येतावतैव प्रयोजनपरिसमाप्तेः । तत्सूक्तम्--**स्वतःसिद्धम्** इति । § 450

नन्वेवमपि कारिकायां वृत्तौ च दृष्टवचनं स्पष्टार्थं कर्त्तव्यं न सिद्धवचनमिति चेत्; तन्न; 100/mkj *निर्विकल्पस्वसंवेदनदृष्टमपि दृष्टम् इत्याशङ्का न निवर्त्तेत, न च तत् प्रमाणम् । ज्ञापकं हि प्रमाणमिष्यते, न च तदेवम्, अन्यथा दान-हिंसाविरतिचेतसां स्वर्गप्रापणसामर्थ्यं स्वर्गादिफलज्ञापकं भवेत्, न चैवमिति प्रतिपादयिष्यते । विषयदर्शनवादिना सिद्धवचने पुनः क्रियमाणे सिद्धं निर्णीतम् इति गम्यते, सिद्धः पक्षो निर्णीतः इति प्रसिद्धिदर्शनात् । ततः साधूक्तम्--**स्वतः सिद्धं प्रमाणम्** इति । § 451

कुत एतदिति चेत् ? अत्राह--**सिद्धिः** इत्यादि । **सिद्धिः** तत्त्वनिर्णीतिः । अस्याः पर्यायमाह--**अविप्रतिपत्तिः अव्युत्पत्तिसंशयविपर्यासलक्षणाज्ञाननिवृत्तिः** । अनेकाधि  अनेन **अधिगतिः तत्फलम्** इति वचनात् तन्मात्र सिद्धिः इत्यादि शङ्का निवर्त्तयति । तथा अप्र  **सिद्धिः**, सा किम् ? इत्यत्राह--**प्रमितिः** प्रमाणफलम् । एतेन सर्वेण **सिद्धौ** इत्येतद् व्याख्यातम् । सा **यतः** यस्मान्निष्ठात् **सम्पद्यते** समाप्तिं प्रतिपद्यते **तत्** वस्तु **प्रमाणम्** । अत्र सिद्धसाधनम् इत्यपरे । तान् प्रत्युत्तरमाह--**तत्पुनः** इत्यादि । ततः /ms तन्निष्ठात् **पुनः** इति भावनायाम् **स्वभावपरभावयोर्यावतोः**  यत्परिमाणयोः अनेन छद्मस्थज्ञानम् अंशेन प्रमाणम् इत्युक्तं भवति । तयोः किम् ? **साधनं** साधकम् **यावतोरि**ति वचनात् तावतोः प्रमाणम् इति गम्यते **यत्तदोर्नित्यः सम्बन्धः** इति न्यायात् । तत् किम् ? इत्याह— **अन्यानपेक्षम्** इति । व्याख्यातमेतत् । कुत एतत् ? इत्यत्राह--**प्रमाणत्वात्** । **प्रमा** प्रमाणं

---

१ म्] नीलात्मकमेव ।
२ सिद्धेः] द्धे
२ तेन] दृष्टान्तेन ।
२ पि] ज्ञानस्य स्वसंवेद्यत्वे ।
४ *] अनुमानमपि ।
१० *] बौद्धाभिमत ।
११ त्] निर्विकल्पकम् ।
१२ दा] दानचित्ते अहिंसकचित्ते च स्वर्गप्रापणसामर्थ्यमस्ति । बौद्धमते च वस्तु निरंशं विद्यते । अतः तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः । इति न्यायात् दानादिचित्तग्राहिणा निर्विकल्पेन तत्सामर्थ्यमपि गृहीतम्, तथा च दानादिग्राहिचित्तादेव स्वर्गादिफलज्ञप्तिः स्यादिति दोषः ।
१८ इति] किं पुनरस्य प्रमाणस्य फलम् ? प्रमेयाधिगतिः ।--प्र° वार्तिकाल° ३ । ३०१ ।
१८ त] अधिगतिमात्रमेव सिद्धिरिति ।
१८ न्मात्र] त्रं
१९ ङ्का] शङ्कां
१९ अप्र] अत्र
२७ माण] त्म

तद् **आत्मा** स्वभावो यस्य तस्य भावात् **तत्त्वात्** । एतदुक्तं भवति--प्रमाणं करणम्, तच्च साधकतमम्, न च सिद्धिफलं प्रत्यन्यापेक्षं तद्युक्तमिति । § 452

ननु मा भूत् नैयायिकादिकल्पितम् अन्यापेक्षं ज्ञानं प्रमाणं सौगतविकल्पितं तद्विपरीतं स्यादिति चेत्; अत्राह--**न पुनः** इत्यादि । **स्वसंवित्तेः** एतन्मात्रं **निर्णयरहितं** स्वसंवेदनं तत् **न पुनः** नैव स्वभावपरभावयोः प्रमाणम् इति । कुत एतत् ? इत्यत्राह--**अतिप्रसङ्गात्** इति । स्वाप[म]दगर्भाण्डमूर्च्छितस्वसंवेदनमपि प्रमाणं भवेदविशेषात् । ननु किमुच्यते अविशेषात् इति, यावता विशेषोऽस्ति इति चेत्; अत्राह--**सर्वचित्तचैत्तानाम्** इत्यादि । सर्वाणि जाग्रत्सुप्तमूर्च्छितादिसम्बन्धीनि यानि चित्तानि नीलादिज्ञानानि चैत्तानि सुखादिविकल्पवेदनानि तेषाम् **आत्मनः** स्वरूपस्य **संवेदनं प्रत्यक्षं** कल्पनापोढाऽभ्रान्तत्वाभ्यां प्रमाणम् । कथम्भूतम् ? इत्याह— **हित** इत्यादि । **सम्यग्ज्ञानपूर्विका सकलपुरुषार्थसिद्धिः** न्यायबि० १ । १ इति वचनात् **हितं** स्रगादि, **अहितं** विषादि तयोः याथासंख्येन **प्राप्तिश्च परिहारश्च** तयोः **समर्थम्, इच्छतां** सौगतानां **स्वापो** सुस्वप्नदर्शिन्यवस्था, **प्रबोधः** /ms तस्मात् उत्थितचित्तदशा **तयोः** अधिकरणयोः **को विशेषः** न कश्चिद्भेदस्तस्य **संभाव्यते,** साक्षात्सम्प्रतिपत्तेरभावाऽविशेषादिति मन्यते । [यतः] यस्मात् विशेषात् **स्वापादौ** आदिशब्देन मदादिपरिग्रहः **सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिर्न भवेत्** । **यतः** इति वा आक्षेपे, स्यादेव इति । एतेन परस्य जाग्रत्-सुप्त-सुषुप्त-मृतावस्थाचतुष्टयाभावं दर्शयति । § 453

101/mkj

स्यान्मतम्--स्वापादौ तेषामनुपलम्भेन असत्त्वात् कथमयं दोषः ? इत्यत्राह--**नहि** इत्यादि । **हि** र्यस्मात् **न स्वपादौ चित्तचैतसिकानाम् अभावं प्रतिपद्यमानान्** प्रति यद् दर्शयति तत् **प्रमाणमस्ति** यावान् कश्चित् प्रतिषेधः स सर्वोऽनुपलब्धिः , सा च प्रबोधेऽपि अस्ति । अत एवोक्तम्--**स्वापप्रबोधयोः को विशेषः संभाव्येत** इति । न च अनैकान्तिकाद् हेतोः साध्यसिद्धिः अतिप्रसङ्गादिति मन्यते । § 454

किञ्च, तदनुपलब्धिः स्वसम्बन्धिनी, परसम्बन्धिनी वा स्यात् ? स्वसम्बन्धिनी चेत्; सा उपलब्धिनिवृत्तिरूपा यदि; कथमतस्तदभावसिद्धिः ? इतरथापि तन्नि[वृत्ति]स्तदभावज्ञापिका स्यात् । ज्ञाता च सा तज्ज्ञापिका ज्ञापकत्वात् धूमवत् । तज्ज्ञप्तिश्च यदि तदन्तरात्; अनवस्था । उपलब्ध्यन्तरस्वभावा चेत्; तत्र तदन्तरभावे कथं चित्तचैतसिकानामभावः ? तदभावोऽपि

---

२ मिति] अन्यापेक्षित्वे प्रकृष्टसाधकत्वानुपपत्तेः ।
५ त] अन्यानपेक्षं निर्विकल्पकम् ।
१३ स] सर्वपुरुषार्थसिद्धिः--न्यायबि० ।
१५ इ] हिताहितप्राप्तिपरिहारार्थी सर्वः पृ० २८ सम्यग्ज्ञानपूर्वकत्वं च हिताहितप्राप्तिपरिहारयोरुक्तम् ।--हेतुबि० टी० पृ० ४० ।
२१ तेषा] चित्तचैतसिकानाम् ।
२४ ब्धिः] ब्धेः
२८ त] ज्ञाननिवृत्तिरूपायाः ।
२८ सिद्धिः] सिद्धेर्ज्ञानधर्मत्वात् ।
२९ सा] उपलब्धिनिवृत्तिः ।
३१ त्र] स्वापादौ ।
३१ त] चित्तचैतसिकान्तरसद्भावे ।

/ms यदि तुच्छः; समयान्तर गमनम् । स्वापादिशरीरादिस्वभावत्वे; तदप्रतिपत्तौ न तदभावनिश्चयः । न खलु भूतलाग्रहणे तत्र घटाभावग्रहणमस्ति । यदि पुनः जाग्रत्प्रबोधज्ञानं तदनुपलब्धिः; एवमपि न तत्र तदभावसिद्धिः, अन्यथा इहलोकप्रत्यक्षात् परलोकाभावः सिध्येत् । तन्न स्वसम्बन्धिनी । परसम्बन्धिनी चेत्; सापि तदा अदृश्यानां तेषां कथमभावमवैति इति, *सन्तानान्तरासिद्धिप्रसङ्गात् । अथ अवस्थाचतुष्टयान्यथानुपपत्तितः तत्र तदभावसिद्धिः; तत्रेदं चिन्त्यते--यथा परपरिकल्पितस्य आत्मनोऽसिद्धौ न तेन आत्मजीवच्छरीरं सात्मकं सिध्यति इति, तथा निर्विकल्पकचित्तचैतसिकानामभावः । तदभावोसिद्धौ न तदपेक्षे जाग्रत्सुप्तदशे सिध्यतः, तथा तन्निवृत्त्यपेक्षे मृतसुषुप्तदशे अपि । तर्वादौ चैतन्यासिद्धौ विज्ञानेन्द्रियायुर्निरोधलक्षणमरणासिद्धिवत् चतुष्टयमसिद्धम् । व्यवहारिणः सिद्धं चेत्; यदि प्रमाणतः; प्रकृतो दोषः । एवमेव; इत्यपि वार्त्तम्; वृक्षादौ मरणमपि तथा सिद्धमस्तु । § 455

यत्पुनरेतत्--एवं विचारणे प्रतिभासाद्वैतमवशिष्यते इति; तत्रापि **चित्रप्रतिभासाप्येकैव बुद्धिः** प्र॰ वार्तिकाल॰ ३ । २२० इत्यादि वचनात् चित्रैकज्ञानरूपेण यदि तेन परितोषः; क्रमभाविसुखदुःखाद्यात्मनापि परितोषः क्रियताम् । अथ एकानेकविकल्पशून्येन; तत्रापि सकलप्रतिभासशून्येन क्रियताम् इति चर्चितम् । ततः स्थितम्--**नहि** इत्यादि । § 456

/ms सन्तु तर्हि तत्रापि तानि इति चेत्; अत्राह--**न च** इत्यादि । **न च** नैव **तेषां** चित्तचैतसिकानां **तदा** स्वापादिदशायाम् **आत्मसंवेदनं मुक्त्वा**
102/mkj **सतां** विद्यमानानां **लक्षणान्तरमस्ति** स्वसंवेदनलक्षणत्वाज् ज्ञानस्येति मन्यते । **यतो** लक्षणान्तरात् **प्रत्यक्षलक्षणं ततस्तेभ्यो निवर्त्तेत** । ननु भवतोऽपि न तदा तभावोऽस्ति; आत्मनोऽपि निवृत्तिप्रसङ्गात् । सतां च तेषां स्वपरावभासित्वं मुक्त्वा न लक्षणान्तरमस्ति ततः समानो दोषः इति चेत्; अत्राह--**स्वापादि** इत्यादि । स्वापादौ स्वस्यैव संवेदनं **स्वापादिस्वसंवेदनम्** तस्य **जाग्रच्चित्तचैतसिकानां** यः **क्षणक्षयादिस्वभावः, आदि**शब्देन निरंशत्वस्वर्गादिप्रापणसामर्थ्यादिपरिग्रहः तस्य यत् **स्वसंवेदनं** ग्रहणं तस्य च तद **कश्चिद् विशेषमन्तरं संप्रेक्षामहे, यतः तत्** क्षणक्षयादिस्वभावसंवेदनम् **अनुपलक्षितम् आस्ते** तथा स्वापादिस्वसंवेदनमपि इति भावः । कुत एतदिति चेत् ? अत्राह--**साक्षात्** इत्यादि । **साक्षात्** प्रत्यक्षतः या

१ स] नैयायिकमतप्रवेशः ।
१ त] स्वापादिकालीनशरीराद्यप्रतिपत्तौ ।
२ त] चित्तचैतसिकाभावनिर्णयः ।
५ *] अदृश्यानुपलम्भादप्यभावश्चेत् तदा ।
६ तु] जाग्रत्सुप्तसुषुप्तमृत ।
६ त्तितः] स्वापादौ ।
९ भावो] वा
९ न] चित्तचैत्तसिकसद्भावापेक्षे ।
१२ पि] एवमेव, यद्वा तद्वा ।
१९ त] स्वापादौ ।
२३ दा] स्वापादौ ।
२३ भा] त[[चित्तचैतसिकसद्भावः ।]]द्भा
२३ आ] यदि स्वापादौ ज्ञानं न स्यात्तदा आत्मनोऽभावः स्यात् ।
२८ द] न

**संप्रतिपत्तिः** निर्णीतिः तस्या उभयत्र यो **भावः** तस्य **अविशेषाद्** अन्यथा क्षणक्षयादिभावानुमानमनर्थकम् । लिङ्गात् संप्रतिपत्तिः उभयत्र, एकत्र सत्त्वादेः अन्यत्र व्यापारव्याहारात् इत्यभिप्रायः । § 457

यदि पुनर्मतम्--पावकात् दृष्टोऽपि धूमः यथा पुनः धूमादेव दृश्यते, तथा चित्ताद् दृष्टोऽपि [व्यापारादिः पुनः] व्यापारादेरेव दृक्ष्यत इति कथं ततस्तत्र स्वसंवेदनसिद्धिरिति ? तत्रोच्यते **अन्यधियो गतेः** इत्यनर्थकं भवेत्, तद्ग- /ms
त्युपायविरहात् । शक्यं हि वक्तुम्--पावकवत् निवृत्तेऽपि जन्मान्तरचेतसि इहजन्मनि सर्वदेहान्तरेषु व्यापारादेरेव व्यापारादिरिति न तदर्थं शास्त्रप्रणयनम् । कथं चैवंवादिनो जलाद्याकारविशेषदर्शनात् भाविन्यामर्थक्रियायां तदर्थिनो नियमेन प्रवृत्तिः ? कदाचित् तस्याः दृष्टोऽपि तदाकारविशेषः पुनस्तत एव स इत्याशङ्काऽनिवृत्तेः । तथा रूपादे रसो दृष्टोऽपि रसादेव स भवेत् [इति] कथमिदमनुमानम्--**एकसामग्र्यधीनस्य** प्र° वा° ३ । १८ इत्यादि । § 458

एतेन स्वभावविरुद्धोपलब्ध्यादिकं चिन्तितम्, न्यायस्य समानत्वात् । एवं प्रत्यक्षमपि चिन्त्यम् । तदपि प्रथमनीलार्थात् तदाकारं पुनः तत एव आसंसारमिति अभ्रान्तग्रहणमनर्थकम् । व्यवहारी तथा न मन्यते; किं पुनरसौ स्वापादौ चैतन्याभावं मन्यते ? तथा चेत्; मृतवत् तत्रापि दाहादिसाहसमाचरेत् । § 459

एतेन नैयायिकादिरपि तत्राऽभावं कल्पयन् निरस्तः । कुतो वा प्रतिबोधे आत्ममनःसंयोगात् ? आस्तां तावदेतत् । जाग्रद्विज्ञानात्; इदमपि आस्ताम् इति यत्किंचिदेकंतत् * केवलं तद्विशेषासंप्रेक्षणे स्वापादौ स्वसंवेदनमनुपलक्षितं सिध्यति अपि तु इदं दूषणान्तरं दर्शयन्नाह--**तथा च** इत्यादि । **तथा** तेन तद्विशेषासंप्रेक्षणप्रकारेण वा च शब्दः अवधारणे तथैव इति 103/mkj
। **स्वं** वा **अर्थश्च** तावेव **विषयौ** गोचरौ तयोः **प्रमाणम्** इत्यभिमतं /ms
**जाग्रद्दशायां** सौगतस्य यद् **विज्ञानं तस्य** यः **क्षणक्षयादिस्वभावः** तस्य या **संवित्तिः**, अगमकत्वात् सापेक्षस्यापि वृत्तेः देवदत्तस्य गुरुभार्यावद् इति ।

१ स्या] बौद्धाभिमते चित्तचैतसिकसद्भावे, जैनाभिमते आत्मनि च ।
५ त] व्यापारादेः ।
५ त्र] स्वापादौ ।
६ इ] प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः । प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ॥ कारिकेयं तदुक्तं धर्मकीर्तिना इति कृत्वा प्रमाणपरीक्षायां पृ° ६४ वर्तते । तर्कभा° मो° पृ° ४ ।
८ त] परसन्तानसमुद्धारार्थम् ।
११ त] आकारादेव ।
११ स] आकारः ।
११ रूपादे] सहकारिकारणात् ।
११ सादेव] केवलात् उपादानभूतात् रसादेव ।
१२ स्य] ...रूपादे रसतो गतिः । हेतुधर्मानुमानेन धूमेन्धनविकारवत् इति शेषः ।
१५ त] नीलाकारादेव ।
१६ मिति] प्रत्यक्षलक्षणे ।
१७ त्] स्वापादौ ।
१९ पि] स्वापादौ ज्ञानाभावम् ।
२० संयोगात्] गादिः
२१ *] यत्किञ्चिदेतत् । न
२४ वा] च
२६ अग] असमर्थत्वात् समासाभाव इति चेन्न; सापेक्षस्यापि समासदर्शनात् इति भावः ।

यदि वा, तस्य क्षणक्षयादेर्ग्राहिणी स्वभावभूता संवित्तिः इति ग्राह्यम्, तस्याः **प्रत्यक्षात्मनोऽपि** विसभावा अपि क्षणक्षयाद्यनुमानाप्रमाणताभयात् **यद्यप्रमाणत्वम्** इष्यते इत्यध्याहारः । **न तर्हि संवित्तेः** संवित्स्वरूपस्य **प्रत्यक्षता** कल्पनापोढाभ्रान्तता प्रमाणम् । § 460

ननु तस्याः प्रत्यक्षता नास्ति । ततः कथं सा प्रमाणमिति चेत् ? अत्राह-- **यदि** इत्यादि । **यदि,** पुनः इति वितर्के, **संवित्तिः तथैव** स्वसंवेदनप्रकारेणैव **सत्यपि** विद्यमानोऽपि **प्रत्यक्षं न स्यात्** कल्पनापोढाऽभ्रान्तस्वभावा न भवेत् **प्रमाणं वा** संवादिनी वा न स्यात्, **प्रमाणलक्षणं ततः सर्वचित्तचैतसिकानामात्मसंवेदनं प्रत्यक्षं प्रमाणम्** न्यायबि° १ । १४ इत्येवंरूपाद् **अन्यथैव व्यवस्थापनीयम्** । कथंभूतम् ? इत्यत्राह--**यत्** प्रमाणलक्षणम् **अतिव्यापकं न भवेत्** स्वापादिसंवेदने यन्नास्ति इत्यर्थः । § 461

ननु उक्तमेव--**यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता ।प्रवर्त्तकं प्रमाणम्** प्र° वार्तिकाल° पृ° १५१, २२ इति च वचनं स्वापादौ क्षणक्षयादौ वा तदस्ति इति चेत्; अत्राह--**तथा च** इत्यादि । **तथा च** परपरिकल्पितप्रकारेण /ms च **सर्वं** प्रत्यक्षादि प्रमाणं **स्वभावे** स्वस्वरूपे **परभावे** पररूपे **वा कथञ्चिदेव** सचेतनादिनीलादिरूपेणैव न क्षणक्षयादिरूपेण **प्रमाणम्** । अत आह--**न सर्वथा** इति सिद्धम् । येन अभ्यासदशायां भाविनि प्रवर्त्तकत्वात् प्रत्यक्षं प्रमाणमिष्टम्, तस्यापि तद्रूपादावेव प्रमाणं न दृश्यप्राप्यविवेके स्वयं विषयीकृतेऽपि, तयोरेकत्वाध्यवसायोऽन्यथा न स्यात् विरोधात् । सतोऽविषयीकरणे **एकस्यार्थस्वभावस्य** प्र° वा° ३ । ४२ इत्यादि विरुध्यते । § 462

अत्रैव दूषणान्तरमाह--**चक्षुरादि** इत्यादि । न केवलं सर्वचित्तचैतसिकानामात्मसंवेदनस्य, अपि तु **चक्षुरादिज्ञानस्यापि** आदिशब्देन श्रोत्रादिज्ञानपरिग्रहः **सर्वथा** क्षणक्षयादाविव नीलादावपि **परतः** विकल्पात् **प्रामाण्ये** अङ्गीक्रियमाणे **कुतः** न कुतश्चित् **ततः** चक्षुरादिज्ञानात् **अर्थं परिच्छिद्य प्रवर्तमानस्य पुनः** पश्चाद् **अविसंवादः** । कुत एतत् ? प्रवर्त्तनस्यैवाऽसंभवात् **ततः** इत्यनेन सम्बन्धः । परत एव प्रवर्त्तनसंभवादिति मन्यते । पुनरत्रैव दूषणान्तरमाह--**क्षणक्षयादि** इत्यादि । **क्षणक्षयादौ** आदिशब्देन परिमण्डलादौ **विसंवादेऽपि चक्षुरादिज्ञानस्य** इति सम्बन्धः । **नीलादौ प्रमाणत्वे** अङ्गीक्रियमाणे **मृगतृष्णादिज्ञानस्यापि** न केवलम् अन्यस्य । कथम्भूतस्य ? **सलिलादिविसंवादिनः** शुक्लादिस्वभावाऽविसंवादात् **कथञ्चित्** न /ms सर्वात्मना **प्रमाणत्वं परीक्षायाः** युक्तेः सकाशात् **प्रतिष्ठापयितुं युक्तम्** । § 463

२ भावा] निर्विकल्पाया
५ स्याः] संवित्तेः ।
७ मानोऽपि] नापि
१२ येदेनां] सविकल्पां बुद्धिम्
१२ त्रैवास्य] निर्विकल्पस्य ।
२० इ] ...प्रत्यक्षस्य सतः स्वयं । कोऽन्यो न भागो दृष्टः स्याद्यः प्रमाणैः परीक्ष्यते ॥ इति शेषः ।

स्यान्मतम्--मृगतृष्णादिज्ञानमविकल्पकमभ्रान्तं न तत्सलिलादिविषयं कथं तस्य तत्र विसंवादः, अन्यथा नीलज्ञानं पीते विसंवादि भवेत् । यच्च सलिलादिज्ञानं संम तन्मृग तृष्णादिज्ञानं तोयादिविभ्रमस्य मानस- 104/mkj त्वोपगमादिति; न; तत्र ज्ञानद्वयानुपलक्षणात् । तथापि तत्कल्पनेऽप्युक्तम् । शक्यं हि वक्तुम्--चन्द्रमेकं पश्यतोऽपि द्विचन्द्रभ्रान्तिरिति इत्यादि । ननु मृगतृष्णाज्ञानेन शुक्लादिस्वभावाग्रहणात् कथं तत्र तदविसंवादो यतः कथञ्चित् प्रमाणं स्यादिति चेत् ? अत्राह--**अन्यथा** इत्यादि । **अन्यथा** उक्ताभावप्रकारेण **तद्दर्शिनो** मृगतृष्णादिसलिलदर्शिनः पुरुषस्य **सुप्तत्वाऽविशेषप्रसङ्गात्** कथञ्चित् तस्य प्रामाण्यं प्रतिष्ठापयितुं युक्तम् । दृश्यमानस्यापि शुक्लादिस्वभावस्य अदर्शनकल्पने सलिलादिप्रतिभासे कः समाश्वास इति ? दृष्टान्तद्वयस्य किं प्रयोजनमिति चेत् ? उच्यते--यदा एकस्मिन्नपि विज्ञाने तस्मिन् सलिलादिप्रतिभासं परोऽभ्युपगच्छति न शुक्लादिप्रतिभासं तदा उक्तन्यायेन सलिलादिप्रतिभासस्यापि निह्नवात् सुप्तेन अस्वप्नदर्शिनोऽविशेषप्रसङ्गात् इत्युच्यते । यदा पुनः शुक्लादिस्वभावविषयमविकल्पं दर्शनं विशदं सलिलादिगोचरं पुनः सविकल्पमपि विशदं मानसं ज्ञानमभ्युपगच्छति, तदा निर्विकल्पकस्य सतोऽप्य नुपलक्षणाद् अस्पष्टसलिलादिज्ञानस्या[स]त्त्वेऽपि /ms भावात् अन्येनाऽविशेषप्रसङ्गाद् इत्यभिधीयते । अथ स्वसंवेदनाध्यक्षनिर्णयविचारप्रस्तावे न उपयोगः चक्षुरादिज्ञानस्य येन तदत्र विचार्यते इति, स्वरूपे स्वसंवेदनाध्यक्षं कथञ्चिदेव न सर्वथा इत्यत्र निदर्शनार्थम् । अत एवोक्तम्--**स्वभावे वा परभावे वा** इत्यर्थः । § 464

साम्प्रतं ज्ञानान्तरवेद्यज्ञानैकान्ते यद् दूषणं सौगतस्य प्रसिद्धं तदेव--**यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता** इत्यत्रापि प्रदर्श्य स्वतः स्वरूपव्यवसायात्मकं सर्वं ज्ञानं प्रसाधयन्नाह--**यथैव हि** इत्यादि । [यथैव] येनैव **हि** प्रकारेण **परतः** ज्ञानान्तरात् **प्रामाण्यम्** आद्यस्य ज्ञानस्य स्वार्थव्यवसायः **प्रामाण्यं चेतसां स्वार्थव्यवसायः** इति वचनात् **इति** एवम् **एकान्ते** यौगकल्पिते **अनवस्थानात्** ज्ञानान्तरेऽपि तदन्तरापेक्षणात् **अप्रतिपत्तिः स्वार्थयोः** इत्यध्याहारः । **तथैव** तेनैव प्रकारेण **सर्वज्ञानानां** सविकल्पकनिर्विकल्पकचेतसां **स्वतः** आत्मना **स्वभावाऽनिश्चयैकान्ते** स्वभावस्य स्वरूपस्य अनिश्चयैकान्ते अङ्गीक्रियमाणे **अनवस्थानाद्** अनवस्थितेः **अप्रतिपत्तिः स्वार्थयोरेव** *गन्तव्या । एतदुक्तं भवति--यथा आद्यं दर्शनं स्वभावे व्यवसायसामर्थ्यविधुरमुत्पन्नमपि अनुत्पन्नकल्पमिति **यत्रैव जनयेदेनाम्** इत्याद्युक्तम्, तथा तत्स्वभावे समुत्पन्नापि विकल्पबुद्धिः स्वतः स्वव्यवसायसामार्थ्य विधुरा इति /ms उत्पन्नाप्यनुत्पन्नकल्पा इति तत्स्वभावव्यवसायेऽपि तदन्तरान्वेषणं तत्रापि

२ स्य] मृगतृष्णिकाज्ञानस्य ।
२ त्र] सलिलादौ ।
३ संम] नं न
१७ अ] सुप्तेन ।
२१ दूष] अनवस्थाख्यम् ।
२८ अ] निर्विकल्परूपे ।
३० *] र व
३३ त] विकल्पबुद्ध्यन्तर ।

तदन्तरान्वेषणमित्यनवस्था । **ततः** तस्माद् अनन्तराद् दोषात् **सर्वज्ञानानां स्वरूपव्यवसायात्मकत्वं अवगन्तव्या** इत्यनेन जातनपुंसकलिङ्गपरिणामेन सम्बन्धात् । तत् किं करोति ? इत्यत्राह--**निर्विकल्पेयदिनिदि निर्विकल्पं** च तत् **प्रत्यक्षलक्षणं** च तत् कर्मतापन्नं **निराकरोत्येव** । केषां सन्बन्धि ? इत्यत्राह--**चित्तचैतसिकानाम्** इति । § 465

स्यान्मतम्--स्वरूपव्यवसायात्मकत्वाऽभावे किमनुपपन्नं यदर्थं तत् साध्यते ? इत्यत्र उत्तरमाह--**स्वसंवेदनम्** इत्यादि । **स्वस्य** आत्मनः **संवेदनं** 105/mkj ग्रहणम् तद**न्तरेण अर्थग्रहणानुप पत्तिवत् स्वरूपव्यवसायम्** आत्मनिर्णयमन्तरेण **विषयस्य** स्वार्थलक्षणस्य **व्यवसायानुपपत्तिश्च उक्ता** । अनेन **अङ्गीकृतात्मसंवित्तेः** सिद्धिवि° १ । १८ इत्यादिना परहृतं चोद्यं कृतमिति दर्शयति । § 466

उक्तमर्थमुपसंहरन्नाह--**तन्नायम्** इत्यादि । यत एवं **स्वपरविषयप्रमाणाभिमतविज्ञानस्य** इत्यादि **सुप्तत्वाविशेषप्रसङ्गात्** इत्यन्तं च व्यवस्थितं तस्मात् **नायम् एकान्तो** वः **संवित्तिः** बुद्धिः **सर्वा** निरवशेषा सर्वज्ञशन्तिवदन्यापि **स्वरूपम्** आत्मानं **वेदयत्ये[व] वेदयति** तस्य किञ्चिन्न वेदयति इत्येवकारार्थः । कथम्भूता ? इत्यत्राह--**संवित्स्वभावापि सती** इति । यदुक्तं ध र्मो त्त रे ण--**द्विविधा भ्रान्तिः--लौकिकी द्विचन्द्रादिग्रहणात्मिका । शास्त्रीया च ग्राहकसंवित्तिभेदलक्षणात्मिका च** तस्या अभावप्रसङ्गात् । तथाहि--सचेतनादिस्वरूपवत् तद्विभ्रमविवेकमपि यद्यात्मनः सा वेदयति कुतः तद्भ्रान्तिः ? इतरथा नीलज्ञानस्य पीते सा भवेत् । एतेन लौकिकी भ्रान्तिर्निरस्ता; तस्या ग्राह्याकाराभावे अभावात्, तन्निबन्धनत्वात् । § 467

अत्रापरः प्राह--भ्रान्तेरभावो न दोषाय सौगतस्य तदभ्युपगमादिति; तन्न; यथाप्रतिभासं तत्त्वोपगमे जैनदर्शनप्रसङ्गात् । तथा च सति भवतः किं सिद्धम् ? इत्यत्राह--**व्यवसाय** इत्यादि । **तन्नाऽयमेकान्तः** इत्येतदत्रापि अनुवर्त्तते । ततोऽयमर्थ--यतः परकीया संवित्तिः एवंविधा **तत्** तस्माद् **व्यवसायात्मक[त्वात्]** इति हेतोरेव **वा** संवित्तिः **स्वरूपं** विषयरूपत्वात् **सर्वथा व्यवस्यति इत्ययं नैकान्तः भ्रान्तेरभावप्रसङ्गात्** इति सम्बन्धः । यथैव हि वैशेषिकस्य संवित्तिः व्यवसायात्मिका अयम् इत्येवं परामृश्यमानं धर्मिणं व्यवस्यति तथैव यदि तस्य स्थाणुत्वपुरुषत्वयोः अन्यतरविवेकं स्वभावभूतम्, अन्यथा स्वभावाव्यवस्थाप्रसङ्गात्, व्यवस्यति; कुतः संशयादिव्यवस्था अतिप्रसङ्गात् ? एवं सर्वस्य एकान्तवादिनः आत्मनैकवाक्यतां समर्थितामुप- /ms संहरन्नाह--**तथा च** तेन प्रकारेण च सर्वैक वाक्यभावे **स्वं** च **अर्थश्च स्वो वा अर्थः** तयोः तस्य वा **अनुभवाश्च इतरश्चाऽननुभवः** तावेव **स्वभावो लक्षणं**

३ निदि ] ल्पेत्यादि
१३ इत्या ] इति प्रारभ्य ।
१३ इत्य ] एतत्पर्यन्तम् ।
१५ द ] सन्ततिवद
१९ सा ] भ्रान्तिः ।
२१ त ] ग्राह्याकारनिबन्धनत्वात् ।
३० ति ] चेत् ।
३३ श्च ] वश्च

स्वरूपं **विभ्राणं** दधानम् । किं तत् ? **विज्ञानम्** । एतत् सौगतमुद्दिश्य उक्तम्, **स्वपररूपव्यवसायेतरस्वभावं वा** स्वपररूपयोः व्यवसायो निर्णयः इतरोऽनिर्णयः तावेव स्वभावः स्वरूपं तं वा **विभ्राणम्** । एतत् वैशेषिकमुद्दिश्य कथितम् । **तद्** अनेकान्त**मन्तरेण** कथं **न कथञ्चिद् उपपनीपद्येत** । § 468

उपसंहारमाह--**तद्** इत्यादिना । यत एवं **तत्** तस्मात् **अविकल्पदर्शनं न** विद्यते विकल्पः स्वपररूपव्यवसायो यस्य सौगतादिकल्पितदर्शनस्य तत् तथोक्तम्, **न** स्वपरभावयोः प्रत्यक्षं सत् **प्रमाणम्** । कुत एतत् ? इत्यत्राह--**स्वयम्** इत्यादि । **स्वयम्** आत्मना **अनुभूतो** गृहीतो यः **स्वभावः** स्वरूपम् स्वो वा भावो ग्राह्यः पदार्थात्मा, तस्यापि न केवलमन्यस्य **सर्वथा** क्षणिकादिप्रकारेणेव नीलादिप्रकारेणापि । यदि वा, विकल्पानुभवान्तराभावापेक्षाभावप्रकारेणेव तदपेक्षाप्रकारेणापि **अननुभूतकल्पत्वात्** । § 469

106/mkj

ननु मा भूत् नैयायिकादिदर्शनं प्रत्यक्षं सत् प्रमाणं स्वग्रहणसामर्थ्यवैधुर्येण घटादिवदचेतनत्वात् न सौगतदर्शनं तत्सामर्थ्यभावेन चेतनत्वादिति [चेत्; अत्राह--] **चेतनत्वेऽपि** इत्यादि । **अपि[ः]** संभावनायाम्, भावतः तत्र चेतनत्वासिद्धेः, तस्मिन्नपि । **स्वयमनुभूतस्यापि सर्वथा अननुभूतकल्प-** /ms **त्वात्** इति सम्बन्धः । अत्र निदर्शनमाह--**सुषुप्तादिवत्** इति । चिन्तितमेतत् । ननु भावत एव तत्र चेतनत्वे कुतः कारणादुच्यते--**चेतनत्वेऽपि** इत्येतदिति चेत्; अत्राह--**स्वविषयीकृत** इत्यादि । **स्वेन** आत्मना **विषयीकृते** अनुभूते **वस्तुनि** क्षणिकादिनीलादिरूपे परकल्पिताद् दर्शनप्रमाणात् अनुमानं विकल्पश्च **तदन्तरं तदपेक्षित्वात्** कारणात् **चेतनत्वेऽपि** इत्युच्यते इति । ननु प्रमितिसाधकं प्रमाणम्, सा च नीलादौ दर्शनादेव जातेति तत्र विकल्पः प्रमाणमेव न भवति किमुच्यते **तदन्तरम्** इति चेत्; अत्राह--**तद्** इत्यादि । **तदपेक्षणीयस्यैव** क्षणिकत्वादौ अनुमानस्यैव नीलादौ विकल्पस्यैव **प्रमाणं** प्रमितिं प्रति साधकतमत्वोपपत्तेः । तस्यैव प्रामाण्यम् इति मन्यते । अथ प्रमितिं प्रति साधकतमस्य विकल्पस्य हेतुत्वाद् दर्शनमपि तां प्रति साधकतममुच्यते । तदुक्तम् अ र्च टे न--**पक्षधर्मतानिश्चयः प्रत्यक्षाज्ज्ञायते इति पक्षधर्मतानिश्चयः प्रत्यक्षत इत्युच्यते** इति । तत्रोत्तरमाह--**तत्कारणत्वेऽपि** इत्यादि । **अभेदात् सदृशस्मृत्याम्** सिद्धिवि॰ १ । ६ इत्यादिवचनात् दर्शनस्य विकल्पकारणत्वं नास्ति, अत एव **तत्कारणत्वेऽपि** इति, **अपिश-**

---

१४ त्वात्] अस्वसंवेदित्वादित्यर्थः ।
१४ त] स्वसंवेदित्वेन ।
१६ त] निर्विकल्पके ।
२२ सा] प्रमितिः ।
२३ ति] गृहीतग्राहित्वादित्यर्थः ।
२४ स्यैव] प्रत्यक्षपृष्ठभाविनो नीलमिदम् इति विकल्पस्यैव ।
२५ माणं] प्रामाण्यं
२६ तां] प्रमितिम् ।
२८ इति] पक्षधर्मस्य साध्यधर्मिणि प्रत्यक्षतोऽनुमानतो वा प्रसिद्धिः निश्चय इति--हेतुबि॰, टी॰ पृ॰ ३९ ।

ब्दः संभावनायाम् । **सन्निकर्षादेरिव तद्वत् मुख्यतः प्रमाणतानुपपत्तेः** [न] अविकल्पदर्शनं प्रमाणम् । उपचारतः तदुपपत्तिः स्यादिति चेत्; अत्राह- /ms -**उपचारत** इत्यादि । उपचारात् **सन्निकर्षादेः** प्रमाणम् इति प्रकारेण **व्यपदेशाऽविघातात्** । § 470

ननु व्यवहारे अन्यत् प्रत्यक्षं प्रमाणं नास्ति, अविकल्पदर्शनस्यैव मुख्यतः प्रमाणतोपपत्तिः इति; अत्राह--**यतः** इत्यादि । **प्रभृति**शब्दोऽयम् आद्यर्थो रिसंज्ञिसंज्ञः । ततोऽयमर्थः— **यतः [प्रभृति]** यस्मात् आदितः विज्ञानात् **पुरुषस्य प्रवृत्तिः तस्य** व्यवसायात्मनः विज्ञानस्य **मुख्यतः प्रमाणत्वोपपत्तिः** नाऽविकल्पदर्शनं प्रमाणम् इति **प्रभृति**शब्देन एतद्दर्शयति--पूर्वमकस्मात् सुखहेतोः दुखहेतोर्वा दर्शने ततः सुखाद्यनुभवने च [न] पुरुष एवमवगच्छति इदं मेसुखसाधनं दुःखसाधनं वा । § 471

यत्पुनरत्रेदं चोद्यम्--सुखादिसाधनदर्शनकाले न सुखादिवेदनम्, तत्काले च न तत्साधनवेदनम्, तत् कुतः सुखादिसाधनयोः हेतुफलभावप्रतीतिरिति ? तत् **प्रतिभासैक्यनियमे** सिद्धिवि° १ । १० इत्यादिना निरस्तम् । ततः तदवगमात् तस्य संस्कारः, पुनः कालान्तरे तस्य तज्जातीयस्य वा दर्शनात् संस्कारप्रबोधे तत्र स्मृतिः, ततः तदेवेदं तत्सदृशम् इति वा प्रत्यभिज्ञा, अतोऽपि यदित्थं तद् इयता कालेन सामग्रीविशेषेण 107/mkj वा इत्थंभूतकार्यकारिइति चिन्ता तर्कः, ततोऽपि इत्थं चेदं तस्मात् पूर्ववत् विवक्षितकार्यकारि इत्यनुमानम्, अतः पुरुषस्य प्रवृत्तिः इति । वक्ष्यते चैतदत्रैव--**अक्षज्ञानैरनुस्मृ[त्य]** सिद्धिवि° १ । २७ [इ]त्यादिना । § 472

यत्पुनरेतत्--प्रवृत्तेः फलभावेन असत्त्वान्न कस्यचित् कुतश्चित् प्रवृत्तिः /ms इति; तद् युगपदिव च क्रमेणापि चित्रैकज्ञान संभवेन प्रत्यक्षबाधितमिति । ननु मृगतृष्णादिजलज्ञानादपि पुरुषप्रवृत्तिरस्तीति तस्यापि मुख्यतः प्रमाणत्वोपपत्तिः स्यादिति चेत्; अत्राह--**प्रेक्षापूर्विका** इति । प्रकृष्टा संशयादिरहिते **[क्षा]** दर्शनं **पूर्वं** कारणं यस्याः सा तथोक्ता सम्यग्ज्ञानपूर्विका इति यावत्, विभ्रमसर्वविकल्पातीतत्वाद्येकान्तनिषेधात् । § 473

ननु निर्विकल्पकदर्शनादेव तथा पुरुषप्रवृत्तिः, अतः तस्यैव मुख्यतः प्रमाणतोपपत्तिः । तदुक्तम्-- § 474

*तद्दृष्टावेव दृष्टेषु संवित्सामर्थ्यभाविनः ।
स्मरणादभिलाषेण व्यवहारः प्रवर्त्तते ॥ प्र° वार्तिकाल° पृ° २४ § 476

इति चेत्; अत्राह--**स्वेक्षित** इत्यादि । **स्वेक्षिते** स्वानुभूते वस्तुनि **अन्यानपेक्षस्य** व्यवसायात्मनो विज्ञानस्य, अत एव स्मरणादिः नान्यत इति मन्यते । उक्तं चैतदत्रैव--**व्यवसायात्मनो दृष्टेः** सिद्धिवि° १ । ४ इत्यादिना । § 477

७ रिसंज्ञिसंज्ञः ] घिसंज्ञः
१३ त ] सुखादिवेदनकाले च ।
१५ तः ] अनुभवात् ।
२७ त ] प्रेक्षापूर्विका ।
३२ अ ] व्यवसायात्मकज्ञानादेव ।

स्यान्मतम्--भवतु व्यवसायात्मनो विज्ञानाद् आदितः प्रेक्षापूर्विका पुरुषप्रवृत्तिः तथापि न तस्य मुख्यतः प्रमाणतोपपत्तिः अवस्तुसामान्यविषयत्वेन विसं वादकत्वात् । तदुक्तम्--**विकल्पोऽवस्तुनिर्भासो विसंवादादुपप्लवः** । इति चेत्; अत्राह--**अविसंवाद** इत्यादि । **अविसंवादस्य एकम्** अन्यनिरपेक्षं **भवनं** यस्मात् तस्य **विकल्पविषयस्य च तत्त्वतो** वस्तुत्वादिति भावः । एतदर्थमेवेदं **स्वेक्षित** इत्यादि । § 478

अत्र चोद्यते--व्यवसायात्मनो नातीते पुरुषप्रवृत्तिः तस्य अनुभूतत्वात्, न वर्तमाने [अनुभूयमानत्वात्] । नहि सुखादौ अनुभूयमाने कश्चित् प्रवर्त्तते प्रवृत्तेरनवस्थाप्रसङ्गात् । नापि भाविनि; प्रत्यक्षतः तदप्रतिपत्तेः न क्वचित् /ms पुरुषप्रवृत्तिरिति । तत्रोत्तरम्--**यतोऽयम्** इत्यादि । **अयं** चोद्यकारः प्र ज्ञा क र गु प्तः अन्यो वा **प्रवर्त्तेत** तथा विचारं कुर्वन्नपि न तिष्ठेत् । कथम्भूतः ? **अस्खलद्वृत्तिः** । एतदुक्तं भवति--यद्ययं प्रेक्षाकारी नियमेन प्रवृत्तिविषयं नास्ति इति पश्येत् न तत्र नित्यवद् अस्खलद्वृत्तिः प्रवर्त्तेत, न चैवं सुपरीक्षक विचारं कुर्वन्नपि न तिष्ठेत् कथंभूतः अस्खलद्वृत्तिः । एतदुक्तं भवति सुपरीक्षकस्यापि जलादौ प्रवृत्तिदर्शनात् **अतः तत्कारी तद्द्वेषी चेति उपेक्षामर्हति** इति । क्व प्रवर्त्तेत इति चेत् ? अत्राह--**हित** इत्यादि । निमित्तयोः द्विवचनमेतत्, तेन **हितस्य** ओदनादेः **प्राप्तौ** प्राप्तिनिमित्तम् **अहितस्य** विषादेः **परिहारे** परिहारनिमित्तम् । न चैतच्चोद्यम्--सुखदुखयोरप्रतिपत्तौ न तत्कारि हितमहितं वा ज्ञातुं शक्यत इति; तथा अनुमानाऽप्रतिपत्तौ न लिङ्गस्य तद्धेतुत्वं प्रतीयते इति न तदर्थी तत्रापि प्रवर्त्तेत तोनुदयात् [अतोऽनुमानानुदयात्] कुतः स्वयं तत्त्वमवबुध्येत परं वा बोधयेत् ? स्वसंवेदनाध्यक्षस्य अनंशस्य विवादगोचरापन्नत्वात् । तदयं भाव्यनुमानम् अप्रतियन्नपि लिङ्गस्य तद्धेतुतामवैति न पुनः तथाविधं सुखादिकम् अप्रतिपन्नोदनादेः तद्धेतुतामि[च्छती]ति स्वेच्छावृत्तिः । कथं प्रवर्त्तते इति चेत् ? अत्राह--**सङ्कर** इत्यादि । यस्य प्राप्तिः तस्य परिहारः यस्य परिहारः तस्य प्राप्तिः इति /ms **सङ्करः**, प्राप्तिविषये परिहारः परिहारविषये च प्राप्तिरेव **व्यतिकरः**, **तयोः व्यतिरेकेण** अभावेन **यतो** यस्मात् ततः **यतः प्रभृति** इत्यादि सुस्थम् । § 479

अत्र अपरः सौगतः प्राह--**यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता** इति ध र्मोत्त र स्य मतमेतत् । तच्च ययैव युक्त्या अस्माभिर्निरस्तं तयैव जैनैः इति

२ स्य] व्यवसायस्य ।
३ इ] उद्धृतोऽयम्--प्रश॰ कन्द॰ पृ॰ १९० । प्रमेयक॰ पृ॰ ३१ । सन्मति॰ टी॰ पृ॰ ५०० । न्यायवि॰ वि॰ प्र॰ पृ॰ ३१४ । स्या॰ रत्ना॰ पृ॰ ३२ । धर्मसं॰ पृ॰ १३४ ।
९ ते] प्रवृत्तिरपि अनुभूयमाना, अतस्तत्रापि प्रवृत्तिर्भवेदिति प्रवृत्त्यनवस्था ।
१३ चैवं] एतदन्तर्गतः पाठो द्विर्लिखितः ।
१९ त] सुखकारि ।
२० त] अनुमानार्थी ।
२० त] लिङ्गे ।
२३ त] अनुमानकारणताम् ।
२३ नादेः] अप्रतियन् ओदनादेः
३० अ] बौद्धविशेषैः ।

सिद्धोपस्थायित्वं तेषाम्, दर्शनं तु विकल्पनिरपेक्षं प्रमाणम् । यद्यप्रमाणं विकल्पः कथं दर्शनेन अपेक्षते ? प्रमाणत्वे प्रमाणसंख्याव्याघात इति । तत्रोत्तरमाह--**विषदर्शनवद्** इत्यादि । § 480

...24 विषदर्शनवदज्ञस्य दर्शनमविकल्पकम् ।
न स्यात्प्रमाणं सर्वमविसंवादहानितः ॥ २४ ॥§ 482

विषमालोक्य तत्र अज्ञ इव प्रमाणयति न पुनः व्यवसायात्मकं प्रमाणमविसंवादकमिति लक्षयति चेति विपरीतलक्षणप्रज्ञो देवानांप्रियः । सर्वमेव दर्शनमविकल्पकं कथं प्रत्यक्षं विसंवादकं अज्ञस्य विषदर्शनमिव । व्यवसायात्मकस्यैवाविसंवादकत्वोपपत्तेः । तदितरस्याव्यवसायात्मकत्वेन विसंवादात् । ननु अविकल्पकं सुखादिनीलादिनिर्भासिज्ञानमविसंवादकम्; न च तदविसंवादकम् अपि तु विकल्पकमेव व्यवसायात्मकत्वात् । तदविसंवादिनः प्रत्यक्षस्य निर्विकल्पकत्वे क्षणक्षयादिवत् साधनान्तरमपेक्षते अनिश्चयादिति । कल्पनापोढमभ्रान्तमपि दर्शनं विसंवादयत्येव यथादर्शनं निर्णयायोगात् । विशेषाकारेण अर्थानामनवभासनात् सामान्याकारेण च व्यवसायानिर्णयात् । यथाप्रतिपत्रभिप्रायं प्रमाणलक्षणमविसंवादकत्वं प्रमाणान्तराबाधितविषयमयुक्तं स्वमतव्याघातात् । तस्मान्नायमविकल्पोऽनुभवः स्वलक्षणग्राही यथार्थनिर्भासं व्यवसाययितुं समर्थोऽविसंवादको नाम । न चाविकल्पितेन स्वभावेन स्वलक्षणव्यवस्थापनं युक्तमद्वैतवदिति भेदाभावात् । विकल्पानां भेदैकान्तेऽपि निःस्वभावतोपपत्तेः । § 483

**अज्ञानस्य** विषे अव्युत्पत्तिसंशय विपर्यासोपेतस्य संबन्धि यत् **विषदर्शनं** स्वानुभूते वस्तुनि संशयविपर्ययकारि अकिञ्चित्करं वा तदिव **विषदर्शनवत्** इति, **सर्वं** चतुर्विधमपि, यदि वा **सर्वम्** अनभ्यासजमिव अभ्यासजमपि **दर्शनं न प्रमाणं स्यात्** भवेत् । कथम्भूतम् ? **अविकल्पकम् अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना** न्यायबि° १ । ५ तदात्मकं न भवति निरंशार्थविषयमित्यर्थः । अत्रायमभिप्रायः--यदि विकल्पनिरपेक्षं स्वतन्त्रं दर्शनं प्रमाणम्; हन्त तर्हि विषाऽज्ञस्य विषदर्शनं तथाविधमनिवारितमिति तदपि प्रमाणं स्यात् । तथा च सति सन्देहादेः न कस्यचिद् विषे प्रवृत्तिः इति । § 484

109/mkj

यत्पुनः--**यत्रैव जनयेदेनाम् अनुमानबुद्धिं तत्रैवास्य प्रमाणता** इति व्याख्यानम्; तदप्येतेन निराकृतम्; भाविमरणसंबन्धिविषाकारविशेषलिङ्ग-

१ तेषाम्] जैनानाम् ।
२ अपेक्ष] क्ष्य
२ त्वे] विकल्पस्य ।
२० स्य] अज्ञस्य
२४ त] कल्पनारहितम् ।

दर्शनस्य सजातीय स्मरणस्य च अनुमानहेतोः अत्रापि कदाचिद् भावात् /ms अनुमानजननादपि प्रमाणं स्यात् । न चैवम्, अतो विषदर्शनवदज्ञस्य सर्व[मवि]कल्पकदर्शनमप्रमाणमिति । ननु कल्पनात्मकमपि विषस्य अन्यस्य च अभ्यासदशायां दर्शनं प्रमाणं दृश्यते, ततः सर्वं दर्शनमप्रमाणमिति वदतो दृष्टबाधनमिति चेत्; अत्राह--**अविसंवादहानितः** इति । अभ्यासदशायां प्रतिपरमाणुनियतं दर्शनं प्रमाणम् इति यः **अविसंवादः** अविप्रतिपत्तिः तस्य **हानितः** सर्वं दर्शनं न प्रमाणमिति । यदि वा, दृष्टस्य परमाणुमात्रस्य अप्राप्तेः तद्धानितः इति व्याख्येयम् । § 485

विषदर्शनं सोपहासं व्यतिरेकमुखेन विवृण्वन्नाह--**विषम्** इत्यादि । **विषम् आलोक्य** दर्शनविषयीकृत्य **तत्र प्रमाणयति** प्रमाणमाचष्टे । किम् ? इत्यत्राह--**अज्ञ इव** इति । अज्ञो व्याख्यातः स इव अव्युत्पन्नः अव्युत्पत्तिसंशयविपर्यासःसौगत इत्यभिप्रायः । तत्र चोक्तं दूषणम् । किं पुनर्न प्रमाणयति ? इत्यत्राह--**न पुनः** इत्यादि । **व्यवसायात्मकं प्रमाणं** प्रमाणयति **न पुनः** । कथम्भूतं तत् ? इत्यत्र**अविसंवादकम्** इति । **प्रमाणमविसंवादिज्ञानम्** प्र॰ वा॰ १ । ३ **इति** एवं **लक्षयति च** अवधारयति च **इति** हेतोः **विपरीतलक्षणप्रज्ञो देवानांप्रियः** । यत् प्रमाणं तदविसंवादकं न भवति, यच्च अविसंवादकं तत् प्रमाणं न वेत्ति इति मन्यते । मा भूत् तर्हि /ms विषदर्शनं प्रमाणं व्यवसायात्मकं वा ज्ञानमविसंवादकमपि तुदकमपि तु दर्शनमिति चेत्; अत्राह--**सर्वमेव** इत्यादि । अनेन शेषमन्वयमुखेन व्याचष्टे--**सर्वमेव** निरवशेषमेव **दर्शनम्** । कथम्भूतम् ? **अविकल्पकम्** अज्ञस्य संबन्धि । केन प्रकारेण ? **कथं प्रत्यक्षं** प्रमाणं न [कथं] चित् । पुनरपि कथम्भूतम् ? इत्यत्राह--**विसंवादकं** विसंवादकत्वात् इति गम्यते यथा सद् अनित्यम् इत्युक्ते सत्त्वादिति । कस्य किमिव तत्तथाविधम् ? इत्यत्राह— **अज्ञस्य विषदर्शनमिव** इति । तथा च प्रयोगः--सर्वमेव अविकल्पं दर्शनं न प्रमाणं विसंवादकत्वाद् अज्ञस्य विषदर्शनवत् इति यदुक्तं परेण--**विवादगोचरमविकल्पं दर्शनं प्रत्यक्षं प्रमाणम् अविसंवादकत्वात्** इति; तत्र हेतोर्विरुद्धतां दर्शयन्नाह--**व्यवसायात्मकस्यैव** इत्यादि । **व्यवसायात्मकस्यैव** नान्यस्य इति एवकारार्थः । निगदितं विना **अविसंवादकत्वोपपत्तेः** । § 486

ननु यदुक्तं **सर्वमेव** इत्यादि; तत्र असिद्धो हेतुः; तथाविधदर्शनस्यैव अविसंवादभावादिति चेत्; अत्राह--**तद्** इत्यादि । **तस्य** व्यवसायात्मनो विज्ञानस्य य **इतरः** अन्यः तस्य **विसंवादात्** । केन कृत्वा ? इत्यत्राह--**अव्यवसायात्मकत्वेन** अवस्तुनिरंशैकान्तगोचरत्वेन । § 487

ननु अव्यवसायात्मकं दर्शनं विसंवादकम् अव्यवसायात्मकत्वेन /ms इत्युच्यमाने अनित्यः शब्दः शब्दत्वात् इत्यादिवत् प्रतिज्ञातार्थैकदेशाऽसिद्धो हेतुरिति चेत्; आस्तां तावदेतत्, उत्तरत्र अस्य विचारयिष्यमाणत्वात् । § 488

१ अ] अज्ञस्य विषदर्शनेऽपि ।
८ त] अविसंवादहानितः ।
१२ र्यासः] र्यस्तः
१४ त्र] त्राह--
१८ तु] तु दकमपि इति पुनर्लिखितं निरर्थकश्च ।
१८ पि] ?

110/mkj

स्यान्मतम्--अविकल्पं दर्शनं यद्यपि क्षणक्षयादौ विसंवादकं तथापि नीलादिसुखादौ संवादकमिति भागाऽसिद्धो हेतुरिति । एतदेव परः दर्शयन्नाह--**ननु** इत्यादि । **ननु** इति वितर्के । **अविकल्पं च सुखादिनीलादिनिर्भासिज्ञानम् अविसंवादकम्** । तत्रोत्तरमाह--**न च** इत्यादि । **न च** नैव **तत्** सुखादिनीलादिनिर्भासिज्ञानम् **अविसंसादकं** निर्विकल्पकम् । किं तर्हि तत् ? इत्यत्राह--**अपि तु विकल्पकमेव** इति । कुत एतत् ? इत्यत्राह--**व्यवसायात्मकत्वात्** । वस्तुसत्सामान्यविशेषात्मकार्थनिर्णयात्मकत्वात् । न चान्यस्य अविसंवादकत्वधर्मः अन्यस्य इति परिकल्प्य भागासिद्धता हेतोः परिकल्पयितुं शक्या, अन्यथा क्वचित् शब्दादौ सामान्यादिप्रसिद्धम् असत्त्वादिकं परिकल्प्य तथा तदपि भागाऽसिद्धम् उद्भावनीयं भवेत् । तद् विकल्पकमिति कुतोऽवगम्यते इति चेत् ? अत्राह--**तद्** इति । **तस्य** सुखादिनीलादिनिर्भासस्य **अविसंवादिनः प्रत्यक्षस्य निर्विकल्पकत्वे** अङ्गीक्रियमाणे **क्षणक्षयादिनिर्भासवत् साधनान्तरमपेक्षते** प्रत्यक्षम् इति विभक्तिपरिणामेन सम्बन्धः । कुत एतत् ? इत्यत्राह--**[अ]निश्चयादिवत्**
/ms * सुखादि स्वभावस्य प्रत्यक्षेण अनिश्चयादिति । न च तदपेक्षते ततो वि[कल्प]कमेवेति । § 489

ननु यदि नाम साधनान्तरमपेक्षते अविकल्पकं दर्शनं नैतावता विसंवादकं साधनान्तरानुग्रहेण सुतरामविसंवादकत्वसिद्धेः आगमवत् । कल्पनापोढाऽभ्रान्तदर्शनमिति चेत्; अत्राह— **कल्पनापोढम्** इत्यादि । **कल्पनापोढमभ्रान्तमपि** । **अपि**शब्दः संभावनार्थ उभयत्र सम्बन्धनीयः । दर्शनेऽपि **तथा च सति स्वार्थ** सिद्धिवि° १ । २३ इत्यादिना कल्पनायाः **अन्तःस्वलक्षणस्य द्वयनिर्भासप्रतीतेः** [सिद्धिवि°] इत्यादिना च विभ्रमस्य व्यवस्थापितत्वात् **दर्शनं विसंवादयत्येव** । कुत एतत् ? इत्यत्राह--**यथा [दर्शनमिति]** दर्शनाऽनतिक्रमेण **यथादर्शनम् निर्णयस्य अयोगात्** । यदि यथादर्शनं निर्णयः स्यात् तर्हि तदनुग्रहात् तदविसंवादकं नितरां भवेदिति युक्तम्, न चैवमस्ति इति मन्यते । नचैतन्निर्विकल्पकमविसंवादकम् इति । अत्रैव युक्त्यन्तरमाह--**विशेष** इत्यादि । **विशेषाकारेण** सजातीयेतरविलक्षणाकारेण **चक्षुरादिबुद्धीन् अर्थानां** सुखादिनीलादीनाम् **अनवभासनात्** कारणात् न चैतत् निर्विकल्पकमविसंवादकम् इति संबन्धः अपि तु विकल्पकमेव इत्यत्रापि तदाह--**सामान्य** इत्यादि । **सामान्याकारेण, च** शब्दः विशेषाकारेण इत्यस्य समुच्चयार्थः, **व्यवसायाऽनिर्णयात् चक्षुरादिबुद्धौ अर्थानाम्** अपि तु **विकल्पकमेव** इति पदघटना ।
/ms § 490

१ कं] क्षणिकांशे समारोपव्यवच्छेदाभावात् ।
२ प] बौद्धः ।
८ स्य] विकल्पस्य ।
८ स्य] निर्विकल्पकदर्शनस्य ।
१५ *] दिति
१७ ता] साधनान्तरापेक्षणमात्रेण ।
२६ चैत] दर्शनम् ।
२८ क्षुरादिबुद्धीन्] बुद्धौ
२८ सु] चेतनेतराणाम् ।

ननु अविकल्पकं च सुखादिनीलादिनिर्भासिज्ञानम् अविसंवादकम् इत्यस्य साधिकां परस्य युक्तिं प्रदर्श्य दूषयन्नाह--**यथाप्रतिपत्रभिप्रायम्** इत्यादि । **प्रमाणस्य लक्षणम् अविसंवादकत्वम् प्रमाणमविसंवादि ज्ञानम्** प्र॰ वा॰ १ । २ इति वचनात् । कथंभूतं तत् ? इत्यत्राह--**यथाप्रतिपत्रभिप्रायम्** दृश्यप्राप्ययोर्नैकत्वम्, अन्यथा दृश्यमेव प्राप्यमेव वा स्यात् । तथापि तयोरेकत्वाध्यवसायाद् यदेव दृष्टं तदेव प्राप्तम् इति प्रतिपत्तृणाम् अभिप्रायः तस्य अनतिक्रमेण **यथाप्रतिपत्रभिप्रायम्** न पारमार्थिकम् इत्य- 111/mkj भिप्रायः । अथवा, मरीचिकाजलवत् सत्याभिमतमपि जलं न परमार्थसत्, तथापि अत्र वासनादार्ढ्येन चिरं प्रतिभासानुगमेन सत्यमेतत् जलम् अर्थक्रियाकारित्वात् नेतरद् विपर्ययात् इति तेषामभिप्रायः, तस्य अनतिक्रमेण **यथाप्रतिपत्रभिप्रायम्** । यदि वा, जाग्रद्दशावत् स्वप्नदशानामपि दृष्टस्य प्राप्तिः अविसंवादोऽस्ति इति तज्ज्ञानमपि प्रमाणं प्रसक्तम्, तथापि न तया जातपरितोषा जन्तवो जायन्ते इति न सा अर्थप्राप्तिः, जाग्रद्दशायां तु विपर्ययाद् भवति इति तेषामभिप्रायः तस्य अनतिक्रमेण **यथाप्रतिपत्रभिप्रायम्** इति । नन्वेवमपि विकल्पकमविसंवादकं प्राप्तम्, तत्रैवास्य सद्भावादिति चेत् अत्राह--**प्रमाणान्तराबाधितविषयम्** इति । प्रमाणान्तरेण अबाधितो /ms विषयो यस्य तत् तथोक्तम् **प्रमाणलक्षणम्** इति । तत् पुनः अविकल्प एव संभवि न विकल्पे, सामान्यादेः प्रमाणान्तरेण बाधनादिति; तत्र दूषणमाह--**अयुक्तम्** इति । एतदपि प्रत्यक्षलक्षणमयुक्तम् । कुत एतत् ? इत्यत्राह--**स्वमतव्याघातात्** । अन्तर्बहिश्च सर्वं क्षणिकं निरंशम् इति बौद्धस्य स्वम् आत्मीयं मतं तस्य व्याघातात् । न हि क्षणिका निरंशाः परमाणवो दृष्टाः प्राप्ता वेति प्रतिपत्तृणामभिप्रायोऽस्ति, यतः तस्य अनतिक्रमेणं तल्लक्षणं युक्तं भवेत् । यदि च यथाप्रतिपत्रभिप्रायं न पारमार्थिकं तल्लक्षणं कुतः **क्षणिकाः सर्वसंस्काराः** *इत्यादिकस्य **नान्योऽनुभाव्यो बुद्धा-**

---

७ अभिप्रायः] केवलं दृश्यविकल्प्यार्थैकीकरणमात्रेण व्यवहारमात्रमेतत् ।--प्र॰ वार्तिकाल॰ पृ॰ ३९८ ।

९ वा] यत्र वासनादार्ढ्यं स जाग्रत्प्रत्ययः । पृ॰ ७२ झटित्येव स्वप्नदृष्टं नश्यति । वासनादार्ढ्यमेतत् न त्वर्थ एव साधयितुं शक्यः ।--प्र॰ वार्तिकाल॰ पृ॰ ३६० ।

११ पि] दशायामपि

१२ त] स्वप्नज्ञानमपि ।

१२ त] स्वप्ने दृष्टप्राप्त्या ।

२२ स्य] अभिप्रायस्य ।

२३ त] प्रत्यक्षलक्षणम् ।

२४ *] (?")तत्रेदमुक्तं भगवता--क्षणिकाः सर्वसंस्काराः स्थिराणां कुतः क्रिया । भूतिर्यैषां क्रिया सैव कारकं सैव चोच्यते ॥--तत्त्वसं॰ प॰ पृ॰ ११ । बोधिच॰ प॰ पृ॰ ३७६ । तत्त्ववा॰ पृ॰ १२० । क्षणिकाः सर्वसंस्काराः विज्ञानमात्रमेवेदं भो जिनपुत्राः यदिदं त्रैधातुकम्--सन्मति॰ टी॰ पृ॰ ७३१ ।

स्ति *इत्यादिकस्य च परमार्थतः सिद्धिः समयान्तरवत् ? प्रतिभासाद्वैतस्य निषिद्धत्वात् निषेत्स्यमानत्वाच्च अनन्तरमेव । प्रमाणान्तराबाधितविषयत्वं च प्रमाणमविकल्पदर्शनमेवेति च चिन्तितम् । § 491

उपसंहारमाह--**तस्मात् नायम् अविकल्पोऽनुभवः** । कथंभूतः ? **स्वलक्षणग्राही यथार्थनिर्भासम्** अर्थनिर्भासाऽनतिक्रमेण **व्यवसायपितुं** व्यवसायं कर्तुं न **समर्थः अविसंवादको नाम** किन्तु विसंवादक एव । ननु न व्यवसायकरणाद् अविसंवादकः अपि तु स्वलक्षणग्रहणात् । व्यवसायोऽपि तद्ग्रहणात् नाऽपरः, जात्यादिप्रतिभासस्य इन्द्रियज्ञाने निषेधादिति चेत्; /ms अत्राह— **न च** इत्यादि । **न च** नैव **अविकल्पितेन** अनिश्चितेन **स्वभावेन** स्वरूपेण **स्वलक्षणस्य व्यवस्थापनं युक्तम्** उपपन्नम् । अत्र दृष्टान्तमाह--**अद्वैतवत्** इति । पुरुषाद्वैतम् इह अद्वैतं गृह्यते न प्रतिभासाद्वैतं 112/mkj तत्र बौद्धस्य विवादाभावात्, तस्य इव तद्वदिति । ननु अद्वैत-स्वलक्षणयोः अप्रतिभासेतरकृतो विशेषोऽस्ति अतः **अद्वैतवत्** इत्ययुक्तमिति चेत्; अत्राह--**भेदाऽभावात्** इति । भेदस्य विशेषस्य अभावात् स्वलक्षणस्यापि अप्रतिभासनादिति मन्यते । ततः सूक्तम्--**अद्वैतवत्** इति । अथ मतम्--तदद्वैतं यदि सुखादिनीलादिप्रतिभासात्मकं तर्हि साकारे सौगतदर्शने पुरुष इति नाम कृतं भवेत्, अन्यथा अचेतनं नावभासते इत्यसत्, सुखादिनीलादिसत्त्वे च न तदद्वैतम्, तदसत्त्वे प्रकृतेऽपि तदस्तु इति; तत्रोत्तरमाह--**विकल्पानाम्** इत्यादि । **विकल्पानां** सुखादिनीलादिभेदानां **भेदैकान्तेऽपि** निरंशस्वलक्षणैकान्तेऽपि न केवलम् अद्वैते **निःस्वभावतोपपत्तेः** असत्त्वोपपत्तेः, अन्यथाप्रतिभासस्य तत्रापि भावादिति भावः, अन्यथा अनेकान्तसिद्धिः इत्युक्तम् । § 492

इदमपरं व्याख्यानम्--निरंशस्वलक्षणदर्शनानन्तरभाविनां **विकल्पानां** यथा स्थूलादिदूरादिभेदा विषयाः तथा निःकलपुरुषदर्शनानन्तरभाविनां तेषां सुखादिनीलादिभेदा विषयाः, तेषां च **विकल्पानां भेदैकान्तेऽपि निःस्वभावतोपपत्तेः** । **स्वः** आत्मीयः सौगतकल्पितो भावः पदार्थः तस्मान्निष्क्रान्तानां /ms भावः तत्र तस्या उपपत्तेः भेदाऽभावादिति सम्बन्धः । ततः सूक्तम्--**अविसंवादकज्ञानं विकल्पकमेव** इति । § 493

---

१ *] नान्योऽनुभाव्यस्तेनास्ति तस्या नानुभवोऽपरः । तस्यापि तुल्यचोद्यत्वात् स्वयं सैव प्रकाशते ॥--प्र° वा° २ । ३२७ ।बुद्ध्यास्ति...ग्राह्यग्राहकवैधुर्यात् स्वयं... इति पाठभेदेन उद्धृतोऽयम्--प्रश° व्यो° पृ° ५२५ । न्यायम° पृ° ५४० । त° श्लो° पृ° १२१ । आप्तप° पृ° ४७ । अष्टस° पृ° ११० । मी° श्लो° टी° पृ° २७५ । शास्त्रदी° पृ° १९५ । प्रमेयक° पृ° ९० । न्यायकुमु° पृ° १३३ । न्यायवि° वि° प्र° पृ° २५१ । सन्मति° टी° पृ° ४८३ । स्या° रत्ना° पृ° १५० । स्या° म° पृ° १३९ । सर्वद° सं° पृ° ३१ । शास्त्रवा° टी° पृ° १७४ ।

१ स] मतान्तरवत् ।

१ प्र] मास्तु सिद्धिः, प्रतिभासाद्वैतोपगमादित्युक्ते प्राह ।

८ सायोऽपि] स्वलक्षणग्रहणात् ।

१६ त] पुरुषाद्वैतम् ।

भवत्वेवं तथापि न तत् प्रत्यक्षम्; मानसत्वेन वैशद्यविरहात्, तथा चोक्तम्—

*न विकल्पानुविद्धस्य स्पष्टार्थप्रतिभासिता ।
स्वप्नेऽपि स्मर्यते स्मार्त्तं न च तत् तादृगर्थदृग् ॥ प्र° वा° २ । २८३§ 496

इति चेत्; अत्राह--**न चैतद्** इत्यादि । § 497

...25 न चैतद् व्यवसायात्मप्रत्यक्षं मानसं मतम् ।
प्रतिसंख्याऽनिरोध्यत्वादर्थसन्निध्यपेक्षणात् ॥ २५ ॥§ 499

न हीदं स्वार्थव्यवसायात्मकं मानसं प्रत्यक्षम्, गवि सन्निहिते मानसीं गोबुद्धिं विनिवर्त्य तदा अश्वकल्पनायामपि गोरेव विनिश्चयात् । स पुनः निश्चयः विकल्पान्तरवदर्थसन्निधिं नापेक्षेत । तस्मादिदं स्पष्टं व्यवसायात्मकं ज्ञानं स्वार्थसन्निधानान्वयव्यतिरेकानुविधायि प्रतिसंख्यानिरोध्यविसंवादकं प्रमाणं युक्तम् । § 500

एतत् सुखादिनीलादिनिर्भासिज्ञानम् । कथंभूतम् ? **व्यवसायात्म** निर्णयात्मकं **मानसं** मनोनिमित्तम् **न च** नैव **मतम्** । कुत एतत् ? इत्यत्राह--**प्रत्यक्ष** इति । **प्रत्यक्षं** विशदम्--इन्द्रियाश्रितं वा यत इदं तन्न मानसमिति । तदाश्रितं च अक्षान्वयव्यतिरेकानुविधायित्वात् अन्वादा वभावात् । तथापि मानसत्वे अस्य द्विचन्द्रदिज्ञानस्यापि मानसत्वमिति व्याहतमेतत्-- § 501

*किञ्चेन्द्रियं यदक्षाणां भावाभावानुरोधि चेत् ।
तत्तुल्यम् । प्र° वा° २ । २९६ इति ।§ 503

113/mkj

अत्रैव युक्त्यन्तरमाह--**प्रतिसंख्या** इत्यादि । प्रतिसंख्यया प्रतिविकल्पेन **अनिरोध्यत्वाद्** अनिराक्रियमाणत्वात् । तथा च प्रयोगः--एतद् विवादगोचरापन्नं ज्ञानं न मानसम्, प्रतिसंख्याऽनिरोध्यत्वात्, यत् पुनर्मानसं न तत्

---

१ त] विकल्पकम् ।
७ प्र] मानसो हि विकल्पो रागादिरूपः प्रतिसंख्यानेन प्रतिपक्षतत्त्वज्ञानेन निवर्त्यते । इति शेषः ।
१५ क्ष] क्षम्
१६ अन्वादा] अन्धादा
१७ अस्य] विकल्पस्य ।
१९ म्] विक्रियावच्चेत् सैवेयं किन्निषिध्यते
२० तिसंख्य] अशुभाद्यालम्बना रागादिप्रतिपक्षभूता प्रज्ञा प्रतिसंख्यानम्--तत्त्वस° प° पृ° ५४७ । तेन प्रज्ञाविशेषेण प्राप्यो निरोधः इति प्रतिसंख्यानिरोधः ।--स्फुटार्था° पृ° १६ ।

प्रतिसंख्याऽनिरोध्यं यथा गवि सन्निहिते गौरयम् इति मानसो विकल्पः । पुनरपि तदन्तरमाह--**अर्थ** इत्यादि । **अर्थस्य** घटादेः **सन्निधिः** योग्यदेशाद्यवस्थानं **तदपेक्षणात्** । § 504

/ms कारिकां विवृण्वन्नाह--**नहीदम्** इत्यादि । **इदं** विवादा स्पदीभूतं ज्ञानम् । कथंभूतम् ? **स्वार्थव्यवसायात्मकम्** । तत्किम् ? **मानसम्** इति युक्तम् । **नहि** न खलु । कुत एतत् ? **प्रत्यक्षं** विशदम् अक्षाश्रितं वा यतः । इतश्च न मानसम्; इत्याह--**गवि** इत्यादि । **गवि** पशुविशेषे । कथंभूते ? **सन्निहिते** । **गोबुद्धिम्** गौरयं महान् शुक्लः दीर्घः अन्यथा वा इत्यादि परामर्शात्मिकां **मानसीं विनिवित्य तदा** तद्विवर्त्तनकाले **गोरेव विनिश्चयात्** । कस्यां सत्याम् ? इत्याह--**अश्वकल्पनायामपि** न केवलं तदकल्पनायाम् । एतदुक्तं भवति--यद्ययं स्थिरस्थूलसाधारणाकारे गोनिश्चयः प्रकृतगोबुद्धिवत् मानसः; तर्हि तद्वद् अश्वकल्पनायां विनिवर्तेत । न चैवम्, तन्न मानसः । **विनिश्चयात्** इत्यनेन एतद्दर्शयति । *तत्कल्पनाकाले गोदर्शनं यदि अविकल्पकम्; तर्हि क्षणक्षयदर्शनवत् तद्व्यवहारो न भवेत् तद्विकल्पानुत्पत्तेः, युगपद् विकल्पद्वयानभ्युपगमात् । तस्मात् निश्चयात्मकमिति । एवकारेण पुनः एतत् कथयति— दर्शनमात्रात् तथा गोव्यवहारे क्षणक्षयादिव्यवहारोऽपि भवेद् विशेषाभावात् । न चैवमिति । § 505

ननु यदा गोविनिश्चयो न तदा अश्वविकल्पना, जैनस्य युगपद् उपयोगद्वयाऽनुत्पत्तेरिति चेत्; मानसं सममुपयोगद्वयं युगपन्नेष्यते न इन्द्रियमानसे, कथमन्यथा न्या य वि नि श्च ये— **सहभुवो गुणाः** *इत्यस्य-- § 506

/ms *सुखमाह्लादनाकारं विज्ञानं मेयबोधकम् । ।
शक्तिः क्रियानुमेया स्यात् यूनः कान्तासमागमे ॥ *इति
निदर्शनं स्यात् ?§ 508

एतेन अक्षणिकज्ञानलक्षणसमारोपव्यवच्छेदात् क्षणिकानुमानं प्रमाणम् इति निरस्तम्; अक्षणिकज्ञानस्य समारोपत्वाऽसिद्धेः, अश्वकल्पनायामपि तन्निवृत्त्यसिद्धेः इति । युक्त्यन्तरमाह— **स पुनः** इत्यादि । **सः** अनन्तरोक्तः **पुनः** इति युक्त्यन्तरसूचकः, **निश्चयः** गोव्यवसायः **विकल्पान्तरवद्** ईश्वरादिविकल्पवत् **यदि मानसः** स्यात् तथा **अर्थस्य सन्निधिं** योग्य-

९ विनिवित्य] विनिवर्त्य
१३ *] अश्वकल्पनाकाले ।
१४ त्] गोव्यवहारो ।
१५ वेत्] गोविकल्पानुत्पत्तेः ।
२० से] एकमिन्द्रियजन्यमपरं च मानसमिति ।
२० *] गुणपर्ययवद्द्रव्यं ते सहक्रमवृत्तयः ।--न्यायवि० १ । ११५
२३ *] यथोक्तं स्याद्वादमहार्णवे--सुखमाह्लादनाकारम्...--न्यायवि० वि० प्र० पृ० ४२८ । अष्टस० पृ० ७८ । न्यायकुमु० पृ० १२९ । सन्मति० टी० पृ० ४७८ । स्या० रत्ना० पृ० १७८ । प्र० रत्नमा० ४ । ८ ।
२८ था] तदा

देशाद्यवस्थितिं **न अपेक्षेत** । अपेक्षते च, तन्न मानसमिति । अनेन **अर्थसन्निध्यपेक्षणात्** इत्येतत् व्यतिरेकमुखेन व्याख्यातम् । उपसंहारार्थमाह--**तस्मात्** इत्यादि । यत एवं **तस्माद् इदम्** अनन्तरोक्तम् **स्पष्टं** विशदं **व्यवसायात्मकं ज्ञानम्** । कथंभूतम् ? **स्वार्थसन्निधानान्वयव्यतिरे** 114/mkj **कानुविधायि प्रतिसंख्याऽनिरोध्यविसंवादकं प्रत्यक्षं प्रमाणं युक्तम्** । अथ तस्य स्वार्थसन्निधानान्वयव्यतिरेकानुविधायित्वं चेत्; अर्थकार्यता, इति ल धी य स्व ये तत्प्रतिषेधो विरुध्यते इति; तन्न; नोत्पत्तौ तदन्वयव्यतिरेकानुविधायित्वम्, अपि तु व्यापारो , अर्थे सद्ग्रहणे व्याप्रियते नान्यथा इति आचार्याभिप्रायात् । कुत एतदवगम्यत इति चेत् ? **स्व**ग्रहणात् । नहि किञ्चित् स्वोत्पत्तौ स्वान्वयव्यतिरेकानुविधायि, विप्रतिषेधात् । ततः सर्वं सुस्थम् § 509

स्यान्मतम्--माभूत्तन्मनसमपि त्वेन्द्रियं तथेन्द्रियं भ्रान्तमस्तु । न च इन्द्रियविभ्रमाः प्रतिसंख्यानेन निवर्त्यन्ते चन्द्रमेकम् इति भावयतोऽपि /ms द्विचन्द्रप्रतिभासानिवृत्तेरिति । तत्रोत्तरमाह--**तच्चेद्** इत्यादि । § 510

...26 तच्चेदवस्तुविषयमप्रमाणं यतोऽन्यतः ।
निर्णयात्मकत्वात्सिद्धेः अर्थसिद्धेरसंभवात् ॥ २६
॥§ 512

दर्शनसिद्धिप्रतिज्ञायां विप्रतिपत्तिविषयस्य साधनान्तरप्रतीक्षस्य सिद्धेरनुपपत्तेः । अधिगतिरित्यपि निर्णीतिरेव । तथा च अनिश्चितार्थनिश्चयेन अविसंवादकं ज्ञानं स्पष्टप्रतिभासमन्यद्वा प्रमाणं नापरम् । ततो व्यवसाय एव अविसंवादनियमोऽधिगमश्च निश्चेतव्यः तत्रैव तद्भावात्, तद्वशादेव तत्प्रतिष्ठानात् । § 513

**तद्** अनन्तरोक्तं **चेत्** यदि **अप्रमाणम्** । कुत एतत् ? **अवस्तुविषयं यतः** । सामान्यविशेषात्मकतत्त्वम् अवस्तु विषयो यस्य तत् तथोक्तम् । किं तर्हि प्रमाणम् ? न किञ्चिद् इत्यर्थः । अविकल्पकं दर्शनम् इति चेत्; अत्राह--**अन्यतः** इत्यादि । **अन्यतः** मिथ्यैकान्तवादिकल्पितात् **प्रमाणाद् अर्थसिद्धिः** अत्यन्तम् **असंभवात्** । ननु सिद्धिः अधिगतिमात्रं ततोऽपि संभवति इति चेत्; अत्राह--**सिद्धेः निर्णयात्मकत्वात्** । § 514

---

६ अथ] प्रत्यक्षस्य ।
७ ये] ज्ञानस्य अर्थकार्यतानिषेधः ।
अन्वयव्यतिरेकाभ्यामर्थश्चेत्कारणं विदः ।
संशयादिविदुत्पादः कौतस्कुत इतीक्ष्यताम् ॥
५४ इत्यादिना क्रियमाणः ।
७ त्तौ] अर्थान्वयव्यतिरेकानुविधानम् ।
८ व्यापारो] रे
१२ थेन्द्रियं] त्तन्मानसमपि त्वेन्द्रियं तथापि
१३ प्र] तत्त्वज्ञानेन ।
२६ सिद्धिः] द्धेः
२७ त] अविकल्पादपि ।

अस्याऽनभ्युपगमे दूषणमाह--**दर्शन** इत्यादि । **दर्शनम्** अर्थसाक्षात्करणं निरंशादर्थात् तदाकारात्मलाभ इति यावत्, तदेव **सिद्धिः** इति या सौगतस्य **प्रतिज्ञा** तस्यां च क्रियमाणायां **सिद्धेः** ज्ञप्तेः **अनुपपत्तेः** दर्शनस्य, सिद्धेः निर्णयात्मकत्वम् इति । कथंभूतस्य ? **विप्रतिपत्तिविषयस्य** । पुनरपि कथंभूतस्य ? **साधनान्तरप्रतीक्षस्य** साधनान्तरे प्रतीक्षा यस्य इति । अनेन दर्शनाऽभावात् [न] तत्सिद्धिः इत्युक्तं भवति । § 515

यत्पुनरेतत्--**अधिगतिस्तत्फलम्** इति; तद् अर्थतो निराकृतम्, शब्दतो निराकुर्वन्नाह--**अधिगतिः इत्यपि** न केवलमन्या अपि तु अधिगतिरित्यपि या सिद्धिः परस्य सापि **निर्णीतिरेव** । निर्णीतिपर्यायः अधिगतिशब्दः इति मन्यते । ततः किं जातम् ? इत्याह--**तथा च** इत्यादि । **तथा च** तेन च प्रकारेण **अनिश्चितस्य अर्थस्य यो निश्चयः** न दर्शनमात्रम्, तेन **अविसंवादकं ज्ञानं स्पष्टप्रतिभासम् अन्यद्वाऽस्पष्टप्रतिभासं प्रमाणं नापरम्** इति युक्तं पश्यामः । § 516

115/mkj

उपसंहारार्थमाह--**तत** इत्यादि । यत एवं **ततो व्यवसाय एव** निर्णये एव **अविसंवादनियमः अधिगमः** स्वार्थग्रहणं **च निश्चेतव्यः** । कुत एतत् ? इत्यत्राह--**तत्रैव** व्यवसाय एव **अन्तयोः** अविसंवादनियम-अधिगमयोः **भावात्** । एतदपि कुतः ? इत्यत्राह— **तद्वशादेव** व्यवसायादेव **तत्प्रतिष्ठानात्** तयोः प्रतिष्ठानात् । § 517

एवं व्यवसायात्मकमविसंवादिज्ञानं प्रमाणं व्यवस्थाप्य साम्प्रतं ततः प्रवृत्तिक्रमं दर्शयति अनागतमर्थं च सूत्रयति--**अक्षज्ञानैः** इत्यादिना । § 518

...27 अक्षज्ञानैरनुस्मृत्य प्रत्यभिज्ञाय चिन्तयन् ।
आभिमुख्येन तद्भेदान् विनिश्चित्य प्रवर्तते ॥ २७
॥§ 520

स्पर्शनरसनघ्राणचक्षुःश्रोत्रमनांसि इन्द्रियाणि । तैः स्वविषयग्रहणम् अवग्रहाद्यात्मिका मतिः बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाणां सेतरप्रकाराणाम् । अत एवानेकान्तसिद्धिः । नहि संवित्तेः बहुबहुविधप्रभृत्याकृतयः स्वयमसंविदिता एवोदयन्ते व्ययन्ते वा यतः सत्योऽप्यनुपलक्षिताः स्युः कल्पनावत् तथेतराकृतयः । स्वलक्षणसामान्यलक्षणैकान्ते पुनः संवेदनाकृतीः

७ इति ] स्वसंवित्तिः फलं चात्र--प्र० समु० १ । १० । फलं स्ववित्--प्र० वा० २ । ३३६ । विषयाधिगतिश्चात्र प्रमाणफलमिष्यते । स्ववित्तिर्वा...--तत्त्वसं० श्लो० १२४४ ।

९ स्य ] बौद्धस्य ।

१६ योः ] तयोः

२२ ते ] उद्धृतोऽयम्--त० श्लो० पृ० १८९ । न्यायवि० वि० द्वि० पृ० ४१ ।

न पश्यामः तथैवापश्यन्तः कथमात्मानमेव विप्रलभामहे । तदेवं परमार्थतः सिद्धिः अनेकान्तात् । मन्यते [मननं वा इति मतिः, स्मरणं स्मृतिः, संज्ञानं संज्ञा, चिन्तनं चिन्ता, अभिनिबोधनमभिनिबोध इति] तथामनन्ति त त्त्वा र्थ सू त्र का राः— मतिः स्मृतिः संज्ञाचिन्ताभिनिबोध इत्यनर्थान्तरम् त० सू० १ । १३ इति । मतिस्मृत्यादयः शब्दयोजनामन्तरेण न भवन्तीत्येकान्तो न यतस्तत्रान्तर्भाव्येरन् । तदेकान्ते पुनः न क्वचित् स्युः तन्नामस्मृतेरयोगात् अनवस्थानादेः § 521

अतो निबन्धनस्थानाद् वाक्यान्तराणि उपप्लवन्ते--**अक्षज्ञानैः तद्भेदान् विनिश्चित्य प्रवर्तते** इत्येकं वाक्यम्, **अनुस्मृत्य तद्भेदान् प्रवर्तते** इति द्वितीयम्, **प्रत्यभिज्ञाय तद्भेदान् प्रवर्तते** इति तृतीयम्, **चिन्तयन्** वितर्कयन् **तद्भेदान् प्रवर्तते** इति चतुर्थम्, **आभिमुख्येन तद्भेदान् विनिश्वत्य प्रवर्तते** इति पञ्चमम्, **चिन्तयन्नाभिमुख्येन तद्भेदान्विनिश्चित्य प्रवर्तते** इति षष्ठं समुदितम् । तत्र **अक्षाणि** चक्षुरादीनि इन्द्रियाणि तेषां कार्यभूतैः **ज्ञानैः तद्भेदान्** हिताहितार्थविशेषान् **विनिश्चित्य प्रवर्तते** पुरुषः । अयं च प्रवृत्तिक्रमः अभ्यासदशायां द्रष्टव्यः । नहि तस्यां प्रवर्त्तमानो नियमेन सजातीयानुस्मरणादिकमपेक्षते जनः तथाऽप्रतीतेः अमुमेवार्थमाश्रित्य **अभ्यासे भाविनि प्रवर्त्तकत्वात् प्रत्यक्षं प्रमाणम्** इति । तत्सर्वं युक्तम्, इदं तु अयुक्तम् प्र ज्ञा क र गु प्ते नोक्तम्— **भाविनि** इति; दाहादिकारणे पावकादौ लोकस्य प्रवृत्तिदर्शनात् । दाहाद्यदर्शने कथं तत् तत्कारणम् इति प्रतीयते इति चेत् ? अभ्यासात् किन्न जायते ? स्वयं च व्यवहारमाश्रित्य ततोऽप्रतिपन्नमपि प्रत्यक्षेण भावि प्रतिपन्नमिच्छन् तमेव आश्रित्य वर्त्तमानं तत्कारणं प्रत्यक्षमिच्छन्तं न सहते इति प्राकृतबुद्धिः । § 522

/ms

116/mkj

अथवा, यदुक्तम्--**गवि सन्निहिते गोबुद्धिं विनिवर्त्त्य तदा अश्वकल्पनायामपि गोरेव विनिश्चियात्** इति; तत्र प्रवृत्तौ इदं वाक्यम्, तत्र अनुस्मृत्यादेर्विरोधात् । **अनुस्मृत्य तद्भेदान् प्रवर्तते*** पूर्वव्यवस्थापितनिक्षेपादिषु प्रवृत्त्यर्थम् । **प्रत्यभिज्ञाय तद्भेदान् तु प्रवर्तते** इत्येतत् पुनः तदेवेदं तेन सदृशम् इति वा अनुसन्धानमात्रेण प्रवृत्तौ । **चिन्तयन् तद्भेदान् प्रवर्तते** इतीदम् अदृश्यमेरुमकारवाडवाग्निविवेकविनिश्चयेन देशाद्यन्तरवृत्तौ । **आभिमुख्येन तद्भेदान् विनिश्चित्य प्रवर्तते** इत्येतत् अकस्माद् धूमदर्शनात्

---

१७ इति] वर्तमानेऽतिमात्रेण वृत्तावध्यक्षमानता । यत्रात्यन्ताभ्यासादविकल्पयतोऽपि प्रवर्तनं तत्र प्रत्यक्षं प्रमाणम्--प्र० वार्तिकाल० पृ० २१८ ।

२० च] तस्माद् व्यवहारमात्रप्रसिद्धानुमानाश्रयेण प्रसिद्धं सम्बन्धमाश्रित्य तदेतदर्थक्रियासाधनमिति दर्शनेन स्पृश्यादिसाधनस्य प्रतिपत्तौ प्रवर्तते । पश्चादभ्यासानुमानमन्तरेणापि प्रतिभासमात्रादेव वृत्तिरिति प्रत्यक्षमपि प्रवर्तकत्वात् प्रमाणम् । अत उच्यते प्रामाण्यं व्यवहारेणेति ।— प्र० वार्तिकाल० पृ० २५ ।

२१ मेव] व्यवहारमेव ।

२४ वृत्तौ] अक्षज्ञानैः तद्भेदान् विनिश्वत्य प्रवर्तते इति ।

२५ *] इति वाक्यं तु ।

२८ कार] मकराकर

पावकोऽत्र इति प्रवृत्तौ । **चिन्तयन् आभिमुख्येन तद्भेदान् विनिश्चित्य प्रवर्तते** [इत्ये]तत् अनित्यः शब्दः श्रावणत्वात् इत्याद्यनुमानात् प्रवृत्तौ । समुदितं तु वाक्यम् वह्निरत्र, धूमात्, यत्र यत्र धूमः तत्र तत्र वह्निः यथा महानसादौ, /ms धूमश्चात्र इत्येवमाद्यनुमानात् प्रवृत्तौ । तत्र अक्षज्ञानैः पूर्वमनयोः सम्बन्धे गृहीते सति पुनस्तैरेव क्वचित् धूमे विषयीकृते पूर्वसंस्कारप्रबोधः, ततः स्मृतिः, तस्याः प्रत्यभिज्ञा, पुनः तर्कः, अतोऽनुमानं [ततः] प्रवृत्तिरिति ।
§ 523

कारिकां विवृण्वन्नाह--**स्पर्शन** इत्यादि । **स्पर्शनरसनघ्राणचक्षुःश्रोत्रमनांसि** । किम् ? **इन्द्रियाणि** । मनः सर्वज्ञसिद्धौ निरूपयिष्यते । **तैः** स्पर्शनादिभिः कारणभूतैः **स्वविषयाणां** स्पर्शादीनां **ग्रहणं** तद्ग्राहकं यज्जन्यते ज्ञानम् । तत् किं नाम ? इत्यत्राह--**मितिः** इति । * । किमात्मिका सा ? इत्यत्राह--**अवग्रह** इत्यादि । ***अवग्रहादयो** वक्ष्यमाणकाः **तदात्मिका** इति । केषां सा ? इत्यत्राह--**बहु** *इत्यादि । **बहु** च युगपत् समानजातीयानां बहूनां ग्रहणम्, **बहुविधं** च भिन्नजातीयानाम्, **क्षिप्रं** च झटिति, **अनिःसृतं** च आलोकाद्यनपेम **अनुक्तं** च पानकादौ गुडादिरसविशेषस्य अकथितं च । **ध्रुवं** च दृढतया कालान्तरस्मरणकारणम् तेषाम् । कथंभूतानाम् ? **सेतरप्रकाराणाम्** सह इतरप्रकारैः अबह्वादिभिः वर्तमानानाम् । तथा च सति किं सिद्धम् ? इत्यत्राह--**अत एव** इत्यादि । यत एव तैः स्वविषयाणां ग्रहणमेवंविधम्, अत एव **अनेकान्तसिद्धिः** । § 524

ननु आगमादेव केवलात् सर्वमेतत् सिद्धं नान्यतः अनुपलक्षणात्, ततो भवत आगमिकत्वमिति चेत्; अत्राह--**नहि** इत्यादि । **नहि संवित्तेः** इन्द्रियमतेः सम्बन्धिन्यः **बहुबहुविधप्रभृत्याकृतयः स्वयम्** आत्मना **असंविदिता एव** /ms अज्ञाता एव **उदयन्त** उत्पद्यन्ते **व्ययन्ते** विनश्यन्ति **वा यतो** यस्माद् असंविदितोदयव्ययात् **सत्योऽपि अनुपलक्षिताः स्युः** । अत्र परप्रसिद्धं दृष्टान्तमाह **कल्पनावत्** इति । यथा **नहि इमाः कल्पनाः** *इत्यादि वचनात् 117/mkj ईश्वरादिकल्पना नाऽनुपलक्षिताः उदयन्ते व्ययन्ते च तथा प्रकृता अपि इति । **तथा** तेनैव प्रकारेण **इतराकृतयः** अबह्वाद्याकृतयः न सत्योऽपि अनुपलक्षिता उदयन्ते व्ययन्ते वा इति । तर्हि तथैव स्वलक्षणसंवेदनाकृतयः सामान्यसंवेदनाकृतय एव वा स्वयं स्वसंविदिता एव उदयन्ते व्ययन्ते चेति चेत्; अत्राह--**स्वलक्षण** इत्यादि । **स्वलक्षणं** च **सामान्यलक्षणं** च ते एव **एकान्तौ** तयोः **संवेदनाकृतीः पुनः न पश्यामः** । चर्चितं चैतत् । तथापि

१० का] क
११ *] मतिरिति
१२ *] अवग्रहेहावायधारणाः ।--त॰ सू॰ १ । १५ ।
१३ *] बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाणां सेतराणाम् ।--त॰ सू॰ १ । १६
१५ पेम] पेक्षम्
२१ आ] आगमानुसारित्वम् ।
२४ प] सौगतप्रसिद्धम् ।
२५ *] तदाह--न चेमाः कल्पना अप्रतिसंविदिता एवोदयन्ते व्ययन्ते चेति । प्र॰ वा॰ स्व॰ टी॰ पृ॰ १२७ ।

ताः सत्यः कल्प्यतामिति चेत्; अत्राह--**तथैव** इत्यादि । **तथैव** परपरिकल्पितप्रकारेणैव **अपश्यत्तत** * **कथं कल्पनया** स्वलक्षणसामान्यलक्षणैकान्ते संवेदनाकृतिकल्पनया **आत्मानमेव विप्रलभामहे** वञ्चयामः । § 525

उपसंहारमाह--**तदेवम्** इत्यादिना । **तत्त गोत्** * **एवम्** उक्तप्रकारेण **परमार्थतः सिद्धिः** सर्वभावानां निष्पत्तिः प्रतिपत्तिर्वा **अनेकान्ताद्** अनेकान्तमाश्रित्य । § 526

मत्यादीनां निरु[क्तिं] दर्शयन्नाह--**मन्यते** इत्यादि । सुगमम् । त त्त्वा र्थ सू त्र का रेण सहात्मनः ए[क]वाक्यतां दर्शयन्नाह--**तथा** इत्यादि । **तथा** उक्तप्रकारेण **आमनन्ति** त त्त्वा र्थ सू त्र का राः । कथम् ? /ms इत्याह--**मतिः स्मृतिः संज्ञा चिन्ताभिनिबोध इत्यनर्थान्तरम्** त° सू° १ । १३ इत्येवम् । सर्वसूत्राणां सोपस्कारत्वात् अत्र प्रवर्त्तकः इत्यध्याहार्यम् । **इति** शब्दः स्वसूत्रे वाक्यान्तरसमाप्त्यर्थः । ततोऽयमर्थो जायते--मतिः प्रवर्तिका इति, स्मृतिः प्रवर्तिका इति, संज्ञा प्रवर्तिका इति, चिन्ता प्रवर्तिका इति, अभिनिबोधः प्रवर्तकः, चिन्ताभिनिबोधः प्रवर्तकः, मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोधः प्रवर्तकः इति च । § 527

ननु च एतन्मत्यादिकमन्योन्यं भिन्नमभिन्नं वा ? उभयथापि **स्वलक्षण** इत्यादि विरुध्यते इति चेत्; अत्राह--**अनर्थान्तरम्** इति । ईषदर्थे नत प्रवर्तते । ईषत् कथञ्चिद् अर्थान्तरम् **अनर्थान्तरमिति** । उक्तं [च] ल घी य स्त्र ये--**प्रमाणफलयोः क्रमभावेऽपि तादात्म्यं प्रत्येयम्** लघी° स्व° श्लो° ६ इति । अथवा, यदावग्रहविषयीकृतम् ईहा प्रत्येति, ईहितम् अवायोऽवैति, अवायानुभूतं धारणा, एवम् उत्तरत्रापि योज्यम्, तदेवमाह **अनर्थान्तरम्** इति, कथञ्चिदभिन्नविषय मत्यादिकम् इत्यर्थः । अन्त्यवाक्यापेक्षया **अनर्थान्तरम्**— अभिन्नप्रवृत्तिप्रयोजनम् इति वा व्याख्येयम् । § 528

ननु मत्यादिकं सर्वम् अभिधानपुरस्सरमेव स्वार्थं प्रत्येति इति शब्दश्रुत एवान्तर्भावोऽस्य, तथा च तच्चिन्तने एवास्य चिन्ता भविष्यति इति पृथगिह चिन्तनमनर्थकमिति चेत्; अत्राह— **शब्दयोजनम्** इत्यादि । **मतिस्मृत्यादयः शब्दयोजनमन्तरेण ते न भवन्ति** किन्तु तद्योजने सति भवन्ति इत्येवम् **एकान्तो न, यत** एकान्तात् **तत्र अन्तर्भाव्येरन्** इत्यर्थः । **यत** /ms इति वा आक्षेपे, नैव संकीर्येरन् । विपक्षे बाधकमाह--**तदेकान्त** इत्यादि । स चासौ एकान्तश्च तस्मिन् अङ्गीक्रियमाणे **पुनः न क्वचिद्** बहिरन्तर्वा **स्युः मतिस्मृत्यादयः** । कुत एतत् ? इत्यत्राह--**तन्नाम** इत्यादि । यस्य 118/mkj नाम्ना योजनात् मृतिस्मृत्यादयः तत् **तन्नाम** इत्युच्यते, तस्य **स्मृतेरयोगात्**

---

१ ता] त्ता
२ *] श्यन्तः
४ *] तत् तस्मात्
७ इत्यादि] मननं मतिः स्मरणं स्मृतिः संज्ञानं संज्ञा चिन्तनं चिन्ता आभिमुख्येन नियतं बोधनमभिनिबोध इति--त° वा° १ । १३ । ५ ।
१७ त] नत्र्
२० दा] द
२२ य] यं
३२ ना] वाचकेन शब्देन ।

। एतदुक्तं भवति--न यत्र यत्र स्वार्थः तत्र तत्र तन्नाम, यतः तद्योजनात् नियमेन मतिस्मृत्यादयः स्युः अपि तु सङ्केतस्य योजनात्, तत्स्मृतेरेव च अयोगात् प्रकृतमिति । कुत एतत् ? इत्यत्राह--**अनवस्थानादेः** अनवस्था[नम्]आदिर्यस्य अन्योन्यसंश्रयस्य स तथोक्तः तस्मात् । तथाहि--प्रथमा नामस्मृतिः तद्विषयाभिधानस्मृतेः, सापि तद्विषयनामस्मृतेः इत्यनवस्था । सन्निहिते च वस्तुनि मत्यादिना निर्णीते नामविशेषे स्मृतिः, तस्याश्च सत्यादिः इत्यन्योऽन्यसमाश्रयः । अत एव अप्रतिपत्तिः प्रतिपत्तेरभावः, अन्धमूकं जगत् स्यादिति मन्यते । चर्चितं चैतत्--**सदृशार्थाभिलापादिस्मृतिः** सिद्धिवि॰ १ । ८ इत्यादिना । § 529

एवं तावत् **प्रमाणस्य फलं साक्षात् सिद्धिः स्वार्थ[वि] निश्चयः** सिद्धिवि॰ १ । ३ इत्यस्य समर्थनद्वारेण **अधिगतिः तत्फलम्** इत्येतन्निरस्तम् । इदानीम् **सारूप्यं प्रमाणम्** न्यायबि॰ १ । २० इत्येतत् प्रकारान्तरेण दूषयन्नाह--**प्रत्यक्षाः** इत्यादि । § 530

...28 प्रत्यक्षाः परमाणवो बहिरिमे स्थूलैकचित्राकृतेः,
संवित्तेर्विषया इति प्रलपता स्याद्वादविद्वेषिणा ।
बुद्धेनालमलं बहिरन्तर्वाऽश्लीलमेवाकुलम्,
तन्नैरात्म्यमपीतरेण न विवेकात्मा न सा युज्यते ॥
२८ ॥§ 534

विषयो द्विविधो बौद्धस्य प्रत्यक्षः अनुमेयश्च । तत्र **प्रत्यक्षः** सन्तो **विषया** गोचराः । के ? इत्याह--**परमाणवः** । क्व ? **बहिरिति** । के पुनस्ते /ms ? इत्याह-- **इमे** परिदृश्यमानघटादिव्यपदेशभाजः । कस्याः ? इत्यत्राह-- **संवित्तेः** । कथम्भूतायाः ? इत्याह— **स्थूलैकचित्राकृतेः** स्थूला एका चित्रा शबला आकृतिः आकारो यस्याः सा तथोक्तः तस्याः **सञ्चितालम्बनाः पञ्च विज्ञानकायाः** इति राद्धान्तात् । **प्रलपता अलम्** । केन ? **बुद्धेन इतर** केन ? दि ग्ना गा दि ना । कथं **प्रलपता ? अश्लीलमेव** असम्बद्धमेव यथा भवति **आकुलं** च । **अपिशब्दः** भिन्नप्रक्रमः अत्र द्रष्टव्यः च शब्दार्थः । कथंभूतेन ? इत्यत्राह--**स्याद्वादविद्वेषिणा** । एतदुक्तं भवति--यथा नीलाकृतेः संवित्तेः नीलं प्रत्यक्षं न पीतादि, सारूप्यकल्पनावैफल्यभयात् तथा **स्थूलैकचित्राकृतेः** तस्याः प्रत्यक्षो विषयोऽपि तथाविध एव कल्पनीयो न परमाणवः इति । § 535

---

७ त्यादिः ] मत्यादिः
१८ स्य ] न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य संभवः ।--प्र॰ वा॰ २ । ६३ ।
१८ क्षः ] क्षाः
२२ थोक्तः ] क्ता
२३ इति ] पञ्चसञ्चयस्यालम्बात्--प्र॰ समु॰ १ । १७ ।
२४ र ] इतरेण
२८ त ] संवित्तेः ।
२८ थाविध ] स्थूलैकचित्राकार एव ।

यत्पुनरत्रोक्तं प्र ज्ञा क र गु प्ते न--**तथाविधायाः तथाविधविषयसिद्धिः दूरस्थितविरलकेशेषु अतदात्मसु तथाविधायाः तस्याः दर्शनात्** । *इति; तत्र न तर्हि परमाणवः तस्याः प्रत्यक्षः सन्तो विषयाः किन्तु अनुमेयाः, इतरथा दूरस्थितविरलकेशा अपि अनेक संवित्तेर्विषयाः तथा 119/mkj इति न भ्रान्तं नाम किञ्चित्, यन्निरासार्थम् अभ्रान्तग्रहणं क्रियमाणमर्थवत् स्यात् । अथ तत्केशानां विरलनाननुकरणेऽपि कृष्णतामात्रानुकरणवत् परमाणूनामन्योन्यविवेकाननुकरणेऽपि नीलतामात्रानुकरणात् ते प्रत्यक्षा इति; तर्हि एकस्य गृहीतेतररूपतया अनेकान्तसिद्धिः ऐति **स्याद्वादविद्वेषिणा** /ms **अलम् अलम्** इति । न तत्त्वतः तस्याः ते प्रत्यक्षं [क्षाः] किन्तु व्यवहारेणेति चेत्; उक्तमत्र नीलाकारसंवित्तेः नीलवत् तस्या अपि स्थूलैकचित्रार्थप्रत्यक्षताप्रसङ्गादिति । § 536

किंच, संवित्तिवद् एकस्य स्थूलैकचित्राकारोऽपि न विरुध्यते इति, एवमर्थं च **स्थूलैकचित्राकृतेः** इति वचनम् । तर्हि प्रतिपरमाणुभेदात् संवित्तिरपि तथाविधा मा भूत् । तदुक्तम्-- § 537

*किं स्यात् सा चित्रतैकस्यां न स्यात्तस्यां मतावपि § 538

प्र० वा० २ । २१० इत्यादि । § 539

इति चेत्; अत्राह--**न सापि** इत्यादि । **न** केवलं बहिरर्थोऽपितु **साऽपि** संवित्तिरपि **विवेकात्मा न न युज्यते** युज्येतैव, प्रतिषेधद्वयेन प्रकृतार्थगतेः, इतरथा उक्तन्यायेन सकलशून्यता स्यादिति मन्यते । सैवास्तु इति चेत्; अत्राह--**तन्नैरात्म्यम्** इत्यादि । यत एवं तस्मात् **नैरात्म्यं** सकलशून्यत्वं **बहिरन्तर्वा इति** एवं **प्रलपता** इत्यादिना सम्बन्धः । स्याद्वादमन्तरेण तदप्रतिपत्तेरिति भावः । छ ॥ § 540

इति श्री र वि भ द्र पादोपजीवि-अ न न्त वी र्य विरचितायां सि द्धि वि नि श्च य टी का यां प्रत्यक्षसिद्धिः प्रथमः प्रस्तावः । छ ॥ § 541

# द्वितीयः प्रस्तावः : २ सविकल्पसिद्धिः

120/mkj

**अक्षज्ञानैः**सिद्धिवि० १ । २७ इत्यादिना उक्तमर्थम् इतरग्रन्थेन समर्थयितुकामः तदादौ संग्रहवृत्तत्रयं **स्वार्थ** इत्यादिकमाह-- § 542

---

३ *] यथैव केशा दवीयसि देशे असंसक्ता अपि घनसन्निवेशावभासिनः परमाणवोऽपि तथेति न विरोधः ।--प्र० वार्तिकाल० पृ० २९६, पृ० १४ ।
३ क्षः] क्षाः
५ म्] प्रत्यक्षलक्षणे ।
७ ते] परमाणवः ।
८ ऐति] इति
९ ते] परमाणवः ।

...1 स्वार्थावग्रहनीतभेदविषयाकाङ्क्षात्मिकेयं मतिः,
भेदावायमुपेत्य निर्णयमयं संस्कारतां यात्यपि ।
स्मृत्या प्रत्यभिज्ञावतोहविषयाद्धेतोरशाब्दानुमा,
कल्प्या आभिनिबोधिकी श्रुतमतः स्यात्
शब्दसंयोजितम् ॥ १ ॥§ 546

अस्याऽयमर्थः--**स्वं** च **अर्थश्च** तयोः ग्राहकोऽ**वग्रहः** **स्वार्थाऽवग्रहः** स्वार्थावग्रहश्च नि पूर्वाद् इणः क्ति शति भवति, अन्यस्याऽप्रकृतत्वात्, /ms प्रत्यासत्तेश्च अवग्रहेण **नीतम्** अवगतम् इति गम्यते । तत्र भेदव[च]न-सान्निध्यात् द्विविधं सामान्यम् इति च, तस्य **भेदो** विशेषो **विषयः** यस्या **आकाङ्क्षाया** ईहायाः सा तथोक्ता, ता**वात्मानौ** स्वभावौ यस्याः सा त-दात्मिकेयं **मतिः** । किं करोति ? इत्यत्राह--**संस्कारतां याति** धारणात्मिका भवति । किं कृत्वा ? इत्यत्राह--**भेदावायमुपेत्य** उपढौक्य **निर्णयमयं** त-दात्मिका भूता इत्यर्थः । **अतः** अस्याः मतेः **परम्** अन्यद् अस्पष्टज्ञानं **श्रुतम्** **श्रुतमस्पष्टतर्कणम्** त° श्लो° पृ° २३७ *इति वचनात् । तत्कथं जायते ? इत्यत्राह--**स्मृत** इत्यादि । **अतः** इत्येतद् अनेनापि सम्बध्य-ते--ततो मतेः **स्मृतिः**, तया **स्मृत्या** कारणभूतया **प्रत्यभिज्ञानता** तदेवेदं तेन सदृशम् इति वा प्रत्यभिज्ञावता पुरुषेण **ऊहविषयाद्** **हेतोः** लि-ङ्गाद् **अनुमा** **कल्प्या** । कथम्भूता ? **अशब्दा** स्वार्थानुमा इत्यर्थः । अस्या नामान्तरमाह--**आभिनिबोधिकी** इति । अभि समन्ताद् अर्थस्य सामान्यरूपेणेव विशेषरूपेणापि निश्चितो बोधो ग्रहणम् तत्र नियुक्ता न पुनः सामान्यापोहमात्रग्रहण इति मन्यते । अथवा, पूर्वज्ञानापेक्षया कथञ्चिद-तिनवस्य अपूर्वस्यार्थस्य ग्रहणम् अभिनिबोधः तत्र नियुक्ता **मतिपूर्वं** **श्रुतम्** त° सू° १ । २० इति वचनात् । मतेः स्मृतिः, ततः प्रत्यभिज्ञा, अत ऊहः, अस्माद् अशाब्दानुमा श्रुतम् इत्युक्तं भवति । **अपिशब्दो** भिन्नप्रक्रमः **श्रुतमतः** इत्यस्याऽनन्तरं द्रष्टव्यः । अतोऽपि परं **शाब्दयोजितं** ज्ञानं श्रुतम् इति । § 547

/ms स्यान्मतम्--दर्शनम्, अतश्च भेदनिश्चय इति किं तदन्तराले आकाङ्क्षया इति ? तत्रोत्तरमाह--**वैशद्यम्** इत्यादि । § 548

६ क्ति] भूतकालार्थे क्ते प्रत्यये सति ।
६ ति] क्ते सति
७ त्र] षष्ठ्या विग्रहे सति इत्यर्थः ।
१३ *] उद्धृतमिदम्--न्यायवि° वि° द्वि° पृ° १८७, ३६० । श्रुतमविस्पष्टतर्कणम्--न्यायकुमु° पृ° ४०४ ।
१४ स्मृत] त्या
१५ भिज्ञान] व
१७ ब्दा] अशाब्दा
२० ण] यथा बौद्धानाम् अनुमानं सामान्यविषयं न तथा ।
२१ ति] भि
२२ इ] श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम्--त° सू° ।
२६ त] बौद्धः प्राह ।
२६ म्] निर्विकल्पकम् ।
२६ य] विकल्पः ।

121/mkj

...2 वैशद्यं यदि भेदनिश्चयकरमेकान्ततो भावतः,
सर्वस्मात्परतः करोतु विपरीतारोपविच्छेदनम् ।
संकल्पाहितवासनापरिणतेः सर्वत्र चित्रेहनम्,
प्रत्यक्षं न ततोऽनन्वयधियां का वासनानां कथा ॥
२ ॥§ 552

**वैशद्यं** स्वलक्षणसाक्षात्करणं **यदि भेदनिश्चयकरम्** अवायं करोतीति चेत्; दृष्टेदर्शनस्य संबन्धि तद्वैशद्यम् **एकान्ततो**ऽवश्यं **भावतः सर्वस्मात्** सजी [सजातीयाद्विजातीया]याच्च **परतः** अन्यस्माद् वस्तुनः सकाशात् **करोतु** । किम् ? **विपरीतारोपविच्छेदनं** विपरीतस्य गुणान्तरस्य आरोपवित् समारोपज्ञानं तस्याः छेदनं विनाशः तदविशेषात् । तथा च आकाङ्क्षावत् सर्वं समारोपव्यवच्छेदकारित्वेनाभिमतमनुमानमनर्थकमिति मन्यते । नायं दोषः, सर्वत्र दर्शनपाटवादेरभावात् इति परस्य आकूतं कृतोत्तरमिति मत्वा तत्पक्षान्तरमाशङ्कते **संकल्प** इत्यादि । कल्पनं कल्पः व्यवसायः, समीचीनः कल्पः यथावस्थितभेदनिश्चयः तस्मायाहिता व्यवस्थापिता, तेन वा, **वासना** तस्याः **परि[णतिः]** स्वकार्योत्पादनसामर्थ्यपरिपाकः सा **चित्रा** शबला दृष्टार्थवैशद्याविशेषेऽपि क्वचिदेव अंशे भेदनिश्चयहेतुः सा न सर्वत्र । तदुक्तम्--
§ 553

*परिव्राङ्कांकस्तुना मेकस्यां प्रमदातनौ ।
क्रमणं कामिनी भक्ष्या इति सा विकल्पनाः ॥§ 555

इति चेत्; अत्राह--**ईहनम्** इत्यादि । **ईहनम्** ईहा, प्रत्यक्षस्य ततः तत्परिणतेः चित्रतायाः सकाशाद् अस्तु प्रत्यक्षम् ईहात्मकं भवतु । एतदुक्तं भवति--न उपादानज्ञानाद् अन्या वासना, तत्परिणतेः चित्रत्वेन ज्ञानपरिणतिरेव चित्रा इत्युक्तं भवति । न च अवग्रह ज्ञानादन्यत् पूर्वम् अवायज्ञानात् प्रतीयते ततः सा अवगृहीतविशेषाकाङ्क्षापरिणतिस्वभावा अस्तु इति । न च परस्य वासना इति दर्शयन्नाह--**अनन्वय** इत्यादि । /ms

६ दृष्टेद] र्द
८ गु] एकत्वादेः ।
१० म] सर्वं क्षणिकं सत्त्वादित्यादिकम् ।
११ भावात्] न विकल्पोत्पत्तिः, अतः समारोपव्यवच्छेदाय अनुमानं सफलमिति ।
१५ क्व] नीलादौ, न क्षणिकत्वादौ ।
१५ म्] उद्धृतोऽयम्--सर्वद° सं° पृ° ३० ।
१७ स्तुना] कामुकश्शुना
१८ णं] कुणपं
१८ सा] तिस्रो
२१ त] वासनापरिपाकस्य ।

अन्वयात् निष्क्रान्त**धियां** सौगतानाम् [का न] काचिद् **वासनानां कथा** इति निरूपयिष्यते **कार्यकारणता नास्ति** सिद्धिवि° ४ । ३ इत्यादिना ।
§ 556

ननु पूर्वपर्यायप्रवृत्तमध्यक्षं नोत्तरपर्याये वृत्तिमत्, नापि उत्तरपर्यायविषयं पूर्वपर्यायवीत्वंक्षमम्, अत एव नानुमानमपि, तत्कुतोऽवग्रहाद्यात्मकत्वं कस्यचित् प्रतीयते ? न चैकस्य अनेकात्मकत्वम् विरोधादिति चेत्; अत्राह--**प्रत्यक्षम्** इत्यादि । § 557

...3 प्रत्यक्षं क्षणिकं विचित्रविषयाकारैकसंवेदनम्,
तत्त्वं चेत् सुखदुःखमोहविविधाकारैकसाधारणः ।
जीवो योगक्षेमभेदभृच्चेत् सन्तानभेदः कुतः,
चित्तानां क्षणभङ्गिनां सहभुवां सहभूतिसंवेदनात् ॥
३ ॥§ 561

122/mkj

**विचित्रो** नानाप्रकारो **विषयो** नीलादिः, तदाकार इव **आकारो** यस्य **एकस्य** अभिन्न**संवेदनस्य** तत् तथोक्तम्, यस्यापि यौगस्य निराकारं तं प्रति विचित्रविषयाकारेषु एकसंवेदनम् इति व्याख्येयम् । कथंभूतम् ? **क्षणिकम्** । तथा च यौगस्य प्रयोगः--क्षणिका बुद्धिः अस्मदादिप्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणत्वात् शब्दवत् इति । पुनरपि कथंभूतम् ? इत्याह—**प्रत्यक्षम्** इति । स्वसंवेदनाध्यक्षविषयीकृतं ज्ञानान्तरविषयीकृतं वा भवतु । तत् किम् ? इत्यत्राह--**तत्त्वं चेदिति** । **तत्त्वं** परमार्थसत् **चेद्** यदि । तद् अन्यथा अङ्गीकुर्वतः सौगतस्य न किंचित् सिध्येदिति मन्यमान एवं पृच्छति, यौगस्यापि प्रतिविषयं विज्ञानभेदमभ्युपगच्छतः **सदसद्वर्गः कस्यचिद् एकज्ञानालम्बनम् अनेकत्वात् पञ्चाङ्गुलवत्** इत्यत्र साध्यदृष्टान्तविरोधः इति च । तथेति वदतो दूषणमाह--**सुख** इत्यादि । **सुखदुःखमोह**ग्रहणम् उपलक्षणम्, तेन सर्वातीतानागतवर्त्तमानपर्याया गृह्यन्ते, ते च ते **विविधाकाराश्च** तेष्वेकः **साधारणः** तदेकः स चासौ **जीवश्च** । यदि वा, सुखदुःखमोहा विविधाकाराः स्वभावभूता धर्मा यस्य स तथोक्तः, स चासौ एकजीवश्च **न किं तत्त्वम्** ? अपि तु तत्त्वमेव । यथैव हि युगपत् संवेदनं चित्रमात्मानं

५ त्वं] क्षण
५ पि] पूर्वोत्तरपर्यायग्राहकम् ।
६ त्वं] आत्मनः ।
१३ निराकारं] ज्ञानम् ।
१५ स्य] नैयायिकस्य ।
१५ योगः] तुलना--अनित्यः शब्दः गुणत्वे सति अस्मदादीन्द्रियविषयत्वात् बुद्धिवत् ।--न्यायवा° पृ° २९९ ।
१६ व्य] विभुद्रव्यमत्र आत्मा ।

प्रत्यक्षयति, नापि तेन विरुध्यते; तथैव क्रमेण जीवः तथा प्रत्यक्षयति तेन वा न विरुध्यत इति भावः । § 562

ननु सौगतं साकारज्ञानवादिनं प्रति अतत्त्वे तदनिष्टं न यौगं निराकारज्ञानवादिनं प्रति । *स हि निराकारेण एकज्ञानेन अनेकमर्थं विषयीकरोतीति चेत्; न; एकेन स्वभावेन तद्विषयीकरणे कुतः अर्थभेदः ? *इतरथा एकस्वभावात् कारणात् कार्यभेदः स्यात् । न चैवमिति निरूपयिष्यते ईश्वरनिराकारणे । § 563

ननु एकस्मिन् सन्ताने सुखे उत्पद्यमाने अनुभूयमाने वा न दुःखमोहादय उत्पद्यन्ते अनुभूयन्ते वा, विनश्यति,* ततो भिन्नयोगक्षेमत्वात् रामाऽर्जुनादिवत् तेषां भेद एव इति सौगतः; एतदेव दर्शयन्नाह--**योग** इत्यादि । **योगः** उत्पादः **क्षेमो**विनाशः संवेदनं वा, तयोः **भेदाऽभेदेनानु** * प्रकृते सुखादौ इति **चेत्**; अत्रोत्तरमाह--**सन्तान** इत्यादि । इदमत्र तात्पर्यम्-- एकसन्तानव्यपदेशभाजां भेदे साध्ये सुखादीनां भिन्नयोगक्षेमत्वात्, /ms यत् अन्यद्--भिन्नं चित्रं ज्ञानं तद् विपक्षः, तस्य च हेतुविपर्ययेण [अ]भिन्नयोगक्षेमेन अनवयवेन व्याप्तौ, ततो निवर्तमानो भिन्नयोगक्षेमलक्षणो हेतुः तद्भेदं साधयेत् नान्यथा, हेतुविपर्ययस्यापि साध्यविपर्ययेण व्याप्तौ चित्रमेकं क्षणिकं ज्ञानं प्रसिध्यति अभिन्नयोगक्षेमत्वेन । तथा च सति **सन्तानानां भेदो** नानात्वं **कुतः** ? न कुतश्चिन्मानात् । केषाम् ? **चित्तानाम्** । कथंभूतानाम् ? **क्षणभङ्गिनाम्** । पुनरपि कथंभूतानाम् ? **सहभुवाम्** इति । अनेन पदद्वयेन अभिन्नोत्पत्तिविनाशौ तेषां कथितौ । पुनरपि तद्विशेषणमाह--**भूतेः असंवेदना [सहभूतिसंवेदनात्]** इति । अत्रायमर्थः--**सहभूतेः** कारणात् 123/mkj सहैव **संवेदनात्** । अनेनापि सहोत्पत्ति-संवेदने कथिते ततोऽभिन्नयोगक्षेमत्वात्तेषाम् विवक्षितचित्रैकज्ञानवदेकत्वमिति । एतेन अशक्यविवेचनमपि चिन्तितम् । § 564

अत्र अपरः प्रतिभासाद्वैतवादी आह--सन्तानाभावात् कस्य केन अभेदः चोद्यते इति चेत् ? *तन्निषेधकप्रमाणाऽभावात् । अनुपलब्धिः प्रमाणमिति चेत्; न; सुखदुःखयोः अन्योऽन्यमप्रवेदनादभावः, अन्यथा अनेकान्तिको हेतुः । सर्वाऽनुपलब्धिरसिद्धा । विचारयिष्यते चैतत् सर्वज्ञसिद्धौ । सतामपि सन्तानानामभिन्नयोगक्षेमत्वादभेदः इति न तैः व्यभिचारः पक्षीकरणादिति

---

१ जीवः] चित्रविचित्ररूपेण ।
१ ति] अनेकाकारेण ।
४ *] यौगः ।
५ *] एकस्वभावेन विषयीकरणेऽपि अर्थभेदश्चेत् ।
९ *] सुखे विनश्यति सति वा न दुःखमोहादयो विनश्यन्ति ।
१० त्] सुखदुःखमोहादीनाम् ।
११ *] भेदभृत् न तु
१५ क्षेमेन] साकल्येन ।
१५ तो] विपक्षभूतात् चित्रज्ञानात् ।
२३ त्वात्तेषाम्] सुखादीनाम् ।
२३ एतेन] चित्राभासापि बुद्धिरेकैव बाह्यचित्रविलक्षणत्वात् । शक्यविवेचनं चित्रमनेकमशक्यविवेचनाश्च बुद्धेर्नीलादयः ।--प्र० वार्तिकाल० ३ । २२० ।
२६ *] सन्ταननिषेधक ।

/ms केचित्; तदपि न युक्तम्; व्यभिचारविषयस्य पक्षीकरणादव्यभिचारे न कश्चिद्धेतुः व्यभिचारी स्यात् । *स्वयं च पक्षीकृतैः तर्क्वादिभिः कार्यत्वादेः व्यभिचारमुद्भावयन् तथा निगदतीति यत्किञ्चिदेतत् । ततो यथा चित्रैकप्रतिभासादक्रमेण चित्रमेकं ज्ञानम्, तथा क्रमेणापि इति स्थित **स्वार्थ** इत्यादि । § 565

संग्रहवृत्तादर्थमुद्धृत्य विवृण्वन्नाह-- § 566

...4 अक्षधीरवगृह्णात्यभेदेन स्वार्थमादितः ।
विशेषेणेहयाऽवैति धारयत्यन्यथाऽस्मृतेः ॥ ४ ॥§ 568

प्रत्यक्षं स्वार्थं सामान्येनावगृह्णातु पुनरादातुं विशेषेण तदाकारेण अवैति यथा अवायस्तेन संस्कारमाधत्ते । अभिमतस्वलक्षणानां कथञ्चिदसाधारणत्वेऽपि सदृशात्मनैव प्रतिभासनात् । अक्षबुद्धौ स्वावयवस्वभावं स्थवीयांसमेकमाकारं प्रतिभासमानं पूर्वापरान्वयि परिस्फुटमस्खलद्वृत्ति संपश्यामः । अन्यथा परिस्फुटं नावभासेत । प्रतिसंख्यानेन [अप्रत्याख्येयत्वाच्च] परस्परविलक्षणानां स्वलक्षणानां स्पष्टनिर्भासान्वयैकस्वभावाभावे अक्षज्ञानं सविकल्पं सिद्धम्, अन्यथा पररूपं स्वरूपेण तदेव कथं संवृणुयात् ? यतो बहिः सदृशात्मना स्फुटमवभासेत । अथायं परमार्थसद् असाधारणानां कथमेकान्तेन संभवः तत्प्रत्यक्षविरोधात् । यदि कुतश्चित् प्रत्यासत्तेः बहिरिव अन्तःपरमाणवः संचितास्तथा प्रत्यवभासेरन्निति; परस्परमसंप्लवात् सन्तानान्तरवत् स्थूलैकान्वयाकारप्रतीतिर्न स्यात् । तद्विभ्रमे बहिरन्तश्च किञ्चित् कुतश्चिदप्रसिद्धम् इदन्तया नेदन्तया च तत्त्वं व्यवस्थापयतीति सुव्यवस्थितं तत्त्वम् ! नचैतन्मन्तव्यम्--अवगृहीतसामान्यस्य विशेषाकाङ्क्षणं मानसमिति; तदिष्यत एव, तदभावे अक्षज्ञानस्य नियमेन अवगृहीतसदृशाकारस्मृतेरयोगात् । न हि सन्निहितविषयबलोद्भूतं तदाकारस्वभावनियतमसाधारणैकान्तात्मविषयं नियमेन अभिमतसजातीयस्मरणकारणं युक्तम्,
124/mkj समयानभिज्ञस्येव कार्यस्मृति सामर्थ्यम् । यदि पुनरन्तर्वासनाप्रबोधविचित्रता, तर्हि ततः स्वयमवगृहीतसमानाकारार्थविशेषाकाङ्क्षालक्षणं परिस्फुटं प्रत्यक्षं किन्नानुमन्यत एव सन्निहितार्थोपयोगात् यतः निर्विकल्पैकान्तसिद्धिः । तद् युक्तं चक्षुरादिज्ञानमपि सत्त्वद्रव्यत्वसंस्थानवर्णादिसामान्यविशेषान् व्यापकव्याप्यस्वभावं प्रतिपद्यमानं स्वयमीहितं व्यापकग्रहणपूर्वकं प्रायः प-

२ *] बौद्धः ।
२ र्क्वादिभिः] तर्वादिभिः
३ न्] उर्वीपर्वततरुतन्वादिकं बुद्धिमद्धेतुकं कार्यत्वात् इति ईश्वरानुमाने पक्षीकृतैः तर्वादिभिः व्यभिचार उद्भाव्यते यत्--ते कार्याः न च बुद्धिमद्धेतुकाः । द्रष्टव्यम्--प्र० वा० १ । १४--१७ ।
४ मेणापि] एको जीवः पूर्वोत्तरपर्यायौ व्याप्नोतीति भावः ।
१६ द्] सन्

रिच्छिनत्ति । न वै चक्षुरादिज्ञानम् ईहा, अपि तु तत्समनन्तरजन्मना तदर्थानन्तरग्राहिणा मानसप्रत्यक्षेण जनितो विकल्पः । ततः स्मृतिरीहेति चेत्; किं पुनः मानसप्रत्यक्षविकल्पनया लब्धम् ? § 569

**अक्षधीः** इन्द्रियबुद्धिः आदौ **आदितः स्वार्थम्** स्वम् अर्थश्च **अभेदेन** सामान्याकारेण **अवगृह्णाति विशेषेण** विशेषाकारेण **अवैति** निश्चिनोति **स्वार्थम्** इति सम्बन्धः । केन कृत्वा ? इत्यत्राह--**विशेषेणेहया[ईहा]** आकाङ्क्षा तया । किं पुनः सा करोति ? **धारयति** स्वार्थसंस्कारमाधत्ते । कुत एतत् ? **अन्यथा** धारणाऽभावप्रकारेण **अस्मृतेः** स्मृतेरभावात् । यदि वा, सामान्याऽवग्रहाभावप्रकारेण अन्यथा स्मृतेरभेदेन स्मृतेरभावप्रसङ्गात् । नहि स्वलक्षणात् भवान् सामान्ये स्मृतिर्युक्त अन्यथा नीलानुभवात् पीते सा भवेत् । अथ स्यात्--विशेषाग्रहणे कथं सामान्याऽवग्रहः ? *व्याप्याप्रतीतौ व्यापकाप्रतिपत्तेरिति; तन्न; चित्रैकज्ञाने नीलाकारेण पीताद्याकाराननुकरणेऽपि तद्व्यापकज्ञानमात्रानुकरणवददोषः । § 570

कारिकां व्याचष्टे **प्रत्यक्षम्** इत्यादिना । **प्रत्यक्षं स्वम् अर्थोचा अवगृह्णातु** । केन प्रकारेण ? **सामान्येन** । किं कुर्वत् पुनः तत् किं करोति ? इत्यत्राह--**पुनः** इत्यादि । **पुनः** पश्चाद् **विशेषेण तदाकारेण स्वार्थमादानुप्रैव** /ms विशेषाकारेणैव **अवैति** निश्चिनोति । पुनरपि किं करोति ? इत्यत्राह--**यथा** इत्यादि । **यथा** येन प्रकारेण **अवायः** स्वार्थयोः **तेन संस्कारमाधत्ते** । कुत एतत् सामान्येन अवगृह्यादिति चेत् ? अत्राह--**अभिमत** इत्यादि । **अभिमतानि** बौद्धैः अङ्गीकृतानि **स्वलक्षणानि** निरंशपरमाणुलक्षणानि तेषां **कथञ्चित्** केनापि देशादिभेदप्रकारेण **असाधारणत्वेऽपि** विलक्षणत्वेऽपि **सदृशात्मनैव** नीलादिकसमानस्वभावेन न असाधारणस्वभावेन इति **एव**कारार्थः, **प्रतिभासनात्** प्रकृतमिति । नवै परमाणुविवेकात्तत्प्रतिभासोऽपि अनेकप्रतीतिविरहप्रसङ्गात् । एतत्तु अभ्युपगम्य उक्तं न परमार्थतः इदमस्ति, इत्याह--**स्वावयवस्वभावम्** इत्यादि । **स्वावयवान्** द्रव्यान्तरावयवान् ततो निराकृतमेतत्--**सर्वस्योभयरूपत्वे** प्र॰ वा॰ ३ । १८१ इत्यादि, **स्वभावः** स्वरूपं यस्य स तथोक्तः । अनेन **द्रव्याणि द्रव्यान्तरमारभन्ते** वैशे॰ सू॰ १ । १ । १० इत्येकान्तनिरासः, **तमाकारं संपश्यामः** । कथंभूतम् ? **स्थवीयांसम्** इति । एतत्तु विशेषणमपि साधनत्वेन प्रत्येयम्--यतः स्थवीयांसम् ततः स्वावयवस्वभावमिति । न खलु निरव यव-अवयविकल्पनैकान्ते 125/mkj

९ था] यादृशोऽनुभवस्तादृशी स्मृतिरित्यभेदः ।
१० वान्] णानुभवात्
१० स्मृतिर्युक्त] क्ता
१० सा] स्मृतिः ।
११ *] व्याप्तुं योग्यस्य विशेषस्य अप्रतिपत्तौ ।
१४ अर्थोचा] अर्थं च
१७ मादानुप्रैव] दातुमेव
१८ तेन] विशेषाकारेण ।
२५ वान्] वानां न
२५ वान्] वानाम्
२६ त्वे] अनेन धर्मकीर्तिना सर्वद्रव्याणां सर्वात्मकत्वं कल्पयित्वा चोदितो दधि खादेति किमुष्ट्रं नाभिधावति इति दूषणं दत्तम्, तन्निराकृतम् ।

परमाणुवत् परस्परमवयविनां महत्त्वादिभेदोऽस्ति यतः स्थूलस्थूलतरादिव्यवहारः तत्र घटेत । तदारम्भकावयवबहुत्वाद्यपेक्षः सर्वोऽयं व्यवहार इति चेत्; अत्राह**एकम्** इति । **एकं स्थवीयांसम्** । एतदुक्तं भवति--योऽसौ स्थवीयान् आकारः स एकः प्रतीयते, अवयवबहुत्वाद्यपेक्षे तु तद्व्यवहारे /ms तत्र स इति प्रतीयते न तु स्थवीयान् इति, स्थवीयस्त्वस्यावयवेषूपि परस्यासंभवात् । किं कुर्वन्तम् ? इत्याह--**प्रतिभासमानम्** । क्व ? **अक्षबुद्धौ** चक्षुरादिज्ञाने । यौगस्य अवयव-अवयविभेदैकान्तप्रतिज्ञा प्रत्यक्षबाधिता इत्यनेन दर्शयति । § 571

अत्राह परः--सत्यम् तथाविधमाकारं भवन्तः संपश्यन्ति, तत्तु क्षणिकम् अन्यथा दर्शनाऽशक्तेः, इत्यत्राह--**पूर्वापर** इत्यादि । **पूर्वापरौ परिणामावन्वेतु** शीलं प्रतिभासमानम् **अक्षबुद्धौ संपश्यामः** इति । शेषमत्र निरूपयिष्यते । अनेन **यद् यथाऽवभासते तत् तथैव परमार्थसद् व्यवहारमवतरति** *इत्यादिप्रयोगे हेतोरसिद्धतां दर्शयति । ननु दूरस्थितविरलकेशादिषु इव तमाकारमेकमसन्तं भवन्तः संपश्यन्ति इति चेत्; अत्राह--**अस्खलद्वृत्ति** यथा भवति तथा तं पश्यामो बाधकाऽभावादिति मन्यते । नाक्षबुद्धौ किन्तु विकल्पबुद्धौ प्रतिभासमानं संपश्याम इति निगदन्तं प्रत्याह--**परिस्फुटम्** इत्यादि । **अन्यथा** अक्षबुद्धौ प्रतिभासनाभावप्रकारेण **परिस्फुटं** यथा भवति तथा **नावभासेत** । दूषणान्तरमाह--**प्रतिसंख्यानेन** इत्यादि । **नचैतद् व्यवसायात्म** सिद्धिवि° १ । २५ इत्यादिना व्याख्यातमेतत् । एवं प्रतिभासबलेन अक्षज्ञाने सामान्याकारेण स्वार्थप्रतिभासं व्यवस्थापितमपि पादप्रसारिकया अनिच्छन्तं प्रति दूषणान्तरमाह--**स्वलक्षणानाम्** इत्यादि । **स्वलक्षणानां** बहिः निरंशक्ष/ms णिक परमाणूनाम् । कथंभूतानाम् ? **परस्परविलक्षणानाम् स्पष्टनिर्भासान्वयैकस्वभावाऽभावे** स्पष्टो निर्भासो यस्य स चासौ अन्वयैकस्वभावश्च तस्य अभावे अङ्गीक्रियमाणे दूषणम् **अक्ष** इत्यादि । अयमत्राभिप्रायः--तत्स्वभावः प्रतिभासमानोऽपि तैमिरिककेशादिवद् यद्य[क्ष]संवित्तेर्विषय इत्यादि; तत्र उत्तरम्--अथ सन्नपि न बहिः तर्हि गत्यन्तराभावात् ज्ञानस्य स इति **अक्षज्ञानं सविकल्पं** सभेदं **सिद्धम् अन्यथा** सविकल्पकत्वाभावप्रकारेण **पररूपं** बहिःस्वलक्षणरूपं **स्वरूपेण** स्पष्टनिर्भासान्वयैकस्वभावेन **तदेव** अक्षज्ञानमेव **कथं संवृणुयात् ?** नैव । **यतः** संवरणात् **सदृशात्मना** समानस्वभावेन **अवभासेत परिस्फुटं** विशदं यथा भवति **बहिः** तदेवेति । *अन्ये तु **स्पष्टनिर्भासान्वयैकस्वभावे** इति पठन्ति; तेषाम् **कथमन्यथा** इत्यादि विरोधः ।

२ हारः] अवयविनि ।
४ तु] स्थूलस्थूलतरादिव्यवहारे ।
५ वेषूपि] वेष्वपि
९ रः] बौद्धः ।
११ न्वेतु] वन्वेतुं
१३ *] द्रष्टव्यम्--पृ° २ टि° १० ।
१३ इव] स्थवीयांसम् ।
२९ थं] अत्रायं पूर्वपक्षः--पररूपं स्वरूपेण यया संव्रियते धिया । एकार्थप्रतिभासिन्या भावानाश्रित्य भेदिनः ॥
३० *] अन्ये तु इति पदेन अस्य व्याख्यान्तरं सूचयति टीकाकारः ।

नहि तेन तदेव संव्रियते अन्यथा पटः स्वात्मना संव्रियेत । भवतु तर्हि अक्षज्ञानवद् बहिरपि तत्स्वभावः न्यायबलायातस्य परिहर्तुमशक्यत्वादिति चेत्; अत्राह--**अथायम्** इत्यादि । **अथायम्** अनन्तरनिर्दिष्ट आकारः **परमार्थेन सद्** विद्यमानो अन्तरिव बहिरपि इति भावः । **असाधार णानां** परस्प- 126/mkj
रविलक्षणानां **स्वलक्षणानाम्** इत्यनुवर्तते । **कथम् एकान्तेन** अवश्यंभावेन **संभवः** । कुत एतत् ? इत्यत्राह--**तद्** इत्यादि । तेषां **प्रत्यक्षेण विरोधात्** । तर्हि बहिरन्तश्च परमाणव एव अविनिर्भागवृत्त्युत्पत्त्या संचिताः प्रतिभान्ति तदुक्तम्-- § 572 /ms

*तदेतन्नूनमायातं यद्वदन्ति विपश्चितः ।
यथा यथाऽर्थाश्चिन्त्यन्ते विविच्यन्ते तथा तथा ॥ प्र० वा० २ । २०९§ 574

इति चेत्; एतदेव आशङ्क्य दूषयन्नाह--**कुतश्चिद्** इत्यादि । **कुतश्चित्** कस्याश्चिद् अविनिर्भागवृत्त्युत्पत्तिलक्षणायाः **प्रत्यासत्तेः बहिः** परमाणव **इव** तद्वत् । यदि पुनः **अन्तः परमाणवः संचिताः** पुञ्जीभूताः **तथा** स्पष्टनिर्भासान्वयैकस्वभावप्रकारेण **प्रत्यवभासेरन् इति** परमताशङ्का । तत्र दूषणं **परस्परम्** इत्यादि । **परस्परम्** अन्योन्यम् **असंप्लवात्,** एकस्य ज्ञानपरमाणोः तदन्तरेषु तेषां वा तत्र स्वभावस्य व्यापारस्य वा यः संप्लवो गमनं तस्य अभावात् । अत्र परप्रसिद्धं दृष्टान्तमाह--**सन्तानान्तरवत्** इति । सन्तानान्तराणामिव तद्वद् इति । एतदुक्तं भवति--यथा तेषां नान्यःस्वभावसंकीर्णता नापि विषयीकरणं संप्लवः तथा अन्तःपरमाणूनामिति । ततः किं जातम् ? इत्याह--**स्थूलैक** इत्यादि । **स्थूलैकस्य** अद्वयोपलक्षिताकारस्य **प्रतीतिः स स्थूलैकान्वयाकारप्रतीतिः** सा **न स्यात्** । **सन्तानान्तरवद्** इति निदर्शनं मध्ये करणादनेनापि सम्बन्धनीयम् । ततो यथा त्रैलोक्यसन्तानान्तरगृहीतार्थापेक्षया न तत्प्रतीतिः तथा दार्ष्टान्तिकप्रतीतिरपि न स्यात् । यस्तु अनुपलम्भात् सन्तानान्तराभावात् निदर्शनमसिद्धमिति मन्यते, स कथम् एकज्ञानपरमाणुना वेद्यमानम् अन्यदभ्युपगच्छेत् यतः चित्राद्वैतं भवेत् । § 575

एतेन सकल विकल्पातीतं तत्त्वं चिन्तितम्; नीलप्रतिभा[सम्] उप- /ms
लभ्यमानं सुखादिप्रतिभासं सन्तमभ्युपगच्छन् सन्तानान्तरनिषेधं निगदति यत्किञ्चिदेतत् । § 576

अत्राह परः--अस्तीयं प्रतीतिर्भ्रान्ता इति, तदुक्तं प्र ज्ञा क र गु प्ते न--**मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽपि अदोषः** प्र० वार्तिकाल० ३ ।

४ द्] सन्
९ त] इदं वस्तुबलायातं यद्वदन्ति विपश्चितः । यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा ॥ --प्र० वा० ।
१४ प] बौद्धमत ।
१८ था] सन्तानान्तराणाम् ।
१८ नान्यः] न्य
२० स] सा
२३ म्भात्] अनुपलम्भाद्धेतोः सन्तानान्तरस्य अभावं कृत्वा ।
२९ रः] विज्ञानवादी ।

२११ इति; तत्रोत्तरमाह— **तद्विभ्रम** इत्यादि । तस्याः तत्प्रतीतेः **विभ्रमे** अङ्गीक्रियमाणे । **क्व** ? **बहिरन्तश्च** । किं जातम् ? इत्यत्राह--**किञ्चित्** सुखादिकं नीलादिकं च तत् **कुतश्चित्** प्रत्यक्षादनुमानाद्वा **अप्रसिद्धम्** अनिर्णीतम् । केन प्रकारेण ? **इदंतया** क्षणिकज्ञानानन्यवेद्यविभ्रमसर्वविकल्पातीततया **नेदंतया** न तद्विपरीतरूपतया **चेति** तद् इत्थंभूतं **तत्त्वं व्यवस्थापयति** सौगतः इत्येवं **सुव्यवस्थितं तत्त्वम्** इत्युपहसनमेतत्, विभ्रमात् कस्यचित् असिद्धेर [ति] प्रसङ्गात् इति मन्यते । ततः **प्रत्यक्षम्** इत्यादि सुस्थम् । § 577

इदानीम् ईहाज्ञाने विप्रतिपत्तिं निराकुर्वन्नाह--ननु तस्मिन् सति तत् मानसमन्यद्वेति विचारः प्रवर्तते, धर्मविचारस्य धर्मिसत्तानिबन्धनत्वात् 127/mkj । अतः तत्सत्तैव सध्येति चेत्; नैतदस्ति; तत्सत्त्वस्य स्वसंवेदनाध्यक्षसिद्धत्वात् । सिद्धे हि सामान्ये धर्मिणि तद्विशेषानादातुमीहमानस्य प्रतीतेः, तद्योग्योपायोपादानात् निरीहस्य तदयोगादिति मन्यते । एवमर्थं चेदमुक्तमत्रैव **नहि संवित्तः बहुबहुविधप्रभृत्याकृतयः** सिद्धिवि° १ । २७ इत्यादि । **न** /ms **च नैव एतन्मन्तव्यम् अवगृहीतस्य** अवग्रहेण विषयीकृतस्य **सामान्यस्य विशेषाकाङ्क्षणं मानसं** मनोनिमित्तम्, न इन्द्रियनिमित्तम् **इति** मानसं **तद् इष्यत एव** किन्तु तदेव न भवति इति **एव**कारार्थः । तदाकाङ्क्षणं मानसम् इत्युक्ते अवग्रहज्ञानमपि तत्परिणामि तद् इत्युक्तं भवति, यथा मार्दो घटः इत्युक्ते मृत्पिण्डोऽपि तदुपादानं मार्द इत्युक्तं भवति । यद्यपि चैतत् **न चैतद्व्यवसाय** सिद्धिवि° १ । २५ इत्यादिना निरस्तं तथापि प्रकारान्तरेण निराकरणार्थमित्यदोषः । कुत कुतत् ? इत्यत्राह **तदभाव** इत्यादि । तस्य अवग्रहपरिणामेहाज्ञानस्य अभावे **तदभावे** । कस्य ? **अक्षज्ञानस्य** निरंशस्वलक्षणविषये अक्षज्ञाने अभ्युपगम्यमान इत्यर्थः, **नियमेन** अवश्यंभावेन **अवगृहीतः** अवग्रहेण विषयीकृतः पूर्वं यः **सदृशाकारः** अथवा इदानीम् अवगृहीतेन सदृशाकारः पूर्वं दृष्टः तस्य **स्मृतेरयोगात् न चैतन्मन्तव्यम्** इति । एतदपि कुतः ? इत्यत्राह— **न हि** इत्यादि । **हिः** इति यस्मादर्थे, यस्मात् **न सन्निहितो** यो **विषयः** तस्य **बलेन उद्भूतम्** उत्पन्नमपि अक्षज्ञानम् [इति] विभक्तिपरिणामेन संबन्धः । पुनरपि कथंभूतम् ? इत्यत्राह— **तद्** इत्यादि । **तस्य** सन्निहितविषयस्य **आकारम्** अनुकरोति इत्येवंशीलो यः **स्वभावः** स्वस्वरूपं तत्र **नियतम्** स्वप्नेऽपि स्वरूपाद् अन्यन्न पश्यति इत्यर्थः । पुनरपि /ms तद्विशेषणं दर्शयन्नाह— **असाधारण** इत्यादि । सर्वतो विलक्षणोऽ**साधारणः एकः** असहायः **अन्तः** धर्मो यस्य [आत्मनः स्व] भावस्य स **विषयो** यस्य तत्, कं **नियमेन अभिमतसजातीयस्मरणकारणं युक्तं** पूर्वेण परः परेण वा

९ स्मिन्] ईहाज्ञानस्य विद्यमानत्वे सत्येव ।

१८ त] ईहाज्ञानस्य परिणामिकारणभूतम् ।

१८ त] मानसम् ।

३० अ] भिन्नं बाह्यं वस्तु ।

३३ कं] किम् ?

पूर्वः क्षणः सजातीय इति स्मरणम् अभिमतसजातीयस्मरणम् तस्य कारणं युक्तम् । नहि असाधारणैकान्तात्मविषयानुभवात् तथाविधं बहिःस्मरणं युक्तं नीलानुभवात् पीतस्मरणवत् । तथा च सामान्यादिव्यवहारः परस्य दुर्घट इति मन्यते । **समये**त्यादिना दृष्टान्ते तदेव समर्थयते--अयमुदात्तः अयमन्यः इत्यादिकः सङ्केतः **समयः तदनभिज्ञस्य** गोपालादेरिव शास्त्रव्याख्याकरणादि-स्वरादिभेदः **कार्यम्** उच्यते तत्र **स्मृतिसामर्थ्यमयुक्तम् ।** एतदुक्तं भवति--यथा उदात्तादिसमयाग्रहणे न तत्र गोपालादेः स्मृतिः तथा सदृशाकाराऽग्रहणेऽपि न तत्र स्मृतिरिति । एतेन **अभेदेन अन्यथाऽस्मृतेः**--स्मृतेरभावात् इत्येतद् व्याख्यातम् । § 578

ननु नाक्षज्ञानम् असाधारणैकान्तविषयम् तत्स्मृतिकारणम् इति सम्बन्धः । एतदुक्तं भवति--यथा नीलानुभवाज्जायमाना वासना नीले स्मृतिकारणं न पीते तथा तदक्षज्ञानवासनापि असाधारणविषयस्मृतिकारणं न तत् स्मृतिकारणमिति । § 579

इदमपरं व्याख्यानम्--यत एव अक्षज्ञानमुक्तप्रकारं तत एव न केवलं तत्स्मृतिः, अपि तु वासनापि न भवेत् नोत्पद्येत तत इति न साधारणैकान्त /ms विषया अक्ष ज्ञानवासना तत्कारणम् अपि तु पूर्वसजातीयस्मृतिवासना 128/mkj । अयं तु विशेषः--तदक्षज्ञानप्रबोधिता सती तत्कारणम्, तत्प्रबोधश्च नीलादावेव न क्षणक्षयादौ इति चेत्; अत्राह--**यदि पुनः** इत्यादि । अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिकल्पनाहितवासना **अन्तर्वासना** तस्याः **प्रबोधः** दर्शनादुत्तरसजातीयस्मरणजननपरिणतिः तस्य **विचित्रता**--नीलादावेव न क्षणक्षयादौ तत्प्रबोध इति, यदि पुनः इष्यते इत्यध्याहारः; **तर्हि ततः** तद्विचित्रतायाः **प्रत्यक्षं किन्नाऽनुमन्यते** ? अनुमन्यत एव । कथंभूतम् ? इत्यत्राह--**स्वयम्** आत्मना **अवगृहीतः** विषयीकृतो यः **समानाकारोऽर्थः** तस्य **विशेषा** ये तेषु **आकाङ्क्षणं** तद्ग्रहणाभिमुख्यं **लक्षणं** स्वरूपं यस्य तत् तथोक्तम् । पुनरपि कथंभूतम् ? इत्यत्राह--**परिस्फुटम्** विशदम् । कुतः ? **सन्निहितार्थोपयोगात्** सन्निहितेऽर्थे व्यापारात् । एतदुक्तं भवति--तत्कल्पना ततः किं स्यात् इत्यादिना प्रत्यक्षं प्रमाणम् इत्युक्तम्, तदाहितवासनाऽपरसजातीयविकल्प एव तत्प्रबोधविचित्रता कस्यचिदेव विशेषस्य निर्णयाकाङ्क्षा इति । **यतो** यस्माद् अननुमनना **निर्विकल्पैकान्तसिद्धिः** इति । **यतः** इति वा आक्षेपे, नैव तत्सिद्धिरिति । **न चैतन्मन्तव्यम्** इत्यादिना **वैशद्यम्** इत्यादि वृत्तमपि व्याख्यातम् । § 580

उपसंहारार्थमाह--**तद्** इत्यादि । यत एवं **तत्** तस्मात् **युक्तम्** /ms उपपन्नम् । किं तत् ? इत्याह--**चक्षुरादिज्ञानमपि** न केवलं मानसं **क्रमेण परिच्छिनत्ति** जानाति इति । कान् ? इत्याह--**सत्त्वद्रव्यत्वसंस्थानवर्णादिसामान्यविशेषान्** । यदा पूर्वः पूर्वः सामान्यम् तदा उत्तरे विशेषा

१२ न] अक्षज्ञानम् ।
१५ न] नाऽ
२९ ना] अनुमननात्
३१ वृ] द्वितीयः श्लोकः ।

इति तद्विशेषान् इत्युच्यते । कथं परिच्छिनत्ति ? इत्याह--**व्यापक** इत्यादि । **[व्यापकेन]** व्याप्यः **स्वभावो** यस्य विशेषस्य स तथोक्तः तं **प्रतिपद्यमानं** निश्चिन्वत् । कथंभूतम् ? **स्वयम्** आत्मने**हितम्** । कथमीहितम् ? इत्याह--**व्यापकग्रहणपूर्वकं** यथा भवति । किं सर्वदा एवं परिच्छिनत्ति इति चेत् ? अत्राह--**प्रायः** बाहुल्येन, कदाचित् नैवम् इति प्रतिपादयिष्यते **वर्णसंस्थानसामान्यम्** सिद्धिवि° २ । ७ इत्यादिना । § 581

यत्पुनरत्रोक्तम्--**यदि चक्षुरादिज्ञानं स्वयमक्रमरूपं कथं तत्क्रमेण परिच्छिनत्ति विरोधात् ? अथ क्रमरूपं तर्हि स्वक्रममपि परेण परिच्छिनत्ति तमपि परेण स्वक्रमेण इत्यनवस्थितिः** । तदेतत् **पूर्वपूर्वस्य स्वग्रहणानुबन्धमजहतः एव उत्तरोत्तरं प्रति साधकतमत्वात्** सिद्धिवि° २ । १५ इत्यत्र विचारयिष्यते अत्रैव प्रस्तावे । § 582

अत्राह परः--**नवै चक्षुरादिज्ञानम्** इत्यादि । **नवै** नैव **चक्षुरादिज्ञानं** चक्षुरादीनां कार्यं यज्ज्ञानम् तत् **ईहा अपितु** किन्तु **तत्समनन्तरजन्मना** तस्मात् चक्षुरादिज्ञानात् समनन्तराद् उपादानात् जन्म यस्य तत् तथोक्तं तेन । केन ? **मानसप्रत्यक्षेण** । कथंभूतेन ? **तदर्थानन्तरग्राहिणा** तस्य /ms चक्षुरादिज्ञानस्य योऽर्थः तस्य अनन्तरः तज्ज्ञान सहकार्यर्थक्षणः तद्ग्राहिणा । तदुक्तम्--**इन्द्रियज्ञानेन समनन्तरप्रत्ययेन स्वविषयानन्तरविषयसहकारिणा** 129/mkj **जनितं मानसं प्रत्यक्षम्** । न्यायबि° १ । ९ इति । **जनितो विकल्प** इहेति पद घटना । **ततः** तस्मात् कारणात् **स्मृतिः न** प्रत्यक्षम् **ईहा** इति अनुभवकार्यस्य तद्विषयस्य ज्ञानस्य गत्यन्तराऽभावात् इति भावः, **इति** एवं **चेत्**; अत्र पृच्छति आचार्यः--**किं पुनः मानसप्रत्यक्षविकल्पकल्पनया लब्धम् ?** मानसं प्रत्यक्षमेव विकल्पो भेदः तस्य कल्पनया किं प्राप्तं सौगतेन ? तत्प्रत्यक्षं चक्षुरादिव्यापारकाले अन्यदा वा न प्रतिभाति केवलं कल्पनाशिल्पिकल्पितम् इत्येतत् **कल्पनया** इति । § 583

अत्राह शा न्त भ द्रः--**तत्कल्पनया बहिरर्थे मानसं स्मरणं लब्धम्, न हि तत् चक्षुरादि ज्ञाद्युक्तं भिन्नसन्तानत्वात्, अन्यथा देवदत्तानुभूते यज्ञदत्तस्य स्मरणं भवेत्, मानसात् तत्प्रत्यक्षात् तत्स्मरणं न विरुध्यते ।** एतदाशङ्क्य दूषयन्नाह--**प्रत्यक्षाद्** इत्यादि । § 584

---

८ पि] क्रमेण ।
१२ रः] बौद्धः ।
१९ इहेति] **ईहा** इति
२५ द्रः] शान्तभद्रस्त्वाह--यद्यपि प्रत्यक्षतः तस्माद् भेदो न लक्ष्यते कार्यतो लक्ष्यत एव । कार्यं हि नीलादिविकल्परूपं स्मरणापरव्यपदेशं न कारणमन्तरेण कादाचित्कत्वात् । न चाक्षज्ञानमेव तस्य कारणं सन्तानभेदात् प्रसिद्धसन्तानान्तरतज्ज्ञानवत् । ततोऽन्यदेवाक्षज्ञानात्तत्कारणं तदेव च मानसं प्रत्यक्षमिति । --न्यायवि° वि° प्र° पृ° ५२६ । इह शान्तभद्रेण सौत्रान्तिकानां मतं दर्शयता पूर्वं चक्षू रूपे चक्षुर्विज्ञानं ततस्तेनेन्द्रियविज्ञानेन सहजक्षणसहकारिणा तृतीयस्मिन् क्षणे मानसप्रत्यक्षं जन्यते इति व्याख्यातम्...इह पूर्वैः चक्षुरादिविज्ञानेनानुभूतत्वान्न विकल्पाभाव इति चाशङ्क्याभिहितम्--देवदत्तेनापि दृष्टे यज्ञदत्तस्यापि विकल्पप्रसङ्गः...--न्यायबि° ध° पृ° ६१-६२ ।
२६ ज्ञाद्युक्तं] दिजं युक्तम्

…5 प्रत्यक्षान्मानसादृते बहिर्नाक्षधियः स्मृतिः ।
सत्त्वान्तरवच्चेत्तत् समनन्तरमस्य किम् ॥ ५ ॥§ 586

मनोऽक्षज्ञानानां सन्ताननानात्वेऽपि यतोऽनन्यसत्त्वव्यवस्था परस्परं समनन्तरप्रत्ययता च, तत एवेन्द्रियार्थे मनसः स्मृतिः स्यात् । तदलमन्तर्गडुना बहिर्मानसप्रत्यक्षेण ? § 587

**प्रत्यक्षात्,** कथंभूतात् ? **मानसादृते** तदन्तरेण **बहिः स्मृतिर्न,** कुतः सकाशात् ? **अक्षधियः** चक्षुरादिज्ञानात् । दृष्टान्तमाह--**सत्त्वान्तरवद्** इति । सत्त्वान्तरं सन्तानान्तरं तस्माद इति । यथा देवदत्तान्न यज्ञदत्ते स्मृतिः तथा प्रकृतधियः **चेद्** यदि मतम् । अत्र दूषणम्--**तत्समनन्तरमस्य किम्** इति । इदमत्र तात्पर्यम्--इन्द्रियमानसप्रत्यक्षयोः अभिन्नः, भिन्नो वा सन्तानः स्यात् ? अभिन्नश्चेत्; **तत्** मानसं प्रत्यक्षं **समनन्तरम्** उपादानम् **अस्य** स्मृतिकार्यस्य **किम् ?** नैव । एतदुक्तं भवति--यथैव इन्द्रियज्ञानात् स- /ms
न्तानान्तरात् न मानसं स्मरणम्, तथैव तदभिन्नसन्तानान्न मानसप्रत्यक्षादपि इति । यो हि जात्यश्वो न गर्दभात्, सः तत्पुत्रादपि न भवति । भिन्नश्चेत्; **तद्** अक्षज्ञानं **समनन्तरम्** उपादानम् **अस्य** मानसाध्यक्षस्य **किम् ?** नैव, स्मृतिवत् तदपि ततो न भवति । § 588

यत्पुनरुक्तं प्र ज्ञा क रे ण--**न स्मृतिलिङ्गतः तदध्यक्षस्य व्यवस्था किन्न प्रतीतितः, निश्चयात्मकात् नीलादिप्रतीतेः तदध्यक्षरूपत्वात्** । इति; तदप्येतेन निरस्तम्; इन्द्रियज्ञानस्य तदुपादानस्य तद्वत् निर्णयात्मकत्वे तत 130/mkj
एव सकलार्थसिद्धेः, तस्यैव प्रतीतेः **तदिन्द्रियज्ञानं समनन्तरमस्य किम् ?** अनिर्णयात्मकत्वे **तदनिर्णयात्मकम्** इन्द्रियज्ञानं **समनन्तरम् अस्य** निर्णयात्मनो मानसाध्यक्षस्य **किम् ?** अक्षार्थयोगादेव तसंभवादात् तत्संभवात् । ***अभेदात् सदृशस्मृत्याम्** सिद्धिवि० १ । ६ इत्यादौ चर्चितमेतत् । § 589

किंच, यदि तत् क्षणिकनिरंशपरमाणुविषयं न तत्र प्रमाणान्तरवृत्तिः, निर्णीते समारोपाऽभावात् । **निश्चयारोपमनसोर्बाध्यबाधकभावतः** प्र० वा० १ । ५० इति वचनात् । यदि च तत् मध्यक्षणस्य पूर्वापरक्षणापेक्षं कार्यकारणत्वमात्मभूतं न निश्चिनोति; सर्वाऽग्रहणम्, अन्यथा गृहीतेतररूपमेकं स्यात् । निश्चिनोति पूर्वापरयोरग्रहणेऽपि इति चेत्; तर्हि--आकुलभाषितमेतत्—

८ स्माद ] तद्वत्
१४ सः ] गर्दभपुत्रादपि ।
१६ पि ] इन्द्रियाध्यक्षात् ।
१७ तः ] मानसप्रत्यक्षस्य ।
१८ किन्न ] किन्तु
१८ इति ] इदमित्यादि यज्ज्ञानमभ्यासात् पुरतः स्थिते । साक्षात्करणतस्तत्तु प्रत्यक्षं मानसं मतम् ॥--प्र० वार्तिकाल० पृ० ३०५ ।
१९ त ] नीलादिप्रतीतिवत् ।
२४ दि ] अक्षज्ञानम् ।
२७ भू ] स्वस्वरूपात्मकम् ।

*द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात् ।
द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम् ॥ प्र॰ वार्तिकाल॰ १ ।
२ इति ।§ 592

तथा **पूर्वापरावस्थानिर्णयेऽपि स्वयमवस्थात्** *****निर्णयाद्वाप्याप्रतिपत्तिः** इति च । अथ तद्ग्रहणे; तर्हि तयोरपि कार्यकारणभावनिर्णयः अपरतद्ग्रहणे, इति पूर्वापरकोट्योस्माद्यन्तयोर्विषयीकरणमवश्यंभावि, तथा तस्य परतः सर्वस्माद् विवेकनिश्चये सर्वं वक्तव्यम् । § 593

ततो यदुक्तं परेण--**मध्यक्षणदर्शनेनागतक्षणदर्शने तद्वत्त्वात् सर्वाऽतीतानागतक्षणदर्शनम्** इति; तन्निरस्तम्; अन्यत्रापि समानत्वात् । अथ क्वचित् कार्यकारणभाव एव नेष्यते; नैवम्; इन्द्रियज्ञानाऽभावात् *तत्प्रभवं मानसाध्यक्षं न स्यात् । व्यवहारेण तदस्तित्वे तत्रैव तदवस्थो दोषः । शेषमत्र प्र मा ण सं ग्र ह भा ष्या त् प्रत्येयम् । § 594

व्यतिरेकमुखेन कारिकां विवृण्वन्नाह--**मनोऽक्ष** इत्यादि । **मनोऽक्षज्ञानानां** मानसेन्द्रियप्रत्यक्षाणां **सन्ताननानात्वेऽपि** न केवलं तदनानात्वे **यतो** यस्याः प्रत्यासत्तेः **अनन्यसत्त्वव्यवस्था** एकप्राणिव्यवस्था **परस्परम्** अन्योन्यं मनोऽक्षसंविदां **समनन्तरप्रत्ययता च** उपादानकारणता च । ननु अक्षसंविद एव मनःसंविदां समनन्तरकारणं न पुनः एताः तासाम्; तत्कथमुच्यते--**परस्परम्** इत्यादि इति चेत्; नैवं शक्यं वक्तुम्, यथैव हि पावकादेव धूमो न तस्मात् पावको जायमानः प्रतीयते इति पावक एव [धूमस्य कारणं न]
/ms धूमः पावकस्य इति निश्चयः, तथैव यदि इन्द्रियज्ञानादेव मानसं प्रत्यक्षं न तस्मादिन्द्रियज्ञानं जायमानं प्रतीयते युक्तमेतत्--इन्द्रियज्ञानमेव तत्कारणं न तत्तस्येति । यावता कल्पनया इन्द्रियज्ञानं तत्कारणं तयैव च तदपि क-
131/mkj स्यचिदिन्द्रियज्ञानस्य कारणमस्तु, *तस्याः सर्वत्र निरङ्कुशत्वात् । ततो यथा इन्द्रियज्ञानजनितं ज्ञानं मानसं प्रत्यक्षं तथा तज्जनितं प्रत्यक्षान्तरं स्यादित्यभिप्रायः । **तत एव** तस्या एव प्रत्यासत्तेः **इन्द्रियार्थे** चक्षुरादिविषये **मनसः** मनोऽध्यक्षात् **स्मृतिः** ईहा **स्यात्** भवेत् नान्यतः कारणादिति भावः । ततः किं जैनेन प्राप्तम् ? इत्याह--**तद्** इत्यादि । **तत्** तस्माद् उक्तन्यायाद् **अलं** पर्याप्तं **बहिर्मानसप्रत्यक्षेण** कल्पितेन । कथंभूतेन ? **अन्तर्गडुना** स्मृत्यक्ष-

---

३ स्थात्] अवस्थातुरनिर्णयात् ।
३ *] त्र
३ याद्वा] द्वा
४ अथ] पूर्वापरयोः ग्रहणे ।
५ कोट्योस्मा] रना
७ रेण] तुलना--यदि
कालकलाव्यापिवस्तुग्रहणमक्षतः ।
सर्वकालकलालम्बे ग्रहः स्यान्मरणावधेः
॥--प्र॰ वार्तिकाल॰ पृ॰ ५९२ ।
७ नेना] नेनाऽना
७ ने] मध्यक्षणवत् वर्तमानत्वात् ।
९ ज्ञानाऽभावात्] इन्द्रियज्ञानस्य
इन्द्रियेभ्यः अनुत्पादात् ।
९ *] इन्द्रियज्ञानजन्यम् ।
१६ पुनः] मनःसंविदः ।
२० मेव] मानसज्ञानकारणम् ।
२१ न] मानसम् ।
२१ णं] कल्पनयैव ।
२१ च] मानसमपि ।
२२ *] कल्पनायाः ।

ज्ञानयोः घाटाललाटयोरिव अन्तरालगडुलव[द्] वर्तमानेन अकिञ्चित्करेण ? इन्द्रियज्ञानादेव प्रकृतार्थसिद्धेरिति भावः । § 595

एतदेव दर्शयन्नाह--**विकल्प** इत्यादि । § 596

...6 **विकल्पवासनास्पष्टप्रबोधोऽक्षार्थसन्निधेः ।**
**व्यापकव्याप्यसामान्यविशेषार्थात्मगोचरः ॥ ६ ॥**§ 598

वितर्कनुगततद् व्यापकसामान्यग्रहणपूर्वकं व्याप्यविशेषावायज्ञानं मनोऽक्षविकल्पानां समानम् । तत्र इन्द्रियार्थसन्निकर्षः समयनियमेन अन्तर्वासनाप्रबोधं यथार्हं स्पष्टयतीति तेषां तत्समानम् । ततस्तेषामर्थप्रतिभासः अनुपलक्षणेऽपि भिद्येत न पुनरीहा निराक्रियेत लिङ्गलिङ्गिसम्बन्धस्मृतिवितर्कवत् तदन्यथानुपपत्तेः अतर्कस्मृतेः व्याप्तिः न सिध्येत् अप्रतिपत्तेः । § 599

अवग्रहादीनाम् उत्तरोत्तरं ज्ञानं **विकल्पः** तेन आहिता **वासना** तद्वासना तस्याः **स्पष्टो** किन्वाद **प्रबोधः** उन्मीलनम् । स कुतः ? इत्याह--**अक्षार्थसन्निधेः** इन्द्रियार्थसंप्रयोगात् न मानसप्रत्यक्षादेरिति मन्यते । कथंभूतः ? इत्यत्राह--**व्यापक** इत्यादि । **व्यापकं** च **व्याप्यश्च** तौ च तौ **सामान्य विशेषौ** च व्यापकं सामान्यम् व्याप्यो विशेषः तत्स्वभावौ **अर्थात्मानौ** /ms **गोचरौ** यस्य स तथोक्तः । § 600

कारिकां विवृण्वन्नाह--**वितर्क** इत्यादि । वितर्कणं **[वितर्कः]** विशेषाकाङ्क्षणवितर्कपरिणामम् **अनु** पश्चाद् **गतम्** तच्च **तद् व्यापकसामान्यग्रहणं** च तत् **पूर्वं** कारणं परम्परया यस्य तत्तथोक्तम् [किं त] दित्याह--**व्याप्यविशेषावायज्ञानम्** । तत्कथंभूतम् ? इत्यत्राह--**मनोऽक्षविकल्पानां समानम्** इति । **मनो**विकल्पानाम् **अक्षविकल्पानाम्** इन्द्रियज्ञानानां **समानं** सदृशमिति । § 601

ननु प्रत्यक्षप्रस्तावे किमर्थमप्रस्तुतानां मनोविकल्पानामुपादानमिति चेत् ? दृष्टान्तार्थम् । यथा मनोविकल्पानां वितर्काऽनुगतव्यापकसामान्यग्रहणपूर्वं व्याप्यविशेषावायज्ञानं तथा अक्षविकल्पानामिति । न चासिद्धो दृष्टान्तः; पूर्वं मनसा सामान्यव्यवसायः, तदनन्तरं तद्विशेषाकाङ्क्षणम्, अतश्च पुरुषः स्थाणुः इति वा विशेषावायज्ञानम्, सौगतस्यापि प्रसिद्धमेतदिति । ननु यदि नाम मनोविकल्पानां वितर्कानुगतव्यापकसामान्यग्रहणपूर्वं व्याप्यविशेषावायज्ञानं किमायातं येन अक्षविकल्पानां तत् स्यात् ? न हि एकस्य धर्मो नियमेन अन्यस्यापि, अन्यथा अर्कस्य कटु * किमा गुडस्य स्यादिति 132/mkj

१ योः ]
घाटामस्तकान्तरालवर्तिमांसपिण्डापरनाम गडुरिव गडुः निष्फलत्वात् ।--हेतु॰ टीकालो॰ पृ॰ २९५ । प्र॰ वा॰ स्व॰ टी॰ पृ॰ २१७ ।

१ राल ] ले
१२ किन्वाद ] विशदः
३० अ ] धत्तूरकस्य ।
३० * ] मानसाध्यक्षजनितम् ।

चेत्; अत्राह--**तत्र** इत्यादि । **तत्र** दृष्टान्तेतररूपे तद्विकल्पानां सहनिर्देशः /ms **इन्द्रियार्थयोः सन्निकर्षः** योग्यदेशादिसन्निधिः **समयस्य** अवग्रहादिकालस्य **नियमेन** अव्यभिचारेण **अन्तर्वासनाप्रबोधम्** अन्तर्वासना मनोविकल्पवासना तस्याः प्रबोधम् उन्मीलनं **स्पष्टयति** विशदं करोति **इति** हेतोः **तेषां तत्समानम्** इति । एतदुक्तं भवति--मनोविकल्पा एव न तत्सन्निकर्षात् स्पष्टीभवन्ति ततः दृष्टान्तेतरभावो न विरुध्यते इति । § 602

ननु मानसा विकल्पाः स्पष्टाकारविधुराः, तत् कुतः स्पष्टीभवन्ति इति चेत् ? अत्राह— **यथार्हम्** इत्यादि । **यथार्हम्** यथायोग्यं सामग्रीभेदं प्राप्य स्पष्टयति इति । उपसंहरन्नाह--**ततः** तस्मात् **अर्थप्रतिभासा** **तेषां** विकल्पानां स्पष्टेतररूपतया **भिद्येत न पुनः ईहा निराक्रियेत अनुपलक्षणेऽपि** न केवलम् उपलक्षणे च । निदर्शनमाह--**लिङ्ग** इत्यादि । **लिङ्गलिङ्गिनोः सम्बन्धः** अविनाभावः तस्य या **स्मृतिः** तद्रूपो यो **वितर्कः** तस्ये व तदनुपलक्षणम् । एतदुक्तं भवति--यथा गृहीतव्याप्तिकस्य पुंसो धूमदर्शनानन्तरं धूमकेतुप्रतिपत्तौ अन्तराले विद्यमानस्यापि सम्बन्धवितर्कस्य अनुपलक्षणम्, तथा ईहायामपि इति । तथा च विपक्षेऽपि अनुपलक्ष्यमाणत्वात् इत्यस्य साधनस्य सद्भावात् ईहा ततो न निराक्रियेत इति भावः इति केचिदाचक्षते । तेषां धूमदर्शना[न]न्तरं पावकप्रतिपत्तौ अनुपलक्षितसम्बन्धस्मृतिसद्भावे /ms भ्रूणेऽपि [य]दकस्माद् धूमदर्शनाद् अग्निरत्र इति ज्ञानं तद्दे वे न बौद्धं प्रति **प्रमाणान्तरम्** इत्युक्तं कथन्न विरुध्येत ? यदा अनुपलक्ष्यमाणात् तत्स्मृतिं नेच्छति तदा तदुक्तं नान्यदेति चेत्; तदापि परप्रसिद्धस्य प्रकृतहेतुव्यभिचारविषयस्य अभावात् परस्य तत् प्रमाणान्तरं स्यात्, भवेत् पुनः ईहा हीयते इति समानाऽनिष्टापत्तिः । तस्मादन्यथा व्याख्यायते--**लिङ्गलिङ्गिसम्बन्धस्मृतिः** परप्रसिद्धा ऊह एव उच्यते, तस्या **वितर्कः** विशेषाकाङ्क्षा तेन तुल्यं वर्त्तत इति तद्वत् । एतदुक्तं भवति--यथा मीमांसकेन लिङ्गिलिङ्गिसामान्यसम्बन्धस्मृतिमिच्छता अनुपलक्ष्यमाणेऽपि तद्वितर्कना सौगतेन निषिध्यते अपि तु इष्यते [एव] तथा प्रकृता ईहाऽपि इति । कुत इति चेत् ? अत्राह--**तद्** इत्यादि । तस्याः तत्सम्बन्धस्मृतेः **अन्यथा** तद्वितर्काभावप्रकारेण **अनुपपत्तेः** । एतदपि कुतः ? इत्यत्राह--**अतर्कित** इत्यादि । **न** विद्यते **तर्कितं** विशेषाकाङ्क्षणं यस्याः सा चासौ **स्मृतिश्च** तस्याः सकाशात् **व्याप्तिः** अनवयवेन लिङ्गलिङ्गिनोः सम्बन्धो **न सिध्येत्** । कुत इति चेत् ? अत्राह--**अप्रतिपत्तेः** । अतर्कस्मृतेः व्याप्तेः अप्रतिग्रहणात् । नहि धूमस्य सामान्यस्य अग्निसामान्येन व्याप्तिग्रहणे सा गृहीता नाम ।

---

९ तिभासा ] सः
१४ धू ] अग्नि ।
१६ इति ] व्याख्याकाराः ।
१८ द्भावे ] गर्भस्थेऽपि ।
१८ न ] भट्टाकलङ्कदेवेन ।
२० माणात् ] णत्वात्
२२ वेत् ] भवतः
२६ ना ] तर्को न
३२ सामा ] धूमसामा

लिङ्गलिङ्गिसामान्यस्यैव प्रतीतितो विशेषे अप्रवृत्तिप्रसङ्गादिति निरूपयिष्यते । एतत् **वितर्कानुगत** इत्यादावपि निदर्शनं द्रष्टव्यम् । § 603 /ms

ननु व्याप्याऽप्रतिपत्तौ न व्यापकप्रतिपत्तिरिति कथमुच्यते--**वितर्कानुगत** इत्यादि । अथ व्याप्यप्रतिपत्तौ व्यापकप्रतिपत्तिः; तर्हि व्यापकसामान्यवत् व्याप्यविशेषस्यापि अवग्रहेणावग्रहणात् किम् ईहादिना ? संशयाद्यभावः तस्मात् इति चेत्; अत्राह--**वर्ण** इत्यादि । § 604
133/mkj

...7 वर्णसंस्थानादिसामान्यं दूरस्थस्यावगृह्यते ।
तद्विशेषेहयाऽवायो तदभावेऽपि जातुचित् ॥ ७
‖§ 606

यथैव हि व्यक्तिव्यतिरेकसामान्यदर्शिनस्तदनुपलक्षणमयुक्तं तद्दर्शनबलाद् भिन्नेषु द्रव्यादिषु अभिन्नप्रत्यययोत्पत्तेः, तथैव स्वलक्षणदर्शिनस्तदनुपलक्षणं तद्दर्शनबलात्तदन्यव्यवच्छेदविकल्पोत्पत्तेः । तदनुभवेहितव्यपोहमात्मसात्कुर्वन् कथमनुपलक्षको नाम ? स्वलक्षणदर्शिनः स्वलक्षणोपलक्षणविकल्पमन्तरेणापि तदन्यापोहकल्पनायां जातिदर्शिनोऽपि तदुपलक्षणविकल्पमन्तरेणापि कुतश्चित् भिन्नेषु समवायिषु प्रत्ययः कथं विरुध्येत ? कारणशक्तेरचिन्त्यत्वात् इतरत्रापि एतदेवोत्तरं विशेषाभावात् । § 607

**वर्णश्च** शुक्लादिः **संस्थानं** च ऊर्ध्वादिः **आदिशब्देन** कर्मादिपरिग्रहः, तेषां **सामान्यं** सदृशः परिणामः **दूरस्थस्य** भावस्य **अवगृह्यते** अवग्रहेण विषयीक्रियते । तथाहि--दूरस्थवलाकादिविशेषणशुक्लरूपाग्रहणेऽपि तद्रूपसामान्यग्रहणम् पुरुषादिविशेषण-ऊर्ध्वाद्यदर्शनं दूरे, तथा कर्मण्यपि योज्यम् । तन्न युक्तम्--व्याप्याप्रतीतौ व्यापकाप्रतीतिः इति । कथं तदवगृह्यते ? इत्याह--**तद्विशेषेहया** इति । तस्य सामान्यस्य विशेषाः तेषु ईहा आकाङ्क्षा तया सह । तर्हि तदीहातो नियमेन विशेषावायभावात् संशयाद्यभाव इति चेत्; अत्राह--**अवाय** इत्यादि । अवाय एव तस्या वा कारणभूता शक्तिः **तस्याः अभावेऽपि** न केवलं भावे **जातुचित्** कदाचित् न सर्वदा । § 608

ननु दूरस्थस्य न तत्सामान्यमवगृह्यते किन्तु स्वलक्षणमेव, केवलम् अतद्धेतुफलव्यपोहसामान्यनिश्चयोत्पत्तेः तत्सामान्यमवगृह्यत इति व्यवहारी मन्यते इति परः, तन्निराकरणद्वारेण कारिकार्थं समर्थयमान आह-- **यथैव हि** इत्यादि । **यथैव हि** येनैव हि प्रकारेण **व्यक्तिभ्यो व्यतिरेको** भेदो यस्य तच्च **तत्सामान्यं च** तद्द्रष्टुं शीलस्य वैशेषिकादेः **तद्दर्शिनः तस्य** सामान्य- /ms

६ स्मात्] ईहादेः ।
२३ स्या] तस्य
२६ अ] अतत्कारणकार्यव्यावृत्तिरूपस्य
सामान्यस्य निश्चयः संजायते ।
२७ रः] बौद्धः ।

स्य **अनुपलक्षणम्** अनिश्चयनम् **अयुक्तम्** अनुपपन्नम्, किन्तु उपलक्षणमेव युक्तम् । कुत एतत् ? इत्यत्राह--**तद्दर्शन** इत्यादि । तस्य सामान्यस्य **दर्शनं** तस्य **बलं** सामर्थ्यं तस्मात् **भिन्नेषु** देशादिभेदवत्सु । केषु ? इत्यत्राह--**द्रव्यादिषु** । द्रव्यमादिः येषां गुणादीनां ते तथोक्ताः तेषु, **अभिन्नः प्रत्यय**ग्रहण-मुपलक्षणं तेन अभिधानोत्पत्तिः इत्यपि गृह्यते । एतदुक्तं भवति— विशेषाः द्रव्यादयः विशेषणं सत्तादिसामान्यम्, न च तदनुपलक्षितं तेषु विशिष्टप्रत्ययहेतुः इतरथा दण्डानुपलक्षणेऽपि क्वचिद् दण्डी इति प्रत्ययः स्यात् । न चैवम्, **नाऽगृहीतविशेषणा विशेष्ये बुद्धिः** इति वचनात् इति, **तथैव** तेनैव प्रकारेण **स्वलक्षणदर्शिनः** स्वलक्षणं पश्यति इत्येवंशीलस्य सौगतस्य **तदनुपलक्षणम्** स्वलक्षणानुपलक्षणम् **अयुक्तम्** इति सम्बन्धः । कुत एतत् ? इत्यत्राह--**तद्दर्शन** इत्यादि । **तस्य** स्वलक्षणस्य यत् **दर्शनं तद्बलात् तदन्यव्यवच्छेदविकल्पोत्पत्तेः** तस्य विवक्षितखण्डादिस्वलक्षणस्य अन्ये विजातीयाः 134/mkj कर्कादयः तेषां तेभ्यो वा व्यवच्छेदो व्यावृत्तिः तस्य विकल्पो निश्चयः तस्य /ms उत्पत्तेः । ननु यदि नाम तद्बलात् तद्विकल्पोत्पत्तिः तथापि न स्वलक्षणोपलक्षणं नियमाभावादिति चेत्; अत्राह--**तद्** इत्यादि । **तस्य** स्वलक्षणस्य **अनुभवो** दर्शनम् तेन **ईहित** आकाङ्क्षितो यो **व्यपोहो** विजातीयव्यावृत्तिः, अथवा व्यपोहविषयत्वाद् विकल्पो व्यपोहः, तम् **आत्मसात्कुर्वन्** सौगतः **कथम् अनुपलक्षको नाम** अनिश्चायको नाम किन्तु उपलक्षक एव । न खलु देवदत्तस्यानुपलक्षणे तस्य यज्ञदत्ताद् व्यपोहः सिद्धः शक्यः प्रत्येतुम्, तत्प्रतीतौ न तदुपलक्षणम् । अत्रायमभिप्रायः--यदाऽयं सौगतः अनुभूतस्वलक्षणस्य उपलक्षको भवति तदा दूरस्थस्य वर्णसंस्था[ना]दिसामान्यस्य विकल्पतोऽपि ग्रहणाभावात् तद्ग्रहणनिबन्धनः किमियं वलाका अहोस्वित् पताका, वलाकायां पताकाकैरेति , तथा स्थाणुर्वा पुरुषो वा, पुरुषे स्थाणुरेव इति संशयः विपर्ययो वा न भवेत् । न चैवम्, ततो दूरस्थस्य तत्सामान्यं प्रथममवगृह्यते इति । § 609

अधुना परपक्षान्तरमाशङ्क्य दूषयन्नाह--**स्वलक्षण** इत्यादि । **स्वलक्षणदर्शिनः** तथागतस्य **स्वलक्षणस्य उपलक्षणं** निश्चयनं येन यस्मिन् वा स तथोक्तः स चासौ **विकल्पः तमन्तरेणापि तस्य** विवक्षितस्वलक्षणस्य **अन्यो** विजातीयः तस्य **अपोहो** व्यावृत्तिः तद्विषयो विकल्पः तथा उच्यते तस्य **क**-/ms **ल्पनायां** क्रियमाणायां **जातिदर्शिनोऽपि** वैशेषिकादेः **तदुपलक्षणविकल्पमन्तरेणापि** सामान्योपलक्षणनिश्चयमन्तरेणापि **कुतश्चित्** कस्याश्चिद् योग्यतायाः **समवायिषु** गोत्वादिसामान्यसम्बन्धवत्सु नान्येषु, कथम्भूतेषु ? **भिन्ने[षु] प्रत्ययः कथं विरुध्येत** । कथमनुपलक्षितं सामान्यं तत्प्रत्ययहेतुरिति चेत् ?

६ विशेषाः ] ष्याः
६ त ] सत्तासामान्यं विशेषणम् ।
१४ नाम ] दर्शनबलात् ।
२३ ताकाकैरेति ] ताकैवेति
२५ स्य ] वर्णसंस्थानादिसामान्यम् ।
२९ व्यावृत्तिः ] अपोहविषयः ।
२९ था ] अपोह इत्युच्यते ।

अत्राह--**कारण** इत्यादि । तत्प्रत्ययस्य **कारणं** सामान्यं **तच्छक्तेः अचिन्त्यत्वात्** । ननु दृष्टे वस्तुनि चोद्ये **कारणशक्तेरचिन्त्यत्वात्** इत्येत्तदुत्तरं नान्यत्र अतिप्रसङ्गात् । तदुक्तम्-- § 610

**यत्किञ्चिदात्माभिमतं दिवाय** प्र° वार्तिकाल° पृ° ३५ इत्यादि । न च सामान्यं क्वचिद् दृष्टमिति चेत्; अत्राह--**इतरत्रापि** इति । न केवलं जातिवादिपक्षे अपि **तु इतरत्रापि** स्वलक्षणवादिपक्षेऽपि **कारणशक्तेरचिन्त्यत्वात् इत्येतदेवोत्तरमिति** मन्यते । अथ मतं स्वसामान्यलक्षणयोः दर्शनादर्शनकृतविशेषसद्भावात् कथमविशेषचोदनमिति चेत् ? अत्राह--**विशेषाऽभावात्** इति ? जातिवत् स्वलक्षणस्यापि दर्शनाऽभावात्, भवतो द्वयोरपि सत्त्वमसत्त्वं वा इति मन्यते । तन्न दर्शनजन्मना विकल्पेनैव सामान्यं गृह्यत इति युक्तम् । § 611

भवतु वा, तथापि स्वमतसिद्धिं दर्शयन्नाह--**असतः** इत्यादि । § 612

...8 असतः सद् व्यवच्छिन्द्यात् यथाऽनक्षविकल्पधीः ।
तथा स्पष्टाक्षधीः स्वार्थसन्निधेरनुमन्यताम् ॥ ८ ॥§ 614

दूरस्थस्य अर्थदर्शनं यदि असतः स्वविषयमपोहन्तीं किमप्यस्तीति विकल्पबुद्धिं जनयेत् तथा दूरस्थदृष्टिरपि पुनः अशेषवस्तुस्वभावानुपलम्भेऽपि सन्मात्रग्राहिणी संभा व्येत । न वै केवलमासन्नार्थदर्शी समविषमाकारदर्शनविशेषानेव नोपलक्षयति, [किं तर्हि] सत्तादिविकल्पविशेषानपि क्रमस्योपलक्षयितुमशक्तेः । पश्यन्नयमसाधारणमेव पश्यति इति प्रतिज्ञाय कोशपानं विधेयम् । उपहतेन्द्रियैः चन्द्रादेर्दर्शनेऽपि तद्विशेषानुपलब्धेः । तत्र चन्द्राद्यदर्शनं कल्पयन् न केवलं रूपादिस्वलक्षणान्येव दृष्टे तत्प्रतिभासवैकल्यान्नोपलभते अपि तु स्वयमन्तःस्वलक्षणं च यथाश्रुतमप्रतिभासानात् । स्वभावनैरात्म्यकल्पनामाविशन् आत्मानमहीकयति । साध्य [अप्रसिद्धेः] । ततो बहिरन्तश्च कृतम् ! तस्मादयं किञ्चित् केनचित् सदृशपरिणामविशिष्टं पश्येत्, तद्विशिष्टं प्रतीहमानो नावश्यं विशेषमवैति स्मरन्निव । § 615 (135/mkj)

**असन्त** इत्युपलक्षणम् । तेन सर्वस्माद् अनभिमताद् इति गृह्यते, **सद्** इति उपलक्षणम् सर्वस्याऽभिमतस्य । **सद्विद्या द्य** *वच्छिन्नं विषयीकुर्यात् । **यथा** येन योग्यताप्रकारेण **अनक्षविकल्पधीः** मानसी विकल्पबुद्धिरिति । अनक्षविशेषणं स्वमतापेक्षया न सौगतापेक्षया, *तस्य हि सर्वा विक- (/ms)

४ दिवाय] विधाय
४ इत्यादि] निरुत्तरः तत्र कृतः परेण । वस्तुस्वभावैरिह वाच्यमित्थं तथोत्तरे स्याद् विजयी समस्तः ॥--इति शेषः ।
२६ न्त] असतः
२७ *] सद् व्यवच्छिन्द्यात् व्य
२९ *] सौगतस्य ।

ल्पधीः *अनक्षैव इति तद्विशेषणमनर्थकम्, **तथा** तेन प्रकारेण **स्पष्टाक्षधीः** प्रत्यक्षबुद्धिः **असतः सद् व्यवच्छिन्द्यात्** इति सम्बन्धः । कुतः ? इत्यत्राह--**स्वार्थसन्निधेः** । स्वग्रहणयोग्योऽर्थः स्वार्थः तस्य सन्निधेः योग्यदेशाद्यवस्थितेः । इति शब्दोऽत्र द्रष्टव्यः, इत्येवम् **अनुमन्यताम्** अभ्युपगम्यताम् । § 616

कारिकां विवृण्वन्नाह--**दूर** इत्यादि । **दूरस्थस्य** पुरुषस्य यद**र्थदर्शनं** कर्तृ **यदि विकल्पबुद्धिं जनयेत्** । किं कुर्वाणाम् ? **अपोहन्तीम्** । किम् ? इत्याह--**स्वविषयम्** । कुतः ? **असतः** खरविषाणादेः केवलात् नान्यतो न सतो व्यपोहन्ती[म्] । केन प्रकारेण ? इत्यत्राह— **किमपि अस्ति इति** एवं **तथा** तेन प्रकारेण **दूरस्थदृष्टिरपि** न केवलम् अनक्षविकल्पधीः **संभाव्येत** । कथंभूता ? **सन्मात्रग्राहिणी** । **पुनः** इति वितर्के । कस्मिन् सति ? इत्यत्राह--**अशेषवस्तुस्वभावाऽनुपलम्भेऽपि** न केवलं तदुपलम्भे । अथ मतम्--अनर्थविषयत्वाद् अनक्षविकल्पधीः तथा युक्ता नेन्द्रियबुद्धिः विपर्ययादिति चेत्; न; तस्या अपि वस्तुविषयत्वस्य प्रतिपादयिष्यमाणत्वात् । वक्ष्यति च--**सम्यग्विचारिता वाक्यविकल्पास्तत्त्वगोचराः** । सिद्धिवि० ५ । ४ इति । ततः स्थितम्--**वर्णसंस्थानादिसामान्यम्** *इत्यादि । § 617

/ms ननु दूरार्थदर्शने अवग्रहाद्यभावो मा भूत् तदुपलक्षणात्, आसन्नार्थदर्शने तत् स्याद् विपर्ययादिति चेत्; अत्राह--**नवै केवलम्** इत्यादि । वै शब्दः शिरःकंप्प, **न केवलमासन्नमर्थं पश्यति** इत्येवं शी [लः] **समश्च विषमश्च** तौ च तौ **आकारौ** च सदृशेतरपरिणामाकारौ तयो**र्दर्शनम्** ग्रहणं तस्य **विशेषा** अवग्रहादयः **तानेव नोपलक्षयति,** किं तर्हि ? **सत्तादिविकल्पविशेषानपि** 136/mkj सत्ता आदिर्येषां शब्दत्वादीनां तेषां विकल्पा व्यवसायाः त एव विशेषाः तानपि नोपलक्षयति । एतदुक्तं भवति--यथा क्वचित् सत्त्वज्ञेयत्वादिविकल्पान् क्रमभाविन उपलभ्य पुनः आसन्नार्थदर्शी युगपद् व्यवसायेऽपि क्रमेणैव तत्प्रवृत्तिरिति व्यवस्थापयति युगपदनेकव्यावृत्तिविकल्पाऽसंभवात् तथा दूरे समविषमाकारदर्शनविशेषान् क्रमेण जायमानानुपलभ्य आसन्नेऽपि तथा तान् व्यवस्थापयति, दृष्टेन अदृष्टसिद्धेरनिवारणादिति । अथ मतम्--आसन्नार्थदर्शी यदि तद्दर्शनविशेषान् पश्यति किमिति तथैव नावधारयति इति ? तत्राह--**क्रमस्य उपलक्षयितुमशक्तेः** इति । आसन्नार्थदर्शिनो ये तद्दर्शनविशेषाः तेषाम् सत्तादिविकल्पवत् क्रमस्य उपलक्षयितुमशक्तेः इति । § 618

स्यान्मतम्--आसन्नार्थदर्शी क्षणिकनिरंशपरमाणुस्वलक्षणमेव पश्यति /ms इति तद्दर्शनविशेषान् असत्त्वान्नोपलक्षयति न सत एव तत्कथमुच्यते-

---

१ *] न इन्द्रियजन्या, अपि तु मानसी निर्विकल्पजन्या वा ।
१३ बुद्धिः] अर्थसामर्थ्यसमुद्भूतत्वादर्थजन्यैव सा ।
१३ स्या] विकल्पबुद्धेरपि ।
१५ *] पृ० १३३ प० १ ।
१८ शिरःकंप्प] कम्पे
२५ था] क्रमेणैव ।
२७ थेव] क्रमेणैव ।
३२ विशेषा] समविषमाकारदर्शनविशेषान् ।

-**सम** इति ? अत्राह--**पश्यन्नयम्** इत्यादि । **पश्यन्नयं** सौगतो लोको वा **असाधारणमेव** नान्यत् **पश्यति इत्येतत् प्रतिज्ञाय कोशपानं विधेयम्** अन्यतः तत्प्रतिपत्तेरसंभवादिति भावः । ततः **सम** इत्यादि सूक्तम् । § 619

सांप्रतं पराम्युपगतभ्रान्तेन्द्रियज्ञानबलेन सामान्यग्रहणं व्यवस्थापयन्नाह--**उपहतेन्द्रियैः** इत्यादि । उपहतानि कामलादिना दूषितानि इन्द्रियाणि येषां **तैः चन्द्रादेः** आदिशब्देन वर्तुलत्वादेर्**दर्शनेऽपि** न केवलम् अदर्शने, तथा **तत्र** उपहतेन्द्रियेषु **आद्यं** चन्द्रादिदर्शनाभावं **कल्पयन्** सौगतादिः, कुतः कल्पयन् ? इत्यत्राह--**तद्** इत्यादि । **तस्य** चन्द्रदेर्**विशेषः** एकत्वादि[ः] तस्य **अनुपलब्धिः** तदनुपलब्धौ चन्द्राद्यदर्शनम्, एकस्य गृहीतेतररूपद्वयाऽयोगादिति मन्यते । किं करोति ? इत्यत्राह--**न केवलम्** इत्यादि । **न केवलं रूपादिस्वलक्षणान्येव** निरंशक्षणिकरूपादिपरमाणूनेव **नोपलभते,** कुत एतत् ? **दृष्टे[ः]** । रूपादिदर्शनस्य **तत्प्रतिभासवैकल्यात्** परपरिकल्पितस्वलक्षणप्रतिभासविरहात्, उपहतेन्द्रियैरिव अनुपहतैरपि बहिरर्थाऽदर्शनम् इति मन्यते । माभूत् तस्य दर्शनं तथापि विज्ञानवादिनो न किञ्चित् तस्यतीति चेत्; अत्राह--**अपि तु** इत्यादि । **अपि तु** किन्तु **स्वयम्** आत्मना **अन्तःस्वलक्षणं** च ज्ञान स्वलक्षणमपि नोपलभते इति । कुत एतत् /ms ? इत्यत्राह--**यथा** इत्यादि । **यथाश्रुतं** यथाभ्युपगम [म अ]**प्रतिभासनाद् अन्तः स्वलक्षणस्य** इति सम्बन्धः । तर्हि बहिरिव अन्यत्रापि विचारसाम्यात् शकलशून्यता अस्तु इति चेत्; अत्राह--**स्वभाव** इत्यादि । ज्ञानज्ञेययोः **स्वभावस्य** स्वरूपस्य **नैरात्म्यं** नीरूपत्वं तस्य **कल्पनाम् आविशन्** सौगतः **आत्मानम् अह्रीकयति** । कुत एतत् ? इत्यत्राह--**साध्य** इत्यादि । **ततो बहिरन्तश्च कृतम् !** अप्रतिभासेऽपि यथा सामान्यावभासनं तथा तद्विशेषानुपलम्भेऽपि चन्द्रादिदर्शनम् उपहतेन्द्रियैरिति कथन्न दृष्टिः सन्मात्रग्राहिणी संभाव्यत इति मन्यते । उपसंहारार्थमाह--**तस्मात्** इत्यादि । यत एवं **तस्मात् अयं** व्यवहारी **किञ्चित्** पुरुषादिकं **केनचित्** स्थाण्वादिना सह यः सदृशपरिणामः तेन **विशिष्टं पश्येत्, तद्विशिष्टं** तत्परिणामभेदं **तत्प्रति ईहमानोऽपि नाऽवश्यं विशेषमवैति** न विशेषोऽ वायीभवति । निदर्शन- 137/mkj माह--**स्मरन्नेव** इति । यथा कथञ्चित् स्मरन् केनचित् सदृशपरिणामेन तद्विशेषं प्रतीहमानोऽपि नावश्यं तद्विशेषं स्मरति तथा प्रकृतमपि इति । § 620

यदि नावश्यं विशेषमवैति किं तर्हि तत् स्यात् ? इत्यत्राह--**समदृष्टेः** इत्यादि । § 621

---

३ अ] मद्यपानाद्विना ।
४ प] बौद्धाभिमत ।
७ आद्यं] चन्द्राद्यदर्शनं
९ ब्धिः] ब्धेः ।
९ त] एकत्वादिविशेषानुपलब्धौ ।
१४ त] बहिरर्थस्य ।
१५ तीति] नश्यतीति
१८ अ] अन्तरपि ।
२७ वा] अवायात्मकनिश्चयविषयो भवति ।
२८ न्नेव] रन्निव

...9 समदृष्टेर्विशेषेहारेका स्वार्थाविनिश्चये ।
अतस्मिंस्तद्ग्रहो भ्रान्तिरपि स्पष्टावभासिनी ॥ ९ ॥§ 623

व्यापकं स्वभावं पश्यन् विशेषं प्रति पुनस्तदन्तरमीहमानो व्यवहारी नावश्यमवैति सामग्रीवैकल्यसंभवात् । तत्त्वेतरस्वभावा प्रतिपत्तिः संशीतिरनवस्थैव । अन्यथाप्रतिपत्तिः पुनर्विसंवादः । तत्त्वप्रतिपत्तिरवायः । सर्वश्चेदमीहाविनाभावि । सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेः सन्देहोपपत्तेः । § 624

**समदृष्टेः** अवग्रहाद् विशेषाकाङ्क्षा **विशेषेहा,** तस्याः किम् ? इत्याह-- /ms **आरेकेति** । **विशेषेहा** इत्येतज्ज्ञात का विभक्ति परिणाममिह संबध्यते । ततः तस्याः **आरेका** संशीतिः । किं सर्वदा सा ततो भवति । न इत्याह--**स्वार्थाविनिश्चये** । स्वशब्देन ईहा गृह्यते, स्वस्य अर्थः तदाकाङ्क्षितो विशेषः तस्याऽविनिश्चये सति आरेका न विनिश्चये, कदाचित् ततः तद्विनिश्चयोऽपि जायत इत्यभिप्रायः । न केवलं तत आरेकैव किन्तु विपर्ययोऽपि इति दर्शयन्नाह--**अतस्मिंस्तद्ग्रहो भ्रान्तिरपि** इति । भ्रान्तिरपि विपर्ययोऽपि न केवलम् आरेकाऽवायावेव ततो जायेते इति । तत्स्वरूपं दर्शयितुमाह--**अतस्मिंस्तद्ग्रहः** [स्थाणौ] पुरुषादिग्रहः अबाह्ये बाह्यग्रहवत् । न च तद्ग्रहोऽसिद्धः; प्रतिभासनात् । यथैव च एकेन ज्ञानेन अन्योऽन्यभिन्ननीलाद्याकाराणां व्याप्तिः तथा स्वतो भिन्नानां गृहीतिरिति निवेदितम् । निवेदयिष्यतेतदविभ्रमे ष्यते चैतत्-- **अविभ्रमेऽ सौगतं जगत्** [इत्यादिना] । सर्वविकल्पातीतत्वे स एव दोषः कथञ्चित् कुतश्चिदप्रतिपत्तेः । ततो बहिर्भ्रान्तिरभ्युपगन्तव्येति सर्वं सुस्थम् । कथम्भूता सा ? इत्यत्राह--**स्पष्टावभासिनी** इति विशदा इति । अनेन **सदृशदर्शनप्रभवा सर्वापि भ्रान्तिः मानसी** इति मतं निरस्तम्; तस्याः स्पष्टावभासित्वाऽयोगात् । प्रतीयते च तत्प्रभवाऽपि मरीचिकादौ जलादिभ्रान्तिः तथावभासिनी । § 625

कारिकां विवृणोति--**व्यापक** इत्यादि । **[व्यापकस्वभावं]** नाऽव्यापकस्वभावं सादृश्यैकत्वपरिणामस्वभावं **पश्यन् विशेषं** तद्भिदं **प्रति पुनः** त- /ms **दन्तरमीहमानो** व्यवहारी **नावश्यं** नियमेन **अवैति** निश्चिनोति विशेषम् इति सम्बन्धः । कुत एतत् ? इत्यत्राह— **सामग्री** इत्यादि । विशेषे अवायस्य या सामग्री देशसन्निधानादिलक्षणा तस्या **विकल्प संभवात्** । संशयादीनां स्वरूपं प्रदर्श्य ईहात उत्पत्तिं दर्शयन्नाह--**तत्त्व** इत्यादि ।

९ का] का इति पञ्चमीविभक्तेः संज्ञा ।
२२ इति] तुलना— मानसं तदपीत्येके तेषां ग्रन्थो विरुध्यते । नीलद्विचन्द्रादिधियां हेतुरक्षाण्यपीत्ययम् ॥--प्र० वा० ३ । २९५ ।
२३ त] सादृश्यप्रभवापि ।
२४ त] स्पष्टा ।
२९ ल्प] वैकल्य
३० त्त्व] त्त्वे

**प्रतिपत्तिः संशीतिः** । कथंभूता ? **तत्त्वेतरस्वभावा अनवस्थैव** । **व्यापकस्व-भावम्** इति वचनात् व्याप्योऽपि स्वभावः, आक्षिप्तस्तस्य तन्नान्तरीयकत्वात् । स चानेकः ततः सूस्यत * व्यापकस्वभावे दृश्यमाने तत्त्वस्वभावो विव- 138/mkj क्षितव्याप्यस्वभावः इतरश्च [स्व]भावोऽविवक्षितव्याप्यस्वभावः तयोर्न विद्यते अवस्था अवस्थितिर्यस्या सा तथोक्ता उभयत्र दोलायमाना इत्यर्थः । § 626

सामान्यविशेषात्मकतत्त्वप्रतीतिरपि संशीतिः इत्येके;* तन्निरासार्थ एव-कारः, तस्याः तत्त्वेतरस्वभावावस्थारूपत्वात् । **अन्यथा** अन्येन तत्त्वस्वभावे इतरस्वभावप्रकारेण, इतरस्वभावे तत्त्वस्वभावप्रकारेण **प्रतिपत्तिः पुनः विसं-वादो** विपर्ययः । **तत्त्वप्रतिपत्तिः अवायः** विवक्षितव्याप्यस्वभावनिर्णयोऽवायः । **सर्वं** निरवशेषं **च इदं** संशीत्यादिकम् **ईहाऽविनाभावि** । § 627

ननु यदि नाम समदृष्टिः किमायातं येन अतो विशेषेषु ईहातश्च आरेका स्यात् । नहि अन्यत्र दृष्टेः अन्यत्र सा युक्ता, अन्यथा घटदृष्टेः पटे भवेत् । किंच, सामान्यदृष्टौ विशेषो यद्युपलब्धिलक्षणप्राप्तिः सन्नोपलभ्यते तर्हि /ms तदभाव एव न तत्र ईहा आरेका वा । अथ अन्यथा [अ] दृश्यानुपलब्धेरेव संशीतिः इति किं **समदृष्टेः** इत्यनेन ? न हि स्वर्गादौ तद्दृष्टेः संशीतिः इति चेत्; अत्राह--**सामान्य** इत्यादि । **व्यापकस्वभावं पश्यन्** इत्यनुवृत्तेः येषां विशेषाणाम् ईहा आरेका च तेषां व्यापकस्वभावं **सामान्यम्** इह गृह्यते तस्य **प्रत्यक्षा[द्] दर्शनात्** । § 628

अनेन न ह्यन्यस्य दर्शने अन्यस्य सा युक्ता, अन्यथा घटदर्शने पटे सा भवेत् इति; तन्निरस्तम् । न खलु यथा तत्सामान्यं विवक्षितविशेष-स्वभावं तथा पटः पटस्वभाव इति । **ईहमानस्य** तद्व्याप्यविशेषान् आदातुं चेष्टमानस्य । अनेन यदुक्तम्--**सामान्याऽदृष्टौ विशेषाणां दृश्यात्मनामदृष्टौ अभावः स्यात्** । इति; तन्निरस्तम्; तदा आचार्येण तद्दृश्यात्मतानभ्युपग-मात्, अन्यथा **ईहमानस्य** इति न ब्रूयात् । को हि नाम दृश्यं पश्यन्नेव आदातुमीहते । § 629

यत्पुनरुक्तम्--***एवं सति अदृश्यानुपलब्धिरेव संशयात् किं सामान्यप्रत्यक्षात्** इत्यनेन इति; तदप्येतेन निरस्तम्; तत्त्वेतरस्वभाव-व्यापकभवेदर्शनादेव अनैकान्तिकहेतुदर्शनादि च तत्र नियमेन सन्देहो

२ स्य] व्याप्यस्य ।
२ त] व्यापकं विना अभवनात् ।
३ *] सूच्यते
६ *] बौद्धादयः ।
७ स्याः] सामान्यविशेषात्मकतत्त्वप्रतीतेः ।
११ स] सामान्यदर्शनम् ।
११ अ] समदृष्टेः ।
१३ प्राप्तिः] प्तः
१४ त] विशेषस्य अभाव एव ।
१४ अ] उपलब्धिलक्षणप्राप्तो न भवति ।
१५ त] समदृष्टेः ।
२० त] व्यापकभूतं सामान्यम् ।
२१ टः] घटः
२६ *] तुलना--अन्यथा उपलब्धिलक्षणप्राप्तानुपलम्भादभावो नानुपलब्धिमात्रात् । तथाप्यनुपलब्धेरेव संशयः व्यर्थमेतत् सामान्यप्रत्यक्षादिति ।--प्र० वार्तिकाल० पृ० १८ ।
२६ ब्धिरेव] ब्धेरेव
२८ वे] भाव
२८ नादि] द्, इतः

युक्तो न अदृश्यदर्शनादेव । अन्यथा अदृश्यपरचैतन्यादेः अनुपलम्भादभावासिद्धेर्मृतादिव्यवहारोच्छेदः स्यात् इति । § 630

/ms यच्चोक्तम्--**सामान्यप्रत्यक्षमन्तरेणापि क्वचित् संशयः** इति तदपि न सूक्तम्; तत्रापि शब्दादन्यतो वा सामान्याप्रतिपत्तौ तदभावात् समवायादर्शिनः शास्त्रार्थसन्देहः अन्यथा । सामान्यप्रत्यक्षात् इत्येतस्य उपलक्षणार्थ-
139/mkj त्वात् । एवमर्थं च **वित कर्नुगत** सिद्धिवि° २ । ६ इत्याद्युक्तम् । आचार्यविप्रतिपत्त्यादेः समयोऽनेन चिन्तितः । **विशेषाऽप्रत्यक्षात्** तस्य सामान्यस्य ये **विशेषाः** तेषाम् **[अप्रत्यक्षात्]** अदर्शनात्, इदमप्युपलक्षणम् तदग्रहणस्य । **विशेषस्मृतेः** विशेषयोः स्मरणात् **सन्देहोपपत्तेः** कारणात् **सर्वं चेदम् ईहाविनाभावि** इति सम्बन्धः । तदुपलक्षणम्, तेन विपरीतविशेषस्मृतेर्भ्रान्त्युपपत्तेः इत्यादि ग्राह्यम् । § 631

ननु यदीयं भ्रान्तिः तत्स्मरणपूर्विका, न तर्हि स्पष्टावभासिनी अनुमानवत्, अतोऽयुक्तमुक्तम्--**भ्रान्तिरपि स्पष्टावभासिनी** इति चेत्; न; जलादिभ्रान्त्या व्यभिचारात् । नैयायिकस्य प्रत्यभिज्ञानेन; कथमन्यथा तदध्यक्षमिति । § 632

ननु संशयादिः स्मृतिविशेषः, स च अविकल्पानुभवात् वस्तुस्वभावत इति किं तत्र ईहयेति ? एतदेवाह--**निर्विकल्प** इत्यादिना । § 633

...10 निर्विकल्पदृष्टेरेव स्मृतौ वस्तुस्वभावतः ।
निराकारावबोधेन सजातीयस्मृतिर्न किम् ॥ १० ॥ § 635

तद्दृष्टावेव दृष्टेषु व्यवहारप्रवृत्तौ संवित्तिबलात् सजातीयस्मृत्यभिलाषादेरिति किं ग्राह्याकारकल्पनया ? केवलमवबोधमात्रं भावस्वभावतो प्रकृतस्मृतिहेतुः प्रतीयेत । कल्पयित्वापि विषयाकारं स विशेषो मृग्यः येन प्रतिविषयं भिद्येत अन्यथा अतिप्रसङ्गात् । तेनैव संवेदनं प्रतिनियतार्थवेदनं स्यात् । यत उत्पन्नं ज्ञानं यज्जातीयस्मृतिहेतुतया व्यवहारयति तत्तस्य नेतरस्येति कुतोऽतिप्रसङ्गः, सदर्थाकारस्म स्वयमनुपलक्षितस्य स्मृतौ

३ म्] तुलना--दृश्यते कान्यकुब्जादिषु सामान्यप्रत्यक्षतामन्तरेणापि प्रथमतरमेव स्मरणात् संशयः ।--प्र° वार्तिकाल° पृ° १८ ।
४ त्तौ] संशयाभावात् ।
४ भावात्] सङ्केताग्राहिणो यथा शास्त्रार्थसन्देहो न भवति । अपि तु तस्य अप्रतिपत्तिरेव ।
४ वाया] समया
५ था] स्यादिति सम्बन्धः ।
९ त] विशेषाग्रहणस्य ।
९ त्तेः] नहि विशेषस्मृतिव्यतिरेकेणापरः संशयः, उभयांशावलम्बिस्मृतिरूपत्वादस्य ।--प्र° वार्तिकाल° पृ° १८ ।
१४ भिज्ञानेन] व्यभिचारः, तद्धि स्मरणपूर्वकमपि प्रत्यक्षं स्पष्टावभासि च ।
१४ त] प्रत्यभिज्ञानम् ।

अभावानतिशायनात् । विप्लवे साकारदर्शनात् तदन्यत्र कल्पनायामतिप्रसङ्गात् । तावतैव सर्वव्यवहारप्रसिद्धेस्तथैवास्तु इति चेत्; स्वयमभिप्रेतभ्रान्तिमात्रासिद्धेः सर्वथाऽसम्बद्धप्रलापमात्रम्, अविद्यात एव विद्यासिद्धेरनिवारणात् अनिष्टानुषङ्गात् । भ्रान्तिमात्रात् परमार्थतोऽसिद्धस्वभावात् प्रतीतिविपर्यासेन भावान् इदन्तया नेदन्तया वा व्यवस्थापयितुकामः सौगतः एकान्तेन अविकल्प एवेत्यलमतिप्रसङ्गेन । § 636

**निर्विकल्पदृष्टेः** अविकल्पानुभवाद् **वस्तुस्वभावतः** भावस्वाभाव्यादेव नान्यतः इति **एव**कारार्थः । सजातीय**स्मृतौ** सामान्यविषयविकल्पबुद्धौ अङ्गीक्रियमाणायाम् दूषणमिदमिति दर्शयन्नाह--**निराकार** इत्यादि । **निराकारावबोधेन** अर्थसारूप्यरहितदर्शनेन हेतुत्य **किन्न सजातीयस्मृतिः** सर्वोऽपि सामान्यविकल्पो जायते इत्यध्याहार्यम्, जायत एव । कुतः ? /ms **वस्तुस्वभावतः** भावशक्तेरिति, येन कारणेन ग्राह्याकारोऽर्थाकारोऽत्रावबोधे कल्प्यते । ततो न युक्तमेतत्-- § 637

140/mkj

*स्मृतिश्चेदृग्विधं ज्ञानं तस्याश्चानुभवाद् भवः ।
स चार्थाकाररहितः सेदानीं तद्वती कथम् ॥ प्र० वा० २ । ३७४ इति ।§ 639

यथैव हि निराकारादनुभवात् कथं सा तद्वती आकारवती; तथा सामान्याकाररहितात्ततः तदाकारवती कथमिति समानम् । एवमर्थं च सजातीयस्मृतिः इत्युक्तम् । वस्तुस्वभावतः इत्यपि नोत्तरम्; अन्यथा निराकारावबोधात् तत एव तद्वती इति यत्किञ्चिदेतत् । § 640

कारिकां विवृण्वन्नाह--**तद्दृष्टावेव** इत्यादि । निर्विकल्पिका दृष्टिः **तद्दृष्टिः तस्यां** सत्यां पुनः ये **दृष्टाः तेषु व्यवहारः[र]प्रवृत्तौ** अङ्गीक्रियमाणायाम् । कुतः ? इत्यत्राह--**संवित्ति** इत्यादि । **संवित्तेर्बलं** सामर्थ्यम् तस्माद् या **सजातीयस्मृतिः** तस्या **अभिलाष आदि**शब्देन द्वेषपरिग्रहः तस्मात् **इति किं दर्शनस्य ग्राह्याकारकल्पनया** सारूप्यकल्पनया **केवलं** ग्राह्याकारशून्यम**वबोधमात्रं भावस्वभावतो** वस्तुशक्तेः **प्रकृतस्मृतिहेतुः** सजातीयस्मरणकारणं

१० हेतुत्य] तुना
१६ ती] इति दूषणं दीयते ।
१७ तः] दर्शनात् ।
१९ त] वस्तुस्वभावादेव ।
१९ ती] आकारवती स्यात् ।
२० त] तुलना--तद्दृष्टावेव दृष्टेषु संवित्सामर्थ्यभाविनः । स्मरणाद् व्यवहारश्चेदनुमानं तथा सति ।--प्र० वार्तिकाल० पृ० २४ । येन वार्तिककार एवमाह--तद्दृष्टावेव दृष्टेषु संवित्सामर्थ्यभाविनः । स्वव्यापारवकारणास्मरणादित्यादि--न्यायबि० टी० टि० पृ० ३१ । आह च--तद्दृष्टावेव...स्मरणादभिलाषेण व्यवहारः प्रवर्तते--सन्मति० टी० पृ० ४९८ । पुनश्चोक्तं दृष्टेषु संवित्सामर्थ्यभाविनं स्मरणादित्यादि--प्र० वा० स्व० टी० पृ० ६ ।

**प्रतीयेत** । शेषमत्र चर्चितम् । तत्र साकारस्मृतेर्दर्शनं साकारं सिध्यति इति मन्यते । § 641

ननु मा भूत् साकारस्मृतेर्दर्शनस्य साकारतासिद्धिः, तस्या अन्यथा /ms सिद्धिः, प्रतिकर्मव्यवस्थायाः तत् स्यात् इति । तदुक्तम्-- § 642

*अर्थेन घटयत्येनां नहि मुक्त्वाऽर्थरूपताम् ।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता ॥ प्र० वा० २ ।
३०५ इति । चेत्; § 644

अत्राह--**कल्पयित्वापि** इत्यादि । न केवलम् अकल्पयित्वा किन्तु **कल्पयित्वापि विषयाकारं** दर्शनस्य विषयसारूप्यं **विशेषः** अतिशयः **मृग्यः सः** अवबोधो **येन** विशेषेण **प्रतिविषयं भिद्येत, अन्यथा** अन्येन तद्विशेषान्वेषणाभावप्रकारेण **अतिप्रसङ्गात्** । तदाकारात् प्रतिकर्मव्यवस्थायाम् किञ्चिन्नीलज्ञानं सकलस्य नीलस्य, सदाकारं वा ज्ञानं सतः स्यात् इति अतिप्रसङ्गः, तस्माद् विशेषो मृग्यः इति प्रतिकर्मव्यवस्थापि अन्यथा सिद्धेति भावः । ननु भवतोऽपि अवबोधस्य निराकारस्य सर्वत्राविशेषादतिप्रसङ्गः समान इति चेत्; अत्राह--**तेनैव** इत्यादि । **तेनैव** योग्यताविशेषेणैव **संवेदनं** समीचीनं **प्रतिनियतार्थवेदनं** ग्रहणं **स्यात्** इति कुतोऽतिप्रसङ्गः इति गत्वा सम्बन्धः । तेनैव च विशिष्टस्मृतिनिमित्तं स्यादिति कुतोऽतिप्रसङ्गः । § 645

141/mkj

सांप्रतं नैयायिको भूत्वा सूरिः अतिप्रसङ्गं परिहरन्नाह--**यत** इत्यादि । **यतः** यस्मात् स्थूलत्वादिधर्मोपेतादर्थाद् **उत्पन्नं** ज्ञानं **तस्यार्थस्य तत् न इतरस्य** अजनकस्यार्थस्य **इति** हेतोः **कुतोऽतिप्रसङ्गः** इतरथा अनग्नेः धूमः स्यात् । अतज्जन्यत्वम् अन्यत्रापि । § 646

स्यान्मतम्--**यत उत्पन्नं तस्य तत्** इत्युच्यमाने इन्द्रियादेः स्यादिति; /ms तत्राह— **यज्जातीय** इत्यादि । यत्समानः **यज्जातीयः** तस्य **स्मृतिहेतुतया व्यवहारयति**— व्यवहारे प्रवृत्तं जनं करोति **तस्य तत् नेतरस्य इति कुतोऽतिप्रसङ्गः ?** न चेन्द्रियादिः सजातीयस्मृतिहेतुतया व्यवहारयति इति । § 647

ननु पदार्थान्तरं ज्ञानं स्वयमनुभवात्मकं भवति तदा तेन अर्थो ज्ञातो भवति, तत्र च तत्स्मृतिहेतुर्नान्यथा, न चैतत् नैयायिकस्येति चेत्; अत्राह-

---

३ स्या] साकारतायाः ।
४ त्] दर्शनं साकारं ।
५ त्येनां] निर्विकल्पिकामर्थबुद्धिम् ।
६ ता] साधनं मेयरूपता ।--प्र० वा० ।
तस्मादर्थाधिगतेः प्रमाणं मेयरूपता ।--तत्त्वोप० पृ० ५३ । प्रकृतपाठः— न्यायकुमु० पृ० १६७ । प्रमेयक० पृ० १०७ । प्रश० कन्द० पृ० १२३ । न्यायवि० वि० प्र० पृ० २४० । सन्मति० टी० पृ० ३१२ । स्या० रत्ना० पृ० १३६ । प्रमेयरत्नमा० २ । ९ । स्या० म० पृ० १३७ । प्रमाणमी० पृ० ३३ । सर्वद० पृ० ३६ ।
११ तः] सर्वस्य सतः आकारमनुकुर्यादिति भावः ।
१२ स्थापि] योग्यतया ।
२६ रं] यदार्थाकारं

-**तर्थे** त्यादि । सति * प्रतिनियतो नीलादिः **अर्थः** तस्य **आकार** इव आकारो यस्य ज्ञानस्य तत् तथोक्तं तस्य **अनुपलक्षितस्य** अनिश्चितस्य **स्वयम्** आत्मना **अभावेन** शशशृङ्गादिनाऽ**नतिशायनात्** । क्व ? **स्मृतौ** । तस्यां क्रियमाणायाम् अतिशयाभावात् **यत** उ[त्पन्नम् इ]त्यादि सम्बन्धः । एतदुक्तं भवति--यदि निर्विकल्पकं दर्शनं तदतिशयरहितमपि स्मृतिकारणं नैयायिककल्पितं चिन्न स्यात् इति; तर्हि विप्लवे अर्थाभावेऽपि तदाकारदर्शनात् ससाकारो ज्ञानस्य प्रतिभासमानस्य गत्यन्तराभावात् । तदुक्तम्--
§ 648

***अनर्थाकारशङ्का स्यादप्यर्थवति चेतसि** । प्र° वा° २ । ३७१ इति चेत्; § 649

अत्राह--**विप्लवे** इत्यादि । **विप्लवे** विभ्रमदशायां यत् **साकारदर्शनम्** अविकल्पकं ज्ञानमेवमर्थं च **दर्शन**ग्रहणम्, अन्यथा ज्ञानग्रहणं न्याय्यम् **तस्मात्** तेन हेतुना तद्वा आश्रित्य, **तद्** इत्ययं निपातः तस्य इत्यस्यार्थे द्रष्टव्यः । तस्य ग्राह्याकारस्य **अन्यत्र** जाग्रद्दशाज्ञाने **कल्पनायां** क्रियमाणायाम् **अतिप्रसङ्गात्** । यतः कुतश्चिदसिद्धात् निदर्शनात् यस्य कस्यचिदर्थस्य सिद्धिप्रसङ्गादिति **नैवं संवेदनम्** इत्यादिना सम्बन्धः । विप्लवेऽपि साकारदर्शनमसिद्धम् निराकारेण दर्शनेन तत्र कुतश्चिद् भ्रान्तेः घटादेरसत एव बहिरिव ग्रहणात् इत्यभिप्रायः । तदुक्तं न्या य वि नि श्च ये--**न चेतद् बहिरेव, किं तर्हि बहिर्बहिरिव प्रतिभासते । कुत एतत् ? भ्रान्ते [ः], तदन्यत्र समानम्** इति । § 650 /ms

अत्राह परः--**तावतेव** इत्यादि । **तावतेव** असतः प्रतिभासनमात्रेणैव **सर्वस्य** प्रमाणेतरादिरूपस्य **व्यवहारस्य** मिथ्याविकल्परचितस्य **प्रामाण्यं व्यवहारेण** प्र° वा° १ । ७ इत्यादि वचनात् **प्रसिद्धेः** कारणात् **तथैवास्तु** तेनैव निराकारेण ज्ञानेन असदेव घटादिकं गृह्यते इति प्रकारेणैव अस्तु सर्वम् इत्यध्याहारः **इति** एवं **चेत्**; अत्राह आचार्यः--**स्वयम्** इत्यादि । **स्वयम्** आत्मना यद**भिप्रेतम्** अङ्गीकृतं **भ्रान्तिमात्रं** सौगतेन तस्य **असिद्धेः** तदप्रतिपत्तेः कारणात् । किम् ? इत्याह--**सर्वथा** इत्यादि । **सर्वथा** सर्वेण प्रकारेण **असम्बन्धस्य** असम्बद्धं वा **प्रलापमात्रम् इति** एवं **निर्णीतमेतत्** प्रथमप्रस्तावे । § 651

142/mkj

तदभिप्रेतसिद्धौ दूषणमाह--**ब्रह्म** इत्यादि । इदमत्र तात्पर्यम्--यथा विभ्रमादेवं विभ्रमसिद्धिः तथा वा **विद्यात एव** प्रत्यक्षादिलक्षणाया **विद्याया** ब्रह्मणो

१ र्थे ] सदर्थे
१ * ] सन्
६ चिन्न ] तन्न
६ त ] अर्थाकार ।
७ साकारो ] न स आकारो
१४ नात् ] दृष्टान्तात् ।
१५ नैवं ] तेनैव
२० रः ] बौद्धः ।
२७ न्ध ] द्ध
३० वा ] चाऽ

/ms या **सिद्धिः** तस्या **अनिवारणाद् असंबद्धप्रलापमात्रम्** इति । ननु भवतु तत्सिद्धिः, तथापि घटादिवत् प्रतिभासमानस्य तस्य विभ्रमसिद्धेः सिद्धं नः समीहितमिति चेत्; अत्राह--**अनिष्टानुषङ्गात्** । सौगतस्य इष्टम्--अनेकं क्षणिकं सर्वथा भ्रान्तं ज्ञानम्, अनिष्टम्--एकमक्षणिकं व्यापकमभ्रान्तं ब्रह्मतत्त्वम्, अस्य अनुषङ्गात् तन्मात्रम् इति सम्बन्धः । यथा खलु भ्रान्तिः भ्रान्तेः प्रतीयमानापि न भ्रान्तिः तथा ब्रह्मतत्त्वमपि इति मन्यते । § 652

तर्हि भ्रन्तिरपि न कुतश्चित् प्रतीयते इति चेत्; अत्राह--**भ्रान्तिमात्रात्** इत्यादि । भ्रान्तिरेव तस्मात् । कथंभूतात् ? **परमार्थतः** तत्त्वतोऽ**सिद्धस्वभावात्** अनिश्चितरूपात् **प्रतीतिविपर्यासेन** स्वप्नादिदशा[विप]र्यासेन स्वप्नादिदशायां भ्रान्तं ज्ञानं न जाग्रद्दशायाम् इति येयं प्रतीतिः लौकिकी प्रसिद्धिः तस्याः स्वप्नादिवद् अन्यदा विभ्रान्तं ज्ञानम् अन्यदेव वा स्वप्नादावपि अभ्रान्तम् इति यो विपर्ययः तेन **भावान्** नवेतररूपानर्थानिवत्तया स्वाभिमतस्वभावतया **नेदन्तया** न पराभिमतस्वभावतया **वा** शब्दः पूर्वसमुच्चयार्थः **व्यवस्थापयितुकामः सौगतः एका[न्ते]न** अवश्यंभावेन **अविकल्प एव** परामर्शशून्य ए[व] । यदि वा ईषदसिद्धोन्मेषोऽयम् **इत्येवम् अलं** पर्याप्तम् **अतिप्रसङ्गेन** । ततो **निराकारावबोधेन** इत्यादि स्थितम् । § 653

/ms निर्विकल्पदर्शनात् सजातीयस्मृतौ न केवलमनुभवस्य ग्राह्याकारवैकल्यम् अपि तु तस्यापि इति दर्शयन्नाह--**सर्वतः** इत्यादि । § 654

...11 सर्वतः सर्वेण सर्वं विलक्षणमलक्षयन् ।
बोधात्मा चेत्स्मृतेर्हेतुः सन्निकर्षस्तथा न किम् ॥
११ ॥§ 656

वस्तुस्वभावत एव समनन्तरप्रत्ययोऽवग्रहादिमतिः स्वयम् इन्द्रियार्थसन्निकर्षविशिष्टः स्मृत्यादिव्यवहारहेतुः, सामग्रीविशेषात् वासनाप्रबोधवैशद्यसंभवात् स्वप्नादिवत् । तदयं स्पष्टावितथस्वग्राह्यविशेषान्वयप्रतिभासवासनाप्रबोधश्च साक्षात् दर्शननिमित्तो भवन् अनेकान्ततत्त्वं प्रतिष्ठापयति । § 657

**सर्वतः** सजातीयाद् विजातीयाच्च **सर्वेण** नीलादिप्रकारेण इव सदादिप्रकारेणापि **सर्वं** स्वविषयाभिमतमशेषं **विलक्षणं** व्यावृत्तरूपम् **अलक्षयन्** अनिश्चिन्वन् । कोऽसौ ? **बोधात्मा** निर्विकल्पो बोधः **स्मृतेः** स्मरणस्य **हेतुः चेद्** यदि **सन्निकर्षः** इन्द्रियार्थसंप्रयोगः **तथा** तेन वस्तुस्वभावप्रकारेण **न किं** स्मृतिहेतुः ? स्यादेव । तथा च अनुभववैकल्यं तथा तदलक्षयः नास्य ततः चेतनत्वकृतो विशेष इति मन्यते । § 658

---

२ त] ब्रह्मसिद्धिः ।
२ नः] विभ्रमवादिनाम् ।
१२ या] चेतनेतररूपानर्थानिव **इदन्तया**
२९ ल्यं] फल्यं
२९ यः] क्षयतो
३० नास्य] सन्निकर्षात् ।

कारिकायाः सुगमत्वाद् व्याख्यानमकृत्वा प्रकृतमर्थमुपसंहरन्नाह--**वस्तुस्वभावत एव** न सारूप्यादेः इति एवकारार्थः, **समनन्तरप्रत्ययः**--समः ज्ञानत्वेन अनन्तरः उपादानत्वेन प्रत्ययः **अवग्रहादिमतिः** बोधः, कथम्भूतः ? 143/mkj इत्यत्राह--**स्वयम्** इत्यादि । **स्वयम्** आत्मना न सांख्यस्य इव पारम्पर्येण **इन्द्रियार्थसन्निकर्षविशिष्टः** स्वव्यापारे नोत्पत्तौ इति चिन्तितम् । ततः तदविशिष्टोमानसाध्यक्षप्रत्ययपरित्यागः **स्मृत्यादिव्यवहारहेतुः** स्मृतिः आदिर्यस्य प्रत्यभिज्ञानादेः स एव तेन वा व्यवहारस्य हेतुः । § 659

स्यान्मतम्--अवग्रहादिप्रत्ययः सामान्यविशेषात्मवस्तुविषयत्वेन सविकल्पक इति वैशद्यविरहात् कथं तद्विशिष्ट इति ? तत्राह--**सामग्री** इत्यादि । सामग्र्या इन्द्रियार्थसन्निकर्षादिलक्षणायाः **विशेषात्** हेतोः **वासनाप्रबोधवैशद्यसंभवात्** तद्विशिष्ट इति सम्बन्धः । अत्र दृष्टान्तमाह--**स्वप्नादिवत्** इति । आदिशब्देन कामशोकादिविप्लवपरिग्रहः । स्यादेतत्--वासनानिमित्तत्वेन प्रत्ययस्य स्वप्नादिवद् भ्रान्तता स्यात् इति; तत्राह--**तदयम्** इत्यादि । **तत्** तस्मात् इन्द्रियार्थसन्निकर्षादिसामग्रीविशेषाद् **अयम्** अवग्रहादिप्रत्ययाभिधानः **अवितथोऽभ्रान्तः स्पष्टो** विशदः **स्वस्य ग्राह्यो विशषान्वयौ** भेदाभेदौ तयोः **प्रतिभासः** यस्मिन् स चासौ **वासनाप्रबोधश्च** पुनः अस्य **अवितथ** इत्यादिना यसः । एतदुक्तं भवति--यद्यपि अर्थप्रत्ययो वासनातो जायते तथापि न भ्रान्तः सामग्रीविशेषादुत्पत्तेः स्वप्नादौ असंभविन इति । ननु पूर्वदर्शनाहितवासनाप्रबोधः परदर्शनात् नेन्द्रियार्थसन्निकर्षादिति चेत्; अत्राह--**साक्षात्** इत्यादि । **साक्षाद्** अव्यवधानेन **दर्शननिमित्तो भवतु** तत्प्रबोधः **अनेकान्ततत्त्वं प्रतिष्ठापयति** अनेकान्तदर्शनाद् अपरस्य दर्शनस्य तन्निमित्तस्य अभावादिति भावः । § 660

/ms

एतदेव दर्शयन्नाह--**न पश्यामः** इत्यादि । § 661

...12 न पश्यामः क्वचित् किञ्चित् सामान्यं वा स्वलक्षणम् ।
जात्यन्तरं तु पश्यामः ततोऽनेकान्तहेतवः ॥ १२ ॥ § 663

यथोक्तं स्वलक्षणं सामान्यलक्षणं वा न क्वचित् कदाचित् पश्यामः प्रत्यक्षे वर्णसंस्थादिविचित्रमन्वयिनमुपलक्षयामः । स्वपरप्रतिबोधं प्रत्यक्षं कथञ्चिद-

५ त] इन्द्रियार्थसन्निकर्षरहित ।
६ विशिष्टो] ष्ट
९ द्विशिष्ट] इन्द्रियार्थसन्निकर्षविशिष्टः ।
१५ ग्राह्यो] ह्यौ
१७ सः] कर्मधारयसमासः ।
१९ नात्] भवति ।
२० द] दर्शनं निमित्तं यस्य ।
२० तु] न्
२२ त] वासनाप्रबोधकारणभूतस्य ।

प्रमाणयन् प्रमाणान्तरं कथमवतिष्ठेत ? स्वतः सिद्धस्य कस्यचिदन्यथानुपपत्तिवितर्कात् परोक्षार्थप्रतिपत्तिरनुमानं न पुनरनुपपन्नम् । प्रत्यक्षस्य आत्मनि परत्र वा कथञ्चित् परमार्थसिद्धौ कथं तन्मिथ्यैकान्तं अन्यानपेक्ष्यं साधयेत् यतोऽयं यथादर्शनमेव मानमेयफलस्थितिः क्रियते न पुनर्यथातत्त्वमिति ब्रूयात् । यथेहितं प्रमाणातीतं परमात्मतत्त्वमन्यथा वा कथयतः परस्यापि न वक्त्रं वक्रीभवति यतः स्वलक्षणान्येव यथालक्षणं सिध्येयुः । § 664

**न पश्यामः क्वचिद्** बहिरन्तर्वा **किञ्चित्** परमपरं वा व्यक्तिभ्यो भिन्नं तद्रहितं वा **सामान्यं वा**शब्दो भिन्नप्रक्रमः **स्वलक्षणम्** इत्यस्य अनन्तरं द्र-
/ms ष्टव्यः । ततः स्वलक्षणं वा न पश्यामः । **किञ्चित्** कल्पितं परमार्थरूपं वा । इवार्थो वा, सामान्यमिव स्वलक्षणं न पश्यामः । यथान्यासं भिन्नप्रक्रमो
144/mkj वा । किं तर्हि पश्यथ ? इत्यत्राह--**जात्य न्तरं तु** अनेकान्तं पुनः **पश्यामः** । अनेन तदेकान्ताभावसाधने विरुद्धोपलब्धिं दर्शयति । न केवलमध्यकृमेव नैकान्तजातं परितोषम्, अपि तु सर्वलिङ्गमपि इति दर्शयन्नाह--**तत** इत्यादि । **ततः** तस्मात्यायद् [तस्मान्न्यायाद्] **अनेकान्तस्य हेतवः** सर्वेऽपि सम्बन्धिनः इति वाक्यशेषः । § 665

कारिकार्थं प्रकटयन्नाह--**यथोक्तम्** इत्यादि । **यथा** येन प्रकारेण सौगतेन **स्वलक्षणं** नैयायिकादिना **सामान्यलक्षणं च** उक्तं **कदाचिद्** व्यवहारदशायां परमार्थदशायां वा **क्वचित् न पश्यामः** ? कुत एतत् ? इत्यत्राह--**प्रत्यक्ष** इत्यादि । एतदपि कुतः ? इत्यत्राह--**वर्ण** इत्यादि । **वर्णो** नीलादिः **संस्थानं** वर्तुलत्वादि **आदि**शब्दः प्रत्येकमभिसम्बध्यते तेन [एकत्र] रसादेः अन्यत्र नव-पुराणादिभेदस्य परिग्रहः तेन **विचित्रं** शबलम् । कथंभूतम् ? **अन्वयिनम् उपलक्षयामो** यत इति । वनादिवत्प्रत्ययवत् भ्रान्तं तदुपलक्षणमिति चेत्; अत्राह--**स्वपर** इत्यादि । **स्वपरयोः प्रतिबोधः** ग्रहणं येन यस्मिन् वा तत्तथोक्तम् । किं तद् ? इत्याह **प्रत्यक्षम्** । **कथञ्चित्** केनापि प्रत्यक्षप्रकारेण अनुमानप्रकारेण वा **अप्रमाणयन्** अप्र-
/ms माणं कुर्वन् कथयन् वा **प्रमाणान्तरम्** अस्मात् प्रत्यक्षप्रमाणात् अन्यद् अविकल्पदर्शनम् अनुमानं च तदन्तरं **कथं** नैव **अवतिष्ठेत** प्रतिष्ठापयेत् सौगतः । **श्रदः प्रतिष्ठायाम्** इति दविधिः । ननु उक्तन्यायात् यद्यपि दर्शनं नावतिष्ठेत अनुमानं सविकल्पकमातिष्ठेत इति चेत्; अत्राह--**स्वत** इत्यादि । **स्वतो** न साधानान्तरात् **कस्यचित्** कार्यस्य इतरस्य वा **लिङ्गस्य सिद्धस्य** निश्चितस्य यः **अन्यथानुपपत्तिवितर्कः तस्मात् परोक्षार्थप्रतिपत्तिः अनुमानं** त पुनः अनुमानम**नुपपन्नम् प्रत्यक्षस्य आत्मनि** स्वस्वरूपे **परत्र वा** धर्मादौ **कथञ्चित्** सदादिरूपेण न क्षणभङ्गप्रकारेण **परमार्थमि** क्रियमाणायाम्

१३ कृ] ध्यक्ष
१३ नैकान्त] अनेकान्तं पश्यतीति
२२ त्] वत् इति निरर्थकं भाति, वनादिप्रत्ययो यथा भ्रान्तः केवलं समूहालम्बनः वृक्षादिव्यतिरेकेण वनस्य स्वतन्त्रस्याभावात् ।
३२ त] न
३३ मि] सिद्धौ

**अन्यानपेक्ष्याम**न्तरेण, चर्चितमेतत्--**सिद्धं यन्न परापेक्ष्यम्** सिद्धिवि० १। २३ इत्यादिना। **कथं नैव तन्मिथ्यैकान्तं** प्रत्यक्षविभ्रमैकान्तं **साधयेत् ?** नहि स्वयमनुपपन्नम् अन्यद् व्यवस्थापयति अतिप्रसङ्गात् **यतः** तत्साधनादयं **सौगतः**-- § 666

*(?")यथादर्शनमेव मानमेयफलस्थितिः।
क्रियते प्र० वा० २। ३५७ § 668

**न पुनर्यथातत्त्वमा क्रियते इति** एवं **ब्रूयात् इति**। ननु व्यवहारिणापि न भावतोऽनुमानमस्ति। यदि पुनः अविचारितरमणीयं तेन व्यवहारप्रसिद्ध्यर्थं तदाश्रीयते तर्हि मयापि तथैवेति न दोष इति चेत्; अत्राह--**यथेहितम्** इत्यादि। ईहितस्य स्वेच्छाविषयीकृतस्य अनतिक्रमेण **यथेहितम्** **प्रमाणातीतम्** अप्रमाणम् **परमात्मतत्त्वं** ब्रह्मतत्त्वम् **अन्यथा वा** प्रधानादिप्रकारेण वा **कथयतो** वचनमात्रेण प्रतिपादयतः **परस्यापि पुरुषाद्यद्वैतवादिनोऽपि**। न केवलं सौगतस्य **न वक्त्रं वक्रीभवति**। एतदुक्तं भवति--यथा[ऽ]प्रमाणकं विभ्रममात्रं परप्रसिद्धादप्रमाणात् अनुमानात् सौगतस्य सिध्यति परमार्थतः तथा परस्यापि व्यवहारिप्रसिद्धवचनादेः पुरुषाद्यद्वैतादि सिध्यति। न खलु व्यवहारी वचनेनापि विना जीवितुं क्षणमते इति निवेदयिष्यते। **यतो** वक्त्रस्य वक्रीभावात् **स्वलक्षणान्येव** नान्यत् **यथालक्षणं सिध्येयुः**। **यतः** इति वा आक्षेपे नैव सिध्येयुरिति। § 669 /ms 145/mkj

एतेन भ्रान्तेतरविवेकैकान्तं कथं साधयेत् इति प्रत्येयम्। प्रतिभासात् इति चेत्; अत्राह--**यथेहितम्** इत्यादि। अत्रायमभिप्रायः--यथा विभ्रमेतराकारशून्यं स्वसंवेदनमात्रं प्रतिभासात् सिध्यति तथा प्रमाणातीतमन्यथा वा सप्रमाणं वा पुरुषादितत्त्वं सिध्यति। शेषं पूर्ववत्। तदनन्तरोक्तं स्वपरप्रतिबोधं प्रत्यक्षं प्रमाणयितव्यम्। § 670

तद्यरित्रैक ज्ञानप्रसादाद् अवग्रहाद्यात्मकमेकं प्रसाध्य अधुना अन्यथा साधयन्नाह--**फलानुमेय** इत्यादि। § 671

...13 फलानुमेयशक्त्यात्म भेदेहात्मना च किम्।
स्वार्थसंवित्प्रत्यक्षं नैकं सह क्रमेण वा ॥ १३ ॥§ 673

---

१ माणायाम्] **क्ष्यम्** अपेक्षाम
५ मेव] मेवेयं
६ ते] अविद्यमानापि ग्राह्यग्राहकसंविदाम् इति शेषः।
७ मा] त्त्वं
७ न] ननु इति वितर्के।
८ हारिणापि] णोऽपि
८ न] परमार्थतः।
९ त] अनुमानं स्वीक्रियते।
१२ पुरु] ब्रह्मवादिनः सांख्यस्य वा।
१६ ते] क्षमते
२४ रित्रैक] तद्यित्रैक

स्वार्थलक्षणप्रत्यक्षं स्वलक्षणं स्वफलानुमेयसामर्थ्यात्मकं यद्येकं स्यात् सन्निहितार्थसामान्यविशेषावग्रहेहार्थात्मकमेकं कथन्न भवेत् ? यतो विशेषदर्शनादेव तद्विपरीततत्त्वारोपव्यवच्छेदस्मृतिः कल्प्येत । परस्परविरोधस्वभावे कत्वसिद्धौ सहक्रमाभ्यां विचित्रविवर्तपरमार्थैकस्वभावभावप्रतिपत्तेरप्रतिषेधात् । तदेतद्...कथञ्चित्तादात्म्यादवग्रहादीनाम् । शक्तिशक्तिमतोर्भेदे सम्बन्धासिद्धेः, अभेदैकान्ते व्यक्तिव्यक्त्या व्यक्तिः परोक्षेव शक्तिवत् प्रसज्येत । संवृतेरपराधोऽयम् यदिमां संवृणोति पारिमण्डल्यादिवदिति शक्तेः संवृतिरियं शक्तिमसंवृण्वन्ती तदनेकान्तत्वं प्रसाधयति । तदयं समारोपः प्रत्यक्षे क्षणिकपारिमण्डल्यादौ भवन् एकान्तकल्पनामस्तं गमयति । प्रत्यक्षस्य नीलादिसमारोपविवेकस्यैव व्यवसायात्मकत्वात् । दृष्टे...स्वलक्षण...

§ 674

**स्वशब्देन** एकान्तवादी गृह्यते तस्यायेर्थाया **स्वसंविदः** तासां सम्बन्धि यत् **प्रत्यक्षं** प्रत्यक्षपरिच्छेद्यम् । [कथं] भूतम् ? इत्याह--**फल** इत्यादि । **फलेन अनुमेया १२३ क १ शक्तिः आत्मा** स्वभावो यस्य तत्तथोक्तं **सह वा** युगपदिव **तत्प्रत्यक्षं क्रमेणैकं किं** न स्यादेव । केन ? इत्यत्राह--**भेदेहात्मना** । **भेदस्य** विशेषस्य **ईहा** तद्ग्राह्योऽर्थपर्यायः तथोच्यते ज्ञानपर्यायविशेषश्च, सैव **आत्मा** स्वभावः तेन, **च** शब्दाद् अवग्रहावायाद्यात्मना किन्न स्यात् इत्यर्थः प्रतिपाद्यः । § 675

कारिकां विवृण्वन्नाह--**स्वार्थ** इत्यादि । **स्व**शब्दः पूर्ववद् व्याख्येयः । तस्य **अर्थरेव लक्षणम्** अर्थस्वरूपं यत् **प्रत्यक्षं स्वलक्षणं** स्वस्वरूपं यत् **प्रत्यक्षं** प्रत्यक्षप्रमाणप्रमितं तत् **स्वफलानुमेयसामर्थ्यात्मकं** स्वम् आत्मीयं यत् फलं
146/mkj तेन अनुमेयं यत् सामर्थ्यम् तदात्मकम् । आत्मशब्देन सामर्थ्यस्य तद्वतो भेदैकान्तं निरस्यति, तत्र तदयोगात् । न खलु ततो भिन्नं सामर्थ्यं युक्तम्, भावस्य तन्निष्ठत्वाद् अन्यथा सर्वं सर्वस्य तत् स्यात्, समवायस्य निषेधात् सर्वत्राऽविशेषाच्च । अथ तदविशेषेऽपि किञ्चित् कस्यचित् सामर्थ्यम् । कुत एतत् ? चित्रत्वाद् भावशक्तीनमिति चेत्; किं पुनः तद्वतः तस्य च अन्याः पृथग्भूताः शक्तयः सन्ति येनैवम् ? [तथा चेत्] स एव दोषः अनवस्था वा । अपृथग्भूताश्चेत्; तथा आद्यं सामर्थ्यम् इति साधूक्तम्--**तदात्मक**मिति ।

§ 676

ननु फलानुमेयसामर्थ्यात्मकम् इत्येवास्तु किं **स्वशब्देन** लोकवत्तरेणापि तदर्थगतेः । न खलु लोको धूमादग्निं प्रतिपद्यमानमेवं वदति

१२ या] तस्मै अर्था याः
१६ त] ईहा इत्युच्यते ।
२० रेव] एव
२२ त] सामर्थ्यवतो द्रव्यात् ।
२३ त] भेदैकान्ते सामर्थ्य-सामर्थ्यवद्भावाऽयोगात् ।
२४ त] सामर्थ्यस्वरूपत्वात् ।
२४ अ] भेदेऽपि तस्येति स्वीकारे ।
२५ स] नित्यत्वात् व्यापकत्वादेकत्वाच्च सर्वं प्रति समानः समवाय इति भावः ।
२५ त] भेदाविशेषेऽपि ।
२५ किञ्चित्] क्वचित्
२८ म्] इष्यताम् ।
३१ रेणापि] वत्तदन्तरेणा[[स्वशब्दं विनापि ।]]पि

पावकोऽत्र स्वधूमात् इति चेत्; उच्यते--१२३ ख १ अन्यमतनिषेधार्थत्वाददोषः । अनेकशक्त्यात्मकस्य भावस्य अनेकं फलं तस्माद् एकशक्त्यात्मकभवानुमानम् *इत्यन्येषां दर्शनम्; तन्निषेधार्थं स्ववचनमिति । **यदि एकं स्यात्** भवेत् । अत्रोत्तरम्--**सन्निहित** इत्यादि । **सन्निहितोऽर्थो** घटादिः तस्य **सामान्यविशेषौ** तावेवाग्रहेतयोर्थातयोर्थं **तदात्मकमेकं कथन्न भवेत् ?** स्यादेव । उपलक्षणमेतत्, अवायाद्यात्मकमपि भवेत् । **यतः** तदभवनात् **विशेषदर्शनादेव** दर्शनम् आश्रित्यैव **कल्प्येत** । किम् ? इत्याह--**तद्** इत्यादि । तेषु विशेषेषु **विपरीतस्यैव [त]त्त्वस्य आरोपः तस्य व्यवच्छेदस्मृतिः** क्षणिकत्वानुमा नैव कल्प्येत, **यत** इत्यस्य आक्षेपार्थत्वात्, तद्विपरीतज्ञानस्य समारोपत्वासिद्धेरिति भावः । कुत एतत् ? इत्यत्राह— **परस्पर** इत्यादि । **परस्परम्** अन्योन्यं **विरोधो** ययोः प्रत्यक्षानुमेययोः **स्वभावयोः एकत्वस्य** तादात्म्यस्य **सिद्धौ सहक्रमाभ्यां विचित्रविवर्तपरमार्थैकस्वभावभावप्रतिपत्तेरप्रतिषेधात्** । ततो निराकृतमेतत्-- § 677

*नो चेद् भ्रान्तिनिमित्तेन प्र० वा० ३ । ४३ इत्यादि । § 678

उपसंहारार्थमाह--**तदेतद्** इत्यादि । सुगमम् । कुत एतत् ? इत्यत्राह--**कथञ्चित्तादात्म्याद्** एकत्वाद् **अवग्रहादीनाम्** । ननु शक्ति-शक्तिमतोर्भेदैकान्तनिषेधे अभेद एव इति न *पक्षान्तरसंभव इति न युक्तं **फलानुमेय** इत्यादि इति चेत्; अत्राह--**शक्तिशक्तिमतोः भेदे** नैयायिकोपगते या १२३ क २ **सम्बन्धासिद्धिः** तस्याः सकाशात् यः सौगतेन तयोः **अभेदैकान्तो**ऽभ्युपगतः **तस्मिन्** सति **व्यक्तिः** चेतनस्य इतरस्य वा **व्यक्त्या** बुद्ध्या विषयीक्रियमाणे स्वभावे **व्यक्तिः परोक्षेव** अदृश्यैव **शक्तिवत् प्रसज्येत** । तथा च सर्वभावव्यवहारविलोप इति मन्यते । तथा प्रत्यक्षैव शक्तिः व्यक्तिवत् प्रसज्येत । ततः **हेतुना यः समग्रेण** प्र० वा० ३ । ६ इत्यादि 147/mkj । **द्विष्ठसम्बन्धसंवित्तिः** प्र० वार्तिकाल० १ । १ इत्यादि च प्लवते । § 679

अत्र परमतमाशङ्कते--शक्तेः प्रत्यक्षत्वेऽपि **संवृतेः** विपरीतकल्पनायाम् **अयमपराधो** दोषः **यद्** यस्माद् **इमां** शक्तिं **संवृणोति पारिमण्डल्यादिवत्** । अत्र **आदिशब्देन** क्षणिकत्वादिपरिग्रहः **इति** एवं चेत्; अत्राह--**शक्तेः** इत्यादि । **शक्तिः संवृतिः** संवरणम् **इयं** परेण उच्यमाना । किं क-

---

३ भ] भवस्य शिवस्यानुमानम् ।
३ *] नैयायिकानां दर्शनम् ।
५ योर्थं] तावेव **अवग्रहेहयोरर्थौ**
१४ भ्रान्तिनिमित्तेन] संयोज्येत गुणान्तरम् । शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात् ॥ इति शेषः ।
१७ *] भेदाभेदवाद ।
२० क्तिः] क्तेः
२३ यः] कार्योपादोऽनुमीयते । अर्थान्तरानपेक्षत्वात् स स्वभावोऽनुवर्णितः ॥ इति शेषः ।
२४ इ] नैकरूपप्रवेनात् । द्वयोः स्वरूपग्रहणे सति सम्बन्धवेदनम् ॥ इति शेषः ।
२५ नायाम्] याः
२८ क्तिः] क्तेः

रोति ? इत्याह--**तस्य** अनन्तरस्य **अनेकान्तत्वं प्रसाधयति** । **किं** कुर्वती ? इत्याह--**शक्तिमसंवृण्वन्ती** । तदेवं निश्चितेतरत्वेन गृहीतेतरं रूपं स्यात् इत्यर्थः । दृष्टान्तं दूषयन्नाह--**पारिमण्डल्ये** [त्या] दि । परोपहसनपरमेतत् । उपसंहारार्थमाह--**तद्** इत्यादि । यत एवं **तत्** तस्मात् **अयं समारोपः** विपरीतारोपः **प्रत्यक्षे** दर्शनगोचरे **क्षणिकपारिमण्डल्यादौ भवन्** नीलाभावन्ते **कान्तकल्पनाम् अस्तंगमयति,** अनेकान्तसिद्धेरिति मन्यते । § 680

ननु स्यादयंदोषो यदि समारोपविवेकव[त्] निश्चितं गृहीतमन्पश्यन्न-लैवम् अन्यथाप्यदोषात् इति चेत्; अत्राह--**प्रत्यक्षस्य** इत्यादि । १२३ ख २ **प्रत्यक्षस्य नीलादौ** न क्षणिकत्वादौ **समारोपस्य** अनीलाद्यारोपस्य **विवेको** यस्मिन् येन वा **तस्यैव** नान्यस्य **व्यवसायात्मकत्वाद्** व्यवसितस्यैव प्रत्यक्षत्वात् इत्यहिप्रपात्ताम् **अस्तंगमयति** इति स्तम्बन्धः । § 681

ननु प्रत्यक्षाद् व्यवसायोद्भवः, तत्र कथं तत्तदात्मकमिति चेत्; अत्राह--**दृष्टेः** इत्यादि । चिन्तितमेतत् प्रथमप्रस्तावे । इतरश्च न दृष्टेरविकल्पिकायाः विकल्प इति दर्शयन्नाह— **स्वलक्षण** इत्यादि । एतदपि तत्रैव निरूपितम् । § 682

एवमवग्रहमीहां च व्यवस्थाप्य अवायं व्यवस्थापयन्नाह--**तत्स्वार्थ** इत्यादि । § 683

...14 तत्स्वार्थाऽवाय एवायमन्यापोहः कथंचन ।
अविकल्पकदृष्टेः स्यान्न विकल्पमनो यतः ॥ १४ ॥§ 685

न ह्यन्यतः स्वार्थमव्यवच्छिन्दत् प्रत्यक्षं परिच्छिनत्ति, नापि कथञ्चिदपरिच्छिन्ददेव व्यवच्छिनत्ति सर्वथा अर्थस्वभावासिद्धिप्रसङ्गात् । निर्विकल्पेन गृहीतस्यागृहीतकल्पतया विकल्पबुद्धेर्निर्विषयत्वाच्च । न च [ततो विकल्प-संभवः] ततो वर्णसंस्थानादिविकल्पोऽपि मा भूत । कथमेवं न सुप्तायितम्, कथञ्चात्यन्तमसदृशात्मकं पूर्वापरपरामर्शशून्यमलक्ष्यं निममेन सदृशविकल्पं वन्ध्यासुतदर्शनमिव योजयेत् ? यतो विकल्पानां कुतश्चिदविसंवादः सम्बन्धासिद्धेः । तन्नासाधारणैकान्ते प्रमाणप्रमेयफलव्यवस्था साधारणैकान्तवत् । § 686

**तद्** इति निपातः स इत्यस्य अर्थे द्रष्टव्यः । स एव उपगतोऽयं निरूप्यमाणः । **एवकारो** भिन्नप्रक्रमः **अन्यापोह** इत्यस्याऽनन्तरं द्रष्टव्यः, ततोऽन्यो विजातीयः अपोह्यते स्वविषयाद् भिन्नो व्यवस्थाप्यते येन व्यव-

६ न्ते] भवन् न नीलादावित्ये
८ म्] गृहीतं पश्येत् न चैवम्
११ पात्ताम्] इत्यतिप्रसङ्गात् ताम्
१२ क्षाद्] व्यवसायो विकल्पः संजायते, न तु स्वयं तन्निश्चयात्मकम् ।
१३ श्च] च्च

सायेन सोऽ**न्यापोह एव स्वार्थाऽवायो** जैनाभिमतः । यदि वा, यथान्यास- 148/mkj
मेव **एव**कारोऽस्तु तदवाय एव अन्यापोहो नान्य इत्यर्थः । कुत एतत् ? इत्यत्राह--**कथंचन** इत्यादि । **कथंचन** केनापि स्वयम् उपादानत्वप्रकारेण विकल्पवासनाप्रबोधप्रकारेण वा । **अविकल्पकदृष्टेः** अविकल्पदर्शनात् **स्यात्** भवेत् **न विकल्पमनो यतः** । एतदुक्तं भवति--यदि तदवाय एव अन्यापोहः अयमेव वा तदवायो न भवेत् किन्तु अन्य एव दर्शनजनितो मानसो विकल्पः; तर्हि तदभाव एव स्यात् इति । तथाहि--यदि तद्दृष्टिः कदाचिद् उपलम्भगोचरचारिणी युक्तमेतत्--**यतो विकल्पमनः** इति, /ms
नान्यथा अतिप्रसङ्गात् । न चैवमिति चिन्तितम् । § 687

व्यतिरेकमुखेन कारिकां व्याख्यातुमाह--**नहि** इत्यादि । **हि** इति यस्मादर्थे । यस्मात् **नान्यतो**ऽविवक्षितात् **स्वार्थं** स्वम् अर्थश्च **अव्यवच्छिन्दत्** ततो भिन्नमविषयीकुर्वत् **प्रत्यक्षं परिच्छिनत्ति** विषयीकरोति स्वार्थं नाम किन्तु व्यवच्छिन्ददेव । अनेन स्वार्थावाय एव अन्यापोह इति व्याख्यातम् । **नापि स्वार्थं कथञ्चित्** सचेतननीलादिप्रकारेण **अपरिच्छिन्ददेव [व्यवच्छिनत्ति]** अनेन अन्यापोह एव तदवाय इति दर्शितम् । कुत एतत् ? इत्यत्राह--**सर्वथा** इत्यादि । सर्वेण अन्यतो व्यवच्छिन्दता तत्परिच्छिन्नत्य नेन कथञ्चित् पन च्छिन्दत् व्यवच्छिनत्ति नाम इत्यनेन वा प्रकारेण **अर्थस्वभावाऽसिद्धिप्रसङ्गात्** । **नहि** इत्यादि । एतदपि कुतः ? इत्याह--**निर्विकल्प** इत्यादि । अन्यव्यवच्छेदविकल्पात् निष्क्रान्तेन **गृहीत[स्य अगृहीत] कल्पनया** हेतुभूतया **विकल्पबुद्धेः** अन्यव्यवच्छेदविकल्पस्य **निर्विषयत्वाच्च** । स्वार्थव्यवसायजननात् [नि]र्विकल्पकमेव अर्थस्वभावग्राहकमिति चेत्; अत्राह--**नच** इत्यादि [नच तनिर्विकल्पात् ।तो विकल्पसंभवः] § 688

ननु माभूत् क्षणिकादिविषयत्ततस्तत्रन्नीलादिविषयं त्तस्यात् इति चेत्; अत्राह--**ततो वर्ण** इत्यादि । **ततो** निर्विकल्पकदर्शनात् न केवलं क्षणिकत्वादिविकल्पः किन्तु **वर्णसंस्थानादिविकल्पोऽपि मा भूत्,** एकस्य स्वविषये *तज्जनकेतररूपासंभवादिति भावः । इदमपरं व्याख्यानम्--**ततो** मान- /ms
सतज्ज्ञानयोगाद् **वर्णेन** लिङ्गेन **संस्थानादिविकल्पः** तदनुमानमपि **मा भूत्,** दर्शनमात्रविषयीकृतस्य लिङ्गस्य तदकारणत्वात् । अत्रापि पूर्वो दृष्टान्तः संबंधते । तन्न युक्तम्-- § 689

---

६ त] स्वार्थावायः ।
८ त] निर्विकल्पकदृष्टिः ।
११ श्च] श्व
१५ त] स्वार्थावायः ।
१७ त्य] नत्तीत्य
१७ न] परि
१९ निष्क्रान्तेन] निर्विकल्पेन ।
२० त्वाच्च] विकल्पस्य अवस्तुभूतसामान्यविषयत्वात् ।
२३ स्यात्] विषयात्ततः[[निर्विकल्पात् ।]] [[विकल्पः ।]]सः नीलादिविषयात्तु[[निर्विकल्पात् ।]] स्यात्
२५ स्य] निर्विकल्पस्य ।
२६ *] नीले विकल्पजनकत्वं क्षणिकांशे तदजनकत्वमिति रूपद्वयासम्भवादिति भावः ।
२८ स्य] अनुमानहेतुत्वाभावात् ।
२९ तै] सम्बध्यते

> *ममैवं प्रतिभासो यः न स संस्थानवर्जितः । प्र° वार्तिकाल २ । १ इत्यादि ।§ 690

ततः किं जातम् ? इत्याह--**कथम्** इत्यादि । **एवम्** अनन्तरप्रकारेण सति दोषे **कथं न सुप्तायितम्** ? अत्रैव दूषणान्तरमाह--**कथम्** इत्यादि । **कथं च अत्यन्तं** सर्वात्मना **असदृशात्मकं** विलक्षणं कारणविषयस्वभावादिना
149/mkj **विकल्पदर्शनम्** इति विभक्तिपरिणामेन सम्बन्धः **सदृशविकल्पं नियमेन** अवश्यंभावेन **योजयेत्** अन्यथा नीलज्ञानं पीतविकल्पं योजयेत् अविशेषात् । कथम्भूतं तत् ? इत्याह--**पूर्वापरपरामर्शशून्यं** पूर्वः कारणक्षणः अपरः कार्यक्षणः तयोः परामर्शो विषयीकरणम् तेन शून्यम् । एतदुक्तं भवति--यदा तद्दर्शनं पूर्वापरयोर्न प्रवर्त्तते तदा तद्गतं सादृश्यं न विषयीकरोति तत्कथं तत्र स्मृतिहेतुः ? अननुभूते तदयोगात् । इतरथा वर्त्तमाने वृत्तिमदिन्द्रियं तत्र दर्शनकारणं स्यात् इति न युक्तमेतत्-- § 691

> *वर्त्तमाने सदाक्षाणां वृत्तिर्नातीतभाविनि ।
> तदाश्रितं कथं ज्ञानं वर्ततातीतभाविनि ॥ प्र° वार्तिकाल ३ । १२६ इति ।§ 693

/ms अथ पूर्वस्मरणसहायमपरदर्शनं तद्विकल्पेन योजयेत्, एवमपि पूर्वमात्रस्मृतिः स्यात् नापरसदृशे सादृश्याऽननुभवात् । तथापि तत्कल्पने परिमलस्मरणसहायं चक्षुः गन्धे ज्ञानमुपजनयेत् । अविषयत्वमुभयत्र समानम् । यदि पुनः पूर्वापरदर्शनाभ्यां तदभेदेन व्यवस्थितं सादृश्यं प्रतिपन्नमेव केवलं पूर्वस्मरणसहायादुत्तरदर्शनात् तत्र विकल्पः स्यादिति चेत्; तर्हि तद्दर्शनाभ्यां तदभेदेन व्यवस्थितमेकत्वं प्रतिपन्नमेव केवलं पूर्वस्मरणसहायादपरदर्शनात् तत्र एकत्वज्ञानं स्यात् । न चैवं परेण इष्यते । तन्न परस्य सदृशविकल्पं तद् योजयेदिति स्थितम् । पुनरपि कथंभूतम् ? इत्याह--**अलक्ष्यमिति** । निरंशपरमाणुरूपतया सन्तानान्तरवदभावेन सन्देहेन वा **अनध्यवशेयंयमने** **बन्ध्यासुतदर्शनमिव** तत्र **कथं योजयेदिति** दर्शयति । **यतो** योजनाद् **विकल्पानाम्** अयगविनामन्यथा व्यवसायिनां **कुतश्चित्** परम्परया स्खल-

---

१ इ] एवमन्यत्र दृष्टत्वात् अनुमानं तथा सति । इति शेषः ।
५ वि] निर्वि
६ अविशेषात्] भिन्नत्वाविशेषात् ।
९ त] पूर्वापरगतम् ।
१० त] स्मरणाभावात् ।
११ त] अतीतानागतादौ ।
१२ व] योग्यदेशस्थितेऽक्षाणां वृत्तिर्नातीतभाविनि । तदाश्रितं च विज्ञानं न कालान्तरभाविनि ॥--प्र° वार्तिकाल° । उद्धृतोऽयम्--न्यायवि° वि° प्र° पृ° १४२ ।
१४ त] पूर्वापरसदृशविकल्पेन ।
१५ दृशे] स्मृतिः स्यात् ।
१७ त] पूर्वापरतादात्म्येन ।
१८ ल्पः] सदृशोऽयमिति विकल्पः ।
१८ नाभ्यां] पूर्वापरतादात्म्येन ।
२० रेण] बौद्धेन ।
२० स्य] बौद्धस्य ।
२३ ने] **अलक्ष्य**मनध्यवसेयं **नियमेन**
२४ था] अयं गौरित्यादि

क्षणादुत्पत्तेः **अविसंवादः** । कुत इति चेत् ? अत्राह— **सम्बन्धाऽसिद्धेः** इति । एतदुक्तं भवति--यदि परस्य स्वलक्षणात् तद्दर्शनाद्वा विकल्पानामुत्पत्तिः स्यात् तदा तत्र सम्बन्धसिद्धेः अविसंवादः स्यात् । न चैवमिति । उपसंहारार्थमाह--**तन्न** इत्यादि । यत एवं **तत्** तस्मात् **न असाधारणैकान्ते प्रमाणप्रमेयफलव्यवस्था** । दृष्टान्तमाह— **साधारणैकान्तवत्** इति । § 694

**प्रमाणस्य फलं साक्षात् सिद्धिःस्वार्थविनिश्चयः** ।सिद्धिवि० १ । ३ /ms
इत्यनेन प्रमाणस्य अक्रमरूपं फलं प्रतिपाद्य अधुना स्वपक्षे क्रमरूपं दर्शयन्नाह--**व्यापक** इत्यादि । § 695

...15 व्यापकावग्रहव्याप्तसमीहावायधारणाः ।
पौर्वापर्येण सम्प्राप्तप्रमाणफललक्षणाः ॥ १५ ॥§ 697

पश्यन्नयमसाधारणमेव पश्यति दर्शनात् इति परमसमञ्जसं स्थूलाकारस्य तत्र प्रतिभासात्, तद्व्यतिरेकेण स्वलक्षणानि परिस्फुटं तत्र प्रतिभासन्त इति रचितं शिलाप्लवं कः श्रद्दधीत ? नहि सञ्चिताः परमाणवः पारिमण्डल्यं 150/mkj
क्षणिकत्वं वा जहति यतोऽन्यथा प्रतिभासेरन् । तदेतत्सामान्यं व्यापकमवगृह्य विशेषं प्रतीहमानं तथाऽवयत् धारयति इति युक्ता प्रमाणफलव्यवस्थितिः । अत्रैव तद्व्यवस्थितिसम्बन्धः । पूर्वपूर्वस्य स्वविषयग्रहणानुबन्धमजहत एव उत्तरोत्तरं प्रति साधकतमत्वात् स्मार्तज्ञानवत् । यथादर्शनमेव सर्वत्र मानादिव्यवस्था न यथातत्त्वमित्येकान्ते कुतस्तत्त्वप्रतिपत्तिः ? प्रमाणान्तरस्याप्यसिद्धेः । प्रत्यक्षस्वभावत्वात् सर्वथाऽसिद्धेः § 698

**व्यापकं** सामान्यं तस्य **अवग्रहश्च व्याप्तो** विशेषः तस्य **समीहा अवायो धारणाश्च** । ताः कथंभूताः ? इत्याह--**संप्राप्त** इत्यादि । **संप्राप्तम् प्रमाणफलयोर्लक्षणं** यकाभिः ताः तथोक्ताः । कथम् ? इत्याह--**पौर्वापर्येण** । § 699

ननु स्वलक्षणमात्रस्य सर्वत्र दर्शनात् अयुक्तमेतद्--**व्यापके**त्यादि इति चेत्; अत्राह— **पश्यन्नयम्** इत्यादि । **पश्यन्नयं** सौगतः जनो वा *__असाधारणमेव__ न साधारणं **पश्यति** । कुत एतत् ? **दर्शनात्** असाधारणस्य अवलोकनात् इत्येवं **परमसमञ्जसम्** । कुत एतत् ? इत्यत्राह— **स्थूलाकारस्य** इत्यादि । नास्त्येव तत्र तस्य प्रतिभासः स्वलक्षणप्रतिभासादिति चेत्; अत्राह— **तद्व्यतिरेकेण** इत्यादि । **तद्व्यतिरेकेण** यथोक्तस्थूलाकारव्यतिरेकेण **स्वलक्षणानि परिस्फुटं** यथा भवन्ति तथा तत्र अक्षबुद्धौ **प्रतिभासन्ते इत्येवं**

---

२ दि] बौद्धस्य ।
२ त] स्वलक्षणदर्शनाद्वा ।
२५ *] स्वलक्षणम् ।
आद्यमसाधारणविषयमेव--हेतुबि०, टी० पृ०
२५ ।
२८ त्र] दर्शने ।
२८ स्य] स्थूलाकारस्य ।

**रचितं शिलाप्लवं कः श्रद्दधीत ?** यथोक्ताकारस्य तत्र प्रतिभासेऽपि एतेषां प्रतिभासकल्पने काष्ठप्लवे शिलाप्लवकल्पना स्यादिति मन्यते । अथ तान्येव
/ms सञ्चितानि तथावभासन्ते; तत्राह--**नहि** इत्यादि । **हिः** यस्मात् **न परमाणवः** चेतनेतराणवः **संता** सन्तः **पारिमण्डल्यम्** असर्वगतनिरंशत्वं **जहति क्षणिकत्वं वा** सांशाऽक्षणिकत्वप्रसङ्गादिति मन्यते । **यतः** तत्त्यागाद् **अन्यथा** अन्येन परिमण्डलक्षणिकत्वप्रकाराद्दिनेन सांशाऽक्षणिकत्वप्रकारेण **प्रतिभासेरन्** । **यत** इति वा आक्षेपे, नैव प्रतिभासेरन् । तथापि तथावभासने न किञ्चिद्विज्ञानमभ्रान्तं स्यादिति भावः । § 700

उपसंहर्तुमाह--**तदेतद्** इत्यादि । यत एवं **तत्** तस्मात् **एतत्** प्रतीयमानं प्रत्यक्षम् **अवगृह्य** । किम् ? इत्याह--**सामान्यं** द्विविधमपि, कथम्भूतम् ? **व्यापकं** स्वसकलविशेषस्वभावम्, अन्यस्य व्यापकत्वाभावात् । किं कुर्वत् किं करोति ? इत्यत्राह--**विशेषं** तद्व्याप्यभेदं **प्रति ईहमानं तथा** ईहितविशेषप्रकारेण **अवयत्** निश्चिन्वत् **धारयति** धारणीभवति **इति** एवं **युक्तं** * **प्रमाणफलव्यवस्थितिः** । § 701

अत्राह--*नैयायिकादिः--**विशेषणस्य सामान्यस्य व्यापकस्य यदा ज्ञानं**
151/mkj **प्रमाणं तदा विशेषस्य विशेष्यस्य ज्ञानं फलम्, *अस्य च प्रमाणत्वे संस्कारः फलम्** इत्यभिधानात् मदीय एव मते तद्व्यवस्थितिः; तत्राह--**अत्रैव** इति ।
/ms परीक्ष्यमाणे अस्मिन्नेव अनेकान्ते तत्त्वे **तद्व्यवस्थिति[रिति]** सम्बन्धः, अन्यत्र सामान्यादिव्यवस्थाऽभावादिति भावः । § 702

ननु च मध्यक्षणेक्षणक्षीणम् अध्यक्षं न पूर्वोत्तरक्षणौ ईक्षितुं क्षमते । नापि पूर्वापरपर्यायालोकनं मध्यक्षणमालोचते, *खण्डे वृत्तिमत् न

---

१ त्र] दर्शने ।
१ तिभासेऽपि] स्वलक्षणानाम् ।
२ अथ] परमाणुस्वलक्षणानि ।
४ संता] सञ्चिताः
६ काराद्दिनेन] राद् भिन्नेन
१० पि] तिर्यगूर्ध्वताभेदम् ।
१४ *] क्ता
१५ *] यदा सन्निकर्षः तदा ज्ञानं प्रमितिः, यदा ज्ञानं तदा हानोपादानोपेक्षाबुद्धयः फलम्...--न्यायभा° १ । १ । ३ । तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षं प्रमाणम्...प्रमितिः द्रव्यादिविषयं ज्ञानम्...अथवा सर्वेषु पदार्थेषु चतुष्टयसन्निकर्षादवितथमव्यपदेश्यं यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षं प्रमाणं...प्रमितिः गुणदोषमाध्यस्थ्यदर्शनमिति ।--प्रश° भा° पृ° १८७ । यदा निर्विकल्पकं सामान्यविशेषज्ञानं प्रमाणं तदा द्रव्यादिविषयं विशिष्टं ज्ञानं प्रमितिरित्यर्थः । यदा निर्विकल्पकं सामान्यविशेषज्ञानमपि प्रमारूपमर्थप्रतीतिरूपत्वात् तदा तदुत्पत्तावविभक्तमालोचनमात्रं प्रत्यक्षं...विशेष्यज्ञानं विशेषणज्ञानस्य फलं विशेषणज्ञानं न ज्ञानान्तरफलं...यदा निर्विकल्पकं सामान्यविशेषज्ञानं फलं तदा इन्द्रियार्थसन्निकर्षः प्रमाणम्, यदा विशेष्यज्ञानं फलं तदा सामान्यविशेषालोचनं प्रमाणमित्युक्तं तावत्...सम्प्रति हानादिबुद्धीनां फलत्वे विशेष्यज्ञानं प्रमाणमित्याह...--प्रश° कन्द° पृ° १९९ । प्रमाणफलते बुद्ध्योर्विशेषणविशेष्ययोः । यदा तदापि पूर्वोक्ता भिन्नार्थत्वनिराक्रिया ॥ विशेषणे तु बोद्धव्ये यदालोचनमात्रकम् । प्रसूते निश्चयं पश्चात्तस्य प्रामाण्यकल्पना ॥ निश्चयं तु फलं तत्र नासावालोचितो यदा । तदा नैव प्रमाणत्वं स्यादर्थानवधारणात् ॥ हानादिबुद्धिफलता प्रमाणं चेद् विशेष्यधीः । उपकारादिसंस्मृत्या व्यवायश्चेदियं फलम् ॥--मी° श्लो° प्रत्यक्ष° श्लो° ७०-७३ ।
१६ *] विशेष्यज्ञानस्य ।
२० च] मध्यक्षणावलोकनमात्रपर्यवसितम् ।
२१ *] गोविशेषे ।

मुण्डादौ वर्तते तत्कुतः तदाधारस्य सामान्यस्य तस्य तद्व्यापकस्येति चेत् ? अत्राह--**पूर्वपूर्वस्य** । **पूर्वपूर्वं** यद्विज्ञानं तस्य **तस्य उत्तरमुत्तरं** च प्रतीतिः **यज्ज्ञानं तत्प्रति साधकतमत्वात्** अव्यवधानेन जनकत्वात् पूर्वपूर्वस्य उत्तरोत्तरज्ञानपरिणामादिति भावः । कथम्भूतस्य ? **स्वविषयग्रहणानुबन्धमजहत एव** स्वविषयं गृह्णदेव विषयान्तरग्रहणाकारेण परिणमते । ततः **तदेतदि** [त्यादि]ना सम्बन्धः । अत्र दृष्टान्तमाह— **स्मार्त्तज्ञानवत्** इति । स्मृतिरेव **स्मार्त्तं ज्ञानं** तस्य इव **तद्वत्** इति । एतच्च परस्य सुप्रसिद्धम्, अन्यथा कथं काल्पनिकमपि सामान्यादिव्यवहारमारचयेत् । § 703

ननु सर्वत्र तद्व्यवस्था यथादर्शनमेव न परमार्थत इति चेत्; अत्राह--**यथा** इत्यादि । सर्वत्र अन्तर्बहिश्च महि  वा इतरमतवत् जैनमतेऽपि **यथादर्शनमेव मानादिव्यवस्था न यथातत्त्वम् इत्येवम् एकान्ते** अङ्गीक्रियमाणे **कुतो न** कुतश्चित् **तत्त्वस्य यथादर्शनमेव** प्र° वा° २ । ३५७ इत्यादि  स्वरूपस्य क्षणक्षयादिस्वरूपस्य वा **प्रतिपत्तिः ?** एतदुक्तं भवति--यदि तत्र /ms यथादर्शनमेव तद्व्यवस्था बहिरर्थवन्न तत्सिद्धिः । अथ यथातत्त्वम्; तदेकान्तप्रतिज्ञाहानिः इति । ननु मा भूत् प्रत्यक्षतः तत्प्रतिपत्तिः विचारात् स्यादिति चेत्; अत्राह--**प्रमाणान्तरस्यापि** इत्यादि । इदमत्र तात्पर्यम्--यावान् कश्चिद्विचारः स सर्वोऽपि यदि अप्रमाणम्; न ततो बहिरर्थवत् प्रकृततत्त्वसिद्धिः । अथ प्रमाणम्, न प्रत्यक्षम्; विचारात्मकत्वात् [ककल्पनापोढमभ्रान्तं प्रत्यक्षम्न्यायबि° १ । ४ इति प्रत्यक्षलक्षणत्वात् ।ल्पनापोढत्वाद्] भ्रान्तत्वाच्च प्रत्यक्षस्य । अनुमानं चेत्; तर्हि **प्रमाणान्तरस्यापि** अनुमानस्याप्य**सिद्धिः कुतः तत्त्वप्रतिपत्तिः ?** कुतः तदसिद्धिः ? इत्यत्राह--**प्रत्यक्षस्वभावत्वात्** इति । **प्रत्यक्षस्य** अविकल्पस्य **स्वभावः** क्षणिकनिरंशपरमाणुरूपता इव स्वभावो यस्य [तस्य] भावात् **तत्त्वात्** । एतदुक्तं भवति--यथा अविकल्पदर्शनं न लक्ष्यं तथा अनुमान  मपि । चिन्तितं चैतत्--**अङ्गीकृतात्मसंवित्तेः** सिद्धिवि° 152/mkj १ । १८ इत्यादिना । न च तस्य रूपद्वयं येन कथञ्चिल्लक्ष्यं स्यात्, एकान्तहानिप्रसङ्गात् । एतदप्युक्तम् **प्रसिभास्येक** सिद्धिवि° १ । १० इत्यादिना । अथवा **प्रत्यक्षस्य** स्वपरभावयोः विभ्रमः **स्वभावः** सर्वविकल्पातीतता वा स इव स्वभावो यस्य तस्य भावात् **तत्त्वात्** इति । ततो यथा प्रत्यक्षान्न स्वपरयोः सिद्धिः तथा अनुमानादपि इति । यथा वा, न विभ्रमादि व्यव- /ms स्था तथा अध्यक्षानुमानव्यवस्थापीति भावः । व्यवहारेण तत्सिद्धिरिति चेत्; अत्राह--**सर्वथा** इति । सर्वेण परमार्थप्रकारेणेव व्यवहारप्रकारेणापि **सर्वथा सिद्धिः [असिद्धेः]** इति विकल्पाभावे अत्यन्तव्यवहारापहारात् मिथ्यैकान्ते तदग्रहादिति । § 704

---

१ त्कुतः ] व्यक्तिनिष्ठस्य ।
७ च्च ] बौद्धस्य ।
९ य ] व्यवहारतः ।
१० हि ] यदि
१२ इ ] यथानुदर्शनं चेयं
मानमेयफलस्थितिः । क्रियतेऽविद्यमानापि ग्राह्यग्राहकसंविदाम् ॥--प्र° वा° इति मतस्य ।
२० सिद्धिः ] द्धेः
२६ सिभास्ये ] सै

एवं परस्य प्रतीत्यभावेन प्रमाणान्तराऽसिद्धिरुक्ता, साम्प्रतं कारणाभावेन सा उच्यते इति दर्शयितुमाह--**निबोध** इत्यादि । § 705

...16 निबोधः सर्वतोऽन्यस्य विलक्षणमलक्षयन् ।
अनीहः सदृशस्मृत्या हेतुरित्यविकल्पना ॥ १६ ॥ § 707

स्वविषयविशेषनिर्भासं प्रत्यक्षमात्मानं कथञ्चिन्न लक्षयतीति विरुद्धम्, यथासमयं प्रतिपत्तेः । प्रतिपत्तौ वा प्रमाणान्तरावृत्तिप्रसङ्गात् । विशेषं लक्षयतो निराकाङ्क्षत्वात् कथञ्चिदप्रयतमानस्य कुतः स्मृतिर्यतः समारोपव्यवच्छेदविकल्पः । समा...। तल्लक्षितसमारोपे अतिप्रसङ्गात् किमकिञ्चित्करादिदर्शनवत् । यदि पुनः अनुभूतं सर्वथा न लक्षयेत् कुतः समारोपव्यवच्छेदप्रयत्नः सुपुप्तवत् । विशेषं पश्यतो लक्षयतो वा समानाकारस्मृतिरयुक्तैव तयोरसम्बन्धात् । अतिप्रसङ्गो ह्येवं स्यात् । अनर्थिका चेयम् अर्थक्रियासमर्थस्वलक्षणदृष्टिर्ग्राहकं यतः विकल्पबुद्धेरतद्विषयत्वात् । तत्त्वदर्शिनस्तद्विपरीतस्मृत्युत्पादनप्रयत्नानुपपत्तेः तद्दर्शनबलोत्पत्तेः तत्त्वे प्रवर्तनाच्च नानर्थिका अनुमानवदिति चेत्; तस्यास्तर्हि प्रामाण्यं युक्तं तदभावे संवादायोगात् । प्रमाण...। तदयं विशेषदर्शनात् सामान्यस्मृतिव्यवहारं प्रवर्तयन्नविकल्प एव । § 708

**निबोधो** बोधो **हेतुः** कारणम् [अन्यस्य] प्रमाणान्तरस्य **इति अविकल्पना** वोम्मयस्य कल्पना । किं कुर्वन् ? **अलक्षयन्** अनिश्चिन्वन्, **सर्वतः** सजातीयाद् अन्यतोऽर्थान्तराद् **विलक्षणं** व्यावृत्तं परकल्पितं वस्तु धर्म्मादि सिद्धेः, अनिश्चितस्य अस्य अनुमानहेतुत्वे स्वापादौ प्रसङ्ग इति चोक्तम्, तदुत्तरकालभाविविकल्पापेक्ष तद्धेतुः इति चेत्; अत्राह--**सदृशस्मृत्या** इति । **सदृशस्मृत्या** सदृशविकल्पेन कारणेन स तस्य हेतुः **इत्यपि अविकल्पना** विकल्पप्रमाणान्तरतापत्तेः । यद्वक्ष्यति अत्रैव वृत्तौ **तस्याः तर्हि** इत्यादि । स तर्हि तल्लक्षयन् तस्य हेतुरिति चेत्; अत्राह--**अनीहः** इत्यादि । **अनीहः**
153/mkj, /ms सत्त्वादिवत् क्षणिकत्वादिरूपेणापि लक्षिते वस्तुनि अलक्षिता सा सम्भवात्तिराकाङ्क्षः तस्य हेतुः **इत्यपि [वि] कल्पना** निश्चिते प्रमाणान्तरवैफल्यादिति मन्यते । विलक्षणे लक्षिते च सदृशस्मृतेरभावात् तया हेतुः इति **अविकल्पना** इति । § 709

२ सा] प्रमाणान्तरासिद्धिः ।
१८ य] वोन्मत्त
२० र्म्मादि] धर्म्यादिर
२० अस्य] धर्म्यादिज्ञानस्य ।
२१ ल्पापेक्ष] क्षः
२२ स] निबोधः ।
२३ वृत्तौ] टीकायाम् ।
२४ स] निबोधः ।
२५ सा] ईहा ।
२६ वात्ति] वति तन्नि
२६ त] निबोधस्य ।

ननु स्यादयं दोषो यदि तत्सर्वथा न सर्वं लक्षयेत् । लक्षयति इति चेत्; अत्राह--**स्वविषय** इत्यादि । **स्वो** बोधात्मा **विषयो**ऽर्थः, यदि स्वावेव **विशेषौ** भेदौ सर्वतो व्यावृत्तत्वात्, **तयोर्निर्भासः** तदाकारता स विद्यते यस्य तत्तथोक्तं ज्ञानम् । कथंभूतम् ? **प्रत्यक्षम्** अविकल्पदर्शनम् **आत्मानं** स्वस्वरूपम्, उपलक्षणमेतत्--तेन विषयस्वरूपं च, **कथञ्चित्** सत्त्वादिरूपेण **न क्षपति इत्येवं विरुद्धम्** एकस्य लक्षितेतरस्वभावे अनेकान्तप्रसङ्गादिति मन्यते । सर्वथा तर्हि लक्षयति इति चेत्; अत्राह--**यथासमयम्** इत्यादि । **समयस्य** सौगतकल्पितं तस्य * अनतिक्रमेण **यथासमयं प्रतिपत्तेः** तत्त्वस्य, लक्षयतीति विरुद्धम् । तत्प्रतिपत्त्यङ्गीकरणे दूषणमाह--**प्रतिपत्तौ वा प्रमाणान्तरावृत्तिप्रसङ्गात्** विरुद्धम् । कुत एतत् ? इत्यत्राह— **विशेषं लक्षयतो निराकाङ्क्षत्वात्** । तथापि तद्वृत्तिः स्यादिति चेत्; अत्राह--**कथञ्चित्** इत्यादि । नीलादिप्रकारेणेव क्षणिकत्वादिप्रकारेणापि **अप्रयतमानस्य** वस्तु साधयितुमनीहमानस्य **कुतः** कारणात् **स्मृतिर्दृष्टान्तस्मरणं यतः** स्मृतेः **समारोपव्यवच्छेद विकल्पः** *त- /ms द्व्यवच्छेदकमनुमानम् । कुत एतत् ? इत्याह--**समेत्यादि** । तथापि तत्संभवे दूषणमाह--**तद्** इत्यादि । **तेन** प्रत्यक्षेण **लक्षितस्य समारोपे** अङ्गीक्रियमाणे **अतिप्रसङ्गात्** अनुमानलक्षितस्यापि स्यात् । भवतु को दोषः इति चेत्; अत्राह--**किम् [अकिञ्चित्कर]** इत्यादि । तस्य **अकिञ्चित्करादिकादिदर्शनवत्** व्यवहारानुपयोगित्वादिति मन्यते । तर्हि सर्वथा न [ल]क्षयतीति चेत्; अत्राह--**यदि पुनः** इत्यादि । **अनुभूतं** [अनुभव]विषयीकृतं **सर्वथा** क्षणिकत्वादिना इव नीलत्वादिनापि **यदि न लक्षयेत्, प्रत्यक्षम्** इति सम्बन्धः । **कुतः समारोपव्यवच्छेदप्रयत्नः** समारोपव्यवच्छेदोऽनुमानं तत्र प्रयत्नः कुतः ? **सुषुप्तस्य इव तद्वत्** इति । § 710

स्यान्मतम्--उत्तरविकल्पजननात् प्रत्यक्षं तल्लक्षयति इत्युच्यते ततोऽयमदोषः इति; तत्राह--**विशेषम्** इत्यादि । **विशेषणं पश्यतो** दर्शनस्य लोकस्य वा **समानाकारस्मृतिरयुक्तेव** । कथंभूतस्य ? **लक्षयतो वा** *विशेषमिति लक्षणोकृतविकारेऽपि पुनः **लक्षयतः** इति वचनं दोषान्तरप्रतिपादनार्थम् । कुतः सा न युक्ता ? इत्याह--**तयोः** विशेषदर्शनसमानाकारस्मृत्योः **असम्बन्धात्** तादात्म्यतदुत्पत्तिसम्बन्धविरहात् । § 711

अथ मतम्--मा भूद् विसदृशयोः तादात्म्यलक्षणः सम्बन्धः, पावकधूमयोरिव तदुत्पत्ति लक्षणः स्यादिति चेत्; अत्राह--**अतिप्रसङ्गो हि एवं स्यात्** /ms नीलानुभवस्य पीतस्मृतिः स्यात् विसदृशत्वाविशेषात् । § 712

---

२ स्वावेव] तावेव
५ ति] लक्षयति
८ *] ल्पितस्य
१३ *] समारोपव्यवच्छेदकम् ।
१७ रादिकादि] रादि
२३ क्षं] अनुभूतम् ।
२४ णं] षं
२५ *] यद्यपि विशेषरूपेण लक्षणीकृत एव विचारः प्रवर्तते ।
२६ विकारेऽपि] लक्षणीकृतविचारेऽपि
२७ कुतः] सदृशस्मृतिः ।
३० योरिव] कार्यकारणभावात्मकः ।
३१ स्य] नीलानुभववतः पुरुषस्य ।

ततः तदुत्पत्तिमभ्युपगम्य दूषणान्तरमाह--**अनर्थिका चेयम्** इत्यादि। **अनर्थिका** निष्प्रयोजनिका। **च** इति पूर्वदूषणसमुच्चये, **इयं** समानाकार- 154/mkj स्मृतिः। कुतः ? इत्याह--**अर्थक्रिया** इत्यादि। **अर्थक्रियासमर्थस्य स्वलक्षणस्य दृष्टिर्दर्शनम् ग्राहकं यतः**। *तद्वत् तत्स्मृतिरपि तद्ग्राहिका इति चेत्; अत्राह--**विकल्पबुद्धेः अतद्विषयत्वात्** अर्थक्रियासमर्थाऽविषय-त्वात् कारणात् **अनर्थिका** इति। भवतु अतद्विषया तथापि तत्सत्तयैव नः प्रयोजनमिति चेत्; अत्राह--**तत्त्व** इत्यादि। **तत्त्वदर्शिनः** सौगतस्य अन्यस्य वा अर्थक्रियार्थिनः **तस्य** तत्त्वस्य या **विपरीता समानाकारस्मृतिः** तस्या **उत्पादने** यः **प्रयत्नः** तस्य **अनुपपत्तेः अनर्थिका** इति। नहि नीलदर्शिनः तत्क्रियार्थिनः पीतस्मृतिकरणे प्रयत्न उपपद्यते। § 713

अत्र परमतमाशङ्कते **तद्** इत्यादि दूषयितुम्। **तस्य** तत्त्वस्य **दर्श-नं** तस्य **बलं** सामर्थ्यं तेन **उत्पत्तेः** तत्रत्वे * **प्रवर्तनात्व न अनर्थिका अनुमानवत्** इति चेत्; अत्राह--**तस्याः** समानाकारस्मृतेः **तर्हि प्रामाण्यं युक्तम्** उपपन्नम्, न दृष्टेः प्रामाण्यं युक्तम् इति। कुतः ? इत्याह--**तद्** इत्यादि। **तदभावे** तत्स्मृत्यभावे **संवादायोगात्** धर्माद्यविप्रतिपत्तेरयोगात्। /ms कुतः ? इत्याह-- **प्रमाण** इत्यादि। व्याख्यातमेतत् प्रथमप्रस्तावे। **विशेष-म्** इत्याद्युपसंहरन्नाह--**तद्** इत्यादि। यत एवं **तत्** तस्मात् **अयं** सौगतः **विशेषदर्शनात् सामान्यस्मृतिव्यवहारं प्रवर्त्तयन् अविकल्प एव** परामर्शशून्य एव। तन्नास्य प्रमाणान्तरस्य सिद्धिरिति कुतः तत्त्वप्रतिपत्तिरिति स्थितम्। § 714

भवतु तर्हि यथातत्त्वमेव मानादिव्यवस्था, सा च सौगतमत एव; इत्यत्राह-- § 715

...17 विकल्पेऽनर्थनिर्भासे विसंवाद्यविकल्पके।
प्रत्यक्षं किं तदाभासं प्रमाणान्तरमेव वा ॥ १७
|| § 717

विकल्पबुद्धेः न केवलमवस्तुनिर्भासः किन्तु विसंवादोऽपि सामान्य-प्रतिपत्तेः विशेषदर्शनात्। अनयाऽर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां विसंवाद्यते। पुनरनुमानात् क्षणभङ्गादिषु व्यवहर्त्रभिप्रायवशात्

---

४ *] दर्शनवत्।
४ पि] विशेषस्मृतिरपि।
६ त्वात्] अर्थक्रियाकारिस्वलक्षणाविषयत्वात्।
६ थापि] विकल्पबुद्धिसद्भावेनैव।
१० र्शिनः] नीलार्थक्रियाभिलाषिणः।
१२ *] तत्त्वे
१२ नात्व] च
१२ र्थिका] समानाकारस्मृतिः।
१५ र्मा] धर्म्या
१९ न्नास्य] सौगतस्य।

प्रामाण्याप्रामाण्यव्यवस्थायां विकल्पाविकल्पयोः प्रमाणेतरव्यवस्था प्रसज्यते । वस्तुतः पुनः विकल्पबुद्धेः विसंवादोऽपि तथैवाविकल्पबुद्धेः । कथमर्थ-निर्भास इति चेत्; स्थूलस्यैकस्य प्रतिभासनात् वस्तुनो तद्विपरीतलक्षणत्वात् । तत एव विसंवादोऽपि विकल्पवत् । § 718

**विकल्पे** अनुमाने अन्यस्मिन् वा **अनर्थनिर्भासे** वस्तुसामान्याकारे **विसंवादिनि** विगताऽविप्रतिपत्तिप्रपञ्चे यदि[वा]व्यभिचारिणि सत्य**विकल्प-के** क्षणिकनिरंशैकपरमाणुनिष्ठे दर्शने **प्रत्यक्षं किं न** किञ्चिद् विकल्पज्ञानम् अन्यद्वा, यदि वा स्वसंवेदनम् अन्यद्वा, यत इदं सूक्तं स्यात्--**कल्पनापोढं ज्ञानं प्रत्यक्षम्** प्रमाणसमु॰ पृ॰ ८ इति, **तदाभासं किम्** ? न किञ्चित्, प्रत्यक्षापेक्ष्यस्यास्य तदभावे अभावादिति तद्व्यवच्छेदार्थमभ्रान्तग्रहणमयुक्तम् । पश्य हि बहिरिव अन्तः परमाणुमात्रं तत्त्वं न तस्य द्विचन्द्रादिदर्शनमपि । प्रत्यक्ष प्रमाणाद् यद् अनुमानं **तदन्तरम्** तदेव वा **किं** यत इदं 155/mkj
शोभेत--**त्रिरूपात् लिङ्गाद्** न्यायबि॰ २ । ३ इत्यादि । **तदाभासम्** इत्येतत् मध्ये करणादत्रापि सम्बध्यते । प्रमाणान्तराभासं वा किम् ? तत् सूक्त-म्--**हेत्वाभासाः ततोऽपरे** हेतुबि॰ श्लो॰ १ इत्यादि । पक्षादितदाभासयोः /ms
साध्यज्ञानस्य वा असिद्धेरिति मन्यते । § 719

कारिकार्थं दर्शयितुमाह--**विकल्प** इत्यादि । **विकल्पबुद्धेः** लिङ्गविषयात्मा **न केवलमवस्तुनिर्भासः** । किं तर्हि ? **किन्तु विसंवादोऽपि** वचनमपि । ततो निराकृतमेतत्-- § 720

*लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि ।
प्रतिबन्धात् तदाभासशून्ययोरप्यवञ्चनम् ॥ प्र॰ वा॰ २ । ८२
इति ।§ 722

कुत एतत् ? इत्यत्राह--**विशेष** इत्यादि । **सामान्यस्य प्रतिपत्तिः** य-स्यां सा तथोक्ता तस्या विकल्पबुद्धेः प्रवृत्तेन **विशेषाणां दर्शनात्** शङ्खे पीतप्रतिपत्तेः प्रवृत्तेन शुक्लदर्शनादिव । ननु विशेषेषु तद्विसंवादेऽपि न त-त्साध्यायां स इति चेत्; अत्राह--**अर्थम्** इत्यादि । **अर्थं** पावकादिकं **परिच्छिद्य अनया** विकल्पबुद्ध्या **प्रवर्तमानः** जनोऽ**र्थक्रियायां** दाहादिलक्ष-णायां **विसंवाद्यते विशेषदर्शनात् सामान्यप्रतिपत्तेः** इत्येतदत्रापि सम्बध्यते । एतदुक्तं भवति--यथाविधमर्थं परिच्छिद्य प्रवर्त्तते जनः तथाविधार्थसाध्याऽर्थ-

---

१० स्यास्य] प्रत्यक्षाभासस्य ।
१० भावे] प्रत्यक्षाभावे ।
१० म्] कल्पनापोढमभ्रान्तं प्रत्यक्षम् इति प्रत्यक्षलक्षणे ।
११ हि] यस्य[[बौद्धस्य ।]] हि
१३ इ] तत्र स्वार्थं त्रिरूपाल्लिङ्गाद् यदनुमेये ज्ञानम्--न्यायबि॰ ।
१४ त्] तन्न
१८ यात्मा] यायाः
१८ पि] वञ्चनमपि
२१ न्धात्] सम्बन्धात् ।
२१ त] लिङ्गाभास-लिङ्ग्याभासरहितयोः अर्थात् सम्यक्लिङ्गलिङ्गिनोः अवञ्चनम् अविसंवादः ।

क्रियाप्राप्तौ तत्र तदविसंवादो नान्यथा, इतरथा पीतज्ञानात् प्रवर्त्तमानस्य शुक्लशङ्खार्थकियाप्राप्तौ तत्र ज्ञानमविसंवादि स्यादिति । अनुमानविकल्पबुद्ध्या न विसंवाद्यते इति चेत्; अत्राह--**पुनः** इत्यादि--**पुनः** लिङ्गबुद्ध्यनन्तरम् /ms **अनुमानादर्थं** परिच्छिद्य प्रवर्त्तमानो विसंवाद्यते, क्व ? **क्षणभङ्गादिषु** विशेषदर्शनात् सामान्यप्रतिपत्तेः । § 723

ननु **व्याख्यातारः खल्वेवं विवेचयन्ति न व्यवहर्त्तारः । ते हि दृश्यविकल्प्यावर्थौ एकीकृत्य यथेष्टं प्रवर्त्तन्ते, तदभिप्रायवशात् तदवञ्चनमुक्तम्** प्र° वा° स्व° १ । ७२ इति चेत्; अत्राह--**व्यवहर्त्र भिप्राय** इत्यादि । **व्यवहर्तॄणाम्** व्यवहारिणाम् यदेव अस्माभिः लिङ्गबुद्धेः लिङ्गिबुद्धेर्वा प्रतिपन्नम् तदेव प्राप्यते इति यो**ऽभिप्रायः तद्वशात्** क्षणिकविकल्पानां **प्रामाण्यव्यवस्थायां** नित्यादिविकल्पानां वा**ऽप्रमाणव्यवस्थायां** क्रियमाणायां **विकल्पा[विकल्प]योः प्रमाणेतरव्यवस्था प्रसज्येत** । दर्शनोत्तरकालभावी नीलादिनिश्चयः इह विकल्प इत्युच्यते नाऽनुमानम्, अत्र परस्य विवादाऽभावात्, तस्य प्रमाणत्वव्यवस्था--यदेव तेन परिच्छिन्नं तदेव प्राप्यते इति, तदभिप्रायवशाद् अविकल्पस्य अप्रमाणत्वव्यवस्था प्रसज्येत अनेन अर्थं परिच्छिद्य प्रवर्त्तमाना वयं तत्प्राप्तिनत्त+इतितन्नेतितत्तद भिप्रायः । अन्यथा **मनसोर्युगपद्वृत्तेः** प्र° वा° २ । १२३ इत्यादि अनर्थकं स्यात् । § 724

156/mkj

एतेन दर्शनदृष्टविषयत्वमपि विकल्पस्य निरस्तम्; तथा तदभिप्रायाभावात् । वस्तुविकल्पस्य तद्य वस्थेति चेत्; अत्राह--**वस्तुतः** परमार्थतः । **पुनः** इति पक्षान्तरद्योतने, **विकल्पबुद्धेः** अनुमानविकल्पबुद्धेरपि /ms अन्यस्याः स्वयं परेण तत्त्वोपगमात् **विसंवादोऽपि** वञ्चनं न केवलमवस्तुनिर्भास एव । तथा च इतरविकल्पवद् अनुमानविकल्पोऽपि प्रमाणं न भवेदिति मन्यते । अस्तु तर्हि सर्वा विकल्पबुद्धिरप्रमाणं विसंवादात् अवस्तुनिर्भासाच्च, अविकल्पबुद्धिस्तु प्रमाणं विपर्ययादिति चेत्; अत्राह--**तथैव** इत्यादि । **अविकल्पबुद्धेः** बौद्धेन स्वलक्षणविषयत्वोपगमात् क्वर्थं तदवस्तुविषयत्वमिति मन्वानः परः पृच्छति **कथमनर्थनिर्भासः इति** ? अत्रोत्तरमाह--**स्थूलस्यैकस्य [प्रतिभासनात्]** इत्यादि । इदमेव वस्तुलक्षणमिति चेत्; अत्राह— **वस्तुनः** इत्यादि । **वस्तुनः** अर्थक्रियाकारिणो भावस्य **तस्माद्** उक्तात्लक्षणाद् **विपरीतम्** अन्यथाभूतम् अद्वयरूपं **लक्षणं** पश्य

---

२ त] पीते ।
११ माण] ऽप्रामाण्य
१३ र] बौद्धस्य ।
१५ त] व्यवहर्त्रभिप्रायवशात् ।
१६ द] न तत्प्राप्तिमन्त इति तद
१७ इ] सविकल्पाविकल्पयोः । विमूढो लघुवृत्तेर्वा तयोरैक्यं व्यवस्यति ॥ इति शेषः ।
१९ त] दर्शनदृष्टविषयत्वव्यवस्था ।
२१ त] विसंवादत्वस्वीकारात् ।
२४ माणं] अविसंवादात्, स्वलक्षणवस्तुविषयत्वाच्च ।
२६ र्थं] कथं
२९ श्य] यस्य

तस्य भावात् **तत्त्वात्** । परप्रसिद्ध्या इदमुक्तम्, **तत एव** अवस्तुनिर्भासादेव **विसंवादोऽपि** न केवलम् अवस्तुनिर्भास एव **अविकल्पबुद्धेः** इति सम्बन्धः । तथा च **प्रमाणमविसंवादि ज्ञानम्** प्र° वा° १ । ३ इत्यादि परस्य असंभवि प्रमाणलक्षणमिति प्राप्तम् । § 725

ननु व्यवहारमाश्रित्य **प्रमाणमविसंवादि ज्ञानम्** इत्युक्तम् **व्यवहारेण** प्र° वा° १ । ७ *इत्यादि वचनात् । न च जनाः तदवस्तुनिर्भासेऽपि संवादभाजः प्रतीयन्ते, तदवस्तुनिर्भास एव वस्त्वध्यारोपेण प्रवृत्तौ तत्परितोषदर्शनात्, तत्परितोषश्च अविसंवाद इति सौगतं मतम्, तत् कस्येव तस्या विसंवाद इति चेत्; अत्राह-- **विकल्पवद्** इति । दर्शनोत्तरकाल- /ms भाविनो विकल्पस्य इव तद्वदिति । एतदुक्तं भवति--यथा विकल्पस्य अवस्तुसामान्यनिर्भासिनो विसंवादः ततः प्रवृत्तौ जातपरितोषेऽपि व्यवहारिणि तथा अविकल्पबुद्धेरपि । इतरथा तद्वत् विकल्पस्यापि प्रामाण्यसिद्धिः प्रमाणसंख्यानियमः स्वलक्षणैकान्तश्च निरवसरः स्यात् । § 726

एतेनेदमपि निरस्तं यदुक्तम् अ र्च टे न--**व्यवहर्तृभिप्रायवशाद् विकल्पस्य गृहीतग्रहणात् प्रामाण्यमुक्तं, न भावतः,** ***तत्र तदभावात्, परमार्थतः पुनः अवस्तुनिर्भासात्** *इति; कथम्? अविकल्पबुद्धेरपि अस्य समानत्वात् । § 727

अधुना योगाचारस्य मतं दूषयितुं दर्शयति--**यथा** इत्यादि । § 728

...18 यथाकथञ्चित्तस्यार्थरूपं मुक्त्वाऽवभासिनः ।
सत्यं कथं स्युराकारा निर्भासा यतो बहिः ॥ १८
॥§ 730

157/mkj

...19 इति; विज्ञप्तिमात्रेऽपि समानं सर्वमेव च ।
मुक्त्वा स्वतत्त्वं तस्य अन्यथा प्रतिभासनात् ॥ १९
॥§ 732

१ प] बौद्धाभिप्रायेण ।
६ *] प्रामाण्यं व्यवहारेण ।--प्र° वा° ।
९ स्येव] अविकल्पबुद्धेः ।
१२ सिद्धिः] द्धेः
१३ संख्या] प्रत्यक्षानुमानरूपप्रमाणद्वयसंख्या ।
१५ *] विकल्पे ।
१६ *] तुलना--यद्यपि तेनानधिगतं सामान्यमधिगम्यत इति वर्ण्यते तथापि तदर्थक्रियासाधनं न भवतीति तदधिगन्ता तैमिरिकादिज्ञानप्रख्यो विधिविकल्पो न प्रमाणम्...जातेस्तु अर्थक्रियासाधनत्वाभावादनधिगताया अधिगमेऽपि केशादिज्ञानस्येव न प्रामाण्यम् । --हेतुबि° टी° पृ° २७ ।

**यथाकथञ्चित्** येन केनचित् सामान्यादिप्रकारेण विकल्पस्य अविकल्पस्य वा **अवभासिनः** । किं कृत्वा ? **मुक्त्वा** । किम् ? **अर्थरूपम्** । कथंभूतम् ? **सत्यम्** अवितथम् निरंशं तस्यैव सत्यत्वात् । तस्य किम् ? इत्याह--**कथम्** इत्यादि । **सत्यम्** इत्येतदत्रापि योज्यं लब्धलिङ्गविभक्तिपरिणामम् । ततोऽयमर्थः--**सत्याः** अवितथाः **कथम् ?** कथञ्चित् **सु** भवेयुः **आकाराः निर्भासा यतः** सत्याकारेभ्यो **बहिः** । **इति** शब्दः पूर्वपक्षसमाप्त्यर्थः । § 733

तत्र उत्तरमाह--**विज्ञप्ति** इत्यादि । बहिरर्थशून्या **विज्ञप्तिरेव तन्मात्रं तत्रापि न** केवलं बहिरर्थे **सर्वं** निरवशेषम् अनन्तरं बहिरर्थदूषणं **समानम्** ततो
/ms बहिरर्थवत् माध्यस्थ्यबद्धपरिकरेण प्रामाणिकजनेन तदपि परिहरणीयमिति मन्यते । कुत एतत् ? इत्यत्राह--**स्वतत्त्वम्** इत्यादि । अत्रायमभिप्रायः--**चित्रं तदेकमिति चित्रतरं ततः** । प्र० वा० २ । २०० इति वदता तन्मात्रमपि चित्रमेकं नाभ्युपगन्तव्यं किन्तु निरंशमेकम्, तथा च **चित्रप्रतिभासापि एकैव बुद्धिः** प्र० वार्तिकाल० ३ । २२० इत्यादि स्ववचनविरुद्धम् । तच्च न नीलादिसुखादिशरीरव्यतिरिक्तम्, परस्य अनभ्युपगमात्, अन्यथा **न नीलादिसुखादिशरीरव्यतिरिक्तं जडार्थग्राहकमस्ति** इति प्र ज्ञा क र गु प्त स्य वचनं न सुभाषितं स्यात् । अप्रतिभासनाच्च, अन्य [था] ब्रह्मप्रतिभासोऽपि कथं निराक्रियेत ? ततो नीलादिसुखादिशरीरस्वभावं तदित्यभ्युपगन्तव्यम् । **तस्य च स्वतत्त्वम्** आत्मस्वभाव क्षणिकनिरंशपरमाणुपरिमाणं **मुक्त्वा** विहाय **अन्यथैव** स्थिरस्थूलसाधारणात्मना **प्रतिभासनात्** । उक्तं च अत्रैव--**पश्यन् स्वलक्षणान्येकं स्थूलम्** सिद्धिवि० १ । १० इत्यादि । इतरथा यदुक्तं प्र ज्ञा क रे ण--**तदेतन्नूनमायातम्** प्र० वा० २ । २१० *इत्यादिना परमाणुप्रतिभासं व्यवस्थापयतो अतिसूक्ष्मेक्षिकया विचारयतोऽपि स्थूलैकप्रतिभासो नति वर्त्तते इत्याशङ्क्य **मायामरीचिप्रभृतिप्रतिभासवद् असत्त्वेऽप्यदोषः** प्र० वार्तिकाल० ३ । २११ इति तदनवसरं स्यात्, स्वतत्त्वावभासे तदयोगात् । § 734

---

५ सु] स्युः
१० नेन] विज्ञप्तिमात्रमपि ।
१२ रं] चित्रं तदेकमिति चेदिदं चित्रतरं ततः ।...चित्रं नीलपीताद्यात्मकं तत् पतङ्गादिकमेकमिति चेत्; इदम् चित्रमेकम् यदुच्यते तत् ततः चित्रपतङ्गादपि चित्रतरम् आश्चर्यतरम् । चित्रमिति नानारूपाणि तदेव पुनरेकमुच्यत इत्युपहसति ।--प्र० वा० मनोरथ० ।
१३ पि] विज्ञप्तिमात्रमपि ।
१४ इत्यादि] प्रज्ञाकरोक्तम् ।
१७ स्य] नीलादिसुखादिकमन्तरेणापरस्य ज्ञानाकारस्यानुपलक्षणात्पृ० ३४५यथा च न सुखादिव्यतिरेकेणापरं विज्ञानं तथा नीलादिव्यतिरेकेणापि ।पृ० ४०९, ४५४ । नीलान्न व्यतिरेकेण विषयिज्ञानमीक्ष्यते पृ० ४०६ न हि सितासितादिव्यतिरेकेणापरा ग्राहकादिता प्रतिभासमानोपलभ्यते ।--प्र० वार्तिकाल० पृ० ३७८ ।
१९ भाव] वं
२३ *] इदं वस्तुबलायातं यद् वदन्ति विपश्चितः । यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा ॥--प्र० वा० ।
२३ तो] ता
२४ ति] नाति
२६ इति] उत्तरं प्रदत्तं तदनवसरं स्यात् ।

यत्पुनरुक्तं तेनैव--**यदवभासते तज्ज्ञानं यथा सुखादि, अवभासते च नीला दिकम्** इति; तदनेन निरस्तम्; निरंशपरमाणुस्वभावस्य नीलादेः साध्यधर्मित्वे सुखादेश्च दृष्टान्तत्वे साध्यधर्मिप्रभृति सर्वमसिद्धम् अप्रतिभासनात् । चित्रैकरूपस्य तत्त्वे सर्वं सिद्धं विपर्ययात्, इदं त्वसिद्धम्--तज्ज्ञानम् इति, तत्र तदसंभवाद् अनभ्युपगमात्, *परस्य चित्रैकज्ञानसिद्धेः । तम न्यत्र निरंशे वस्तुनि ज्ञानत्वं साध्यो धर्मो वर्त्तते अन्यत्र साध्यधर्मी दृष्टान्तधर्मी च यत्र साध्यधर्मो वर्त्तते इति न किञ्चिदेतत् । § 735 158/mkj, /ms

ननु च नीलादेर्यद्यपि स्थूलादिरूपेण स्वतत्त्वं मुक्त्वा अवभासनं तथापि न स्वसंवेदनरूपतया, अतः तया तस्य सत्यसत्य वा न प्रकृतरूपेणेति चेत्; अत्राह— **यथाकथञ्चित्** इत्यादि । § 736

...20 यथाकथञ्चित्तस्यात्मरूपं मुक्त्वावभासिनः ।
स्यादन्तः सत्याकारो ज्ञानस्य बहिर्न किम् ॥ २० ॥§ 738

**तस्य** नीलादिसुखादिमात्रस्य । कथम्भूतस्य ? **अवभासिनः** प्रतिभासवतः तच्छीलस्य वा । किं कृत्वा ? **आत्मरूपं मुक्त्वा** अद्वयस्वभावं विहाय । कथमवभासिनः ? **यथाकथञ्चिद्** येन केनचित् स्थूलादिग्राह्यादिप्रकारेण, **सत्याकारो** चित्स्वसंवेदनरूपतया न स्थूलादिरूपतया **स्यात्** भवेत् । कस्य ? **ज्ञानस्य** । क्षान्तः स्वस्वरूपे तथा सन्ति विभ्रमेतररूपतया चित्रमेकं ज्ञानं स्यादिति मन्यते । भवत्वेवं को दोष इति चेत्; अत्राह--**बहिः** बाह्यं वस्तुनः किं स्यादेव सत्याकारं विभ्रमेकम् । अथवा **तस्य** ज्ञानस्य **सत्याकारः** /ms **कथञ्चिन्**नीलादिरूपतया न स्थूलादिरूपतया न किञ्चित् स्यादेव । क्व ? **बहिः** । तथा च सौत्रान्तिको विजयते न योगाचारः, तस्य क[थ]ञ्चित् जाग्रद्दशासम्बन्धितया न स्वप्नाद्यवस्थासम्बन्धितया । ततो निराकृततो निराकृतमेतत्--**निरालम्बनाः सर्वे प्रत्ययाः प्रत्ययत्वात् स्वप्नप्रत्ययवत्** । प्र° वार्त्तिकाल° ३ । ३३१ **विवादगोचरापन्नो ग्राह्याकारोऽसत्यः तथा स्वप्नदृष्टतदाकारवत्** इति

४ त्त्वे] साध्यधर्मित्वे दृष्टान्तत्वे च ।
४ यात्] प्रतिभासनात् ।
५ त्र] निरंशज्ञानात्मके तद्व्यवहाराभावादिति भावः ।
५ *] प्रज्ञाकरस्य ।
५ म] तद
९ त्य] सत्यताऽसत्यता
१६ त्याकारो] रः
१७ क्षान्तः] क्व ? अन्तः
१७ न्ति] सति
१९ मे] मै
२२ तो] निराकृततो इति पदं पुनरुक्तम् ।
२४ इति] न नीलाद्यतिरेकेण ग्राह्यत्वमपरं क्वचित् । नीलादिता च विभ्रान्तविज्ञानेऽप्यवभासनात् ॥ पुरः स्फुटावभासित्वं भ्रान्तेर्वा न किमीक्ष्यते । तस्मान्न किंचिद् ग्राह्यत्वं यद् भ्रान्तादतिरिच्यते ॥पृ° १७७ । नीलादयो हि स्वप्नप्रतिभासवदसत्याः पृ° १८५ ग्राह्यता प्रतिभासादन्या नास्ति पृ° १९६ ।

। कथम् ? ज्ञानस्य स्थूलाद्याकारवत् प्रतिभासनात् स्वसंवेदनाकारस्यापि सत्यताविरहप्रसङ्गात् बहिरर्थवत् न तदाकारसिद्धिः स्यादिति । § 739

कारिकायाः सुगमत्वाद् व्याख्यानमकृत्वा क र्ण क मतप्रवेशार्थ पूर्वोक्त-मुपसंहरन्नाह— **यथा** इत्यादि । § 740

159/mkj

…21 यथार्थरूपं बुद्धेर्वितथप्रतिभासनात् ।
अविशेषात्स्वरूपं च न सिध्यति ततस्तथा ॥ २१
॥§ 742

स्वरूपमन्तरेण विभ्रमप्रतिभासासंभवादसमानम्, विषयाभावेऽपि बहुलं तथोपलब्धेः । § 743

**यथा** येन प्रकारेण **बुद्धेर्वितथप्रतिभासनात्** हेतुना ततः तद्वा आश्रित्य सौत्रान्तिकस्य **अर्थरूपम्** अर्थस्य अचेतनस्य घटादे रूपम् अनेकक्षणिक-निरंशपरमाणुलक्षणं **न सिध्यति तथा** योगाचारस्यापि **स्वरूपं च ततो** बुद्धेर्न सिध्यति । कुत एतत् ? इत्यत्राह--[अविशेषात्] विशेषाभावात् वस्तुस्वभाव-परिहारेण प्रतिभासस्य उभयत्र समत्वात् । यथा वा तेन बहिः स्थूलैकाकारो नेष्यते तथा योगाचारेणापि अन्तः । अथवा, **यथा बुद्धेर्वितथप्रतिभासनात्** स्वप्नादिदशायाम् **अर्थरूपं न सिध्यति** अविशेषेण नैयायिकादेः तथा **स्वरूपं** /ms **च** स्वसंवेदनं च **बुद्धेर्न** सिध्यति अविशेषेण योगाचारस्य । कुत एतत् ? इत्यत्राह--**अविशेषात्** विशेषाभावात् अर्थज्ञानपक्षयोः, एकत्र स्वप्नादिः अन्यत्र ग्राह्याकारो दृष्टान्त इति मन्यते । § 744

क ल्ल क स्तु आह--**स्वरूपमन्तरेण** इत्यादि । बुद्धेः यत्स्वरूपमात्रा साक्षात्करणलक्षणं तदन्तरेण **विभ्रमस्य** भ्रान्ताकारस्य यः **प्रतिभासः** तस्य **असंभवात्,** स्वतः तस्य प्रतिभासे विभ्रमाऽयोगादिति मन्यते । **असमानं** स्व-परपक्षयोः अविशेषोऽसिद्ध इति । तथा प्रयोगः— अस्ति बुद्धेः स्वरूपं विभ्र-मप्रतिभासाऽन्यथानुपपत्तेः । उक्तं च--**अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्य-**

२९५ । तस्मादनादितथाभूतानुमानपरम्पराप्रवृत्तमनुमानमाश्रित्य बहिरर्थकल्पनायां ग्राह्यग्राहकसंवेदनकल्पनाप्रवृत्तेः ग्राह्यादिकल्पना । परमार्थतः संवेदनमेवाविभागमिति स्थितम् पृ० ३९८ ग्राह्यग्राहकभावो हि नैवास्ति परमार्थतः । अपरप्रत्ययं रूपमतद्व्यावृत्तितस्तथा ॥--प्र० वार्तिकाल० पृ० ४२७ ।
३ कृत्वा] कर्णकगोमिनामा प्रमाणवार्तिकस्ववृत्तिटीकाकारो बौद्धाचार्यः ।
९ ना] यथास्वं प्रत्ययापेक्षादविद्योपप्लुतात्मनाम् । विज्ञप्तिर्वितथाकारा जायते तिमिरादिवत् ॥— प्र० वा० ३ । २१८ ।
१३ तेन] सौत्रान्तिकेन ।
१७ त्र] अर्थपक्षे ।
१९ मात्रा] मात्रं
२३ स्य] अप्रत्यक्षश्चासौ उपलम्भश्च तस्य अस्वसंविदितज्ञानस्य इत्यर्थः । तुलना--अप्रसिद्धोपलम्भस्य नार्थवित्तिः प्रसिध्यति ।--तत्त्वसं० श्लो० २०७४ । उद्धृतोऽयम्--न्यायवि० वि० प्र० पृ० ८२ । प्रमेयक० पृ० २९ । सन्मति० टी० पृ० ८१ ।

ति इति । नन्वेवम् अर्थरूपमन्तरेणापि तत्प्रतिभासासंभवात् ततस्तत्सिद्धिः कस्मान्नेति चेत्; अत्राह--**विषय** इत्यादि । [विषयस्य] घटादेरभावेऽपि न केवलं भावे **बहुलं तथा** विषयग्राहकत्वेन **उपलब्धेर्बुद्धेः** सर्वत्र सर्वदा तथा सेति मन्यते । **असमानम्** इत्येवं चेत्; अत्र दूषणमाह--**अन्यथा** इत्यादि । § 745

...22 *अन्यथानुपपन्नत्वमसिद्धस्य न सिध्यति ।
चित्सामान्यविदा युक्तं स्वार्थसामान्यमीक्षितुम् ॥
२२ ॥§ 747

कथञ्चिदसिद्धात्मनो बुद्धेः कथमसाधारणं रूपमनुमीयते ? यतः संभाव्यं स्यात् । स्वतस्तच्चिद्रूपसिद्धौ संभावितासाधारणात्मनः साकल्येन यत् सत्तत्सर्वं सामान्यविशेषात्मकमिति व्याप्तिसिद्धौ कथं द्रव्यस्य परमार्थस्यापि बहिरर्थस्य प्रत्यक्षप्रतिपत्तिरपह्नूयेत ? न हि अगृहीतवस्तुसामान्यं चिद्रूप- 160/mkj
मात्रं प्रत्यक्षं कर्तुमवगाहते यतस्तेन चेतनैकान्तसिद्धिर्विशिष्येत । § 748

इदमत्र तात्पर्यम्--कथञ्चिद् बुद्धेः प्रत्यक्षत्वे **यथाकथञ्चिद्** इत्यादि दूषणमुक्तम् इति सर्वथा तदप्रत्यक्षत्वमङ्गीकर्त्तव्यम्, तस्मिंश्च सति न विभ्रमप्रतिभाससंभवः, परेणापि तथाभ्युपगमात् । तथा च **अन्यथा** अन्येन बुद्धिस्वरूपाभावप्रकारेण **अनुपपन्नत्वम् असिद्धस्य** अनिश्चितस्य विभ्रमप्रतिभासस्य न **सिध्यति** । नहि असिद्धस्य बन्ध्यासुतस्य तदभाव प्रकारेण /ms
अनुपपन्नम् इति वक्तुं शक्यम् । अनेन अन्यथानुपपन्नत्वं हेतुलक्षणं तद्वत्त्वे सिद्धमिति दर्शयति । तर्हि सच्चेतनादिरूपेण प्रत्यक्षा बुद्धिः नापरेणेति चेत्; अत्राह--**चित्सामान्य** इत्यादि । नन्वेतत् **बहिर्न किम्** इत्यनेन दूषणमुक्तम्, तत् किमर्थं पुनरुच्यते इति चेत्; न; तेन बुद्धेर्विभ्रमाकारस्य कथञ्चिदभेदे इदमुक्तम्, अनेन एकान्तेन भेदे इति विभागात् । **चिदेव** तस्या वा **सामान्यम्** तस्य **विदा** वेदनेन बुद्धिस्वभावभूतविभ्रमाकारविवेकग्रहणविमुखचिन्मात्रग्रहणेन इत्यर्थः । **युक्तम्** उपपन्नं **स्व**ग्रहणयोग्यो योऽर्थः तस्य **सामान्यम् ईक्षितुम्** । अनेन **बुद्धेः कथञ्चित् प्रत्यक्षत्वम्एकस्यार्थस्वभावस्य** प्र° वा° ३ । ४२ इत्यादि च वदतः पूर्वापरविरोधो दर्शितः । § 749

१ रेणापि ] ज्ञानप्रतिभास ।
१ त्सिद्धिः ] अर्थसिद्धिः ।
६ *] तुलना--अन्यथानुपपन्नत्वमसिद्धस्य न सिध्यति ।(?")--न्यायवि° १ । १२ । प्रमाणनि° पृ° १२ । प्रमेयरत्नमा° ३ । १५ ।
१४ था ] बुद्धेरप्रत्यक्षत्वम् ।
१९ रेणेति ] विशेषाकारेण ।
२६ इ ] प्रत्यक्षस्य सतः स्वयम् । कोऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते । इति शेषः ।
२६ तः ] बौद्धस्य ।

कारिकां विवृण्वन्नाह--**कथञ्चिद्** इत्यादि । **कथञ्चिद्** विभ्रमाकारविवेका[दि]प्रकारेणापि **असिद्धात्मनः** सर्वथा अगृहीतरूपाया **बुद्धेः कथम् असाधारणम्** अचेतनादिव विभ्रमादपि व्यावृत्तं यदद्वयं स्वस्वंवेदन**रूपं** तद्विभ्रमप्रतिभासान्यथानुपपत्त्या **अनुमीयेत** न कथञ्चित् । हेतोरेव सिद्धवादिति मन्यते । **यतो**ऽनुमीयमानत्वात् **संभाव्यं स्यात् असाधारणं रूपम्** इति सम्बन्धः । स्यान्मतम्--तस्याः सच्चेतना[दि] रूपं स्वतः सिद्धम्; इत्याह--**स्वतः** इत्यादि । **स्वतो** नान्यतः **तस्याः चिदेव रूपं** तस्य **सिद्धौ** अङ्गीक्रियमाणायां **बुद्धेः** इति सम्बन्धः । कथम्भूतायाः ? इत्यत्राह--**संभावित** इत्यादि
/ms । **संभावितः** अनुमेयः **असाधारणः आत्मा** यस्याः सा तथोक्ता तस्यां किम् ? इत्यत्राह— **साकल्येन** इत्यादि । **साकल्येन** बहिरन्तश्च **यत् सत् तत्सर्वं सामान्यविशेषात्मकम्** इत्येवं **व्याप्तिसिद्धौ कथं** प्रत्यक्षेण प्रत्यक्षाः वा प्रतिपत्तिः **प्रत्यक्षप्रतिपत्तिः अपह्नूयेत ?** नैव । कस्य ? इत्याह--**बहिरर्थस्यापि** न केवलं ज्ञानस्यैव । कथंभूतस्य ? इत्याह--**संभावित** इत्यादि । पुनरपि कथंभूतस्य ? इत्याह--**द्रव्येत्यादि परमार्थस्य** इति पर्यन्तम् । ननु यदि नाम न बुद्धिः प्रत्यक्षसंभावितात्मा, बहिरर्थस्य किमायातं, येन सोऽपि तथा स्यादिति चेत्; अत्राह--**न हि अगृहीत** इत्यादि । **न हि प्रत्यक्षं कर्तुंवगाहते** विषयीकरोति । किम् ? इत्याह— **चिद्रूपमात्रम् चित्स्व**संवेदनलक्षण **रूपं** यस्य भावस्य स तथोक्तः स एव **तन्मात्रं** कर्म ज्ञानसामान्यमिति यावत् । कथंभूतम् ? इत्याह--**अगृहीतवस्तुसामान्यम्**
161/mkj अगृहीतं बाह्यवा * **सामान्यं** येन तत्तथोक्तम् । गृहीतवस्तुसामान्यमेव तत् ***तदवगाहते** इति भावः । अनेन प्रत्यक्षसिद्धम् उभयत्र सामान्यं दर्शयति । **यतस्तेन** तन्मात्रावगाहनात् **चेतनैकान्तसिद्धिर्विशेष्येत** भिद्येत अर्थसिद्धेः । **यतः** इति वा आक्षेपे, **[सं]भावितेत्यादि** । एतदुक्तं भवति--यथा व्यापकस्य चिद्रूपमात्रस्य अनुपलब्धौ तद्व्याप्यस्य संभावितासाधारणरूपस्य विभ्रमाकारविवेकलक्षणस्य अनुपलब्धिः तथा प्रकृतमपि इति यदुक्तं प्र ज्ञा
/ms क रे ण— **अतीतानागतावस्थानामग्रहणेऽपि तदवस्थाता गृह्यते** *इत्यत्र **कथं व्याप्याऽप्रतिपत्तौ तद्व्यापकप्रतिपत्तिः** प्र॰ वार्तिकाल॰ १ । ४४ इति; तदनेन निरस्तम्; विभ्रमाकारविवेकाप्रतिपत्तावपि तद्व्यापकचिद्रूपमात्रप्रतिपत्तिवद् विशेषाऽग्रहणेऽपि तद्व्यापकसामान्यप्रतिपत्तिसंभवात् । ननु

३ स्वं] सं
४ हेतोरेव] रेवाऽ
४ वा] त्वा
६ स्याः] बुद्धेः ।
९ स्यां] तस्याः
११ क्षाः] क्षा
१६ सोऽपि] बहिरर्थोऽपि ।
१७ र्तुं] र्तुम
१८ ण] णं
१८ र्म] विषयभूतम् ।
२० *] बाह्यवस्तु
२० त्] प्रत्यक्षम् ।
२१ *] चिद्रूपमात्रम् ।
२५ दुक्तं] अथावस्थानामग्रहणे न [[पि]] पूर्वापरव्याप्तिप्रतीतिः;
अवस्थाऽग्रहणेऽवस्थातृप्रतीतिः कथं भवेत् ।
व्याप्याप्रतीतावन्यस्य व्यापकत्वाप्रतीतितः
॥--प्र॰ वार्तिकाल॰ ।
२६ स्थाता] आत्मा ।
२६ *] इति शङ्कायामुक्तम् ।

बहि [ ] व्यापकोपलब्धावपि विशेषाणां यद्यदर्शनं कथं *तस्य ते इति प्रतिपत्तिः ? पुनस्तत्र दर्शनादिति चेत्; पुनस्तत्र दर्शनं कुतः सिद्धम् ? न तावत् पूर्वप्रत्यक्षात्; तस्य पश्चाद्भावात् तत्राऽप्रवृत्तेः । नापि उत्तरप्रत्यक्षात्; अस्य पूर्वमभावात् व्यापकेऽप्रवृत्तेः । न च तत्समुदायात्; क्रमभाविनोः तदसंभवात् । उभयकालभावि च तदेकं क्रमभाविचक्षुरादिव्यापारचर्चितं न चारु चर्चनमर्हति । *तद्ग्रहणोपायासंभवाच्च आत्मसत्तामात्रस्याऽविशेषात्, न ततः तत्सिद्धम् प्रत्यक्षपर्यायस्य कृतोत्तरत्वात् । § 750

एतेन अनुमानमपि चिन्तितम्; तत्र तदभावेऽस्याभावादिति चेत्; अत्राह--**चिद्रूपम्** इत्यादि । § 751

...23 चिद्रूपं सर्वतोऽभिन्नं पश्यतः परमार्थतः ।
तद्विशेषो यथा वेद्यस्तथा बहिरुपेयताम् ॥ २३
॥§ 753

कुतश्चिदपि स्वयमव्यावृत्तं सामान्यं पश्यन्नेव आत्मा गृहीतुं प्रयतमानः अचेतनव्यवच्छिन्नं चैतन्यं द्रव्यं क्रमेण गृह्णीयात् । ततः प्रत्यक्ष आत्मा स्वयमविप्रतिषिद्धः यथासामर्थ्यमन्तर्गृह्णाति तथा च बहिरित्यवगन्तव्यम् । प्रत्यक्षपरोक्षैकात्मनः प्रमेयस्य बहिः प्रतिषेद्धुमशक्यत्वात् । कथञ्चिदप्रत्यक्षत्वे कुतो वस्तु संभावयेत् लिङ्गादेरसिद्धेः गाढनिद्राक्रान्तवत् । § 754

**चितो बुद्धेः रूपं** स्वभावः । कथम्भूतम् ? **अभिन्नम्** अव्यावृत्तम् । कुतः ? **सर्वतः** सजातीयाद् विजातीयाच्च सत्सामान्यं तस्यैव तथाविधत्वादिति मन्यते । **पश्यतः** विकल्पदर्शनेन विषयीकुर्वतः सौगतस्य **तद्विशेषः** तस्य चित्सम्बन्धिनः तत्सामान्यस्य विशेषः चैतन्यादिलक्षणः वृत्तौ वक्ष्यमाणो भेदः **यथा** येन प्रकारेण **वेद्यो** ग्राह्यः **परमार्थतः** इति तन्मध्येकरणात् उभयत्र सम्बन्धनीयम् । **तथा** तेन प्रकारेण **बहिः** बहिरर्थे **उपेयतां** सत्सामान्यं पश्यतोऽर्थस्य तथा विशेषो वेद्यः निदर्शनम् अनन्तरनीत्या प्रसाधितं न पुनः प्रसाध्यते । § 755 162/mkj /ms

**कुतश्चिद्** इत्यादिना कारिकार्थमाह--**कुतश्चिदपि** न केवलम् एकस्मात् **स्वयम्** आत्मना **अव्यावृत्तं**, किम् ? **सामान्यं पश्यन्नेव** । किं कुर्यात् ?

१ विशेषाणां] व्याप्यभूतानाम् ।
१ *] व्यापकस्य सामान्यस्य ते विशेषा इति ।
२ त्र] व्याप्ये ।
३ श्चाद्भावात्] व्याप्ये ।
६ *] उभयकालभाविनः एकस्य ग्राहकप्रमाणाभावात् ।
६ वाच्च] क्रमभाव्युभयव्यापिनः एकस्य सिद्धौ तथाभूतस्यात्मनोऽपि सिद्धिः स्यादिति भावः ।
८ त्र] प्रत्यक्षाभावे ।
८ भावेऽस्याभावादिति] अनुमानस्याप्यभावादिति ।
१८ स्यैव] सर्वतोऽव्यावृत्तत्वात् ।
२२ र्थे] र्थः

इत्याह--**गृह्णीयात्** । किम् ? **चैतन्यम्** कर्म तद्विशेषम् । कथम्भूतं तत् ? इत्यादि **अचेतनव्यवच्छिन्नम्** । कोऽसौ गृह्णीयात् ? इत्याह--**आत्मा** जीवः । पुनरपि किं कुर्वन् ? इत्याह--**प्रयतमानः** । किं कर्तुम् ? इत्याह--**गृहीतुं चैतन्यम्** इति सम्बन्धः । पुनरपि कथंभूतम् ? इत्याह--**द्रव्य** इत्यादि । कथम् ? **क्रमेण** । **ततः** तस्मादूर्ध्वं कथंभूतः ? इत्याह--**प्रत्यक्ष** इत्यादि । दृश्यस्वभाव इत्यर्थः । ननु आत्मनो निषेधात् कथमेतदिति चेत्; अत्राह--**स्वयम्** इत्यादि । **स्वयम्** आत्मना **अविप्रतिषिद्धो**ऽनिराकृतः प्रथमप्रस्तावेऽत्र च चिन्तितमेतत् । तर्हि तस्याविशेषात् सर्वं सर्वदा सर्वत्र गृह्णीयादिति चेत्; अत्राह--**यथा** इत्यादि । **सामर्थ्यस्य** अनतिक्रमेण गृह्णाति । एतत् प्रकृते योजयन्नाह--**यथा** इत्यादि । **यथा** येना व्यापकग्रहणपूर्वव्याप्यग्रहणप्रकारेण, यदि वा **यथा** शक्तिग्रहणप्रकारेण **अन्तर्गृह्णाति तथा च** तेनैव प्रकारेण **[बहिः]** गृह्णाति **इत्येवम् अवगन्तव्यम्** । तथा च यदुक्तं प्र ज्ञा क रे ण--**यदवभासते तज्ज्ञानं यथा सुखादि, अवभासते च** /ms **नीलादिकम्, जडस्य प्रतिभासाऽयोगात्** इति; तदनेन निरस्तम्; ज्ञानवत् जडस्यापि [प्रति]भासाविघातात् । अयं तु विशेषः--ज्ञानस्य स्वतः इतरस्य परतः इति । न च तदपह्नवो युक्तः, स्तम्भादिकमहं वेद्मि इति प्रत्ययात् तत्प्रतीतेः, अन्यथा नीलादौ कः समाश्वासः ? कथं स तस्य ग्राहकः इत्यपि न चोद्यम्; स्वरूपस्य कथं ग्राहकः इत्यपि चोद्यप्रसङ्गात् । स्वरूपवत् पररूपस्यापि ग्राहकः प्रतीयते इति न विशेषः । शेषं पुनरत्र परस्य भाषितम्--कार्यकारणभावम् अनुमान-समारोप-व्यवच्छेद्य-व्यवच्छेदकभावं चित्रैकज्ञानाद्वैतम् अन्यद्वा विज्ञप्तिमात्रेऽपि निराकरोति इति निरूपयिष्यते । § 756

यत्पुनरेतत्--**नीलादि ज्ञानं चक्षुरादिव्यापारानन्तरम् उप[लभ्य]मानत्वात् तद्ग्राहकाभिमतज्ञानवत्** इति; तत्र तन्न नीलं तद्व्यापारानन्तरम् उपलभ्यमानत्वात् शङ्खवत् इत्यस्यापि प्रसङ्गः । प्रमाणबाधनमुभयत्र । § 757

किञ्च, चक्षुरादेर्बहिरर्थत्वे दर्शनाभावेन न तद्व्यापारानन्तरं तदुपलम्भ इति हेतोरसिद्धिः दृष्टान्तस्य च साधनविकलता, *अन्यस्य चक्षुरादेर्लिङ्गस्य वा व्यापारानन्तरं तदुपलम्भभावे वा प्रकृतहेतोर्व्यभिचारः, *ज्ञानत्वे तद्व्यापारान-

---

२ इत्यादि] इत्याह
८ त] आत्मनो नित्यस्य ।
१० येना] न
१७ यात्] परतः ।
१७ स] प्रतिभासः ।
१७ स्य] जडस्य ।
१९ स्य] बौद्धस्य ।
२० अनु] अनु मानेन समारोपस्य व्यवच्छेदः क्रियते इति तयोः व्यवच्छेद्यव्यवच्छेदकभावः ।
२३ त्] तुलना--नीलान्न व्यतिरेकेण विषयि ज्ञानमीक्ष्यते । ज्ञानपृष्ठेन भेदस्तु कल्पनाशिल्पिनिर्मितः ॥--प्र॰ वार्तिकाल॰ पृ॰ ४०६ ।
२४ त्र] नीलं न नीलम् इत्यप्यनुमानं स्यादित्यापादयति ।
२६ न] चक्षुरादि ।
२६ रं] नीलाद्युपलम्भः ।
२७ *] भिन्नरूपेण ।
२८ *] चक्षुरादीनां ज्ञानत्वे ।

न्तरं नीलद्युपलम्भेऽपि न परस्य *तज्ज्ञा नस्य उपलम्भ इति दृष्टान्ताऽसिद्धिः 163/mkj । अथ अर्थवादिनः तत् सिद्ध[मि]ति न दोषः; तद् यदि प्रमाणतः सिद्धम्; सौगतस्यापि सिद्धम्, प्रमाणस्य क्वचित् पक्षपाताभावात् । तथा च **न नीलादेः परं ग्राहकम्** इत्यस्य व्याघातः । यदि पुनः अप्रमाणतः; तर्हि न निदर्शनम्; अप्रमाणसिद्धस्य तदयोगात् हेतुवत्, *इतरथा चाक्षुषत्वादिकमपि हेतुः स्यादिति यत्किञ्चिदेतत् । /ms § 758

यत्पुनरेतत्--**जाग्रत्स्तम्भादि ज्ञानम् वासनाकार्यत्वात् कामशोकाद्युपप्लुतदृष्टकामिन्यादिवत्** इति; तदपि न सारम्; यतः तस्य परं प्रति तत्कार्यत्वासिद्धेः । ततः सूक्तम्--**यथा अन्तः** इत्यादि । एवमपि [न] बहिरर्थस्य सामान्यविशेषात्मकस्य प्रतिभासनं तस्य वा संभवो निषेधादिति चेत्; अत्राह--**प्रत्यक्ष** इत्यादि । **प्रत्यक्षो** यः सामान्यरूपः स्वभावभेदः वस्तुन आत्मभूतो विशेषः संभाव्यः, यच्च **परोक्षा** असाधारणलक्षणः स्वभावभेदः तयोः **एकः** साधारण **आत्मा** स्वभावो यस्य स तथोक्तः तस्य । कस्य ? **प्रमेयस्य** बहिर्ग्राह्यस्य **प्रतिषेद्धुं** निराकर्तु**मशक्यत्वात्** अन्यथा तथा वित्तेरपि निषेधः स्यादिति मन्यते । तर्हि बहिरन्तर्वा असाधारणरूपेणेव साधारणेनापि रूपेण अप्रत्यक्षताऽस्त्विति चेत्; अत्राह— **कथञ्चिद्** इति । **अप्रत्यक्षत्वे** वस्तुनः प्रत्यक्षत्वाभावे **कुतो** लिङ्गादेर्न कुतश्चित् **संभावयेद् वस्तु** अनुमानेन विषयीकुर्यात् **लिङ्गादेरसिद्धेः** कथञ्चिदसाधारणवद् **गाढनिद्राक्रान्त इव** तद्वदिति । § 759

प्रस्तावार्थोपसंहारकारिकां **सद्रूपम्** इत्यादिकामाह-- § 760

...24 सद्रूपं सर्वतो वित्तेः तद्विविक्तं विवेचयेत् ।
चिदात्मा परिणामात्मा पुनः कालादिभेदकृत् ॥ २४ ॥§ 762

सर्वं चेतनेतरसामान्येन वस्तुसत्त्वं पश्यन्नेव अचेतनं चेतनाद् व्यवच्छिन्दन् परिच्छिनत्ति जनः । पुनस्तमेव अन्यतोऽचेतनाद् व्यवच्छिन्दन् तद्वर्णसंस्थानादिविशेषान् क्रमशः कालादिभेदेन परिच्छिनत्ति नान्यथा । अन्तरङ्गस्य प्रतिपत्तावयमेव क्रमः— स्वपरचैतन्यसामान्यमचेतनाद्विविक्तं परिच्छिद्य पुनः परस्माद् व्यवच्छिद्य क्रमेण विशेषान् परिच्छिनत्ति निष्कल [स्वभावानवधारणात् ।] § 763

---

१ स्य] द्वितीयस्य ।
१ *] तद्ग्राहकाभिमतस्य ज्ञानस्य ।
२ वादिनः] ग्राहकाभिमतं ज्ञानम् ।
५ *] अप्रमाणसिद्धस्य दृष्टान्तत्वे ।
५ था] अनित्यः शब्दः चाक्षुषत्वात् ।
७ त्] तुलना--वासनाबलभावित्वे बोधतैव प्रसज्यते । वासना स्मृत्यभिज्ञानकारणत्वेन लक्षिता ॥--प्र० वार्तिकाल० पृ० ३१९ ।
८ स्य] जैनं प्रति ।
८ ति] वासनाकार्यत्वासिद्धेः ।
१२ च्च] श्च
१२ रोक्षा] क्षो

अत्रायमर्थः--**चिदात्मा विवेचयेत्** गृह्णीयाद् दर्शनस्वभावः । किम् ? /ms इत्यत्राह— **सत्** सत्तासामान्यं § 764

***जं सामान्यग्रहणं दर्शनमिति भण्णये समये** ।गो॰ जी॰ गा॰ ४८१ 164/mkj इत्यभिधानात् तद् वैशेषिकादिकल्पितं गृह्णीयात्; इत्यत्राह— **रूपं** स्वभावम् । कस्य ? इत्यत्राह--**वित्तेर्बुद्धेः** आत्मन इत्यर्थः । **पुनः** पश्चात् **तद्विविक्तं** विभिन्नम् । कुतः ? अन्यस्मात् विजातीयादचेतनात् अवग्रहरूपः सन् विवेचयेत्, पुनः **सर्वतो** विविक्तं सजातीयाद् विजातीयाच्च आकाङ्क्षादिपरिणामात्मा पुनश्च **कालादिभेदकृत्** कालादिभिः भेद्यस्य ततथोक्तम् **रूपम्** इति सम्बन्धः, कालादिविशिष्टं तद् विवेचयेत् । § 765

इयम् अपरापरायोजातिका **सत्सत्** इति यद् **रूपं** सर्वभावानां साधारणं तद् **विवेचयेत्,** पुनः पुद्गलेतत्स्वभावं तद् विवेचयेत् । कथम्भूतम् ? **सर्वस्या** * **विविक्त वित्तेः** सकाशात् अन्यस्माद् वित्तेः अर्थान्तरात् पुद्गलान्तरादिति यावत् **सर्वतो** निरवशेषात् । पुनरपि **कालादिना भेदं** कुर्वाणा * **विवेचयेत्** इति । § 766

कारिकां विवरीतुमाह--**सर्व** इत्यादि । **सर्वं चेतरसामान्येन** तत्साधारणत्वेन **वस्तुनः सत्त्वं पश्यन्नेव अचेतनं** पुद्गलं **परिच्छिनत्ति जनः** आत्मा वा । किं कुर्वन् ? इत्याह--**व्यवच्छिन्दन्** पुद्गलम् इति । कुतः ? **चेतनात्,** पुनरपि **तमेव अन्यतः अचेतनाद्** अर्थान्तरतः पुद्गलान्तरात् **व्यवच्छिन्दन् तस्य** पुद्गलस्य **वर्णसंस्थानादिविशेषान् क्रमशः परिच्छिनत्ति** । कथम् ? /ms **कालादिभेदेन** आदिशब्देन क्षेत्रादिपरिग्रहः **नान्यथा** नाऽपरेण प्रकारेण । ननु प्रत्यक्षतोऽनुमानतो वा कालस्याऽग्रहे कथं तद्भेदेन परिच्छिनत्तीति चेत्; न सदेतत्; व्यवहारकालस्य प्रत्पर मार्थकालस्य *तर्कविषयत्वात् । § 767

द्वितीयां कारिकायोजनिकां दर्शयन्नाह--**अन्तरङ्ग** इत्यादि । **अन्तरङ्गस्य** चैतन्यस्य **प्रतिपत्तौ अयमेव** नान्यः **क्रमः** । तमेव दर्शयन्नाह--**स्वपर** इत्यादि । **सर्वं चेतनेतरसामान्येन वस्तुसत्त्वं पश्यन्नेव** इत्यनुवर्त्तते । ततोऽयमर्थः--

---

३ *] जं सामण्णं गहणं भावाणं णेव कट्टुमायारं । अविसेसदूण अट्ठे दंसणमिदि भण्ण+ए सम+ए ॥--गो॰ जी॰ । उद्धृतेयं गाथा धवलाटीकायाः सत्प्ररूपणायाम् । जं सामण्णग्गहणं दंसणमेयं विसेसियं णाणं ।--सन्मति॰ २ । १ ।
३ मिति] सामण्णं गहणं दंसणमिदि
४ भिधानात्] सामान्यम् ।
८ स्य] भेदो यस्य
१० रायोजातिका] अपरा योजनिका[[व्याख्या ।]]
११ भावं] [[तत् सत् द्विविधं पुद्गलात्मकम् पुद्गलभिन्नजीवादिरूपं च इत्यादिरूपेण ।]]पुद्गलेतरस्वभावं
१२ *] सर्वतः सर्वस्मात्
१२ विविक्त] क्तं
१४ *] णं
१५ र्व] र्वं
१५ र] चेतनेतर
२१ थं] कालादिभेदेन ।
२२ स्य] पलघटीमुहूर्तादिरूपस्य ।
२२ र] प्रत्यक्षत्वात् पर
२२ स्य] कालाणुरूपस्य ।
२२ *] अनुमान ।

*तत्सामान्येन तत्पश्यन्नेव **स्वपरचैतन्यसामान्यम् अचेतनाद्विविक्तं परिच्छिद्य पुनः परस्माद्** आत्मान्तराद् आत्मानं **व्यवच्छिद्य क्रमेण विशेषान्** अवग्रहादीन् स्वभावान् **परिच्छिनत्ति** इति । कुत एतत् ? इत्यत्राह--**निःकल** इत्यादि । सुगमम् । § 768

तद्विभ्रमैकान्ते बहिरर्थप्रतिपत्तिवत् सन्तानान्तरप्रतिपत्तिरपि सौगतस्य दुर्लभेति दर्शयन्नाह कारिकाम्--**बुद्धिपूर्वाम्** इत्यादिकाम् । § 769

...25 बुद्धिपूर्वां क्रियां दृष्ट्वा स्वदेहेऽन्यत्र तद्ग्रहात् ।
ज्ञायते बुद्धिरन्यत्र अभ्रान्तैः पुरुषैः क्वचित् ॥ २५
॥§ 771

165/mkj

स्वयं व्यापारव्याहारनिर्भासविज्ञानस्यैव साक्षात् चिकीर्षाविवक्षाप्रभवनियमः संभाव्येत इति कल्पने प्रमाणाभावात् । बुद्धिपूर्वा क्रियैव व्यापारव्याहारात्मिका परोक्षबुद्धेर्हेतुरिति स्वल्पमुक्तम्, आकारविशेषस्यापि हेतोरविप्रतिषेधात् । सुषुप्तादौ तयोरभावेऽपि कथमयं स्वभावविप्रकर्षिणाम् इन्द्रियायुनिरोधमनुपलब्धेर्विजानीयात् ? यतः स्थावरेषु तन्निरोधलक्षणस्य मरणस्य असंभवमाचक्षीत । यदि पुनरायुर्निरोधमेव मरणं किं स्याद्यतस्तद् विज्ञानादिनिरोधेन विशिष्यते ? न जाने अहमपि ईदृशम् । तदयं स्ववेदनमद्वयं परिच्छिन्नव्यवधानमलक्षयन् परचित्तमत्यन्तपरोक्षं कुतश्चित् परिच्छिनत्ति व्यवच्छिनत्तीति च निष्प्रमाणिकैवास्य प्रवृत्तिः । § 772

**बुद्धिः पूर्वं** कारणं यस्याः ताम् । काम् ? **क्रियाम्** । किम् ? **दृष्ट्वा** । क्व ? **स्वदेहे** । **अन्यत्र** परदेहे **तद्ग्रहात्** बुद्धिपूर्वक्रियाग्रहात् **ज्ञायते बुद्धिरन्यत्र** इति पदघटना । कैः ? **अभ्रान्तैः पुरुषैः क्वचित्** तमात्रे बुद्धिसामान्ये न विभ्रमैः न नानाविभ्रमैर्ज्ञायते तल्लिङ्गस्य वाहारादेरर्थवदसितिभासवहारादि प्रतिभासस्यापि निरालम्बनत्वादिति मन्यते । § 773

स्यान्मतम्--जाग्रद्दशायां व्यापारादिनिर्भासः साक्षात् चिकीर्षादेः, अन्यत्र पारम्पर्येण ततोऽयमदोष इति; तत्रोत्तरमाह--**स्वयम्** इत्यादि । **स्वयम्** आत्मना **व्यापारः** कायस्य चेष्टा **व्याहारो** वचनस्व तयोर्**निर्भासो** यस्मिन् /ms

१ *] चेतनेतरसामान्येन ।
१ त्सामान्येन] वस्तुसत्त्वम् ।
८ चित्] उक्तं च--बुद्धिपूर्वां...मन्यते बुद्धिसद्भावः सा न येषु न तेषु धीः ॥ --त० वा० पृ० २६ । धर्मकीर्तिकृतसन्तानान्तरसिद्धौ प्रथमश्लोकोऽपि ईदृश एव । पूर्वार्धः--न्यायवि० वि० प्र० पृ० ३०३ ।
२० मात्रे] तन्मात्रे
२१ ते] ?
२२ हारादि] व्या[[वचनादेः ।]]हारादेरर्थवदसत्त्वात्, व्याहारादि
२३ व्यापा] हा
२३ अ] सुषुप्त्यनन्तरं प्रबोधावस्थायाम् ।
२५ स्व] वचनं च

**विज्ञाने** तत् तथोक्तं तस्**यैव चिकीर्षाविवक्षाप्रभवनियमः सम्भाव्येत** । कथम् ? इत्याह--**साक्षात् इत्येवं कल्पने प्रमाणाभावात्** । § 774

यस्तु प्र ज्ञा क रः स्वप्नान्तिकशरीरवादी स्वप्नदशायामपि व्याहारादिनिर्भासज्ञानस्यापि साक्षात् चिकीर्षादिप्रभवनियममभ्युपगच्छति; तत्र तस्य बहिर्निर्भासज्ञानस्यापि साक्षात् बहिरर्थतत्त्वप्रभवनियमसिद्धेर्विज्ञप्तिमात्रवादो निरालम्बः स्यात् । § 775

यत्पुनरुक्तं तेनैव--**सन्तानान्तरस्यानभ्युपगमात् तदसिद्धिर्न दोषाय** इति; तदपि न सत्यम्; यतो योगाचारं प्रत्यस्य दोषस्याभिधानात् प्रतिभासाद्वैतवादिनं प्रति विपर्ययात्--तस्य हि न्नित्यवत् स्वप्रतिभासस्यापि विचार्यमाणस्य घटनायोगात् सर्वाऽभाव एव दोषः इति किं तद्दूषणाभिधानेनेति । § 776

सांप्रतं सन्तानान्तरहेतोः परप्रयुक्तस्य भागाऽसिद्धतादर्शयन्नाह--**बुद्धिपूर्वा** इत्यादि । **बुद्धिपूर्वा** बुद्धिः कार्यभूता **क्रियैव,** कथम्भूता ? **व्यापारव्याहारात्मिका परोक्षबुद्धेः** देहान्तरबुद्धेः **हेतुः** लिङ्गम् **इत्**येवं **स्वल्पमुक्तम्** पक्षीकृते सर्वत्रास्या[अ]संभव इति भावः । अथ मंडादौतवः स च /ms 166/mkj अचेतनत्वाद् विपक्ष एव न पक्ष इति; तत्रोत्तरमाह--**[आ]कारविशेषस्यापि** इत्यादि । न केवक्तं तत्क्रिया[या]एव, कस्यचित् लोकप्रसिद्धस्य अनुमेयबुद्धिसहचरस्य धर्मान्तरधर्मस्यादिः सम्बन्धिनः चैतन्यस्य **हेतोः** लिङ्गस्य **अविप्रतिषेधात्** । एतदुक्तं भवति--तत्र चैतन्याभावे स विपक्षः स्यात् । न चैवम्, तद्व्यवस्थापकप्रमाणान्तरभावादिति । § 777

किंच, तत्क्रियातः परदेहे चैतन्यरहितं तद्विपक्षः, न वास्य तत्र चैतन्याभावग्राहकमस्तीति दर्शयन्नाह--**सुषुप्तादौ** इत्यादि । **स्वभावविप्रकर्षिणां** पक्षसपक्षाभ्याम् अन्यस्य इति वक्तव्ये इन्द्रियायुग्रहणम् उत्तरदूषणदित्सया, **कथं** केन प्रकारेण न केनचिद् **अयं** सौगतः **निरोधम्** अभावं **विजानीयात्** यतः कश्चिद् विपक्षः स्यात् । कुतो न विजानीयात् ? इत्यत्राह--**अनुपलब्धि** इत्यादि । ननु तत्कार्यस्य व्याहारादेरदर्शनात् निरोधं विजानीयादिति चेत्; अत्राह--**सुषुप्तादौ** । आदिशब्देन मूर्च्छितादिपरिग्रहः **तयोर्व्यापारव्याहारयोरभावेऽपि** । § 778

---

३ स्व] स्वप्नान्तिकशरीरसञ्चारदर्शनात्... --प्र॰ वार्तिकाल॰ २ । ५४, पृ॰ ७२ । यथा स्वप्नान्तिकः कायस्त्रासलङ्घनधावनैः । जाग्रद्देहविकाराय तथा जन्मान्तरेष्वपि ॥--प्र॰ वार्तिकाल॰ २ । ३७ ।
८ योगा] अनेकविज्ञानसन्तानवादिनं प्रति ।
९ त्] तन्नियमवत्
१० त] सन्तानान्तरासिद्धिप्रसङ्गरूपेण ।
११ ता] तां
१२ बुद्धिः] द्धेः
१४ वः] अथ तर्वादौ न[[व्यापारव्याहारात्मिका क्रिया ।]],
१६ त] बुद्धिपूर्वायाः क्रियाया एव ।
१७ स्यादिः] धर्म्यन्तरधर्मस्यापि
१८ त] तर्वादौ ।
२० त] बुद्धिपूर्वक्रियातः ।
२० हितं] चैतन्ये तद्रहितं
२० वा] चा
२२ ग्र] ग्रं
२५ ब्धि] ब्धेः

ननु तस्याः क्रियायाः अभावेऽपि तदभावेऽपि इति वक्तव्ये किमर्थम्--**तयोः** इति वचनम् ? असन्देहार्थम्, इतरथा आकारविशेषस्य अभावेऽपि तदभावेऽपि इत्यपि मतिः स्या भावात्  **कथं** तेषां तं **विजानीयात्** इति सम्बन्धः । एवं मन्यते  प्रतिबद्धसामर्थ्यस्य कार्याऽभावादभावावगतिः, न /ms चैवं चैतन्यमिति । § 779

प्र ज्ञा क र स्त्वाह--**तत्रापि चैतन्यस्याभावे अन्यथा अवस्थाचतुष्टयाभावः** इति; न स युक्तकारी; प्रबोधाऽभावप्रसङ्गात्, विनष्टात् कारणात् कार्यानुत्पत्तेरिति निवेदयिष्यते अत्रैव अनन्तरप्रस्तावे । तेषां निरोधमजानतो यदपरं प्राप्तं तद्दर्शयन्नाह--**यतः** इत्यादि । **यतो** यस्मात् निरोधविज्ञानात् **स्थावरेषु** *तर्वादिषु **तन्निरोधलक्षणस्य असंभवं मरणस्य आचक्षीत** । **यत** इति वा आक्षेपे नैव आचक्षीत । § 780

अत्र पार्श्ववर्त्ती कश्चिदाह--**यदि पुनः** इत्यादि । **यदि पुनः आयुर्निरोधमेव मरणम्; किं स्यात्** किं दूषणं भवेत् **यतो** दूषणात् तन्मरणं **विज्ञानादिनिरोधेन** आदिशब्देन इन्द्रियनिरोधेन **विशिष्यते** इति ? अत्र आचार्यो दूषणमपश्यन् आह--**न** इत्यादि । **न जानेऽहमपि** न केवलम् अन्यो न जानाति **ईदृशं** परेण यादृशमुक्तम् । § 781

उपसंहारमाह--**तद्** इत्यादिना । यत एवं **तत्** तस्माद् **अयं** सौगतः **स्ववेदनमद्वयम् अलक्षयन्** । कथंभूतम् ? इत्याह--**परिच्छिन्न** इत्यादि, स्वतादात्म्यव्यवस्थितमित्यर्थः । यदि वा **परिच्छिन्नं** प्रमाणेनानवगतम्  स्वपरग्रहणे व्यवधानहेतुत्वाद् **व्यवधानम्** आवरणकारणं कर्म यस्येति व्याख्येयम्, स्वसंवेदनैका[न्तो]पगमादिति मन्यते । स किं करोति ? इत्याह--**पर** /ms, इत्यादि । **परचित्तम्** । कथंभूतम् ? **अत्यन्तपरोक्षं कुतश्चिद्** व्यापारादेः 167/mkj बुद्धिपूर्वकात् **परिच्छिनत्ति** स्वयं विषयीकरोति **व्यवच्छिनत्ति च** कुतश्चिद् वृक्षादेः व्याहारादितत्कार्याभावाद्वा **इत्येवं निःप्रमाणिकैव अस्य** बौद्धस्य **प्रवृत्तिः** सात्मकं जीवच्छरीरं प्राणादिमत्त्वात् इत्यस्मादन्य  न्यायस्याभेदादिति मन्यते । § 782

ननु यदुक्तम्--**कथञ्चिदसिद्धात्मनो बुद्धेः** इत्यादि; तदयुक्तम्; सच्चेतनादिरूपेणापि तस्याः प्रत्यक्षत्वादिति चेत्; अत्राह--**स्वतश्च**  इत्यादि । § 783

...26 स्वतश्चेत्सर्वथा सिद्धिः बुद्धेः किं तत्र हेतुना ।

३ भावात्] स्यात् । भवान्
६ स्याभावे] वः
९ तो] बौद्धस्य ।
१० *] विज्ञानेन्द्रियायुर्निरोधलक्षणस्य मरणस्यानेनाभ्युपगमात्, तस्य च तरुष्वसंभवात् ।--न्यायबि० ३ । ५९ ।
विज्ञानादिनिरोधो हि मरणं बौद्धबोधतः ।
असिद्धं यस्य तरुषु विज्ञानं तन्मतिस्तथा
॥--प्र० वार्तिकाल० पृ० ४६ ।
१९ म्] नावगतम्
२५ न्य] दस्य
२८ श्च] श्चेत्

स्वतश्चेत्सर्वथाऽसिद्धिः बुद्धेः किं तत्र हेतुना ? ॥ २६ ॥§ 785

यथैव ह्यवितर्कयतः समारोपव्यवच्छेदः न सविकल्पप्रत्यक्षमन्तरेण संभवति तथैव प्रत्यक्षविकल्पे च पुनः समारोपव्यवच्छेदस्मृतिः न कश्चिदर्थं पुष्णाति स्वतः समारोपानुत्पादात्, कृतस्य करणाभावात्, अन्यथा कृतस्य स्वतः सिद्धौ प्रमाणान्तरानर्थक्यासंभवौ प्रतिपत्तव्यौ । निर्लोठितं चैतदिति
§ 786

**स्वतः** परनिरपेक्षा **सिद्धिः** ज्ञप्तिः **चेद्** यदि **बुद्धेः सर्वथा** सदादिरूपेणेव रूपान्तरेणापि **किं** न किञ्चित् **तत्र** बुद्धौ **हेतुना** लिङ्गेन नीलाद्याकारेणेव सर्वाकारैः तस्याः प्रत्यक्षसिद्धत्वादिति भावः । तथा च **यदवभासते तज्ज्ञानं यथा सुखादि । यद् यथाऽवभासते तत्तथैव परमार्थसद् व्यवहारावतारि यथा नीलं नीलतयाऽवभासमानं तथैव तदवतारि, [अव] भासन्ते च क्षणिकतया सर्वे भावः** इत्यादि प्र ज्ञा क र स्य विज्ञानैकान्तवादिनो न कश्चिदर्थं पुष्णाति समारोपव्यवच्छेदस्य निराकरिष्यमाणत्वादनन्तरम् । **स्वतश्चेत् सर्वथाऽसिद्धिः बुद्धेः किं तत्र हेतुना** धर्माद्यसिद्धौ हेतोरप्रवृत्तिरिति भावः । § 787

सौत्रान्तिकं प्रति प्रतिपादितं दूषणं समानं योगाचारस्यापीति मन्वान आचार्यः तदेव दृष्टान्तीकृत्य **तथैव** इत्यादिना कारिकां विवृणोति । **यथैव**
/ms **हि** येनैव हि प्रकारेण सौत्रान्तिकस्य **न संभवति** । किम् ? इत्याह--**समारोपव्यवच्छेदः**, समारोपव्यवच्छेदहेतुत्वाद् अनुमानं तद्व्यच्छेद इत्युच्यते । किमन्तरेण ? **सविकल्पप्रत्यक्षमन्तरेण** निर्विकल्पप्रत्यक्षाद् इत्यभिप्रायः । किं कुर्वतः ? **[अ]वितर्कयतः** धर्मादिकन निश्चिन्वतः, न च अनिश्चितं तदनुमानाय प्रभवति, शेषमत्र चिन्तितम् । यद्वक्ष्यते--**निर्लोपितं चैतद्** इति । तर्हि सविकल्पकप्रत्यक्षेमति स भवति इत्याह--**प्रत्यक्ष** इत्यादि । **प्रत्यक्षस्य विकल्पे वा** भेदे च व्यवसायमकेव प्रत्यक्षे मतिः * **पुनः समारोपव्यवच्छेदस्मृतिः** क्षणिकाद्यनुमानं **न कश्चिदर्थं पुष्णाति** क्षणिकत्वादेः प्रत्यक्षतो निर्णयादिति भावः । समारोपव्यवच्छेदं करोतीति चेत्; अत्राह--**स्वतः** इत्यादि । स्वयं **समारोपानुत्पादात्**, निश्चये तदयोगात्, **निश्चयारोप-**
168/mkj **मनसोः बाध्यबाधकभावातः** प्र० वा० १ । ५० इति वचनात् **न कश्चिदर्थं पुष्णाति** इति मन्यते । तथापि तत्करणे दूषणमाह--**कृतस्य करणाऽभावात्**

१२ इत्यादि] पृ० २ टि० १० ।
१२ इत्यादि] निश्चयचित्तस्य आरोपचित्तस्य च परस्परं बाध्यबाधकभावात् ।
१२ स्य] अनुमानम् ।
१३ पुष्णाति] समारोपव्यवच्छेदं करोति इत्याशङ्कायामाह--।
१९ च्छेद] समारोपव्यवच्छेद इत्युच्यते कार्ये कारणोपचारात् ।
२१ न] धर्म्यादिकम
२२ त] धर्म्यादिकम् ।
२२ निर्लोपि] निर्लोठि
२३ ति] प्रत्यक्षेऽपि न संभवति;
२४ वा] च
२४ केव] यात्मके च
२४ *] सति

इति । **अन्यथा** अनेन **कृतस्य** बुद्धेः **स्वतः सिद्धौ** निर्णीतौ **प्रमाणान्तरस्य** अनुमानस्य **आनर्थक्यम्,** *असिद्धा च **संभवः** तदानर्थक्याऽसंभवौ **प्रतिपत्तव्यौ । निर्लोठितं चैतदिति ।** § 788

एवं सौगतस्य अविकल्पकमध्यक्षं निराकृत्य वैशेषिकस्य सविकल्पकं तन्निराकर्तुमाह— **प्रत्यक्षम्** इत्यादि । § 789

...27 प्रत्यक्षं सविकल्पं चेत् सामान्यसमवायिनाम् ।
अनुस्यूतिधियो न स्युरेकस्यात्र विनिश्चयात् ॥ २७
‖§ 791

न हि भिन्नेषु द्रव्यादिष्वनुवृत्तिज्ञानं युक्तं सदृशप्रतीतिर्वा । तदेकसम्बन्धप्रतीतिरेव किन्न युज्यते भ्रान्तेरभावात् । न चैकवस्तुसम्बन्धमन्तरेण भिन्नेषु द्रव्यादिषु समानप्रत्ययो न भवति सामान्यानां स्वतः सत्त्वज्ञेयत्वादिप्रतीतेरभावप्रसङ्गात् । केषाञ्चित् स्वतः सत्त्वं नेतरेषामित्यस्यापि निष्प्रमाणिका प्रवृत्तिः, अन्यथा सामान्यसमवायानवस्थानुषङ्गात् सामान्यतद्वतोस्तादात्म्यं युक्तम् । समवायस्य समवायान्तराभावेऽपि वृत्तौ किं पुनरितरेषां तथैव वृत्तिर्न स्यात् । न च इह विषाणादिषु गौः शाखादिषु वृक्षः इति प्रतीतिः स्यात् । सामान्यसमवाययोर्व्यापित्वेऽपि क्वचिदेव समीहितप्रत्ययहेतुत्वं नान्यत्रेति वैचित्र्यसंभवे द्रव्यमेव चित्रं भवितुमर्हति । निरंशनिष्क्रियात्मनः सामान्यस्य समवायस्य च स्वविशेषव्यापित्वं कथं स्वस्थः प्रस्थापयेत् द्रव्याद्याधारभेदात् स्वरूपहानेः । तदेतत् प्रत्यक्षं द्रव्यपर्यायात्मकं युक्तम् ।
§ 792

**प्रत्यक्षं सविकल्पकं** व्यवसायात्मकं **चेद्** यदि । केषाम् ? इत्याह- /ms
-**सामान्य** इत्यादि । **सामान्येन समवायिनां** समवायवतां द्रव्यगुणकर्मणाम्, यदि वा, सामान्यानां समवायिनां च द्रव्य-गुण-कर्म-अन्त्यविशेषाणां समवायसम्बन्धवताम्, सामर्थ्यात् समवायस्यापि तद् इत्युक्तं भवति-- **नाऽगृहीतविशेषाणां विशेष्ये बुद्धिः** इति वचनात् । समवायाप्रत्यक्षत्वे समवायिनां तत् इति वक्तुशक्तेः । अत्र दूषणमाह— **अनुस्यूति** इत्यादि । सत्तासामान्येन द्रव्यगुणकर्मणाम्, तैश्च तस्य, द्रव्यत्वगुणत्वकर्मत्वसामान्येन

---

१ अनेन] अन्येन प्रकारेण
२ *] स्वतः असिद्धौ अनुमानस्य असंभव इति भावः ।
२ च] द्वौ अ
५ कं] प्रत्यक्षम् ।
२० कं] त्पं
२१ सा] द्रव्यत्वगुणत्वकर्मत्वादिना ।
२३ त] प्रत्यक्षम् ।
२४ विशेषाणां] विशेषणा
२४ इ] तुलना--विशिष्टबुद्धिरिष्टेह नचाज्ञातविशेषणा ।--मी॰ श्लो॰ अपोह॰ श्लो॰ ८८ ।
२५ त] प्रत्यक्षम् ।
२६ स्य] सत्तासामान्यस्य ।

द्रव्यादीनां प्रत्येकम्, तैः तस्य च, द्रव्येण गुणकर्मणाम्, तैः तस्य, अवयविनां , तै र्वा तस्य कथञ्चित्तादात्म्येन व्याप्तयः **अनुस्यूयतः** तासां **धियो** गृहीतयो **न स्युः, अत्र** अस्मिन् प्रत्यक्षे सविकल्पे सति अङ्गीक्रियमाणे वा । कुत एतत् ? इत्यत्राह--**एकस्य विनिश्चयात्** इति । एकस्य इत्यत्र 169/mkj वीप्सा द्रष्टव्या । ततोऽयमर्थः— एकस्य एकस्य असहायस्य असहायस्य स्वतन्त्रस्य वा सामान्यस्य द्रव्यस्य [गुणस्य] कर्मणोऽन्यस्य वा विनिश्चयात् । सन्निव ताः । ततः तदभावप्राप्तेः परस्य प्रमाणविरोध इति मन्यते । अत्रैवार्थे **नहि** इत्यादि वृत्तिर्भविष्यति । अथवा, सामान्यानां सत्त्वादीनां या **अनुस्यूतिधियः** इदं सामान्यम्, इदं सामान्यम् इति बुद्धयः, बहुवचनात् तथाभिधानानि च यानि ताः तानि च **न स्युः** इति । कुत एतत् ? /ms इत्यत्राह--**एकस्य** इत्यादि । एकस्य **एकस्य** अपरसामान्यसहायरहितस्य सत्त्वादिसामान्यस्य **विनिश्चयात्** । अत्रापि **न चैकवस्तुसम्बन्धम्** इत्यादि व्याख्यातम् । समवायिनां च या **अनुस्यूतिधियः** ताश्च **न स्युः**, बहुवचनं पूर्ववद् व्याख्येयम् । कुत एतत् ? इत्यत्राह--**एकस्य** इत्यादि । **एकस्य** असहायस्य द्रव्यस्य गुणस्य कर्मणः समवायस्य अन्यस्य [च] **विनिश्चयात्** । अत्र व्याख्यानम्--**समवायस्य** इत्यादि । **समवायस्य वा** स्वतन्त्रस्य समवायसम्बन्धरहितस्य **विनिश्चयात्** । अत्र व्याख्यानं **न चेह** इत्यादि ।
§ 793

**नहि** इत्यादिना कारिकार्थमाह--**नहि भिन्नेषु** । केषु ? इत्याह **द्रव्य** इत्यादि । तेषु किम् ? इत्यादि **अनुवृत्तिज्ञानं** सद् द्रव्यं सन् गुणः सत् कर्म इत्याद्यनुगमज्ञानं **युक्तम्** उपपन्नम् **सदृशप्रतीतिर्वा** अनेन अयं समानः इति बुद्धिर्वा नहि युक्ता इति सम्बन्धः । यत् परस्य युक्तं तदाह--किन्तर्हि **किन्न तेषां** द्रव्यादीनाम् **एकेन** असाधारणेन सामान्यादिना **सम्बन्धः** समवायः तस्य **प्रतीतिरेव युज्यते** नान्यानुभूतानामिक सूत्रसम्बन्धप्रतीतिवत् । यदि वा, ते च, एकं च सामान्यादि सम्बन्धश्च समवायः तेषां प्रतीतिरेव परस्परविलक्षणानां युज्यते । ननु समवायस्य अतिसूक्ष्मत्वेन अनुपलक्षणाद् भ्रान्त्या तदनुवृत्तिज्ञानमिति चेत्; अत्राह--**भ्रान्तेरभावात्** अनुवृत्तिज्ञानविभ्रमाऽयोगात् जातितद्वताम् अवयव-अवयविनां गुण-गुणिनां /ms क्रिया-तद्वतां सम्बन्धस्य च भेदेन निर्णये विभ्रमाऽभावात् । न वै खलु घट पटयोर्भिन्नयोः निर्णये[ए]कस्य अन्यतरानुवृत्तिप्रतीतिरिति मन्यते । § 794

१ तैः] द्रव्यादिभिः ।
१ स्य] द्रव्यत्वगुणत्वकर्मत्वसामान्यस्य ।
१ तैः] गुणकर्मभिः ।
१ स्य] द्रव्यस्य ।
२ विनां] अव यविना अवयवानाम्
२ विनां] अवयवैर्वा ।
२ स्य] अवयविनः ।
२ तः] तयः
६ स्य] विशेषस्य, अवयविनो वा ।
७ न्निव] सन्ति च
७ ताः] अनुस्यूतबुद्धयः ।
११ अप] द्रव्यत्वगुणत्वादीनि अपरसामान्यानि ।
२० इत्यादि] त्याह--
२२ स्य] वैशेषिकस्य ।
२४ नान्यानुभूतानामिक] नानामुक्तानामेक
२५ ते] द्रव्यादयः ।
३० स्य] घटस्य पटस्य वा ।

ननु यदुक्तम्--द्रव्यादिषु भिन्नेषु अनुवृत्तिज्ञानं सामान्यनिबन्धनं न भवति इति; तदयुक्तम्; अनुमानबाधनात् प्रतिज्ञायाः । तच्च अनुमानम्--द्रव्यादिषु भिन्नेषु अभिन्नं ज्ञानं ततो भिन्नविशेषणनिबन्धनं तत्प्रत्ययविशिष्टप्रत्ययत्वात् पुरुषे दण्डीतिप्रत्ययवत् इति चेत्; अत्राह— **नचैक** इत्यादि । **न च** नैव **एकेन वस्तुना** सामान्येन यः **सम्बन्धः तमन्तरेण भिन्नेषु द्रव्यादिषु समानप्रत्ययो न भवत्येव** अपि तु भवत्येव, प्रतिषेधद्वयेन प्रकृतार्थगतेः । कुत एतत् ? इत्यत्राह--**सामान्यानाम्** इत्यादि । **सामान्यानां** सत्त्वादिजातीनां **स्वतः** अन्यसम्बन्धरहितानाम् आत्मनैव **सत्त्वज्ञेयत्वादि** आदिशब्देन पदार्थत्वपरिग्रहः, तस्य **प्रतीतेरभावप्रसङ्गात्** । **नच** इत्यादिना गतेन सम्बन्धः । अस्ति च तत्प्रतीतिः, ततोऽनैकान्तिको हेतुरिति मन्यते । § 795

170/mkj

एतेन सामान्यं सामान्यम् इति प्रतीतिः चिन्तिता । § 796

ननु किमुच्यते--तदभावप्रसङ्गात् इति, यावता स्वत एव तेषां तत्र सामर्थ्यम्, तत एव सेति चेत्; अत्राह--**स्वतः** इत्यादि । **केषाञ्चित्** सामान्य-समवाय-अन्त्यविशेषाणां **सत्त्वं** विद्यमानत्वम्, अन्यथा प्रधानादिवत् कुतस्तद्व्यवस्था, नाऽपरसत्तासम्बन्धमन्तरेण अनुस्यूतिप्रत्ययहेतुत्वं **नेतरेषां** द्रव्यादीनाम् **इत्येवम् अस्यापि** वैशेषिकस्यापि न केवलं सौगतस्यैव /ms **निष्प्रमाणिका प्रवृत्तिः** । § 797

अत्र कश्चिदाह--सामान्यादौ सत्त्वज्ञेयत्वा वंसतिसभिष्यति * कुतो योगिनामपि ततः प्रधानादिविपर्ययेण सामान्यादिसिद्धिः ? कथं च सा तत्रोपचरिता ? भिन्नसत्तादिवस्तुसम्बन्धमन्तरेण उत्पत्तेः; द्रव्यादौ सा तथा स्यात्, अत्रापि तदभावाद् अप्रतीतेः । तदुक्तम्--**न पश्यामः क्वचित् किञ्चित् सामान्यं वा** सिद्धिवि० २ । १२ इत्यादि । तत्प्रतीतेः अत्र तदनुमानं च चिन्तितम् । यदि पुनस्तत्र तदुपचारात् अत्र सा भिन्नविशेषणनिमित्ता अन्यथा तदयोगादिति मतिः; सापि न युक्ता; अत्र उपचारात् तत्र मुख्या

---

२ अनुमान] द्रव्यगुणकर्मसु सत्सदिति प्रत्ययो विशेष्यव्यतिरिक्तानुगतनिमित्तनिबन्धनः भिन्नेषु अनुगतप्रत्ययात् कम्बलादिषु नीलद्रव्यसम्बन्धात् नीलं नीलमिति ज्ञानवत् ।...एवं दण्डीति ज्ञाने दण्डो निमित्तम्...--प्रश० व्यो० पृ० ६८७ । प्रश० कन्द० पृ० ३१३ ।

४ त्वात्] द्रव्यादिप्रत्ययात् विशिष्टप्रत्ययत्वात् ।

१२ भाव] सत्त्वज्ञेयत्वादिप्रतीतेरभावप्रसङ्गात् ।

१२ तेषां] सामान्यादीनाम् ।

१४ धा] सांख्याभिमत ।

१५ र] स्था, स्वतः अपर

१८ *] त्वादौ असति सा मिथ्या इति

१९ तः] सत्त्वादिप्रतीतेः ।

२० त] सामान्यादौ ।

२० भिन्न] भिन्नविशेषणं मुख्यं दण्डादिवत्--प्र० वार्तिकाल० १९५ ।

२० उत्प] इति चेत्; ।

२० था] उपचरिता ।

२१ त] भिन्नसत्तादीनां सम्बन्धाभावात् ।

२१ भावाद्] भिन्नस्य सामान्यस्य अप्रतीतेः ।

२२ तीतेः] द्रव्यादौ ।

२३ त्र] सामान्यादौ ।

२३ निमित्ता] अत एव मुख्या ।

२४ अत्र] द्रव्यादौ ।

२४ त्र] सामान्यादौ ।

इत्यस्यापि प्राप्तेः । न च स्वयंकल्पितात् मुख्योपचारविभागात् तत्त्वसिद्धिः; अतिप्रसङ्गादिति । § 798

अपरस्त्वाह--सामान्यं सामान्यम् इत्यनुस्यूतिप्रत्ययस्य समवायहेतुत्वात् **स्वतः** इत्याद्ययुक्तमिति; तन्न; इदमिहेतिप्रत्ययस्य तन्निमित्तत्वात्, इतरथा घटोऽयं घटोऽयम् इत्यादेरपि प्रत्ययस्य तन्निमित्तत्वसिद्धेः किं सामान्येन ? अपि च, किमिदं सामान्यं नाम इति प्रश्ने किमुत्तरं वक्तव्यम् ? एकम् अनेकवृत्ति तत् इति चेत्; अवयविद्रव्य-संयोग-द्वित्वादिसंख्यादौ प्रसङ्गः । अनुवृत्तिविज्ञाननिमित्तमिति चेत्; समवायः सामान्यं प्रसक्तम् इति न सामान्यं सामान्यम् इति ज्ञानं तन्निमित्तमिति साधूक्तम्--**स्वतः** इत्यादि । भवतु तर्हि सामान्यादीनामपि अन्यतः सत्त्वमनुस्यूतिप्रत्ययहेतुत्वं चेति
/ms चेत्; अत्राह--***अन्यथा*** इत्यादि । अन्येन स्वतः ततप्रत्ययहेतुत्वाभावप्रकारेण अन्यतः तद्भावप्रकारेण **सामान्यानां समवायस्य च अनवस्थाऽनुषङ्गात् अस्यापि निष्प्रमाणिका वृत्तिः** इति सम्बन्धः । तथाहि--द्रव्यादिवत् यदि सामान्यानामपि अपरसामान्यसम्बन्धात् सत्त्वं तत्प्रत्ययहेतुत्वं वा; तर्हि तत्सम्बन्धात्तस्यापि अपरसत्सम्बन्धात् तस्याप्यपरसत्सम्बन्धादित्यनवस्था । समवायस्यापि अन्यतः तत्त्वे; अन्यस्य समवायस्य चान्यः समवाय इति समवायानवस्था । § 799

171/mkj

* अथ मतम्--सामान्यसमवायानवस्था अथ मतम्--सामान्यसमवायानामपि सत्तासम्बन्धे; द्रव्यादिवदपरसामान्यसम्बन्धः स्यात्, न चैवमिति । अयमपि परस्यैव दोषोऽस्तु न जैनस्य, तेन क्वचिदन्यतस्तत्त्वानभ्युपगमात् । कुत एतत् ? इत्यत्राह--**सामान्य** इत्यादि । [सामान्यतद्वतोः] जातितद्वतोः **तादात्म्यं** कथञ्चिदेकत्वं **युक्तम्** उपपन्नं यत इति । § 800

एवं तावद् द्रव्यादिभ्यो भिन्नं सामान्यं निराकृत्य सांप्रतं तत्सम्बन्धं निराकुर्वन्नाह— **समवायस्य** इत्यादि । ननु सोऽपि **समवायानवस्थानुषङ्गात्** इत्यनेन निरस्तः; सत्यम्; तथापि परतो जात्यादीनां तत्त्वे निरस्ते इदानीमन्यथापि निराक्रियत इति विशेषः । अत्र परस्य अनेकं दर्शनम्--
/ms स्वत एव समवायिषु समवायो वर्त्तते इत्येकम् । विशेषणीभावसम्बन्धात्

---

४ त्वात्] समवायहेतुकत्वात् ।
७ त्] स्वविषयसर्वगतमभिन्नात्मकमनेकवृत्ति...--प्रश॰ भा॰ पृ॰ ३११ ।
७ द्वित्वादिसंख्यादौ] सामान्यत्वप्रसङ्गः अनेकवृत्तित्वात् ।
८ म्] समवायेऽपि समवायः समवायः इत्यनुवृत्तिज्ञाननिबन्धनं भवत्येव ।
९ ज्ञानं] समवायनिमित्तम् ।
११ प्र] तत्प्र
१३ अस्यापि] वैशेषिकस्यापि ।
१६ त्वे] सत्त्वे तत्प्रत्ययहेतुत्वे च ।
१८ *] एतच्चिह्नान्तर्गतः पाठः पुनर्लिखितः ।
२० पि] वैशेषिकस्यैव ।
२६ अत्र] वैशेषिकस्य ।
२७ म्] अविभागिनो वृत्त्यात्मकस्य समवायस्य नान्या वृत्तिरस्ति तस्मात् स्वात्मवृत्तिः ।--प्रश॰ भा॰ पृ॰ ३२९ ।

इत्यपरम् । न वर्त्तते इत्यन्यत् । तदेतद् दर्शनत्रयं चेतसि व्यवस्याप्य प्रथमे तावद् दूषणं योजयति--**समवायस्य समवायान्तराभावेऽपि** स्वत एव इति यावत्, **वृत्तौ** समवायिषु वर्त्तते अङ्गीक्रियमाणे **किं पुनः इतरेषां** द्रव्यादीनां **तथैव** येनैव प्रकारेण समवायस्य तेनैव **वृत्तिर्न स्यात्** ? स्यादेव । तथा च किं समवायकल्पनयेति भावः । अत्रैव दूषणान्तरमाह--**न च** इत्यादि । **न च इह विषाणादिषु गौः शाखादिषु वृक्षः इत्येवं प्रतीतिर्बुद्धिः स्याद्** भवेत्, समवायस्य कार्यत्वेन सम्बन्धिनी इति सम्बन्धः । एवं मन्यते इह विषाणादिषु गौः शाखादिषु वृक्षः इति बुद्धेः समवायः साध्यते तत्कार्यभूतायाः, यदा तु समवायः स्वत एव क्वचिद् वर्तते तह समवायो वर्त्तते इति बुद्धिर्न समवायनिमित्ता यथा तथा *प्रकृतापि इति, अनेन तद्धेतोर्व्यभिचार उक्तः । द्वितीये **समवायस्य समवायान्तराभावे अपि**शब्दाद् अन्यस्य विशेषणीभावसम्बन्धस्य भावे **वृत्तौ किं पुनः इतरेषां** द्रव्यादीनां **तथैव** समवायाद् **वृत्तिर्नस्यात्** ? स्यादेव, इति समवायतद्द्रव्यादीनामपि क्वचिद् वृत्तौ विशेषणीभावसम्बन्ध इति मन्यते । दूषणान्तरमाह--**न चेह** इत्यादि । पूर्ववद् व्याख्यानम् । अयं तु विशेषः इह समवायो वर्त्तते इत्यस्याः प्रतीतेः यथा विशेषणीभावः कारणारथा *अन्यस्या अपि इति । अथवा, विशेषणीभावः सम्बन्धो यदि सम्बन्धान्तरं स्वसम्बन्धिषु वर्तते; /ms तह नि वस्थानात् **नचेत्यादि** दूषणम् । अथ स्वतः; समवायोऽपि तथैव वर्तते इति **समवायस्य** इत्यादि तदवस्थम् । यदि पुनः, न ते समवाये तथा प्रसङ्गः इति कुतः ततः इहेदम् इति प्रतीतिः ? तृतीयेऽपि समवायस्य तदन्तराभावे, **अपि**शब्दो भिन्नप्रक्रमः **वृत्तौ** इत्यस्य अनन्तरं द्रष्टव्यः । ततोऽयमर्थः--**वृत्तावपि,** अपि शब्दाच्च वृत्तौ **किं पुनः समवायेन** इति विभक्तिपरिणामेन सम्बन्धः । कुत एतत् ? अत्राह--**इतरेषां द्रव्या दीनां** 172/mkj **तथैव वृत्तिर्न स्यात्** । न खलु इदमनुवर्त्तते इत्येतत् तदसम्बन्धाद् युज्यते; यतः कुतश्चित् तदनुषङ्गात् । सम्बन्धात् स्यात् इति चेत्; कुतः सम्बन्धः समवायः, सम्बन्धासम्बन्धाद् गगनादिवत् ? दूषणान्तरमाह--**न चेह**

---

१ म्] समवाये अभावे च विशेषणविशेष्यभावादिति--न्यायवा० १ । १ । ४ तस्माद् विना सम्बन्धान्तरं विशेषणविशेष्यभाव एषितव्य इति सिद्धम्--न्यायवा० ता० टी० पृ० १११ ।

३ ते] वर्तने

४ तेनैव] स्वत एव ।

९ ह] तर्हि

१० *] इह शाखादिषु वृक्षः इत्यादि बुद्धिरपि ।

१६ था] कारणं तथा

१६ *] इह शाखादिषु वृक्षः इत्यादि प्रतीतेरपि ।

१७ रं] न्तरेण

१८ नि] तदाऽन

१८ पि] स्वत एव ।

२० कुतः] समवायात् ।

२२ ब्दाच्च] च्चाऽ

२४ नु] मत्र

२४ त्] समवाय्यसम्बद्धात् समवायात् ।

२६ न्धः] तुलना--इत्ययुक्तः स सम्बन्धो न युक्तः समवानिभिः । आप्तमी० श्लो० ६४ ।

२६ न्धाद्] सम्बन्ध्यसम्बद्धत्वात्

२६ त्] नहि स्वसम्बिन्धिभिः असम्बद्धः कश्चित् सम्बन्धो भवितुमर्हति ।

इत्यादि । अत्रायमर्थः— यत एव न द्रव्यादीनां क्वचिद् वृत्तिः अत एव तत्प्रतीतिरपि न स्यादिति, *अन्यथा ईश्वरादेरेव स्यात् । कथं वा कस्यचित् प्रत्यक्षः समवायः इन्द्रियार्थसन्निकर्षाभावात् ? सर्वथापि तत्प्रत्यक्षत्वे अलं चक्षुषोऽर्थेन सन्निकर्षसाधनेन ? § 801

[अनेन] यदुक्तं परेण--सर्वस्य सामान्यस्य सर्वगतत्वे समवायस्य च गोत्वादिप्रत्ययसाङ्कर्यमिति **दधि खादेति चोदितः उष्ट्रमपि धावेत्** प्र॰ वा॰ ३ । १८३ *इत्यत्र चोद्ये प्रत्युत्तरम्--**सम्बन्धस्यापिविशेषेऽपि न सम्बन्धिनः सः, नहि कुण्डबदरयोः संयोगो यथा कुण्डे[बदरे च]वर्त्तते तथा** /ms **बदरमपि** इति तद् दूषयन्नाह-- **सामान्य** इत्यादि । इदमत्र तात्पर्यम्--सर्वसर्वगते सामान्ये इदं प्रत्युत्तरम्, व्यक्तिसर्वगते वा ? प्रथमपक्षे **सामान्यसमवाययोर्व्यापित्वेऽपि क्वचिदेव** द्रव्यत्वस्य पृथिव्यादिषु एव गुणत्वस्य रूपादिष्वेव कर्मत्वस्य गमनादिष्वेव **समीहितप्रत्ययहेतुत्वं** द्रव्यादिप्रतीतिनिमित्तत्वं **नान्यत्र इत्येवं वैचित्र्यस्य** तयोः *समर्थेतरस्वभावभेदेन शबलत्वस्य **संभवे** अङ्गीक्रियमाणे **द्रव्यमेव** सामान्यविशेषात्मकं **चित्रं भवितुमर्हति** । एवं मन्यते तयोर्व्यापित्वपक्षे नेदं प्रत्युत्तरम्— **सम्बन्धस्याऽविशेषेऽपि तं सम्बन्धिनः सः** इति; सम्बन्धवत् सम्बन्धिनोऽपि सामान्यस्याविशेषात्, इदं तु युक्तम्--तदविशेषेस्वा त्मभूतकार्यजननशक्तिविशेषः इति । *तत्र च सर्वत्रानेकान्तसिद्धिः । द्वितीये पक्षे **स्वविशेषव्यापित्वं** देशादिभिन्नानेकस्वाकारव्यापित्वं **निरंशनिष्क्रियात्मनः सामान्यस्य समवायस्य च कथं** केन प्रकारेण **स्वस्थः** पिशाचाद्यनुपहतः **प्रस्थापयेत्** । ननु तथाविधस्यापि सर्वात्मना स्वावारेषु वृत्तेः तत्तस्य स प्रस्थापयेदिति चेत्; अत्राह--**द्रव्य** इत्यादि । [द्रव्यादिषु] प्रत्याधारं तस्य **भेदात् स्वरूपहानेः कथं प्रस्थापयेत्** इति ? यत एवं **तत्** तस्मात् **एतत्** प्रस्तुतप्रस्तावव्यवस्थाप्यमानं **प्रत्यक्षं द्रव्यप-**

---

२ *] वृत्त्यभावेऽपि तत्प्रतीतौ ईश्वरकालादेरेव सा प्रतीतिर्भवतु इति दोषः ।

३ थापि] [[सन्निकर्षाभावेऽपि ।]]अन्यथापि

५ रेण] वैशेषिकेण ।

७ *] चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ।प्र॰ वा॰ इति बौद्धस्य प्रश्ने ।

७ स्यापिवि] स्यावि

८ सः] अविशेषः, येन दध्याख्यः सम्बन्धी उष्ट्ररूपः स्यात् ।

८ ते] उभयनिष्ठत्वात् संयोगस्य ।

९ था] बदराख्यं द्रव्यमुभयनिष्ठं न हि भवितुमर्हति ।

१३ योः] सामान्यसमवाययोः ।

१३ *] क्वचिदेव समीहितप्रत्ययहेतुतया सामर्थ्यमन्यत्र तु असामर्थ्यमिति स्वभावभेदेन । यद्यपि अपरिच्छिन्नदेशानि सामान्यानि भवन्ति तथाप्युपलक्षणनियमात् कारणसामग्रीनियमाच्च स्वविषयसर्वगतानि पृ॰ ३१४ यथा कुण्डदध्नोः संयोगैकत्वे भवत्याश्रयाश्रयिभावनियमः तथा द्रव्यत्वादीनामपि समवायैकत्वेऽपि व्यङ्ग्यव्यञ्जकशक्तिभेदाद् आधाराधेयनियमः ।--प्रश॰ भा॰ पृ॰ ३२७ ।

१५ ते] सामान्यसमवाययोः ।

१६ तं] न

१७ विशेषेस्वा] षेऽप्या

१७ क्तिविशेषः] स्वभावभूतशक्तिभेदः ।

१७ *] स्वभावभूतशक्तिविशेषस्वीकारे च ।

१८ क्षे] स्वव्यक्तिसर्वगतत्वपक्षे ।

२० नु] निरंशस्य निष्क्रियस्यापि ।

२१ स्वावारेषु] स्वाकारेषु

**र्यायात्म[क]मेव** । यदि वा, एतत् विचार्यमाणं वस्तु **प्रत्यक्षं** तत्परिच्छेद्यं **द्रव्यपर्यायात्मकमेव युक्तम्** इति । § 802
173/mkj

**अन्यथानुपपन्नत्वम्** इत्यादिकम्, अन्यच्च स्वलक्षणादर्शनम्, वैशेषिकस्यापि भागिनो वर्त्तननिषेधं च दर्शयन्नाह—**प्रत्यक्षम्** इत्यादि । § 803 /ms

...28 प्रत्यक्षं यतो द्रव्यं गुणपर्यायात्मकं तत ।
परोक्षमपि द्रव्यस्य सिद्धस्यानुमितेः स्वतः ॥ २८
॥§ 805

अन्तम् **अपि** शब्दो भिन्नप्रक्रमः **प्रत्यक्षम्** इत्यस्यानन्तरं द्रष्टव्यः । **प्रत्यक्षमपि द्रव्यं** घटादि **परोक्षं** दृश्येतरात्मकं **यतः** ततो **गुणपर्यायात्मकम्** इति । कुत एतत् ? इत्यत्राह--**स्वतः** स्वरूपेण **सिद्धस्य** निश्चितस्य **द्रव्यस्य अनुमितेः** अनुमेयत्वाद् अन्यथा सर्वो हेतुः आश्रयासिद्धः स्यात् । न चैतदिष्यते परेण । § 806

ननु यदि तत्सिद्धं कथमनुमेयमिति चेत् ? अत्रा[ह--]फलोपजननशक्त्याद्यात्मना । नहि व्यक्तिवत् शक्तिरपि तस्य प्रत्यक्षा; तदनुमानवैफल्यप्रसङ्गात्, तथा व्यवहाराभावाच्च । यदि पुनः सौगतस्येव नैयायिकस्यापि अविकल्पं दर्शनं ततोऽयमदोषः इति; तदपि नोत्तरम्; सौगतेन सहायस्मै जलाञ्जलेर्दानात् । निश्चिते च न विभ्रमभाव इत्युक्तम् । तन्न शक्तिः प्रत्यक्षा । नापि शक्तिवद् व्यक्तिरपि परोक्षा; सर्वस्य आन्ध्यप्राप्तेः प्रमाणविरोधात् । एवमपि व्यक्तिशक्त्योरभेदे न ततो गुणपर्यायात्मकं तदिति चेत्; न प्रत्यक्षेतरैकान्तः स्यात् । भेदादिति चेत्; कथं द्रव्यस्य शक्तिः इति व्यपदेशः अतिप्रसङ्गात् ? तत्र समवायात्; न; *अस्य निषेधात् । इहेतिप्रत्ययहेतुः समवायस्य शक्तिः यदि ततो भिन्ना; कथं तस्य इति व्यपदिश्यतां समवायान्तराभावात् ? चर्चितमेतदिति यत्किञ्चिदेतत् । § 807

तं प्रति दूषणान्तरमाह--**सामान्यादेकान्तः** । § 808

---

३ च] अन्य[[बौद्धस्य ।]]
४ स्यापि] स्यावि
४ भागिनो] निरंशस्य वृत्तिप्रतिषेधम् ।
७ म्] अत्र
१२ त] द्रव्यम् ।
१३ स्य] द्रव्यस्य ।
१३ त] शक्त्यनुमान ।
१५ हाय] न्य
१८ त] व्यक्तिशक्त्यात्मकत्वात् ।
१८ प्र] अभेदे सति व्यक्तिः प्रत्यक्षा शक्तिः परोक्षेति द्व्यात्मकता न स्यादिति भावः ।
२० ङ्गात्] घटस्यापि पटः स्यात् ।
२० *] समवायस्य ।
२१ दि] समवायात् ।
२३ सामान्यादेकान्तः] सामान्ये इत्यादि

...29 सामान्याद्यर्थसमवायादेर्विविक्तं ततो ह्यसत् ।
प्रत्येकं द्विबहुषु कार्यं स्वांशैः सर्वात्मना न तत् ॥
२९ ॥§ 810

/ms [सामान्यादि] एकान्तेन **विविक्तं** भिन्नम् ? कुतः ? **अर्थसमवायादेः** अर्थात् द्रव्यादेः **समवायाद् आदि**शब्दाद् अन्त्यविशेषात् । समवायादिग्रहणं दृष्टान्तार्थम् । यथा तस्य सामान्यादि **ततो** विविक्तमदृश्यम् **हि** यस्मात्ः तस्माद् **असत्** तथा *अस्यापि इति । तथा च प्रयोगः--यद् यद्रूपतया कालत्रयेऽपि न प्रतीयते न तत् तद्रूपतया सत् यथा आत्मादि पुद्गलरूपतया कालत्रयेऽपि अप्रतीयमानम्, तद्रूपतया असत्त्वेन प्रतीयते च एकान्तेन अर्थसमवायादेः विविक्तं सामान्यादि इति । अत्रैव दूषणान्तरमाह--**प्रत्येकम्** इत्यादि । सामान्यादि एकमेकं **प्रत्येकं** समवायिषु मध्ये । कथम्भूतेषु ? **द्विबहुषु** द्वयोः परमाण्वादिद्रव्ययोः **कार्य**द्रव्यादि वर्त्तत इति द्विग्रहणं **स्वांशैः** स्वैकदेशैः **सर्वात्मना** सर्वस्वभावेन **न** वर्त्तते इत्युपस्कारः । चर्चितमेतत् ॥ छ ॥ § 811

इति र वि भ द्र पादोपजीव्य न न्त वी र्य विरचितायां सि द्धि वि नि श्च य टी का यां सविकल्पकसिद्धिः द्वितीयः प्रस्तावः ॥ छ ॥ § 812

# तृतीयः प्रस्तावः : ३. प्रमाणान्तरसिद्धिः

174/mkj

एवं प्रस्तावद्वयेन सविकल्पमध्यक्षं प्रमाणं प्रसाध्य अधुना स्मरणप्रत्यभिज्ञानोहानां प्रामाण्यमविसंवादिनां व्यवस्थापयितुकामः तत्स्वरूपाविसंवादनिबन्धनं प्रस्तुतप्रस्तावद्वयार्थं स्मरन्नाह प्रस्तावादौ **सम्यग्** इत्यादि वृत्तम् ।
§ 813

...1 सम्यक् सामान्यसंवित् व्यभिचरति न वै सत्स्वभावं परस्मात्,
चित्तं निर्णेतुमनलं स्वमपगतं सिद्धसाध्यैकरूपम् ।
संभाव्यार्थाकारविरहं तदपि विरहितं चित्रमेकं यदीयुः,

५ था] समवायादेः ।
६ *] द्रव्यादेरपि ।
११ कार्य] कार्यं

चित्राभं द्रव्यमेकं बहिरनुगमयत् तत्त्वतः पर्ययैस्तैः ॥ १ ॥§ 817

*अर्थः--सौगतानुसारेण स्मरणादिसंवित् **सामान्यसंवित्** इत्युक्तम्, *तत्र तस्या एव सामान्यसंवित्त्वात् । सा किम् ? इत्याह--**सम्यग्** इति । **सम्यग्** अविसंवादिनी सती वा काचित् इत्यपेक्षम् । अत्र युक्ति **व्यभिचरति** इत्यादिकामाह--**चित्तं ज्ञानं व्यभिचरति** जहाति **नवै** नैव **सत्त्वभावत** /ms अर्थात्मनोः विद्यमानं स्वरूपम्, क्वचित् प्लुतौ लौकिकशास्त्रीयविभ्रमे यदि विभ्रमेतररूपमेकं ज्ञानं चेदित्यर्थः । तदेव **निर्णेतुं** निश्चेतुं **स्वम्** आत्मानम्, उपलक्षणमेतत् तेन परं च गृह्यते, **अनल[म]**समर्थम् । [कथं]भूतम् ? **अपगत** व्यावृत्तम् । कुतः ? **परस्माद्** अन्यस्मात् सजातीयाद् विजातीयाच्च **अ[प]गतम्** इति वचनात्, अन्यथा तं निर्णेतुं समर्थमिति गम्यते, यदि स्वविषये निर्णयजननेतरस्वभाववदित्यर्थः । तदेव च यदि **सिद्धसाध्यैकरूपं** सिद्धं निश्चितं सदादिसाध्यं फलानुमेयं स्वर्गादिप्रापणादिकम् एकं रूपं यस्य तत्तथोक्तं दृश्येतररूपमेकं चेदिति मन्यते । व्यवहारापेक्षया उक्तम् । § 818

यः पुनर्मन्यते ध र्मो त्त रः--**स्थवीयान् एको ग्राह्याकारो मिथ्या विचार्यमाणस्य अयोगात्, ततो व्यतिरिक्तं निरंशं संविन्मात्रं परमार्थसत्** । इति; तत्राह--**संभाव्य** इत्यादि । **संभाव्यः अर्थाकारविरहः** आलोक्यः सदादिभेदो यस्य तत्तथोक्तं **चित्तमेकं यदि** इति । § 819

योवि मन्यते प्र ज्ञा क र गुप्तः--**न नीलादिसुखादिशरीरव्यतिरिक्तं संवेदनमस्ति अनुपलम्भात्** प्र° वार्तिकाल° तदेव चित्रमेकं ज्ञानम् **चित्रप्रतिभासाऽपि** प्र° वार्तिकाल° ३ । २२० *इत्यादि वचनात् । तं प्रत्याह--**विचित्र** इत्यादि । नीलादिर्ग्राह्याद्दृश्याकारैः **चित्रा** सदला **भा** 175/mkj प्रतीतिर्यस्य तत्तथोक्तम्, **चित्रमेकं** यदि **तदपि न विरहितम्** किन्तु सहितम् /ms । कैः ? **पर्यायैः** क्रमपरिणामैः **एकम्** अभिन्नम् उक्तन्यायेन **ईयुः** सौगताः अवगच्छेयुः **यदि** इत्यनेनैतद्दर्शयति । तदनवगमे सकलशून्यता स्यादिति तदवगन्तव्यमिति । ततो निराकृतमेतत् यदुक्तं परेण--**अनुभूते स्मरणम् इत्येतन्नानुभवेन ज्ञायते तेन स्मरणाऽविषयीकरणे,*** **नानेन अनुभवस्याप-**

---

२ *] कारिकार्थः ।
२ *] सौगतमते ।
४ युक्ति] क्तिं
५ त] वं
६ प्लुतौ] स्मृतौ
९ त] तं
१८ योवि] योऽपि
१८ गुप्तः] नीलादिसुखादिकमन्तरेणापरस्य ज्ञानाकारस्यानुपलक्षणात्--प्र° वार्तिकाल° ३ । ३१३ ।
२० *] चित्राभासापि बुद्धिरेकैव बाह्यचित्रविलक्षणत्वात् । शक्यविवेचनं चित्रमनेकमशक्यविवेचनाश्च बुद्धेर्नीलादयः ।--प्र° वार्तिकाल° ।
२१ नीलादिर्ग्राह्याद्दृश्याकारैः] नीलादिग्राह्यदृश्याकारैः
२१ ला] शबला
२३ र्यायैः] पर्ययैः
२६ तेन] अनुभवेन ।
२६ *] अनुभूतत्वस्य परिच्छेदायोगादिति भावः ।
२६ नानेन] स्मरणेन ।

**रिच्छेदात्** । इत्यादि । तद् इदम् इति स्मरणप्रत्यक्षे लेखक व्यतिरेकेण नापरं प्रत्यभिज्ञानम्, *तदभावे न तर्कोऽपि इति कथमुक्तम् प्रतिपत्त्या बाधनात् ? किं कारयत् तत्तथा यदि ? इत्याह--**बहिः** इत्यादि । **बहिः** स्वतः अन्यत्र **अनुगमयतु** ज्ञापयतु । किम् ? इत्याह--**द्रव्य** इत्यादि । यथैव हि तदेकं चित्राह मात्मानं बिभर्त्ति तथैव तथाविधं बहिर्गमयति । तथा च यदुक्तं परेण--**स्मरणविषयस्य क्षणिकत्वेन नाशात् प्रत्यभिज्ञागोचरस्य अभावात् [न] प्रवृत्तौ प्राप्तिर्यतः तदविसंवादः** इति; तदनेन निरस्तम् । ततः स्थितम्--यदि तथाविधं चित्तं तर्हि **सम्यक् सामान्यसंवि[दि]**ति । § 820

तदेवं स्मरणादेः अविसंवादे सिद्धे यदपरं सिद्धं तद्दर्शयन्नाह--**प्रमाणम्** इत्यादि । § 821

...2 *प्रमाणमविसंवादात् मिथ्या तद्विपर्ययात् ।
गृहीतग्रहणान्नो चेन्न प्रयोजनभेदतः ॥ २ ॥§ 823

प्रत्यक्षस्यापि प्रामाण्यमविसंवादात् नपुनरर्थाकारानुकारितया अतिप्रसङ्गात् । स पुनरनुभूतस्मृतेर्यदि स्यात् प्रामाण्यं लक्षयति । सविकल्पेऽनधिगतार्थव्यवसायाभावादयुक्तमिति चेत्; न; प्रयोजनविशेषात्, क्वचित् सदृशाकारभेदविशेषाणामुत्तरोत्तरपर्यायविशेषसाध्यार्थक्रियावाञ्छायां तथैव प्रामाण्याविरोधात् । अन्यथा कालादिभेदेन अनधिगतार्थाधिगतेरपि प्रमाणतानभ्युपगमात् । § 824

**प्रमाणं स्मृतिः** । कुतः ? **अविसंवादात्** । **मिथ्या** अप्रमाणं स्मृतिः इति सम्बन्धः । [कुतः ? तद्] **विपर्ययात्** । विसंवादात् । प्रत्यक्षतदाभास-

---

१ इत्यादि] तुलना— ननु अनुभूते जायमानमित्येतत् केन प्रतीयताम् ? न तावदनुभवेन तत्काले स्मृतेरेवासत्त्वात् । न चासती विषयीकर्तुं शक्या । न चाविषयीकृता तत्रोपजायते इत्यधिगतिः । न चानुभवकाले अर्थस्य अनुभूतताऽस्ति, तदा तस्यानुभूयमानत्वात् । तथा चानुभूयमाने स्मृतिरिति स्यात् । अथानुभूते स्मृतिरित्येतत् स्मृतिरेव प्रतिपद्यते; न; अनया अतीतानुभवार्थयोरविषयीकरणे तथा प्रतीत्ययोगात् ।--प्रमेयक॰ पृ॰ ३३६ ।

१ क] एव तद्

२ रं] तस्मात् स एवायमिति प्रत्ययद्वयमेतत्--प्र॰ वार्तिकाल॰ पृ॰ २२ । यदतीतं न तद् ग्राह्यं यदा ग्राह्यं न तत्तथा । स्मर्यमाणेन रूपेण तदतीतं न वस्तुसत् ॥ निश्चयस्य दृढत्वाच्च प्रामाण्यमुपपत्तिमत् । प्रत्यभिज्ञानमप्येवमक्षयोगस्त्वपार्थकः ॥--प्र॰ वार्तिकाल॰ पृ॰ ५९३ । प्र॰ वा॰ स्ववृ॰ टी पृ॰ ७८ ।

२ *] प्रत्यभिज्ञानाभावे ।

४ तु] त्

४ तु] त्

५ चित्राह] चित्राभ

६ रेण] बौद्धेन । अविसंवादसद्भावात् प्रमाणं ज्ञानमिष्यते । वर्तमानेऽविसंवादो न तु पूर्वविनाशिनि ॥ न स्याद्यदि तदेकत्वं किं ततोऽर्थक्रिया न सा...--प्र॰ वार्तिकाल॰ पृ॰ ५९३ ।

८ दि] चित्रात्मकम् ।

११ *] तुलना--प्रमाणमर्थसम्बन्धात् प्रत्यक्षान्वयिनी स्मृतिः ।--प्रमाणसं॰ श्लो॰ १० ।

वत् इति निदर्शनमत्र वक्तव्यम् । ननु नाविसंवाद एव प्रमाणलक्षणं 176/mkj येनैवं स्यात्, अपि तु अज्ञातार्थप्रकाशोऽपि । स्मृतौ तदभावात् न प्रमाणं सेति; तदाह--*****गृहीतग्रहणात्** । गृहीतस्य दर्शनेन विषयीकृतस्य ग्रहणात् स्मृत्या विषयीकरणात् कारणात् **नो न चेत्** यदि स्मृतिः प्रमाणम् । अत्रोत्तरमाह--**न** इत्यादि । यदुक्तं परेण तन्न । कुतः ? **प्रयोजनभेदतः** । प्रमाणस्य हि प्रयोजनं फलम्--अज्ञाननिवृत्तिः प्रवृत्तिश्च, तस्य भेदात्, प्रत्यक्षप्रयोजनात् स्मृतिप्रयोजनस्य विशेषात् । ततः यथैव हि प्राक् प्रवृत्तम् आत्मनोऽज्ञानम् अध्यक्षं निवर्त्तयति पुनः स्वगोचरे प्रवर्त्तयति जनं तथा स्मृतिरपि विशेषाऽभावात् । § 825

ननु यदुक्तम्--स्मृतिः प्रमाणम् अविसंवादात् प्रत्यक्षवत् इति; तन्न सारम्; दृष्टान्ते अर्थसारूप्यात् प्रामाण्यसिद्धेः स्मृतौ तदभावादिति चेत्; अत्राह--**प्रत्यक्षस्यापि** इत्यादि । न केवलमन्यस्य किन्तु **प्रत्यक्षस्यापि प्रामाण्यम् अविसंवादात् न पुनः अर्थाकारानुकारितया** । कुत एतत् ? इत्याह--**अतिप्रसङ्गात्** । भवतु अविसंवादात् तस्य तदिति चेत्; अत्राह--**स पुनः** इत्यादि । **सः** अविसंवादः **पुनः अनुभूतस्य** अर्थस्य **स्मृतेः यदि स्याद्** भवेत् **प्रामाण्यं लक्षयति** तत्स्मृतेः इति । दूषयितुं परमतमाशङ्कते--**सविकल्प** इत्यादिना । [सविकल्पे] सविकल्पकप्रत्यक्षपक्षे स्मृतेः **अनधिगतार्थव्यवसायाभावाद् अयुक्तं** प्रामाण्यम् । अनेन एतद्दर्शयति— *परः--यथा मम अनिश्चितार्थनिश्चयात् समारोपव्यवच्छेदाद्वा अनुभूतार्थमनित्यत्वाद्यनुमानम्, नैवं स्मृतिर्विपर्ययात् निश्चिते तदयोगात् **इति** एवं **चेत्**; अत्राह--**न** इत्यादि । यदुक्तं परेण तन्न । कुतः ? **प्रयोजनविशेषात्** । स च निगदितः । अत्र परेण सह एकवाक्यतामात्मनो दर्शयन्नाह--**क्वचिद्** इत्यादि । **क्वचित्** सूभ्रादौ **सदृशाकाराणां** प्रत्यक्षाणां ये **भेदा** धारावाभिविशेषाः तेषाम् /ms **उत्तरोत्तरपर्यायविशेषसाध्यार्थक्रियावाञ्छायां तथैव** प्रयोजनविशेषप्रकारेणैव **प्रामाण्याऽविरोधात्** प्रयोजनविशेषात् स्मृतेः प्रामाण्यं युक्तमिति । कुत एतत् ? इत्यत्राह--**कालादिभेदेन** आदिशब्दात् क्षेत्रादिपरिग्रहः, **अन्यथा** अन्येन प्रयोजनविशेषाभावप्रकारेण **अनधिगतार्थाधिगतेरपि** अगृहीतार्थग्रहणादपि न केवलम् अन्यतः तद्विशेषाणां **प्रमाणताऽनभ्युपगमात्** सौगतेन यथा जलप्राप्त्येकार्थक्रियावाञ्छायाम् अवान्तरदर्शनविशेषाणाम्, इतरथा जलाध्यवसायकारणं मरीचिकादर्शनं तद्वत् प्रमाणं भवेत् । § 826

२ तु] अज्ञातार्थप्रकाशो वा--प्र॰ वा॰ १ । ७ ।
२ त] अज्ञातार्थप्रकाशाभावात् ।
३ *] गृहीतग्रहणान्नेष्टं सांवृतं...--प्र॰ वा॰ १ । ५ ।
११ स्मृतौ] अर्थसारूप्याभावात् ।
१४ अविसंवादात्] प्रत्ययस्य ।
१८ *] बौद्धः ।
१९ म्] प्रमाणं भवति ।
२० यात्] अनिश्चितार्थनिश्चायकाभावात् ।
२० योगात्] समारोपायोगात् कथं तद्व्यवच्छेद इति भावः ।
२३ सूभ्रादौ] स्तम्भादौ
२३ धारावाभि] वाहि

यदि पुनरयं निर्बन्धः गृहीतग्रहणान्न स्मृतिः प्रमाणं तर्हि तत एव तद्वत् सकल[मनु]मानमपि प्रमाणं न स्यादिति दर्शयन्नाह--**साकल्येन आदितो व्याप्तिः** इत्यादि । § 827

…3 साकल्येनादितो व्याप्तिः पूर्वं चेल्लिङ्गलिङ्गिनोः ।
अनुमेयस्मृतिः सिद्धा न प्रमाणं विशेषवत् ॥ ३ ॥ § 829

177/mkj

यावान् कश्चिद् धूमवान् प्रदेशः स सर्वोऽपि अग्निमानिति व्याप्ताव-सिद्धायाम् अनुमेयप्रतिपत्त्यनुपपत्तेः । सिद्धौ एवमनुमानं स्मृत्यन्तरान्न वि-शेष्येत । ततो लिङ्गलिङ्गिज्ञानयोः प्रमाणेतरव्यवस्था व्यतिकीर्येत । स्वयम-नुभूताद् व्यतिरेके पुनरनवयवेन व्याप्तिसिद्धेरयोगात् । सामान्यविषया व्याप्तिः तद्विशिष्टानुमितेः इति चेत्; पूर्वानुभूतस्मृतेरपि तथाविधविशेषानिराकरणात् यत्किञ्चिदेतत् । § 830

**साकल्येन** सामस्त्येन **आदितः** आदौ सकलानुमानप्रवृत्तेः **पूर्वं सिद्धा** निश्चिता **व्याप्तिः** अविनाभावः **चेत्** । कयोः ? **लिङ्गलिङ्गिनोः** । **अनुमेयस्मृतिः** अनुमानं **न स्यात् प्रमाणं साकल्येन** इत्येतदत्रापि सम्बन्धनीयम् । अत्र दृष्टान्तमाह--**विशेष**वदिति अननुमानस्मृतिवदिति । § 831

**यावान्** इत्यादिना कारिकार्थमाह--**यावान् कश्चिद् धूमवान् प्रदेशः**, उपलक्षणमेतत् धानु कालोऽपि गृह्यते **स** प्रदेशादिः **सर्वोऽपि** न केवलं कश्चिदेव **अग्निमान्** इत्येवं **व्याप्तौ असिद्धायां** सत्यां **अनुमेयस्य** अप्रसिद्धस्य या **प्रतिपत्तिः** तस्या **अनुपपत्तेः अनुमान स्मृत्यन्तराद्** अलिङ्गजात् स्मरणात् /ms **न विशेष्येत** न भिद्येत । एतदुक्तं भवति--यथा अननुभूते न स्मृत्यन्तरम् अतिप्रसङ्गात् तथा व्याप्यत्वेनानिश्चितात् लिङ्गात् व्यापकत्वेनानिश्चितस्यानुमेय-स्य प्रतिपत्तिरपि न युक्ता, अन्यथा भूमिगृहवर्धितस्य अकस्माद् धूमदर्शनाद् अग्निप्रतिपत्तिः स्यात् । तवैवं व्यापकत्वेनागृहीतस्य ततः प्रतिपत्तिसंभाव-ना, अनुमानस्य स्मृतिविशेषत्वात् अत एवोक्तम्--**स्मृत्यन्तरात्** इति, ततः तदसत्त्वेन न विशेष्येत इति मन्यते । तथा यावान् कश्चिद्भावः स सर्वः क्षणिक एव इत्येवं तस्यमसिद्धायां सर्वं वाच्यम् । तस्यां सिद्धायां को दोष इति चेत् ? अत्राह--**सिद्धौ** इति । **सिद्धौ** निश्चये एवं व्याप्तेः इति विभक्तिपरिणामेन सम्बन्धः, **अनुमानं स्मृत्यन्तरात् न विशेष्येत** । कुत एत-

---

१ त्] स्मृतिवत् ।
१७ धानु] तेन
१९ अनुमान] नं
२१ लिङ्गात्] साध्यत्वेन ।
२२ स्य] अगृहीतव्याप्तिकस्य ।
२३ वैवं] न चैवम्
२३ स्य] पुरुषस्य ।
२६ इत्येवं] व्याप्तौ ।

त् ? इत्याह--**अनुमेय** इत्यादि । *साध्यं शक्यमभिप्रेतमप्रसिद्धम**नुमेयम्** इति, [तस्य] या **प्रतिपत्तिः** तस्याः **अनुपपत्तेः** व्याप्तिज्ञानेन तस्य निश्चये तदयोगात् । तथा च **त्रिरूपाल्लिङ्गाद् यदनुमेये ज्ञानं तदनुमानम्** न्यायबि० २ । ३ इति वचनमात्रम्; सिद्धसाध्यविषयत्वेन तस्य प्रमाणाभासतेति मन्यते । **अनुमान**ग्रहणमपि उपलक्षणम्, तेन उत्तरप्रदेशादिप्रत्यक्षमपि ततो न विशेष्येत व्याप्तिज्ञानेन प्रदेशादेरपि ग्रहणात्, इतरथा स सर्वोऽपि अग्निमान् इति प्रतिपत्तेरयोगात्, व्याप्याप्रतिपत्तौ व्यापकाप्रतिपत्तिवत् आधाराप्रतिपत्तौ आधेयप्रतिपत्तिरपि नास्ति, एवमर्थं च प्रदेशग्रहणम्, अन्यथा यावान् कश्चिद् धूमः इति ब्रूयात् । न च भावक्षणिकत्वव्यतिरेकेण अपरं यत्त ज्ञानेनागृहीतम् उत्तराध्यक्षेण गृह्यते । तत एव न तद्व्याप्तिसिद्धिः । नाप्यनुमानमिष्यते इति प्र ज्ञा क र गु प्तः कथं **द्वे एव प्रमाणे** प्र० /ms वार्तिकाल० ३ । ६२ इत्युक्तम् ? व्यवहारेणेति चेत्; तेनैव तर्हि यथा व्याप्तिज्ञानेन गृहीते अनुमानं प्रमाणं तथा प्रत्यक्षानुभूते स्मृतेः इति **द्वे** 178/mkj **एव प्रमाणे** प्र० वार्तिकाल० इति मिथ्यावचः । व्यवहारे च प्रमाणमन्तरेण व्याप्तिसिद्धौ किमन्यत्रापि तदन्वेषणेन इति स एव दोषो मिथ्या तद्वच इति । *प्रतिभासाद्वैतादेश्च प्रतिषेधात् अत्रैव तेन स्थातव्यम् । § 832

*तस्य ततोऽविशेषे किं जातम् ? इत्याह--**तत** इत्यादि । **ततः** तस्य ततोऽविशेषात् **प्रमाणेतरव्यवस्था व्यतिकीर्येत** । कयोः ? इत्याह--**लिङ्गलिङ्गिज्ञानयोः** लिङ्गज्ञाने व्याप्तिज्ञाने प्रमाणव्यवस्था लिङ्गिज्ञाने अनुमानज्ञाने इतरव्यवस्था स्यात् । विपर्ययश्चेष्यते परेण । अथ लिङ्गज्ञानविषयाद् अन्यत्र लिङ्गज्ञानस्य वृत्तिरिष्यते ततोऽयमदोषः; तत्राह--**स्वयम्** इत्यादि । **स्वयम्** आत्मना **अनुभूतात्** व्याप्तिज्ञानेन विषयीकृतात् **व्यतिरेको** लिङ्गिज्ञानविज्ञानविषयस्य भेदे अङ्गीक्रियमाणे **पुनः अनवयवेन** साकल्येन **व्याप्तिसिद्धेरयोगात्** सा **व्यतिकीर्येत** इति सम्बन्धः । *तदनुभूते तद्वैफल्यम्, अन्यत्र तदप्रवृत्तिः इति मन्यते । § 833

**सामान्य** इत्यादि अ र्च ट मतं दूषयितुं शङ्कते--देशादिविशेषणरहितेन अग्निना तथाभूतस्य धूमस्य व्याप्तिसिद्धिः **सामान्यविषया व्याप्तिः** इत्युच्यते,

---

१ *] साध्यं शक्यमभिप्रेतमप्रसिद्धम्--न्यायवि० २ । ३ ।
२ व्याप्तिज्ञानेन] साध्यस्य ।
५ पि] स्मृतेः ।
६ स] प्रदेशः ।
९ च] यावान् कश्चिद् भावः स सर्वः क्षणिकः इति प्रयोगे ।
९ त्त] यत् तज्
११ प्तः] प्ते न
१२ तेनैव] व्यवहारेणैव ।
१३ स्मृतेः] प्रामाण्यं स्वीकर्तव्यमिति ।
१५ त्रापि] प्रमाणस्वीकारेण ।
१५ च] द्वे एव प्रमाणे इति वचनम् ।
१६ *] अस्तु प्रमाणस्यापि विलोपः अद्वैतोपगमात् इति प्रज्ञाकरगुप्तः, तत्राह--।
१७ *] अनुमानस्य ।
१७ स्य] स्मृत्यन्तरात् ।
२० ज्ञाने] अप्रमाणत्वं स्यात् गृहीतग्राहित्वादिति भावः ।
२१ लिङ्ग] लिङ्गि
२१ स्य] अनुमानस्य ।
२२ तिरेको] के
२४ सा] प्रमाणेतर व्यवस्था ।
२४ *] व्यप्तिज्ञानविषयीकृते ।
२६ ट] तुलना--सामान्येनान्वये सिद्धे पक्षधर्मत्वयोगतः । विशेषनिष्ठता तस्य सम्बन्धग्रहणात्मना ॥--प्र० वार्तिकाल० ३ । ४० ।

विशेषेण पक्षधर्मताबलाद् देशादिविशेषेण **तद्भेदेन विशिष्टस्य** तैः **अनुमितेः** इति चेत्; अत्रोत्तरमाह--**पूर्वानुभूत** इत्यादि । **पूर्वं** यदनुभूतं तस्य या **स्मृतिः** /ms **तस्या अपि** न केवलम् अनुमितेरेव **तथाविधस्य** अनुमितौ कल्पितस्य **विशेषस्य [अ] निराकरणात्** कारणात् **यत्किञ्चिदेतत्** न किञ्चिदेतदित्यर्थः । तथाहि--दे[शादि वि]शेषणरहितस्य अनुभूतस्य तत्सहितस्य पुनः स्मरणे न बाधकं पश्यामः । कथं तथाननुभूतस्य तथा स्मरणम् अतिप्रसङ्गादिति चेत् ? कथं तथाविधस्य व्याप्तिज्ञानेनाविषयीकृतस्य अनुमितिः अतिप्रसङ्गात् इति समानात्मत्व पक्षधर्मताग्रहणस्य प्रकृते क्षयोपशमस्य बलमिति न विशेषः । दृश्यते हि केनचिद् विशेषेण रहितस्य व्याख्यातुः प्रघट्टकस्य ग्रहणेऽपि पुनः स्मर्तृविशेषात् तद्विशिष्टस्य स्मरणम् । अत एव तदनिराकरणात् इत्युक्तम् । § 834

एतेन यदुक्तं मीमांसकेन-- § 835

*तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम् ।
अदुष्टकारणारब्धं प्रमाणं लोकसम्मतम् ॥ *इति; § 837

तन्निरस्तम्; पूर्वानुभूतस्मरणेऽपि अस्य अनुमानवद् भावात् सप्तमप्रमाणप्रसङ्गात् । § 838

अधुना नैयायिको भूत्वा सूरिः **सामान्यविषया व्याप्तिः विशेषेण अनुमितिः** इति वदन्तं प्रमाणान्तरमन्यदापादयितुमाह--**तदेवम्** इत्यादि । § 839
179/mkj

...4 तदेवमुपमावाक्यसंस्कारात्तत्र पश्यतः ।
तत्संज्ञासंज्ञिसंबन्धे विशेष्येदनुमानवत् ॥ ४ ॥ § 841

गोसदृशो गवयः इति वाक्यात् संज्ञासंज्ञिसम्बन्धमवगतवतः अस्येयं संज्ञेति विशेषणप्रतिपत्तिः पुनरनुमानं नातिशेते यतः प्रमाणमनुमानं नापरम् । यदि... § 842

**तत्** इत्ययं निपातः तस्मिन् इत्यस्यार्थे द्रष्टव्यः । तस्मिन् परोक्षे **एवम्** उक्तप्रकारेण सति न्याये गौरिव गवयः इति वाक्यम् **उपमावाक्यं** तेन आहितो यः **संस्कारः तस्मात्तत्र ज्ञानजो ज्ञानहेतुश्च संस्कारः** *इति वचनात्

---

८ त्व] समानम् । [[अनुमानस्थले ।]]एकत्र
८ स्य] स्मृतौ ।
१० एव] विशेषस्यानिराकरणात् ।
१४ *] प्र॰ वार्तिकाल॰ पृ॰ २१ । श्लोकोऽयं मीमांसकोक्तत्वेन उपलभ्यते--सन्मति॰ टी॰ पृ॰ ३१८ । प्रमेयक॰ पृ॰ ६१ । हेतुबि॰ टी॰ पृ॰ २८० ।
१५ णेऽपि] प्रामाण्यस्य ।
१८ इति] अर्चटम् ।
२६ *] ज्ञानजो ज्ञानहेतुश्च संस्कारः--प्र॰ वार्तिकाल॰ ३ । ५२७ ।

। कथं तद्वाक्यात् स इति चेत् ? पारम्पर्येण ततः तस्य भावात् ततः स इत्युच्यते इत्यदोषः । तथाहि--तद्वाक्यात् प्रतिपत्तिरिति तद्विषयं ज्ञानम्, पुनः तत्सहकारिणा मनसा यावान् कश्चित् पदार्थः गोसदृशः स सर्वो /ms गवयशब्दवाच्यः इति सामान्येन वाच्यवाचकसम्बन्धविषयमानसमध्यक्षं जन्यते, ततः संस्कारः इति स्मृतिः स्मरणं जायते इत्यध्याहारः । क्व ? इत्यत्राह--**तद्** इत्यादि । तौ च तौ **संज्ञासंज्ञिनौ** च गवयशब्द ग विशेषौ **तयोः सम्बन्धे** वाच्यवाचकलक्षणे । कस्य ? **पश्यतः** । किम् ? **गवयम्** । सा किम् ? इत्याह--**विशेष्येत** स्मृत्यन्तराद् भिद्येत । किमिव ? इत्यत्राह— **अनुमानवत्** तदिव तद्वदिति । इदमत्र तात्पर्यम्--यथा सामान्यविषयायां व्याप्तौ विशेषेण अनुमानं जायमानमपूर्वार्थं तथा मानसप्रत्यक्षेण सामान्येन [संज्ञा]संज्ञिसम्बन्धे प्रतिपन्ने पुनः तस्य सर्वस्य स्मरणाद् वने गवयदर्शनाद् विशेषेण तत्प्रतिपत्तिः अपूर्वार्थास्तु । § 843

यत्पुनरत्रोक्तम्--सामान्यस्य विशेषनिष्ठत्वात्, तत्प्रति [पत्तौ वि]शेषप्रतिपत्तिः इति; तदसारम्; अन्यत्र समत्वात् । § 844

कारिकां विवृण्वन्नाह--**गोसदृशो गवयः** इत्यादि । **गोसदृशो गवयः इत्येवं वाक्यात्** तद्विज्ञानात् सहकारिणः **संज्ञासंज्ञिसम्बन्धम् अवगतवतः** ज्ञातवतः सामान्येन पुनः कालान्तरेण गवयदर्शनाद् **अस्य** प्रतीयमानस्य **इयं गवयः** इति **संज्ञा** **इत्येवं विशेषेण प्रतिपत्तिः** व्याप्तिदर्शिनः सामान्येन इति सम्बन्धः । **पुनः अनुमानं नातिशेते** । **यतः** अतिशायनात् **प्रमाणम् अनुमानं नाऽपरम्** उपमानं न प्रमाणं स्यात् । **यतः** इति वा आक्षेपे, यतो नापरं स्यात् ? स्यादेव, उपमानं प्रमाणमभ्युपगच्छेत् । § 845

सौगतस्य इतरस्य वा प्रमाणान्तरं दर्शयितुं मतमाशङ्कते--**यदि** इत्यादिना । सुगमम् । § 846

अत्र दूषणमाह--**प्रमाणान्तरम्** इत्यादि । § 847

प्रमाणान्तरमन्यत्र तत्संज्ञाऽसंभवस्मृतिः । [१/२]

|§ 848

तद्वाक्याहितसंस्कारस्य अगोषु स्वयं तन्नामासम्बन्धमर्थापत्त्या [उपगम्यते] यथा सामान्येन लिङ्गलिङ्गिसम्बन्धप्रतिपत्तिः प्रमाणान्तरं तथेयमपि प्रत्यभिज्ञानं प्रमाणान्तरम्, न गवयोऽयं तादृशोपलब्धेः । अथवा, एकविषाणि खङ्गः सप्तपर्णो विषमच्छद इत्याहितसंस्काराणां पुनस्तत्प्रत्यक्षदर्शिनामभिज्ञानं किन्नाम प्रमाणं स्यात् ? § 849

180/mkj

६ ग] गो
१२ विशेषेण] संज्ञासंज्ञिसम्बन्धप्रतिपत्तिः ।
१६ द्विज्ञानात्] वाक्यविज्ञानात् ।

/ms उपमानादन्यत् प्रमाणं [प्रमाणान्तरं] स्यात् **अन्यत्र** गवयाद् अन्येषु महिष्यादिषु गवय इति संज्ञा **तत्संज्ञा** तस्याः **असंभवस्मृतिः** । § 850

कारिकाखण्डं व्याचष्टे--**तद्वाक्य** इत्यादिना । गोसदृशो गवयः इति वाक्यं **तद्वाक्यं** तेन उक्तविधिना **आहितः संस्कारो** यस्य तस्य प्रतिपत्तिवतः । किं तत् ? **तन्नामासंबन्धं** गवयाभिधानसम्बन्धाभावम् । **क्व** ? इत्यत्राह--**अगो[षु]** विसदृशेषु इति । **स्वयम्** आत्मना । § 851

ननु गौरिव गवयः इति वाक्यप्रतिपत्तिसहकारिणा मनसा भवतु गोसदृशेषु सामान्येन तत्संज्ञासंज्ञिसम्बन्धप्रतिपत्तिः तद्विसदृशेषु केन तन्नामाऽसंबन्धप्रतिपत्तिः इति चेत् ? अत्राह— **अर्थापत्त्या** इति । यतो गोसदृशो गवयः, ततोऽर्थात् तद्विलक्षणो न गवयः इतिवाक्यप्रतिपत्तिः **अर्थापत्तिः तया** त्यतेनैवतन्ते तद्दर्शयति--**यथा सामान्येन लिङ्गलिङ्गिनोः** संज्ञासंज्ञिनोः **सम्बन्धस्य प्रतिपत्तिः प्रमाणान्तरम्** अनुमानादेः **तथा इयमपि** इति । किं जातम् ? इत्याह--**प्रमाणान्तरम्** उपमानादन्यत् प्रमाणम् । किं तत् ? इत्याह--**प्रत्यभिज्ञानम्** । कथंभूतम् ? इत्याह--**न गवयोऽयम्** इति । **अयं** गोविसदृशो दृश्यमानो **न गवयः** न गवयशब्दवाच्य इति । **अयम्** इत्यनेन सामान्यार्थापत्तेः अनुमानवदस्य विशेषं दर्शयति । तत् कुतो जायते ? इत्याह--**तादृशोपलब्धेः** इति । गोविसदृशोपलब्धेः इति प्रत्यभिज्ञानपदेन एतत् कथयति । यदि अस्य परो वैधर्म्योपमाने अन्तर्भावं /ms ब्रूयात् तर्हि जैनोऽपि अस्य उपमानस्य च असादृश्येतरप्रत्यभिज्ञाने इति नानयोः ततः प्रमाणान्तरत्वं प्रत्यक्षादिव आगमादेरपि तद्भावादिति । § 852

अधुना अस्य कारिकाखण्डस्य अन्यार्थो व्याख्यायते--**अन्यत्रो**क्ताद् अ[न्य]स्मिन् विषये **तत्संज्ञासंभवस्मृतिः** तस्य अन्यस्य संज्ञा नाम तस्याः संभवस्मृतिः **प्रमाणान्तरमेव** । तस्याव्याख्याने उत्तरोऽर्थोऽकारिकार्थः स्यात् । § 853

एतदेव विवृण्वन्नाह--**अर्थेच** इत्यादि । **अथवा** इत्येतद् व्याख्यानान्तरसूचकम् । **एकविषाणी खड्गः सप्तपर्णो विषमच्छदः इत्येवम् आहितसंस्काराणां** पुरुषाणां **पुनः** पश्चात् **तत्प्रत्यक्षदर्शिनां** तत्खड्गादिकं प्रत्यक्षेण द्रष्टुं शीलानाम् **अभिज्ञानम्**--अयं स खड्गादिशब्दवाच्योऽर्थः इति प्रत्यभिज्ञानं **किन्नाम प्रमाणं स्यात्** साधर्म्योपमाने वैधर्म्योपमाने वा अस्य अनन्तर्भावात् तल्लक्षणत्वादस्यान्यन्नाम कर्त्तव्यमिति मन्यते । § 854

अत्रैवोदाहरणान्तरमाह **तथे**त्यादिना । § 855

---

८ केन] प्रमाणेन ।
११ न्ते] उपगम्यते
१२ म्] तर्काख्यम् ।
१८ प] नैयायिकः ।
२५ अर्थेच] अथवा
३१ थे] स्त्ये

…5 स्त्यादिलक्षणश्रवणेन पुनस्तथादर्शिनः ।
संख्यादिप्रतिपत्तिश्च पूर्वापरनिरीक्षणात् ॥ ५ ॥§ 857

सोपानादिषु सह पृथग्वा दृष्टेषु पौर्वापर्यादिस्मृतिस्तदपेक्षैव । § 858

**स्त्वादीनाम्** द्वन्द्वः, पुनः अस्य **आदिशब्देन** बहुव्रीहिः, अस्यापि **लक्षणशब्देन** षष्ठीसमासः, अस्य च **श्रवणेन,** तस्मात् **पुनः तथा** श्रवणप्रकारेण **दर्शिनः** स्त्यादि  दिदर्शनवतः समभिज्ञानं **किन्नाम प्रमाणम्** इति सम्बन्धः 181/mkj
। अपरमपि प्रमाणान्तरमस्य दर्शयन्नाह--**संख्यादि** इत्यादि । **संख्यैकत्वादिलक्षणा आदिर्येषां** कार्यकारणभावपरवाक्यदूरासन्नादीनां ते तथोक्ताः तेषां **प्रतिपत्तिश्च प्रमाणान्तरम्** इति सम्बन्धः । § 859

आत्मनो ऽर्थसन्निकर्षजत्वात् मानसं प्रत्यक्षं सुखादिप्रतिपत्तिवत् सा इत्येके । तत्राह--**पूर्व** इत्यादि । **पूर्वश्च अपरश्च** तयोः **निरीक्षणात्** तत्प्रतिपत्तिः । अत्रायमभिप्रायः— यथा आत्ममनश्चक्षुराद्यर्थ सन्निकर्षाज् जायमानं /ms
ज्ञानं चक्षुरादिप्रत्यक्षमुच्यते नान्यत्, तथा आत्ममनोऽर्थसन्निकर्षात् मानसम् इत्युच्यतां न प्रकृतम् । यदि पुनः तदपि ज्ञानत्वात् चक्षुरादिजनितरूपादिज्ञानवत् इन्द्रियार्थसन्निकर्षजम्; तर्हि अनुमानादिना व्यभिचारः । अस्यापि पक्षीकरणे मानसप्रत्यक्षत्वम् । तद्धेतुलिङ्गादेरप्यपेक्षणान्न दोष इति चेत्; अन्यत्र पूर्वापरनिरीक्षणस्य अपेक्षणान्न दोष इति न समानमिति । § 860

एतद्विवृण्वन्नाह--**सोपान** इति । अत्र **आदिशब्देन** कारणादिपरिग्रहः, तेषु **सह पृथग् वा दृष्टेषु** सोपानेषु पृथगेव दृष्टेषु कारणादिषु संख्यादिप्रतिपत्तिर्भवन्ती उक्तन्यायेन प्रत्यक्षादेः अतिरिच्येत, ततः पृथक् प्रमाणं भवेत् । कथंभूता ? इत्याह--**पौर्वा** इत्यादि । **पूर्वापरयोर्भावः आदिर्यस्य** स्थूलेतरत्वादेः तस्य या **स्मृतिः तदपेक्षैव** नान्यथा इति एवकारार्थः । तथाहि--पूर्वदर्शनाहितसंस्कारस्य अपरदर्शने सति ततः पूर्वस्मरणे च तस्माद् अयमेकः तेन द्वितीयः इत्यादि प्रतिपत्तिः, एवं कारणभावादौ योज्यम् । § 861

अन्यदपि तद्दर्शयन्नाह--**नाम** इत्यादि । § 862

---

४ स्त्वा] स्त्या
६ स] इयं सा स्त्रीशब्दवाच्या इत्यादि ज्ञामम् ।
१० नो] आत्ममनो
११ इ] प्रत्यभिज्ञानं हि नाम आद्यप्रत्यक्षनिरोधे द्वितीयदर्शने प्रागाहितसंस्काराभिव्यक्तौ स्मृतिपूर्वं तृतीयं दर्शनम् ।--न्यायवा° पृ° ४०० । एवं पूर्वज्ञानविशेषितस्य स्तम्भादेर्विशेषणमतीतक्षणविषय इति मानसी प्रत्यभिज्ञा ।--न्यायम° प्रमे° पृ° ३३ ।
१३ र्षात्] जायमानम् ।
१४ म्] प्रत्यभिज्ञानाख्यम् ।
१४ त] संख्यादिज्ञानम् ।
१६ अ] अनुमानस्यापि ।
१६ मा] तस्यास्तु ज्ञानत्वादेव हेतोः मानसज्ञानवत् ।
२७ पि] प्रमाणान्तरम्--प्रत्यभिज्ञानाख्यम् ।

...6 नामादियोजनाज्ञानं पश्यताञ्चोपमानवत् । [१/२]

|§ 863

पूर्वापरप्रमाणव्यक्त्यविनाभाविशब्दादियोजनाज्ञानं सर्वं प्रमाणान्तरम् ।

§ 864

**नाम** अभिधानम् **आदिर्**येषां जातिगुणादीनां ते तथोक्ताः तेषां **योजनाज्ञानम्** केषां वत् ? * इत्याह--**पश्यताम्** अभिधेयाभिधानादिकम् उपलभमानानाम् । **चशब्दो** भिन्नप्रक्रमः **ज्ञानम्** इत्यस्यानन्तरं द्रष्टव्यः । तत् किम् ? इत्याह--**उपमानवद्** इति । तद्वत् प्रमाणान्तरं स्यात् इत्यर्थः ।

§ 865

एतद्व्याचष्टे **पूर्व** इत्यादिना । अभिधानाभिधेयविशेषणादीनां **पूर्वापरप्रमाणव्यक्तयः** तदविनाभावि यत् **शब्दादियोजनाज्ञानं** तत् **सर्वं** निरवशेषम्

/ms उपमानमिव **प्रमाणान्तरम्** । § 866

किं पुनः आपाद्यान्येतान्येव प्रमाणानि आहोस्वित् पराण्यपि सन्ति इति कश्चित् ? सन्ति इति दर्शयन्तमाह--**अर्थापत्तिः** इत्यादि । § 867

182/mkj

अर्थापत्तिरियं चिन्ता मेयान्यापोहनोहनम् ॥ ६

‖§ 868

देशकालादिनियतं पश्यतः शृण्वतो वा पुनः इदमित्थमेव नान्यथेति विधिप्रतिषेधलक्षणं विकल्पद्वयं कथञ्चन स्मार्तमेवेति संकीर्येत न वा ? संभवप्रत्ययस्वभावमवधारणपरं स्मार्तमेव । § 869

प्रमाणषट्कविज्ञातो यद्यालुः साध्याभावे नियमेनाभवन् यत्र अदृष्टमर्थं कल्पयेत् सा अर्थापत्तिः । तदुक्तम्-- § 870

*प्रमाणषट्कविज्ञातो यत्रार्थोऽनन्यथाभवन् ।
अदृष्टं कल्पयेदर्थं सार्थापत्तिरुदाहृता ॥ मी० श्लो० अर्था०
श्लो० १ इति ।§ 872

अटव्यां गवयदर्शनात् नगरे गवि या स्मृतिः इत्यनेन गृह्यते, अन्यस्याः प्रमाणान्तरत्वेन अविशेषेण प्रसाधितत्वात् । यावान् कश्चिद् धूमवान् प्रदेशः स सर्वोऽप्यग्निमान् इत्यादि प्रतिपत्तिः **चिन्ता** । अथ इयम् अदृष्टश्रुतपूर्वा इति किं स्वरूपा सा इति पृष्ट इव तत्स्वरूपं दर्शयितुमाह--**मेय** इत्यादि

५ *] तत् ?
१८ द्यालुः ] योऽर्थः
२० न्] अविनाभूतः सन् ।
२४ अथ] चिन्ता ।

। **मेयो**ऽनुमेयः अग्न्यादिः विपक्षः तस्माद् **अन्यो** यो अनग्न्यादिविपक्षः तस्माद्धेतोः **अपोहनं** व्यावृत्तिः तस्य **ऊहनं** वितर्कणम् । § 873

अथवा, **मेयो** धूमादिहेतुः तस्य **अन्य**स्माद् अनग्न्यादेः **अपोहनम्** तन मिति केचित्; तद्युक्तमन्यथेति वा चिन्त्यम्; सूत्र एव तदवयवव्याख्याने प्रयोजनाभावात्, *वृत्त्यविशेषप्रसङ्गात् अतिप्रसङ्गाच्च । तस्माद् अन्यथा व्याख्यायते--**मेयः** प्रत्यक्षादिप्रमाणपरिच्छेद्यः स्वपररूपाभ्यां भावाऽभावात्मको घटादिः **तस्य ऊहनम्** दीर्घोऽयम् अन्यथा वा इत्यादि रूपेण दर्शनानन्तरं मानसविकल्पेन चिन्तनम्, तत्रैव **अन्यस्य** पटादेः **अपोहनं** व्यावृत्तिः, तस्य तदिह नास्ति इति **ऊहनं** वितर्कणम् । एतदुक्तं भवति--यथा तदत्र नास्ति इति ऊहनदर्शनाद् अभावाख्यं प्रमाणमिष्यते तथा इत्थमिदम् इत्यूहनदर्शनाद् भावाख्यमपि अपरं *तदिष्यताम्, भावांशवद् अभावांशस्यापि प्रत्याक्षादेरेव अन्यथा ग्रहणाद् अभावाख्यमपि तन्नाभ्युपगन्तव्यमिति, /ms
तदेतत् सर्वम् **उपमानवदिति** सम्बन्धः । § 874

मध्यपदद्वयस्य उत्तरकारिकाद्वयेन यथाक्रमं व्याकरिष्यमाणत्वात् । आद्यन्तपदद्वयं साधिकार्थं कृत्वा व्याख्यातुमाह--**पश्यतः** इत्यादि । **पश्यतः** चक्षुरादिना साक्षात्कुर्वतः । किम् । इत्याह **देश** इत्यदि । **आदि**शब्देन द्रव्यस्वभावपरिग्रहः, तैः **नियतम्** । अत्रायमभिप्रायः— यथा स्वदेशादिना सत्त्वं भावस्य प्रत्यक्षतः प्रतीयते तथा परदेशादिना असत्त्वमपि । ततो निराकृतमेतत्-- § 875

*न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः ।
भावांशेनैव सम्बन्धः योग्यत्वादिन्द्रियस्य हि ॥ मी° श्लो°
अभाव° श्लो° १८ इति ।§ 877

यथैव हि ततो भावांशस्य प्रतीतेः तत्र तद् योग्यं तथा अभावांशस्यापि इति, अत्रापि तद्योग्यमस्तु अविशेषात् । § 878 183/mkj

यत्पुनरेतत्--अभावः स्वसमानजातीयप्रमाणवेद्यः प्रमेयत्वात् भाववत् इति; तदप्यनेन निरस्तम्; प्रत्यक्षबाधनात् प्रतिज्ञायाः । तथा **शृण्वतो वा** शब्दात् प्रतिपद्यमानस्य वा **देशकालादिनियतम्** । अनेन पूर्वस्य हेतोः व्यभिचारं दर्शयति **अग्निहोत्रं जुहुयात् स्वर्गकामः** कृ° य° काठक° ६

१ क्षः] पक्षः
४ न] इत्यूहनं चिन्तन
४ केचित्] व्याख्याकाराः ।
५ *] टीकातः सूत्रस्य भेदो न स्यादिति भावः ।
११ *] प्रमाणम् ।
१२ अ] नास्तिरूपेण ग्रहणसंभवात् ।
२२ त] प्रत्यक्षादेः ।
२२ त] भावांशे ।
२२ त] प्रत्यक्षादि ।
२३ त] प्रत्यक्षादि ।
२४ रेत] मेयो यद्वदभावो हि मानमप्येवमिष्यताम् । भावात्मके यथा मेये नाभावस्य प्रमाणता ॥ तथैवाभावमेयेऽपि न भावस्य प्रमाणना ।--मी° श्लो° अभाव° श्लो° ४५-४६ ।
२५ प्र] प्रत्यक्षेण घटाद्यभावस्य प्रतीयमानत्वात् ।

। ७ इति वाक्यात् स्वभावाद् अभिमतसत्त्ववद् अनभिमतासत्त्वस्यापि प्रतीतेः, किमन्यथा तदुच्चारणेनेति ? तस्य किम् ? **इत्याह--पुनः** इत्यादि । **पुनः** दर्शनश्रवणाद् ऊर्ध्वं **विकल्पद्वयं** जायते इत्युपस्कारः । कथंभूतम् ? इत्याह— **विधिप्रतिषेधलक्षणं** विधिप्रतिषेधयोः भावाभावयोः लक्षणं निश्चयनं [यस्य] यस्मिन् वा तत्तथोक्तम् । केन प्रकारेण ? इत्याह **इत्थम्** /ms इत्यादि । **इदं** दृश्यमानं च **इत्थम्** अनेन स्वदेशादि प्रकारेणैव **नान्यथा** परदेशादिप्रकारेण नैव । **एवकारो**ऽत्रापि सम्बध्यते । **च** इति समुच्चये । **इतिः** एवमर्थे । पुनरपि कथम्भूतम् ? **अवधारणपरम्**उक्तवत् । तत्किम् ? इत्याह— **कथञ्चन** इत्यादि । **कथञ्चन** केनापि युक्तिप्रकारेण **स्मार्त्तमेव** । स्मृतिशब्दः पूर्वोऽनुवर्तते इत्येव वर्त्तते इत्येवं **संकीर्येत न वा ?** यदि संकीर्येत; तर्हि **विधिलक्षण**विकल्पवत् **प्रतिषेधलक्षण**विकल्पोऽपि न स्मृतेः प्रमाणान्तरं स्यात् । अथ न संकीर्यते; प्रतिषेधलक्षणविकल्पवत् विधिलक्षणविकल्पोऽपि प्रमाणान्तरं स्यादिति मन्यते । तन्न कु मा रि लः प्रमाणषट्कवादी । § 879

योऽपि प्र भा क रो मन्यते--नाऽभावः प्रमाणान्तरं प्रत्यक्षादिप्रमाणपञ्चकशेषत्वादस्य इति तं प्रत्याह--**संभव** इत्यादि । अस्यायमर्थः--अनुमानार्थापत्तिव्यपदेशभाक्, च शब्दोऽत्र पूर्वसमुच्चयार्थो द्रष्टव्यः । **विकल्पद्वयम्** इति सम्बन्धः । कथंभूतम् ? इत्याह--**संभवः** साध्यभावे भावः नियमेन तदभावे अभावः, दृश्यमानस्य श्रूयमाणस्य वा देशकालादिनियतस्य तयोः **प्रत्ययः** प्रतीतिः अन्यथानुपपत्तिग्रह इति यावत् । स एव **स्व** आत्मीयः कारणत्वेन **भावो** यस्य तत्तथोक्तम् । अनेन यथा अनुमानस्य साध्याभावासंभवनियमनिर्णयलक्षणो हेतुः कारणं तथा अर्थापत्तेरपि इति दर्शयति । पुनरपि कथंभूतम् ? इत्याह--**अवधारणपरं** जीवादिः स- 184/mkj, /ms त्त्वादिभ्यः परि णाम्येव नान्यथा इत्यवधारणप्रधानम् । एतेन तयोः

---

१ इति] मैत्रा° ६ । ३६ ।
१ द्] अग्निहोत्रादियागप्रतिपादनवत् ।
१ अन] बौद्धादिकल्पितस्य खादेत् श्वमांसम् इत्याद्यनिष्टार्थस्य निवृत्तिरपि ततः प्रतीयते इति भावः ।
१० इ] इत्येव वर्त्तते इति द्विर्लिखितम् ।
१४ वादी] प्रत्यभिज्ञानाख्यस्य सप्तमस्यापि प्रमाणस्य प्रसङ्गात् ।
१५ ते] अप्रमीयमाणत्वमेव हि नास्तित्वं नापरं न चाप्रमीथमाणतैव प्रमेयं यस्मात्तदर्थासंसृष्टानुभवयुक्ततैव आत्मनः तस्यार्थस्याप्रमीयमाणता । सा चावस्था आत्मनः स्वसंविदितैव, अतः प्रमेयं नावशिष्यते ।--बृहती प° पृ° ११९-२० । तस्माद् भावग्राहकप्रमाणाननुवृत्तिरेव अभावावगमं प्रसूते पृ° ११९ अभावस्य तु स्वरूपावगतिर्नास्ति इति न प्रमाणाभावादन्यः प्रमेयाभावः । प्रमाणाभावोऽपि च स्वरूपान्तरानवगमादेव न भावान्तरप्रमितेर्भिद्यते, भावान्तरप्रमितिश्च स्वयं प्रकाशरूपा न प्रमेयतामनुभवतीति प्रमेयमभावाख्यस्य प्रमाणस्य नोपपद्यते । प्रमेयासद्भावाच्च न प्रमाणान्तरमवकल्पन इति स्थितम् । पृ° १२४ नास्तित्वञ्च प्रमाणानामनुत्पत्त्यैव गम्यते । नास्तित्वप्रतिपत्तिर्हि तां विना नास्ति कुत्रचित् ॥ योग्यप्रमाणानुत्पत्तेः कारणत्वपरिग्रहात् । अतिप्रसङ्गदोषोऽपि नावकाशमुपाश्नुते ॥--प्रक° प° पृ° १२९ । नयवि° पृ° १६२ । तन्त्ररह° पृ° १७ । प्रभाकरवि° पृ° ५७ ।
२४ त] अनुमानार्थापत्त्योः ।

स्वरूपाभेदं कथयति । तत् किम् ? इत्याह--**संकीर्येत न वा** संकीर्येत ? कथम् ? इत्याह--**कथंचन,** अनुमानप्रकारेण अर्थापत्तिप्रकारेण चैकीभवेद्वा न वा ? यदि संकीर्येत; तर्हि यथा कु मा रि ल स्य प्रमाणषट्कवार्त्ता वार्त्तैव तथा प्रकारस्य प्रमाणपञ्चककथा कृत्वैव । अथ न संकीर्येत; त्रिरूपलिङ्गजनितादनुमानानुमानद्वत्त यथा साधर्म्यदृष्टान्तरहिताया अर्थापत्तेः भेदः तथा तस्याः पक्षधर्मत्ववर्जिताया इति स एव दोषः तयोः प्रमाणसंख्याव्याघात इति मन्यते । नन्वनुमानं स्मरणजम्, दृष्टान्तस्मरणभावे भावात्, नैवमर्थापत्तिर्विपर्ययात् ततस्तयोर्भेद इति चेत्; अत्राह--**स्मार्त्तमेव** इति । स्मृतेर्जातं **स्मार्त्तम्** । एवकारेण एतत्कथयति--यदि अनुमानोत्थापकोऽर्थो दृष्टान्तस्मरणमन्तरेण अनुमानं नोत्थापयितुमलम्, तर्हि अर्थापत्त्युत्थापकोऽपि तथैवाऽस्तु । अथ विपक्षे सद्भावबाधकप्रमाणबलादेव अर्थोऽर्थापत्तिमुपजनयति, तथा अनुमानमपि इति निरूपयिष्यते । यदि पुनः अर्थापत्तौ दृष्टान्तस्याऽसतोन स्मरणम्, अनुमाने सतोऽपि; अकिञ्चित्करस्य किं स्मरणेन इति समानः तदभावः । अथायं निर्बन्धो लिङ्गं दृष्टान्तमन्तरेण साध्याविनाभावि ज्ञातुं न शक्यते इति; तथा अर्थापत्त्युत्थापकोऽप्यर्थः, इति सूक्तम्--**स्मार्त्तमेव** इति । § 880

ननु यदुक्तं स्मृतिः उपमानवदिति न दोषाय अभ्युपगमादिति चेत्; अत्राह--**गविस्मृतिः** इत्यादि । § 881

...7 गवि स्मृतिः प्रमाणं स्यात् गवयं पश्यतः कथम् ।
अन्यत्र तद्विलक्ष्येऽपि प्रयोजनवशान्न किम् ॥ ७ ॥§ 883

उपमावाक्याद् यथा क्वापि सादृश्यप्रतिपत्तिस्तथा कस्यचित् केनचिद् वैलक्षण्यप्रतिपत्तिः अर्थापत्तेः । तदुत्तरप्रत्यक्षात् पूर्वस्मृतिरविशेषेण प्रमाणम-

---

४ स्य ] प्र भा क र स्य
४ कृत्वैव ] कथैव
५ त्त ] दनुमानात्
६ भेदः ] अर्थापत्तौ साधर्म्यदृष्टान्ते व्याप्तिग्रहणं नावश्यकम् । अविनाभाविता चात्र तदैव परिगृह्यते । न प्रागवगतेत्येवं सत्यप्येषा न कारणम् ॥--मी० श्लो० अर्था० श्लो० ३० ।
६ स्याः ] अर्थापत्तेः ।
६ र्जिताया ] अपि भेदोऽस्तु । इति तद्रहिताऽर्थापत्तिः प्रमाणं स्यात् ।--न्यायकुमु० पृ० ५१९ ।
७ योः ] कुमारिलप्रभाकरयोः ।
८ स्त ] अनुमानार्थापत्त्योः ।
१३ तो ] असत्त्वात् ।
१४ भावः ] दृष्टान्ताभावः ।
१६ र्थः ] साध्याविनाभावितया ज्ञातुं न शक्येत ।
२० किम् ] तुलना--उपमानं प्रसिद्धार्थसाधर्म्यात् साध्यसाधनम् । तद्वैधर्म्यात् प्रमाणं किं स्यात् संज्ञिप्रतिपादनम् ॥ १९ ॥--लघी० । न्यायावता० वा० श्लो० १४ ।

स्तु प्रयोजन[वशात्] प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम्, संज्ञासंज्ञिसम्बन्धप्रतिपत्तिश्च उपमानार्थ इति किं परिसंख्यानेन ? कृतेन अकृतवीक्षणस्य सर्वस्यैव भवति उपमानम् । नन्वेवमुपमानानुमानयोः अभेदप्रसङ्गः, तथास्तु । उदाहरणसाधर्म्यवैधर्म्याभ्यां सह पृथग्वा स एव तत्र साधनम् । अत्रापि उपमानसाधर्म्यानुमानयोरभेदः स्याद् विशेषादर्शनादिति विपरीतलक्षणप्रज्ञो जडात्मा । ततोऽनुमानमेव, सर्वथा अविनाभावसम्बन्धप्रतिपत्तिमन्तरेण प्रामाण्यानुपपत्तेः । प्रत्यक्षेऽपि समानः प्रसङ्गः । तथैवानुमानेऽपि । कस्यचित् कथञ्चित् स्वतः सिद्धिमन्तरेण उत्तरस्यावृत्तेः चिन्तोपमानवत् ।
§ 884

185/mkj

/ms गोरलाभे गवयेन तत्कार्यं कर्त्तव्यम् इति श्रुत्वा कश्चित् कञ्चिद् आटव्यं पृच्छति कथंभूतो गवयो भवति ? स तं प्रत्याह--गौरिव गवयः इति । स पृष्टा एवं श्रुत्वा नगरे गामुपलभ्य पुनः अटवीं पर्यटन्, यद्वातत्र गवयमुपलभ्य गां स्मरति तदा सा **गवि** गवयसादृश्यविशिष्टे **स्मृतिः प्रमाणं** मीमांसकस्य उपमानाख्यं मानं **स्याद्** भवेत्, **गवयं पश्यतः** पुंसः । चेच्छब्दोऽत्र द्रष्टव्यः, कात्वा वा तदर्थो व्याख्यातव्यः । अत्र दूषणमाह--**कथम्** इत्यादि । **कथं** केन प्रकारेण **न प्रमाणम् अपि तु** प्रमाणमेव । **अन्यत्र** क्वचित् महिष्यादौ **स्मृतिः** इति सम्बन्धः । कथंभूते ? इत्याह--**तद्** इत्यादि । तस्माद् गवयाद् विसदृशरूपेण लक्ष्यते इति **तद्विलक्ष्यः** तस्मिन्नपि न केवलं तत्सदृशे गवि इति । एतदुक्तं भवति--यथा सादृश्यविशिष्टे [गवि तद्विशिष्टे वा] सादृश्ये, गोग्रहणमुपलक्षणम्, स्मृतिः प्रमाणान्तरं तथा वैलक्षण्यविशिष्टे महिष्यादौ तद्विशिष्टे वा वैलक्षण्ये इति । ननु गोसदृशालम्भनादि यथा सदृशस्मृतेः प्रयोजनं नैवं वैलक्षण्यस्मृतेरिति चेत्; अत्राह--**प्रयोजनवशात्** इति । वैदिकवद् इतरप्रयोजनभावादिति भावः । § 885

कारिकां विवृणोति **उपमा** इत्यादिना । गौरिव गवयः इति **वाक्याद् यथा क्वापि** गवि **सादृश्यप्रतिपत्तिः तथा कस्यचित्** महिष्यादेः **केनचिद्** गवादिना **वैलक्षण्यप्रतिपत्तिः** । कुतः ? **अर्थापत्तेः**, यत एवं **तत्** तस्मात् **उत्तरप्रत्यक्षात्** गवयप्रत्यक्षात् **पूर्वस्य** गवादेः **स्मृतिः प्रमाणमस्तु** अविशेषेण, सदृशस्मृतिवद् विसदृशस्मृतिरपि प्रमाणं भवतु । कुत एतत् ? इत्याह—
/ms **प्रयोजन** इत्यादि । § 886

---

१ म्] प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्--न्यायसू॰ १ । १ । ६ ।
११ व्यं] वनवासिनम् ।
१२ ष्ट्वा] दा
१२ त्र] अटव्याम् ।
१५ कात्वा] काक्वा
२१ ण्ये] प्रमाणान्तरमस्तु ।

२१ नादि] गोसदृशस्य यागादौ आलम्भनं क्रियते इति सदृशस्मृतेः वैदिकं प्रयोजनं विद्यते इति भावः ।
२३ इ] लौकिकजनस्य गोविलक्षणमहिषादिज्ञानरूपं प्रयोजनमस्त्येवेति भावः ।

ननु यदुक्तम्--**चिन्तोपमानवत्** इति; तत्र साकल्येन [लिङ्ग]लिङ्गिसम्बन्धबुद्धिर्यदि चिन्ततेयस्याः साक्षात् परम्परया मनोऽर्थसन्निकर्षादुत्पत्तेर्मानसप्रत्यक्षत्वेन प्रमाणता इति सिद्धसाधनम् । अथवा यदुक्तम्--प्रमाणान्तरम् इत्यादि; तदपि तादृगेव; वैधर्म्योपमानत्वादस्य, शेषं मानसमध्यक्षम् इति नैयायिकादयः । तान् प्रत्याह--**प्रसिद्ध** इत्यादि । **प्रसिद्धेन** गवादिना **प्रसिद्धं** वा यत् **साधर्म्यं** तस्मात् **साध्यस्य** संज्ञासंज्ञिसम्बन्धज्ञानस्य **साधनम्** प्रमातृप्रमेयाभ्यामन्यः कारणकलापः **उपमानम्** प्रमाणम् । अस्य फलम् अर **संज्ञा** इत्यादि । **उपमानार्थ** उपमानफलम् **इत्येवं च** शब्दः पूर्वसमुच्चये **किं परिसंख्यानेन** परिगणनेन, न किञ्चित् । किं तर्हि भवतु ? इत्याह--**कृतेन** इत्यादि । **कृतेन** निश्चितेन **[अ]कृतस्य** परोक्षस्य यद् **वीक्षणं** ज्ञानं तस्य **सर्वस्यैव** निरवशेषस्यैव **भवति उपमानम्,** उपमानादपरं परोक्षं प्रमाणं मा भूद् इति मन्यते । एतदुक्तं भवति--यथा विशदेन्द्रियार्थसन्निकर्षजज्ञानसाधर्म्यात् साक्षात् परम्परया तत्सन्निकर्षजं विशदमविशदं वा प्रत्यक्समुच्यते 186/mkj तथा प्रसिद्धसाधर्म्यात् साध्यसाधनोपमानसाधर्म्यात् कृतेनाकृतज्ञानम् उपमानमस्तु अवान्तरविशेषस्य सर्वत्र भावादिति । § 887

पर आह--**नन्वेवम्** इत्यादि । **ननु** इति अक्षमायाम् । **एवं** सति **उपमानाऽनुमानयोः अभेदप्रसङ्गः;** भेदश्च तयोर्लोके प्रसिद्ध इति मन्यते । /ms **तथास्तु** इति वदन्तमाचार्यं प्रत्याह--**स एव तत्र** इत्यादि । **तत्र** तयोः उपमानाऽनुमानयोर्मध्ये **साधनम्** अनुमानम् । काभ्याम् ? इत्याह--**उदाहरण** इत्यादि । **उदाहरणं** निदर्शनं तेन यत् **साधर्म्यं** कृतकत्वादि समानधर्मेण सदृशत्वम् **वैधर्म्यं** तद्धर्माऽभावेन विसदृशत्वं पक्षस्य **ताभ्याम्** इति । **सह** इत्यनेन अन्वयव्यतिरेकवत् पूर्ववच्छेषवत्सामान्यतोऽदृष्टम् इत्यनुमानं दर्शयति **पृथग्वा** इत्यनेन केवलान्वयि पूर्ववच्छेषवद् इति केवलव्यतिरेकि पूर्ववत्सामान्यतोऽदृष्टम् इति च उपमानलक्षणमुक्तमिति नोच्यते । § 888

अत्र दूषणमाह आचार्यः--**अत्रापि** इत्यादिना । न केवलं पूर्व व्याप्तिज्ञान[स्य] मानसाध्यक्षत्वकल्पने किं चैत्रापि **उपमानसाधर्म्यानुमानयोरभेदः स्यात् प्रसिद्धसाधर्म्यात् साध्यसाधनम्** न्यायसू° १ । १ । ६ इत्यस्य

---

२ स्याः] चिन्ता; तस्याः
३ इति] तस्य ग्रहणं प्रत्यक्षानुपलम्भसहायान्मानसात् प्रत्यक्षात् । धूममग्निसहचरितमिन्द्रियेणोपलभ्य अनग्नेश्च जलादेर्व्यावर्तमानमनुपलम्भेन ज्ञात्वा मनसा निश्चिनोति धूमोऽग्निं न व्यभिचरतिति ।--न्यायकलि° पृ° ३ ।
४ तादृगेव] सिद्धसाधनमेव ।
७ न्यः] प्रमातृप्रमेयाभ्यामन्यस्य प्रमाणता भवति ।
८ अर] आह-
१३ वा] ज्ञानम् ।
१५ भावादिति] न हि किञ्चिदवान्तरविशेषमात्रेण प्रमाणान्तरत्वं भवति ।
२२ पू] तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं चेतिसू° १ । १ । ५त्रिविधमिति अन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति ।--न्यायवा° पृ° ४६ ।
२५ पूर्व] र्वं
२६ चैत्रापि] किन्त्वत्रापि

**उदाहरणसाधर्म्यात् साध्यसाधनम्** न्यायसू° १ । १ । ३४ इत्यस्य च **विशेषाऽदर्शनात्** इति मन्यते । तथा च परः परमार्थतः तयोर्भेदं कथयति लक्षणं च समानं ब्रूते **इति विपरीतलक्षणप्रज्ञो जडात्मा इति** । सत्यं निदर्शनमात्रमेतत् तेन वैधर्म्योभयोपमानानुमानयोरभेदः स्यादिति च द्रष्टव्यम् । § 889

एवं स्वयम् आचार्येण नैयायिके निरस्ते सौगताः प्राहुः--**ततोऽनुमानमेव** इत्यादि । अस्यायमर्थः--यस्मात् **कृतेन अकृतवीक्षणं सर्वम्** इति विभक्तिपरिणामेन सम्बन्धः । § 890

/ms अत्राह परः--प्रसिद्धसाधर्म्यादन्यतो वा साध्या विनाभाविनः साध्यसाधनमनुमानमस्तु परं तु उपमानादिकं स्यादिति चेत्; अत्राह सौगतः--**सर्वथा** इत्यादि । सर्वेण प्रसिद्धसाधर्म्यप्रकारेण अन्येन वा **सर्वथ अविनाभावसम्बन्धप्रतिपत्तेः** विना **तमन्तरेण प्रामाण्यानुपपत्तेः** अनुमानमेव अस्तु इति सम्बन्धः । एतदुक्तं भवति--यदि प्रसिद्धसाधर्म्यस्य अन्यस्य वा अविनाभावसम्बन्धप्रतिपत्तिरस्ति; सिद्धमस्मत्समीहितम् । अन्यथा ततो जायमानं न किञ्चित्प्रमाणम् अतिप्रसङ्गादिति । ननु यथा प्रत्यक्षस्य अविनाभावसम्बन्धप्रतिपत्तेर्विना प्रामाण्यं तथा उपमानादेः स्यादिति चेत्; अत्राह--**प्रत्यक्षेऽपि** इत्यादि । न केवलमन्यत्र अपि तु **प्रत्यक्षेऽपि समानः** सदृशः **प्रसङ्गः** प्रसक्तिः **अविनाभाव** इत्यादिकस्य । *तदपि हि वस्तुप्रतिबन्धात् तत्र प्रमाणं नान्यथा । § 891

अत्राह चार्वाकः--अनुमाने तर्हि अविनाभावसम्बन्धप्रतिपत्तेरभावात् प्रामाण्यं न स्यादिति; तत्राह--**तथैव** इत्यादि । **तथा** तेन प्रत्यक्षप्रकारेण **अनुमानेऽपि** न केवलम् अन्यत्र समानः प्रसङ्गः इति पदघटना । अस्ति च तत्रापि सा इति मन्यते । तदुक्तम्-- § 892

187/mkj

*अर्थस्यासंभवेऽभावात् प्रत्यक्षेऽपि प्रमाणता ।
प्रतिबद्धस्वभावस्य तद्धेतुत्वे समं द्वयम् ॥ इति ।§ 894

एवं स्वमतं व्यवस्थाप्य सौगताः कदाचिदेवं ब्रूयुः--अस्माकं कथं चिनो * **पमानवद्** इति । तत्राह आचार्यः--**कस्यचिद्** इत्यादि । **कस्यचित्** धूमादेः

---

२ रः] नैयायिकादिः ।
९ रः] नैयायिकः ।
१० स्तु] अविनाभावग्रहणं बिना यत् ज्ञानं सादृश्याद् भवति तद् भवतु उपमानमित्यभिप्रायः ।
१७ त्र] उपमानादावेव ।
१८ *] प्रत्यक्षमपि ।
२३ च] प्रत्यक्षेऽपि ।
२३ सा] अर्थाविनाभावप्रतिपत्तिः ।
२५ म्] प्रत्यक्षमनुमानञ्च ।
२५ इति] अत एवाह--अर्थस्यासंभवे...--प्र° वार्तिकाल° ३ । ११७ । तत्त्वसं° प° पृ° ७७५ । आप्तप° पृ° १७३ । न्यायवि° वि° प्र° पृ° २० । सन्मति° टी° पृ° ५५५ । न्यायावता° वा° वृ° पृ° ८६ । धर्मकीर्तिरप्येतदाह प्रमाणमी° पृ° ८ ।
२७ *] चिन्तो

**कथञ्चित्** केनापि प्रकारेण **स्वतः** [न]साधनान्तरेण ज्ञानापेक्षामन्तरेण **सिद्धिः** /ms
निर्णीतिः[ता]**मन्तरेण उत्तरस्य** अध्यक्षद् अनुमानस्याऽ**वृत्तेः चिन्तोपमानव-त्** इति । अत्रायमभिप्रायः--अस्याः सिद्धेः सद्भावे ततः अनुमानमेव अस्तु इत्ययुक्तं प्रत्याख्या[नम्] । § 895

[प्रत्यक्षा]नुमानयोरन्यतरत्र तदन्तर्भावात् न दोष इति चेत्; अत्राह--**भूता** इत्यादि । § 896

...8 भूता भव्याः सर्वे सन्तो भावाः क्षणक्षयाः ।
इति व्याप्तौ प्रमाणं ते न प्रत्यक्षं न लैङ्गिकम् ॥ ८ ॥§ 898

परोक्षस्य सम्बन्धात्तदविनाभाविनोऽन्यतः सिद्धिरनुमानमेवेति; अत्र सम्बन्धो नैव प्रत्यक्षो भवितुमर्हति यतोऽनुमानव्यवस्था स्यात् । न हि कस्यचित् साकल्येन व्याप्तिज्ञानं क्वचित् कदाचित् प्रत्यक्षं सन्निहितविषयबलोत्पत्तेरविचारकत्वात् । यदि तद्बलोत्पन्नं विकल्पज्ञानं न भवेत् अनुमानं च न स्यात् । अनधिगतलिङ्गलिङ्गिस्वलक्षणाध्यवसायेऽपि यदि न प्रमाणान्तरं प्रत्यक्षमपि न स्यात् । तत्प्रत्यक्षानुमानाभ्याम् अविकल्पित [सांवृताभ्याम्] नार्थाधिगतिर्नाम । समारोपव्यवच्छेदस्याप्यभावात् । यत् सत् तत्सर्वं क्षणिकमेवेति प्रत्यक्षसिद्धौ शब्दक्षणिकत्वमेव किमनुमेयम् ? § 899

**भावाः सन्तः** पदार्थाः **सर्वे** निरवशेषाः । के ते ? इत्याह--**भूता** इत्यादि । **क्षणिक्षया इत्येवं व्याप्तौ** व्याप्तिविषये **प्रमाणं ते** सौगतस्य **न प्रत्यक्षं न लैङ्गिकम्** नानुमानम् । तदभावाभ्युपगमान्नायं दोष इत्येके । तेषां व्याप्तेरग्रहे नानुमानं नाम, इत्ययुक्तमिदम्--**प्रत्यक्षमनुमानं चेति द्वे एव प्रमाणे** । इति । व्यवहारेण तदभिधानाददोष इति चेत्; व्यवहारेण तत् न परमार्थतः [इति] कुतोऽवसेयम् ? विचारादिति न युक्तम्; अस्य अप्रमाणत्वे नातस्तदवसेयम् अतिप्रसङ्गात् । प्रमाणत्वमपि नाध्यक्षत्वेन [अनिर्विकल्पकस्य हि प्रत्यक्षत्वमभ्युपगम्यते, विचारस्य च विकल्परूपत्वादिति भावः ।नभ्युपगमात्] विरोधाच्च । नानुमानत्वेन; अनभ्युपगमात् । तन्न विचारात् तदवसेयम् । प्रत्यक्षादिति; न; एवंवादिनः स्वसंवेदनप्रत्यक्षादन्यस्य असंभवात् । न च तत् स्वरूपादन्यत्र वृत्तिमत् इति कुतस्ततः अन्यत् प्रत्यक्षम् अनुमानं च

---

२ द्] वत्
५ त] चिन्तायाः तर्कस्य अन्तर्भावात् ।
१८ णि] ण
१९ त] व्याप्तिज्ञान ।
२० म्] द्विविधं सम्यग्ज्ञानम् ।
प्रत्यक्षमनुमानं च--न्यायबि० १ । २, ३ ।
प्र० वा० २ । १ । प्रत्यक्षानुमानभेदेन द्विविधमेव प्रमाणं प्रतिपत्तव्यम्--प्र० वार्तिकाल० २ । १ ।
२२ अस्य] विचारस्य ।
२२ ना] विचारात् ।
२७ त्] स्वसंवेदनप्रत्यक्षम् ।

व्यवहारेण इति प्रतिपत्तिः ? नहि नीलज्ञानं पीतादिकम् इदंतया नेदंतया वा व्यवस्थापयितुमलम्, ज्ञानान्तरकल्पनावैफल्यप्राप्तेः । अथ अन्यत् 188/mkj प्रत्यक्षादिकम् असत्; असतश्च सत्त्वेन अन्यथा वा कल्पनं नान्यतो व्यवहारात् इति चेत्; कुतस्तदसत्त्वसिद्धिः ? अनुपलम्भात् इत्यनुत्तरम्; /ms स्वयमेव अतः परेण+अनुमानव्यवस्थानात् **प्रतिषेधाच्च कस्यचित्** इति वचनादिति । अस्य व्यवहारेण प्रामाण्ये कुतः अन्तः परमार्थतोऽन्याभावसिद्धिः यतः स्वसंवेदनाध्यक्षाद्वैतमेव इति युक्तम् । नाप्यत एव तदभावः सिध्यति; तत्र अस्य अव्यापारात्, इतरथा सुखादीनां परस्परमनुलम्भात् सर्वाभावः स्यात् । § 900

एतेन यदुक्तं प्र ज्ञा क रे ण--**प्रतिभासाद्वैतादन्यस्य अभावात् कथमुच्यते भूता इत्यादि** इति; तन्निरस्तम् । अस्याः ग्रहणम् उपलक्षणम्, तेन अन्यस्यामपि, तन्न तस्य प्रमाणम् इत्यनुमानोच्छेदः । § 901

कारिकार्थं दर्शयितुमाह--**परोक्षस्य** इत्यादि । **परोक्षस्य** इन्द्रियविषयस्य **सम्बन्धात् तदविनाभाविनोऽन्यतः** ततोऽन्यस्मात् **सिद्धिः अनुमानमेव** न प्रमाणान्तरम् । **इति** शब्दः परपक्षसमाप्तौ । सूरिः आह--**अत्र** इत्यादि । **अत्र** परपक्षे **संबन्धो** लिङ्गलिङ्गिनोः अविनाभावो **नैव प्रत्यक्षो भवितुमर्हति यतो** यस्मात् तत्प्रत्यक्षभवनार्हत्वात् **अनुमानव्यवस्था स्यात्** । **यत** इति वा आक्षेपे, नैव स्यात् । एतदुक्तं भवति--**उपलम्भः सत्ता** प्र° वार्तिकाल° ३ । ५४ इति वचनात् प्रत्यक्षभवनार्हत्वाभावेन सर्वचस्तदभावे नानुमानं कारणाभावे कार्यानुत्पत्तेरिति । एतदेव दर्शयन्नाह--**नहि** इत्यादि । **हि** यस्मात् **न कस्यचित्** सौगतस्य नैयायिकादेर्वा **साकल्येन** सामस्त्येन **व्याप्तिज्ञानं** लिङ्गलिङ्गिसम्बन्धग्रहणं **प्रत्यक्षं क्वचिद्** व्यवहारे परमार्थे वा देशे **वा कदाचित्** संसारिदशायां योगिदशायां वा काले वा **भवितुमर्हति** । ततो /ms निराकृतमेतत्--**यस्य यावतादेशमात्रा** प्र° वार्तिकाल° ३ । ६१ इति । केनचिद् धर्मेण न तावद्वैशद्येन; *तत्र तदभावात्, तथा अव्यवहारात् । तथापि तत्र तदङ्गीकरणे न किञ्चिदविशदं ज्ञानं भवेत् । नापि चक्षुराद्यक्षप्रभवत्वेन; तत्र तदव्यापारात्, अन्यथा प्रत्यक्षसंख्यानियमव्याघातः । अभ्यासजत्वेनेति चेत्; अत्रेदं चिन्त्यते--विकल्पमात्रं वा अभ्यासपरिकरगोचरीकृतं तत् स्यात्, अनुमानं वा ? प्रथमविकल्पे न तत्प्रमाणम्,

---

३ था] असत्त्वेन वा ।

५ रेण] बौद्धेन ।

६ नादिति] धर्मकीर्तिरप्येतदाह--प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः । प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ॥--प्र° मी° पृ° ८ । प्रमेयरत्नमा° २ । १ । तथा चोक्तं तथागतैः--प्रमाणान्तरसामान्यस्थिते...--सर्वद° सं° पृ° १९ ।

१० एतेन] तस्मात् संवेदनमेव केवलमद्वैतमपरस्याभावादिति स्थितम् ।पृ° २९०नाद्वैतादपरं तत्त्वमस्ति--प्र° वार्तिकाल° पृ° ३० ।

१९ इति] उपलम्भः सत्तेति व्यवस्था--प्र° वार्तिकाल° ।

१९ भावे] सर्ववस्त्वभावे

२४ ता] ती

२५ *] व्याप्तिज्ञाने ।

कामाद्युपप्लुतदृष्टिवत् । द्वितीये व्याप्तिज्ञानादनुकृतान्वयव्यतिरेकं कारणम् **नाऽकारणं विषयः** *इत्यस्य **प्रमाणतोऽर्थप्रतिपत्त्या प्रवृत्तिसामर्थ्याद् अर्थवत् प्रमाणम्** न्यायभा° पृ° १ **अर्थसहकारिव्यवसायादिविशेषणज्ञानकं प्रमातृप्रमेयाभ्यामर्थान्तरं प्रमाणम्** इत्यस्य च वचनात् स्वविषयकार्येण तेन भवितव्यम्, इति न स्वसमानसमयभुवो ग्रहणम् तस्य तदकारणत्वात् । यच्च कारणं तदपि तद्देशादिसन्निहितमेव न सर्वं विवक्षितम्, अन्यथा स्वान्यकार्यदेशादौ तेन तत्कर्त्तव्यमिति निरूपयिष्यते अनन्तरमेव । ततः सूक्तम्--[सन्निहितेत्यादि] **सन्निहितः** तत्कालानन्तरकालो यो **विषयः** तस्य **बलेन उत्पत्तेः** कारणात् प्रत्यक्षस्य, तज्ज्ञानं न प्रत्यक्षं भवितुमर्हतीति । हेत्वन्तरमाह--**अविचारकत्वात्** इति । अविकल्पकत्वाऽस्वग्रहणात्मकत्वाभ्यां सन्निहितस्यापि विषयस्य अव्यवस्थापकत्वात् तन्न तद् भवितुमर्हतीति । तद्व्याप्तिज्ञानं तर्हि अनुमानं स्यादिति चेत्; अत्राह--**तद्बलाद्** इत्यादि । न केवलं तज्ज्ञानं प्रत्यक्षं न भवितु मर्हती त्कं किन्त्वनु**मानं च** तदपि **न स्यात् । यदि** चेद् **विकल्पज्ञान**मूक ज्ञानं न भवेत् । कथम्भूतम् ? **तद्बलोत्पन्नं** प्रत्यक्षसामर्थ्योत्पन्नम् **ऊहो मतिनिबन्धनः** इति वचनात् । अस्ति तत्, केवलं प्रमाणं न भवति, प्रमाणमपि लिंगिक मेव इति चेत्; अत्राह--**अनधिगत** इत्यादि । **अनधिगतं** प्रत्यक्षादिना अविषयीकृतं **लिङ्गलिङ्गिस्वलक्षणं** यत् **तस्याध्यवसायेऽपि** न केवलम् अनध्यवसाये **यदि न प्रमाणान्तरम्** । तथाहि--यदि न प्रमाणं **प्रत्यक्षमपि न स्यात्** तस्यापि तल्लक्षणान्तराभावात् । यदि न तदन्तरं किन्तु अनुमानमेनमेव, अनुमानं न स्यात् अनवस्थानादिति मन्यते । § 902

189/mkj /ms

ननु माभूद् अनुमानं तथापि न सौगतस्य काचित् क्षतिः स्वयं तदभावोपगमात् । तत्त्वाभ्युपगतस्य प्रतिभासाद्वैतस्य प्रत्यक्षतः सिद्धिरिति चेत्; अत्राह--**तत्प्रत्यक्ष** इत्यादि । ते च ते सौगतकल्पिते परमार्थसंवृतिरूपे **प्रत्यक्षमनुमाने च** ताभ्याम्, कथम्भूताभ्याम् ? इत्याह— **अविकल्पित** इत्यादि । सुगमम् । **नार्थाधिगतिर्नाम** व्यवहारे अर्थस्य व्याप्तिलक्षणस्य प-

---

२ *] उद्धृतमिदम्--अनेकान्तजय° पृ° २०७ । धर्मसं° पृ° १७६ । बोधिचर्या° प° पृ° ३९८ । तत्त्वार्थश्लो° पृ° २१९ । आप्तप° पृ° १६८ । प्रमेयक° पृ° ३५५, ५०२ । न्यायकुमु° पृ° ६४० । स्या° र° पृ° ७६९ । न्यायवि° वि° प्र° पृ° २९० । स्या° मं° पृ° २०६ । अहेतुश्च विषयः कथम्--प्र° वा° ३ । ४०६ । नाहेतुर्विषयः— प्र° वार्तिकाल° ३ । ४०६ । न ह्यकारणं प्रतीतिविषयः--हेतुबि° टी° पृ° ८० । नाननुकृतान्वयव्यतिरेकं कारणं नाकारणं विषयः--न्यायकुमु° पृ° ६४० । सन्मति° टी° पृ° ५१० । प्र° मी° पृ° ३४ । षड्द° बृ° वृ° पृ° ३७ ।

५ स्य] समसमयभाविनोः कार्यकारणभावाभावात् ।

९ ज्ञानं] तज्ज्ञानं

११ त] व्याप्तिज्ञानम् ।

११ त] प्रत्यक्षम् ।

१३ त्कं] त्थम्

१४ मूक] मूह

१६ त्] व्याप्तिज्ञानम् ।

१६ लिंगिक] लैङ्गिक

२५ म] क्षा

रमार्थे तदद्वैतलक्षणस्य अधिगतिर्न, प्रत्यक्षस्य सकलविकल्पविकलस्य परं प्रति असिद्धेः, अनुमानस्य च सांवृतस्य तत्त्वाऽसाधकत्वादिति मन्यते । § 903

ननु यदुक्तम्--माऽनुमा--अनुमानेन नार्थाधिगतिः नाम इति; तत्सिद्ध-साधनम्; तेन तदधिगतेरनभ्युपगमात् । समारोपव्यवच्छेदकरणात् तत् प्र-/ms माणमिष्यत इति चेत्; अत्राह--**समारोप** इत्यादि । न केवलम् अर्थाधिग-तेः अपि तु *__तद्व्यवच्छेदस्याप्यभावात्__ । अर्थाधिगतिमन्तरेण स्वापादिवत् तद्व्यवच्छेदासंभवादिति मन्यते । § 904

यस्तु मन्यते प्र ज्ञा क र गु प्तः--**योगिज्ञानं व्याप्तिज्ञानम्** इति । तं 190/mkj प्रत्याह— **यत्सत्** इत्यादि । **यत् सत्** अर्थक्रियाकारि **तत्सर्वं क्षणिकमेव** नित्यं न भवति **इत्येवं प्रत्यक्षसिद्धौ शब्दक्षणिकत्वमेव किमनुमेयं** किन्तु सर्वम् अनुमेयं स्यात् इति न किञ्चित् प्रत्यक्षप्रमाणप्रमेयं भवेत् । अथ सुखादि-नीलादि तत्प्रमेयमिष्यते, तथा क्षणिकत्वमपि अस्तु तदविशेषादिति न किञ्चिदनुमेयम् । न च योगिज्ञानविषयीकृते समारोप्येभ्यासदशाचद्यतः तद्व्यवच्छेदकरणादनुमेयं स्यात्, समारोपे वा न प्रत्यक्षतः तद्व्याप्तिसिद्धिः । न वा निश्चितलिङ्गवत् सा अनुमानकरणमिति मन्यते । § 905

एतेन सन्बन्धसम्बन्धजं मानसमध्यक्षं चिन्तितम् । § 906

एवं तावत् सामान्येन परस्य साकल्येन व्याप्तिग्रहणेसंभवीति प्रतिपाद्यं यदुक्तम् अ र्च टे न--**सर्वस्य क्षणिकत्वेन साकल्यव्याप्तिग्रहणं नाध्यक्ष-तः, अपि तु अक्षणिकात् सर्वतः सत्त्वं व्यावर्त्तमानं तीरादर्शिशकुनिन्यायेन**

---

१ त] प्रतिभासाद्वैतस्वरूपस्य ।
१ प] जैनादिकम् ।
२ च] विकल्परूपस्य ।
४ मा] मा अनुमा प्रमाणम् इत्यर्थः ।
५ तेन] अनुमानेन ।
५ णात्] अनुमानम् । यदा पुनरनुमानेन समारोपव्यवच्छेदः कृतो न भवतीति तदर्थमन्यत् प्रवर्तते ।--प्र० वा० स्व० पृ० १२५ । समारोपविवेकेऽस्य प्रवृत्तिरिति गम्यते ।--प्र० वा० ३ । ४८ ।
७ *] समारोपव्यवच्छेदस्य ।
९ इति] तुलना--अन्ये तु व्याप्तिग्रहणकाले प्रतिपत्तुर्योगिन इवाशेषविषयं परिज्ञानमस्तीति ब्रुवते ।--प्रश० व्यो० पृ० ५७० । योगिप्रत्यक्षतो व्याप्तिसिद्धिरित्यपि दुर्घटम्--त० श्लो० पृ० १७९ । न्यायकुमु० पृ० ४३२ । प्रमेयक० पृ० ३५१ ।
१३ त] प्रत्यक्षप्रमेयम् ।
१५ तः] रोपोऽनभ्यासदशा च, यतः
१६ सा] व्याप्तिः ।
१७ स] मनःसंयुक्तेन आत्मना सम्बद्धाः सर्वेऽर्थाः ।
१८ णे] णम
१९ तिपाद्यं] द्य
१९ म्] नैव प्रत्यक्षतः कार्यविरहाद्वा सर्वशक्तिविरहोऽक्षणिकत्वे उच्यते किन्तु तद्व्यापकविरहात् । तथाहि--क्रमयौगपद्याभ्यां कार्यक्रिया व्याप्ता प्रकारान्तराभावात् । ततः कार्यक्रियाशक्तिव्यापकयोस्तयोरक्षणिकत्वे विरोधान्निवृत्तेस्तद्व्याप्तायाः कार्यक्रियाशक्तेरपि निवृत्तिरिति सर्वशक्तिविरहलक्षणमसत्त्वमक्षणिकत्वे व्यापकानुपलब्धिराकर्षति विरुद्धयोरेकत्रायोगात् । ततो निवृत्तं सत्त्वं क्षणिकेष्वेवावतिष्ठमानं तदात्मतामनुभवतीति यत् सत् तत् क्षणिकमेव इत्यन्वयव्यतिरेकरूपाया व्याप्तेः सिद्धिर्निश्चयो भवति ।--हेतुबि० टी० पृ० १४६ ।
२० तीरा] यथा किल वहनारूढैर्वणिग्भिः शकुनिर्मुच्यते अपि नाम तीरं द्रक्ष्यतीति ।

गत्यन्तराऽभावात् क्षणिके व्यवस्थितिं कुर्वत् तेन व्याप्तमिति निश्चीयते, ततः तद्व्यावृत्तिश्च तद्व्यापिकाया अर्थक्रिया[याः] व्यावृत्तेः, अस्याश्च व्यापकयोः **क्रमयौगपद्ययोः** । इति । तत्राह--**सत्ताम्** इत्यादि । § 907

...9 सत्तां सर्वतोऽक्षणिकात् स्वनिवृत्तौ निवर्तयेत् ।
व्याप्यामर्थक्रियां चेत्सा क्षणिके केन सिध्यति ॥ ९ ॥§ 909

क्रमाक्रमयोः व्यापकयोरन्यतरेण क्षणिके अर्थक्रियायाः प्रत्यक्षप्रवृत्तिरेव विपक्षे बाधकप्रमाणवृत्तिः । सा पुनः क्षणक्षयानुपलक्षणात् कथं प्रत्यक्षा ? प्रत्यक्षापि कथं तत्सम्बन्धिनी । जातेः...कथंप्रत्यक्षा । क्षणिकस्यार्थक्रियासिद्धिमन्तरेण सत्ता व्यावर्तमाना कथञ्चित्क्षणिके सत्तां साधयेत् विपक्षानतिशायनात् । तदयं क्षणिके अर्थक्रियामेव कुतश्चित् साधयितुमर्हति अन्यथा विपक्षव्यावृत्त्यसिद्धेः । कारणस्य क्षणिकस्य सत्तैवार्थक्रिया प्रत्यक्षेति चेत्; तथाऽक्षणिकस्य अविशेषात्, प्रतीतिवत्स्वविशेषः इतरत्रापि । कार्योत्पत्तिः...अन्यत्रापि समानम् । कारणाच्चेत्; किं केन व्याप्तम् ? ततः स्वभावानुपलब्धिरेव विपक्षे बाधकं प्रमाणम् । सा पुनः क्षणिकोपलब्धिरसिद्धैव विप्रतिपत्तेः अन्यथा साधनवैयर्थ्यात् । § 910
191/mkj

**सर्वतः** कुदस्यात् कालान्तरस्थायिनश्च यदि वा दृश्याभिमताद् अन्यतश्च **अक्षणिकात् चेत् सत्तां निवर्त्तयेत्** । कथम्भूताम् ? **व्याप्यां** स्वव्याप्याम् इत्यवगन्तव्यम्, यथा मातरि वर्त्तितव्यम् इत्यत्र स्वस्याम् इति । का ? इत्यत्राह--**अर्थक्रिया** इति । कस्मिन् सति ? इत्याह--**स्वनिवृत्तौ** इति । तत्र दूषणम् **सा** अर्थक्रिया स्वाहिमेत **क्षणिके** वस्तुनि । **केन** प्रमाणेन प्रकारेण वा **सिध्यति,** न केनचित् । एतदुक्तं भवति--अक्षणिके व्यापकयोः क्रमाऽक्रमयोरनुपलम्भः क्षणिकेऽपि इति तत्रापि तदभावो न वा क्वचिदिति । § 911 /ms

कारिकां विवृण्वन्नाह--**क्रम** इत्यादि । **क्रमाक्रमयोर्मध्ये** । कथंभूतयोः ? **व्यापकयोः अर्थक्रिया** इति सम्बन्धः । **अन्यतरेण** क्रमेण अक्रमेण वा **क्षणिके** निरन्वयनश्वरे वस्तुनि या **अर्थक्रिया** तस्याः **प्रत्यक्षप्रवृत्तिः** अध्यक्षोत्पत्तिरवा **विपक्षे** अक्षणिके । यदा हि शब्दः क्षणिकः सत्त्वात् साध्यते तदा

---

स यदा सर्वतः पर्यटं स्तीरं नासादयति तदा वहनमेवागच्छति तद्वदेतदपि द्रष्टव्यम् । यतश्चावश्याभ्युपगमनीयोऽयं पक्षः तस्मान्न किञ्चिदमया अविद्यमानप्रतिष्ठानया दिशः प्रतिपत्त्या प्रयोजनम् ।--हेतुबि° टी° पृ° १९३ ।

१६ स्यात्] कूटस्थात्
२० स्वाहिमेत] स्वाभिमत
२२ त] अर्थक्रियाया अभावः ।
२७ वा] रेव

अन्यः सर्वः क्षणिकः सपक्षो भवति अक्षणिको विपक्ष इति **बाधकप्रमाणवृत्तिः अर्थक्रियायाः** इति गतेन सम्बन्धः । अन्वयप्रतिपत्तिरेव व्यतिरेकप्रतिपत्तिः; कथमन्यथा **निश्चितान्वयवचनादेव सामर्थ्याद् व्यतिरेकगतेः तद्वचनं निग्रहस्थानम्** उक्त * शोभेत ? सात्मके च क्वचित् प्राणादेरदर्शनेऽपि कुतश्चित् निरात्मकान्निवृत्तिः स्यादिति मन्यते । तथाभ्युपगच्छतो दोषमाह--**सा** इत्यादि । **सा** अर्थक्रिया । **पुनः** इति वितर्के **क्षणक्षयानुपलक्षणात् कथं** केन प्रकारेण **प्रत्यक्षा ?** तस्या अपि क्षणिकैकान्ते क्षणिकत्वेन अनुपलक्षणादिति
/ms मन्यते । **प्रत्यक्षाऽपि कथं तत्सम्बन्धिनी** क्षणक्षयसम्बन्धिनी सिध्येत् । दृष्टान्तम् आह--**जातेः** इत्यादिकम् । **कथं** केन प्रकारेण **प्रत्यक्षा** । सुगमम् । मा सिधत् तत्सम्बन्धिनी सा; को दोष इति चेत् ? अत्राह--**क्षणिकस्य** इत्यादि । **क्षणिकस्य अर्थक्रियायाः** या **सिद्धिः** निर्णीतिः **तामन्तरेण** क्षणिकात् **सत्ता** अर्थक्रिया **व्यावर्त्तमाना कथञ्चित्क्षणिके सत्ताम्** अर्थक्रियां **साधयेत्** । कुत एतत् ? इत्यत्राह--**विपक्षानतिशायनात्** । उपसंहारमाह--**तद्** इत्यादि । यत एवं **तस्माद् अयं** सौगतः **क्षणिके अर्थक्रियामेव कुतश्चित्** प्रमाणात् **साधयितुम् अर्हति, अन्यथा** तत्र तत्साधनाभावप्रकारेण **विपक्षव्यावृत्तेरसिद्धिः** * विप[क्षाद] क्षणिकाद् अर्थक्रियायाः या व्यावृत्तिः तस्या असिद्धेः इति । का इति योगविभागात् का-सः तात्परः तपरः इति यथा । अपर आह--**कारणस्य** । कथम्भूतस्य ? **क्षणिकस्य सत्तैव** स्वरूपसत्त्वमेव **अर्थक्रिया,** तदुक्तम्--**भूतिर्येषां क्रिया सैव** । कथंभूता सा ? इत्याह--**प्रत्यक्षा**
192/mkj **इति** एवं चेद् यदि । पराभिप्रायसूचकः **चेत्** शब्दः । उत्तरमाह आचार्यः--**तथा** तेन प्रकारेण **अक्षणिकस्य** कारणस्य सत्तैव अर्थक्रिया प्रत्यक्षा इति न ततः साध्यो व्यावर्त्तते इति मन्यते । § 912

अनन्ने कस्य कालत्रयानुयायित्वम् अक्षणिकसत्त्वम्, न च तत् प्रत्यक्षतः
/ms प्रत्येतुं शक्यं तत्र तदसामर्थ्यात्, तस्य पूर्वापरकोटिविच्छिन्नत्वं क्षणिकसत्त्वम्, तच्च ततः प्रत्येतुं शक्यं ततोऽस्याभावात् कथमुक्तमिति चेत् ?

---

१ अन्यः] प्रदीपादिः ।
३ त] व्यतिरेकवचनम् ।
४ उक्त] अन्वयव्यतिरेकवचनयोर्वा साधर्म्यवति वैधर्म्यवति च साधनप्रयोग एकस्यैवाभिधानेन सिद्धेर्भावात् द्वितीयस्यासामर्थ्यमिति तस्याप्यसाधनाङ्गस्याभिधानं निग्रहस्थानं व्यर्थाभिधानादेव ।--वादन्या° पृ° ६५ ।
४ *] इत्युक्तं
१० त्] अतीन्द्रियत्वात् ।
१० न्धिनी] क्षणक्षयसम्बन्धिनी ।
१० सा] अर्थक्रिया ।
१६ *] द्धेः
१७ का] का इति पञ्चमीविभक्तेः संज्ञा ।
१७ सः] पञ्चमीतत्पुरुषसमासः ।
१९ म्] क्षणिकाः सर्वसंस्काराः अस्थिराणां कुतः क्रिया ? भूतिर्यैषां क्रिया सैव कारकं सैव चोच्यते ॥--बोधिचर्या° पृ° ३७६ । मध्यमकवृ° पृ° ११६ टि° १ । ब्र° भा° पृ° ५३१ । रत्नाकराव° पृ° २९ । स्या° म° श्लो° १६ ।
१९ भूतिर्ये] यैं
२२ तः] अक्षणिकात् ।
२३ न्ने] नन्वे
२३ त्] कालत्रयानुयायित्वम् ।
२५ च्च] क्षणिकत्वम् ।
२५ तः] प्रत्यक्षात् ।
२५ तोऽस्या] नित्यस्य ।

अत्राह--**अविशेषात्** अस्य विशेषस्याभावादिति । यथैव हि एकस्य कालत्रयानुयायिसत्त्वं द्रष्टुमशक्यं तथा बाह्यस्येतरस्य वा परमाणोः क्षणमात्रसत्त्वम् । कल्पनया तु तदुभयं शक्यमिति मन्यते । § 913

ननु न परमाणोः पूर्वापरयत्ता क्षणिकत्वमुच्यते, अपि तु दृश्यस्य स्थूलस्य, ततोऽयं विशेष इति चेत्; अत्राह--**प्रतीतीत्यादि** । अत्रायमभिप्रायः--अस्मिन् पक्षे यथा युगपदेकस्य स्थूलस्य एकानेकात्मकत्वं तथा क्रमेणापि इति, क्षणक्षयपक्षे **प्रतीतिवालक्षणो विशेषः** अक्षणिकपक्षाद् भेदः **इतरथा** * क्षणिकपक्षे प्रतीत्यनुग्रहणलक्षणोऽन्य एक्षा ततान्यथा चिन्तितम् अन्यथा परस्य कार्यं प्रवृत्तम् । § 914

इतर आह--**कार्योत्पत्तिः** इत्यादि । अत्र दूषणम्--**अन्यथापि** अक्षणिकेऽपि **समानम्** । तदुत्पत्तिः सा स्यात् इति परमतमाशङ्कते--**कार[णात्]** इत्यादि । **चेत्** शब्दः पराभिप्रायद्योतकः । नन्वेतद् आशङ्कितं परिहृतं च **कारणस्य क्षणिकस्य** इत्यादिना; सत्यम्; तथापि दूषणान्तरप्रतिपादनार्थं तत्पुनः आशङ्क्यते, तदेवाह--**किं तेन** इत्यादि । **किं** सत्त्वं नानार्थ क्रियालक्षणेन व्यापकेन **व्याप्तम् ?** न केनचिदिति । एव मन्यते— यदा सत्तेव अर्थक्रिया; तथाऽभेदान्न तयोः कल्पितोऽपि व्याप्यव्यापकभावः । नहि तदेव ते । तथा सति यद् दूषणं तदाह--**तत** इत्यादि । **तत** उक्तन्यायात् **स्वभावस्य** सत्तास्वरूपस्य **अनुपलब्धिरेव** उक्ता न व्यापकाऽनुपलब्धिः **विपक्षे** सत्ता**बाधकं प्रमाणम्** इति एवकारार्थः । अनेन अनुपलब्धिविशेषापरिज्ञानम् अ र्च ट स्य दर्शयति । सैवास्तु कोदोषः इति चेत्; अत्राह— **सा पुनः** इत्यादि । **सा** परेण उच्यमाना **पुनः** इति वितर्के **क्षणिकोपलब्धिः** क्षणिकसत्ता विषये विषयिशब्दोपचारादेवमुच्यते । अथवा उपलभ्यते इति उपलब्धिः इति व्युत्पत्तेः । **असिद्धैव** अज्ञातैव । कुत एतत् ? इत्यत्राह-- **विप्रतिपत्तेः** विरुद्धा अक्षणिकस्य प्रतिपत्तिः विप्रतिपत्तिः तस्याः । अनेन तदभावसाधने विरुद्धोपलब्धिं दर्शयति । प्रतिपत्त्यभावाद्वा विप्रतिपत्तेः । अनेन स्वभावानुपलब्धिः । अस्यानभ्युपगमे दूषणमाह--**अन्यथा** अन्येन विप्रतिपत्त्यभावप्रकारेण **साधनस्य** क्षणिकत्वानुमानस्य **वैयर्थ्यात्** सा असिद्धैव इति । समारोपव्यवच्छेदोऽपि प्रथमं चिन्तितः । इदमत्र तात्पर्यम्--अनुपलब्धिलक्षणप्राप्तायाः सत्तायाः न तावत् स्वभावानुपलब्धिः विपक्षेऽभावसाधनं स्वयमनभ्युपगमात् । नाप्युपलब्धिलक्षणप्राप्तायाः; नित्यवत् क्षणिकेऽपि तद-

/ms

२ म्] अपि द्रष्टुमशक्यमिति सम्बन्धः ।
४ त्ता] योरसत्ता
५ स्य] अभावः ।
७ तीतिवा] वत्त्व
८ *] रत्रापि अ
८ था] णोऽप्यस्त्येव, ततोऽन्यथा
१० थापि] त्रापि
१४ तेन] केन
१४ नानार्थ] केन नाम अर्थ
१५ एव] वं
१६ त] सत्त्वमेव ।
१७ ते] व्याप्यं व्यापकं च ।
२२ ये] उपलब्धिर्हि ज्ञानात्मिका विषयिणी तस्याः विषयभूतायां सत्तायामुपचारः क्रियते ।
२४ अनेन] अक्षणिकाभाव ।
३० णिकेऽपि] अर्थक्रियाऽदर्शने ।

193/mkj दर्शने गत्यन्त राभावेन तदुपलब्धिलक्षणप्राप्तताऽसिद्धेरिति । तन्न **प्रत्यक्षतः क्षणिकेऽर्थक्रियासिद्धिः** । अत एव नानुमानतोऽपि; तत्पूर्वकत्वादस्येति मन्यते । § 915

ननु यदुक्तम्--**अन्यत्रापि समानम्** इति; न समानम्; अक्षणिकात् क्रमाऽक्रमाभ्यां कार्योत्पत्तेः [विरोधात्; तत्परिहरन्नाह--पूर्वमित्यादि] । § 916

...10 पूर्वं नश्वराच्छक्तात्कार्यं किन्नाविनश्वरात् ।
कार्योत्पत्तिर्विरुध्येत न वै कारणसत्तया ॥ १०
॥ § 918

यस्मिन् सत्येव यद्भावः तत्कार्यमितरत् कारणमिति क्षणिकत्वे न संभवत्येव सहोत्पत्तिप्रसङ्गात् कुतः सन्तानवृत्तिः ? ततः प्राक् तत्करणसामर्थ्ये अनुत्पन्नं तदभाव एव भावि तत्कार्यमिति मृत्वापि अङ्गीकर्त्तव्यम् । परपक्षे पुनः एतावानेव विशेषः कारणस्य...। न च कारणाभावेन तदुत्पत्तिर्विरुध्येत । तदेतत् कारणं कार्योत्पत्तौ तत्कालं वा तिष्ठतु मा वा भूत् प्राक् तत्करणसमर्थं पश्चान्न करोत्येव । न वै पश्चात् करोति अभावात्, तत् स्वयं पश्चात् भवति, इत्यत्रापि प्रतिनियतकालमपेक्ष्यम्, [यतो] यथास्वं क्रमेण कार्यं भवति । § 919

/ms **पूर्वं** स्वसत्ताकाल इति यावत् **शक्तात्** समर्थात् । कुतः ? **नश्वरात्** क्षणिकात् **कार्यं** जायते इत्यध्याहारः । कदा ? **पश्चात्** कालान्तरे । अत्र दूषणमाह--**किन्न** इत्यादि । **[किं] अविनश्वराद्** अक्षणिकात् प्राक् शक्तात् कार्यं पश्चान्न जायते ? तथोत्पादनस्वभावस्य अविशेषात् । नन्वेवं कार्यकालेऽपि कारण[सं]भव इति कुतः कार्यभाव इति चेत्; अत्राह--**कार्योत्पत्तिर्विरुध्येत नवै** नैव **कारणसत्तया** किन्तु तदभावेन । § 920

यदुक्तं परेण--**अन्वयव्यतिरेकनिबन्धनः कार्यकारणभावः । तत्र अन्वयः कारणभावे भावः, व्यतिरेकः तदभावे अभावः** इति तन्निराकृत्य कारिकार्थं

---

२ त] प्रत्यक्षपूर्वत्वादनुमानस्य ।
७ या] उद्धृतोऽयम्--न्यायवि॰ वि॰ प्र॰ पृ॰ ४७५ ।
२० भाव] कारणकार्ययोः सहभावविरोधात् ।
२२ अ] तद्भावे भावः तदभावेऽभावश्च प्रत्यक्षानुपलम्भसाधनश्च कार्यकारणभावः--हेतुबि॰ पृ॰ ५४ । यतोऽन्वयव्यतिरेकनिबन्धनः कार्यकारणभावव्यवहारः--हेतुबि॰ टी॰ पृ॰ १७० । भावे भाविनि तद्भावः भाव एव च भाविता । प्रसिद्धे हेतुफलते प्रत्यक्षानुपलम्भतः ।--सम्बन्धप॰ श्लो॰ १६, प्र॰ वार्तिकाल॰ भू॰ । प्रमेयक॰ पृ॰ ५१० । कार्यकारणभावप्रसाधनं भावाभावप्रसाधनप्रमाणाभ्यां यथा इदमस्मिन् सति भवति सत्स्वपि तदन्येषु समर्थेषु तद्धेतुषु तदभावे न भवतीति । --वादन्या॰ पृ॰ १४ । अस्मिन् सति इदं भवत्यस्योत्पादादिदमुत्पद्यते इत्येतदेव हेतुलक्षणं भगवतोक्तम् --प्र॰ वार्तिकाल॰ पृ॰ ६७, ६८, २७ । अन्वयो नाम सर्वत्र सत्येव साध्ये हेतोर्भावो व्याप्त्या । चासति साध्ये हेतोरभावो व्यतिरेकः--हेतुबि॰ टी॰ पृ॰ २२४ ।

दर्शयितुकाम आह— **यस्मिन्** इत्यादि । **यस्मिन् सत्येव** नाऽसति **यद्भावः** तस्य * **कार्यम् इतरत्** पूर्वं **कारणम् इत्येवं क्षणिकत्वे** भावानाम् अङ्गीक्रियमाणे **न संभवत्येव** । कुत एतत् ? इत्यत्राह--**सहोत्पत्ति** इत्यादि । कार्यकारणयोः युगपदुत्पत्ति**प्रसङ्गात्** कुतः **सन्तानवृत्तिः** । एतदुक्तं भवति--यदि सत् कारणं कार्यं जनयति तर्हि स्वोत्पत्तिसमये जनयति, तदैव तस्य सत्त्वात् । तथा तत्कार्ये विश्व कार्यं स्वोत्पत्तिसमय इत्येककालीनता 194/mkj सकलसन्तानस्य इति । **ततः** तस्माद् अनन्तरदोषा[त्] **प्राक्** स्वोत्पत्तिसमये **तत्करणसामर्थ्ये** तस्य विवक्षितस्य कार्यस्य करणं निष्पादनम् तत्र सामर्थ्यं तस्मिन् **सति अनुत्पन्नं** कार्यं **तदभाव एव** कारणाभावे एव **भावि** तत्कारणाभाव एव भवत् **तस्य** विनष्टस्य **कार्यम् इत्येवं मृत्वा** सटित्वापि **अङ्गीकर्त्तव्यम्** । अयमत्राभिप्रायः— यथा प्राक् समर्थात् नश्वरात् पश्चात् /ms जायमानं कार्यं तस्य इति व्यपदिश्यते तथा अनश्वरादपि इति न तत्रेदं दूषणं ध र्म की र्त्ति ना कीर्त्तितं तत्कीर्त्तिमावहति । नन्वेवं तयोः अविशेष एव दर्शितः इति चेत्; अत्राह--**परपक्ष** इत्यादि । **परपक्षे** अक्षणिकवादिपक्षे **पुनः एतावानेव** अधिको **विशेषः** क्षणिकपक्षाद् भेदकः । कोऽसौ ? इत्याह--**कारणस्य** इत्यादि । नन्वेवं कार्योत्पत्तिर्न स्यात् कारणसत्तया तद्विरोधादिति चेत्; अत्राह--**न च** इत्यादि । किं तर्हि **कारणाभावेन तदुत्पत्तिर्विरुध्येत,** अन्यथा निर्हेतुकत्वमिति मन्यते । प्रकृतोपसंहारमाह--यत एवं **तत्** तस्मात् **एतदुपलभ्यमानं** पित्रादि **कारणं कार्योत्पत्तौ** क्रियमाणायां तन्निमित्तं वा **तिष्ठतु तत्कालं वा** अवस्थितिं करोतु **मा वाऽभूत्** पूर्वमेव वा नीरूपतां व्रजन् **प्राक् तत्करणसमर्थं पश्चान्न करोति** एवं * किन्तु प्रागेव करोति । § 921

ननु सौगतस्य क्षणादूर्ध्वं [न] तिष्ठन्ति भावाः तत्किमर्थमिदमुच्यते--**तिष्ठन्तु*** इति ? दृष्टार्थं । यथा अवतिष्ठमानं प्राच्यमर्थं तदैव सकलं करोतु इत्युच्यते तथा तद्विपरीतमपि उच्यतामविशेषात् । § 922

पर आह--**नवै** नैव **पश्चात् करोति स्वयमभावात्** पश्चात् इति । किं तर्हि ? **तत्कार्यं पश्चाद् भवति स्वयम् इत्येतद् अत्राप्यपेक्ष्यम्,** इत्येतत्कारणात् **प्रतिनियतकालं** क्रियाविशेषणमेतत् । **यथास्वं क्रमेण स्वयम्** इत्यनुवर्तते, **कार्यं भवति इति** । ततो निराकृतमेतत्--**नाऽक्रमात् क्रमिणो भावाः** प्र॰ /ms वा॰ १ । ४५ इत्यादि । § 923

२ *] तत्
४ वृत्तिः] कार्यकारणयोः ।
६ त] कारणकाले कार्यसद्भावे ।
६ त्कार्ये] समस्तमुत्तरोत्तरक्षणवृत्तिकार्यम् ।
१३ णं] न चैवाक्षणिकस्य क्वचित् कदाचित् शक्तिरस्ति क्रमयौगपद्याभ्यां कार्यक्रियाशक्तिविरहात्... --हेतुबि॰ पृ॰ ६३ ।
१८ था] यदि कारणाभावेन कार्योत्पत्तेर्विरोधो नास्ति तदा ।
२१ *] त्येव
२४ *] तिष्ठतु
२४ दृष्टार्थं] दृष्टान्तार्थम्
२४ र्थं] करोति ।
२९ मा] क्रमरहितात् नित्यात् ।

ननु यथा नश्वरात् तत्कार्यं पश्चाज्जायमानमपि[न] सकलमेकदैव जायते तथा नित्यादपि जायते इति न युक्तम्--**प्रतिनियतकालम्** इत्यादि इति चेत्; अत्राह--**यद् यद्** इत्यादि। § 924

...11 **यद् यदा कार्यमुत्पित्सु तत्तदोत्पादनात्मकम्।**
**कारणं कार्यभेदेन न भिन्नं क्षणिकं यथा॥ ११**

॥§ 926

यथा क्षणिकं प्रदीपादि कारणं स्वभावनानात्वमन्तरेण स्वभावदेशादिभिन्नमनेकं क्रमभावि तैलदशाननदाहादि कार्यं करोति तथाऽक्षणिकं कालभेदभिन्नम् कार्य...। यदनन्तरं यन्नोत्पन्नं न तत्तत्कार्यम् अक्षेपकारित्वात् कारणस्येत्ययुक्तं देशव्यवधानेऽपि तथा प्रसङ्गात्। कालस्यैव... § 927

195/mkj

**यत्** सजातीयं विजातीयं च **यदा कार्यम् उत्पित्सु** तस्य **तदा** यदुत्पादनं सत्ता सम्बन्धिनः करणं **तदात्मकम्**। किं तत्? इत्याह--**कारणम्** इति। नन्वेवं कार्यभेदात् तस्य भेदः स्यात्। तदुक्तम्--**क्रमाद्भवन्ती धीश्चेयं क्रमं तस्यापि संशति** प्र॰ वा॰ १। ४५ इति चेत्; अत्राह--**कार्यभेदेन [न] भिन्नं** कारणम् इति पदघटना। दृष्टान्तमाह--**क्षणिकं यथा** इति।

§ 928

दृष्टान्तं व्याचष्टे--**क्षणिकं प्रदीपादि कारणं स्वभावनानात्वमन्तरेण स्वभावदेशादिभिन्नम्**, अत्र आदिशब्देन चिरन्तर बौद्धापेक्षया सामर्थ्यपरिग्रहः इदानीन्तनापेक्षया कालपरिग्रहः, तस्य हि वह्नी दाहाद् एकस्मात् **क्रमभावि** * तस्य पाकोर्थादि कार्यं जायते **अनेकं तैलदशाननदाहादिकं कार्यं यथा करोति**। दृष्टान्तं व्याख्याय दार्ष्टान्तिके योजयति--**तथा कालभेदभिन्नम्** अनेकं कार्यं करोति इति **अक्षणिकं स्वभावनानात्वमन्तरेण** इत्येतदत्रापि अनुवर्त्तनीयम्। कुत एतत्? इत्यत्राह--**कार्य** इत्यादि। इतर आह--**यदनन्तरम्** इत्यादि। **यत्** तस्य **अनन्तरं यद्** वस्तु **नोत्पन्नम्** अपि तु पश्चात् कालान्तरे **न तत् तस्य कार्यम्**, कुत एतत्? **अक्षेपकारित्वात् कारणस्य**। अस्योत्तरमाह--**इत्येवं** परस्य **अयुक्तम्**। कुतः? इत्याह--**देशव्यव-**
/ms **धानेऽपि** न केवलं [काल] व्यवधाने तत् **तथा प्रसङ्गात्**; तथाहि—यस्य अनन्तरदेशे यन्नोत्पन्नं न तत् तस्य कार्यम् अपेक्ष्यकारित्वात् कारण-

३ द्] यदा
४ द्] उद्धृतोऽयम्--न्यायवि॰ वि॰ प्र॰ पृ॰ ४७५।
१२ स्य] कारणस्य।
१७ र] न्तन
१८ एक] वर्त्तिदाहाद्येक
१९ *] एतदन्तर्गतः पाठो व्यर्थः।
१९ द] दशा-वर्तिका तस्याः आननदाहः मुखदाहः इत्यर्थः।

स्य इति न योगिज्ञानं त्रैलोक्यकार्यमिति सर्वज्ञाभावः, इतरथा सर्वार्थदेशेन तेन भवितव्यमिति प्राप्तम् । § 929

अथ देशव्यवधानेऽपि जातं तस्य इत्युच्यते न कालव्यवधाने; तदाह--**कालस्यैव** इत्यादिना । तत्रोत्तरमाह--**अप्राप्त** इत्यादि । § 930

...12 अप्राप्तकार्यकालत्वात् यथा व्यवहितमकारणम् ।
तदुत्तरं वा तत्कार्यं न च जातेस्तदत्यये ॥ १२
॥§ 932

व्यवहितस्य कार्योत्पत्तौ व्यावृत्त्यविशेषात् उपयोगो न विशेष्येत, निवृत्तेः निःस्वभावत्वात् । भावस्यैव कथञ्चिद् विशेषोपपत्तेः चित्रनिर्भासक्षणिकज्ञानवत् ततोऽनेन पूर्वस्याभावे भवता अनिष्टेऽपि भवितव्यम् अभावस्य सर्वत्राविशेषात् । अन्यथा स्वत एव नियतकालं कार्यलक्षणमतिवर्तेत । अभावस्य च भेदायोगात् । नहि आनन्तर्यमभावं विशेषयति अर्थस्वभावान्वयापत्तेः । § 933

अत्रायमभिप्रायः--ध र्मो त्त रा दी नां पूर्वमनन्तरं कारणम्, उत्तरं कार्यम्, विपरीतम् अकार्यकारणम्, तत्र यदनन्तरं तैः कारणमभ्युपगन्तव्यम्, तत् कारणं न भवति इत्य**कारणम्** । कुतः ? **अप्राप्तः कार्यकालो** येन तस्य भावाद् **अप्राप्तकार्यकालत्वात्** । दृष्टान्तमाह--**यथा व्यवहितमिति** । यथा रण्डागर्भं प्रति परिणेता कालेन व्यवहितोऽकारणम् तथा प्रकृतमपि इति । द्वितीयं प्रयोगमाह--**तच्च उत्तरम्** अनन्तरं वा **कार्यं** तस्य 196/mkj
कार्यं न भवति । कुत एतत् ? इत्यत्राह--**जातेरुत्पत्ते** [ः] **तदत्यये** कारणाभिमतात्यये । अत्रापि **यथा व्यवहितम्** इति निदर्शनं योज्यम् । यथा भाविकालव्यवहितं विधवागर्भकार्यं विनष्टस्य परिणेतुर्न भवति तथा प्रकृतमपि इति । § 934

कारिकायाः सुगमत्वाद् व्याख्यानमकृत्वा यदुक्तं परेण--**अप्राप्तकालत्वाविशेषेऽपि पूर्वः अनन्तरमेव कारणं न व्यवहितं विचित्रत्वाद् भावशक्तेः । नहि प्राप्तकालमपि सर्वं कारणमिति सन्दिग्धविपक्षव्यावृत्तिको हेतुः । एतेन द्वितीयोऽपि हेतुः चिन्तितः** । इति; एतत् परिहरन्नाह--**व्यवहितस्य** इत्यादि । **व्यवहितस्य** चिरविनष्टस्य अनन्तरनष्टस्य च कार्योत्पत्तौ क्रियमाणायां /ms
**व्यावृत्तेः** निवृत्तेः **अविशेषात् उपयोगः** व्यापारो **न विशिष्येत** । तथा च अनन्तरवद् व्यवहितमपि कारणं स्यात् विचित्रत्वाद् भावशक्तेः अत्रापि न

२ तेन] योगिज्ञानेन ।
१० र्तेत] तुलना--सत्यभवतः स्वयमेव नियमेन पश्चाद्भवतः तत्कार्यत्वं विरुद्धम्, कालान्तरेऽपि किन्न स्यात्तदभावाविशेषात् समनन्तरवत् ।--अष्टश० अष्टस० पृ० ९० ।
२८ निवृ] अभावस्य ।

दण्डधारितम् इति प्र ज्ञा क र गु प्त स्यै व मतं न ध र्मो त्त रा दी ना म् इति मन्यते। कुतो न विशिष्यते ? इत्याह--**निवृत्तेः निःस्वभावत्वात्**। ननु यदि निवृत्तेः निःस्वभावत्वान्न विशेषः, कस्य तर्हि विशेषः ? इत्याह--**भावस्यैव** नाऽभावस्य **कथञ्चित्** केनापि समर्थेतरादिप्रकारेण **विशेषस्य** भेदस्य **उपपत्तेः** उपयोगो न विशिष्यत इति। § 935

अत्राह कश्चित्--व्यवहितमपि किञ्चित् कारणं जाग्रज्ज्ञानादिः प्रबोधादेः, तस्य च स्वकाले भावत्वाद् विशेषोपपत्तिः इति साध्यविकलो दृष्टान्त इति तत्राह--**चित्र** इत्यादि। **चित्रो निर्भासो** यस्य तत्तथोक्तं तच्च तत्**क्षणिकज्ञानं** च तस्य इव **तद्वत्** इति। चित्रैकक्षणिकज्ञानसमानस्य भावस्य परिणामिन इत्यर्थः। एतदुक्तं भवति--यत् तद् व्यवहितस्यापि कारणत्वे जाग्रद्विज्ञानं दृष्टान्तीकृतम्, तच्च निरंशैकपरमाणुपर्यवसितस्वभावम्; तर्हि न तत् वादिनः प्रतिवादिनो वा प्रमाणतः सिद्धमिति कथं निदर्शनं पुरुषवत् ? अथ **चित्रप्रतिभासापि एकैव बुद्धिः** प्र॰ वार्तिकाल॰ ३। २२० इत्यादि वचनात् चित्रमेकम्; न तत् सौगतस्य दर्शनमनुसरति किन्तु जैनस्य अक्रमेण इव क्रमेणापि आत्मनो दृश्येतरस्वभावेनापि चित्रत्वप्रसाधनात्। तन्न किञ्चिदेतत्। § 936

/ms उपसंहारमाह--यत एवं **ततः अनेन**। केन ? **उत्तरेण** कार्येण कथम्भूतेन ? **पूर्वस्य** कारणस्य **अभावे** एव न भावे **भवता** जायमानेन। किंकत्तथ्यम् ? इत्याह--**अनिष्टेऽपि** न केवलम् इष्टे अनन्तरकाले **भवितव्यमिति**। इति **पूर्वाभावस्य** तत्कारणस्य **सर्वत्र** काले **अविशेषात्**। न चाऽविकले कारणे कार्यानुत्पादो युक्त इति मन्यते। ननु सर्वदा तदविशेषेऽपि कार्यं प्रतिनियतकालं जायते इति चेत्; अत्राह--**अन्यथा** इत्यादि। अनिष्टकालोत्पत्त्यभावप्रकारेण **अन्यथा स्वत एव** आत्मनैव **नियतकालं** यत् स्वातन्त्र्यं निर्हेतुकत्वं सूचयत् दुस्तरं **कार्यलक्षणम्** परायत्तत्वम् **अतिवर्त्तेत** भावाऽभावयोः अनायत्तत्वात्। § 937
१197/mkj

स्यान्मतम्, पूर्वस्याभावो यद्यपि इष्टकालवद् अनिष्टेऽपि काले समस्ति तथापि अभिमताभावकाल एव भवति कार्यमिति; तत्राह--**अभावस्य च** इत्यादि। अन्यस्माद् अभावाद् भिद्यमानोऽभावः कथञ्चिद्भावः[त]स्य ततो **भेदाऽयोगात्** इत्यभिप्रायः। कुत एतत् ? इत्यत्राह--**तर्हिआनन्तर्यम्** इत्यादि। **न[हि]**यस्माद् **आनन्तर्यं** कार्योत्पत्तेः प्राग् अनन्तरम् अभावस्य

१. प्रज्ञाकरः। गाढसुप्तस्य विज्ञानं प्रबोधे पूर्ववेदनात्। जायते व्यवधानेन कालेनेति विनिश्चतम्॥--प्र॰ वार्तिकाल॰ पृ॰ ६७।

१ म] प्रज्ञाकरो हि व्यवहितकारणवादी।
११ त] जाग्रद्विज्ञानम्।
११ वादिनः] विज्ञानाद्वैतवादिनः प्रज्ञाकरस्य।
१२ तिवा] जैनादेः।
१९ म्] किं कर्त्तव्यम्
२५ अ] स्वतन्त्रत्वात्।
२९ र्हि] नहि

भाव **आनन्तर्यमभावं विशेषयति** अन्यस्मादभावाद् व्यवच्छिनत्ति, तुच्छाभावस्य विशेषयितुमशक्तेः । एतदपि कुतः ? इत्याह--**अर्थ** इत्यादि । **अर्थस्य** जीवादेः **स्वभावस्य अन्वयापत्तेः** । एतदुक्तं भवति--यदा पूर्वस्य कथञ्चिदुत्तराकारेण गमनम् अभावः, तदाऽसौ केनचिद् बन्ध्यासुताद्यभावच्छिद्येत[वं व्यवच्छेद्येत]नान्यदा इति । यदि वा, कार्योत्पत्तेः प्राग् अनन्तरकारणस्य भाव आनन्तर्यं तदभावं विशेषयति । नहि पूर्वमनन्तर स्याभावो न सर्वस्य /ms इति । कुतः ? इत्याह--**अर्थ** इत्यादि । पूर्ववद् योज्यम् । § 938

यदुक्तं सान्त भद्रे ण--**निरुध्यमानं कारणं निरुद्धम्** इति; तदसारम्; यतो निरुध्यमानं यदि स्वोत्पत्तिसमये; हेतुफलयोः समकालता, अन्यदा तु तदेव नास्ति इति किं निरुध्यमानं नाम ? अन्यथा **अर्थ** इत्यादि दोषः । ततः स्थितम्--यथा प्राक् समर्थे नित्ये कारणे अजातं कार्यं पश्चात् स्वयमेव नियतकालं जायमानं [न] तस्य कार्यं तथा क्षणिकेऽपि स्वसत्ताकाले समत्वेऽनुपजातं पुनस्तथा जायमानं न तस्य इति । § 939

ननु च **यद् यदा कार्यम् उत्पित्सु तत्तदोत्पादनात्मकं कारणं** नित्यं यदि क्रमवत्सहकारिकारणमपेक्ष्यते तदेव अनित्यत्वम्, तत्कृतमुपकारमात्मसात्कुर्वतो गत्यन्तराभावात् । अन्यथा किं तदपेक्षया अतिप्रसङ्गात् । तदुक्तम्--**अपेक्ष्येत परः कार्यम्** प्र॰ वा॰ ३ । १८० इत्यादि । इति चेत्; अत्राह--**हेतोः** इत्यादि । § 940

...13 हेतोरात्मा न भिद्येत स्थिरस्य सहकारिभिः ।
उत्पत्तौ च क्षणिकस्य फलानां विविधात्मनाम् ॥
१३ ॥§ 942

सामग्रीवशात् कार्यभेदेऽपि यथाऽक्षेपकारिणां क्षणिकानां स्वभावभेदो न भवति अनाधेयाप्रहेयातिशयत्वात् तथैव कालान्तरस्थायिनां क्रमोत्पित्सुकार्याविशेषेऽपि स्वभावभेदो मा भूत् । कार्यकाल... § 943

**हेतोः** कारणस्य उपादानत्वेन अभिमतस्य । किम्भूतस्य ? **स्थिरस्य** नित्यस्य **आत्मा** स्वरूपं **न भिद्येत** । कैः ? इत्याह--**सहकारिभिः** निमित्ताऽसमवायिकारणैः । कस्मिन् सति ? इत्यत्राह--**उत्पत्तौ** सत्याम् इति । केषाम् ? इत्याह--**फलानां विविधात्मनां** देशादिभिन्नस्वभावानाम् । **सहकारिभिः** इत्येतद् अत्रापि सम्बन्धनीयम् । अतोऽयमर्थो जायते— सहकारिभिः कृत्वा फलानां विविधात्मनामुत्पत्तौ न उपादानोपकारोत्पत्तौ हेतोः

---

८ सा] शा
१२ स्य] नित्यस्य ।
१३ स्य] क्षणिकस्य ।
१६ त] सहकारिकारणापेक्षया ।
१७ इ] यदि विद्येत किञ्चन ।
यदकिञ्चित्करं वस्तु किं केनचिदपेक्ष्यते ॥
इति शेषः ।

/ms आत्मा न भिद्यत इति । यदि पुनरयं निर्बन्धः सहकारिण उपादानस्य उप- 198/mkj कारं कुर्वन्त एव प्रकृतफलानि जनयन्ति इति । तत्रेदं चिन्त्यते--उपकार-मुपादानस्य अपरमुपकारमुपकल्पयन्तः प्रकृतमुपकारं जनयन्ति, अनुप-कल्पयन्तो वा ? प्रथमपक्षे--अपरोपकारकरणेऽपि तदुपादानोपकारकरण-मित्यनवस्थायाम्, अपरापरोपकारकरण एव उपयुक्तशक्तीनां सहकारिणां प्रकृतकार्यजन्मनि व्यापारं [न स्यात्] । द्वितीयपक्षे--उपकारोपादानस्य उपकारमकुर्वन्त एव उपकारं कुर्वन्ति सहकारिणो न कार्योपादानस्य तम-कुर्वतः कार्यमिति किं कृतो विभागः ? अस्यैव समर्थनार्थं सौगतप्रसिद्धं दृष्टान्तमाह--**क्षणिकस्य च** इति । **च** शब्द इवार्थो निपातानामनेकार्थत्वात् । तदयमर्थ उक्तो भवति--यथा क्षणिकस्य उपादानकारणस्य सहकारिभिः आत्मा न भिद्येत तैरेव फलानां विविधात्मनामुत्पत्तौ तथा प्रकृतस्यापि इति । न हि तस्यापि निरंशस्य स्वहेतोः उत्पन्नस्य अर्थैः किञ्चित् क्रियते भेदप्राप्तेः इति । § 944

कारिकां विवृण्वन्नाह--**सामग्रीवशात्** इति । **सामग्रीवशात् कार्यभेदेऽपि** फलनानात्वेऽपि **क्षणिकानां स्वभावस्य** स्वरूपस्य **भेदो यथा न भवति** । क-थम्भूतानां तेषाम् ? इत्याह— **अक्षेपकारिणाम्** इति अविलम्ब्यकारिणाम् इत्यर्थः । कुत एतत् ? इत्याह--**अनाधेय** इत्यादि । निरंशत्वेन तेषु अतिशयस्य केन [अपि आधान] प्रहाणाभावादिति मन्यते । **तथैव** तेनैव /ms प्रकारेण **कालान्तरस्थायिनां** नित्यानां **क्रमोत्पित्सु कार्यविशेषेऽपि स्वभाव-भेदो मा भूत् सामग्रीवशाद्** इत्येतदत्रापि सम्बन्धनीयम् । तद्वशादितीदे भिन्नं कार्यमेव जायते न तेषाम् अतिशयाधानप्रहाणम् इति मन्यते । कुतस्तर्हि क्रमेण कार्यमिति चेत् ? अत्राह--**कार्यकाल** इत्यादि । विचारितमेतत्--**यद् यदा कार्यमुत्पित्सु** इत्यादिना । तथा सति क्रमभाविसहकारिवैफल्यम्, उपादानादेव क्रमकार्यनिष्पत्तेः । तत्सहकारिणः तन्निष्पत्तौ उपादानं किमर्थं गृह्यते तत्राऽसमर्थत्वात् ? अन्यथा प्रागपि ततः कार्यं सहकारिणः समर्थाः जनयन्ति नोपादानम् इति किं कृतो विभागः ? § 945

तेषामेव वा तदन्वयव्यतिरेकानुविधानात् न नित्यव्यापिनः सन्निधानेऽपि अतिप्रसङ्गात् इति चेत्; अत्राह--**नित्यैश्च** इत्यादि । § 946

---

६ व्यापारं] रो
७ त] उपकारम् ।
८ तः] न्तः
११ आ] स्वरूपम् ।
११ तैरेव] सहकारिभिरेव ।
१२ त] क्षणिकस्यापि ।
१२ ते] स्वभावभेदप्राप्तेः ।
१९ कार्य] र्या
२० शादितीदे] द्धि देशादि
२१ तेषा] नित्यानाम् ।
२३ इत्यादिना] पृ° १९४ ।
२४ कारिणः] सहकारिणः सकाशात् कार्यनिष्पत्तौ ।
२५ अन्य] यद्युपादानं प्राक् समर्थम् ।
२६ म्] समर्थमपि ।
२७ तेषामेव] सहकारिणामेव ।
२७ न्निधानेऽपि] तस्य कारणत्वम् ।

...14 नित्यैश्च जातेष्वर्थेषु अन्योऽन्यसहकारिभिः ।
तेष्वेकत्र समर्थेऽन्ये न निवर्तेरन्नकालिकैः ॥ १४ ॥§ 948

यथाकार्यकालं स्वभावतः कर्तरि स्वकारणा[त्तथोत्पन्नेषु] तत्करणसमर्थेषु पुनरागन्तुकेषु परस्पर[उपकारिषु] तत्करणसमर्थेऽन्यतमस्मिन् सति न वै अपरे निवर्तेरन् प्रत्येकं तत्करणस्वभावत्वात् क्षणिकवत् । तदेवं क्षणिकेतरैकान्तौ नान्योन्यमतिशयाते । कार्यकारणयोः सहावस्थाने दधिक्षीरादिषु सहोपलम्भेन अभेदादिप्रसङ्गः इति चेत्; संविदो विभ्रमेतरस्वभावयोः सहभावेऽपि सहोपलम्भादेरभावात् । विज्ञप्तेः...तदन्यत्रापि कल्पयन् केन वार्यते ? परिणाम...। चित्र... § 949

199/mkj

चशब्दो भिन्नप्रक्रमः इवार्थः **अकालिकैः** इत्यस्यानन्तरं द्रष्टव्यः । ततोऽयमर्थः--**जातेषु** निष्पाद्येषु । केषु ? **अर्थेषु** कार्येषु सत्सु । कैः ? इत्याह--**नित्यैः** इति । किंभूतैः ? इत्याह— **अन्योऽन्यसहकारिभिः** एककार्ये परस्परसहायैः इत्यर्थः । यदि वा, क्वचित् कार्ये एकस्य उपादानत्वे अन्येषां तत्सामग्रीपतितानां सहकारित्वम्, तेषाम् उपादानत्वे तस्य सहकारित्वमित्यन्योऽन्यसहकारिणः तैः इति । किम् ? इत्याह--**अन्ये** इत्यादि । **तेषु** अर्थेषु **एकत्र** एकस्मिन् उपादाने सहकारिणि वा कारणे **समर्थे** व्याप्रियमाणे वा **अन्ये** सहकारिणः उपादानपदार्था हेतवो न **निवर्त्तेरन्** किन्तु सर्वेऽपि तान् कुर्वन्ति तत्करणैकस्वभावत्वात् । अत्र निदर्शनमाह--**अकालिकैः** इति । यथा **अकालिकैः** क्षणिकैः अन्योऽन्यसहकारिभिः /ms जन्येष्वर्थे [षु ए]कत्र अन्ये न निवर्त्तेरन् हेतवः तथा प्रकृतेऽपि इति ।

§ 950

**यथा** इत्यादिना कारिकां विवृणोति । कार्यकालाऽनतिक्रमेण **यथाकार्यकालम् कर्त्तरि** कस्मिंश्चित् जनके सति । कुतः ? इत्याह--**स्वभावतः** स्वस्वाभाव्यात् । केषु सत्सु ? इत्यत्राह— **तद्** इत्यादि । अत्रापि **स्वभावतः** इत्येतद् अपेक्ष्यम् । **तत्करणसमर्थेषु** यथास्वकालम् उत्पित्सुकार्यजननशक्तेषु । किम्भूतेषु ? इत्याह--**स्वकारण** इत्यादि । पुनरपि किम्भूतेषु ? इत्याह--**पुनः** इत्यादि । पूर्वं समर्थे तस्मिन् सत्यपि **पुनः** पश्चात् **आगन्तुकेषु** । [पु]नरपि तानेव विशिनष्टि--**परस्पर** इत्यादिना । तस्मिन् सति किं जातम् ? इत्याह--**तत्** [इत्यादि । तत्] इत्यनेन विवक्षितं कार्यं परामृश्यते । **तत्करणसमर्थे अन्यतमस्मिन्** उपादानकारणे सहकारिणि वा **सति नवै** नैव **[अ]परे निवर्त्तेरन्** । कुवद् इत्यत्राह--**प्रत्येकम्** इत्यादि । एकस्य एकस्य **तत्करणस्वभावत्वादिति** भावः । अत्र दृष्टान्तमाह--**क्षणिकवद्**

२० कृतेऽपि] नित्येऽपि ।
३१ द्] कुत एतत् ?

इति । क्षणिक इव तद्वत् इति । यथा क्षणिके तत्करणसमर्थे अन्यतमस्मिन् अपरे [न] निवर्त्तेरन् तथा नित्येऽपि इति । § 951

यत्पुनरत्रोक्तं परेण--**क्षणिकस्य स्वहेतोः स स्वभावः यः सहकारिकारणापेक्षः कार्यजनकः, स न नित्यस्य, तदभावात्, आकस्मिकत्वे अनियमप्रसङ्गः** इति; तदसारम्; कार्याणां नित्यानां तदनिवारणात् । एवमर्थः नोक्तं **तथैव कालान्तरस्थायिनाम्** इत्यादि, अन्यथा कूटस्थानाम् इत्यादि /ms ब्रूयात् । कूटस्थपक्षेऽपि अयं न दोषः नित्यत्वात् तत्स्वभावस्य, अनित्यो हि स्वभावः स्वयमुत्पद्यमानोऽनियतः स्यात् इति युक्तम् । अत एवोक्तम्--**यथाकार्यकालम्** इत्यादि । § 952

प्रकृतं निगमयन्नाह--**तदेवम्** इत्यादि । **तत्** तस्माद् **एवम्** उक्तप्रकारेण **क्षणिकेतरैकान्तौ** क्षणिकाऽक्षणिकैकान्तौ **नान्योऽन्यं** परस्परम् **अतिशयाते** भेदं लभेते ? क्षणिकवद् अक्षणिकेऽपि अर्थक्रियासंभवेन व्यापकानुपल- 200/mkj ब्धिः, सत्त्वेन व्याप्तिसिद्धिः । अथवा, अक्षणिकवत् क्षणिकेऽपि तदसम्बन्धे न तस्य तद्व्याप्तिसिद्धिः इति मन्यते । यत्र उपलब्धिलक्षणप्राप्तं [यत्] नोपलभ्यते तत्र तन्नास्ति यथा प्रदेशविशेषे घटः, नोपलभ्यते च तथाविधं कारणं कार्ये इति स्वभावानुपलब्धिः । तत्र तदुपलम्भे वा सर्वस्य सर्वत्रोपलम्भ इति प्राप्तम् । न चैवम्, ततः प्रदेशविशेषे घटवत् कारणे कार्यस्य तत्र च कारणस्य अनुपलब्धिः दृश्यस्य अभाव इति क्षणिकतासिद्धेः न युक्तम्--**तदेवम्** इत्यादि, इत्यभिप्रायवतो मतमाशङ्कते **कार्य** इत्यादि । **कार्यकारणयोः सहावस्थाने** अभ्युपगम्यमाने । एतदुक्तं भवति--यथा सतः कारणस्य कार्ये अवस्थानं तथा कार्यस्य कारणे इति । [ततः] किं स्यात् ? इत्याह--**दधिक्षीरादिषु सहोपलम्भेन कार्यकारणयोः** इति सम्बन्धः, **अभेदादिप्रसङ्गः** । अस्यायमर्थः--यदि कार्यं दध्यादि पूर्वं कारणेन क्षीरादिना, /ms कारणं क्षीरादि कार्येण दध्यादिना पुनः सहोपलभ्यते तदा अस्य इदं कारणम्, इदमस्य कार्यम् इति यो भेदः तस्य अभावो **अभेदः**, यदि वा, यदा जैन-सांख्ययोः कारणे कार्यं तत्र कारणं तादात्म्येन वर्त्तते तदा कार्यकारणयोः **सहावस्थाने** एकत्वेन अवस्थाने सति कदाचित् क्षीरादिषु । केन किम् ? इत्याह--**सहोपलम्भेन** एकत्वोपलम्भेन **अभेदः** कार्यमेव कारणमेव वा स्यात्, **आदिशब्देन** वर्त्तमानत्वादिव्यपदेशादिपरिग्रहः, तस्य **प्रसङ्गः** । **इत्येवं चेत्**; अस्य उत्तरमाह--**संविद्** इत्यादि । **संविदः** तैमिरादिज्ञान-

३ प] बौद्धेन ।

६ नोकृं] मर्थमत्रोक्तं

१२ कानुप] सत्त्वमर्थक्रियया व्याप्तम्, सा च क्रमयौगपद्याभ्याम्, ते च नित्यान्निवर्तमाने स्वव्याप्यामर्थक्रियामादाय निवर्तेते, सा च स्वव्याप्यं सत्त्वम् इति व्यापकानुपलब्धिबलात् सत्त्वस्य क्षणिकत्वेन व्याप्तिः साध्यते । यदा अक्षणिकेऽपि अर्थक्रिया सिद्धा तदा न सत्त्वक्षणिकत्वयोः व्याप्तिः सिद्धेति भावः । द्रष्टव्यम्--पृ° १९० टि° ४ ।

१३ ब्धिः] ब्धेः

१३ द] अर्थक्रियाया अभावे ।

१४ स्य] सत्त्वस्य ।

१४ द्व्या] क्षणिकत्वेन व्याप्तिसिद्धिः ।

२६ त्र] कार्ये ।

स्य **यो विभ्रमस्वभावो** द्विचन्द्राद्यपेक्षया **तिमिराशुभ्रमण** न्यायबि० १ । ६ इत्यादि वचनात् यश्च **इतरस्वभावः** स्वरूपापेक्षयाऽविभ्रमस्वभावः **सर्वचित्तचैत्तानाम्** न्यायबि० १ । १० इत्याद्यभिधानात् । अथवा, **संविदो** निखिलकल्पनाज्ञानस्य यो **विभ्रमः स्वभावो अभिलापसंसर्ग** न्यायबि० १ । ५ इत्यादिवचनात् यश्च **इतरस्वभावः** स च कथितः, तयोः **सहभावेऽपि** न केवलम् असहभावे । किम् ? इत्याह--**सहोपलम्भादेः** इत्यादि । सहोपलम्भः सहदर्शनम् आदिर्यस्य अभेदादेः तस्य **अभावात्** । न वै द्विचन्द्रादिज्ञानस्य प्रतिभाससमये एव तत्स्वभावोपलम्भोऽस्ति विप्रतिपत्त्यभावेन ततः कस्यचित् कदाचिदपि क्वचित् प्रवृत्ता[त्त्य]भावप्रसङ्गात् । न चैवम्, ततोऽपि प्रवृत्तिदर्शनाद् असत्त्वख्यात्यादिवादभेदाभावप्रसङ्गाच्च । एतत् सौत्रान्तिकं प्रति पूर्वोक्तस्य व्यभिचारप्रदर्शनार्थं व्याख्यानम् । तयोः सहभावेऽपि कथञ्चिदेकत्वम्, भावेऽपि सर्वथैकत्वोपलम्भादेरभावादचोद्यमेतत् इति व्याख्येयम् । § 953 /ms

साम्प्रतं योगाचरं प्रति व्याख्यानं क्रियते--**संविदो** यो **विभ्रमस्वभावो** ग्राह्यग्राहकसंवेदनत्रयस्वभावः यश्च **इतरस्वभावो**ऽद्वयसंवित्स्वभावः । तथा चोक्तम्-- § 954

*अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥§ 956

मन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः ।
अन्यथैवावभासन्ते तद्रूपरहिता अपि ॥§ 958

प्र० वा० २ । ३५४, ५५ इत्यादि । § 959
201/mkj

तयोः **सहभावेऽपि** युगपद्भावेऽपि कथञ्चिदेकत्वभावेऽपि वा । किम् ? इत्याह--**सहोप** इत्यादि । पूर्ववद् व्याख्यानम् । तथाहि--तस्या विभ्रमः स्वभावोपलम्भे न इतरस्वभावोपलम्भः । न हि शुक्ले शङ्खे पीततोपलम्भे शुक्लस्वभावोपलम्भः । ततो न युक्तम्--**अविभागोऽपि बुद्ध्यात्मा** प्र० वा० २ । ३५४ इति, § 960

*नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते ॥ प्र० वा० २ । ३२७ इति च ।§ 962

५ थितः ] सर्वचित्तचैत्तानाम् इत्यादिना कल्पनाज्ञानस्यापि स्वरूपसंवेदनं अविभ्रमात्मकमेव ।
१० अ ] यदि ततः प्रवृत्तिर्न स्यात्तदा ।
२३ स्या ] संविदः ।
२४ मः ] म
२८ सैव ] संवित् ।

वदात्मनः पुरुषवत् स्वप्नेऽप्यदर्शनात् ततो भ्रान्तिमात्रे व्यवतिष्ठेत । इतरस्वभावादर्शनेऽपि गतेयं विभ्रमवार्ता इति निरभिधेयमेतत्--**अवेद्यवेदकाकारा** प्र° वा° २ । ३३० इत्यादि । **अविभागोऽपि** प्र° वा° २ । ३५४ इत्यादि च । न खलु चन्द्रमस्यविभागेऽवभासने चन्द्रद्वयप्रतिभासकल्पननु लोकबाधनात् । प्र ज्ञा क रः **पूर्वमविभागबुद्ध्यात्मनो दर्शनं पुनः तत्पृष्ठभाविना विकल्पेन स ग्राह्यग्राहकसम्वित्तिभेदवानिव लक्ष्यते** इति वचनं
/ms
नहि निर्विकल्पकेन किञ्चित् लक्ष्यते नाम, इति सः ध र्म की र्तेः अभिप्रायमज्ञात्वैव मन्यते, तथा तदभिप्रायाऽभावात्, अन्यथा **मन्त्राद्युपप्लुताक्षाणाम्** प्र° वा° २ । ३५५ इत्यादि निदर्शनमप्रेक्षाकारितां तस्य सूचयेत् । नहि नाम सविभ्रमे अक्षविभ्रमो निदर्शनम्, ईश्वरादिविभ्रमस्य तज्जातीयस्य भावात् । न चास्य द्विचन्द्रादिभ्रान्तिरपि इन्द्रियजा इति सिध्यति । शक्यं हि वक्तुम्--प्रथमम् एकेन्दुदर्शनम्, पुनस्तस्य विकल्पेन द्वित्वाध्यवसाय इति । तथा च तस्या इन्द्रियजत्वं साधयतो ध र्म की र्तेः [अकीर्तिः] आयाता । शेषमत्र प्रथमपरिच्छेदेऽभिहितं प्रकृतेऽपि द्रष्टव्यम् । ततो यत्किञ्चिदेतत् ।

§ 963

एतेन नैयायिकादिरपि जैनं प्रति **कार्यकारणयोः** इत्यादि वदन् निवारितो द्रष्टव्यः । तथाहि--संविदः संशयविपर्ययज्ञानस्य यः स्थाणुर्वा पुरुषो वाऽयम् इति, पुरुषे स्थाणौ वा स्थाणुरिति पुरुषः इति वा विभ्रमस्वभावः, यश्च अयम् इति धर्मिमात्रे इतरस्वभावोऽविभ्रमस्वभावः तयोः । शेषं पूर्ववत् । भवतु अविरुद्धमेकं ज्ञानमिति चेत्; अत्राह--**विज्ञप्तेः** इत्यादि । **तद्** अनन्तरोक्तम् **अन्यत्रापि** अर्थेऽपि समानं **कल्पयन्** केन **वार्यते** । कुत एतत् ? इत्यत्राह— **परिणाम** इत्यादि । *सनिदर्शनमत्रैव हेतुमाह--**चित्र** इत्यादिना । § 964

यत्पुनः परेण भावविनाशयोरपिनाभावसाधने उक्तम्-- § 965

---

१ नः] संविदात्मनः
३ इ] यथा भ्रान्तैर्निरीक्ष्यते ।
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा ॥ इति शेषः ।
४ नु] नं
५ रः] र स्य
६ ल्पेन] विकल्पेन अनुभवादुपजायमानेन व्यवस्थाप्यते व्यवहारतः । अनुदर्शनं दर्शनानुरूपो विकल्पः ।--प्र° वार्तिकाल° ३ । ३५७ ।
७ सः] प्रज्ञाकरः ।
११ न] धर्मकीर्तेः ।
१३ च] द्विचन्द्रादिभ्रान्तः ।
१३ तो] नीलद्विचन्द्रादिधियां हेतुरक्षाण्यपीत्ययम् ॥...किं वैन्द्रियं यदक्षाणां भावाभावानुरोधि चेत् । तत्तुल्यं विक्रियावच्चेत् सैवेयं किं निषिध्यते ॥--प्र° वा° २ । २९०--९६ इत्यादिना भ्रान्तेरिन्द्रियजत्वं धयतः ।
१९ र्मिमात्रे] अविभ्रमस्वभावः ।
२२ *] दृष्टान्तसहितम् ।
२४ रेण] अहेतुत्वाद्विनाशस्य स्वभावादनुबन्धिता । न हि विनश्वरं तद्भावे हेतुमपेक्षते स्वहेतोरेव विनश्वराणां भावात् ।--प्र° वा° स्व° पृ° ३६० । विनाशं प्रति सर्वेषामनपेक्षतया स्थितेः ।...सर्वत्रैवानपेक्षाश्च विनाशे जन्मिनोऽखिलाः । सर्वथा नाशहेतूना तत्राकिंचित्करत्वतः ॥--तत्त्वसं° श्लो° ३५३, ३५७ ।
२४ पि] रवि

202/mkj

*विनाशनियतो भावः तं प्रत्यन्यानपेक्षणात् ।
तद्धेतूनामसामर्थ्यात् इति ;§ 967

तदेतदन्यत्रापि समानमिति तत्साधनमिति दर्शयन्नाह--**उत्पादस्थितिभ-ङ्गानाम्** इत्यादि । § 968

...15 उत्पादस्थितिभङ्गानां स्वभावादनुबन्धिता ।
तद्धेतूनामसामर्थ्यादतस्तत्त्वं त्रयात्मकम् ॥ १५ ॥§ 970

यथैव हि भावस्य विनाशहेतुः स्वभावभूतस्य विनाशं न करोति कृतस्य करणाभावात् । नापि परभूतं करोति, तस्य करणेऽपि प्रागिव तदवस्थस्य तथोपलम्भादिप्रसङ्गात् । सम्बन्धासिद्धेः अस्येति व्यपदेशोऽपि मा भूत् । न च व्यतिरिक्तो घटादेर्विनाशो नाम । सन्नपि तादात्मानमखण्डयन् तद-वस्थमेव स्थगयति यतो न दृश्येत । तदयं विनाशहेतुः तदतत्क्रियाविकलः कथमपेक्ष्यः यतः कादाचित्को विनाशः स्यात् ? § 971

प्रागसत आत्मलाभः उत्पादः, सतः पुनरभावो भङ्गः पूर्वस्य /ms
द्वितीयादिक्षणे, अवस्थानं स्थितिः इति एतेषां **स्वभावात्** स्वरूपेण हेतुभूतेन **अनुबन्धिता** अविनाभाविता । कुत एतत् ? इत्यत्राह--**हेतूनाम्** इत्यादि । तेषाम् उत्पादस्थितिभङ्गानां ये हेतवः तेषाम् **असामर्थ्यात्,** उत्पाद-स्थितिभङ्गेषु इति विभक्तिपरिणामेन सम्बन्धः । **अतः** अस्मात् न्यायात् **तत्त्वं** जीवादिस्वरूपं **त्रयात्मकम्** उत्पादस्थितिभङ्गात्मकम् । § 972

सदृष्टान्तं कारिकार्थं दर्शयन्नाह--**यथैव** हि इत्यदि । **यथैव** येनैव प्र-कारेण, **हिः** इति वितर्के **भावस्य** घटादे**र्विनाशहेतुः** मुद्गरादिः **स्वभावभूव**

१ तं] विनाशं प्रति अन्यकारणानामपेक्षा नास्तीत्यर्थः ।
१५ हे] तद्धे
१९ य] विनाशहेत्वयोगात् । स्वभावत एव भावा नश्वराः, नैषां स्वहेतुभ्यो निष्पन्नानामन्यतो विनाशोत्पत्तिः तस्यासामर्थ्यात् । न हि विनाशहेतुर्भावस्य स्वभावमेव करोति तस्य स्वहेतुभ्यो निर्वृत्तेः । नापि भावान्तरमेव; भावस्य तदवस्थत्वात्तथोपलब्ध्यादिप्रसङ्गः । नापि भावान्तरेणावरणम्; तदवस्थे तस्मिन्नावरणायोगात् । नापि विनाशहेतुना अभावः क्रियते अभावस्य विधिनान्यतयोपगमे व्यतिरेकाव्यतिरेकविकल्पनातिक्रमात् । भावप्रतिषेधकरणे न तस्य किंचित् भवति न भवत्येव केवलमिति । एवं च कर्ता न भवतीत्यकर्त्तुरहेतुत्वमिति न विनाशहेतुः कश्चित् । वैयर्थ्याच्च । यदि स्वभावतो नश्वरः न किञ्चिन्नाशकारणैः, तत्स्वभावतयैव स्वयं नाशात् । यो हि यत्स्वभावः स स्वहेतोरेवोत्पद्यमानस्तादृशो भवति न पुनस्तद्भावे हेत्वन्तरमपेक्षते ।--हेतुबि॰ पृ॰ ५६ । प्र॰ वा॰ स्व॰ १ । २७२ ।

स्यात्म भूतं **भावस्य** इत्येतदत्रापि सम्बन्धनीयम्, **विनाशम्** अभावं **न करोति** । कुत एतत् ? इत्यत्राह--**कृतस्य** इत्यादि । **कृतस्य** स्वकारणात् निष्पन्नस्य भावस्य **करणाभावाद्** भावस्य स्वभावभूतविनाशकरणाभाव एव कृतः स्यात्, तस्य च स्वहेतोः उत्पत्तेर्न करणमिति मन्यते । अस्वभावभूतं तर्हि करोति; इत्याह--**नापि** इत्यादि । **परभूतम्** अर्थान्तरभूतं **नापि करोति तस्य** परभूतस्य विनाशस्य **करणेऽपि** न करणे **प्रागिव तदवस्थस्य** पूर्वावस्थाऽविचलितस्य भावस्य **तथा** पूर्ववद् **उपलम्भादिप्रसङ्गात्** । **आदिशब्देन** 203/mkj अर्थक्रियादिप्रसङ्गात् इति गृह्यते । दूषणा न्तरं दर्शयन्नाह--**सम्बन्ध** इत्यादि । **सम्बन्धस्य** पारतन्त्र्यस्य **असिद्धेः** कारणाद् **अस्य** घटादेर्विनाश इत्येवं **व्यपदेशोऽपि,** अभिधानमपि न केवलम् अनन्तर एव दोष इति **अपिशब्दः,** **मा भूत्** । § 973

/ms ननु किमुच्यते **सम्बन्धासिद्धिः** इति, यावता विशेषणीभावो भावाभावयोः सम्बन्धः सिद्ध इति चेत्; न; अत्र अनवस्थितेः प्रतिपादनात् । माभूत् तयोः सम्बन्धो व्यपदेशो वा तथापि न दोषः, सम्बन्धरहितस्य अभ्युपगमात् इत्येके; तदपि न सुन्दरम्; साक्षात् परम्परया वा तस्य इन्द्रियेण असम्बन्धो न; अग्रहणप्रसङ्गात् । तथापि ग्रहणे रूपादेः तेन सम्बन्धकल्पनमनर्थकम् । § 974

स्यान्मतम्--अभावेन तस्य स्थगनात् तथोपलम्भाद्यभावादयुक्तस्य क्तंत**स्य करणेऽपि** इत्यादि । तत्रोत्तरमाह--**नच** इत्यादि । **नच** नैव **व्यतिरिक्तो** घटादेः अर्थान्तरभूतो **विनाशो नाम** । स्फुटार्थे **नाम** शब्दः, तद्ग्राहकप्रमाणाभावेन अभावात् । दूषणान्तरमाह--**तदात्मानम्** इत्यादि । अस्यायमर्थः--सन्नपि **तदात्मानं** तस्य दृश्यस्य घटादेः आत्मानं स्वभावम् **अखण्डयन्** अविनाशयन् **तदवस्थमेव** तदात्मानं **स्थगयति,** न च **यतः** स्थगनात् **न दृश्येत** । सता हि स्वविषयज्ञानजननयोग्येन अवश्यं तत्कर्त्तव्यमिति मन्यते । तदात्मखण्डने स एव दोषोऽनवस्था च । § 975

प्रकृतं निगमयन्नाह--**तदयम्** इत्यादि । यत एवं **तत्** तस्माद् **अयं** लोके प्रतीयमानो **विनाशहेतुः** मुद्गरादिः । **तदतत्क्रियाविकलो** घट[स्वभावा]स्वभावविनाशकरणविकलः **कथं** नैव **अपेक्ष्यो** विनाशकार्ये इत्युपचारयतो अपेणात् **कादाचित्को** भावस्य **विनाशः स्यात्** । **यत** इति वा आक्षेपे, नैव स्यात्, नित्यः स्यात् इत्यर्थः । § 976

अत्रैव दूषणान्तरमाह--**विनाशो यद्यभाव[ः]स्याद्** इत्यादिना । § 977

---

१ भूव] तं
१ स्यात्म] स्वात्म
६ णे] नाकरणे
१० अ] पूर्ववदुपलम्भादिप्रसङ्गलक्षणः ।
१२ न्धासिद्धिः] द्धेः
१४ योः] भावाभावयोः ।
१६ तेन] इन्द्रियेण सह ।
२५ स्था] आत्मखण्डनं भिन्नमभिन्नं वा क्रियते इत्यादि ।
२७ त] भिन्नाभिन्नविनाशकरणरहितः ।
२८ तो] पस्कारः, **यतः**

...16 विनाशो यद्यभावः स्यात् क्रियाप्रतिषेधान्न[चेत्] ।
भावं न करोतीति केनापेक्ष्येत तत्क्वचित् ॥ १६
॥§ 979

ततः स्वभावनश्वरोऽर्थः सिद्धः, तथैव भावस्य उत्पादहेतुरकिञ्चित्करः कृतस्य उत्पादने प्रयोजनाभावात् । तत एवाभावस्यापि स्वतः सिद्धत्वात् । प्रागभावं भावीकुर्वन्नुत्पादहेतुश्चेत्; प्राग्भावमभावीकुर्वन् विनाशहेतुः किन्नानुमन्यते ? यदि पुनर्भावस्य प्रध्वंसाभावोऽपि स्वत एव अभावान्तरवत् स्वहेतोरेव अभावत्वात्, तथैव भावस्य स्थितिरपि । यथा च स्वयमनुत्पित्सोः उत्पादहेतुः स्थास्नोः स्थितिहेतुरिति उत्पादस्थितिहेतुरिति उत्पादस्थितिभङ्गान् प्रत्यनपेक्षत्वं भावस्य सिद्धं तत्स्वभावापेक्षणात्, कांश्चिद् द्रव्यक्षेत्रकालस्वभावविशेषान् परिहृत्य अन्यत्र भवन् उत्पादो विनाशो वा तदपेक्षस्तद्धेतुश्च युज्येत प्रतीतेरविरोधात् । § 980

**विनाशः यद्यभावः** प्रसज्यप्रतिषेधरूपा भावनिवृत्तिः **यदि** तर्हि अभावं /ms मुद्गरादिः करोति **इत्येवं भावं न करोति इति** हेतोः **क्रियाप्रतिषेधात्** घ- 204/mkj टादेः करणनिराकरणात् अकिञ्चित्करत्वं विनाशहेतोः, क्रियाप्रतिषेधरूपत्वात् प्रसज्यप्रतिषेधस्य इति [तत्] तस्मात् **केन अपेक्ष्येत** न केनचित् **क्वचित्** कार्ये इत्यर्थः । § 981

उपसंहरन्नाह--**तत** इत्यादि । यत एवं **ततः स्वभावतो नश्वरोऽर्थः सिद्धः** । तथा च प्रयोगः--यो यं प्रति अन्यानपेक्षः स तत्स्वभावनियतः यथा अन्त्या कारणसामग्री स्वकार्योत्पादनं प्रति अनपेक्षा तत्स्वभावनियता, विनाशं प्रति अन्यानपेक्षश्च भावः इति । एवं दृष्टान्तं व्याख्याय दार्ष्टान्तिकं विवृण्वन्नाह--**तथैव** इत्यादि । **तथैव** तेनैव प्रकारेण **भावस्य** घटादेः **उत्पादहेतुः अकिञ्चित्करः** । कुत एतदिति चेत् ? अत्राह--**कृतस्य उत्पादन** इत्यादि । इदमत्र तात्पर्यम्— यथा विनाशोऽभाव इति भाववतो भेदविचारमर्हति तथा उत्पादोऽपि तदविशेषादिति । तथाहि— यदि सत एव स्वभावभूत उत्पादः क्रियते; तर्हि स एव क्रियते इति **कृतस्य उत्पादने प्रयोजनाभावात्** हेतुस्वभाववदिति । एतेन स्वभावभूतोऽपि चिन्तितः । न खलु सतो घटस्य अर्थान्तरभूतोऽपि सः क्रियमाणः कश्चन अर्थं पुष्णाति । § 982

स्यान्मतम्--अस्य विकल्पद्वयस्य निरालम्बनत्वात् नातः प्रकृतसिद्धिरिति चेत्; अत्राह— **तत एव** इत्यादि । **तत एव** अनन्तरविकल्पभेदादेव

---

१३ तिषेधात्] अथ क्रियानिषेधोऽयं भावं नैव करोति हि । तथाप्यहेतुता सिद्धा कर्तुर्हेतुत्वहानितः ॥ --तत्त्वसं° श्लो° ३६६ ।
१८ योगः] यद्भावं प्रति यन्नैव हेत्वन्तरमपेक्षते । तत्तत्र नियतं ज्ञेयं स्वहेतुभ्यस्तथोदयात् ॥ निर्निबन्धा हि सामग्री स्वकार्योत्पादने यथा । विनाशं प्रतिसर्वेऽपि निरपेक्षाश्च जन्मिनः ॥--तत्त्वसं° श्लो° ३५४--५५ ।
१९ त] स्वकार्योत्पादमस्वभावनियता ।
२७ सः] उत्पादः ।

नान्यतोऽ**भावस्यापि** न केवलमुत्पादस्य **स्वभावतः सिद्धत्वाद् उत्पादहेतुः** /ms **अकिञ्चित्करः** इति सम्बन्धः । अस्य विकल्पद्वयस्य निरालम्बनत्वे सौगतस्य इष्टाऽसिद्धिरिति मन्यते । § 983

परमतमाशङ्कते--**प्रागभावम्** इत्यादिना । अथ कोऽयं प्रागभावो नाम ? उत्पत्तेः पूर्वमभाव इति चेत्; स मृत्पिण्डादन्यः, स एव वा स्यात् ? प्रथमपक्षे नैयायिकादेः तन्मतं न सौगतस्येति तन्मतानभिज्ञानात् । न च तुच्छमभावं कश्चिद् भावीकरोति बन्ध्यासुतादेरपि तत्करणप्रसङ्गात्, भावोपादानकल्पनावैफल्यप्रसङ्गाच्च । तन्नाद्यः पक्षः । द्वितीयेऽपि पक्षे मृत्पिण्ड एव प्रागभावः, तं भावीकुर्वन् इत्युक्तम्, तस्य पूर्वमेव सतः तदयोगात् । अथ तं घटाभावात्मकं भावीकुर्वन् इत्ययमर्थो विवक्षितः, सोऽपि न युक्तः, ततो घटस्य भिन्नस्य भावात् व्यपदेशादिभेदात् । तन्न द्वितीयोऽपि युक्तः । यदप्यत्रोत्तरम्--**प्राग्भावम्** इत्यादि । तत्रापि चिन्त्यते--किमिदं प्राग्भावमिति ? यदि विनाशात् पूर्वकालभावी घटः प्रागभावः तमिति; तर्हि बौद्धस्य न कश्चित् तुच्छो विनाश इति कस्य ततः प्राग् अन्यदा वा भावः ? न खलु बन्ध्यासुतात् प्राक् किञ्चिद् भवति । तत एव *तम् **अभावीकुर्वन्** इत्ययुक्तम्; अभावस्य ततो व्यतिरेकाव्यतिरेकयोर्यथोक्तदोषात् । अथ तम् **अभावीकुर्वन्** कपालीकुर्वन् इत्युच्यते; तदसारम्; तस्यैव कपालभावयोगात्, घटनाशे कपालभावायोगात्, ततो यत्किञ्चिदेतदिति । § 984
205/mkj

अत्र प्रतिविधीयते--यथैव हि सौगतस्य प्रागभावः प्रध्वंसाभावश्च तुच्छो /ms नास्ति तथैव करणात्, एकान्तेन भिन्नं कार्यमपि नास्ति किन्तु उपादानमेव उपादेयो भवति इति प्रतिपादितम् **विज्ञप्तेः** सिद्धिवि° ३ । १४ इत्यादिना । **ततः प्रागभावं** घटविविक्तमृत्पिण्डाकारं द्रव्यं **भावीकुर्वन्** घटीकुर्वन् घटपर्यायोपेतं जनयन् **उत्पादहेतुः** उपादानम्, सहकारिकारणकारणकलाप इति चेत्; **प्राग्भावं** घटसत्त्वम् **अभावीकुर्वन्** स्वपर्यायकपालविविक्तं कुर्वन् **विनाशहेतुः किन्नानुमन्यते** ? अयमेवाचार्यस्य अभिप्रायः । **यदि पुनः** इत्यादि[ना]पूर्वपक्षान् **यदि पुनः** इत्यादिना तु अपरपक्षं दर्शयति । **यदि** इति पराभिप्रायसूचने, **पुनः** इति वितर्के, **भावस्य** घटादेः **प्रध्वंसाभावोऽपि** न केवलं प्रागभावः **स्वत एव** स्वस्मादेव नश्वरस्वभावात् नान्यतो मुद्गरादेः । अत्र निदर्शनमाह--**अभावान्तरवत्** इतरेतरात्यन्ताभाववत्, सोऽपि स्वभावः, कुतः ? इत्याह--**स्वहेतोरेव** । प्रध्वंसः कपालात्मना भावः स्वत

७ त] सद्भावकरणप्रसङ्गात् ।
८ ङ्गाच्च] अभावादेव सर्वकार्योत्पत्तेः ।
९ त] मृत्पिण्डस्य ।
९ तं] मृत्पिण्डम् ।
१० त] मृत्पिण्डात् ।
१३ प्राग] ग्
१५ *] प्राग्भावम् ।
१६ तो] भिन्नाभिन्नपक्षयोः ।
१७ अथ] भावम् ।
२१ म्] पृ° १९८ ।
२३ ण] णं
२३ लाप] अन्यः कारणसमूहः ।
२६ क्षान्] क्षं
२६ पुनः] तथैव

एव अभावत्वात् इतरेतराभाववत्; अत्र दूषणमाह--**तथैव** इत्यादि । **तथैव** तेनैव प्रकारेण **भावस्य स्थितिः** परापर[क्षणेषु] अवस्थानमपि न केवलं प्रध्वंस एव **स्वत एव स्यात्** इति । शक्यं हि वक्तुं भावस्य स्थितिः स्वत एव भावधर्मत्वात् प्रध्वंसवत् । न चात्र धर्म्यसिद्धिः; पूर्वस्य उत्तरक्षणे विवेकवद् अविवेकत्वात् [स्यापि प्रसिद्धेः, त]था चोक्तं न्या य वि नि श्च ये-- § 985

> *भेदज्ञानात् प्रतीयेते प्रादुर्भावात्ययौ यदि ।
> अभेदज्ञानतः सिद्धा निरंशे न केनचित् ॥ न्यायवि° श्लो° ११४§ 987

अत एव न स्वरूपासिद्धो हेतुः प्रत्यक्षादिबाधितो वा पक्षः । अनेन /ms पूर्वस्य हेतोर्विरुद्धत्वमित्थं कथयति--तत्र यदुक्तं **प्राग्भावम्** इत्यादि; तदयुक्तम्; यतो नश्वरं चेत् *तमभावीकुर्वन् विनाशहेतुः किं तेन ? स्वयमेव नाशात् । *विपरीतं चेत्; तदशक्यम् । नहि अनश्वरं तं कश्चिद् अभावीकर्त्तुं समर्थ इति चेत्; अत्राह--**यथा च** इत्यादि । **यथा** इति वचनाद् अनुक्तमपि तथा इति गम्यते । तथा **स्वयम्** आत्मनोऽपि **अनुत्पित्सोश्च पुनः उत्पादहेतुः अकिञ्चित्करः** इति सम्बन्धः । प्रथमस्य [स्व]यम् उत्पत्तेरन्यस्य शशविषाणवत् कारणसन्निधानेऽपि अनुत्पत्तेरिति भावः । एवं स्थितावपि दर्शयति **स्थास्नोः** इत्यादिना । **स्थितिहेतुः अकिञ्चित्कर इत्येवं सर्वं समानम्** । अनेनैव तद्दर्शयति--**उत्पादस्थितिभङ्गान् प्रति अनपेक्षत्वं भावस्य सिद्धं तत्स्वभावापेक्षणात् इति** तद्विनाशेऽपि । यदि पुनः तं प्रति नापेक्षं तत्स्वभावस्य सर्वदा सन्निधानात् इत्युच्यते तथा प्रतीतेः; तदितरत्र समानमिति । तथा च-- § 988

> *विरुद्धाव्यभिचारी स्यात् सर्वो हेतुः परोदितः ।
> समत्वात् परपक्षेऽपि यद्वा स्यात् कल्पितः स्वयम् ॥§ 990

206/mkj

ननु च उत्पादस्य अहेतुकत्वे नित्यं सत्त्वमसत्त्वं वा । तदुक्तम्-- § 991

> *नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् ।

---

२ स्य] तथैव स्थितिं प्रत्यनपेक्षं स्थास्नु तद्धेतोरकिञ्चित्करत्वात्, तद्व्यतिरिक्ताव्यतिरिक्ताकरणादित्यादि सर्वं समानम् ।--अष्टश° अष्टस° पृ° १८५-८६ ।
४ ध] स्थितिरूपस्य धर्मिणोऽसिद्धिः ।
४ व] भेदवत् ।
५ अ] अभेदस्यापि ।
७ न] स्थितिरंशेन
१० *] भावम् ।
१० किं] विनाशहेतुना ।
११ *] अनश्वरस्वभावम् ।
१८ द्वि] तद्वद्वि

अपेक्षातो हि भावानां कादाचित्कत्वसंभवात् ॥ प्र° वा° ३ । ३४ § 993

इति चेत्; अत्राह--**कांश्चित् द्रव्य** इत्यादि । **कांश्चिद्** विवक्षितान् **द्रव्यक्षेत्रकालस्वभाव[विशेषान्] विशेष**शब्दः प्रत्येकं द्रव्यादिभिः सम्बन्धनीयम्, **परिहृत्य** । का * ? **अन्यत्र** अभिमतकालादौ **भवन्** जायमानः **वा**शब्दो /ms भिन्न प्रक्रम इवार्थः **उत्पाद** इत्यस्यानन्तरं द्रष्टव्यः । तत **उत्पाद** इव **विनाशः तदपेक्षो** अन्यद्रव्यापेक्षः **तद्धेतुः** द्रव्यादिहेतुको **युज्येत** । कुत एतत् ? इत्यत्राह--**प्रतीतिरविरोधात्** । अथवा, यथानिवेशमेव **वा** शब्दो व्याख्येयः । विनाशवद् उत्पादोऽपि स्वत एव इति स्वभाववादिनं प्रति **कांश्चिद्** इत्यादेः उपन्यासात् । अत्र **च** इति समुच्चये । शेषं पूर्ववत् । § 994

एवं सत्यपि दृष्टान्ते व्याप्तिग्रहणाभावात् क्षणक्षयादौ सर्वहेतूनां गमकत्वं प्रतिपाद्य संप्रति दृष्टान्ताभावात्तत्प्रतिपादयन्नाह--**जीवच्छरीर** इत्यादि । § 995

यदि वा, यदुक्तम् अ र्च टे न--**सत्त्वादेः अन्वयाभावेऽपि व्यापकानुपलब्धेः विपक्षव्यतिरेकाद् गमकत्वम्** इति; तत्र कृतं निषेध उपसंहरन्नाह--**जीवच्छरीर** इत्यादि । § 996

...17 जीवच्छरीरे प्राणादिर्यथाऽहेतुर्निरन्वयात् ।
तथा सर्वः सत्त्वादिरहेतुः क्षणिके क्वचित् ॥ १७ ॥ § 998

पक्षविपक्षाभ्यां सर्वस्य संग्रहात् यथा जीवच्छरीरे प्राणादिरनन्वयः तथा क्षणिकत्वेऽपि सत्त्वकृतकत्वादिरिति । न हि क्षणिकत्वेतराभ्यां तृतीया राशिरस्ति यत्र हेतुर्वर्तते शब्देऽपि तथाऽनिश्चयात् । अपरापरताल्वादिचक्षुरादितैलादिव्यापारसाफल्याच्छब्दादीनामपरापरस्वभावसिद्धेः क्षणिकत्वविनिश्चयः, तत एव अनित्यतामात्रं साध्यं क्वचित् सिद्धम्, तत्रैव तद्व्यापारस्य साफल्यात् । § 999

**जीवच्छरीरे** सात्मकत्वे साध्ये **प्राणादिः** हेतुः **यथा** येन प्रकारेण **अहेतुः** । कुतः ? इत्याह--**निरन्वयात्** साधर्म्यदृष्टान्ताभावात् । **तथा सर्वः** शुद्धाशुद्ध-

---

३ म्] नीयः
४ *] क्व
७ तीति] ते
१३ इति] एतच्च बाधकं प्रमाणं व्यापकानुपलब्धिरूपमुत्तरत्रावसरप्राप्तं स्वयमेव वक्ष्यति । तदनया बाधकप्रमाणप्रवृत्त्या साध्यधर्मस्य वस्तुनः साधनधर्मस्वभावता सिध्यति ।--हेतुबि° टी° पृ° ४४ ।
१३ निषेध] धम्
१७ क्ष] अनयोरेव द्वयो रूपयोः सन्देहे अनैकान्तिकः । यथा सात्मकं जीवच्छरीरं प्राणादिमत्त्वादिति । न हि सात्मकनिरात्मकाभ्यामन्यो राशिरस्ति यत्रायं प्राणादिर्वर्तेत । आत्मनो वृत्तिव्यवच्छेदाभ्यां सर्वसंग्रहात् ।...न तत्रान्वेति । एकात्मन्यपि असिद्धेः ।--न्यायबि° ३ । ९६-९९, १०३--४ ।
२४ शु] शुद्धः सत्त्वं हेतुः । अभिन्नविशेषणविशिष्टः उत्पत्तिमत्त्वात् इति, भिन्नविशेषणविशिष्टः कृतकत्वादिति । एतौ अशुद्धौ । द्रष्टव्यम्--न्यायबि° ३ । ९-११ ।

स्वभावः **सत्त्वादिः** निरन्वयादहेतुः **क्षणिके क्वचित्** कस्मिंश्चित् शब्दादौ साध्ये क्षणिकत्वे वा क्वचित् साध्ये । अथवा, **जीवच्छरीरे** सात्मकत्वे साध्ये **प्राणादिः** हेतुः निरन्वयाद् अन्वयाभावं प्राप्य योऽसौ उक्तः स **यथा** येन व्यतिरेकाभावप्रकारेण **सत्त्वादिरहेतुः** । शेषं पूर्ववत् । § 1000

207/mkj

कारिकां विवृण्वन्नाह--**पक्ष** इत्यादि । जीवच्छरीरं सर्वं **पक्षः**, घटादिः **विपक्षः, ताभ्यां सर्वस्य** चेतनेतरजातस्य **संग्रहात् यथा जीवच्छरीरप्राणादिः अनन्वयः** साधर्म्यदृष्टान्तरहितः **तथा क्षणिकत्वे** साध्ये, **अपि**शब्दो भिन्नप्रक्रमः **सत्त्वकृतकत्वादिः** इत्यस्य अनन्तरं द्रष्टव्यः । यदि वा, यथास्थानमेव **अपि**शब्दोऽस्तु । तत्रायमर्थः--**क्षणिकत्वे अपि**शब्दाद् अक्षणिकत्वेऽपि इति । नहि तत्रापि सपक्षोऽस्ति, अनन्वयः इत्यपेक्षा । कुतः ? इत्यत्राह--**नहि** इत्यादि । [हि] यस्मात् **न व्याप्तिसाधने** सत्त्वादेः **क्षणिकेतरत्वाभ्याम्** अविनाभावसिद्धौ **तृतीया राशिरस्ति** सपक्षाभिधाना प्रतिरत्र तद्रासौ **हेतुः** सत्त्वादिः **वर्तेत** । शब्दादिः तृतीया राशिरस्ति इति चेत्; अत्राह--**शब्द** इत्यादि । **अपि**शब्दात् न केवलं विवादगोचरे वस्तुनि इति **तथा** क्षणिकत्वप्रकारेण **अनिश्चयात्** सत्त्वादेः इति । न च तथाऽनिश्चितसत्त्वं वस्तु निदर्शनम्, इतरथा साध्यमपि स्यादविशेषात् । यदा पुनः शब्द एव क्षणिक[ः] साध्यः तदा शब्दस्य बुद्ध्यादिभिः सह उपादानं तेन तेषां समानताप्रतिपादनार्थम् । § 1001

अत्रापरः प्राह--**अपरापरताल्वादि-चक्षुरादि-तैलादिव्यापारसाफल्यात् शब्दादीनाम् अपरापरस्वभावसिद्धिः क्षणिकत्वविनिश्चयः**; तदसारमिति दर्शयन्नाह--**तत एव** इत्यादि । यत एव अपरः तद्व्यापारः अपरापरशब्दादिस्वभावमन्तरेण अनुपपन्नो वैफल्यात्, **तत एव अनित्यतामात्रं** परिणामिनित्यत्वं **साध्यं क्वचित्** सौगतस्य **तत्रैव तद्व्यापारस्य** उक्तविधिना **साफल्यात्** । एतदुक्तं भवति--ततो न्यायात् शब्दादौ परिणामाऽनित्यत्वं सिद्धं तन्निदर्शनमुच्यते नान्यत्र सिद्धसाधनात्, तथा च दृष्टान्ताभावात्तदसाध्यमुक्तम् । एतच्चोक्त- /ms मिति किमनेनेति चेत्; न; अन्यथा अभिप्रायात् । यदुक्तं प्र ज्ञा क रे ण--**क्षणिकत्वे साध्ये न दृष्टान्ताभावो नीलादेः सर्वस्य, तत्र यद्यवभासते तत्तथैव परमार्थसद् व्यवहारावतारि यथा नीलं नीलतयाऽवभासनं तथैव तदवतारि, सर्वमवभासते च क्षणिकतया** । इति; तत्र पक्षस्य प्रत्यक्षबाधनं हेतोश्च असिद्धत्वमनेन कथ्यते । अथवा, क्षणिकत्वात् नीलादेरव्यतिरेके तद्वत् तस्यापि स्वभावविप्रकर्ष इति दृष्टान्तस्य साध्यसाधनोभयवैकल्यम् । तत्र तदनभ्युपगमे क्व हेतोः उपसंहार इति प्रदर्श्यते । § 1002

---

६ रीर] रे
१२ द्रासौ] अस्ति यत्र तद्राशौ
१७ तेन] शब्देन ।
१७ तेषां] बुद्ध्यादीनाम् ।
२० सिद्धिः] द्धेः
२१ त] ताल्वादिव्यापारः ।
२७ द्य] द
३१ त] क्षणिकत्ववत् ।
३१ त] नीलादेरपि ।

स्यान्मतम्--सौगतस्य दानादिचेतांस्येव पुण्यपापव्यपदेशभाञ्जि, तेषां च स्वसंवेदनाध्यक्षविषयत्वात् न [स्व]भावविप्रकर्ष इति साधनविकलता दृष्टान्तस्येति; तदशिक्षिताभिधानम्; यतः ततः कालान्तरे फलाऽसिद्धेः, तदन्याभ्युपगमस्य अवश्यंभावात् । अथ मतम्--स्वभावविप्रकर्षेऽपि पुण्यपापयोः सर्वैरपि वादिभिः साधनात्, साध्यविकलता दृष्टान्तस्येति; तदनुपपन्नम्; प्रक्रमाऽपरिज्ञानात् । ततः तदसाध्य...साधनात् । साध्यं तु उक्तमेव ।
§ 1003

साम्प्रतं हेतोर्विरुद्धत्वात् न तत् साध्यम्; इत्याह--**अनिष्टसिद्धेः** । § 1004
208/mkj

...18 अनिष्टसिद्धेः पारार्थ्यं यथाऽनिष्टं प्रसाधयेत् ।
संहतत्वं तथा सत्त्वं शब्द[क्षणिकतान्वयि] ॥ १८
॥§ 1006

परार्थाश्चक्षुरादयः...नहि विपक्ष एव निर्णयात् कृतकत्वस्य । यद् यद्भावं प्रति अन्यान्यपेक्षं तत्तद्भावनियतं यथा अन्त्या कारणसामग्री स्वकार्यजननं प्रति इति परस्य चोदितचोद्यमेतत् । तथा चेत्; भावः कालान्तरस्थानोत्पादं प्रत्यनपेक्षणात् तद्भावनियतः सिध्येत् नान्यथा । सतोऽर्थस्य पुनः उत्तरकालं स्थितौ किमपेक्षणीयं स्यात् यतः कादाचित्की स्थितिः स्यात्, तथा पुनरुत्पित्सोरुत्पत्तौ न किञ्चिदपेक्षणीयमिति समानम् । यदि पुनः भावः स्थास्नुरुत्पित्सुर्वा न भवेत् न कदाचिदपि तिष्ठेदुत्पद्येत वा खपुष्पवत् । नहि तन्नश्वरत्वमेव साधयतीति समञ्जसम् अन्यत्राप्यविशेषात् । तदिमेऽर्थाः स्वरसत एवोत्तरीभवन्तो यथायोगं परस्परोपकारमतिशयाधानमात्मसात्कुर्वन्ति । कस्यचित् कुतश्चिद्विनाशे परोऽन्य एव जायते । ननु निरन्वयनिवृत्तौ कस्य कारणाहिता कार्योत्पत्तिः ? § 1007

**अनिष्टस्य** परिणामाऽनित्यत्वस्य **सिद्धेः** तत्रैव सर्वहेतूनां दर्शनान्न तत्साध्यमिति वैफल्याच्च साधनस्य इति शेषः, यदर्थं तत्प्रयुक्तं तस्य असाधनात् अनिष्टसिद्धिं समर्थयते **पारार्थ्यम्** इत्यादिना । चक्षुरादीनां संबन्धि
/ms **संहतत्वं** कर्तृ **प्रसाधयेत् यथा** येन तत्रैव दर्शनप्रकारेण । किम् ? इत्याह--**पारार्थ्यम्** । किम्भूतम् ? **अनिष्टम्** तेषामेव सांख्येन संहतं तत् साधयितुम् इष्टं संहतं प्रसाधयेत् । एवं परप्रसिद्धं निदर्शनं प्रतिपाद्य दार्ष्टान्तिकं प्रतिपादयति **तथा सत्त्वं** शुद्धेतररूपम् **अनिष्टं प्रसाधयेत्** इति सम्बन्धः । किंभूतं सत्त्वम् ? इत्याह--**शब्द** इत्यादि । § 1008

---

९ येत्] यथा परार्थाश्चक्षुरादयः संघातत्वात् शयनासनाद्यङ्गवदिति । तदिष्टासंहतपारार्थ्यविपर्ययसाधनाद् विरुद्धः ।--न्यायबि० ३ । ८७, ८८ ।
२६ तेषामेव] चक्षुरादीनाम् ।

कारिकार्थं प्रकटयति--**परार्थाश्चक्षुरादयः** इत्यादिना । कुत एतत् ? इत्यत्राह--**नहि** इत्यादि । **विपक्ष एव** परिणाम एव **निर्णयात्** कृतकत्व-स्य इति । ननु यद्यपि कृतकत्वस्य तत्रैव निर्णयः तथापि न तेन तद्व्याप्तिः अनुमानेन तद्विपरीतव्याप्तिप्रसाधनादिति परः । तदेव दर्शयन्नाह--**यद् यद्भाव-म्** इत्यादि । ननु पूर्वम् **उत्पादस्थितिभङ्गानाम्** इत्यादिना सर्वमेतदुक्तम्, इति किमर्थं पुनरपि उच्यते इति चेत् ? सत्यमुक्तम्, किन्तु पूर्वं विनाशे अयमिव * स्वतन्त्रो हेतुः, अधुना अनेन कृतकत्वादेः नाशित्वेन अविनाभावः साध्यत इति विभागः । यद्वा **विपक्ष एव निर्णयात्** इत्यस्य हेतोभक्तेनैव परग्रथनासिद्ध तामुद्भानेव  तां परिहरति **परस्य चोदितचोद्यमेतत्** इति निपानार्थ * । **यद्वस्तु** यस्य भावो **यद्भावः** तं **प्रति अनपेक्षं तद्वस्तु तद्भाव-नियतं** द्वितीयेन तच्छब्देन यदुक्तं तस्य परामर्शः । अत्र दृष्टान्तमाह--**यथा** इत्यादिकम् । **अन्त्या चासौ कारणसामग्री च** इति तत्सामग्री **स्वकार्यजननं प्रति अनपेक्षा सती तद्भावनियतैव** स्वकार्यजनन  भावनियतैव । पक्षध-र्मोपसंहारमाह--**तथा** इत्यादि । सुगमम् । **चेच्छब्दः** पराभिप्रायद्योतकः । 209/mkj /ms अत्रोत्तरमाह--**भाव** इत्यादि । **भाव** इत्येतदुपलक्षणं तेन कृतक इत्येतदपि गृह्यते । **कालान्तरस्थान**  च **उत्पादश्च तौ प्रति अनपेक्षणात् तद्भावनियतः** कालान्तरस्थानोत्पादभावनियतः **सिध्येत्** । अस्याऽनभ्युपगमे दूषणमाह--**नान्यथा** अतो हेतोर्विनश्वराभावः सिध्येत् व्यभिचारित्वात् हेतोरिति मन्यते । एतदनेन दर्शयति--यथा क्षणिकत्वे सत्त्वादिर्विरुद्धः विपक्ष एव निश्चयात्, तथा अन्येन तस्य अविनाभावसाधकोऽप्यनपेक्षणादिति हेतुः तत्रैव विनिश्च-याविशेषादिति । § 1009

स्यान्मतम्--**कालान्तरस्थानोत्पादौ प्रति अनपेक्षणात्** इत्यसिद्धम्; त-द्भावनियतत्वे तौ प्रति सापेक्षत्वाद् भावस्य इति । तत्रोत्तरमाह--**सतोऽर्थस्य** इत्यादि । सतो विद्यमानस्य अर्थक्रियाकारिणो भावस्य **पुनः** इति वितर्के **उत्तरकालम्** उत्पत्तेः **स्थितौ किमपेक्षणीयं स्यात्** न किञ्चिदित्यर्थः । स-तोऽर्थस्य स्वभावभूताया अन्यस्या वा केनचित् करणे विनाशे च दोषात्, एवमर्थं च **सतोऽर्थस्य** इत्युक्तम्, **यतः** अपेक्षणीयात् **कादाचित्की स्थितिः स्यात् तथा** तेनैव प्रकारेण **पुनः उत्पित्सोर्भावस्य उत्पत्तौ न किञ्चिदपेक्ष-णीयम् यतो**ऽपेक्षणीयात् कादाचित्को *त्पत्तिः स्यादिति । **यतः** इत्याद्यनुवृत्तेः । **इत्येवं समानं** विनाशवदत्वाप्यतदत्तप्येतदस्ति * इति मन्यते । § 1010

३ स्य] विपक्ष एव ।
४ अनुमानेन] पक्ष एव ।
५ म्] पृ॰ २०२ ।
७ *] [[तद्भावं प्रत्यन्यानपेक्षत्वादिति ।]]अयमेव
९ तामुद्भानैव] हेतोर्यत्तेनैव परं प्रत्यसिद्धता उद्भाविता
१० *] निदर्शनार्थम्
१६ स्थान] नं
१९ दिर्विरुद्धः] कथञ्चिन्नित्ये ।
२० हेतुः] विपक्ष एव ।
२६ स्या] स्थितेः ।
२९ *] चित्को
३० *] वदन्यत्राप्येतदस्ति

नन्वस्य अपेक्षणीयस्याभावेऽपि स्थास्नु-उत्पित्सु-स्वभावापेक्षणात्, अस्य /ms च सर्वदाऽसन्निधानादसिद्धो हेतुः इति चेत्; अत्राह--**यदि पुनः** इत्यादि । **भावो** जीवादिः **स्थास्नुः उत्पित्सु** **वति भवेत् न कदाचिदपि तिष्ठेद् उत्पद्येत वा खपुष्पवत् इति** । तिष्ठति उत्पद्यते च ततः तत्स्वभाव इति । ननु तद्भावं प्रति अनपेक्षत्वं नश्वरत्वमेव साधयति प्रत्यक्षादिबाधाऽभावात् न स्थित्युत्पत्तिस्वभावं विपर्ययादिति चेत्; अत्राह--**नहि** इत्यादि । **हिः** यस्मात् तद्भावं प्रति अनपेक्षत्वं **नश्वरत्वमेव** *नान्यत् **साधयति इति न समञ्जसम्** उपपन्नम् । कुत एतत् ? इत्यत्राह--**अन्यत्रापि** । *आपाद्यसाध्येऽपि **अविशेषाद्** विशेषाभावात्; तत्रापि प्रत्यक्षादिबाधाऽभावादिति मन्यते । § 1011

उपसंहारव्याजेन परकीयस्य हेतोरसिद्धतां दर्शयन्नाह--**तद्** इत्यादि । यत एवं **तत्** तस्मात् **इमे** प्रत्यक्षतः प्रतीयमाना **अर्था** जीवादयः **स्वरसत एव** [स्व] भावत एव **उत्तरीभवन्तः** *पूर्वाकारपरित्यागाऽजहद्वृत्तोत्तराकारं गच्छन्तः **आत्मसात्कुर्वन्ति** इति युक्तम् । किम् ? इत्याह--**अतिशयाधानं** योग्यतास्थापनम् । कथम् ? इत्याह--**यथायोगमिति** उत्पादविनाशसहकारिकारणसंबन्धो योगः तस्य अनतिक्रमेण । कथंभूतम् ? इत्याह--**परस्परोपकारम्** इति । **परस्परेण** सहकारिणा उपादानस्य अनेन स- 210/mkj हकारिण **उपकारो** यस्मिन् येन इति वा विग्रहः । तदनेन उत्पादं प्रतीवपिनासं प्रत्यपि भावस्य कृतकस्य वा सापेक्षत्वाद् भावस्य विनाभाव- /ms साविनासाविनाभाव साधने तद्भावं प्रत्यनपेक्षत्वमसिद्धमित्युक्तम् भवति । ननु यदुक्तम्--**तहिये अर्थाः स्वरसत एव उत्तरीभवन्तः** इति; तदयुक्तम्; **कस्यचित्** पूर्वस्य **कुतश्चिद् विनाशे परः अन्य एव** जायते इति चेत्; अत्राह--**ननु** इत्यादि । **ननु** नैव **निरन्वयनिवृत्तौ** अत्यन्तमभावे **कस्य** कारणस्य कारणाकारणाहिता * **कार्योत्पत्तिः** अनियमप्रसङ्गादिति मन्यते । § 1012

कथं तर्हि कार्योत्पत्तिः ? इत्यत्राह--**अनादिनिधनम्** इत्यादि । § 1013

...19 **अनादिनिधनं द्रव्यमुत्पित्सु स्थास्नु नश्वरम् ।**

३ ति] र्वा न
४ तः] उत्पत्तिस्थितिस्वभावः ।
६ भावं] बाधासद्भावात् ।
७ *] उत्पत्तिस्थितिस्वभावम् ।
८ *] आपाद्यं यत् साध्यम् उत्पत्तिस्थितिस्वभावरूपं तस्मिन् ।
१२ *] पूर्वाकारपरित्यागः उत्तराकारस्वीकारश्च परस्परम् अजहद्वृत्तः--ध्रौव्यत्वं स्वीकुर्वन्नेव संजायते इति भावः । द्रष्टव्यम्--पृ॰ १ टि॰ ९ ।
१६ अनेन] उपादानेन ।
१८ पिनासं] प्रति इव विनाशं
१८ वा] हेतोः ।
१९ साविनासाविनाभाव] विनाशाविनाभाव
१९ ने] विनाशं प्रत्यन्यानपेक्षणादिति हेतुः असिद्धः इति भावः ।
२० हिये] तदिमे
२१ स्य] पर्यायस्य ।
२३ *] कस्य कारणाहिता

स्वतोऽन्यतो विवर्तेत क्रमाद्धेतुफलात्मना ॥ १९

‖§ 1015

यदि सर्वं सत् उत्पादस्थित्यात्मकं सर्वदा न स्यात् सकृदपि तथा मा भूत् खरविषाणवत्, तथा तत् पूर्वोत्तरपरिणामात्मना सततं विवर्तमानं प्रतिक्षणं त्रिलक्षणं हेतुफलव्यवस्थामात्मनि विकल्पयन् परत्र कार्यकारण-व्यपदेशभाग् भवतीति समञ्जसम्, प्रत्यनीकस्वभावाविनाभावात् । § 1016

अविद्यमाना आदिनिधनम् **अनादिनिधनं,** *सादित्वे कार्यानुपादान-कारणाभावे सदपि सहकारिकारणम् अकिञ्चित्करम् । न चैवं शक्यं वक्तुं कदाचिदनुपादाना कार्योत्पत्तिः अन्यदा अन्यथेति; तथाऽदर्शनात् । दर्श-नानुसारेण च तत्त्वव्यवस्थानात् । कथञ्चैवं वादिनां कार्यदर्शनाद् उपादान-कारणानुमानम् ? सर्वत्राऽऽशङ्काऽनिवृत्तेरति तद्व्यवहारोच्छेदः । *सान्तत्वे पुनः अशेषसन्ताननिवृत्तिरिति । निरूपयिष्यते चैतत् जी व सि द्धौ । किन्तदित्थम्भूतम् ? इत्याह--**द्रव्यम्** इति । न चैतत् चोद्यम्--*रूपादिव्य-तिरेकेण किं तत् इति ? **प्रतिभासैक्यनियम** सिद्धिवि° १ । १० इत्यादिना प्रसाधनात् । पुनरपि कथम्भूतं तदिति आहोस्वित् [तदित्याह--उत्पित्सु स्थास्नु नश्वरम्] इत्यादि । तत्किं कुर्यात् ? इत्याह--**विवर्त्तेत** । केन प्रकारेण ? **हेतुफलात्मना** मृत्पिण्डघटादिस्वभावेन । § 1017

*ननु च प्रधानं महदादिफलात्मना विवर्त्तते न तद्धेत्वात्मना **मूलप्र-कृतिरविकृतिः** सांख्यका° ३ इति वचनादिति चेत्; न; महदादिपरिणाम-जननस्वभावस्य अकादाचित्कत्वे *तदनुपरतिरिति कपिलोऽन्यो वा मुक्तो न म कथं यदि पुनः कपिलादिना संसर्गाभावात्तदुपरति [रिति] मतिः; /ms
सापि न युक्ता; *अविकले कारणे कार्यस्य अवश्यंभावात् । अथ त- 211/mkj
त्संसर्ग एव स स्वभावो न पूर्वम्; हन्त कथम् **मूलप्रकृतिः** ? सांख्यका° ३ इति युक्तम् **हेतुफलात्मना** इति । § 1018

एतेन वैशेषिकादिमतमपि चिन्तितम् । यदेव द्रव्यस्य हेत्वात्मता तदेव फ-लात्मता । अयं तु विशेषः--कदाचित् कस्यचिदभिव्यक्तिः अनभिव्यक्तिस्वाह

१ ना] उत्तरांशः उद्धृतः--न्यायवि° वि° प्र° पृ° ४१४ ।
६ माना] नम्
६ *] सर्वथा नूतनस्योत्पादे ।
७ णा] ण
७ भावे] उपादानकारणाभावे इत्यर्थः ।
८ अ] उपादानकारणात् ।
१० ति] कार्यकारणव्यवहाराभावः ।
१० *] सर्वथा निरन्वयविनाशस्वीकारे ।
११ द्धौ] चतुर्थप्रस्तावे ।
१२ *] गुणव्यतिरिक्तं द्रव्यं नास्ति इति शङ्काभिप्रायः ।
१७ *] सांख्यः प्राह ।
१७ न] न प्रधानम् अन्यहेतुतः समुद्भूतं तस्य नित्यत्वादिति ।
१८ विकृतिः] अकार्यभूता नित्येति ।
१९ *] महदादिकार्याणां सर्वदोत्पत्तिः ।
१९ पिलोऽन्यो] जीवात्मा ।
२० थं] वा कथं मुक्तः ?
२० ति] कपिलादिकं प्रति महदादिकार्योत्पादस्याभावः ।
२१ *] नित्ये प्रधानाख्ये कारणे ।
२१ अथ] कपिलादिसंसर्गे सत्येव ।
२२ स] कार्योत्पादनस्वभावः ।
२२ कृतिः] अविकृतिः--नित्येति कथमुच्यते ?

च **[सर्वं] सर्वत्र विद्यते** इति कश्चित्; तं प्रत्याह--**क्रमाद्** इति । **क्रमम्** आश्रित्य इत्यर्थः, इतरथा सव्येतरगोविषाणवत् न हेतुफलव्यपदेशः । व्यङ्ग्यव्यञ्जकभावेऽपि अस्य चोद्यस्याऽनिवृत्तेः । § 1019

विवर्तते तदात्मना किन्तु स्वत एवेति पुरुषाद्यद्वैतवादिनः **पुरुष एवेदम्** ऋक्° १० । ९० । २ इत्यादि वचनात् । यद् उत्पद्यते तत् परतः, नश्वरः, स्वात्मनि क्रियाविरोधात्, उत्पत्तिसमये स्वमयभावाच्च । तथा परत एव विन स्वतः, सर्वदा विनाशप्रसङ्गात् इति केचित्; तान् प्रति आह--**स्वतः अन्यतः** इति । **[वि]वर्तेत** इति सम्बन्धः । **स्वतः** तथा विवर्त्तनस्वभाववैधुर्य्ये परतोऽपि न विवर्त्तेत खरशृङ्गवत्, गगनच्चैयमर्थं च **उत्पित्सु** इत्याद्युक्तम् । परतः तद्विवर्तनप्रतिषेधे प्रत्यक्षादिविरोधः । § 1020

**द्रव्यम् उत्पित्सु** इत्यादि समर्थयते **यदि** इत्यादिना । **यदि** चेत् **स** विद्यमानं **सर्वं सर्वदा उत्पादात्मकं न स्यात् सकृदपि तथो**त्पादात्मकत्वप्रकारेण **मा भूत्**, भवति च, ततो मन्यामहे सर्वदा उत्पादात्मकमिति । अनेन चरमक्षणकथा क्षीणेति दर्शयति । ननु यदि नाम च कदाचिद् दुषात्मकं वस्तु तस्य किमायातं येन सर्वदा तत् तदात्मकं स्यादिति चेत्; /ms न तर्हि इदानीं कदाचित् स क्षणिकमुपलभ्य सर्वदा तत्तथा इत्यनुमानम् । शेषं चर्चितमत्र । **तथा स्थित्यात्मकं** सर्वदा यदि न स्यात्; सकृदपि तथा माभूत् । भवति च तदात्मकं तत्प्रतीतेः प्रतिपादनात् । ततः सर्वदा तदात्मकमिति निराकृतमेतत् यदुक्तं प्र ज्ञा क रे ण--**दध दत्तादेः उपलम्भदशायां भवत् कालान्तरस्थायिता तथाप्रतीतिर्नान्यदा विपर्ययात्** इति; कथम् ? *अदृष्टस्य ज्ञानादेः अभिमतस्वाभावाऽसिद्धिप्रसङ्गात् । दृष्टानुरूपतत्त्वव्यव-

---

१ च] क्तिश्च, आह च--
१ श्चित्] सांख्यः । किं सांख्यमतमवलम्ब्य सर्वं सर्वत्र विद्यते ।--प्र° वार्तिकाल° पृ° १८० ।
२ देशः] समसमयभाविनोः कार्यकारणभावाभावात् ।
४ ना] हेतुफलात्मना ।
५ इ] पुरुष एवेदं यद् भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥--श्वे° ३ । १५ ।
६ क्रियाविरोधात्] न स्वत उत्पद्यते इति सम्बन्धः ।
६ भावाच्च] स्वभावतः एव विनश्यतीति सम्बन्धः । इति बौद्धाः ।
७ विन] विनाशो न
७ केचित्] नैयायिकादयः ।
९ र्थं] गगनवच्च[[नैयायिकमतापेक्षया इदमुक्तम् ।]], एवमर्थं
१२ स] सत्
१४ था] नहि स कश्चित् क्षणो विद्यते यस्मात् अग्रिमक्षणोत्पत्तिर्न भवति इति चरमक्षणस्य अभाव एव ।
१४ च] न
१५ कं] उत्पादात्मकं
१५ त्] उत्पादात्मकम् ।
१६ स] सन्तं
१६ दा] सत् क्षणिकमेव इत्यनुमानं स्यात् ।
१७ था] स्थास्नु ।
१८ कं] स्थित्यात्मकम् ।
१९ ध] देव
२० त्] तु
२० तीति] ते
२० दा] यदा देवदत्तो न दृश्यते तदा ।
२१ *] यदि उपलब्धस्यैव तत्स्वभावता व्यवस्थाप्यते तदा अदृष्टस्य--अनुपलब्धस्य ।
२१ ज्ञानादेः] अभिमतो यः प्रतिभासरूपः स्वभावः तस्य असिद्धिः स्यादिति भावः ।

स्थापनम् अन्यत्र समानम् । **खरविषाणवत्** इति उभयत्र निदर्शनम् । एतद् अन्यत्राऽवृत्ति दिशन्नाह--**तथा** इत्यादि । पृथगस्य उपादानं दृष्टान्तार्थं परं प्रति अस्य सिद्धत्वात्, नैयायिकादिकं प्रति एतत् साध्यार्थम् पूर्वं दृष्टा न्तार्थमिति विभागः । यत एवं **तत्** तस्मात् **पूर्वोत्तरपरिणामात्मना सततं** 212/mkj **विवर्त्तमानं** क्षणं [क्षणं]**प्रति प्रतिक्षणं त्रीणि** उत्पादस्थितिभङ्गाः **लक्षणानि** यस्य तत् **त्रिलक्षणम् सत् सर्वम्** इति सम्बन्धः । तत् किं कुर्वत् किं करोति ? इत्यत्राह--**हेतुफल** इत्यादि । **हेतुफलयोर्व्यवस्था** पूर्वः पूर्वो हेतुः परं परं फलम् इति लौकिकी स्थितिः ताम् इति । तदनेन यदुक्तं केनचित् **पूर्वं कार्यम् उत्तरं कारणम्** इति; तन्निरस्तम्; **शुचि नरशिरःकपालं प्राण्यङ्गत्वात्** न्यायप्र° पृ° २ इत्यादिवत् प्रसिद्धिबाधनादिति । यदि वा, **हेतुफलमेव** विशिष्टा नानाप्रकारा या **अवस्था** दशा **ताम्** इति । **स्वरूपमेव जन्यं जनकं च** इति, तदनेन निरस्तम् । कथम् ? **वि[कल्पयन्]** जन्यजनकताप्रतीतेः **आत्मनि स्वस्वरूपेण** कल्पनायाम् ततस्तद्व्यवस्थायाः काल्पनिकत्वं **कल्पयन्** अविकल्प इत्युक्तं भवति । नीलादिसुखादिविशेष स्यापिकल्प- /ms त्वेन प्रतिभासाद्वैतमपि तथा स्यात् । प्रत्यक्षबाधनम् इतरत्र समानम् । **नहि पूर्वोत्तरपरिणामरहितं किञ्चित् क्वचित् प्रत्यक्षबुद्धौ प्रतिभाति** इत्युक्तम् । § 1021

अथवा, अवस्थातुः एकान्तेन अवस्था भिन्नाः इति मतम् अयुक्तमिति कथितं भवति । भवति **परत्र** सहकारित्वेन उपकारके सन्तानान्तरे सति **कार्यव्यपदेशभाग्,** *उपकार्ये **कारण**व्यपदेशभाग् **भवति इति समञ्जसम् ।** कुतः पुनः सत् सर्वं तथाविधम् ? इत्यत्राह--**प्रत्यनीक** इत्यादि । उत्पादस्य **प्रत्यनीकस्वभावः** स्थितिः **तदविनाभावाद्** वस्तुस्वभावस्य उत्पादस्य । § 1022

कुत एतदपि इति चेत् ? अत्राह--**द्रव्याद्** इत्यादि । § 1023

---

१ त्र] देवदत्तादौ ।
२ त्राऽवृत्ति] त्राप्यति
३ अस्य] खरविषाणस्य उत्पादादिस्वभावशून्यस्य ।
८ चित्] प्रज्ञाकरेण भाविकारणवादिना । यथा च कारणस्य पूर्वं भावं विना न भवति कार्यं तथा अवश्यंभावि कारणं कार्यस्य परभावं विना नेति समानं कार्यकारणभावनिबन्धनमिति द्वयोरपि परस्परं कार्यकारणभावः ।--प्र° वार्तिकाल° पृ° २८ ।
९ त्वात्] लोकविरुद्धो यथा शुचि नरशिरःकपालं प्राण्यङ्गत्वात् शङ्खशुक्तिवत्--न्यायप्र° पृ° २ । परीक्षा° ६ । १९ ।
१२ इति] यत् अद्वैतवादिनां मतम् ।
१३ स्थायाः] हेतुफलव्यवस्थायाः ।
१४ न्] कथयन् ।
१४ ल्प] विवेकरहित एव ।
१४ स्यापि] वि
१५ था] कल्पनात्मकमेव ।
१८ म्] नैयायिकादेः ।
१९ न्तानान्त] पदार्थान्तरे ।
२० *] उपकर्तुं योग्ये पदार्थे तु ।
२१ र्वं] उपकार्यम् उपकारकं च, अत एव कारणकार्यात्मकम् ।

...20 ***[*]द्रव्यात् स्वस्मादभिन्नाश्च व्यावृत्ताश्च परस्परम् ।
लक्ष्यन्ते गुणपर्याया धीविकल्पाविकल्पवत् ॥ २०***

‖§ 1025

गुणिनः कथञ्चिदभिन्नाः रूपादयः सुखादयो वा सकृत्प्रतीताः क्रमेण...तथा... तत्सिद्धम्...। यत्पुनरेतत्--परमाणूनां संयोगे दिग्विभागेन अङ्गीक्रियमाणे षडंशतापत्तेः । निरंशत्वे परस्परानुप्रवेशान्न प्रचयभेद इति; अत्रोत्तरम् । § 1026

**द्रव्यात्** इत्यनेन गुणपर्यायैकान्तं निषेधति, **अभिन्नाश्च** इत्यनेन तेषां तद्वतोर्भेदैकान्तम्, **व्यावृत्ताश्च** इत्यनेन सांख्यमतम्, **परस्परं वा भिन्ना व्यावृत्ताश्च** इत्यनेनापि, **स्वस्माद्** इत्यनेन **सर्वस्योभयरूपत्वे** प्र° वा° ३
213/mkj । १८१ इत्यादिकम् । **गुणाः सह**भाविनो जीवस्य ज्ञानादयः, पुद्गलस्य रूपादयः, **पर्यायाः** क्रमभाविनः सुखदुःखादयः, शिवकादयश्च **लक्ष्यन्ते** प्रत्यक्षप्रमाणेन निश्चीयन्ते । अनेन प्रतीतिसिद्धत्वेन काल्पनिकत्वम् । § 1027

**युक्त्या यन्न घटामुपैति तदहं दृष्ट्वापि न श्रद्दधे** इति वदन्तं प्रति निदर्शनमाह— **धीविकल्पाऽविकल्पवद्** इति । **धियो विकल्पाविकल्पौ इव तद्वत्** इति । यथा धियः सकाशात् विकल्पौ आकारौ भिन्नौ अभिन्नैव लक्ष्येते तथा प्रकृताः स्वद्रव्याद् इति निष्ठुरविचारचतुरस्य अनेन स्वमतत्यागं दर्शयति । नैयायिकादिकं प्रति निदर्शनं नोक्तं प्रतीतिबलेन तेन
/ms द्रव्यादिव्यवस्थोपगमात् । अथवा, धियः सम्बन्धिनौ विकल्पौ स्वैः विभ्रमेतर-संशयेतर-दृश्येतर-ग्राह्येतर-नीलेतराकारैः भेदाभेदौ ताभ्यां तुल्यं वर्त्तत इति तद्वत् । § 1028

कारिकां विवृण्वन्नाह--**गुणिन** इत्यादि । गुणिनः सकाशात् **कथञ्चित्** तत् सर्वात्मना **अभिन्ना रूपादयः सुखादयो वा सकृद्** एकदा **प्रतीताः** परीक्षितप्रमाणप्रमिताः । किं कुर्वन्ति ? इत्याह--**क्रमेण** इत्यादि । दृष्टानुरूपत्वात् सर्वदा तत्त्वसिद्धेः इति भावः । तदनभ्युपगच्छतोऽपि हताद् आगच्छति इति दर्शयन्नाह--**तथा** इत्यादि । अत्रापि **क्रमेण** इत्यादि संयोज्य व्याख्या कर्त्तव्या । प्रकृतं निगमयन्नाह--**तत्सिद्धम्** इत्यादि । § 1029

---

१ *] उक्तं च--...द्रव्यात् स्वस्मादभिन्नाश्च व्यावृत्ताश्च परस्परम् । उन्मज्जन्ति निमज्जन्ति जलकल्लोलवज्जले ॥ --न्यायकुमु° पृ° ३७० । देवैर्निवेदितं चैतत् स्वयमन्यत्र तद्यथा । द्रव्यात् स्वस्माद...--न्यायवि° वि° प्र° पृ° ४३२ ।
८ तेषां] द्रव्यात् ।
८ म्] अभेदप्रतिपादकम् ।
८ वा] चाऽ
९ नेनापि] सांख्यमतं नषेधति ।
१० म्] धर्मकीर्तिकृताक्षेपं निषेधति ।
११ यः] जीवस्य ।
११ श्च] मृदः पुद्गलस्य ।
१२ म्] निषेधति इति सम्बन्धः ।
१३ इति] उद्धृतमिदम्--अष्टश°, अष्टस° पृ° २३४ ।
१६ अभिन्नैव] अभिन्नाविव
१६ कृताः] गुणपर्यायाः ।
१६ स्य] युक्त्यैकान्तवादिनः ।
१७ तेन] नैयायिकादिना ।
२४ ताद्] हठात्

ननु अस्ति स्थूलस्य एकस्य नानावयवगुणपर्यायात्मनो बुद्धौ प्रतिभासनम्, स नैकोऽवयवी गुणी वा युक्तः विचारायोगात् । तदेव दर्शयन्नाह- -**यत्पुनरेतद्** इत्यादि । **यत्** परेण यथोक्तप्रमेयदूषणम् उक्तम् इति शेषः । **पुनः** इति युक्त्यन्तरसूचने, **एतन्निवेद्यमानं** स्थूलस्य सूक्ष्मनान्तरीयकत्वात् **परमाणूनाम्** इत्युक्तम् । *ते च संयोगापेक्षा एव तं जनयन्ति नान्यथा अतिप्रसङ्गात् इति **संयोगे** इति स च एकदेशेन सर्वात्मना वा स्याद् गत्यन्तराभावात् इति मनसि निधाय प्रथमपक्षे दूषणमाह--**दिग्विभागेन** इत्यादि । [दिशः प्राच्यादयः] *तद्विभागेन **संयोगे** अङ्गीक्रियमाणे **षडंशतापत्तेः** *तेषामेवपरमाणुतैव न स्यात् सांशत्वात् घटादिवत् इति मन्यते । द्वितीयपक्षे तदाह--**निरंशत्वे** परमाणूनाम् अङ्गीक्रियमाणे **परस्परानुप्रवेशात्** कारणात् **न प्रचयभेदः** स्कन्ध भेदः **इति** शब्दः पूर्वपक्षसमाप्तौ । तदुक्तम्— /ms

*तत्र दिग्भागभेदेन षडंशाः परमाणवः ।
नो चेत् पिण्डोऽणुमात्रः स्यात् न च ते बुद्धिगोचराः ॥
न्यायवि॰ १ । ८६ इति ।§ 1032

एतद् दूषयन्नाह--**अत्र** इत्यादि । **अत्र** पूर्वपक्षे **उत्तरम्** उच्यते इति शेषः । § 1033

यथा[तथा]शब्दावन्तरेणापि तदध्यारोपात् प्रतिवस्तूपमालङ्कारमाश्रित्य कारिका व्याख्यायते-- § 1034
214/mkj

...21 क्षणश्चित्क्षणमध्यस्थो न जहाति निरंशताम् ।
तथाणुरपि मध्यस्थः ततः प्रचयवर्धनम् ॥ २१
॥§ 1036

विज्ञप्तिमात्रेऽपि ज्ञानस्य स्वहेतुफलमध्यवर्तिनः सांशत्वे अनन्तक्षणप्रसङ्गात् तावतैव परिसमाप्तत्वात्तदन्यकल्पनानर्थक्यम् । अनुप्रवेशे पुनः एकक्षणवर्ति निष्पर्यायं जगत् स्यात् । यदि पुनः कथञ्चिन्निरंशत्वेऽपि तथा परमाणूनामनुप्रवेशाभावात् प्रचयभेदः स्यात् । क्रम...। तथा सति-- § 1037

---

३ शेषः ] षट्केन युगपद् योगात् परमाणोः षडंशता । षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः ॥--विज्ञ॰ विंशि॰ श्लो॰ १२ । चतुःश॰ पृ॰ ४८ । तत्त्वसं॰ पृ॰ २०३ ।
४ सूक्ष्म] अन्तरा विना न भवतीति नान्तरीयकम् अविनाभावीत्यर्थः ।
५ *] परमाणवः ।
५ तं] अवयविनम् ।
६ स] संयोगः ।
८ *] दिग्विभागेन ।
९ *] परमाणूनाम् । यतः सर्वे षड्दिग्वर्तिभिः परमाणुभिः संयुज्यन्ते ।
९ तेषामेव] क

यथा **चित्क्षणमध्यस्थः** चिद्रूपौ कारणकार्यभूतौ यौ क्षणौ तयोर्मध्यम् अन्तरं तत्र तिष्ठति इति तत्स्थः । कोऽसौ ? इत्याह--**क्षणो** भागः पूर्वस्य कार्यभूतः उत्तरस्य कारणभूतः, सोऽपि चिद्रूप एव अन्यस्य तदभावात् । स किं करोति ? इत्याह--**न जहाति** न परित्यजति । किम् ? इत्याह--[निरंशताम्] निरंशस्य सर्वात्मना एकदेशेन इति विकल्पाऽयोगात् केवलं तत्र तिष्ठति इति न्यायात्, **तथा अणुरपि** परमाणुरपि न केवलं चित्क्षण एव **मध्यस्थो न जहाति निरंशताम्** इति सम्बन्धः । ततः किं सिद्धम् ? इत्याह--**ततः प्रचयवर्धनं** तस्मान्न्यायात् कालप्रचयवत् देशप्रचयस्यापि वर्धनम्, स्यात् इत्यध्याहारः । § 1038

एतदुक्तं भवति--वित्क्षण मध्यस्थः क्षणः पूर्वोत्तरक्षणाभ्यां सान्तरः, निरन्तरो वा ? न तावदाद्यो विकल्पः; *चिरन्तनसौगतानां तथाऽभ्युपगमाभावात्, नैरन्तर्यविशिष्टानामेव क्षणानाम् उपादानोपादेयभावाभ्युपगमात् । येषामपि प्र ज्ञा क र गु प्ता दी नां तथाभ्युपगमः तेषाम् असंसृष्टा क्षणा एव स्वकार्यं कुर्वन्ति न परमाणव इति किं कृतो विभागः ? अतिप्रसङ्गोऽत्रापि दुर्वारः । /ms तन्न परमाणूनां कार्यारम्भे संयोगमुपकल्प्य *तन्निबन्धनं दोषचिन्तनं न्याय्यम् । *जागरणप्रबोधचेतसोः उपादानोपादेयभूतयोः व्यवधाने नित्यवत् कार्यकारणभावनिषेधात् न सुस्थितं तन्मतम् । व्यवधानं च तयोः नाभावेन नापि कालेन; तदनभ्युपगमात् । अत एव न सजातीयविज्ञानैः; स्वापादिदशायां तदनभ्युपगमात् । विजातीयैः व्यवधाने; न विज्ञप्तिमात्रं स्यात् । भवतु वा तैर्व्यवधानम्, तथापि तेषामन्योन्यं तच्चेतोभ्यां च पुनरपि सान्तरत्वे तदेव चोद्यं तदेव उत्तरमित्यनवस्थाः प्रत्येकं गगनतलविसर्पिण्यो योज्याः । निरन्तरत्वे समायातो द्वितीयो विकल्पः । एवमर्थं च **क्षणो वित्क्षणमध्यस्थः** इति सामान्येनोक्तम् । सोऽपि न युक्तः संयोगवत् दोषात् । नैरन्तर्यम् संयोग इति शब्दभेदमात्रमुत्पश्यामो नार्थभेदम् । अन्ये तु मन्यन्ते सर्वचेतसां परस्परं न सान्तरत्वं नापि विपर्ययः, 215/mkj तत्कथं **क्षणो वित्क्षण** इत्यादि दोष इति; तेन तत्प्रतीतिपृथुवत्र निहतप्रज्ञामूर्त्तयः किन्नाम इदंतया नेदंतया व्यवस्थापयन्तीति यत्किञ्चिदेतत् । सकृद्

३ स्य] चितः प्रति कारणकार्यभावाभावात् ।
१० ण] चित्क्षण
११ *] प्राचीनबौद्धानाम् ।
१२ मात्] अर्थान्तराभिसम्बन्धाज्जायन्ते येऽणवोऽपरे । उक्तास्ते सञ्चितास्ते हि निमित्तं ज्ञानजन्मनः ॥ अणूनां स विशेषश्च नान्तरेणापरानणून् ।...--प्र० वा० २ । १९५-९६ ।
१४ न] असंसृष्टाः परमाणवः ।
१५ *] सर्वात्मना एकदेशेन वा संयोगः इति संयोगनिबन्धनम् ।
१६ *] स्वापात् प्राग्वर्ति जाग्रच्चेतः स्वापानन्तरमुत्थितस्य प्रबोधचेतः, तयोः मिथः कारणकार्यभावः स्वापावस्थायां ज्ञानाभाववादिनः प्रज्ञाकरमतेऽस्ति ।
१७ धाने] यथा न नित्ये कारणकार्यभावः तथात्रापि ।
१८ योः] जाग्रत्प्रबोधचेतसोः ।
१९ विजातीयैः] विज्ञानाद् व्यतिरिक्तैः अर्थैः ।
२५ यः] निरन्तरत्वं वा ।
२६ तेन] ते

विज्ञानस्यैकस्य चित्रताप्रतीतिर्न नैरन्तर्यादिप्रतीतिः इति पर[म]गहनमेतत् । § 1039

अपरस्तु आह--प्रतीयमानमेव ज्ञानं [न] पूर्वं नापि परमिति कथमुच्यते **क्षणो वित्क्षणमध्यस्थः** इति; सोऽपि न युक्तकारी, विचारायोगात् । तथाहि--नीलादिव्यतिरेकेण ब्रह्मवत्तदभावात् । नीलादयश्च चित्रत्वात् नैकं युगपत् नीलादिचित्रत्वं प्रत्येति । न क्रमेण सुखादिचित्रत्वमिति प्राकृतबुद्धिः /ms । § 1040

**क्षणो वा क्षणमध्यस्थः** इति च पाठोऽस्ति । तत्रायमर्थः--अचेतनो नीलादिरूपः चेतनश्च तद्बुद्धिस्वभावः चेतन एव इति **क्षणो वा** क्षण इव **क्षणयोः** अचेतनयोः चेतनयोः तयोरेव वा कारणाकार्यभूतयोः **मध्यस्थो न जहाति निरंशताम् अणुरपि** इति । शेषं पूर्ववत् । § 1041

कारिकां स्पष्टयन्नाह--**विज्ञप्ति** इत्यादि । **विज्ञप्तिमात्रेऽपि** अन्तर्ज्ञेयवादिमतेऽपि न केवलं सौत्रान्तिकमत इति **अपिशब्दार्थः** । **ज्ञानस्य** अत्रापि अपिशब्दो लुप्तो द्रष्टव्यः, तेन अज्ञानस्यापि । कथंभूतस्य ? **स्वहेतुफलमध्यवर्त्तिनः** स्वस्य स्वो वा यो हेतुः यच्च फलम् तयोर्मध्ये वर्तितुं शीलमस्येति तद्वर्त्तिनः, षट्परमाणुमध्यवर्त्तिनः । परमाणोरपि च **सांशत्वे** अङ्गीक्रियमाणे **नतत्क्षण प्रसङ्गात्** कारणात् **तावतैव** तस्यानन्तक्षणप्रसङ्गमात्रेणैव **परिसमाप्तत्वाद्** अनाद्यनन्तसन्तानप्रयोजनस्य इति मन्यते । **तदन्यकल्पनानर्थक्यम्** तेभ्यः अनन्तक्षणेभ्यः ये अन्ये क्षणाः तेषां कल्पनानर्थक्यम् । तथाहि--तन्मध्यवर्तिनः क्षणस्य स्वांशमध्यवर्तित्वेऽपि तदपरांशकल्पना, पुनरपि तस्मिन् सति तदन्यकल्पनेति परं सान्तरत्वेचिन्तने स एव प्रसङ्गश्चिन्त्यः । सहभाविनां स्वसन्तानान्तरक्षणानाम् एतत् संभवति न वेति विचारचतुरस्रधियो विचारयन्तु । यदि संभवति; किमर्थं परमाणव एव उपद्रूयन्ते ? निरंशत्वे दूषणं दर्शयन्नाह--**अनुप्रवेश** इत्यादि । **ज्ञानस्य** इत्यनुवर्तते । तस्य तद्वर्तिनः पूर्वत्र उत्तरत्र वा तयोर्वा तत्रानुप्रवेशे अङ्गीक्रियमाणे **पुनः** इति पक्षान्तरसूचने । /ms **एकक्षणवर्ति** एकक्षणमात्रं **जगत् स्यात्** । किंभूतम् ? **निष्पर्यायम्** पर्यायरहितमिति । अनेन सौत्रान्तिकयोगाचारयोः सकलमतनिषेधं दर्शयति । प्र ज्ञा क र स्य तथाभ्युपगमं कुर्वतोऽपि उक्तम्--**युगपच्चित्रप्रतिपत्तिवत् क्रमेणापि तत्प्रतिपत्तेरनिषेधात् प्रत्यक्षविरोधः** इति । § 1042

**यदि पुनः** इत्यादिना परमतमाशङ्कते--**यदि पुनः कथञ्चित्** केनापि प्रकारेण **निरंशत्वेऽपि** [इ]ष्यते इत्यध्याहारः । कुतः ? इत्याह--**अनुप्र-**

१ त्] उपहासपदमेतत् ।
३ अ] ब्रह्मवादी ।
३ पूर्वं] न पूर्वं कारणम्, नापि परम् कार्यम् ।
५ भावात्] क्षणानामभावात् ।
१७ ण] अनन्तक्षण
१७ त] परमाणोः ।
२१ त्वे] त्व
२४ त] ज्ञानस्य ।
२४ त] क्षणमध्यवर्तिनः ।
२५ त] पूर्वोत्तरयोर्वामध्ये ।
२९ मेणापि] चित्रप्रतिपत्तेः ।

**वेशाभावात्** इति । तत्रोत्तरमाह— **तथा परमाणूनाम्** इत्यादि । **तथा** तेन प्रकारेण **परमाणूनां** घटारम्भकाचेतनसूक्ष्मभागानां **प्रचयभेदो** रचनाविशेषः **स्यात्** इति गतेन सम्बन्धः । अत्र निदर्शनम् **क्रम** इत्यादि । § 1043

एवं सति यत् सिद्धं तद्दर्शयन्नाह--**तथा सति** इत्यादि । § 1044

**तथा सति--** § 1045

...22 अत्यक्तपारिमण्डल्यनानात्वादृश्यताणवः ।
तत्प्रत्यनीकमात्मानं संयोगैः विभ्रतेऽञ्जसा ॥ २२ ॥ § 1047

216/mkj

परमाणवः पारिमण्डल्यं [भित्वा] स्थूलमेकं स्वभावं स्वयमुपगताः समुपलक्ष्यन्ते तथापरिणामात् । न हि तथाऽपरिणतं तत् विप्रतिषेधात् । § 1048

एवं सति पारिमण्डल्यं च निरंशत्वं [च] नानात्वं च अदृश्यता च **अत्यक्ताः पारिमण्डल्यनानात्वाऽदृश्यता** यैः ते तथोक्ताः, ते च ते **अणवश्च** । ते किं कुर्वन्ति ? इत्याह— **तद्** इत्यादि । **तत्प्रत्यनीकं** पारिमण्डल्यनानात्वादृश्यताप्रत्यनीकं सांशमेकं दृश्यम् इति यावत् । **आत्मानं** स्वभावं **विभ्रते** स्वीकुर्वन्ति । कैः ? इत्याह--**संयोगैः** नैरन्तर्यैः । **अञ्जसा** परमार्थतः । **अत्यक्तपारिमण्डल्य**पदेन घटवत् तत्परावयवानामपि सांशत्वे अनवस्था स्यादिति कल्पनं निरस्यति, **अत्यक्तनानात्व**ध्वनिना अवयविनो /ms निरंशत्वम्, **अत्यक्तादृश्यता**वचनेन दृष्टे प्रमाणान्तरावृत्तिम्, **अणवः** इत्यनेन प्रकृतिः कारणम्, पुरुषः कारणम् इत्येतत्, **तत्प्रत्यनीकमि**त्यतः परमाणुभ्यः परमाणव एव निरन्तरा दृश्या जायन्ते इति, **आत्मानम्** इत्यनेन वैशेषिकादिमतम् **अञ्जसा** इत्यनेन कल्पितत्वम् इति । § 1049

ननु कुतः परमाणवः सिद्धा येनैवं स्यात् ? नतावत् प्रत्यक्षतः; तत्र तत्प्रतिभासविरहात् स्वयमनभ्युपगमात् । तन्न युक्तम्--**अत्र प्रत्यक्षानुपलम्भसाधनः कार्यकारणभावः** हेतुबि॰ पृ॰ ५४ इति । तत एव नानुमानतोऽपि;

११ पा] अणुपरिमाणम् । नित्यं परमाणुमनःसु, तत्तु पारिमण्डल्यम् । पारिमण्डल्यमिति तस्य नाम । तथाहि--परिमण्डलानि परमाणुमनांसि, तेषां भावः पारिमण्डल्यं तत्परिमाणमेव ।--प्रश॰ व्यो॰ पृ॰ ४७३ । पारिमण्डल्यमिति सर्वापकृष्टं परिमाणम् ।--प्रश॰ कन्द॰--पृ॰ १३३ । पारिमण्डल्यं परमाणुपरिमाणम् ।— सप्तप॰ टी॰ पृ॰ ४९ । मुक्ता॰ श्लो॰ १५ ।

१६ त] कपालकपालिकादीनामपि ।

१९ म] सांख्यस्य ।

१९ म] ब्रह्मवादिनः ।

२१ इति] निरस्यति इति गतेन सम्बन्धः ।

२४ इति] प्रत्यक्षानुपलम्भाभ्यामन्वयव्यतिरेकयोः गतिः...--प्र॰ वार्तिकाल॰ पृ॰ १८३ ।

प्रत्यक्षाभावे तन्मूलस्य तस्य अनवतारात् । नापि इन्द्रियवत् कार्यव्यतिरेकतः तत्सिद्धिः; सत्सु अन्येषु कारणेषु तदभावे नियतेन अनुपजायमानस्य कस्यचित् कार्यस्याऽभावात्, स्थूलादेव मृत्पिण्डात् तथाविधघटोत्पत्तिदर्शनात् । § 1050

यत्पुनरेतत्--यत्स्थूलं तद् अल्पपरिमाणकारणारब्धं यथा पटः, स्थूलं च अष्टाणुकादि कार्यम्, तत् स्व[ल्प]परिमाणकारणमिति परमाणुसिद्धिः इति; तदसारम्; यतः सूक्ष्ममपेक्ष्य स्थूलमिति भवति । न च अष्टाणुकात् परं रूपं सिद्धमस्ति यदपेक्ष्य अष्टाणुकं स्थूलं स्यात् । *अत एव तत्सिद्धिरिति चेत्; अस्यापि कुतः ? तत इति चेत्; अन्योन्यसंश्रयः--सिद्धे हि ततः परस्मिन् तद्रूपे ततः तत्स्थूलतासिद्धिः, अस्याश्च तत्सिद्धिरिति । § 1051

यच्चान्यत्--यत् स्थूलं तद्भिद्यमानं घादि दृष्टम्, स्थूलं च अष्टाणुकम्, ततः तदपि भिद्यते तावद् अभिद्यमानभेदपर्यन्तमिति तत्सिद्धिः इति; तदपि विलक्षाभिधानम्; यतः अष्टा णुकस्य भेदनतः परं न किञ्चिद् भवत्येव 217/mkj /ms
प्रमाणाभावात् । तन्न अणुसिद्धिः इति चेत्; अत्रप्रतिविधीयते-- § 1052

परिमाणस्य उत्कर्षातिशयात् विज्ञानमहत्त्वपरिमाणकाष्ठासिद्धिवद् अपकर्षाविषयात् पुद्गलाल्पपरिमाणकाष्ठासिद्धिः । प्रयोगः--परिमाणस्य अपकर्षः क्वचित् परमकाष्ठावान् अतिशयवत्त्वात् तत्प्रकर्षवत् । न च साध्यशून्यो दृष्टान्तः, इतरथा सर्वज्ञाद्यभावः प्रमाणबाधितो भवेत् । § 1053

यत्पुनरुक्तं परेण--तदपकर्षकाष्ठायां भावः किमास्ते, आहोस्वित् सर्वथा नश्यति इति न निश्चयोऽस्ति इति; तदसारम्; सर्वथा तद्विनाशाभावात् युक्तिबाधनात् । *तत्प्रकर्षेऽपि दोषाच्च । § 1054

कारिकां व्याचष्टे--**परमाणव** इत्यादिना । **परमाणवः समुपलक्ष्यन्ते** इति सम्बन्धः, विशदाबाधितरूपेण समीचीनेन **लक्ष्यन्ते** इत्यस्य प्रदर्शनार्थम्--**स-**

---

१ त] प्रत्यक्षपूर्वकस्य ।
१ स्य] अनुमानस्य ।
१ त्] यदीन्द्रियं न स्यात् तर्हि रूपादिज्ञानं न स्यादितिवत् यदि परमाणवो न स्युः तर्हि घटादिकार्यं कुतः स्यादिति ।
२ णेषु] परमाण्वभावे ।
२ तेन] नियमेन
३ मृत्पिण्डात्] स्थूल ।
५ त्] तथा कार्यादल्पपरिमाणं समवायिकारणं तस्याप्यन्यदल्पपरिमाणमित्याद्यं कार्यं निरतिशयपरमाणुपरिमाणैरारब्धमिति ज्ञायते ।--प्रश॰ व्यो॰ पृ॰ २२४ ।
७ रं] सूक्ष्मं वस्तु ।
८ *] अष्टाणुकात् स्थूलात् ।
९ त] परस्मात् सूक्ष्मात् ।
११ घादि] घटादि
१२ प] परमाणु ।
१५ विज्ञान] यथा विज्ञानस्य उत्कर्षातिशयदर्शनात् पराकाष्ठासिद्धिर्भवति यथा वा परिमाणस्य अतिमहापरिमाणरूपता च प्रसाध्यते तथैव ।
१६ यात्] र्षातिशयात्
१६ योगः] तथा घटादिकारणकारणेषु अल्पतरादिभावः क्वचिद्विश्रान्तः तरतमशब्दवाच्यत्वात् महापरिमाणवत् । यत्र विश्रान्तस्ते परमाणव इति ।--प्रश॰ व्यो॰ पृ॰ २२४ । प्रश॰ कन्द॰ पृ॰ ३१ । न्यायकुमु॰ पृ॰ २१७ । स्या॰ रत्ना॰ पृ॰ ८७० ।
१८ भावः] सर्वज्ञ-महत्त्वपरिमाणयोरभावो भवेत्, यश्च प्रमाणबाधितः ।
२० त] पदार्थस्य नाशाभावात् ।
२१ *] परिमाणप्रकर्षेऽपि इयं दुष्कल्पना भवेत् ।

मः अभिधानम् । स्वयं स्वग्राहकज्ञानसामीप्यम् उपगता न आकारसमर्पणेन इत्यस्य कथनार्थम् **उपस्य**, निश्चीयन्ते न अविकल्पदर्शनेन दृश्यन्ते इत्यस्य च **लक्ष्यन्ते** इत्यस्य । किं कुर्वाणाः किम् ? इत्याह— **स्थूलमेकं प्रत्यक्षमात्मानम्** इत्यनुवर्त्तते । क्वचित् **स्वभावम्** इति श्रूयते । पुनरपि किं कुर्वन् ? इत्याह--**पारिमण्डल्य** इत्यादि । सुगमम् । कुत एतत् ? इत्यत्राह--**तथा** इत्यादि । **तथा** तेन अनन्तरप्रकारेण **परिणामात्** । एतदपि कुतः ? इत्यत्राह--**नहि** इत्यादि । **हिः** यस्मात् **न तथा** तेन अनन्तरप्रकारेण **अपरिणतं तत्** तदनन्तरं वस्तु **भवति** । कुतः ? **विप्रतिषेधात्** इति । § 1055

प्रकृतनिगमनव्याजेन उपमानादीनां स्वाभ्युपगतज्ञाने अन्तर्भावं कुर्वन्नाह--**तदेतद्** इत्यादि । § 1056

[चूर्णिप्रकरणमेतत् ।तदेतत् उपमानादि मतिज्ञानप्रभेदलक्षणम् अवग्रहादिमतिस्मृतिसंज्ञाचिन्ताभिनिबोधात्मकं द्रव्यपर्यायविषयं सामान्यविशेषविषयं च प्रागभिलापसंसर्गात् प्रमाणमविसंवादात् तद्विपरीतमपि तत्प्रभेदलक्षणम् । मिथ्याऽज्ञानम् अप्रमाणम्, यथा एकान्तविषयदर्शनानुमानादिकमन्यद्वा ।] § 1057

/ms यत एवं **तत्** तस्मात् **एतद्** अनन्तरं निरूप्यमाणं **उपमानादि** ज्ञानम् इति सम्बन्धः । तत् किम् ? इत्याह--**मतिज्ञान** इत्यादि । **मतिज्ञानस्य प्रभेदः** प्रपञ्चः स एव **लक्षणं** स्वरूपं यस्य तत्तथोक्तं मतिज्ञानविशेष इति यावत् । कुत एतत् ? इत्यत्राह--[अवग्रह इत्यादि] **अवग्रह आदिर्यस्याः**
218/mkj सा चासौ **मतिः** समासः, सा च **स्मृतिश्च संज्ञा** च **चिन्ता** च **अभिनिबोधश्च** ते **आत्मानो** यस्य तत्तथोक्तम् । एतच्च तत्प्रभेदविशेषणमपि साधनं द्रष्टव्यम्, ततः तज्ज्ञानं तदात्मकत्वात् मतिप्रभेदलक्षणम् इति । § 1058

ननु उपमादीनादीनां तत्रान्तर्भावो निरूपयितुमारब्धः तत्किमर्थम् **अवग्रहादिमतिस्मृति**ग्रहणमिति चेत् ? सत्यम्; तथापि प्रसिद्धसंज्ञादिज्ञानोत्पत्तिक्रमस्य उपमानादौ प्रदर्शनार्थं तद्ग्रहणमित्यदोषः । तथाहि--यथैव पूर्वपर्यायाऽवग्रहाद्याहितसंस्कारस्य परपर्यायावग्रहात् पूर्वपर्यायस्मृतौ प्रसिद्धसंज्ञाचिन्ताऽभिनिबोधाः तथैव गवयसदृशगवाद्यवग्रहाद्याहितसंस्कारस्य पुनर्गवयाद्यवग्रहाद् गोस्मरणे सति तेन सदृशोऽयम् इति ज्ञानं जायते इति संज्ञातो न भिद्यते । एतेन वैलक्षण्यसंख्यादिज्ञानं चर्चितम् । § 1059

ननु च अवग्रहादिमतिस्मृतिप्रभवस्य ज्ञानस्य संज्ञात्मकत्वे सर्वतो व्यावृत्तस्य घटस्य अवग्रहात् संस्कारे पुनः तथाविधस्य भूतलादेरवग्रहाद्

---

१ मः] उपसर्गस्य ।
२ स्य] कथनम् ।
३ च] प्रदर्शनार्थम् ।
३ स्य] कथनम् ।
२३ त] उपमानादिज्ञानम् ।
२३ दा] अवग्रहाद्यात्मकत्वात् ।
२४ त] मतिज्ञाने ।
२७ स्य] पुरुषस्य ।
२८ संज्ञाचिन्ताऽभिनिबोधाः] उत्पद्यन्ते ।
२९ इति] उपमानम् ।
३२ त] सर्वतो व्यावृत्तस्य ।

अवगृहीतघटस्मरणाद् इह स घटो नास्ति इति ज्ञानं संज्ञा भवेत्, न चैवम्, सादृश्यैकत्वप्रत्यवमर्शस्यैव तत्त्वोपगमात् **प्रत्यभिज्ञा द्विधा** न्यायवि० २ । ५० इत्यादि वचनात् । तस्माद् अभावाख्यं तत् प्रमाणान्तरमिति मीमांसकः । तदुक्तम्-- § 1060

*गृहीत्वा वस्तुसद्भावं  स्मृत्वा च प्रतियोगिनम् । /ms
मानसं नास्तिताज्ञानं जायते अक्षानपेक्षया ॥§ 1062

मी० श्लो० अभावप० श्लो० २७ इति चेत्; § 1063

तन्न सारम्; तस्यापि तत्त्वोपगमात्, दृष्टप्रत्यवमर्शात्मकत्वात् । **प्रत्यभिज्ञा द्विधा** न्यायवि० २ । ५० इत्यादि तु वचनम् एकत्ववत् सादृश्ये प्रत्यभिज्ञात्वप्रतिपादनार्थं न परिगणनार्थम्, इतरथा **मतिस्मृति**-- त० सू० १ । १३ इत्यादि सूत्रम् अध्यापम् * भवेत् । § 1064

स्यान्मतम्, घटभूतलयोः अन्योन्यविवेकस्य तत्प्रत्यक्षाभ्यां गोगवययोः सादृश्यवत् प्रतीतौ पुनः तत्प्रत्यवमर्शः प्रत्यभिज्ञानं भवेत्, न चैवं मानसनास्तिताज्ञानादेव तत्प्रतीतेः । तथा चोक्तम्-- § 1065

*न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः ।
भावांशेनैव सम्बन्धो योग्यत्वादिन्द्रियस्य हि ॥§ 1067

मी० श्लो० अभावप० श्लो० १८ इति चेत्; § 1068

तन्न युक्तम्; भावांशवद् इतरस्यापि प्रत्यक्ष एव । प्रतियोगिनः सर्वान्यसंसृष्टस्य स्मरणे न क्वचित् प्रतिषेधः, अभ्युपगमबाधनात् । तदसंसृष्टस्य स्मरणं तथा पूर्वमनुभवे, अन्यथा अति  प्रसङ्गः । तत्रापि 219/mkj
तदन्यप्रतियोगिस्मरणात् तथाप्रतिपत्तौ अनवस्था । घटविविक्तभूतलस्मरणादिति चेत्; अन्योऽन्यसंश्रयः, ततो यत्किञ्चिदेतत् । तथा अवग्रहादिमतिस्मृतिसंज्ञाभ्यो जायमानं ज्ञानं चिन्तात्मकत्वात् तत्प्रभेदलक्षणं न योगिप्रत्यक्षम्, तस्य तद्विरोधात् । § 1069

एतेन मानसं प्रत्यक्षं तत् इति निरस्तम् । चक्षुरादिप्रत्यक्षसामग्रीतो भिन्नसामग्रीप्रभवत्वाच्च । तथापि तत्त्वे अतिप्रसङ्गः । § 1070

---

२ त] प्रत्यभिज्ञानत्वोपगमात् ।
३ इत्या] सादृश्यविनिबन्धना, एकत्वविषया च ।
५ गृहीत्वा] शुद्धभूतलं वस्तु ।
५ च] यस्य अभावः क्रियते सः प्रतियोगी तम् ।
८ स्यापि] प्रत्यभिज्ञानत्वस्वीकारात् ।
११ *] अन्याय्यं
१२ स्य] घट-भूतलग्राहिप्रत्यक्षाभ्याम् ।
१४ नास्तिताज्ञानादेव] अभावप्रतीतेः ।
१८ इ] अभावस्यापि ।
१८ एव] प्रतीतेः ।
२१ त] असंसृष्टत्वप्रतिपत्तौ ।
२२ यः] घटविविक्तभूतलस्मरणाद् घटस्य भूतलासंसृष्टताप्रतिपत्तिः, घटस्य भूतलासंसृष्टताप्रतिपत्तौ च घटविविक्तभूतलस्मरणमिति ।
२३ त] मतिप्र भेदात्मकम् ।
२५ त्] अभावज्ञानम् ।
२६ त्वाच्च] न तत् प्रत्यक्षात्मकम् ।

/ms तद्वत् चिन्ताप्रभवत्वाद् अर्थापत्तिरपि प्रसिद्धा अनुमानवत् तत्प्रभेदलक्षणम् अभिनिबोधात्मकत्वात् । § 1071

स्यान्मतम्--एकत्वप्रत्यवमर्शः प्रत्यभिज्ञानम्, न सादृश्यादिप्रत्यवमर्शस्य तत्प्रभेदलक्षणे अन्तर्भाव इति चेत्; अत्राह--**द्रव्य** इत्यादि । अस्यायमर्थः--यस्मात् तदेतद् विज्ञानं परेण उच्यमानं **द्रव्यपर्यायविषयं सामान्यविशेषविषयं च** तस्मात् यथोक्तं । सामान्यं हि सादृश्यमेव तद्विषयं च ज्ञानं परेणापि प्रत्यभिज्ञानमिष्यते इति मन्यते । किं सर्वं तन्न लक्षणं * न इत्याह--**प्राग् अभिलापसंसर्गात्** इति । गवयादिशब्दयोजनात् [प्राक्] यज्ञायते उपमाणादिज्ञानं तत् न पुनः सोऽयं गवयशब्दवाच्यः इत्यादि ज्ञानम् इति भावः । न केवलं तत् तल्लक्षणमेव किन्तुप्रमाणमपि इति दर्शयन्नाह--**प्रमाणम्** । **च** शब्दोऽत्र द्रष्टव्यः । कुतः ? **अविसंवादात्** । अन्यदपि ज्ञानं तत्प्रभेदलक्षणं दर्शयन्नाह--**तद्** इत्यादि । तस्माद् उक्ताद् उपमानादेः **विपरीतं** गोरिव गवयः इत्याद्यागमाहितसंस्कारस्य शाखादिमान् वृक्षः क्षीराम्भःप्रविवेचनतुण्डो हंसः इत्याद्यागमाहितसंस्कारस्य च नैयायिकाद्युपमानादिज्ञानं तदपि द्रव्यादिविषयं सत् ***तत्प्रभेदलक्षणं प्रमाणं वादादिति** सम्बन्धः । § 1072

साम्प्रतमप्रमाणं दर्शयन्नाह--**मिथ्याऽज्ञानम्** इति । **मिथ्या** अग्रहादिमतिस्मृतिसंज्ञाचिन्ताभिनिबोधात्मकं ज्ञानम् इति **अज्ञानम् अप्रमाणम्** प्रमाणं न भवति मत्यज्ञानत्वात् इति द्रष्टव्यम् । अत्र निदर्शनमाह--**यथा** इत्यादि /ms । **एकान्तस्य विषयस्य** सम्बन्धि **दर्शनाऽनु मानादिकम्** आदि शब्देन आगमपरिग्रहं तद्यवेति । **अन्यद्वा** स्वप्नादिज्ञानं वा । अनेन लौकिकशास्त्रीयदृष्टान्तद्वयं दर्शयति । § 1073

यदि वा, अन्यथा पूर्वपक्षयित्वा एतद् ज्ञातव्यम्, तद्यथा पूर्वप्रस्तावद्वये यदवग्रहादिधारणापर्यन्तं ज्ञानं चिन्तितम्, यच्च **प्रमाणम् अविसंवादिस्मृतिः** इत्यादिना स्मरणम् अस्मिन्, चतुर्थप्रस्तावे प्रत्यभिज्ञानं निरूपयिष्यमाणम्, तत्रैव लेशतः क्रमप्राप्तप्रस्तावशेन **भूताभव्याः** *इत्यादिना पूर्वं चिन्तितं [तर्क] ज्ञानम्, षष्ठे चिन्तयिष्यमाणम् अनुमानं च, पञ्चसु ज्ञानेषु क्व अन्तर्भाव्यतामिति ? तत्राह--**तदेतद्** इत्यादि । **तदेतत्** निरूपितं निरूपयिष्यमाणं 220/mkj च । किम् ? **ज्ञानम्** । तत् किम् ? इत्याह--**[मति]ज्ञानप्रभेदलक्षणं** मतिज्ञानाऽन्तर्भूतमित्यर्थः । किम्भूतम् ? इत्याह--**अवग्रहादि** इत्यादि । पुनरपि कथंभूतम् ? इत्याह--**द्रव्य** इत्यादि । किं सर्वम् ? न, इत्याह--**प्राग्** इत्यादि । तत्संसर्गाद् ऊर्ध्वं श्रुतम् इति मन्यते । § 1074

---

२ म्] मतिज्ञानप्रभेदलक्षणम् ।
६ थोक्तं] तथोक्तम्
६ ज्ञानं] मीमांसकादिनापि ।
७ *] तत्तल्लणम् ?
९ त्] मतिज्ञानम् ।
९ म्] एतत्तु श्रुतमेव ।
१३ स्य] पुंसः ।
१५ *] मतिज्ञानप्रभेदलक्षणम् ।
१५ वादादिति] णमविसंवादादिति
२० वेति] हः तदिवेति
२४ अस्मिन्] तृतीयप्रस्तावे ।
२५ त्रैव] तृतीयप्रस्तावे ।
२५ *] पृ० १८७ ।
२६ प] मतिश्रुतावधिमनःपर्ययकेवलज्ञानेषु ।
३१ त] शब्दसंसर्गात् ।

ननु च पूर्वम् अत्र अन्यत्र च स्मरणादि सर्वं श्रुतम् इत्युक्तम्, तत्कथन्न विरोध इति चेत् ? न विरोधः, मुख्यश्रुतसाधर्म्याद् उपचारेण तथाभिधानात् । तच्च प्रमाणम् । कुतः ? **अविसंवादात्** । सर्वं तर्हि तदात्मकं ज्ञानं तल्लक्षणं प्रसक्तम्; इत्याह--**तद्विपरीतम्** इत्यादि । **तत्** तस्मात् द्रव्यादिविषयात् तदात्मकाज्ज्ञानाद् **विपरीतं** विलक्षणं ज्ञानम् इत्यनुवर्तते **मत्यज्ञानं** मतिज्ञानं नंभवति । कुतः ? **अप्रमाणं** यतः द्रव्यादिविषयं न भवति इत्यभिप्रायः । शेषं पूर्ववत् । § 1075

क्वचित्पुस्तके--***प्रमाणमेकमध्यक्षमगौणमपरे विदुः** इत्यादि सकलं चूर्णि प्र क र ण मस्ति, तत् कैश्चिन्न व्याख्यातं, वद्गलं पौनरुक्त्यस्य अप्रस्तुताभिधानस्य च तत्र भावात् । § 1076 /ms

ननु यदुक्तम्--**मतिज्ञानप्रभेदलक्षणं ज्ञानं प्रमाणम् अविसंवादकत्वात्** इति; तदयुक्तम्; क्वचिद् अ[वि]संवादाभावात् । तथाहि--[न] दृष्टस्य पुनः प्राप्तिः अस्ति, भवतु वा सा स्वप्नेऽप्यस्ति । यदि पुनरसौ न तत्प्राप्तिः, कथम् अन्या ? विशेषाऽभावात् । अथ अर्थदर्शनम् अविसंवादो न तत्प्राप्तिः; इदमपि तादृगेव, विप्लवेऽपि अस्य भावात् । अथ अर्थतद्व्यवस्था विपक्षवत्; तत्प्रतीतिश्च प्रत्यक्षतः अनुमानतो वा गत्यन्तराभावात् ? परपर्यनुयोगोऽपि नातो युक्तः असम्बद्धप्रलापित्वप्रसङ्गात् । भवतु तत एव सा इति चेत्; द्रव्यते -- § 1077

...24 ज्ञानी येनातिशेते भवभृतमितरं तत्प्रमाणं समन्तात्,
हेयोपादेयसिद्धौ न पुनरनुभवोऽभूतकल्पोऽविकल्पः ।
स्यात्प्रत्यक्षस्मृत्यभिज्ञा स्वपरविषयतर्कानुमात्मा मतिः,
चिन्ताऽचिन्त्यात्मिकेयं कलयति विषयादन्यमन्यत्र सिद्धौ ॥ २४ ॥§ 1081

**ज्ञानी** प्रत्यक्षादिज्ञानवान्, **येन** प्रत्यक्षादिज्ञानेन **अतिशेते** विजयते, अन्येन तदतिशायनाऽयोगात् ज्ञानेन इति लभ्यते । कमतिशेते ? इत्याह--**भवभृतम्** अविद्याविलासिनीदर्शिताऽनेकजन्मादिविभ्रमप्रपञ्चम् । कथंभूतम् ? इत्याह--**इतरम्** अज्ञानिनं विभ्रमान्ये कान्ततत्त्वे विपर्यासान[ध्य]व-

---

२ त] श्रुतत्वाभिधानात् ।
९ कैश्चिन्न] व्याख्यातृभिः ।
९ लं] ?
१४ त्प्राप्तिः] अर्थप्राप्तिः ।
१५ वेऽपि] मिथ्याज्ञानेऽपि ।
१८ ते] उच्यते
२६ मान्ये] मात्तम् ए

सायोपपन्नं नैयायिकादिकम् । तत् किम् ? इत्याह--**तद्** इत्यादि । स येन तम् अति [श्येते] तत् तत् इत्यनेन परामृश्यते, **तत्प्रमाणम्,** अन्यथा कुतस्ततः स्वेष्टसिद्धिः बहिरर्थवदिति मन्यते । किमर्थम् ? इत्यत्राह--**समन्तात्** इत्यादि । **समन्तात्** सर्वतो **हेयं** यत्तत्त्वं सत्येतरप्रविभागलक्षणं यच्च **उपादेयं** विभ्रमाद्यकान्तरूपं तयोः **सिद्धौ** तत्सिद्धिनिमित्तम् । एतदुक्तं /ms भवति--यदि न किञ्चित् प्रमाणम् कुतः अभिमत सिद्धिः ? तदस्ति चेत्; साकल्येन प्रमाभङ्गविधानविरोधः इति । § 1082

221/mkj

अपरस्तु आह--न किञ्चिद् विज्ञानं प्रमाणम् नाप्यप्रमाणं सकलविकल्पातीतत्वात् तत्त्वस्य, तस्य च स्वसंवेदनाध्यक्षप्रमाणतः सिद्धेः, नापि प्रमाभङ्गविधानविरोधः बहिः तद्विधानात् इति । तत्राह--**न पुनः** इत्यादि । **न पुनः** नैव **अनुभवः** प्रमाणम् इति सम्बन्धः । क्व ? इत्याह— **हेयोपादेयसिद्धौ** हेयं सकलविकल्पतत्त्वं उपादेयं तद्रहितं संवेदनमात्रम्, तत्सिद्धौ इति । किंभूतोऽ**नुभवः** ? इत्याह--**अविकल्प** इति । न विद्यते सत्येतरादिविकल्पो भेदो यस्य स तथोक्तः । कुतः ? इत्यत्राह--**अभूतकल्प** इति । अभूतम् अजातं कुतश्चित् कारणात् ब्रह्मादि तत्त्वं नित्यं तत्समानः । एतच्च विशेषणमपि हेतुत्वेन द्रष्टव्यम्--अभूतकल्पत्वाद् इति । कथमभूतकल्प इति चेत् ? उच्यते--यथैकस्य अनेकात्मताभयात् नीलादिसुखादिभ्यो व्यतिरिच्यमानशरीरं सर्वविकल्पातीतं केनचिद् व्रह्यतत्त्वमिष्यते तथा तत एव संवेदनतत्त्वं तथाविधं निरंशं क्षणिकं सौगतेन अभ्युपगन्तव्यम्, तद्वदेव । तच्च न स्वपरव्यवस्थाहेतुः इति न प्रमाणमिति । § 1083

ननु न मया परेण वाऽदृष्टमेव तदभ्युपगम्यते येनायं दोषः स्यात्, अपि तु यथाप्रतिभासमिति चेत्; अत्राह--**प्रत्यक्ष** इत्यादि । **प्रत्यक्षं** अवग्रहादिधारणापर्यन्तम्, अस्यैव प्रकृतत्वात् **स्मृतिश्च अभिज्ञा** च, **स्वं** च **परश्च** स्वपरौ तौ **विषयौ** यस्य स तथोक्तः, स चासौ **तर्कश्च** स च **अनुमा** च ता /ms **आत्मानो** यस्याः सा तथोक्ता **मतिः स्याद्** भवेत् **प्रमाणम्** इति सम्बन्धः । अनेन एतत् कथयति--यदि यथाप्रतिभासं संवेदनं प्रमाणमिष्यते; तर्हि यथोक्ता मतिः प्रमाणयितव्या तस्या एकत्र दर्शनादिप्राप्तिपर्यन्तव्यवहारोपयोगित्वेन प्रतिभासनात् । अथ अतिसूक्ष्मपरीक्षया व्यवतिष्ठमानं तद् ब्रह्म न किञ्चिद् व्यस्यात् * परस्य गत्यन्तराभावात् इति । § 1084

---

५ माद्य] द्ये

६ त] प्रमाणमस्ति ।

८ आह] तस्मान्न परमार्थतः किञ्चिदस्तीत्यस्तु यथा तथा संवृत्या एतावतापि प्रमाणाप्रमाणव्यवस्थितिर्न काचित् क्षतिः । अभिप्रेत एव भवत्पक्षोऽस्माकमिति न वस्तुतत्त्वमतिक्रम्य वर्तितुं शक्यम् ।--प्र° वार्तिकाल° पृ° १८६ ।

९ स्य] संवेदनाद्वैतस्य ।

१० द्विधानात्] प्रमाणादिनिषेधकरणात् ।

१२ हितं] सकलविकल्पातीतम् ।

१८ ते] अद्वैतवादिना ।

१८ त] एकस्य अनेकात्मकताभयात् ।

२१ म] अद्वैतवादिना ।

२१ रेण] सौगतेन ।

२१ मेव] अदृष्टम्— अप्रामाणिकम् ।

२७ स्या] मतेः ।

२९ *] व्यवस्येत्

ननु स्वपरशब्देन किमर्थं **तर्क** एव विशेष्यते नान्यत् प्रत्यक्षादिकम्, तदपि तथाविधमेव जैनस्येति चेत्; सत्यम्; यस्तथा नेच्छति तं प्रति तस्य तथाविधप्रसाधनाय तर्को दृष्टान्तीकर्तुं तथा विशेष्यते । यथा तर्कः स्वपरविषयः ततः साकल्यव्याप्तिं साध्यसाधनयोः परेण इच्छता अभ्युपगम्यते तथा प्रत्यक्षादिकमभ्युपगन्तव्यमिति निराकृतमेतत्--**नान्योऽनुभाव्यो बुद्ध्याऽस्ति** प्र० वा० ३ । ३२७ इत्यादि । कथं तर्कस्तद्विषयः ? इत्यत्राह--**चिन्ता** इत्यादि । **चिन्ता** इति तर्कस्य संज्ञा पूर्वाचार्यप्रसिद्धा । **चिन्ता** तर्कोऽ**चिन्त्यात्मिका** अचिन्त्यः कथमेवं विवेयम् इत्यविचार्यः आत्मा स्वभावो यस्याः सा तथोक्ता **इयं** प्रत्यनुमातृ प्रत्यक्षप्रमाणपरिच्छेद्या । कुतः **अचिन्त्यात्मिका ?** इत्यत्राह--**कलयति** इत्यादि । **कलयति** अध्यवस्यति यतः । किम् ? **अन्यम्** अर्थान्तरम् । कुतोऽन्यम् ? इत्याह--**विषयात्** प्रत्यक्षादि गोचरात् अन्यं परोक्षमित्यर्थः । क्व ? इत्यत्राह--**अन्यत्र** स्व- 222/mkj
देशाद् अन्यदेशे, उपलक्षणमेतत् तेन अन्यदा च इति गृह्यते । किमर्थं कलयति ? इत्याह--**सिद्धौ** निर्णीतौ अन्यस्य अन्यत्र सिद्धिनिमित्तमित्यर्थः । अस्याऽनभ्युपगमे साकल्येन हेतोः साध्येन व्याप्तेरसिद्धेः--**यदवभासते तत् ज्ञानं यथा सुखादि** इत्याद्यनुमानं प्रतिहतप्रसरं भवेत् । न च स्वांश- /ms
मात्रावलम्बिना **जडस्य प्रतिभासायोगात्** इत्यादिना विचारेण तत्सिद्धिः, अन्यथा नीलज्ञानात् पीतादिसिद्धिः स्यादित्यलं प्रसङ्गेन । § 1085

अथवा, सविकल्पकप्रत्यक्षपक्षे स्मृतेर्गृहीतग्राहकत्वेऽपि **न प्रयोजनविशेषात्** इत्यादिना प्रामाण्यं व्यवस्थाप्य संप्रति परपक्षोक्तं तस्य गृहीतग्राहित्वं निराकुर्वन्नाह--**ज्ञानी** इत्यादि । ज्ञानी सचेतनो **येन** स्वभावेन **अतिशेते** । किम् ? इत्याह--**इतरम्** अचेतनं घटादिकम्, येन स्वभावेन ततो भिद्यत इत्यर्थः । ननु स्वग्रहणविमुख्येन अर्थग्रहणात्मना धर्मेण तम् अतिशेते स इति, सोऽपि धर्मः प्रमाणं स्यादिति चेत्; अत्राह--**भवभृतम्** इति । **च** शब्दोऽत्र द्रष्टव्यः, भवभृतं च महेश्वरपोषकं नैयायिकादिकं **तत्** प्रमाणं स्वपरव्यवसायज्ञानं प्रमाणमित्यर्थः । किमर्थम् ? इत्याह--**समन्ताद्** इत्यादि । व्याख्यातमेतत् । अविकल्पानुभवेन मतं विजयते अतः स प्रमाणम्, इत्यत्राह--**न पुनः** इत्यादि । **अभूतकल्पः** अभूतोऽजातः खरविषाणादिः ईषदसिद्धः, अभूतकल्पः **अविकल्पो**ऽनुभवः न प्रमाणम् नार्थपरिच्छेदकः । प्रयोगः— अविकल्पोऽनुभवः न कस्यचिद् ग्राहकः, असत्त्वात्,

२ त] स्वपरविषयकमेव ।
४ त] तर्कात् ।
६ इत्यादि] तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥
इति शेषः ।
६ यः] स्वपरविषयः ।
७ पू] उमास्वाम्यादिना तत्त्वार्थसूत्रादौ निर्दिष्टा ।
८ विवे] विधे
१७ त] संवेदनाद्वैतसिद्धिः ।
२० इ] पृ० १७५ ।
२० स्य] स्मरणस्य ।
२३ म्] अचेतनम् ।
२७ तं] स तम्[[अचेतनम् ।]]

गगनकुसुमवत् इति । अतः कथं तद्गृहीतं किञ्चिद् विज्ञानं गृहीति, * नान्यथा सोऽपि अन्यगृहीतं गृह्णाति इति स्यात् तदन्यवत् । अविकल्पानुभवस्यापि /ms नानुभवः; तदनुभवस्य अप्रमाणत्वे न किञ्चित् प्रमाणं भवेत् । अन्यस्य कस्यचिदनुपलम्भेन असत्त्वाद् इत्यपरः । तं प्रत्याह--**प्रत्यक्ष** इत्यादि । विवृतम्, अस्याः प्रतिभासादिति मन्यते । निर्विकल्पानुभूतविषयत्वात् स्मृतिः अप्रमाणमिति । § 1086

अत्रैव दूषणान्तरं दर्शयन्नाह--**चिन्ता** इत्यादि । **चिन्ता** परकीया **इयं** गृहीतग्राहिज्ञानं सर्वं प्रमाणम् इत्येवं रूपा[ऽ]**चिन्त्यात्मिका**[ऽ]चिन्त्यस्वभावा मानत्राणरहितातायाः भर्तृत्राणहीनायाः कुलयोषित इव तद्रूपत्वात् । कुत एतत् ? इत्यत्राह--**कलयति** इत्यादि । **अन्यत्र** अन्यस्याः **सिद्धौ** गृहीतौ, **अन्यत्र** इति वचनात् सूरेर्मनसि काचिद् विवक्षिता सिद्धिर्वर्त्तते इति गम्यते । **अन्यत्र** इत्यस्य संबन्धिशब्दात् ततो विवक्षितसिद्धिविषयाद् **अन्यं** विषयान्तरम् एकान्तेन **कलयति** अध्यवस्यति यतः, न चैवमस्ति इति मन्यते । देशादिभेदेन एकत्रार्थे अनेकसिद्धिसंभवात्, न च सा प्रमाणं ततोऽप्रवृत्तिप्रसङ्गात् । क्षणिकत्वादर्थस्य नैवं चेत्; न; अत्र प्रमाणाभावात् । पूर्वोत्तरयोः मध्ये तस्य च तत्र अनुपलब्धिः प्रमाणमिति चेत्; न; अस्याः क्षणिकनिरंशपरमाणुतत्त्वैकान्ते सर्वथाऽसिद्धेः युगपत् स्वावयवात्मकघटादितत्त्वसमयेऽपि नितरां तत्र प्रत्यक्षाद्यात्मिकायाः मतेः प्रमाणत्वात् । § 1087

223/mkj

यदि वा, अन्यथा पूर्वपक्षयित्वा इदं वृत्तं व्याख्यातव्यम् । ननु प्रत्यक्षमेव एकं प्रमाणम् तत्किमर्थं तदनन्तरं स्मरणादि प्रमाणत्रयमत्र चिन्त्यते /ms इति चेत्; अत्राह--**ज्ञानी** इत्यादि । **ज्ञानी** परीक्षावान् स्वयं चार्वाको **येन** अनुमानज्ञानेन **अतिशेते** । कम् ? इत्याह— **भवभृतम्** भवः संसारः तं बिभर्त्ति पुष्णाति समर्थयत इति भवभृत् जैनादिः तम्, इतरवत् निषेधकम् स्वशिष्यादिकम् **अतिशेते** ततो विशेषं लभते । तदनुमानज्ञानं प्रमाणं किमर्थम् ? इत्याह--**समन्ताद्** इत्यादि । **समन्तात्** साकल्येन **हेयस्य** परलोकदेवताविशेषधर्माऽधर्मप्रमाणान्तरादेः **उपादेयस्य** भूतचतुष्टयपरचैतन्य-मुख्यप्रत्यक्षप्रमाणादेः **सिद्धौ** निर्णीतिनिमित्तम् । § 1088

ननु प्रत्यक्षानुभवादेव तत्सिद्धिः इति स एव प्रमाणमिति चेत्; अत्राह--**न पुनः** इत्यादि । **न पुनः** नैव **अनुभवः** प्रत्यक्षज्ञानं प्रमाणं **हेयोपादेयसिद्धौ** इत्यनुवर्त्तते । किंभूतः ? **विकल्पः निर्णयात्मा** परापेक्षया इदमुक्तम् । पुन-

१ त] निर्विकल्पकगृहीतम् ।
१ किञ्चिद्] वस्तु ।
१ *] गृह्णाति
११ नात्] अकलङ्कदेवस्य ।
१२ ब्दात्] त्वात्
१६ स्य] मध्यस्य क्षणस्य ।
१६ त्र] पूर्वोत्तरयोः ।
१८ येऽपि] जैनमतेऽपि ।
२० न] चार्वाकः ।
२७ य] भूतचतुष्टयात्मकं यत् परचैतन्यम् ।
२९ स] अनुभव एव ।

रपि किंभूतः ? इत्याह--**भूतकल्प** इति । भूतानि पृथिव्यादीनि तत्कल्पः तत्सदृशः । एतदुक्तं भवति--यथा पृथिव्यादीनि भूतानि स्वयम् अचेतनानि न हेयोपादेयसिद्धौ प्रमाणम्, अन्यथा ज्ञानकल्पनमनर्थकं स्यात्, तथा अनुभवोऽपि तदुपादानतया स्वयमचेतनो न तत्र प्रमाणम् । न खलु अचेतनोपादानं चेतनं युक्तम्, इतरथा अचेतनात् मृत्पिण्डात् चेतनो घटः स्यात् । तथा च प्रयोगः--यदचेतनोपादानं न तत् चेतनं यथा घटादि, अचेतनतोपादानं च परस्य ज्ञानमिति । ननु तदुपादानत्वेऽपि तस्य चिद्रूपतया प्रतीतेः प्रत्यक्षबाधितः पक्षः इति चेत्; मृत एव विज्ञानात् तस्य तथात्वप्रतीति गस्त्यत्तावदेतत् चतुर्थपरिच्छेदे निरूपयिष्यामाणत्वात् । यदि /ms वा भूतानि कल्प्यन्ते व्यवस्थाप्यन्ते विषयीक्रियन्ते येन स **भूतकल्प** इति व्याख्येयम् । न च तस्य तत्सिद्धौ सामर्थ्यं परलोकादेः अतद्विषयत्वात् । नापि यद् यद्विषयं न भवति तत्तस्य निषेधकं व्यवस्थापकं वा अतिप्रसङ्गात् । § 1089

ननु भवतु अनुमानं प्रमाणम्, तथापि प्रकृते क उपयोग इति चेत् ? अत्राह--**प्रत्यक्ष** इत्यादि । व्याख्यातमेतत् । अत्रायमभिप्रायः--अनुमानं प्रमाणमिच्छता पूर्वं लिङ्गलिङ्गिनोः सम्बन्धदर्शनम्, पुनः क्वचित् प्रायो लिङ्गदर्शनम्, सम्बन्धस्मृतिः, प्रत्यभिज्ञानम्, तर्कः, पुनः अनुमानमित्यभ्युपगन्तव्यम् । अनुमानवच्च स्वविषयस्मृत्यादिकमपि प्रमाणमिति चेति । § 1090

ननु च प्रत्यक्षेण लिङ्गलिङ्गिनोः साकल्येन सम्बन्धप्रतिपत्तौ प्रतिपत्तुः सर्वज्ञत्वम्, तेनैव अनुमानेन प्रतिपत्तौ अन्योऽन्यसंश्रयः, तदन्तरेण अनवस्था, तत्कथं सम्बन्धप्रतिपत्तिः यतोऽनुमानमिति चेत्; अत्राह--**चिन्ता** इत्यादि । **चिन्ता** इत्यन्वर्थसंज्ञाकरणात् तर्कस्य मानसविकल्पत्वोपवर्णनम्, प्रत्यक्षत्वनिषेधे तेन साकल्यव्याप्तिं प्रतिपद्यमानस्य जैनस्य सर्वज्ञत्वं नाऽनिष्टाय अभ्युपगमात् इति दर्शयति अनेन । तदुक्तम्-- § 1091
224/mkj

*अशेषविदिहि क्ष्यते सदसदात्मसामान्यवित् ।
जिन प्रकृतमानुषोऽपि किमुत अखिलज्ञानवान् ॥§ 1093

पात्रकेसरिस्तोत्र श्लो० १९ इति । § 1094

---

४ त] भूतोपादनतया ।
७ तोपा] नोपा
७ स्य] चार्वाकस्य ।
७ स्य] ज्ञानस्य ।
९ त्] रास्तां तावदेतत्
११ स्य] प्रत्ययस्य ।
२० यः] सिद्धे सम्बन्धे अनुमानोत्थानम्, तस्मिंश्च सम्बन्धसिद्धिः ।
२० त] अनुमानान्तरेण व्याप्तिप्रतिपत्तौ ।
२३ तेन] मानसविकल्पेन ।
२५ क्ष्य] विदिहेक्ष्य
२६ प्र] हे जिन, यदा सामान्यमनुष्योऽपि सत्त्वसामान्येन सर्वं वस्तुजातं जानन् सर्वज्ञो भवति तदा अखिलज्ञानवान् यदि सर्वज्ञो भवेत् किमत्र चित्रम् ।

**अचिन्त्यात्मिका** इत्यनेन च विषयोत्पत्तिसारूप्ययोः लिङ्गाश्रितत्वस्य च अभावेऽपि योग्यतया स्वविषयपरिच्छेदान्न तत्पक्षभावी दोषः । **इयम्** इत्य- /ms नेनापि तस्याः प्रत्यात्म स्वसंवेदनाध्यक्षवेद्यतया निषेधने प्रत्यक्षबाधनम् । सा किं करोति ? इत्याह--**कलयति** साकल्येन अवधारयति । किम् ? **अन्यं** साधनं साध्यात् तस्य अन्यत्वात् । किम् ? **अर्थसिद्धौ** सिद्धिनिमित्त- म् । क्व ? **अन्यत्र** । साधनात् **अन्यत्** साध्यं तत्र अनुमाननिमित्तमिति यावत् । कुतः ? इत्याह--**विषयात्** इति । यथा मातरि वर्त्तितव्यम्, पितरि शुश्रूषितव्यम् इत्युक्ते स्वस्यां स्वस्मिन् इति गम्यते तथा **विषयात्** इत्युक्तेऽपि स्वविषयाद् अन्यथानुपपन्नत्वलक्षणात् इति गम्यते इति । § 1095

इति र वि भ द्र पादकञ्जभ्रमर अ न न्त वी र्य विरचितायां सि द्धि वि नि श्च य टी का यां प्रमाणान्तरसिद्धिः तृतीयः प्रस्तावः ॥ छ ॥ § 1096

# चतुर्थः प्रस्तावः : ४. जीवसिद्धिः

225/mkj

एवं तावत् **प्रमाणस्य साक्षात् सिद्धिः स्वार्थविनिश्चयः** *इत्यपेक्ष्य स्मरणं प्रमाणान्तरं सप्रपञ्चं चिन्तितम् । साम्प्रतम्--**पूर्वं पूर्वं प्रमाणं स्यात् फलं स्यादुत्तरोत्तरम्** लघी॰ श्लो॰ ७ इत्यभिसमीक्ष्य तदेव प्रत्यक्षाफलजन- नात् चिन्तयितुं प्रत्यभिज्ञानं च आत्मसिद्धिपुरस्सरं तर्कजननात् प्रज्ञावादौ **विज्ञातान्** इत्यादि -- § 1097

...1 विज्ञातान् विषयानशेषकरणैः स्मृत्वा मनोऽभिज्ञया,
तर्कं तर्कितगोचरेतरविधिं नीत्वाऽभितो बुध्यते ।
श्रोत्रादिसमुपेतमेव विषयीकुर्वीत चक्षुर्न वै,
*पश्यत्येव हि सान्तरं पृथुतरं रश्मेः कुतो निःसृतिः
॥ १ ॥§ 1101

मन्यते बुध्यते अर्थान् इति **मनः** आत्मा । स किं करोति ? इत्याह- -**बुध्यते** जानाति, न निरन्वयज्ञानसन्तानः प्रकृतिपरिणामो व्यवसायः पृ-

३ ने] यदि निषेधः क्रियते तदा ।
१ *] पृ॰ १२ ।
३ इ] स्वरचितलघीयस्त्रये उक्तम् ।
३ क्षा] प्रत्यभिज्ञा
४ ज्ञावादौ] प्रस्तावादौ
५ इत्यादि] इत्याह
९ *] तुलना--सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानाधिकस्य च । अधिष्ठानाद्बहिर्नाक्षं न शक्तिर्विषयेक्षणे ॥ २० ॥ सर्वार्थसम्प्रयोगे तु सान्तराधिकयोर्ग्रहः । यो दृष्टश्शब्दरूपाभ्यां बाध्यते स निरन्तरम् ॥ ४१ ॥--प्र॰ समु॰ १ । २०, ४१ ।
११ रिणामो] सांख्यसम्मतः ।

थिव्यादिर्वा इति मन्यते । न चेदमत्र मन्तव्यम् सुखादिव्यतिरेकेण नात्मा अस्ति तत्कथमसौ बुध्यते ? सुखादेः आत्मत्वेऽविप्रतिसार इति कुतः ? **प्रत्यक्षं क्षणिकं विचित्रविषयाकारैकसंवेदनम्** सिद्धिवि° २ । ३ इत्यादिना तद्व्यवस्थापनात् । वक्ष्यति च तत्सिद्धिम् अनन्तरमेव । किं बुध्यते /ms ? इत्याह--**विषयान्** इति । द्रव्यपर्यायसामान्यविशेषार्थान् न विषयार्पितस्वाकारान् । ततो यदुक्तं केनचित्--**येन वेद्यते तत्ततो न भिद्यते यथा तस्यैव वेदकस्य स्वरूपम्, वेद्यते च आत्मना नीलादिकम्** इति; तदनेन निरस्तम्; पक्षस्य प्रत्यक्षबाधनात्, वेदकस्य अहमहमिकया अन्यत्र अन्यत्र च घटादेर्दर्शनात्, *इतरथा कोकिलकुलं धवलं पक्षित्वाद् बलाकावत् इत्यपि स्यात् । अथ कथम् आत्मा ततो भिन्नः अतदायत्तस्तात्वेत्ति ? तथादर्शनात्, कथमन्यथा अर्थस्तथाविधः तज्ज्ञनकः ? योग्यता अन्यत्रापि न वार्यते । शेषमत्र चिन्तितम् । § 1102

एतेन यदुक्तं सांख्येन--**इन्द्रियाणि अर्थमालोचयन्ति, अहङ्कारोऽभिमन्यते, मनः संकल्पयति, बुद्धिः अध्यवस्यति पुरुषश्चेतयते** इति; तन्निरस्तम्; बुद्ध्याकारवद् विषय स्येव साक्षाद् वेदनसद्भावात् । कश्चायं नियमः- 226/mkj -बुद्धिः तदनुरमन्तरेण दृश्यते न विषय इति । न च तस्यामज्ञातायाम् आदर्शवन्न तत्प्रतिबिम्बवेदनमिति । ननु यदि सत्तामात्रेण स तानु बुध्यते; तर्हि तदविशेषात् सर्वः सर्वदर्शी स्यादिति चेत्; अत्राह— **अभिज्ञया** इति प्रत्यभिज्ञानेन । § 1103

स्यान्मतम्--तदेवेदम् इति [ज्ञान]मभिज्ञा; तत्र तद् इति स्मरणोल्लेखः, इदम् इति च वर्त्तमानोल्लेखः, न चापरं ज्ञानमस्ति यत् प्रत्यभिज्ञाभिधानं स्यादिति; तदसारम्; यतः प्रतिपरमाणुनियतस्य वेदनस्य पूर्वमेव निषेधात् । प्रत्यक्षस्य स्मरणस्य वा उल्लेखः, खरविषाणोल्लेखः, युगपत् चित्रैकसंवेदनाभ्युपगमः, पूर्वापर पर्यायग्रहणोल्लेखद्वयमुल्लिखन्तीं प्रत्यभिज्ञामेकां समर्थ- /ms यते । सापि प्रमाणम् । तथा च प्रयोगः--येन ज्ञानेन आत्मा विषयान् बुध्यते

१ पृथिव्यादिर्वा] चार्वाकाभिमतः ।
२ सार] निर्बाधता । पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि--अमरकोशः । तत्र विदूषणसमुदाचारोऽकुशलं कर्माध्याचरति तत्र तत्रैव च विप्रतिसारबहुलो भवति ।--शिक्षासमु° पृ° १६० । न विप्रतिसारः अविप्रतिसारः, दोषरहित इत्यर्थः ।
८ या] अन्तः ।
८ अ] बहिः ।
९ *] प्रत्यक्षबाधितस्यापि साध्यत्वे ।
१० आत्मा] ज्ञानात् ।
१० स्तात्वेत्ति] त्तस्तत्त्वतोऽस्ति
११ थाविधः] ज्ञानजनकः ।
१४ इति] एवं बुद्ध्यहङ्कारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा— चक्षू रूपं पश्यति, मनः संकल्पयति, अहङ्कारोऽभिमानयति, बुद्धिरध्यवस्यति ।--सांख्यका° माठर° ३० ।
१५ स्येव] स्यैव
१६ नुर] भव
१६ च] बुद्धौ ।
१७ ज्ञातायाम्] दर्पणवत् ।
१७ न्न] वत्
१७ त्तामात्रेण] आत्मा ।
१७ तानु] तान्
१७ तानु] अर्थान् ।
२० म्] तस्मात् स एवायमिति प्रत्ययद्वयमेतत् ।--प्र° वार्तिकाल° पृ° २२ ।
२१ रं] प्रत्यक्षस्मरणव्यतिरिक्तम् ।

[तत् प्रमाणम्, यथा घटादिज्ञानम्, बुध्यते] च स प्रत्यभिज्ञानेन विषयान् इति । अथ मतं यद्यसौ गताः *तया बुध्यते, तर्हि अदृष्टपूर्वस्यापि भावस्य पूर्वापरपर्यायैकत्वं प्रथमदर्शन एव तया स बुध्येत इति; तदपि न युक्तम्; इत्याह--**विज्ञातान्** इति । कैः ? इत्यत्राह--**अशेषकरणैः** सन्निहिते बीजपूरकादौ यानि रूपरसगन्धस्पर्शविषयाणि अशेषानि समस्तानि करणानि चक्षुरादीनि, ज्ञानानि वा कार्ये कारणोपचारात्, यदि वा पूर्वं यानि वृत्तानि यानि च पश्चात् प्रवर्त्तन्ते तान्यशेषकरणानि तैः इति । नन्वेवं विज्ञातविज्ञानाद् अभिज्ञा प्रमाणं न स्यादिति चेत्; अत्राह--**न किं ते** इत्यादि । **न किं तम्** ऊहितम् यद् अवग्रहादि तस्य गोचरो विषय **इतरो विधिः** स्वभावः, स्वकारणैर्विधीयते इति विधिः इति व्युत्पत्तेः तं **नीत्वा विषयान्** इति वर्त्तते । तथाहि--चक्षुषा बीजपूरादेः एकस्य स्थवीयसो रूपात्मकस्य ग्रहणेऽपि न सोद्याकस्य ग्रहणम्, रसवादिनोऽपि तस्य रसाद्यात्मकस्य वेदनेऽपि न रूपात्मकस्य वेदनम्, तथा पूर्वदर्शनेन पूर्वपर्यायविशिष्टस्य अवसायेऽपि नोत्तरपर्यायविशिष्टस्य अवसायः, नापि अपरपर्यायावग्रहेण पूर्वदशाविशिष्टस्य अवग्रह इति, प्रत्यभिज्ञया तु उभयावस्थाविशिष्टो बुध्यते इति नैकान्तेन गृहीतग्राहित्वमिति भावः । ननु यदि पूर्वेण उत्तरेण वा दर्शनेन कस्यचिद्
/ms एकत्वं प्रतिपन्नं स्यात् युक्तं प्रत्यभिज्ञया तस्य ग्रहणं दर्शनानुसारित्वादस्याः । न च पूर्वापरैकत्वदर्शनं संभवि । *मा भूत्, प्रत्यभिज्ञा च तद्विषया स्यादिति चेत्; उक्तमत्र--पूर्वदर्शनाभावेऽपि स्यात् । तद्दर्शने सति इति चेत्; विस्मृततद्दर्शनस्य । आशुस्मरणे सतीति चेत्; पटदर्शनस्मरणात् घटे तदेकत्वप्रत्यभिज्ञानं भवेत् । *तदेकत्वादर्शनान्नेति चेत्; तत एव अन्यत्रापि मा भूद् अविशेषादिति चेत्; अत्राह--**अभिनव** इति । **अभि** नवं पूर्वपर्यायपरिहारेण अपरं यन्ति इति अभिमतः निपातत्वादयमस्यार्थ उक्तः
227/mkj । पूर्वत्वं कालान्तरस्थान वत्तो विषयान् **विज्ञातान् विषयान् अशेषकरणैः** इति सम्बन्धः । तदुक्तम्— **पश्यन्स्वलक्षणान्येकम्** सिद्धिवि° १ । ९ इत्यादि । न चायमेकान्तः अपरापरदशादर्शने तद्वात्रयं दृश्यते इति, कथमन्यथा मध्यक्षणस्य दर्शनेन पूर्वापरक्षणादर्शने ततो विवेकप्रतिपत्तिः ? शेषमत्र पूर्वमत्रापि चिन्तितम् । § 1104

१ स] आत्मा ।
२ य] आत्मा ।
२ ताः] अवस्थाः ।
२ *] अभिज्ञया ।
६ वा] इन्द्रियकार्यभूते ज्ञाने ।
६ वृत्तानि] जातानि ।
८ ते] तर्कित
९ म्] तर्कितम्
१२ स्य] रसाद्यात्मकस्य
१२ वा] वे
१७ चिद्] वस्तुनः ।
१७ स्य] एकत्वस्य ।
१७ स्याः] प्रत्यभिज्ञायाः ।
१८ *] पूर्वापरैकत्वदर्शनसंभवो मा भूत् तथापि ।
२० स्य] पुरुषस्य स्यात् ।
२१ *] घटगतैकत्व ।
२२ व] अभितः
२३ तः] अभितः
२४ त्तो] तो
२६ यं] तद्वानवश्यं

स्यादेतद् यति **विज्ञातान् विषयान् अशेषकरणैः आत्मा अभिज्ञया बुध्यते** तर्हि सर्वान् आजन्मनः सर्वःता तया बुध्यते इति चेत्; अत्राह--**स्मृत्वा** इति । स्मरणेन विज्ञातान् पूर्वविषयान् कृत्योत्तर विषयैः विज्ञानैः एकत्वेन ध्यसा * बुध्यते न सर्वानिति मन्यते । अनेन स्मृतेः प्रत्यभिज्ञानफलत्वेन प्रामाण्यं दर्शयति । § 1105

सांप्रतं तर्कफलत्वेन प्रत्यभिज्ञाया प्रमाणत्वमुपवर्णयन्नाह--**तर्कम्** इत्यादि । अस्यायमर्थः— अभिज्ञया करणभूतया कृत्वा **तर्कम्** ऊहं **नीत्वा** विषयान् तर्कग्राह्यान् तान् कृत्वेत्यर्थः । तान् विषयान् नीत्वा तं तद्ग्राहकमापाद्य इत्यर्थः । किम्भूतम् ? इत्याह--**तर्कितम्** इत्यादि । **तर्कितः** प्रत्यक्ष- /ms
प्रमाणेन निश्चितो गोचरः तस्मात् **इतरो**ऽन्यः देशाद्यन्तरभावी भावः तत्र **विधिः** विधानम् उत्पत्तिर्यस्य स तथोक्तः तमिति । अनेन प्रत्यक्षफलत्वम् एकान्तेन निराकरोति अस्य । स किं करोति ? इत्याह--**बुध्यते अभितः** समन्ताद् विषयान् तर्केण इति विभक्तिपरिणामेन संबन्धः । § 1106

ननु स्मरणादिविषयस्य तत्कालेऽभावात् कथं तेन [ग्रहणम् ?] ग्राहकसमानसमयो हि विषयः तेन गृह्यत इति युक्तम्, अन्यथा चक्षुरादिज्ञानमपि सर्वातीतादिग्राहकं स्यादिति चेत्; अत्राह--**श्रोत्रादि** इत्यादि । इदं वाक्यं यथातथाशब्दावन्तरेणापि प्रतिवस्तूपमालङ्कारवशेन व्याहृतं यथातथाशब्दं व्याख्येयम् । **श्रोत्रम् आदिः** यस्य घ्राणादेः स तथोक्तः यथा **समुपेतमेव** स्वसन्निकृष्टमेव नाऽसन्निकृष्टं **विषयीकुर्वीत** विषयम् इति वचनपरिणामेन सम्बन्धः, **चक्षुः नवै** नैव समुपेतमेव विषयीकुर्वीत तदसमुपेतमेव विषयं विषयीकुर्वन् प्रतीयत इति मन्यते । एतच्च सौगतस्य प्रसिद्धमिति न साधनमर्हति । यथा चक्षुरादिज्ञानं स्वकालविशेषणं वस्तु विषयीकुर्वीत स्मरणादिकं तु भिन्नकालविशेषणमपि इति, सर्वत्र तथाप्रतीतेरविशेषात् । § 1107

एतेनेदमपि निरस्तं यदुक्तं प्र ज्ञा क रे ण--**स्मरणादिकम् अतीतादौ प्रवर्त्तमानं निर्विषयं तत्काले विषयाभावात्** इति; तन्निरस्तम्; चक्षुर्ज्ञानमपि तथा निर्विषयं स्यात्, तद्देशे तद्विषयाभावात् इति । § 1108 /ms

ननु सौगतस्य चक्षुरिव श्रोत्रमपि न वै समुपेतमेव विषयीकुर्वीत **चक्षुःश्रोत्रमनसाम् अप्राप्यकारित्वम्** इति राद्धान्तात् किमुच्यते **श्रोत्रादि** इत्यादि

२ र्वःता] सर्वास्ताः[[अवस्थाः ।]]
२ या] अभिज्ञया ।
२ ते] बुध्येत
३ र] कृत्वा उत्तर
४ *] नाध्यवसाय
४ स्मृतेः] प्रत्यभिज्ञानं स्मरणस्य फलमिति भावः ।
१२ रोति] तर्कस्य ।
१८ ब्दं] यथातथाशब्दसहितम् ।
२० त] चक्षुः असम्बद्धमेवार्थम् ।
२५ त] स्मरणकाले ।
२५ इति] गृह्यमाणे स्मृतिर्नास्ति ग्रहणानन्तरं हि सा । अतीतेग्रहणे तस्य रूपाभावे न सा स्मृतिः ॥ इदानीं स्मरणं जातं कथं जानाति पूर्वताम् । अविद्यमानं नीरूपं कथं तद्रूपता स्मृतेः ॥--प्र॰ वार्तिकाल॰ पृ॰ ६०२ ।
२८ रा] अप्राप्तान्यक्षिमनःश्रोत्राणि--अभिध॰ को॰ १ । ४३ ।

228/mkj । तस्मादेवं वक्त[व्यं] घ्राणादि इति । दूरे शब्दः निकटे शब्दः इति प्रतीतिश्च चक्षुरिव श्रोत्रमप्राप्यकारि इति चेत्; आस्तां तावदेतत्, आगमप्रस्तावे अस्य निरूपयिष्यमाणत्वात् । § 1109

अत्राह वैशेषिकः--श्रोत्रादिवत् बाह्येन्द्रियत्वात् चक्षुरपि समुपेतमेव विषयीकरोति, तत् किमर्थमुक्तम् **चक्षुर्न वै** इति; तं प्रत्याह--**पश्यत्येव हि** इत्यादि । **हि** यस्मादर्थः, यत् **पश्यत्येव** ईक्षत एव न [न] पश्यति इति एवकारार्थः, चक्षुः इत्यनुवर्त्तते । ननु मनः पश्यति न चक्षुः अन्यथा तत्परिकल्पन[मनर्थकम्] इति चेत्; न; आत्मानं विषयं पश्यन्तं चक्षुः [सह] करोति इति तत् पश्यति इत्युच्यत इत्यदोषात् । किं पश्यति ? इत्याह--**सान्तरम्** । सह अन्तरेण देशेन नद्यादिना द्रव्येण काचात्पटलादिना वर्त्तमानं घटादिकं विषयम् इति वचनपरिणामेन सम्बन्धः । एतदुक्तं भवति--चक्षुरिति यदि गोलकस्य लोकव्यवहारतः अभिधानमाश्रीयते; तर्हि तस्य देशादिव्यवहितेन घटादिना प्रत्यक्षतः ततोऽत्यन्तभिन्नेन प्रतीयमानेन सन्निकर्षसाधने प्रत्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन बाह्येन्द्रियत्वात् इति कालात्ययापदिष्टो हेतुः स्यात्, यथा अश्रावणः शब्दः सत्त्वात् इति । § 1110

तत्रैव युक्त्यन्तरमाह--**पृथुतरम्** इति । सर्षपादेः सूक्ष्मात् पृथु चक्षुः तस्मात् अतिशयेन पृथु पर्वतादिकं पृथुतरं तत् पश्यति इति सम्बन्धः । /ms अत्रायमभिप्रायः--पूर्वोक्तेन विधिना देशादिना देशादिव्यवहितेन पर्वतादिना प्रमाणबाधितत्वान्न चक्षुषस्तेन सन्निकर्षोऽस्ति, तथापि पादप्रसारिकतया यदि इष्यते तर्हि यतः पर्वतादिप्रदेशस्य पृथुनो जलबुद्बुदसन्निभेन चक्षुषा सम्बन्धः, तावत एव तेन ग्रहणं स्यात् न योजनादिपरिमाणस्य पृथुतरस्य । न खलु हस्तेन अन्धस्य हस्तिहस्तमात्रसन्निकर्षे संपूर्णहस्तिप्रतिपत्तिरस्ति । विद्यते च चक्षुषा प्रथुतरस्य ग्रहणम् । ततो मन्यामहे असन्निकृष्टं पश्यति चक्षुः इति । § 1111

ननु न गोलकविशेषः चक्षुः येनायं दोषः स्यात्, अपि तु रश्मयः, तेषां च अर्थसन्निकृष्टानां तत्प्रकाशनसाधनात् । अस्मिंश्च पक्षे पृथुतरं तत्

---

१ तीतिश्च ] तेश्च
४ वैशेषिकः ] प्राप्यकारि चक्षुः इन्द्रियत्वात् घ्राणादिवत् ।--न्यायवा॰ पृ॰ ३६ । न्यायवा॰ ता॰ टी॰ पृ॰ १२२ । प्राप्तार्थप्रकाशकं चक्षुः व्यवहितार्थाप्रकाशकत्वात् प्रदीपवत् बाह्येन्द्रियत्वात् त्वगिन्द्रियवत् । --प्रश॰ कन्द॰ पृ॰ २३ ।
४ स ] चक्षुःश्रोत्रे प्राप्यार्थं परिच्छिन्दाते बाह्येन्द्रियत्वात् त्वगिन्द्रियवत् । --न्यायवा॰ ता॰ टी॰ पृ॰ ७३ ।
७ त ] मनःकल्पना व्यर्था ।
१० काचात् ] भ्र
१४ क ] साध्य ।
२० तः ] यावतः
२० न्निभेन ] अल्पेन ।
२१ तेन ] चक्षुषा ।
२२ स्तिह ] शुण्डादण्ड ।
२५ यः ] रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ।--न्यायसू॰ ३ । १ । ३२ । तयोर्महदण्वोर्ग्रहणं चक्षूरश्मेरर्थस्य च सन्निकर्षविशेषाद् भवति यथा प्रदीपरश्मेरर्थस्य चेति ।--न्यायभा॰ । चक्षुर्बहिर्गतं बाह्यालोकसम्बन्धाद् विषयपरिमाणमुपपद्यते...--प्रश॰ व्यो॰ पृ॰ १५९ । पृथुग्रहणस्यापि पृथ्वग्रतया तद्वदेवोपपत्तेः ।--प्रश॰ किर॰ पृ॰ ७४ ।
२६ रं ] चक्षु ।

पश्यति इति न विहन्यते, मूले सूक्ष्माणां प्रदीपादिरश्मिवत् अग्रे स्थूलानां भावादिति चेत्; अत्राह--**रश्मेः** इत्यादि । रश्मिः इति जातिव्यपेक्षयैकवचनम्, व्यक्त्यपेक्षायां तु रश्मीनां चक्षुष इति विभक्तिपरिणामेन सम्बन्धः । **कुतः** ? न कुतश्चित् प्रमाणात् **निःसृतिः**प्रतिपत्तिः गत्यर्थस्य सरतेर्ज्ञानार्थत्वात् । न तावत् प्रत्यक्षतः; तत्र तदप्रतिभासनात् । अनवस्थानात् तेषामपि अपन तद्रश्मिसंबन्धेन ग्रहणात् । नापि अनुमानतः; तदभावात् । ननु 229/mkj इदमस्ति--रश्मिवच्चक्षुः स्वरश्मि[सम्बद्धं] सर्वत्र स्वार्थं प्रकाशयति, तैजसत्वात्, प्रदीपवत् इति चेत्; कुतोऽस्य तैजसत्वम् ? उष्णस्पर्शत्वात्; न; तद्विशेषस्य तत्राऽभावात् । सोष्णतामात्रस्य घ्राणादावपि भावात् । भासुर- /ms रूपवत्त्वात्; किमिदं रूपस्य भासुरत्वम् ? उज्ज्वलत्वमिति चेत्; न; अस्य निमित्तं निस्त्रिंशादौ भावात् । कपिशत्वे सति इति चेत्; न; तस्य वरनारीलोचनेषु दुग्धधवलेषु अभावात्, कनकवच्च कनककेतकीकुसुमदलेषु भावात् । एतेन मार्जारादिचक्षुरपि व्याख्यातम् । § 1112

अपरेषां दर्शनम्--चक्षुः तैजसं रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपवत् इति; तेषां सर्वे घटादयः प्रसिद्धाः पावकवत् सत्त्वात् तैजसाः किन्न स्युः ? अथ उष्णभासुरस्पर्शरूपविविक्तघटादिग्राहिणा अध्यक्षेण पक्षस्य बाधनात् नैवम्; प्रकृतेऽपि समानमेतत् । § 1113

किंच, न तैजसं चक्षुः अत्यासन्नाऽप्रकाशकत्वात्, यत् पुनः तैजसं तद् अत्यासन्नस्यापि प्रकाशकं यथा प्रदीपादिः इति [व्यति] रेकी हेतुः अत्र किन्न विजृम्भते ? न चायं परस्य अगमकः; अन्यथा **सात्मकं जीवच्छरीरं प्राणादिमत्त्वात्** *इति न सुभाषितम् । § 1114

यदि वा, तमःप्रकाशकत्वात्; यत् पुनः तैजसं न तत् तमःप्रकाशकं यथा प्रदीपादि इति ग्राह्यम् । तदुक्तम्-- § 1115

---

४ त्तिः] सृ गतावित्यस्य ।
६ न] अपरनयन
७ स्ति] तुलना--कृष्णसारं रश्मिवत् द्रव्यत्वे सति रूपोपलब्धौ नियतस्य साधनाङ्गस्य निमित्तत्वात् । अथवा, रश्मिवच्चक्षुः द्रव्यत्वे सति नियतत्वे च सति स्फटिकादिव्यवहितार्थप्रकाशकत्वात् प्रदीपवत् । --न्यायवा° पृ° ३८१ । न्यायवा° ता° टी° पृ° ५२५ ।
८ कुतोऽस्य] चक्षुषः ।
९ स्य] उष्णताविशेषस्य ।
११ निमित्तं] निशित[[शाणीकृततीक्ष्णशस्त्रादौ ।]]
१३ एतेन] नक्तञ्चरनयनरश्मिदर्शनाच्च । सू° दृश्यन्ते हि नक्तं नयनरश्मयो नक्तञ्चराणां वृषदंशप्रभृतीनाम्, तेन शेषस्यानुमानम् ।--न्यायभा° ३ । १ । ४३ । न्यायम° पृ° ४८० ।
१५ इति] द्रष्टव्यम् पृ° ८ टि° ४ ।
१५ त्त्वात्] हेतोः ।
१८ त्वात्] तुलना--अप्राप्यकारि चक्षुः स्पृष्टानवग्रहात् । यदि प्राप्यकारि स्यात् त्वगिन्द्रियवत् स्पृष्टमञ्जनं गृह्णीयात् । न च गृह्णाति ।--त° वा° पृ° ६७ ।
२० चायं] नैयायिकस्य ।
२१ *] नेदं जीवच्छरीरं निरात्मकम् अप्राणादिमत्त्वप्रसङ्गात् ।--न्यायवा° पृ° ४६ ।
२२ त्वात्] न तैजसं चक्षुः । तुलना--न तैजसं चक्षुः तमःप्रकाशकत्वात् ।--न्यायकुमु° पृ° ८० । स्या° रत्ना° पृ° ३२४ ।

*तमो निरोधि वीक्ष्यन्ते तमसा नावृतं परम् ।
कुड्यादिकं न कुड्यादितिरोहित मेत्कका ॥§ 1117

लघी० श्लो० ५६ इति । § 1118

प्रदीपाद्यालोकाभावेऽपि च क्वचिद् रूपज्ञानस्य उदयदर्शनात् कथं तदालोकस्य नियमेन रूपप्रकाशकत्वम्, यतः साधनविकलो दृष्टान्तो न भवेत् ? तदेवं नायनरश्मीनामसिद्धेः तेषां चक्षुःशब्दवाच्यत्वेन धर्मित्वे बाह्येन्द्रियत्वात् इति आश्रयस्वरूपासिद्धो हेतुरिति यत्किञ्चिदेतत् । § 1119

इदमपरं व्याख्यानम्--**रश्मेः** चक्षूरश्मीनां **कुतः** कारणात् **निःसृतिः** निर्गमनं स्वाधिष्ठानात् ।
/ms नहि अकारणम् अदृष्टं सत्तया कल्पनमर्हति, अतिप्रसङ्गात् । अर्थप्रकाशनं तत्कारणम् इत्येके । तथा हि--इन्द्रियम् आत्मसंब-
230/mkj द्धमर्थं प्रकाशयद् दृष्टम् । तत्र यदि गोलकवत् तद्रश्मीनामपि अर्थसम्बन्धो न स्यात् कुतस्तत्प्रकाशनम् ? अस्ति च । ततो मन्यामहे रश्मेः निर्गमनमिति । मनोवत् सम्बन्धसम्बन्धात् तत्प्रकाशनापत्तेः अदोषः । तथाहि--यथा मन आत्मना संयुक्तम्, सोऽपि आकाशेन, तदपि सर्वभावैः इति सम्बन्धसम्बन्धात् तदर्थप्रकाशकम् । न खलु तस्य तद्रश्मीना[ञ्च] स्वार्थेन संयोगः परैः अभ्युपगम्यते । तथा चक्षुः मनसा, तदपि आत्मना संयुक्तम्, सोऽपि आकाशेन, तदपि सर्वभावैः इति सम्बन्धसम्बन्धात् तदर्थप्रकाशकम् । न खलु तस्य तद्रश्मीनां स्वार्थेन संयोगः परैः अभ्युपगम्यते । तथा, चक्षुः मनसा तदपि आत्मना सोऽपि विषयैः संयुक्त इति सम्बन्धात् चक्षुरपि तत्प्रकाशकमित्यलं रश्मिनिर्गमनकल्पनया । न च इन्द्रियत्वाऽविशेषेऽपि मनः तथा प्रकाश षेपिरक्षुः इति न विशेषं पश्यामः । एवं शाखाचन्द्रमसोर्युगपद्ग्रहणमुपपन्नं भवति, अन्यथा क्रमेण गच्छतां रश्मीनां पूर्वं शाखया संयोग इति तस्या एव ग्रहणं पुनः चन्द्रमसा इति तस्य ग्रहणमिति क्रमप्रतिपत्तिः स्यात् । न चैवम् । § 1120

---

२ का] तमिवेक्षकाः
४ च] नक्तञ्चरादौ ।
९ या] सद्रूपेण ।
१० म्] रश्मिकारणकम् । तुलना--करणं वास्यादि प्राप्यकारि दृष्टं तथा चेन्द्रियाणि तस्मात् प्राप्यकारीणि ।--न्यायवा० पृ० ३६ । इन्द्रियाणां कारकत्वेन प्राप्यकारित्वात् ।--न्यायम० पृ० ३७ ।
१३ म] तुलना--तथैव कारणत्वस्य मनसा व्यभिचारिता । मन्त्रेण भुजङ्गाद्युच्चाटकादिकरेण वा ॥ ८८ ॥ --त० श्लो० पृ० २३४ । न्यायकुमु० पृ० ८२ । स्या० रत्ना० पृ० ३३० ।
१४ त] आकाशमपि ।
१५ स्य] चक्षुषः ।
१६ सा] संयुक्तम् ।
१६ सोऽपि] आत्मापि ।
१७ न्धात्] एतदन्तर्गतः पाठो द्विर्लिखितः ।
२१ क्षुः] यति न चक्षुः
२१ शा] तुलना--पश्येच्चक्षुश्चिराद् दूरे गतिमद् यदि तद्भवेत् । अत्यभ्यासे च दूरे च रूपं व्यक्तं न तत्र किम् ॥ १३ ॥ यदि चक्षुः प्राप्यकारित्वात् विषयदेशं गच्छेत् तदा उन्मिषितमात्रेण न चन्द्रतारकादीनर्थान् गृह्णीयात् ।--चतुःश० पृ० १८६ । चक्षुर्हि शाखाचन्द्रमसावभिन्नकालमुपलभते...--त० वा० पृ० ६८ ।
२३ स्या] शाखायाः ।
२३ सा] सम्बन्धः ।
२३ स्य] चन्द्रमसः ।

उत्पलपत्रशतवेधवत् शाखाचन्द्रमसोर्ग्रहणस्य आशुभावात् यौगपद्यप्रतिपत्तिभ्रम इत्यन्ये; तन्न; मूर्त्तस्य असर्वगतस्य सूचीद्रव्यस्य तत्पत्रैः भिन्नदेशैः क्रमेण सम्बन्धात् युक्तो युगपत्त्वविभ्रमः नान्यत्र तद्विपरीते, इतरथा /ms एवम् एकज्ञानवार्त्ता निर्मूला स्याद् वराकी । § 1121

यदि मतम्--अन्यत्रापि तथाविधस्य रश्मेर्भिन्नदेशाभ्यां शाखाचन्द्रमोभ्याम् संयोगः क्रमेण इति; स्यादेतदेवं यदि सूचीद्रव्यवत् कुतश्चिद् रश्मिगमनप्रतिपत्तिः स्यात्, न सा अस्ति इत्युक्तम् । तद्विभ्रमाऽप्रतिपत्तौ अन्योऽन्यसंश्रयः । तथाहि--क्रमेण रश्मिगमनसिद्धौ तद्विभ्रमसिद्धिः [तद्विभ्रमसिद्धौ च क्रमेण रश्मिगमनसिद्धिः] इति । ततः स्थितम्--**रश्मेः कुतो निःसृतिः** इति । § 1122

ननु यस्य सकलज्ञेयग्रहणस्वभावं ज्ञानं तत्स्वभावश्च आत्मा कथं तस्य स कस्यचिदप्यर्थस्य स्वयं ग्राहको यतः अक्षापेक्षस्य अर्थे क्रमग्रहः स्यात् सर्वज्ञवत् । आवरणसद्भावात् स्वयमग्राहक इति चेत्; कुतः तत्सिद्धिः ? न प्रत्यक्षतः; तत्र तदप्रतिभासनात् । देशादीनाम् आवरणत्वे सर्वज्ञाभावः, *तेषां सर्वदा भावात् । रागादीनां सद्भावेऽपि विषयदर्शनभावान्न आवरणत्वम् । अन्यस्य अनुमानतो न प्रतिपत्तिः; तदर्थापक लिङ्गाभावात् । अथ सर्वविषयप्रकाशनस्वभावस्य तदप्रकाशनात् तत्सिद्धिः; तत्स्वभावता 231/mkj कुतस्तस्य सिद्धा ? तदावरणापाये सर्वप्रकाशनस्वभावत्वात्; अन्योऽन्यसंश्रयः--सिद्धे हि सर्वप्रकाशनस्वभावे सति आवरणसिद्धिः, तत्सिद्धौ तत्क्षये तत्प्रकाशनस्वभावसिद्धिः इति चेत्; अत्राह--**मिथ्याज्ञानम्** इत्यादि । § 1123

...2 मिथ्याज्ञानं विसंवादादप्रमाणं विषादिवत् ।
ज्ञातुरावरणोद्भूतेः दोषहेतोः स्वतः सतः ॥ २ ॥§ 1125

मत्यज्ञानभेदा अवग्रहादयः प्रमाणाभासा मिथ्याग्रहणात्मकाः, प्रमाणस्य अविप्रतिसारलक्षणत्वात् । स्वतः प्रमाणभूतस्य आत्मनः परतो विपर्यासोपपत्तेः मत्तमूर्च्छितादिवत् । यदि पुनः स्वत एव ज्ञाता न स्यात् कुतः परतोऽचेत-

---

२ न्ये] यत्पुनरेतत्-शाखाचन्द्रमसोस्तुल्यकालग्रहणमिति; तदपि न; अनभ्युपगमात् को हि स्वस्थात्मा शाखाचन्द्रमसोः तुल्यकालग्रहणं प्रतिपद्यते । कालभेदाग्रहणात् मिथ्याप्रत्यय एषः उत्पलदलशतव्यतिभेदवदिति ।--न्यायवा॰ पृ॰ ३५ । न्यायवा॰ ता॰ टी॰ पृ॰ १२० । प्रश॰ कन्द॰ पृ॰ २३ । प्रश॰ व्यो॰ पृ॰ १५९ । प्रश॰ किर॰ पृ॰ ७४ । मुक्ता॰ पृ॰ १७८ ।
५ त्रापि] मूर्त्तस्य ।
८ सिद्धौ] यौगपद्यविभ्रमसिद्धिः ।
१२ स] आत्मा ।
१३ त्सिद्धिः] आवरणसिद्धिः ।
१५ *] देशादीनाम् अपायाऽसंभवात् ।
१६ म्] रागादीनाम् ।
१६ क] [[अनुमानप्रयोजकहेत्वभावात् ।]]तदुत्थापक
१७ स्य] आत्मनः ।
१७ त्सिद्धिः] आवरणसिद्धिः ।
१८ स्य] आत्मनः ।

नवत् । न हि तथापरिणामरहितस्य तथा परिणामः । परस्य अन्यातिशयकल्पनायामात्मनः किन्न कल्प्यते ? ज्ञस्वभावस्य अप्राप्यकारिणः प्रतिबन्धाभावे त्रिकालगोचरमशेषं द्रव्यं कथञ्चिज्ज्ञानतो न कश्चिद्विरोधः, आत्मनः स्वविषये वैशद्यमनुभवतः परोक्षप्रत्यक्षवत् । नास्माकमावरणक्षयोपशमवशात् स्वकारणशक्तेः । स्वलक्षणदर्शनाहितसन्तानविकल्पवासनाप्रकृतिः संवृतिः वस्तुमात्राध्यवसायात् व्यवहारमारचयतीति चेत्; न; क्षणिकैकान्ते अर्थक्रियाविरोधनिर्णयात् । ततः § 1126

अस्यायमर्थः--यत् तस्मिन् **मिथ्याज्ञानम् अप्रमाणं विसंवादात्** वञ्चनात् प्रसिद्धं हि लोके प्रकृत्यादिविषयं तत् धर्मि । तत्र साध्यम् आह--**आव**/ms **रणोद्भूतेः** इति । जीवस्य स्वविषये प्रवृत्तिनिषेधकं ज्ञानावरणीयादि कर्म आवरणं तस्य उद्भूतिः स्वकार्यकरणाभिमुख्यं तस्याः, भवति इति शेषः । साध्यमेतत् । हेतुमाह--**दोषहेतोः** इति । दोषः अन्यथाग्रहणं स एव हेतुः लिङ्गं तस्मात् । दृष्टान्तमाह--**विषादिवत्** इति । विषम् आदिर्यस्य सुरादेः स तथोक्तः तस्मादिव तद्वदिति । एतदुक्तं भवति--यथा विषादेः उपजायमानं भूभ्रमणादिविषयं विषाद्यावरणोद्भूतेः भवति तथा प्रकृत्यादिविषयमपि, *तददृष्टावरणोद्भूतेः इति । प्रयोगः--विवादगोचरापन्नं [मिथ्याज्ञानम् आवरणोद्भूतेर्भवति, मिथ्याज्ञानत्वात्] मिथ्याज्ञानस्य उपलक्षणार्थत्वात् [तेन] अज्ञानत्वाद् अस्पष्टत्वादिति [च] गृह्यते, विषादिजनिततथाविधज्ञानवत्, एवमर्थं च विषादिग्रहणम्, तदुपयोगे तन्त्रियाननिवृत्तेः इति । § 1127

अत्राह सौत्रान्तिकादिः--मिथ्याज्ञानात् प्राक् तदाधारस्य स्वविषयप्रकाशनस्वभावस्य भावे कस्यचिद् आवरणकल्पना श्रेयसी; न च सोऽस्ति प्रमाणाभावात् । मिथ्याज्ञानमपि निराधारं जायते **आदेशाः चित्रचैतसिका** इति वचनात् । ततस्तस्यापि आवरणकल्पना कीदृशी ? तत्र भावान्त232/mkj रादर्शनादिति पक्षस्य प्रत्यक्षबाधो दृष्टान्तस्य साध्यवैकल्य मिति; तं प्रत्याह--**ज्ञातुः** इति । यः प्राक् शङ्खं शुक्लतया ज्ञातवान्, संप्रति जानाति पीततया, पुनर्ज्ञास्यति शुक्लतया स ज्ञाता इत्युच्यते । स च **प्रत्यक्षं क्षणिकं** /ms **विचित्रविषयाकारैकसंवेदनम्** सिद्धिवि° २ । ३ इत्यादिना लेशतः प्रदर्शितः, प्रपञ्चतः पुनरत्रैव प्रदर्शयिष्यते । तदुक्तं न्या य वि नि श्च ये-- § 1128

*सत्यन्तमाहुरायायां विद्यया विभ्रमेण यः ।

९ लोके] सांख्याभिमत ।
१० णीयादि] आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः ।--त° सू° ८ । ४ ।
१५ यं] मिथ्याज्ञानम् ।
१६ *] ज्ञानावरणोदयात् ।
१८ थाविध] धा
१९ निवृत्तेः] तन्नितयानिवृत्तेः
१९ निवृत्तेः] मिथ्यात्वम् अज्ञानत्वमस्पष्टत्वञ्च ।
२१ स्य] आत्मनः ।
२२ सिका] अदेशाः चित्तचैतसिकाः
२३ स्यापि] आत्मनोऽपि ।
२६ स] ज्ञाता ।
२९ रायायां] सत्यं तमाहुराचार्याः

सदर्थमसदर्थं वा पसुरोस्त्वावलोकतः ॥§ 1130

न्यायवि० १ । ३८ इति । § 1131

वैशेषिकस्त्वाह--ज्ञानोत्पत्तेः प्राक् आत्मा विद्यते, स तु तदा ज्ञानाभावादेव विषयं सन्तमपि न विषयीकरोति नावरणादिति; **देवरक्ताः किंशुकाः** इति न तत्र नः प्रयासः आवरणसाधने । तत्र केवलं धर्मादिसामग्रीतः समीचीनज्ञानम्, अन्यस्याः मिथ्याज्ञानमिति विभाग इति । तत्रोत्तरमाह--**स्वतः** इति । स्वात्मरूपेण न अर्थान्तरज्ञानसम्बन्धेन **ज्ञातुः** इति वृत्तौ प्रतिपादयिष्यते । § 1132

विभ्रमैकान्तवादी प्राह--भवतु कश्चित् स्वयं ज्ञाता, स च स्वभावत एव विपरीतार्थग्राही नावरणादिति; तत उत्तरं पठन्ति--**सतो**ऽवितथस्य यथावस्थितस्वार्थग्रहणस्वभावस्य इत्यर्थः । **स्वतः** इत्येतदत्रापि सम्बन्धनीयम्, कथमन्यथा विभ्रमैकान्तस्यापि प्रतिपत्तिः । न हि विभ्रमादेव तत्प्रतिपत्तिर्युक्ता, अतिप्रसङ्गात् । तदुक्तं केनचित्-- § 1133

*प्रभासुरमिदं चित्तं प्रकृत्याऽऽगन्तवो मलाः ।§ 1134

प्र० वा० १ । २१० इति । § 1135

परः पुनरेवं मन्यते--स्वतस्तस्य मिथ्यादर्शनात्मकत्वम् अन्यतो यथार्थदर्शनात्मकत्वमिति; स **विषात्** इत्यनेन निरस्तः; विषादुपयोगान्वयव्यतिरेकानुविधायितया दृश्यमानस्य मिथ्यादर्शनस्य अन्यतः कल्पने धूमोऽपि अग्निप्रभवो न स्यात् । स्वतश्च मिथ्यात्वेन सर्वसंविदां कुतः स्वसंवेदनपरमार्थ सिद्धिः ? नहि तत्र पूर्वसंवेदनादन्यस्य व्यापारः **चक्षुरादेर्विषयप्रतिनियमः** /ms
**विपयात् तदाकारता आलोकात् स्पष्टता विज्ञानाद् विज्ञानस्य विद्रूपता ।** इति वचनात् । नापि स्वसंवेदनपरमार्थाऽसिद्धौ सौगताः सुखमासितुं काल-कलालेशमपि समर्थाः, कस्यचिद् विधिनिषेधायोगात् । ततः स्थितम्--**स्वतः सतः** इति । § 1136

नन्वेवं चेदिदमनुमानं तर्हि **मिथ्याज्ञानमप्रमाणम्** इत्येवास्तु, किं **विसंवादात्** इत्यनेन इति चेत् ? उच्यते--विवादास्पदीभूतं मिथ्याज्ञानम् अदृष्टावरणम् इति साधयन्तं प्रति यदा कश्चिद् ब्रवीति कस्यचिन् मिथ्याज्ञानस्य अभावात् साध्यदृष्टान्तधर्मिणोरसिद्धिः इति; तदा तं प्रति तद्धर्मिणः साधनार्थम् **विसंवादात्** इत्युच्यते । यतः अभ्युपगच्छतापि प्र ज्ञा क रे ण प्रतिभासाद्वैतम् इदम् अतो जायते, इदमस्माद् दूरं निकटम् इत्यादि विकल्पबुद्धीनां निर्विषयत्वाऽपरनामा विसंवादोऽभ्युपगन्तव्यः कथमन्यथा प्र-

---

१ तः ] प्रभुरेषोऽवलोकते
५ त्र ] ज्ञानाभावान्न ग्रहणमित्यत्र ।
५ ने ] सति ।
७ वृत्तौ ] टीकायाम् ।
९ स ] ज्ञाता ।
१२ त ] विभ्रमप्रतिपत्तिः ।
१४ भासु ] स्व
२१ वि ] ज्ञानरूपता ।
२८ त ] साध्यदृष्टान्तधर्मिणोः ।
२८ र्मिणः ] णोः

233/mkj तिभासाद्वैतम् ? तथा च *कथं धर्म्यसिद्धिः ? तथापि मिथ्याज्ञानं विसंवा-
दात् इत्यस्तु किम् अप्रमाणपदेन इति चेत् ? न; अनुमानेन आवरणसत्ता
साध्यते भवता, तच्च मिथ्या तत्कुतः ततो भावतः तत्सिद्धिः इति वदन्तं
प्रति एवमभिधानात् । § 1137

अत्रायमभिप्रायः--अनुमानं चेत् मिथ्यात्वपेक्ष्यते; तर्हि विसंवादादप्रमाणं
स्यात्, प्रमाणं चेष्यते, तन्न मिथ्या इति । ननु स्यादेदत् प्रमाणं य-
/ms दि विसंवादकं स्यात्, यावता मिथ्यात्वेऽपि मणिप्रभामणिज्ञानवत् साध्य
प्रतिबन्धादविसंवादकमिति चेत्; ननु तन्मणिज्ञानम् अविसंवादेऽपि यदि
न प्रमाणम्; क्वथमनुमानं तल्लक्षणव्यभिचारात् ? प्रमाणं चेत्; प्रत्यक्षम्,
अनुमानं वा ? अन्यत्र मण्यध्यवसायः अन्यत्र मणिप्राप्तेः नाध्यक्षम्, इत-
रथा मरीचिकानिचये जलाध्यवसायः कूपादौ जलप्राप्तौ अध्यक्षं स्यात् ।
भवति जातपरितोषस्य इति चोदवदेत् यदि मणिभ्रान्तिः इन्द्रियज्ञानम्, न
चैवम्, रूपसाधर्म्यदर्शनापेक्षणात्, अक्षविकारमन्तरेण भावात्, वावकैः *
सन्तानान्तरेण समर्पणात्, प्रतिसंख्यानेन बाधनात्, मानसी तु युक्ता युक्त
रजतभ्रान्तिवत् । अस्या इन्द्रियजत्वे सति-- § 1138

*नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम् ।
शुक्तौ वा रजताकारः रूपसाधर्म्यदर्शनात् ॥§ 1140

प्र° वा° ३ । ४३ इति विरुध्यते । § 1141

मनोविभ्रमं प्रति अक्षविभ्रमस्य दृष्टान्तत्वानुपपत्तेः इति । भवतु मान-
सी नेरतस्य प्रमाणमिति चेत्; प्रत्यक्षाद् अन्यस्यां तदनुरोधात् प्रत्यक्षत्वे
दर्शनपृष्ठभाविनो विकल्पस्य व्यवहारिणं प्रति स्मृतित्ववर्णनमयुक्तम् । न
खलु व्यवहारी दर्शनाद् विकल्पमन्यमिच्छति **मनसोर्युगपद्वृत्तेः** प्र° वा° २
। १३३ *इत्यादिवर्णनात् । § 1142

---

१ *] मिथ्याज्ञानस्य प्रसिद्धेः ।
३ त] अनुमानात् ।
३ तः] परमार्थतः ।
३ त] आवरण ।
५ मिथ्यात्व] ध्याप्य
६ त्] तद
८ णिज्ञा] मणिप्रभामणिज्ञानम् ।
९ नुमानं] प्रमाणम् ।
१० अ] कुञ्चिकाविवरस्थायां मणिप्रभायाम् ।
१० अन्य] अपवरकाभ्यन्तरे ।
११ क्षं] प्रमाणम् ।
१२ देत्] चेत्; स्यादेतत्
१३ कैः] तुलना--कदाचिदन्यसन्ताने तथैवार्प्येत वाचकैः । दृष्टस्मृतिमपेक्षेत न भासेत परिस्फुटम् ॥--प्र° वा° २ । २९८ ।
१३ *] वाचकैः
१४ तिसंख्यानेन] तत्त्वज्ञानेन ।
१४ युक्त] शुक्तौ
१५ अस्या] भ्रान्तेः ।
१६ भ्रान्तिनिमित्तेन] सादृश्यादिना ।
१६ म्] नित्यत्वादिलक्षणम् ।
२० स्य] नेतरस्य
२३ *] सविकल्पाविकल्पयोः । विमूढो लघुवृत्तेर्वा तयोरैक्यं व्यवस्यति ॥ इति शेषः ।

अस्तु नाम तमः  तदन्यत्र मणिप्राप्तेः धूमादग्निवत्, पूर्वं च तत्प्रभाव्यवसायः स्यात्, वृक्षाध्यवसाये शिंशपाध्यवसायवत्, न चैवम्, अविचारैकमजातपरितोषं व्यवहारिणं प्रति तदप्रामाण्यवर्णनात् । एतेन कार्यलिङ्गत्वं तयोर्निरस्तम्; तदध्यवसायात् प्राग् अग्निव्यवसायवत् प्रभाध्यवसायेन भवितव्यमिति कुतस्तत्र मण्यध्यवसायः ? नहि धूमं निश्चिन्वतः  पावकस्य /ms अन्यस्य वा अध्यवसायो दृष्टः । तत्र मणिव्यवसायस्य अनुमानत्वे **मणिप्रदीपप्रभयोः** प्र० वा० २ । ५७ इत्यादि सुघटम् । यस्तर्हि अवधारितविशेषः एवमनुमानं करोति— प्रभावानयं गृहप्रदेशविशेषः मणिसहितप्रभाविशेषत्वात् अन्यत्रोपलब्धैवंविधतत्प्रदेशवत् । कुञ्चिकाविवरप्रभाविशेषो वायं मणिसंस्थानवान् तद्विशेषत्वात् पूर्वोपलब्धतद्विशेषवत् इति, [तत्र]  का वार्त्ता 234/mkj ? अनुमानमेव तदिति ब्रूमः । अयं तु विशेषः--यद्येतत् मिथ्याज्ञानमप्रमाणं कथमन्यस्य तथाविधस्य अनुमानस्य प्रामाण्ये दृष्टान्तः स्यात् ? न खलु साध्यमेव दृष्टान्तीभवति अतिप्रसङ्गात् । ततः स्थितम्--अनुमानं चेत् मिथ्याज्ञानम् अप्रमाणं स्यात्, अर्थादुत्पत्तौ तैमिरिकज्ञानवत् इत्यस्य प्रदर्शनार्थम् अप्रमाणग्रहणमिति । § 1143

अथवा, अन्यथा पूर्वपक्षयित्वा इदं व्याख्येयम् । तथाहि--यदुक्तम् अनन्तरप्रस्तावे **तदेतद् द्रव्यपर्यायसामान्यविशेषविषयम्** इत्यादि **प्रमाणम् अविसंवादात्** इत्यन्तम्; तत्र तज्ज्ञानस्य वेदम स्वभावे आत्मनि समवायात् स एव तांस्तथा बुध्यत इति नैयायिकादिः । शरीरे समवायात् शरीरं न मनः इति चार्वाकाः । प्रधानम् इति सांख्याः । तज्ज्ञानं स्वतः प्रमाणं न परतः इति मीमांसकाः । तदुक्तम्-- § 1144

*स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् ।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते ॥§ 1146

मी० श्लो० सू० २ श्लो० ४७ इति; § 1147

तत्राह--**मिथ्याज्ञानम्** इत्यादि । **ज्ञातुः अवग्रहादिमतिस्मृति** /ms **संज्ञाचिन्ताभिनिबोधात्मकं प्रागभिलापसंसर्गात् मतिज्ञानप्रभेदलक्षणं ज्ञानम्** इति सम्बन्धः । न शरीरस्य प्रधानस्य वा; तस्य ज्ञातृत्वायोगादिति निरूपयिष्यते अचेतनत्वात् घटादिवत् इति । कुतो ज्ञातुः ? इत्याह--**स्वतः** स्वस्वाभाव्यात्, नार्थान्तरज्ञानसम्बन्धादिति च । तज्ज्ञानं च प्रमाणमुक्तम् । कुतः ? **अविसंवादात्** । सांप्रतं वोच्यते, स्वतः सतो ज्ञातुः । ततोऽयमर्थो जायते--तज्ज्ञानं प्रमाणम् अविसंवादात्, स्वविषयीकृतस्वार्थाऽव्यभिचारात् ।

---

१ मः] अनुमानम्
७ इत्यादि] मणिबुद्ध्या भिधावतोः ।
भिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति
॥ इति शेषः ।
१७ स्तावे] सिद्धिवि० २ । २४ ।
१८ म] चेतन
१९ स] आत्मा ।
१९ रीरं] बुध्यते ।
२० म्] बुध्यते ।
२७ इति] पृ० २१७ ।

अनेन स्वकार्ये प्रवृत्तिलक्षणे स्वग्रहणापेक्षणात् परतः तत् इत्युक्तं भवति । **स्वतो** ज्ञातुः सकाशात् इति का विभक्तिपरिणामेन सम्बन्धः, उत्पत्तेः इति शेषः, प्रमाणम् इति घटनात् । किंभूतात् ? इत्याह--**स्वतः सतः** इति । विवृतमिदम् । अनेनापि कारणगुणतस्तदुद्भवात् परतः तद् इति; मन्यते । अत्र दृष्टान्तमाह--**प्रमाणं मिथ्याज्ञानं विसंवादात् आवरणोद्भूतेश्च** यथा परतः इति शेषः, आवरणाद् उद्भूतिः आवरणोद्भूतिः इणो । कथंभूतात् ? **दोषहेतोः** इति । शेषम् उक्तवत् अ न न्त की र्त्ति कृ तेः स्व तः प्रा मा ण्य भ ङ्गा द् अवसेयमेतत् । § 1148

यदि वा, **दोषहेतोः** इत्यादि अन्यथावतार्य अधुना व्याख्यायते--कुतो नु खलु आवरणोद्भूतिः ? यदि स्वतः; मिथ्याज्ञानमपि तत एव अस्तु । परतश्चेत्; स वक्तव्यः, न च सोऽस्ति, अप्रमाणत्वात् । नहि बीजमिव अङ्कुरम् आवरणं जनयन् कश्चिदुपलभ्यते अनुमीयते वा लिङ्गाभावात् । रागादिः उपलभ्यते; सत्यम्; किन्तु तदनन्तरमेव आवरणं जायमानं

/ms नोपलभ्यते अनुमीयते वा । भवतु वा सकारणमावरणम्, तथापि तेन मूर्तेन अमूर्तस्य आत्मनः पांशुराशिना इव आकाशस्य न सम्बन्ध इति;

235/mkj अत्राह--**दोषहेतोः** इत्यादि । दोषो रागादिः स एव हेतुः कारणं तस्मात् **आवरणोद्भूतेः** यद्वा स हेतुर्यस्याः तस्या इति । दृष्टान्तमाह--**विषादिवत्** इति । जीवोपयुक्तविषादेरिव तद्वदिति । तथाहि--मिथ्याज्ञानादनुमिता आवरणोद्भूतिः ज्ञातृरागादिपूर्विका तदुपघातहेतुत्वाद् विषादिवत् इति । जीवोपयुक्तविषादेरिव तद्वत् इति । वक्ष्यति च--**मनोध्यक्षायकर्मनिराश्रवैः शुभेरशुभेश्च यथास्वं पुण्यपापबन्धो जीवानाम्** सिद्धिवि° प्रस्ता° ४ इत्यादि । यदुक्तम्--अमूर्त्तस्य कथं मूर्त्तेन सम्बन्ध इति ? तदप्यनेन निरस्तम्; तत्सम्बन्धहेतोर्दोषस्य अमूर्त्तेऽपि भावात् । एतदपि वक्ष्यति--**मलैर्निसर्गाद् बध्येत** सिद्धिवि° प्रस्ता° ४ इत्यादिना । दोषस्य हेतोः विषयादेरिव तद्वद् इति वा व्याख्येयम् । § 1149

कारिकां विवृण्वन्नाह--**मत्यादि** * **मत्यज्ञानभेदा** मत्यज्ञानविशेषाः, उपलक्षणमेतत् तेन श्रुताज्ञानादिभेदा गृह्यन्ते । के ते ? इत्याह--**अवग्रहादयः** । आदि [शब्देन] ईहादिपरिग्रहः । एतदपि उपलक्षणम् अनुस्मरणादिभेदानाम् । ते किम् ? इत्याह--**प्रमाणाभासाः** प्रमाणं न भवन्ति इत्यर्थः । कुतः ? इत्याह--**मिथ्या** इति । **मिथ्या** अन्यथा**ग्रहणात्मका** यतः । § 1150

ननु अनुमानज्ञानम् अन्यथास्थितं स्वलक्षणम् अन्यथा गृह्णदपि प्रमाणं ततो नेदमप्रमाणलक्षणं व्यभिचारादिति चेत्; अत्राह--**प्रमाणस्य** इत्यादि ।

---

२ का] का इति पञ्चमीविभक्तिः ।
४ तः] प्रामाण्यम् ।
६ इणो] तस्याः
१० त] स्वत
२० वैः] मनोवाक्कायकर्मभिरास्रवैः
२३ अमूर्त्तेऽपि] जीवे ।
२४ यादेरिव] विषादेरिव
२६ *] मत्यज्ञान इत्यादि
३१ अन्य] सामान्यरूपेण ।

**प्रमाणस्यापि प्रतिसारो** यथावस्थितार्थनिर्णयो **लक्षणं** यस्य तस्य भावात् **त-** /ms **त्वात्** । एतदुक्तं भवति--प्रमाणत्वं यथार्थनिर्णयेन व्याप्तं सर्वप्राणभृतां सिद्धम्, मिथ्यैकान्तादिप्रवादेऽपि तद्विषयस्यैव परमार्थतो ज्ञानस्य प्रमाणत्वोपवर्णनात् परैरपि, ततो यथार्थे निवर्तमाने तदपि निवर्त्तते यथा वृक्षत्वे निवर्तमाने शिंशपात्वम्, अन्यथा सर्वस्य प्रमाणमिति न कश्चित् स्वपक्षसिद्धिविकलः स्यादिति । अनुमानं चेत् मिथ्या अप्रमाणम् । शेषमत्र चिन्तितम्, चिन्तयिष्यते चानकस्य कथम्भूतस्य कुतो भवन्ति ? इत्याह--**स्वतः** इत्यादि । [स्वतः] आत्मनो जीवस्य न निराधारो नापि शरीरस्य प्रधानस्य वा । किंभूतस्य ? **प्रमाणभूतस्य** । यथार्थग्रहणस्वभावस्य **स्वतो** नार्थान्तरज्ञानसमवायात् । कुतो भवन्ति ? इत्याह--**परतो विपर्यासोपपत्तेः** । अत्रापि **आत्मनः** इत्यपेक्ष्यम्, आत्मनः **परतः** मूर्त्तकर्मणः सकाशात् या विपर्यासोपपत्तिः अन्यथास्वभावापादनं तस्याः । अत्र दृष्टान्तमाह--**मत्त** इत्यादि । **मत्तमूर्च्छितस्य** इव **तद्वत्** इति । यथा मत्तादेः परतो विषादेः विपर्यासोपपत्तेः मिथ्याऽवग्रहादयः तथा अन्यस्यापि इति निदर्शनार्थः । § 1151

एतेन इदमपि प्रत्युक्तं यदुक्तं परेण-- **कर्मणा आत्मस्वरूपाऽखण्डने तदवस्थं जैनस्य सर्वस्य सर्वदर्शित्वम्, खण्डने आत्माऽनित्यत्वम् । आवरणं च प्रकाश्यप्रकाशकयोः अन्तराले वर्त्तमानं घटप्रदीपयोरिव प्रावरणम् प्रकाश्यस्यैव प्रकाशनं प्रतिबध्नाति न प्रकाशकस्य । नहि अन्तर्यवनिकया दीपस्य आत्मप्रकाशनं प्रतिहन्यते इति आत्मनः तस्मिन् सत्यपिस-** /ms **र्वथा स्वरूपप्रकाशनं स्यात्** । इति; कथञ्चित् आत्मस्वरूपखण्डनस्य 236/mkj अभिमतत्वात्, आत्मनः परतो विपर्यासोपपत्तिवर्णनात्, अन्यथा कोऽस्यार्थः स्यात्, कथञ्चिदनित्यत्वस्य व सर्वथा अन्यत्रापि तदसंभवात् । दृश्यते हि किट्टिकालिकादिना कलुषितवपुषाम् अन्यदीनां स्वरूपेऽपि चित्रप्रकाशनम्--
§ 1152

*मलविद्धमणेर्व्यक्तिर्यथाऽनेकप्रकारतः ।
कर्मविद्धात्मनो व्यक्तिस्तथाऽनेकप्रकारतः ॥§ 1154

लघी० श्लो० ५७ इति । § 1155

**स्वतः प्रमाणभूतस्य** इत्यस्याऽनभ्युपगमे दूषणमाह--**यदि** इत्यादि । **यदि** चेत्, **पुनः** इति वितर्के पक्षान्तरसूचने वा, **स्वत एव** स्वस्वभावत एव स्वकारणादेव यो **ज्ञाता** यथार्थग्राही **न स्यात्** न भवेद् आत्मा इति विभक्तिपरिणामेन सम्बन्धः । तत्र को दोषः ? इत्याह— **परतः** इत्यादि । स्वरूपात् स्वहेतोर्वा परं ज्ञानं ततः, कुतो नैव स्यात् ज्ञाता इति सम्बन्धः ।

---

१ स्यापि ] वि
७ स्य ] चानेकधा । कस्य
८ स्य ] चार्वाकाभिमतस्य ।
८ स्य ] सांख्याभिमतस्य ।
१९ त ] आवरणे ।
२२ व ] च
२२ अ ] दृष्टान्ते मण्यादौ ।
२३ अन्य ] मण्या

अत्र दृष्टान्तमाह--**अचेतनवत्** इति । घटादिः अचेतनः तेन तुल्यं वर्त्तते इति तद्वत् इति । प्रयोगश्च--यो ज्ञानस्वभावरहितो नासौ ज्ञाता यथा घटादिः, ज्ञानस्वभावरहितश्च परस्य आत्मा इति । § 1156

ननु किमिदमचेतनमिति ? चेतना[ऽ]समवायिकारणम्; तत्समवायिकारणं तर्हि चेतनं प्रसक्तमिति आत्मापि चेतन इति कथम् अज्ञाता, चेतनस्यैव तद्व्यपदेशादित्यभ्युपगमविरोधः । न च चेतनास्वभावो न तत्समवायिकारणम्; अरूपादिस्वभावस्यापि घटादे रूपादिसमवायिकारणत्वोपपत्तेः /ms । अथ चेतनायाः अन्यदचेतनम् स्यात्; न च तदस्ति, प्रमाणाऽभावादिति दृष्टान्तमात्रमशेषमिति न साध्यधर्मिसंभवः, *तद्भावे वा तत एवासिद्धेः किमेतेन अनुमानेन ? अत एव तत्सिद्धौ अन्योऽन्यसंश्रयः--तथा हतो तस्य आत्मतत्त्वसिद्धौ अन्ये घटादयो दृष्टान्तीभवन्ति, ततश्च तत्सिद्धिः इति । यदि पुनः अचेतनत्वाविशेषेऽपि आत्मन *आश्रयत्वं घटादेस्तत् अचेतनवत् इति सामान्यवचनेन लभ्य[ते] इति चेत्; न; उभयथाप्यदोषात् । तथाहि--अस्तु तावच्चेतनाऽसमवायिकारणम् अचेतनं घटादि, चेतनं च तत्समवायिकारणम्, तथापि न इत्युपगममाहानिः , *चेतनापरिणामकारणस्यैव समवायिकारणत्वात् नान्यस्य, अन्यथा चक्षुरादेरपि तत्कारणत्वप्रसङ्गात् । *तत्र तस्याः असमवायान्नेति चेत्; अथ कोऽयं तत्र समवायः ? तस्मिन् सति आत्मलाभ इति चेत्; प्रसङ्गः पूर्ववद्भवेत् । तत्रोत्कलितं तदेव न बुध्यामहे । तस्मिन् सति तदात्मन उद्भव इति चेत्; न किञ्चित् परिहृतम् । तदाधेयत्वम् इत्यपि वार्त्तम्; भूतले कलशादेः समवायप्रसङ्गात् । अयुतसिद्धस्य इति चेत्; किमिदमयुतसिद्धस्य इति ? अपृथक्सिद्धस्येति चेत्; न; [अ]पृथक्सिद्धत्वं यदि कारणादेकान्तेनाभिन्नसिद्धत्वम्; सांख्यदर्शनम् । 237/mkj अथ कथञ्चित्; जैनशासनम् । स्यान्मतम्— कारणाभिन्नदेशकालप्रभवत्वम्; आकाशादि समवायिकारणं किन्न स्यात् ? नहि तद्देशादिपरिहारेण चेतनासंभवः तदसर्वगतत्वप्रसङ्गात् । बुद्ध्यात्मप्रदेशस्य चक्षुराद्यभिन्नदेशादित्वे /ms बुद्धेरपि तद्भवति न वेति चिन्त्यताम् । ततः चेतनैव चेतनासमवायिकारणम्, तदकारणमचेतनम् इति स्थितम् । § 1157

---

४ स] चेतनस्य समवायिकारणं यन्न भवति तदचेतनमित्यर्थः ।
६ स्यैव] ज्ञातृव्यपदेशात् ।
८ च] चेतनमस्ति ।
९ *] चेतनसद्भावे वा ।
९ एवासिद्धेः] एव सिद्धेः
१० तो] हि--अतः
१२ *] धर्मित्वम् ।
१२ त्] दृष्टान्तत्वम् ।
१४ ना] चेतनायाः समवायिकारणं यन्न भवति तदचेतनमित्यर्थः ।
१५ माहानिः] महानिः
१५ *] यः स्वयं चेतनरूपेण परिणमति तस्यैव ।
१६ पि] चेतनासमवायिकारणत्वप्रसङ्गात् ।
१७ *] चक्षुरादौ ।
१७ त्र] चेतनायाः ।
१७ स्याः] समवायाभावात् ।
१८ ङ्गः] चक्षुरादौ सति चेतनाया आत्मलाभस्य प्रतीतेः ।
१८ लितं] तत्त्वम्;
२२ म्] सांख्येन कार्यकारणयोरभेदत्वस्वीकारात् ।
२४ आकाशादि] चेतनासमवायिकारणम् ।
२५ वः] आकाशस्य असर्वगतत्वप्रसङ्गात् ।

यत्पुनरुक्तम्--अरूपादिस्वभावा घटादयो रूपादिसमवायिकारणमिति; तदप्यनेन निरस्तम्; ननु घटादिवत् आत्मनोऽपि अतत्स्वभावस्य चेतनासमवायिकारणत्वे साध्यदृष्टान्तयोरविशेष इति चेत्; आस्तां तावदेतत्, अनन्तरं निरूपणात् । भवतु वा चेतनाया अन्यदचेतनम्, तथापि न सर्वस्य दृष्टान्ताऽविशेषः, अचेतनत्वेऽपि आत्मनः साध्यधर्मित्वेन उपादानात्, अन्यद् अचेतनं दृष्टान्तीभवति, यथा पिण्डोऽयं सास्नादिमान् गोवत् इत्युक्ते अन्यो गौः दृष्टान्तीभवति । न चान्यधर्मसिद्धिचोदनम्; न्यायसिद्धे तस्मिन् परारोपितधर्मनिषेधात् । § 1158

इदमपरं व्याख्यानम्--**यदि पुनः स्वत एव** स्वेनैव रूपेण ज्ञाता अर्थग्रहणपरिणामी **न स्याद्** आत्मा **परतो**ऽसमवायि-निमित्तकारणात् **कुतः** स्यात् ? नैव नहि **तथापरिणामस्वभावरहितस्य** कस्यचिद् अन्यः **तथापरिणामः अचेतनवत्** पृथिव्यादिवत् इति, लोकायतापेक्षया घटादिवत् इति । § 1159

ननु यदुक्तम्--(?')आत्मनः चेतनस्याभेदे तद्वत् चक्षुरादिरपि तत्समवायिकारणं स्यात्, भेदस्य समवायस्य वाऽविशेषादिति; तन्न युक्तम्; भेदाऽविशेषेऽपि कस्यचिदेव कस्याश्चित् प्रत्यासत्तेः कार्यं प्रति तत्कारणत्वोपपत्तेः, चित्रत्वाद् भावशक्तीनामिति चेत्; अत्राह--**परस्य** इत्यादि । **परस्य** ज्ञातुः अन्यस्य कारणस्य **अतिशयस्य** सामर्थ्यस्य **कल्पनायां स्वत एव** /ms
इत्यनुवर्त्तते, अन्यथा अनवस्था स्यादिति मन्यते । **आत्मनः किन्न कल्पयेत्** स्वत एव ग्रहणातिशयं नैयायिकः, कल्पयेदेव न्यायस्य समानत्वादिति मन्यते । § 1160

अथवा, अन्यथा पूर्वपक्षयित्वा इदं व्याख्येयम्--(?')नात्मा स्वतः परतो वा ज्ञाता तस्य ज्ञानसम्बन्धाऽभावात्, अपि तु प्रधानं ज्ञातृ विपर्ययात्, ततस्तस्यैव मिथ्याज्ञानग्रहादयः परतो विपर्यासोपपत्तेः परिणामित्वात्, नात्मनो विपर्ययात् इति सांख्यः; तं प्रत्याह--**परस्य** इत्यादि । **परस्य** आत्मनोऽन्यस्य प्रधानस्य **अतिशयकल्पनायां** यथार्थेतरज्ञानसामर्थ्यकल्पनायाम् **आत्मनः** पुरुषस्य तमतिशयं **किन्न कल्प्यते,** यतः सांख्यप्रधानवद् आत्मनोऽपि परिणामाऽविरोधादिति मन्यते । § 1161

ननु भवतु स्वतो ज्ञाता आत्मा सावरणश्च तथापि आवरणाभावे अक्षव्यापारसमकालमेव भावतोऽर्थं विषयीकरोतु तन्मात्र एव तत्सामर्थ्यात् । तद्यथा--**प्रदीपः अनावरणेऽपि स्वयोग्यमेव प्रकाशयति न सर्वम्** इति प्र ज्ञा क रः; तत्राह--**ज्ञस्वभावस्य** इत्यादि । जानाति इति ज्ञः स्वभावो यस्य **ज्ञस्वभावस्य** आत्मनः **जानतो न कश्चिद् विरोधः** । किम् ? इत्याह— **द्रव्यम्,** न गुणपर्यायौ । अनेन रूपाद्यवयवात्मन एकस्य 238/mkj
स्थवीयसः तेन ग्रहणादिति मन्यते । वर्तमानकालविशेषणं तत्तस्य जानतो न विरोध इति चेत्; अत्राह--**त्रिकालगोचरम्** । त्रयः कालो गोचरो

१३ त्] आत्मवत् ।
१५ ति] समवायिकारणत्वोपपत्तेः ।
२२ तु] प्रकृतिः सांख्याभिमता ।
३४ णं] द्रव्यम् ।

यस्य तत् तथोक्तं त्रिकालावयविरूपमित्यर्थः । एवमपि खण्डशो जान-
/ms त इत्याह— **अशेषं** सर्वम् । केन प्रकारेण ? इत्याह--**कथञ्चित्** । येन केनचित् प्रकारेण । तथाहि— पूर्वं चक्षुरादिना नवत्वविशेषणविशिष्टस्य घटस्य ग्रहणम्, पुनः तस्यैव तेन पुराणविशिष्टस्य, तदनन्तरं पूर्वपर्याय-विशिष्टस्य स्मरणात्, प्रत्यभिज्ञानात् पूर्वापरपर्याययोः तां यावः , तर्केण जन्मादिमरणपर्यन्तं पर्यायाणाम् एकत्वाविनाभाविनां दर्शनस्मरणाभिज्ञानज-न्मना साकल्येन सामान्यतः स्वसाध्याऽविनाभावे तेषां गृहीते सति, द्रव्यस्य अनन्तता अनुमानतः प्रतीयते इति । § 1162

एके अनुमानजन्मना मानसप्रत्यक्षेत्व कथम् इति चिन्त्यम् । अक्षजात्यत्वात् न किञ्चिदप्रत्यक्षं स्यादिति चिन्तितम् । § 1163

कदा ? इत्याह--**प्रतिबन्धाभावे** । यस्य ज्ञानस्य स्वविषये प्रवर्तमानस्य यत् प्रतिबन्धकं कर्म तस्य अभावे सति । ननु ज्ञानस्वभावस्य प्रतिब-न्धरहितस्यापि अभिन्नदेशकालाऽर्थग्रहणमात्मनः; अन्यथा अतिप्रसङ्ग इति चेत्; अत्राह--**अप्राप्यकारिणः** । प्राप्तुं ग्राहकसमानदेशकालं कर्तुं शक्यं प्राप्तं यन्न तथा भवति तदप्राप्यं कर्तुं गृहीतुं शीलस्य अप्राप्यकारिणः, देशवत् कालभिन्नस्यापि ग्रहणे विरोधाऽभावादिति मन्यते । *यस्तु मन्यते स्वरूपादन्यत्र न ज्ञानस्य प्रवृत्तिः तत्कथमुच्यते **अप्राप्यकारिण** इति ? स दृष्टव्यो भवति--कथं स्वरूपे वृत्तिः ? तत्र वर्त्तमानस्य दर्शनादिति चेत्; तदितरत्र समानम् । निरूपपितु चैतत् । § 1164

अत्राह मीमांसकः--तदशेषं जानतः षड्भिः प्रमाणैर्न कश्चिद् विरोधः इति । तं प्रत्याह--**स्व** इत्यादि । यथोपवर्णितस्य **आत्मनः स्वविषयं** सत् सर्वम्
/ms अन्यथा व्याप्त्यप्रतिपत्तिः, तत्र **वैशद्यमनुभवतो न कश्चिद् विरोधः** प्रतिब-न्धाभावे इत्यनुवर्त्तते । दृष्टान्तमाह--**परोक्ष** इत्यादि । ननु प्रत्यक्षपरोक्षवत् इति वक्तव्यम् न्याय्यत्वादिति चेत्; न; परमतापेक्षया एवमभिधानात् । त-था हि--यदुक्तं प्र ज्ञा क रे ण--**कथमेकत्र क्रमवित्तयोऽवगम्यन्ते यतोऽशेषं द्रव्यं कथंविज्ञानतो न कश्चिद् विरोध इति स्यात्** इति तदुद्दिश्य **परोक्षं** साधारणस्पष्टाकारविषयमानादिविकल्पज्ञानं तच्च **तत्प्रत्यक्षं** च स्वरूपापेक्ष-या तेन तुल्यं वर्त्तते इति **तद्वद्** इति व्याख्येयम् । यथा एकं युगपद्

४ स्यैव ] घटस्यैव ।
५ यावः ] तदेकत्वस्य
७ तेषां ] पर्यायाणाम् ।
९ क्षेत्व ] णेति; तत्
१० त्वात् ] अक्षातीतत्वात्
१५ प्राप्तं ] प्राप्यं
१६ * ] प्रज्ञाकरः ।
१८ दृ ] प्र
१९ पितु ] रूपितं
२० इति ] यदि षड्भिः प्रमाणैः स्यात् सर्वज्ञः केन वार्यते । एकेन तु प्रमाणेन सर्वज्ञो येन कल्प्यते । नूनं स चक्षुषा सर्वान् रसादीन् प्रतिपद्यते ॥--मी॰ श्लो॰ चोदनासू॰ श्लो॰ १११--१२ ।
२२ त्तिः ] व्याप्तेः त्रिकालगोचरत्वात् ।
२५ त्र ] आत्मनि ।
२५ म ] क्रमज्ञानानि ।
२६ थंविज्ञा ] थञ्चिज्ञा
२७ ण ] णा
२८ ए ] परोक्षं ज्ञानम् ।

आकारद्वयसाधारणमवगम्यते तथा क्रमेण अनेकवित्तिसाधारणमिति मन्यते । मीमांसकमुद्दिश्य समत्वका राद्यन्तराऽविशदवृक्षादिज्ञानं **परोक्षं** तदिव । चकाराभावे वि सत् प्रत्यक्षमुच्यते तस्य इव तद्वत् इति व्याख्येयम् ।
§ 1165

पक्षे प्रमाणाबाधं दृष्टान्ते साध्यं दर्शयन्नाह सौगतः--**नास्माकम्** इत्यादि । **नास्माकं** सौगतानाम् **आवरणं** च ज्ञानावरणीयादिकर्म, **क्षयश्च उपशमश्च** अन्यस्य अप्रकृतत्वात् अश्रुतेः, स्वावरणस्यैव क्षय उपशमश्च गृह्यते तेषां 239/mkj च **सा** बुद्धिः नावरणवशात् **मिथ्याबुद्धिः** येन **मत्यज्ञानभेदात्*** इत्यादि शोभेत । नापि तत्क्षयोपशमवशाद् यथार्थबुद्धिः यतो **ज्ञस्वभावस्य** इत्यादि च । कुतः तर्हि सा ? इत्यत्राह--**अपि तु,** किन्तु **स्वकारणशक्तेः** मिथ्याबुद्धेः कारणं कदाचित् कलुषितं लोचनादि **तिमिराशुभ्रमण** न्यायबि० १ । ६ इत्यादि वचनात्, यथार्थबुद्धेः तदेव विपरीतम्, तस्य शक्तिः यथोक्तज्ञान- /ms जननसामर्थ्यम् तस्या बुद्धिः इति सम्बन्धः । § 1166

ननु यथा कामलाद्युपलिप्ताच्चक्षुरादेः इन्द्रियजा भ्रान्तिः तथा कर्माऽऽवरणोपलिप्तात्मनः सा मानसी विकल्पभ्रान्तिरिति; अत्राह--**स्वलक्षण** इत्यादि । **स्वलक्षणदर्शनेन आहिते** स्थापिते **सन्ताने** या **विकल्पवासना** विकल्पकारणभूता वासना । यदि वा, तद्दर्शनाहिता स्वकार्यजननं प्रत्यभिमुखीकृता पूर्वपूर्वविकल्पजनिता वासना तस्याः **प्रकृतेः** स्वभावात् नावरणोद्भूतेः **संवृतिः** स्वतः उद्भूता तत्त्वसंवरणात् सामान्यादितिकल्पबुद्धिः । सा किं करोति ? इत्याह--**व्यवहारं** मिथ्येतररूपम् **आरचयति** । कुतः ? इत्याह--**वस्तुमात्रव्यवसायात्**--अस्वलक्षणेऽपि स्वाकारे स्वलक्षणलेशाध्यवसायात् । अनेन मिथ्यात्वमस्य दर्शयति । **चेत्** शब्दः पराकूतोद्योतकः । § 1167

ननु मत्तमूर्च्छितादेः इन्द्रियजा मानसी भ्रान्तिः विषादिमूर्त्यसवसंय कलुषितप्राक्तनान्मनसो दृष्टापि यदृष्टतथाविधभावसंपर्कमनःपूर्विका कल्प्यते; तर्हि क्षित्यादेः बीजसह[कृता]या दृष्टोऽपि अङ्कुरः खलविलादिव्यवहिते बीजे अङ्कुरो दृश्यमानः क्षित्यादेरेव किन्न कल्प्यते ? तथा, यद्यथा यथा मदिरादिप्रतिबन्धनिवृत्तिः तथा ज्ञानेषु मिथ्यात्वनिवृत्तिर्दृष्टापि यद्यन्यथा

२ का] समन्धका
३ वि] ऽपि
८ सा] वशात्
८ *] दा
१२ इत्यादि] तिमिराशुभ्रमणनौयानसंक्षोभाद्य...--तिमिरमक्ष्णोर्विप्लवः, इन्द्रियगतमिदं विभ्रमकारणम् । आशुभ्रमणम् अलातादेः । मन्दं हि भ्राम्यमाणे अलातादौ न चक्रभ्रान्तिरुत्पद्यते तदर्थमाशुग्रहणेन विशेष्यते भ्रमणम् । एतच्च विषयगतं विभ्रमकारणम् । नावा गमनं नौयानम् । गच्छन्त्यां नावि स्थितस्य गच्छद्वृक्षादिभ्रान्तिरुत्पद्यत इति यानग्रहणम् । एतच्च बाह्याश्रयस्थितं विभ्रमकारणम् । संक्षोभो वातपित्तश्लेष्मणाम् । वातादिषु हि क्षोभं गतेषु ज्वलितस्तम्भादिभ्रान्तिरुत्पद्यते । एतच्च अध्यात्मगतं विभ्रमकारणम् । सर्वैरेव च विभ्रमकारणैरिन्द्रियविषयबाह्याध्यात्मिकाश्रयगतैः इन्द्रियमेव विकर्तव्यम् ।--न्यायबि० टी० १ । ६ ।
१९ सामान्यादिति] वि
२३ संय] मूर्च्छाशयसंपर्क
२६ य] निरर्थकमिदम् ।
२६ था] ?

स्यात्; न तर्हि कारणनिवृत्तिप्रयुक्ता कार्यनिवृत्तिरिति न क्वचिद् व्यवतिष्ठेत इत्यभिप्रायवता **मिथ्याज्ञानम्** इत्यादि वदता एतत् परिहृतं यद्यपि तथापि /ms भङ्ग्यन्तरेण परिहरन्नाह--**न** इत्यादि। परोक्तनिषेधे **न** इति शब्दः। कुतः ? इत्याह--**क्षणिकैकान्ते अर्थस्य** कार्यस्य **क्रिया** करणं **तद्विरोधस्य निर्णयाद्** अनन्तरातीतप्रस्तावे इति शेषः। § 1168

ततः किं जातम् ? इत्याह--**कार्य** इत्यादि। § 1169

…3 कार्यकारणता नैव चित्तानां सन्ततिः कुतः।
सन्तानान्तरवद्भेदात् वास्यवासकता कुतः॥ ३

॥§ 1171

सत्यां च कार्यकारणतायां कुतः क्वचित् सन्ताननियमः ? सर्वत्र स- 240/mkj र्वेषामानन्तर्या विशेषात्। सत्यपि वास्यवासकता न भवत्येव प्रत्यासत्तेर- भावात्। ततो विकल्प एव [न] भवेत्। § 1172

तद्विरोधनिर्णयात् **कार्यकारणता** कार्यता कारणता वा **नैव**। केषाम् ? इत्याह— **चित्तानां** क्षणिकैकान्ते इत्यनुवर्तते। अर्थक्रियारूपत्वात्तस्या इति भावः। मा भूत् सा, तथापि किम् ? इत्याह--**सन्ततिः** सन्तानः **कुतः चित्तानाम्** इति सम्बन्धः। कार्यकारणताविशेषलक्षणत्वात् सन्ततेरिति मन्यते। भवतु वा तत्र तेषां कारणता तथापि दोषः, इत्याह--**वास्य- वासकता** पूर्वचित्तं तस्य वासकता, उत्तरचित्तस्य वास्यता **कुतः** नैव। कुतः ? **भेदात्** नानात्वात् एकसन्तानत्वेन अभिमतचित्तानाम् इति घटना। दृष्टान्तमाह--सन्तानान्तराणामिव **सन्तानान्तरवद्** इति। § 1173

कारिकां विवृण्वन्नाह--**सत्यां च** इत्यादि। **च** शब्दः अपिशब्दार्थः संभावनायाम्। सत्यामपि **कार्यकारणतायां क्वचित्** लक्षणैकान्ते **कुतो** न कुतश्चित् **सन्ताननियमः**— अयम् एकः सन्तानः, एते च नानासन्तानाः इति विभागः; तदेकान्ते इत्यनुसम्बन्धः। § 1174

ननु येषां क्षणानाम् आनन्तर्येण पूर्वापरभावः तेषामेकसन्तानत्वम् अन्ये- षां विपर्यय इति चेत्; अत्राह--**सर्वत्र सर्वेषाम्** इत्यादि। **सर्वेषां** भिन्नैक- सन्तानपातिनां क्षणानाम् **आनन्तर्याऽविशेषात् सर्वत्र** बहिरन्तर्वा। यद्वा, **सर्वत्र** कार्यकारणाभिमतानाम् **सर्वेषां तदविशेषात्** इति प्रत्येयम्। § 1175

/ms अत्रापरः प्राह--नानन्तर्यात् सन्ताननियमः, अन्यथापि तद्भावात्, जाग- त्प्रबोधचेतसोरिवेति; तस्य समानं कालंश्चये जाग्रच्चेतांसि कस्यचित् प्र-

१३ स्या] कार्यकारणतायाः।
१६ तेषां] चित्तानाम्।
१७ स्य] त्तस्य
२१ णैकान्ते] क्षणैकान्ते
२४ णानाम्] चित्तानाम्।
२८ रः] व्यवहितकारणवादी प्रज्ञाकरः।
२८ अ] व्यवहितेऽपि।
२९ ये] कालं येषां तानि[[समानकालानि।]]

बोधस्य एकसन्तानानि कुतो न भवन्ति ? देशादि देशस्य भेदस्य सर्वत्राविशेषात् । एकस्य अनेकोपादानाभावात् [न] इति चेत्; कथमेकस्माद् देवदत्तजाग्रद्विज्ञानात् प्रबोधज्ञानपञ्चकं कदाचित् भवति । एकस्यैव ततो भावे अन्येषामनुपादानत्वम् । तेषां तद्विज्ञानात् पूर्वज्ञानोपादानत्वे नैकसामग्र्यधीनः भावानां सहभावः इति निःसारमेतत्--**एकसामग्र्यधीनस्य** प्र० वा० ३ । १८ इत्यादि । रसादीनां सहभावे हि एकसामग्र्यधीनतानियमाभावात् । न कालाभावा * एकसामग्रीव्यपदेशता इत्युक्तम् । तद्भावेऽपि न ज्ञायते किं कस्य तत्रोपादानमिति । रूपज्ञानं रूपज्ञानस्य, एवमन्यत्रापि योज्यमिति चेत्; आद्यं सौगतं ज्ञानमनुपादानं प्रसक्तम्, पूर्वं तथाविधस्य तदुपादानस्याभावात्, अन्यथा कुतः सोपायं सुगतत्वम् ? अनुमानस्य विकल्पेन भिन्नसन्तानत्वे तु प्रत्यक्षं प्रति उपादानत्वम्, अन्यथा विकल्पस्य तद् इति **अभेदात् सदृशस्मृत्याम्** सिद्धिवि० १ । ७ इत्यादि दूषणमविचलितम् । अतो यथा एकमनेकस्य उपादानम् तथा अनेकमेकस्य, इतरथा जाग्रद्विज्ञानपञ्चकात् नैकं कदाचिद् [इति] अन्येषामानर्थक्यम् । सहकारित्वान्नेति चेत्; तर्हि विषादिमूर्च्छितादिप्रतिबोधं प्रति वैनतेयादिध्यानादिकमपाथकम् । 241/mkj भिन्नकालानामेकत्र सहकारित्वे अनुमीयमानरूपसमानकाल्यरसः पूर्वरूपादेरुपजनने सहकारीति सामग्र्येकदेशः सामग्र्या लिङ्गमिति प्रसक्तम् । § 1176

किञ्च, एकत्र भिन्नकालानेकोपादानसहकारिज्ञानव्यापारसंभवे न ज्ञायते भेदैकान्ते सन्ततिनियम इति तदवस्थो दोषः । न च तेषां सजातीये उपयोगे अन्यत्र उपयोग इति चिन्तितम् । तत्र प्रबोधभिन्नकाले उपयोगो वा तथैकस्य क्रमभाविनि कार्ये व्यापार इति **नाऽक्रमात् क्रमिणो भावाः** प्र० वा० १ । ४५ इति न बुध्यामहे । § 1177

अन्ये त्वाहुः--न अनन्तरं नापि भिन्नकालमुपादानम्, अपि तु सदृशम्, अतोऽयं नियम इति; तेषां शान्तचेतसः कुतश्चिद् आविष्टप्रबोधभावे कथं स इति निरूप्यताम् ? पुत्रस्य पितृचित्तधर्मानुवृत्तौ संभवेत्, नियमाभावः अन्यत्रापि । तन्न सन्ताननियम इति स्थितम् । § 1178

भवतु वा तन्नियमः, तथापि दोषः इत्याह--**सत्यपि** इत्यादि । पूर्वचित्तस्य **वासकता** अपरस्य **वास्यता न भवत्येव** । कुतः ? इत्याह--**प्रत्यासत्तेरभावात्** । § 1179

१ स्य] व्यर्थमेतत् ।
३ ए] प्रबोधचेतसः ।
३ त] जाग्रच्चेतसः ।
४ द्विज्ञानात्] जाग्रद्विज्ञानात् ।
७ *] नैककालभाविनाम्
१० स्य] सर्वज्ञातुः ज्ञानस्य ।
१० था] यदि पूर्वमपि सौगतं सर्वज्ञज्ञानमस्ति तदा कुतः उपायात् सर्वज्ञत्वं जायते इति स्यात् ?
१६ वैन] गरुडध्यानादिकम् ।
१७ का] काले भवः काल्यः ।
२० भेदैकान्ते] क्षणिकैकान्ते ।
२२ वा] वा शब्दः यथा अर्थे ।
२५ म] सन्ताननियमः ।
२५ श्चिद्] क्रोधादिसद्भावे ।
२६ स] एकसन्ताननियमः ।
२६ वेत्] एकसन्तानत्वम् ।
२६ माभावः] नियमान्न पुत्रः पितृचित्तमनुवर्तते इत्युक्ते प्राह ।

अथ केयं प्रत्यासत्तिः यस्याः त्वया अत्राभावोऽभिधीयते ? हेतुफल-भाव इति चेत्; सा अस्त्येव इति हेतोरसिद्धिः, **सत्यपि** इत्यादि वच-नात् । *अन्यथाऽभ्युपगमे वा दोषः । देशादिनैकट्यम्; तर्हि तदभावेऽपि उपादानोपादेयभाववद् वास्यवासकभावोऽपि न विरुद्ध्यत इति सन्दिग्ध-विपक्षव्यावृत्तिको हेतुः । यदि पुनः तदभावे अनुपादानेतरभावोऽपि नेष्यते; **सत्यपि** इत्यभ्युपगमविरोधः इत्युक्तो दोषः । यदि पुनः योग्यता; कुतस्त-
/ms दभावो भेदैकान्ते ? वास्यवासकत्वेन अभिमतयोः देशादिभेदात्; उक्त-मत्रापि जन्यजनकभावयोग्यताभावात्, इयमपि योग्यता न विरुध्यत इति । दृष्टत्वाच्च, दृष्टं खलु जाग्रच्चित्तं शास्त्रादिपरिज्ञानंपरिकरं देशादिव्यवहिते प्रबोधचेतसि वा निरूपां वासनामादधानम् । न हि दृष्टेऽनुपपन्नं नाम । न च स्वापादिदशाऽनु[भूयते] । यापि तत्परिकरचेतस्त्वचित्तकैः अनुभूय-ते तद्दशाभावभयात् यतस्तत्र वासना कल्प्यते इति तथा कल्पंसादि कुसुमं कुस्थमादिरक्तं कालादिव्यवहिते फलजायि । बीजपूरादिकाण्डादि काण्डादिकरक्तं यतः स्यात् भवेत् । § 1180

यत्पुनरेतत् निदर्शनम्--**सन्तानान्तरवत्** इति; तदपि न सूक्तम्; वैष-म्यात्, हेतुफलभावस्य नियतत्वात् । अन्यत्रापि अस्य चोद्यस्य समत्वादिति; तन्न; अन्यथाऽभिप्रायात्; तथाहि--राज्ञा राजपुत्राणामिव भेदेऽपि य-थाकथञ्चिदस्तु लौकिकः सन्ताननियमः, वास्यवासकभावः पुनः कथञ्चित्
242/mkj कारणानुरूपकार्यभावः । स पूर्वमेव कारणविनाशे न युक्तः । न हि यथा पितरि मृतेऽपि कालान्तरे तत्सन्तानं च गृह्णन्ति पुत्रादयः, दृश्यते अद्यापि राज्यस्थितेन राज्ञ जनितोऽपि स्वराज्ये पुनः निवेशितः तत्सन्तानव्यपदेश-भाक्, तथा तदाकारम्; अन्यथा चिरमृतेऽपि भर्त्तरि विधवायाः चिरभाविनि वा कन्यायात्प्रदाकारमपत्यं भवेत् । § 1181

यत्पुनरेतदुक्तम्--मृतेऽपि जाग्रच्चेतसि तदनुरूपं प्रबोधज्ञानमिति; तदपि
/ms न सारम्; **सिद्धं यन्न परापेक्ष्यम्** सिद्धिवि° १ । २४ इत्यादि कारिका-विचारे विचारितत्वात् । अपि च, अदर्शनमात्रेण स्वापादौ आत्माभावसिद्धौ घटादावपि स्यादिति न निराकुलमेतत् **अदृश्यानुपलम्भादात्मनो घटादिषु**

३ *] हेतुफलभावाभावस्वीकारे ।
३ भावेऽपि] देशादिनैकट्याभावेऽपि ।
९ रि] नपरि
१० नि] वि
१२ ते] स्वापादिदशा ।
१२ ल्पंसादि]
कार्पासादि[[तुलना--व्यवहितस्यापि लाक्षारसादेरुपधानस्य दर्शनादिति --प्र° वार्तिकाल° पृ° ४३३ । लाक्षादिरसावसिक्तानामिव बीजानां...--तत्त्वसं° प° पृ° १८२ ।]]
१४ वेत्] ?
१७ राज्ञा] राज्ञो
१९ स] वास्यवासकभावः कारणानुरूपकार्यभावो वा ।
२१ राज्ञ] ज्ञाऽ
२२ था] पितुः आकारं न हि तत्सन्तानत्वेन गृह्णन्ति ।
२३ वा] भर्तरि ।
२३ न्यायात्प्र] यास्त
२७ त्] तुलना--नेदं निरात्मकं जीवच्छरीरमप्राणादिमत्त्वप्रसङ्गात् । निरात्मकेषु घटादिषु दृष्टादृष्टेषु प्राणाद्यदर्शनात् तन्निवृत्त्या आत्मगतेः । अदृश्यानुपलम्भादभावासिद्धौ घटादेर्नैरात्म्यासिद्धेः प्राणादेरनिवृत्तिः ।--प्र° वा° स्व° पृ° ६२ ।

**अभावाऽप्रतिसिद्धौ घटादीनां नैरात्म्याऽसिद्धेः निरात्मकेभ्यो घटादिभ्यः प्राणादेः अनिवृत्तिः** इ[ति]ना[दृश्यानुपलम्भ] नादभावासिद्धिः, अपि तु प्रतिपत्रभिप्रायविषयाद् अवस्थाचतुष्टयादिवे[ति चेत्,]तर्हि सात्मकाऽनात्मकावस्थाभेदात् तद्विषयात् घटादीनां नैरात्म्यं केन वार्यते ? यथा चसुप्तो देवदत्तः सुषुप्तो मृतो जीवति इति व्यवहारभेदः, तथा कारणात् कार्यात् स्वभावाद् अन्यतश्च साध्यसिद्धिव्यवहारभेदोऽस्ति, स किन्नाऽभ्युपगम्यते ? कारणान्ययोर्व्यभिवारदर्शनात् सर्वधानास्वासे दृश्यादर्शनस्य व्यभिचारदर्शने स्वापादौ किन्नाम *सत्त्वाशङ्का स्यात्, यतः जाग्रचेतस एव प्रबोधो निश्चीयेत ? न च व्यवहारः चैतन्यविर[हि]णीं स्वापादिदशां मन्यते, तद्वत्यपि जीवद्व्यवहारप्रवर्त्तनात् । *तेषां च तत्र *तदभावमननादभावे न क्वचित् क्षणभङ्गदर्शनं सिध्येत् । तैः अनुपलक्षितं तदस्ति न स्वापादिचैतन्यम् इति किं कृतो विभागः ? § 1182

यत्पुनरुक्तम्--कार्पासादिकुसुमे लाक्षादिरागात् फले तद्रागवासना इति; तदप्यतिसाहसम्; रञ्जितपुष्पस्य व्यवहितफलकारणत्वे अवान्तरबीजाङ्कुरादिवैफल्यम् । कथञ्चैवम् अनन्तरोऽर्थः ज्ञानं स्वाकारं जनयति इति नियमः, यतस्तदर्थिनां नियतदेशादौ वृत्तिः ? ततः स्थितम्--क्षणिकैकान्ते वास्यवासकता न भवति इति । § 1183 /ms

तदभावे को दोषः ? इत्याह--**तत** इत्यादि । यत एवं **ततो विकल्प एव [न] भवेत्** कारणाभावादिति मन्यते । § 1184

नन्वस्य सर्वस्य अभावो न बौद्धान् प्रति प्रतिभासाद्वैतवादिनो बाधते अभीष्टत्वात् । न च पक्ष एव विपक्षः अतिप्रसङ्गादिति चेत्; अत्राह--**अन्यतोऽपि** इत्यादि । § 1185

243/mkj

...4 अन्यतो विनिवृत्ता धीः स्वभावमनुवर्तते ।
प्रत्यक्षादीस्तँथात्मैकः प्रतिक्षण[विलक्षणान्] ॥ ४
॥§ 1187

---

३ यादिवे ]
जाग्रत्सुप्तसुषुप्तमृतेति+अवस्थाचतुष्टयमत्र ग्राह्यम् ।
७ धानास्वासे ] कारणादीनामन्योन्यं व्यभिचारदर्शनात् सर्वत्रानाश्वासे
८ *] किन्न आत्म
९ पि ] स्वापादिमत्यपि पुरुषे ।
१० *] व्यवहारिणाम् ।
१० च ] स्वापादिदशायाम् ।
१० *] चैतन्याभाव ।
११ सिध्येत् ] व्यवहारिभिः क्षणभङ्गस्याऽमननात् ।
११ तैः ] व्यवहारिभिः ।
११ क्षितं ] क्षणभङ्गदर्शनम् ।
१९ णाभावादिति ] विकल्पस्य वासनाजन्यत्वस्वीकारात् ।
२० ति ] निरर्थकमेतत् ।
२२ तोऽपि ] तो विनिवृत्ता

सर्वतोऽन्यस्याद् व्यावृत्तं चित्तं बहिरन्तर्मुखभ्रान्ताभ्रान्तस्वभावान्वयि तत्क्षणस्थितिधर्मकं परिकल्प्य आत्मानमेव स्वगुण[पर्यायात्मकं] स्वतः संवेदननिष्ठितं प्रतिक्षिपतीत्ययुक्तम् । § 1188

अत्रायमभिप्रायः--चित्रमेकं ज्ञानं तदद्वैतम्, निरंशानेकज्ञानमात्रम्, सर्वविकल्पातीतं विभ्रममात्रं वा यत्रेदमुक्तम् **मायामरीचिप्रभृतिप्रतिभासवद् असत्त्वेऽपि अदोषः** प्र० वार्तिकाल० पृ० २८६ इति ? तत्र प्रथमपक्षे--**अन्यतः** सजातीयात् विजातीयाच्च **[वि] निवृत्ता** अपसृता **धीः** बुद्धिः **स्वभावान्** आत्मभूतान् आकारान् **अनुवर्तते** व्याप्नोति । कान् तान् ? इत्याह--**प्रत्यक्षादीन् प्रत्यक्षो**[ऽ]भ्रान्त **आदिर्येषां** भ्रान्तनीलादीनां ते तथोक्तानिति । अनेन **एक[त्र] विरुद्धधर्मध्या[स]संभवे अनेकमेव न किञ्चित् स्यादिति सर्वस्य सर्वत्रोपयोगादिप्रसङ्गः** *इत्यादि निरस्तमिति दर्शयति । चित्रैकचित्तस्य विरुद्धधर्माध्यासेऽपि पततोऽभ्युपगमात् सौगतैरिति । **तथा** शब्दश्रवणात् यथाशब्दः अत्र लुप्तनिर्दिष्टोऽनुमीयते । **तथा** तेन एकस्य अनेकस्वभावभूताकारतादात्म्यप्रतिभासप्रकारेण, सहोत्पत्तिविनाशसंवेदनप्रकारेण सहभुवां सर्वेषां क्षणानामेकत्वप्रसङ्गेन एकसन्तानापत्तेः **आत्मा**
/ms
पुरुषः **एकः** स्वभावोऽनुवर्त्तते इति सम्बन्धः । कथंभूतान् ? इत्याह--**प्रतिक्षण** इत्यादि । एतेन अशक्यविवेचनमपि शक्यपरिहारमिति दर्शितम् । नहि तदपि स्वाकारतादात्म्याभासाद् अन्यथा उक्तदोषाद् अपरम् । आत्मस्वभावानामध्य हरणं प्रचण्डनृपतिधनामिव अशक्यसाधनम् । एतेन परमात्रेन तेषां दर्शनं निरूपितम् । § 1189

ननु प्रतिभासाद्वैते विवक्षितधीव्यतिरिक्तस्याऽभावात् कथमुच्यते--**अन्यतो विनिवृत्ता धीः** इति । नहि असतः किञ्चिद् व्यावर्त्तते । सतोऽपि अदर्शने कुतः कस्य केन विनिवृत्तिः प्रतीयते ? न च अ[न]न्यवेद्येषु वेदनेषु केनचिद् अन्यवेदनमिति चेत्; उक्तमत्र अन्यभावग्राहकप्रमाणाभावः । यथा च सुखेनाऽसंवेदनाद् दुःखाभावः तथा तेन सुखभावस्याऽवेदनादभाव इति न किञ्चित् स्यात् । सुखेन अविषयीक्रियमाणं दुःखमस्ति न ज्ञानान्तराणि इति पश्यत परस्य सुधिषो दुश्चेष्टितम् । § 1190

यत्पुनरुक्तम्--सतोऽप्यविषयीकृता न कस्यचिद् विनिवृत्तिप्रतिपत्तिः इति; तदपि परस्य स्ववधाय शूलतक्षा स्वप्रतिभासमात्रस्याप्यसिद्धेः, ज्ञानेन तद्विपरीतधर्माऽनिषेधात् तददर्शनोपगमात् । यदि पुनः, निरपेक्षसुखादिवेद-

---

१० थोक्तानिति] क्ताः तानिति
११ *] तुलना--न चैकस्य विरुद्धौ स्वभावौ संभवतः, विरुद्धधर्माध्यासेन तस्यैकत्वहानिप्रसङ्गात् । --हेतु बि० टी० पृ० २२० ।
१२ तोऽ] परमार्थतोऽ
१८ पि] अशक्यविवेचनमपि ।
१८ दोषाद्] भिन्नप्रकारम् ।
१९ ध्य] मप
१९ ना] न
२० मात्रेन] मार्थेन
२३ वेद्येषु] स्ववेद्येषु इत्यर्थः ।
२७ सुधिषो] यो
२९ वा] वधा
२९ क्षा] तक्षणम्[[तीक्ष्णकरणम् ।]]
३० त] विपरीतधर्माणामदर्शनात् ।

नमेव तद्विपरीतधर्मनिषेधनम्; अविषयीकृतादपि तर्हि विनिवृत्तिः प्रतीयते 244/mkj इत्यायातम् । अपि च, अयं स्वयमेव सर्वविकल्पान् प्रतिपद्यमानोऽपि तदतीतं तत्त्वं प्रतिपद्यते वदति च **नाऽविषयीकृताद् विनिवृत्तिसिद्धिः** इति तत्कारी तद्द्वेषी चेति उपेक्षामर्हति । § 1191

यच्चान्यदुक्तम्-- अनन्यवेद्येषु वेदनेषु न चान्यवेदनम्; तदपि न सुन्द- /ms रम्; प्रतिभासाद्वैताऽसिद्धिप्रसङ्गात् सर्वसंविदां निरालम्बनत्वाऽसिद्धेः । ततः सूक्तम्--**अन्यतो विनिवृत्ता धीः** इति । § 1192

कारिकां व्याख्यातुमाह--**सर्वतोऽन्यस्माद्** इत्यादि । **सर्वतो** विजातीयात् उपादानोपादेयाभिमतात् क्षणाद् **अन्यस्मात्** स्वतो भिन्नाद् **व्यावृत्तम्** अपसृतं **चित्तं** ज्ञानं **परिकल्प्य** । कथम्भूतम् ? इत्याह--**बहिरन्तर्मुखभ्रान्तात् तत्स्वभावाद्यपि बहिश्च अन्तश्च मुख**मवभासनं ययोः तौ तथोक्तौ तौ च तौ **भ्रान्ताऽभ्रान्तस्वभावौ** तौ **अन्वेतुं** शीलम्, **तदन्वयो** वा अस्यास्तीति **तदन्वयि** बहिर्मुखाभ्रान्तस्वभावान्वयि । यदि वा, **बहिरन्तर्मुखौ** यौ स्वभावौ **भ्रान्तौ च** यौ स्वभावौ तान् अन्वेतुं शीलमिति ग्राह्यम् । तथाहि--परस्य सर्वं विकल्पज्ञानं स्वरूपे अभ्रान्तम्, **सर्वचित्तचैत्तानाम्** न्यायबि॰ १ । १० इत्यादि वचनात्, बहिः अर्थरूपे भ्रान्तम् **भ्रान्तिरपि सम्बन्धतः प्रमा** इत्यादि वचनात् । उपलक्षणमेतत्, तेन अविकल्पेतरनीलेतरस्वभावान्वयि गृह्यते । पुनरपि किम्भूतम् ? इत्याह--**अक्षणस्थितिधर्मकम्** । न चैतत् **सर्वतोऽन्यस्माद् व्यावृत्तम्** इत्यनेनैव कथितमिति किं पुनरुच्यते, यद् विसवंतो व्यावृत्तं तत्क्षणस्थितिधर्मकमेव, अन्यथा न कं सर्वतो व्यावृत्तमिति चेत्; सत्यम्; तथापि यः पूर्वापरक्षणव्यावृत्तं नेच्छति तं प्रति तत्साधनार्थमिदं **तत्क्षण** इत्यादि । तथाहि--यस्मात् क्षणस्थितिधर्मकं नश्वरस्वभावं तस्मात् /ms नाशं प्रति अनपेक्षणात् प्रतिक्षणं नाशनियतमिति । यदि वा, पूर्वेण सहभाविनः सर्वस्माद् व्यावृत्तमुक्तम्, एतेन पूर्वापराभ्याम् इति विशेषः । किं करोति ? इत्याह--**प्रतिक्षिपति**--निराकरोति । किम् ? इत्याह--**आत्मानमेव** जीवमेव न तच्चित्तमेव इति एवकारार्थः । किम्भूतम् ? इत्याह--**स्वगुण** इत्यादि । पुनरपि कथम्भूतम् ? इत्याह--**स्वतः** इत्यादि । **स्वतः** आत्मनैव **संवेदननिष्ठितम् इति** हेतोः **अयुक्तम्** अनुपपन्नम् परस्य सर्वमिति । § 1193

सांप्रतम् उत्तरं विकल्पत्रयं दूषयितुकाम आह--**अभ्रान्तम्** इत्यादि । § 1194

---

३ त] सर्वविकल्पातीतम् । परमार्थतस्तु विज्ञानं सर्वमेवाविकल्पकम् ।--प्र॰ वार्तिकाल पृ॰ ३०८, ३९८ ।
३ ते] इति महदाश्चर्यम् ।
९ याभि] यानभि
११ पि] भ्रान्ताऽभ्रान्तस्वभावान्वयि
१३ ब] वाक्यमिदं पुनरुक्तमिव भाति ।
१४ च] भ्रान्ताभ्रान्तौ च
१४ स्य] बौद्धस्य ।
१७ नात्] भ्रान्तिरपि च वस्तुसम्बन्धेन प्रमाणमेव ।--प्र॰ वार्तिकाल॰ ३ । १७५ ।
१८ ण] तत्क्षण
१९ वंतो] यद्धि सर्वतो
२० कं] न तत्
२४ एतेन] क्षणाभ्यां व्यावृत्तमिति कथितम् ।

…5 अभ्रान्तञ्चामुञ्चन्ती न मुञ्चत्यात्मचेतनाम् ।
बुद्धिः सीत्वा सदित्वा च आत्मानं प्रतिक्षणम् ॥ ५
॥§ 1196

चेतनोऽयमितीक्षमाणः परस्मात् सर्वतः परावृत्तः प्रतिक्षणमात्मानं नात्यन्ताय वै जहाति स्वगुणपर्यायान्वयलक्षणत्वात् तद्वस्तुनः । तद्व्यतिरेकभावस्यानुपपत्तेः कुतः सहेतुरहेतुर्वापि । § 1197

245/mkj

**अभ्रान्तं** जाग्रद्दशायां स्वरूपेऽपि वा, भ्रान्तं स्वप्नावस्थायां ग्राह्याकारे च **आत्मानं** स्वभावं **प्रतिक्षणं** क्षणं क्षणं प्रति **अमुञ्चती** स्वीकुर्वाणा **दद्धिः [बुद्धिः]** सर्वस्य प्रतीतिविशेषः । सा किं करोति ? इत्याह--**सीत्वा** इत्यादि । **च** शब्दः अपिशब्दार्थः भिन्नप्रक्रमः **मुञ्चत्यात्मचेतनाम्** इत्यस्यानन्तरं द्रष्टव्यः । **न** इत्यपि निपातानामनेकार्थत्वात् ननि *त्यस्य अर्थे, आक्षेपे । ततोऽयमर्थः--बुद्धिः ननु आत्मचेतनामपि न केवलं गुणिनमवयति तं परिणामिनं मुञ्चति जहाति, सकलशून्यता स्यादिति मन्यते । किं कृत्वा ? इत्याह— **सदित्वा** इति सूक्ष्मपरीक्षया स्थूलाद्येकस्वभावापि कथित फलवत् निरंशाऽनेकपरमाणुदशायां गंधा । पुनरपि किं कृत्वा ? **सीत्वा** तादृक्षसाऽनन्दने बहिः परमाणुवत् मृता इत्यर्थः । तथा च सर्वदात्वे जगति जाते प्रतिभासमात्रस्यापि प्रत्यस्तमयात् किमाश्रयोऽयं कारणादीनां प्रतिषेधं ब्रूयादिति मन्यते । अनेन मध्यविकल्पद्वयं निरस्तम् । § 1198

/ms

अन्त्यविकल्पमाश्रित्य इदमपरं व्याख्यानम्--**भ्रान्तमात्मानम् अमुञ्चती,** इतरथा **मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽप्यदोषः** प्र० वार्तिकाल० ३ । २११ इत्यस्य व्यवस्थापकप्रमाणाभावेन प्रतिज्ञामात्रत्वप्रसङ्गात् । न खलु विभ्रमाद् विभ्रमसिद्धिः; अतिप्रसङ्गात् । **भ्रान्तमात्मानममुञ्चन्ती** बहिरन्तश्च विरुद्धधर्माध्यासिनो विचाराक्षमस्य स्वभावस्यापि तत्र प्रतिभासनात् **प्रतिक्षणं बुद्धिः** इति उभयत्र संबध्यते । किं करोति ? इत्याह--**न मुञ्चत्यात्मचेतनाम्** आत्मापरनामिकां पूर्वापरपर्यायां नयती चेतनां न जहाति इत्यर्थः । किं कृत्वा ? इत्याह--**सीत्वा सदित्वाच** इति लौकिकी वचनप्रवृत्तिरियम् । यदि वा, तमात्मानं प्रतिक्षणममुञ्चती बुद्धिः **स्वभावात् प्रतिक्षणविलक्षणाद् अनुवर्त्तते** इति गतया कारिकया सम्बन्धः । § 1199

ननु न भ्रान्तं नापि अभ्रान्तमात्मानं बुद्धिः बिभर्ति तस्मान्तम् भावात् सर्वविकल्पातीतत्वात्तत्वस्येति चेत्; अत्राह--**सीर्त्त** इत्यादि । आत्मचेतनां

१० *] ननु इ
१० अर्थे] द्रष्टव्य इति सम्बन्धः ।
१३ थित] क्वथित
१४ त्] क्वथितफलवत् शीर्णफलवत् इत्यर्थः ।
१४ गंधा] गत्वा
१५ ने] तादृक् स्वसंवेदने
२४ ती] न्तीं
२५ दित्वाच] त्वा च
२६ भावात्] न्
२६ णाद्] न्
२८ म्] तस्यात्यन्तम
२९ सीर्त्त] त्वा

स्वप्रकाशं न मुञ्चन्ती अन्यथा स्थूलादिग्राह्यरूपवत् तत्परित्यागे बहिरर्थसत्त्ववद् भ्रान्तेतरविवेकोऽपि न सिध्येदिति **अज्ञानार्थकोऽसौ इति पारमार्थिकं प्रमाणलक्षणम्** इति प्लवते । § 1200

स्वाभिमतप्रदर्शनपरं कारिकार्थं दर्शयन्नाह--**चेतनोऽयम्** इत्यादि । **चेतनः** स्वपरग्रहणस्वभावः आत्मा **एकः** इति गतेन सम्बन्धतः नैयायिकादिपरिकल्पितः **अयम्** इति स्वसंवेदनाध्यक्षेण **ईक्षमानः** * अहमि कया न पुरुषाद्वैतवादिसांख्यकल्पितः, तत्र नित्यम् आगमगम्यत्वेन **अयम्** इत्युल्लेखाभावात् । नतु आगमवत् तत्र स्वसंवेदनाध्यक्षमपि व्याप्रियते ततोऽयमदोष इति चेत्; अत्राह--**परा** इत्यादि । **परावृत्तः** अपसृतः **परस्माद्** आत्मान्तराद् घटादेश्च तथाप्रतीतेः । नैवं ब्रह्मात्मा; *तदद्वैतोपरमात् । मदीय आत्मा तथा इति सांख्यः; तत्राह--**सर्वतः** सर्वेण स्वरूपेण इव देशादिनापि **परावृत्तः** । सर्वतः आद्यादिपाठान्तम् । यदि वा, सर्वस्मात् सर्वतः नैवं सांख्यात्मा सर्वथा **सर्वं सर्वत्र विद्यते** इत्यस्य विरोधात् । अनेन आत्मनः सर्वगतत्वसाधनं सर्वमध्यक्ष[बाधित]मिति दर्शयति । § 1201 /ms 246/mkj

प्रतिक्षणनाशिक्षणसन्तानात्मा इत्थम्भूत इति सौगतः; तत्राह--**प्रतिक्षणम्** इत्यादि । क्षणं क्षणं प्रति **आत्मानं** स्वरूपं **जहदपि नात्यन्ताय** नात्यन्तम् इत्यस्यार्थेऽवंत * *प्रतिरूपकोऽयं निपातो वर्त्तते, **जहाति** किन्तु कथञ्चित् । कुत एतत् ? इत्यत्राह— **स्वगुण** इत्यादि । **स्वे** आत्मीया ये **गुणा** ये च **पर्याया** न द्रव्यान्तरसम्बन्धिनः तेषु **अन्वयः** अनुगमनम् तस्य **लक्षणं** ग्रहणं स एव [वा]लक्षणं स्वरूपं यस्य तत्तथोक्तम् तस्य **भावात् तद्वस्तुनः** चेतनस्य इतरस्य वा भावस्य । आत्मनि प्रकृते । अपि च, **वस्तुन** इति सामान्यवचनं दृष्टान्ते न पराभ्युपेतोपलब्धिः इत्यस्य प्रदर्शनार्थम् । एतदपि कुतः ? इत्याह--**तद्व्यतिरेकेण** इत्यादि । **तद्व्यतिरेकेण** अनन्तरवर्णित वस्तुव्यतिरेकेण **भावस्य** ब्रह्मण इव निरंशविज्ञान, सन्तानस्यापि **अनुपपत्तेः** प्रमाणाभावादिति मन्यते । ततः किं जातम् ? इत्याह--**कुतो** न कश्चित् **सहेतुः** सकारणो **अहेतुर्वा** अकारणो वा **अपिना [यो यद्भावं प्रत्यन्यानपेक्षः स तत्स्वभावनियतः यथा अन्त्या कारण] सामग्री स्वस्वकार्योत्पादनं प्रति अनपेक्षया सती ल+अ भावनियता, विनाशं प्रति अनपेक्षश्च भावः** *इति दुर्भाषितं साध्याद्यन्त्यधर्म्यसिद्धिः । § 1202 /ms

२ कोऽसौ] अज्ञातार्थप्रकाशो वा
३ इति] तत्र पारमार्थिकप्रमाणलक्षणमेतत् । पूर्वं तु सांव्यवहारिकस्य--प्रमाणवार्तिकाल° २ । ६ ।
५ तः] न्धः, न
६ *] णः
६ मि] अहमहमि
८ तु] ननु
१० नैवं] परव्यावृत्तः ।
१० *] परस्वीकारे अद्वैतवादविरोधः ।
१७ *] -र्थे चतुर्थ्यन्त
१७ *] चतुर्थीप्रतिरूपको निपातः ।
२५ श्चित्] कुतश्चित्
२८ या] क्षा
२८ ल+अ] तद्
२८ *] तुलना--ये यद्भावं प्रत्यनपेक्षास्ते तद्भावनियताः, यथा समनन्तरफला सामग्री स्वकार्योत्पादने नियता, विनाशं प्रत्यनपेक्षाश्च सर्वे जन्मिनः कृतका भावा इति स्वभावहेतुः ।--तत्त्वसं° प° पृ° १३२ । द्रष्टव्यम्--पृ°...टि°...।
२९ सिद्धिः] ?

पुनरपि परस्य सहेतुके विनाशे दोषमुपदर्शयन्नाह--**हेतुमत्त्वे** इत्यादि ।
§ 1203

...6 हेतुमत्त्वे विनाशस्य नाशाद्भावः पुनर्भवेत् ।
नान्यथैकान्तिकाः सर्वेऽहेतुमन्नाशहेतवः ॥ ६ ॥ § 1205

विनाशो यदि भावस्वभावो न भवेत् तस्य किं कुर्वाणो हेतुः स्यात् ? न तावदुत्पादयति; पूर्वावधिपरिच्छिन्नवस्तुसत्तासम्बन्धलक्षणत्वादुत्पत्तेः । तस्य कथञ्चित् केनापि कार्यत्वे भावस्वभावानतिक्रान्तेः भावः स्यात्, तत्लक्षणत्वाद् वस्तुनः । कादाचित्कं सदकार्यमिति प्रक्रियाव्यावर्णनमात्रं विरोधात् । तथा अनुत्पत्तिधर्मकम् अनाधेयाप्रहेयातिशयात्मकं तथा स्वविनाशहेतुभावान्न विनश्यतीति । विनाशे वा विनष्टस्य सत्ता । यदि वा सतोऽनुत्पत्तिः उत्पत्तिहेत्वभावात् । घटादेरप्येवं प्रसङ्गात् । स्वसामग्रीजन्मनः तद्विनाशकारणस्यावश्यंभावनियमाभावान्न कश्चिद्धेतुरव्यभिचारी स्यात्
247/mkj । विनाशहेतुः प्राग  सतो विनाशस्य स्वभावं करोति न सत्तासम्बन्धमिति चेत्; कः पुनर्भावानामन्योन्याभावप्रागभावकर्त्ता ? यतस्तत्स्वभावस्थितिः । अस्ति कश्चिद्विशेषः । परस्परस्वभावदेशकालपरिहारपरिणतिमभावं विद्मः । तथा हेतुमत्त्वं क्षणिकस्य विरुद्धप्रमाणबाधितम् । न हि अतीतेन वर्तमानस्य तद्वत्ता अतिप्रसङ्गात् । § 1206

अत्रायमभिप्रायः--एकान्तवादिकल्पितस्य वस्तुनः प्रमाणाभावेन असत्त्वान्न तस्य हेतुर्वा * विनाश इत्युक्ति  लौकिकस्य अर्थस्य परेण स विनाशः कल्पनीयः, तत्रापि पूर्वोत्तराकारपरिहारावाप्तिलक्षणविकारस्य विनाशोत्पत्तिव्यपदेशे उभयत्रापि जैनमतसिद्धिः इत्युक्तमनन्तरप्रस्तावे अहेतुविनाशपक्षे **उत्पादस्थितिभङ्गानाम्** सिद्धिवि॰ ३ । १७ इत्यादिना, सहेतुविनाशपक्षेऽपि **अनादिनिधनं द्रव्यमुत्पित्सु खासुश नश्वरम्** । सिद्धिवि॰ ३ । २१ इत्यादिना । ततः तद्भयात् तेन नाशोत्पादवत उत्पाद एकान्तेन भिन्नः अभ्युपगन्तव्यः । एवं च विनाशस्य भावादेकान्तेन भिन्नस्य प्रध्वंसस्य **हेतुमत्त्वे** सकारणत्वे अभ्युपगम्यमाने **नाशात्** प्रध्वंसात् **विनाशस्य** इत्यनुवर्त्तते **भावो** घटादिः **पुनर्भवेत्** स्वोपलम्भार्थक्रियाकारी पूर्ववत् पश्चादपि स्यादित्यर्थः । एतदुक्तं भवति--परव्यापाराज्जायमानो नाशः अन्यो वा कृतको भवति, **अपेक्षितप-**
/ms **रव्यापारो हि भावःकृतकः** न्यायवि॰ ३ । १४ इति वचनात् । कुतश्चिद् भवतोऽस्यापि भावव्यपदेशाविरोधात्, कृतकश्च घटादिवदवश्यं नश्यति इति । ननु यस्य कृतकः स्वकारणान्नश्वरो जायते भवतु तस्याऽयं दोषो नास्माक-

१९ *] तुना
१९ इत्युक्ति] क्तेः
२३ खासुश] स्थास्नु
२४ यात्] जैनमतसिद्धिभयात् ।
२८ अन्यो] उत्पादो वा ।
३० तोऽस्यापि] नाशस्यापि ।

म्, अनश्वरकृतकोऽपि हि भावः विनाशकारणसन्निपाताद् विनश्यति न स्वभावतः । न च नाशस्य नाशकं कारणमस्ति इत्येके; तत्राह--**नान्यथैकान्तिका** इत्यादि । विनाशस्य नाशाभावप्रकारेण **अन्यथा नैकान्तिकाः** अव्यभि  चारिणो **न सर्वे** निरवशेषाः अनैकान्तिकाः स्युः इत्यर्थः । के ? इत्याह--**हेतुमन्नाशहेतवः** सकारणप्रध्वंसस्य हेतवः लिङ्गानि कृतकत्वादीनि । यदि वा, तद्धेतवः तत्कारणानि मुद्गरादीनि । यथैव हि विनाशकृतकत्वेऽपि न तन्नाशहेतवः अवश्यंभाविनः तथा घटादिविनाशहेतवोऽपि । § 1207

अत्र अन्येषां दर्शनम्--[विनाशस्य] विनाशेऽपि भावस्य न प्रादुर्भावः, नहि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भाव इति; तन्न सारम्; वैषम्याद् दृष्टान्तदार्ष्टान्तिकयोः । नहि यथा भावस्य प्रध्वंसभावः तथा देवदत्तस्य हन्ताऽपि, तेन आत्मनोऽन्यस्य देवदत्तेऽभावस्य विधानात् । अस्य नाशे भवत्येव तस्य प्रादुर्भावः, इतरथा तदभाववैफल्यम्, तस्मिन् सति जीवतोऽपि देवदत्तस्य अदर्शनप्रसङ्गः । § 1208

अन्ये तु ब्रुवते--घटस्य प्रध्वंसवत् तत्प्रध्वंसोऽपि उपलब्धिं प्रतिबध्नाति इति तददर्शनमिति; तदपि न सूक्तम्; अतिप्रसङ्गात् । तथाहि--यदि अन्याभावोऽन्यस्य उप  लब्धिप्रतिघातकृत्; तर्हि पटाभावः सकलस्य उप- 248/mkj
लब्धिप्रतिबन्धकारी स्यात् प्रत्यासत्ति  विप्रकर्षाभावात् । अद्या भावेनापि /ms
भावस्य विशेषणीभावस्य अस्य  वा सम्बन्धस्य परं प्रत्यसिद्धत्वात्, अनवस्थाना[त्] सम्बन्धान्तराभावात् । यदि पुनः, विशेषणीभावः अपरसम्बन्धरहितोऽपि कस्यचिदुच्यते; तर्हि समवायाद्यभावेऽपि गुणादिः कस्यचिदुच्यतामविशेषात् । इन्द्रियेणाऽसम्बद्धस्य च तस्य ग्रहणे किमत्र [किमन्यत्र] इन्द्रियस्य विषयेण सम्बन्धकल्पनेन ? § 1209

किञ्च, प्रध्वंसनाशवत् प्रागभावनाशोऽपि घटोपलब्धिं प्रतिबध्नाति इति न पुनः [घटोत्पत्तिः स्यात् । अथ] घटभावेन तन्नाशयस्यु  तिरस्कारात् नासौ तदुपलब्धिप्रतिबन्धकः; किमसौ तद्भावः प्रध्वंसकाले नास्ति येन तस्कारैको  न भवेत् । न चैकस्य एकत्र क्रियाऽक्रिये विरोधात् । अनादित्वात् प्रागभावस्य गगनादिवन्न नाश इत्येके; तेषां प्रागिव घटोत्पत्तिकाले दृश्यः सन् उपलभ्यते इति तदापि घटो नाद्यापि उत्पद्यते इति प्रतीतिः स्यात्

४ भि ] ऐकान्तिकाः व्यभि
१० भावः ] प्रध्वंसरूपेण परिणतिः तथा हन्तुः देवतत्तविनाशरूपेण परिणतिः ।
११ तेन ] हन्त्रा ।
११ स्य ] तिरोधानस्य ।
११ अ ] तिरोधानात्मकस्य अभावस्य ।
१४ त ] प्रध्वंसप्रध्वंसोऽपि ।
१५ त ] प्रध्वंसरूपस्य कपालस्य नाशेऽपि घटस्य दर्शनं न भवति ।
१७ अद्या ] अन्या
१८ अस्य ] अन्यस्य
२० क ] द्रव्यस्य ।
२१ स्य ] अभावस्य ।
२२ स ] सन्निकर्ष ।
२३ ध्नाति ] अभावत्वाविशेषात् ।
२४ भावेन ] घटोत्पादेन ।
२४ स्यु ] तत्प्रागभावस्य
२५ दु ] घटोपलब्धि ।
२६ स्कारैको ] तत्तिरस्कारको
२८ न् ] प्रागभावः ।
२८ दापि ] घटोत्पत्तिकालेऽपि प्रागभावः स्यादिति ।

पूर्ववत् । अथ घटभावेन तिरस्कारात् सतोऽपि तारानिकरस्येव भास्वता तस्याऽनुपलम्भनम्; नित्यस्य स्वविषयविज्ञानोत्पादनयोग्यस्यसमग्रेतरकारणस्य ति[रस्कारा]योगात् । न च नित्यव्यापिनो व्यवधानं शब्दवत् । तदेवम् /ms अनुपलब्धिकारणेषु दूरत्वादिषु असत्स्वपि अनुपलभ्यमानोऽपि यदि प्रागभावो घटकालेऽस्ति शब्दः ताल्वादिव्यापारात् पूर्वमूर्ध्वं च तथा अस्ति इति तस्य आकाशकार्यगुणत्वकल्पनमयुक्तम् । § 1210

ननु यथा नित्यव्यापिनः सतो दृश्यस्यापि गोत्वादेः केनचित् तिरस्कारस्तथा अत्रापि स्यादिति चेत्; न; तत्रापि समत्वाद् दोषस्य । यदि पुनरेतन्मतम्--*तदभावेन तस्य दृश्यताखण्डनात्तिरस्कार इति; तर्हि प्रागभावस्यापि नाशोऽभ्युपगतः स्यात् । अपि च, प्रध्वंसस्यापि *तदभावः तिरस्कारकोऽस्तु भावतिरस्कारकत्वात् प्रागभाववत् । अस्याऽनभ्युपगमे नानुमानव्यवस्था । ततः सूक्तम्--**हेतुमत्त्व** इत्यादि । § 1211

अत्र केचित् चोदयन्ति--यदि भावाद् भिन्नं विनाशमुद्दिश्य इदं दूषणमुच्यते सूरिणा, तर्हि भावस्य तत्कालेऽपि तदवस्थस्यैव भावात् किमर्थमुच्यते--**विनाशस्य नाशाद्भावः पुनर्भवेत्** इति । नहि गगनादेः सतः पुनर्भावो युक्तः । अथ **पुनर्भवेत्** इति पूर्ववद् दर्शनादिविषयो भवेत् इति व्याख्यायते; तदपि न सुन्दरम्; *तदापि ततः तद्विषयतानिषेधात् । *इतिना अस्यापि दोषस्य अत्रैव निर्देशात् । तथाहि--**हेतु[म]त्त्वे विनाशस्य** अभ्युपगमम्यमाने **नाशात्** ततो विनाशात् सकाशाद् **भावो** घटादिः **पुनः** इति अवधारणार्थः, अन्य[थेत्य]स्य अनन्तरं द्रष्टव्यः, **अन्यथैव** अन्येन एवकारेण एकान्तेन भिन्न इत्यर्थः **भवेत्** साधदि * इति शेषः । अत्र पक्षे दूषणम् **ऐकान्तिका** इत्यादि 249/mkj । **न** इत्ययं भिन्नप्रक्रमः **ऐका न्तिक** इत्पूर्वमनं द्रष्टव्यः । ततोऽयमर्थः--**हेतुमतो नाशस्य** परेण ये **हेतवः** यानि कारणानि प्रतिपादितानि ते /ms न **ऐकान्तिका** नावश्यकाभ्युपगमनार्हाः तत्कृतनाशे सत्यपि तथैव घटादेः उपलम्भादिति मन्यते । § 1212

अथवा **अनैकान्तिकाः** अवश्यं तज्जनका नां । यद्येवम् अनेन पर्याप्तमिति पूर्वदूषणमनर्थकमिति चेत्; न; हेतोः विनाशं तेन च भावस्य तिरोधानमभ्युपगच्छन्ति [ये] तेषां **विनाशो यदि** इत्यादिकस्य **कादाचित्कमकार्यम्** इत्यस्य च वृत्तिग्रन्थस्य भेदो न स्यात् । § 1213

अन्येन अर्थेन कारिकां विवृण्वन्नाह--**विनाशो यदि** इत्यादि । **विनाशः** प्रध्वंसो **यदि भावः स्वभावो न भवेत्** उत्तरपरिणामात्मको न स्याद् अपि

१ तोऽपि] प्रागभावस्य ।
२ स्य] स्याऽ
६ स्य] शब्दस्य ।
९ *] प्रागभावाभावेन ।
९ भावेन] प्रागभावस्य ।
१० *] प्रध्वंसाभावाभावः ।
११ अ] एतदनुमानानभ्युपगमे ।
१४ स्य] विनाशकालेऽपि ।
१७ *] पूर्वमपि ।
१७ *] इतिशब्देन ।
२१ *] स्यात् यदि
२२ न्तिक] का
२२ नं] इत्यूर्ध्वमनन्तरं
२६ नां] नाम
३१ स्व] भावस्व

तु भावाद् भिन्नः स्यादित्यर्थः । **तस्य** विनाशस्य **किं कुर्वाणो हेतुः** न किञ्चित्कुर्वाणः कारणं **स्यात्** मुद्गरादिः । अथवा, तस्य भावस्य किं कुर्वाणो विनाशः स्यात्, विनाशस्य च किं कुर्वाणो हेतुः स्यादिति योज्यम् । तथाहि--यदा भावाद् भिन्न एव विनाशः तदा नासौ *तस्य किञ्चित्करोति इति व्यपदिश्यते उपकारापेक्षत्वात् अर्थान्तरयोः वास्तवसम्बन्धस्य, अन्यथा अतिप्रसङ्गात् । योग्यतासम्बन्धेऽपि अविनाभाव एव रूपरसादिवत् न पुनर्भावनिवृत्तिः । सैव तस्य तेन क्रियते इति चेत्; यदि स्वभावभूता; प्रथमोऽपि विनाशः तथैवास्तु इत्यलं भेदैकान्तकल्पनया । अर्थान्तरं चेत्; तदवस्थो दोषोऽनवस्था च । विनाशेन च विनाशकरणात् तस्यैव सोऽस्तु पावकस्येव धूमः । तथा वधिना त एव *तत्सम्बन्धान्नष्ट इति स्यान्न भावः । भावसम्बन्धिनः करणाददोषश्चेत्; उक्तमत्र, तेन तस्य उपकाराऽकरणात् तत्सम्बन्धिनः इति घटनायोगात् । भावेनाप्यसौ क्रियते ततस्तत्सम्बन्धीति चेत्; उभयोः स्यात्, तव भावः स्वविनाशहेतुः, सर्वदा प्रसङ्गात्, नित्यस्य अपेक्षायोगात् । विशेषणीभावसम्बन्धस्य तत्रैव भावात् तत्सम्बन्धी इत्यपि वार्त्तम्; भेदैकान्ते तत्सम्बन्धस्याविनमयि तुमशक्तेः । तन्निवृत्तिकरणाद् भावस्य विनाशः उपलम्भप्रतिबन्धकरणात् स्यादिति चेत्; उक्तमत्र **तदवस्थस्य *तदयोगादिति** । किञ्च, § 1214 /ms

तिरोहिता ह्यभावास्ते योगिभिः स्वयं नेष्यन्ते । *
योगिनो [न च] युक्ताः [स्युः] कथं सर्वार्थवेदनैः ॥§ 1216

सर्वज्ञत्वं तथा [चैवं] वर्ण्यते यैः स्वभक्तितः ।
तेषामसर्वविद्वान्तर्गता क्वेत्यपि चिन्त्यताम् ॥§ 1218

ते यदा तैः समीक्ष्यन्ते तदा क्षीणा प्रतिक्षीणां ।
योगिनः प्रति वार्त्तेयं नष्टानुत्पन्नगोचरा ॥§ 1220

सांख्यस्य योगिनः सर्वे चिरं जीवं साम्प्रतम् ।

४ *] भावस्य ।
५ योः] भिन्नयोः ।
६ ङ्गात्] सर्वस्य सर्वव्यपदेशप्रसङ्गात् ।
६ त्] स्यात् ।
७ सैव] भावनिवृत्तिरेव ।
७ स्य] भावस्य ।
७ तेन] नाशेन ।
७ भूता] अभिन्ना ।
८ विनाशः] अभिन्नोऽस्तु ।
१० एव] च विनाश एव
१० *] विनाशसम्बन्धात् ।
११ न्धिनः] विनाशस्य ।
१२ सौ] विनाशः ।
१३ व] न च
१५ भेदैकान्ते] विशेषणीभावस्यापि ।
१५ यि] स्यापि नियमयि
१७ *] उपलम्भप्रतिबन्धायोगात् ।
१८ *] नेष्यन्ते योगिभिः स्वयं ।
२१ ता] द्वार्ता गता
२२ तिक्षीणां] क्षणं
२४ जीवं] जीवन्तु

250/mkj सर्वदा [सर्वथा] भावा येभ्यःसोस्थोन संस्थिताः ॥ § 1222

योगिनः एवं चकारः काकवद्भुवि वा नुः ।
कैरिक तैस्ता संतीनाः कं यान्तु संश्रयम् ॥ § 1224

सदोपलभ्यमाना हि काटाः किन्नाम नाशिनः ।
अन्यथा नाशिनः सर्वे भवेयुः गगनादयः ॥ § 1226

इति कपिलमुनीशैः संस्तुते संस्त मार्गे,
अचलनिखिलभावानाश्रिते किन्तु नश्येत् ।
बत वदत विनाशे नैव चान्येन योगः ।
सत इह सततं तत् तन्निरोधो न वार्त्ता ॥ इति । § 1230

तत् स्थितम्--**विनाशो यदि भावस्वभावो न भवेत् तस्य किं कुर्वाणस्य स्याद् विनाशः** इति । § 1231

ननु यदुक्तम्--**तस्य विनाशस्य हेतुः किं कुर्वाणः स्यात्** इति; तत्र उत्पत्तेः कुर्वाणः स्यादिति चेत्; अत्राह--**पूर्व** इत्यादि । **न तावद् उत्पादयति**
/ms । तावच्छब्दो वितर्के न क्रमार्थो अन्यस्य प्रयोजनस्यावचनात् **नोत्पादयति** न जनयति **हेतुः** मुद्गरादिः **विनाशम्** इति विभक्तिपरिणामेन सम्बन्धः । कुतः ? इत्याह--**पूर्वावधिः** प्रागभावः तेन **परिच्छिन्नं** विशिष्टं **यद्वस्तु** घटादिः तस्य **सत्तया सम्बन्धः** समवायः स एव **लक्षणं** यस्य तस्य भावात् **तत्त्वात्** । कस्य इत्याह--**उत्पत्तेः** इति । न च प्रागस्ततो विनाशस्य सत्तया सम्बन्धः; अनभ्युपगमात् परस्य **त्रिपदार्थसत्करी सत्ता** इति वचनात् । नापि प्रध्वंसस्य परेण द्रव्यादिष्वन्त त त वि इष्यत इति मन्यते । § 1232

नन्वेवम् अत्यल्पमिदमुच्यते--**स हेतुः विनाशं न तावद् उत्पादयति** इति, यावता घटादेर्हेतुः तमवि नोत्पादयति । तथाहि--न तावद् घटादेः प्रागसतः तद्धेतुः आत्मलाभलक्षणामुत्पत्तिमुपजनयति; तदन्योत्पत्तिकल्पनानर्थक्यप्रसङ्गात् । नापि प्रागसतः सत्तासम्बन्धलक्षणा ; सत्तासमवायस्य नित्यत्वात् । न च कुतश्चिदज्ञातस्य बन्ध्यासुतस्येव सत्तया अन्येन वा सम्बन्धः, यतः

१ येभ्यःसोस्थोन] यैः कौटस्थ्येन
२ कारः] योगिनः वंचकाः
२ नुः] ?
३ म्] ?
४ काटाः] भावाः
६ संस्त] सांख्य
१४ मार्थो] र्थे
१८ स्य] कस्याः ?
१९ मात्] वैशेषिकस्य । सदिति यतो द्रव्यगुणकर्मसु सा सत्ता--वैशे० सू० १ । २ । ७ ।
२० रेण] वैशेषिकेण ।
२० वि] ष्वन्तर्भाव
२२ त] घटमपि ।
२२ वि] पि
२३ द्धेतुः] घटहेतुः ।
२४ णा] णाम्[[उत्पत्तिमुपजनयतीति सम्बन्धः ।]]
२५ ज्ञा] दजा
२५ अन्येन] समवायेन वा ।

किञ्चित् केनचिदुत्पादितं भवेत् । जातस्येति चेत्; यद लब्धात्मलाभस्य; त[र्हि] उक्तो दोषः--किमन्यया उत्पत्त्या ? कथमन्यथा शशशृङ्गादेर्भेद इति चेत्; अयमपरः परस्य दोषोऽस्तु । न खलु अत्सदोषाः सन्तोऽपि अकलङ्कमुपलीयन्ते । § 1233

ननु न विनाशस्याद्यस्य वा प्रागसतः सत्तासम्बन्धलक्षणा उत्पत्तिः हेतुना क्रियते यत्रायं स्यात्, अपि तु स्वरूपमेव क्रियतामिति चेत्; अत्राह--**तस्य** इत्यादि । **तस्य** विनाशस्य **कथञ्चित् केनापि** सत्तासम्बन्धकरणलक्षणेन /ms स्वरूपलक्षणेन वा प्रकारेण **कार्यत्वे** हेतुभाजतृत्वे **भावस्वभावानतिक्रान्ते**र्भावरूपानतिक्रमात् **न तावदुत्पाद यति** इति सम्बन्धो भावः स्यादिति मन्यते 251/mkj । तथापि स कुतो भावः स्यादिति चेत् ? अत्राह— **तल्लक्षणत्वाद् वस्तुनः** इति । परमतापेक्षया **स** सत्तासम्बन्धो **लक्षणं** यस्य तस्य भावात् तत्त्वाद् **वस्तुनः** सद्वर्गस्येति व्याख्येयम् । स्वमतापेक्षया तु **सः** प्रागसतो हेतोरात्मलाभो **लक्षणं** यस्य तस्य भावात् तत्त्वात् **वस्तुनो** भावस्य इति, स्वप्रागभावाद् अन्यथा प्रध्वंसो न विशिष्येत अवान्तरजातिसम्बन्धविरहात्, इतरथा द्रव्यादिवत् सत्तासम्बन्धः । यदि पुनः क्वचित्तदविरहेऽपि तत्सम्बन्धो नेष्यते; तर्हि [कथं] तत्सम्बन्धविरहेऽपि द्रव्यादीनामेव अवान्तरजातियोगो न जात्यादीनामिति विभागः स्यात् । एतेन अन्यस्यापि विशेषकस्य धर्मस्य संभवो निरस्त इति मन्यते । व्याख्याता एकेन अर्थेन कारिका । § 1234

साम्प्रतं प्रथमेन व्यतिरेकतां व्याकुर्वन्नाह--**कादाचित्कम्** इत्यादि । अत्रायमभिप्रायः— अनन्तरन्यायेन प्रागसन् पुनः कुतश्चित् जायमानो विनाशः कार्यम्, अत एव वस्तुव्यवस्था मितं तत् । इदानीं विनाशलक्षणं वस्तु **कादाचित्कं** देशकालद्रव्यादिनियतं **सदकार्यम् इति प्रक्रियाव्यावर्णनमात्रश्चाष्टषष्ठि** घटितकृतान्तपदार्थप्रपञ्चकथनमात्रम् । मात्रशब्देन अव्यवस्थितं तत्त्वं दर्शयति । कुतः ? इत्याह--**विरोधात्** । पूर्वापराभ्युपगमयोः अन्योऽन्यबाधनात् । तथाहि--यदि विनाश वस्तु प्रागसत् कुतश्चित् जायते कथमकार्यम् घटादिवत् ? अथाऽकार्यम्; गगनादिवत् कथं कादाचित्कं [कादाचित्कञ्च अका]र्यं चेति परस्परविरुद्धमेतत् । ततः कादाचित्कत्वात् /ms कार्यम् इति मन्यते । § 1235

**तथा कादाचित्कम् अनुत्पत्तिधर्मकम् इति प्रक्रियाव्यावर्णनमात्रम्** । कुतः ? इत्याह--**विरोधात्** इति । तद्यथा **तत्कादाचित्कं** प्रागसत् पुनर्ल-

---

१ द] यदि
३ स्य] वैशेषिकस्य ।
३ अत्स] अंश
३ अ] कलङ्करहितम् अकलङ्कन्यायम् ।
५ स्याद्य] न्य
५ स्य] घटादेः ।
८ तृत्वे] हेतुना जन्यत्वे
१४ अ] प्रागभावत्वप्रध्वंसत्वादि ।
१५ था] जातिसम्बन्धस्वीकारे ।
१५ न्धः] स्यात् इति शेषः ।
१५ पुनः] सामान्यादौ अवान्तरजातिविरहेऽपि ।
१५ द] द्
१६ त] सत्तासम्बन्ध ।
२१ त्] स्था, अभिमतं च तत्
२३ ष्ठि] मात्रम् स्वेष्टि
२३ कृतान्त] सिद्धान्त ।
२५ विनाश] शो
२५ त्] सन्

ब्धात्मलाभकं **कुड्यादिवत् कथमनुत्पत्तिधर्मकम्** अविद्यमानोत्पत्तिधर्मकम् ? तथात्मलामस्यैव उत्पत्तिरूपत्वस्यचिद् अर्थान्तरसत्तासम्बन्धनिषेधात् । अथाऽनुत्पत्तिधर्मकम् आकाशवद् बन्ध्यास्तन्धयवत्; कथं कादाचित्कम् इति विरोधः ? तस्मात् कादाचित्कत्वाद् उत्पत्तिधर्मकमिति भावः । § 1236

तथा, कादाचित्कम् **अनाधेयाऽप्रहेयाऽतिशयात्मकम्** अजन्याविनाशसामर्थ्यस्वभावम् **इति प्रक्रियाव्यावर्णनमात्रम्** । कुतः ? **विरोधात्** । तथा च कुतश्चिद् आत्मानं तल्लभते चेत्यदिवत् दुरुपपादमनाधेयाऽप्रहेयातिशयात्मकत्वम्, अन्यत आत्मलाभस्यैव आधेयप्रहेयातिशयात्मकत्वात् । यदि पुनः गगनादिवत् अनाधेयाऽप्रहेयात्मकम्; कथं कादाचित्कम् ? अथ जातस्य पुनः अतिशय आवानुपानेतुं वामशक्यत इति तत्तदात्मकमुच्यते; तदसत्य कादाचित्कत्वे अर्थक्रियाकारित्वे वा तत्र आधेयप्रहेयातिशयात्मकत्वं घटादिवत् पुनरनुमितेः प्रतिपद्यमानः केन वार्यते ? § 1237

तथैव कादाचित्कमविनश्वरम् इति प्रक्रियाव्यावर्णनमात्रं विरोधात्, स-
252/mkj र्वस्य कादा चित्कस्य विनश्वरत्वेन प्रतीतिः घटादिवत् इति । **तथा** कादाचित्कं **स्वविनाशहेतुभावात् स्व**शब्देन विनाश वस्तु परामृश्यते तस्य **विनाशः स्वो** विनाशस्य आत्मीयो वा **विनाशः** तस्य **हेतोः** कारणस्य **अभावात् न विनश्यति इति प्रक्रियाव्यावर्णनमात्रं विरोधात्** इति स्वमतव्याधातात् । *यो हि कादाचित्कत्वे जगतोऽपि विनाशकारणमभ्युपगच्छति तस्य प्रकृते काऽक्षमा ? तथा **विनाशे वा** प्रध्वंसे वा **विनाशवस्तुनः** इति सम्बन्धः । **वा शब्दः** अभ्युपगमसूचकः पक्षान्तरसूचको वा, **विनष्टस्य** प्रध्वंसविशेषणवतः **सत्तासम्बन्धिनो** घटादेः । § 1238

**यदि वा, सतो** विनाशाद् भिन्नस्य स्वतो विद्यमानस्य **अनुत्पत्तिः** पुनरप्रादुर्भावः । कुतः ? इत्याह--**उत्पत्तिहेत्वभावात्** इति । भावस्य उत्पत्तौ त्रिविधो हेतुः--समवायि-असमवायि-निमित्तभेदेन । न च विनाशः तेषामन्यतमः । आदित्यालोकाभावलक्षणे तमसि पुनः प्रदीपादिभावेन प्रहतेऽपि पुनः तदालोकोन्मज्जनम् । नाप्यन्यस्य तत्कारणस्य भावनियम इति प्रक्रियावर्णनमात्रम् । कुतः ? विरोधात् । यदि विनाशविनाशेऽपि प्रादुर्भावः; न तर्हि विनाशविनाशः तद्भावः, तल्लक्षणत्वादस्य, कथमन्यथा नैरात्म्यनिषेधे सात्मकत्वसिद्धिः । ततो यदि [विनाश]विनाशः; कथन्न भावप्रादुर्भावः ? न चेत्; कथं तन्नाशः ? § 1239

यत्पुनरुक्तम्--उत्पत्तिहेतुभावादिति; तदसारम्; यतो घटोत्पत्तौ अवयवसंयोगः कारणम्, तस्यापि क्रिया [, अ]तः क्रियाविनाशविनाशे त-

२ त] असतः आत्मलाभ एवोत्पत्तिरिति भावः ।
२ चिद्] त्वात् । कस्यचिद्
७ त्] चेत् पटादिवत्
१० त] आधातुमपनेतुं वा न शक्यते
११ त्य] तदसत्;
१४ तीतिः] तेः
१५ हेतु] हेत्व
१५ विनाश] शि
१८ *] बौद्धः ।
१८ स्य] विनाशहेतुस्वीकारे ।

त्प्रादुर्भावः, ततः संयोगः ततोऽपि घटः । यदि वा, विभागेन संयोगविनाशः कृत इति सहेतुकः तस्यापि कुतश्चिन्नाशे संयोगोन्मज्जनम् । अथवा, घटाद् भिन्नस्य नाशस्य  भावे न तस्य किञ्चिदिति नाशनाशे निष्प्रतिद्वन्द्विनः /ms केवलमुपलम्भो भवति तमोनाश इव इति किं हेतुना ? § 1240

यत्पुनरुक्तम्--आलोकाभावे तमसि नाशितेऽपि न दिनकरालोकप्रादुर्भाव इति; तदपि न सुपरीक्षिताभिधानम्; तत्रापि चोद्यस्य समत्वात् । न आलोकाभावमात्रं तमः, सालोकापवरके बहलालोकप्रदेशात् प्रविष्टस्य तमःप्रतिभासात् । विज्ञानाभावे चात्र तमसि सर्वत्र तदभाव एतदस्तु नादित्यालोकाभावः । § 1241

ज्ञान भावः तमः; अभावे न ज्ञानप्रादुर्भावः । न खलु चि  तदभाव एव मतः ; इतरथा आलोकोऽपि तमोऽभावो भवेत् । भावप्रत्ययवेद्यत्वाच्च नाऽभावमात्रं तमो घटादिवत् । ततः सूक्तम्--**कादाचित्कम्** इत्यादि । § 1242

तत्रैव दूषणान्तरमाह--**पटादेरपि** इत्यादि । न केवलं विनाशस्य किन्तु **घटादेरपि** हेतुमर्थे * कादाचित्कत्वे च सति **एवं** विनाशवत् **प्रसङ्गात्** कारणात् **प्रक्रियावर्णनमात्रम्** इति सम्बन्धः । पुनरपि दोषान्तरमाह--**स्वसामग्रीजन्मन** इत्यादि । स्वसामग्र्या जन्म यस्य भावस्य  अभावस्य /ms [वा] तस्य । **तद्विनाशकारणस्य** यत् तद्विनाशकारणं परेण अभ्युपगतं 253/mkj तत् तच्छब्देन परामृश्यते, तच्च तद्विनाशकारणं च इति तस्य, **अवश्यंभावनियमाऽभावात्** कारणात् **न कश्चित्** कृतकत्वादिः अनित्यत्वसाधनो **हेतुः अव्यभिचारी स्यादित्यर्थः** । § 1243

यदुक्तम्--न प्रागसतो विनाशस्य सत्तासम्बन्धलक्षणा उत्पत्तिः केनचित् क्रियते अपि तु स्वरूपमेव; तत्राह सौगतः--* **विनाशहेतुः** इत्यादि । **विनाशस्य हेतुः** कारणं पराभ्युपगतः **प्रागसतः** स्वोत्पत्तेः पूर्वमसतोऽविद्यमानस्य **विनाशस्य स्वभावं** स्वरूपं **करोति न सत्तासम्बन्धम् इत्येवं चेद्** यदि । तत्र दूषणमाह--**कः पुनः** इत्यादि । **कः** न कश्चित् **पुनः** इति अक्षमायाम्, **भावानां** घटादीनां यः **अन्योऽन्याभावः**, अत्यन्ताभावस्य एतद्विशेषत्वात् पृथगनभिधानम्, यश्च **प्रागभावः** तस्य **कर्त्ता, यतः** कर्तुः **तत्स्वभावस्थितिः ? यत** इति वा आक्षेपे, नैव तत्स्थितिः । तथा च प्रयोगः--[यः]अभावः स स निर्हेतुकः यथा प्रागभावादिः, अभावश्च विनाश इति । ननु यदि नाम प्रागभावादेरहेतुत्वं नैतावता विनाशस्य तत्, अन्यथा गगनादेरहेतुत्वात् घ-

१ त्प्रादुर्भावः] क्रियाप्रादुर्भावः ।
२ हेतुकः] संयोगविनाशस्यापि ।
३ त] घटस्य ।
८ भाव] विज्ञानाभाव एव तमोऽस्तु ।
९ नादित्यालोकाभावः] तमः ।
१० ज्ञान] ना
१० चि] क्वचित्
१० भाव] ज्ञानाभाव ।
११ तः] तमः
११ भाव] तमोऽस्ति इत्यादि ।
१५ *] हेतुमत्त्वे
२२ चित्] कारणेन ।
२३ *] तुलना--न हि विनाशहेतुर्भावस्य स्वभावमेव करोति; तस्य स्वहेतुभ्यो निर्वृत्तेः ।--हेतुबि॰ पृ॰ ५६ ।

टादीनामपि तद्भवेत् । प्रत्यक्षबाधनमुभयत्र समानमिति चेत्; अत्राह--**अस्ति वा** इत्यादि । **अस्ति** विद्यते **वा कश्चिद्** देशादिकृतो **विशेषः** भेदः प्रागभावादेर्विनाशस्य ? नास्ति इत्यर्थः । एतदुक्तं भवति— यथा प्रागभावादयः कारणान्वयव्यतिरेकाननुविधायिनः अकृतकाः तथा विनाशोऽपि । नहि महति दण्डादिसन्निपाते महान् अन्यथाविधे अन्यथा विनाशः; विनिवृत्तिमात्रस्य /ms सर्वत्र अविशेषादिति । न च भावतः प्रागभावादयः सन्ति; इत्याह--**परस्पर** इत्यादि । **परस्परम्** अन्योन्यं **स्वभावश्च देशश्च कालश्च** तेषां **परिहारः** तेन **परिणतिम्** आत्मलाभम् **अभावं विद्मः भावानाम्** इति सम्बन्धः । § 1244

एवं सौगतेनापि नैयायिकं विमुखतां नीत्वा अधुना सौगतं स्वयं तां नयन्नाह--**तथा च** इत्यादि । **तथा च** तेन च तत्परणत्यभाववेदनप्रकारेण **हेतुमत्त्वं** सकारणत्वं **विरुद्धप्रमाणबाधितम्** । कस्य ? इत्याह--**क्षणिकस्य** भावस्य इति वचनपरिणामेन सम्बन्धः । इदमत्र तात्पर्यम्--नैयायिकस्य हेतुमतोऽपि विनाशस्य विनाशमनभ्युपगच्छतः अनित्यत्वहेतवो व्यभिचारिणः, प्रागभावादिकमहेतुमभ्युपगच्छतो विनाशो विनिहेतुः तदभावो वा । बौद्धस्य पुनः क्षणिकत्वमभ्युपच्छतः कृतकत्वादयः असिद्धा एव इति नासौ परमतिशेते इति । कुतस्तस्य न हेतुत्वम् ? इत्याह--**न ह्यतीत** इत्यादि । [हि] यस्माद् **अतीतेन** कार्योत्पत्तेः प्रागेव नष्टेन **भावेन वर्त्तमानस्य तद्वत्ता** हेतुमत्ता **[न] अतिप्रसङ्गात्** सर्वेण अतीतेन सर्वस्य तद्वत्ताप्रसङ्गात् । निरूपितं चैतत् **कार्यकारणता नैव** सिद्धवि° ४ । ३ इत्यादि । § 1245

नन्वेवं नैयायिकस्येव सौगतस्यापि मताभावे सकलशून्यतैव स्यादिति चेत्; अत्राह— **समक्षम्** इत्यादि । § 1246

...7 समक्षं गुणपर्यायस्वभावद्रव्यसाधनम् ।
विपक्षेऽर्थक्रियायोगाद् व्यावृत्तं विभ्रमात्मनः ॥ ७ ॥§ 1248

254/mkj

इति स्थितमेतत् सर्वम्...गुण... § 1249

**समक्षं** प्रत्यक्षं **गुणश्च पर्यायाश्च स्वभावा** आत्मानो यस्य **द्रव्यस्य** तस्य /ms **साधनम्** बहिरन्तश्च गुणपर्यायात्मकद्रव्यप्रत्यक्षत्वात् इत्यर्थः । अनेन सकलशून्यतां कल्पयतः प्रत्यक्षबाधां दर्शयति । स्यान्मतम्--अस्ति प्रत्यक्षबुद्धौ

१ त] अहेतुकत्वं स्यात् ।
५ अ] अल्पे ।
६ तः] परमार्थतः ।
९ तां] विमुखताम्— युक्तिशून्यताम् ।
१४ विनिहेतुः] शोऽपि निर्हेतुः
१५ इति] बौद्धः ।
१६ म] नैयायिकम् ।
१८ द्व] हेतुमत्ता ।
१९ त्] पृ° २३९ ।

यस्य प्रतिभासः, स तु भ्रान्तः बाध्यमानत्वाद् द्विचन्द्रादिप्रतिभासवदिति चेत्; अत्राह--**विपक्ष** इत्यादि । **विपक्षे** भावाद्येकान्ते **अर्थक्रियायाः** दर्शनादिलक्षणाया **अयोगात् व्यावृत्तम्** अपसृतम् । कुतः ? **विभ्रमात्मनः** भ्रान्तस्वभावात् **समक्षम्** इति सम्बन्धः । एतदुक्तं भवति--यथा एकचन्द्रदर्शनभावाद् द्विचन्द्रदर्शनं भ्रान्तं तथा एकान्तदर्शनादिभावे अनन्तरसमक्षं भ्रान्तं स्यात् । न चैवमिति । कारिकार्थस्य नैकधा राजपथीकृतत्वात् प्रकृतमुपसंह [रन्नाह--इति] **स्थितमेतत्** इत्यादि । **स्थितं** निश्चितमेतत् । किं तत् ? इत्याह--**सर्वम्** इत्यादि । तथा परं स्थितम् इत्याह--**गुण** इत्यादि । तु सद्भावोऽत्र द्रष्टव्यः द्रव्यलक्षणान्तरनिषेधार्थत्वात् । § 1250

ननु चेतनाऽचेतनयोः अमूर्त्तमूर्त्तयोः जीवकर्मणोः सम्बन्धाभावेन एकस्य गमने स्थाने वा नान्यस्य नियमेन गमनं स्थानं वा गवाश्ववत् । सम्बन्धेऽपि तदुत्पत्तिलक्षणे स एव दोषः घटकुलालवत् । तादात्म्यलक्षणे तु नायं दोषः कृतकत्व-शब्दवत्, अत्रापि अन्यतरदेव स्यात् कल्पितो वा भेद इति चेत्; अत्राह--**चेतना** इत्यादि । § 1251

...8 चेतनाचेतनावेतौ बन्धं प्रत्यपेक्षताम् ।
भिन्नौ लक्षणतोऽत्यन्तं हेमादिश्यामिकादिवत् ॥ ८ ॥§ 1253

परस्परविलक्षणावपि चेतनाचेतनौ बन्धं प्रत्येकत्वं प्रतिपद्येते हेमश्यामिकादिवत् । न च मूर्तामूर्तयोः संयोगो विरुद्धः पञ्चस्कन्धकदम्बकाभावप्रसङ्गात् आत्ममनःसन्निकर्षादेश्च । § 1254

**चेतन** आत्मा **अचेतनः** कर्मपदार्थः तौ **चेतनाचेतनौ**, उपलक्षणमेतत् तेन अमूर्त्तमूर्त्तौ **एतौ** प्रत्यक्षानुमानप्रतीयमानौ **बन्धं** संयोगविशेषम् **प्रति अपेक्षकताम्** सहचरादिकार्यसमानतादात्म्यं भिन्नद्रव्ययोः तद्विरोधात् । कुतस्तादात्म्यं न गतौ ? इत्याह--**भिन्नौ** परद्रव्यान्तरभूतौ यतः । केन /ms
? इत्याह--**लक्षणतः** स्वलक्षणेन आद्यादिपाठान्तः, तल्लक्षणमेव आश्रित्य । तथाहि--ज्ञानदर्शनोपयोगो जीवस्यैव लक्षणम्, अचेतने रूपाद्यात्मकत्वं *पुद्गलस्यैव इति । कथं भिन्नौ ? इत्याह--**अत्यन्तं** कालत्रयेऽपि परस्परं लक्षणसंक्रान्त्यभावमनेन दर्शयति । दृष्टान्तमुभयत्र दर्शयति **हेमादिश्यामिकादिवत्** । एकेन आदिशब्देन माणिक्यादेः अपरेण किट्टादेः परिग्रहः ताविव तद्वदिति । § 1255

१ स्य] द्रव्यस्य ।
१३ अ] तादात्म्यसम्बन्धे ।
१३ अ] जीव एव स्यात् कर्म एव वा ।
२२ क] क्ष्य
२५ म्] उपयोगो लक्षणम्--त० सू० २ ।
८ ।
२५ *] स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ।--त० सू० ५ । २३ ।

कारिकां विवृण्वन्नाह--**परस्पर** इत्यादि । **परस्परम्** अन्योन्यं **विलक्षणावपि** विसदृशलक्षणावपि **चेतनाऽचेतनौ** जीवकर्मपुद्गलौ **बन्धं प्रति एकत्वं प्रतिपद्येते हेमश्यामिकादिवद्** आदिशब्दः प्रत्येकमभिसम्बध्यते । § 1256

255/mkj

ननु[मूर्त्ताऽ] मूर्त्तयोस्तयोः संयोगविशेषलक्षणः कथं बन्धो येनैवं स्यादिति चेत् ? अत्राह--**न च** इत्यादि । **न च** नैव **मूर्ताऽमूर्तयोः** कर्मात्मनोः **विरुद्धः संयोगः** । कुतः ? इत्यत्राह--**पञ्चस्कन्ध** इत्यादि । § 1257

ननु **विषादिवत्** इत्यनेन परिहृतं यत इत्यदोषः । **पञ्चस्कन्धा** रूपादयः तेषां **कदम्बकस्य** समूहस्य **अभावप्रसङ्गात्** कारणात् **न च मूर्त्ताऽमूर्त्तयोर्विरुद्धः संयोगः** इति पदघटना । तथाहि--क्वचित् शरीरे रूपस्कन्धो मूर्त्तः, अमूर्त्ता वेदनादयः, तत्समूहरूपपरापररूपतया उपजायमानस्य संसारव्यपदेशात् । मूर्त्तेत्तरयोश्च संयोगविरोधः अन्यत्र रूपम् अन्यत्र वेदनादयः सह्यविन्ध्यवदिति न शरीरे [सु]खाद्यनुभवनमिति प्राप्तम् । § 1258

ननु तत्कदम्बकं यदि संयोगः; तर्हि तदभावो न सौगतस्य दोषाय

/ms अभ्युपगमादिति चेत्; नैरन्तर्यस्य तेनाप्युपगमात् । न च नैरन्तर्यादन्यः संयोगो जैनस्यापि । ततो यथा पञ्चस्कन्धानां मूर्त्तेतररूपाणामपि नैरन्तर्यलक्षणः संयोगः तथा जीवकर्मणोरिति । **आत्मनः** * **सन्निकर्ष** आत्ममनसोः संयोगः, **आत्मा मनसा युज्यते** न्याम° पृ° ७४ इति वचनात् **आदिः** यस्य स तथोक्तः तस्य **च अभावप्रसङ्गात्** न च तयोः संयोगो विरुद्धः । **आदिशब्देन** मनोगगनसन्निकर्षः प्रकृतिपुरुषसन्निकर्षश्च गृह्यते । § 1259

[अस्तु] यथार्थग्रहणस्वभावस्य आत्मनो मिथ्याज्ञानादनुमितो बन्धः, स तु केन हेतुना ? इत्यत्राह--**शुभाऽशुभैः** इत्यादि । § 1260

...9 शुभाशुभैश्चेतनो जीवो बध्यतेऽचेतनैः स्वयम् ।
यथास्वमास्रवैश्च स्वैः मनोवाक्कायकर्मभिः ॥ ९ ॥§ 1262

४ योः] जीवकर्मणोः ।
७ इ] पृ° २३१ ।
७ यः] रूपवेदनाविज्ञानसंज्ञासंस्काराः ।
११ विरोधः] धे
१३ त] पञ्चस्कन्धसमूहः ।
१३ त] संयोगाभावः ।
१४ स्य] अन्तरालाभावरूपस्य सम्बन्धस्य । प्राप्तावस्थाविशेषे हि नैरन्तर्येण जातितः । ये पश्यत्याहरत्येष वस्तुनी ते तथाविधे ॥ ६६६ ॥ ये निरन्तरोत्पन्ने वस्तुनी ते एव संयुक्तशब्दवाच्ये... --तत्त्वसं° प° पृ° २२१ ।
१५ स्यापि] संयोगोऽपि नैरन्तर्यावस्थितार्थव्यतिरेकेण अपरो न प्रतीयते । --न्यायकुमु° पृ° २७७ । सन्मति° टी° पृ° ६७७ ।
१६ *] आत्ममनः
१८ त] मूर्तामूर्तयोः ।
१९ कृति] सांख्याभिमतः ।

मनोवाक्कायकर्मभिः शुभैरशुभैश्चास्रवैः यथास्वं पुण्यपापबन्धो जीवानामित्यत्र न कश्चिद् विप्रतिपत्तुमर्हति किन्तु सर्वेषामविगीतोऽयमिति । § 1263

**जीवः** आत्मा । किंभूतः ? **चेतनः** स्वपरग्रहणस्वभावः न वैशेषिककल्पितः तस्य बन्धफलाभावात् । तस्य हि फलं सुखदुःखादिकं मिथ्याज्ञानमन्यद्वा । न च सर्वदा अचेतनस्य तद् युक्तं विरोधात् । भिन्नस्य उत्पत्तावपि न तस्य किञ्चिद् अतिप्रसङ्गात्, समवायनिषेधात् । स किम् ? इत्याह--**बध्यते** संयुज्यते । कैः ? इत्याह--**अचेतनैः** कर्मपुद्गलैः न सौगतकल्पितैः चेतनरूपैः कर्मभिः **चेतना कर्म** अभिध० को० ४ । १ इति तथागतवचनात् । कुतः स्याः कर्मत्व विरोधात्, आत्मस्वभा वत्वाच्चेतनायाः । 256/mkj विपरीता चेतना कर्मेति चेत्; तस्याः कुतो भावः ? वासनातश्चेत्; न; तन्निषेधात् अनन्तरमेव, तस्याश्च तत्त्व-तद्वेदनकाल एव नरकादिप्रापणसामर्थ्यवेदनात्, सर्वस्यापि हिंसादिचेतनादिभ्यः अपरोपदेशात् निवृत्तिः स्यात् तत्त्ववेदिता योगिनामिव । न खलु कश्चित् सचेतनो दुस्तटीपातमतितया न कं जानन्नेव आचरते दुःखभीरुः । न च निष्कलदर्शने चेतनानिश्च- /ms येऽपि तत्सामर्थ्यानिश्चयकल्पनमिति सुविचारितमेतत् । तत्सामर्थ्याग्रहणे च तद्वतोऽप्यग्रहणमिति न अचेतनकर्मपक्षाद् विशेषः । § 1264

ननु बध्यन्ते सौ तैः, स तु नश्वरम् अपि तु महेश्वरप्रेरितैः । तयाहि--यः चेतनेन बध्यते स धीमता प्रेरितेन बध्यते, यथा चौरो निगडादिना, बध्यते च आत्मा तथाविधस्तेनेति, योऽसौ तत्प्रेरकः स महेश्वर इति चेत्; अत्राह--**स्वयम्** इति । **स्वयम्** आत्मना न ईश्वरादिना । यो हि चेतनः तैः बध्यते स एव आत्मवन्धनाय तेषां प्रेरकः किं तत्र ईश्वरेण अन्येन मन्यत वा । न चेदमत्र चोद्यम्--अर्वाग्दर्शी तानि अपश्यन् कथं तेषां प्रेरक इति; स्वप्नादौ अदृष्टात्तानामपि स्वकरचरणादीनां प्रेरकत्वदर्शनान् । यस्य च ईश्वरज्ञानमेकं नित्यमनात्मवेदकम्, तस्य ईश्वरः तानि पश्यति

---

४ ल्पितः] सर्वथा नित्यस्य निष्क्रियस्य स्वयमचेतनस्य च ।
५ दा] था
५ स्य] सुखदुःखादिकम् ।
८ इति] चेतना मानसं कर्म— अभिध० को० ।
९ स्याः] कुतोऽस्याः[[चेतनायाः ।]]
९ त्व] त्वम् ?
१० स्याः] विपरीतायाः ।
११ त] वासनायाश्च ।
१३ वेदिता] नां
१४ कं] नरकं
१४ निष्क] निर्विकल्पदर्शने ।
१५ मिति] निश्चयानिश्चयलक्षणविरुद्धधर्माध्यासप्रसङ्गात् ।
१७ न्ते] ध्यतेऽ
१७ तैः] कर्मभिः ।
१७ म्] न स्वयम्
१७ प्रेरितैः] अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् श्वभ्रं वा स्वर्गमेव वा ॥--महाभा० वनप० ३० । २८ ।
२१ तेषां] कर्मणाम् ।
२२ वा] वेति मन्यते
२२ ता] कर्माणि ।
२३ अदृष्टात्ताना] ष्टाना
२४ य] वैशेषिकस्य ।
२४ रः] कर्माणि ।

इत्यतिश्रद्धेयम् । अनित्यं चेत्; *तत्तर्हि तस्य अदृष्टपूर्वकम्, अन्यथा **यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः** वैशे॰ सू॰ १ । १ । २ इति व्याहन्यते, अनेन व्यभिचारात् । तस्य च अदृष्टसम्बन्धो यदि अन्येन धीमता कृतः; अनवस्था । स्वयं चेत्; अन्यस्यापि तथा अस्तु । इति साधूक्तम्— **स्वयम्** इति । § 1265

अथ मतम्--यदि चेतनः तैः स्वयं मन्यते मुक्तात्मानोऽपि बध्येरन् विशेषाभावादिति चेत्; अत्राह--**आस्रवैः** इति । आस्रवन्ति समागच्छन्ति संसारिणां जीवानां कर्माणि यैः येभ्यो वा ते आस्रवा रागादयः तैः करणभूतैः कृत्वा । न केवलम् एतैरेव अपि तु **मनोवाक्कायकर्मभिश्च** मनोवचनशरीरव्यापारैश्च । /ms यद्येवशब्दः रागादिवद् एतेष्वपि प्रवर्तते निमित्तसाम्यात् तत्किमर्थं तच्छब्देन रागादय उच्यन्ते इति चेत् ? सत्यम्, मनःप्रभृतीनां स्वशब्देनाविधानात्, *तच्छब्देन तेषामेव अभिधानम् यथा **दोषावरणयोर्हानिः** आप्तमी॰ श्लो॰ ४ इत्यत्र दोषशब्देन आवरणयोरप्यभिधानेऽपि आवरणयोः पृथगभिधानात् दोषा रागादय उच्यन्ते । § 1266

यदि वा, **आस्रवैः** मनोवाक्कायकर्मभिः इति समानाधिकरण्येन सम्बन्धः 257/mkj करणीयः । तत्र च लौकिकन्यायापेक्षया मनःकर्मभिः इत्यनेन मानसा व्यापारा रागादयोऽपि गृह्यन्ते, ततः सिद्धा न तैर्बध्यन्ते निरास्रयत्वात्तेषामिति मन्यते । अनेन सर्वेण एतत् कथयति--विवादगोचरापन्नं कार्यं बुद्धिमत्कारणं तत्त्वात् घटादिवत् इत्यत्र यदि चेतनेन आत्मना सास्रवेण आत्मनोऽचेतनैर्बन्धः स्वयं क्रियते, इति स एव क्रियते इति स एव धीमान् तत्कारणं साध्यते; तर्हि सिद्धसाधनम् । परश्चेत्; दृष्टान्तेऽपि मतत्सिद्धिरिति । § 1267

ननु बध्यमानोऽसौ आस्रवैः कृत्वा अचेतनैः स्वयम्, तथापि आत्मीयैरिव परकीयैरपि बध्यते इति मीमांसकः । स हि पुत्रादिसम्बन्धिभिः तैः चिरमृतानामपि पित्रादीनाम् ब[द्ध]त्वमभ्युपगच्छति, सौगतो वा अन्यकर्मभिः अन्यस्य; तं प्रति आह--**स्वैः** इति । **स्वैः** आत्मीयैः आस्रवैः न परकीयैः,

१ *] ईश्वरज्ञानम् ।
१ स्य] ईश्वरस्य ।
४ स्यापि] स्वयं सम्बन्धोऽस्तु ।
६ ते] बध्यते
९ भिश्च] कामवाङ्मनःकर्म योगः । स आस्रवः ।--त॰ सू॰ ६ । १, २ ।
१० द्येव] यद्यास्रव
११ र्थं] आस्रवशब्देन ।
१२ ब्देनावि] भि
१२ *] आस्रवशब्देन ।
१२ तेषामेव] रागादीनामेव ।
१४ न्ते] वचनसामर्थ्यादज्ञानादिर्दोषः स्वपरपरिणामहेतुः ।...आवरणात् पौद्गलिकज्ञानावरणादिकर्मणो भिन्नस्वभाव एवाज्ञानादिर्दोषोऽभ्यूह्यते ।--अष्टस॰ पृ॰ ५१ ।
१७ सिद्धा] मुक्तपुरुषाः ।
१७ न्ते] रागादिरहितत्वात् ।
१७ य] व
१९ त्वात्] कार्यत्वात् ।
१९ इ] महाभूतचतुष्टयमुपलब्धिमत्पूर्वकं कार्यत्वात्...--प्रश॰ कन्द॰ पृ॰ ५५ । न्यायकुसु॰ ५ । १ ।
२० स] स्वयं स्वः क्रियते ।
२१ म] न
२२ मानोऽसौ] आत्मा ।
२३ तैः] आस्रवैः ।
२५ अन्य] क्षणिकत्वात्, अन्येन क्रियते अन्यश्च बध्यते इति भावः ।

अव्यवस्थापत्तेः । न खलु पुत्रस्य सुरादर्शनाभिलाषादयः पितरम् अत्यन्तश्रोत्रियं सुरया योजयन्ति जीवन्तपि किमङ्ग पुनः मृतान् ? अन्यथा कृतानेकयोगोऽपि पिता पुत्रदोषात् नरकं व्रजेदिति न कश्चित् प्रेक्षाकारी नियमेन सुकृतकारी स्यात् । कदाचित् पुत्रं दोषकारिणमाशङ्कमानः पुत्रो /ms
वा न जननीयः । नहि वैरिणः स्ववधमाशङ्कमान एव तम् आत्मनः सन्निहितमुपनयति । यदि पुनः कस्यचित् कश्चित् पुत्रः श्रुतकारी दृष्ट इति स्वयं पुत्रजनने प्रवृत्तिः--अन्योऽपि तादृशो भविष्यति, कदाचिदर्थसन्देहो हि कृषीवलादिवत् प्रवृत्तेः अङ्गमिति; तदसाम्प्रतम्; यतः कस्यचिदपकार्यपि तादृक्षो भविष्यति इत्यनर्थसंज्ञानिवृत्तेः । ततः सूक्तम्--**स्वैः** इति । यद्वा, **स्वैः** अचेतनैर्बध्यते; अन्यथा ठकपापैः सर्वोऽपि बध्येत । यदि असौ अन्यस्मै ददाति, तदा सोऽपि बध्यते । तथाहि--सौगतः जन्मयोपार्जितं पुण्यं तेन त्वाः सर्वे सर्वे सत्त्वाः सुखिनो भवन्तु इति सर्वोऽपि वदतीति चेत्; वतिनैता तस्य पुण्येन अन्ये सुखिनो नाम, *इतरथामतिर्यदैव पापो भणति मदीयेन अतिपापेन सर्वे योगिनो दुःखिता भवन्तु तदाऽसौ सकलसंसारदुःखरहितो योगिनस्तु तत्सहिताः स्युः इति । यस्मै तद्दीयते स यदिच्छति, तर्तर्हि सर्वमेव तत्त योगिनः तदिच्छन्ति इति चेत्; न युक्तमेतत्; यतो यदैव म्रियमाणाय चिरंजीविनम् *इच्छति, वर्षशतायुः स्वायुः ददाति, तद्दातुः तदैव मरणम् अन्यस्य चिरजीविनस्तम् भवेत् । न चैवम् । किञ्च, § 1268

इष्टाय भाग्यहीनाय वक्रवन्ती सपुण्यकम् ।
ददानः पुण्यहीनः स्यात् इष्टश्चक्रिपदं व्रजेत् ॥§ 1270

258/mkj

ततो यत्किञ्चिदेतत् । § 1271

कथंभूतैः तैः ? इत्याह--**शुभाऽशुभैः** इति । पुण्यहेतुभिः **शुभैः** अपुण्यहेतुभिः **अशुभैः मनोवाक्कायकर्मभिः आस्रवैः** इति । तद्धेतुत्वम् एतेषां वृत्तौ /ms
निवेदयिष्यति । § 1272

---

५ नीयः] इति मन्येत ।
५ वैरिणः] सकाशात् ।
६ पुत्रः] वेदानुसारी ।
९ संज्ञा] शङ्काऽ
१० असौ] ठकः चौरवृत्त्या गृहीतं द्रव्यम् ।
११ सोऽपि] ठकद्रव्यग्राही पुरुषोऽपि ।
११ न्म] यन्म
१२ त्वाः] त्वाः सर्वे इति व्यर्थमत्र द्विर्लिखितं भाति ।
१२ इति] ...यत्प्राप्तमर्थकुशलं मयाऽमलं । तेन सर्वजगदर्थसाधिनी सिद्धिरस्तु जगतोऽस्य सर्वदा ॥--प्र॰ वार्तिकाल॰ पृ॰ ६४८ । तत्त्वसं॰ प॰ पृ॰ ९३६ । बोधिच॰ पं॰ पृ॰ ६०५ ।
१३ तिनैता] नैतावता
१३ *] कश्चित् पापबुद्धिः ।
१४ दाऽसौ] पापी ।
१५ दि] दी
१६ त्त] नहि सर्व एव तत्र
१७ *] कश्चिदिष्टजनः, अथ च ।
१८ म्] वित्वं
१९ न्ती] चक्रवर्ती
२३ वृत्तौ] टीकायाम् ।

ननु च य एव पुण्यहेतवः त एव पापहेतवः शुभाचरणवतोऽपि अपायदर्शनात्, तथा य एव पापहेतवः त एव पुण्यहेतवोऽपि हिंसाद्यनुष्ठानरतस्यापि अभ्युदयदर्शनात् । एवं च हेतुसङ्करे कथं प्रेक्षाकारिणा धर्माद्युपायाचरणमिति चेत्; अत्राह--**यथास्वम्** इति । यानि स्वानि ये वा **यथास्वम्** इति । एतदुक्तं भवति--यस्य शुभस्य अशुभस्य वा चेतनस्य यानि मनोवाक्कायकर्माणि स्वानि कारणत्वेन प्रत्यासन्नानि ये वा आस्रवाः तेषामनतिक्रमेण चेतनोऽचैतनैर्बध्यते इति । न खलु शुभस्य अचेतनस्य कारणानि अशुभस्य सुता भवितुमर्हन्ति, अन्यथा शाल्यङ्कुरकारणानि यवाङ्कुरस्य स्युः । यस्तु शुभाचारवतोऽपि अपायो दृश्यते नासौ तदाचारात् तज्जन्यानाद्वाकर्मणः, अपि तु पूर्वकृतदुष्कर्मणः, इतरथा तदाचारफलस्य तदैव निष्पन्न[त्वान्न] कश्चिद् भाविना मन्त्रदेवताविशेषाराधनादिफलेन तद्वान् स्यात् । यदि च कदाचित् शुभाद्वाऽनन्तरमपायदर्शनात् स एव तस्य तत्कारणस्य वा कारणम्; हन्त सविषं दिव्यमाहारं भुञ्जानस्य मृत्युः तदाहारकृतः ! यदि पुनः प्रायशः तदाहारात् स न दृष्टः, किन्तु विषाद् दृष्टः इति तदेव तत्कारणं कल्प्यते नाहारः; एवं प्रकृतेति कल्पनायाम् किं विरुध्येत यतः सा न क्रियेत ? अपायस्य वञ्जलं विरुद्धाचरणादेव दर्शनात् । ननु स्यादेतदेवं यदि शुभावणेत् पुण्यं कुतश्चित् सिद्धं स्यादिति चेत्; आस्तां तावदेतत् वृत्तौ वक्ष्यति । § 1273

/ms एतेन हिंसाद्यनुष्ठानात् कदाचिद् *हिरण्यादिलाभोपलम्भात् तदनुष्ठानं धर्मसाधनम् इति निरस्तम्; तल्लाभस्य पूर्वकृतसुकृतादेव भावात् । तदनुष्ठानेऽपि तत्त्वाभा *दर्शनात् । इदं तु स्यात्--इत्थं तेन कर्म कृतं यत्तदनुष्ठानसहितं फलं ददाति । *तत एव च तद्भावे गुरुभार्याभिगमनादेः [सुखसाधनलाभः ।तत् स्यात्] । § 1274

एतेन इदमपि प्रयुक्तम्--**परस्य अनुकूलेषु अनुकूलाभिमानजनितोऽभिलाषः अभिलषितुः अर्थाभिमुखक्रियाकारणं जनयति तत्तदात्मनोऽनुकूलेषु तज्जनिताभिलाषवत्** । इति; कथम् ? गुरुभार्यानुकूलेषु परपुरुषादिगमनादिषु पुत्रादेः तदनुकूलाभिलाषस्यापि धर्महेतुत्वप्रसङ्गात् । गुरोः

---

८ सुता] सुता[[आस्रवकारकाः ।]]
९ त] शुभाचारात् ।
९ न्यानाद्वा] ज्जन्याद्वा
१२ स] शुभ एव ।
१२ स्य] अपायस्य ।
१४ दाहारात्] दिव्याहारात् ।
१४ स] मृत्युः ।
१४ देव] विषमेव ।
१५ कृतेति] तेऽपि
१६ लं] बन्धनं
१७ णेत्] भाचरणात्
१९ *] यज्ञादिदक्षिणायाम् ।
२१ *] तल्लाभा
२२ *] हिंसाद्यनुष्ठानादेव ।
२२ च] हिरण्यादिसुखसाधनलाभस्वीकारे ।
२४ एतेन] तुलना--परस्यानुकूलेष्वनुकूलाभिमानजनितोऽभिलाषः अभिलषितुरर्थाभिमुखक्रियाकारणमात्मविशेषगुणमाराध्नोति अनुकूलेष्वनुकूलाभिमानजनिताभिलाषत्वात् आत्मनोऽनुकूलेष्वनुकूलाभिमानजनिताभिलाषवत् इत्यस्य...--प्रमेयक० पृ० ५५५ ।

प्रतिकूलत्वान्नेति चेत्; मृते वा गुरौ स्यात् । यदि प्रतिकूले च तपसि भतुर *नुकूलाभिलाषोऽपि पुण्यहेतुर्न स्यात् । § 1275

मीमांसकस्त्वाह--केव  हिंसाद्यनुष्ठानं मन्त्रसहितम्, यथा विषं केवलं मृत्यवे न  मन्त्रादिसहितम्, ततोऽभ्युदयस्य व्याधिशमनस्य भावादिति; 259/mkj तदयुक्तम्; स्वेच्छामात्राद् अर्थाऽसिद्धेः, अतिप्रसङ्गाच्च । वेदस्य प्रमाणत्वस्य निषेत्स्यमानत्वात् न ततोऽस्य विभागस्य प्रतिपत्तिः, खार्पटिकागमादपि तत्प्रतीतिप्रसङ्गाच्च । ततो यत्किञ्चिदेतत् । § 1276

यदि वा, **शुभाऽशुभैः पुण्यापुण्यैरचेतनैः बध्यते** इति सम्बन्धनीयम् । तर्हि अविशेषेण  चेतनं  तैः बध्यत इति चेत्; अत्राह--**यथास्वम्** इति । /ms यस्य चेतनस्य यः स्वः मन्दतीव्रादिरूपः क्रोधादिस्वभावस्तस्य अनतिक्रमेण इति । § 1277

कारिकां व्याख्यातुमाह--**मनोवाक्काय** इत्यादि । **मनोवाक्कायकर्मभिः आस्रवैः** । अथवा **आस्रवैः** इत्यत्र च शब्दो द्रष्टव्यः । किंभूतैः ? इत्याह--**शुभैरशुभैश्च** । § 1278

ननु कारिकायां **शुभाऽशुभैः** इति समस्तो निर्देशः कृतः, अत्र किमर्थं व्यस्तः क्रियते इति चेत् ? सङ्करादिपरिहारार्थः । ये शुभाः ते शुभा एव, ये च स्वस्य ते स्वस्यैव नान्यस्य(?') इति प्रतिपादनार्थः तथानिर्देशः । कथम् ? इत्याह--**यथास्वम्** इति । किम् ? इत्याह--**पुण्यपापबन्धः** । केषाम् ? इत्याह--**जीवानाम्** । न प्रकृतेर्नापि ज्ञानक्ष[णस्य] । ता [कारिकायां सामान्यतो] जीव इत्युक्तम्, अत्र व्यक्त्यपेक्षं **जीवानाम्** इति वचनं जीवबहुत्वप्रतिपादनार्थम्, इतरथा अत्रापि जीवस्य इत्येकवचनप्रयोगे मन्दमतेः आशङ्का स्यात्--आचार्यमते [एक] एव जीवः इति । न च तद्बन्धः तस्य तत्कारणाभावात् सत्तामात्रा प्रमाणभाच्च  । शरीरपरिमाणस्य चेतनापरिणामस्य अनाद्यनिधनस्य कर्तुर्भोक्तुः आत्मनः प्रतिपादनार्थं जीवग्रहणम् । अस्यैव ग्रहणम् अस्यैव तद्वाच्यत्वेन प्रसिद्धेः, आत्मादिशब्दानां तु परापेक्षया अन्यत्रापि प्रवृत्तेः । § 1279

नन्वत्र परविप्रतिपत्तिनिरासार्थं प्रमाणं वक्तव्यमिति चेत्; अत्राह--**अत्र** इत्यादि । **अत्र अर्थे न कश्चिद् विप्रतिपत्तुमर्हति** । § 1280

स्यान्मतम्--प्रमाणेन विषयीकृते प्रमेये न कश्चिद् विप्रतिपत्तुमर्हति । न चायं तेन विषयीकृतः । तथाहि--न तावत् प्रत्यक्षेण; तत्र  तदप्र- /ms

१ दि] यदि इति निरर्थकम् ।
२ *] कर्तुर
३ केव] नैव
३ म्] पापहेतुः ।
६ त] वेदात् ।
६ त्तिः] इयं हिंसा पुण्यहेतुरियं च पापहेतुरिति ।
९ नं] नः
१७ त] पृथङ्निर्देशः ।
१९ प्र] सांख्याभिमतायाः ।
१९ ज्ञा] बौद्धाभिमतस्य ।
२२ स्य] नित्यैकजीवस्य ।
२३ त्तामात्रा] त्रे
२३ भाच्च] णाभावाच्च
२५ अ] अस्यैव ग्रहणम् इति पुनरुक्तम् ।
२५ प] वैशेषिकाद्यपेक्षया ।
२६ अ] नित्ये व्यापिनि निष्क्रिये च ।

तिभासनात् । न वै खलु आतसादितैलादिसंपर्के घटादेः पांशुराशिसम्बन्ध इव मनोवाक्कायकर्मभिरास्रवैः शुभैरशुभैश्च पुण्यपापबन्धो जीवानां प्रत्यक्षतः प्रतीयते; विप्रतिपत्तेरभावप्रसङ्गात् । नापि अनुमानेन; लिङ्गाभावात् । न च तत्कर्मास्रवाः लिङ्गम्; कारणात् कार्यानुमानम् इति प्राप्तेः । न चैवम्, व्यभिचारात्, *नावश्यं कारणानि कार्यवन्ति भवन्ति प्र° वा° स्व° १ । ६६ । न च ते अन्यत्र अन्यदा तत्कारणत्वेन आतसतैलादिवत् प्रतीतं यतस्तेभ्यो बन्धोऽनुमीयेत मालवकातसतैलसंपर्कादिव उदरमलबन्धः । लिङ्गान्तरमत्र साध्यसमम् । आगमेन विषयीकृत इति चेत्; कथन्न तत्र कश्चिद् विप्रतिपत्तुमर्हति ? तद्विषयीकरणादेव विप्रतिपत्तीनामतीन्द्रियार्थे प्रकृतिः कारणं पुरुषः कारणम् इत्यादौ दर्शनात्, अन्यथा आगमेनापि
260/mkj तदविषयीकरणे निरालम्बा विप्रतिपत्तयो न प्रवर्त्तेरन् । यदेव च विप्रतिपत्तिकारणं तत एव तन्निवृत्तिरिति न हेतुफलव्यवस्था । आगमविशेषोऽपि अतीन्द्रिये दुरवगमः, विशिष्टपुरुषप्रणीतत्वादेर्निश्चेतुमशक्यत्वात् । अथ तत्कर्मास्रवेभ्यः पुण्यबन्धो जीवानाम् इत्यादि वाक्यं प्रमाणम्, अर्हद्वाक्यत्वात्, परिणामिघटादिप्रतिपादकतद्वाक्यवत्(?') इति; तदपि न सुन्दरम्; अत्र तद्वाक्यत्वाऽसिद्धेः । यदि पुनः तदपि तद्वाक्यम् अनेकान्तात्मकतत्त्वविषयत्वात् प्रसिद्धान्यतद्विषयवाक्यवत् इति; तदपि तादृगेव; तद्विषयत्वे परापप्रतीत-
/ms त्वाविरोधात् । नहि एतन्नामकमतीन्द्रियं सप्तमद्रव्यं प्रतिक्षणं परिणामीति विकलविदो वदतो वक्त्रं वक्रीभवति । तन्न आगमेनापि विषयीकृतः । § 1281

अपरे मन्यन्ते--न प्रयाससाध्योऽयमर्थः **किन्तु सर्वेषामविगीतोऽयम्**, सर्वेषां वादिनां विगानरहितोऽयमिति न कश्चित् सचेतनो विप्रतिपत्तिमपि प्रमाणाङ्कुशरहिताः स्वमतसमर्थनमदवहलावलेपापन्ना गजा इव प्रवर्त्तमाना विप्रतिपत्तारः केन वार्यन्ते । दृश्यन्ते हि चार्वाकादयः अत्रैव विवदमानाः, न च ते तत्त्वप्रतिपत्तिं प्रति उपेक्षणीयाः समदर्शिभिः परहितावधानदीक्षावद्भिः अ क ल ङ्कैः । नापि तेषां विप्रतिपत्तय एवमेव निवर्त्तन्ते अपि तु प्रमाणात्, अतस्तदेव तान् प्रति वक्तव्यं किमनेन **अत्र न कश्चित्** इत्यादिना । § 1282

मीमांसकोऽपि **श्वेतं छगमालभेत स्वर्गकामः** इति वचनात् द्रव्यादीनामेव पुण्यत्वमिच्छति, **ब्राह्मणो न हन्तव्यः** इत्यादि वचनाच्च ब्र-

१ लु] अतीसीतैलादि ।
५ *] द्रष्टव्यम्--हेतुबि° टी° पृ° २१० । न्यायबि° टी° २ । ४१ ।
७ न्धोऽनुमीयेत] मालवकतैलात् अतीसीतैलाद्वा ।
१० तीन्द्रियार्थे] सांख्यस्य ।
१० पुरुषः] वेदान्तिनः ।
१६ त] अर्हद्वाक्यत्वासिद्धेः ।
१७ प] परस्य प्रतिवादिनो या अपप्रतीतिः तस्याप्यविरोधात् ।
२१ पि] मर्हति
२६ देव] प्रमाणमेव ।
२८ व्या] श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः । चोदनालक्षणैः साध्या तस्मात्तेष्वेव धर्मता ॥--मी° श्लो° सू° २ ।
२८ इ] न जातु ब्राह्मणं हन्यात् ।--मनु° ८ । ३८० । उदधृतमिदम्— सन्मति° टी° पृ° ७३१ ।

ह्यवधादीनामेव पापत्वम्, न ताभ्यां परं पुण्यपापबन्ध इति । प्र भा क र स्त्वाह-- § 1283

*न मांसभक्षणे दोषः न मद्ये न च मैथुने ।
प्रवृत्तिरेव हि भूतानां निवृत्तिस्तु फलमिति ॥§ 1285

मनु० ५ । ५६ इति । § 1286

सौगताः पुनः दानहिंसादिचित्तादिकमेव पुण्यादिकं पठन्ति । **दान-हिंसाविरतिचेतसां स्वर्गप्रापणसामर्थ्यात्, तेषां प्रत्यक्षत्वेऽपि न प्रत्यक्षत्वम्** इति सूरेर्वचनाद् इदमेवम् इत्यवसीयते । परमार्थतः कार्यकारणविरहान्न कस्यचित् तैस्तद्बन्ध इत्यन्यः । § 1287

सांख्यस्य तु मतम्--तैः प्रकृतिपरिणामविशेषो जायते, ततः तस्या एव तद्बन्धो न पुरुषाणां शुद्धात्मनामिति । तत्रैव-- § 1288

*गुणानां परमं रूपं न दृष्टिपथमृच्छति ।
यत्तु दृष्टिपथप्राप्तं तन्मायेव सुतुच्छकम् ॥§ 1290

261/mkj

इत्यभिधानात् न बन्धफलभावः पारमार्थिक इत्येकः । एवमन्येऽपि /ms
कुनया वक्तव्याः । तदेव विप्रतिपत्तिदर्शनात् कथमुच्यते--**किन्तु सर्वेषाम-विगीतोऽयम्** इति ? § 1291

अत्र प्रतिविधीयते--**पुण्यपापबन्धो जीवानाम् इत्यत्र न कश्चिद् विप्रतिप-त्तुमर्हति** इति वदतोऽयमभिप्रायः--सर्वाद्वैतनिषेधात् जीवबहुत्वसिद्धेः **जीवा-नाम्** इत्यत्र न कश्चिद् विप्रतिपत्तुमर्हति । कथं तत्प्रतिषेध इति चेत् ? उक्तमत्र, तथापि उच्यते किञ्चित्--विज्ञानलक्षणस्य अन्यस्य वा अद्वैतस्य अदृष्टस्य कल्पने तथाविधानां परिणामिनामन्यथाभूतानां वा सन्तानान्तराणां तथाकल्पनायां तस्याः पुरुषाधीनतया अनिवार्यत्वात् कथमद्वैतम् ? दृष्टस्य कल्पने; अन्यतो दर्शने अस्य सिद्धः परमार्थतो ग्राह्याभाव इति कथमद्वैतम् ? इतरथा ग्राह्यभेदवत् न ततस्तत्सिद्धिः । § 1292

---

४ प्र] प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ।--मनु० ।
४ मिति] महाफला
८ प] प्रतिभासाद्वैतवादी ।
९ चित्] अचेतनैः कर्मभिः ।
९ न्ध] न बध्यन्ते न मुच्यन्ते उदयव्ययधर्मिणः । संस्काराः पूर्ववत्सत्त्वो बध्यते न न मुच्यते ॥--माध्य० का० १६ । ५ ।
१० तैः] मनोवाक्कायकर्मभिः ।
१० स्या] प्रकृतेरेव ।
१३ म्] द्रष्टव्यम्--पृ० ८९ टि० ५ ।
१५ देव] वं
२१ राणां] आत्मान्तराणाम् ।
२२ त] अदृष्ट ।
२२ त] कल्पनायाः ।
२३ अस्य] अद्वैतस्य ।

एतेन आगमात् तत्सिद्धिः प्रत्युक्ता । स्वतो दर्शनं वे  ज्ञाने एतत् प्रतीयताम् । नहि अप्रमाणकं स्वदर्शनमन्यद्वा क्वध्यव  स्थाम् अर्हति, अतिप्रसङ्गात् । § 1293

अथ मतम्--नीलाद्यात्मकमेव तदद्वैतम्, अन्यस्याप्रतिभासेनासत्त्वात्, नीलादेश्च स्वप्रतिभासात्मकत्वं सुखादिवत् प्रतिभासमानस्य सतोऽन्यग्राह्-कादर्शनादिति; तन्न युक्तम्; यतः प्रतिभासवशेन तत्त्वव्यवस्थायां नीलम-हं वेद्मि, पीतमहं वेद्मि इति अहमहमिकया ज्ञानस्वरूपवत् ततो भिन्नं नीलादिकं प्रतियत् प्रती[यते] इति तथैव स्यात्, अन्यथा न कस्यचिद्वेद-कमिति स्वग्रहणमिति दूरोत्सारितम् । प्रत्यक्षबाधनमुभयत्र । न चेदमत्र चोद्यम्--एकस्वभावेन स्वपरयोः *ऐक्यम् । अनेकस्वभावेन; अनवस्था, त-/ms स्यापि पुनः अन्यस्वभावान्तरेण ग्रहणात् ।  न च ग्रहणस्वभावस्य ज्ञानस्य अगृहीतः स्वभावः; विरोधात् इति । कथम् ? यस्माद् एकमेव *स्वभावमपि स्वपरो प्रतियत् प्रतीयते तस्मात् तौ प्रत्येति । नापि तयोरैक्यं तदप्रतीतेः, इतरथा नीलज्ञानं येन स्वभावेन पीताद् व्यावर्तते तेनैव रक्ताद् व्यावृत्तौ तयोरैक्यमिति महती चित्राद्वैतता ! स्वभावान्तरकल्पने तदवस्था अनव-स्था । शेषमत्र चिन्तितम् । भवेत्  वा तदनेकस्वभावं तद्ग्राहकम् तथापि नानवस्था, तद्वतो ग्रहणेऽपि स्वभावभूताया अपि योग्यतायाः ग्रहणनिय-माऽयोगात् । केवलं कार्यदर्शनात् तदात्मिका अनुमीय[ते] व्यवहारो नेदानीं  प्रवर्त्यते । तद्वतो ग्रहणे तद्ग्रहणेऽपि नानवस्था; तत्स्वभावात्मकस्य तथैव प्रतिभासनात् । मध्यादितागात्मकनीलमन्या कारज्ञानवत् । अस्यानभ्युपगमे कुतस्तदद्वैतमिति कथं जीवनानात्वनिराकरणमप्रमाणकं युक्तम् ? भावे वा तस्य प्रागभावप्रध्वंसाभावाऽनभ्युपगमे न *पुरुषाद्वैताद् भेद इति सुस्थिता चित्राद्वैतता ! *तदभ्युपगमे वा कथं प्रकृतविकल्पद्वयनिवृत्तिः ? तथाहि--येन स्वभावेन प्राक् पश्चाच्च तदसत् तेनैव स्वकाले सत्, स्वभावान्तरेण वा ? प्रथमपक्षे पूर्वं पश्चाच्च भावः स्वकालेऽपि भावात्, कार्यकारणभावप्रतिषेधो वा पूर्वोत्तरक्षणविशेषयोरेव *तद्भावव्यपदेशात् । तदभावस्य विज्ञप्तिमात्रेऽपि 262/mkj उपगमाददोष इति चेत्; कथमदोषः, यावता  येनैव स्वभावेन कुतश्चित् जायते मध्यक्षणः तेनैव चेदपरस्य कारणम्; पूर्वापरयोरैक्यम् । तदन्तरक-

१ त] अद्वैतसिद्धिः ।
१ वे] चेत्;
१ त्] स्वदर्शनम् ।
२ व] स्वव्यव
८ अन्य] नीलादेः प्रतिभासास्वीकारे ।
१० योः] वेदने ।
१० *] स्वपरयोः ।
१२ *] मेक
१३ रो] रौ
१३ तौ] स्वपरो ।
१४ पीताद्] पीतज्ञानात् ।
१५ व्यावृत्तौ] पीतज्ञान-रक्तज्ञानयोः ।
१६ वेत्] भवतु
१८ दात्मिका] योग्यता ।
१९ नेदानीं] वेदानीं
२० दिता] भा
२० न्या] नीलाद्या
२२ *] नित्यत्वापत्तिरिति भावः ।
२३ *] प्रागभावप्रध्वंसाभावस्वीकारे ।
२५ भावः] सद्भावः ।
२६ *] कार्यकारणभाव ।

ल्पनायाम् आकल्पमनवस्थालता सौगतभूरुहमावेष्ट्य वर्त्तते । पूर्वोत्तरक्षणानभ्युपगमे च यथा अक्षणिकस्य अक्रमेण स्वकार्यकारिणो युगपत् सकलं स्वविषयं विज्ञानमुत्पाद्य उपरतस्य द्वितीयादिक्षणादर्शनाभावात् शून्यता तथा क्षणमात्रावलम्बिनो विज्ञानस्य भवेत् न वेति सुधियः चिन्तयन्तु ? तदा च शून्यतायामपि यदि न परस्य अनिष्टं किञ्चिदापद्यते सर्वदा सैवास्तु । प्रत्यक्षादिविरोधः अन्यत्रापि समानः । § 1294 /ms

किञ्च, **स्वयं सैव प्रकाशते** प्र॰ वा॰ २ । ३२७ *इत्येतदपि एवं सति अयुक्तं स्यात्, स्वग्रहणयोग्यतामन्तरेण जडार्थवत् तदयोगात् । सापि स्वग्राह्यता योग्यतामपेक्षते, तत्र च प्रकृतविकल्पद्वयवृत्तिः अवश्यंभाविनी यथोक्तदोषात् । तन्न प्रत्यक्षसिद्धं स्वपरावभासकत्वं चेतसां निर्विकल्पात् निराकर्तुं युक्तम् अतिप्रसङ्गात् । § 1295

ननु न समकालस्य परस्य प्रकाशिका बुद्धिः अप्रतिबन्धात्, स्वतन्त्रयोः उभयोः प्रतिभासनात्, पर एव वा नीलादिः तत्प्रकाशकः स्यात् । अथ नीलादौ कर्मता प्रतीयते ततः स एतया प्रकाश्यते न तेन बुद्धिर्विपर्ययादिति; तत्र यतो नीलाव्य तिरेकेण कर्मतादर्शनम् । तत्स्वरूपमेव कर्मतेति चेत्; न; बुद्धावपि तस्य भावात् । यदि पुनः गृहीतिकरणाद् बुद्धिरेव तस्य ग्राहिका; तर्हि सा यदि ततो भिन्ना क्रियते गृहीतिः बुद्धिः नीलम् इति त्रितयं स्वतन्त्रमाभाति न किञ्चित् कस्यचिद् ग्राहकम् । गृहीत्यापि भिन्नस्य तदन्तरस्य करणे स एव दोषोऽनवस्था च, तेनापि तदन्तरस्य करणात् । न गृहीतिरपि बहिरर्थवत्ता गृहीताऽस्ति । तद्गृहीतौ च अनुबद्धप्रसङ्गः, अनवस्था च तत्रापि अपरा[परगृहीत्यपेक्षणात् ।] अभिन्ना चेत्; नीलादिरेव तया /ms क्रियते इति प्राप्तम्; तच्च न युक्तम्; अन्यत एव तस्य भावात्, कृतस्य करणायोगात् । *तया च क्रियमाणो नीलादिः उत्तरज्ञानवशतामेव * स्यात् न अर्थः । अर्थोपादानत्वान्नेति चेत्; न; अर्थाग्रहणात् तदुपादानत्वासिद्धिः । ग्रहणे वा कथं न प्रकृतो दोषः अनवस्था चक्रकं भवेत् । अभिन्नायाः तत्रापि गृहीतेः करणे पुनः पुनस्तस्यैव प्रवृत्तेः । तन्न समसमयस्य समुष्या परस्य ग्रहणम् । § 1296

३ णा] ण
५ दा] शून्यतैवास्तु ।
७ *] नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात्...--इति पूर्वांशः ।
८ त्] स्वप्रकाशायोगात् ।
१३ नीलादिः] बुद्धिप्रकाशकः ।
१४ या] बुद्ध्या ।
१५ त्र] तन्न;
१५ नीलाव्य्] न नीलाद् व्य
१६ पि] स्वस्वरूपस्य ।
१६ त] नीलादेः ।
१७ सा] गृहीतिः ।
१९ स्य] गृहीत्यन्तरस्य ।
२० त्ता] वद
२० गृहीताऽस्ति] अस्ति इति वक्तुं शक्यते ।
२० च] यः दोषप्रसङ्गः अर्थपक्षे अस्ति तस्य अनुबद्धत्वमत्रापि स्यात् ।
२१ नीलादिरेव] गृहीत्या ।
२२ एव] पूर्वनीलादेः ।
२३ *] गृहीत्या ।
२३ *] वंशतामेव
२७ मुष्या] शेमुष्या

एतेन भिन्नकालस्यापि तया ग्रहणं स्वारितम्; अविशेषात्, सर्वातीतानागतग्रहणप्रसङ्गाच्च । तन्न भिन्नस्य केनचित् कस्यचिद् ग्रहणमिति न जीववत् कुड्यमिति चेत्; न; उक्तमत्र, अविकल्पेन प्रत्यक्ष प्रतीयमानस्य बुद्धिनीलाद्योर्वेद्यवेदकभावस्य निराकर्त्तुमशक्तेरिति । [न] च बुद्धिवत् 263/mkj नीलादेः प्रतिभासनम् अपराधीनं परं प्रति प्रसिद्धम्, अन्यथा नीलमहं वेद्मि इति स्वप्नेऽपि न स्याद् अविषये तदवृत्तेः । नहि नीलदर्शी पीतमहं वेद्मि इति कदाचिद् व्यवहरति । § 1297

यत्पुनरुक्तम्--नीलमेव शब्दः कुतो न ग्राहकम् इति; तदपि तथा सुप्रतीत्या परिहृतम् । *परस्यापि नीलाकारं ज्ञानम् आत्मवत् पीताकारज्ञानस्य ग्राहकं तद्वद् आत्मनो वा अग्राहकं न स्यात् । आत्मनो ग्राहकत्वेन अन्यस्य अग्राहकत्वेन प्रतीतेरिति चेत्; अहमहमिकया बुद्धेः प्रतीयमानायाः स्वपरग्राहकत्वेन नीलादेश्च तद्ग्राह्यत्वेन प्रतीतिरिति समः समाधिः । § 1298

यत्पुनरेतत्--न नीलादिस्वरूपव्यतिरेकेण ग्राह्यता प्रतिभाति, स्वरूपं च /ms यथा बुद्ध्यपेक्षया नीलस्य तथा तदपेक्षया बुद्धेरपि इति; तदपि न सारम्; यतः सर्वभावानामन्योऽन्यं स्वरूपभेदात् । नहि एकस्य स्वरूपं [अन्यस्य]; सर्वस्य एक[त्व]प्रसङ्गात् । तथा च बुद्धेर्ग्राह्यं ग्राहकं च स्वरूपम् नीलादेः, ग्राह्यमेव, तथाप्रतीतेरिति । इतरथा यया योग्यतया नीलाकारम् आत्मसात्करोति नीलज्ञानं तया पीतज्ञानं तमात्मसात्कुर्यात् । अत एव न धिया *तस्य गृहीतिः काचित् क्रियते, अपि तु स्वरूपमेव गृह्यते, यथा कारणेन कार्यस्य स्वरूपं जन्यते । कथञ्चैवंवादिनाम् आत्मनोऽपि बुद्धिर्ग्राहिका ? गृहीतिकरणात्; प्रसङ्गः पूर्ववत् । अथ न तस्य सा ग्राहिका किन्तु स्वयं प्रकाशते; न; स्वयम् आत्मानं गृह्णाति इति नाममात्रभेदात्, नीलं वा न गृह्णाति किन्तु प्रकाशयति इत्यपि स्यात् । § 1299

यच्चाप्युक्तम्--न समसमयस्य इतरस्य वा ग्राहिका इति; तत् सर्वगम्; तथाहि--ज्ञानम् आत्मनि नीलाद्याकारं वित्समकालम् इतरं वा विभर्त्ति इति सर्वं वाच्यम् । यथादर्शनमपि; अन्यत्राप्युक्तम् । § 1300

ननु च नीलमहं वेद्मि इति प्रतीतिः स्वप्नेऽपि; ततः किम् ? तत्रेव जाग्रद्दशायामपि नीलादिप्रतिभासः असदर्थः सिध्यति इति चेत्; न; एकत्र तथाभावेन सर्वत्र तथाभावनियमासिद्धेः, इतरथा स्ववेदनेऽपि तथाभावसिद्धेः बहिरर्थवत् तदपि त्यागाङ्ग ततो बहिरर्थादिव साधनादिप्रयोजनासिद्धेः, इत-

---

१ स्यापि] बुद्ध्या ।
१ स्वा] निवा
३ मिति] न चेतनस्य जीवस्य सिद्धिर्नापि कुड्यस्य अचेतनस्येति भावः ।
३ क्ष] क्षेण
५ म्] स्वाधीनम्, न पराधीनम् अपराधीनम् इति व्युत्पत्तेः ।
८ ब्दः] बुद्धेः
९ *] प्रतिभासाद्वैतवादिनः ।
९ म्] स्वरूपवत् ।
१० कं] पीताकारज्ञानवद्वा ।
११ त्वेन] पीताकारज्ञानस्य ।
१४ या] नीलापेक्षया ।
१९ *] नीलादेः ।
२१ न] आत्मनः ।
२७ त्रेव] स्वप्नदशायामिव ।
३० त] स्ववेदनात् ।

रथा असत्प्रतिभासत्वाविशेषेऽपि तदङ्गीकरणात् *अर्धवैसस न्यायोऽनुष्ठितः स्यात् । ततो यथा प्रतिभासाविशेषेऽपि बहिरर्थप्रतिभा[सोऽ]सदर्थ इष्यते /ms सौगतेन, न स्ववेदनप्रतिभासः, तथा परेण स्वप्नार्थप्रतिभासोऽसदर्थ इष्यते न जाग्रत्प्रतिभा[सः । ननु यथा जाग्रत्प्रतिभा]सादेः स्तम्भादेः परमार्थसत्त्वं ततः स्वप्नेऽपि तत्तस्य भवेदिति भावे को दोषो बहिरर्थवादिनः ? प्रमाणतदाभासप्रणयनमनर्थकमिति चेत्; सौगतस्यापि **सर्वमालम्बने, न स्वरूपे** 264/mkj **भ्रान्तम्** प्र° वार्तिकाल° पृ° २८० इति किमेवम[न]र्थकं न स्यात् ? अपि च, स्वप्नेतरयोः ततः परमार्थसिद्धौ मम प्रमाणतदाभासप्रणयनं वैकत्रस्य *, सौगतस्य पुनः सकलं दर्शनं विज्ञप्तिमात्राऽसिद्धेः इत्यहो तस्य परदूषणकौशलम् ! § 1301

अपरेषां दर्शनम्--स्वप्नवद् अन्यदापि सत्येतरप्रविभागवियोग इति; तेषामपि न विज्ञप्तिमात्रं प्रसिध्यति, ज्ञप्तेरिव सकलविकल्पातीतस्यापि सिद्धेः दर्शनान्तरानुषङ्गात् । किं तेन तादृशा सिद्धेनेति चेत् ? किं ज्ञप्त्या ? न च अस्मिन्नेकान्ते न कस्यचित् सकलविकल्पातीतता क्षणिकैकान्तो वा सिध्यतीत्युक्तप्रायम् । भेदवद् अभेदस्यापि बहिरन्तश्च प्रतीतेः कुण्डलादिषु सर्पवत् । न चेयं प्रतीतिः कल्पितरूपा; सः इति प्रतीतोल्लेखः अयम् इति वर्त्तमान इति विकल्पयतोऽपि अनिवृत्तेः, अ[श्वं] विकल्पयतोऽपि गोबुद्धिवत् । तथा विकल्पयतः सकलशून्यतापि उक्ता । [न त]देकान्ते परेण बाध इष्यते यतो निर्विषयत्वं स्यात् स्वप्नज्ञानेऽपि तथानुषङ्गेन तदेकान्तहानेः । कुत इयं प्रतीतिरिति चेत् ? भेदप्रतीतिवत् चक्षुरादेः इति । क्रमः अपरापरतद्व्यापाराद् अपरविशेषश्च उपवर्णितः । केवलं पूर्वोत्तरपर्याय स्मरणदर्शनाभ्यां स एवायम् इति प्रत्यवमर्शोऽन्यो जन्यते, यतः /ms अपरपरिणामेषु तिष्ठतः पूर्वपर्यायस्थिता व्यवसीयते । न च इन्द्रियज्ञानमेव सविषयम्; सर्वस्य स्वप्रतिभासिना विषयेण सविषयत्वात् । तदेकान्ते पुनः विशेषतः । एतेन कार्यकारणभावप्रतीतिरपि निरूपिता; इदमस्माज्जातम् इति अविगानेन प्रतीतेः । तन्न सर्वज्ञानानाम् विशेषकल्पना परस्य श्रेयसी । § 1302

यत्पुनरेतत्--यद् विशददर्शनमार्गावतारि न तत् परमार्थसत् यथा स्वप्नोपलब्धं मतङ्गजादिकम्, विशददर्शनमार्गावतारि च जाग्रद्दशादर्शनदृष्टस्त-

---

१ णात्] स्ववेदनस्वीकारात् ।
१ *] अर्धवैशन्यायः ॥ २५६ ॥ यथा कश्चिद्यवनः कुक्कुटीमांसभोजनकामः तत्सन्ततिकामश्च तद्ग्रीवादिकं छित्वा भुङ्क्ते, उदरं च सन्तानार्थं स्थापयतीति यथा न संभवति तथा प्रकृतेऽपि ।--भु° लौकिकन्याय° पृ° १०४ । न चार्धवैशसं युक्तं तत्त्वज्ञाने विवक्षिते ।...कुक्कुटादेरेको देशः प्रसवाय कल्पते पच्यते देशान्तरमित्यर्धवैशसम्...--बृहदा° वा° टी° १ । ४ । १२७६ । लौकिकन्या° द्वि° ।
१ स] वैशस
३ रेण] जैनादिना ।
५ प्नेऽपि] स्तम्भादेः सत्त्वम् ।
७ इ] द्रष्टव्यम्--पृ° ६४ टि° ५ ।
९ *] न विफलं
९ पुनः] सांशम् न निरंशम् ।
१६ ती] अती
२० कुत] अभेदप्रतीतिः ।
२१ त] चक्षुरादिव्यापारात् ।

म्भादिकम् इति; तत्रापि दृष्टान्ते कुतः परमार्थसत्त्वाभावः प्राप्तः यतस्तेन विशददर्शनमार्गावतारित्वस्य अन्यस्य वा हेतोः व्याप्तिः सिध्येत् ? अप्रतिपन्नेन सात्मकत्वेनेव प्राणादेः आत्मना इव संहतत्वादेः कस्यचिद् व्याप्त्यसिद्धेः । प्रतिपन्ने इति चेत्; यदि विशददर्शनात् परमार्थसत्; कथं हेतुः अव्यभिचारी, अनेन व्यभिचारात् ? अपरमार्थसन् चेत्; बहिरर्थवत् न तत्सिद्धिरिति स एव दोषः— न तेन कस्यचिद् व्याप्तिः इति । एतेन अनुमानादपि तत्प्रतिपन्नता प्रत्युक्ता; तत्रापि अपरनिदर्शनान्वेषणे अनवस्था । जाग्रद्दृष्टस्तम्भादि निदर्शनमिति चेत्; अन्योऽन्यसंश्रयः--सिद्धेहि स्वप्नदृष्टमतङ्गजादेः परमार्थसत्त्वाभावे ततो जाग्रद्दशोपलब्धस्तम्भादेश्च तत्सिद्धिः, अतश्च तत्सिद्धिः इति । यदि पुनः प्रतिपाद्येन स्वप्नदृष्टस्य घटादेः परमार्थसत्त्वाभावेऽपि उपगमात्
/ms तेन हेतोः व्याप्तिसिद्धेः, न हेतोः निरन्वयदोषः, दृष्टान्तस्य वा साध्यविकलता सन्दिग्धधर्मता वा; तथा सति सांख्योऽपि अचेतनाः सुखादयः अनित्योत्पत्तिमत्त्वात् घटादिवत् इति वदन् किमिति ध र्म की र्ति ना स्व ग्रहणं व्याचक्षाणेन अकारणमेव निरस्तः ? प्रतिपाद्येन सौगतेन लोकेन वा तत्र [अ]नित्योत्पत्तिमत्त्वादेः अङ्गीकरणात् । प्रतिपाद्यवशेन च दृष्टान्ते
265/mkj साध्यसिद्धिः न पुनः साध्यधर्मिणि हेतोः इति कोऽयं नियोगः ? यदि वा प्रतिपाद्येच्छामात्रसिद्धं साध्यमादाय दृष्टान्ते तेन हेतोः व्याप्तिरिष्यते; तर्हि अस्वेच्छा मात्रसिद्धमादाय सा किन्नेष्यते ? अप्रमाणभूतयोः स्वपरेच्छयोरविशेषात् । तथाभ्युपगमे को दोष इति चेत्; न कश्चित्; केवलं साध्यवत् साधनस्यापि स्वेच्छाकल्पितस्य अभिमतसाध्येन व्याप्तिभावात् **स्वदृष्टार्थप्रकाशकं परार्थमनुमानम्** *इत्यत्र अर्थग्रहणमनर्थकम् । तन्न स्वपरेच्छामात्रसिद्धेन साध्येन हेतोर्व्याप्तिसिद्धिरिति कथन्न निरन्वयादिदोष इति चेत् ? अत एव, पक्षीकृतेऽपि तदभावसिद्धेः हेतोः आनर्थक्यम् । न च प्रतीतस्य अनर्थकविकल्पितनिरासः अतिप्रसङ्गात् । विकल्पस्यास्य तदत-
/ms द्विषयत्वे तदयोगात् सकलशून्यतानुकूलत्वाच्च । अथ जाग्रत्प्रत्ययो बाधक इष्यते, यतस्तस्मिन् सति परमार्थसन्न भवति स्वप्नघटादिकम्, अपि तु तथा असदपि सत्त्वेन मिथ्या वितर्कितमिति व्यवहारप्रवृत्तेरिति चेत्; न; परेण तस्य तद्बाधकत्वाऽनभ्युपगमात् । अभ्युपगमेऽपि जाग्रत्स्तम्भादौ तदभावान्न

---

३ त्वादेः] संहतत्वादेः[[परार्थाश्चक्षुरादयः संघातत्वात् शयनासनाद्यङ्गवत् इत्यादेः ।]]
४ त्] दृष्टान्तं प्रतिपन्नम् ।
५ न्] त्
६ व्याप्तिः] सिध्येत् ।
६ व्याप्तिः] पक्षलक्षणे उपात्तं स्वयं शब्दं ।
१४ स्व] स्वयं[[द्रष्टव्यम्--प्र० वा० ४ । ३०...।]]
१५ वा] घटादौ ।
१८ र्हि] न स्वेच्छा अस्वेच्छा, अन्येच्छा इत्यर्थः ।
१८ अस्वेच्छा] अन्येच्छा
१९ विशेषात्] विशेषाभावात् ।
२१ *] तत्र परार्थानुमानं स्वदृष्टार्थप्रकाशनमित्याचार्यीयलक्षणम् ।--प्र० वा० मनो० ४ । १ । तत्र परार्थानुमानं तु स्वदृष्टार्थप्रकाशनम्--प्र० वार्तिकाल० पृ० ४६७ ।
२७ रेण] प्रतिभासाद्वैतवादिना ।
२८ स्य] जाग्रत्प्रत्ययस्य ।
२८ म्भादौ] बाधकाभावात् ।

परमार्थसत्त्वाभावः स्यात् । भवतु वा कथञ्चित् तरे तदभावो नैतावता सर्वत्र तत्सिद्धिः, विपक्षे सद्भावबाधकप्रमाणाभावे सन्दिग्धविपक्षव्यावृत्तिकत्वेन अनैकान्तिकत्वात् । नहि परमार्थसद्दर्शनमार्गावतारित्वं केन विज्ञानं तश्चिद् * बाध्यमानं दृष्टं सर्वज्ञे वक्तृत्वादिवत्; तथा सतः कस्यचि[त्तद]दर्शनात् । *तथापि तत्र तदभावसाधने न वक्तृत्वादीनां गमकत्वमिति मीमांसकं प्रति विद्वेषो निर्निबन्धनः । दर्शने वा हेतोर्व्यभिचारः कथं परिहृतः स्यात् ? सुतएव न विरोधोऽपि साक्षात् तत्र तद्भावं बाधते, अदृष्टेन हेतोः विरोधद्वयासिद्धेः । § 1303

ननु परमार्थसत्त्वविरोधी तदभावः, तेन व्याप्तो हेतुः, अतः परम्परापाया विरोध इति चेत्; यदि क्वचित् तयोः सहभावदर्शनात् तेन तद्व्याप्तिः, कार्यत्वस्य बुद्धिमत्कारणत्वेन व्याप्तिः, क्वचित् सहभावदर्शनस्य अत्रापि भावात् । *विपक्षे बाधकम् अन्यत्रापि दुर्लभम् । भवतु वा विपक्षात् कथञ्चिदस्य व्यावृत्तिः, तथापि विशददर्शनगम्यत्वेऽपि परमार्थसत्त्वे हेतोः व्यभिचारापरिहारः । ततो यत्किञ्चिदेतत् । § 1304

ननु न बौद्धेन क्वचित् किञ्चित् साध्यते निषिध्यते वा तत्कुतः, केवलं यो व्यवहारी प्रतिभासादिना जाग्रत्स्तम्भादीनां परमार्थ[त्वं] साधयति /ms शतेन स्वप्नादौ तद्व्यभिचारेण तदभ्युपगतेन निरान्त यते, तेन तत्र परमार्थसत्त्वाभावाभ्युपगमात् इत्येके । तत्र किं पुरुषाभ्युपगमादप्रमाणकात् साधनं व्यभिचारि भवति ? तथा चेत्; सत्त्वादि सर्वमनैकान्तिकं तद्वत् स्यात्, प्रतिपाद्येन अनित्यघटादिवत् नित्ये गगनादौ तदङ्गीकरणात् । यदि च प्रतिभासादिः अनैकान्तिकः ततः किं बहिरर्थपरमार्थसिद्धिः ? [न हि] सन्दिग्धव्यभिचारिणः साधनात् साध्यसिद्धिरसन्दिग्धा उपजायते अतिप्र- 266/mkj सङ्गात् । सन्दिग्धेऽर्थे सति को दोषः ? किं तेन व्यवहारानुपयोगिना समाश्रितेन इति ? किं पुनस्तत्त्वम्, यत् तत्परिहारेण समाश्रयणीयं स्यात् ? स्वसंवेदनमात्रमिति चेत्; ननु च प्रतिभासादिना तदपि सिध्यति, स च अभ्युपगमेन व्यभिचारीकृत इति न किञ्चिदेतत् । अथात्र विशेषोऽभ्युपगम्यते परेण; अन्यत्रापि सोऽभ्युपगम्यते इति । न च अन्यस्य व्यभिचारे अन्यस्य व्यभिचारः अतिप्रसङ्गात् । तदुक्तम्-- § 1305

*इन्द्रजालादिषु भ्रान्तिमीरयन्ति न चापरम् ।

१ रे] तत्र
४ *] केनचिज्ज्ञातं कुतश्चिद्
५ *] अदर्शनमात्रेण ।
५ कृत्वादीनां] नाम
७ न] नच
१० रापाया] परम्परया
११ व्याप्तिः] स्यात् ।
११ चित्] घटादौ ।
१२ *] यथा कार्यत्वहेतोः विपक्षे बाधकं दुर्लभम् तथा अन्यत्रापि विशददर्शनगम्यत्वेऽपि हेतौ दुर्लभम् ।
१५ त्कुतः] एते दोषाः ।
१७ तेन] स तेन
१७ निरान्त] राक्रि
२० नादौ] सत्त्वस्वीकारात् ।

अपि चाण्डालगोपालबाललोलविलोचनाः ॥ न्यायबि° श्लो° ५१ इति ।§ 1307

नन्वेवं बहिरर्थसाधनं प्रकृति चेत्; उच्यते--यथा बहिरर्थग्रहणानुबन्धमजहत एव ज्ञानस्य स्वग्रहणव्यापारः, स्वग्रहणानुबन्धं चाऽजहतो देशभिन्नार्थग्रहणव्यापारः, तथा कारणग्रहणानुबन्धमजहत एव कालभिन्नकार्यग्रहणसिद्धेः कार्यकारणभावः पारमार्थिकः सिध्यति, *तत्सिद्धेश्च यथा क्वचिद् /ms धूमदर्शनादग्नेः सिद्धिः तथा क्वचिद् वागुपलम्भात् चैतन्यसिद्धिः इति यदुक्तम्--**वाग्बुद्ध्योः प्रमाणाभावेन कार्यकारणभावाऽसिद्धेर्न वाचो बुद्ध्यनुमानम्** इति; तन्निरस्तम् । § 1308

तत्त्वे कदा बुद्धेर्वाचो दर्शनेऽपि न सर्वत्र सर्वदा तत एव, सालूकात् सालूकस्य दर्शनेऽपि पुनः गोमयादपि तद्दर्शनेन व्यभिचाराशङ्काऽनिवृत्तेः तत्रापि, तं कथं वाचो बुद्ध्यनुमानम् इत्येके; ते चार्वाकादपि पापीयांसः; स्वयमेव यादृशाद् यादृशमुपलब्धम्, अन्यदापि तादृशादेव तादृशभावम् अभ्युपगम्य पुनः अन्य[थाभि]धानात् । कथं चैवं वादिनां सर्वं ज्ञानं स्वाग्राहिमा पुनः परग्राह्यता इति सिध्यति यतो मीमांसकादिनिवृत्तिः स्यात् । नहि प्रत्यक्षमियतो व्यापारान् कर्तुं समर्थम्, अविषये स्वयमवृत्तेः, एक वाक्य द्वैतनिषेधात् । अथ यत् स्वग्राहि न भवति तज् ज्ञानमेव न भवति । कुत एतत् ? स्वग्रहणात् तल्लक्षणान्तराभावात् इति । तदपि कुतः ? तथादर्शनात् । नन्वेकत्र तथादर्शने सर्वत्र तथाभावः कथंभूतस्य वृक्षस्य स्वभावस्य एकदा दर्शनेऽपि स्वभावातिक्रमाऽनिवृत्तेः । एवं सत्यपि ज्ञानं स्वस्वभावं कदाचनापि न जहाति, कार्यं तु कारणं जहाति इति प्रचण्डनृपतिचेष्टितम् ! ततः साधूक्तम्--**जीवानाम् इत्यत्र न कश्चिद् विप्रत्तिपत्तुमर्हति** इति । § 1309

**पुण्यपापबन्ध** इत्यत्रापि न कश्चिद् विप्रतिपत्तुमर्हति । तद्यथा, तेषां यथावस्थितस्वपरप्रकाशनस्वभावत्वेना प्रकृत्याशुभामुरीणम् आमंतुके मिथ्याज्ञानं विषादिभ्यः समुपलभ्य आगन्तुकं सुखादिकमपि तथाविधकारणप्रभवम् /ms इत्यनु [मातु]मर्हन्तु परीक्षकाः इतरथा धूमादेः अग्न्यादि कथमनुमीयते ? एतावांस्तु विशेषः— यतो मिथ्याज्ञानादिकं विवादास्पदीभूतं भवति तत् 267/mkj पापम् इत्याख्यायते, यतः सुखादिकं तत् पुण्यम् इति । तथा च प्रयोगः

२ कृति] तं
५ *] कार्यकारणभावसिद्धेश्च ।
६ म्भात्] बुद्धि ।
९ त्त्वे] नन्वे
११ तं] तत्
१३ पुनः] व्यभिचारशङ्काप्रदर्शनात् ।
१४ स्वाग्राहिमा] स्वग्राहि न
१४ ता] ज्ञानं परेण ग्राह्यमिति ।
१६ वाक्य] एकं [[कथं चैवं वादिनां सर्व ज्ञानम् एकं च सिध्यति तदद्वैतनिषेधात् इति सम्बन्धः ।]]च तद
१९ स्य] कथमभूत् ? प्रत्यक्षस्य
१९ माऽनिवृत्तेः] स्वभावातिक्रमस्य आशङ्का स्यादिति भावः ।
२४ आमंतुके] त्वेन प्रकृत्या भास्वराणाम् आगन्तुकं

तेषाम्--आगन्तुकविवादगोचरापन्नं सुखादिकं तत्संयुक्तविषादिकारणसमान कारणप्रभवम् आगन्तुके सति तत्परिणामत्वात् प्रसिद्धमिथ्याज्ञानवत् । § 1310

इदमपि तु सुभाषितम्--**पुण्यपापबन्धो जीवानाम् इत्यत्र न कश्चिद् विप्रतिपत्तुमर्हति** इति । तथैव **तेषां तद्बन्धः मनोवाक्कायकर्मभिः आस्रवैः शुभाशुभैः इत्यत्र न कश्चिद् विप्रतिपत्तुमर्हति** इति । तथाहि--विषादौ स्वपरात्मनोः अहिते हितबुद्धिः मिथ्याज्ञानतः, ततस्तत्र अविरतिः अत लक्षणा, ततोऽपि प्रमाणे हितेतरविषयं मनसोऽप्रणिधानम्, तस्माच्च लोभः तदादातुं मनोवाक्कायव्यापारः, ततस्तदानम् आत्मनस्तेन संयोगः, तेन पुनः अपरं मिथ्याज्ञानम्, एवं परत्रापि वक्तव्यम् । तथा तत्रैव मिथ्याज्ञानात् क्रोधादयः तद्व्यापारः तदुपादानं मिथ्यात्म नादिकमिति व्याख्यातव्यम् । तद्वद् विशिष्टौषधादौ सम्यग्ज्ञानादेः तदुपादाने सुखादिकं व्याख्यातव्यम् । तदेवं सिद्धायां व्याप्तौ पुण्यपापबन्धोऽनुमितोऽतो भवति इत्यनुमीयते, आज्ञादि मिथ्याज्ञानादिकं च [त]त्कारणमित्यपि । न च कारणात् कार्यानुमानमयुक्तम्, अन्यथा दृश्यानुपलब्धिः असद्व्यवहारसाधनम् अनिरूपितमेव स्यात्, तस्याः तत्कारणत्वोपगमात् । योग्यतानुमानेऽपि प्रतिबन्धवैकल्यसंभवाशङ्कया कथं निःशङ्कं तदनुमानं तन्दुलादेः ओदनाद्यनुमानवत् । अत्र कारण /ms
विशेषकल्पनायाम् अन्यत् समानम् । तदुक्तम्-- § 1311

*एषोऽहं मम कर्म शर्म हरते तद्बन्धनान्यास्रवैः,
ते क्रोधादिवशाः प्रमादजनिताः क्रोधादयः सोव्रतात् ।
मिथ्याज्ञानकृतात्ततोऽस्मि सततं सम्यक् सव्रतो
दक्षः क्षीणकषाययोगतपसां कर्त्तेति मुक्तो यतिः ॥§ 1315

यश० उ० पृ० २४६ इति । § 1316

तनुक्तोवादिभ्य एव हीनसंस्थानसंक्रान्तित्वं तेभ्योऽन्यददृष्टं तत्कारणं जायते अतदर्शनात् इति । तदुक्तम्-- § 1317

*दुःखे विपर्यासमतिः तृष्णा च बन्धकारणम् ।

---

४ द्व] अचेतनकर्मबन्धः ।
६ अत] अविरत
७ माणे] मादो
८ म्] तदादानम्
८ स्तेन] कर्मणा ।
१० मिथ्यात्म] थ्यामा
१२ आज्ञादि] अज्ञानादि
१३ पि] अनुमीयते इति सम्बन्धः ।
१५ त] असद्व्यवहारकारण ।
१७ म्] अस्त्यात्मास्तमितादिबन्धनगतः
तद्बन्धनान्यास्रवैः । ते क्रोधादिकृताः
प्रमादजनिताः क्रोधादयस्तेऽव्रतात् ॥
मिथ्यात्वोपचितात् स एव समलः
कालादिलब्धौ क्वचित् ।
सम्यक्त्वव्रतदक्षताकलुषतायोगैः क्रमान्मुच्यते
॥--आत्मानु० श्लो० २४१ ।
१९ सो] तेऽ
२० क्] क्त्वान्
२३ नुक्तोवादिभ्य] तत्र क्रोधादिभ्य
२४ अत] तथा

प्राणिनो यस्य ते न स्तः न स जन्माधिगच्छति ॥ प्र॰ वा॰ १ । ८३ इति ।§ 1319

चैव **पुनर्बन्ध** इत्यादि । § 1320

...10 पुनः फलविकल्पः स्यात् सुखदुःखादिलक्षणः ।
यथास्वं कालादिसामग्रीसन्निधौ बन्धसन्ततौ ॥ १० ॥§ 1322

मूषिकालर्कविषविकारवत् । § 1323

**पुनः** तेषां पुण्यपापबन्धात् पश्चात् कालान्तर इत्यर्थः । **फलविकल्पः** 268/mkj तद्वच कार्यभेदः **स्याद्** भवेत् । किं लक्षणः ? इत्याह--**सुख** इत्यादि । तत्र **आदिशब्देन** इष्टानिष्टशरीरादिपरिग्रहः । कस्मिन् सति स्यात् ? इत्याह--**बन्धसहितौ** इति । जीवकर्मणोः संयोगविशेषः न समवायः चेतने समवायविरोधात् **बन्धः** तस्य **सन्ततिः** आफलावाप्तेः सन्तानेन समवस्थानम् । एतदुक्तं भवति--यदि क्रोधादिभ्यः आत्मसम्बन्धसन्तत्या प्राप्तफलकालं किञ्चिन्न स्यात् कुतो जन्मान्तरे फलविकल्पः ? क्रोधादेश्च जन्मकाल एव विलयात् । न ततः क्षणिकैकान्ते सन्ताननिषेधात् स युक्तः । § 1324

एतेन **श्वेतं छागमालभेत स्वर्गकामः** इति वचनात् [न] मनोवाक्कायकर्मभ्यः फलविकल्पः इति निरस्तम्; द्रव्यादीनाम् इष्टिकालादावेव विनाशात् । तत्प्रवाहंस्थितौ वरं तेभ्यः समुत्पन्नकर्मणां तत्स्थितिरस्तु विरोधाऽभावात्, /ms न द्रव्यादीनां विपर्ययात्, ऐहिकफलकालेऽपि तत्सन्ततेरप्रतिपत्तेरिति । तस्यां सत्याम् कथं कुतः स स्यात् ? इत्यत्राह— **यथास्वम्** इत्यादि । यस्य कर्मणो स उदयः फलोपजन[न]सामर्थ्यपरिपाकः यथाकालम्, उदीरणम् अपक्वपरिपाचनं तस्य अनतिक्रमेण **यथास्वम्** इति । तयोर्ध्वसा सामर्थ्यात् स्वस्यात् * अत्रायमभिप्रायः--यदि स्वेन स्वभावेन प्रथममुत्पन्नं शुभमशुभं वा कर्म तेनैव कालान्तरे स्थितमपि फलं जनयेत्, तदुत्पत्तिसमय एव तत्स्यात् । नहि कारणावैकल्ये फलवैकल्यम्, अतत्कार्यत्वप्रसङ्गात् । § 1325

स्यान्मतम्--इत्थंभूत एव असौ स्वभावः यत् कालान्तरे कार्यम् । दृश्यते हि मन्त्रतन्त्रादीनां स्वदेशे समर्थानां देशान्तरे कार्यकरणमिति; तन्न युक्तम्;

२ चैव ] ?
९ हितौ ] सन्ततौ
९ विशेषः ] एकक्षेत्रावगाहे सत्यन्योऽन्यानुप्रवेशलक्षणः ।
१३ स ] फलविकल्पः ।
१५ द्र ] द्रव्यगुणक्रियादीनाम् ।
१५ इ ] यज्ञकाल एव ।
१६ वाहं ] ह
१६ तेभ्यः ] द्रव्यादिभ्यः ।
१६ त ] प्रवाहस्थितिः ।
१९ स ] य
२१ * ] तपसः सामर्थ्यात् तत्स्यात् ।
२३ त ] फलम् ।

तत्कार्याणां कालान्तरेऽपि सहभावप्रसङ्गात् । तथा च अस्य उत्पद्यते इदं कर्म इति योगिनोऽपि न बुद्धिः । न च परस्य अकारणं विषयः **अर्थवत् अर्थसहकारि प्रमाणम्** इति वचनात् । योगिनः अकारणमपि विषयः इत्यपि वार्त्तम्; अन्यस्यापि तथासंभावनाप्रसङ्गात् **यस्य यावती मात्रा** प्र० वार्तिकाल० पृ० २२३ इतु न्यायात् । § 1326

ननु ईश्वरज्ञानं नित्यमपि अर्थग्राहकम्, तथा नित्यमस्तु, अन्यथा अनीश्वरयोगिनो ज्ञानं क[थ]मर्थग्राहकम् ? तत्कार्यत्वात्; कथमेकस्माद् एकस्वभावात् कर्मणः अन्यतो वा क्रमभावि कार्यद्वयम् ? तथा स्वभावादिति चेत्; स स्वभावः कारणस्य, कार्यस्य वा भवेत् ? न तावत् कारणस्य; एकस्वभावत्वात् । नहि य एव पूर्वकार्ये स एव अन्यत्र तद्व्यापारो युक्तः, कार्यकालभेदाऽभावप्रसङ्गात् । नापि कार्यस्य; उत्पन्न-अनुत्पन्नविकल्पद्वये तदयोगात् । नाऽनुत्पन्नस्य; खरविषाणवत् । नाप्युत्पन्नस्य; अन्योऽन्यसंश्रयात्--उत्पन्नस्य तत्स्वभावता, तस्यां च तथोत्पत्तिः इति । § 1327 /ms

ननु यथा एकस्माद् एकस्वभावाच्च युगपद् देशभिन्नं कार्यं तथा क्रमेण कालभिन्नमिति चेत्; भवतु सौगतस्य न जैनस्य, तस्य सर्वदा कारणस्वभावभेदादेव कार्यभेदभावात् । § 1328

269/mkj

अत्रापरः प्राह--यथा एकस्वभावेन कारणम् आत्मनि नानासामर्थ्यं बिभर्त्ति, तथा तेनैव नानाकार्यं कुर्यादिति, इतरथा अनवस्था इति; तन्न; जैनस्य समयाऽपरिज्ञानात् । न खलु जैनस्य किञ्चित् केनचित् स्वभावेन तत्सामर्थ्यं बिभर्त्ति इति मतम्, अपि तु स्वकारणात् तदात्मकमुत्पद्यते संशयेतरस्वभावज्ञानवदिति । § 1329

तदेतेन यदुक्तं केनचित्--**रूपादिवद् धर्माऽधर्मसंस्काराणाम् आधारव्यापकत्वम्** इति; तन्निरस्तम्; सर्वत्र सर्वदा तत्कार्योदयप्रसङ्गात्, मोक्षाभावप्रसङ्गात् धर्माद्यभावरूपत्वात्तस्य । तत्र तदभावे नाधारव्यापकत्वं तेषाम्; मोक्षे तद्रहितस्य आत्मनो भावात् । कथं वा तत्र तदभावोऽवसीयते ? तत्कार्यशरीराद्यभावात्; किं पुनः कार्याऽभावात् कारणाभावगतिः इत्येकान्तः ? तथा चेत्; कथं सर्वत्र धर्मादिगतिः यतः सर्वगतात्मव्यापकत्वं सर्वत्र तत्कार्याभावात् । अदर्शनात् सत्कार्याभावात् तत्र तत्कार्याभावो न धर्माद्यभावात् इति नोत्तरम्; मोक्षेऽपि तथा प्रसङ्गात् । § 1330

---

२ प] नैयायिकादेः ।
५ इतु] इति
७ म्] न ह्यकारणं प्रतीतिविषयः--हेतुबि० टी० पृ० ८० ।
१९ स] शास्त्र ।
२१ ज्ञान] यथा संशयज्ञानं स्थाण्वादावर्थे संशयरूपमपि स्वरूपे असंशयात्मकं भवति तथा ।
२४ स्य] मोक्षस्य ।
२५ तेषाम्] धर्मादीनाम् ।
२५ भावात्] धर्मादिशून्यस्य आत्मनः सद्भावात् ।
२५ त्र] मोक्षे ।
२५ त] धर्मादीनामभावः ।
२८ स] कार्याणि सन्त्यपि न दृश्यन्ते ।

किं च, आत्ममनःसंयोगः स्वाधाराव्यापकोऽपि चेत् सर्वत्र सर्वदा आत्मनि धर्मादिकं जनयति; धर्मादिः तथा स्वाधाराऽव्यापकोऽपि सर्वत्र कार्यं करोति इति किं तद्व्यापकत्वकल्पनया ? इति यत्किञ्चिदेतत् । § 1331

/ms ननु न सर्वत्र सर्वं तत्कार्यं कालादिसामग्रीवैकल्यात् तद्भावे तु भवत्येवेति चेत्; अत्राह--**कालादि** इत्यादि । **काल आदिर्**येषां ते देशद्रव्यविशेषादीनां ते तथोक्ताः तेषां **सामग्री** तः [तेकालादयः ।] एव विशिष्टपरिणामोपेता न पुनः तेभ्योऽन्यैव, तस्या एव कार्योदयः प्रसङ्गात् । भिन्नायाश्च *तत्सम्बन्धाऽयोगात् समवायनिषेधात् । उपकार्योपकारकभावकल्पने सामग्रीवत् त एव कार्यमुपकुर्वन्तु । पुनरपि तदन्तरकल्पने अनवस्था स्यात् । **तस्याः सन्निधौ** सन्निधाने अङ्गीक्रियमाणे उदय-उदीरणवशात् **फलविकल्पः स्यात्** । कर्मणां तत्कृतोपकाराभावे तत्सन्निधानवैयर्थ्यमिति मन्यते । यदि वा, तत्सन्निधौ फलविकल्पः स्यात्, तस्मिन् सत्येव भावात्, कर्मसु तेषु सत्स्वपि पूर्वमभावात् इति व्याख्येयम् । **पुनः बन्धसन्ततौ फलविकल्पः स्यात्** इत्यनेन दृश्यादेव सेवादेः तद्विकल्पन निराकरोति समानसेवादीनामपि कस्यचिद् अचिराद् अपरस्य चिरात् फलम् अन्यस्य चिरादपि फलं न इति फलविकल्पस्य दर्शनात् । न च समाने कारणे फलवैचित्र्यम्; अतत्फलत्वप्रसङ्गात् । नहि शुक्लपद्मबीजेभ्यः शुक्लाऽशुक्लपद्मसंभवः । § 1332

एतेन दृश्यभूतविशेषात् तत्संभवोऽपास्तः; परिस्राव्यस्फटिकभाजने व्यवस्थापितादपि जलात् नानाजन्तुजन्मोपलम्भात् । तत्र सूक्ष्मादृश्यभूतविशेषकल्पनं कर्मवादान्न विशेष्येत । तद्विशेषो कदाचित् क्वचिदेव भवन्नात्मनः कारणनियमं सूचयति । आकस्मिकत्वे मिथ्याज्ञानादिभेदोऽपि मिथ्याज्ञानादिनिमित्तास्रवपूर्वको न स्यात् । ततः स्थितं **पूर्वबन्ध** इत्यादि । § 1333

(left margin, beside "विशेषकल्पनं…": 270/mkj)

/ms दृष्टान्तमाह-- **मूषिक** इत्यादि । **मूषिकाऽलर्क**शब्दयोः कृतद्वन्द्वयोः **विष**शब्देन षष्ठीसमासः तस्य पुनः **विकारशब्देन** । यदि वा, मूषिकालर्कविषाणां कृतद्वन्द्वानां विकारशब्देन तत्समासोऽभिधेयः, तद्विकारेण तुल्यं वर्त्तते इति **तद्वत्** इति । § 1334

**सुखदुःखादिलक्षणः** इत्यत्र आदिशब्देन विवक्षितं मिथ्यादर्शनज्ञानफलं निरूपितुं कारिकामुपन्यस्यति **उदयोदीरण** इत्यादिना । § 1335

---

३ त] आत्मव्यापकत्व ।
७ रिणामोपेता] सामग्री ।
७ तेभ्योऽन्यैव] भिन्नैव ।
७ यः] य
८ भिन्नायाश्च] सामग्र्याः ।
८ *] कालादिकारण ।
८ उ] सामग्री-कारणयोः ।
९ त] कालादयः ।
१४ न] ल्पं
१५ पि] पुरुषाणाम् ।
१९ त] फलविकल्पः ।
२३ न्ध] पुनर्बन्ध
२७ त] षष्ठीसमासः ।
३० निरूपि] पयि

...11 **उदयोदीरणसद्भावे दृष्टिप्रतिबन्धकर्मणाम् ।**
**मिथ्यादृष्टिधियौ कर्मप्रकृतीनां क्षयोपशमात् ॥ ११**
॥§ 1337

जीवादितत्त्वार्थाश्रद्धानं मिथ्यादर्शनम् । जीवे तावन्नास्तिक्यम् अन्यत्र जीवाभिमानश्च, मिथ्यादृष्टेः द्वैविध्यानतिक्रमात् विप्रतिपत्तिरप्रतिपत्तिर्वेति । मिथ्यादृष्टेः क्षायोपशमिकभावस्यापि तद्घातिकर्मणामुदयोदीरणवशात् मत्यज्ञानादिपरिणतिः । § 1338

ननु च **आदिशब्देन** उपदर्शितोपदर्शनार्थं पुनः कारिका उच्यमाना पुनरुक्ततामावहेत्, अतिप्रसङ्गश्च इष्टानिष्टशरीरादिफलोपदर्शनार्थयोरपि तथावचनप्राप्तेः इति चेत्; न; अन्यथा तदुपन्यासात् । तथाहि--मिथ्याज्ञानादेः अविरतिः, ततः प्रमादः, अस्मात् क्रोधादयः, तेभ्यः आस्रवः, [ततः] कर्मबन्धः, पुनः बन्धसन्ततौ फलविकल्पः स्यात् इति सूरेः अभिप्रायः, **एषोऽहं मम कर्म शर्म हरते** यश॰ उ॰ पृ॰ २४६ इत्यादि वचनात् । तत्र प्रथमं मिथ्यात्वादिकं यदि अकारणमन्यकारणं वा सर्वं तथैव स्यादिति; अत्राह--**उदयोदीरण** इत्यादि । अत्रायमभिप्रायः--तदपि मिथ्या[त्वा]दिकम् अन्यस्मात् कर्मोदयोदीरणवशाद् अनादित्वात् तत्प्रबन्धस्य बीजाङ्कुरप्रबन्धवत् इति । यद्वा, तत्र आदिशब्देन इष्टस्थानसंक्रमणादिपरिग्रहः, न मिथ्यादर्शनादेः तत्र विवादस्य **मिथ्याज्ञानं विसंवादादप्रमाणम्** सिद्धिवि॰ ४ । २ इत्यादिना निराकृतत्वात् । तदेव अत्र पुनरपि दृष्टान्तार्थमुपदर्शयितुम् **उदयोदीरण** इत्यादिकां कारिकामाह । इदमत्र तात्पर्यम्--यथा मूषिकालर्कविषादि स्वकालादिसामग्री सत्तवा [सत्त्वे फलवत् तथा] उदयोदीरणवशात् मिथ्यात्वं किञ्चिद् उपलभ्य आगन्तुकम् अक्षणिकत्वादिमिथ्यात्वं तादृशादेव /ms कारणादिष्यते तथा आगन्तुकसुखादिविकल्पोऽपि इति । उदये उदीरणे च सति । केषाम् ? इत्याह--**दृष्टि** इत्यादि । तद्वरुवि ज्ञान**प्रतिबन्धकर्मणाम्** । किं स्यात् ? इत्याह--**मिथ्यादृष्टिधियौ** मिथ्यारुचि-मिथ्याज्ञाने स्याताम् इति शेषः । [किं] सर्वदा इति चेत्; अत्राह--**कर्म** इत्यादि । यदा काश्चित् कर्मप्रकृतयः क्षयोपशमवत्यो भवन्ति तदा आत्मनो विषयग्रहणाभिमुख्यम्, अन्यथा मत्तमूर्च्छितवत् तदयोगात्, तदापि कासाञ्चिद् उदयादिभावे मिथ्यारुच्यादिकमिति, यथा विषाद्युपयोगे मूर्च्छितस्य । अकासाविद् द्विष्ट- 271/mkj कलानां कुतश्चित् क्षयोपशमे कासाञ्चिच्च उदयोदीरणे प्राथमिकप्रबोधे स विभ्रम इति मन्यते । § 1339

**जीवादि** इत्यादिना कारिकां विवृण्वन् प्रथमं निर्दिष्टां मिथ्यादृष्टिं विवृणोति--**मिथ्यादर्शनम्** । किम् ? इत्याह--**जीवादि** इत्यादि । **आदिश-**

---

१५ स्य] कर्मोदय-मिथ्यात्वादिसन्तानस्य ।
२३ रुवि] तत्त्वरुचि
२७ त] ज्ञानोद्भवायोगात् ।
२९ लानां] कासाञ्चिद् विषकल्पानां

ब्देन अजीवादिपरिग्रहः, स एव **तत्त्वार्थः** प्रमाणोपपन्नत्वात् तत्र **अश्रद्धानम्** अरुचिः । तदेव दर्शयन्नाह--**जीव** इत्यादि । **तावत्** शब्दः क्रमवाची **जीवे** आत्मनि **नास्तिक्यं** नास्तिकस्य भावो **मिथ्यादर्शनम्** इति सम्बन्धः । तत्रैव अपरं दर्शयति **अन्यत्र** चेतनापरिणामशून्ये स्वयं कल्पिते धर्मिणि सर्वगतत्वादिधर्मोपरक्ते **जीवाभिमानश्च मिथ्यादर्शनम्** इत्यनुवर्तते, अतस्मिन् तदभिमानस्य तद्रूपत्वात् । किं पुनः द्विविधमेव तत् प्रदर्श्यते ? इत्याह-- **मिथ्यादृष्टेः** इत्यादि । मिथ्या दृष्टिः रुचिर्यस्य तस्य **द्वध्या** * **नतिक्रमात्** । /ms कुतः ? इत्याह-- **विप्रतिपत्तिः** इत्यादि । तस्य जीवे विरुद्धा विपरीता वा प्रतिपत्तिः **विप्रतिपत्तिः अप्रतिपत्तिः** प्रतिपत्त्यभावो यतः **वा** शब्दो विकल्पार्थः **इति** शब्दः मिथ्यारुचिसमाप्त्यर्थः । § 1340

ननु किं जीवोऽस्तु न [वा] इति, तथा चेतनपरिणामस्वभावः अन्यो वा इति संशयपक्षोऽपि तृतीयोऽस्ति स कस्मान्नेहोच्यते इति चेत् ? न; तस्य अप्रतिपत्तिशब्देन उक्तत्वात्, तथा वा प्रतिपत्त्यभावरूपत्वात् संशयस्य इति । कथंभूतस्य मिथ्यादृष्टेस्तद्द्वयः ? इत्याह— **क्षायोपशमिकभावस्यापि** कर्मणां यः क्षयश्च उपशमश्च क्षयोपशमः तत्र भवो भावो यस्य तस्यापि **मिथ्यादृष्टेः** । **तदपि** शब्दः तस्यैव इत्यवधारणे, वच्छता रहितस्य तदभावात् । संभावनायां वा । कुतस्तत्तस्येति चेत् ? अत्राह--**तद्धाति** इत्यादि । **तच्छब्देन** जीवः परामृश्यते, तस्य जीवस्य **घातिकर्माणि** यानि तत् कर्मसामान्यवचनेऽपि दर्शनोपघातद्वारेण तदुपघातकानि प्रक्रमाद् गृह्यन्ते, तेषाम् **उदयोदीरणवशात्** इति । न केवलं मिथ्यादर्शनमेव तस्य अतो भवति अपि तु मिथ्याज्ञानमपि इति दर्शयन्नाह--**मत्य** इत्यादि । **मत्यज्ञानम्** मिथ्याऽवग्रहादिज्ञानम् **आदिर्यस्य** श्रुताऽज्ञानादेः स तथोक्तः स एव **परिणतिः** । च शब्देत्व द्रष्टव्यः । ततोऽयमर्थः--तत्परिणतिश्च क्षायोपशमिकभावस्यापि तद्धातिकर्मोदयोदीरणवशादिति । § 1341

ननु च जीववदन्यत्रापि नास्तिक्यसंभवे **जीवे तावत्** इति क्रमवाची शब्दः प्रयुज्यते । न चान्यत्र तदिति चेत्; अत्राह--**तत्र** इत्यादि । § 1342

...12 तत्रेति द्वेधा नास्तिक्यं प्रज्ञासत् प्रज्ञप्तिसत् ।
तथादृष्टमदृष्टं वा तत्त्वमित्यात्मविद्विषाम् ॥ १२
॥§ 1344

---

४ स्व] नैयायिकादिना ।
६ त्वात्] मिथ्यात्वात् ।
६ त्] मिथ्यात्वम् ।
७ *] द्वैविध्या
११ जीवोऽस्तु] स्ति
१२ स] संशयः ।
१३ स्य] संशयस्य ।
१३ वा] च
१६ ता] मिथ्यात्व
२३ ब्देत्व] शब्दोऽत्र
२६ त] नास्तिक्यम् ।

कुम्भस्तम्भादि दृष्टं प्रज्ञप्तिसत् संस्थानादेः स्वलक्षणेष्वभावात् । वृत्तिविकल्पानवस्थादोषानुवृत्तेः । स्थूलस्याभावात्, परिमण्डलादेरप्रतिभासनात्, तद्व्यतिरेकिणोऽसम्भवात् । विज्ञप्तिमात्रं परमार्थसत्; यथादर्शनं प्रज्ञप्तिसत्त्वात् भ्रान्तस्यापि नानैकत्व  संभवात् ग्राह्य [ग्राहकसंवित्ति] भेदावभासनात् 272/mkj संभावितैकरूपस्य स्वतोऽसिद्धेः परतश्च स्वभावनैरात्म्यं सर्वभावानां प्रमाणाभावे न प्रतिपत्तुमर्हति शून्यवादी, भावे च । तदयमात्मानं मिथ्याभिनिवेशेन अनर्थगर्ते प्रवेश्यमानोऽपि न चेतयते । प्रमाणाभावेन प्रत्यक्षमेकं नापरं प्रमेयतत्त्वं वेति न तथा प्रतिपत्तुमर्हति । प्रमाणान्तरप्रतिषेधे प्रत्यक्षलक्षणानुपपत्तेः किं केन विदध्यात् प्रतिषेधयेद्वा यतः चातुर्भौतिकमेव जगत् स्यात् । यदि नाम स्वसंवेदनापेक्षया बहिरन्तश्चोपप्लुतमिति सूक्तमेवैतत्, निराकृतपरदर्शनगमनात् । विभ्रमैकान्तमुपेत्य स्वसंवेदनेऽपि अपलापोपलब्धेः अन्यथा विप्रतिषेधात् चतुर्भूतव्यवस्थामपि लक्षणभेदात् कथयितुमर्हति । न च चतुर्भूतव्यवस्थाकथनं युक्तम् परोक्षाणामपि लक्षणात् साकल्येन तत्त्वाप्रतिपत्तेरन्यथानुपपत्तेः । § 1345

**तत्रक्षायोपशमिकभावस्यापि तद्घातिकर्मोदयोदीरणवशात् मिथ्या दर्शनम्इत्येवं** /ms व्यवस्थिते सति मते वा **नास्तिक्यं** नास्तिकस्य भावः कर्म वा **द्वेधा** द्विप्रकारं बाह्याध्यात्मिकविषयभेदेन, यदि वा, जीवाऽजीवगोचरना[ना]त्वेन विज्ञप्तिमात्रस्य भावात्, अथवा जाग्रत्स्वप्नविषयभेदेन वा भेदगोचरत्वेन च, यदि वा अनुमानादिप्रमाणतत्प्रमेयविषयभेदेन तद्विविते  । यदि वा, जीवे यन्नास्तिक्यं तस्य भेदं दर्शयन्नाह--**तत्र** इत्यादि । **तत्र** जीवे **नास्तिक्यं द्विधा** सौगतचार्वाकचर्वणभेदेन । अथवा, तत्र तयोः नास्तिक्य-अन्यत्रजीवाभिमानयोर्मध्ये नास्तिक्यं तद्वेधा इति व्याख्येयम् । तत् किम् ? इत्याह— **प्रज्ञासत्** संवृतिसत् इत्यर्थः । § 1346

ननु प्रज्ञाप्ति  शब्दो न क्वचित् संवृतिपर्यायतया रूढः तत एवं वक्तव्यं दृष्टं * संवृतिसत् इति, एवं हि स्पष्टो निर्देशो भवति **तत्त्वसंवरणात् संवृतिः मिथ्याविकल्पबुद्धिः** इति सर्वत्र प्रसिद्धेः तया सत् इति । नापि एवंवचने कारिका मद  इति चेत्; तन्न; परमतभेदप्रदर्शनार्थत्वात् तथावचनस्य । तथाहि--दृष्टं सर्वं चेतनभ्वा  मिथ्येति मतम् **मायामरीचिप्रभृति प्रतिभास-**

---

१८ स्य] स्याऽ

१९ द्विविते] तद् द्वेधेति

२० द्विधा] द्वेधा

२४ ज्ञाप्ति] प्रज्ञेति

२५ *] स्पष्टं

२५ संवृतिः] समन्ताद्वरणं संवृतिः । अज्ञानं हि समन्तात् सर्वपदार्थतत्त्वाच्छादनात् संवृतिरित्युच्यते । परस्परसंभवनं वा संवृतिः अन्योऽन्यसमाश्रयेणेत्यर्थः । अथवा संवृतिः संकेतो लोकव्यवहार इत्यर्थः । स च अभिधानाभिधेयज्ञानज्ञेयादिलक्षणः ।--माध्य० वृ० पृ० २४० । प्रमाणमन्तरेण प्रतीत्यभिमानमात्रं संवृतिः । संवृतिर्नाम विकल्पविज्ञानमधिमुक्तिमाह अनादिवासनातः ।--प्र० वार्तिका० पृ० ३ । ४ । संव्रियत आव्रियते यथाभूतपरिज्ञानं स्वभावावरणादावृतप्रकाशनाच्चानयेति संवृतिः । अविद्या मोहो विपर्यास इति पर्यायः ।--बोधिच० प० पृ० ३५२ ।

२७ द] भ्रंश

२८ भ्वा] चेतनमचेतनं वा

**वदसत्त्वेऽपि अदोषः** प्र° वार्तिकाल° ३ । २११ इति वचनात् । कुतः ? इत्याह--**प्रज्ञप्तिसत्** इति हेतोः, प्रगता ज्ञप्तिः यस्य तत् तथोक्तं **प्रज्ञप्तिसत्** सत्त्वं यस्य सर्वस्य तदपि तथोक्तम् । नहि कस्यचित् परमार्थसत्त्वग्राहकं मानमस्ति, उपलम्भादेः स्वप्नेऽपि भावादिति । **तथादृष्टम्** उपलम्भगोचरचारि प्रकृष्टाऽद्वयज्ञप्तिरूपेण सद् विद्यमानं सर्वं सुखादिनीलादि न जीवाऽजीवरूपेण । **यद् उपलभ्यते च नीलादि कम्** इति वचनात् । अपरं दर्शनम् /ms, 273/mkj तथा च **अन्यादृष्टं** सर्वं प्रज्ञप्तिसत् व्यवहारेण सत् **प्रामाण्यं व्यवहारेण** प्र° वा° १ । ६ इत्यभिधानात् । प्रशिथिला अविचारितरमणीया ज्ञप्तिः अस्य इति व्युत्पत्तेः इति । परमपि नास्तिक्यं दर्शयति **अदृष्टम्** अनुपलब्धं क्षणिकपरमाणुरूपवेदनं पुरुषवत् सकलशून्यत्वं वा परमार्थसत् इति । तत् अन्यदपि दर्शयन्नाह— **तथा** इत्यादि । **तथा** तेन प्रकारेण **दृष्टं** दर्शनं प्रत्यक्षम् इति यावत् । दृष्टमेव इति अवधारणीयम्, तेन न अदृष्टं दर्शनादन्यत् अनुमानादिकमपि गृह्यते । तत् किम् ? इत्याह--**तत्त्वम्** इति । तत्त्वविषयत्वात् तत्त्वं विषयिणि विषयोपचारात् यथा **उपलम्भः सत्ता** प्र° वार्तिकाल° ३ । ५४ इति । यदि वा, दृष्टमेव दर्शनविषयीकृतमिव न अनुमानादिविषयीकृतम् आत्मादितत्त्वं परमार्थसत् इति ग्राह्यम् **इति** एवम् **आत्मविद्विषां** नैरात्म्यवादिनां सौगतलौकायतानाम् **नास्तिक्यं द्वेधा** इति सम्बन्धः § 1347

कारिकां विवृण्वन्नाह--**कुम्भस्तम्भादि दृष्टम्** इत्यादि । **कुम्भस्तम्भौ आदी** यस्य चेतनेतरवस्तुनः तत् तथोक्तम्, तच्च तत् **दृष्टं** च दर्शनविषयीकृतम् इत्यर्थः । § 1348

ननु च कुम्भादि इति वक्तव्ये किमर्थं स्तम्भवचनमिति वक्तुं भव[ति] ? स्तम्भस्य तद्वद्वा कुम्भस्य उपलम्भप्रतिपादनार्थम्, एकस्यापि तदपलापे द्वयोरपि स भवेत् । यथैव हि कुम्भदर्शनेन स्तम्भो न दृश्यते तथा स्तम्भदर्शनेन कुम्भोऽपि । परस्परपरिहारस्थिततदुपलम्भप्रतिज्ञाने कुतः सन्तानान्तरनिषेधो यतोऽद्वैतम् । एकस्य तदात्मकत्वे तद्ग्रहणे वा क्रमेणापि तस्य तदविरोधि * इति कथं नैरात्म्यं क्षणिकत्वं वा इति तत्प्रतिपादने सिद्धं /ms भवति । कुम्भादि इति पुनरुच्यमाने मतान्तरदृष्टम् आदिशब्देन पुरुषादि गृह्यते इति आशङ्क्येत । तत् किम् ? इत्याह--**प्रज्ञप्तिसत्** इति । प्रगतज्ञप्ति सहि त्यर्थः । तैमिरिकदृष्टकेशोण्डुकवत् व्यवहारेण वा सत् । अत्र यद् विशददर्शन इत्यादि साधनं द्रष्टव्यम् । तत्रैव युक्त्यन्तरमाह--**संस्थानादेः** इत्यादि । **संस्थानम्** दीर्घत्वादिकम् **आदिः** यस्य द्रव्यसामान्यादेः तस्य **स्वलक्षणेषु** बहिरन्तःपरमाणुलक्षणेषु **अभावात्** । कुतः ? इत्यत्राह--**वृत्ति**

६ ते] ?
११ त्] नास्तिक्यम् ।
१५ मिव] मेव
२४ त] उपलम्भविलोपे ।
२७ *] ध
२७ त] कुम्भस्तम्भादिप्रतिपादने ।
२८ म] पुरुषाद्वैतवादिदृष्टम् ।
३० हि] सदि
३१ द्र] द्रष्टव्यम्--पृ° २६४ प° ७ ।

इत्यादि । गुणिनि गुणानाम् अवयवेषु अवयविनः विशेषेषु जातेः समवायेन वर्त्तनं **वृत्तिः** तस्याः **विकल्पः** किम् एकदेशेन उत सर्वात्मना, क्रमेण यौगपद्येन वा इति भेदवित्तन तेन तस्मिन् वा **अनवस्था** । (?')एकदेशेन वर्त्तने तत्रापि अपरभिन्नदेशकल्पनम्, तत्रापि अपरमिति देशाव्यवस्थितिः, सर्वात्मना गुणगुणिनोः अन्यतरदेव स्यात्, * एवमन्यत्र गुणिनोः अन्यतरत् एवमन्यत्रापि वक्तव्यम् । तथा सति गुणादयः तद्वन्तश्च इति या व्यवहिलम्बनादेः स तथोक्तः स चासौ **दोषश्च** तस्य **अनुवृत्तेः** सकाशात् **कुम्भस्तम्भादि दृष्टं प्रज्ञप्तिसद्** इति सम्बन्धः । § 1349

ननु मा भूत् संस्थानादिः आधारव्यतिरिक्ता यथोक्तदोषात्, स्वयमेव तु स्वलक्षणं कुम्भादिस्थूलादिरूपं स्यादिति जैनः; तत्राह--**स्थूलस्य अभावाद्** इति । **स्थूलस्य** महत्त्वोपेतस्य, उपलक्षणमेतत्, तेन दीर्घादेर्**भावात्** स्वलक्षणस्य इति वचनविभक्तिपरिणामेन सम्बन्धः । तदभावः पुनः कारणाऽभावात् 274/mkj । तस्य हि कारणं बह्ववयवसंयोगः, स च सर्वात्मना एकदेशेन वा अवयवानां दुरुपपादः । अपेक्षाकृतत्वाद्वा, स्थूलादिकमपेक्ष्य [सूक्ष्मादिकम्, सूक्ष्मादिकं चापेक्ष्य] स्थूलादिकमात्मानं लभते । न च अपेक्षभाविनो /ms धर्माः पारमार्थिकाः । अनेन अभेदवादो दर्शितः इति विभागः, तदभावात् **कुम्भादिकं प्रज्ञप्तिसद्** इति घटना । § 1350

परमाणवस्तर्हि परमार्थसन्तो भवन्तु इति चेत्; अत्राह--**परिमण्डल** इत्यादि । [परिमण्डलं] सूक्ष्मनिरंशत्वम् **आदिः** यस्य क्षणभङ्गादेः तस्य **अप्रतिभासनात् स्वलक्षणेषु** इति तत् तत्सत् इति । यथोक्तविशेषशून्यं नीलादिमात्रं परमार्थसत् इति चेत्; अत्राह--**तद्व्यतिरेकिण** [इत्यादि ।] तस्मात् स्थूलकुम्भादेर्दृष्टाद् व्यतिरिक्तस्य नीलादेः **असंभवात् अप्रतिभासनात्** इति अनन्तरोक्तो हेतुः अत्र द्रष्टव्यः । ततोऽयमर्थः--यथा अप्रतिभासनात् परिमण्डलादेरभावः तथा तद्व्यतिरेकिणो नीलादेरपि इति न युक्तमेतत्--**यद् यथावभासते तत् तथैव परमार्थसद् यथा नीलं नीलतयाऽवभासमानम्** । इत्यादि; नीलदृष्टान्ताभावात् । तथापि तत्कल्पनायां परिमण्डलादेरपि सा केन वार्यत इति तन्निषेधवचनं पूर्वापरबाधितं **तद्व्यतिरेकिणः** इत्यनेन एतद् दर्शयति । यदि स्थूलादिस्वभावाव्यतिरेकिणो नीलादेः तथावभासनेन परमार्थसत्त्वमिष्यते, सर्वस्य क्षणिकत्वस्य साधने तथावभासनहेतुना; नहि स्थूलादिप्रतिभासनवद् अक्षणिकत्व [प्रति]भासस्यापि कारणाऽभावादसिद्धो

---

१ विशेषेषु] द्रव्यगुणकर्मसु ।
३ न] चिन्तनं
४ त] एकदेशेऽपि ।
५ ना] वर्तने ।
५ *] एतदन्तर्गतः पाठो द्विर्लिखितः ।
६ यः] गुणादिवन्तश्च ।
६ हि] यो **वृत्तिविकल्प** आ
९ तिरिक्ता] क्तो
१३ त] स्थूलस्य ।
१३ स] संयोगः ।
१५ अपेक्ष] क्षा
२० त्] प्रज्ञप्तिसत् ।
२४ पि] स्थूलस्य ।
२७ सा] कल्पना ।

हेतुरिति । यदि पुनः नीलादेः तदव्यतिरेकिणोऽपि परमार्थसत्त्वं न तस्य इत्युच्यते; व्यभिचारी हेतुः स्यादिति । ततो नीलादेः तद्व्यतिरेकिणोऽसंभवात् कुम्भादिकं तथासद् इति । § 1351

/ms संप्रति प्रज्ञप्तिशब्दस्य अपरमप्यर्थं दर्शयन्नाह--**विज्ञप्ति मात्रम्** इत्यादि । विशिष्टा ज्ञप्तिरेव तन्मात्रम् कुम्भस्तम्भादि दृष्टम् इति सम्बन्धः **यदवभासते तज्ज्ञानम्** इत्याद्यभिधानात् । तच्च किं भूतम् ? इत्याह--**परमार्थसद्,** विज्ञप्तिमात्रस्य परमार्थसत्त्वेन उपगमात् । प्र ज्ञा क रे णा प्युक्तम्--**अज्ञातार्थप्रकाशो वा इत्येतत् पारमार्थिकं प्रमाणलक्षणम्** प्र° वार्तिकाल° २ । ५ इति । एतत् माध्यमिकेन कदर्थयन्नाह--**यथादर्शनम्** इत्यादि । अत्रायमभिप्रायः--यथादर्शनं वा विज्ञप्तिमात्रं कल्पेत, अन्यथा वा ? प्रथमपक्षे **यथादर्शनं** दर्शनाऽनतिक्रमेण **प्रज्ञप्तिसत्त्वात्** बहिरर्थवद् अविचारितसद् विज्ञप्तिमात्रं न परमार्थसद् इति मन्यते । कुत एतत् ? इत्यत्राह--**भ्रान्तस्यापि** इत्यादि । अत्रायमभिप्रायः--परेण **चित्रप्रतिभासापि एकैव बुद्धिः** प्र° वार्तिकाल° ३ । २२० इत्यादि वदता नानैकत्वेऽपि तस्याः परमार्थसत्त्वमङ्गीकृतं सर्वथा नैरात्म्यं निरूपयतो नानैकात्मनः तद्वत् संविदितात्मनः परिणामिनोऽपि आत्मनः परमार्थसत्त्वम् । तदेवं **भ्रान्तस्यापि** परिणामिन आत्मनः, न केवलम् अभ्रान्तस्य विज्ञप्तिमात्रस्य इति **अपिशब्दार्थः** । तस्य किम् ? इत्याह--**नानैकत्वसंभवात्** । एवं मन्यते--यस्य नानैकत्वसंभवो न
275/mkj तस्याभ्रान्तत्वं यथा परिणामिन आत्मनः, नानैकत्वसंभवश्च विज्ञप्तिमात्रस्य इति । यदि पुनः तदात्मनोऽपि तद्वत् परमार्थसत्त्वं परो मन्यते को दोषः स्यात् ? न कश्चित्, ते गुण एव तु स्यात् । नानैकत्वस्य विपक्षसंक्रमनिवारणात् असौगतं जगत् स्यादिति चेत्; न जाने अहमपि ईदृशम् ।

§ 1352

ननु भवतु भ्रान्तस्य नानैकत्वसंभवः नाऽभ्रान्तस्य तन्मात्रस्येति चेत्;
/ms अत्राह-- **ग्राह्य [ग्राहकसंवित्ति]** इत्यादि । **ग्राह्यादिशब्दानां** कृतद्वन्द्वानां **भेदशब्देन** षष्ठीसमासः तेन **अवभासनात्** तन्मात्रस्य इति विभक्तिपरिणामेन सम्बन्धः । द्वितीयपक्षे--**संभावितैकरूपस्य--संभावितम्** अस्तीति मनसा अवतारि पुनं न पुनः प्रत्यक्षादिना प्रमाणेन निश्चितम् **एकत्र** सहायम्, अथवा सन्तानान्तरनिषेधेन एकसंख्यायुक्तं **रूपं** स्वभावो यस्य **तस्य स्वतः** स्वसंवेदनाध्य[क्ष]तो **असिद्धेः** अप्रतिपत्तेः । न हि असूक्षिकया कालभेदमिव देशभेदमपि चिन्तयतो नीलादिस्वभावम् अन्यथाभूतं वा परमाणुरूपं वेदनमाभाति । यदि वा **स्वतोऽसिद्धेः** अनिष्पत्तेः अनुत्पत्तेः इत्यर्थः

१ त] स्थूलादिस्वभावाव्यतिरेकिणः ।
३ त] प्रज्ञप्तिसत् ।
१० ल्पेत] प्येत
१३ रेण] प्रज्ञाकरेण ।
१४ स्याः] बुद्धेः ।
२० त] परिणाम्यात्मनोऽपि ।
२४ त] विज्ञप्तिमात्रस्य ।
२८ पुनं] अवभासितं
२९ त्र] म
३० या] अतिसूक्ष्मेक्षिकया

। नहि कस्यचित् स्वत उत्पत्तिः, अहेतुकत्वेन सर्वत्र सर्वदा भावप्रसङ्गात्, नीलादि पीतादिना भवेत् । तथापि तन्नियमे अर्थाकार्यत्वेऽपि ज्ञानस्य तन्नियमः स्यादित्यलं तदुत्पत्तिसारूप्यकल्पनेन । तन्नियमवत् स्वरूपनियमोऽपि कल्पनातो नान्यतः सिध्यति । एतेन नित्यस्यैकरूपस्य सहकार्यपेक्षस्य तत्कृतोपकारानपेक्षस्य क्रमतोऽपि कार्यकरणे स्वभावनियमो व्याख्यातः । ततः स्थितम्--**स्वतोऽसिद्धेः** इति । § 1353

तस्य परतोऽप्यसिद्धेः इति दर्शयन्नाह--**परतश्च** अन्यतोऽप्य**सिद्धेः** अप्रतिपत्तेः । तथाहि— संभावितैकरूपस्य चक्षुषि गन्धस्य, एवं परत्रापि, न प्रतिभानमस्ति नीलादिसुखादिव्यतिरिक्तव *वादास्पदत्वात् । तत्र तत्प्रतिभासनभावेऽपि परमार्थतो ग्राह्यग्राहकभावाऽभावेन **नान्योऽनुभाव्यो बुद्ध्यास्ति** प्र० २ । ३२७ इत्यादि, **निरालम्बनाःप्रत्ययाः** प्र० वार्तिकाल पृ० ३८७ /ms
इत्यादि **यदवभासते तज्ज्ञानम्** इत्यादि च विरुध्यते, ज्ञानस्येव जडस्यापि परतः प्रतिभासाऽविरोधात् । § 1354

किञ्च परस्यापि तद्रूपस्य परतः सिद्धिः, तस्यापि परतः इत्यनवस्था । अतद्रूपत्वे किं तस्य निर्भागंधकल्पनया इति मन्यते । § 1355

ननु तस्य स्वप्रतिभासरहितस्य परतः सिद्धौ विज्ञप्तिरूपतैव हीयते स्वप्रतिभासलक्षणत्वात्तस्याः, तत्कथं परानभ्युपगमो दूष्यत इति चेत् ? सत्यम्; तथापि यो  अनिश्चितस्वसंवेदनरूपां ग्राह्यादिभ्रान्त्यन्थानुपपत्त्या तां व्यवस्थापयन्ति तान् प्रति इदमुच्यते, **अद्वयंयानमुत्तमम्** इत्यागमाद्वा । § 1356

इदमपरं व्याख्यानम्--**परतश्च** स्वतः अन्यतः कारणादपि **असिद्धेः** अनुत्पत्तेः । तद्यथा— समकालात् परतस्तदुत्पत्तौ; तदपि परस्य कारणम् 276/mkj
अविशेषात्, तथा च सति अन्योऽन्यसंश्रयः । अथापि किञ्चिदेव कारणं कार्यं वा; तथा किञ्चिदेव कस्यचिदेव ग्राहकं ग्राह्यम् इति [तथा] च निराकृतमेतत्--**नीलादिरपि ज्ञानस्य ग्राहकः स्यात्** इति । यथा च तस्य परेण जन्यते स्वरूपं नापरोत्पत्तिः क्रियते, तथा जंत  तस्य नीलादेः स्वरूपं गृह्यते न गृहीतिः क्रियते । तस्मादेतदपि निरस्तम्--**ज्ञानेन अर्थस्य**

---

२ पीतादिना] सत् भवेत् ।
२ थापि] अहेतुकत्वेऽपि ।
२ त] उत्पत्तिनियमे ।
२ त] अर्थप्रतिनियमः ।
३ त्] अर्थप्रतिनियमवत् ।
९ *] रिक्तस्य वि
११ इ] तस्या नानुभवोऽपरः । तस्यापि तुल्यचोद्यत्वात् स्वयं सैव प्रकाशते ॥ इति शेषः ।
१५ निर्भागंध] गत्व
१७ स्याः] विज्ञप्तेः ।
१८ यो] ये
१९ माद्वा] विज्ञप्तिमात्रतां व्यवस्थापयन्ति तान् प्रति । तथा चोक्तम्--अद्वयं...--प्र० वार्तिकाल० २ । ७ ।
२१ त] उत्पद्यमानमपि ।
२२ अविशेषात्] समकालत्वात् ।
२२ यः] परात् प्रकृतस्योत्पत्तिः, प्रकृताच्च परस्येति ।
२४ त्] यदुच्यते प्रतिभासाद्वैतवादिना यदि समकालं ज्ञानं नीलादेर्ग्राहकम्, तदा नीलादिरपि कुतो न ज्ञानस्य ग्राहक इति ?
२५ जंत] ज्ञानेन

**तद्रूपाया गृहीतेः करणे एकत्र अर्थस्य करणम् अन्यत्र अनवस्था** इति । एतेन भिन्नकालादपि तदुत्पत्तिः उक्ता । अपि च जन्यविज्ञानकालेऽसतः परस्मादुत्पत्तौ बन्ध्यासुतादपि उत्पत्तिः स्यात् भेदाभावात् । अथ तस्य *तत्कालेऽसत्त्वेऽपि स्वकाले सत्त्वं न बन्ध्यासुतस्य ततोऽयमदोषः; ननु तस्य कार्यकालेऽसत्त्ववत् स्वकाले सत्त्वं यदि न कुतश्चित् प्रतीयते; तर्हि वचनमात्रमेतन्न /ms समाधानमर्हति । प्रतीयते चेत्; कथं ग्राह्यग्राहकभावनिवृत्तिः ? तन्न किञ्चिदेतत् । अथ परेण यतः कस्यचिदुत्पत्त्यनभ्युपगमात् किमर्थमेतदुच्यते इति मतिः; तस्य अनिष्टसिद्धिप्रतिपादनार्थम् । यदा हि तद्रूपस्य सतः स्वतः परतो वा नोत्पत्तिः अत एव [न] विनाशः, ततो नित्यत्वम् इति सर्वस्य क्षणिकत्वप्रतिज्ञाव्याघातः । ज्ञानवादिनां पुनः कालाऽभावाद् एकस्य कालत्रयानुयायित्वम्, एकक्षणानुवृत्तिः क्षणिकत्वम् इति अपसिद्धान्तः । § 1357

ततः तदसिद्धिरस्तु । ततः किम् ? इत्याह--**स्वभावेन** स्वरूपेण **नैरात्म्यं** स्वरूपतुच्छता **सर्वभावानां** तदसिद्धेः इति पदघटना । एवं शून्यवादिना विज्ञप्तिवादिनं घातयित्वा अधुना शून्यवादिनं स्वयमेव निहन्ति **प्रमाण** इत्यादिना । **प्रमाणस्य** प्रत्यक्षादेः **अभावेन** करणभूतेन[न] **प्रतिपत्तुमर्हति शून्यवादी स्वभावनैरात्म्यम्** इति सम्बन्धः । यस्य हि सर्वं शून्यं तस्य प्रमाणाभावोऽपि । तेन तत्प्रतिपत्तौ तस्यापि अनेन तदभावेन प्रतिपत्तिः तस्याप्यन्येनेत्यनवस्थेति मन्यते । यदि वा, तदभावेन तत्प्रतिपत्तौ किमन्यत्रापि प्रमाणान्वेषणेन इति ? अथ चेत्रैक नीलादिसुखादिप्रतिभासेन सकलशून्यताव्यवस्थाकारिणः प्रमाणस्य बाधनात् ***तदभावे न प्रतिपत्तुमर्हति**--प्रमाणाभावे सति न प्रतिपत्तुमर्हति **स्वभावनैरात्म्यम्** इति वा व्याख्यानम् । § 1358

अत्राह प्र ज्ञा क र गु प्तः-- **प्रतिभास एव कार्यकारणभावादिविकल्पशून्यत्वात् पर्युदासापेक्षया शून्यता यथा केवलं भूतलं घटशून्यता । तत्र** /ms **च स्वसंवेदनाध्यक्ष-प्रमाणभावात् कथमुच्यते तदभावे न तत् प्रतिपत्तुमर्हति** । इति; तं प्रत्याह--**भावे च** इति । भावेऽपि **प्रमाणस्य** प्रतिभासमात्रलक्षणस्वभावनैरात्म्यस्य वा अङ्गीक्रियमाणे । किम् ? इत्याह--**तदयम्** इत्यादि 277/mkj । **तत्** तस्माद् भावाद् **अयं** प्र ज्ञा क रा दिः **न चेतयते** । किं क्रियमाणोऽपि ? **प्रवेश्यमानोऽपि** । किम् ? इत्याह--**अनर्थगर्त्तं** स्वयम् अनर्थत्वेन अभ्युपगमाद् अनर्थः परिणामादिः तेन उपलक्षितं तद्रूपस्त्वा गर्त्तमिव गर्त्तम् तत्प्रविष्टो युगसहस्रैरपि ततो नात्मानमुद्धरति । किम् **अन-**

१ त] अर्थादभिन्नायाः ।
१ ए] अभेदपक्षे ।
१ त्र] भेदपक्षे सम्बन्धार्थम् उपकारान्तरस्वीकारे अनवस्था ।
३ स्यात्] विशेषाभावात् ।
३ स्य] कारणस्य ।
३ *] कार्यकाले ।
१७ माणाभावोऽपि] शून्य एव ।
१८ तेन] प्रमाणाभावेन ।
१८ अनेन] अन्येन
१९ भावेन] प्रमाणाभावेन ।
२० चेत्रैक] अथवा, एकत्र
२१ *] प्रमाणाभावे ।
३० स्त्वा] पत्वात्

**र्थगर्त्तम्** ? इत्याह--**आत्मानं** जीवमिति । केन ? इत्याह--**मिथ्याभिनिवेशेन** मिथ्या असत्यः अभिनिवेशः नैरात्म्याद्याग्रहः तस्य यस्मिन् चित्रैकप्रतिभासे स तथोक्तः तेन, **स्वयम्** आत्मना । § 1359

यद्वा, आत्मा न स्वत्तचेत **अनर्थगर्त्तं** सकलशून्यतागर्त्तं **प्रवेश्यमानोऽपि नात्मानं चेतयते** । कुतः पुनः अयमपि नात्मानं न चेतयते इति चेत् ? उच्यते--**प्रमाणाभावे न** तदभावे सति वा **[तथा] प्रतिपत्तुं वा अर्हति** यतः । किम् ? इत्याह--**प्रत्यक्षमेकम्** प्रमाणम् इति शेषः, **नापरम्** अनुमानादिकम् **इत्येतत्** । किमेतदेव तथा प्रतिपत्तुमर्हति नापरमपि ? इत्याह--**प्रमेयतत्त्वं वा** । वेति पक्षान्तरसूचने । प्रत्यक्षपरिच्छेद्यमेकं नापरम् आत्मादितत्त्वं प्रमेयतत्त्वम् इति । एतच्च कुतः **तदभावे न तत्प्रतिपत्तुमर्हति ?** इत्याह--**प्रमाणान्तर** इत्यादि । प्रत्यक्ष**प्रमाणाद्** अन्यद् अनुमानादि **तदन्तरं** तस्य **प्रतिषेधे** निरासे सति **प्रत्यक्षलक्षणानुपपत्तेः** । प्रत्यक्षस्य हि लक्षणं वैशद्यं साविप्लवम्, तच्च अशेषतद्व्यक्तिनिष्ठं न प्रमाणान्तरमन्तरेण प्रतिपत्तुं /ms शक्यं प्रत्यक्षस्य नियतगोचरत्वात् । अकृतलक्षणत्वाच्च न ततः तत्प्रतिपत्तिः, **तदभावे न प्रतिपत्तुम् अर्हति** इति सम्बन्धः । § 1360

इदमपरं व्याख्यानम्--प्रमाणान्तरनिषेधे कर्त्तव्ये प्रत्यक्षलक्षणग्रहणं तन्निषेधस्य तस्यानुपपत्तेः । नहि सर्वथा प्रमाणान्तरं नास्ति इति प्रत्यक्षम् इयतो व्यापारान् कर्त्तुं समर्थम् नापरमिति तदभावे न प्रतिपत्तुमर्हति । § 1361

अत्र त त्त्वो प प्ल व कृ द् आह--चार्वाकैश्चारु चर्चितं--स्वयम् एवं लक्षणतः तदनुपपत्तिः तेषां न दोषाय, प्रत्यक्षोपगमस्तु व्यवहारेण इति; तत्राह--**किं केन ?** इत्यादि । तदनुपपत्तेः कारणात् **किं** प्रत्यक्षादिलक्षणस्य परकीयस्य अतिव्याप्त्यादिकम्, **केन ?** न केनचित् **विदध्यात्** कुर्यात् चार्वाकः । न हि प्रमाणमन्तरेण तदपि कर्तुं शक्यं यतः **परपर्यनुयोगपराणि बृ हस्प तेः सूत्राणि** इति सूक्तं स्यात् । **किं** तत् अतिव्याप्त्यादिकं **केन**

---

२ स्य] यस्य
४ चेत] स्वतश्चेत्;
५ पुनः] चार्वाकः ।
५ न] न इति निरर्थकं भाति ।
१३ द्यं] अविप्लवेन सहितं वैशद्यम् ।
१३ क्तिनिष्ठं] प्रत्यक्षव्यक्ति ।
१३ न] अनुमान ।
१४ तः] प्रत्यक्षात् ।
१७ स्य] प्रमाणान्तरनिषेधस्य ।
२० द्] तत्त्वोपप्लवग्रन्थस्य कर्ता जयराशिभट्टः । नास्ति तत्फलं वा स्वर्गादि...उक्तं च परमार्थविद्भिरपि--लौकिको मार्गोऽनुसर्तव्यः अ...। लोकव्यवहारं प्रति सदृशौ बालपण्डितौ ॥ इत्यादि । ननु यद्युपप्लुतस्तत्त्वानां किमाया...अथातस्तत्त्वं व्याख्यास्यामः पृथिव्यप्तेजोवायुरिति तत्त्वानि, तत्समुदाये शरीरेन्द्रियविषयसंज्ञा इत्यादि ? न; अन्यार्थत्वात् । किमर्थम् ? प्रतिबिम्बनार्थम् । किं पुनरत्र प्रतिबिम्ब्यते ? पृथिव्यादीनि तत्त्वानि लोके प्रसिद्धानि, तान्यपि विचार्यमाणानि न व्यवतिष्ठन्ते किं पुनरन्यानि । पृ० १ तदेवमुपप्लुतेष्वेव तत्त्वेषु अविचारितरमणीयाः सर्वे व्यवहारा घटन्त इति । पृ० १२५--तत्त्वोप० ।
२१ त्तिः] प्रत्यक्षानुपपत्तिः ।
२५ इ] उद्धृतमिदम्--सन्मति० टी० पृ० ६९, ७४ ।

**प्रतिषेधयेद्वा यतो** यस्मात् कस्यचिद् विधानात् प्रतिषेधाच्च **जगत् स्यात्** । किं भूतम् ? इत्याह--**चातुर्भौतिकमेव** चतुर्भिः पृथिव्यादिभिः उपश्रुतत्वात् 278/mkj भूतैरिवेगृह्याते द्वत इति । यदि वा, **किं** पृथिव्यादिकं जीवादिकं च **केन विदध्यात् प्रतिषेधयेद्वा** प्रमाणाभावे उभयोः अभ्युपगमः प्रतिषेधो वा स्यात् इति मन्यते । एतदेवाह--**यतो** यस्माद् विधानात् प्रतिषेधाच्च **चातुर्भौतिकमेव जगत् स्यात्** चतुर्भूतनिर्मितमेव स्यात् । एतदुक्तं भवति--प्रमाणाभावेन /ms आत्मादिवद् भूतपरित्यागे सकलशून्यतापत्तेः, भूतवद् आत्मादिपरिग्रहे व्यवहाराविशेषात् कुतः चातुर्भौतिकमेव विपर्ययभावात् ? तन्नायं सौगतम् अतिशेते इति **तदयम्** इत्यादिकम् आदर्शयति-तत्र हि प्रत्यक्षमन्यद्वा प्रमाणं प्रतिषिध्यते--तदुपलम्भादेर्बाधकाभावस्य अन्यस्य वा तल्लक्षणस्य स्वप्नेऽपि भावात् । अदुष्टकारणारब्धत्वस्य ज्ञातुमशक्तेः अतीन्द्रियस्येन्द्रियस्य दुष्टत्वस्य इतरस्य वा प्रत्यक्षतोऽज्ञाना[त् ज्ञा] नेऽपि पूर्वचोद्याऽनिवृत्तिः, पुनस्तत्रापि अदुष्टकारणारब्धत्वकल्पने तदेव चोद्यम् तदेव उत्तरम् इत्यनवस्था । ज्ञानप्रामाण्यात् तदवगमे अन्योऽन्यसंश्रयः--तथाहि सिद्धे तत्प्रामाण्ये ततोऽदुष्टकारणारब्धत्वसिद्धिः, तस्याः तत्प्रामाण्यसिद्धिः इति । तन्न बहिः किञ्चित् प्रमाणम्, कस्यचिद् विधानं प्रतिषेधनं तु स्वसंवेदनप्रत्यक्षबलात् इति कस्यचित् एभेतोऽपि । § 1362

[अपि च] त त्त्वो प प्ल व करणात् ज य रा शिः सौगतमतमवलम्ब्य ब्रूयात्; तत्राह— **स्वसंवेदन** इत्यादि । **स्वेन** स्वस्य वा **वेदनं** ग्रहणं तस्य **उपेक्षया** अभ्युपगमेन **यदि नाम** इत्यरुचौ । तथा सति **बहिः उपप्लुतम्, अन्तश्च अन्यथा,** [इति] सौगतमतमेव निरस्तप्रसरं त चार्वाकम् इति प्रत्यक्षं प्रमाणम् इत्येवमुक्तम् । **यदि नाम** इति सम्बन्धः । तत्र उपहासपरं वचनमाह--**सूक्तमेवैतत्** असूक्तेऽपि सूक्तम् इत्यभिधानात्, **निराकृतपरदर्शनगमनात्** सकलस्वदर्शनत्यागात् सूक्तलेशोऽपि नास्ति इति **एवकारेण** दर्शयति । कस्मात् असूक्तम् यस्माद् उपहास्यमेतदिति कदाचित् सौगतः तत्पक्षपातमुद्वहन् ब्रूयाद् इत्याह--**स्वसंवेदन** इत्यादि । अत्र अपिशब्दो /ms द्रष्टव्यः । ततोऽयमर्थः-- न केवलं बहिः अपितु **स्वसंवेदनेऽपि अप्रस्तापोपलब्धेः** प्रलापस्य निह्नवस्य उपलब्धेः दर्शनात् **सूक्तमेवैतत्** इति सम्बन्धः । किं कृत्वा ? इत्याह--**विभ्रमैकान्तमुपेत्य** इति । बहिरिव तत्रापि विभ्रमस्य निरूपितत्वादिति नेदं पुनर्निरूप्यते । ननु सत्यं तत्रापि अप-

---

३ त] भूतैरेवेति गृह्यते यतः
४ योः] पृथिव्यादि-जीवयोः ।
८ न्नायं] चार्वाकः ।
१० त] प्रमाणलक्षणस्य ।
१२ स्य] अदुष्टत्वस्य वा ।
१४ प्रामाण्यात्] अदुष्टकारणारब्धत्वपरिज्ञाने ।
१४ सिद्धे] ज्ञानप्रामाण्ये ।
१७ एभेतोऽपि] एतत् शोभेत
२० या] अपेक्षया
२१ श्च] सत्यम् ।
२१ त] न
२८ स्तापो] अपलापो
२८ स्य] अपलापस्य
३० त्यं] सत्यम् ।

लापोपलब्धिरस्ति बहुजन्मजात्मनि जगति तत्रापि विवादवृत्तेरनिवारणात्, स तु उपलभ्यमानोऽपि अपलापो युक्त्या व्यवच्छिद्यस्ये ति तस्य अपलापस्य व्यवच्छेदस्यापि तदुपलब्धिः इति सम्बन्धः । न च अविरुद्धविधिः तद्व्यवच्छेदकः; अतिप्रसङ्गात् । तदभावः कुत इति चेत् ? अत्राह--**अन्यथा** इत्यादि । **अन्यथा** अन्येन विरोधाऽभावप्रकारेण **विप्रतिषेधाद्** अन्योऽन्यविरोधात् तस्य तदुपलब्धेः इत्यपेक्षम् । तथाहि--यदि प्रत्यक्ष-अपलापयोः विरोधः; तर्हि स्वसंवेदनभावे तद्भावे वा स्वसंवेदनस्य वार्त्तापि दुर्लभा । न चैवम् । अथ सहभावः; न विरोधगतिरिति । प्रत्यक्षं च समानकालमन्यद्वा न तद्विरोधि; अर्थग्रहणवत् दोषात् । विरोधोऽपि मिथ्यैकान्ते अनिदंते * कथमिव सतुप्य वगम्यते ? नापि अनुमानतोऽनभ्युपगमात् इति मन्यते 279/mkj
। अन्यथा स्वसंवेदनाध्यक्षप्रतिज्ञाव्याघातः । § 1363

इदमपरं व्याख्यानम्--न तावत् स्वसंवेदनात् तद्व्यवच्छेदः; *तेन तस्य विरोधाऽभावात्, अन्यथा अन्येन अनुमानेन तद्व्यवच्छेदप्रकारेण विप्रतिषेधात् तस्य तदुपलब्धेः इति । तद्यथा— यदि अनुमानेन तद्व्यवच्छेदः; कथं स्वसंवेदनप्रत्यक्षमेव प्रमाणम् ? तच्च कथं तेन तद्व्यवच्छेदः ? व्यवहारेण अनुमानोपगमाददोष इति चेत्; अथ कोऽयं व्यवहारो नाम ? अस- /ms
त्यपि अनुमाने प्रमाणे जनस्य तदस्तित्वविकल्पः स इति चेत्; न; अत्र प्रमाणाभावात् । न स्वसंवेदनप्रत्यक्षम्; तत्र मिथ्यैकान्त[म]नभ्युपेत्य अपलापोपलब्धेः, न च स्वयमनवस्थितम् अन्यव्यवस्थानिबन्धनम् अतिप्रसङ्गात् । नाप्यनुमानम्; *तदेव नास्ति तत एव तद्व्यवस्थानमित्यतिसाहसम् । संवृतिसिद्धेन तेन तद्व्यवस्थापि तादृगेव; **यादृशो यक्षः तादृशो बलिः** इति न्यायात् । § 1364

अन्यस्त्वाह--स्वसंवेदने विभ्रमैकान्ताभ्युपगमः प्रमाणान्न युक्तः; विभ्रमात् तदसिद्धेः । तन्न युक्तम्--स्वसंविदित इत्यादि इति चेत्; न; अत्र बहिरर्थसिद्धेरनिवारणा[त्] दोषो मा भूत् परमतगमनमिति । तर्हि बहिरपि पृथिव्यादिमात्रे प्रत्यक्षं प्रमाणमिष्यते; तत्राह--**चतुर्भूत** इत्यादि । चतुर्णां पृथिव्यादीनां [भूतानां] **व्यवस्था** सङ्करव्यतिकरव्यतिरेकेण स्थितिः, ता एव **तामपि लक्षणभेदात्** धारणेरणद्रवनानात्वात् **कथयितुमर्हति** इति । तथा **परो मिथ्याभिनिवेशेन स्वयम् अनर्थगर्तम् आत्मानं** जानंध जीवं **प्रवेश्यमानोऽपि [न] चेतयते** इति सम्बन्धः । तथाहि--यथा धारणादिस्वभावभेदात्

२ स्ये] द्यते इ
७ न] ना
९ अनिदंते] निरंशे
९ *] स्वसंवेदनेऽपि ।
१० तुप्य] सन्नप्य
१२ *] स्वसंवेदनेन ।
१५ च] तचेत्;
१७ ल्पः] व्यवहारः ।
२० *] अनुमानमेव ।
२२ इति] यथा बलिस्तथा यक्षः ।--प्र० वार्तिकाल० पृ० २९३ ।
२४ त] विभ्रमैकान्ताऽसिद्धेः ।
२७ ता] ता एव इति निरर्थकमत्र ।
२९ जीवं] जात्यन्ध इव
३० धा] धारणं पृथिव्याः ईरणं वायोः द्रवत्वं जलस्य उष्णता च अग्नेः लक्षणम् ।

कालत्रयेऽपि परस्परं भिन्ना भूम्यादयः [तथा] तेभ्यः चेतनामूर्त्तत्वरूपभेदात् सहदर्शननियमेऽपि भिन्नश्च आत्मा इति । § 1365

ननु यथा पूर्वमुक्तम् **प्रतिपत्तुमर्हति** इति, एवमत्रापि वक्तव्यम्, किमर्थमुक्तम्— **कथयितुमर्हति** इति चेत् ? उच्यते--**कथयति** परं प्रतिपादयति, स च प्रतिपन्न [चैतन्यः] प्रतिपादनीयः, अन्यथा पाषाणादयः प्रतिपादनीयाः स्युः । अचेतनत्वान्नेति चेत्; प्रतिपाद्याभिमतेऽपि चैतन्यं कुतः प्रतिपन्नम् ? /ms अध्यक्षत इति चेत्; न; तस्य तत्र अप्रवृत्तेः । नहि परः परसुखदुःखादिकं प्रत्यक्षयितुमर्हति, अन्यथा सर्वज्ञनिषेधः । चैतन्यमात्रं प्रत्यक्षयति, कथमन्यथा शरीरदर्शनात् जीवति इति प्रतीतिः स्यात्, नहि विशेषणाऽग्रहणे तद्विशिष्टविशेष्यप्रतीतिः दण्डा[ग्रहणे दण्ड्य]ग्रहणवद् इति चेत्; न; चैतन्यस्य सुखाद्यव्यतिरेकात् । न च सुखाद्यग्रहेऽपि तदव्यतिरिक्तचैतन्यग्रहो युक्तः, अन्यथा पिण्डाद्यग्रहणेऽपि मृद्द्रव्यग्रहः स्यात् । § 1366

ननु यथा भवदीयमते प्रतिक्षणपरिणामाऽग्रहेऽपि द्रव्यग्रहणम्, दूरे वा 280/mkj विशेषाग्रहणेऽपि सन्मात्रग्रहणं तथा अत्रापि स्यादिति चेत्; न; तत्परिणामस्य प्राकृतपुरुषावेद्यत्वात् । तद्विशेषाणाम् अतिदूरतादग्रहणं नैवं सुखादयोऽपि विपर्ययात्, तेषां स्वसंवेदनैकस्वभावत्वमिति चेत्; कुत एतत् ? इन्द्रियेणाऽग्रहणात् । एतदपि कुतः ? परत्र सुखादौ संशयात् । तत् चैतन्येऽपि समानम् । दूरत्वाद् इन्द्रियेण परस्य सुखाद्यप्रत्यक्षत्वे प्रत्यो रन्योऽन्यं संश्लेषे सुखाद्यनुभवनं भवेत् । शरीरान्तःप्रवृत्तेः सुखादेरननुभवने चैतन्येऽपि प्रसङ्गः । तदन्तःप्रविशिना वा अनुभवनम् । तन्न प्रत्यक्षतः तत्प्रतिपत्तिः । जीवति अयम् इत्ययं तु प्रत्ययः शरीराकारविशेषादर्शनात् धूमवत्त्वदर्शनात् [क्वचित्] प्रदेशे अग्निप्रत्ययवत् इति अनुमानत्वेन प्रमाणान्तरनिषेधस्य इत्यस्य प्रदर्शनार्थमिति । § 1367

यदि पुनः तद्व्यवस्था न तद्भेदात् कथयितुमर्हति इति; तत्राह--**अन्यथा** । अन्येन तदभावेऽपि तत्कथनप्रकारेण **अनवस्थाप्रसङ्गात्** भूतचतुष्टयावस्थितेरभावप्रसङ्गात् । लक्षणभेदाऽभावे लक्ष्यभेदाऽनवधारणात् । तत्त्वात्त /ms [द]न्येन तत्प्रसङ्गात् इति वा वाच्यम् । तद्भेदादेव तर्हि कथयितुमर्हति इति चेत्; अत्राह--**न च** इत्यादि । **न च** नैवं **चतुर्भूतव्यवस्थाकथनार्हत्वं तथा** लक्षणभेदप्रकारेण प्रत्यक्षेण करणभूतेन **युक्तम्** उपपन्नम् । कुतः ? इत्याह--**परोक्षाणामपि** न केवलं प्रत्यक्षाणामेव भूम्यादीनाम् **लक्षणात्** धारणादिस्वभावानां ज्ञानात् । § 1368

---

१ तेभ्यः] भूतेभ्यः ।
५ स] परः ।
७ स्य] चैतन्ये ।
८ निषेधः] विरुध्यते इति शेषः ।
१० द] दण्डाग्रहणे दण्ड्यग्रहणवत् ।
१२ था] पिण्डस्थासादिपर्यायाग्रहणेऽपि ।
१३ था] जैनमते ।
१४ त] पूर्वापरपर्यायरूपपरिणामस्य ।
१५ ता] त्वा
१६ यात्] अतिनैकट्यात् ।
१८ त्यो] द्वयो
२० त] परकायानुप्रवेशकारिणा पुरुषेण ।
२१ विशेषा] ष
२४ त] लक्षणभेदात् ।
२९ नाहत्वं] कथनं

यदि वा, प्रत्यक्षेण लक्षणभेदेन तद्व्यवस्थाकथनकाले परोक्षणात् पुनः तथा लक्षणयुक्तानां दर्शनात् । न च तत्तथा प्रत्यक्षेण युक्तमिति । नहि धूमो देशान्तरादौ धूमध्वजपूर्वकत्वेन उपलभ्यमानः पूर्वप्रत्यक्षेण तथा कृतव्यवस्थ इति भणितुं शक्यते परोक्षाणामपि तद्रूपेणाङ्गनादिति । एतदपि कुतः ? इत्याह--**साकल्येन** सामस्त्येन **तत्त्वानां** पृथिव्यादीनां **प्रतिपत्तेः** निर्णयस्य **अन्यथा** परोक्षाणामपि लक्षणाभावप्रकारेण **अनुपपन्नाः** * तेषामपि **लक्षणात्** इति सम्बन्धः । § 1369

यदि वा, परोक्षाणामपि तथादर्शनादिति । एतत् कुतः ? इत्याह--**साकल्येन** इत्यादि । **साकल्येन तत्त्वस्य** पृथिव्यादिस्वरूपस्य इदंतया नेदंतया वा **प्रतिपत्तेः अन्यथा** पुनः पुनः तथैव तेषां दर्शनाभावप्रकारेण **अनुपपत्तेः** इति । तथा सति धर्माधर्मस्वभावाः परलोकानुयायिचैतन्यस्वभावा विशिष्टसुखज्ञानादिस्वभावा वा न भूम्यादय इति दुराराध्या प्रतिपत्तिः । § 1370

अथवा **साकल्येन** इत्यादि वाक्यम् उत्तरकारिकया सम्बद्ध्य व्याख्यातव्यम्--**साकल्येन** अनवयवेन **तत्त्वस्य** पृथिव्यादेः तृस्यादि कार्यकारणस्वभावस्य या **प्रतिपत्तिः** तस्याः **अन्यथा** अन्येन आध्यात्मिकज्ञानाभावप्रकारेण /ms **अनुपपत्तेः** सकाशाद् **आध्यात्मिकज्ञानं** यद् अस्ति इति शेषः । § 1371

...13 आध्यात्मिकं यतो ज्ञानं प्रत्यक्षं भूतगौरवम् ।
भूतमभूतं भूतश्चेदास्तां भूतपञ्चमम् ॥ १३ ॥§ 1373

281/mkj

पृथिव्यादिस्वभावभेदं प्रतिपद्य विज्ञप्तिस्वभावभेदम्, हर्ष [विषादाद्यनेकाकारम्] अन्तःसमक्षं प्रतिक्षिपतीति कथं प्रेक्षावान् ? अपि च भूतप्रत्यक्षं यदि तत्त्वान्तरम् परिसंख्या विरुध्येत । संवित्तेः तेष्वन्तर्भावकल्पनायां तत्त्वमेकमेव स्यात् । § 1374

तथाहि--कुतश्चित् पृथिव्यादिविशेषात् बुभुक्षादिपीडापाये एकदा प्रतिपन्ने यद् एवंविधं तद् इयता कालादिना इत्थम्भूतप्राणिविशेषस्य तदपायकारणम् इति सिद्धायां व्याप्तौ पुनः तस्य तादृशस्य वा दर्शनात् सम्बन्धस्मृतौ प्रत्यभिज्ञाने चिन्तायां दृश्यमानस्य तत्कारणस्वभावप्रतिपत्तौ प्रवृत्तिरिति प्रायिकमेतत् । तदुक्तमत्रैव--**अक्षज्ञानम्** सिद्धिवि° १ । २७ इत्यादि । न चैतत् पृथिव्यादेर्युक्तम्, पूर्वज्ञानस्य उत्तरज्ञानाकारपरिणामदर्शनात् मृत्पिण्डस्य

१ त] चतुर्भूतव्यवस्था ।
१ णात्] परोक्षाणामपि लक्षणात्
४ ना] स्वीकारात् ।
६ *] पत्तेः
६ पि] परोक्षाणामपि ।
१४ तृस्यादि] धृत्यादि
२३ पृ] अन्नादिरूपात् ।
२४ त] बुभुक्षादिपीडानिवारकम् ।
२७ म्] नैः

स्थासपरिणामवत् । तदास्तां तिष्ठतु न विचारणीयम् । कुतः ? इत्याह-- **प्रत्यक्षं यतः** । न वै खलु पृथिव्याद्यसंभविगुणपर्यायोपचिततया प्रत्यक्षं तत्त्वं पृथिव्यादिभ्यो भिन्नम् न्यद्वा इति विचारमर्हति, तेषामपि परस्परं तत्प्रसङ्गात् । किं तर्हि विचारणीयम् ? इत्याह--**भूतगोचरम्** इत्यादि । पृथिव्यादिविषयं ज्ञानं **प्रत्यक्षम्** इन्द्रियज्ञानम् इत्यर्थः । § 1375

ननु अस्य आध्यात्मिकज्ञानादा त्तत्परिहारेणैव परिहृतं तत् किमर्थं पृथगेतदुच्यते ? सत्यम्; तथापि पूर्वं सामान्येन अयं विशेषेण उच्यते इति विभागः । § 1376

अत्र परस्य अनेकं दर्शनम्--भूतस्वभावः तद् इत्येकम् । तत्परिणाम इत्यपरम् । तेभ्यो भिन्नमतत्त्वं मरीचिकाजलवत् इति अन्यत् तत्त्वम् इति परम् । तत्कार्यत्वात् तत्रैव न्तर्भवति इति पृथक् । तत्र अनेकं वाक्यम्--**भूतं** पृथिव्यादि **भूतरूपं चेत्** यदि **भूतगोचरं ज्ञानं प्रत्यक्षम् आस्तां** पर्याप्तम्
/ms तेनेत्यः । कुतः ?  इत्याह--**अभूतं स्यात् यतः** अभूतस्वभावं भवेत् । नहि सर्वभूतानि चेतनारूपाणि संविद्रते जगतः प्राणिम(?त्व)प्रसङ्गात् । क्व- चित् तदाविर्भावतिरोभावकल्पनापि पापीयसी सांख्याविशेषात्, भूतव्यवस्था भूतरूपैव स्यादिति । § 1377

तथा **अभूतम्** ईषद्भूतरूपं परिणाममस्य कथञ्चित् परिणामिरूपत्वात् **चेत्** यदि तदपि **आस्ताम् अभूतं स्यात्** यतः कथञ्चिदपि भूतरूपं न भवेत् अचेतय चेतनपरिणामविरोधात् । § 1378

तथा **अभूतं** भूताद् अन्यत् **चेद्** अस्त्वतं * मरीचिकाजलवदत् स्यात् । **चेत्** इत्येतद् अत्रापि सम्बन्धनीयम् । तदप्या**स्ताम्** । *ततः कस्यचित् विधानप्रतिषेधाऽभावात् इत्युक्तत्वात् । § 1379

**भूतं** परमार्थं **तच्चेद्** अस्तु **पञ्चमं** तत्त्वम् इति शेषः । ततोऽन्यस्य सतो गत्यन्तराभावात् इति मन्यते । § 1380

तथा इदमपरम्--**अभूतं** भूतेभ्यो व्यक्तात् कारणात् कार्यस्य अन्यत्वात पटतन्तुवत् **चेत्**; तथापि **भूतं चेद्** भूतरूपं यदि, तत्कार्यत्वेन तत्रैव अन्त-
282/mkj र्भावात् पृथिव्यां पटवदिति ।  एतदपि **आस्ताम्** । **अभूतं स्यात्** भूतरहितं सर्वं स्यात् भूतानामन्योऽन्यं कार्यकारणभावेन अन्तर्भावाद् भूतव्यवस्था न स्यात् । यदि पुनः काष्ठादेरन्तर्भूतपावकादेः पावकादिसमुद्भव इति न दोषः; तत्राह--**अस्तु पञ्चमं** तत्त्वं पृथिव्यादेः अन्तर्भूतचेतसो भावात् इति भावः । § 1381

६ ज्ञानादा] ज्ञानपदोपादाना
९ स्य] चार्वाकस्य ।
९ द्] यज्ञानम् ।
११ त्वात्] भूते एव ।
१३ तेनेत्यः] त्यर्थः
१५ त] सांख्यकल्पित ।
१८ पि] सत्यार्थम् ।
२० *] आस्ताम्
२१ *] असद्रूपात् ।
२५ म्] व्याख्यानम् ।
२९ व] न पुनः पार्थिवात् काष्ठादेरग्निः जलाद्वा पार्थिवं मुक्ताफलादिकम् ।

कारिकां विवृण्वन्नाह--**पृथिव्यादि** इत्यादि । **पृथिव्यादेः स्वभावभेदं** स्वरूपनानात्वं **प्रतिपत्त्या** अभ्युपगम्य **विज्ञप्तिस्वभावभेदं** बुद्धीनां सन्तानभिन्नानां रूपनानात्वं विज्ञप्तिग्रहणं सांख्यवैशेषिक-आत्मनिषेधार्थम् स्वभावभेदग्रहणं सकलाद्वैतबाधार्थम् । किं भूतम् ? इत्याह--**हर्ष** इत्यादि । पुनरपि /ms किंभूतम् ? इत्याह--**अन्तः** इत्यादि । अनेन शरीरात् गृहादिव दीपस्य दर्शयति । **समक्षं** स्वसंवेदनप्रत्यक्षविषयं **प्रतिक्षिपति** निराकरोति **इति** हेतोः **कथं प्रेक्षावान् ? अपि च** इत्यादिना अत्रैव दूषणान्तरमाह--**भूतप्रत्यक्षं** पृथिव्यादिगोचरम् इन्द्रियज्ञानम् **यदि तत्** पृथिव्यादिभ्योऽन्यत्वे सति **यदि** द्रव्यान्तरम्; **परिसंख्या** चत्वार्येव तत्त्वानि इति परिगणनं **विरुध्येत** । § 1382

इदमपरं व्याख्यानम्--**तत्त्वं** च पृथिव्यादिकार्यत्वेन **अन्तरं** च भिन्नम् इति चेत्; अत्राह--**संवित्तेः** स्वपरग्रहणलक्षणायाः भूतप्रत्यक्षरूपचेतनायाः **तेषु** भूतेषु तत्स्वभावतया **अन्तर्भावकल्पनायां** क्रियमाणायां **तत्त्वम् एकमेव स्यात्** तच्चातुर्विध्यं हीयेत परस्पराऽन्तर्भावात् । अथ पृथिव्यादीनां परस्परविविक्तानां प्रतिभासनात् नैवम्; तर्हि संवित्तिविभक्तानां तथैव प्रतिभासनात्, अन्यथा प्राणिमयं जगत् स्यादिति प्रकृतमपि मा भूदिति मन्यते । § 1383

यदि पुनः तत्स्वभावतया न तत्रान्तर्भावः अपि तु तत्परिणामतया तत्राह--**स्यात् पर्याय** इत्यादि । § 1384

...14 स्यात्पर्यायः पृथिव्यादेः सलिलादिस्तथा न वै ।
चेतनोऽचेतनस्य वाऽचेतनश्चेतनस्य च ॥ १४
॥§ 1386

पुद्गलद्रव्यं सूक्ष्मं खरादिविवर्तमासाद्य पृथिव्यादिव्यपदेशभाक् पुनरन्यथा बहुलं परिणामि लक्ष्यते, यथा चन्द्रकान्तमणिः पृथिवीस्वभावो द्रवति चन्द्ररमेः, शुक्रशोणितं भस्ममृत्तिकादिपर्यन्तं रूपादिपरिणामं याति, तथैव मुक्ताफलादि । काष्ठदिकमग्निसात् भवति अरण्यादिसंयोगात् । न पुनः चेतनश्चैतन्यं विहाय विपरिवर्तते अचेतनश्चेतनो भवन् सँल्लक्ष्यते । तदयमुभयं चेतनेतरतत्त्वमेकीकुर्वन् पुद्गलद्रव्यलक्षणं पृथिव्यादिभेदेन चतुर्धा व्यवस्थापयन् कथं स्वस्थो विपर्यस्तबुद्धिर्देवानां प्रियः ? प्रत्यक्षस्यातीवलङ्घनात् । इहजन्मनि तावत् प्राणिनामाद्यन्तचित्तानि चित्तान्तरोपादानोपादेयभूतानि चित्तत्वात् यथा मध्यचित्तम् । अत्र पुनरन्यथानुपपत्तिरस्त्येव, जातस्य

२ त्या] पद्य
६ स्य] भिन्नत्वं दर्शयति ।
८ रं] तत्त्वान्तरं
१४ नात्] न चातुर्विध्यहानिः ।
१४ थेव] परस्परविविक्ततया ।
१७ न] भूतेषु ।
१७ तु] भूतपर्यायतया ।

पूर्वाभ्यस्तस्मृत्यनुबन्धात् भयादिप्रतिपत्तेः । अनेन पथिकाग्नेः ज्वालान्तरपूर्वकत्वं प्रत्यग्निवत् इति व्यभिचारचोदनं प्रत्युक्तम्, तेज कारणपूर्वकत्वस्य तत्र विरोधात् । सतश्चेतनस्य चित्स्वभावेन परिणमतः कारणान्तरानपेक्षत्वात् 283/mkj स्वयमक्षेपेण विवर्तोपपत्तेः अनैमित्तिकत्वा दचेतनवत् । द्वितीये तदवश्यम्भावात् । यदि पुनः अन्त्यक्षणस्य नोत्तरीभवनशक्तिः; अवस्तुत्वं स्वोपादानप्रबन्धाभावं साधयेत् अर्थक्रियालक्षणत्वाद्वस्तुनः । समर्थं न करोति चेति विरुद्धम् । सामग्रीजन्मनां विसदृशकार्याणां कादाचित्कत्वं न तु उत्तरीभवनस्य । तदेतत् अन्ते क्षयदर्शनमसिद्धम्, मध्ये स्थितिदर्शनमपि स्थितिं प्रसाधयेदव्यभिचारात् । यदि चेतनः अचेतनाकारेण विवर्तेत स्वापप्रबोधवत् प्रेत्यभावसिद्धेः कथन्नानवद्यम्--अपर...। चेतनेतरयोः स्वभावसिद्धयोः सङ्करव्यतिकरप्रतिपत्तिरयुक्तैव दृष्टहानेरदृष्टपरिकल्पनाच्च । *जलबुद्बुदवज्जीवाः मदशक्तिवद् विज्ञानमिति परः अर्के कटुकिमानं दृष्ट्वा गुडे योजयति । विज्ञप्तेर्यदि स्वालक्षण्यादिविशेषेऽपि मदशक्त्यादिदृष्टान्तेन सत्त्वोत्पत्तिकृतकत्वादेः भूतस्वभावत्वम्; तत एव परोऽपि भूतानामपि बुद्धिचैतन्यविवर्तानतिक्रमं सुखादिस्वसंवेदनवत् साधयेदिति विरुद्धाव्यभिचारीति मिथ्याभिनिवेशात् प्रमाणप्रमेयव्यवस्थामतिलङ्घयेत् § 1387

इदमत्र तात्पर्यम्--संवित्तेः भूतपरिणामत्वेन तत्रान्तर्भावे अनिष्टं किञ्चित् सिध्यति इष्टं च न सिध्यति । अनिष्टसिद्धिं तावद्दर्शयति--**स्याद्** भवेत् **पर्यायः** परिणामः । कस्य कः ? इत्याह--**पृथिव्यादेः सलिलादिः** । अस्यार्थं स्वयमेव वृत्तौ वक्ष्यति तन्नेह उच्यते । ततः पृथिव्यादौ सलिलादेः अन्तर्भाव इति भावः । इष्टासिद्धिं दर्शयन्नाह--**तथा** इत्यादि । येन अन्वयव्यतिरेकानुविधान /ms प्रकारेण पृथिव्यादेः पर्यायः सलिलादिः **तथा नवै** नैव **चेतनो**ऽवग्रहादिः **अचेतनस्य** चेतनस्वभावरहितस्य पृथिव्यादेः **अचेतनः** पृथिव्यादिः **चेतनस्य वा** पर्याय इति सम्बन्धः । तदनेन **आत्मैवेदं सर्वम्** छान्दो० ७ । २५ । २ इत्याद्यपि निरस्तम् । अवग्रहाद् ईहायाः ततोऽवायस्य अतो धारणायाः स्मृतेः प्रत्यभिज्ञाया अस्याः तर्कस्य अनुमानस्योत्पत्तिदर्शनात् । न चान्यस्य परिणामोऽन्यस्य; अव्यवस्थापत्तेरिति मन्यते । § 1388

स्यान्मतम्--यदि चेतनस्य नाचेतनः तस्य वा चेतनः; कथं जाग्रद्दशातः स्वापदशा, तस्यश्च प्रबोधदशा यतस्तदा अवग्रहादिसंभव इति ? तत्र

---

११ *] तुलना--जलबुद्बुदवज्जीवाः यथैव हि समुद्रादौ नियामकादृष्टरहिताः पदार्थसामर्थ्यवशात् वैचित्र्यव्यपदेशभाजो बुद्बुदाः प्रादुर्भवन्ति तथा सुखदुःखवैचित्र्यभाजो जीवाः...(?")--न्यायकुमु० पृ० ३४२ ।

१२ ज्जीवाः] मदशक्तिवद् विज्ञानम्--न्यायकुमु० पृ० ३४२ । ब्र० शा० भा० ३ । ३ । ५३ । न्यायक० पृ० ४३७ । न्यायवि० वि० प्र० पृ० ९३ । मदशक्तिवच्चैतन्यमिति--प्रक० प० पृ० १४६ । तुलना--मद्याङ्गवद् भूतसमागमे ज्ञः...--युक्त्यनु० श्लो० ३५ ।

१७ त्वेन] भूतेषु ।

१९ अस्यार्थं] ग्रन्थकारोऽकलङ्कदेवः ।

२० वृत्तौ] स्वोपज्ञटीकायाम् ।

२८ नः] अचेतनस्य ।

२८ नः] न परिणामः तर्हि ।

केषाञ्चित्परिहारः--तद्दशायामविकल्पकं दर्शनमस्ति ततः प्रबोधः । *अन्येषां जाग्रद्विज्ञानात् सः इति । *अपरेषां ज्ञानरहितादात्मनः इति । नान्त्यः तावत् परिहारः संभवति; ज्ञानाद् व्यतिरिक्तस्य आत्मनोऽन्यस्य वा भूताऽविशेषात् । यद्यपि कार्यभूतानां क्षणिकत्वमिति न स्मरणप्रत्यभिज्ञानादिसंभवतः त-दापि * तत्कारणभूतेभ्यः तत्संभवो नित्यत्वात्तेषाम् । यद्यपि तद्रूपादयः नास्मत्सदृशानां प्रत्यक्षाः तथापि बुद्धा दयः तदाश्रितत्वेऽपि प्रत्यक्षाः, यथा 284/mkj आकाशपरममहत्त्वाद्यप्रत्यक्षत्वेऽपि तदाश्रितः शब्दः प्रत्यक्षः । § 1389

यस्तु मन्यते बुद्धेः शरीराश्रितत्वे तस्य क्षणिकत्वाद् देशान्तरादौ प्रत्य-भिज्ञानं न स्यादिति; स्यादेतदेवं यदि कार्यसंयोगिना कारणं न संयुज्येत, न चैवम्, पटसंयोगिना तन्तुसंयोगदर्शनात् । नापि मध्यमध्यमशरीरस्य प्रबोधकारणत्वात् ; तद्भावे भावाद् अभावे अभावात् । न जाग्रच्चित्तस्य, /ms तदभाव एव भावात् । तथापि तत् तस्य चेत् कारणम्; तर्हि विधवाया गर्भः चिरमृताद् भर्त्तुः न सन्निहितात् परपुरुषात्, इति न सा निग्राह्या स्यात् । § 1390

यदि मतम्--प्रबोधस्य शरीरकारणत्वे जाग्रच्चित्तानुकरणविरोध इति; त-दपि सुपरिहारम्; यतः कारणकारणस्यापि अनुकारणसंभवात् तदविरोधः । तथाहि--तच्चेतसः शरीरं प्राणादिवत्, ततः पुनरपरं शरीरं प्राणादेरिव प्राणादिः तावद् अन्ता दशा, ततः पुनः तदनुरूपप्रबोधः पित्रनुरूपपुत्रवत् इति । त-द्यथा पितुः शुक्रादिपातः पुनः तत्परिणामविशेषात् पित्रनुरूपमपत्यशरीरम् । § 1391

यदि वा, शरीरं बोधोपादानकारणम्, तच्चित्तं सहकारिकारणम्, परस्य च सहकारिकारणानुरूपं कार्यम्, अन्यथा कथमर्थानुरूपं ज्ञानम् ? भिन्न-कालं कथं सहकारि इत्यपि नोत्तरम्; सर्पादिदष्टमूर्च्छितस्य पूर्वामूर्च्छितः चित्तं प्रति भिन्नकालतास्यापि मन्त्रादेः सहकारित्वस्य परैरभ्युपगमात् । प्र-थमः पुनः अपर्यालोचित एव; स्वापादौ हि क्षणिकसंवेदनोपगमे जागरणात्

१ स्ति] अविकल्पदर्शनात् ।
१ *] प्रज्ञाकरादीनाम् ।
२ सः] प्रबोधः ।
२ *] नैयायिकादीनाम् ।
२ नः] प्रबोधः ।
३ विशेषात्] भूतवदचेतनत्वादित्यर्थः ।
४ पि] कार्यरूपाणां भूतानाम् ।
४ तः] वः
५ *] तथापि
५ त्वात्तेषाम्] कारणात्मकभूतानां परमाणूनामित्यर्थः ।
५ पि] कारणात्मकभूतपरमाणुगता रूपादयः ।
६ बुद्धा] बुद्ध्या
६ यः] भूताश्रितत्वेऽपि ।
७ त्वेऽपि] आकाशाश्रितः ।
८ त्वे] शरीरस्य ।
११ बोध] धा
११ त्वात्] त्वम्
११ स्य] प्रबोधकारणत्वम् ।
१२ थापि] जाग्रच्चितम् ।
१२ त्] प्रबोधचित्तस्य ।
१३ सा] विधवा ।
१६ अनुका] क
२१ चित्तं] जाग्रच्चित्तम् ।
२२ म्] भवत्येव ।
२४ पूर्वामूर्च्छितः] त
२४ तास्यापि] लस्यापि

तस्य विशेषो वाच्यः यतस्तत्र प्रत्यक्षसिद्धं क्षणक्षयादिकं तत्प्रवृत्त्यादिकारणं मरणवद् इति न स्यात् । समारोपः इति चेत्; न; तत्र तदभावात् । इतरथा तदुपलक्षणे न गाढनिद्रा दशा नाम । तदनुपलक्षणं तु **नहि इमाः कल्पनाः** प्र० वा० स्व० टी० पृ० १२७ इत्यादि प्रतिहन्ति । यदि पुनः निश्चयाऽभावो विशेषः; सोऽपि न युक्तः; तदभाव एव अस्तु । कथमनुभूतं /ms क्षणक्षयादिकमननुभूतं यतस्तत्र तद्व्यवहारो न स्यात् ? निर्विकल्पानुभूतमननुभूतकल्पमिति चेत्; न तर्हि स्वापादेः संहृताशेषविकल्पदशा भिद्येत इति तत्रैव अन्यत्रापि-- § 1392

*संहृत्य सर्वतश्चिन्तां स्तिमितेनाऽन्तरात्मना ।
स्थितोऽपि चक्षुषा रूपमीक्षते साऽक्षजा मतिः ॥§ 1394

प्र० वा० २ । १२४ इति प्लवते । § 1395

तत्र नीलादिविकल्पसद्भावेऽपि ततस्तत्र संवेदनाऽप्रवेदनात्, चेतनस्य चेतनः तस्य वा अचेतनः पर्यायः इति न युक्तमेतत्--**नवै चेतनोऽचेतनस्य** इत्यादि इति चेत्; अत्र प्रतिविधीयते-- § 1396

निर्णयेतरसंवित्तेः सदाऽभ्युपगमादयम् ।
न दोषो जायतेऽस्माकं सौगतैकान्तपक्षवत् ॥§ 1398

प्रबोधस्यान्यथायोगादन्तरालेऽनुमीयते ।
285/mkj संवित्तिरविकल्पाऽपि जैनैः किन्न सदा स्वयम् ॥§ 1400

कार्यकारणभावोऽयमन्यथा नियतः कुतः ।
अहेतुरन्यहेतुर्वाऽदृष्टहेतुः प्रसज्यते ॥§ 1402

यदि स्वापे संवित्तिरनुपलक्षितेति प्रबोधोऽहेतुकः, तर्हि मेघादिः अनुपब्धोपादानः तथैव अहेतुः इति सर्वे कादाचित्कमपि तथैव शङ्क्येत । अथ अन्यहेतुकः; तन्मेघादिरपि अन्यजातिकारण इति न चतुर्भूतव्यवस्था । अर्थं पृथिव्यादेरेव तदुत्पत्तिदर्शनात्; अदृष्टमपि जलपटलादेः सजातीयं कारणमनुमीयताम् । § 1403

एतेनेदमपि प्रत्युक्तम्--**यथा अविकल्पात् स्वापात् सविकल्पप्रबोधसंभवः तथा अचेतनात् चेतनसंभवः** इति; कथम् ? अन्यत्रापि प्रसङ्गात् ।

४ इत्यादि] अप्रतिसंवदिता एवोदयन्ते व्ययन्ते वा यतः सत्योऽप्यनुपलक्षिताः स्युः इति शेषः ।
८ इति] स्वापादिवत् ।
२२ त] प्रबोधवत् कारणरहितः ।
२२ र्वे] र्वं
२२ त] अहेतुकमिति ।
२४ नात्] पृथिव्यादिरेव तत्कारणं तर्हि ।

शक्यं हि वक्तुं यथा सूक्ष्मपृथिव्यादिभूतेभ्यः स्थूलतद्भूतभावः तथा जलादेः भूम्यादिभावस्या इति स्यात् § 1404

ननु यथा आत्मवत् पृथिव्यादयो भिन्नजातीयाः परस्परं कथं त- /ms
द्वदेवपृथिव्यादेः सलिलादिपर्याय इति चेत्; अत्राह--**पुद्गलद्रव्यम्** इत्यादि । रूपरसगन्धस्पर्शवद्द्रव्यं **पुद्गलद्रव्यं सूक्ष्मम्** । किं स्यात् ? इत्याह--**पृथिव्यादिव्यपदेशभाक् स्यात्** इति शेषः । अत्र आदिशब्देन जलादिपरिग्रहः । किं कृत्वा ? इत्याह--**आसाद्य** प्राप्य । किम् ? इत्यादि **स्वर** * **विवर्त्तमासाद्य** पृथिवीव्यपदेशभाक् । एवमन्यत्र योज्यम् । एतदुक्तं भवति--न पृथिव्यादयो भिन्नजातीया एकद्रव्यपर्यायत्वात् मृत्पिण्डादिवत् इति । § 1405

ननु प्रतीयमानपृथिव्यादिभ्यः किमन्यत् तद्व्यपदेशभागिति चेत्; न; स्थूलस्य सूक्ष्मपूर्वकत्वस्यापि अव्यभिचारात् पटवत् इति तन्तुसिद्धेः । एवमपि भवतु पृथिव्याः स्वयं रूपरसगन्धस्पर्शवत्याः तथाविधकारणानुमानम्, न जलाऽनलाऽनिलेभ्यः गन्धरसरूपविरहितेभ्यो यथासंभवं किन्तु तदनुरूपं कारणान्तरमनुमीयते चेत्; न; तत्रापि स्पर्शवत्त्वे सति गन्धाद्यनुमानाऽनिराकरणात् । किं पुनः तत् ? इत्याह--**पुनरन्यथा** इत्यादि । **पुनः** पश्चाद् **अन्यथा** अन्येन पृथिव्यादिविलक्षणप्रकारेण **बहुलं** परिणामि **लक्ष्यते** पुद्गलद्रव्यमिति । तदेव दर्शयति **यथा** इत्यादिना । **यथा** इत्ययमुदाहरणप्रदर्शने, **चन्द्रकान्तमणिः** खरत्वेन **पृथिवीस्वभावो द्रयविति** जलीभवति । कुतः ? इत्याह--**चन्द्ररश्मेः** । न तन्मणिः द्रवति उपलम्भाद् अपि तु तत्संसक्ता जलात्मकाः चन्द्ररश्मयः इत्येके । तेषां तद्भुतौ को
दोषः ? अदर्शनमिति चेत्; न; गन्धद्रव्यस्य सर्वदा सर्वदिक्षु भागानां /ms
गमनेऽपि तावत एव उपलम्भात्, तद्रश्मेश्चाप्यदर्शनं किन्न स्यात् ? *तदपरापरोत्पत्तिः न तन्मणेः इति किं कृतो विभागः ? **शुक्रशोणितं द्रवरूपं**
कललार्बुदादिक्रमेण **स्त्यादिपरिणामं याति** । किं भूतम् ? इत्याह— 286/mkj
**भस्म** इत्यादि । **भस्ममृत्तिकयोः** कृतद्वन्द्वयोः **आदिशब्देन** बहुब्रीहिः, अत्र आदिशब्देन पिण्डादिपरिग्रहः, पुनः अस्य **पर्यन्तशब्देन** स एव विधेयः । **तथैव** तेनैव विशिष्टौषधादिप्रयोगप्रकारेण **मुक्ताफलादि,** आदिशब्देन हिमादि परिगृह्यते **द्रवति** इति अनुवर्त्तते । यदि वा, पुद्गलद्रव्यं स्नेहविवर्त्तमासाद्य

---

२ स्यात्] वः स्यात्[[इति न पृथिव्यादीनां तत्त्वान्तरम् ।]] इति ।

४ देव] आत्मवदेव ।

५ पु] स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ।--त॰ सू॰ ५ । २३ ।

७ *] त्याह--**खर** इत्यादि । **खर**

१४ त्रापि] जलानलानिलादीनि गन्धरसरूपसहितानि स्पर्शवत्त्वात् पृथिवीवत् ।

१५ नु] वायुस्तावद् रूपादिमान् स्पर्शवत्त्वात् घटादिवत् ।...आपो गन्धवत्यः स्पर्शवत्त्वात् पृथिवीवत् । तेजोऽपि रसगन्धवत् रूपवत्त्वात् । --स॰ सि॰ ५ । ३ ।

१८ विति] द्रवति

२२ त] चन्द्ररश्मेः ।

२२ *] प्रतिक्षणं अपरापरचन्द्रश्मय उत्पद्यन्ते चेत्; मणिरपि अपरापर एवोत्पन्नोऽस्तु ।

२६ स] बहुब्रीहिः ।

**मुक्ताफलादिकं परिणामं याति** इति सम्बन्धः । अत्र **आदि**शब्देन स्तत-कादेः  गुटिकादिपरिणामो गृह्यते । **काष्ठादिकम्** आदिशब्देन तृणादिक-म् **अग्निसाद् भवति** । कुतः ? इत्याह--**अरणि** इत्यादि । **आदि**शब्दाद् विशिष्टद्रव्यादि**संयोगात्** । ततः स्थितम्--**पुद्गलद्रव्यम्** इत्यादि । § 1406

तर्हि तद्वत् पुरुषचेतनः तथा परिणमते न पुद्गलद्रव्यमिति; अत्राह--**न [पुनः]** नैव **चेतनो** ब्रह्मात्मा **चैतन्यं** स्वपरावभासित्वं **विहाय विपरिवर्त्तते** पृथिव्यादिरूपेण परिणमते । एतदुक्तं भवति--पुद्गलद्रव्यं यथा पृथिव्यादिरूपेण विपरिवर्त्तते तत्र तद्रूपाद्यन्वयदर्शनात्, तथा यदि पुरुषः तद्रूपेण विपरिव-र्त्तिता ; चैतन्यान्वयः तत्र प्रतीयेत । न चैवमिति । अचेतनस्तर्हि चेतनरूपेण परिणमत इति चेत्; अत्राह--**अचेतनः** पृथिव्यादिः **पुनः चेतनो भवन् सँल्ल-क्ष्यते** । **न पुनः** इत्यनुवर्त्तते, स ल्लक्ष्यत इति । अनेनैतद् दर्शयति—/ms यदि अचेतनः परिणामी चेतनः तत्परिणामः तत्र तद्रूपान्वयः स लक्ष्य-ते * । न च तदस्ति रूपादिरहितस्य अन्तःचेतनस्य परिस्फुरणात् । न च तत्र रूपादीनामनाविर्भावकल्पना श्रेयसी; भूतानामन्योऽन्यात्मनि लक्ष-णानाविर्भावकल्पने न लक्षणभेदेन *तद्व्यवस्थाकथनम युक्तं स्यात् । § 1407

उपसंहरन्नाह--**तद्** इत्यादि । यत एवं **तत्** तस्माद् **अयं** वावाकस्त्वं **पुद्गलद्रव्यलक्षणम्** एकसंख्योपपन्नम् **चतुर्धा** चतुर्भिः प्रकारैः **व्यवस्थापयन्** । केन ? इत्याह— **पृथिव्यादिभेदेन कथं स्वस्थः** भूतगृहीत इत्यर्थः । कुतः ? इत्याह--**विपर्यस्तबुद्धिः** । यथा चन्द्रमसमेकं द्वित्वेन व्यवस्थापयन् तथाविधबुद्धिः तथा अयमपि यतः । § 1408

ननु परचेतोवृत्तीनां दुरन्वयत्वात् तथाविधबुद्धिरयमिति कुतो ज्ञायते इति चेत्; अत्राह— **देवानांप्रिय** इत्यादि । देवानां मूर्खाणां प्रियो यतः । नहि असौ सत्तामात्रेण तन्मयः  अतिप्रसङ्गात्, अपि तु प्रमाणत्राणर-हितत्वोपदेशात् सुखसंवर्धितमतीनां तेषां प्रमाणविषये अप्रवेशात्, ततोऽसौ तथाबुद्धिः अवगम्यते । तथाविधतत्त्वोपदेशोऽपि तस्य कुतोऽवगम्यते इति चेत् ? अत्राह--**प्रत्यक्षस्य** इत्यादि । **प्रत्यक्षस्य** प्रमाणस्य प्रमेयस्य वा **अतीव लङ्घनाद्** अन्यथैव प्रतिपादनात् । किं पुनरयमेतदेव कुर्वन् अस्व-स्थः ? न; इत्याह--**चेतनेतरतत्त्वम् एकीकुर्वन्** । कथंभूतम् ? **उभयम् ?** अनेकशेषं पूर्ववदत्रापि । § 1409

---

२ कादेः ] सूतकादेः
८ पुरुषः ] पृथिव्यादिरूपेण ।
९ र्त्तिता ] विपरिवर्तेत
९ त्र ] पृथिव्यादिषु ।
११ स ] सँ
१२ रिणामः ] चेतने ।
१३ * ] सँल्लक्ष्येत
१४ च ] चेतने ।
१५ * ] पृथिव्यादिभूतचतुष्टयव्यवस्था ।
१५ म ] नं
१७ त्वं ] चार्वाकः स्वयं
२१ त ] विपर्यस्तबुद्धिः ।
२३ असौ ] चार्वाकः ।
२३ यः ] तत्प्रियः
२५ त ] विपर्यस्तबुद्धिः ।
२५ त्त्वो ] तत्त्वो
२५ देशोऽपि ] चार्वाकस्य ।

तदेवं मध्यावस्थायां चेतन एव चेतनीभवति इति साकल्येन विपक्षेऽनन्तरबाधकोपदर्शनेन सिद्धायां व्याप्तौ यत्सिद्धं तद्दर्शयन्नाह--**प्राणिनाम् इहजन्मनि** इत्यादि । प्राणा दश आगमपठिता विद्यन्ते येषां ते **प्राणिनः** तेषाम् । एतेन सर्वसम्बन्धिनाम् आद्यन्तचित्तानां धर्मित्वेन उपादीयमानानां प्रमाणादिसत्त्वेन अनुमानसिद्धत्वं दर्शयति, इतरथा प्रत्यक्षेण तेषामग्रहणाद् अनुमानस्य वा[ऽ]वचने हेतोः आश्रयासिद्धिः आशङ्क्येत । न च आत्मन एव तच्चित्ते तथा साधयितुमत्राभिप्रेत चित्तानि इति बहुनिर्देशात् । नापि एकत्र आत्मनि आद्यन्तयोः बहुचित्तसंभवः । ततः सूक्तम्--**प्राणिनाम्** इति वचनं सर्वसत्त्वाद्यन्तचित्तान् मानपरिच्छेद्यत्वज्ञापनार्थमिति । एवमपि तेषामनाद्यनन्तभूतानाम् आद्यन्तचित्तासंभव इति आश्रयासिद्धो हेतुः; यस्माद्धि न पूर्वचित्तमस्ति तद् आदिः, यस्माच्च नोर्थ तद् अन्त्यम्, न चैतत् जीवानाद्यनिबंधन त्वे युक्तमिति चेत्; अत्राह— **इहजन्मनि** अस्मिन् जन्मनि । **तावत्** शब्दः क्रमवाच्येव पूर्वपूर्वजन्मस्वपि तत्साधनक्रमप्रदर्शनार्थः । **आद्यन्तचित्तानि** । कथम्भूतानि तानि ? इत्याह--**चित्त** इत्यादि । **चित्तान्तरम् उपादानोपादेयभूतं** येषां तानि तथोक्तानि । भूतशब्दः प्रत्येकमभिसम्बध्यते । ततोऽयमर्थः--आदिचित्तानि चित्तान्तरोपादानभूतानि अन्त्यचित्तानि चित्तान्तरोपादेयभूतानि इति । यदि वा, **चित्तान्तरस्य उपादानोपादेयभूतानि** इति ग्राह्यम् । तथा हि आदिचित्तानि पूर्वभवमरणान्त्यचित्तान्तरस्योपादेयभूतानि, अन्त्यचित्तानि भाविभवाद्यचित्तान्तरस्य उपादानभूतानि । एवमपि *एवं वक्तव्यम् चित्तोपादानोपादेयभूतानि इति वक्तव्यं किमन्तरशब्देन भेदस्य उपादानोपादेयभूतवचनादेव सिद्धेः अन्यथा तदयोगात्, एकात्मवदिति चेत्; न; साख्यं प्रति सिद्धसाध्यतापरिहारार्थम् एवंवचनात् । सांख्यो हि सर्वत्र कार्यकारणयोरभेदैकान्तवादी चित्तोपादानोपादेयभूतानि इति वचने सिद्धसाध्यता मन्येत । तत्कुतः तानि तथाभूतानि ? इत्याह— **चित्तत्वात्**, विशेषस्य साध्यत्वात् सामान्यस्य साधनत्वात् न प्रतिज्ञार्थैकदेशाऽसिद्धो हेतुः इत्येके । विशेषयोः सामान्ययोर्वा एवं साध्यसाधनभावेऽपि नायं दोषः इत्यपरे । अन्यथा नित्यः शब्दः शब्दत्वात् इत्यादावपि स्यात् । अत्र दृष्टान्तमाह दर्शयितुम्--**यथा** इत्यादि । **यथा मध्यचित्तम्** इत्यर्थः । § 1410

/ms 287/mkj /ms

---

३ श] पंच वि इंदियपाणा मणवचिकायेसु तिण्णि बलपाणा । आणापाणप्पाणा आ+उगपाणेण होंति दस पाणा ।--गो॰ जीव॰ गा॰ १२९ ।

५ त्वेन] प्राणादिमत्त्वेन

५ तेषा] आद्यन्तचित्तानाम् ।

७ त्राभिप्रेत] तम्

९ चित्तान्] त्तानामनु

११ नोर्थ] नोऽन्तः

११ त्] आदिः अन्तश्च ।

१२ न] निधन

१९ भाविभ] जन्म ।

१९ *] एवं वक्तव्यम् इति निरर्थकं भाति ।

२१ सिद्धेः] भेदाभावे उपादानोपादेयभावासंभवात् ।

२५ त्वात्] सामान्यस्य च विशेषनिष्ठत्वात् न निरन्वयदोषोऽपि ।

२६ इत्येके] ननु प्रत्ययविशेषो धर्मी सामान्यं साध्यमिति न प्रतिज्ञार्थैकदेशता ।--प्र॰ वार्तिकाल॰ पृ॰ ३८७ । हेतु॰ टीकालो॰ पृ॰ ३९६ । प्रमेयर॰ १ । १ । स्या॰ रत्ना॰ पृ॰ ४१--४२ ।

ननु जैनस्य लोहलेख्यं वज्रं पार्थिवत्वात् काष्ठवत् इत्यादाविव न दृष्टान्तमात्राद् हेतुः गमकः, अपि तु अन्यथानुपपत्तेः, *स च अत्र, [अतः] आह--**अत्र** इत्यादि । **अत्र** हेतोः **पुनः** इति सौष्ठवे, **अन्यथा** साध्याभाव-प्रकारेण **अनुपपत्तिः** अघटना **अस्ति** । **एव** निपातेन मनागपि तदुपपत्तिः नास्ति इति वदति । कुतः ? इत्याह--**जन्म तस्य** इत्यादि । **जाते**वादौवा 288/mkj * अन्त्यतस्य **पूर्वम्** अतीतजन्म**न्यश्च** स्तनादिपानादिकत्रस्य * **स्मृतेर-नुबन्धात्** अविच्छेदात् । एतदुक्तं भवति--मरणान्त्यचित्तस्य तत्त्वं यदि उत्त-रजन्मादिप्रबोधाविनाभावि न भवेत्, तर्हि तत्र तदाहितसंकारवैधुर्ये जातस्य स्मृत्यनुबन्धः [न स्यात्] । मान्नपि पुरुषमात्रेण अन्येन कथमवगम्यते /ms परचेतोवृत्तीनां दुरन्वयत्वादिति चेत्; अत्राह--**भयादि** इत्यादि । **भयम् आदिर्यस्य** अभिलाषादेः तस्य **प्रतिपत्तेः** मुखविकारादिना निश्चितेः, अन्य-था कुतश्चित् परचेतोवृत्तिविशेषे प्रतिपत्त्यभावमुत्प्रेक्षामहे । न चैवम्, अतो वत्कुविकारादेः भयादिप्रतिपत्तिः ततः तदनुबन्धप्रतिपत्तिरिति । § 1411

एतेन **जातस्य पूर्वाभ्यस्तस्मृत्यनुबन्धात्** इत्यस्य हेतोः स्वरूपासिद्धिरपि प्रत्युक्ता । § 1412

ननु मध्यचेतसि चित्तत्वं यद्यपि चित्तान्तरोपादेयत्वसहितं दृष्टं तथापि आद्यन्तचेतसि तत्तथा न युक्तम्, अन्यथा प्रत्यग्नेर्ज्वालापूर्वकत्वदर्शनात् प-थिकाग्नेरपि पूर्वं कत्वं तत्त्वादनुमीयेत । व्यभिचाराशङ्का अन्यत्रापि इति चेत्; अत्राह--**पथिकाग्नेः** इत्यादि । **अनेन** इत्ययं शब्दः अन्ते करणात् **प्रत्यग्निवत्** इत्यस्य अनन्तरं यथास्थानं च द्रष्टव्यः । ततोऽयमर्थः— **पथिकाग्नेः** पथिक-सम्बन्धिनः पावकस्य, पथिकस्य अनवस्थायित्वेन तत्संबन्धित्वस्य परोक्ष-ताज्ञापनार्थम्, अथवा ज्वालान्तरपूर्वकत्वेतरत्वसंभवज्ञापनार्थं पथिकग्रहणम् तस्य हि अग्निः उत यद्यपि संभवति । **ज्वालान्तरपूर्वकत्वं** साध्यम्, अत्र हेतुः पथिकाग्नित्वात् इति द्रष्टव्यः । निदर्शनमाह--**प्रत्यग्निवद्** इति । क-श्चित् पथिकः शीतार्तो अरणिनिर्मथनाद् अन्यतो वा प्रज्वालिताग्निः निःशीतो भूतात् क्वापि गतः, पुनस्तत्रैव अपरः पण्डितमाना समागत्य ततोऽग्नेः प्रत्यग्निं प्रज्वाल्य अनुमानं करोति पथिकाग्नि[ः] ज्वालान्तरपूर्वकः तत्त्वात् /ms प्रत्यग्निवत् । न चैवम्, अतः **अनेन** भवदीयानुमानस्य व्यभिचार **इति** यद्

२ *] अन्यथानुपपत्तिविशिष्टो हेतुः ।
५ स्य] जातस्य[[तदहःसमुत्पन्नस्य बालकस्य ।
तुलना--पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसंप्रतिपत्तेः ।--न्यायसूत्र° ३ । १ । १९ ।]]
६ *] जातस्य
६ स्य] उत्पन्नस्य
६ श्च] न्यभ्यस्त
६ *] कं तस्य
९ पि] [[भवन्नपि स्मृत्यनुबन्धः ।]]भवन्नपि
१३ त्कु] क्त
१३ तः] स्मृत्यनुबन्ध ।
१७ प्र] अग्निसमुद्भूतद्वितीयाग्नेः ।
१८ पूर्वं] त[[ज्वालापूर्वकत्वम् ।]]त्पूर्व
१८ त] अग्नित्वात् ।
२२ त्व] अन्यपथिकाग्निपूर्वकत्वज्ञापनार्थम् ।
२३ स्य] पथिकस्य ।
२६ भूतात्] भूत्वा
२६ माना] मानी
२७ त्त्वात्] अग्नित्वात् ।

**व्यभिचारचोदनं तदनेन** अनन्तरग्रन्थेन **प्रत्युक्तम्** प्रकृते हेतुलक्षणभावाद् अन्यत्र विपर्ययात् । तमेव दर्शयन्नाह--**तेजःकारण** इत्यादि । **तेजसः कारणं** पुद्गलद्रव्यम् अनन्तरवर्णितम् **तत्पूर्वकत्वस्य तत्र** पथिकाग्नौ **[अ]विरोधात्** । विरोधाभावान्न ज्वालान्तरपूर्वकत्वमस्य, ननु  चेतने अभिहितनीत्या तत्पूर्वकत्वस्य अविरोध इति मन्यते । § 1413

अथ सर्वत्र सर्वदा सन्तु तदादिचित्तानि इष्टसाध्यानि ननु मरणान्त्यचित्तानि प्रमाणाभावात् । तर्हि *अर्वाग्भागदर्शिप्रत्यक्षम् इयतो व्यापारान् कर्त्तुं [समर्थम्] सन्निहितविषयबलोत्पत्तेः । लिङ्गाभावेन अभावात् नाप्यनुमानम् । चित्तत्वस्य भावालिंगाता वो  असिद्ध इति चेत्; न; *तत् कार्यम्, कारणम्, अनुभयं वा स्यात् ? तत्र उप— देयाभिमतात् प्रागेव भावात् न कार्यम् । स्नानादेः प्रागपि भवन् जलादिस्तत्कार्यम् इत्येके; तेषां *प्राप्यमर्थक्रियाजातं किं कुर्वाणं जलादेः कारणम् ? अकिञ्चित्करस्य तदयोगाद् अतिप्रसङ्गात् ।  न च अकारणं कार्यं युक्तम् । सत्ताम् इति 289/mkj
चेत्; ननु च अनुत्पन्नमसत् खरविषाणसमं कथं कस्यचित् तामुपजनयति ? स्वकाले सत्त्वाददोषः; कार्योत्पत्तेः प्रागपि तदा तत्सत्त्वे पूर्वभावित्वमेव कारणस्य अर्थादापतितं नानागतत्वम् । पश्चात् सत्त्वे प्रागेव उत्पन्ने कार्ये तदकिञ्चित्करत्वं कृतस्य करणाऽयोगात् । तत्र  कार्यम् । नापि कारणम्; अर्वाग्दर्शिना कार्यादर्शने तद्विशिष्टताऽविनिश्चयात् । तद्दर्शने अनुमानवैफल्यम् ।  न च तन्मात्रं लिङ्गम्; प्रतिबन्धवैकल्यसंभवात् । अनुभयस्य /ms
प्रतिबन्धाभावात् अलिङ्गत्वमिति । तत्राह--**सतः चेतनस्य** इत्यादि । **सतो** विद्यमानस्य **चेतनस्य** अन्त्यदशायाम् इति प्र[क्र]माद् एतल्लभ्यते । अनेन एतत् कथयति--मध्ये चेतनस्य अन्यस्य वा सत्त्वं भिन्नकार्यकारित्वेनेव उत्तरस्वपरिणामकारित्वेन व्याप्तं प्रतिपन्नम्, तदिदानीं यदि तदभावेऽपि स्यात् निःस्वभावत्वमिति कुतः कस्यचित् तत्त्वमन्यद्वा ? अन्यथा सर्वस्य व्याप्यस्य स्वव्यापकाभावेऽपि भावाशङ्कया अननुमानं जगत् स्यादिति । **चित्स्वभावेन** चिद्रूपेण **परिणमतो** विवर्त्तमानस्य **कारणान्तराऽनपेक्षत्वात्** । यस्मात् कारणात् उत्पद्यते असौ चेतनः तस्माद् अन्यत् कारणं तदन्तरम्, तत्र न विद्यते अपेक्षा यस्य तद्वा न अपेक्ष्यते इति तस्य भावाऽभावात्  **अत्र पुनः अन्यथानुपपत्तिः अस्त्येव** इत्यनेन सम्बन्धः । § 1414

---

४ स्य] पथिकाग्नेः ।
४ नु] नतु
६ नु] नतु
७ र्हि] नहि
७ *] अस्मदादिप्रत्यक्षम् ।
९ वो] भावाल्लिङ्गाभावो
९ *] चित्तम् ।
१२ *] भावि ।
१३ स्य] कारणत्वायोगात् ।
१३ त्ताम्] कुर्वाणम् ।
१४ त्] अविद्यमानम् ।
१४ चित्] सत्ताम् ।
१७ त्र] तन्न
१९ त] कारणमात्रम् ।
१९ स्य] कार्यकारण-उभयव्यतिरिक्तस्य ।
२३ त] उत्तरचित्तम् ।
२५ अ] अनुमानशून्यम् ।
२८ भावाऽभावात्] तस्य भावात्

ननु तदनपेक्षत्वेऽपि तद्रूपेण परिणामो न भविष्यति ? इत्याह--**स्वयम्** इत्यादि । **स्वयम्** आत्मना **अक्षेपेण** झटिति **विवर्तस्य उपपत्तेः** । एतदपि कुतः ? इत्याह--**अनैमित्तिक [त्वात्]** इत्यादि । निर्हेतुकस्य **अचेतनेच-त्** पृथिव्यादिव [त्] । परमाशङ्कते द्वेष यितुं **द्वितीय** इत्यादि । तत्र उत्तरमाह--**तदवश्यम्** इत्यादि । तस्य द्वितीयक्षणस्य नियमेन **भावात्** ।
§ 1415

तु स तनस्य * इत्यादि अनभ्युपगच्छतो दूषणमाह--**यदि** इत्यादि । **पुनः** इति पक्षान्तरद्योतने, **अन्त्यक्षणस्य** मरणचित्तस्य **नोत्तरीभवनशक्तिः** नोत्तरपरिणामसामर्थ्यम्, **अवस्तुत्वम्** अन्त्यक्षणस्य । तत् किं कुर्यात् ? इत्याह--**स्वोपादान** इत्यादि । स्व इत्यनेन अन्ते क्षणः परामृश्यते तस्य **उपादानप्रबन्धस्य अभावं साधयेत्** । कुतः ? इत्याह— **अर्थ** इत्यादि । २३७ **अर्थस्य** कार्यस्य [क्रिया] करणं **तल्लक्षणत्वाद् वस्तुनः** । तत्साम-र्थ्यं तल्लक्षणम्, तच्च सहकारिवैकल्यात् कार्याकारिणोऽपि तत्क्षणस्य अस्ति इति चेत्; अत्राह— **समर्थम्** इत्यादि । **समर्थम्** अन्त्यक्षणजातम् इति **न करोति च इत्येवं विरुद्धम्** । तथाहि— यदि समर्थम्; कथं न क-रोति ? न करोति चेत्; कथं समर्थम् ? अन्यथा नित्यं समर्थमपि सहकारिवैकल्यात् सर्वदा न कुर्यादिति मन्यते । नार्थक्रिया नापि त-त्सामर्थ्यं तल्लक्षणम्, अपि तु सत्तासम्बन्ध इति कस्मान्नाशङ्कितमिति चेत्;
290/mkj अव्यापकत्वात्, सामान्यादौ अभावात्, प्रतिषिद्धत्वाच्च । तर्हि तदुत्तरीभवन-शक्त्यभावेऽपि विजातीयकरणशक्तेर्न तदवस्तुत्वम् इत्याशङ्कनीयमिति चेत्; न; चार्थाकस्य तथा मताभावाद् भूतसमुच्छेदानभ्युपगमात् । अत एवोक्तम् **अचेतनवत्** इति । § 1416

ननु यथा चेतनस्य संसारे अवग्रहादयो न तत ऊर्ध्वं तथा मरणात् पूर्वं सोऽपि न पश्चादिति चेत्; अत्राह--**सामग्र्या जन्म** येषाम् **विसदृशकार्याणां** केषां **कादाचित्कत्वं** सुवर्णे कटकादीनामिव स्यात् **न पुन** * च **उत्तरीभव-नस्य** कादाचित्कत्वम् । **अचेतनवत्** इत्येतदत्रापेक्ष्यम् । न च अन्त्यचित्तानि चित्तान्तरोपादेयभूतानि इति साधयतः प्रत्यक्षबाधा पक्षस्य यथा अश्रावणः शब्दः इति साधयतः । अन्त्ये क्षयदर्शनादिति चेत्; अत्राह--**तत्** तस्माद् उक्तन्यायात् **एतत्** परेण उच्यमानम् **अन्ते** मरणाद् ऊर्ध्वं यच्चेतनस्य परेण

४ त्] तनवत्
४ द्वेष] दूष
७ *] सतश्चेतनस्य
१० अन्ते] अन्त्यः
१२ त] अर्थक्रियासामर्थ्यम् ।
१३ त] वस्तुलक्षणम् ।
१३ च] वस्तुलक्षणम् ।
१८ र्थ्यं] वस्तुलक्षणम् ।
१८ इति] वैशेषिकाभिमतम् । द्रव्यादीनां त्रयाणामपि सत्तासम्बन्धः...--प्रश० भा०, व्यो० पृ० १२१ ।
१९ सामान्यादौ] तेषां स्वतः सत्त्वात् सामान्यविशेषसमवायेषु सत्तासम्बन्धाभावात् ।
२१ चार्था] र्वा
२५ केषां] तेषां
२५ *] तु न
२८ अन्त्ये] अन्ते

**क्षयदर्शनम्** उपगतम् तद् **असिद्धम्** अनिश्चितम्, तत्र तत्क्षयाऽसिद्धेः । अदर्शनं पुनः प्राणभिन्मात्रस्य * तद्ग्रहणसामर्थ्यवैधुर्यात् । न च तददर्शनं पक्षबाधनाय अलम्, अन्यथा शब्दे नित्यत्वाऽदर्शनमपि तद्बाधकं स्यादिति /ms मन्यते । अतश्च तदसिद्धम् इत्याह--**मध्ये** जन्मन ऊर्ध्वं मरणात् प्राक् यत् **स्थितिदर्शनं तदपि** न केवलम् उक्तो न्यायः **स्थितिं प्रसाध्येत् अन्त्ये** * इति सम्बन्धः । कुतः ? इत्याह--**अव्यभिचाराद्** अविनाभावात् । तथाहि— यदि अन्ते स्थांतुर्न भवेत् भावो मध्येऽपि न भवेद् अविशेषादिति सौगतं मतम् । यदुक्तम्-- § 1417

*जातिरेव हि भावानां विनाशे हेतुरिष्यते ।
यो जातो न च विध्वस्तो नश्येत् पश्चात् सहेतव ॥ इति
|§ 1419

अथ मध्ये स्थितिः, तर्हि तत्र यत्तस्य रूपं तदेवापि इति पश्चात् स्थितिः केन वार्यते । एतदप्युक्तम्-- § 1420

*यद्येकस्मिन् क्षणे जातः तिष्ठेत् क्षणमिहापरम् ।
क्षणकोटीसहस्राणि ननु तिष्ठेत् तथैव सः ॥§ 1422

अथ मध्ये स्थास्नुरपि पुनः क्षरादि विपायिप्रत्ययोपनिपाते नश्यति इति मतिः; सापि न युक्ता; यतः तथाविधस्य गगनादिवत् तदयोगात् **सतोऽत्यन्तविनाशाऽसंभवात्** इत्युक्तत्वाच्च । § 1423

सौगतमतानुसारी भूत्वा कदाचित् चार्वाको मध्ये स्थितेरनुपलब्धिं मध्ये स्थितेरदर्शनस्य असिद्धेश्च कारणात्, न केवलम् अव्यभिचारात् **मध्ये स्थितिदर्शनम्** इत्यादिना सम्बन्धः । अनेन मध्ये स्थितिदर्शनस्य असिद्धता परिहृता । § 1424

ननु प्रसाधयतु मध्ये स्थितिदर्शनम् अन्ते स्थितिं चेतनस्य, *तां तु अचेतनरूपेण, ततो विरुद्धो हेतुः इति चेत्; अत्राह--**यदि** इत्यादि । **चेतनः** सन् **अचेतनाकारेण विवर्त्तेत** पुनः चेतनाकारेण विवर्त्तेत **यदि स्वाप-** 291/mkj **प्रबोधवत्** स्वापप्रबोधयोरिव **प्रेत्यभावसिद्धेः** मृत्वा पुनर्भवनसिद्धेः **कथं न**

---

१ त] अन्ते ।
२ *] भृन्मात्रस्य
२ वैधुर्यात्] अल्पज्ञत्वादिति ।
५ साध्ये] धये
५ *] अन्ते
७ स्थांतुर्न] स्थास्नुर्न
९ जा] उत्पत्तिरेव ।
१० व]
स[[उद्धृतोऽयम्...जातिरेव...नश्येत् पश्चात् स केन वा--षड्द॰ वृह॰ पृ॰ १२ ।]] केन वा
११ त्र] मध्ये ।
११ देवापि] तदेव अन्तेऽपि
१४ कोटी] टि
१५ रादि] क्षुरादि
१६ स्य] सदा स्थास्नोः ।
१६ योगात्] विनाशासंभवात् ।
२२ *] स्थितिम् ।

/ms कथञ्चिद् **अनवद्यं** स्यात् । किं तत् ? इत्याह--**अपर** इत्यादि । एतदभ्युपगम्य दूषणमुक्तम्, यावता परमार्थतो नैतदस्ति इति । **न पुनः चेतनः चैतन्यं विहाय** इत्यादिना उक्तं स्मारयन्नाह--**चेतनेतरयोः** इत्यादि । **चेतनो** जीवः **इतरो**ऽचेतनः पृथिव्यादिः तयोः **सङ्करश्च** एकत्र प्रसक्तिः **व्यतिकरश्च** परस्परविषयगमनं तयोः **प्रतिपत्तिः अयुक्तैव** । कथंभूतयोः ? इत्याह--**स्वभावसिद्धयोः** एकैकपरिहारेण स्वस्वरूपेण सिद्धयोः । यदि वा, स्वस्मात् समानजातीयाद् भावात् निष्पन्नयोः । कुतः ? इत्याह--**दृष्टस्य** तयोर्भेदस्य **हानेः** सर्वस्य प्रक्षयस्य सा नासतां दर्शयति--नीलादिसुखादिप्रत्यक्षस्यापि तदनुषङ्गात् । **अदृष्टस्य** प्रत्यक्षेण अविषयीकृतस्य तयोः सङ्करादेः **कल्पनाच्च** इति । अनेनापि परस्य प्रमाणान्त[र] प्रसङ्गं दर्शयति तदभावे तदयोगात् । § 1425

ननु भवतु अदृष्टकल्पनम् अप्रमाणकं तु न स्यात्, व्यवहारेण तदभेदसाधकस्य अनुमानस्योपगमात् । तच्च अनुमानम्--चेतनो भूतपरिणामः तत्स्वभावो वा सत्त्वादिभ्यो जलबुद्बुदवत् मदशक्तिवच्च इति । एतदेवाह--**जल** इत्यादिना । **जलस्य बुद्बुदैः** समानं वर्त्तते इति **तद्वत्** । के ? इत्याह--**जीवाः** । एतदुक्तं भवति--यथा सत्त्वादिसन्तो बुद्बुदा जलात्मकाः तत्रैव भवन्ति विनश्यन्ति [च] तथा जीवाः पृथिव्यादिषु इति **मदस्य** जातिकया **मन्त्या** तुल्यं वर्तते इति **तद्वत्** । किं तत् ? **विज्ञानम्** । इदमत्र तात्पर्यम्--यथा भतीकिवोदिनिः मदशक्तिः आत्मभूता अभिव्यज्यते, तत्रैव पुनः सा तिरोभवति तथा भूतैः विज्ञानम् । अत्रोत्तरमाह--**इत्येव*** /ms **परः** केवलम् **अर्कसा कटुकिमानं दृष्ट्वा गुडादावपि योजयति**--कटुको गुडादिः सत्त्वादिभ्यो गुडादिति । तदनेन यथा अत्र पक्षस्य प्रत्यक्षबाधनं तथा प्रकृतेऽपि इति दर्शयति । हेतुं दूषयन्नाह--**विज्ञप्तेः** इत्यादि । **विज्ञप्तेः** परिणामिचेतनायाः, **यदि साधयेत्** इति सम्बन्धः । किम् ? इत्याह—**भूत** इत्यादि । कुतः ? इत्याह--**सत्त्वोत्पत्ति** इत्यादि । केन दृष्टान्तेन ? इत्याह--**मदशक्त्यादि** इत्यादि । कस्मिन् सत्यपि ? इत्याह--**स्वालक्षण्यस्य** इत्यादि । अत्र आदिशब्देन पर्यायादिविशेषो गृह्यते, तत्प्रतिबन्धाभावं दर्शयति तस्य । दूषणमाह--**तत एव** सत्त्वोत्पत्तिकृतकत्वादेः **साधयति** इति सम्बन्धः । किम् ? इत्याह--**बुद्धि** इत्यादि । **बुद्धिश्च** प्रधानस्य आद्यः परिणामो महदाख्यः **चैतन्यं** तु पुरुषः तयोः **विवर्त्तः** परिणामः तस्य **अनतिक्रमम्** । केषाम् ? इत्याह--**भूतानामपि** न केवलम् अन्यस्य । कस्य

८ स्य] प्रत्यक्षस्य
८ सा] हानिः ।
१२ नु] चार्वाकः ।
१२ त] चेतनाचेतनयोरभेद ।
१६ न्तो] मन्तो
१७ काः] जले एव ।
१८ न्त्या] शक्त्या
१९ तीकिवोदिनिः] सती किण्वादिभिः
२० *] वं
२१ सा] अर्के
२२ त्त्वादिभ्यो] आदिपदेन उत्पत्तिमत्त्वकृतकत्वादयो ग्राह्याः ।
२२ गुडादिति] अर्कवत्

च ? इत्याह--**सुखादि** इत्यादि । **सुखादि स्वसंवेदनं** च तयोरिव **तद्वत्** इति । कः ? इत्याह--**परोऽपि** सांख्यः--**तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि** सांख्यका° २१ इति वचनात् । पुरुषाद्वैतवादीव **पुरुष एव इदम्** ऋक्° १० । ९० । २ इत्याद्यभिधानात्, न केवलं चार्वाक एव इति **अपिशब्दः** * **इति** हेतोः **विरुद्धाऽव्यभिचारी सत्त्वोत्पत्तिकृत-** 292/mkj **कत्वादिः** इति विभक्तिपरिणामेन सम्बन्धः, विरुद्धं साध्यं न व्यभिचरति एवंशीलः चैतन्यभूतपरिणामवत् तेषामपि अन्यपरिणामप्रसाधनात् । यदि वा, विरुद्धेन साध्येन [अ]व्यभिचारी तदविनाभावी विरुद्ध इति यावत् । तथाहि--विज्ञप्तेः सत्त्वादि मध्यावस्थायाम् अनन्तरोक्तन्यायाद् विपक्षसद्भावबाधनात् चेतनोपादेयत्वाव्यभिचारि प्रतिष्ठापितं यथा च अन्तर्व्याप्तौ /ms असिद्धायां बहिर्व्याप्तेरकिञ्चित्करत्वं तथा न सिद्धायामपि इति । यद्वक्ष्यति--प्र मा ण सं ग्र हे--**भविष्यति आत्मा सत्त्वात्** प्रमाणसं° पृ° १०४ तत्र च न अचिद्रूपेण; अनिष्टापत्तेः साधनवैफल्याच्च । नापि चिद्रूपेण; तत्साधने पृथिव्यादावपि सद्भावे न तद्व्यभिचारी विशिष्टस्य हेतुत्वात् । इदमपरं व्याख्यानम्— **तत एव** इत्यादि । **भूतानामपि** इति, अयमपिशब्दो भिन्नक्रमः **विरुद्धाऽव्यभिचारी** इत्यस्य अनन्तरं द्रष्टव्यः । ततोऽयमर्थो न केवलं विरुद्धाऽव्यभिचारी किन्तु व्यभिचार्यपि । विज्ञप्तेर्मध्यदशायां चैतन्यविवर्ताऽनतिक्रमेऽपि सत्त्वोत्पत्तिकृतकत्वादेर्दर्शनात् । § 1426

**इति** इत्यादिना उपसंहारमाह--**इत्येवम्** अनन्तरप्रकारेण **मिथ्याभिनिवेशाद्** असत्याऽऽग्रहात् **प्रमाणप्रमेयव्यवस्थाम् अतिलङ्घयेत् प्रमाणस्य** प्रमाणत्वस्य, भावप्रधानत्वात् निर्देशस्य, **व्यवस्था** विशद एव अभ्रान्त एव ज्ञाने स्थितिः ताम् **अतिलङ्घयेत्** अतीव प्रलयं नयेत् । तथाहि— भूतेभ्योऽत्यन्तमभिन्नं चैतन्यं भिन्नं पश्यत् प्रत्यक्षं यदि प्रमाणम्; द्विचन्द्रादिज्ञानं कथं न भवेत् यतो लौकिकी प्रत्यक्षतदाभासव्यवस्थामनुसरन् लौकायतिकः स्यात् ? अथ अप्रमाणम्; द्विचन्द्रादिज्ञानवत् सर्वमविशेषेण भवेद् भूतेभ्योऽभिन्नस्य स्वरूपस्य ततो भिन्नस्य सर्वेण ग्रहणात् । नहि किञ्चिद्विज्ञानम् आत्मानं रूपाद्यात्मकं प्रत्येति सारूप्यनिषेधात् । तथापि तस्य तथा प्रतीतिकल्पने सर्वस्य सर्वदर्शित्वकल्पने [ऽ]लौकायतिकं जगत् स्यात् । § 1427

किं च, तदात्मकत्वेन सर्वस्य ज्ञानस्य अवभासने चार्वाकचर्विता स- /ms र्वविप्रतिपत्तिः इति किं शास्त्रप्रणयनेन ? नहि नीलादिकं पश्यन्तं प्रति

---

१ च] कस्येव
२ कात्] एकादशेन्द्रियपञ्चतन्मात्रासमूहरूपात् षोडशकगणात् ।
३ वादीव] दी वा
५ *] रूपरसगन्धस्पर्शशब्द लक्षण पञ्चतन्मात्राभ्यः ।
१० च] पक्ष एव साध्यसाधनयोर्व्याप्तिरन्तर्व्याप्तिः । तुलना--अन्तर्व्याप्तावसिद्धायां बहिरङ्गमनर्थकम् प्रमाणसं° पृ° १११ ।
११ था] न इति निरर्थकम् ।
२३ भिन्नं] अत्यन्तभिन्नं चैतन्यमभिन्नं
२४ वेत्] प्रमाणम् इति सम्बन्धः ।
२४ लौकिकी] कीं
२७ त्येति] तदाकारतानिराकरणात् ।

तदुपदेशः अर्थवान् । भ्रान्तिव्यवच्छेदार्थं तदिति चेत्; न; भ्रान्तिबुद्धेरपि तदात्मकत्वेन अवभासने तदवस्थो दोषः, ततः ततोऽभिन्नस्य स्वरूपस्य भिन्नस्य ग्रहणात् किन्नामाभ्रान्तं यत् प्रत्यक्षं प्रमाणं स्यात् ? भूतात्ममात्रे अभ्रान्तमिति चेत्; स्यादेतदेवं यदि तन्मात्रस्य कुतश्चित्सत्त्वं प्रतीयेत, दर्शनस्य तददर्शनेन व्यभिचाराद्, अत्रापि बाधकस्य दुर्लभत्वात् । § 1428

यदि तर्हि तद् भूतेभ्यो भिन्नमवभासते तथैव सत् इत्येके । तथापि तस्य ततोऽभेदे [न] कस्यचित् कुतश्चिद् भेद इति न प्रत्यक्षप्रमाणव्यवस्था तत्प्रमेयव्यवस्था वा इत्यपरे । § 1429

अपरस्य तु दर्शनम्--सत्यम्; तद्भूतेभ्यः कारणत्वेन अभिमतेभ्यो भिन्नं तथाऽवभासनात्, कार्यस्य कारणात् भेदाच्च, तथापि यथा पार्थिवतन्तुभ्यः पटो जायमानो भिन्नोऽपि पार्थिव एव तथा चैतन्यं भूतात्मकशरीराद् भूतात्मकम् इति; तदसत्यम्; यतो नहि यथा रूपादित्वेन तन्तुपटयोः साधर्म्यं
293/mkj तथा भूतचेतनयोः,* अरूपादित्वात् चेतनस्य । तत्रापि तत्कल्पने न प्रत्यक्षम्, साधनान्तरनिषेधात् । नानुमानम्, अन्यथा प्रत्यक्षमेव प्रमाणं नापरम् इति प्रमाणव्यवस्थामतिलङ्घयति सत्त्वादेः पृथिवीदृष्टान्तेन चेतते रूपादिमत्त्वसाधने तत एव भूतानां प्रत्येकं तत्साधनात् प्रमेयव्यवस्थाम् अतिलङ्घयति । § 1430

**जीवे तावत् नास्तिक्यं मिथ्यादर्शनम्** इति व्याख्यातम्, संप्रति **अन्यत्र**
/ms **जीवाभिमानश्च** इत्येतद् व्याख्यातुकाम आह-- **तथा च** इत्यादि । § 1431

...15 तथा चात्मा गुणैः कर्त्ताऽविकार्यप्यर्थान्तरैः ।
भोक्तेति मतं मिथ्या व्यापकादेशकल्पना ॥ १५
॥§ 1433

स्वतः प्रवर्तमानस्यैवानेकरूपस्य परोपकारसंभवात् । तद्विहाय पुनरविकारिण एव प्रयत्नादृष्टसमवायात् कर्तृत्वं पुनः सुखदुःखादिसमवायात् भोक्तृत्वमिति बन्ध्यासूनोर्विक्रमादिगुणसम्पद्वक्तुमुपक्रमते । परिणामो वस्तुलक्षणम् । तथा परो जीवस्य तत्त्वं चैतन्यसुखदुःखादिपरिणामकर्तृत्वभोक्तृत्वलक्षणं चेतनः पुरुषः स्वयं स्वभावतः अकर्त्ता दर्शनात् भोक्तेति विभजते । प्रतिपन्नकार्यकारणात्मनोऽचेतनस्य प्रधानस्य तद्वृत्तिरिति सुख...। स्वतः प्रवर्तमानस्यैव शरीरोपकारसंभवात् । § 1434

**तथा** तेनैव प्रकारेण **गुणैः** प्रयत्नाऽदृष्टादिलक्षणैः करणैः कृत्वा **आत्मा कर्त्ता** । किंभूतैः ? **अर्थान्तरैः** ततोऽत्यन्तं विभिन्नैः । किंभूतोऽपि ? इत्याह-

४ दि] भूतात्ममात्रस्य ।
११ रीराद्] जायमानं भिन्नमपि ।
१३ *] साधर्म्यमस्ति ।
१४ म्] प्रमाणं साधकमस्ति ।
१५ ते] चेतने
१६ त] सत्त्वादिभ्यः ।
३० त] आत्मनः ।

-**अविकार्यपि** अनाधेयाऽप्रहेयातिशयोऽपि **इत्येवं मतम् मिथ्या तप्रा** **गुणै**र्बुद्ध्यादिभिः **अर्थान्तरैः आत्मा अविकार्यपि** सुखाद्यनुभवरूपतया गगनवदपरिणतोऽपि **भोक्ता** इति **मिथ्या** युक्तिविरोधात् । एवं वैशेषिकादेः अन्यत्र जीवाभिमानं प्रदर्श्य सांख्यस्य दर्शयन्नाह— **भोक्ता** इत्यादि । तत्रायमर्थः--गुणैः सत्त्वरजस्तमोभिः कारणभूतैः अर्थान्तरैः प्रधानाश्रितैः आत्मा पुरुषः **भोक्ता** तदुपदर्शितानामर्थानाम् अनुभविता अविकार्यपि तत्साक्षात्करणपरिणामरहितोऽपि **इति मिथ्या** । नहि तथाऽपरिणतं तथा भवति, विप्रतिषेधात् । सदा तत्स्वभावत्वे जाग्रत्सुप्ताद्यविशेषः । सति दर्शने सतो दृश्यस्य अदर्शनायोगात् । तदाविर्भावतिरोभावकल्पनापि अविकारिणो न युक्ता । एतेन पुरुषान्तरबुद्ध्यर्पिताकारस्य सर्वस्य सर्वैर्दर्शनम् उक्तम् । अदृष्टं न दर्शनस्य नियामकम् एकरूपत्वात्तस्य । नापि दृश्यस्य निःस्वभावतापत्तेः । न च समानदर्शनानां कस्यचिद् दृश्यंद्य यद्य दृष्यं दृष्टमिति । तथा भोक्तापि सन्नकर्त्ता इति मिथ्या, भोक्तुः अकर्तृत्वविरोधात्, सकलशक्तिविरहलक्षणत्वाद् अकर्तृत्वस्य । अधुना तयोः साधारणं मिथ्यात्वं दर्शयन्नाह--**व्यापक** इत्यादि । **व्यापकस्य** आत्मनो**ऽदेशकल्पना** निरंशत्वकल्पना **मिथ्या** तयोः 294/mkj/ms विरोधात् इति निरूपयिष्यते । **व्यापकादेर्विकल्पन्त** इति क्वचित् पाठः । अत्र **आदिशब्देन** निरंशत्वादिपरिग्रहः, सोऽपि मिथ्या एकत्र प्रमाणाभावाद् अन्यत्र देहाऽव्यापकत्वप्रसङ्गात् । § 1435

**स्वतः** इत्यादिना कारिकार्थमाह--**स्वत** आत्मना **प्रवर्तमानस्यैव** पूर्वाकारपरिहाराऽजहद्वृत्तमुत्तरं परिणामम् अनुभवत एवा**नेकरूपस्य परोपकारसंभवात्** परेषाम् आत्मनो भिन्नानां बुद्ध्यादीनाम् उपकारो जनम् अथवा परैः सहकारिभिः उपकारः अतिशयो वा तत्तस्य * संभवात् कारणात् **तद्विहाय** तत् स्वतः प्रवर्त्तमानं वऽतुस्त्वुत्यत्का **पुनरविकारिण एव** कूटस्थनित्यस्यैव **आत्मनो** जीवस्य **प्रयत्नाऽदृष्टसमवायात्** सकाशात् **कर्तृत्वं पुनः** पश्चात् प्रयत्नाऽदृष्टाकृष्टेष्टपदार्थप्राप्त्यनन्तरं **सुखदुःखादिसमवायाद् भोक्तृत्वम् इत्येवं व्यासूनो विक्रमादिगुणसम्पदं वक्तुम् उपक्रमते** नैयायिकः । एतदुक्तं भवति— यथा बन्ध्यासुतस्य परोपकाराऽसंभवात् न विक्रमादिगुणसंपत्कीर्त्तनं न्याय्यं तथा अविकारिणः परोपकाराऽसंभवात्

---

१ म्] नैयायिकस्य ।
१ प्रा] तथा
८ त्वे] दर्शनस्वभावत्वे ।
९ दा] कदाचिदाविर्भावः कदाचिच्च तिरोभावः ।
९ अविकारिणो] कूटस्थनित्यस्य पुरुषस्य सदैकरूपत्वात् ।
११ स्य] अदृष्टस्य ।
१२ दृष्यं] दृश्यमन्यस्यादृश्यं
१४ स्य] भुजिक्रियायाः कर्तुरिव च भोक्तृत्वात् ।
१४ योः] नैयायिकसांख्ययोः ।
१५ त] व्यापकत्व-निरंशत्वयोः ।
१६ न्त] ल्पना
१७ ए] सर्वगतत्वपक्षे ।
१८ अ] निरंशत्वे ।
२१ म्] जननम्
२२ *] तस्य
२३ त्का] वस्तु मुक्त्वा
२६ व्यासूनो] बन्ध्यासूनो
२८ प] परकृतस्य उपकारस्य आधानायोगात् ।

प्रयत्नाऽदृष्टयोरभावात् न तत्समवायात् कर्तृत्वं न्याय्यम्, तदभावात् तत्कुतः ? सुखदुःखादिविज्ञानाऽभावात् तत्समवायाद् भोक्तृत्वमपि तादृगेव इति । प्रयत्नाऽदृष्टयोः सहवचनं तयोः कार्यकारणभावाऽभावप्रदर्शनार्थम् । परेण हि प्रयत्नविशेषाद् अदृष्टः, तस्माच्च प्रयत्नविशेष इति इष्यते । तत्र अविकारिण एकस्याप्यनुत्पत्तौ द्वितीयाभावस्य सुलभत्वात् । दृष्टान्तदार्ष्टान्तिकभावाऽभाव-प्रदर्शनार्थं वा--तेन हि प्रयत्नस्य दृष्टान्तत्वम् अदृष्टस्य दार्ष्टान्तिकत्वम् इष्यते /ms । तद्यथा--प्रयत्नसमानधर्मेण हि देवदत्तगुणेन तदुपकारकाः पश्वादयः समाकृष्टाः कार्यत्वे सति तदुपकारकत्वात् ग्रासादिवत् इति; तत्र प्रयत्नस्य अविकारिगुणत्वनिषेधे कुत एव अदृष्टस्य तद्गुणत्वम् इति ? § 1436

ननु मा भूद् बन्ध्यासूनोः अत्यन्तमसतो विक्रमादिगुणसम्यगव्यावर्णनम् आत्मनस्तु अविकारिणोऽपि सत्त्वात् कर्तृत्वादिव्यावर्णनमुपपन्नमिति चेत्; अत्राह--**वस्तु** इत्यादि । **वस्तुनो** भावस्य **लक्षणं** स्वभावः । किम् ? इत्याह--**परिणामः** । *तदभावे वस्तुत्वाऽयोगात् । तल्लक्षणं वस्तुनो **विहाय पुनः अविकारिण एव** वस्तुलक्षणपरिणामरहितस्यैव अवस्तुन एव इत्यर्थः, लक्षणनिवृत्त्या लक्ष्यनिवृत्तेरवश्यंभावात् । शेषं पूर्ववत् । § 1437

एवं नैयायिकमतं निराकृत्य कापिलमतं निराकुर्वन्नाह--**तथा** इत्यादि । **तथा** तेन प्रकारेण **परः** सांख्यः **जीवस्य** आत्मनः **तत्त्वं** स्वरूपं **चैतन्य-सुखदुःखादिपरिणाम कर्तृत्वभोक्तृत्वलक्षणं विभजते** विलभते । किं गजे व कथम् ? इत्याह--**प्रतिपन्न** इत्यादि । **प्रतिपन्नः** कथञ्चिदभेदेन आत्मसात्कृतः 295/mkj **कार्यस्य** उत्तरोत्तरस्य महदादेः **कारणस्य** पूर्वपूर्वस्य **आत्म** * स्वभावो येन तस्य । कस्य ? इत्याह--**प्रधानस्य** । किं भूतस्य ? इत्याह **अचेतनस्य** इति । **तस्य** सुखदुःखादि **वृत्तिः** तत्परिणतिः **इति** । **प्रतिपन्न** इत्यादिना प्रधानवद् यदि पुरुषस्यापि प्रतिपन्नकार्यकारणात्मता को दोषः स्याद् येन तस्य अविकारित्वं कल्प्यते ? न च दोषमन्तरेण तत्त्यागः अप्रेक्षाकारितापत्तेः /ms । स्यात् प्रत्यक्षादि वा वा दोषो यदि अविकार्यस्या प्रतीयेते दर्शयति **सुख** इत्यादिना कृतोत्तरत्वम् । कृतोत्तरं ह्येतत्--**स्यात्पर्यायः पृथिव्यादेः** सिद्धिवि° ४ । १४ इत्यादिना । § 1438

---

१ त] तल्लक्षणकर्तृत्वाभावात् परोपकारः कुतः ।
४ अविकारिण] आत्मनः ।
६ तेन] नैयायिकेन ।
७ गुणेन] अदृष्टेन ।
८ इति] देवदत्तविशेषगुणप्रेरितभूतकार्याः तदुपगृहीताश्च शरीरादयः कार्यत्वे सति तदुपभोगसाधनत्वात् गृहवदिति ।--प्रश° किरणा° पृ° १४९ ।
९ स्य] अविकार्यात्मगुणत्वम् ।
१० ग] सम्पद्
१३ *] परिणामाभावे ।
१८ व] किं वत्
२० *] आत्मा
२१ स्य] प्रकृतितत्त्वस्य ।
२२ दुःखादि] देः
२३ ता] स्वीक्रियेत ।
२४ येन] पुरुषस्य ।
२५ वा] बाधा
२५ स्या] र्यत्वमस्य
२५ तीयेते] येत

ननु स्यादेवं यदि चेतनाः सुखादयः सिद्धाः स्युः, न चैवमिति चेत्; कथं पुरुषः चेतनः ? अभ्युपगमात्, सोऽयम् अन्यस्य सुखादावपि । न चास्य स्वपरसम्बन्धित्वकृतो विशेषः; तदकिञ्चित्करत्वात् । एतेन आगमात् इति चिन्तितम् । यदि पुनः स्वयम् आत्मनो ग्रहणात् स चेतनः; सुखादिरपि स्यात् । नहि तस्यापि पर एव साक्षात्कारी कश्चित् । पुरुष इति चेत्; तस्यापि तथा अन्यकल्पने अनवस्थितिः । अपरस्याऽदर्शनम् उभयत्र । अचेतनप्रधानपरिणामत्वात् पृथिव्यादिवद् अस्वग्रहणात्मकाः सुखादयः; प्रत्यक्षेण पक्षबाधनं शब्दाऽश्रावणत्ववत् । कथं वा तत्परिणामाः ते इत्यपि चिन्त्यम् । अनात्मग्रहणात्; अन्योऽन्यसंश्रयः । उत्पत्त्यन्यत्वादेः * घटादिवदचेतनाः सुखादय इत्येके; तत्र सत्त्वात् तद्वत् पुरुषोऽप्यचेतनः स्यात् । तत्र यथा सत्त्वाऽविशेषेऽपि किञ्चित् चेतनम्, अपरम् *अन्यथा, तथा उत्पत्त्याद्य विशेषेऽपि स्यात् । अत्र अन्ये हेतोः असिद्धतामुद्भावयन्ति; तन्न; अन्यथाभावस्य उत्पत्त्यादिव्यपदेशात्, तस्य सांख्यैरपि अङ्गीकरणात् अन्यस्य तद्व्यपदेशार्हस्य प्रमाणतः सौगतस्यापि असिद्धेः । ततः सुखादेः चेतनत्ववत् चेतनपरिणामत्वमुक्तमिति मन्यते । **चेतनः पुरुषः स्वयम्** आत्मना **अकर्त्ता** केवलं प्रधानकर्तृत्वारोपाद् उपचारेण कर्त्ता इत्युच्यते इति **स्वयम्** इत्यनेन दर्शयति, **स्वभावतः** स्वरूपतः न उपचारतः । **दर्शनाद्** दर्शितविषयस्य साक्षात्करणाद् **भोक्ता इत्येवं जीवस्य तत्त्वं विभजते** । एवं मन्यते भोक्तृत्ववत् कर्तृत्वमपि बुद्धिपूर्वं चेतनस्यैव युक्तं नेतरस्य; अन्यथा /ms तत एव सकलपुरुषार्थसिद्धेः पुरुषकल्पना कमर्थं पुष्णाति । § 1439

**स्वत** इत्यादिनैव **व्यापको देश कल्पना मिथ्या** इति च व्याख्यातम् । तथाहि--**स्वत** आत्मना **प्रवर्त्तमानस्यैव** युगपत् सर्वशरीरावयवान् स्वावयवैः व्याप्नुवतः **परस्य शरीरोपकारो** धारणादिः तस्य **संभवान्न** निश्रा देशस्य सौगतकल्पिताविभागचित्तवद् इति । एतच्च चू र्णौ लघ्वादे जीवसिद्धौ शास्त्रकृता चिन्तितम् अवधार्यम् । एतदपि कुतः इत्याह--**अवस्तु लक्षणम्** इत्यादि । [परिणामः] सह क्रमेण वा अन्यथाभावो भावलक्षणम् । शेषं पूर्ववत् । § 1440

---

२ म्] जैनस्य ।
२ चास्य] अभ्युपगमस्य ।
४ म्] जैनागमे सुखादेश्चेतनत्ववर्णनात् ।
४ णात्] पुरुषः ।
७ यः] इति चेत् ।
८ ते] सुखादयः ।
९ णात्] आत्मत्वेनाग्रहणात् ।
९ यः] सति सुखादेः आत्मत्वेनाग्रहणे अचेतनप्रधानपरिणामसिद्धिः, तत्सिद्धौ च अनात्मग्रहणसिद्धिरिति ।
९ *] उत्पत्तिमत्त्वादेः
१० त्र] तन्न;
१० त्वात्] पृथिव्यादिवत् ।
११ म्] पृथिव्यादि ।
११ *] अचेतनम् ।
१२ त्याद्य] उत्पत्तिमत्त्वाद्य
२० था] बुद्धिमतः प्रधानादेव ।
२१ देश] कादेश
२३ रीरो] शरीरस्य उ
२३ निश्रा] वात् मिथ्या अ
२३ स्य] निरंशस्य ।
२४ घ्वादे] [[लटपिपीलिकादेः त्रसजीवस्य ।]]लटादेः
२५ सिद्धौ] अकलङ्कदेवेन ।
२५ स्तु] वस्तु

296/mkj

ननु यथा चरमक्षणः अनर्थक्रियाकार्यपि परार्थक्रियाकारिसाम्यात् [सन्] तथा आत्मापि स्यात्; तन्न युक्तं **तद्विहाय** इत्यादि इति सांख्य-यौगाः; तत्राह--**अन्त्य** इत्यादि । § 1441

...16 अन्त्यचित्तक्षणेवात्मा भावश्चेत् कारको यतः ।
स्यादभावस्ततस्तद्वदभावेनाविशेषतः ॥ १६ ॥ § 1443

नित्यस्यात्मनः अन्त्यबुद्धिक्षणस्य च स्वयमकिञ्चित्करस्यानर्थक्रियाकारिणः कुतश्चित्कारकादिसाधर्म्याद् वस्तुत्वे पुनः अकारकत्वादेव व्यक्तमवस्तुत्वम् अवस्तुसाधर्म्यात् । § 1444

**अन्त** श्चासौ **चित्तक्षणश्च** स **इव आत्मा** पुरुषोऽकारकः कार्यमकुर्वन् **भावो** वस्तु **स्याद्** भवेत् । कुतः ? **कारको यतः**, अन्येन कारकेण समानधर्मा **यतः** । **चेत्** शब्दः पराभिप्रायद्योतकः । अत्र दूषणमाह--**अभावस्त्वच्छः** * **स्यात् आत्मा** इति सम्बन्धः । ततः [तद्वत्] अन्त्यचित्तक्षणाद् **अभावेन** नीरूपत्वेन **अविशेषतो** विशेषाऽभावात्, जैनान् प्रति साध्यसमो दृष्टान्त इति मन्यते । § 1445

दृष्टान्त-दार्ष्टान्तिकौ एकेन तलप्रहारेण अपहस्तयन्नाह--**नित्य** इत्यादि । **नित्यस्य** अविकारिण **आत्मनः अन्त्यबुद्धिक्षणस्य** सौगतकल्पितस्य **च** इति समुच्चये । **स्वयं न किञ्चित्करस्य अनर्थक्रियाकारिणः कुतश्चिद् वस्तुत्वे** /ms अङ्गीक्रियमाणे । कुतः कुतश्चिद् ? इत्याह— **कारकसाधर्म्याद्** इति । कारकेण साधर्म्यात् ज्ञेयत्वादिलक्षणाद् **आदि**शब्देन वस्तुत्वादिपरिग्रहः । § 1446

ननु ज्ञेयत्वं स्वविषयज्ञानजनकत्वम्, अतः तच्चेत् तस्यास्ति; **स्वयम् अकिञ्चित्करस्य** इति विरुध्यते । वस्तुत्वादिसाधर्म्याच्च वस्तुत्वसाधने तदेव साधनं साध्यं च प्रसक्तम् । तत्र ज्ञेयत्वादिभावे व यद्वक्ष्यति--**अवस्तुसाधर्म्यात्** इति; तदपि न सङ्गतम्, खरशृङ्गादिना साधर्म्याभावादिति चेत्; न; अन्यथाऽभिप्रायात् । तद्यथा, यथाहि--परेण अन्त्यचित्तक्षणस्य आत्मनो वा स्वयमकिञ्चित्करस्यापि वस्तुत्वं साध्यते कारिकाभिमतवत् केनचिद् उभयत्र विद्यमानेन धर्मेण, तदा हेतोरस्य असिद्धतोद्भावनार्थमाह--**पुनः** इत्यादि । **पुनः** अस्य प्रयोगस्य अनन्तरम् **अकारण त्वादेव** कारकसाधर्म्याऽभावादेव न हेत्वन्तरात् इति एवकारार्थः । न हि स्वयमकिञ्चित्करस्य केनापि धर्मेण

९ अन्त] अन्त्य
१२ *] अभावस्तुच्छः
१२ णाद्] णवद्
२१ त] ज्ञेयत्वं ।
२३ व] च
२५ रेण] नैयायिक-सौगतादिना ।
२६ कारि] र
२८ ण] क

कारकसादृश्यं सदपि ज्ञातुं शक्यम्, तद्धर्मज्ञानोपायाऽसंभवात् । ततः किम् ? इत्याह--**व्यक्तं** यथा भवति तथा **अवस्तुत्वम्** वस्तुत्वसाधनाभावः प्रकृतस्य इति । इदं तु निश्चितं स्याद् इत्याह--**अवस्तु** इत्यादि । **अवस्तुना** खरविषाणेन **साधर्म्याद्** अकिञ्चित्करत्वसादृश्यात् **व्यक्तमवस्तुत्वं** निःस्वभावत्वम् । यदा परोऽकिञ्चित्करस्यास्य वस्तुत्वसाधने कल्पितं कारकसाधर्म्यमिच्छति तदा अकारकत्वादेव इत्यादि प्रतिप्रमाणमुच्यते । § 1447

अन्त्यचित्तक्षणस्य अकिञ्चित्करस्य अवस्तुसाधर्म्यादि वस्तुत्वे साध्ये अकारकत्वादेव इत्यस्य हेतोः परोपगतेन न्यायेन साध्याव्यभिचारं दर्शयन्नाह--**सत्ताम्** इत्यादि । § 1448

297/mkj

...18 सत्तां व्याप्नोति चेत्कार्यसत्तैवार्थक्रिया स्वयम् ।
क्रमाक्रमाभ्यां कूटस्थात् स्वनिवृत्तौ निवर्तयेत् ॥
१८ ॥§ 1450

तत्सत्ताव्यतिरेकेण नार्थक्रियां प्रेक्षामहे । सा पुनः क्रमयौगपद्याभ्यां वस्तुसत्तां व्याप्नुयात् अन्त्यचित्तक्षणात् नित्याद्वा स्वयं व्यावर्तमाना तत्सत्तां निवर्तयेत् । अव्यापकव्यावृत्तौ व्यावृत्त्यनियमात् । सा च...कथमव्यभिचारी सत्त्वादिहेतुः यतः क्षणिकमेव परमार्थसत् सिध्येत् । § 1451

**सत्तां** विद्यमानतां **व्याप्नोति चेत्** यदि । किम् ? इत्याह--**अर्थक्रिया** /ms **स्वयम्** आत्मना । काऽसौ अर्थक्रिया ? इत्याह--**कार्यसत्तैव** तत्कारणसामर्थ्यम्, अस्य निरूपयिष्यमाणत्वात् । साऽपि अर्थक्रिया **क्रमाक्रमाभ्यां** व्याप्ता, **चेद्** इत्यनुवर्त्तते, **व्याप्नोति** इत्यस्य कृतप्रत्ययपरिणामस्य अत्र सम्बन्धः । **कूटस्थाद्** अचलात् नित्यात् **स्वनिवृत्तौ सत्तां निवर्त्तयेद् अर्थक्रिया चेत्** । अथवा क्रमाऽक्रमौ स्वनिवृत्तौ निवर्त्तयतः इति वचनपरिणामेन सम्बन्धः अर्थक्रियाम् इति ता * विभक्तिपरिणामेन । नहि अन्त्यचित्तक्षणस्य अकारकत्वादेव **अवस्तुसाधर्म्याद् व्यक्तमवस्तुत्वम्** इति घटना । § 1452

ननु अन्त्यचित्तक्षणो यद्यपि सजातीयं कार्यं न करोति, न चापि विजातीयस्य विषयविज्ञानादेः करणात् नाऽसिद्धो मदीयो हेतुः, भवदीय एव अकारकत्वादेव इत्यसिद्ध इति चेत्; एतच्चोद्यपरिहारपुरस्सरं न पर-

२ स्य ] आत्मनः ।
५ स्यास्य ] अन्त्यचित्तक्षणस्य ।
७ र्म्यादि ] द
१७ त्का ] तत्क
१९ कृत ] व्याप्नोति इति क्रिया कृदन्तप्रत्ययान्ता व्याप्ता इति रूपं प्राप्ता अत्र सम्बन्ध्यते ।
१९ प्र ] त्र
२१ व ] द्विवचन ।
२२ ता ] ता इति षष्ठीविभक्तेः संज्ञा ।
२२ * ] इप[[अत्र तु अर्थक्रियाम् इति द्वितीयान्तं सम्बध्यते ।]]
२४ चापि ] तथापि

मातरी *इति गम्यते । **तस्य सत्ता** स्वोत्तरपरिणामसद्भावः तस्या **व्यतिरेकः** अभावः तेन त्ताम न्तरेण इत्यर्थः । **नार्थक्रियां** विजातीयकरणं **प्रेक्षामहे** अपि तु तया सहैव प्रेक्षामहे । एवं मन्यते यथा शिंशपायाः क्वचिद् वृक्षस्व-भावतामुपलभ्य देशान्तरादावपि तत्स्वभावता, अन्यथा निःस्वभावतापत्तेः, व्ववस्थाप्यते, तथा तत एव भावस्य बहुलं सजातीयेतरकार्यजननसामर्थ्य-स्वभाववादर्शनात् सर्वदा सा किन्न व्यवस्थाप्यते विशेषाभावात् ? इतरथा सर्वानुमानोच्छेदः । § 1453

ननु भवतु तत्स्वभावता, तथापि सजातीयं न करिष्यति इति चेत्; /ms विरुद्धमेतत् समर्थं न करोति च इति नित्यवत् । उपादानवच्च उपादेय-स्याऽपि अदृश्यताविरोधात् । अथ कार्यत्तया भावसत्ता व्याप्ता ततो विजातीयकार्यासद्भावेऽपि सा न विरुध्यते । कुत एतत् ? तथादर्शनात्, तदितरत्र समानम् । यदि वन्धः सजातीयाकरणेऽपि विजातीयकरण-म् इति; तथा विजातीयाऽकरणेऽपि सजातीयकरणशङ्कया भाव्यमिति न निरारेका सुगतस्य इतरस्य वा सर्वज्ञता नाम ? कथञ्चैवंवादिनां सामग्री जनिका ? यतः **एकसामग्र्यधीनस्य** प्र° वा° ३ । १८ इत्यादि सुघटं स्यात् । तस्माद् विजातीयवत् सजातीयस्यापि करणमस्तु इति । § 1454
298/mkj

भवतु एवं ततः किम् ? इत्यत्राह--**सा** अनन्तरोक्ता **पुनः** अर्थक्रिया **व-स्तुसत्तां चेद् व्याप्नुयात्** । केन प्रकारेण सा ? इत्यत्राह--**क्रमयोगपद्याभ्याम्** इति । ततः किम् ? इत्याह— **व्यावर्त्तमाना** अर्थक्रिया **अन्त्यचित्तक्षणात् नित्याद्वा तयोः सत्तां निवर्त्तयेत्** । कुत एतत् ? इत्यत्राह--**स्वयम्** आत्म-ना, **अव्यापकस्य व्यावृत्तौ** सत्यां **व्यावृत्तेः अनियमाद्** अवश्यंभावाऽभावाद् अव्याप्यस्य इति शेषः । § 1455

स्यान्मतम्--व्यावर्त्तताम् अन्त्यचित्तक्षणाद् अर्थक्रिया तथापि सत्ता न निवर्त्तते अप्रतिबन्धात् इति चेत्; अत्राह--**सा च** इत्यादि । **कथम् अव्य-भिचारी** न कथञ्चित् **हेतुः सत्त्वादिः** अनर्थक्रियाकारिणि नित्येऽपि त-द्भावाऽनिवारणादिति मन्यते । **यतः** व्यभिचारित्वात् **क्षणिकमेव परयार्थसत् सिध्येत्** । § 1456

---

१ री] ?
१ *] अत्र पाठः त्रुटितः ।
२ त्ताम] स्वसत्ताम
३ या] सत्तया ।
३ चिद्] पुरःस्थिते ।
६ वा] ता
८ त] सजातीयेतरकरणस्वभावता ।
१० या] अथ न कार्यसत्तया
११ सा] भावसत्ता ।
१२ न्धः] यदि पुनरयं निर्बन्धः
१४ ता] सर्वेऽर्थाः सजातीयमेव उत्तरक्षणं कुर्वन्तु न सर्वज्ञचित्तं विजातीयमिति भावः ।
१६ स्यात्] तत्र हि सजातीयमुत्तरक्षणं जनयित्वैव विजातीयं क्षणं प्रति सहकारिभावकल्पनेनैव निर्वाहः ।
२४ न्धात्] अर्थक्रियासत्तयोरविनाभावाभावात् ।

ननु न कार्यसत्तया वस्तुसत्ता व्याप्ता यतः तन्निवृत्तौ साऽपि निवर्त्तेत अपि तु तज्जननसामर्थ्येन, तच्च सहकारि २४४ वैकल्यात् चरमक्षणस्य अस्ति इति नाऽसत्त्वमिति चेत्; अत्राह--**सामग्री** इत्यादि । § 1457

...19 सामग्री कारणं नैकं शक्तानां शक्तिमान् यदि ।
सामग्रीं प्राप्य नित्योऽर्थः करोत्येवं न किं पुनः ॥
१९ ॥§ 1459

नार्थक्रिया निवर्तमाना वस्तुसत्तां निवर्तयति, तत्सामर्थ्यं पुनरन्त्यक्षणस्यास्ति, न करोति सामग्रीवैकल्यात् । समर्थसादृश्यादित्ययुक्तम्; नित्यस्यापि सर्वदा सामर्थ्येऽपि सामग्रीसाकल्यवैकल्याभ्यां कार्यकरणाकरणप्रसङ्गात् । विशेषतः पुनः नित्योऽर्थः संभवसामग्रीसन्निधिः करोत्यपि न पुनरन्त्यक्षणः सर्वथाऽभावात् । सहकारिसन्निधौ च स्वतः कथञ्चित्प्रवृत्तिरेव भावलक्षणम् । तन्नागमो युक्तिबाधने समर्थम् व्याप्तेरसिद्धेः । § 1460

**शक्तानां** गुणकार्योत्पत्तिं प्रति समर्थानां सहकारि-उपादानहेतूनां या **सामग्री** समग्रता मेव **कारणं** कार्यजनिका इत्यर्थः, **न** तेषां मध्ये **एकं** कारणम् इति । चरमश्च क्षण एक इति परो मन्यते । तदभिप्रायद्योतनो **यदिशब्दः** । अस्य उत्तरं पठति--**शक्तिमान्** इत्यादि । **शक्तिमान्** सदा समर्थः **सामग्रीं प्राप्य नित्योऽर्थः** आत्मा अन्यो वा **करोति एवं न [किं] पुनः** । एतदुक्तं भवति--यथा क्षणिकं वस्तु चरमदशायां समर्थमपि सामग्रीविकल्पात् कार्याणि न सम्पादयति अन्यदा तु विपर्ययात् संपादयति तथा अक्षणमपि सर्वदा समर्थमपि सामग्रीवेलायां करोति नान्यदा इति । § 1461

कारिकां व्याख्यातुमाह--**नार्थक्रिया** इत्यादि । **न अर्थक्रिया** कार्यसत्ता **निवर्त्तमाना वस्तुसत्तां निवर्त्तयति** तस्याः तेनव्याप्तेः इति भावः । **तत्सामर्थ्यम् पुनः** इति सौष्ठवे **अन्त्यक्षणस्य अस्ति** । कार्यं कस्मान्न क**रोति** इति चेत् ? आह--**सामग्रीवैकल्यात्** * सहकारिप्रत्ययवैधुर्यात् । 299/mkj
कार्याकरणेऽपि अस्ति इति कुतोऽवगम्यते इति चेत् ? आह--**समर्थम्** इत्यादि । येन कार्यं कृतं तद् इह समर्थं गृह्यते, अन्यस्य साध्यसमत्वात्, तेन **तत्सादृश्यात्** कस्यचिद् आकारस्य उभयत्र सद्भावात् । विवेचयन्ति

१ न्निवृत्तौ] कार्यनिवृत्तौ ।
२ त] तज्जननसामर्थ्यम् ।
२ ल्यात्] कार्याकरणेऽपि ।
१३ मेव] सैव
१४ एकां] एकं
१४ म्] कार्यजनकम् ।
१८ ल्पात्] वैकल्यात्
१८ अ] उपान्त्यक्षणादौ ।
१९ पि] अक्षणिकमपि
२२ त] अर्थक्रियायाः ।
२२ व्याप्तेः] त[[वस्तुसत्तया ।]]याऽव्याप्तेः
२४ *] वस्तुसत्तापि ।

हि लौकिकाः कृतमरणकार्येण सादृश्याद् विशेषेणा परमपि तत्समर्थमिति । तत्रोत्तरमाह--**इत्ययुक्तम्** । कुतः ? इत्याह— **नित्यस्यापि** न केवलं /ms क्षणिकस्य **सामग्रीसाकल्या भ्यां कार्यकरणाऽकरणप्रसङ्गात्** । कस्मिन् सत्यपि ? इत्याह--**सामर्थ्येऽपि** । कदा ? इत्याह--**सर्वदा** इति । चरमक्षणादस्य विशेषमपि दर्शयति--**विशेषत** इत्यादिना । **विशेषः** तत्क्षणाद् अतिशयेन, **पुनः** इति अतिशयभावनायाम् **नित्योऽर्थः करोति अपि,** न केवलं न करोति । किं भूतः ? इत्याह--**संभवात्सामग्रीसन्निधिः । संभवात् सामग्रीसन्निधिः** अ[स्ये] ति **संभवच्छेनैतदृब्देन** * एतद्दर्शयति । यद्यपि सहकारिणा तस्य न किञ्चित् क्रियते, तथाप्यसौ तस्य संभवति सहभूय कार्यकरणात् क्षणिकपक्षवदिति । § 1462

ननु तथा अन्त्यक्षणोऽपि करोति इति न तस्मादस्य विशेष इति चेत्; अत्राह--**न पुनः** नैव **अन्त्यक्षणः** करोति **अपि** इति सम्बन्धः । कुतः ? इत्याह--**सर्वथा** सामस्त्यप्रकारेण न पुनः कार्यकाले **[अ] भावात्** । न च असन् कार्यजन्मनि व्याप्रियते, इतरथा चिरमृतादपि साक्षात् शरीरे प्रणादिप्रसव इत्याशङ्कायां चित्तक्षणसन्तानात्मनापि न सात्मकत्वं जीवच्छरीरे स्यात् । यदि पुनः [स्व] काले सत् कार्यकृदिष्यते; तदपि न सुन्दरम्; यतः पूर्वं तत्समर्थेऽपि पश्चात् कार्यभावे न नित्यार्थनिषेधः, तथा ग्राह्यग्राहकभावस्यापि अनिवारणात् । तदने[न] तस्य परत्रापि न व्यापार इति तदपि गतम् यत् पिञ्जने लग्नम् इति परस्य दर्शितं भवति । § 1463

ननु चरमः अन्यो वा क्षणस्थायी भावः कार्यं कुर्वन् उपलभ्यते, न पुनः नित्योऽर्थः तत्कथं तस्मादस्य विशेष इति चेत् ? अत्राह--**सहकारिण** इत्यादि । विसदृशकार्यजन्मनि यः **सहकारी** तस्य सन्निवाव **सन्निधौ च स्वतः** स्वरूपेण **कथञ्चित्** न सर्वात्मना **प्रवृत्तिरेव** उत्तराकारेण गमनमेव /ms **भावलक्षणं** वस्तुरूपं तथैव दर्शनात् इति मन्यते । तदेवम् अन्त्यचित्तक्षणस्य अवस्तुत्वे साधिते साधूक्तम्--**अन्त्यचित्तक्षणो वात्मा** इत्यादि । § 1464

स्यान्मतम्--**अकर्त्ता निर्गुणः शुद्धो भोक्ता सन्नात्मागमे** यथा ते तस्यैव

---

१ विशेषेणा] विषेण अ
१ पि] विषम् ।
३ ल्या] साकल्यवैकल्या
५ विशेषः] विशेषतः
७ वात्] संभव
८ वात्] वा
८ *] **संभवसामग्रीसन्निधिः इति** शब्देन
११ स्य] नित्यस्य ।
१७ निषेधः] तत्रापि पूर्वं सामर्थ्येऽपि यथासहकारिसन्निपातं कार्योत्पादात् ।
२१ स्य] नित्यस्य ।
२२ स] सन्निवाव इति व्यर्थमत्र ।
२६ म्] उद्धृतोऽयम्--अमूर्तश्चेतनो भोगी नित्यः सर्वगतोऽक्रियः । अकर्ता निर्गुणः सूक्ष्म आत्मा कापिलदर्शने ॥--स्या॰ म॰ पृ॰ १८५ । षड्द॰ बृह॰ पृ॰ ४१ । अकर्ता निर्गुणो भोक्ता आत्मा सांख्यनिदर्शने ।--सूत्रकृ॰ टी॰ पृ॰ २१ । अकर्ता निर्गुणः शुद्धः --न्यायकुमु॰ पृ॰ ११२ । यश॰ उ॰ पृ॰ २५० । अकर्ता निर्गुणः शुद्धो नित्यः सर्वगतोऽक्रियः । अमूर्तश्चेतनो भोक्ता आत्मा कापिलशासने ॥--आत्मानुशा॰ ति॰ श्लो॰ १३७ । तुलना--तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य । कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥--सांख्यका॰ १९ ।

निषेधे शास्त्रविरोधः, न च शास्त्रमनेन न्यायेन वाच्याते भिन्नविषयत्वात् । तदुक्तम्-- § 1465
300/mkj

*अतीन्द्रियानसंवेद्याद् यस्यान्त्यार्षेण चक्षुषा ।
ये भावान् वव नानुमानेन बाध्यते ॥§ 1467

वाक्यप॰ १ । ३८ इति । § 1468

तत्राह--**तन्न** इत्यादि । **तदवस्तुभूतापरिणाम्यात्मप्रतिपादकशास्त्रम् आगमः न युक्तेः** अनन्तरोक्तायाः **बाधने** निराकरणे **समर्थम्** अपि तु सैव तद्बाधने समर्था, अतीन्द्रियेऽपि तस्या [अ]प्रतिहतप्रसरत्वात् । **व्याप्तेरसिद्धेः** कथमन्यथा अनुमानप्रवृत्तिरिति मन्यते । यदि वा, तथाविवात्मप्रतिपत्तिं विदवच्छास्त्रं तद्बाधने समर्थं न सत्तामात्रेण अतिप्रसङ्गात् । तत्प्रतिपत्तिश्च न प्रधाने अचेतने घटादिवत् करोति । नापि पुंसि तद्विकारशून्ये परोक्षे च सा सत्यपि कमर्थं पुष्णाति ? स्वसंविदिते पुनः प्रतिप्राणि सर्वेषाम् आत्मना स्वसंवेदनाध्यक्षसिद्धत्वात् किं शास्त्रं करिष्यति ? न चाऽविकारिणि भ्रान्तिः, या तेन अपनीयते । § 1469

एतेन पुरुषाद्वैतनिषेधेऽपि न शास्त्रं तद्बाधनसमर्थमिति निरूपितम् । ततः स्थितम्— **तन्न** इत्यादि । § 1470

ननु यदि कथञ्चित् प्रवृत्तिरेव भावलक्षणम् सा प्रधाने अस्ति इति तद्वस्तु, ततो नेतरवत् साङ्ख्यः एकान्तेन दूषितः स्यात्, तत्र च भेदानां परिमाणादेः साधनस्य भावात् न तदभावाशङ्कापि युक्तेति चेत्; अत्राह--**अस्ति प्रधानम् इत्यत्र** इत्यादि । § 1471 /ms

...20 अस्ति प्रधानमित्यत्र भेदानामन्वयादयः ।
अन्यथैवोपपद्येरन् एकान्ते भावधर्मवत् ॥ २०
॥§ 1473

१ वाच्याते] बाध्यते
३ स्यान्त्या] द्यान्पश्यन्त्या
४ व] वचनं तेषां
५ इ] उक्तं च भर्तृहरिणा--सन्मति॰ टी॰ पृ॰ ७५३ ।
७ सैव] युक्तिः ।
८ स्या] युक्तेः ।
९ थाविवा] धा
१० व] ध
१२ सा] प्रतिपत्तिः ।
१२ ना] नां
१४ या] भ्रान्तिः ।
१५ द्वा] युक्तिबाधन ।
१७ वृत्तिरेव] उत्तरपर्यायप्रवृत्तिः ।
१९ स्य] भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥--सांख्यका॰ १५ ।
१९ त] साधनाभावाशङ्का ।

भेदानामेककारणपूर्वकत्वे साध्ये वैश्वरूप्यकारणभावात् विरुद्धा एव नित्यादिवत्, विश्वरूपादिकारणानां परिणाम एव संभवात् । स्वयमेकस्यात्मनः पुनरेकस्वभावस्य विश्वरूपाद्यनभ्युपगमात् । सामान्यविशेषात्मनां विकाराणां स्वभावानुरूपोत्पत्त्यविप्रतिषेधात् । न वै कारणसामान्यवचनेऽपि चिच्छक्तेः सहकारिकारणम् अपरिणामित्वात् । नन्वेवं सति शेषो भावः प्रसज्येत । § 1474

**अस्ति प्रधानमित्यत्र** साध्ये **भेदानां** महदादीनाम् **अन्वयः** अनुगमनम् **आदिः** येषां परिमाणादीनां ते अन्वयादयः परेण उच्यमाना हेतवः । कथम्भूताः ? इत्याह--**अन्यथा** साध्याभावप्रकारेणैव उपपद्येरन् मनागपि तद्भावप्रकारेण नोपपद्येरन् ततो नाऽनैकान्तिकाः किन्तु विरुद्धा एव इत्येवकारार्थः । अत्र दृष्टान्तमाह--**एकान्ते** नित्यक्षणिकैकान्ते साध्ये **भावधर्मवत्** भावः सत्त्वम्, उपलक्षणमेतत्, तेन कृतकत्वादिपरिग्रहः, स एव धर्मः पराश्रितत्वात् तेन तुल्यं वर्त्तते इति तद्वत् । स्वयम् अस्ति सर्वज्ञः इति धर्मिणः सत्ताप्रसाधनात् तत्साधनदोषो नोद्भावितः स्वमतसिद्ध्यनुकूलत्वादि[ति] विरुद्धतैव आविष्कृता । § 1475

301/mkj

कारिकां विवृण्वन्नाह--**एककारणपूर्वकत्वे** इत्यादि । **एकम्** अद्वितीयं यत् **कारणं** प्रधानाख्यं **तत्पूर्वकत्वे** तन्निमित्तत्वे **साध्ये** । केषाम् ? **भेदानां** महदादीनाम् । § 1476

ननु कारिकायाम् **अस्ति प्रधानम्** इति अन्यत् साध्यं निर्दिष्टम्, वृत्तौ तु **भेदानाम् एककारणपूर्वकत्वम्** अन्यदिति कथं वृत्तिसूत्रयोः साङ्गत्यम् ? सूत्रानुरूपया च वृत्त्या भवितव्यमिति चेत्; अत्र केचित् परिहारमाहुः--प्रधानधर्मिणः सत्तासाधने भावाऽभावोभयधर्माणाम् असिद्ध-विरुद्ध-अनैकान्तिकमिति दोषदर्शनात्, एवंसाध्यान्तरकरणेऽपि विरुद्धतादोष इति प्रतिपादनार्थमेवं वचनमिति; तैः **एककारणपूर्वकत्वे** इत्यत्र अपिशब्दो द्रष्टव्यः, न केवलम् **अस्ति प्रधानम्** इत्यत्र अपि तु **तत्पूर्वकत्वेऽपि विरुद्धा एव** इति अर्थप्रतिपत्तिर्यथा स्यादिति तथा सूत्रेऽपि **अस्ति प्रधानम्** इत्येतद्
/ms उपलक्षणत्वेन व्याख्येयम्, कथमन्यथा तदसाङ्गत्यपरिहारः ? § 1477

इदमपरं व्याख्यानम्--**एककारणम्** इति प्रधानस्य अपरमत्वर्थकमभिधानम्, तच्च तत् महदादिभ्यः पूर्वं भावात् **पूर्वकं** चेति तस्य भावे **तत्त्वे** साध्ये इति । पूर्वव्याख्याने **भेदानाम्** इत्येतत् पूर्ववद् उत्तरत्रापि सम्बध्यते

---

८ रेण] साङ्ख्येन ।
२१ केचित्] व्याख्याकाराः ।
२२ प्र] प्रधानात्मकधर्मिणः ।
२३ दोष] भावसाधने असिद्धः, अभावे विरुद्धः उभयधर्मे च अनैकान्तिकः । नासिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः । धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथम् ॥--प्र० वा० ३ । १९० ।
२८ अ] न विद्यते परमं द्वितीयं यस्य तस्य भावस्तत्त्वम् अपरमत्वम्, तद् अर्थो यस्येति अपरमत्वार्थकम्, एकमेव प्रधानं न द्वितीयमित्यर्थः ।
२८ त्व] त्वा

। अस्मिन् उत्तरत्रैव भेदानां महदादीनां **वैश्वरूप्यकारणभावात्** ननु विरुद्धा एव इति । निदर्शनमाह--**नित्यादि** । कुतः ? इत्याह— **परिणाम एव संभवाद्** इति । स्वगुणपर्यायैर्न परगुणपर्यायैः भावः **परिणामः तत्रैव संभवात्** वैश्वरूप्यकार्यकारणत्व पादी नाम् इति विभक्तिपरिणामेन सम्बन्धः । एतदपि कुतः ? इत्यत्राह--**विश्वरूपादिकारणानाम्** इति । रूपम् आदि रसादेः असौ रूपादिः, विश्वो निरवशेषो पादः [न] नैयायिकमतवद् विकलो रूपादिर्येषां पुद्गलद्रव्याभिमतकारणानाम् **रूपरसगन्धस्पर्शवन्तः पुद्गलाः** त० सू० ५ । २३ इति वचनात्, तेषां विश्वरूपादिकारणानां **परिणाम एव संभवात्** इत्यनुवर्त्तते । एतदुक्तं भवति-- § 1478

*प्रकृतेर्महान् ततोऽहङ्कारः तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥§ 1480
सांख्यका० २१ § 1481

इति वचनात् यथा भूतानि रूपादिमन्ति तथा तत्कारणानि पञ्च तन्मात्राभिमतानि, एवं तावद्वक्तव्यम्--यावत् प्रकृतिः, विजातीयात् कार्यानुत्पत्तेः इति । **कारणानाम्** इत्यनेन प्रधानस्य पुद्गलापरनाम्नो विशेषापेक्षया बहुत्वं दर्शयति । तदपि कुतः एतत् ? इत्यत्राह--**स्वयमे कस्य** इत्यादि । 302/mkj
**स्वयं** सांख्येन **विश्वं** संपूर्णं **रूपादि** यस्य पृथिव्यादिकार्यस्य तत् तथोक्तं तस्य /ms
**अनभ्युपगमात्** । कस्य सम्बन्धिनः ? इत्याह--**आत्मनः** पुरुषस्य । **पुनः** इति पक्षान्तरद्योतने । किम्भूतस्य ? इत्याह--**एकस्वभावस्य** । **एकः** चेतनालक्षणो न रूपादिलक्षणः **स्वभावो** यस्य तस्य इति । एवं मन्यते--यथा पुरुषस्य रूपादिरदिहतस्य न रूपादिमत्कार्यं तथा अन्यस्या पातरवा पुरुषस्यैव तदिति किं तत्त्वान्तरकल्पनयेति । पुनरपि किंभूतस्य ? इत्यत्राह--**एकस्य** [एक] संख्योपेतस्य । इदमत्र तात्पर्यम्--यथा तस्य देशकालस्वभावभिन्नम् अनेकं रूपादिमद् उपादेयमयुक्तं तथा एकस्य प्रधानस्य इति । इतश्च विश्वरूपादिकरणानां तत्रैव संभव इति दर्शयन्नाह--**विकाराणाम्** इत्यादि । **विकाराणां** विशिष्टकार्याणां न अविकारस्य प्रधानस्य । किंभूतानाम् ? **सामान्यविशेषात्मनाम्** इति । किं तेषाम् ? इत्याह--**स्वभाव** इत्यादि । तेषां विकाराणां यः **स्वो भावः** स्वरूपं **तदनुरूपस्य** विकारान्तरस्य **उत्पत्तिः**

---

४ पादी ] त्वादी
६ पादः ] रूपादिः
६ विक ] यथा नैयायिकमते अग्नौ रसगन्धौ जले गन्धः वायौ च रूपरसगन्धा न स्वीक्रियन्ते न तथा अत्र विकलत्वम् ।
८ व ] स्पर्शरसगन्धवर्णवन्तः पुद्गलाः--त० सू० ।
१४ तानि ] रूपरसगन्धस्पर्शशब्दाः तन्मात्राः ।
१४ कृतिः ] मूलकारणभूता ।
१५ या ] कार्यापेक्षया ।
२१ वा ] पि, इतरथा
२२ त ] सर्वं कार्यं महदादिरूपम् ।
२२ त ] प्रधानाख्य ।
२३ स्य ] पुरुषस्य ।
२४ म ] कार्यम् ।

या तस्याः **अविप्रतिषेधात्** कारणात् तत्रैव तेषां संभवात् इति सम्बन्धः । तन्न युक्तम्-- § 1482

*मूलप्रकृतिरविकृतिः सांख्यका° २२ इत्यादि ।§ 1483

ननु मूलकारणाभावे कुतः तद्विकारा इति चेत् ? अन्येभ्यो विकारेभ्यः तेऽपि अन्येभ्यः इति अनादि विप्रतिषेधात् कारणात् तत्रैव तेषां संभवादिति सम्बन्ध विषयं तत्परम्परा इति न सांख्यं प्रतिपत्ति दर्शनमुक्तम्--नित्यक्षणिकैकान्त सत्को त्पत्त्यादि[रि] ति; तन्न युक्तम्, तस्य तदसिद्धेः । स
/ms हि सत्त्वादेः नित्यैकान्ते साध्ये नित्यपुरुषवत् परिणामिनि महदादौ सत्त्वस्य भावाद् व्यभिचारमिच्छति, कृतकत्वादेः तत्र भावेऽपि प्रकृतिपुरुषयोरभावाद् भागासिद्धत्वम् । क्षणिकत्वे पुनः सर्वस्य [क्षणिकत्वे] साध्ये नित्ये पुरुषे सत्त्वस्य भावात् तदेव व्यभिचारित्वम्, कृतकत्वादे[ः] तथैव भागासिद्धत्वं न विरुद्धत्वम् । अथ प्रधानस्यैव तदुभयं साध्यते; भवेत् कृतकत्वादेर्विरुद्धत्वं परिणामिन्येव प्रधानादौ भावात्, न सत्त्वस्य नित्येऽपि पुरुषे तस्य भावात् । § 1484

अथ पुरुषोऽपि परिणामी इति नैते दोषाः, तत्राह--**न वै** इत्यादि । **न वै** नैव **कारणसामान्यवचनेऽपि** परिणामिकारणम् इह गृह्यते । कुतः ? **चिच्छक्तेः** योगभा° १ । २ इति वचनात् । नहि आत्मा **चिच्छक्तेः सहकारिकारणम्;** तस्याः ततोऽव्यतिरेकात् । ततोऽयमर्थः--नैव परिणामिकारणम् आत्मा चिच्छक्तेः चेतनारूपसामर्थ्यस्य । कुतः ? इत्याह— **अपरिणामि**[त्वात्, परिणाम] रहितत्वाद् आत्मनः इति विभक्तिपरिणामेन सम्बन्धः । तन्न नित्यक्षणिकैकान्ते साध्ये सत्त्वादिर्विरुद्धः अपि तु यथोक्त इति कापिलो मन्यते । एतदाचार्यः परिहरन्नाह--**नन्वेवम्** इत्यादि । **ननु** इति
303/mkj भावनायाम्, **एवम्** उक्तप्रकारेण **सति** तदकारणत्वे इति **शेषो भावः प्रसज्येत** आत्मनः इति सम्बन्धः । न चैवम्, अतः तस्य सत्त्वमिच्छता परिणामित्वमभ्युपगन्तव्यमिति कथं निदर्शनाऽसिद्धिरिति भावः । § 1485

भवतु तर्हि तच्छक्तेः कारणम् आत्मेति चेत्; अत्राह--[बुद्ध्य इत्यादि] § 1486

---

१ त्रैव] विकाराणाम् ।
३ इ] ...महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिः न विकृतिः पुरुषः ॥ इति शेषः ।
५ अनादि] एतच्चिह्नान्तर्गतः पाठः पुनर्लिखितः ।
६ न] न इति निरर्थकमत्र ।
६ त्ति] प्रति यन्नि-
७ णिकैकान्त] न्ते
७ त्को] सत्त्वो
१७ क्तेः] क्तिः
१७ इ] चितिशक्तिरपरिणामिन्यप्रतिसङ्क्रमाऽदर्शितविषया शुद्धा चानन्ता च सत्त्वगुणात्मिका चेयम् ।--योगभा° ।
१८ स्याः] आत्मनः ।
२४ स्य] आत्मनः ।

...21 **बुद्ध्यध्यवसिते चिच्छक्तिः पुंसः स्वत एव चेत् ।**
**ज्ञानादयः कथन्न स्युश्चेतनस्यैव वृत्तयः ॥ २१**

‖§ 1488

चेतनस्य वैश्वरूप्यादेः परिणामः सिद्धः, सुखादिव्यतिरेकेण चैतन्यवृत्तेरनुपलब्धेः । ततः दर्शनशक्तिः कार्यनिरपेक्षा बुद्ध्यध्यवसायवत् यतः बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते । उभययोः वैश्यरूप्यादेः संभवात् कुतः अपरिणामिनी चिच्छक्तिः बुद्धिविवर्तमनुविधत्ते ? §1489

**बुद्ध्यध्यवसिते**इन्द्रियाणि अर्थम् आलोचयन्ति इत्यादिकया प्रणालिकया गृहीताकारवस्तूनि **पुंसः चिच्छक्तिः** तद्दर्शनसामर्थ्यं **स्वत एव** न परतः **वृत्तयः** इत्यनेन लब्धैकवचनपरिणामेन सम्बन्धाद् वृत्तिः परिणामः, तथा /ms **स्युः** इत्यनेनापि जातैकवचन[परिणामेन] सम्बन्धात् स्यात् इति भवति । **चेद्** इति पराभिप्रायद्योतने । अत्र दूषणमाह--**ज्ञानादय** इत्यादि । **ज्ञानम्** **आदिर्येषां** सुखादीनां ते तथोक्ताः **कथं न स्युः** स्युरेव **चेतनस्यैव** पुरुषस्यैव **वृत्तयः** परिणामाः । एवं मन्यन्ते यथा ज्ञानादिभेदानां वैश्वरूप्यादयो नैककारणपूर्वका इतरथा शरीरादिवत् पुरुषाणामपि परिणामिनां किञ्चिद् अपरमेकं कारणं स्यात् इति व सांख्यदर्शनम् तथा घटादिभेदानामपि इति । §1490

कारिकां व्याख्यातुमाह--**चेतनस्य** इत्यादि । **चेतनस्य परिणामः सिद्धः** । कुतः ? इत्याह--**वैश्वरूप्यादेः** सकाशाद् **आदि**शब्देन कार्यकारणभावादिपरिग्रहः । एतदपि कुतः ? इत्याह--**सुखादिव्यतिरेकेण चैतन्यवृत्तेः** चैतन्यपरिणामस्य **अनुपलब्धेः**, सुखाद्यात्मकत्वेन तत्तद्वृत्तेः उपलब्धेश्च इति भावः । प्रकृतमुपसंहरन्नाह--**ततः** अनन्तरात् न्यायात् **न दर्शनशक्ते** भूतान इत्याह--**कार्य** इत्यादि । **कार्य**शब्दोऽयं भावप्रधानः **कार्यत्वनिरपेक्ष्या** कार्यभूतेव इत्यर्थः । अत्र दृष्टान्तमाह--**बुद्ध्यध्यवसायवद्** इति । बुद्धेः अध्यवसायः स्वपरनिर्णयः स इव तद्वत् । यथा तदध्यवसायो न कार्यत्वनिरपेक्षः तथा तच्छक्तिरपि, **यतः** तच्छक्तेः कार्यत्वनिरपेक्षत्वाद् ***बुद्ध्यध्यवसितमर्थ** नित्यः

७ इ] इन्द्रियाणि अर्थमालोचयन्ति बुद्धिरवधारयति मनः संकल्पते आत्मा चेतयते इति । एवं बुद्ध्यहङ्कारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा--चक्षू रूपं पश्यति मनः संकल्पयति अहङ्कारोऽभिमानयति बुद्धिरध्यवस्यति ।--सांख्यका° माठर° पृ° ४७ ।
८ स्तूनि] वस्तुनि
१५ व] न
२० द्वृत्तेः] त[[चैतन्यवृत्तेः ।]]द्वृत्तेः
२१ क्ते] क्तिः
२१ भूतान] किंभूता ?
२२ पेक्ष्या] क्षा
२५ *] उद्धृतमिदम्--त° श्लो° पृ° ५० । आप्तप° पृ° १६४ । प्रमेयक° पृ° १०० । न्यायकुमु° पृ° १९० । न्यायवि° वि° प्र° पृ° २३५ । स्या° रत्ना° पृ° २३३ ।
२५ र्थ] र्थं पुरुषः

पुमान्, **चेतयति** पश्यति । **यत** इति वा आक्षेपे, तदभावात् नैव चेतयते । तन्न युक्तम्--**न प्रकृतिर्न विकृतिः पुरुषः** सांख्यका० २२ इति । § 1491
304/mkj

ननु यदि नाम बुद्ध्यध्यवसायः कार्यत्वनिरपेक्षे नास्ति तच्छक्तेः किमायातं /ms येन सापि तस्य ? नहि एकस्य धर्मोऽविशेषेण अन्यस्य इति चेत्; अत्राह--**वैश्व** इत्यादि । **वैश्वरूप्यादेः संभवात्** उक्तनीत्येति मन्यते । कस्य सम्बन्धिनः ? इत्याह--**उभययोः** चैतन्यशक्ति-बुद्ध्यध्यवसाययोः भेदानामपि इति **बुद्ध्यध्यवसितमर्थं नित्य श्चेतय[ते]** । इति च ब्रुवाणेन बुद्धिवत् पुरुषोऽपि विषयाकारोऽभ्युपगन्तव्यः, अन्यथा बुद्धिप्रतिबन्धबाह्यमर्थम् अनाकारोऽपि पश्येत् इति किं बुद्धिकल्पनया ? अथेष्यते सोऽपि तदाकारः; तत्राह--**कुतः** न कुतश्चिन्न्यायात् **बुद्धिविवर्त्तः** बुद्धेः अर्थाकारं परिणामम् **अनुविधत्ते** अनुकरोति । का ? इत्याह--**चिच्छक्तिः** । किंभूता ? इत्याह--**अपरिणामिनी** । तदनुविधाने दर्पणादिवत् परिणामिनी स्यादिति भावः । § 1492

इदमपरं व्याख्यानम्--**कुतः** कारणात् सा **अपरिणामिनी** अपि इति, अपिशब्दोऽत्र द्रष्टव्यः । **तद्विवर्त्तम् अनुविधत्ते** यदि स्वतः अर्थमपि तत एव अनुविधत्ते इति अनन्ततद्विवर्त्तेन अर्थे तदन्तरानवस्था स्यादिति मन्यते । § 1493

तथा इदमपरम्--**चिच्छक्ति [र]परिणामिनी** सदैकरूपा **बुद्धेर्विवर्त्तं** युगपत् क्रमभाव्यनेकनीलादिसुखादिप्रतिबिम्बपरिणामं **कुतः अनुविधत्ते ?** नैकत्वेन तत्समा नानैव भवेद् विरोधात् । तथाहि--यदि सर्वदा एकरूपा; तर्हि न बुद्धिविवर्त्तानुकारिणी । [सा]* चेत्; नैकरूपा । न च विषयनानात्ववद् विषयिणः तद्ग्रहणशक्तिनानात्वमन्तरेण तद्ग्रहणं युक्तम्, एकैकस्वभावस्य अनेककार्यकरणवत् । § 1494

/ms तदेवं ज्ञानादयश्चेत् तस्यैव वृत्तयः इति प्रसाधिते यल्लब्धं तद्दर्शयन्नाह--**ज्ञानम्** इत्यादि । § 1495

...21 ज्ञानादिकमजीवस्य मूर्तस्य व्यतिरेकिणः ।

---

१ ति] ते
२ कृ] कारणम् ।
२ विकृतिः] कार्यम् ।
३ पेक्षे] क्षो
४ सा] चैतन्यशक्तिरपि ।
७ नित्य] पुरुष
९ ते] पुरुषः ।
१० र्त्तः] र्तम्
१७ म्] व्याख्यानम् ।
१९ नानैव] अनेकैव न भवेदिति अन्वयः ।
१९ रूपा] चिच्छक्तिः ।
२० *] बुद्धिविवर्तानुकारिणी चेत्; ।
२१ रेण] विषयग्रहणम् ।
२१ स्य] कारणस्य ।
२४ म्] ज्ञानादिकम्

ज्ञानं जीवस्य वा मिथ्या अनेकं वेत्यनात्मकम् ॥
२१ ॥§ 1497

वृत्तिरचेतनस्य ज्ञानं चेतनस्योपलब्धिरिति स्वयंक्लृप्तां भेदकल्पनां प्राह विशेषानुपलब्धेः अतिप्रसङ्गाच्च । तथा परो द्रव्यस्य स्वतश्चैतन्यविकलस्य व्यतिरेकिणं गुणमाह सम्बन्धात् । सत्यपि भावतस्तदभावात् । कथमज्ञश्चेतनो नाम अर्थान्तरात् चैतन्यात् अतिप्रसङ्गात् । तथा पुनश्चैतन्यस्य मूर्तस्य इतरस्य ज्ञानमनात्मकमिति च मिथ्यादर्शनानि । § 1498

**ज्ञानादि**ग्रहणम् उपलक्षणं सुखादेः, तेन **ज्ञानादिकं** वृत्तिः **अजीवस्य** अचेतनस्य प्रधानस्य । किंभूतस्य ? **मूर्त्तस्य** रूपादिमत इति **यज्ज्ञानं** तत् **मिथ्या** यथोक्तन्यायवचनात् । अत्र दृष्टान्तमाह--**जीवस्य** इत्यादि । वक्ष्यमाणको **वा शब्द** इवार्थः अत्रापि सम्बन्धनीयः । ततोऽयमर्थः संपद्यते **जीवस्य** आत्मनः । किंभूतस्य ? **व्यतिरेकिणो** ज्ञानाद् एकान्तेन भिन्नस्य । **मूर्त्तस्य** इत्येतद् विशेषणम् असंभवात्, परेण तथाविधस्यापि आत्मनः अमूर्त्तत्वेन उपगमात्, अत्र नाभिसम्बध्यते, **ज्ञानं** वृत्तिः इति । ज्ञानमिव 305/mkj प्रकृतमपि ज्ञानं मिथ्या । इदमपि किमिव **मिथ्या** ? इत्याह--**अनात्मकम्** इति । न विद्यते आत्मा यस्य तद् **अनात्मकम् ज्ञानम्** इति ज्ञानं यथा **मिथ्या** तथा **जीवस्य व्यतिरेकिणो ज्ञानं वृत्तिः** इति ज्ञानं **मिथ्या** इति । एतदुक्तं भवति--यथा अन्यात्मकं ज्ञानम् अनाश्रयं न कस्यचिद् गुणः तथा व्यतिरेकिणोऽपि न गुणः स्याद् अतिप्रसङ्गात् । अथ आत्मन एव गुणः तत्र समवायात्; न; समवायस्य अविशेषे *तदविशेषात्, प्रमाणभावेन असत्त्वाच्च । *तत उत्पत्तेः तस्य तद्गुणत्वे; *उत्तरोत्तरं ज्ञानं पूर्वपूर्वस्य क्षणिकज्ञानस्य गुण इति ततोऽन्यस्य गुणिनः साधनमनवसरमेव । यथैव च क्षणिकस्य स्वसत्तासमये कार्यं कुर्वतः कारणत्वं दुरुपपादम्, हेतुफलयोः सहभावापत्तेः, तथा [अ] क्षणिकस्यापि कार्यकालविशेषणात् तद्रूपात् पूर्वोत्तरतद्रूपयोः सर्वथा [अ] व्यतिरेके, तावन्मात्रत्वात्तस्य इति । यथैव वा स्वसत्तासमये तस्य तत्कुर्वतः तद् दुरुपपादम् कार्यकाले स्वयमभावात् /ms तथा इतरस्यापि पूर्वकालविशेषणाद् रूपाद् उत्तरस्य सर्वथा [अ]भेदात्,

---

१२ रेण] साङ्ख्येन ।
१७ था] सर्वथा भिन्नम् ।
१७ यं] निराश्रयत्वात् ।
१८ पि] अर्थस्य ।
१९ अविशेषे] एकत्वे ।
१९ *] सर्वान् प्रति अविशेषात् ।
१९ माण] णा
२० त्त्वाच्च] समवायस्य ।
२० *] आत्मनः ।
२० स्य] आत्मगुणत्वे ।
२० *] बौद्धः प्राह ।
२३ णात्] तत्स्वरूपात् ।
२४ द्रूपात्] पूर्वक्षणवर्तिनः उत्तरक्षणवर्तिनश्च स्वरूपस्य ।
२४ रेके] अभेदे कारणत्वं दुरुपपादमिति सम्बन्धः ।
२५ ये] क्षणिकस्य ।
२५ स्य] कार्यम् ।
२५ तः] कारणत्वम् ।
२६ था] नित्यस्यापि ।
२६ णाद्] स्वरूपात् ।
२६ भेदात्] एकरूपत्वात् कारणत्वं दुरुपपादमिति सम्बन्धः ।

*इतरथा एकमेव न किञ्चित् स्यात् । किञ्च, न परात्मनो युगपदनेकदेशकालव्याप्तिः, निरंशत्वाद् अनात्मकचित्तवद् इति । उपसंहारमाह--**अनेक वेति मिथ्या ज्ञानम्** इत्यनुवर्त्तते । § 1499

कारिकार्थं कथयन्नाह--**वृत्तिः अचेतनस्य** इत्यादि । **वृत्तिः** परिणामः **अचेतनस्य** करणस्य । किम् ? **ज्ञानम्, चेतनस्य** पुरुषस्य **उपलब्धिः** दर्शनं **वृत्तिः इत्येवं स्वयम्** आत्मना न प्रमाणेन **प्रक्लृप्ताम्** अपरिचितां **भेदकल्पनां प्राह** सांख्यः । कुतः ? इत्याह— **विशेषस्य** ज्ञानोपलब्ध्योः भेदस्य **अनुपलब्धेः** । § 1500

ननु अयमनैकान्तिको हेतुः अयोगोलक-पावकयोः विशेषानुपलम्भेऽपि भेदादिति चेत्; अत्राह--**अतिप्रसङ्गात्** पुरुषचैतन्ययोरपि भेदप्रसङ्गात् । शक्यं वक्तुं पुंसः अन्यदेव चैतन्यम्, संसर्गाद् अयोगोलकवह्निभेदा[भाव]वदभेदाध्यवसायः । **च** शब्दः अवधारणे । अतिप्रसङ्गादेव स्वयं प्रक्लृप्तां भेदकल्पनां प्राह इति । न च परिणामवादिनं प्रति दृष्टान्त[ः] सिद्धोऽस्ति; अयोगोलकस्य तथापरिणामात् । अतिप्रसङ्गं दर्शयन्नाह--**तथा** इत्यादि । येन स्वमवाषिका *प्रकारेण सांख्यो बुद्धिचैतन्ययोर्भेदमाह **तथा परो** यौगो **द्रव्यस्य** इति । सामान्यवचनेऽपि प्रस्तावाद् आत्मनः इति गम्यते **स्वतः** स्वरूपेण **चैतन्यविकलस्य** अचेतनस्य **व्यतिरेकिणम्** अर्थान्तरभूतं **गुणमाह**

/ms । नैतव्यं दर्शनम् । कुतः ? इत्याह-- **सम्बन्धात्** समवायात्, तथा च बुद्धिवत् चैतन्यमपि न पुरुषस्य रूपम्, इति न युक्तमेतत्— **चैतन्यं पुरुषस्य स्वरूपम्** योगभा° १ । ९ इति मन्यते । § 1501

306/mkj

*स आह--किमुच्यते **तथा** इति; यावता प्रमाणबलेन अहं सर्वमेतत् कथयामि इति । तत्राह--विद्यमानेऽपि **सत्य[पि] सम्बन्धि** द्रव्यचैतन्ययोः अत्यन्तभिन्नयोः समवायरूपे, **अपिशब्दः** संभावनायाम् **भावतः** प्रमाणाभावेन **तदभावात्** । बहिरन्तश्च जात्यन्तरप्रतिभासे इह अवयवे अवयवी इत्यादि प्रत्ययाभावे धर्मिणो विरहात् तद्विषयानुमानावृत्तेः इति । **कथम् अज्ञे** *चेतनः सत्तात्मा **चेतनो नाम ? नैव** । कुतः ? इत्याह--**अर्थान्तरात्** ततो भिन्ना**चैतन्यात्** इति । कुतो न स्यात् ? इत्याह--**अतिप्रसङ्गात्** गगनादिरपि ततः चेतनः स्यादिति बुद्ध्यादेर्विशेषगुणत्वं नवद्रव्याणि इति च

१ *] अभेदेऽपि एकत्वाभावे ।
२ अनेक] कं
६ रिचितां] उपरचितां
१३ च] जैनादिकम् ।
१४ स्य] अग्निसंसर्गादग्नित्वेन परिणामात् ।
१५ *] मनीषिका
१८ व्यं] नैतन्मन्तव्यं
२१ *] नैयायिकः ।
२२ न्धि] सम्बन्धे
२६ *] ज्ञः अ
२६ त्तात्मा] सन्नात्मा
२८ पि] भिन्नचैतन्यात् ।
२८ त्वं] रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दाः वैशेषिकगुणाः ।--प्रश° भा° पृ° ३९ ।
२८ इति] तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसंज्ञयोक्तानि नवैवेति ।--प्रश° भा° पृ° ३ ।

द्रव्यसंख्या विहन्यते, तत्सम्बन्धस्य सर्वगतत्वेन तत्राप्यविशेषात् । अथ सम्बन्धस्य [अ]विशेषे सम्बन्धिनोर्विशेष इष्यते; न; सम्बन्धवैफल्यप्रसङ्गात् । ययैव प्रत्यासत्त्या तदविशेषेऽपि *तद्विशेषेष्टिः तयैव अस्य अयम् इति व्यपदेशनियमभावात् । § 1502

किंच, यदि आत्मन्येव चैतन्यमुपलभ्येत; युक्तमेतत्, न चैवं तदात्मनोऽनुपलब्धिः * । तथापि तत्र तत्कल्पने अन्यत्रापि तदस्तु अविशेषादिति । यदि वा, **अर्थ**शब्दोऽयं घटादिविषयवाची, तस्मादन्यः तद्वत् स्वतो भिन्नज्ञानग्राह्यत्वं ग[तः] तदन्तरं विषयान्तरं तस्मात् स्वयम् **अज्ञः** सन् **कथं चेतनो नाम ?** कुतः ? इत्याह--**अतिप्रसङ्गात्** *प्रयत्नादिसम्बन्धेऽपि चेतन[ः] स्यात् । अथ अर्थग्रहणात्मकत्वाज् ज्ञानस्य, *तत्सम्बन्धादेव चेतनः नेतरसम्बन्धात् तस्य विपर्ययरूपत्वात्; *तस्य स्वग्रहणाभावे अर्थग्रहणमपि दुर्लभं घटादिवदित्युक्तप्रायमिति । § 1503 /ms

अतिप्रसङ्गं पुनरपि सांख्यस्य दर्शयन्नाह--**तथा पुनः** इत्यादि । **तथा** तेन सांख्यकल्पनाप्रकारेण **पुनः** सांख्यादिकल्पनायाः पश्चात् **चैत[न्य]स्य मूर्त्तस्य** पृथिव्यादिचतुष्टयस्य **ज्ञानम्** अनेन पौ रं[न्द रंचार्वाकसम्बन्धि ।] मतं दर्शितम् । अथवा **पुरुष एव इदं सर्वम्** ऋक्० १० । ९० । २ इत्यादि दर्शनम् । यदि वा, *स्वदर्शनम्, अत्र **मूर्त्तस्य** इति न सम्बन्धनीयं जैनचेतनस्य अमूर्त्तत्भं *कादाचित्कमत्र अनुपयोगीति न वक्तव्यम् । **इतरस्य** अचेतनस्य वा भूम्यादेः मूर्त्तस्य, अनेन अ वि द्ध क र्ण स्य समयो दर्शितः । ज्ञानग्रहणे अनुवर्त्तमाने पुनः ज्ञानग्रहणं तद्व्यवहितमिति सन्निहितसम्बन्धार्थम् **अनात्मकम्** आत्मशून्यं **ज्ञानम्** इत्येतदत्रापि सम्बन्धनीयम् । **च** इति समुच्चये **इति च** एवं सति **मिथ्यादर्शनानि** एकान्तवादिसंबन्धनीति * शेषः । उक्तानामपि यौगादिमतानां कापिलमतानन्तरं पुनः प्रदर्शनं तत्र अतिप्रसङ्गप्रतिपादनार्थम् । § 1504

307/mkj

ननु यदुक्तमत्रैव प्रस्तावे प्रथमकारिकायाम् **मिथ्याज्ञानं स्वतः सतो ज्ञातुः आवरणोद्भूतेः** इत्यादि; तदयुक्तम्; अमूर्त्तस्य आत्मनो मुक्तस्येव मूर्त्तेन आवरणाभिमतेन सम्बन्धाऽभावात् । न चासम्बद्धम् आवरणम्; अतिप्रसङ्गात् । एतदेवाह--[कथमित्यादि] § 1505

---

१ स्य] चेतनासमवायस्य ।
१ त्वेन] आकाशेऽपि भावात् ।
३ त्त्या] सम्बन्धाविशेषेऽपि ।
३ *] सम्बन्धिनोर्विशेषता स्वीक्रियते ।
४ भावात्] किं सम्बन्धकल्पनया ।
६ *] ब्धेः
६ त्र] आत्मनि ।
८ रं] अर्थान्तरम् ।
९ *] अन्यगुण ।
१० *] ज्ञानसमवायादेव ।
११ स्य] अर्थग्रहणस्वभावाभावात् ।
११ *] ज्ञानस्य ।
१४ स्य] चैतन्यविशिष्टस्य ।
१७ *] जैनदर्शनम् ।
१८ त्भं] र्तत्वात्, मूर्तत्वं
१८ *] कर्मसम्बद्धदशायाम् ।
२३ *] न्धीनीति
२६ इ] पृ० ३२१ ।
२७ तेन] कर्मणा ।

...22 कथं पुनरमूर्त्तस्य सम्बन्धः कर्मणेति चेत् ।
माणिक्यादिर्न वै मूर्तिः मलसम्बन्धकारणम् ॥ २२ ॥§ 1507

मलैर्निसर्गाद् बध्येत जीवोऽमूर्तिः स्वदोषतः ।
[१/२] ।§ 1508

जीवस्य मूर्तिं कल्पयित्वापि कर्मबन्धनिमित्तं स्वदोषान्तरं कल्पितव्यं माणिक्यादिवत् । ततः पुनरमूर्तस्य चेतनस्य नैसर्गिका मिथ्यादर्शनादयो बन्धहेतवः । § 1509

**कथं** न कथञ्चित् **पुनः अमूर्त्तस्य कर्मणा** मूर्त्तेन **सम्बन्धः** । ननु मूर्त्तेन इत्यत्र न श्रूयते तत् कथं लभ्यमिति चेत् ? **अमूर्त्तस्य** इति वचनात्
/ms । यदि कर्माऽपि अमूर्त्तं स्यात् तद्वचनमनर्थकं स्यात्, अमूर्त्तयोः सम्बन्धाऽविरोधात् । **कर्मणा** इति वचनाद् इतरस्य कर्मत्वाऽयोगात् । न च मूर्त्ताऽमूर्त्तयोः विरुद्धः संयोग इति; अतः प्रस्तुतत्वाद्वा । **चेद्** इति पराभिप्रायद्योतकः । अत्र उत्तरमाह--**मलैर्निसर्गाद्** इति । § 1510

नन्वेतत् **परस्परविलक्षणावपि** इत्यादिना ग्रन्थेन प्रतिपादितम्, **शुभैः** इत्यादिना च तद्बन्धकारणम्, तत् किमर्थं पुनरप्युच्यते इति चेत् ? तस्यैव प्रकारान्तरेण समर्थनार्थम् । तथाहि--**मनोवाक्कायकर्मभिः** इत्यादि **न कश्चिद् विप्रतिपत्तुमर्हति** इति पर्यन्तवचनेऽपि पञ्चस्कन्धवत् इत्यादिकमुल्लङ्घ्य कश्चिद् वदति मूर्त्ता एव हेमादयः मूर्तैः श्यामादिकाभिः सम्बन्ध्य माना दृष्टा इति मूर्त्तिरेव बन्धकारणम्, अत्मनि तदभावान्न तद्बन्धः इति; तं प्रति उच्यते--**मलैः** इत्यादि । **नवै** नैव **मूर्त्तिः मूल संबन्धकारणम्** । किं कारणम् ? इत्याह--**माणिक्यादिः बध्येत** । कैः ? इत्याह--**मलैः** किट्टकालिकादिभिः । **मूर्त्तैः** इति विभक्तिपरिणामेन सम्बन्धः । न चैवम्, अन्यथापि तस्य दर्शनादिति मन्यते । § 1511

अत्राह **परश्च** * **दोषतः** इति । स्वस्य स्वो वा दोषः दुष्टाकरप्रभवत्वादिलक्षणः तेन ततो **बध्येत** माणिक्यादिः इति वा अनुवर्त्तते । कुतः ? **निसर्गात्** स्वभावतः । एवमन्वयः--सदोषो माणिक्यादिः सम्बध्यते मणेः नेतरः, तथैव तस्य स्वाभाव्यात् तथा दर्शनादिति । तस्य उत्तरमाह--**जीवोऽमूर्त्तिः** इति ।

---

९ त] अमूर्तवचनम् ।
१० इ] अविद्यादेः ।
१३ इ] पृ° २५४ ।
१४ इत्यादिना] पृ° २५५ ।
१६ नेऽपि] पृ° २५५ ।
१७ श्या] कालिमादिभिः ।
१७ न्ध्य] म्बद्ध
१८ त] मूर्त्यभावात् ।
१९ मूल] मल
२३ *] परः--स्व
२३ दोषः] मलयुक्तखानिजन्यत्वात् ।
२५ णेः] मलैः

लुप्तः अपि शब्दः अत्र द्रष्टव्यः ततो **जीवोऽपि** न केवले  माणिक्यादिरेव । किंभूतः ? इत्याह--**अमूर्त्तिः** अविद्यमानमूर्तिः । **मलैः** कर्मभिः **निसर्गात्** **स्वभावतः** **स्वदोषतः** आत्मीयेन मिथ्यात्वादिदोषेण । § 1512 /ms

प्रकृत संभाव्य कारिकां विवृण्वन्नाह--**जीवस्य** इत्यादि । **जीवस्य मूर्त्तिं कल्पयित्वापि कर्मबन्धनिमित्तं स्वदोषान्तरं** भावकर्मलक्षणं **कल्पितव्यम् माणिक्यादेरिव तद्वद्** इति । ततः तस्मान्न्यायात् **पुनः अमूर्त्तस्य नैसर्गिका बन्धहेतवः** । कस्य ? इत्याह--**चेतनस्य** । के ? इत्याह--**मिथ्यादर्शन** इत्यादि । § 1513 308/mkj

ननु किममूर्त्तस्य मूर्त्तेन कर्मणा सम्बन्धकल्पनया, यावता [अ] मूर्त्तेनापि तेन तद्गुणादिसमवाये न कश्चिद् दोषः । तदुक्तम्--**आत्मविशेषगुणः कर्तृफलदायी कार्यविरोधी संयोगजोऽदृष्टो धर्मोऽपि व्याख्यातः** इति चेत्; अत्राह--**जात्या** इत्यादि । § 1514

...23 जात्या व्यतिरिक्तयाऽर्थाः स्युरन्या जातिः स्वतः सती ।
तथैवार्थान्तरैः किन्न द्रव्यं स्याद् गुणकर्मभिः ॥ २३ ॥ § 1516

**जात्या** इति सामान्यवचनेऽपि **स्युः** इति वचनात् सत्ता परिगृह्यते । नहि अन्यया अर्थाः सन्तो भवन्ति । किंभूतया ? **व्यतिरिक्ताया** द्रव्यादेः एकान्तेन भिन्नया । किं तया ? इत्याह--**अर्थो** द्रव्यगुणकर्माणि **द्रव्यगुणकर्मसु अर्थः** वैशे० सू० ८ । २ । ३ इति वचनात् । **स्युः** सन्तो भवेयुः । किन्नैव ? **किम्** इत्यनेन वक्ष्यमाणेन सम्बन्धः । नहि स्वयमतद्रूपम् अन्येन तद् भवति, अन्यथा रूपादिना रादना दिकं तद्वत् स्यात् । तथाविधया जात्या अर्थानां समवायसम्बन्धोऽपि अत्रैव वृत्ते निराकरिष्यते । § 1517

किञ्च, जातिरपि यद्यसती; कथं तया किञ्चिदसत् सत् स्यात् ? नहि--बन्ध्यासुतो गगनकुसुममालया सन्नाम । सती जात्यन्तरेण चेत्; अनवस्था

---

१ ले ] लं
४ कृत ] तं
१० तेन ] अदृष्टाख्येन ।
१० वाये ] स्वीक्रियमाणे ।
११ इ ] धर्मः पुरुषगुणः कर्तुः प्रियहितमोक्षहेतुः अतीन्द्रियोऽन्त्यसुखसंविज्ञानविरोधी पुरुषान्तःकरणसंयोगविशुद्धाभिसन्धिजः...--प्रश० भा० पृ० १३८ ।
१६ तिरिक्ताया ] क्तया
१८ इति ] अर्थ इति द्रव्यगुणकर्मसु--वैशे० सू० ।
२० ना ] गगना
२० त् ] रूपि ।
२१ त ] भिन्नया ।
२१ वृत्ते ] वृत्तौ, श्लोके वा ।

। स्वतो यदि; तत्राह परः— अर्थेभ्यः **अन्या जातिः** सत्तासामान्यं **स्वत** आत्मना स्यात् **सती** भवेत् **किम्** इत्यनेन **स्यात्** इत्यनेन वक्ष्यमाणेन /ms सम्बन्धः । अर्था अपि तथैव स्वयं स्युः इति मन्यते । तदनेन द्रव्यगुणयोः अभावात् **आत्मविशेषगुणो धर्मादिः** इति निरस्तम्, [गुण]*कर्मणोरभावात् **आत्ममनःसंयोगजः** इति च । नहि कर्माऽभावे संयोगः; *तत्पूर्वकत्वादस्य । अथवा, देवदत्तं प्रति उपसर्पतां पश्वादीनां पराभ्युपगमेन कर्माऽभावात् ततो धर्माद्यनुमानमनुपपन्नमिति दर्शयति । § 1518

भवन्तु वा यथाकथञ्चित् परस्य अर्थाः, तथापि दोषं दर्शयन्नाह--**अर्थान्तरैः** द्रव्यादत्यन्तं भिन्नैः **द्रव्यं** पृथिव्यादि **स्याद्** भवेद् धवलं सङ्ख्येयादि गन्त्रादिकम् । कैः ? इत्याह--**गुणकर्मभिः** । **गुणैः** रूपादिभिः **कर्मभिः** गमनादिभिः याथासङ्ख्येन गुणैः धवलं * सङ्ख्येयादि कर्मभिः गन्त्रादिकम् । **किम्** इत्येतद् अत्रापि सम्बन्धनीयम्, अन्यथा आत्मादिकमपि स्यात् अविशेषात् । § 1519

309/mkj

ततः किं प्राप्तम् ? इत्याह--**निष्कर्माणि** [इत्यादि]-- § 1520

...24 निष्कर्माणि वा गुणिनः कारकाणि गुणैर्विना ।
समवायेन किंवृत्तिस्तद्वद्देव दुरन्वयम् ॥ २४ ॥§ 1522

कर्मभ्योऽपसृतानि निरस्तकर्माण्येवं वाचा इत्यवधारणे । **कारकाणि** कर्त्रादीनि **गुणिनो** द्रव्याणि सर्वैर्**गुणैर्वा विना** स्युः इत्यनेन गतेन सम्बन्धः, परस्परानापन्ना एव स्युः इति मन्यते । § 1523

ननु नायं दोषः जातितद्वतोर्गुणगुणिनोः कर्मतद्वतोः भेदेऽपि **स** समवायवृत्त्या जात्यादीनां तद्वति वर्त्तनादिति चेत्; अत्राह--**समवायेन** समवाय एव च अवृत्ति **किम्** ? नैव वृत्तिः, कुत्सिता वा वृत्तिः इति, यतः समवायस्य समवायिषु वृत्तौ इह समवायो वर्त्तते इति प्रत्ययः सम्बन्धान्तरनिबन्धनः स्यात्, पुनरपि तदन्तरनिबन्धन इत्यनवस्था, अन्यथा तन्तुषु पटः इत्यादिप्र-

---

१ रः] जैनः ।
३ स्व] सन्तः ।
४ इति] धर्मः पुरुषगुणः--प्रश॰ भा॰ पृ॰ १३८ ।
४ *] गुणपदार्थस्य कर्मपदार्थस्य च ।
५ इ] पुरुषान्तःकरणसंयोगविशुद्धाभिसन्धिजः--प्रश॰ भा॰ पृ॰ १३८ ।
५ च] निरस्तम् ।
५ *] क्रियापूर्वकत्वात् ।
७ र्माद्य] देवदत्तविशेषगुणप्रेरितभूतकार्य्याः तदुपगृहीताश्च शरीरादयः कार्यत्वे सति तदुपभोगसाधनत्वात् गृहवदिति...--प्रश॰ किरणा॰ पृ॰ १४९ । प्रश॰ व्यो॰ पृ॰ ४११ । प्रश॰ कन्द॰ पृ॰ ८८ ।
११ *] लं
१६ वाचा] ण्येव **वा**
१९ स] स इति निरर्थकम् ।
२० त] द्रव्यादौ ।
२१ अवृत्ति] एव **वा वृत्तिः**
२३ त] सम्बन्धान्तर ।

त्ययोऽप्यनेनैव व्यभिचारात् न समवायसाधकः स्यात् । तेषु तदवृत्तौ वा /ms
न कस्यचित् सम्बन्धोऽपरायत्तत्वाद् आकाशवत् । अत एव इहप्रत्ययक-र्तृत्वमपि तस्य **तद्वदेव दुरन्वयम्**, इतरथा संयोगेऽपि प्रसङ्गः असम्बन्धेऽपि इत्येवं युक्तिबाधितं संकीर्त्यते वैशेषिकैः । § 1524

अनेन ***कार्यविरोधी कर्तृफलदायी** इति च निरस्तं बोद्धव्यम् ॥ छ ॥

§ 1525

इति र वि भ द्र पादपङ्कजभ्रमर-अ न न्त वी र्य विरचितायां सि द्धि वि नि श्च य टी का यां जीवसिद्धिः चतुर्थ प्रस्तावः । § 1526

## पञ्चमः प्रस्तावः : ५ वादसिद्धिः

310/mkj

एवम् अनन्तरप्रस्तावद्वयेन अशब्दयोजनं स्मरणादि श्रुतं व्याख्यातम् । यदुक्तमः शब्दैः परमन्यद्योजितं श्रुतम् इति; तत् संप्रति व्याख्यातुम् अवसरप्राप्तम्, तच्च परार्थमिति, परप्रतिपादनाय च तत्प्रयोगे न्यायवादिन-मपि केचिदेकान्तवादिनो वचनाद्युपालम्भच्छलेन पराजयेन योजयन्तः स-मुपलभ्यन्ते तन्निषेधार्थं वादन्यायप्रस्तावं प्रस्तुवन् तदादौ संग्रहवृत्तमाह— **पक्षस्थापनया** इत्यादि । § 1527

...1 पक्षस्थापनया निरस्तविषयं वादे निगृह्णाति न,
स्वाकूतोज्झमसाधनाङ्गवचनादोषोक्तिसंकीर्तनैः ।
स्वार्थं साधितवन्तमस्तविषयस्तूष्णीम्भवन्तं ब्रुवन्,
अन्यद्वा प्रलपन् परेण स समः स्वार्थासाधने ॥ १
॥§ 1531

**पक्षो** व [क्ष्यमाणल]क्षणः तस्य **स्थापना** समर्थनं तथा वादी प्रतिवादी वा **निगृह्णाति** विजयते । क्व ? **वादे** । कम् ? इत्याह--**निरस्तो विषयः** पक्षो

१ नेनैव] इह समवायिषु समवायः इति प्रत्ययेनैव ।
१ तेषु] समवायिषु ।
१ त] असम्बन्धे वा समवायस्य ।
३ स्य] समवायस्य ।
३ प्र] सम्बन्धत्वप्रसङ्गः ।
३ अ] स्वसम्बन्धिषु सम्बन्धाभावेऽपि ।
५ *] कार्यं सुखदुःखादिफलं विरोधि यस्य । अदृष्टे हि स्वकार्यं कृत्वा विनश्यतीति भावः ।
५ दायी] धर्मः इति । द्रष्टव्यम्--पृ० ३०८ टि० ३ ।
५ इति] [There is a footnote reference in the book, but no corresponding footnote.]
२ मः] म्
२ त्] श्रुतम् ।
३ त] शब्दप्रयोगे कर्त्तव्ये सति ।
१० ने] स्वार्थे असंसाधिते

यस्य स तथोक्तः तं वादिनं प्रतिवादिनम् । वादी अन्यथा कुर्वात् भिज्ञाति इत्याह--**न** इत्यादि । **स्वाकूत**शब्देन स्वपक्षः परामृश्यते तस्य **उत्स** त्यागः क्रियाविशेषणमेतत्, **स्वाकूतोज्झा** यथा भवति तथा न निगृह्णाति । पक्ष- /ms स्थापनाहीनो न निगृह्णाति इत्यर्थः । कैः कृत्वा ? इत्याह-- **असाधनाङ्गम्** [न साधनाङ्गम्] असाधनाङ्गम तस्य वचनम्, अथवा **न साधनाङ्गवचनम्** । न दोषोऽ**दोषः** तस्य **उक्तिः**, यदि वा न दोषोक्तिः **अदोषोक्तिः** विद्यमानस्यापि दोषस्य अनुच्चारणम्, **असाधनाङ्गवचनं वादोक्तिश्च** तयोः **संकीर्त्तनानि** प्रकाशनानि तैरिति । कं तैः न निगृह्णाति ? इत्याह— **स्वार्थं साधितवन्तम्** । किंभूतः ? इत्याह--**अस्तविषयः** निरस्तपक्षः । नन्वयमर्थः **स्वाकूतोज्झम्** इत्यनेन उक्तः किमर्थं पुनरुच्यते ? सत्यम् उक्तः, तथापि पूर्वमनाश्रितपक्षो न निगृह्णाति इत्यस्य प्रतिपादनार्थम् । तदुक्तम्-- **यतो वादिना उभयं कर्त्तव्यं स्वपक्षसाधनं परपक्षदूषणं च** इति । जाचं पुनः आश्रितपक्षोऽपि निरस्तविषयो न निगृह्णाति अस्येति विशेषः । इदमपरं व्याख्यानम्--**स्वाकूतो ज्ञानं निगृह्णाति, न च स्वार्थं साधितवन्तं तत्संकीर्तनैः अस्तविषयः** असिद्धमहामहीप्रान्तरितविषयः । § 1532
311/mkj

ननु यद्यपि स्वार्थं साधितवन्तं न निगृह्णाति तर्हि तूष्णींभवन्तं निगृह्णाति इति चेत्; अत्राह--**तूष्णींभवन्तम्** इत्यादि । अत्रादिमतिप्रायः तूष्णींभवन्तं किं परः स्वपक्षं साधयन् निगृह्णाति, किं वा त्वया साधनाभिधाने अधिकारिणापि न किञ्चिदुक्तम् मौनमेव अनुष्ठितम् इत्यद्वा स्वार्थसिद्ध्यनुपयोगि ब्रुवन्, स्वयं तूष्णींभवन् वा ? तत्र प्रथमपक्षे उक्तम्--**पक्षस्थापनया** इत्यादि । द्वितीय आह--**तूष्णीं भवन्तम् न** [इति] सम्बन्धः । किं कुर्वन् ? **ब्रुवन्निति** । ब्रुवन् तूष्णींभावम् उद्भावयन्, **अन्यद्वा** असम्बद्धम् **प्रलपन्** /ms वा पुरुषः । किंभूतः ? **परेण** निग्राह्येण **सम एव** पूर्व एवकारोऽत्र द्रष्टव्यः । कस्मिन् सति तत्समः ? इत्याह--**स्वार्थासाधने** इति । यथैव हि तूष्णींभवतः साधनानभिधाने न स्वार्थसिद्धिः तथा तदुद्भावयतोऽपि अन्यद्वा ब्रुवतः । नहि तदुद्भावनमात्रेण स्वार्थसिद्धिः परस्य । शेषमत्र निरूपयिष्यते । तृतीयेऽप्याह--**सोध्ये** त्याहदि ब्रुवतोऽन्यः इतरः तूष्णींभूतः, सोऽपि

१ वा] कथयन्तम् ।
१ अ] अन्यैः छलादिभिः उपायैः ।
१ भिज्ञाति] कुतो न निगृह्णाति ?
२ उत्स] उज्झा
५ म] ङ्गं
६ म्] साधनाङ्गस्य अवचनम् ।
७ वादोक्तिश्च] च अदोषोक्तिश्च
११ क्षो] वैतण्डिकः ।
११ म्] विजिगीषुणा उभयं कर्त्तव्यं स्वपरपक्षसाधनदूषणम् --अष्टश०, अष्टसह० पृ० ८७ ।
१२ जाचं] अयं
१४ ज्ञानं] तोज्झं न
१५ हीप्रा] पा
१५ यः] असिद्धश्चासौ महामहीपः महाभूपालः तेन अन्तरितः आक्रान्तः विषयः पक्षः यस्य असिद्धपक्ष इति यावत् ।
१७ तिप्रायः] अत्रायमभिप्रायः
१९ द्वा] इति, यद्वा
२६ त] तूष्णींभूतो भवानिति कथनमात्रेण ।
२७ दि] **सोऽप्यन्य** इत्यादि

तूष्णींभवन्तं न निगृह्णाति । केन कारणेन ? इत्याह--**साध्या** करणभूतया इति । § 1533

ननु **वादे निगृह्णाति** इत्युक्तम्, तत् को वादः ? इत्यत्राह--**समर्थवचनम्** इत्यादि । § 1534

...2 समर्थवचनं जल्पं चतुरङ्गं विदुर्बुधाः
पक्षनिर्णयपर्यन्तं फलं मार्गप्रभावना ॥ २ ॥§ 1536

वादिनः तत्त्वप्रतिपादनसामर्थ्यमन्तरेण यथैवोन्मार्गशोधनेन मार्गप्रभावना न संभवति एवं परिषद्बलस्य यथार्हं सत्यदोषनिवेदनसामर्थ्येऽसति । स्वयमेवोद्धृत्य न्यायवादिनमपि व्यापारव्याहाराभ्यां प्रतिक्षिपतां दर्शनात् स्वयमौद्धत्यप्रच्छादनार्थम् । छलजातिनिग्रहस्थानानां भेदो लक्षणं च नेह प्रतन्यते । तैः साधनोपालम्भो जल्प इति केश्चिल्लक्षणात् । ततश्चतुरङ्ग एव जल्पः वचनस्यापि सांकर्य्यं तदन्यतरतत्त्वेतरनिर्णयावसानमेव, न पुनः वक्त्रभिप्रायसूचनम् । साधनदूषणतदाभासव्यवस्थायाः वस्तुतत्त्वप्रतिबन्धात्, वक्त्रभिप्रायसूचनाभिधानस्य सर्वत्राविशेषात् । प्रतिबन्धाभावात् कथं शब्दैः स्वार्थप्रतिपादनमिति चेत्; § 1537

**समर्थवचनं जल्पं विदुः** जानीयुः । के ? इत्याह--**बुधाः** विद्वांसः स म न्त भ द्र स्वा मि प्रभृतयः । यदि तर्हि तेषां जल्पलक्षणपरिज्ञानं किमिति न्यायान्तरवद् वादन्यायो न निर्दिष्टः; तदनिर्देशे च कुतः तत्परिज्ञानं तेषामवगम्यताम् ? वचनलिङ्गा हि वक्तृचेतोविशेषा असर्वविदामिति चेत्; क एवमाह--स तैर्न निर्दिष्टः इति ? यावता-- § 1538

312/mkj

*अन्वर्थसंज्ञः सुमतिः मुनिस्त्वं स्वयं मतं येन सुयुक्तिनीतम् ।
यतश्च शेषेषु मतेषु नास्ति सर्वक्रियाकारकतत्त्वसिद्धिः ॥§ 1540

बृहत्स्व० श्लो० १७ § 1541

इत्यादिना भगवतो न्यायेन प्रतिपाद्यजनप्रतिबोधनं स्तुवद्भिः सर्वत्र तदेव अभ्युपगतमिति ज्ञायते । कणचरादिवत् स्वशास्त्रे क्वचित् छलाद्यन-

---

१ साध्या] स्वाकूतोज्झया

५ स] तुलना--समर्थवचनं वादः । प्रकृतार्थप्रत्यायनपरं साक्षिसमक्षं जिगीषतोरेकत्र साधनदूषणवचनं वादः ।--प्रमाणसं० पृ० १११ । त० श्लो० पृ० २८० । प्रमेयरत्नमा० ६ । ४७ । प्रमाणनय० ८ । १ । प्रमाणमी० २ । १ । ३० ।

१८ त] जल्पपरिज्ञानम् ।

१८ तेषा] समन्तभद्रादीनाम् ।

२० स] जल्पः ।

२५ क] नैयायिकवैशेषिकवत् ।

भिधानाच्च । यो हि स्वयमयुक्तमकुर्वन् परं युक्तकारिणम् अभिनन्दति स लोके अभिमतयुक्तकारिणं त्व इति अवगम्यते । § 1542

कथं पुनः तेनमेस्तस्य तस्सुतम् इति चेत् ? उच्यते--सुमतिः मुनिस्त्व- /ms म् अन्वर्थसंज्ञः अनुगतार्थाऽभिधानवान् । केन कारणेन ? इत्याह--येन कारणेन त्वया इति अध्याहारः, स्वयं मतं स्वपक्षः सुयुक्ता अबाधितयुक्त्या प्रमाणात्मिकया न तच्छलाद्यात्मिकया नीतम् अर्थिजनं प्रापितं स युक्त्या प्रबोधित इत्यर्थः । विपक्षे बाधकमाहुः यतश्च इत्यादि । ततः **पक्षस्थापनया** इत्यादि **वादिना उभयं कर्त्तव्यम्** इत्यभिदधानेन उक्तं न वेति परीक्षकाः चिन्तयन्तु । यदि युक्तम्; किमिति तैः वादन्यायो नोक्तः ? तेषामेव च सूत्रकृतां भगवतां प्राकृतजनावेद्याभिप्रायः सूरिणा अ क ल ङ्क न वा र्त्ति क का रे ण सप्रपञ्चः प्रकटीक्रियते । § 1543

अथ को वादः इति प्रश्ने किमर्थं **जल्पं विदुः** इति उत्तरमुच्यते वाद-जल्पयोः भेदात् । प्रश्नानुरूपेण च उत्तरेण भवितव्यम् अन्यथा स्वात्पृष्ठः कोऽपि दाराम् आचष्टे इति स्यात् । अथ तयोरभेदः; एवमपि प्रकृतानुरूपं वक्तव्यम् वादं विदुः इति । नव कारिकाभिप्रायेण एवमभिधानाद् अल्प-मतीनां तद्भेदविभ्रमनिवारणार्थम् । अत एव वितण्डापि न कथान्तरम्, जल्पस्य वादादभेदे कथं वितण्डा तद्विशेषः ततो भिद्येत । नहि घटस्य पार्थिवत्वे तद्विशेषाः पदार्थान्तरम् । यदि [वा] वादं विदुः वादे इत्येतद् अनुवर्त्तमानं विभक्तिपरिणामेन इह सम्बध्यते, तन्न जल्पाद् अन्यो वाद इति मन्यते । § 1544

किं तत् जल्पं विदुः ? इत्याह--**समर्थवचनम्** । अथवा कथम्भूतं **जल्पं** वादं **विदुः** ? इत्याह--**समर्थवचनम्** इति । समर्थं चेद् वचनं च । यदि वा, समर्थं वचनमस्मिन् जल्पे तम् इति । किं पुनः वचन समर्थ- /ms म् ? येन स्वयमभिप्रेतोऽर्थः साध्यरूपः साधनरूपः विरुद्धदूषणतल्लक्षणश्च परं प्रति प्रतिपाद्यते वचनेन तत्समर्थम् इति उच्यते । वचनं च यथा अर्थप्रतिपादकं तथा निरूपयिष्यते । तदनेन त्रिरूपलिङ्गवाक्यमेव पञ्चावय-वमेव वाक्यं वाद इति एकान्तं निराकरोति । परप्रतिपादनाय तदुदाहारो न व्यसनेन । तत्र यावता वचनेन तत्प्रतिपत्तिः तावत् समर्थम् इति किं

---

२ त्व] कारी
३ म्] तेन तत्स्तुतम्
५ सुयुक्ता] क्त्या
१० वा] तत्त्वार्थवार्तिककारेण इत्यर्थः । अथवा प्रस्तुतग्रन्थगतमूलश्लोका अपि वार्तिकशब्देन उच्यन्ते, तत्कर्त्रा ।
१२ अ] नैयायिकः प्राह ।
१४ दाराम्] आम्रान् पृष्टः कोविदारान्
१५ व] न च
१६ त] वादजल्पयोर्भेदभ्रमनिराकरणार्थम् ।
१७ त] जल्पविशेषः ।
१७ त] वादात् ।
१८ त] घटविशेषाः ।
२२ चेद्] चेदं
२३ न] नं
२६ मेव] बौद्धाभिमतम् ।
२७ मेव] नैयायिकस्वीकृतम् ।
२७ दुदाहारो] उदाहरणम् उदाहारः कथनमित्यर्थः ।
२८ नेन] परप्रतिपत्तिः ।

नियमेन ? [तेन] **छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः** न्यायसू° १ । २ । २ इति निरस्तम्; छलादीनाम् असमर्थवचनत्वात् । नहि ते स्वयं 313/mkj प्रयुक्ताः स्वपक्षं साधयन्ति साधनवैयर्थ्यप्रसङ्गात्, परत्र च उद्भाविताः परपक्षं निराकुर्वस्य विरोधात् । तत्प्रयोगेऽपि सम्यक्साधनवादिनः साध्यसिद्धेरप्रतिबन्धात् परव्यामोहनार्थम् एकवृत्तम्  अनुष्टेयम् असार्था वरणम् । उभयत्र असिद्धानैकान्तिकोद्भावनमपि तादृगेव, तर्थे  तस्मिन् जल्पे वितण्डाभावः । तथाहि--**स प्रतिपक्षस्थापनाहीनो जल्पो वितण्डा** न्यायसू° १ । २ । ३ इति; तत्र प्रतिपक्षस्थापनाहीनः स्वपक्षसमर्थ[न]रहितश्चेत्; न समर्थवचन इति कुतो जल्पः यतो वितण्डा स्यात् ? अथ वैतण्डिकः परपक्षदूषणाय अवश्यं यतते ततस्तद्दूषणवचनं समर्थवचनम् इत्युच्यते; तदपि न सारम्; यतः स्वपक्षसिद्ध्यभावे परपक्षाऽनिषेधात् । यथाह--**वितण्डा आत्मतिरस्कारः** इति चेत्; अयं परस्यैव दोषोऽस्तु । § 1545

यदि मतं समर्थवचनस्य जल्पत्वे व्याख्यानादिषु अतिप्रसङ्ग इति; तत्राह--**चतुरङ्गम्** इति । यदि वा, कथं जल्प एव वादः तयोर्विषयभेदाद्, विजिगीषुविषयः  जल्पो न वादः अस्य शिष्टादिविषयत्वात् इति; तत्राह-- /ms **चतुरङ्गम्** इति । चत्वारि वादि-प्रतिवादि-प्राश्निकपरिषद्वललक्षणानि अङ्गानि, नावयवाः, वचनस्य तदनवयवत्वात् । § 1546

द्वितीये तु व्याख्याने अङ्गशब्दो अवयववाची संभवति, **चतुरङ्ग समर्थवचनं जल्पं वादं विदुः** इति । [वादि]प्रतिवादिवचनात् न व्याख्यानादिषु समर्थवचनं जल्प इति दर्शयति तत्र तदभावात् । सभा  सभापतिवचनात् तस्य विजिगीषुविषयताम् अन्यथा व्याख्यानादिवत् तत्परिग्रहवैफल्यम् ।

---

२ ते] छलादयः ।
४ स्य] न्त्य
४ विरोधात्] परपक्षेण सह विरोधाभावात् ।
४ त] छलादिप्रयोगेऽपि ।
५ म्] एतद्वृत्तम्
५ असार्था] असामर्थ्या
६ र्थे] तदर्थे
७ स] जल्पः । यत्र विजिगीषुः विजिगीषुणा सह लाभपूजाख्यातिकामः जयपराजयार्थं प्रवर्तते सा विजिगीषुकथा । विजिगीषुकथा जल्पवितण्डासंज्ञोक्ता ।--न्यायसा° पृ° १६ । न्यायकलि° पृ° १३ ।
१५ त्वात्] तत्र वादो नाम यत् परस्परेण सह शास्त्रपूर्वं विगृह्य कथयति । स वादो द्विविधः संग्रहेण जल्पो वितण्डा च ।--चरकसं° पृ° २६२ । वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः कथा । सा द्विविधा--वीतरागकथा विजिगीषुकथा चेति । यत्र वीतरागो वीतरागेणैव सह तत्त्वनिर्णयार्थं साधनोपालम्भौ करोति सा वीतरागकथा वादसंज्ञया उच्यते ।--न्यायसा° पृ° १५ । वादो नाम वीतरागयोः पक्षप्रतिपक्षपरिग्रहपूर्वकः प्रमाणतर्कपूर्वकसाधनोपालम्भप्रयोगे क्रियमाणे एकपक्षनिर्णयावसानो वाक्यसमूहः ।--न्यायकलि° पृ° १३ ।
१६ प्राश्निक] उक्तं च--स्वसमयपरसमयज्ञाः कुलजाः पक्षद्वयस्थिताः क्षमिणः । वादपथेष्वभियुक्तास्तुलासमाः प्राश्निकाः प्रोक्ताः ॥--न्यायप्र° वृ° पृ° १४ । प्रमाणमी° पृ° ६३ । न्यायता° दी° पृ° १५८ ।
१८ ङ्ग] ङ्गं
१९ र्थं] र्थ
२० त] वादिप्रतिवाद्यभावात् ।
२० भा] सभ्य
२१ ताम्] दर्शयति ।

एतावदेव च वादस्यापि निग्रहवतो रूपमिति कथं तयोः विषयभेद इति ? § 1547

एतेन एकस्य वादिप्रतिवादिभेदकल्पनेऽपि न तद्वचनं जल्प इत्युक्तं भवति । यदि तद्वचनं जल्पः तदनवसानम् तन्नियमकारणस्य असाधनादिः अवचनादिति चेत्; अत्राह— **पक्षनिर्णयपर्यन्तम्** इति । **पक्षस्य** विवाद-गोचरार्थस्य **निर्णयः** विप्रतिपत्तिपरिहारेण अवस्थानं **पर्यन्तो** यस्य स तथोक्तः तम् इति न वादिप्रतिवादिगुणदोषसंकीर्तनपर्यन्तमिति भावः । § 1548

ननु यदि वादिसम्बन्धिपक्षनिर्णयपर्यन्तम् इति गृह्यते जल्पाप्रवृत्तिः, 314/mkj पूर्वमेव तन्निर्णय भावात्, स्वनिश्चयवद् अन्यस्य निश्चयोत्पादनाय तद्धेतुप्रयोगात्, इतरथा गोपालवत् कुतस्तस्य जल्पे विकारः । एतेन प्राश्निक-तन्निर्ण[य]पर्यन्तमिति चिन्तितम् **सिद्धान्तद्वयवेदिनः** इति वचनात् निर्ज्ञातोभ-यपक्षाणामेव प्राश्निकत्वात् । पार्थिवः पुनः पार्थिव इव न सर्वः स्वयं तन्निर्णयवान् तन्निर्णयपर्यन्तम् इति च दुरवगाहम् । नापि प्रतिवादितन्निर्ण-/ms यपर्यन्तम् इत्युपपन्नम्; स्वदुरागमाहितदृढविभ्रमस्य प्रतिवादिनः प्रतिपद्य मानस्यापि तन्निर्णययोगात् । तन्न युक्तं **पक्षनिर्णयपर्यन्तम्** इति चेत्; न सुन्दरमेतत्; यतः साध्याविनाभाविसाधनप्रयोगोपन्यासाद् अपहाय प्ररूढम-पि व्यामोहं प्रतिवादिनः परपक्षं प्रतियन्तः प्रतीयन्ते अभिमानिनोऽपि, आतुरा इव परमौषधम् । येऽपि च केचिन्न प्रतियन्ति खलमतयः तदपेक्षया तदुप-न्यासजनितः सत्यनिर्णयो [ज्ञातो]भयकृतान्तानाम् अन्यवचनात् प्रतिपत्तिः * जायते, इतरथा जन्मनसि वादीतरगुणदोषप्रति[पत्ति]विश्ववैधुर्यात् कुतो *निकषोपलम्भसमा नत्वं यतस्तदपेक्षा स्यादिति । § 1549

किं पुनरस्य फलम् ? इत्याह--**फलं जल्पस्य** इत्यनुवर्त्तते । किम् ? इत्याह--**मार्गस्य** सम्यग्ज्ञानादेः **प्रभावना** प्रकाशनम् । § 1550

---

१ त] वादजल्पयोः ।
३ न] समर्थवचनम् ।
४ म्] अपरिसमाप्तिः ।
५ नादिः] असाधनाङ्गादेः
९ मेव] वादिपक्षस्य निर्णीतत्वादित्यर्थः ।
९ स्व] तुलना--स्वनिश्चयवदन्येषां निश्चयोत्पादनं बुधैः । परार्थं मानमाख्यातं वाक्यं तदुपचारतः ॥ --न्यायावता० श्लो० १० ।
१० था] स्वपक्षनिर्णयाभावे ।
१० विकारः] जल्पेऽधिकारः
११ त] पक्षनिर्णय ।
११ व] अपक्षपतिताः प्राज्ञाः सिद्धान्तद्वयवेदिनः । असद्वादनिषेद्धारः प्राश्निकाः प्रग्रहा इव ॥ इत्येवंविधप्राश्निकांश्च... ...--प्रमेयक० पृ० ६४९ ।
१२ पार्थिवः] राजा, सभापतिपदे स्थितः ।
१३ वान्] अतः ।
१३ त] सभापतिपक्षनिर्णयान्तम् ।
१५ द्य] पाद्य
१५ य] या
१८ त] अविनाभाविसाधनप्रयोगजनितः ।
१९ कृतान्तानाम्] प्राश्निकादीनाम् ।
१९ नात्] वादिवचनाज्जायमानायाः प्रतिपत्तेः सकाशात् ।
२० *] त्तेः
२० न] [[प्राश्निकादिचेतसि ।]]तन्मन
२१ *] कसौटी इत्याख्यः पाषाणः सुवर्णपरीक्षणोपयोगी ।
२१ मा] षोपलसमा
२१ पेक्षा] प्राश्निकाद्यपेक्षा ।

ननु तत्त्वस्य आत्मादेः अध्यवसायः कुतश्चित् स्वयं निर्णयः तस्य दस्युभ्यः सौगतादिभ्यः संरक्षणं तत्फलमस्तु **तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्** न्यायसू० ४ । २ । ५० इति वचनादिति चेत्; यदि प्रमाणतः तत्संरक्षणम्; अनुकूलमाचरसि प्रमाणविषये प्रवृत्तेः, तत एव तत्प्रकाशनस्य अवश्यंभावात् । *अन्यतश्चेत्; तन्न युक्तमिति निवेदयिष्यते । दस्यवोऽपि यदि प्रमाणतः तन्निराकुर्वन्ति न छलादिचचनादप्रमाणकात् तस्य त्राणं प्राश्निकाः पक्षपातरहिताः तत्त्ववेदिनो मन्यते । यदि सप्रमाणकात्; स्वत एव तद्रक्षितम्, किं तत्र छलादिप्रयासेन ? दैवरक्ता हि हिंसकाः [किंशुकाः केन रज्यन्ते नाम] । § 1551

ननु च वादिना प्रतिवादी सभ्याश्च प्रतिपादनीयाः न सभापतिः सुकुमारप्रज्ञः, ततः किं तेन इति त्र्यङ्गं जल्पं विदुः इत्येवास्तु इति चेत् अत्राह--**वादि** /ms
इत्यादि । **वादिनः** प्रतिवादिप्राश्निकयोः **तत्त्वप्रतिपादनसामर्थ्यम्** उपलक्षणमेतत् तेन प्रतिवादिप्राश्निकयोः तत्त्वप्रतिपादनसामर्थ्यम् इत्यपि गृह्यते **तदन्तरेण यथैव** येनैव प्रतिपाद्यप्रतीत्योः अभावप्रकारेण **उन्मार्गस्य** एकान्तस्य **शोधनेन** अपसारणेन **मार्गप्रभावना न संभवति** वक्ष्यमाणविधिना । **एवं परिषद्बलस्य** राज्ञः **यथार्हं** यथायोग्यं **सत्ये,** राज्ञे वादिप्रतिवादिनं **दोषनिवेदने सति** *तेन एवं त्वया स्थातव्यम्, त्वया एवं सभ्यैश्च यथावृत्तमेव अस्मि 315/mkj
निवेदनीयम् इत्यलङ्घ नीयमाज्ञापनं कर्त्तव्यम्, तत्र **सामर्थ्येऽसति** पुनर्न स्यात् तच्छोधनेन तत्प्रभावना इति । कुतः ? इत्याह--**स्वयमेव उद्धृत्य** इत्यादि । **न्यायवादिनमपि** न्यायं वदति इत्येवंशीलगुणमपि वादिनं प्रतिवादिनं **प्रतिक्षिपतां दर्शनात्** । काभ्याम् ? इत्याह--**व्यापारव्याहाराभ्याम्** अहो पुरुषिकया । किमर्थम् ? इत्याह--**स्वयम्** आत्मना वा **अद्धत्य प्रच्छादनार्थम्** । ननु सभ्याः तन्निवारकाः, तान् उल्लङ्घयन्तं क्षिपतां दर्शनात् इति मन्यते । न्यायशास्त्रमेव तर्हि नियामकमिति चेत्; अत्राह--**छल** इत्यादि । **वचनविघातोऽर्थविकल्पोपपत्त्या छलम्** न्यायसू० १ । २ । १० **दूषणाभासास्तु जातयः** न्यायबि० ३ । १४० **विप्रतिपत्तिप्रतिपत्तिश्च निग्रहस्थानम्** न्यायसू० १ । २ । १९ एषां **भेदो लक्षणं च नेह प्रतन्यते** विस्तरभयाद् अन्यत्रैव तद द्रष्टव्यम् इति **केचित् तैः साधनम् उपालम्भश्च** यस्मिन् स तथोक्तः । कोऽसौ ? इत्याह--**जल्प** इत्येवम् वादात् पृथ-

---

५ एव] मार्गप्रकाशनस्य ।
५ *] छलादितः ।
६ तः] स्वकृततत्त्वाध्यवसायम् ।
७ कात्] क्रियमाणं ।
७ स्य] संरक्षणम् ।
८ कात्] यदि सौगतादयः सप्रमाणकवाक्यात् तत्त्वं निराकुर्वन्ति ।
११ तेन] सभापतिना ।
१६ तिवादिनं] नां
१७ *] राज्ञा ।
१८ त] आज्ञापने ।
१९ त] मार्गप्रभावना ।
२१ तिवादिनं] नां
२३ त्य] औद्धत्य
२८ केचित्] केश्चित्[[नैयायिकैः ।]]
२९ ल्प] यथोक्तोपपन्नः छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः--न्यायसू० १ । २ । २ ।

/ms गेव जल्पस्य **केश्चित्** नैया यिकादिभिः **लक्षणात्,** ताभ्यां तं प्रतिपक्षिपतां दर्शनाद् इति सम्बन्धः । § 1552

छलादीनाम् आक्रोशचपेटादिसमत्वादिति मन्यते । तथाहि--आढ्योऽयं नवकम्बलवत्त्व इत्युक्ते स प्रतिवादी उद्भावयति मा अस्य नव कम्बलाः किन्तु एकः इत्यसिद्धो हेतुरिति; त चिन्त्यते--किं सम्यक् साधनप्रयोगे पुरः स ए तदुद्भावने प्रतिवादिनः पराज विपरीते वा ? तत्राद्यपक्षे स्वपक्षसिद्ध्यैव वादी प्रतिवादिनं विजयते किमन्येन ? यदि पु द्विर्बद्धं सुबद्धं भवति इति तदुद्भावनेनापि;* तदसत्यम्; युक्त्या निगृहीते तद्वैफल्यात्, *वि पयोगमृते सत्तोमहि तद्व्यापादनाय स्वल्पचपेटादिकं युञ्जते । कथश्चैवं हेत्वन्त निग्रहस्थानं न दूषणान्तरोद्भावनम् इति विभागः, यतो वादिनो युगपत् जयपराजयौ स्याताम् ? तस्मात् नवकम्बलत्वादि [ति]हेत्वर्थस्य विवक्षितत्वात् नायमसिद्धो हेतुः । प्रकरणा भिश्च अनेकार्थेषु शब्देषु नियतार्थसंप्रत्ययः कर्त्तव्यः, अन्यथा सर्वशब्दानामनेकार्थत्वात् सर्वो एवं हेत्वादिः दुष्टः स्यात् नास्त्यत्र सीतस्यसो धूमकेतोः--शिखिनः इत्यादि प्र
316/mkj गेऽपि तदुद्भावनसंभवादिति । एवमसौ निवारणीयो न तावता निग्रहणीयः, समीचीनसाधनप्रयोगवैफल्यम् अन्यथा स्यादिति । भावे च सकृत् जयपराजयौ वादिनः । किं पुनरेवंवादिना तदुद्भावनं न कर्त्तव्यम् ? न निग्रहबुद्ध्या प्रकृतदोषात् अपि तु निवारणबुद्ध्या इति ब्रूमः । अनुद्भावने को दोषः ? न कश्चित्, यदि हेतुं समर्थयते । निग्रहः इत्यपरे; तदसाम्प्रतम्;
/ms यतः प्रतिवादिप्रयुक्तछलानुद्भावनं वादिनः पराजयाधिकरणं यदि स एव

---

३ छ] तुलना--तत्त्वरक्षणार्थं सद्भिरुपह व्यमेव छलादि विजिगीषुभिरिति चेत्; नखचपेटशस्त्रप्रहारादीपनादिभिरपि इति वक्तव्यम् । तस्म ज्यायानयं तत्त्वरक्षणोपायः ।--वादन्या° पृ° ७१ । लकुटचपेटादिभिस्तन्न्यक्कारस्यापि तत्त्वाध्यवसा संरक्षणार्थत्वानुषङ्गात् ।--न्यायकुमु° पृ° ३३८ ।

३ आ] नवकम्बलोऽयं माणवक इति प्रयोगः । अत्र कम्बलोऽस्येति वक्तुरभिप्रायः । विग्रहे तु विशेषो न समासे । तत्रायं छलवादी वक्तुरभिप्रायादविवक्षि मन्यार्थम्--नव कम्बला अस्येति तावदभिहितं भवता इति कल्पयति । कल्पयित्वा चासंभवेन प्रतिषे एकोऽस्य कम्बलः कुतो नव कम्बलाः इति ? तदिदं सामान्यशब्दे वाचि छलं वाक्छलमिति । अस्य प्रत्यवस्थानम्...। सोऽयमनुपपद्यमानार्थकल्पनया परवाक्योपालम्भो न कल्पते इति ।--न्यायभा° १ । २ । १२ । चरकसं° पृ° २६६ । उपायहृ° पृ° १५ । न्यायासा° पृ° १६ । न्यायकालि° पृ° १६ ।

६ ए] प्रयोगपुरस्सरे

६ ने] छलाद्युद्भावने ।

८ *] प्रयोजनम् ।

८ निगृहीते] प्रतिवादिनि ।

९ *] छलादिप्रयोगवैयर्थ्यात् ।

९ वि] अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्--न्यायसू° ५ । २ । ६ ।

९ हि] शत्रौ नहि

१० म्] निग्रहस्थानमिति ।

१४ सो] शीतस्पर्शो

१४ केतोः] अग्नेः इत्यस्यार्थे शिखिनः इति प्रयोगे क्रियमाणे कश्चित् शिखिशब्दं मयूरार्थकं मत्वा दूषयेत् ।

१५ त] छलोद्भावन ।

१५ ताव] अनेकार्थकशब्दप्रयोगमात्रेण ।

१७ त] छलोद्भावनम् ।

१९ रे] नैयायिकाः ।

२० र] तदा स्यात् यदा ।

२० स] प्रतिवादी ।

मया प्रयुक्तं छलं कृपया नोद्भावितमिति पर्यनुयोज्योपेक्षणात् निगृहीतोऽसि इति व्यवस्थापयेत्; तर्हि तस्यैव तदुद्भावने स्वयं स्वदोषोद्भावनात् । अस्ति वा स्वभावतदुद्भावनावस्थयोः विशेषः ? दृश्यन्ते हि स्वयम् उद्भावितेनापि दोषेण निगृह्यमाणाः चौरप्रभृतयः । **को हि स्वं कौपीनं विवृणुयात्** इति वचनात् स्वयं तदुद्भावनायोगाच्च । अथ सभ्याः; ते तर्हि यथा तदनुद्भावनं तस्य पराजयं व्यवस्थापयति तथा समीचीनसाधनवचनं जयमपि व्यवस्थापयन्तु । सह जयेतरौ स्यातामिति चेत्; *जाल्पिकस्यैव अयं दोषोऽपरोऽस्तु । अथ तदनुद्भावनदोषैः न साधनसमीचीनता स्यात्, स दोषोऽपि मा भूत्; अहो मध्यस्थाः प्राश्निकाः यदल्पदोषेण महागुणमपि साधनमसमीचीनं मन्यन्ते, न पुनः तद्गुणेन अल्पदोषम् अदोषम् इति । तन्न आद्यपक्षे समीचीनसाधनप्रयोगपुरस्सरे छलोद्भावने वादी परं विजयत इति । § 1553

नापि द्वितीये, द्वयोः समत्वात् कस्य विजयः ? अपरस्यापि पराजयो वा स्यात् ? यथैव प्रतिवादिनः छलप्रयोगो दोषः तथा वादिनः साधनाभासप्रयोगः । यदि प्रतिवादी तदुद्भावयेत् तथैव, अन्यथा स एव पराजयवान् स्यात् यदि वादी जयवान् न चेत्, तयोः परस्परापेक्षत्वात् । भवति इति चेत्; तत्र प्रतिवादिनः पर्यनुयोज्योपेक्षणमनुद्भाव्यते; तर्हि सोऽपि वा नो दोषमनुद्भाव्य जयति इति पुनरपि सकृत् जयेतरौ । यदि उद्भाव्य; वादी एव जीयते इत्युक्तं स्वदोष प्रकाशनात् । अथ प्राश्निकाः वादिदोषानुद्भावनं प्रतिवादिनो निग्रहं कल्पयन्ति; ते एव वादिनः साधनाभासवचनेन प्रतिवादिनः छलवचनेन इति तदवस्था युगपद् द्वयोर्जयेतरव्यवस्था । अथ तयोः परस्परदोषोद्भावनं प्रतीक्ष्य जयेतरव्यवस्थां ते विरचयन्ति; *तदनुद्भावने का वार्त्ता ? *तयोः साम्येन व्यवस्थापनमिति चेत्; कुत एतत् ? अन्यतरस्यापि पक्षाऽसिद्धेरिति चेत्; तदुद्भावनेऽपि तदेव अस्तु विशेषाऽभावात्, अन्योऽन्यदोषोद्भावनविशेषभावेऽपि प्रकृततत्त्वाऽपरिसमाप्तेः । नापि प्रत्येकं जयेतरप्राप्तिपरिहारः । § 1554

/ms

१ या] प्रतिवादिना ।
१ या] त्वया[[वादिना ।]]
१ प] निग्रहप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ।--न्यायसू° ५ । २ । २१ । निग्रहस्थाने कृतेऽपि निगृहीतोऽसि इति अवचनात् ।
२ स्यैव] प्रतिवादिन एव ।
२ ने] स्वकृतछलाद्युद्भावने ।
४ इति] तुलना--एतच्च कस्य पराजय इत्यनुयुक्तया परिषदा वचनीयम्, न खलु निग्रहं प्राप्तः स्वकौपीनं विवृणुयादिति ।--न्यायभा° ५ । २ । २१ ।
५ भ्याः] वादिनः छलाद्यनुद्भावनमुद्भावयन्ति ।
५ स्य] वादिनः ।
६ ति] न्ति
७ *] छलादिप्रयोगं जल्पे स्वीकुर्वतो नैयायिकस्य ।
८ स्यात्] तर्हि ।
८ स] छलाद्यनुद्भावनम् ।
१० पुनः] साधनगुणेन ।
१४ योगः] दोषः ।
१४ तिवादी] साधनाभासमुद्भावयेत् ।
१४ स] प्रतिवादी ।
१५ योः] जय-पराजययोः ।
१८ नं] ने
२० नेन] निग्रहं कल्पयन्तु ।
२१ ते] प्राश्निकाः ।
२१ *] दोषानुद्भावने ।
२२ *] वादिप्रतिवादिनोः ।
२३ देव] साम्येन व्यवस्थापनमस्तु ।

317/mkj

किञ्च, साधनाभाववादिना परस्यछले समुद्भाविते किं तस्य तद्वादिना नष्टा येन जयं व्यवस्थापयन्ति ? तदुद्भावनेन तिरोधानानुष्ठा इति चेत्; तदुद्भावनमपि साधनदोषेस तिरोधानान्नष्टमिव किन्न स्यात् ? एवमेतत्, स दोषो यदि प्रतिवादिनोद्भायोतान् भावने किं स्यात् प्रतिवादिनः ? सतोऽपि दोषस्याऽनुद्भावनं निग्रह इति चेत्; तस्य तद्दयां प्रसक्तम् तन्न वा, अन्यतरं दोषमुद्भाव्य वादिनो जयमिच्छतः अंशेन पर्यनुयोज्योपेक्षणप्रसक्तिः । उभयदोषप्रकाशनेऽप्युक्तम् । एकप्रकाशने नवरि [द्वि]तीयप्रकाशनमिति तत्तच्छलवादिन गृह्णाति । § 1555

ननु यदा छलवादी दोषमुद्भावयति तदा का गतिः ? सकृज्जयेतरप्राप्तिः । यदि वादी छलमुद्भावयेदिति चेत्; तथा वादिनोऽपि तत्प्राप्तिप्रकाशनेऽपि तस्य दोषद्वयमायातम्, छलाप्रकाशं साधनाभासवचनं च । तत्र च चिन्तितं /ms दूषणमनन्तरमेव । तस्मात् न साधनाभासवाद्यपि छलवादिनं विजयते । एतेन पूर्वपक्षवादी छलं वदन् परेण जीयते इति मतं चिन्तितम्, प्रकृतविकल्पद्वये तथैव दोषात् । § 1556

ननु छलं त्रिविधम्--वाक्छलम्, सामान्यछलम्, उपचारछलं चेति । तत्र आद्यस्य व्याख्यानम्--स्त्रत्रम् **अविशेषाभिहितेऽर्थे वक्तुरभिप्रायाद् अर्थान्तरकल्पना वाक्छलम्** न्यायसू° १ । २ । १२ अस्यायमर्थः--अविशेषेण प्रत्यग्र-संख्याविशेषवाचिसामान्यशब्देन अभिहितेऽर्थे नवकम्बलत्वात् इति हेतोः वक्तुरभिप्रायात् तदा उक्त प्रत्यग्रकम्बलात्तदि अर्थान्तरस्य नवसंख्योपेतार्थस्य कल्पना वाक्छलम् । यथा हि एषः नवकम्बलत्वात् इत्युक्ते कुतोऽस्य एककम्बलस्य नव कम्बलाः इति वचनम् । § 1557

सामान्यछलव्याख्यानसूत्रम्--**संभवतोऽर्थस्य अतिसामान्ययोगादसद्भूतार्थ कल्पना सामान्यछलम्** न्यायसू° १ । २ । २३ संभवतः श्रूयमाणस्य अर्थस्य अतिसामान्ययोगात् अनैकान्तिकसामान्ययोगाद् असद्भूतार्थकल्पना तस्य अनेकस्य सामान्यस्य अहेतोः हेतुत्वकल्पना तया वचन व्याख्यातः स नो छलम् । यथा ब्राह्मणोऽयं विद्याचरणसम्पन्नः इत्युक्ते कश्चिदाह--संभव-

---

१ नाभाव] स
१ त] साधनाभासवादिता ।
१ द्वादिना] ता
२ तिरोधानानुष्ठा] नान्नष्टा
३ त] छलोद्भावनमपि ।
३ दोषेस] ण
३ स] साधनाभासदोषः ।
४ ने] नोद्भाव्येत । अनुद्भावने
५ यां] तद्द्वयं
५ वा] अथवा किमपि न स्यादिति भावः ।
८ वादिन] नं नि
१५ त्रिविध] तत् त्रिविधं वाक्छलं सामान्यछलमुपचारछलं चेति ।--न्यायसू° १ । २ । ११ ।
१६ म्] स्त्रयम्
१८ प्र] प्रत्यग्रं नूतनम् ।
१९ उक्त] तदुक्त
१९ दि] लात् यत्
२४ अ] यद्विवक्षितमर्थमाप्नोति च अत्येति च तदतिसामान्यम् । यथा ब्राह्मणत्वं विद्याचरणसम्पदं क्वचिदाप्नोति क्वचिदत्येति ।--न्यायभा° १ । २ । १३ ।
२५ व्याख्यातः] विघातः
२६ नो] सामान्य

ति ब्राह्मणे विद्याचरणसम्पद् इति तत्स्तुतिः । तत्रापरः प्राह--यदि ब्राह्मणत्वं तत्सम्पदो हेतुः ज्ञापकः कारको वाऽस्य; ब्रातोऽपि द्विजः तत्सम्पन्नः स्यादिति । § 1558

उपचारछलव्याख्यानम्--**धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेध उपचारछलम्** न्यायसू॰ १ । २ । १४ अयमत्रार्थः--उपचरितार्थाभिधाने प्र- /ms धानार्थकल्पनया वचनव्याघातः तच्छलमिति । यथा मञ्चाः क्रोशन्ति इत्युक्ते न मञ्चाः क्रोशन्ति किन्तु तद्गताः पुरुषाः इति । तदेतत् त्रिविधमपि छलं छलमात्रम् न निग्रहाय उक्तवत् । § 1559

318/mkj

एतेन जातिरपि व्याख्याता । का पुनरियं जातिः ? **साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः** न्यायसू॰ १ । २ । १८ तत्र प्रत्यवस्थानं जातिः इति जातेः सामान्यलक्षणम् । * प्रक्षणं प्रत्यवस्थानम् प्रत्यवस्थानमात्रं प्रतिषेधाभास इत्येके; तदसत्यम्; प्रत्यवस्थानशब्दस्य उत्तरसामान्यवचनस्य तदाभासे असत्यर्थादौ वृत्तिविरोधात् । न चात्र तदस्ति । § 1560

यत्पुनरत्रोदाहरणमुक्तम्--अनित्यः शब्दः कृतकत्वात् घटादिवत् इत्युक्ते वैशेषिकेण; कश्चिदाह--यथा घटेऽनित्यत्वे सति कृतकत्वं दृष्टं तथा आकाशगुणत्वाभावेऽपि, तत इदमपि प्रसक्तम्--न आकाशगुणः शब्दः कृतकत्वात् घटवत् इति; प्रत्यवस्थानमात्रमेतत्; कथम् ? अप्रस्तुताकारत्वानागुणत्वबाधनेपि अतिन्य त्वाबाधनात् । आगमबाधोऽपि इत्येके । तन्न वैशेषिकस्य सुभाषितम् आगमबाधने सर्वत्र **आगमः प्रतिज्ञा** न्यायभा॰ १ । १ । १ इत्यस्य विरोधात् । न च विभागेन तदागमत्वम्; अन्यत्रापि अनाश्वासापत्तेः । अनेन पूर्वहेतोर्व्याप्तेरखण्डनात् तन्मात्रम् इत्यपरे; तेषामखण्डितप्राप्तिका प्रकृतसाधनसमर्थात् [प्रा] क्तनादेव हेतोः जयेतरव्यवस्थानात् नेदं निग्रहस्थानम्, इतरथा तद्वैफल्यम् । द्वाभ्यां निग्रहेऽपि उक्तम् । कथं वा /ms अनेन तद्व्याप्तेः अखण्डनम्, यावता घटादौ आकाशगुणत्वाभावसहचरितस्य कृतकत्वस्य वचनेऽपि यदि तेतेन तद्व्याप्तिः अनित्यत्वेनापि न स्यात् इत्येवं तत्र प्रतिवादिनः अभिप्रायात् । पव वैशेषिकस्य सहदर्शनाद् अन्यद् व्याप्तिसाधकमस्ति । § 1561

यत्पुनरुक्तम्--आकाशाऽप्रतिपत्तौ अप्रसिद्धविशेषणः पक्षः, शब्दगुणात् तत्प्रतिपत्तौ न तत्प्रतिषेध इति आकाशगुणत्वाभावेन न कृतकत्वस्य व्याप्तिः इति न पूर्वसमानता इति; तन्न युक्तम्; यतः आकाशस्य प्रतिपत्तावपि न शब्दात् प्रतिपत्तिः इति निरूपयिष्यते, ततो यत्किञ्चिदेतत् । § 1562

१ त] ब्राह्मणस्य प्रशंसा ।
२ ब्रातोऽपि] व्रात्योऽपि[[असंस्कृतोऽपि ।]]
२ द्विजः] विद्याचरणयुक्तः ।
११ *] एतदन्तर्गतः पाठो द्विर्लिखितः ।
११ मात्रं] नमत्र
१३ दाभासे] उत्तराभासे ।
१३ त्य] त्या
१५ आ] यतो न घटः आकाशगुणः ।
१८ अतिन्य] अप्रस्तुताकाशगुणत्वबाधनेऽपि अनित्य
२२ प्राप्तिका] व्याप्तिकात्
२५ तेतेन] ते न
२६ व] न च

तस्या विभागार्थम् **साधर्म्यवैधर्म्याभ्याम्** न्यायसू° १ । २ । १८ इत्येतत् । साधर्म्येणोक्ते हेतौ प्रत्यवस्थानं दर्शयति भाष्यकारः--**उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः** न्यायसू° १ । १ । ३५ इति, अस्य उदाहरणवैधर्म्येण प्रत्यवस्थानं जातिः इति शेषः । तत्र उदाहरणम्--क्रियावान् आत्मा क्रियाहेतुगुणयोगत्वात् लोष्टवत् इति । अत्राह परः--यदि क्रियावद्द्रव्यसाधर्म्यात् क्रियाहेतुगुणसम्बन्धात् तथा आत्मा साध्यते; तर्हि तद्द्रव्यदभु त्वाद् अक्रियत्वमस्यास्तु विशेषाभावादिति । एतच्च असदुत्तरं पूर्वहेतुव्याप्त्यखण्डनात् । उपलक्षणमेतत्, तेन उदाहरणसाधर्म्येणापि प्रत्यवस्थानं जातिः । तद्यथा--निष्क्रिय आत्मा विभुत्वाद् आकाशवत् इति, अत्र प्रत्यवस्थानम्--सक्रिय आत्मा क्रियाहेतुगुणयोगित्वात् लोष्टवत् अविशेषात् इति । एतदपि
/ms तत एव असदुत्तरम् । वैधर्म्येणोक्ते हेतौ प्रत्यवस्थानं दर्शयति स एव उदाहरणवैधर्म्यात् साध्यसाधनं हेतुः इत्यस्य उदाहरणसाधर्म्येण प्रत्यवस्थानं जातिः इति शेषः । यथा न चेतनायतनं तृणादयः प्राणादिरहितत्वात्, यत् पुनः चेतनायतनं तत् प्राणादिमद् दृष्टं [यथा] जीवच्छरीरम् इत्यत्र यदि जीवच्छरीर[वैधर्म्यादचेतनत्वं तर्हि तत्]साधर्म्यात् मूर्त्तत्वात् तृणादीनां चेतनत्वमस्तु विशेषहेत्वभावात् इति । उपलक्षणमेतत्, तेन उदाहरणवैधर्म्यात् साध्यसाधनं हेतुः इत्यस्य उदाहरणवैधर्म्येणापि प्रत्यवस्थानं जातिः इति । तत्रोदाहरणम्--अनित्यः शब्दः कृतकत्वात्, यदनित्यं न भवति [न तत् कृतकं] यथा आकाशम् इत्युक्ते पर आह--यदि नित्यवैधर्यात् कृतकत्वाद् अनित्यः शब्दः तर्हि अनित्यवैधर्म्याद् अस्पर्शवत्त्वात् नित्योऽस्तु । कथिता जातिः । *निग्रहस्थानानि पुनरत्रैव यथावसरं कथयिष्यन्ते । § 1563

---

319/mkj १ स्या] जातेः ।

१ इ] साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ।--न्यायसू° १ । २ । १८ ।

२ कारः] साधर्म्येणोपसंहारे साध्यधर्मविपर्ययोपपत्तेः साधर्म्येणैव प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुतः साधर्म्यसमः प्रतिपेधः । निदर्शनं क्रियावानात्मा द्रव्यस्य क्रियाहेतुगुणयोगात् । द्रव्यं लोष्टः क्रियाहेतुगुणयुक्तः क्रियावान् तथा चात्मा तस्मात् क्रियावानिति । एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते निष्क्रिय आत्मा विभुनो द्रव्यस्य निष्क्रियत्वात् । विभु च आकाशं निष्क्रियं च, तथा चात्मा, तस्मान्निष्क्रियः इति । न चास्ति विशेषहेतुः क्रियावत्साधर्म्यात् क्रियावता भवितव्यं न पुनरक्रियसाधर्म्यान्निष्क्रियेणेति विशेषहेत्वभावात् साधर्म्यसमः प्रतिषेधो भवति ।--न्यायभा° ४ । १ । २ ।

५ त्वात्] क्रियाहेतुगुणः अदृष्टम् ।

६ त] क्रियावान् ।

६ भु] तद्वद् विभु

११ त] पूर्वहेतोः व्याप्तेरखण्डनादेव ।

११ स] भाष्यकारः । वैधर्म्येण चोपसंहारे निष्क्रियः आत्मा विभुत्वात् । क्रियावद् द्रव्यमविभु दृष्टं यथा लोष्टः, न च तथात्मा तस्मान्निष्क्रियः इति । वैधर्म्येण प्रत्यवस्थानं निष्क्रियं द्रव्यमाकाशं क्रियाहेतुगुणरहितं दृष्टम्, न तथा आत्मा तस्मान्निष्क्रिय इति । न चास्ति विशेषहेतुः क्रियावद्वैधर्म्यात् निष्क्रियेण भवितव्यं न पुनरक्रियवैधर्म्यात् क्रियावतेति विशेषहेत्वभावात् वैधर्म्यसमः । अथ वैधर्म्यसमः--क्रियाहेतुगुणयुक्तो लोष्टः परिच्छिन्नो दृष्टः, न च तथात्मा तस्मान्न लोष्टवत् क्रियावानिति । न चास्ति विशेषहेतुः क्रियावत्साधर्म्यात् क्रियावता भवितव्यं न पुनः क्रियावद्वैधर्म्यादक्रियेणेति विशेषहेत्वभावाद् वैधर्म्यसमः ।--न्यायभा° ५ । १ । २ ।

२१ *] विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ।--न्यायसू° १ । २ । १९ ।

निगमयन्नाह--ततः **चतुरङ्ग** इत्यादि । **समर्थवचनं जल्पं विदुः** इत्युक्तम् । तत्र किं तस्य साधर्म्यम्  ? इत्याह--**वचनस्यापि** इत्यादि । **वचनस्यापि** न केवलम् अध्यक्षलिङ्गयोरेव **सामर्थ्यम्** अस्ति इति वाक्यशेषः । किम्भूतम् ? इत्याह--**तदन्य** इत्यादि । तच्छब्देन वादिप्रतिवादिनोः तत्त्वे प्रकृते परामृश्येति[ते इ]ति **तदन्यतरस्य** वादित्वम्  **तत्त्वस्य इतरस्य** वा यो **निर्णयः** स एव **अवसानं** पर्यन्तं यस्य तत् तथोक्तं न इतरकल्पितम् इति **एवकारार्थः** । वक्त्रभिप्राय सूतमेव  तत् तस्येति चेत्; तत्राह--**[न] पुनः** नैव **वक्त्रभिप्रायसूचनम्** । एवकारोऽत्रापि द्रष्टव्यः अवधारणार्थो वा पुनःशब्दोऽत्र । कुतः ? इत्याह— **साधन** इत्यादि । **साधनं** च **दूषणं** च **तदाभासश्च** साधनदूषणमात्रं  तेषां **व्यवस्था** अभिधानविकल्पात्मिका स्थितिः **तस्या वस्तुत्व प्रतिबन्धात्** । अस्याऽयमर्थः--वस्तु परमार्थसत् यत् साधनादितत्त्वं तत्र प्रतिबन्धाद् आयत्तत्वात् । एतदुक्तं भवति--साधनादिविकल्पः तद्विषयः, अन्यथा ततः तत्सिद्धेः तद्व्यवहारोच्छेदः, अविकल्पनिषेधात् । अनिषेधेऽपि [न] ततोऽपि, इतरथा अकिञ्चित्करादेरपि तत्सिद्धेः कृतकः शब्दः अनित्यत्वात् घटादिवत् इत्यपिस्यात् । तद्विकल्पप्रभवाश्च नितरां तद्विषयाः, इति निराकृतमेतत्--**विकल्पयोनयः शब्दाः** इत्यादि । § 1564 /ms

320/mkj

**वक्त्रभिप्राय** इत्यादिना परमतमाशङ्कते दूषयितुम् । **वक्तुः** साधनादिवादिनः **अभिप्रायः** साधनादिविकल्पः सूच्यते अभिलप्यते येन **तत्सूचनम् अभिधानं** तयोः समाहारलक्षणो द्वन्द्वः तस्य **सर्वत्र** साधनादिसद्भाववत् तदभावेऽपि **अविशेषात्** । एतदपि कुतः ? इत्याह--**प्रतिबन्धाभावात्** साधनादिभिः सह वक्त्रभिप्रायसूचनस्य तादात्म्य-तदुत्पत्तिलक्षणाऽविनाभावा [भावा] त् कारणात् **कथं शब्दैः** उपलक्षणमेतत्, तेन विकल्पैः **स्वार्थस्य** साधनादिलक्षणस्य **प्रतिपादनमिति चेत्**; अत्र परस्य स्ववचनविरोधं दर्शयितुं कारिकां **नोपनेयम्** इत्यादिकामाह-- § 1565

...3 नोपनेयं क्वचित् किञ्चिदसिद्धं नापनीयते ।
वाचाऽङ्गं सूच्यते चेति वक्ता कथमनाकुलः ॥ ३ ॥§ 1567

२ म्] सामर्थ्यम्
५ म्] वादिनः
७ मेव] सूचनमेव
१० मात्रं] णतदाभासाः
११ त्व] तत्त्व
१२ त्र] वस्तुनि ।
१३ त] वस्तुविषयः ।
१३ त] वस्तुसिद्धेः ।
१४ तोऽपि] अविकल्पाद् वस्तुसिद्धिः ।
१६ इ] विकल्पाः शब्दयोनयः ।
तेषामन्योऽन्यसम्बन्धो नार्थान् शब्दाः स्पृशन्त्यमी । इति शेषः । --न्यायकुमु॰ पृ॰ ५३७ टि॰ ७ ।

शब्दाः कथं कस्यचित् साधनमिति ब्रुवन् कथमवधेयवचनः ? तत्कृतां तत्त्वसिद्धिमुपजीवतीति साधनाङ्गवचनाद् भूतदोषोद्भावनाद्वा । शक्तस्य सूचनं हेतुवचनं स्वयमशक्तमपि, साध्योक्तिः पुनः पारम्पर्येण नालमिति परः प्राकृतशक्तिः । § 1568

**क्वचित्** शब्दादिधर्मिणि **किञ्चिद् असिद्धम्** अनित्यत्वादिकं **नोपनेयं** नोपढौकनीयम् । /ms कया ? **वाचा** अनित्यत्वशब्देन, साधनानर्थक्यम् अन्यथेति मन्यते । तत एव **कुतश्चित्** शब्दादेः **किञ्चित्** नित्यत्वादिकं **नापनीयते** न निराक्रियते **वाचा** न नित्यः इति चचनेन । तदुक्तं वि नि श्च ये--**ते तर्हि क्वचित् किञ्चिद् उपनयतोऽपनयतो वा कथं कस्यचित् साधनम्** इति । किं तर्हि तया क्रियते ? इत्याह--**वाचाऽङ्गं लिङ्गं सूच्यते च परार्थं तु अनुमानं स्वदृष्टार्थप्रकाशनम्** प्र॰ वार्तिकाल॰ ४ । १ इति वचनाद् **इ**त्येवं यो **वक्ता** स **कथम् अनाकुलः** आकुल एव पूर्वापरविरुद्धाऽभिधानात् । **वाचा** इति उपलक्षणम्, तेन विकल्पेनापि **सूच्यते च** इति वा उपलक्षणम्, तेन व्यवसीयते च । § 1569

कारिकां विवरीतुमाह--**शब्दा** इत्यादि । **शब्दाः कथं** न कथञ्चित् **कस्यचित् साधनम् इ**त्येवं **ब्रुवन्** सौगतः **कथमवधेयवचनः** ? कुतः ? इत्याह--**तत्कृतां** शब्दकृतां **तत्त्वस्य सिद्धिं** निर्णीतिम् **उपजीवति इति** हेतोः । एतदपि कुतः इत्याह--सिद्धिः **साधनं** तस्य **अङ्गं** निमित्तम् त्रिरूपं लिङ्गम्; साध्यते अनेन इति वा साधनम्, अस्यां पक्षधर्मत्वादेः अवयवः तस्य **वचनात्** प्रतिपादनात् शब्दैः इति विभक्तिपरिणामेन सम्बन्धः । **भूतस्य** विद्यमानस्य **दोषस्य** असिद्धादेः **उद्भावनाद्वा** । इदमत्र तात्पर्यम्--साधनदूषणवचनेन तदप्रतिपादने साधनाङ्गस्य अवचनाद् दोषस्य च अनुद्भावनाद् अनर्थकवचनाच्च निग्रहप्राप्तिः तद्वक्तुः । प्रतिपादने अयं दोषः अनुषङ्गी इति । § 1570

321/mkj

/ms स्यान्मतम्-- **न ततः किञ्चित् कश्चित् प्रतिपादप्रति प्रतिपद्यतेवा केवलं तैमिरिकद्वयवद् भ्रान्त्या शब्दत इदं मया अयं प्रतिपादितः अहं च प्रतिपन्नः**

---

१ त] तुलना--तत्कृतां वस्तुसिद्धिमुपजीवति न तद्वाच्यतां चेति स्वदृष्टिरागमात्रमनवस्थानुषङ्गात् । --अष्टश॰ अष्टस॰ पृ॰ १३० ।

२ श] पूर्वपक्षः--साध्याभिधानात् पक्षोक्तिः पारम्पर्येण नाप्यलम् । शक्तस्य सूचकं हेतुवचोऽशक्तमपि स्वयम् ॥--प्र॰ वा॰ ४ । १७ ।

१० या] वाचा ।

११ इ] स्वेन दृष्टं स्वदृष्टं वादिप्रतिवादिभ्यां प्रतिपाद्यप्रतिपादकाभ्यां स्वदृष्टस्येत्यर्थः । यदि प्राश्निकाः तेषामधिकारात् । विप्रतिपत्तिनिरासस्तु सामर्थ्यादेव प्रसिद्धः । प्रकाश्यतेऽनेन स्वप्रतीतोऽर्थः परं प्रति । तच्च कायवाग्विज्ञप्तिरूपम् । तत्र स्वदृष्टोऽर्थः त्रिरूपं लिङ्गम् ।--प्र॰ वार्तिकाल॰ ४ । १ ।

१९ अस्यां] सिद्धौ ।

१९ त्वादेः] दिः

२२ त] साधनदूषणरूपपदार्थाकथने ।

२५ तः] शब्दात् । तुलना--अनेन एतदपि निराकृतम्--अद्वैते कथं तिबोधनाय प्रवर्तते इति । स्वपरयोरस्यार्थस्यासिद्धेः । अयं परोऽहं न परः इति स्वसंवेदनमेवैतद् सादयति । नात्र परमार्थतो विभागः--अहं प्रश्नयिता परः कथयति । द्वयोरपि

**इति वक्तुः प्रतिपत्तुश्च बुद्धिः जायते** इति; तन्न सारम्; यतः कथमेवं स्वयं जानन्नेव शाब्दव्यवहारम् अनुबाधेत संयोग्यादिव्यवहारवत् ? यथैवायं ग्यादिलिङ्गं प्रतिबन्धाभावेन सव्यभिचारमुपलभ्य परिहृतवान् तथा शब्दं परिहरेत् । अथ रित्यागे क्षणमपि जीवितुं न शक्यते इति तत्पामः तत एव भविष्यच्छकटाद्यनु *कृत्तिकाद्युदयपरित्यागोऽपि मा भूत् । तथा च **अद्य आदित्योदयात् श्व आदित्य उदे इति नानुमानं व्यभिचारसंभवात्** इति प्लुवते । यदि पुनः व्यवहारी तथाविधादपि लिङ्गादिकं प्रतिपद्यते इति तदर्था तदङ्गीकरणम्; अत एव संयोग्याद्यङ्गीकरणमस्तु । यम् अप्रतिबद्धादपि शब्दात् लिङ्गं प्रतिपादयति न तथाविधाल्लिङ्गात् लिङ्गिनमिति प्राकृतश्च । तैमिरिकोऽपि विज्ञाततैमिरज्ञानमिथ्यात्वो न ततो व्यवहारमारचयति, इतरथा विभ्रमज्ञाने ज्ञा क र स्य पक्षत्रयस्थापनमयुक्तं स्यात्--प्रतिपन्नव्यभिचारो न ततः प्रवर्त्तते अपि तु मानात्, अन्यस्य जातविप्रलम्भस्य तरस्यत प्रमाणम् इति । § 1571

ननु तस्य शब्दादपि वस्तुप्रतिपत्तिं ततः तत्प्राप्तिं मन्यमा तत् ज्ञानं प्रमाणं स्यात्, अयमस्यैव दोषोऽस्तु, अतो लिङ्गादिवत् शब्दादपि अनेन व्यवहारं *तद्वत् तस्य वस्तुतत्त्वप्रतिबन्धोऽभ्युपगन्तव्य इति स्थितम् । § 1572 /ms

भवत्वेतत्, तथापि शब्दो लि[ङ्गं] गमयति न साध्यमिति अत्राह--**शक्तस्य सूचनम्** इत्यादि । **शक्तस्य** साध्यज्ञापने लिङ्गस्य समर्थस्य **सूचनम्** । किम् ? इत्याह--**हेतुवचनं** त्रिरूपलिङ्गवाक्यम् । किम्भूतम् ? इत्याह--**अशक्तमपि** साध्यज्ञा मर्थमपि **स्वयम्** आत्मना इति । साध्यंवचनं किंभूतम् ? इत्याह--**साध्योक्तिः** अनि शब्दः इति प्रतिज्ञावचनम् * **पुनः** न केव- 322/mkj

---

स्वाकारोपरक्तप्रत्ययसंवैतत् न तु विभागः स्वप्नप्रत्ययवत् उन्मत्तप्रत्ययप्रलापवच्च । उन्मत्तस्तर्हि वादी कथं ततोऽद्वैतप्ररपि ? ननु सर्वप्रत्ययप्रलय एवायं प्रवर्तते नात्र प्रतीतेरुदयः । किं तर्हि प्रतिवादिनाऽन्येन वा कर्त्तव्यम् ? क्रियमाणं किञ्चिद् दृश्यते ? --प्र० वार्तिकाल० पृ० २९३ ।

३ ग्यादिलिङ्गं] वैशेषिकाभिमतं । संयोगि समवार्थसमवायि विरोधि च । --वैशे० सू० ३ । १ । ९ ।

३ प्र] अविनाभावाभावेन ।

४ त्पामः] न तत्त्यागः

५ *] भविष्यत्प्रतिपद्येत शकटं कृत्तिकोदयात् । श्व आदित्य उदेतेति ग्रहणं वा भविष्यति ॥--लघी० १४ । कृत्तिकोदयमालक्ष्य रोहिण्यासत्तिक्लृप्तिवत् ।(?")--मी० श्लो० पृ० ३५१ ।

७ त] व्यभिचा ।

८ र्था] र्थं

८ म्] बौद्धः ।

९ त] अविनाभावशून्यात् ।

११ न] पीतशङ्खादिविज्ञानं तु न प्रमाणमेव तथायावाप्तेरभावात् । संस्थानमात्रार्थक्रियाप्रसिद्धावन्यदेव ज्ञानं प्रमाणमनुमानं । तथाहि--प्रतिभास एवं यः स न संस्थानवर्जितः । एवमन्यत्र दृष्टत्वादनुमानं तथा च तत् ॥ येन न कदाचिद् व्यभिचार उपल स यथाभिप्रेते विसंवादात् विसंवाद्यत एव । यस्तु व्यभिचारसंवेदी स विचार्य प्रवर्तते--संस्थानमात्रं वत् प्राप्यते परत्र संदेहो विपर्ययो वा, ततोऽनुमानं संस्थाने संशयः परत्रेति प्रत्ययद्वयमेतत् प्रमामाणं च ।...शब्दविषयं तु ज्ञानमभिप्रायनिवेदनात् प्रमाणं...--प्र० वार्तिकाल० पृ० ५ ।

१२ त] नरस्य न

१६ *] दिवत् ।

१६ त्] शब्दस्य ।

२० साध्यं] ध्य

२१ *] शब्दत्यागे ।

लं साधनात् साध्यसिद्धेः साक्षाद् अपि तु वचनवत् **पारम्पर्येणापि नाऽलं** साध्यप्रतिपादने न समर्था साध्यप्रतिपादनाद् इत्येवं **परः प्राकृतशक्तिः** प्राकृता प्राकृते वा शक्तिः अस्य, शक्तवत् साध्यप्रतिपादनसंभवादिति मन्यते । § 1573

न तु लिङ्गस्येव साध्यस्यापि प्रतिपादने वचनस्य सामर्थ्ये तत एव साध्यसिद्धेः हेतुवैफल्यमिति चेत्; अत्राह--**सम्यग्विचारिता** इत्यादि । § 1574

...4 सम्यग्विचारिता वाक्यविकल्पास्तत्त्वगोचरम् ।
साध्यं पश्यद्भिरज्ञेयं प्रायः प्राकृतबुद्धिभिः ॥ ४
॥§ 1576

सर्व एवायमनुमानानुमेयव्यवहारो विकल्पारूढेन धर्मधर्मिन्यायेन न बहिः सदसत्त्वमेपक्षते इति चेत्; कथमर्थादेव लिङ्गादर्थगतिः ? कथञ्च धर्मधर्मितया भेद एव बुद्धिपरिकल्पितो नार्थोऽपि, विकल्पानामवस्तुसंस्पर्शाभ्युपगमात् । वस्त्वाश्रयत्वाद्वस्तुविषयत्वे कथं साध्याविनाभाविहेतुमन्तरेणानुपपन्नं हेतुवचनं तत्त्वविषयं न भवेत् ? § 1577

**सम्यक्** साध्याविनाभाविसाधनोपन्यासेन **विचारिताः** परीक्षिताः **तत्त्वगोचरं** नयन्तः इति वाक्यशेषः । के ? इत्याह--**वाक्यानां** कार्यभूताः अर्थ**विकल्पाः** । यदि वा, **वाक्यानि विकल्पाश्च** इति ग्राह्यम् । वाक्यग्रहणं तस्यैव केवलवर्णपदपरिहारेण व्यवहारोपयोगप्रतिपादनार्थम् । विकल्पग्रहणं दृष्टान्तार्थम् । यथा उक्तविधिना सम्यग् विचारिता विकल्पाः तत्त्वगोचराः तथा वाक्यान्यपि, रूपादिशब्दा निर्विषय विकल्पयोनित्वात् प्रधानादिशब्दवत् /ms इत्यत्र हेतोः असिद्धतोद्भावनार्थं वा । § 1578

सर्वेण अनेन एतदुक्तं भवति--शब्दोऽनित्य इति प्रतिपाद्यमाना अपि स्वसमयावष्टम्भाद् अनर्थकान्यशब्दसाधर्म्याद्वा [न] प्रतिपद्यन्ते तानुद्दिश्य हेतूपन्यास इति; तर्हि हेतोरेव साध्यसिद्धेः किं साध्यनिर्देशेनेति चेत् ? अत्राह--**प्रायः** इत्यादि । **प्रायो** बाहुल्येन क्षणिकत्वादिरूपेण न शब्दादिस्वभावेन यच्छब्दादि **साध्यम्** अनुमेयम् तद**ज्ञेयम्** अपरिच्छेद्यम् । कैः ? इत्याह--**प्राकृतबुद्धिभिः** सौगतैः । तेषां ज्ञानं सर्वमविकल्पम्, विकल्पस्यापि स्वरूपवद् बहिरपि एत्तेः एकस्य रूपद्वयविरोधात् । किं कुर्वद्भिः ?

२ र्था ] र्थम्
२ साध्य ] ध्या
५ तु ] ननु
५ त ] वचनादेव ।
१७ स्यैव ] वाक्यस्यैव ।
१९ य ] या
१९ प्र ] सांख्याभिमत ।
२२ स्व ] स्वमताग्रहात् ।
२७ एत्तेः ] निर्विकल्पकत्वापत्तेः
२७ स्य ] एकस्य विकल्पस्य स्वरूपे निर्विकल्पकत्वं बहिरर्थे च विकल्पकत्वमिति रूपद्वयं न संभवति विरोधादित्यर्थः ।

इत्याह— **पश्यद्भिः** इन्द्रियाणि तत्र व्यापारयद्भिः, इन्द्रियग्राह्यं न भवेदित्यर्थः । § 1579

एतदुक्तं भवति--यथा हेतोः सिध्यति साध्ये तत्प्रतीत्यर्थं वक्तृविग्रहमावहति तथा चक्षुरादिव्यापारोऽपि दृष्टुः अविशेषात् । को हि विशेषो येन इन्द्रियमनर्थकं दोषाय, अपि तु वचनमेव । यदि पुनः लिङ्गाद् गम्यमानेऽप्यर्थे नेन्द्रियव्यापारा स्किरतं बुद्ध्युत्पत्तावपि नापरापरस्य तस्य वैफल्यं स्यात् । अथ धर्मिमात्रे तत्साफल्यान्नायं दोषः; क्षणिकत्वादिधर्मे स्यात् । एकत्र गुणः सर्वत्र गुणं करोति न दोषो दोषमिति चिन्त्यमेतत् । ततोऽस्माद्दोषाद् बिभ्यता प्रतिज्ञावचनमिव इन्द्रियमपि तत्र परिहरणीयम् । धर्म्यसिद्धिः स्यादिति चेत्; अयमपरोऽस्य दोषोऽस्तु । § 1580 323/mkj

कारिकाया उत्तरार्धस्य व्याख्यानमकृत्वा सुगमत्वात् पूर्वार्धं समर्थयितुं पूर्वपक्षयन्नाह--**सर्व एव** इत्यादि । **सर्व एव** कार्यहेतोः स्वभावहेतोर्वा /ms **अयं** प्रतीयमानः **अनुमानानुमेयव्यवहारो** लिङ्गलिङ्गिव्यवहारो **विकल्पारूढेन** विकल्पावभासिना । केन ? इत्याह--**धर्मः** सत्त्वादिः **धर्मी** शब्दादिः तयोः **न्यायः सर्वे भावाः स्वभावेन** प्र० वा० ३ । ३९ इत्यादि **धर्मान्तरप्रतिक्षेपाऽप्रतिक्षेपौ** इत्यादिश्च, तेन । तर्हि तद्विकल्पस्य वस्त्वाश्रयत्वात् तद्व्यवहारः पारमार्थिकः इति चेत् ? अत्राह--**न बहिरपेक्षते** तद्व्यवहारः । किम् ? इत्याह--**सदसत्त्वम् । सत्त्वमसत्त्वं** च धर्मधर्मिणोः; इत्यपेक्षते, विकल्पस्य निर्विषयत्वादिति मन्यते । **चेद्** इति पराभिप्रायद्योतकः । तत्र दूषणमाह--**कथं** न कथंचित् **अर्थादेव** वस्तुभूतादेव **लिङ्गात्** सत्त्वधूमादेः न कल्पितात् पक्षसपक्षाऽन्यतरत्वादेः इति **एवकारार्थस्य** अग्न्यादेः **गतिः** प्रतिपत्तिः ? इष्यते च परेण **अर्थो हि अर्थं गमयति** इति वचनात् । कथं ततः सा न स्यादिति चेत् ? उच्यते--यदा हि धर्मधर्मिविकल्पो निर्विषयः तदा धर्मी शब्दः तद्धर्माः सत्त्वादयः पक्षसपक्षान्यतरत्वादेर्नातिरिच्यन्ते इति । § 1581

ननु उक्तमत्र धर्मधर्मितया भेद एव बुद्धिपरिकल्पितो नार्थोऽपि इति चेत्; अत्राह--**कथं च** इत्यादि । **धर्मधर्मिणो**र्भावः **तत्ता** तया यो **भेदः** स **एव बुद्धिपरिकल्पितो नार्थेप्यर्थोपि** * लिङ्गलिङ्गि लक्षणो न केवलं तत्तया /ms भेद एव कथं वा न बुद्धिपरिकल्पितः किन्तु तत्कल्पित एव । कुतः ?

---

३ ति] सति ।
६ तं] व्यापारतिरस्कारः तद्
६ स्य] इन्द्रिव्यापारस्य ।
१२ स] तथा चानुमानानुमेयव्यवहारोऽयं सर्वो हि बुद्धिपरिकल्पतो बुद्ध्यारूढेन धर्मधर्मिभेदेनेति उक्तम्--प्र० वा० स्ववृ० १ । ३ । आचार्यदिग्नागेनाप्येतदुक्तमित्याह--तथा चेत्यादि...--प्र० वा० स्ववृ० टी० पृ० २४ ।
१५ इत्यादि] स्वस्वभावव्यवस्थितेः । स्वभावपरभावाभ्यां यस्माद् व्यावृत्तिभागिनः ॥ इति शेषः ।
१८ स] सत्त्वं धर्मस्य असत्त्वं च धर्मिणः ।
२१ स्य] रार्थः । **अर्थस्य**
२२ रेण] अर्थादर्थगतेः--प्र० वा० ४ । १५ ।
२३ तः] विकल्पात् ।
२३ सा] अर्थगतिः ।
२८ *] नार्थोऽपि

इत्याह--**विकल्पानाम्** इत्यादि । इदमत्र तात्पर्यम्--उक्तविधिना न अन्तर्बहिर्वा निरंशोऽर्थः संभवति सांश च विकल्पविषयत्वात्, **विकल्पानां च** सौगतैः **अवस्तुसंस्पर्शाऽभ्युपगमात् विकल्पोऽवस्तुनिर्भा[सो वि]संवादादुपप्लवः** *इति वचनात्, **[न] अर्थोऽपि बुद्धिपरिकल्पितः** इति सम्बन्धः । पश्यतु प्र ज्ञा क र स्य **सर्वविकल्पातीतं प्रतिभासमात्रं तत्त्वम्** *इति मतम् । *तस्य सत्त्वादयः अर्थरूपतयापि विकल्पिता भवन्ति नवेति चिन्त्यमेतत् । यदि भवन्ति; कथम् **अर्थो हि अर्थं गमयति** इति ध र्म की र्त्ति वचनम् असौ गच्छेत् ? भवन्तु तर्हि वस्तुविषयाः ते इति चेत्; अत्राह--**वस्तु** बहिरन्तश्च सांशो भावः **आश्रयः** कारणम् अवलम्ब्यं येषां तेषां भावात् तत्त्वात् । **वस्तुविषयत्वे** अङ्गीक्रियमाणे **विकल्पानाम्** इत्यनुवर्त्तते, **कथं** केन प्रकारेण **तत्त्वविषय** न भवेत् । किम् ? इत्याह--**हेतुवचनम्** । किंभूतम् 324/mkj ? इत्याह--**हेतुमन्तरेण अनुपपन्नम्** । किंभूतं हेतुम् ? इत्याह--**साध्य** इत्यादि । वस्तुनो विकल्पाः ततः तद्वचनमिति मन्यते । अनेन पूर्वार्धं समर्थितम् । § 1582

एवं तावत् लिङ्गलिङ्गिविकल्पानां केषाञ्चिद् बहिरर्थविषयत्वप्रतिपादनेन तज्जन्मनोऽभिधानस्यापि तद्विषयत्वं प्रतिपादितम् । संप्रति विवक्षाप्रभवत्वेन /ms तस्य तद्विषयत्वं परेण यदुक्तं तत्पूर्वपक्षयित्वा निराकुर्वन्नाह--**विवक्षा** इत्यादि । § 1583

...5 विवक्षाप्रभावं वाक्यं स्वार्थे न प्रतिबध्यते ।
तत्सूचितेन लिङ्गेन कथं तत्त्वव्यवस्थितिः ॥ ५ ॥ § 1585

वक्त्रभिप्रायमात्रं वाक्यं सूचयतीत्यविशेषेणाक्षिपन् पारम्पर्येणापि न ततस्तत्त्वं प्रतिपद्येत । न च वक्त्रभिप्रायमेकान्तेन सूचयन्ति श्रुतिदुष्टादेः अन्यत एव प्रसिद्धेः । § 1586

२ च] सांशश्च
४ *] अथोक्तम्-विकल्पोऽवस्तुनिर्भासाद् विसंवादादुपप्लवः इति ।--प्रश॰ कन्द॰ पृ॰ १९० । सन्मति॰ टी॰ पृ॰ ५०० । स्या॰ रत्ना॰ पृ॰ ८२ । धर्मसं॰ पृ॰ १३४ । सर्वद॰ पृ॰ ४४ ।
५ *] विचार्यमाणं हि सकलमेव विशीर्यते नाद्वैतादपरं तत्त्वमस्ति--प्र॰ वार्तिकाल॰ पृ॰ ३१ ।
६ *] प्रज्ञाकरस्य ।
८ ते] विकल्पाः ।
११ य] यं
१६ स्यापि] बहिरर्थविषयत्वम् ।
१७ स्य] शब्दस्य ।
१७ रेण] बौद्धेन ।
१७ दुक्तं] शब्देऽप्यभिप्रायनिवेदनात् ॥ ३ ॥वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते । प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम् ॥ ४ ॥--प्र॰ वा॰ १ । ३-४ ।

*पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः ।
अविनाभावनियमात् हेत्वाभासास्ततोऽपरे ॥§ 1588

हेतुबि॰ श्लो॰ १ § 1589

इत्यादिना स्वयमनभिमतस्यापि वस्तुनः प्रतिपत्तेः । तथा अनेकार्थेषु केनार्थोऽयं विवेचितः येन वक्त्रभिप्राय एवार्थः । शब्दैः क्वचित् विसंवादात् स्वयमनाश्वासे किं शब्दविकल्पव्यभिचारचोदनया स्वल्पकल्पनया, ज्ञानमेव किन्न प्रतिक्षिपेत् ? § 1590

**विवक्षैव प्रभवः** कारणं यस्य प्रभवति अस्मात् इति व्युत्पत्तेः, विवक्षाया वा प्रभवो यस्य, ततः प्रभवति इति वा यत् तथोक्तम् । किम् ? इत्याह--**वाक्यम्** । तत् किन्न क्रियते ? इत्याह--**न प्रतिबध्यते** । क्व ? इत्याह--**स्वार्थे** स्व आत्मीयो वादिनो हेतुरूपोऽर्थः तस्मिन्, इति काक्वा अर्थोऽत्र द्रष्टव्यः । अत्रोत्तरमाह--**तेन** वाक्येन यत् **सूचितं** तेन । केन ? **लिङ्गेन** विवक्षा विकल्पारूढा इति मन्यते । अन्यस्य तेन सूचनस्य परैः अनभ्युपगमात् **कथं** न कथञ्चित् **तत्त्वस्य व्यवस्थितिः** इष्टस्य [क्षण]क्षयादेः । एतदुक्तं भवति--यत् तेन विकल्पारूढं लिङ्गं सूचितं न तस्य तत्त्वे प्रतिबन्धः, यस्य च तत्र प्रतिबन्धो न तत्तेन सूचितम् । न च अन्यस्य सूचने अन्यत्र प्रतिपत्तिः प्रवृत्तिर्वा, अन्यथा स्वशब्देन अश्ववचने गवि सा भवेत् । अथ तदारूढेण प्रयोजनाऽसिद्धेः अन्यत्र सा भवेत्; तन्न; अतिप्रसङ्गात् । यदि पुनः तत्त्वतस्तेन सूचनेऽपि भ्रान्त्या [त्रि]रूपं लिङ्गं सूचितमिति प्रतिपत्तिः; सापि न युक्ता; अविषये भ्रान्तेरपि प्रतिपत्तेरयोगात्, इतरथा ततः अश्वशब्दात् गवि प्रतिपत्तिः स्यात् । असादृश्यान्नेति चेत्; किं पुनः विकल्पाकार-अर्थ-स्वभावयोः सादृश्यमस्ति ? तथा चेत्; प्रत्यक्षवद् विकल्पानामर्थविषयत्वं केन वार्यते ? प्रत्यक्षस्यापि सर्वथा तदभावात् । § 1591

यस्तु मन्यते--तदभावेऽपि आन्तरोपप्लववशात् तथाप्रतिपत्तिः इति; सापि न तत्त्वदृष्टिः; यतः यद् यत्कार्यं तत् तदेव गमयति प्रतिबन्धात्, यथा धूमः अग्निम्, विवक्षाकार्यं च वाक्यम् । तथा यत् यत्कार्यं न भवति तद् भ्रान्त्यापि तन्न गमयति यथा स एव धूमः अपावकम्, अकार्यं च वाक्यम् अर्थस्य इति । यदि पुनः तथापि तया तत् तत्र बुद्धिं जनयति कुतश्चित् प्रत्यासत्तेः; तत एव तर्हि परमार्थतः किञ्चिदकारणे ज्ञानं करिष्यति, तद्विज्ञानं च तत्र प्रमाणं स्यात् अविसंवादाभिमानिनः यथा कुञ्चिकाविवरमणिज्ञानं मणौ । § 1592

/ms 325/mkj

स्यान्मतम्, न वाक्यं कथञ्चिदपि अर्थे ज्ञानं जनयति विवक्षाया अन्यत्र, केवलं विकल्पान्तरमेवं जायते अतो वाक्यादर्थः प्रतीय [ते] इति; न;

१५ तेन] शब्देन ।
१५ स्य] वस्तुभूतार्थस्य ।
१७ स्व] अश्व
१७ सा] प्रतिपत्तिः ।
१८ नाऽसिद्धेः] वस्तुभूतेऽर्थे ।
२३ था] सादृश्याभावात् ।
२७ स] अग्निकार्यः ।
२९ णे] अकारणभूताऽर्थविषयकम् ।

तथा क्रमप्रतीतेरभावात् पूर्वं वाक्याद् विवक्षाविकल्पः पुनः अर्थविकल्प इति । ततः स्थितम्--**[तत्] सूचितेन लिङ्गेन कथं तत्त्वव्यवस्थितिः** इति ।
§ 1593

इदमपरं व्याख्यानम्--**विवक्षाप्रभवमपि** इति अपि शब्दोऽत्र द्रष्टव्यः । **वाक्यं स्वार्थेन** स्वाभिधेयवस्तुना **प्रतिबध्यते कथम्** इति प्रश्ने **तत्सूचितेन लिङ्गेन तत्त्वव्यवस्थितिर्यतः** इत्युत्तरम् । § 1594

कारिकां विवृण्वन्नाह--**वक्तृभिप्रायमात्रं** भवद्भिः अर्थं **वाक्यं सूचयति इत्येवम् अविशेषेण आक्षिपन्** क्रोडीकुर्वन् सौगतः **पारम्पर्येणापि** न केवलं सन्ते तो वाक्यात् **तत्त्वं** साध्यं वस्तु **न प्रतिपद्येत** । अथ वाक्यात् लिङ्गम्, अतः तत्त्वम् इति; परार्थानुमानं स्यादिति मन्यते । द्वितीयं कारिकाव्याख्यानं /ms व्यतिरेकमुखेण अनेनैव दर्शितम्, वक्तृभिप्रायसूचकत्वं वाक्यस्याभ्युपगम्य दूषणमुक्तम्, इदानीम् एकान्तेन तदपि नास्तीति दर्शयन्नाह--**नच नैव वक्तृभिप्रायम् एकान्तेन** अवश्यम्भावेन **सूचयन्ति** सूच्यत इत्युत इत्याह--**श्रुति** इत्यादि । **आदि**शब्देन अर्थान्तरगमनपरिग्रहः । यत्रापि **श्रुतिर्दृष्टा *देः** इति पाठः, तत्र **आदि**शब्देन कल्पनादुष्टादिपरिग्रहः । **श्रुतिदुष्टादेः अन्यत एव प्रसिद्धेः** । आदिशब्दलब्धमर्थम् उदाहरन्नाह--**पक्षधर्म** इत्यादि । ***पक्षो** धर्मी अवयवे समुदायोपचारात्, तस्य **धर्मः तदंशेन** तस्य पक्षस्य अंशेन साध्यधर्मेण न तदेकदेशेन पक्षशब्देन समुदायावचनात् **व्याप्तो** व्याप्तियोगात् । *व्याप्तिश्च व्यापकगता तत्र यत्रासौ साधनधर्मो भाव एव नाभावे । व्याप्यगता तत्रैव यत्रासौ साध्यधर्मो नान्यत्र । किम् ? इत्याह--**पुनः** इति वितर्के **हेतुरेव** मनागपि [अ] हेतुर्न भवति इत्येवकारार्थः । कति प्रकारः ? इत्यत्राह--**स हि** स हेतुः **खलु त्रिधा** । कुतः ? इत्याह--**विरुद्ध** इत्यादि । § 1595

अत्र चोद्यते--यदि पक्षधर्मः; कथम् असिद्धः ? स्वयम् आश्रयस्य च सन्देहे असिद्धो * वाऽसिद्ध उच्यते । न च तदा कस्यचित् पक्षधर्मता । तथा यदि तदंशेन व्याप्तः; कथं विरुद्धोऽनैकान्तिको वा ? तदंशव्याप्तिवचनेन अन्वयव्यतिरेकयोरभिधानेन तन्निरासात् । स हि विपक्षे सन् असन् सपक्षे विरुद्धः, उभयत्र सन् संभाव्यमानो वा अनैकान्तिकः, न चास्य 326/mkj तदं शव्याप्तिरिति; न; परापेक्षया एवमभिधानात् । *परो हि सत्त्वादीनां

९ तो] साक्षात्
१० अतः] लिङ्गात् ।
१३ इत्युत] इति । कुतः ?
१४ *] श्रुतिदुष्टा
१६ *] पक्षो धर्मी अवयवे समुदायोपचारात्--हेतुबि॰ पृ॰ ५२ ।
१९ *] व्याप्तिर्हि व्यापकस्य तत्र भाव एव, व्याप्यस्य वा तत्रैव भावः ।--हेतुबि॰ पृ॰ ५३ ।
१९ एव] व्यापकस्य भाव एव नाभावः कदाचन ।
१९ नाभावे] वः
२० र्मो] वर्तते तत्रैव व्याप्यस्य भावः ।
२५ *] द्वे
२७ भिधानेन] विरुद्धानैकान्तिकनिराकरणात् ।
२९ *] बौद्धः ।

पक्षधर्मत्वं तदंशव्याप्तिं च [अभ्युपगच्छति] कुतोऽनेकान्तवादिनस्तस्य प्रमाणता ? *ते न क्वचित् सत्त्वादिसंभवः इति असिद्ध उच्यते, अनेकान्त एव वा अस्य तवोद्विराद्धः कल्पितस्य क्षणिकैकान्तवद् अक्षणिकैकान्तेऽपि व्यभिचारी इति, यद्वक्ष्यति-- § 1596 /ms

*असिद्धः सि द्ध से न स्य विरुद्धो दे व न न्दि नः ।
द्वे धा स म न्त भ द्र स्य हेतुरेकान्तसाधने ॥ सिद्धिवि°
परि° ६ इति ।§ 1598

ततः परपरिकल्पितात् कार्यादेः **अपरे** कार्यादयो मरणादौ साध्ये अरिष्टादयः **हेत्वाभासा** न [हेतवः] भवन्ति इत्यध्याहारः । कुतः ? इत्याह--**अविनाभावनियमात्** । अस्यैव व्याख्यानं **तत** इत्यादि । § 1599

द्वितीयं व्याख्यानमाह--**ततः परे** *सं योग्यादयो **हेत्वाभासा** भवन्ति इति । कुतः ? इत्याह— **अविनाभावनियमात्** । अस्यायमर्थः--**विना** भाव्य मन्तरेण **अभाव्य नियमः** सा[ध्या]भावे अभावनियमः, पुनः अस्य न ज्ञायोगे साध्याभावेऽपि भाव इत्युक्तं भवति, तस्माद् **इति** । ततः कि जातम् ? इत्याह--**स्वयम्** आत्मना आदिना **अनभिमतस्यापि** न केवलम् अभिमतस्यैव **वस्तुनः** अर्थस्य **प्रतिपत्तेः** शब्देभ्यः इति विभक्तिपरिणामेन सम्बन्धः । **न च वक्त्रभिप्रायम् एकान्तेन सूचयन्ति शब्दा** इत्यपेक्षम् । § 1600

ननु यद्यप्येवं भावना व्याख्यायते--यथा प्ययमस्य अर्थो न भवति किन्तु वक्त्रभिप्रायोऽर्थः इति चेत्; अत्राह--**तत्त्व** इत्यादि । **तथा** तेन उक्तप्रकारेण **अनेकार्थेषु** शब्देषु सत्सु **केन** पुरुषेण प्रमाणेन वा **अर्थोऽयं** निर्दिश्यमानो **विवेचितः** पृथक्कृतः **येन** वितेत्रनेन **वक्त्रभिप्राय एव** नान्यः **स्यादर्थः** न केनचित् इत्यर्थः । § 1601

एतेन *पत्रमपि चिन्तितम् । § 1602 /ms

अथ कदाचिद् अर्थाभावेऽपि वृत्तेः अनर्थकाः शब्दाः ? इत्यत्राह--**क्वचित्** न सर्वत्र **विसंवादात्** वञ्चनात् । कैः ? इत्याह--**शब्दैः** संवादेऽपि वहुलं शब्दैः इत्यपेक्षम् **स्वयम्** आत्मना बौद्धेन **अनाश्वासे** क्रियमाणे किं **स्वल्पकल्पनया** । किंभूतया ? इत्याह--**शब्दानां विकल्पानां व्यभिचारस्य चोदनं** यस्यां तया । तर्हि किं कुर्यात् परः ? इत्याह--**ज्ञानमेव** विक-

---

२ *] बौद्धस्य ।
३ वोद्विराद्धः] संभवाद्विरुद्धः
३ णिकैकान्तेऽपि] सम्भवात् ।
८ यः] भाविकारणवादिप्रज्ञाकरकल्पिताः ।
१० *] वैशेषिककल्पिताः ।
११ भाव्य] साध्य
१२ अभाव्य] व
१३ ज्ञायोगे] न चायोगे
१४ आदिना] अपिना
१६ म्] क्षम्
१७ ना] भावेन
१७ था] तथा
१८ त्त्व] तथा
२० नेन] विवेचनेन
२२ *] पत्रवाक्यं ह्यनेकार्थं भवति ।
२५ म्] क्षम्

ल्पानाम् अनन्तरं निर्देशात् **ज्ञान**शब्देन दर्शनम् इह गृह्यते, तदेव, न शब्दविकल्पानाम्, तत्प्रतिक्षेपेणैव तत्प्रतिक्षेपणात् तन्मूलत्वात्तेषामिति मन्यते । **किन्न प्रतिक्षिपेत्** ? बहिः प्रतिक्षिपेदेव तस्य स्वप्नादौ अर्थाभावेऽपि दर्शनात् इत्येके । येन स्वसंवेदनेन ज्ञानं ज्ञानम् इति भवति तत् **ज्ञानम्** इत्युच्यते, तदेव **किन्न प्रतिक्षिपेत्** ? द्वयनिर्भासवत् तत्रापि अनाश्वासात् । § 1603

एतदेव दर्शयन्नाह-- § 1604

शक्यं हि वक्तुम्— § 1605
327/mkj

...6 साध्योपलब्धेः प्रत्यक्षं पारम्पर्येण नाप्यलम् ।
शक्तस्य सूचिका साक्षात् काचन सर्वा न कल्पना
॥ ६ ॥§ 1607

...7 परमार्थैकतानत्वे बुद्धीनामनिबन्धना ।
न स्यात्प्रवृत्तिरर्थेषु समयान्तरभेदिषु ॥ ७ ॥§ 1609

प्रमाणाभावे ज्ञानमेव किन्न प्रतिक्षिपेदिति । प्रतिक्षेपासिद्धिरिति वाक्यप्रतिक्षेपेऽपि समानम् । तत्त्वप्रतिपत्तिं प्रति वाक्यविशेषैः अनुमानवृत्तौ व्यवहर्तारोऽतिशेरते नान्यथा । तत्कार्यव्यभिचारेऽपि यथा गमकत्वं तथा शब्दस्य । § 1610

**शक्यं हि वक्तुम्** इत्यादि । **हि** यस्मात् **शक्यं वक्तुम्** । किम् ? इत्याह--**साध्योपलब्धेः** साध्यस्य क्षणक्षयस्य स्वसंवेदनाऽनन्यवेद्यादेः या उपलब्धिः दृष्टिः साक्षात्करणं तस्याः **प्रत्यक्षं** *चतुर्विधम् अविकल्पदर्शनं **नाऽलम्** न समर्थम् । कथम् ? इत्याह--**पारम्पर्येण** अपि शब्दोऽत्र व्याख्येयो भिन्नप्रक्रमन्यायात् । [न] केवलं साक्षाद् अपि तु पारम्पर्येणापि । तथाहि--न तावत् साक्षात्, परमार्थाभावेऽपि तत्प्रवृत्तेः उपप्लवदशायाम् । तथा सति /ms यदवभासते न तत् परमार्थसत् यथा तैमिरिकोपलभ्यमानं केशोंद्रकादि, अवभासते च ज्ञानस्य स्वसंवेदनादि । न चैतन्मन्तव्यम्--केशोण्डुकादेः ज्ञानात्मकत्वे तत्सत्त्वात् साध्यविकलो दृष्टान्त इति ; सारूप्यनिषेधात्, ग्राह्यग्राहकाकारभेदप्रतीतेः अन्येन अन्यग्रहणाविरोधात् जननवत् । अस्याभावे विज्ञानवादिनोऽनुमानाभावः । *तद्धि त्रिरूपलिङ्गजमिष्यते तदभावमभ्युपग-

२ ल्पानाम् ] व्यभिचारचोदनया ।
२ णात् ] दर्शनमूलत्वात् विकल्पानाम् ।
४ इत्येके ] प्रतिभासाद्वैतवादिनः ।
५ त्रापि ] स्वसंवेदनेऽपि ।
१८ *] इन्द्रियमनःस्वसंवेदनयोगिप्रत्यक्षभेदेन ।
२२ केशोंद्र ] शोण्डु
२६ *] अनुमानम् ।

च्छन् कथम् **यदवभासते तज्ज्ञानं यथा सुखादि अवभासते च नीलादिकम्** इत्याद्यनुमानं वदेत् ? अस्य सांवृतत्वे कुतः अतो नीलादेः भावतो ज्ञानत्वसिद्धिः अतिप्रसङ्गात् ? अथ **यादृशो यक्षः तादृशो बलिः** *इति वचनात् सापि ततस्तथा नेष्यते; वस्तुतः किं नीलादिकमस्तु ? ज्ञानम् इति चेत्; कुतः प्रमाणात् ? अत एवेति चेत्; हन्त हतोऽसि, प्रकृतविरोधात् । यदि चेदमनुमानं परम्परयापि न तत्र प्रतिबद्धम्, कथमस्य *तदव्यभिचारः ? तथापि तद्भावो § 1611

*लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि ।
प्रतिबन्धात् तदाभासशून्ययोरप्यवञ्चनम् ॥ प्र° वा° २ । ८२

इति प्लवते ।§ 1613

यदि पुनः परम्परया तत्कार्यत्वेनोपगमान्नायं दोषः; तथा सति सर्वमनुमानम् अव्यभिचारम् अत एव स्यादिति न तदाभासो नाम । ततोऽस्य तत्र प्रतिबन्धाऽभावे न अव्यभिचार इति नातस्तत्सिद्धिः । प्रत्यक्षत इति चेत्; न; तस्य तावति व्यापारे सामर्थ्याभावात् । न हि *इदं सर्वं नीलादि ज्ञानम् इति प्रत्येतुमर्हति, अनेन * अन्यग्रहणप्रसङ्गात् । न च 328/mkj
सर्वं नीलादि भवदीयज्ञानाद् बहिर्भूतम् इति युक्तिरस्ति; अत्र ततोऽन्यस्यापि अनिवारणात् । भवदीयानुपलम्भमात्रस्य तदभावसाधने साधर्म्यात् /ms
, इतरथा सुखेन दुःखस्य अनुपलम्भादभावः स्यात् । § 1614

ननु [न] मदीयमध्यक्षम् अशेषस्य नीलादेः ज्ञानात्मकत्वमवैति किन्तु स्वयं विषयीकृतस्य इति चेत्; न; तत्र विवादात् । तथाहि--त्वत्प्रत्यक्षं नीलादिकमात्मभूतं प्रत्येति इति कः प्रत्येति ? तदेवेति चेत्; *अन्यस्य प्रत्यक्षं तत् स्वतो भिन्नं प्रत्येति । तथा व  तत्तथा प्रतिपद्यमानमात्मानं प्रत्येति तदेवेति न विज्ञप्तिमात्रसिद्धिः । स कथमिदं परस्मै निवेदयति ? कथं केन प्रक्षेण * त्वदीयप्रत्यक्षस्य परप्रतिपत्त्यहेतुत्वात्, ज्ञानान्तरवैयर्थ्यप्रसङ्गात् । अन्यज्ञानस्य अधिपतिप्रत्ययो भवतीति चेत्; तर्हि तस्य केनचित्

---

२ नीलादेः] परमार्थतः ।
३ *] अद्वैतेऽपि कथं वृत्तिरिति चोद्यं निराकृतम् । यथा बलिस्तथा यक्ष इति किं केन सङ्गतम् ॥--प्र° वार्तिकाल° पृ° २९३ ।
४ था] परमार्थतः ।
४ ते] इति चेत् ।
६ न] स्वार्थे ।
६ स्य] अनुमानस्य ।
६ *] अर्थाव्यभिचारः ।
७ द्भावो] वे
११ म्] परम्परया तत्कार्यत्वात् ।
१३ *] प्रत्यक्षं ।
१४ अनेन] अन्येन = प्रत्यक्षेण ।
१४ *] अन्येन
१७ र्म्यात्] नेऽसामर्थ्यात्
२० *] जैनस्य ।
२१ क्षं] नीलादिकम् ।
२१ व] च
२३ *] प्रत्यक्षेण
२४ यो] चत्वारः प्रत्यया हेतुश्चालम्बनमनन्तरम् । तथैवाधिपतेयं च प्रत्ययो नास्ति पञ्चमः ॥--माध्यमिकका° १ । २ । तुलना--नीलाभासस्य हि चित्तस्य

प्रत्यासत्तिविप्रकर्षाभावात् सर्वस्य भवेदिति न विवादो नाम भवेत् । न चैवं जैनान् । कथं चैवं कार्यकारणभावो न भवेत्, यतः तद्वत् परेण परस्य ग्रहणं विरुद्धता न्ययापि च प्रत्यक्षं तथा परप्रतिपत्तिहेतुः तथैव * स्यात् । मम नेति चेत्; भवदीयमन्यस्य न इति समानम् । नाप्यनुमानेन; उक्तदोषात् । § 1615

यत्पुनरेतत्--विवक्षितप्रत्यक्षात् नीलादेरभेदात् स्वात्मभूतमेव तत् तत्प्रत्येति इति तस्य ततोऽभेदः, कुतस्तेन ग्रहणम् ? तद्यथा--यद् येन गृह्यते तत् तेन स्वात्मभूतं गृह्यते यथा स्वरूपम्, गृह्यते च नीलादिकम् इति । न त्विदमनुमानम् उक्तम् । तन्न अस्य परप्रतिपादनोपायोऽस्ति । पराभावान्न स प्रतिपाद्यत इति चेत्; तदेतद् अन्यत्रापि समानम् । शक्यं हि अन्येनापि वक्तुम् अहं तावत् नीलादिकं स्वतो भिन्नं पश्यामि, न चान्यः प्रतिपत्ता अस्ति यो मया प्रतिपाद्यते, मां प्रति चोद्य स्वा करोति, प्रतिपक्षात् नः स्वार्थसिद्धिः । § 1616

/ms

यत्पुनरेतत्--कथं स्वतो भिन्नं तत् तत्प्रत्येति इति ? अभिन्नं कथं प्रत्येति ? तथादर्शनात्; अन्यत्र समानम् । तन्न केशोण्डुकादिकं ज्ञानात्मकं युक्तम् । ततो बहिर्भूतस्य परमार्थसत्त्वे च न विज्ञप्तिमात्रं प्रत्यक्षलक्षणे वा अभ्रान्तग्रहणम् अर्थवदिति । तत्त्वसत्त्वाऽसत्त्वविकल्पविकलतापि एतेन चिन्तिता । ततः तदभ्युपगच्छता बहिः तैमिरिककेशादेः असत्त्वमभ्युपगन्तव्यमिति न साध्यशून्यो दृष्टान्तः । § 1617

ननु प्रत्यक्षे सचेतनादेः प्रतिभासने कथं न तदुपलब्धिः ? तत्समर्थमिति चेत्; न; परमार्थोपलब्धिः विवक्षितत्वात् । अत एव साध्यग्रहणम् । भ्रान्तस्य साध्यत्वे क्लेशमात्रं भवेदिति । तत्तत् साक्षात् साध्योपलब्धेः प्रत्यक्षं समर्थम् । अत एव तद्विषयानुमानजनकत्वेन पारम्पर्येण; सर्वथा भ्रान्त्या तदनुत्पत्तेरिति मन्यते । § 1618

329/mkj

ननु ग्राह्याकारवत् स्वरूपेऽपि विभ्रमे विभ्रमोऽपि न सिध्यति । ततस्तन्मात्रमस्तु इति चेत्; अत्राह--**शक्तस्य** इत्यादि । **शक्तस्य** लिङ्गस्य **सूचिका**

---

नीलादालम्बनप्रत्ययान्नीलाकारता ।
समनन्तरप्रत्ययात् बोधरूपता ।
चक्षुषोऽधिपतिप्रत्ययात् रूपग्रहणप्रतिनियमः
। आलोकात् सहकारिप्रत्ययाद्धेतोः
स्पष्टार्थता ।--ब्र० शा० भामती २ । २ ।
१९ ।
२ जैनान्] प्रति विवादसद्भावात् ।
३ यापि] विरुध्येत । अपि
३ *] तवैव
६ मेव] प्रत्यक्षम् ।
६ त्] नीलादिकम् ।
७ स्तेन] प्रत्यक्षेण नीलादेर्ग्रहणमिति
भेदप्रयोगः ।
९ म्] युक्तम्
१० राभावान्न] परः ।
१२ स्वा] द्यं स्वी
१४ त्] नीलादिकम् ।
१५ नात्] इति चेत् ।
१६ णे] कल्पनापोढमभ्रान्तं प्रत्यक्षमित्यत्र
।
२१ ब्धिः] ब्धेः
२२ त्] तन्न
२३ र्येण] साध्योपलब्धौ प्रत्यक्षं न
समर्थमिति ।

ज्ञापिका **[का]चन कल्पना** न सर्वा, न सत् । **साक्षात्** तत्सूचने समर्था तद्विषया इति यावत् । कल्पनाग्रहणमुपलक्षणम्, तेन शब्दोऽपि गृह्यते । यदि वा, कार्ये कारणस्य तत्र वा कार्यस्योपचारात् कल्पनाशब्देन शब्द उच्यते । एतदुक्तं भवति--यथा प्रतिभासाविशेषे स्वरूपपरिहारेण अन्यत्र भ्रान्तं तथा शक्त सूचकशब्दविकल्पपरिहारेण प्रधानादिशब्दादिभ्रान्तत्वमिति /ms । § 1619

यत्पुनरेतत्--**परमार्थैकतानत्व** इत्यादि । तत्र दूषणमाह--**परमार्थैकतानत्वे** इत्यादि । **परमार्थः** स्वलक्षणं तस्मिन् **एकः** प्रधानभूतः **तानः** तादात्म्यादिप्रतिबन्धो यासां तासां भावे **तत्त्वे** अङ्गीक्रियमाणे । कासाम् ? **बुद्धीनाम्** इति । तस्यां किं स्यात् ? इत्यत्राह--**स्यात्** भवेत् **प्रवृत्तिः** वर्त्तनम् । क्व ? **अर्थेषु** । किंभूतेषु ? **समयान्तरभेदिषु** बहिः परस्परविविक्ततनवः क्षणिका निरंशाः परमाणवो दर्शनविषया अन्तश्च अद्वयं वेदनम् इति दर्शनम् इह समयः इत्युच्यते, नान्यः अप्रस्तावात्, ततोऽन्यः तदन्तरम् तद्भेत्तुं सौगतसमयाद् अन्यत्वेन व्यवस्थापनशीलेषु, स्थिरस्थूलसाधारणादिस्वभावेषु समस्तवो क्तिन्यायात् । किंभूता ? इत्याह— **निर्निबन्धना** आलम्बनरहिता इत्यर्थः । ततो मन्यामहे--बहिरन्तश्च बुद्धीनामविशेषेण परमार्थैकतानत्वं नास्तीति शब्दानां निर्विषयत्वं व्यवस्थापयितुकामस्य बुद्धीनां तदाजातं अतः **अधिकार्थिन्याः पतितं तदपि च यत् पिज्ञने लग्नम्** । इत्यापतितम् । § 1620

बहिरन्तश्च कस्यचित् प्रमाणाभावात् तदभावसाधनं त्व सिद्धसाधनमिति मन्यमानस्य प्र ज्ञा क र स्य मतं पूर्वपक्षेणैव दूषयित्वा कारिकाद्वयस्य तात्पर्यं कथयन्नाह--**प्रमाणाभाव** इत्यादि । अस्यायमर्थः यदुक्तम्--**ज्ञानमेव किं न प्रतिक्षिपेत् इति** । तत्र तत्प्रतिक्षेपे प्रमाणप्रतिक्षेपो ज्ञानात्मकत्वात् प्र- /ms माणस्य, अस्य वा भावे **प्रतिक्षेपासिद्धिः** ज्ञानस्य अन्यस्य वा निरासाऽसिद्धिः । परमार्थसिद्धिवत् तत्प्रतिक्षेपसिद्धिरपि प्रमाणमन्तरेण नोपपद्यते । तदुक्तं न्याय वि नि श्च ये--**प्रमाणमात्मसात्कुर्वन्** न्यायवि° १ । ४९ *इत्यादि । ततो वेदनमात्रमस्तु इति मन्यते । इत्येवं चेत्; अत्राह--**वाक्यप्रतिक्षेपेऽपि** वाक्यस्य सविषयत्वनिरासेऽपि न केवलं ज्ञानस्य **समानं** सदृशम् । न त्वरो क्रमे । तदेव दर्शयन्नाह--**तत्त्व** इत्यादि । **तत्त्वस्य** [क्षण] क्षयादेः **प्रतिपत्तिं प्रति अनुमानस्य वृत्तौ** प्रवृत्तौ । § 1621

ननु च तत्प्रतिपत्तिरेव अनुमानं तत्कथमिदमुच्यते इति चेत् ? न; उपचारेण अनुमानशब्देन लिङ्गाभिधानात् । कैः ? इत्यत्राह--**वाक्यविशेषैः**

---

१ त्] न सा
३ स्य] कारणे ।
५ त्र] बहिरर्थे भ्रान्तं प्रत्यक्षम् ।
७ त्] परमार्थैकतानत्वे शब्दानामनिबन्धना । न स्यात् प्रवृत्तिरर्थेषु समयान्तरभेदिषु ॥--प्र° वा° ३ । २०६ ।
१५ वो] समतन्त्रो
१७ दाजातं] तदायातम्
१७ दाजातं] निर्विषयत्वं प्राप्तम् ।
१९ त्व] च
२५ *] प्रतीतिमतिलङ्घयेत् । वितथज्ञानसन्तानविशेषेषु न केवलम् ॥ इति शेषः ।
२८ मे] ?
३० च] तत्त्वप्रतिपत्तिरेव ।

त्रिरूपलिङ्गवचनैः । तस्यां किम् ? इत्याह--**व्यवहर्त्तुं** व्याख्यातारोऽपि तिसेरते * **नान्यथा** नाऽपरेण प्रकारेण । इदमत्र तात्पर्यम्--सर्वं वाक्यं बहिरर्थशून्यम् इति प्रतिपादयतो न तत्र प्रत्यक्षं प्रमाणम् । यदि पुनः यद्यत्राप्रतिबद्धं न तत्तत्र यथार्थप्रतीतिजनकं यथा धूमोऽपावके, बहिरर्थाऽप्रतिबद्धं च सर्वं
330/mkj वाक्यम् इत्यनुमानं तत्र प्रमाणम् । अस्य वाक्यस्य लिङ्गप्रतिपादने प्रतिज्ञा स्ववचनविरोधिनी, तदप्रतिपादने कुतः परस्य लिङ्गप्रतीतिः इति । § 1622

परमुपहसन्नाह--**तदयम्** इत्यादि । अग्न्यादेः काष्ठादिजन्मनोऽपि मण्यादेर्दर्शने **तत्कार्यस्य व्यभिचारेऽपि यथा गम[क]त्वं तथा शब्दस्य** क्वचिद् व्यभिचारेऽपि । § 1623

तद्दर्शयन्नाह--**सामग्रीभ्य** इत्यादि । § 1624

...8 सामग्रीभ्यो विचित्राभ्यः काष्ठादिभ्योऽग्निसंभवे ।
प्रतिपद्यते यतस्तत्त्वं किं शब्दं त्यक्तुमर्हति ॥ ८

‖§ 1626

तत्त्वप्रतिपत्तेः...शाब्दम्...। स्वार्थानुमानेऽपि प्रयोगदर्शनम् अन्यथाऽयुक्तमेव । § 1627

/ms **सामग्रीभ्यः** कारणकलापेभ्यः । किंभूताभ्यः ? **विचित्राभ्यः** भिन्नजातीयाभ्यः । पुनरपि किंभूताभ्यः ? **काष्ठादिभ्यः** आदिशब्देन मण्यादिपरिग्रहः । तेन काष्ठादय एव विशिष्टाः सामग्रीशब्देन उच्यन्ते नान्या तेभ्यः सा इति दर्शयति । यदि स्यात् काष्ठादीनाम् इति ब्रूयात् । § 1628

किंच, अस्या एव कार्यनिष्पत्तेः काष्ठादिकम् अनर्थकं स्यात् । [न] चान्यत उत्पन्नं कार्यमन्यस्य युक्तम् अतिप्रसङ्गात् । अथ तत्सम्बन्धिन्या जनकत्वे तस्याः तदपि जनकं तत्सम्बन्धनाक । कुतः ? तत्र समवायात् । *अस्य सर्वगतत्वे कुतः कस्यचिदेव सा इति चिन्त्यम् । यदि पुनः समवायसम्बन्धाविशेषेऽपि तत्सम्बन्धिविशेष इष्यते; इष्यतां भिन्ना सामग्री तु न सिध्यति । ययैव प्रत्यासत्त्या समवायाविशेषेऽपि केचिदेव काश्चिदेव सामग्रीं बिभ्रति तयैव ते तत्कार्यं कुर्वन्तु तया किम् ? समवायनिषेधाच्च न तत्सम्बन्धिनी । कार्यत्वादिति चेत्; तां तर्हि काष्ठादयोऽस्वरूपेण जनयन्ति कार्ये कः प्रद्वेषः यतः तत् ते न जनयन्ति ? अपरया सामग्र्येति चेत्; स

१ र्त्तुं] हर्तारो
२ *] अतिशेरते
५ ने] वाक्यं न बहिरर्थप्रतिपादकमिति प्रतिज्ञा ।
७ म्] तत्कार्य
१७ सा] सामग्री ।
१९ अस्या] सामग्र्याः ।
२१ स्याः] सामग्र्याः ।
२१ नाक] त्
२२ *] समवायस्य ।
२२ सा] सामग्री ।
२५ न्तु] सामग्र्या ।
२७ तः] कार्यम् ।

एव दोषः, अनवस्था चेति । **अग्निसंभवे** अपिशब्दा तु * द्रष्टव्यः संभावनायाम् । नहि अग्निवद् धूमस्यापि विजातीयाभावे कार्यं लिङ्गं संभवति । तत्संभवेऽपि कार्यं **लिङ्गम् सुविवेचितं कार्यं कारणं न व्यभिचरति** इति न्यायात् न **शब्दः** । किम् ? **लिङ्गम्** इत्यनुवर्त्तते । किंभूतः ? इत्याह--**यतः** शब्दात् **तत्त्वं** लिङ्गलक्षणम् अन्यद्वा **प्र[ति]पद्यते** सौगतः । तथाहि--योऽर्थे सति भवति शब्दः सोऽन्यः, यश्च तदभावे सोऽपि अन्यः । **सुविवेचितं** /ms
**कार्यं कारणं न व्यभिचरति** इत्येतत् न सौगतकाककुलचर्वितम् । न चैतत् चोद्यम्--य एव घटशब्दो घटे सति दृश्यते स एव तदभावे, तत्कथं लिङ्गमिति; तदेकत्वाऽसिद्धेः, *उभयोरपि देशादिभेदात् इति । सादृश्यम् अन्यत्रापि न वार्यते । § 1629

स्यान्मतम्--काष्ठादिजन्मना पावकेन मण्यादिजन्यस्य तस्य न सादृश्यं कारणवैसादृश्यात्, न [तादृशात्] । तादृशाद्धि जायमानं तादृशं नान्यथा 331/mkj
। * तादृशान्यादृशव्यद्धि जायमानं शन्नमधा तादृशान्यादृशव्यवस्थैव न स्यादिति । तदेतदुत्तरं शब्देऽपि समानम् । यथैव घटशब्दं समानं सर्वत्र जनो मन्यते तथा काष्ठमणिजनितं वह्निम्, सदृशव्यवहारदर्शनात् । § 1630

यस्तु मन्यते--इन्धनात् पावको जायते, तदिन्धनं काष्ठवत् मणिरपि, तत्र तादृशा तादृशोद्भव इति । तत्र किमिदमिन्धनम् ? पावकजननयोग्यं वस्तु इति चेत्; तर्हि धूमोऽ तज्जननयोग्यात् शक्रमूर्धादेर्भवन् तादृशात् तादृशः स्यात् । न चैतावता शक्रमूर्धादिः अग्निर्भव इतरथा काष्ठं मणिः स्यादविशेषात् । § 1631

अन्येषां तु दर्शनम्--वक्तरि शब्दः देशान्तरादौ अर्थः तत्कथं स लिङ्गम् । न हि महान् सधूमो महोदधिदहनस्य लिङ्गम् । कथं तर्हि पर्णकाद्या देशान्तरादि तल्ली दाहस्य कथं वा अन्यत्र प्रसुप्तस्य अन्यत्र प्रबोधस्थानान्तरादिचेतसो यतः प्र ज्ञा क र निरुपादानः प्रबोधो न भवेत् । स्वयं च जलचन्द्रादेः चन्द्रादेरनुमानमिच्छति, [यदि] दं दर्शनमवतिष्ठत ततो /ms
यत्किञ्चिदेतत् । § 1632

ननु यदि कार्यं कारणं व्यभिचरति मा भूत् ततस्तदनुमानमिति चेत्; एतदेवाह--**सामग्रीभ्य विचित्राभ्यः काष्ठादिभ्योऽग्निसंभवे** सति कार्यलिङ्गं तल्लिङ्गमेव [न] भवति । तत्रोत्तरमाह--**शब्द[म्]** इत्यादि । **यतः** शब्दात् **तत्त्वम्** अभिमतं वस्तु **प्रतिपद्यते** सौग चार्वाको वा स शब्दः किम् ? अयमत्राऽभिप्रायः--उक्तदोषादनुमानं त्यजन्नपि **न शब्दं त्यक्तुमर्हति** मूक-

---

१ *] शब्दोऽत्र
६ श्च] अर्थाभावे ।
८ एव] घटाभावे ।
९ *] शब्दयोः ।
११ स्य] पावकस्य ।
१३ *] एतदन्तर्गतः पाठः पुनर्लिखितः ।
१८ योग्यात्] वल्मीकात् ।
१९ ता] धूमोत्पादकत्वात् ।
२० णिः] अग्न्युत्पादकत्वाविशेषात् ।
२१ स] शब्दः ।
२२ काद्या] ष्ठादि
२३ ल्ली] वल्ली
२५ त] ते

ताप्राप्तेः । तदपरित्यागे कम यद्यप्रमाणं न ततः तत्त्वं प्रतिपद्ये अन्यथा कथं प्रेक्षावान् किमर्थं वा अन्यत्र प्रमाणान्वेषणम् ? प्रमाणं चेत्; सिद्धं नः समीहितम् । एवमर्थं चशब्दः । **किम्** इति सामान्यवचनम् । § 1633

कारिकायाः प्रथमार्धस्य तात्पर्यमाह--**तत्त्वप्रतिपत्तेः** इत्यादिना । द्वितीयस्य आ **शाब्दम्** इत्यादिना । § 1634

ननु शब्दात् तत्त्वप्रतिपत्तेरभावादसिद्धो हेतुरिति चेत्; अत्राह--[स्वार्थानुमानेऽपि इत्यादि] न केवलं परार्थानुमाने अपि तु **स्वार्थानुमानेऽपि प्रयोगदर्शनम् अन्यथा** अन्येन * तत्त्वप्रयोगदर्शनम् अन्यथा अन्येन तत्त्वप्रतिपत्त्यभावप्रकारेण **अयुक्तमेव** तत्प्रयोजनाभावादिति भावः । § 1635

इदं वा अन्यथा अयुक्तमेव इति दर्शयन्नाह--**तत्त्व** इत्यादि । § 1636

...9 तत्त्वप्रत्यायनाद्वादी जयति प्रतिवाद्यपि ।
भूतदोषं समुद्भाव्य युगपत्संभवात्तयोः ॥ ९ ॥§ 1638

शब्देन वक्त्रभिप्रायसूचनाङ्गीकरणे वादी निगृह्यते तत्त्वतः साधनाङ्गाव-
332/mkj चनात्, तथा प्रतिवाद्यपि भूतदोषमप्रकाशयन् । तत्त्वं प्रमाणतोऽप्रतिपादयतः असाधनाङ्गवचनं भूतदोषं समुद्भावयति प्रतिवादीति युगपन्निग्रहप्राप्तिः जयनात् । तन्न स्वपक्षसिद्धिमन्तरेण कस्यचिज्जयो नाम न्यूनतया...मार्गप्रभावनालक्षणत्वाज्जयस्य । तस्मान्निराकृतपक्षत्वमेव निग्रहस्थानम् । कस्यचित्तूष्णीं भावे तावता परस्य जयाभावात् कः केन निगृह्यते ? साधनदूषणतदाभासानामन्यतरस्य तथोद्भाव्यमाने तूष्णींभावस्यापि युगपत्संभवात् । § 1639

**तत्त्वस्य** तु रूपहेतुरूपस्य, यदि वा साध्यरूपस्य **प्रत्यायनाद्** सौगतो **जयति** प्रतिवादिनम् इत्यध्याहारः । न केवलं वाद्येव अपि तु **प्रतिवाद्यपि**
/ms स एव जयति वादिनम् इति विभक्तिपरिणामेन सम्बन्धः । किं कृत्वा ? इत्याह--**भूतदोषं** पारमार्थिकासिद्धादिदोषमुद्भाव्येत **अन्यथा अयुक्तमेव** इत्यनुवर्त्तते, अन्यथा प्रतिपत्त्यभावप्रकारेण तत्त्वप्रत्यायन-भूतदोषोद्भावनयोः अत्यन्तमसंभवात् । एतदेव दर्शयन्नाह— **युगपद्** इत्यदि । **युगपद्** एकदैव **संभवात् तयोः** जयपराजययोः । तथाहि--यथा सौगते समीचीनसाधनवति परः तद्विपरीतः पराजयवान् तथा सौगतोऽपि स्यात्, सतोऽपि तत्साधनस्य तेनाऽवचनात् । तथा, यथा सदोषसाधनवादी वैशेषिकादिः निग्रहवान् प्रतिवादी बौद्धोऽपि तथैव, तेन दोषस्य सतोऽपि अनुद्भावनात् । § 1640

---

१ म ] प्रत्यक्षादिकं
१ तः ] अप्रमाणभूतप्रत्यक्षादेः ।
५ स्य ] द्वितीयार्धस्य तात्पर्यमाह ।
८ * ] एतदन्तर्गतः पाठः पुनर्लिखितः ।
२१ तु ] त्रि
२४ मुद्भाव्येत ] **दोषं समुद्भाव्य** इति

अथवा, अन्यथा पूर्वपक्षयित्वा कारिकेयं पठितव्या । यदि शब्दो हेतुः *तत एव साध्यसिद्धेः, पुनः कृतकत्वाद्युपादाने हेत्वन्तरं नाम निग्रहस्थानं स्यात् । एतेन शाब्दं प्रमाणान्तरं व इत्येतदपि निरूपितमिति; अत्राह- -**तत्त्व** इत्यादि । नन्वेतत् **सम्यग् विचारिता** इत्यादिना शक्यपरिहृतम्, किमर्थं पुनरा [ह ?] दूषणान्तरप्रतिपादनार्थम् इत्यदोषः । **वादी** जैनो **जयति,** प्रतिवादिनम् । कुतः ? इत्याह--**तत्त्वस्य** जीवादेः समीचीनसाधनप्रतिज्ञादिवचनेन **प्रत्यायनात् प्रतिपाद्येपि** सौगतो वादिनं **जयति** । किं कृत्वा ? **भूतदोषं** प्रतिज्ञादिवचनं परमार्थदूषण**मनुद्भाव्य** * । न चैतद् युक्तम् इति मन्यते । कुतः ? इत्याह--**युगपत् संभवात् तयोः** जयेतरयोः । तथाहि--यदैव वादी स्वाभिमतं युक्तितः प्रतिपाद्य परं विजयते, तदैव /ms परोऽनर्थकप्रतिज्ञादिवचनमुद्भाव्य, तत्र चैकदा संभवः । § 1641

परार्थेन कारिकां विवृण्वन्नाह--**वक्त्रभिप्राय** इत्यादि । **वक्त्रभिप्रायस्य सूचनं शब्देन** कार्यलिङ्गेन यज्ज्ञापनं तस्य **अङ्गीकरणे वादी** सौगतो **निगृह्यते** नैयायिकादिना । कुतः ? इत्याह--**साधनाङ्गस्य** पक्षधर्मत्वादेः । यदि वा, साधनमेव अङ्गं साध्यप्रतिपत्तेः निमित्तम् । अथवा, सिद्धिः साधनं तस्य अङ्गं कारणं तस्य, **अवचनाद्** वादिना इति विभक्तिपरिणामेन सम्बन्धः । कथम् ? इत्याह--**तत्त्वतः** परमार्थेन । नहि अन्यसूचकेन तत्त्वतोऽन्यः सूचितो नाम अतिप्रसङ्गात् । **तथा** तेन प्रकारेण **प्रतिवाद्यपि** सौगतो **निगृह्यते** इत्यनुवर्त्तते । कुतः ? इत्याह--**भूत** इत्यादि । [भूतस्य] सतोऽपि असिद्धादि**दोषस्य** 333/mkj **अप्रकाशनात्** । § 1642

द्वितीयेन तां व्याख्यातुकाम आह--**तत्त्वम्** इत्यादि । **तत्त्वं प्रमाणतः [अ] प्रतिपादयतः** सौगतस्य प्रतिज्ञादि **असाधनाङ्गवचनम् भूतदोषं समुद्भावयति ?** काक्वा व्याख्येयमेतत् । यदि शब्दो वा अत्र द्रष्टव्यः । कः ? इत्याह--**प्रतिवादी इति** हेतोः **युगपन्निग्रहप्राप्तिः** । कुतः ? इत्याह--**जयनात् युगपद्** इत्यनुवर्त्तते, भूतदोषात् पराजयवत् तत्त्वप्रत्यायनात् जयोऽपि वादिनोऽवश्यंभावी इति मन्यते । उपसंहारमाह--यत एवं **तत्** तस्मात् **न कस्यचित् जयो नाम** । केन विना ? इत्याह--**स्वपक्ष** इत्यादि । केन कृत्वा ? इत्याह **न्यूनता** इत्यादि । कुतः ? इत्याह--**मार्गस्य** सम्यग्दर्शनादेः **प्रभावना** प्रकाशनं **लक्षणं** यस्य [तस्य] भावात् **तत्त्वात्** । कस्य ? /ms **जयस्य** इति । यत एवं **तस्मात् निराकृतपक्षत्वमेव** निराकृतः पक्षो यस्य तस्य भावः तत्त्वमेव नान्यत् प्रतिज्ञादिकं **निग्रहस्थानं** वादिनः प्रतिवादिनो वा

१ ब्दो] सत्त्वं
१ हेतुः] अनित्यः शब्दः सत्त्वात् इत्यत्र ।
२ *] सत्त्वादेव ।
२ रं] एकस्मादेव साध्यसिद्धौ द्वितीयहेतूपादाने हेत्वन्तरं नाम निग्रहस्थानं भवति । अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ।— न्यायसू० ५ । २ । ६ ।
४ दिना] पृ० ३२२ ।
७ तिपाद्येपि] वाद्यपि
८ *] णं **समुद्भाव्य**
११ मुद्भाव्य] वादिनं जयतीति सम्बन्धः ।
१२ रार्थेन] द्वितीयार्थेन ।
२१ द्वितीयेन] कारिकाम् ।

। तत्तु असम्यक्साधनवादिनि जैने सौगतस्य प्रतिज्ञादिवचनमुद्भावयतोऽपि अस्तीति स एव निगृह्यते इति भावः । § 1643

एतेनेदमपि प्रत्युक्तं यदुक्तम्--**पञ्चावयवोपपन्नः** न्यायसू° १ । २ । १ इत्यत्र नैयायिकादिना अवयवन्यूनता-विपर्यास-आधिक्यं निग्रहस्थानम् इति; पर आह अत्य ल मिदमुच्यते--**निराकृतपक्षत्वमेव निग्रहस्थानम्** इति; यावता तूष्णींभावोऽपि तदिति चेत्; अत्राह--**कस्यचित्** वादिनः प्रतिवादिनो वा **तूष्णीम्भावे सति तावता** तूष्णीम्भावमात्रेण **परस्य** प्रतिवादिनो वादिनो वा **जयाभावात् कः केन निगृह्यते** । कुतः ? इत्याह--**युगपद्** इत्यादि । न केवलं साधनाऽसाधनाङ्गप्रतिज्ञादिवचनोद्भावनयोः युगपत् संभवः किन्तु **तूष्णीम्भावस्यापि युगपत् संभवात्** । एतदुक्तं भवति--यदि वादिनः तूष्णीम्भावात् पराजयः तस्यापि कदाचित् तद्भावात् वादिनः संभवेदिति सकृज्जयेतरौ स्याताम् इति । § 1644

ननु कस्यचित् तूष्णीम्भावमात्रेण न परस्य तयो येनायं दोषः स्यात्, अपि तु तथोद्भावयतः, न च द्वयोः तूष्णीम्भावे तदस्तीति चेत्; अत्राह--**साधन** इत्यादि । साधने ये * **दूषणं** च असिद्धत्वादि, तद् इत्यनेन साधनदूषणं परामृश्यते तदिव आभासत इति **तदाभासम्** च तत्त्वतो
334/mkj असिद्धादेः * **तथा** भावेन **उद्भाव्यमान** तयोश्च **युगपत् संभवात्** इति
/ms सम्बन्धः । एवं मन्यते वादिना असिद्धादीनां साधनदोषाणाम् अन्येन्य तस्मित् प्रयुक्ते तन्नोद्भावयति परः किन्तु अन्यमेव यदा; तदा कस्य जयः पराजयो वा ? न कस्यचित्, अन्यथा द्वयोरपि सकृत् स्यात्, समतैव तु न्याय्या । क एवं व्यवस्थापयति ? सभा इति चेत्; कुतः ? द्वयोरपि

---

२ स] सौगत एव ।
४ त्र] प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादःन्यायसू° १ । २ । १ इति वादलक्षणे । अनेन च हीनमन्यतमेनाप्यवयवेन न्यूनम्, हेतूदाहरणाधिकमधिकम् इति न्यूनाधिकयोरुद्भावनमनुज्ञायते । सिद्धान्ताविरुद्धग्रहणेनापि सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः इति विरुद्धाख्यहेत्वाभासोद्भावनमनुज्ञातमित्येवं वादे त्रीणि निग्रहस्थानान्युद्भावनीयानि । अन्ये वदन्ति--विरुद्ध एव हेत्वाभासो वादे चोद्यते नानैकान्तिकादिरिति कथमेतद् युज्यते ? निग्रहस्थानेभ्यः पृथगुपदिष्टाः हेत्वाभासा वादे चोदनीया भविष्यन्ति इति भाष्यकारवचनात् प्रमाणपदेन च तन्मूलावयवाक्षेपात् प्रमाणाभासमूलनिरासे सति सकलहेत्वाभासोद्भावनमपि तत्र सिद्धमिति । सिद्धान्ताविरुद्धग्रहणेन सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्त इत्यपसिद्धान्ताख्यनिग्रहस्थानानि वादे उद्भाव्यन्त इति ।--न्यायम° प्रमे° पृ° १५० ।
५ ल] ल्प
६ तूष्णींभावोऽपि] निग्रहस्थानम् ।
११ त] प्रतिवादिनोऽपि ।
११ त] तूष्णीम्भावात् ।
११ वादिनः] जयः ।
१३ यो] तयोः प्रसङ्गः
१४ त] उद्भावनमस्ति ।
१५ *] **साधनं च**
१६ तो] तेषाम्
१७ *] अन्यतरस्यापि
१७ मान] ने
१९ स्मित्] अन्यतरस्मिन्
१९ प] प्रतिवादी ।

तत्त्वसिद्धेरभावात्, एकस्य दुष्टसाधनवचनाद् अन्यस्य अन्यदोषप्रकाशनात् । *सैव तर्हि तूष्णीम्भावमात्रप्रकाशनेऽपि, कस्यचिदिष्टसिद्धेरभावात् अन्यथा साधनोपयोगाभावं तयोः समतां व्यवस्थापयितुमर्हति । यदि पुनः वादिनः तद्दोषप्रकाशनाद् इतरो जयवान् इत्युच्यते; तिष्ठतु तावदेतत् **असाधनाङ्ग** इत्यादि कारिकया निरूपयिष्यमाणत्वात् । § 1645

यदा परस्य अन्यदोषोद्भावनमुद्भाव्यते तदा वादी जयति इत्येके; तत् केन उद्भाव्यते ? वादिनेति चेत्; सकृज्जयेतरौ, परस्येव आत्मनोऽपि दोषस्य तेनैव प्रकाशनात् । एतेन सभया इति निरस्तम्; सा हि यथा वादिनोऽपि सन्तं दोषं नोपलक्ष्यते अमध्यस्थताप्रसङ्गादिति । § 1646

अत्रैव दूषणान्तरं दर्शयन्नाह--**असाधनाङ्ग** इत्यादि । § 1647

...10 असाधनाङ्गवचनमदोषोद्भावनं द्वयोः ।
निग्रहस्थानमिष्टं चेत् किं पुनः साध्यसाधनैः ॥ १० ॥§ 1649

वादिनस्तूष्णींभावादसाधनाङ्गवचनाच्च निग्रहस्थानपर्यन्तजल्पपरिसमाप्तौ समम् । § 1650

**असाधनाङ्गस्य*** अनुच्चारणं तूष्णीम्भावः **अदोषोद्भावनं** दोषस्य सतोऽपि अप्रकाशनम् उपेक्षणं **द्वयोः** यथासङ्ख्येन वादिप्रतिवादिनोः **निग्रहस्थानम् इष्टं चेत्** यदि [किं न] किञ्चित् **साध्यैः साधनैश्च** ज्ञातैः इत्यध्याहारः । ध्यात्र * पेक्षया उभयत्र बहुवचनम् । **पुनः** इति वितर्के । इदमत्र तात्पर्यम्--तत्परिज्ञानं यदि स्वार्थमेव; परप्रतिपादनाऽसंभवात्, कुतः कस्यचित् क्व /ms कारुणिकत्वं यतः शिष्योपाध्यायव्यवस्था । प्रतिपादकाभावे वा कथं कस्यचित् तत्परिज्ञानम् इत्यपि चिन्त्यम् । स्वत इति चेत्; सर्वस्य स्यादिति शास्त्रप्रणयनमनर्थकम् । परार्थम् अपे ति चेत्; किमर्थं तूष्णीम्भूतः कश्चित् निगृह्यते ? स तावत् प्रतिपादनीयो यावत् तत्त्वं प्रतिपद्यते अन्यथा किमर्थतृरेवा भिधीयते--**तावद् अभिधानीयं यावत् प्रतिपाद्यः प्रतिपद्यते** । इति सुभाषितं स्यात् । § 1651

कथं परोपन्यस्तमजान [न्] तैः पुनः पुनः प्रतिपाद्यते न पुनः स्वसाधनम् इति कोऽयं नियोगः--अन्यः सर्वः प्रतिपाद्यते न वादी प्रतिवादी वेति

१ स्य] वादिनः ।
१ स्य] प्रतिवादिनः ।
२ *] सभा एव ।
६ स्य] प्रतिवादिनः ।
८ था] यदा
९ ते] नोपलक्षयति तदा
१२ चेत्]

पूर्वपक्षः--असाधनाङ्गवचनमदोषोद्भावनं द्वयोः । निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते ॥--वादन्या० श्लो० १ ।
१५ *] साधनाङ्गस्य अवचनम्
१८ *] व्यक्त्य
२२ अपे] वै
२४ तृरेवा] किमर्थमेवम

335/mkj च । दस्युत्वात् इति चेत्; कथं दस्युता ? समयान्तरावेशात्; तत एव प्रतिपाद्यते तदारित्यागेन प्रतिपादकसमये समावेशो यथा स्यात् । दृश्यन्ते हि समयान्तरानुषङ्गिणोऽपि विशेषप्रतिपादनवशाद् अन्यमार्गानुसारिणो भवन्तः । केचित् न सर्वे इति चेत्; न तर्हि प्रतिपाद्यः, नहि अन्योऽपि प्रतिपाद्यमानोऽभीष्टसमय एव वर्तते, तत्राप्रवर्त्तनस्य कस्यचि समयान्तरे प्रवर्त्तनस्य च दर्शनात् । कथमेवं शिष्टादिः दस्युर्न भवेत् वादप्रवृत्तिकाले तत्समा, इतरथा तत्र प्रवृत्तिः कुतः ? सर्वदा नेति चेत्; अन्ययोपि सर्वदा ति कुतो निश्चयः ? एतेन चोद्यकृत् शिष्योऽपि दस्युः स्यादिति विज्ञेयम् । अथ निग्रहबुद्ध्या तेर्दस्युता; उक्तमत्र शिष्टादेः स्यात् । § 1652

किञ्च, तूष्णमासीनो यदि वादी दस्युत्वान्न प्रयते, केवलं न गृह्यते; तर्हि वादिनाऽपि अनेन परोऽत एव न समीचीनसाधनात् प्रधनीयः, तं
/ms प्रति मौनं विधातव्यं यत्किञ्चिद्वा भाषणीयम् । एवं सति स एव गृहीति चेत्; तत्र ठकप्रयोगः कर्त्तव्यः यतोऽसौ विमुखो भवति, तत्परिज्ञा च ठकाः सेवनीयाः वादं चिकीर्षुभिः, न साधनपरिज्ञानार्थं तत्त्ववादिनः । ततस्तत्प्रयोगात् निभृत एवं वक्तव्यः पर्यनुयोज्योऽपि अहमुपेक्षितस्त्वया ततो निगृहीतोऽसि इति । तया असा स्यादिति चेत्; न; दस्युनिग्रहे तदयोगात्, अन्यत्र समत्वात् । § 1653

इदमपरं व्याख्यानम्--**साधनाङ्गं यन्न** भवति **वचनम्, दोषो** यो **न** भवति तस्य **उद्भावनं द्वयोर्निग्रहस्थानम् इष्टं चेत् किं पुनः साध्यसाधनैः** इति । तथाहि--प्रतिज्ञादिवचनम् असिद्धादिवचनं च भूतदोव्य वादिनि निगृहीते पुनः पुनः स्वपक्षसाधनाय प्रतिवादिनः प्रयासो निग्रहस्थानं स्यात् । भूतदोषोद्भावनमुद्भाव्य प्रतिवादिनि वादिना निर्जिते पुनः तस्य स्वपक्षसाधनं तादृशमेवेति । § 1654

परः पुनरेतत् परिहरति--नैव कश्चित् निग्रहोत्तरका विपक्षसिद्धये यतते प्रयोजनाभावात्, **वादिना उभयं कर्त्तव्यम् स्वपक्षसाधनं परपक्षदूषण** इति तु वादिप्रवृत्तिनियमार्थम् । वादिना हि [न] यत्किञ्चन भाषणीयम् अपि तु स्वपयोः साधनदूषणे, वादिना इति वचनात्, इतरथा तस्य निग्रहः स्यादिति; तन्न सारम्; साधनाङ्गं विरुद्धसाधनमत्र गृह्यते, तस्य पक्षसाधनंकत्वेन साधनाङ्गत्वात् तो निग्रहस्याभिमतत्वात्, **तस्मात् निराकृतपक्षत्वमेव**

१ रावेशात्] चेत्; ।
१ त] समयान्तरप्रवेशार्थमेव ।
७ त] स्वमशात् ।
७ त] वादे ।
७ योपि] अन्यस्यापि
१० न] नि
११ प] प्रतिवादी ।
१३ गृहीति] निगृह्णातीति
१३ वि] मूकः ।
१५ योगात्] ठकप्रयोगात् ।
१९ द्व] वादिप्रतिवादिनोः ।
२२ त] दिनः ।
२३ नं] निग्रहायैव ।
२६ इति] तस्माज्जिगीषता स्वपक्षश्च स्थापनीयः परपक्षश्च निराकर्तव्यः ।दन्या० पृ० ७२ ।
२९ त्वेन] परपक्षसाधकत्वेन

**निग्रहस्थानम्** इति वचनात्, अपि ***असिद्धानेकान्तिकप्रतिज्ञादितद्वचनम्** /ms **असाधनाङ्गवचनं वादिनो निनम्** । वादन्या° पृ° ६६ कुत एतत् ? ततः तत्पक्षासिद्धेरिति चेत्; किं पुनः पर पक्षसिद्धिरस्ति यतोऽसौ विजयी ? न च तज्जयमन्तरेण इतरस्य निग्रहो नाम, परस्परापेक्षत्वा यपराजययोः । न स्वपक्षसिद्ध्या परो वादिनमभिभवति किन्तु तद्वचनदोषमात्रात् । न चैवं 336/mkj भ्रूनर्त्तनादेरपि अभिभवेद् अविशेषात् । भवत्येव ततः परपक्षसिद्धिरिति चेत्; न; इतरदोषमात्रात् तदयोगात्, अन्यथा साध्यस्य यानि साधनानि तद-विनाभावीनि तैः किम् ? कथं चैवं वादिनो असिद्धादिः विरुद्धाद् विशिष्येत ? § 1655

ततः स्थितम्--**असाधनाङ्गस्य वचनं** वादिनो निग्रहस्थानम् **इष्टं चेत् किं पुनः साध्यसाधनैः** इति । तथा **अदोषस्य उद्भावनं** प्रतिवादिनो निग्रहस्थानं चिन्त्यम् । यदा हि वादिना अकलङ्कसाधने उपन्यस्ते परोऽदोषोदोषमुद्भावयति; तदा तत एव चेदसौ निगृह्येत **किं साध्यसाधनैः** साध्यस्य सिद्धये यानि साधनानि उपन्यस्तानि तैः न किञ्चित् । परनिग्रहाय तदुपन्यासः स च अन्यत एव जात इति मन्यते । ननु तदभावे अदोषोद्भावनमेव न ज्ञायते; तस्य अन्यथापि परिज्ञानात् । § 1656

किंच, सम्यक्साधनप्रयोगे यदा परो दोषं नोद्भावयति तदा कुतोऽसौ निगृह्यते ? तत्प्रयोगादिति चेत्; तत एव अदोषोद्भावनेऽपि निगृह्यताम् । नहि तत्प्रयोगः तदा तत्प्रयोगो भवति, अन्यथा अदोषोद्भावनमपि दुरन्वयम् । अथाभ्यत एव निग्रहे किं ततः तेन ? त एव तद्भावे किमन्यतः तेन इति समानम् । अत एव आह--**किं पुनः साध्यसाधनैः** इति । अस्याय- /ms मर्थः--अदोषोद्भावनं परस्य निग्रहस्थानमिष्टं चेत्; **किं पुनः साध्यसाधनैः** तत् ? इष्टम् इत्यनुवर्त्तते । इष्टं चेत्; अदोषोद्भावनमनर्थकमिति मन्यते । § 1657

स्यान्मतम्--अदोषोद्भावनं सदपि चेद् वादी निग्रहं नोद्भावयते; तर्हि पर्यनुयोज्योपेक्षणात् स एव निगृह्यते निराकृतपक्षत्वात् । तदुद्भावनेऽपि स-र्वं समानम् । तदुभ[यस्य निग्रह] स्थानमिष्टमिति चेत्; आस्तां तावदेतत् **वादिनोऽनेकहेतूक्तौ** सिद्धिवि° परि° ५ इत्यादिना निरूपयिष्यमाणत्वात् । § 1658

अपरः प्राह--न साधुसाधनप्रयोगे अदोषोद्भावनं निग्रहस्थानमिष्टम्, अपि तु तद्विपरीतप्रयोगे इति; तत्राह--**किं पुनः साध्यसाधनैः** इति ।

---

१ *] साधनस्य सिद्धेर्यन्नाङ्गम् असिद्धो विरुद्धोऽनैकान्तिको वा हेत्वाभासः तस्य वचनं वादिनो निग्रहस्थानम् असमर्थोपादानात् ।--वादन्या° पृ° ६६ ।
६ त] वादिपक्षे दोषोद्भावनात् ।
१२ रोऽदोषो] षे
१३ सौ] प्रतिवादी ।
१४ न्यासः] साधनोपन्यासः ।
१५ त] अदोषोद्भावनादेव ।
१५ भावे] साधनाभावे ।
१७ कुतोऽसौ] प्रतिवादी ।
१८ त] सम्यक्साधनप्रयोगात् ।
१९ त] तदैव ।
२० अथाभ्य] न्य
२० त] तत
२६ स] वादी ।

तात्पर्यमिदमत्र--वादिना हेत्वाभासे प्रयुक्ते प्रतिवादिना च अदोषे समुद्भाविते न वादी प्रतिवादिनं निगृह्णाति; सदोषचेतनस्य जयाभावात्, न तमन्तरेण इतरस्य निग्रहो नाम । तथा सति प्रतिवाद्यपि वादिनं निगृह्णीयादिति युगपत् जयेतरौ स्याताम्, ततः तयोः समतैव युक्ता । तथापि प्रतिवादिन एव स्थापयन्तः कथं प्राश्निका मध्यस्था यतो वादे अपेक्षन्ते ? साध्यं साध्यते येषु तैः **साध्यसाधनैः** सभ्यैः **किम्** इति । § 1659

ननु स्यात् समता यदि वादी प्रतिवादिनः अदोषोद्भावनं नाविर्भावयेत्, आविर्भावने तु मतं न यतीति चेत्; तत्रेदं चिन्त्यते--स्वदोषं प्रकाश्य, अन्यथा वा तदाविर्भावयेदिति ? तत्र न तावदन्त्यः पक्षः; स्वदोषाऽप्रकाशने /ms मया प्रयुक्तो दोषः अनेन नोद्भावितोऽपि कृत्य इति ज्ञातुमशक्तेः । 337/mkj नापि आद्यः; स्वयं स्वदोषप्रकाशनात् तस्यैव निग्रहप्राप्तिः इत्युक्तत्वात् । यदि पुनः परत्र भूतदोषप्रकाशनात् जयः स्वात्मनि भूतदोषोविर्भावनाद् विपर्ययोऽपि स्यात् । अथ भूतदोषोद्भावनगुणेन तिरस्कारात् नासौ दोषः; तेन अस्य तिरस्कारात् कथमयं गुणः ? § 1660

किञ्च, यदि अन्यात्मदोषप्रकाशनात् स्वदोषाः स्वात्मनि दोषात्मतां जहति; तर्हि असिद्धादीनां हेत्वाभासानामन्यतमं तदाभासं स्वयमेवोच्चार्य निर्व्वरं वक्तव्यम्--मया असिद्धोऽन्यो वा हेतुः प्रयुक्तोऽपि क्रिया नोद्भावित इति । तया च सस माह--* **वादिनः** इत्यादि । **[वादि]नः** पूर्वपक्षवतः **तूष्णींभावाद् असाधनाङ्गवचनात्** स्वपरपक्षयोः साधनाङ्गं यन्न भवति प्रतिज्ञाद्यदिसिद्धादि, तस्य वचनात्, न पुनः **न साधनाङ्गवचनाद् असाधनाङ्गवचनात्** इति व्याख्यानम्, अस्य **तूष्णींभावात्** इत्यनेन गतत्वात् । **च** इति समुच्चये । **निग्रहस्थानं पर्यन्ते** यस्य **जल्प[स्य]** वादस्य तस्य **परिसमाप्तौ** सत्याम् । § 1661

ननु वादिवत् प्रतिवादिनोऽपि तूष्णींभावे यत्किञ्चनभाषणभावे वा द्वयोः समत्वान्न तत्परिसमाप्तिरिति चेत्; अत्राह--**भूत** इत्यादि । § 1662

---

२ स्य] सदोषत्वेन तस्य
५ अपेक्ष] क्ष्य
८ तीति] स[[वादी ।]] तं[[प्रतिवादिनम् ।]] जयतीति
९ वा] तस्य प्रतिवादिनः अदोषोद्भावनमाविर्भावयेत् ।
१० कृत्य] तु अन्य
११ स्यैव] वादिनः ।
१२ त्र] प्रतिवादिनि ।
१२ दोषो] षा
१३ योऽपि] पराजयोऽपि ।
१६ रं] निर्भरं
१७ क्रिया] त्वया
१८ *] **तथा च समम्** । इत्याह--
१९ प्र] अथवा तस्यैव साधनस्य यन्नाङ्गं प्रतिज्ञोपनयनिगमनादि तस्य असाधनाङ्गस्य साधनवाक्ये उपादानं वादिनो निग्रहस्थानं व्यर्थाभिधानात् । --वादन्या॰ पृ॰ ६१ ।
१९ दिसिद्धा] ज्ञाद्यसिद्धा
२० इ] अथवा सिद्धिः साधनं तदङ्गं धर्मो यस्यार्थस्य विवादाश्रयस्य वादप्रस्तावहेतोः स साधनाङ्गः तद्व्यतिरेकेणापरस्याप्यजिज्ञासितस्य विशेषस्य शास्त्राश्रयव्याजादिभिः प्रक्षेपो मोषणं च परव्यामोहनानुभाषणशक्तिविघातादिहेतोः, तदप्यसाधनाङ्गवचनं वादिनो निग्रहस्थानमप्रस्तुताभिधानात् । --वादन्या॰ पृ॰ ६६ ।

...11 भूतदोषं समुद्भाव्य जितवान् पुनरन्यथा ।
परिसमाप्तेस्तावतैवास्य कथं वादी निगृह्यते ॥ ११
॥§ 1664

तन्न सुभाषितम्-- विजिगीषुणोभयं कर्त्तव्यं स्वपक्षसाधनं परपक्षदूषणं च इति । § 1665

**भूतदोषं** तूष्णींम्भावादिपरमार्थदोषम् **उद्भाव्य** कथमुद्भाव्य ? इत्याह--**जितवान्** इति । यदि वा, **तमु द्भाव्य वादी जितवान्** यतः ततः **पुनः** पश्चाद् वितर्के च पुनः इति...[स्व]पक्षसिद्धिप्रतिपतमातः प्रतिवादी **निगृह्यते** । कुतः ? इत्याह--**तावतैव** भूतदोषोद्भावनमात्रेणैव प्रस्या वादिनिग्रह- /ms
रूपस्य **परिसमाप्तेः** इति । **अन्यथा** तदपरिसमाप्तिप्रज्ञाकरेण **कथं वादी निगृह्यते** न कथञ्चित् । § 1666

तथाहि--तां प्रति तत्प्रयत्नः वादिनो निग्रहार्थः, प्रतिबोधनार्थः, सता प्रतिबोधनार्थः, एवमेव वादिति चत्वारः पक्षः । तत्र आद्ये पक्षे तद्वैफल्यम्; अन्यत एव तन्निग्रहात्, तूष्णीम्भावादेरपि ठकप्रयोगाद्भावात् । द्वितीये तूष्णीम्भावादेर्निग्रहानुपपत्तेः । [न] हि परप्रतिपादनाय कृतावासना दोष-
मात्रेण परान निग्रहेण योजयन्ति शिष्याणि च सिद्धान्तद्वयवेदिनं 338/mkj
प्राश्निकाः । तृतीयविकल्पवार्त्तापि न युक्ता । चतुर्थे तु वक्तुः असम्बद्धाभिधायित्वम्, साक्षिसमक्षम् आत्मोत्कर्षज्ञापनार्थं तां प्रति यतते प्रतिवादी न तत्परिसमाप्तौ नितराम् आलोक्षाथा ज्ञापितः स्यादिति सैव क्रियताम् । § 1667

अथ ततः तत्परिसमाप्तौ न कश्चित् स्वपक्षसिद्धिं प्रति यतते इति; अत्राह--**तन्न** इत्यादि । **तत्** तस्मात् ततः तत्परिसमाप्तेर्न **सुभाषितम्** । किम् ? इत्याह--**विजिगीषुणा** वादिना प्रतिवादिना वा **उभयं कर्त्तव्यम् स्वपक्षसाधनं परपक्षदूषणम् इति** । तथाहि--प्रतिवादिना विजिगीषुणा न तावत् तत्कर्त्तव्यम् अपि तु तेन वादी यतः कुतश्चित् निर्मुखः पिशाचो वा विधातव्यः । न तेनापि;* प्रतिवादी तथा विधातव्यः । § 1668

एतेन अदोषोद्भावनम् इत्यपि व्याख्यातम् । ततः स्थितम्--**कस्यचित् तूष्णीम्भाव** इत्यादि । यदि शाब्दो हेतुः शाब्दं प्रमाणं वा; अनित्यः श-

५ उद्भाव्य] समुद्भाव्य
६ मु] समु
७ मातः] द्धिं प्रतिपन्नवता
८ स्या] **अस्य**
९ रेण] प्रकारेण
११ तां] स्वपक्षसिद्धिं प्रति ।
१२ ता] सभा
१२ वादिति] वा स्यादिति
१४ ना] कृतौ असता
१५ रान] न्
१५ शिष्याणि] ष्यान्
१६ वेदिनं] नः
१८ आलोक्षाथा] ?
२५ *] वादिनापि, तत्कर्तव्यमिति सम्बन्धः ।

/ms ब्दः इति वचनादेव साध्यसिद्धेः किं कृतकत्वादिना, तत्सिद्धौ तद्वचनं निग्रहस्थानमिति । § 1669

अत्रैव दूषणान्तरमाह--**साकल्येन** इत्यादि । § 1670

...12 साकल्येनाविनाभावे सिद्धे हेतोः प्रसिध्यति ।
ततः सत्त्वादिवादीव पक्षधर्मत्ववाद्यपि ॥ १२ ॥§ 1672

साकल्येन व्याप्तहेतुवचनात् पुनः पक्षधर्मत्ववचनं प्रतिज्ञोपनयवचनेन समानं भवेद्वा न वेति तथागतरागं परित्यज्य चक्षुषी निमील्य समुन्मील्य वा चिन्तय तावत् तत्तथा साधर्म्यवैधर्म्ययोः सहवचनेन साधनवाक्यं समानं भवेद्वा न वा ? यदि समानमिति किं प्रतिज्ञादिवचनैरेव ? साधनसामर्थ्यपरिज्ञानमुभयत्र समानम् । § 1673

**साकल्येन** अ [न]वयवेन **अविनाभावे सिद्धे** निश्चिते सति । कस्य ? हेतोः । **तत** एव हेतोः सकाशात् **प्रसिध्यति** सति साध्य **सत्त्वादिवादी [व आदि]** शब्देन उपनयादिपरिग्रहः । **पक्षधर्मत्ववाद्यपि** स्यात् इत्यध्याहारः । पक्षधर्मत्ववादी सत्त्वा[दि] वादीव वत् सदृशः सत्त्वा[दि]वादी स्यात् इत्यर्थः । नहि अनित्यः शब्दः इत्यस्मात् सन् कृतको वा शब्दः इत्यादेः विशेषं पश्यामः । **अपि** शब्दात् यत् सत् कृतकं वा तदनित्यं यथा घटः, सन् कृतकश्च शब्दः इत्यादिवाक्यवादी गृह्यते । हि उपनयतिगमन युगपत् साधर्म्यवैधर्म्यप्रयोगवादिनो न विशिष्यते इति प्रवृत्तौ निरूपयिष्यते । § 1674

कारिकां व्याख्यातुमाह--**साकल्येन** इत्यादि । **साकल्येन व्याप्तस्य हेतोः** यत् सत् कृतकं वा तदनित्यं यथा घटः इत्यादि **यद्वचनं** तस्मात् **पुनः** पश्चात् **पक्षधर्मत्ववचनं समानम्** सदृशम् । केन ? इत्याह--**प्रतिज्ञोपनय** इत्यादि । **भवेद्वा नवेति तथागतरागं** सुगताग्रहम् अथवा **तथा** तेन प्रतिज्ञादिवचनं निग्रहस्थानम्, पक्षधर्मत्ववचनम् इति प्रकारेण **आगतरागं**
339/mkj **परित्यज्य चक्षुषी निमील्य समुन्मील्य वा चिन्तय ता [वत्] तत्तथा साधर्म्य वैधर्म्ययोः सह** युगपत् यत् सत् तदनित्यं यथा घटः, संश्च शब्दः, यदि नित्यं न भवति तत् सदपि न भवति यथा आकाशं तथा च शब्दः इति यद् **वचनं** तेन **समानम्** यत् सत् तत् सर्वमनित्यम् घटवत्, संश्च शब्दः
/ms इत्यादि **साधनवाक्यं भवेद्वा न वा** इत्यादि सर्ववक्तव्यम् । § 1675

ननु अनित्यः शब्दः इत्यनेन प्रतिज्ञावचनेन संश्च शब्दः इति पक्षधर्मत्ववचनं समानं भाव्यम्, साध्यस्यैव निर्देशात् । यथैव हि विप्रतिपन्नं प्रति

१२ साध्य] ध्ये
१४ त्] तद्वत्
१७ ति] यनि
१७ न] ने
१८ ते] ष्येते
१८ वृत्तौ] ति वृत्तौ[[टीकायाम् ।]]

२३ इति] अथवा तस्यैव साधनस्य यन्नाङ्गं प्रतिज्ञोपनयनिगमनादि, तस्यासाधनाङ्गस्य साधनवाक्ये उपादानं वादिनो निग्रहस्थानं व्यर्थाभिधानादेव ।--वादन्या° पृ° ६१ ।
२६ दि] यद

शब्दस्य अनित्यत्वं साध्यम्, तथा सत्त्वादिकमपि अन्यथा तद्वचनानर्थक्यं स्यात् । अनित्यः शब्दः, कृतकत्वात्, यत् कृतकं तदनित्यं दृष्टं यथा घटः, कृतकश्च शब्दः इति उपनयवचनेन च । यथैव हि शब्दोऽनित्यः कृतकत्वात् इत्यनेन उक्त एव अर्थः कृतकश्च शब्दः इत्यनेनोच्यते तथा यत्कृतकं तदनित्यम् इत्यनेनोक्तमेव कृतकश्च शब्दः इत्यनेनापि उच्यते । साकल्यव्याप्तिवचनात् शब्दकृतकत्वाभिधानात् सामान्ये विशेषस्य अन्तर्भावात् । अन्यथा शब्दकृतकत्ववत् अन्यस्यापि तेनानभिधानाद् व्याप्तिवचनमनर्थकमापद्येत । § 1676

एतेन तस्मादनित्यः इत्यनेन निगमनवचनेन तत्समानमिति चिन्तितम् । यथा खलु हेतुसामर्थ्येन उक्त एव अर्थो निगमनेन अभिधीयते तथा व्याप्तिवाक्येन उक्तः पक्षधर्मत्ववचनेन । § 1677

तथा साधर्म्यवैधर्म्ययोः सहवचनेन साधनवाक्यं समानम् । यथा वै खलु निश्चितेऽन्वये उक्ते व्यतिरेकस्य, अव्यतिरेकान्वय स्य अर्थापत्त्या गतिः तथा विपक्षसद्भावबाधकप्रमाणबलात् साकल्येन व्याप्तस्य अवगतस्य हेतोः वचनात् पक्षधर्मत्वं सपक्षे सत्त्वम् अर्थापत्त्या अवगम्यते इति त्रिरूपसाधनवाक्यं क्वोपयुज्यत इति चेत्; अत्राह--**यदसमानम् इति किं प्रतिज्ञादिवचनैरिव प्रतिज्ञादिवचनैरेव किम्** इति, निगृह्येत इति पदघटना /ms । नहि तद्वचनैः हेतोर्व्याप्तिः खण्ड्यते तत्परिज्ञानं वा यतस्तत्प्रतिबन्धः स्यात् । § 1678

ननु परार्थमनुमानं न हेतुदोषादेव दुष्टम् अपि तु वादिदोषादपि, अस्ति च दोषः प्रतिज्ञादिवचनरहितस्यापि साधनस्य साध्यसिद्धौ यत्सामर्थ्यं तदपरिज्ञानम्, अन्यथा न तत्प्रयोगं कुर्यात् । को हि धीमान् अनर्थके ज्ञानं नेव आत्मानं क्लेशयति इति चेत्; अत्राह--**साधन** इत्यादि । **साधनस्य** सत्त्वादेः **सामर्थ्यस्य परिज्ञानम् उभयत्र** प्रतिज्ञादिवचने पक्षधर्मत्वादिवचने च उक्तविधिना **समानम्** । ततः सत्त्वादिवादीव पक्षधर्मत्वादिवादी च पक्षधर्मत्वादिवाद्यपि निगृह्येत इति मन्यते । § 1679

किं च, यदि परार्थे अनुमाने साधनसाधर्म्यापरिज्ञानं दोषः इति वादी निगृह्येत तर्हि सौगतस्य इदमपरं निग्रहस्थानं स्यादिति दर्शयन्नाह--**सत्त्वादेव** इत्यादि । § 1680

...13 सत्त्वादेव क्षणस्थाने उत्पत्त्यादौ निगृह्यते ।

---

३ उ ] हेतोरुपसंहार उपनयः ।
३ च ] समानं भाव्यमिति सम्बन्धः ।
९ नेन ] प्रतिज्ञाया उपसंहारो निगमनम् ।
९ नेन ] पक्षधर्मत्ववचनम् ।
१३ य ] व्यतिरेके च अन्वय
१६ द ] दि
१७ नैरिव ] रेव
१८ त ] प्रतिज्ञादिवचनैः ।
२२ अ ] साधनसामर्थ्यपरिज्ञाने ।
२३ नेव ] अनर्थकज्ञानेनैव
२७ र्म्या ] सामर्थ्या

धर्माधिकोक्तितो वादी तत्सामर्थ्यानभिज्ञया ॥ १३ ॥§ 1682

340/mkj

केवलस्यापि भावस्य विनाशसाधनसामर्थ्यात् पुनः उत्पत्तेः कृतकत्वाद्वेति उपाधिविशिष्टोपादानात् निग्रहस्थानम् स्वपरव्यापारापेक्षभावलक्षणत्वात्तेषाम् । न हि येनावश्यं निग्रहस्थानं तेन शिष्या व्युत्पादनीयाः । न हि शुद्धस्यापि साधनत्वे पुनरुपाध्यपेक्षणं युक्तम् । § 1683

**सत्त्वाद्** विद्यमानत्वाद् भिन्नाभिन्नोपाधिरहितात् इति **एवकारार्थ**[ा] **क्षणस्थाने** क्वचिद् धर्मिणि क्षणक्षये सिद्धे निश्चिते सति **उत्पत्त्यादौ** उत्पत्तिः आदिर्यस्य कृतकत्वादेः स तथोक्तः, तस्मिन् प्रयुक्ते इत्यध्याहारः **निगृह्यते** वादी इति शेषः । § 1684

ननु उत्पत्तिशब्देन प्रागसतः आत्मलाभलक्षणं सत्त्वमुच्यते, कृतकशब्देनापि तदेता पेक्षितपरव्यापारभावम्, एवं प्रयत्नानन्तरीयकत्वादावपि वक्तव्यम्, ततो यथा अनित्यः शब्दः सत्त्वात् इत्युक्ते न निग्रहः तथा उत्पत्तेः कृतकत्वात् प्रयत्नानन्तरीयकत्वाद् इत्युक्तेऽपि न स युक्तः । न
/ms हि शब्दान्तरेण तदेव उच्यमानं निग्रहाय जायते अन्यथा धूमोऽपि तेन उच्यमानो जायेत इति चेत्; अत्राह--**धर्म** इत्यादि । **धर्मेण** प्रागसत्त्व-परव्यापारादिरूपेण भिन्नाभिन्नविशेषणेन **अधिकस्योक्तितः** उक्ते सत्त्वस्य उत्पत्त्यादिना इति उभयत्र विभक्तिपरिणामेन सम्बन्धः । एतदुक्तं भवति--यच्छुद्धसत्त्वं सत्त्वशब्देनोच्यते तदेव उत्पत्त्यादिशब्देन यद्युच्येत; न दोषोऽयं स्यात् । तद्वचने च **सत्त्वं शुद्धाशुद्धभेदेन भिन्नाऽभिन्नविशेषणभेदेन च शिष्यव्युत्पादनार्थं सत्त्वकृतकत्वादिशब्दैः अभिधीयते** इति प्लवते । § 1685

किंच, कृतकत्वादिशब्देषु सङ्केतमात्राश्रयणं न व्युत्पत्तेः कथमेवं सति प्रयत्नानन्तरीयकत्वस्य सपक्षैकदेशव्यापकत्वम्, तस्मिन् वा साध्ये अनित्यत्वस्य अनैकान्तिकत्वं शुद्धे सत्त्वे तदयोगात् ? अनेन विशिष्टं तदुच्यते नोत्पत्त्यादिना इति किं कृतो विभागः ? § 1686

---

६ भिन्नाभिन्नोपा] विशेषण ।
११ देता] देवाऽ
१४ तेन] शब्दान्तरेण ।
१९ त] सत्त्वशब्देनैव उत्पत्त्यादिवचने ।
१९ त्त्वं] तुलना--यथा यत् सत् तत् सर्वं क्षणिकं यथा घटादयः, संश्च शब्दः ।--हेतुबि॰ पृ॰ ५५ ।
१९ भिन्ना] उपाधिभेदापेक्षो वा स्वभावः केवलोऽथवा । उच्यते साध्यसिद्ध्यर्थं नाशे कार्यत्वसत्त्ववत् ॥--प्र॰ वा॰ ३ । १८५, १८६ ।
१९ ऽभिन्न] क्वचित् स्वभावभूतधर्मपरिग्रहद्वारेण यथा तत्रैवोत्पत्तिः ।--प्र॰ वा॰ स्व॰ पृ॰ ३४९ ।
२० इति] यत् सत् तत्सर्वमनित्यं यथा घटादिरिति शुद्धस्य स्वभावहेतोः प्रयोगः । यदुत्पत्तिमत्तदनित्यमिति स्वभावभूतधर्मभेदेन स्वभावस्य प्रयोगः । यत्कृतकं तदनित्यमिति उपाधिभेदेन । एवं प्रत्ययभेदभेदित्वादयो द्रष्टव्याः ।--न्यायबि॰ ३ । ११-१३, १५ । एतेन प्रत्ययभेदभेदित्वादयो व्याख्याताः ।--प्र॰ वा॰ स्ववृ॰ पृ॰ ३४८ ।
२१ मेवं] सत्त्वात् प्रयत्नानन्तरीयकत्वादेरभेदे ।
२२ स्मिन्] प्रयत्नानन्तरीकत्वे ।
२३ अनेन] सत्त्वेन ।

एतेन अर्थान्तरं नोच्यते इति निरस्तम् । § 1687

ननु भवतु धर्मादि[धि]कस्य सत्त्वस्य अभिधानम् उत्पत्त्यादिना तथापि कथं तत्र निगृह्येत इति चेत्; अत्राह--**तद्** इत्यादि । तच्छब्देन सत्त्वं परामृश्यते **तस्य सामर्थ्यं** केवलस्य साधनशक्तिः **तस्यानभिज्ञया** अपरिज्ञानेन । एवं मन्यते यदि--शुद्धस्य सत्त्वस्य साधनसामर्थ्यं किं विशेषणननोन्ये यत्तदुपादा [नं] न निग्रहस्थानमिति । § 1688

*अन्ये पुनराहुः--नोत्पत्त्यादेः क्वचित् क्षणिकत्वं साध्यते परमार्थतस्तदभावात्, अपि तु तथावभासनात् **यथावभासते** इत्यादि वचनात् । तदेव 341/mkj च सत्त्वम् **उपलम्भः सत्ता** प्र० वार्तिकाल० ३ । ५४ इति वचनात्, तेनायमदोष इति; तेषामपि इदमेवोत्तरम् । तद्यथा सत्त्वादेः क्षणिकत्वेन अवभासादेव सर्ववस्तूनां क्षणस्थाने सिद्धे निश्चिते अङ्गीक्रियमाणे निगृह्येत /ms सौगतः । कुतः ? इत्यत्राह--**धर्माधिकोक्तितः** इति । **धर्मश्च अधिकश्च** तयोः **उक्तितः** । नहि एकान्तक्षणिकता[वभा]सनं सर्वभावानां धर्मिणां धर्मः प्रत्यक्षतोऽनुमानतो वा सिद्धः । न तावत् प्रत्यक्षतः; तत्र तदप्रतिभासनात् । न खलु चक्षुरादिबुद्धौ क्षणिकत्वेन अवभासमाना भावा भासन्त इति निश्चयोऽस्ति कुण्डलादिपर्यायानुयायिनः सर्पादयः तत्रावभासन्ते इति निर्णयात् । § 1689

विरोधादयोऽपि एवं कृतोत्तराः । भेदाभेदैकान्तसंकल्पः पर्यायतद्वतोः अनैकान्तेन निराकृतः । तत्र अनवस्थोद्भावनम् अ र्च ट स्य स्वपक्षघातीव लक्ष्यते । हेतुत्रिरूपत्वनिश्चयेऽपि तत्संभवात् अभिलाप्येतराकारद्वयस्य तत्रोपगमात्, इतरथा निर्विकल्पकैकान्ते धर्मधर्मिभावाभावान्न हे तु बि न्दो र पि कल्पनयापि व्यवस्था । § 1690

ननु पूर्वपर्यायप्रत्यक्षस्य नोत्तरपर्याये, तत्प्रत्यक्षस्य पूर्वपर्याये वृत्तिरिति कथं तेन तदनुयायित्वं कस्यचित् प्रतीयते इति चेत्; तर्हि स्वरूपमात्रपर्यवसितं तत् कथमन्येषां ग्राहकं यतः तत् क्षणिकत्वावभासनं प्रतिपद्येत, धर्मप्रतिपत्तेः धर्मिप्रतिपत्तिनान्तरीयकत्वात् इति कथं सिद्धो हेतुः ? अत एव नाऽनुमानम्; *तदभावे तदभावात् । यदि पुनः संवृतिसिद्धं सर्वं क्ष-

५ नोन्ये] णेनान्येन

७ *] प्रतिभासाद्वैतवादिनः प्रज्ञाकरादयः ।

८ त] प्रतिभासनमेव ।

१६ त] प्रत्यक्षे । तुलना--तस्मादुभयहानेन व्यावृत्त्यनुगमात्मकः । पुरुषोऽभ्युपगन्तव्यः कुण्डलादिषु सर्पवत् ॥--मी० श्लो० आत्मवाद श्लो० २८ । प्रत्यक्षप्रतिसंवेद्यः कुण्डलादिषु सर्पवत् ।--न्यायवि० २ । ११६ । तत्त्वसं० श्लो० २२३-२४ ।

१९ म्] एकान्तेन विभिन्ने च ते स्यातां वस्तुनी स च । तयोः केन विभिन्नाभ्यामभेदस्य विभेदतः । तेषामभेदसिद्ध्यर्थमभिन्नो यदि तूच्यते ॥ अन्यः स्वभावस्तस्यापि तदभेदप्रसिद्धये । कल्पनीयः स्वभावोऽन्यः तथा स्यादनवस्थितिः ॥--हेतुबि० टी० पृ० १०५ ।

२० येऽपि] निश्चयो हि अर्थरूपे विकल्पकोऽपि सन् स्वरूपे अविकल्पको भवति ।

२३ र्याये] वृत्तिरिति ।

२३ त] उत्तरपर्यायप्रत्यक्षस्य ।

२४ तेन] प्रत्यक्षेण ।

२४ क] धर्मिणो द्रव्यस्य ।

२५ त] प्रत्यक्षम् ।

२७ *] प्रत्यक्षाभावे ।

णिकत्वावभासनमभ्युपगम्य हेतोः सिद्धिः प्रार्थ्यते; परोऽपि संवृतिसिद्धम् एकस्य त्रिकालानुयायित्वावभासनमभ्युपगम्य असिद्धं [त]त्तथैव व्यवस्थापयेदविशेषात् । § 1691

/ms अथ स्वयम् उपलभ्यमानाद्भावात् क्षणिकत्वावभासनधर्मानुपलभ्य सर्वेऽपि तद्धर्मका व्यवस्थाप्यन्ते; अत्रापि तदवस्थं चोद्यम्--केन तथा व्यवस्थाप्यन्ते ? नाध्यक्षेण अनुमानेन वा; उक्तदोषात् । संवृत्या तद्व्यवस्थापने ततः क्षणिकत्वमपि संवृतिसिद्धं स्यादिति न पारमार्थिकभावस्वभावनिश्चय इति महती सौगतस्य भावस्वभावनिरूपणकुशलता ! § 1692

किंवा स्वयम् उपलभ्यमानेषु भावेषु क्षणिकत्वम् ? अपरापरकोटिविच्छिन्नतेति चेत्; कोटिग्रहणपूर्वकमध्यक्षं यदि कस्यचित् तद्विच्छिन्नत्वं गृह्णीयात्, न तर्हि अनुगमग्रहणं दूषितं स्यात्, विच्छिन्नत्ववत् तद्विपर्ययस्य 342/mkj *अन्यग्रहणसंभवात् । अन्यथा चेत्; तथैव अनुयायित्वं गृह्णीयात् इत्युक्तम् । देशव्यवहितवत् कालव्यवहितस्यापि प्रत्यक्षेण ग्रहणमविरुद्धम् सारूप्यनिषेधात् । न दृष्टान्तासिद्धिरिति चेत् । तन्न प्रत्यक्षतः पक्षधर्मतासिद्धिरस्य । नाप्यनुमानतः; तत्पूर्वकस्य अस्य तदभावे अभावात् । भवतु वा कुतश्चित् तत्सिद्धिः तथापि हेतुसिद्धित एव साध्यसिद्धेः अनुमानमनर्थकम् । तथाहि--पूर्वापरविच्छिन्नत्वेन भासने क्षणिकत्वावभासन[म]निश्चितस्य हेतुत्वायोगात् । तच्चेन्निश्चितम्; किमनिश्चितं यदनुमानसाध्यम् ? तद्व्यवहार इति चेत्; न; अस्य निश्चयात्मकत्वात् । तदिदमायातम्--घटविविक्तभूतलं निश्चिन्वतोऽपि न घटाभावविनिश्चय इति । कथं चैवंवादिनः सविकल्पप्रत्यक्षगृहीते /ms व्यवहाराय मा नुमानं प्रवर्त्तेत ? कथं वा भावेषु क्षणिकत्वमनिच्छन्तः तथावभासनमिच्छन्ति ? परमार्थतः भावधर्मप्रतिपत्तेर्भावप्रतिपत्तिनान्तरीयकत्वात् । क्षणिकभावधर्मश्च तथावभासनम्, अन्यथा **को हि भावधर्ममिच्छन् भावं नेच्छेत्** प्र० वा० स्ववृ० २ । १९३ इत्यादि सुभाषितं ? कथम् ? यथा च क्षणिकत्वमनिच्छन्तो दृश्यन्ते तथा तथावभासनमपि । ततः स्थितम्--हेतुसिद्धावेव सिद्धिः साध्यस्य अनुमानमपार्थकम् निग्रहस्थानम् । एतदेवाह--**अधिकोक्तितः** हेतुनिश्चयाद् **अधिकस्य** अनुमानस्य **उक्तितो** निगृह्येत इति । § 1693

यदि वा, क्षणिकाः सर्वे भावाः तथावभासनात्, यदि पुनः तथावभासमाना अपि तथा न स्युः नि रूपता स्यात् संविन्निष्ठत्वात् प्रमेयव्यवस्थितेः इति । एतावतैव चेत् प्रकृतं सिध्येत् नीलादिवद् इत्यने । न हि

१ रोऽपि] जैनोऽपि ।
४ मानाद्भावात्] मानान् भावान्
११ र्हि] पूर्वापरानुयायित्व ।
११ स्य] अविच्छिन्नत्वस्य ।
१२ *] अन्येन प्रत्यक्षेण ग्रहणसंभवादिति भावः ।
१४ चेत्] च
१५ त] प्रत्यक्षपूर्वकस्य ।
१९ अस्य] व्यवहारस्य ।
२१ मा] अ
३० था] क्षणिकाः ।
३० नि] नी
३० ता] तुच्छत्वं स्यात् ।
३१ चेत्] च
३१ ने] इति

पुरुषाद्वैतवादिनं प्रति दृष्टान्तेऽपि परमार्थसाधने उपायान्तरमस्ति अनवस्थापत्तेः । न च तं प्रति क्षणिकत्वं साध्यं विवादाऽविशेषात् । ततोऽधिकस्य दृष्टान्तस्य उक्तेः निगृह्येत । § 1694

यदि वा, अयमेकान्तः--यद् यथावभासते तत् तथैव परमार्थसत्; तर्हि स्तम्भादयः स्थूलैकनानात्वस्वभावतया प्रतिभासमानाः तथैव सन्त इति **मायामरीचिप्रभृतिप्रतिभासत्वेऽपि अदोषः** प्र॰ वार्तिकाल॰ ३ । २२१ इति प्लवते । अक्रमवत् क्रमेणापि सांशयितैक वस्तुसंभवे च कथं प्रतिज्ञाहेत्वोः संभवः ? तत्प्रतिभासनिषेधे च सर्वनिषेधनमिति नानुमानोत्थानं धर्मा त्वसिद्धेः । असमन्त श्चेत् तैरेव हेतुः अनैकान्तिक इति तद्वचनात् निगृह्येत । तदाह--**धर्माधिकोक्तितः** धर्मश्चासौ अधिकश्च इति कामचारेण /ms विशेषणविशेष्यत्वमिति अधिकस्य विशेष्यत्वम् । अधिकत्वं पुनः पक्षसपक्षस्यापि धर्मत्वात् निगृह्येत । तथा **सत्त्वादेव क्षणस्थानवद् उत्पत्त्यादौ** सिद्धे अङ्गीक्रियमाणे सौगतो विरुद्धाव्यभिचारिहेतुवचनात् निगृह्येत । **उत्पत्त्यादौ** इत्यत्र **आदि**शब्देन स्थितिविनाशयोर्ग्रहणम् । केन हेतुना निगृह्येत ? इत्यत्राह--**तत्** इत्यादि । **तस्य** हेतुसाधकस्य प्रमाणस्य साध्ये यत् **सामर्थ्यम्**, अथवा तस्य हेतोर्दृष्टान्तरहितस्य यत् तत्, यदि वा स्वहेतोरिव परहेतोरपि, तस्या**नभिज्ञया** । यद्वा तस्य हेतोरभावेन **तत्सामर्थ्यस्य** वा **अनभिज्ञायते** 343/mkj * । § 1695

कारिकां विवृणोति **केवलस्य** इत्यादिना । **अपि** शब्दो भिन्नप्रक्रमः, **केवलस्यापि** न केवलं धूमादेः केवलस्य **विनाशः साधनं साधर्म्यात्** कारणात् **पुनः** इति परामर्शे । उपाधिना प्रागसतः इत्यादिना **विशिष्टस्य उपादाना**ऽप्रयोगात् भावस्य इत्यनुवर्त्तते । कथम् ? इत्याह--**उत्पत्तेः कृतकत्वाद्वा इत्येव** * । ततः किम् ? इत्याह--**निग्रहस्थानम्** वादिनि शेषः । § 1696

ननु यथा केवलो भावः सत्त्वशब्देन उच्यते, तद्वद् उत्पत्त्यादिशब्दैरिति; अत्राह— **स्वपर** इत्यादि । **स्वपरयोः व्यापारयोः अपेक्षा यस्य** तौ वा अपेक्षते इति तदपेक्षः स चासौ **भावश्च** इति तल्ल**क्षणत्वात् तेषाम्** उत्पत्त्यादीनाम् । स्वव्यपारापेक्षभावलक्षणा उत्पत्तिः **प्रागसत आत्मलाभ उत्पत्तिः** इति वचनात् अभिन्नविशेषणो भाव एवमुक्तः । परव्यापारापेक्षभावलक्षणाः कृतकत्वादयः **अपेक्षितपरव्यापारोहि भावः कृतकः** न्यायबि॰ ३ । १४ /ms

१ अ] उपायान्तरकल्पने ।
६ त्वेऽपि] सवदसत्त्वेऽपि
७ यितैक] सांशान्वितैक
९ र्मा] धर्म्या
९ न्त] असन्त
११ अ] अधिकशब्दस्य ।
१८ *] ज्ञया इति
२० र्म्यात्] विनाशसाधनसामर्थ्यात्
२१ उ] विशेषणेन ।
२२ इत्यादिना] नात् प्र
२३ *] वं
२३ वादिनि] वादिन इति
२९ ए] उत्पत्तिशब्देन ।

इत्याद्य भिधानात् । अनेन भिन्नविशेषणः । शुद्धस्यैव एवमभिधाने तद्ध-र्मानुक्तिः शब्दान्तराऽप्रयोगादिति मन्यते । क्वचित् **स्वपरव्यापारापेक्षा** इति पाठः । तत्र तदपेक्षया भाव इति व्याख्येयम् । शुद्धस्य सामर्थ्येति सिद्ध व्युत्पादनार्थं तद्विशिष्टोपादानमिति चेत्; अत्राह--**नहि** इत्यादि । एवं म-न्यते--**येन** प्रयुक्ते **अवश्यं निग्रहस्थानम् न तेन शिष्याः** तदनुग्रहाप्रवृत्तेः **व्युत्पादनीया इति** । § 1697

इदमपरं व्याख्यानम्--**केवलस्य** सजातीयविजातीयविविक्तनिरंशक्षण-स्य यो **भावः** सत्ता विषयिणि विषयोपचारात्, वस्तुनो वा उपलम्भो वा तस्यापि न केवलम् अन्यस्य यत् परेण विनाशसाधनसामर्थ्यमभ्युपगतम्, यद् उपलब्धिलक्षणप्राप्तं यत्र नोपलभ्यते तत्तत्र नास्ति यथा क्वचित्प्रदेशे तथाविधो घटः, उपलब्धिलक्षणप्राप्तौ च पूर्वापरक्षणौ मध्यक्षणे, सा वा तत्र नोपलभ्यते च । यदि वा **यद् यथावभासते** इत्यादि प्रयोगापेक्षः; तस्मात् तस्य निग्रहस्थानम् । कस्मादिव ? इत्यत्राह--**उत्पत्तेः कृतकत्वाद्वा** इति । **वा** इति इवार्थः । § 1698

एतदुक्तं भवति--यथा प्र ज्ञा क र स्य निरंशाद्वैतवादिनः न किञ्चित् प्रागसत् उत्पद्यते अपेक्षितपरव्यापारं कृतकं वा, तथापि तद्धेतु वदतो निग्रहस्थानम् तथा न तस्य कस्यचिद् भाव उपलम्भो वा स्वभावविरुद्ध-स्थूलैकस्थिरप्रतिभासेन बाधनात्, तथा तस्यैव तत्सामर्थ्यात् पुनः पश्चाद् **उपाधिना** सपक्षसत्त्वेन **विशिष्टोपादान** निग्रहस्थान । यदि वा, पक्षधर्मत्वं
/ms सपक्षे सत्त्वम् असपक्षेऽसत्त्वम् उपाधिः तद्विशिष्टहेतोः उपादानाद् इति ग्राह्यम् । तथा स्व स्ववादी **तयोः व्यापारौ** साधनप्रयोगौ **तदपेक्षो** यो **भावः** तल्लक्षणत्वात् रूपत्वाच्च **तेषाम्,** प्र ज्ञा क र गु प्त म प्रयुक्त-
344/mkj विनाशहेतूनाम् निग्र हस्थानम् इति सम्बन्धः । शक्यं वक्तुं यद् यत्र यथा उपलब्धिलक्षणप्राप्तम् उपलभ्यते तत् तत्त्वतः तथा विद्यते यथा चित्रज्ञानं स्वाकारेषु, कथञ्चिदुपलभ्यते च तथाविधो भावः स्वपर्यायेषु क्रमभाविषु । तथा निर्बाधबोधे यद् यथावभासते [तत् तथा परमार्थसत्] स्वसंवेदनवत्, प्रतिभासते च सर्वम् उत्पादव्ययध्रौव्यात्मकत्वेन । यथा यो यं प्रत्यनपेक्षम् * इत्यादिकमपि वाच्यम् । **नहि शुद्धस्यापि** हेतुदृष्टान्तरहितस्यापि **भावस्य**

---

१ इ] स्वभावनिष्पत्तौ अपेक्षितव्यापारभावो हि कृतकः । तेनेयं कृतकश्रुतिः स्वभावाभिधायिन्यपि परोपाधिमाक्षिपति ।--प्र॰ वा॰ स्व॰ पृ॰ ३४८ ।
३ या] स्वपरव्यापारापेक्षया ।
३ र्थ्येति] पि
३ सिद्ध] शिष्य
५ युक्ते] क्तेन
५ त] शिष्यानुग्रहाभावात् ।
११ सा] असौ[[मध्यक्षणो वा ।]]
१२ त्र] पूर्वापरक्षणयोः ।
१६ द्धेतु] तुं
१७ त] प्रज्ञाकरस्य ।
१९ विशिष्टोपादान] नं
१९ स्थान] नम्
२१ वादी] तथा च वादी
२२ म] गु प्ते न
२५ त] उपलब्धिलक्षणप्राप्तो भावः ।
२७ था] तथा
२८ *] क्षः
२८ इ] स तत्स्वभावनियतः, यथा अन्त्या कारणसामग्री स्वकार्योत्पादने ।

इत्यनुवर्त्तते **साधनत्वे** हेतुहीनस्य प्रत्यक्षत्वेन, साध्यसाधकत्वदृष्टान्तरहितस्य लंगंधे **पुनः उपाधिः** * पक्षधर्मत्वार **पेक्षणं** यस्मिन् लिङ्गे तत्तथोक्तम्, **उपाधिः** सपक्षसत्त्वस्य **अपेक्षणं युक्तं** समर्थम् उपपन्नं वा । § 1699

पुनरपि तत्रैव पूर्वपक्षे दूषणान्तरं दर्शयन्नाह--**सर्वनाम्ना** इत्यादि । § 1700

...14 सर्वनाम्ना विना वाक्यं तद्धितेन विना पदम् ।
संक्षेप्तव्यं समासार्थनिग्रहस्थानभीरुणा ॥ १४

॥§ 1702

यत् सत् उत्पत्तिमत् कृतकं प्रयत्नानन्तरीयकं चेति वाक्यं सदुत्पन्नमित्यादि संक्षेप्तव्यं सदनित्यमिति वा । विपक्षे हेतुसद्भावबाधकप्रमाणबलेन व्याप्तौ सिद्धायां दृष्टान्तस्याकिञ्चित्करत्वात् । तथा च प्रतिज्ञैवेयं व्याप्तिः स्यात् । ततो वरं विनाशी शब्द इति प्रकृतं प्रतिज्ञातुम् । § 1703

सौगतेन लिङ्गप्रतिपादकं यद् **वाक्यम्** इष्यते तत् **संक्षेप्तव्यम्** । कथम् ? इत्याह— **सर्वनाम्ना विना** । यत् तत्पदप्रयोगमन्तरेण । तत्रैव वाक्ये यत् **पदं** तदपि संक्षेप्तव्यम् इति सम्बन्धः । कथम् ? इत्याह--**तद्धितेन विना** । केन ? इत्यत्राह--[समा इत्यादि ।] **समान एवः** पदस्य पदान्तरेण प्रत्ययस्य प्रत्यक्षा **यस्यार्थः** स तथोक्तः तेन **निग्रहस्थानं** तत्र **नीरुणा** सौगतेन नाऽपरेण । § 1704

कारिकां विवृणोति--**यत् सद्उत्पत्तिमत् कृतकं प्रयत्नानन्तरीयकं च** /ms
इत्यादि । तत्र प्रतिहेतुवाक्यभेदेऽपि । **वाक्यम्** इत्येकवचनं जात्यपेक्षम् । यदि च **इति शब्दः** प्रत्येकमभिसम्बध्यते--यत् सत् तदनित्यं यथा घटः 345/mkj

---

२ लंगंधे] गमकत्वे
२ *] धेः
२ त्वार] त्वादेर
३ उपाधिः] धेः
५ नाम्ना] तुलना--सत्त्वमात्रेण नश्वरत्वसिद्धौ उत्पत्तिमत्त्वकृतकत्वादिवचनमतिरिक्तविशेषणोपादानात् कृतकत्वप्रयत्नानन्तरीयकादिषु च कप्रत्ययातिरेकादसाधनाङ्गवचनं पराजयाय प्रभवेत्...--अष्टश॰ अष्टस॰ पृ॰ ८६ । कथं कृतकत्वादिति हेतुः क्वचिद्दतः स्वार्थिकस्य कप्रत्ययस्य वचनम्, यत्कृतकं तदनित्यं दृष्टमिति व्याप्तिं प्रदर्श्यते यत्तद् वचनमधिकं नाम निग्रहस्थानं न स्यात्, तेन विनापि तदर्थप्रतिपत्तेः । सर्वत्र वृत्तिपदप्रयोगादेव चार्थाप्रतिपत्तौ संभाव्यमानायां वाक्यस्य वचनं कमर्थं पुष्णाति येनाधिकं न स्यात्...--त॰ श्लो॰ पृ॰ २९१ । अन्यथा त्वत्प्रयोगेऽपि स्वार्थिकस्तद्धितस्तथा । यत्तत्पदं च दोषः स्यात् प्रतीतार्थातया स्थितेः ॥ कृतं सर्वमनित्यं हि दृष्टं यद्वद् घटादिकम् । कृतश्च शब्द इत्येतन्मात्रात् साध्यस्य निर्णयात् ॥ संक्षेप्तव्यं ततस्तेन विनापि वचनं त्वया । अन्यथा निग्रहादुक्तमिदं सिद्धिविनिश्चये ॥ सर्वनाम्ना विना वाक्यं तद्धितेन विना पदम् । संक्षेप्तव्यं समासार्थनिग्रहस्थानाभीरुणा ॥--न्यायवि॰ वि॰ द्वि॰ पृ॰ २३७--३८ ।
१३ त] तद्धितीयो यः स्वार्थे कः इत्यादि प्रत्ययः तेन विना । कृतकम् इत्यत्र कृतम् इत्येव प्रयोक्तव्यमिति भावः ।
१४ एवः] समास एव
१५ क्षा] प्रकृत्या
१५ नीरुणा] भीरुणा
१९ च] यदि वा

संश्च शब्दः **इत्येवं वाक्यम्,** एवं सर्वत्र योज्यम् । वाक्यग्रहणमुपलक्षणम्, तेन सन्नित्यादि पदमपि गृह्यते । तत् किं कर्त्तव्यम् ? इत्याह--**संक्षेप्तव्यम्** । कथम् ? इत्याह--**सद् उत्पन्नम् इत्यादि** । सदनित्यम् इति, उत्पन्नम् अनित्यम् इति, एवं सर्वत्र योज्यम् । ननु **सर्वनाम्ना विना वाक्यं संक्षेप्तव्यम्** इत्युक्तम् न दृष्टान्तेन विना इति, तत् किं दृष्टान्तो भणनीयः ? इत्यत्राह--**सद** इत्यादि । **वा** इति पूर्वहेतुसमुच्चये, ततः **सदनित्यम्** उत्पन्नमनित्यम् कृत [क] मनित्यम् यन्नित्यमनित्यम् इत्येवं **विपक्षेहेतुसद्भावबाधकप्रमाणबलेन व्याप्तौ सिद्धायां** निश्चितायां च **दृष्टान्तस्य अकिञ्चित्करत्वात्** तथा तत् संक्षेप्तव्यम् इति सम्बन्धः । तथा संक्षेपे को दोषः; इत्यत्राह--**तथा च** तेनैव अनन्तरोक्तप्रकारेण **प्रतिज्ञैवेयं** सदनित्यम् इत्यादिरूपा **व्याप्तिः स्यात्** । नहि शब्दोऽनित्यः, सदनित्यम् इत्यवस्थयोः विशेषोऽस्ति, हेतुरत्र न कश्चित् स्यादित्येवकारार्थः । तथाहि— सदादेरेव पुनर्हेतुत्वेन उपादाने प्रतिज्ञार्थैकदेशता । यदि पुनः सदेव अनित्यत्वं गमयेत् तर्हि तस्य सर्वदा भावात् सर्वदा ततः साध्यप्रतीतेः विवादाभावः । भवतु प्रतिज्ञैव तत्र को दोषः ? इत्यत्राह--**ततः** तस्माद् उक्तात् न्यायाद् **वरं विनाशी शब्दः** /ms **इत्येवं प्रकृतं** प्रस्तावगोचरापन्नं **प्रतिज्ञातुं** यत् प्रकृतं प्रतियतेत शिरस्ताडं क्रन्दतोऽपि प्रतिज्ञाया अनिवृत्तेरिति मन्यते । § 1705

ननु हेतोः साध्यसिद्धौ किं प्रतिज्ञया ? तस्मिन् सिद्धौ किं हेतुना इति चेत् ? अत्राह— **[वि] नाशी** इत्यादि । § 1706

यदि च , उक्तन्यायेन दृष्टान्तस्य अकिञ्चित्करत्वे सिद्धे सति शब्दत्वादेरसाधारणस्य वचनं हेतोः न निग्रहस्थानमिति सदृष्टान्तं दर्शयन्नाह--**विनाशी** इत्यादि । § 1707

...15 विनाशी भाव इति वा हेतुनैव प्रसिध्यति ।
अन्तर्व्याप्तावसिद्धायां बहिर्व्याप्तिरसाधनम् ॥ १५
॥§ 1709

विपक्षे हेतुसद्भावबाधकप्रमाणव्यावृत्तौ हेतुसामर्थ्यमन्यथानुपपत्तेरेव । ततो यथा सत्त्वं शब्दस्य नित्यत्वे नोपपद्यते तथा शब्दत्वम् । § 1710

---

२० च] वा

२४ म्] तुलना--अन्तर्व्याप्तावसिद्धायां बहिरङ्गमनर्थकम् ।--प्रमाणसं० पृ० १११ । अन्तर्व्याप्त्यैव साध्यस्य सिद्धौ बहिरुदाहृतिः । व्यर्था स्यात्तदसद्भावेऽप्येवं न्यायविदो विदुः ॥--न्यायावता० श्लो० २० । अन्तर्व्याप्त्या हेतोः साध्यप्रत्यायने शक्तावशक्तौ च बहिर्व्याप्तेरुद्भावनं व्यर्थम् । पक्षीकृत एव साधनस्य साध्येन व्याप्तिरन्तर्व्याप्तिः अन्यत्र तु बहिर्व्याप्तिः । यथा अनेकान्तात्मकं वस्तु सत्त्वस्य तथैवोपपत्तेः, अग्निमानयं देशो धूमवत्त्वात्, य एवं स एवं यथा पाकस्थानम् ।--प्रमाणनय० ६ । ३५, ३६ । धर्मसं० वृ० पृ० ८२ । जैनतर्कभा० पृ० १२ ।

**वा** शब्दः इवार्थः, निपातानामनेकार्थत्वात्, **विनाशी भाव** इत्यस्यानन्तरं द्रष्टव्यः । ततोऽयमर्थः--भावः सन् सर्वो विनाशी सद् अनित्यम् इति वचनात्, यथा **हेतुनैव** न सदनित्यम् इति प्रतिज्ञामात्रेण **प्रसिध्यति** तथा ध्वनिः शब्दो विनाशी इति हेतुनैव प्रसिध्यति । एवं मन्यते यथा सदनित्यम् इत्युक्त्वा हेतुं वदतो न दोषः तथा शब्दोऽनित्यः इत्युक्त्वापि इति । § 1711
346/mkj

ननु न मया सर्वं सद् अनित्यत्वेन व्याप्तं हेतोः साध्यते किन्तु प्रत्यक्षतः । प्रत्यक्षं हि तद नित्यमेव प्रतीयते इति चेत्; अत्राह--**अन्तर्व्याप्तौ असिद्धायां** *विवादस्थाने साध्येन साधनस्य व्याप्तिः, तस्यां विपक्षे बाधकबलेन असिद्धायां सत्याम्, दृष्टान्ते व्याप्तिः **बहिर्व्याप्तिः असाधनं** साध्यस्य इति शेषः । ततोऽन्तर्व्याप्तिसिद्धिमिच्छता साध्यवत्यवत् * परोक्षा सापि हेतोरेव साध्येति भावः । § 1712

द्वितीयपातनिकायां कारिकाव्याख्यानम्--**विनाशी शब्दः इति** यत् प्रतिज्ञातम्, तत् **प्रसिध्यति** । केन ? इत्याह--**ध्वनिः** इति भावप्रधानोऽयं निर्देशः, **इति** शब्दस्य अनन्तरं द्रष्टव्यः ध्वनित्वं शब्दत्वम् इति यो हेतुः **तेनैव,** न हेत्वन्तरेण । निदर्शनमाह— **विनाशी** इत्यादि । **वा** शब्दः पूर्वत्र द्रष्टव्यः, /ms इतिशब्दोऽत्रापि योज्यः । ततो यथा भावः विनाशी भावः इत्यनेनैव हेतुना प्रसिध्यति तथा प्रकृतमपि इति । नहि भावस्य अनित्यत्वेन व्याप्तिसाधने हेत्वन्तरमस्ति । § 1713

इदमत्र तात्पर्यम्--अनित्यः शब्दः इत्यत्र धर्मिशब्देन अशब्दव्यावृत्तेः उक्तत्वात् पुनः शब्दत्वाद् इति यथा भणितुं न लभ्यते तथा सदनित्यम् इत्यत्र सच्छब्देन असद्व्यावृत्तेः कथनात् सत्त्वात् इत्यपि । § 1714

ननु यत् सत् तत्सर्वम् अनित्यम् इत्येतेन सर्वस्य असतो व्यावृत्तेः उक्तत्वात् संश्च शब्दः इत्यपि तादृशमेव । अयमपरोऽस्य दोषोऽस्तु । § 1715

स्यान्मतम्--अदृष्टान्तं शब्दत्वम् असाधनमिति; अत्राह--**अन्तः** इत्यादि । सुगमम् । § 1716

कारिकार्थं प्रकटयन्नाह--**विपक्ष** इत्यादि । **विपक्षे हेतोः सद्भावबाधकं यत् प्रमाणं** तस्य या **व्यावृत्तिः** तस्यां सत्यां **हेतुसामर्थ्यं** लिङ्गस्य स्वलिङ्गिज्ञापनशक्तिः । सा कुतः ? इत्याह--**अन्यथा** अन्येन साध्याभावप्रकारेण या **अनुपपत्तिः** लिङ्गस्य अघटना तस्या **एव** न पक्षधर्मत्वसपक्षसत्त्वाभ्याम् इति एवकारार्थः, ततो यथा विपक्षे बाधकप्रमाणवृत्त्या हेतुसामर्थ्ये दर्शितेऽपि दृष्टान्तादिकमन्तरेण तदप्रतिपन्नवन्तं प्रति दृष्टान्तवचनं तथा प्रतिज्ञावचनमन्तरेणापि तदप्रतिपत्ति ज्ञा वचनमिति मन्यते । § 1717

---

७ द] सद
८ *] पक्षे ।
१० *] वत्येव
२१ पि] वक्तुं न शक्यम् ।
२३ मेव] न वक्तव्यमिति ।
२३ रोऽस्य] सौगतस्य ।
२४ अदृष्टान्तं] सपक्षसत्त्वशून्यम् ।
३१ न्तं] प्रतिपाद्यम् ।
३२ ज्ञा] पत्तौ प्रतिज्ञा

द्वितीयमर्थं दर्शयति--**तत** इत्यादिना । **ततो** विपक्षबाधकप्रमाणवृत्तिन्यायाद् **यथा सत्त्वं** शब्दस्य अन्यस्य वा **नित्यत्वे** सति **नोपपद्यते** /ms **तथैव शब्दत्वम् इति** शब्दवत् शब्द[त्व] मपि हेतुः इति भावः । § 1718

ननु पक्ष एव साधनस्य साध्येन व्याप्तिः अन्तर्व्याप्तिः, सा च **द्विष्ठसम्बन्धसंवित्तिः** प्र° वार्तिकाल° १ । १ इत्यादि वचनात् साध्ये प्रतिपन्ने प्रतीयेत नान्यथा । *तत्प्रतिपत्तिश्च यदि प्रमाणान्तरात्; अस्य वैकल्यम् । 347/mkj [अनुमानात् ।अस्मादेव;] इति चेत्; अन्योऽन्यसंश्रयः--सिद्धे अतः साध्ये अस्य अन्तर्व्याप्तिसिद्धिः, अस्याश्च सिद्धिः । ततः साकल्यव्याप्तिः श्रेयसी इति चेत्; अत्राह--**साकल्येन** इत्यादि । § 1719

साकल्येन कथं व्याप्तिरन्तस्या विना भवेत् ।
[१/२] ।§ 1720

बहिर्व्याप्तिमात्रं न साधनम्, साकल्य साध्यसिद्धिमाक्षिपत्येव, ततः श्रेयान् साध्यनिर्देशः । क्रम...शब्दत्व...। ततोऽप्तिरेव श्रेयसी, तदभावे साकल्येन व्याप्तिसाधने बहिर्दृष्टान्ताभावात् न कश्चित् स्यात् । पक्षकल्पना फलवती । तद्भावहेतुभावयोरवाच्यत्वाद् किं विदुषः प्रति तादतदुत्पत्तिप्रदर्शनेन दृष्टान्तेन ? यदुक्तस्यासमर्थने साधनस्य निग्रहस्थानं स्यात् । साधनस्य दोषवत्त्वान्निग्रहस्थानमिति युक्तम् । दोषवत्त्वेऽपि यथा वाद्युक्तदोषोवनायां प्रतिवादिनः सामर्थ्यान्निग्रहस्थानम् । इति परस्य बालभाषितम् अनप्रसङ्गात् । तन्न व्याप्तिवचनं प्रतिज्ञामतिशेते । § 1721

साध्यधर्मिणि अत्र च साध्येन नस्य व्याप्तिः **साकल्येन व्याप्तिः कथं** न कथञ्चिद् **भवेत् अन्तर्व्याप्त्या विना** स्याद् इति यावत् । बहिरिव साध्यधर्मिण्यपि व्याप्तेर्वाद्इतरथा प्रात्यु व्याप्तिः स्यात् । तयैव भवतु सेति चेत्; तत्प्रतिपत्तौ कथमात्मदोषम् आ परिहरेत् ? अथ पक्षे सा न प्रतीयते अपि तु सपक्षे; न तर्हि तत्प्रतिपत्तिः साकल्यव्याप्तिप्रति अतद्रूपत्वात् । यदि पुनस्तत्र तत्प्रतिपशे[पत्तिर्नि] ष्यते; कथमेवम् अतिप्रसङ्गो न भवेत् । § 1722

कारिकार्धं व्याचष्टे--**बहिर्व्याप्तिमात्रम्** इत्यादिना । वज्रस्य लोहलेख्यत्वसाधने प्रत्यक्षविरोधात् तन्मात्रं **[न] साधनम्** । यत्र तु न त तत्र साधनमेव इति परः; न; तादात्म्यप्रतिबंध्यभ्यवेपि तद्विरोधस अन्यत्र कः समाश्वासः

३ ब्द] सत्त्व
६ *] साध्यप्रतिपत्तिश्च ।
६ अस्य] अनुमानस्य ।
८ व्याप्तिः] पक्षे सपक्षे च सर्वत्र साध्यसाधनयोः व्या सकलव्याप्तिः ।
१९ अत्र] अन्यत्र
२१ व्याप्तेर्वाद्] प्तिः सर्वत्र
२१ त्यु] शिकी
२२ सा] व्याप्तिः ।
२८ वेपि] प्रतिबन्धसद्भावेऽपि

? लक्षणयुक्ते बाधासंभवे तल्लक्षणमेव दूषितं स्यात् । तत्प्रतिवः पुनः काष्ठादौ य [त] एव पार्थिवत्वं तत एव लोहलेख्यत्वदर्शनात् । नहि तद्भावे हेत्वं * नाम । तत एव तस्य सद्भावे नित्यं तदभाव प्रसङ्गो नाशवत् इति /ms चेत्; न; योग्यताया नित्यमविरोधात् । काष्ठादेः पार्थिवस्य लोहलेख्यत्वेऽपि सर्वस्य तद्भावो विपर्यये बाधकाभावादिति चेत्; तर्हि सकलव्याप्तिः अभ्युपगता स्यात् । चेत्; अत्राह--**साकल्येन व्याप्तिः साध्यसिद्धिम् आक्षिपत्येव,** तदभावे तत्प्रतिपत्ते इति मन्यते । § 1723

प्रकृतमुपसंहरन्नाह--**तत** इत्यादि । यत एवं **ततः** तस्मात् **श्रेयान् साध्यनिर्देशः** प्रतिज्ञावचनम्, अन्यथानुपपन्नत्वोपेतहेतुनिर्देशे तद प्रशस्यः, ततोऽपि तन्निर्देशो बालबुद्ध * * नुग्रहार्थत्वात् प्रशस्यत[र] इति **श्रेयान्** इत्युच्यते 348/mkj । यदि वा, तस्मात् **साकल्येन व्याप्तिः** तद्गृहीतिः विषयिणि विषयोपचारात् **साध्यसिद्धिम् आक्षिपत्येव ततः श्रेयान् साध्यनिर्देशः ।** § 1724

एवं मन्यते--साकल्यव्याप्त्याक्षिप्तस्यापि साध्यस्य पुनः हेतोः साधनं तथा प्रतिज्ञावचनेनापि इति शब्दत्वसाधननिर्देशस्य प्रशस्यमसमर्थनाह माह--**क्रम** इत्यादि । नन्वेतद् **विपक्षे** इत्यादिना समर्थितम् किं पुनः समर्थ्यते ? न अस्य अन्यथावतारात् । तथाहि--साकल्येन व्याप्तिः साध्यसिद्धिम् आक्षिपत्येव, यदि सकलव्यापकप्रतिपत्तिनान्तरीयका सकलव्याप्यस्य तदविनाभावसम्बन्धप्रतिपत्तिः । न चैवम्, किन्तु विपक्षे बाधकप्रमाणपूर्विका इति चेत्; अत्राह--**क्रमे**त्यादि । सुगमम् । **शब्दत्व**ग्रहणम् उपलक्षणम् तेन श्रावणत्वादिग्रहणम् । ततः किं जातम् ? इत्याह--यत एवं **ततोऽन्तर्व्याप्तिः एव** न बहिर्व्याप्तिः साकल्यव्याप्तिर्वा **श्रेयसी** इति । । § 1725 /ms

इतश्च सैव श्रेयसी; इत्याह--**तदभावे** विपक्षे बाधकप्रमाणवृत्त्यभावे **साकल्येन** अनवयवेन सत्त्वादेः अन्यस्य या **व्याप्तिसाधने** व्याप्तिसिद्धौ क्रियमाणायां **बहिर्दृष्टान्ताभावात् न कस्यचित्** स्वभावः कार्यं वा **हेतुः स्यात् ।** यदुक्तं परेण--**लक्षणकाले धर्मी प्रयोगकाले धर्मधर्मिसमुदायः व्याप्तिग्रहणकाले साधनधर्मः पक्षः** । इति; तदनेन निरस्तम्; न हि यावान् कश्चिद् भावः धूमो वा स सर्वोऽपि विनाश-दहनाभ्यां व्याप्तः इति; अत्राह--**न्य पक्ष कल्पना फलवती ।** ननु साकल्येन व्याप्तिसाधने बहिर्दृष्टान्ताभावात्

१ ल] तुलना--लक्षणयुक्ते बाधासंभवे तल्लक्षणमेव दूषितं स्यादिति सर्वत्रानाश्वासः ॥--प्र० वा० स्ववृ० १ । २२ । प्र० काल० ३ । ७१ ।
३ *] हेत्वन्तरापक्षा
३ भाव] तद्भाव
५ त] लोहलेख्यत्वम् ।
७ त] साकल्यव्याप्तिप्रतिपत्त्यसंभवात् ।
९ त] साध्यानिर्देशः ।
१० न्निर्देशो] साध्यनिर्देशः ।
१० *] प्रत्यक्षविरोधः ।
१० *] प्रत्यक्षविरोधसंभवे ।
१४ नाह] स्यत्वमिति समर्थनार्थ
२२ भावे] अन्तर्व्याप्त्यभावे ।
२४ चित्] कश्चित्
२६ र्मः] साध्यधर्मः
२६ इति] अत्र हेतुलक्षणे निश्चेतव्ये धर्मी अनुमेयः । अन्यत्र तु साध्यप्रतिपत्तिकाले समुदायोऽनुमेयः । व्याप्तिनिश्चयकाले तु धर्मोऽनुमेयः इति--न्यायबि० टी० २ । ८ ।
२८ क्ष] तत्पक्ष

माभूत् तदन्वेषणम् विपक्षे बाधकवृत्तेः तत्सिद्धेश्च, प्रयोगसमये तु तद्भावादन्वेषणं युक्तमिति; अत्राह--**तद्भाव** इत्यादि । **किं** न किञ्चित् **प्रयोजनम्** इत्याध्याहारः । केन ? इत्याह--**दृष्टान्तेन** । किंभूतेन ? इत्याह--**तादात्म्यतदुत्पत्तिप्रदर्शनेन** । कान् प्रति ? इत्याह— **विदुषः प्रति** [वि]पक्षे हेतुसद्भावबाधकप्रमाणप्रवृत्तिप्रविजृम्भितहेतुसामर्थ्यपरिज्ञानवतः प्रति । कुतः ? इत्यत्राह--**अवाच्यत्वात्** । कयोः ? इत्यत्राह--**तद्भावहेतुभावयोः** इति । अत्रापि **विदुषः प्रति** इति सम्बन्धनीयम् । एतदुक्तं भवति--तादात्म्यतदुत्पत्ती दृष्टान्ते न प्रदर्श्यंते साधनस्य ते चेदन्यतो ज्ञायेते किं तेन ? यदुक्तम्--
§ 1726

*तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः ।
ख्याप्येते विदुषां वाच्यो हेतुरेव हि केवलः ॥ प्र० वा० ३ । २७ इति ।§ 1728

किंभूतेन दृष्टान्तेन किम् ? इत्यत्राह--**यदुक्तस्य** येन दृष्टान्तेन **असमर्थने**
/ms । कस्य ? **साधनस्य** लिङ्गस्य । किंभूतस्य ? **उक्तस्य** उच्चरितस्य **निग्रहस्थानं स्यात्** तेन दृष्टान्तेन किम् इति सम्बन्धः । अन्यत एव तत्समर्थनात् इति मन्यते । § 1729

इदमपरमस्य व्याख्यानं यत् परेणोक्तम्--**अविदुषः प्रति दृष्टान्तेनोक्तस्य** स्वशब्देन प्रतिपादितस्य **साधनस्यासमर्थने निग्रहस्थानं स्यात्** । **इति**
349/mkj शब्दोऽत्र द्रष्टव्यः । पूर्वपक्षोऽयम्; अत्र दूषणमाह--**तत्र** इत्यादि । **तत्र** पूर्वपक्षे **साधनस्य दोषवत्त्वात् निग्रहस्थानं स्यात् इत्येव युक्तम्** सैव निर्दोषता दृष्टान्तेन प्रकाश्यते इति; न; तस्या अन्यथापि प्रकाशनात् इत्युक्तप्रायम् । पूर्वके तु व्याख्याने **तत्र** इत्यादि दूषणान्तरम् ऊह्यम् । § 1730

पर आह--**दोषवत्त्वेऽपि** साधनस्य इत्यनुवर्त्तते । **यथा** येन प्रकारेण **वादिना उक्तो दोषः** तेन **उद्भावनायां प्रतिवादिनः सामर्थ्यं** तस्मात् प्रतिवादिनो **निग्रहस्थानं युक्तम्** अन्यथा दोषस्य सतोऽप्यप्रकाशनात् प्रतिवादी निगृह्येत । यदि वा, तथोद्भावनेऽसामर्थ्यात् इति ग्राह्यम् । एतच्च प्रतिवादिनो निग्रहस्थानम् । इदं व्याख्यानं चिन्त्यम्, दोषबद्धेन साधनस्य, वादिनिग्रहाधिकारे अन्यानधिकारात् । अत्राह आचार्यः--इत्येवं भाषितं **परस्य बालभाषितम्** । कुतः ? इत्याह--**अनवस्थाप्रसङ्गात्** इति । तथाहि--वादिना दोष इति साधने प्रयुक्तेऽपि यदा प्राश्निकाः तस्य निग्रहं व्यवस्थापयन्ति प्रतिवादिनः तदुद्भावनमपेक्ष्य, तदा स तम्, अन्यं दो द्भावयेत्, न किञ्चिद्वा उद्भावयेत् इति त्रयः पक्षाः । तत्र प्रथमपक्षे यथा प्रयुक्तेऽपि

२ द्भा] दभा
८ श्यंते] दर्श्यंते
८ ते] तादात्म्यतदुत्पत्ती ।
२० स्या] निर्दोषतायाः ।
२६ द्धेन] वत्त्वेन
२९ इति] वति
३० म्] दोषम् ।
३० दो] अन्यं वा दोषमु

दोषे तत्प्रकाशनापेक्षा तथा तत्र प्रकाशितेऽपि तत्परिहारापेक्षा पुनः तत्सम- /ms र्थनापेक्षा इत्यनवस्था । यदि पुनः भूतदोषोद्भावनामात्रेण प्रतिवादिनः ते जयं व्यवस्थापयति ; तर्हि वादिनोऽपि तद्दोषप्रयोगमात्रेण पराजयं व्यवस्थापयेयुः अलं द्वितीयोपन्यासापेक्षणेन । अथ तावन्मात्रेण परस्य तथोद्भावनासामर्थ्यं न ज्ञायते इति तदुपन्यासापेक्षणम्; तर्हि तदुपन्यासमात्रेण इतरस्य तत्परिहारसामर्थ्यमपि न ज्ञायत इति तृतीयोपन्यासापेक्षणं हठादापतति । एतेन उत्तरं विकल्पद्वयं निरूपितम् । § 1731

प्रकृतमुपसंहरन्नाह--**तन्न** इत्यादि । यत एवं **तत्** तस्मात् **न** तत्सर्वम् अनित्यम् इति **व्याप्तिवचनं प्रतिज्ञाम् अतिशेते** । *तद्वचनं प्रतिज्ञैव स्यात् इत्यभिप्रायः । § 1732

अत्राह परः--यदुक्तम् साकल्येन व्याप्तिसाधने नहिदृष्टान्तो भावात् * इति; सारम् विवादगोचरस्य भावस्य क्षणिकत्वेन व्याप्तिसाधने अन्यस्य दृष्टान्तभावादिति; तत्रोत्तरमाह--**न क्षणादूर्ध्वमस्थानम्** इत्यादि । § 1733

...16 न क्षणादूर्ध्वमस्थानं तत्प्रत्यक्षात् प्रसिध्यति ।
उपलब्धिलक्षणप्राप्तं तत्रैकान्ते [च] किं पुनः ॥ १६ ॥§ 1735

अर्थक्रियायाः कुतो विपक्षाद् व्यावृत्तिः क्षणिकपक्षे प्रत्यक्षतानुपपत्तेः । तन्न आधिक्यदोषमुद्भाव्य परमार्थवादिनं परो विजयते इति घटामुपढौकते । § 1736

परिमाणोत्प्रदन्तर व्यतिक्रमकाल[ः] **क्षणः** तत **ऊर्ध्वं** भावस्य यदव * **स्थानं** विनाशः **तत्प्रत्यक्षणात् न प्रसिध्यति** । निरूपितं चैतत् **पश्यन् स्वलक्षणान्येकम्** सिद्धिवि° १ । ९ इत्यादिना । एतदुक्तं भवति--यदि क्षणिको भावः क्वचित् प्रत्यक्षसिद्धः स्यात् तन्निदर्शनेन अन्योऽपि तथा स्यात् 350/mkj । न चैवमिति । § 1737

स्यान्मतम्--पूर्वापरकोटिविच्छिन्नस्य मध्यक्षणस्य तद्विविक्तयोर्वा तत्कोट्योः प्रत्यक्षेण उपलम्भाः , अन्यथा एकक्षण मानं प्रसज्येत, तत्र /ms

२ ते] प्राश्निकाः ।
३ ति] न्ति
४ अलं] प्रतिवाद्युद्भावनापेक्षणेन ।
४ ता] प्राश्निकैः सदोपसाधनवादिनः पराजयघोषणेन ।
४ प] प्रतिवादिनः ।
५ त] प्रतिवादिना कृतस्य दोषोद्भावनस्य अपेक्षा ।
५ स्य] वादिनः ।
९ *] व्याप्तिवचनम् ।
११ *] बहिर्दृष्टान्ताभावात्
१२ म्] तदसारम्
१९ र] परमाणोस्तदन्तर[[परमाण्वन्तर ।]]
२० *] यद
२० णात्] क्षात्
२२ स्यात्] तदुदाहरणेन ।
२४ स्य] मध्यक्षणभिन्नयोः पूर्वापरयोः ।
२५ म्भाः] लम्भात्
२५ मानं] त्रं

केवलं दृश्यानुपलब्धेः अभावव्यवहारः साध्यते इति; तत्राह--**तत्र** इत्यादि । **[तत्र]** तस्मिन् बाह्येतरनिरंशनिरन्वयक्षणिकपरमाणुरूपे । कस्मिन् ? इत्याह--**एकान्ते** । किम् ? इत्याह--**किं** पुनर्नैव **प्रसिध्यति** इत्यनुवर्त्तते । किम् ? इत्याह--**उपलध्ध** इत्यादि । एतुदुक्तं भवति--तत्र एकान्ते यदि उपलब्धिलक्षणप्राप्तं किञ्चिद् भवति तस्य अनुपलम्भाभावः तद्व्यवहारो वा प्रसिध्येत्, न चैतदस्ति इत्युक्तप्रायम् । **तल्लक्षणप्राप्तं तस्य** अनुपलम्भात् तत्र अभावः सिध्येत् । स तु नैकान्तेन, अक्रमेणेव क्रमेणापि एकस्य अनेकरूपसंभवादिति च, तत्तस्य कस्यचिद्भावस्य क्षणक्षयदर्शनात् सर्वस्य तेन व्याप्तिसिद्धिरिति स्थितम् । § 1738

यत्पुनरुक्तम् अ र्च टे न--**सत्त्वस्य विपक्षाद् व्यावृत्तेः क्षणिकत्वेन व्याप्तिसिद्धिः न बहिर्दृष्टान्तबलेन, दृष्टान्तवचनं तु कार्यहेत्वपेक्षया स्वभाव-विशेषापेक्षया च** । तन्निराकुर्वन्नाह--**अर्थ** इत्यादि । **कुतो** न कुतश्चित् प्रमाणात् **विपक्षाद्** अक्षणिकाभिमताद् **व्यावृत्तिः** । कस्याः ? इत्याह--**अर्थक्रियायाः** । *तया हि सत्त्वं व्याप्तम्, *सा ततो व्यावर्त्तमाना तदादाय निवर्त्तेत; सैव तु ततो न निवर्त्तते । कुतः ? इत्याह--**क्षणिकपक्षे प्रत्य-क्षतानुपपत्तेः** । अर्थक्रियायाः इति सम्बन्धः । यदा हि क्षणिकपक्षे क्रम-यौगपद्याभ्यां प्रत्यक्षा अर्थक्रिया भवति तदा कुतश्चित् तयोः निवृत्तौ सा विनिवर्त्तते । यदा तु अक्षणिकवद् इतरत्रापि न प्रत्यक्षा, तदा कुतः सा तत एव व्यावर्त्तेत इति भावः । § 1739

/ms उपसंहारमाह--**तन्नेत्यादि** । यत एवं परस्य सदनित्यम् इत्यादि संक्षेपकरणं प्रसक्तम् तत् तस्मात् **न आधिक्यादिदोषम् उद्भाव्य परमार्थ-वादिनं परः** प्रतिवादी **विजयते** इत्येतद् **घटामुपढौकत** इति । § 1740

यदि पुनः आधिक्यादिदोषमुद्भाव्य परमार्थवादिनं परो विजयते, नहीदम् अपरं दूषणम् इति दर्शयन्नाह--**साध्योक्ति [ः] साधनम्** इत्यादि । § 1741

...17 साध्योक्तिः साधनं शब्दाविनिवृत्तावसंभवात् ।

४ ध्ध] ब्धि
५ म्भा] लम्भाद
१० न] सा हि साध्यविपर्यये हेतोर्बाधकप्रमाणवृत्तिः । यथा यत्सत् तत्क्षणिकमेव, अक्षणिकत्वे अर्थक्रियाविरोधात् तल्लक्षणवस्तुत्वं हीयते ।— हेतुबि॰ पृ॰ ५४ । स्वभावहेतौ विपर्यये बाधकप्रमाणवृत्त्या तादात्म्यसिद्धिनिबन्धनत्वात् ।--हेतुबि॰ टी॰ पृ॰ ५१ ।
१४ *] अर्थक्रियया ।
१४ *] अर्थक्रिया ।
१४ तो] नित्यात् ।
१४ माना] सत्त्वम् ।
१५ सैव] अर्थक्रिया ।
१५ तु] नित्यात् ।
१७ दा] नित्यात् ।
१७ योः] क्रमयौगपद्ययोः ।
१७ सा] अर्थक्रिया ।
१८ इ] अक्षणिकेऽपि ।
१९ त] नित्यादेव ।
२४ म्] तर्हीदम्

## न भावः कृतकत्वं वा असमर्थितमसाधनम् ॥ १७ ॥§ 1743

न हि...एतावता प्रकृतार्थपरिसमाप्तौ किं सत्त्वकृतकत्वादिना ? नन्वेत 351/mkj तदप्युक्तम्--नासमर्थितमेव साधनमिष्यते निग्रह [प्राप्तेः] शब्दत्वं साधनमेव साध्यव्यापकस्वभावत्वात् साकल्येन अनित्यत्वसाधने सत्त्वादिवत् तदेकलक्षणोपपत्तेः, अन्यथा दृष्टान्ते सत्यप्यगमकत्वात् । § 1744

वचनम् **उक्तिः** अनित्यत्वविशिष्टा **साध्या** चासौ **उक्तिश्च** अनित्यः शब्दः इति । किं सा ? इत्यत्राह--**साधनं** हेतुः इत्यर्थः । कुतः ? इत्याह--**शब्दस्य अ [वि] निवृत्तौ** अपरिणामे **[अ] संभवात्** कारणात् **साध्योक्तिः साधनम्** इति । ततः किं जातम् ? इत्याह--**न भावः कृतकत्वं वा** साधनम् इत्यनुवर्त्तते, शब्दाऽनित्यत्वस्य र व संभावि * वचनाद् अन्यत एव सिद्धेः । यदि पुनः अनित्यः शब्दः इत्युक्त्वा सत्त्वात् कृतकत्वाद्वा इति ब्रूयात्; तर्हि उक्तस्य शब्दत्वस्य [स्वय]मसमर्थस्य तत्सामर्थ्यापरिज्ञानेन सत्त्वादिकमुच्यमानं हेत्वन्तरतया निग्रहस्थानं स्यादिति मन्यते । § 1745

ननु यदि शब्दो हेतुः; *तस्य सदा भावात् ततः सदा साध्यप्रतीतेः न कदाचित् कस्यचित् नाम नित्यत्वे विवादः स्यादिति चेत्; अत्राह--**असाधनम्** इत्यादि । **भावः कृतकत्वं वा** एतद् इह अनुवर्त्तते । **वा**शब्द इवार्थे । ततोऽयमर्थः--भाव इव कृतकत्वमिव शब्दः साधनं **नासमर्थितम्** अपि तु समर्थितमेव । समर्थनं च तस्य न सदा इति कुतः ततः सर्वदा व्य *प्रतीतिः, इतरथा अन्यत्रापि समानमेतत् । § 1746

**नहि** इत्यादिना कारिकां विवृणोति । **एतावता** शब्दस्य परिणाममन्तरेण असंभवमात्रेण **प्रकृतार्थपरिसमाप्तौ** शब्दपरिणामसिद्धिनिष्पत्तौ **किं** /ms **सत्त्वकृतकत्वादिना** प्रयुक्तेन इत्यध्याहारः । ननु सर्वस्य सर्वदा भावाद् अर्थप्रतीतेर्न विवाद इति चेत्; अत्राह--**ननु** इत्यादि । **ननु** इति शिरःकम्पे, **एतदप्युक्तम्** प्रतिपादितम् । किम् ? इत्याह--**नासमर्थितमेव साधनम् इष्यते** । कुतः ? इत्याह--**निग्रह** इत्यादि । न च सर्वदा तत्समर्थनम्, यतस्तथैव साध्यप्रतीतिरिति भावः । § 1747

ननु दृष्टान्तेन तत्समर्थन च सोऽत्र इति चेत्; अत्राह--**शब्दत्वं** श्रावणत्वं वा **साधनमेव** असाधनं न भवति । कुतः ? इत्याह--**साध्य** इत्यादि । **साध्यश्चासौ व्यापकश्च** सः **स्वभावो** यस्य तस्य भावात् **तत्त्वात्** । क्वेव किमिते त्याह **साकल्येन अनित्यत्वसाधने सत्त्वादिवत्** । एतदपि कुतः ? इत्याह--**तस्य एकं यल्लक्षणं** तस्य उपपत्तेः, **अन्यथा** एकलक्षणोपपत्त्यभावप्रकारेण **दृष्टान्ते सत्यपि अगमकत्वात्** । यथा प्रयत्नानन्तरीयकः अनित्यत्वाद् घटवत् अत्र साध्यसाधनयोः तादात्म्यं सिद्धम्, अन्यथा अनित्यः शब्दः प्र-

१० *] असंभवादिति
१४ *] शब्दस्य ।
१९ *] साध्य
२७ न] नं न
२७ च] दृष्टान्तः ।
३० त्याह] किमिति चेत् ? आह--

यत्नानन्तरीयकत्वात् इत्यादि न स्यात् । नहि इदं साध्यं क्रियमाणं तादात्म्यं जहाति । न साधनम् इति युक्तम् । यदुक्तम् अ र्च टे न--**प्रयत्नानन्तरीयकत्वस्वभावम् अनित्यं साधनमेव तन्मात्रम्** हेतुबि॰ टी॰ पृ॰ ७४ इति; 352/mkj न; सर्वानैकान्तिकविलोपप्रसङ्गात् । § 1748

पुनरपि आधिक्यादिदोषोद्भावना[त्] परमार्थवादिपराजये दूषणं दर्शयन्नाह--**स वा** *__मनुक्त्वा__ इत्यादि । § 1749

...18 स तामनुक्त्वा वाऽनुक्तं साधनं चेत् समर्थ्यते ।
साध्यवद्दूष्यमन्यच्च अप्रत्युच्चार्य दूष्यते ॥ १८ ॥§ 1751

पक्षमनुक्त्वा साधनं ब्रुवन् स्वयं पक्षीकरोति, पुनः समर्थनात् । साधनं यदि अनुक्त्वा समर्थयेत् किं यत्कृतकम् इत्यादिना ? परस्य साधनमप्रत्युच्चार्य दूषणसंभवे कथमनुक्तं न समर्थ्यते ? तदुभयत्राविशेषात् । तदन्यतरोक्तौ यदुक्तं निग्रहस्थानं तदुभयवचनेऽपि । § 1752

संवास नित्यः **स ताम्** अनित्यः शब्दः इति प्रतिज्ञा**मनुक्त्वा** त-
/ms द्वचने निग्रहप्राप्तिः अनर्थकाभिधानाद्वा वंवेत् किम् ? इत्याह--**साधनं** सत्त्वादिलिङ्गम् । अत्रदूषणम्--**समर्थ्यते** असिद्धविरुद्धानैकान्तिकत्वमलविकलं क्रियते **किन्न,** *किन्नकारयोः व्यवहितयोः अभिसम्बन्धः । किंभूतम् ? इत्याह--**अनुक्तम्** अनुच्चारितम् । § 1753

नन्वेवं साधनाङ्गस्याबन्धना निग्रहस्थानम्; उक्तस्य समर्थने प्रतिज्ञावचनं स्वयमभ्युपगतं निग्रहस्थानम् इत्युभयथा याप्तारज्ञः । § 1754

स्यादेतत्, उक्तं साधनं किमिव समर्थ्यते ? इत्याह--**साध्यवत्** शब्दानित्यत्ववद् इति । अनुक्तस्य समर्थने को दोषः इति चेत् ? उच्यते--**साध्यवत्** तत्र विप्रतिपत्तौ साधनान्तरात् समर्थितात् समर्थनम्, तस्यापि अनुक्तस्यैव समर्थनं तदन्तरात् तस्यापि अनुक्तस्यैव तदन्तरात् इत्यनवस्थानात् साधनप्रयोगोऽनवसरः । किं च, वादिना उभयं कर्त्तव्यम्—स्वपक्षसाधनं परपक्षदूषणं च । तव प्रतिपक्षः तदा दूषितो भवति यदा प्रतिज्ञादिनिगमनपर्यन्तं साधनवाक्यं दूषयति । तच्च उच्चार्य यदि सौगतो

---

२ न] यदि प्रयत्नानन्तरीयकत्वमन्तरेणापि कृतकत्वस्य भावादतत्स्वभावत्वम्; अनित्यत्वेऽप्ययमेव वृत्तान्तः । ततश्च तादात्म्यविरहात् प्रयत्नानन्तरीयकत्वस्यानित्यत्वेनान्वयो न स्यात्, तन्निवृत्तौ वा निवृत्तिरिति कथं ततस्तत् प्रतीयते ? नैष दोषः; प्रयत्नानन्तरीयकपदार्थस्वभावस्यैव अनित्यत्वस्य तेन साधनात् ।--हेतुबि॰ टी॰ पृ॰ ७३-७४ ।
६ स] सौगतः ।
६ *] ता
१४ वंवेत्] चेत्
१६ *] किम्न इति शब्दयोः ।
१८ ना] वचनात्
१९ ज्ञः] पाशारज्जू
२५ व] तत्र

वादी दूषयति; कथं प्रतिज्ञाप्रयोगो निग्रहदायी न भवेत् ? इति दर्शयन्नाह- -**दूष्यम्** इत्यादि । **दूष्यम्** निराकरणम**न्यदीपं** * **साधनम्** इत्यनुवर्त्तते, पक्षादीनाम् उपलक्षणभूतम् । **च** इति पूर्वसमुच्चये । **प्रत्युच्चार्य** पूर्वपक्षयित्वा **दूष्यते** निराक्रियते **किम्** इत्यनेन सम्बन्धः । शास्त्रे वादकाले वा पूर्वपक्षो न कर्त्तव्यः अन्यथा प्रतिज्ञावचनमवश्यंभावीति मन्यते । § 1755

एतेन नैयायिकादेः वादिनः सौगतः प्रतिवादी साधनं प्रत्युच्चार्य दूषयन् निरस्तो वेदितव्यः । यदि पुनः नियमेन तदप्रत्युच्चार्य दूष्यते; तत्राह--**दूष्यं** /ms च इत्यादि । **च** इति यथाऽर्थे । यथा साधनमप्रत्युच्चार्य दूष्यते तथा अनुक्तं किन्न समर्थ्यते ? § 1756

कारिकार्थं स्पष्टयति--**पक्षमनुक्त्वा** इत्यादिना । शब्दोऽनित्यः इति **प-क्षम् अनुक्त्वा साधनं ब्रुवन्** सौगतः **पक्षीकरोति स्वयम्** उच्यमानं साधनं साध्यं करोति । कुतः ? इत्यत्राह— **पुनः** तद्वचनोत्तरकालम् **समर्थनाद्** असिद्धादिदोषविकलतया व्यवस्थापनात् साधनस्य इति विभक्तिपरिणामेन पदघटना । तच्च अवश्यम् अभ्युपेयम् अन्यथा निग्रहप्राप्तिः । अनुक्तं तत् 353/mkj समर्थ्यते इत्यत्राह--**साधनं यदि समर्थयेत् अनुक्त्वा** पक्षवत् । अत्र दोषः **किं** कुत्सितम् । किम् ? इत्याह--**यत् कृतकम्** इत्यादि स्पष्टम् । **परस्य** प्र-तिवादिनः **साधनम् अप्रत्युच्चार्य** । तत्प्रत्युच्चारणं प्रतिज्ञावचनं अवश्यम्भावीति मन्यते । **दूषणसंभवे** दूषणोद्भावनसंभवे साधनस्य इति विभक्तिपरिणामेन सम्बन्धः । **कथम् साधनमयुक्तं युक्त्या न समर्थ्यते** समर्थ्येतैव । कुतः ? इत्याह--**तद्** इत्यादि । **त[दिति]** निपातः तस्य एतस्यार्थे । **तस्य** एवंवचन-स्य **उभयत्र** साधनस्य दूषणा समर्थने **वा विशेषादि**ति । ततः किं परस्य जातम् ? इत्यत्राह--**तदन्यतरोक्तौ** तयोः साधन-तत्समर्थनयोः अन्यतरस्य साधनस्यैव समर्थनरहितस्य समर्थनस्यैव वा साधनरहितस्य **उक्तौ** सत्यां **यत्** परेण **निग्रहस्थानम् उक्तम्** *एकत्र उक्तस्य साधनस्य असमर्थनम् अन्यत्र *साधनाङ्गस्य अवचनम् **तदयु[क्त]म्** उभयवचनेऽपि तदविशेषात् इति मन्यते । § 1757

यदुक्तं परेण--शब्द[ः] प्रमाणान्तरं च इत्यत्र यदि शब्दो लिङ्गं तत एव तर्हि सकलसमीहितसिद्धेः अन्यहेतूपादानात् वादिनो निग्रहस्थानम् /ms इति; तत्राह--**वादिनोऽनेकहेतूक्तौ** इत्यादि । § 1758

२ *] णीयम् अन्यत्
१३ इति] षष्ठीविभक्ति ।
१४ त्] साधनम् ।
१७ णं] णे
१८ नं] न
१८ इति] षष्ठी ।
१९ युक्त्या] मनुक्तम् अनुक्त्वा
२१ णा] णे
२१ वा] चा
२४ *] प्रथमविकल्पे ।
२५ त्र] द्वितीयविकल्पे ।
२५ *] हेतोः ।

...19 **वादिनोऽनेकहेतूक्तौ निगृहीतिः किलेष्यते ।**
**नानेकदूषणस्योक्तौ वैतण्डिकविनिग्रहः ॥ १९**
‖§ 1760

साधनस्यैकदोषमुद्भाव्य शेषस्यानुद्भावनात् प्रतिवादिनः सकृज्जयपराजयौ स्याताम् । अनेकदोषोद्भावने कथमनेकसाधनवादिनमतिशयीत ? § 1761

**वादिनो** जैनादेः **निगृहीतिः केलेत्यरुवा विष्यते** सौगतेन । कस्मिन् ? इत्याह--**अनेकहेतूक्तौ** एकत्र साध्ये अनेकस्य ज्ञापकस्य उक्तौ सत्यां प्रकाशितप्रकाशनवत्, एकेन हेतुना गतेऽर्थे अन्यवैफल्यादिति मन्यते परः । तत्रेदं चिन्त्यते--वादिना उभयं कर्त्तव्यं स्वपक्षसाधनं परपक्षदूषणमिति सौगतो वादी स्वहेतुमेकमभिधाय परपक्षे अनेकान्ते विरोधवैयधिकरण्यानवस्थाऽभावादिदोषमनेकं वदन् निगृह्यते, एकस्मादेव दोषात् परपराजये अन्यवैफल्यम् । तर्हि तेन सर्वत्र एकमेव दूषणं वक्तव्यमिति नियमेन कार्त्स्न्येन परपक्षो दूषितः स्यात् । एवमर्थं च **किल** इत्युच्यते । अथ द्विर्बद्धं सुबद्धम् इति वचनाद् अनेकदूषणवच[नेऽपि न] **निगृहीति तेरत** * एव अनेक[हेतु]वचनेऽपि न स्यात् । एतदेव दर्शयन्नाह— **नानेकदूषणस्योक्तौ** वादिनो नगृहीतिः इत्यनुवर्त्तते । **वैतण्डिकस्य** न वादवतो **विनिग्रहः** । यदि वा, **वादिनः अनेकहेतूक्तौ निगृहीतिः** इति वचनात् प्रतिवादी तदुद्भावने जयवान् वक्तव्य इतरथा तदयोगात् । तत्र च वादिनोऽनेकदोषसंभवः, अनेकस्य वचनं सेन दोषो वचन परस्य सर्वस्यावचने अनेकहेतुवचनवत् प्रसङ्गः । एतदेव आह--**न निगृहीतिः अनेकदूषणस्योक्तौ** परस्य । शेषं पूर्ववदिति । § 1762
354/mkj

कारिकां व्याचष्टे--**साधनस्य** प्रतिपक्षसाधनस्य वादिना उपन्यस्तस्य च
/ms **एकदोषमुद्भाव्य शेषस्य** सतोऽपि दोषस्य **अनुद्भावनात् प्रतिवादिनः सकृज्जयपराजयौ स्याताम्** । पुनः **अनेकदोषोद्भावने कथमनेकसाधनं वा नम अतिशयीत** प्रतिवादी इति विभक्तिपरिणामेन सम्बन्धः । § 1763

प्रतिज्ञादिवचनोपालम्भच्छलेन न्यायवादिनमपि निग्रहणेन संयोज्य आत्मानं मन्यमानं परमुपहसन्नाह--**पक्षम्** इत्यादि । § 1764

...20 **पक्षं साधितवन्तं चेद्दोषमुद्भावयन्नपि ।**

२ हः ] उद्धृतोऽयम्--न्यायवि॰ वि॰ प्र॰ पृ॰ ३७६ ।
५ रुवा ] किलेत्यरुचा
९ प ] जैनमते ।
१० स्मादेव ] विरोधाख्यात् ।
१३ * ] तिरिष्यते, अत
१५ न ] नि
१७ त ] वादिनो निग्रहायोगात् ।
१८ न ] चेन्न दोषवचनं
२४ म ] नवादिनम्

वैतण्डिको निगृह्णीयाद् वादन्यायो महानयम् ॥ २०

‖§ 1766

स्वपक्षस्थापनाहीनोऽपि प्रतिवादी तत्त्वं साधयन्तं सिद्धेरप्रतिबन्धकं दोषं वितण्डयोद्भावयन् जयतीति फल्गुप्रायम्, समर्थयोरेव विवादात् कथमन्यतरो वैतण्डिकः संभाव्येत ? न वै तदन्यतरो वैतण्डिकः साधनं प्रत्युचार्य दूषयतः प्रतिवादिनः प्रत्यवस्थानात्, स्वयं कथञ्चिदुत्तरमभिधायेति वा, तथा तयोर्वैतण्डिकत्वे परिपूर्णो वादन्यायः स्यात् ! § 1767

**पक्षम्** स्वाभिप्रेतमर्थं साध्याविनाभाविसाधनेन साधयन् न **निगृह्णीयात्** । **अपि** शब्दः भिन्नप्रक्रमः **वैतण्डिक** इत्यस्य अनन्तरं द्रष्टव्यः, **वैतण्डिकोऽपि** स्वपक्षस्थापनाहीनोऽपि **स प्रतिपक्षस्थापनाहीनो जल्पो वितण्डा** । न्यायसू० १ । २ । ३ इति वचनात्, *प्रतिपक्षो हस्तिप्रतिहस्तिन्यायेन स्वपक्ष उच्यते **चेद्** यदि तत्र दोषो **वादन्यायो महानयम्** वादन्यायो न भवति किन्तु वितण्डा स्यात् । प्रतिज्ञादिवचनवत् छलादेरप्यनर्थकस्य निग्रहबुद्ध्या उद्भावनसंभवादिति मन्यते । किं कुर्वन् स तं **निगृह्णीयात् ?** इत्यत्राह--**दोषमुद्भावयन्, पक्षं साधितवन्तम्** इति वचनात् पक्षसिद्ध्यप्रतिबन्धकमुद्भावयन्निति गम्यते ।
§ 1768

कारिकां विवृण्वन्नाह--**स्वपक्षस्थापनाहीनो जयति इति फल्गुप्रायम्** । कः ? इत्याह— **प्रतिवादी** । कया ? **वितण्डया** । किं कुर्वन् ? **उद्भावयन्** । किंभूतं कम् ? इत्याह--**सिद्धेरप्रतिबन्धकं दोषम्** इति । कम् ? इत्याह--**तत्त्वं साधयन्तं** वैतण्डिकस्य इयमेव गतिः यत् यथाकथञ्चित् जयति इति चेत्; अत्राह--**समर्थयोः** इत्यादि । **समर्थयोरेव** सम्यक्साधनदूषणवचने शक्तयोरेव नाऽसमर्थयोः वादिप्रतिवादिनोः **विवादात्** समर्थस्यासमर्थन तस्य /ms
वा समर्थेन सह विवादासंभवात् प्रचण्डभूपतेरे व क्लीवेनेति । **कथम् अन्यतरो** वादी [प्रतिवादी] वा **वैतण्डिकः संभाव्येत** तस्य तद्विपरीतत्वात् । § 1769

स्यान्मतम्--वादिना सम्यक्साधने प्रयुक्ते प्रतिवादी भूतदोषमपश्यन् यदि प्रतिज्ञादिवचनं सिद्धेरप्रतिबन्धकमपि सन्तं नोद्भावयेत् तस्य ऐकान्तिकः पराजयः स्यात् । तदुद्भावने तु तत्र सन्देहः । यदा वादी तथैव परिह- 355/mkj
रति तदा पराजयः । अपरिहारे अन्यथापरिहारे वा वाद्येव पराजीयते **ऐकान्तिकपराजयाद्वरं सन्देहः** इति प्रतिवादी वैतण्डिको भूत्वा प्रतिज्ञादिव-

९ प्र] प्रतिपक्षोऽत्र स्वपक्षः, प्रतिवादिपक्षापेक्षया वादिपक्षस्यापि प्रतिपक्षत्वात् ।
१० *] उत्तरपक्षवादी वैतण्डिकः प्रथमवादिप्रसाध्यमानपक्षापेक्षया हस्तिप्रतिहस्तिन्यायेन प्रतिपक्ष इत्युच्यते तमसावभ्युपगच्छत्येव न तत्र साधनमुपदिशति परपक्षमेवाक्षिपन्नास्ते ।--न्यायम० प्रमे० पृ० १५३ ।
२१ न] र्थेन
२१ स्य] असमर्थस्य ।
२२ व] रिव
२५ तिवादी] यथार्थ ।
२६ स्य] प्रतिवादिनः ।
२९ इति] तथापि ऐकान्तिकपराजयाद्वरं सन्देह इति युक्तं तत्प्रयोगकरणेन स्फुटाटोपकरणम् ।--न्यायम० प्रमे० पृ० १५२ ।

चनमुद्भावयति । तथा वाद्यपि तस्मिन् उद्भाविते तथा यदि उत्तरं न वदति तर्हि तस्य ऐकान्तिकः पराजयः स्यात्, उत्तरमात्रे तु उक्ते सन्देहः । यदा परः तथैव दूषयेत् जयवान् स्यात् अदूषणे अन्यथादूषणे वा पराजयवान् इति ऐकान्तिकपराजयवान् इति, ऐकान्तिकपराजयाद् वरं सन्देहः इति वाद्यपि वैतण्डिको भूत्वा उत्तरमात्रं द[दा]तीति नाथोनरो वैतण्डिकः अपि तु द्वावपि वैतण्डिकाविति । एतदेव दर्शयन्नाह--**न वै** इत्यादि । **न वै** नैव **तदन्यतरो** वादिप्रतिवादिनोः अन्यतरः **वैतण्डिकः** किन्तु द्वौ अपि वैतण्डिकौ इति भावः । कुतः ? इत्याह--**प्रत्युच्चाय्यन्ते द्य** *, अन्यथा अननुभाषणं निग्रहस्थानं स्यात् । किम् ? इत्याह--**साधनं** वादि हेच्छं तत्किं कुर्वतः ? **दूषयतः** प्रतिज्ञादिवचनोपालम्भच्छलेन निराकुर्वतः । कस्य ? इत्याह--**प्रतिवादिनः** । तस्य किम् ? इत्याह-- **प्रति वस्थानात्** निराकरणात् । केन ? इत्याह--**स्वयम्** आत्मना वादिनापि । कथम् ? इत्याह— **कथञ्चित्** यत्किञ्चिद् **उत्तरमभिधाय इति** शब्दः पूर्वपक्षसमाप्तौ, **वा** इति पराभिप्रायद्योतने । अत्र दूषणमाह--**तथा** तेन उक्तप्रकारेण तयोर्वादिप्रतिवादिनोर् **वैतण्डिकत्वे** अभ्युपगम्यमाने **वादन्यायः परिपूरिपूर्णत्यात्** उपहसनपरमेतत् । वितण्डैव स्यात् न वादन्याय इत्यर्थः । § 1770

/ms

किञ्च, इदमसिद्धं द्रव्यो यदि प्रतिज्ञादिवचनात् समीचीनसाधनवाद्यपि वादी निग्रहार्हः कथमसौ जेता तद्वचनरहितसाधनवचनेन इति चेत् ? एतत् पूर्वार्धेन प्रदर्श्य उत्तरार्धेन च दूषयन्नाह--कारिकां **जल्पाक** इद का । § 1771

...21 जल्पाकः साधयन्नर्थमनधिकोक्त्या जयत्यसौ ।
प्रतिवादी किन्निगृह्येत न प्रत्युच्चारणादिभिः ॥ २१ ॥ § 1773

वादिनः...साधन[नाङ्गवचनात्] प्रतिवादिनो निग्रहस्थानप्राप्तेः तथानुपपत्तेरिति फल्गुप्रायमिति; साधनप्रत्युच्चारणवत् दोषान्तरोक्ति-अनुक्तिप्रभृतिभिः दोषवत्साधनवादिनापि पुनर्निगृह्येत । तदेतेन अप्रतिभादिः प्रत्युक्तः । कस्यचिद् विप्रतिपत्तौ अप्रतिपत्तौ वा परस्य स्वपक्षसिद्धिमन्तरेण जयाभावात्

---

१ पि ] प्रतिज्ञादिवचने ।
३ रः ] प्रतिवादी ।
४ इति ] एतदन्तर्गतः पाठः पुनर्लिखितः ।
५ रो ] नान्यतरो
८ * ] चार्य इत्यादि
९ था ] विज्ञातस्य परिषदा त्रिरभिहितस्यापि अप्रत्युच्चारणमननुभाषणम्--न्यायसू० ५ । २ । १६ ।
९ हेच्छं ] हेतुं
११ ति ] प्रत्य
१६ त्यात् ] परिपूर्णः स्यात्
१७ व्यो ] द्वयोः
१८ सौ ] वादी ।
१८ जेता ] प्रतिज्ञादिवचन ।
२० का ] इत्यादि

कः केन निगृह्यते ? यत्पुनः इष्टस्य अर्थसिद्धिः साधनं च तदङ्गं पक्षधर्मत्वादित्रिलक्षणास्त्रयो हेतवो गमकाः तविनाभावनियमात्; तत्र पक्षधर्मत्वकार्यत्वपूर्वत्वादिलक्षणम् असाधनम्, अन्यथानुपपत्तिमनिश्चिन्वानः साध्यसाधनयोस्तादात्म्यतदुत्पत्ती कथं प्रतिपद्येत ? तत्प्रतिपत्तौ किं सम्बन्धान्तरेण अन्तर्गडुना ? § 1774

356/mkj

**जल्पाको** वादी **जयति** इति चेत् । किं कुर्वन् ? इत्याह--**साधयन्** । किम् ? इत्याह— **अर्थं** स्वपक्षम् । कथये त्याह--**अनधिकोक्त्या** न विद्यते अधिका उपलक्षणमेतत् तेन न्यूनमपि यस्यां सा तथोक्ता तया इति । तर्हि वादिनो जय एव प्रतिवादिनः पराजय इति कस्यामवस्थायां दोषः स्यात् ? त[दु]द्भावनं वा प्रतिवादिनः पराजयः स्यात् । न तावद् अनधिकोक्त्या अर्थं साधयान् । अत्रापि इदं चिन्त्यते किं सतोऽपि * स्वदोषाणामनुद्भावनात्, समीचीनसाधनवचनाद्वा वादी जयति ? तत्र अन्त्ये पक्षे उक्तं जल्पादि विरुध्येत इति, स एव परस्य पराजय इति । प्रथमपक्षेऽपि स एव वादी स्वयं स दोषमुद्भाव्य जयति तर्हि तस्य पराजय इत्युक्तम् । यदि पुनः प्राश्निकप्रकाशितात् तदनुद्भावनात्; ते तर्हि यथा दोषस्य अनुद्भावनं परस्य /ms पराजयं व्यवस्थापयन्ति तथा वादिनोऽपि वचनमिति यत्किञ्चिदेतत् । एतेन सदोषसाधनवचनकालोऽपि निरूपितः । तत् तस्मिन् पक्षे च प्रतिवादिनः परोक्तः पराजयः । एतदेव दर्शयन्नाह--**प्रतिवादीनिगृह्येत किं नैव** । कैः ? इत्याह--**प्रत्युच्चारणादिभिः** । आदिशब्देन दोषोद्भावनादिपरिग्रहः । § 1775

कारिकार्थं प्रकाशयन्नाह--**वादिन** इत्यादि । गतार्थमेतत् । कुत एतत् ? इत्यत्राह--**साधन** इत्यादि । **प्रतिवादिनो निग्रहस्थानप्राप्तेः तथा** परोक्तप्रकारेण **अनुपपत्तेः फल्गुप्रायम् इति साधनप्रत्युच्चारणवद् दोषान्तरोक्तिश्च अनुक्तिश्च प्रभृति** येषाम् अदोषोद्भावनादीनां तैः इति वादिजयादेव तन्निग्रहस्थानप्राप्तेरिति मन्यते । तैरेव तत्प्राप्तिः नातः इति चेत्; अत्राह--**दोषवत्साधनवादिनापि** न केवलम् अन्येन **पुनः** एवं सति **निगृह्येत** प्रतिवादी इति सम्बन्धः । शेषमत्र चिन्तितम् । § 1776

एतदन्यत्रातिसं न्नाह--**तदेतेन** इत्यादि । **तद्** इत्ययं निपातः तेन इत्यस्य अर्थे वर्त्तते । तेन **पक्षस्थापनया** इत्यादिना **एतेन** इदानीं चेतसि प्रत्यक्षतया प्रतिभासमानेन । **एतेन** इत्युच्यमाने अनन्तरे संप्रतिपत्तिः स्यात्, तेन इत्युच्यमाने चिरव्यवहिते, तस्मात् **तदेतेन** इत्युच्यते । **प्रत्युक्तो** निरस्तः [कथम् ?] इत्याह--**अप्रतिभा** इत्यादि । उत्तराप्रति[पत्तिरप्रति]भा

७ ये] कया ? इ
८ अधिका] कम्
११ यान्] साधयेत्
११ *] सतामपि
१४ स] स्व
१४ र्हि] वादिनः ।
१५ ते] प्राश्निकाः ।
२४ तैरेव] निग्रहप्राप्तिः ।
२४ त्प्राप्तिः] न वादिजयात् ।
२७ त्रातिसं] तिदिश
३१ उ]
उत्तरस्याप्रतिपत्तिरप्रतिभा--न्यायसू० ५ । २ । १८ ।

**आदिर्**येषां निग्रहस्थानानां तानि तथा । *तेषां प्रपञ्चः स नेह प्रदर्श्यते
/ms ग्रन्थगौरवभयात् क था त्र य भ ङ्गा द् अवगन्तव्यः । कथं प्रत्युक्त
इत्युक्तः ? इत्यादि **कस्यचिद्** वादिनो [प्रतिवादिनो] वा **विप्रतिपत्तौ**
अन्यथा व्यवस्थितस्य परमार्गस्य अन्यथाग्रहणे **अप्रतिपत्तौ** तद्ग्रहणाभ्य वेच
**परस्य** प्रतिवादिनो **वा स्वपक्षसिद्धिमन्तरेण जयाभावात्** कारणात् **कः**
**केन निगृह्यते** न कश्चित् केनचित् ? जयपराजययोः अन्योऽन्यापेक्षत्वादिति
। § 1777

तदेवं **वादिप्रतिवादिप्राश्निक** इत्यादिना **चतुरङ्ग एव** इत्यनेन **चतुरङ्गं**
357/mkj **विदुर्बुधाः** इति व्याख्यातम् । **वचनस्यापि** इत्यादिना **स्वार्थानुमानेऽपि**
**प्रयोगप्रदर्शनम् अन्यथाऽयुक्तमेव** इत्यनेन च समर्थं च तद्वचनं च इति
**समर्थवचनम्** इत्येतच्च, **तत्त्वप्रत्यायनात्** इत्यादिना **मार्गप्रभावनालक्षणत्वात्**
इति पर्यन्तेन *पुनः **पक्षनिर्णयपर्यन्तेन** पुनः **पक्षनिर्णयपर्यन्तं फलं मार्गप्र-**
**भावना** इति च । **कस्यचित् तूष्णींभाव** इत्यादिना विपक्षे बाधकमुपदर्शितम्
। § 1778

संप्रति **समर्थस्य** साध्य सिच्चो शक्तस्य **वचनं जल्पं विदुः** इत्येत-
द् व्यवस्थापयितुकामः परमतं दूषयितुमुपन्यस्यति **यत्पुनः** इत्यादि । **य-**
**द्** वादलक्षणं **पुनः** इति पक्षान्तरद्योतने । किं तत् ? इत्याह--***इष्टस्य**
वादिनोऽभिमतस्य **अर्थसिद्धिः साधनम्** अनुमेयप्रतीतिः इति यावत्, साध्य-
ते अनेन इति **साधनं** लिङ्गम् इत्यर्थः । **च इति** पूर्वसमुच्चयार्थः । **तदङ्गम्**
तस्य साधनस्य लिङ्गस्य अङ्गम् अवयवः । किं तत् ? इत्याह--***पूर्व-**
**पक्षधर्मत्वादि,*** **आदि**शब्देन सपक्षे सपक्षे सत्त्वमसत्त्वं वा पक्षे गृह्यते,
तस्य वा सिद्धिः । उप साधनस्य अङ्गं निमित्तं के ? इत्याह--**त्रिलक्षणाः**
/ms त्रयः पक्षधर्मत्वादयो लक्षणं येषां ते तथोक्ताः । कियन्तः ते ? **त्रय** इति

१ *] निग्रहस्थानानाम् ।
२ ङ्गा] एतन्नामकाद् ग्रन्थविशेषात् ।
३ इत्यादि] ह--
५ वेच] णाभावे च
८ नेन] इत्यन्तेन[[पृ॰ ३११ ।]]
९ इति] पृ॰ ३११ ।
९ इत्यादिना] पृ॰ ३११ ।
१० नेन] इत्यन्तेन[[पृ॰ ३३० ।]]
११ च्च] पृ॰ ३११ । व्याख्यातम् इति सम्बन्धः ।
११ इत्यादिना] पृ॰ ३३१ ।
१२ न्तेन] पृ॰ ३३२ ।
१२ *] पुनः पक्षनिर्णयपर्यन्तेन इति द्विरुक्तमत्र ।
१३ च] पृ॰ ३११ । व्याख्यातम् ।
१३ इत्यादिना] पृ॰ ३३२ ।
१५ सिच्चो] सिद्धौ
१७ *] इष्टस्यार्थ [[स्य]] सिद्धिः साधनं तस्य निर्वर्त्तकमङ्गं तस्य वचनं तस्याङ्गस्यानुच्चारणं वादिनो निग्रहाधिकरणम्--तच्च साधनाङ्गमिह निश्चितत्रैरूप्यं लिङ्गमुच्यते, तस्य साधनाङ्गस्य वचनं त्रिरूपलिङ्गख्यानम्, तस्य साधनाङ्गस्यावचनमनुच्चारणमनभिधानम्...--वादन्या॰ टी॰ पृ॰ ३ ।
२० *] पूर्व इति निरर्थकम् ।
२१ *] त्रैरूप्यं पुनर्लिङ्गस्यानुमेये सत्त्वमेव सपक्षे एव सत्त्वम् असपक्षे चासत्त्वमेव निश्चितम् ।--न्यायबि॰ २ । ५ ।
२१ ब्देन] एकः सपक्षे शब्दः द्विर्लिखितः ।
२१ क्षे] असपक्षे
२२ उप] अथ

कार्य-स्वभाव-अनुपलम्भभेदेन । ते किम् ? इत्याह--**हेताव** गमकाः । यदि वा, पक्षधर्मत्वादीनि त्रीणि लक्षणानि येषाम् इति ग्राह्यम् । § 1779

इदमपरं व्याख्यानं नैयायिकाद्यपेक्षया । **तस्य** अनन्तरसाधनस्य **अङ्गम्** अवयवः । किम् ? इत्याह--**पक्षधर्मत्वादि** । केवलान्वयिनः साधनस्य पक्षधर्मत्वम् । आदिशब्देन स्वपक्षे सर्वं गृह्यते । ततः **पूर्ववच्छेषवत्** न्यायसू० १ । १ । ५ इति सूत्रं संगृहीतम् । साधनादिभ्यः पूर्वः पक्षः पूर्वम् अभिधानात्, स यस्यास्ति तत् तद्वदिति । पक्षाद् उक्ताद् उद्धरितः शेषः सपक्षो यस्यास्ति तत्तद्वत् । केवलव्यतिरेकिणो [लि]ङ्गस्य पक्षधर्मत्वम्, आदिशब्देन सामान्यतो दृष्टं चेति गृह्यते । तेन **पूर्ववत् सामान्यतो दृष्टं च** न्यायसू० १ । १ । ५ इति सूत्रपरिग्रहः । सामान्येन च शब्दाद् विशेषणेनैव अदृष्टं विपक्षे इत्यर्थः । अन्वयव्यतिरेकवतः अङ्गं पक्षधर्मत्वम् । आदिशब्देन शेषवत् सामान्यतो दृष्टं च इति गृह्यते । अतः तृतीयमपि सूत्रम् अनुगृहीतम्--**पूर्ववच्छेषवत् सामान्यतोदृष्टं च** न्यायसू० १ । १ । ५ इति । तस्याः सिद्धेः अङ्गं निमित्तं **तदङ्गं त्रयो हेतवः** केवलान्वय[केवलव्यतिरेक-अन्वय] व्यतिरेकिणः । किं लक्षणाः ? **त्रिलक्षणाः** । उपलक्षणमेतत् 358/mkj तेन द्विलक्षणग्रहणम् । यदि वा, **पक्षधर्मत्वादीनि त्रीणि लक्षणानि** येषां ते तथोक्ताः । उपलक्षणमेतत् ततः पक्षधर्मत्वादिद्व्यादिलक्षणा अपि गृह्यन्ते । **त्रयो हेतवः** कारणाकार्य [कारण-कार्य-अकार्यकारण] सामान्यभेदेन ।
§ 1780

एवं च पूर्ववत् कार्यात् पूर्वं जायमानत्वात् पूर्वं कारणम् अस्य अस्ति /ms

---

१ भेदेन] अनुपलब्धिः स्वभावः कार्यं चेति ।--न्यायबि० २ । ११ ।

१ हेताव] हेतवो

३ व्याख्यानं] अग्रे उच्यमानम् ।

५ र्वं] सपक्षे सत्त्वं

६ इति] तत्पूर्वकं त्रिविधमनुमानं पूर्वच्छेषवत् सामान्यतो दृष्टं च इति ।

७ अभिधानात्] उच्चारणापेक्षया, हेतोः पूर्वं पक्षः समुच्चार्यते इत्यर्थः ।

७ त्] पूर्ववत् इति ।

८ त्] शेषवत् इति । तुलना अथवा त्रिविधमिति पूर्वच्छेषवत्सामान्यतो दृष्टं चेति । पूर्वं साध्यं तद्व्याप्त्या यस्यास्तीति तत् पूर्ववत् । साध्यतज्जातीयः शेषः तदस्यास्तीति तत् शेषवत् । पूर्ववन्नाम साध्यव्यापकं शेषवदिति समानेऽस्ति...--न्यायवा० पृ० ४६ ।

११ णेनैव] शेषेणैव

१५ तिरेकिणः] त्रिविधमिति अन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति । तत्रान्वयव्यतिरेकी विवक्षिततज्जातीयोपपत्तौ विपक्षावृत्तिः यथा अनित्यः शब्दः सामान्यविशेषवत्त्वे सति अस्मदादिबाह्यकरणप्रत्यक्षत्वात् घटवदिति । अन्वयी विवक्षिततज्जातीयवृत्तित्वे सति विपक्षहीनः । यथा सर्वानित्यत्ववादिनाम् अनित्यः शब्दः कृतकत्वादिति । अस्य हि विपक्षो नास्ति । व्यतिरेकी विवक्षितव्यापकत्वे सति सपक्षाभावे सति विपक्षावृत्तिः यथा नेदं जीवच्छरीरं निरात्मकम् अप्राणादिमत्त्वप्रसङ्गादिति ।--न्यायवा० पृ० ४६ ।

१६ म्] केवलान्वयिनः विपक्षेऽसत्त्वाभावात्, केवलव्यतिरेकिणश्च सपक्षसत्त्वाभावात् ।

२० च] पूर्ववदिति यत्र कारणेन कार्यमनुमीयते यथा मेघोन्नत्या भविष्यति वृष्टिरिति । शेषवत् तद् यत्र कार्येण कारणमनुमीयते पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वं च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति । सामान्यतोदृष्टं व्रज्यापूर्वकमन्यत्र दृष्टस्य अन्यत्र दर्शनमिति तथा चादित्यस्य ।--न्यायभा० १ । १ । ५ ।

इति । शेषवद् इति शेषं कार्यम् अस्ति इति शेषवद् इति । सामान्येन [अ]कार्यकारणत्वेन सामान्यतोदृष्टं रसादीनि सूत्रत्रयम् अनुसृतं भवति । एतेन वीतादि व्याख्यातम् । कुतः तदङ्गम् ? इत्याह--**तद्** इत्यादि । **तेषु** पक्षधर्मत्वादिषु त्रिषु हेतुषु वा **अविनाभावस्य नियमाद्** इति । वादाधिकारात् तद्वचनपरिग्रहः । तत्र दूषणमाह--**तत्र** इत्यादि । [तत्र] तस्मिन् पूर्वपक्षे **पक्षधर्मत्वं** च **कार्यत्वं** पूर्वत्वं **पूर्वत्वं** च तदादिर्यस्य तत् तथोक्तं **तल्लक्षणं** यस्य तदपि तथोक्तम् । **आदिशब्दः** प्रत्येकमभिसम्बध्यते--पक्षधर्मत्वादि, तदसव्याप्तः इत्यस्य संग्रहार्थः । कार्यत्वादि, *ततः स्वभावत्वादिपरिग्रहः । पूर्ववत्त्वादिः, शेषवत्त्वादेः आदिशब्देन ग्रहणम् । **तदसाधनम्** अलिङ्गम् । कुतः ? इत्याह--**अन्यथा** इत्यादि । § 1781

ननु भवतु त इ हितत्वं तथापि पक्षधर्मत्व-कार्यत्वादिलक्षणं साधनमेव तादात्म्यतदुत्पत्तिप्रतिबन्धादिति चेत्; अत्राह--**साध्य** इत्यादि । **साध्यादभेदात्** साध्यशब्देन स्वभावहेतुः उच्यते, ततोऽभेदात् । **साधन**शब्देन कारणो हेतुः । तयोः **तादात्म्यं** च साध्यरूपता **तदुत्पत्तिश्च** साध्याद् आत्मलाभः ते **तादात्म्यतदुत्पत्ती कथं** न कथंचित् **प्रतिपद्येत** सौगतः । किं कुर्वन् ? **अन्यथा** साध्याभावप्रकारेण **अनुपपत्तिम**घटां हेतोः सतीमसतीं वा **अनिश्चिन्वानः** । एतदुक्तं भवति--अन्यथानुपपत्त्या तादात्म्यतदुत्पत्ती व्याप्ते । नहि यद् यदभावेऽपि भवति तत् तत्स्वभावं तत्कार्यं वा मनीषिणो मन्यन्ते
/ms । ततः तस्या निश्चयाभावे तयोः अनिश्चयात् । पूर्वत्वादिकार्यत्वादिलक्षणम् असाधनम् इति निश्चिनोति नाम इति चेत्; अत्राह--**तत्प्रतिपत्तौ** तस्या
359/mkj अन्यथानुपपत्तेः प्रतिपत्तौ निश्चये अङ्गीक्रियमाणे याः **किं सम्बन्धान्तरेण** तादात्म्यादिलक्षणेन ? किंभूतेन ? **अन्तर्गडुना** अनर्थकेन । अन्यथानुपपत्तिसम्बन्धेन तत्प्रयोजनप्रसाधनादिति मन्यते । § 1782

स्यान्मतम्--सम्बन्धान्तरमन्तरेण सापि न सती निश्चीयते वा तत्कथं तस्य अन्तरं गतः नेति चेत्; अत्राह--**एकलक्षणसिद्धिः** [इत्यादि] । § 1783

...22 एकलक्षणसिद्धिर्वा साकल्येन कथं तथा ।

---

२ सादीनि ] दीति
३ वीतादि ] सांख्योक्तम् । तत्र प्रथमं तावत् द्विविधं वीतमवीतं च । अन्वयमुखेन प्रवर्त्तमानं विधायकं वीतम्, व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतम् । तत्रावीतं शेषवत्...वीतं द्वेधा पूर्ववत् सामान्यतो दृष्टं च ।--सांख्यत° कउ का° ५ ।
६ त्वं ] पूर्वत्वम् इति पुनरुक्तम् ।
७ त्वादि ] इत्यत्र आदिशब्दः ।
८ व्याप्तः ] तदंशव्याप्तः
८ * ] आदिशब्दात् ।
११ इ ] ते ई
११ त्वं ] इष्टसिद्धिः ।
१९ स्या ] अन्यथानुपपत्तेः ।
१९ याभावे ] तादात्म्यतदुत्पत्त्योः ।
२१ याः ] ?
२४ रेण ] अन्यथानुपपत्तिरपि ।
२५ नेति ] अन्तर्गडुतेति

एतत्पूर्ववदादौ च योजनीयमसाधनम् ॥ २२

‖§ 1785

**एकं** प्रधानम् अन्यथानुपपन्नत्वं यत् साधन**लक्षणं** तस्य **सिद्धिः** निर्णीतिः **साकल्येन कथम्** इत्यादिना कृता इति अध्याहारः । वक्ष्यमाणानन्तरपरिच्छेदे करिष्यते इति वा । एवं तावत् पूर्ववत्त्वकार्यत्वादिलक्षणं सौगतकल्पितम् अन्यथानुपपत्तिरहितत्वादसाधनम् इति प्रतिपाद्य [नयायिकं] प्रति पूर्वत्वादिलक्षणं तद्रहितत्वादसाधनम् इति प्रतिपादयन्नाह--**तथा** इत्यादि । **तथा** तेन अनन्तरप्रकारेण **योजनीयम् असाधनम्** इत्**येतत्** । क्व ? इत्यत्राह--**पूर्ववद्** इत्यादि । **आदि**शब्देन वीतादिपरिग्रहः । तथाहि--पूर्ववच्छेषवत् पक्षसपक्षवत्, न साधनम् अन्यथानुपपत्तिरहितत्वात् तदन्यवत् । इतरथा विवादास्पदं सर्वमनित्यं सत्त्वात् दीपादिवत् इत्यपि स्यात् पूर्ववच्छेषवद् इत्यस्य लक्षणस्य भावात् । अथ अनित्यत्वाभावेऽपि सत्त्वस्य आत्मादौ भावात् नेदं साधनम्; किं तर्हि स्यात् ? यत् तदभावे नियमेन न भवति; अन्यथानुपपत्तिरियम्, इति अन्तर्गडुना किं पूर्ववद् इत्यादिना ? तथा पूर्ववत्सामान्यतोदृष्टं विपक्ष ; इत्येतदपि तद्रहितं न साधनम्, /ms अन्यथा स्वसंवेदनं घटादिज्ञानम् आत्मविशेषगुणत्वात्, यः पुनः स्वसंवेदनो न भवति स तद्विशेषगुणो न भवति इति यथा रूपादिः इत्यपि स्यात्, पूर्ववत्त्वस्य विपक्षे सामान्यतो विशेषतो वाऽदर्शनस्य च भावात् । अथ मतं स्वसंवेदनाभावेऽपि प्रयत्नादौ तद्विशेषगुणत्वस्य भावात् नेदं साधनमिति; किं तर्हि स्यात् ? यत् तदभावे नियमेन न भवति; उक्तमत्र अन्यथानुपपत्तिसमर्थनमिति । तथा पूर्ववच्छेषवत् सामान्यतोऽदृष्टम् इति वचन[म]युक्तम्; कथमन्यथा पक्वान्येतानि फलानि एवंरसानि च एकशाखाप्रभवत्वाद् उपयुक्तफलवत्, यानि पुनः एवंविधानि न भवन्ति तानि एकशाखाप्रभवाणि न भवन्ति यथा अविवक्षितफलानि इत्येवमाद्यपि युक्तं [न] भवेत् । बाधितविषयत्वात् नेति चेत्; ननु **लक्षणयुक्ते बाधासंभवे तल्लक्षणमेव दूषितं स्यात्** प्र॰ वा॰ स्ववृ॰ पृ॰ ६६ इति कथमन्यत्र समाश्वासो यतः पूर्ववत्त्वादि साधनं स्यात् ? अबाधितत्वस्यापि तल्लक्षणात् । नाऽस्य लक्षणयोगः इति चेत्; किमिदं बाधितत्त्वम् साध्याभावेऽपि साध्यधर्मिणि दर्शनम्; अबाधितत्वं तदभावे नियमेनाऽदर्शनम् इति अन्यथानुपपन्नत्वम्--अबाधितत्वम् इति नानयोः अवस्थयोः विशेषः । § 1786

360/mkj

किञ्च, अबाधितविषयत्वं किं बाधकस्यादर्शनात्, उत पूर्ववच्छेषवत् सामान्यतोऽदृष्टम् इत्येतस्मात्, आहोस्वित् विपक्षे बाधकप्रमाणदिति त्रयः

६ त] अन्यथानुपपत्तिरहितत्वात् ।
१४ क्ष] पक्षविपक्षवत्
१४ त] अन्यथानुपपत्तिरहितम् ।
१६ त] आत्मविशेषगुणः ।
२६ णात्] क्षणत्वात्
२७ म्] धितत्वम् ?
२८ त] साध्याभावे-विपक्षे इत्यर्थः ।
२९ ना] अबाधितत्व-अन्यथानुपपन्नत्वयोः ।

पक्षाः । तत्र आद्ये पक्षे व्यभिचारः, सतोऽपि बाधकस्य कुतश्चिददर्शनसंभवात्, /ms पुनः पर्यायेण दर्शनात्, अदृष्टदोषेषु शास्त्रेषु परीक्षया पुनः दोषदर्शन । कालत्रयबाधा[ऽ]दर्शनम् अन्तर्व्याप्तिमन्वाकर्षति । द्वितीये प्रकृतमपि परिहृतम् । तृतीये सिद्धो नः सिद्धान्तः । § 1787

यत्पुनरेतत्--पूर्ववत् कारणवत् इति; तदप्यसारम्; वीतरागाभावप्रसङ्गात् । क्षणचयान्यो या वीतरागत्वेन अभिमतो रागादिमान् पुरुषवत् । पुरुषो हि रागादीनां कारणमिष्यते बुद्ध्यादीनां कार्याणां तद्विशेषगुणत्वोपगमात् । वीतरागत्वेनोपगतो न तत्कारणम्; न तर्हि संसारिणो मोक्षः स्यात्, इति तदर्थमनुष्ठानमनर्थकम् । न चैतन्मन्तव्यम्--सामग्री रागादिकारणं न केवलः पुरुषः, तस्याः तदनुमाने सिद्धसाधनम्, पुरुषाद् व्यभिचार इति; नित्यस्य अपेक्षानिषेधात् तस्याः तत्कारणत्वानुपपत्तेः । यदि पुनस्तस्य तत्कृतोऽवस्थाविशेषः तदव्यभिचारी इति; तत एव तदनुमानम् एकलक्षणशासनम् । § 1788

यच्चान्यत्--शेषवत् कार्यवद् इति; तदप्यसुन्दरम्; यादृश एव घटादेः संस्थानविशेषः चक्रचीवरनारदण्डादेर्भवति तादृशस्यैव पाकजोत्पत्तौ तदभावेऽपि स्वयमभ्युपगमात् । एवं च सति चक्रादिवत् उपलब्धिमदभावेऽपि क्वचित्तत्संभवाशङ्कायां कथमतः पर्वतादौ बुद्धिमत्कारणानुमानं निःशङ्कम् । अथ यथा चक्राद्यभावेऽपि तद्दर्शनं [तथा] बुद्धिमदभावे यदि कदाचित् स्यात् को विरोधः ? विरोधे वा तत एव गमकत्वोपगतेः किं शेषवत् इत्यनेन । § 1789

/ms यत् पुनरन्यत्-- सामान्यतः सामान्येन अकार्यकारणत्वेन दृष्टं रूपादौ रसादिकम्; तदप्यसमीक्षिताभिधानम्; यतः कुतः कुतश्चित् यस्य कस्यचित् प्रतिपत्तिप्रसङ्गात् । अथ एकस्मिन् द्रव्ये ततस्तदनुमानम्, अतोऽयमदोषः; तर्हि रसाद् रूपवत् क्वचित् फले बुद्ध्यादेरनुमानं सहभावस्य कदाचिद्दर्शनं । तत्र तस्य समवायाच्चेति चेत्; एकार्थसमवायः तर्हि गमकत्वे निबन्धनम् । भवतु को दोष इति चेत्; न; ततः तद्वत् *कर्मणोऽनुमितिः

---

२ प] क्रमेण ।
२ न] नात्
३ प्र] अबाधितत्वमपि ।
६ या] कण[[कणादः इत्यर्थः ।]]चरोऽन्यो वा
८ त] रागादिकारणम् ।
१० त] सामग्र्याः ।
१० त] रागाद्यनुमाने ।
१० पु] यतः सामग्री रागादिकारणम् अतः केवलपुरुषात् तदुत्पादो न भवति ।
११ स्य] पुरुषस्य ।
११ स्याः] सामग्र्याः ।
११ स्य] पुरुषस्य ।
१५ स्यैव] अग्निसंयोगजरूपाद्युत्पत्तौ ।
१५ त्तौ] चक्राद्यभावेऽपि ।
१९ तेः] त्वोपपत्तेः
२२ म्] सामान्यतोदृष्टं तु यदकार्यकारणभूताल्लिङ्गात् तादृशस्यैव लिङ्गिनोऽनुमानं यथा कपित्थादौ रूपेण रसानुमानम् ।--न्यायम० प्रमा० पृ० ११९ ।
२२ तः] कुतः इति द्विर्लिखितम् ।
२४ नं] नात्
२५ त्र] फले ।
२५ स्य] [[बुद्ध्यादेः ।]]तस्याऽ
२६ त] एकार्थसमवायात् ।
२६ त्] रूपवत् ।
२६ *] क्रियायाः ।

स्यात् तदविशेषात् । तथापि रूपादेरेव तत्संभवे किमेकार्थसमवायेन ? यदि च रूपरसादेः क्वचित् सहभावदर्शनाद् अन्यत्र रसाद् रूपगतिः; तर्हि स्पर्शवत्त्वादेः तत्र दर्शनात् स्पर्शात् जलादौ गन्धादिप्रतिपत्तिरस्तु । अथ अनुमीयमानजलादिसजातीये गन्धाद्यदर्शनात् नैवम्; अत एव सर्वत्र तदनुमानम् । नचायमेकान्तः तत्सजातीये एव दृष्टसम्बन्धलिङ्गिनं गमयति तत्, अन्यथाप्यविरोधात्, इतरथा कथन्न परमतसिद्धिरिति यत्किञ्चिदेतत् ।
§ 1790

361/mkj

ननु साकल्येन साध्याभावे साधनाभावस्य प्रत्यक्षतः प्रतिपत्तौ प्रतिपत्तुः सर्वज्ञत्वम् । अनुमानतोऽनवस्था । न च मानान्तरमिति चेत्; अत्राह--**सत्तर्केणोह्यते रूपम्** इत्यादि । § 1791

...23 सत्तर्केणोह्यते रूपं प्रत्यक्षस्येतरस्य वा ।
अन्यथानुपपन्नत्वं हेतोरेकलक्षणम् ॥ २३ ॥§ 1793

सन्निकृष्टं विप्रकृष्टं वार्थं साकल्येनेदन्तया नेदन्तया वा व्यवस्थापयितुकामस्य अन्यथाभावविषयस्तर्कः परं शरणं नापरम्, सर्व [विषयत्वात्] ततः शब्दविकल्पयोस्तत्त्वसाधनमलङ्घ्यशासनं प्रचण्डभूपतेर्वा । § 1794

**तर्केण** सर्वत्र स्वसंवेदनाभावे ज्ञानत्वानुपपत्तिलक्षणान्तराभावाद् इति अस्पष्टोहविकल्पेन[न] दर्शनादिना **ऊह्यते** वितर्क्यते यद् **रूपं** स्वभावः । कस्य ? इत्याह--**हेतोः** लिङ्गस्य । किंभूतस्य ? **प्रत्यक्षस्य** प्रत्यक्षग्रहणयोग्यस्य सत्त्वधूमादेः **इतरस्य वा** तदग्रहणयोग्यस्य वा । यथा अनन्तज्ञानस्य /ms अनन्तसुखसाधने तस्य वा बुभुक्षाद्यभावे साधने तत्रैव वा अनन्तवीर्यस्य । ए न च अस्मदाद्यपेक्षया उक्तम्; अन्यस्य अशेषं प्रत्यक्षमेव । किं तद्रूपम् ? इत्याह--**अन्यथानुपपन्नत्वम्** साध्याभावे नियमेन साधनस्य अघटनम् । तत्किम् ? इत्याह--तद्रूपम् **एकलक्षणं** प्रधानलक्षणम् । कस्य ? इत्याह--**हेतोः** इति आवृत्त्या सम्बन्धः । एतदुक्तं भवति--न प्रत्यक्षेण अनुमानेन वा निश्चितं रूपम् एकं लक्षणं हेतोः यतः प्रतिपत्तुः सर्वज्ञत्वमनवस्था वा, किन्तु मनोविकल्पेन । सर्वज्ञत्वमतस्तस्येष्यत एव । यदाह-- § 1795

१ रूपादेरेव] अनुमितिसंभवे ।
२ चित्] फले ।
६ त्] लिङ्गम् ।
९ स्था] तस्याप्यन्यतोऽनुमानात् सम्बन्धप्रतिपत्तिरिति ।
१६ त] सत्त
२० त] अनन्तसुखस्य वा ।
२० भावे] व
२० त्रैव] बुभुक्षाद्यभावे साध्ये ।

तुलना--केवली न भुङ्क्ते रागद्वेषाभावानन्तवीर्यसद्भावान्यथानुपपत्तेः ।--प्रमेयक० पृ० ३०० । अनाकाङ्क्षारूपत्वेऽप्यस्या दुःखरूपतया अनन्तसुखे भगवत्यसंभवात् ।--प्रमेयक० पृ० ३०५ ।
२१ च] एतच्च
२१ अ] सर्वज्ञस्य ।

*अशेषविदिहेष्यते सदसदात्मसामान्यवित् ।
जिन प्रकृतिमानुषोऽपि किमुताखिलज्ञानवान् ॥ पात्रके॰ श्लो॰
१९ इति ।§ 1797

ननु तर्को नास्ति अनुपलम्भात् खरविषाणवत्, कथं तेन असता किञ्चिदूह्यते ? सतोऽपि वा आनर्थक्यम्, तदर्थस्यान्यतः सिद्धिः तेति चेत्; अत्राह--**सन्निकृष्टम्** इत्यादि । **सन्निकृष्टं** पुरुषमात्रदर्शनयोग्यं **विप्रकृष्टं वा** तद्विपरीतम् **अर्थं** सत्त्व-धूमादिकम् **साकल्येन** देशकालान्तरव्याप्त्या **इदंतया** अनित्यादि-अग्निस्वभावकार्यतया **नेदंतया वा** नित्यअनग्निस्वभावकार्यतया **अनवस्थापयितुकामस्य** लोकस्य **तर्कः परं** प्रकृष्टं **शरणम्** । किंभूतः ? **अन्यथा** साध्याभाव [अभावः] स **विषयो** यस्य स तथोक्तः । इदमुक्तं
/ms भवति— अनभिमतपरिहारेण अभिमतं तत्त्वम् अनवयवेन व्यवस्थापयितुमिच्छता अनुमानमेष्टव्यम् । *तदप्यभ्युपगच्छता लिङ्गं साध्याविनाभावनियमैकलक्षणम् तन्निश्चय स च तर्कात् नान्यतः इति तर्कमभ्युपगम्य निषेधतो द्विष्टकामितेति । § 1798

362/mkj यत्पुनरुक्तम्--स्वतोपि वानर्थक्यं तदन्यस्य अन्यतः सिद्धेरिति; तत्राह--**नापरम् इति** तर्कादन्यदपरम् अध्यक्षादि कृतविचारं **न शरणम्** इत्यनुवर्त्तते । कुतः स एव शरणम् ? इत्याह--**सर्व** इत्यादि । प्रकृतं निगमयन्नाह--**तत** इत्यादि । यत एवं **ततः शब्दविकल्पयोः** शब्दविकल्पाभ्यां ***तत्त्वसाधनम् अलङ्घ्यशासनम् प्रचण्डभूपतेर्यदलङ्घ्यं** शासनम् आज्ञापनं **वा** तदिव इति । § 1799

ननु तर्कविकल्पप्रस्तावे किमर्थमप्रस्तुतशब्दग्रहणमिति चेत् ? उच्यते--**वचनस्यापि** इत्याद्यभिधानादस्यापि प्रस्तावात् । § 1800

ननु तयोरर्थे प्रतिबन्धद्वयस्याभावात् कथं तद्विषयत्वमिति चेत् ? अत्राह--**योग्य** इत्यादि । § 1801

…24 योग्यः शब्दो विकल्पो वा सर्वः सर्वत्र चेत्स्वतः ।
मिथ्यात्वं परतस्तस्य चक्षुरादिधियामिव ॥ २४
॥§ 1803

३ तेन] तर्केण ।
४ तेति] सिद्धेरिति
८ व] व्यव
११ *] अनुमानमपि ।
१२ च] तन्निश्चयश्च
१४ तोपि] सतोऽपि
१४ स्य] तदर्थस्य
१६ स] तर्कः ।
१८ *] परमार्थसद्वस्तु ।
२० श] शब्दविकल्पयोः इत्यत्र शब्दग्रहणम् ।
२१ स्यापि] शब्दस्यापि ।
२२ नु] शब्दविकल्पयोः ।
२२ प्र] तादात्म्यतदुत्पत्तिलक्षण ।
२५ क्षुरादिधियामिव] यद्येवं शास्त्रकारेण कथमन्यत्र प्रतिपादितम्--योग्यः शब्दो...--न्यायवि॰ वि॰ द्वि॰ पृ॰ ३२१ ।

...25 शब्दानां चेत्स्वतोऽतत्त्वं न प्रयत्नैरपि शक्यते ।
प्रत्यक्षस्य साध्यत्वात् कुतस्तत्त्वव्यवस्थितिः ॥ २५
‖§ 1805

**योग्यः** समर्थः प्रत्यक्षवत् तयोस्तत्र योग्यतासम्बन्धो नान्यः इति तन्निषेधेऽपि न दोष इति भावः । कः ? इत्याह--**शब्दो विकल्पो वा** । किं कश्चित् ? न इत्याह--**सर्वः** । कुतः ? **स्वतः** स्वमाहात्म्यात् । किंच अर्थे किंभूते ? **सर्वत्र** सर्वस्मिन् । **चेत्** शब्दः निपातत्वादवधारणार्थः सर्वत्रैव इति । तन्न युक्तम्--**तयोः नियमार्थयोग्यतायां धूमादिवत् पुरुषेच्छावशादर्थान्तरे वृत्तिर्न स्यात्** इति; तत्रापि तद्योग्यत्वात् । युगपत् ततः सर्वार्थप्रतिपत्तिः इति चेत्; न; एकत्र अपरेण क्षयोपशमस्य अन्यत्र सङ्केतस्य अनियतस्यापेक्षणात् । स्वयं योग्यस्य किं तेन ? इत्यपि वार्तम्; /ms अयोग्यस्य नितरां किं तेन ? न हि सिकताः पीडनमपेक्ष्य तैलोपादानमिति । नन्वेवमर्थाभावे तदप्रवृत्तिः; इत्यत्राह--**मिथ्यात्वम्** इत्यादि । [मिथ्यात्वं] स्वार्थस्यान्यथा विषयीकरणम् शब्दस्य विकल्पस्य च इति विभक्तिपरिणामेन सम्बन्धः । कुतः ? इत्याह--**परतः** *कस्यचित् कर्मणः, अन्यस्य मिथ्याज्ञानात् । तदुक्तम्-- § 1806

*विज्ञानगुणदोषाभ्यां वाग्वृत्तेर्गुणदोषता । प्रमाणसं० २ । १६
इति ।§ 1807

किं स्ये ति कि त्याह--**चक्षुरादिधियाम् [इव]** इति । **प्रसर** * **मिदं चित्तं प्रकृत्या** प्र० वा० १ । २१० *इति वचनात् आसां स्वार्थे सतो * योग्यानां परतः तिमिरादेः यथान्वत् तथा [प्र]कृतस्यापि इति । § 1808
363/mkj

ननु शब्दः स्वार्थे योग्यो ज्ञानकार्यजननादवसीयते, तच्च सङ्केताद् इति । कुतस्तदवसाय इति चेत् ? अत्राह--**शब्दानां पूर्वं** जात्यपेक्षया एकवचनम्, अत्र व्यक्त्यपेक्षया बहुवचनम् । **स्वतः** स्वरूपतः **तत्त्वं** प्रतिपादनयोग्यत्वे न

४ त] तादात्म्यदुत्पत्त्यभावेऽपि ।
७ योः] शब्दविकल्पयोः ।
९ त्र] विकल्पे ।
९ रेण] जैनेन ।
९ स्य] शब्दे ।
१२ र्थाभावे] शब्दविकल्पयोः ।
१४ *] विकल्पस्य ।
१४ क] ज्ञानावरणकर्मणः ।
१४ स्य] शब्दस्य ।
१६ ता] वाञ्छन्तो वा न वक्तारः शास्त्राणां मन्दबुद्धयः । इति शेषः ।
१७ कि] किमिव ? इ
१७ *] प्रभास्वर
१८ *] आगन्तवो मलाः । इत्युत्तरार्धम् ।
१८ नात्] बुद्धीनाम् ।
१८ *] स्वतो
१९ त्] [[मिथ्यात्वम् ।]]न्यत्वं
१९ स्यापि] शब्दस्यापि ।
२२ त्त्वं] अतत्त्वं
२२ त्वे] त्वं

चेत् शब्दः पराभिप्रायद्योतने । **प्रयत्नैरपि** समयकरणैरपि **न शक्यते** कर्तुं तद्योग्यत्वम् । बहुवचने, न केवलम् एकेन द्वाभ्यां वा अपि तु बहुभिरपि इति दर्शयति । तथाहि--यो यत्र स्वतोऽयोग्यः स तत्र प्रयत्नैरपि तथा न भवति यथा सिकतादिः तैले, स्वतोऽयोग्याश्च परस्य शब्दाः तत्त्वप्रतिपादने इति । शक्यते च तत्कर्तुं प्रयत्नैः, ततस्तैः स्वतो योग्याः, रूपादिप्रतिपत्तिविशेषस्य रूपादिशब्दान्वयदर्शनात् । तदुक्तम्--**विशेषं कुरुते हेतुः विस्रसा परिणामिनाम्** । इति मन्यते । § 1809

/ms तदनेन [एतत्] निरस्तम्; **कार्यदर्शनाद् योग्यता अनुमीयते,योग्यतातः कार्यम् [इति] अन्योऽन्यसंश्रयात्** इति । कथम् ? योग्यतातः तत्र कार्यप्रतिपत्तेरनभ्युपगमात्, तत्कार्यस्य प्रत्यक्षत्वात् । केवलं तत्कार्यं किं तादात्म्यादिप्रतिबन्धात् उत अन्यत इति विचारो योग्यतात इति ब्रूमः, तस्या विचारसहत्वादि [ति] स्यात्, तद्भावे **कुतः तत्त्वस्य** स्वलक्षणस्य [व्यवस्थितिः] व्यवस्थानम् ? कुतश्चिदन्यस्य तद्व्यवस्थाहेतोः अभावादिति मन्यते । अविकल्पकप्रत्यक्षादिति चेत्; अत्राह--**प्रत्यक्षस्य** सविकल्प [स्य] बौद्धं प्रति विपक्षत्वाद् अविकल्पकस्य इति गम्यते । **साध्योऽप्रसिद्धः साध्यमप्रसिद्धम्** न्यायवि० श्लो० १७२ इति वचनात्, विषयो निरंशक्षणिकज्ञानरूपादिलक्षणो यस्य, *अन्यस्य विकल्पविषयत्वात् तत्तथोक्तं तस्या [स्य] भावात् तथा तत्कुतः तद्व्यवस्था । यदि वा, साध्यं च तदद्वयं बुद्ध्यात्मनः पुरुषवद् अप्रसिद्धत्वात् विषयस्य स्वपराव्यवस्थापकत्वेन जडघटाविशेषात् तस्य भावात् तत्त्वादिति ग्राह्यम् । § 1810

स्यान्मतम्--तत्त्वतः सविकल्पस्य इतरस्य वा क्वचित् प्रमाणेन इष्टम् अतस्तदभावो नाद्वैतवादिनो दोषाय, तत्त्वाव्यवस्था वा । यत्तु इष्टं तद् व्यवहारेण **प्रामाण्यं व्यवहारेण** प्र० वा० १ । ६ इत्यभिधानात् इति वचनात् इति; तत्राह--**तत्त्व** इत्यादि । § 1811

...26 तत्त्ववित्त्या विना वेत्ति जगत्तत्त्वं क्षणक्षयम् ।
वक्ति वागगोचरं हेतुं साधयेत्किमसाधनैः ॥ २६ ॥§ 1813

---

२ ब] प्रयत्नैरपि इत्यत्र ।
४ स्य] बौद्धस्य ।
५ स्तैः] स्ते
७ इति] अत एवोक्तम्--विशेषं कुरुते हेतुः विस्रसा परिणामिनाम् । मुद्गरादिर्घटादीनामा न्वयव्यतिरेकवान् ॥ इति ॥--न्यायवि० वि० प्र० पृ० ६२ ।
१० त्कार्यं] र्यं
१२ त] योग्यताया ।
१२ द्भावे] तदभावे
१७ *] सामान्यस्य ।
२१ स्य] निर्विकल्पस्य ।
२१ माणेन] णत्वन्न
२३ भिधानात्] इतिवचनात् इति पुनरुक्तम् ।

निर्विषयं मिथ्याज्ञानम् अध्यक्षमनुमानं च स्थूलैकाकारगोचरं व्यवहारेण प्रमाणीकृत्य तत्त्वं व्यावर्णयितुमिच्छति प्रतिबन्धादिविकल्पस्य सर्वस्यैव असमीक्षित [तत्त्वार्थेन] अतिशयाभावात् परमार्थावताराय लोकप्रतीतिं न प्रमाणं समाश्रयति । तत्प्रमाणत्वे क्षणक्षयादेः बाधनम् । तदप्रमाणस्य कुतश्चित् परमार्थसाधनत्वे अन्यत्रापि प्रमाणान्वेषणं कैमर्थक्यं प्रतिपद्यते ? साकल्येन तत्त्वावताराय प्रतिबन्धः...। वक्त्र[भिप्रायसूचकैः] शब्दैः परं तत्त्वसाध- 364/mkj नं प्रतिपिपादयिषति साधनैः किं पुनस्तत्त्वं न साधयेत् यतस्तेन वादी निगृह्यते । न च प्रत्यक्षबुद्धिः स्वलक्षणं यथालक्षणं प्रसाधयति, स्थूलस्यैकस्य अनेकावयवरूपादिसाधारणस्य अतद्रूपपरावृत्तवस्तुमात्रस्य च तत्र प्रतिभासनात् । तदसाधारणस्य संवेदनाभ्युपगमे विकल्पस्यापि तदङ्गीकरणमशक्यनिषेधम् ? तथा सति संवेदनाद्वैताय साधनादिव्यवहाराय च दत्तो जलाञ्जलिः । विकल्पाविकल्पयोः प्रतीत्यभावाविशेषात् । न च प्रतिभासभेदमात्रं बुद्धीनामेकविषयत्वेन विरुद्धम् । § 1814

अस्यायमर्थः--निरंशाः क्षणिका ज्ञानज्ञेयपरमाणवः तथाविधा बहिरर्थशून्या विज्ञानसन्ततयः सर्वाः सर्वथा भ्रान्ताः, सर्वविकल्पातीतं प्रतिभासमात्रं सूकलशून्यतित्वं **तत्त्वम्** इति दर्शनभेदः तस्य **वित्तिः** याथात्म्येन ग्रहणं तया **विना** तामन्तरेण विकल्पानाम् अतत्त्वविषयत्वाद् **वेत्ति** जानाति सौगतः । /ms किम् ? इत्याह--**जगत्तत्त्वम्** जगतः स्वरूपम् । किंभूतम् ? **[क्षण] क्षयम्** । उपलक्षणमेतत् [तेन] विज्ञानसन्ततिमात्रम् भ्रान्तिमात्रम् सकलविकल्पविकलप्रतिभासमात्रम् शून्यमात्रम्, अनेन परस्य पूर्वापराभ्युपगमविरोधं दर्शयति । तथाहि--यदि जगत्तत्त्वं तथाविधं वेत्ति कथं तत्त्ववित्तिः परमार्थतो नास्ति यतः **प्रामाण्यं व्यवहारेण** प्र० वा० १ । ६ इति ब्रूयात् ? अथ नास्ति; कथं विद्यात् तदिति ? **संप्रति त्त्वेव व विरोधवत्** इत्यादिना **वक्ति** कथयति । कम् ? **हेतुम्** । अन्यथा कुतः परार्थानुमानम् । पूर्वस्यानन्तरमस्य वचनम् जगतः क्षणक्षयप्रतिपत्तिमभ्युपगमयति इदं दूषणमिति प्रतिपादनार्थं नान्यथा । किंभूतम् ? इत्याह--**वागगोचरम्** वाचो गोचरो यो न भवति तम् इति, स्वयमेव वचनागोचरं हेतुं वदति तत्प्रतिपादनार्थं च वाक्यम् उपन्यस्यति इति स्ववचनविरोध इति मन्यते । § 1815

ननु व्यवहारेण तत्त्ववित्तिर सि हेतुश्च वाग्गोचरो न तत्त्वतः इति चेत्; अत्राह— **साधयेत् किं** न किञ्चित् । कैः ? **असाधनैः** । परमार्थतः साधनानि यानि न भवन्ति तैः इति, स्वयमसाधनेभ्यो व्यवहारिणा साधनत्वेनोपगतेभ्यः अन्यस्य तत्त्वसिद्धौ सौगतेन उपगतेभ्यो वित्य त्वादिभ्यः सुखादौ सांख्यस्य तत्त्वतोऽचेतनत्वसिद्धिः स्यादिति मन्यते । § 1816

१६ तित्वं] न्यात्मकम्
२१ त्त्वं] विज्ञानसन्तत्यादिरूपम् ।
२३ व] ष्टेत्
२९ सि] स्ति
२९ रो] व्यवहारेण ।
३२ वित्य] अनित्य

यत्पुनरत्रोक्तम्--*याद‍ृशो यक्षः ताद‍ृशो बलिः याद‍ृशानि साधनानि ताद‍ृशमेव तत् साध्यम् इति; तदनेन निरस्तम्; परमार्थसाधनाभावे /ms याद‍ृशताद‍ृशप्रतिपत्तेरयोगादिति । § 1817

कारिकां विवृण्वन्नाह--**निर्विषयम्** इत्यादि । विषयान्निष्क्रान्तम् निरस्तविषयं वा **मिथ्याज्ञानम् अनुमानम् अध्यक्षं च स्थूलैकाकारगोचरं व्यवहारेण प्रमाणीकृत्य** स्वयमप्रमाणं प्रमाणयता भ्य **तत्त्वं व्यावर्णयितुं** व्यवस्थापयितुम् **इच्छति** सौगतः । न च तद्व्यवस्था, मरीचिकाजलज्ञानात् सत्यजलव्यव- 365/mkj स्थावदिति मन्यते । स्योदतत्--माभूत् प्रत्यक्षात् तदा कारगोचरात् तद्व्यवस्था अनुमानात् स्यात् परम्परया तत्प्रतिबद्धात् **भ्रान्तिरपि सम्बन्धतः प्रमा** *इति वचनादिति; तत्राह--**प्रतिबन्धादि** इत्यादि । लिङ्गलिङ्गिनोः अविना **प्रतिबन्धः आदिर्यस्य** पक्षधर्मत्वादेः तस्य **यो विकल्पः** तद्ग्राही निश्चयः, अविकल्पस्य प्रवृत्तेः स्वयमविष[ये तद]योगात् । नहि इदमतो जातम्, अयमस्य स्वभावो अस्य इति व्यापारो *तत्सामर्थ्यम्; कारणादिपरमाणुदर्शनव्यापारस्य परं प्रत्यसिद्धेः । तस्य **तिशयाभावाद्** अनुमानाद् भेदाभावात् । केन ? इत्याह--**असमीक्षित** इत्यादि । किं कस्य ? न; इत्याह **सर्वस्यैव** । एवमुक्तं भवति--प्रतिबन्धादिविकल्पस्य मिथ्यात्वे अनुमानस्य नि पारम्पर्येणापि न प्रतिबन्धः इति न युक्तम् **लिङ्गलिङ्गिधियोरेवम्** प्र० वा० २ । ८२ *इत्यादि, **मणिप्रदीपप्रभयोर्मणिबुद्ध्या** प्र० वा० २ । ५७ इत्यादि च । § 1818

यदि पुनरेतन्मतम्--न परमाणुदर्शनम् अग्निधूमयोः वृक्षशिंशपयोः, *धूमपर्वतस्य दर्शनम्, अपि तु स्थूलैकत्वदर्शनमेव लोकस्य तत्रैव प्रमाणादिव्यवहारात् इति, तदप्रमाणं [प्रमाण] भवतः स्यात् ? प्रथमपक्षे दोषमाह-- /ms **लोक** इत्यादि । **लोकप्रतीतिं** स्थूलैकाकारसंवित्तिम किंभूता **न प्रमाणं समाश्रयति** । किमर्थम् ? इत्याह--**परमार्थावत** इति । द्वितीयेऽप्याह--**तत्प्रमाणत्वे, क्षणक्षयादेः** आदिशब्देन निरंशत्वादिपरिग्रहः । **मणाव** * क्रमेणापि एकस्य अनेकाकारसिद्धेः सविकल्पकं प्रमाणं स्यादि भावः । परमार्थावताराय तामप्रमाणं समाश्रयतः को दोषः ? इत्यत्राह--**तदप्रमाणस्य** इत्यादि । वा चासौ लोकप्रतीतिः अप्रमाणं च तदप्रमाणं तस्य **परमार्थसाधनत्वे** अभ्युपगम्यमाने **कुचत्** तत एव लोकव्यवहारमिथ्यादेः **अन्यत्रापि**

---

१ *] अद्वैतेऽपि कथं वृत्तिरिति चोद्यं निराकृतम् । यथा बलिस्तथा यक्ष इति किं केन संगतम् ॥--प्र० वार्तिकाल० पृ० २९३ ।

६ भ्य] अन्य

८ क्षात्] स्थूलैकाकारविषयात् ।

९ *] द्रष्टव्यम्--पृ० ८२ टि० ४ ।

१३ व्यापारो] रे

१३ *] निर्विकल्पकप्रत्यक्षसाम ।

१३ स्य] जैनादिकं ।

१७ *] पारम्पर्येण वस्तुनि । प्रतिबन्धात् तदाभा योरप्यवञ्चनम् । इति शेषः ।

१८ इ] अभिधावतोः ।

मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ।त शेषः ।

१९ *] एवं सति धूमपर्वतयोः अदर्शनं स्यादिति भावः ।

२० त] स्थूलैकत्वदर्शन एव ।

२२ किंभूता] ताम् ?

२४ *] बाधनम्, अक्रमवत्

२६ ताराय] लोतीतिम् ।

नित्यत्रापि नित्यत्वादावपि **प्रमाणान्वेषणं कमर्थक्यं प्रतिपद्यते** प्रमाणमन्तरेण अन्यस्यापि सिद्धेरिति । एतदेव दर्शयन्नाह--**साकल्ये** इत्यादि । **तत्त्वावताराय** आत्मेश्वरादितत्त्वप्रवेशार्थम् अप्रमाणं सार्थकम् * छरीरम् इत्यादि, विमत्यधिकरणभावापन्नं तन्वादि बुद्धिमत्कारणम् इत्यादि वा अनुमानम् । मिथ्याज्ञानाद् अनुमानान्न क्षणक्षयादिसिद्धिः । अग्निरत्र [इत्यनु]मानात् कथमरिति ? तथा परेणाप्युच्यते--ततो मिथ्याज्ञानाद् आत्माद्य सिद्धौ कथं क्षणक्षयादिसिद्धिरिति नु यथा लोकतः क्षणक्षयादौ सत्त्वादिप्रतिबन्धसिद्धिः नैवम् आत्मादौ प्राणादिमत्त्वादेः चेत्; उक्तमत्र--**प्रतिबन्धे**त्यादि । § 1819

अपरमप्युच्यते--**शब्दैः** इत्यादि । **तत्त्वस्य** क्षणक्षयादेः सम्बन्धि **साधनं** लिङ्गं **तपिपादयिपति परं** प्रति । कैः ? इत्याह **शब्दैः** । किंभूतैः ? इत्याह--**वक्त्र** इत्यादि । प्रतिबद्धैरिति भावः । **किं पुनः तत्त्वं न साधयेत् ?** साधयेदेव । कैः ? इत्याह--**असाधनै** * * साध्या [प्रतिबद्धैः] प्राणादिमत्त्वादिभिः /ms, 366/mkj
**यतो** [ऽ]साधनैः तत्त्वसाधनं **तेन निगृह्येत वादी** । **यत** इति वा आक्षेपे नैव इति । § 1820

ननु अनुमानानुमेययोरभावात् सन्ति च क्रमात् तस्य हेतुत्वादिप्रभेदविकलस्य भावात् तस्य स्वसंवेदनाध्यक्षतः सिद्धेः नायं दोषः इत्यपरः । तंप्रति आह--**न च** इत्यादि । § 1821

स्यान्मतम्--एतत् **प्रतिबन्धादि** इत्यादिना उक्तमिति किमर्थं पुनरुच्यते इति चेत् ? सत्यमुक्तम्, तथापि-- § 1822

*द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ माध्यमिकका॰
२४ । ८§ 1824

इति वचनात् लोकसंवृतिसत्यापेक्षया तदुक्तम्, प्रतिभासाद्वैतपरमार्थसत्यापेक्षया इदमुच्यते--**न च** नैव **प्रत्यक्षबुद्धिः** स्वसंवेदनाध्यक्षं **स्वलक्षणं** स्वस्वरूपं **प्रसाधयति** संशयादिरहितं व्यवस्थापयति । किं मनागपि न ? इत्याह--**यथालक्षणं** यत् तस्य परेण ग्राह्यग्राहकाकारसंवित्तिरहिततया अविभागलक्षणमुच्यते तदनतिक्रमेण । कुतः ? इत्यत्राह--**स्थूलस्यैकस्य** इत्यादि । तात्पर्यमिदमत्र--नीलादेः शरीरसुखादिनीलादिव्यतिरिक्तस्य ग्राहकस्याभावात्, अवभासमानस्य स्वतः ज्ञानात्मकत्वमिति परः, तस्य **स्थूलैकस्य अनेकावयवरूपादिसाधारणस्य** केवलं **तत्र** प्रत्यक्षबुद्धौ **प्रतिभासनात्** । § 1825

---

१ त्रापि] नित्यत्रापि इति व्यर्थम् ।
२ रेण] नैयायिकादेरपि नित्यतत्त्वसिद्धिः स्यात् ।
३ *] सात्मकं
७ सिद्धिः] अविव ।
१२ *] सम्बन्धादौ ।
१२ *] प्रतिबन्धादिविकल्पस्य ।
१६ भावात्] ?
२५ रेण] विज्ञानाद्वैतवादिना ।
२८ स्य] नीलादेः ।

तस्यान्मथाव भासन्ते तथा तदद्वयं निरंशं भावेऽपि क्रमवद् भासत इति । तदुक्तम्-- § 1826

*मन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः प्र° वा° २ । ३५५ इत्यादि ।§ 1827

*[दूरे] यथा वा मरुषु महानल्पोऽपि भासते । प्र° वा° २ । ३५६ इत्यादि § 1828

/ms **अविभागोऽपि**प्र° वा° २ । ३५४ इत्यादि चेति । तत्राह--**अतद्रूपपरावृत्तवस्तुमात्रं च** तस्य स्थूलैकस्य तत्र प्रतिभासनात् । एतदुक्तं भवति--यदा परपरिकल्पि[त] तत्त्वं तदवभासात् पूर्वं पश्चाद्वा प्रमाणतः सिद्धं भवति यथा गजादिप्रतिभासात् मूछ लादयः तदा तत्तथा प्रतिभासत इति युक्तम् । न चैवम्, आबोधिमार्ग घहारात् तस्यैव प्रतिभासनात् । तथापि तस्यैव प्रतिभासोपगमो न किञ्चित् स्वरूपेण प्रतिगतं स्यात्, कदाचित्तत्रापि अन्यस्य तथावभासकल्पनादिति । § 1829

ननु अस्थूलापेक्षया स्थूलम् अनेकापेक्षया च एकः कल्प्यते । न च अपेक्षया पारमार्थिका धर्मा भवन्ति; अतिप्रसङ्गात् । न स्थूलस्यैकस्य प्रत्यक्षबुद्धौ प्रतिभासनम् अपि तु विकल्पे, तत्र ज्ञानपरमाण्वभासनमिति चेत्; अत्राह--**तदसाधारण** इत्यादि । **तस्य** परकीयस्य **असाधारणस्य** सर्वतो व्यावृत्तस्य **संवेदनाभ्युपगमे** । किम् ? इत्याह--**विकल्पस्यापि** न
367/mkj केवलमध्यक्षस्य **तद ङ्गीकरणं** स्वपरासाधारणसंवेदनाङ्गीकरणम् **अशक्यनिषेधम्** अङ्गीकरणस्य इच्छातोऽविशेषात् । स **तथा सति संवेदनाद्वैताय साधनादिव्यवहाराय च दत्तो जलाञ्जलिः** तस्य कल्पितसामान्यगोचरत्वादिति । § 1830

अथ मतम्--विकल्पात् तत्प्रतिभासाभावान्न तदङ्गीकरणमिति; तत्राह--**प्रतीत्य** इत्यादि । **विकल्पाऽविकल्पयोः** योऽयम् असाधारण **प्रतीत्यभावः** तस्य **अविशेषात्** । एवं सति प्रत्यक्षबुद्धौ असाधारणप्रतीत्यभावे **यदवभासते**
/ms **तज्ज्ञानम्** इत्यादौ **यद् यथावभासते** इत्यादौ च धर्मिप्रभृति सर्वमसिद्धम् । तत्र तत्प्रतीत्यभ्युपगमे विकल्पेऽपि स्वपरयोः तथाविधयोः प्रतीतिरिति ।

१ न्ते] स्यान्मतम्--यद् यथावभासते
३ इ] अन्यथैवावभासन्ते तद्रूपरहिता अपि इति शेषः ।
४ इ] तथैवादर्शनात् तेषामनुपप्लुतचेतसाम् इति पूर्वार्द्धम् ।
५ इ] बुद्ध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते । इति शेषः ।
८ मूछ] मृच्छक
९ हारात्] र्गं व्यवहारात्
१० मो] मे
१४ त्र] प्रत्यक्षे ।
२२ ण] णं
२३ अ] असाधारणसंवेदनप्रतीत्यभावे ।
२५ त] प्रत्यक्षबुद्धौ ।

* । प्रथमे; अनैकान्तिको हेतुः । परत्र; असिद्धः । एकस्य स्वपरयोरिव पूर्वापरयोरपि ग्रहणमविरुद्धमिति । ततः स्थितम्--**तत्त्ववित्त्या विना** इत्यादि । § 1831

ननु च सिद्धि § 1832

शब्देनाभ्यामनाक्षस्व बुद्धावप्रतिभासनात् ।
अर्थस्य तद्दृष्टाविव तदनिर्दिष्टस्य वेदकम् ॥ इति ।§ 1834

तत्कथमुच्यते--**वक्तुं वाग्गोचरं** हेतुम् इति **योग्यः शब्दः [विकल्पो वा] सर्वः सर्वत्र** इति वेति चेत्; अत्राह--**नच** इत्यादि । **नच** नैव **प्रतिभासभेदमात्रम्** । कासाम् ? **बुद्धीनाम् एकविषयत्वेन विरुद्धम्** एकविषयत्वेऽपि तन्मात्रस्य संभवात्, विशिष्टस्तु तद्भेदः तेन्न विरुद्ध्यते इति मात्रशब्देन दर्शयति । § 1835

तदेव सदृष्टान्तं दर्शयन्नाह--**दूरासन्नादि** इत्यादि । § 1836

...24 दूरासन्नादिसामग्रीप्रत्यक्षैकार्थसंविदाम् ।
प्रतिभासो यथा भिन्नः प्रत्यक्षेतरयोस्तथा ॥ २४
॥§ 1838

चक्षुरादिज्ञानमेकत्र प्रतिभासभेदमनुभवद् यदीष्यते; प्रत्यक्षादीनां सामग्रीभेदात् प्रतिभासभेदेऽपि एकविषयत्वं कथन्न स्यात् ? विकल्पस्य अतस्मिंस्तद्ग्रहान्निर्विषयत्वं वदन् हतस्त्वम् असाधनाङ्गवचनात् । सम्बन्धस्य एकान्तेन अतत्त्वरूपत्वात् । यथादर्शनं च तत्त्वम्; अन्यथा तत्त्वानुपपत्त्या अनेकान्तसिद्धिः । कथम् ? तल्लक्षणसिद्धिरन्यानपेक्षणमनन्तरं वक्ष्यामः । § 1839

**दूरासन्नशब्दौ** भावप्रधानौ, तेन दूरत्वम् आसन्नत्वम् **आदिर्यासाम्** । **आदिशब्देन** दूरतरत्व+आसन्नतरत्वादिपरिग्रहः, अथवा मन्दलोचनत्वादि[परि]ग्रहः, ता तथोक्तेः **सामग्र्यो** यामां ता अपि तथा ताश्च ताः **प्रत्यक्षाश्च** पुनरपि ता **एकार्थ संविदश्च** तासां **प्रतिभासो यथा** येन विशदेतरप्रकारेण 368/mkj
**भिन्नः प्रत्यक्षेतरयोः** इन्द्रियशब्दज्ञानयोः **तथा प्रतिभासो** भिन्नः इत्यनुवर्त्तते । § 1840

---

१ *] प्रतीतिरस्ति न वेति
१ हेतुः] विकल्पविषयस्य परमार्थत्वसिद्धेः ।
४ सिद्धि] ?
५ स्व] नाव्यापृताक्षस्य
६ इति] श्लोकोऽयम् अपोहसिद्धौ पृ° ६ यच्छास्त्वम् इति कृत्वा समुद्धृतः । सन्मति° टी° पृ° २६० ।
७ रं] वक्ति वागगोचरं
८ वेति] चेति
१० द्भेदः] प्रतिभासभेदः ।
१० तेन्न] तेन
२३ थोक्तेः] तास्तथोक्ताः
२३ यामां] यासां

कारिकां विवृण्वन्नाह--**चक्षुरादि** इत्यादि । **चक्षुरादिर्यस्य** घ्राणादेः तस्य **ज्ञानम् एकत्र** ग्राह्ये **प्रतिभासभेदं** विशदेतरनिर्भासातिशयम् **अनुभवद् यदीष्यते** सौगतेन । कुतः ? **सामग्रीभेदात्** । **कथं न स्यात्** स्यादेव । किम् /ms ? इत्याह--**एकविषयत्वम्** । कासाम् ? इत्याह--**प्रत्यादि** * । कस्मिन्नपि ? इत्याह--प्रतिभासभेदेऽपि । ततो निराकृतमेतत्— **यौ भिन्नप्रतिभासौ प्रत्ययौ न भावेक विषयौ यथा रूपरसप्रत्ययौ, भिन्नप्रतिभासौ च शाब्द-इन्द्रियप्रत्ययौ** । तथा **यौ एकविषयौ तौ न भिन्नप्रतिभासौ यथा सन्निहिते नीले पुरुषद्वयस्य तत्प्रत्ययौ, एकविषयौ न परस्य प्रकृत अव्ययौ** । इति; कथम् ? एकविषयत्वेऽपि मन्देतरचक्षुषोः प्रत्ययप्रतिभासातिशयोपगमेन व्यभिचारात् । § 1841

यस्त्वाह--प्र ज्ञा क रः **तद्विषयस्य परं प्रति असिद्धेः तत्रापि अविशदनिर्भासस्य एकविषयत्वाभावाद् अन्यत्वा तदभावात् सामग्रीभेदात् तद्भावोऽखण्डैकविषयत्वेऽपि चक्षुरादिबुद्धीनां रूपादिप्रतिभासभेदः सामग्रीविशेषात् इति स्यात्** इति; स न प्रेक्षावान्; यतः अविशदनिर्भासिनो विज्ञानाद् द्वंद्व सौगतानामर्थे प्रवृत्त्यभावप्रसङ्गः । नहि निर्विषयतां जानन्नेव जातस्य त नः प्रेक्षाकारी प्रवर्त्तते, सर्वत्र प्रमाणपरीक्षाभावप्रसङ्गात् । प्रवर्त्तमाने च अविसंवादभाग् न भवेत् । भवति च, लिप्यादौ तद्व्यवहारदर्शनात् । **ममैवं प्रतिभासोऽयम्** प्र° वार्तिकाल° १ । १ *इत्याद्यनुमानाद् अविशदनिर्भासा[त्] तत्र ते प्रवर्त्तन्ते न इन्द्रियग्रामाद् इति महती काहलता ! पुनरपि अनुमाने अनवस्था । तन्न किञ्चिदे तत् । अथ स्वलक्षणविषयत्वाद् विशदेतरेन्द्रियज्ञानयोः एकविषयत्वमस्तु न प्रत्यक्षपरोक्षयोः, *अवस्तुसामान्यविषयत्वात् परोक्षस्येति; तदेवाह--**विकल्प** इत्यादि । /ms **अतस्मिन्न** [स्वलक्षणे तद्ग्रहात्] स्वलक्षण ग्रहात् **निर्विषयत्वम्** इत्येवं **वेदन् स हतो** निराकृतस्त्वं पूर्वमेवेति । कुतः ? इत्यत्राह--**असाधनाङ्ग** इत्यादि । एतदुक्तं भवति--यदा [अ] वस्तुसत्सामान्यविषयो विकल्पः तदा तत्प्रभवं वचनमपि तद्विषयमिति न परमार्थसाधनाङ्गविषयमिति **तदवचनात्** निगृहीतेः अर्हन्न हतस्त्वम् इति । विकल्पस्य परम्परया स्वलक्षणप्रतिबन्धात् तत्प्रभवस्य वचनस्यापि तत्र स इति चेत्; अत्राह--**सम्बन्धस्य** परस्पराविनाभावस्य **एकान्तेन** नियमेन [अतत्त्वरूपत्वात्] अतत्त्वं तदवस्तुरूपत्वात्

४ *] प्रत्यक्षेत्यादि
६ भावेक] तावेक
८ त] नीलप्रत्ययौ ।
८ न] च
८ यौ] प्रत्ययौ
९ क्षुषोः] पुरुषयोः ।
१२ त्वा] था
१५ द्वंद्व] ?
१६ नः] ?
१८ *] प्रतिभास एवम्भूतो यः स न संस्थानवर्जितः । एवमन्यत्र दृष्टत्वादनुमानं तथा च तत् ॥--प्र° वार्तिकाल° २ । ११ ।
२२ *] अवस्तु यत् सामान्यं तद्विषयत्वात् ।
२४ स] इत्येवं वदन्
२६ पि] अवस्तुविषयमिति ।
२७ न्न] न्
२८ न्धात्] विकल्पप्रभवस्य ।
२८ स्यापि] स्वलक्षणे ।
२८ स] सम्बन्धः ।

। परपरिकल्पितस्वलक्षणस्य कुतश्चिदसिद्धेः कथं तत्र साक्षादन्यथा वा कस्यचित् तत्त्वतः प्रति[बन्धो] भवेत् ? तदसिद्धो * किं तत्त्वमिति चेत् ? अत्राह--**तत्त्वम्** इत्यादि । दर्शनानतिक्रमेण **[यथा]दर्शनं** च स्थूलादेः इति भावः । ततः किं जातम् ? इत्याह--**अन्यथा** इत्यादि । **अन्यथा** अन्येन अने कान्तसिद्धेरभावप्रकारेण **तत्त्वस्य** या **अनुपपत्तिः** तया **अनेकान्तसिद्धिः** 369/mkj । अत्र परः पृच्छति सूरिम् **कथम्** इत्यादिना ? संपृष्ट आह--**तल्लक्षण** इत्यादि । **तस्य** हेतोः **लक्षणसिद्धिः अनन्तरं** वक्ष्यमाणप्रस्तावः तत्र, **अन्यस्य** पक्षधर्मत्वादेः **अनपेक्षणं वक्ष्यामः** इति । § 1842

तदेवं जल्पस्वरूपं निरूप्य अधुना सदसि तदुपन्यासप्रयोजनं दर्शयन्नाह--**स्याद्वादेन** इत्यादि । § 1843

...28 स्याद्वादेन समस्तवस्तुविषयेणैकान्तवादेष्व-
भिध्वस्तेष्वेकमुखीकृता मतिमतां नैयायिकी शेमुषी
।
तत्त्वार्थाभिनिवेशिनी निरुपमश्चारित्रमासादय-
न्त्यद्धाऽनन्तचतुष्टयस्य महतो हेतुर्विनिश्चीयते ॥ २८
॥§ 1847

**स्यात्** इति निपातः प्रशस्तार्थः । **स्याद्वादेन** च प्रशस्तजल्पेन । किंभूतेन ? **समस्तवस्तुविषयेण** समस्तेन संपूर्णेन वस्तुविषयेण ताद्विकेन वस्तु विषयो यस्य । किम् ? इत्याह--**अभिध्वस्तेषु** निराकृतेषु । केषु ? इत्याह--**एकान्तवादेषु** एकान्तसंबन्धि कथाभेदेषु । बहुवचनात् सकलकथाप्राप्तेः /ms । तेषु सत्सु किम् ? इत्याह--**एकमुखीकृता** अन्यकथाभ्यो विनिवर्त्त्य प्रशस्तजल्पनियता कृता च इत्याह--**सेमुखी** । किंभूता ? **नैयायिकी** न्यायनियुक्ता । केषाम् ? इत्याह--**मतिमतां** प्राज्ञानाम् । सा तथा कुतः ? इत्याह--**तत्त्व** इत्यादि । **तत्त्वार्थाभिनिवेशिन्येव** न्याययुक्ता भवति । किं कुर्वाणा ? इत्याह--**आसादयन्ती** । किम् ? **चारित्रम्** वादिप्रतिवादिपक्षयोः माध्यस्थ्यम्, अनुपममुपमम् द्राद्धदिति **हेतुर्लिङ्गं विनिश्चीयते** । सकलविप्रतिपत्तिमलविविक्ता व्यवस्थाप्यते । कस्य सम्बन्धि ? इत्याह--**अनन्तचतुष्टयस्य महत** इति । § 1848

१ त्र] स्वलक्षणे ।
२ *] द्धौ
६ रः] बद्धः ।
६ संपृष्ट] सः पृष्ट
९ सि] जल्पोपन्यास ।
१६ ताद्विकेन] सामस्त्येन
२० च] का ?
२० सेमुखी] शेमुषी
२४ म्] **निरुपमम्** अनुपमम्
२४ दिति] **अद्धा** झटिति
२५ विविक्ता] क्तं

ननु पावकादेरपि हेतुः विनिश्चेतव्यः; सत्यम्; तथापि प्रधाने कृतो यत्नः अन्यत्रापि भवति । अत एव उच्यते **महत** इति । § 1849

यदि वा प्रस्तोष्यमाणप्रस्तावपातनिकावृत्तमेतत् । *अस्य एवं प्रवेशः । हेतुवद् अनुमेयज्ञनेऽपि विवादभावात् तदपि विनिश्चीयताम्; इत्यत्राह--**स्याद्वादेन** अनेकान्तशासनेन **समस्तवसुविषयिणा उन्मिषितमपि अनेकान्तमन्तरेण न संभवति** इति वचनद् **एकान्तवादेषु** सौगतादिसमयेषु **अभिध्वस्तेषु एकमुखीकृता** अनेकान्ताभिमुखीकृत शेषं पूर्ववत् । अतः तस्य **हेतुरेव विनिश्चीयते** नानुमेयज्ञानमिति । § 1850

तत् हेतुवत् तद्वाक्येऽपि विवादवृत्तेः तदपि परैरिव भवद्भिरपि किन्न विनिश्चीयते इति चेत् ? न; अस्य अनन्तरं विचारितत्वात् । अत एव
/ms, 370/mkj परार्थानुमानावचनमिति । मार्गप्रभावनायाः किं फलमिति वा शङ्कते **स्याद्वादेन** इत्यादि । **नैयायिकी** प्रमाणप्रमेयन्यायनियुक्ता **शेमुषी** सम्यग्ज्ञानम् इति यावत् । **तत्त्वार्थाभिनिवेशिनी** तत्त्वार्थाभिरुचिसंप्रयुक्ता **निरुपमं चारित्रम्** पापक्रियानिवृत्तिम् । **आसादयन्ती** झटित्यद्वा ****अनन्तचतुष्टयस्य** अनन्तज्ञानादेः **महतो हेतुः** कारणम् तत्पलेति **विनिश्चीयते** । § 1851

इति र वि भ द्र पादोपजीवि अ न न्त वी र्य मु नि विरचितायां सि द्धि वि नि श्च य टी का यां जल्पसिद्धिः पञ्चमः प्रस्तावः । § 1852

# षष्ठः प्रस्तावः : ६ हेतुलक्षणसिद्धिः

371/mkj

अथ स्वैरेव विपश्चिद्भिः हेतोः विनिश्चितत्वात् इह पुनरपि किमर्थं विनिश्चीयते इति चेत्; अत्राह--**[हे] य** इत्यादि । § 1853

...1 हेयादेयविवेककाहलखलो बालः प्रलब्धाकुलः,
प्रायो नालमलं प्रबोद्धुममलालीढं पदं स्वामिनः ।
स्वीकुर्वन्मलिनीकरोति वितथैकान्तैर्न तत् केवलम्,
शपति क्रोशति साधुशासिन इति व्यक्तं विवेक्ष्यामहे
॥ १ ॥§ 1857

२ त्वः ] गौणेऽपि ।
३ *] वृत्तस्य ।
५ यिणा ] विषयेण
९ वृत्तेः ] हेतुवाक्यमपि ।
१४ *] त्यद्वा
१४ *] अनन्तज्ञानदर्शनसुखवीर्यलक्षणस्य ।
१५ लेति ] तत्तथेति

बाल इव स्वभाध्व स्वभावतो वैमुख्यात् परः सौगतादिः **बालः** अनेन सहजं मोहमस्य दर्शयति । किंभूतः ? इत्याह--**हेयम्** पक्षधर्मत्वादिकम् **आदेयम्** अन्यथानुपपन्नत्वं तयोः **विवेको** विवेचनम् मिथः पृथक्करणम् तत्र **काहलश्चासौ खलश्च स काहलः** * काहलकातः तद्विवेकक्लेशभीरुः । **खलः** शतः तद्विवेकम् अन्येन प्रतिपाद्यमानोऽपि स्वायम् अप्रतिपद्यमानःपूर्वः तेन **प्रायेण** बाहुल्येन **प्रलब्धो** वञ्चितश्चासौ **आकुलश्च** इत्यनेन आभिसंस्कारिकं दर्शयन्ति । स किम् ? इत्याह--**नालं** शक्तः **अलम्** अत्यर्थं मनाक् समर्थ इत्यर्थः **अविनाभावनियमाद्** हेतुबि॰ श्लो॰ १ इति वचनात् । किं कर्तुम् नालम् ? इत्यत्राह--**प्रबोद्धुं** ज्ञातुम् । किम् ? इत्याह--***पदम्** अधिकारात् हेतुं पद्यते गम्यते अनेन अनुमेयोऽर्थः इति /ms
व्युत्पत्तेः । § 1858

ननु सदोपं तत्, अतस्तदपरिज्ञानमदोषाय इति चेत्; अत्राह--**अमलालीढम्** अमलैः गणधरप्रभृतिभिः आलीढम् आस्वादितम् । नहि ते सदोषमालिहन्ति अमलत्वहानिः । कस्य तत् ? इत्यत्राह--स्वा मि नः पा त्र के श रि ण इत्येके । कुत एतत् ? तेन तद्विषय त्रि ल क्ष ण क द 372/mkj
र्थ न म् उत्तरभाष्यं यतः कृतमिति चेत्; नन्वेवं सी म न्ध र भ ट्टा र क स्य अशेषार्थसाक्षात्कारिणः तीर्थकरस्य स्यात् । तेन हि प्रथमम् § 1859

*अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ।
नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ॥§ 1861

---

१ स्व] स्वभावाध्व इति व्यर्थमत्र ।
२ स] नैसर्गिकं मिथ्यात्वम् ।
४ *] काहलखलः
४ कातः] कत्वतः
५ तः] खलत्व[[खलत्वात् ।]]तः
५ म्] स्वयम्
६ मानःपूर्वः] नपूर्वः
६ तेन] कारणेन ।
७ आभिसंस्कारिकं] परोपदेशजं मिथ्यात्वम् ।
८ इति] पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः । अविनाभावनियमात् हेत्वाभासास्ततोऽपरे ॥--हेतुबि॰ श्लो॰ १ । प्र॰ वा॰ ३ । ३ ।
१० *] तीर्थकरस्य ।
१४ हानिः] नेः
१५ इत्येके] व्याख्याकाराः । तुलना--नेदं स्वबुद्धिकल्पितम् अपि तु परागमसिद्धमित्युपदर्शयितुकामो भावत्सीमन्धरस्वामितार्थंकरदेवसमवसरणात् गणधरदेवप्रसादादासादितं देव्या पद्मावत्या यदानीय पात्रकेसरिस्वामिने समर्पितमन्यथानुपपत्तिवार्तिकं तदाह--अन्यथानुपपन्नत्वं...--न्यायवि॰ वि॰ द्वि॰ पृ॰ १७७ । हेतुलक्षणं वार्तिककारेणैवमुक्तम्--अन्यथानुपपन्नत्वं...--त॰ श्लो॰ पृ॰ २०५ । प्रमाणप॰ पृ॰ ७२ । जैनतर्कवा॰ पृ॰ १३५ । सूत्रकृ॰ टी॰ पृ॰ २२५ । प्र॰ मी॰ पृ॰ ४० । अन्यथेत्यादिना पात्रस्वामिमतमाशङ्कते...नान्यथानुपपन्नत्वं...अन्यथानुपपन्नत्वं...--सन्मति॰ टी॰ पृ॰ ५६० । न्यायदी॰ पृ॰ ३२ । तदुक्तं पात्रस्वामिना --अन्यथानुपपन्नत्वं...--स्या॰ रत्ना॰ पृ॰ ५२१ । अन्यथाऽसम्भवो ज्ञातो यत्र तत्र त्रयेण किम् ।— प्रमाणसं॰ पृ॰ १०४ । तदुक्तम्--अन्यथानुपपन्नत्वं...--प्र॰ वा॰ स्ववृ॰ टी॰ पृ॰ ९ ।
१५ तेन] पात्रकेशरिणा ।
१७ तेन] सीमन्धरेण ।

इत्येतत् कृतम् । कथमिदमवगम्यते इति चेत् ? पा त्र के श रि णा त्रि ल क्ष ण क दर्थ नं कृतमिति कथमवगम्यते इति समानम् ? आचार्यप्रसिद्धेः इत्यपि समानमुभयत्र । कथा च महती सुप्रसिद्धा । तस्य तत्कृतत्वे प्रमाणमाण्ये तत्प्रसिद्धौ कः समाश्वासः ? तदर्थं करणात् तस्येति चेत्; तर्हि सर्वं शास्त्रं तदवि[भि]धेयं च अत एव शिष्याणामेव न तत्कृतम् इति व्यपदिश्येत । पा त्र के स रि णोऽपि वा न भवेत्; तेनापि अन्यार्थं तत्करणात् तेनाप्यन्यार्थमिति न कस्यचित् स्यात् । § 1862

अनेन तद्विषयप्रबन्धकारणात् पा त्र के स रि णः तद् इति चिन्तित-म्; मूलसूत्रकारेण *कस्यचिद् व्यपदेशाभावप्रसङ्गात् । तस्मात् साकल्येन साक्षात्कृत्य उपदिशत एव अयं भगवतः तीर्थकरस्य हेतुः इति निश्चीयते । एतच्च अमलालीढत्वे कारणमुक्तम् । § 1863

ननु तेनापि तदङ्गीक्रियते साध्याभावे नियमेन साधनाभावस्योपगमात्, /ms तत् किमुच्यते बालं * **प्रबोद्धुमिति** ? अत्राह--**स्वीकुर्वन् बालः पदम्** इति च अनुवर्त्तते । **मलिनीकरोति** अमलं करोति । कैः ? इत्याह--**वितथैकान्तैः** पक्षधर्म एव सपक्षे सन्नेव इत्यादयो पि **तथा** मृषा **एकान्ताः** तैः इति । निर्मलं समलं विधाय प्रतिपद्यमानः तत्प्रतिपद्यते द्विचन्द्रदर्शी [व] चन्द्रम-समिति मन्यते । अनेन बालत्वं हेयादेयविवेककालविप्रलम्भत्वञ्चोपदर्शयति । § 1864

संप्रति तत्खलप्रलब्धाकुलतां दर्शयन्नाह--**न केवलम्** इत्यादि । **न केव-लं** तत् मलिनीकरोति किन्तु **क्रोशत्यपि** । कान् ? इत्यत्राह--**साधुशासिनः** दृष्टेष्टाविरुद्धप्रतिवचनप्रणेतॄन् । **स्वामिनः** इत्येतत् ज्ञात विभक्तिवचनप-रिणामम् इह संबध्यते । **एतेनैव यदह्रीकाः** प्र० वा० ३ । १८० इत्यादि वचनात् **शपति** इत्यवगम्यते । तत्खलविप्रलब्धाकुल एव तान् **शपति** नान्यः **इति** हेतोः **व्यक्तं** विशदं यथा भवति तत् पदं तथा **विवेक्ष्यामहे** । § 1865

किं तस्य पदं केन वाच्यं व्यक्तं करिष्यते इति ? अत्राह--**पक्ष** इत्यादि । § 1866

---

२ णा] एतन्नामकं शास्त्रम् ।
३ था] आराधनाकथाकोशे ।
३ स्य] अन्यथानुपपत्तिश्लोकस्य ।
४ त] सीमन्धरकृतत्वे ।
४ माण्ये] प्रमाणाभावे
४ सिद्धौ] पात्रकेशरिकृतमिति प्रसिद्धौ ।
४ त] पात्रकेशर्य्यर्थम् ।
६ अ] स्वशिष्यार्थम् ।
८ प्र] व्याख्यान ।
९ *] सूत्रस्य ।
१३ *] नालं
१५ था] वितथा
१७ काल] काहल
२१ ज्ञात] ज्ञात ता
२२ इ] किमप्ययुक्तमाकुलम् । प्रलपन्ति प्रतिक्षिप्तं तदप्येकान्तसंभवात् ॥ इति शेषः ।

...2 *पक्षधर्मस्तदंशेन व्याप्तोऽप्येति हेतुताम् ।
अन्यथानुपपन्नोऽयं न चेत्तर्केण लक्ष्यते ॥ २ ॥§ 1868

373/mkj

स्वार्थानुमाने जिज्ञासितविशेषो धर्मी पक्षः । परार्थानुमाने पुनः जिज्ञापयिषितविशेषः स्वनिश्चयवदन्येषां निश्चयोत्पादनाय पक्षपरिग्रहात् । सत्याश्च परस्य जिज्ञासायां तत्प्रतिपादयिषोः पक्षव्यपदेशो वक्त्रभिप्रायस्यैव प्रत्यासत्तेः परार्थव्यपदेशवत् । तादृशपक्षस्य निरुपचरितस्य धर्मः तदंशेन च व्याप्तः । निरुपचरितस्त्र तदंशः तद्धर्मस्तदेकदेश इति, पक्षशब्देन समुदायवचनात् । पक्षो धर्मीत्युपचारे तद्धर्मतापि न सिद्धा । नहि तत्र तद्धर्मः साधयितुमिष्टः तथा च सर्वः सर्वधर्मा स्यात् इच्छाया निरङ्कुशत्वात् । तदनिराकृतौ साधयितुमिष्टः तद्धर्मः इति सन्देहः स्यात्, अन्यथा हेतुवचनानर्थक्यात् । सन्दिग्धधर्मणः पक्षधर्मत्वे कथं तत्रोपचरितपक्षव्यपदेशः सन्दिग्धं धर्ममिच्छन् हेतोरसिद्धिमाशङ्केत ? यतोऽयं उपचारमाश्रयेत् । यदि पुनः उपचरितपक्षस्य धर्मिणः असन्दिग्धेन व्याप्तो हेतुः; शब्दस्य नित्यत्वे कृतकत्वादिरपि सत्त्वप्रमेयत्वादिना व्याप्तो हेतुः स्यात् न तद्धर्मिणा । न च स्वयमेकदेशोपचारवृत्तेः पुनः सर्वनाम्ना परामृश्य समुदायशब्दस्य समुदायवृत्तिरयुक्ता, यतः पक्षशब्देन समुदायस्यावचनात् धर्मिण एव वचनात् तदंशवत् तद्धर्मो न तदेकदेशः इति सूक्तं स्यात् यथा ग्रामस्य तदेकदेशस्थितोऽहमद्राक्षमिति । तदेतत् मुख्यशब्दार्थलङ्घनं गङ्गास्नानभयात् कर्कटीभक्षणन्यायमनुसरति तत्रैव दोषात् । व्याप्तिर्व्यापकस्य तत्र भाव एव व्याप्यस्य वा तत्रैव भावः; तत्र अन्यथानुपपत्तिरेव नान्यत् रूपम् । न चेत्; किं कस्य व्याप्यं व्यापकं च ? कारणं कार्यस्य स्वभावो भावस्य चेत्; क्षणिककारणस्य कार्यकालमप्राप्नुवतः कथं व्याप्तिर्नाम ? तत्स्वभावयोश्च भेदैकान्ते किं केन व्याप्यते ? व्यवहर्त्रभिप्रायवशात् तत्त्वमसमीक्ष्य तादात्म्यतदुत्पत्तिव्यवस्थायां स प्रमाणान्तरं प्रसज्येत अविसंवादकत्वात् । विसंवादित्वे तदाश्रयणमप्रेक्षाकारित्वं

१ *] तुलना--पक्षधर्मस्तदंशेन व्याप्तो हेतुः...--हेतुबि० श्लो० १ ।

३ स्वार्थानुमाने] अनुमेयोऽत्र जिज्ञासितविशेषो धर्मी ।--न्यायबि० २ । ८ ।

४ स्व] तुलना--नन्वाचार्यस्य पक्षवचनमभिमतमेव । यदाह--स्व निश्चयवदन्येषां निश्चयोत्पादनेच्छया । पक्षधर्मत्वसम्बन्धसाध्योक्तेरन्यवर्जनम् ॥--प्र० वार्तिकाल० पृ० ४८७ । स्वनिश्चयवदन्येषां निश्चयोत्पादनं बुधैः । परार्थं मानमाख्यातं वाक्यं तदुपचारतः ॥--न्यायावता० श्लो० १० ।

७ त] तदंशो हि तद्धर्म एव--हेतुबि० पृ० ५३ ।

७ प] पक्षो धर्मी अवयवे समुदायोपचारात्--हेतुबि० पृ० ५२ ।

१७ सू] तदा हि वक्तुरभिप्रायवशान्न तदेकदेशः तदंशः पक्षशब्देन समुदायावचनात् ।--प्र० वा० स्ववृ० पृ० १६ ।

१९ व्या] तस्य व्याप्तिर्हि व्यापकस्य तत्र भाव एव । व्याप्यस्य वा तत्रैव भावः ।--हेतुबि० पृ० ५३ ।

प्रकृतानुपयोगात् । तदेतस्मिन् प्रतिबन्धनियमे कथं चन्द्रादेरर्वाग्भागदर्शनात् परभागोऽनुमीयेत ? नानयोः कार्यकारणभावः सहैव भावात् । न च तादात्म्यम्; लक्षणभेदात् अलम् अन्यथानुपपत्तेरनवद्यमनुमानम् । किं पुनरन्यथोपपद्यते ? न वै भावाः पर्यनुयोगमर्हन्ति ? तादात्म्ये किं पुनः कारणं वृक्षस्वभावा शिंशपा, धूमोऽग्निकार्यमतिप्रसङ्गात् अत्रापि तदेवोत्तरम् । § 1869

अनेन हेतो रूपं तद्ग्राहकं प्रमाणम्, तदनभ्युपगमे तदा सतां च दर्शयति । **पक्षः** वक्ष्यमाणलक्षणः । **अपि** शब्दः प्रत्येकमभिसम्बध्यते । **धर्मोऽपि,** अपि शब्दात् **पक्षधर्मोऽपि अयं** शब्दे सत्त्वादिः शकटोदये कृत्तिकोदयः प्रत्यक्षप्रतीयमानो **हेतुतां** गमकत्वेवेतिं तथा **तदंशेन व्याप्तोऽपि** । अत्रापि अपिशब्दात् तेनाव्याप्तोऽपि ताम् एति । त[दे]वोदाहरणम्--अनित्यः शब्दः सत्त्वात् घटवत् श्रावणत्वाद्वा इति । तदंशपदम् अत्रैव वृत्तौ निरूपयिष्यते । किंभूतस्ताम् एति ? इत्यत्राह--**अन्यथा** साध्याभावप्रकारेण **अनुपपन्नः** । किं सर्वोऽपि स तथाविधः तामेति ? **न**; इत्याह--**लक्ष्यते** निश्चीयते । **अन्यथानुपपन्नोऽयं चेत्** यदि । केन ? इत्याह--**तर्केण** । अस्यानभ्युपगमे दोषमाह--**न चेदम्** अन्यथानुपपन्नो न हेतुतामेति, अन्यथा स श्यामः तत्पुत्रत्वात् इत्यादिरपि आगच्छेत् । तथा परमार्थतोऽन्यथानुपपन्नोऽपि **न चेत् तर्केण अन्यथानुपपन्नोऽयम् इति न लक्ष्यते हेतुताम् एति** इतरथा क्वचिद् धूमदर्शनात् नालिकेरद्वीपादागतस्य अग्निप्रतिपत्तिः स्यात् । अथवा तर्केण लक्ष्यते चेद् अन्यथानुपपन्नोऽयं ननु हेतुतामेति किन्तु एत्येवेति । § 1870

कारिकां व्याचष्टे **स्वार्थ** इत्यादिना । **स्वार्थं** यद् **अनुमानं** तत्र **धर्मी पक्षः** । किंभूतः ? **जिज्ञासितविशेषः** । परस्मै पदार्थं यद् **अनुमानं** तत्र **पुनः** इति पक्षान्तरसूचने **जिज्ञापयिषितविशेषो धर्मी** पक्षः इत्यनुवर्तते । कुत एतत् ? इत्यत्राह--**स्वनिश्चयं चेद्** इत्यादि । **श्च** इत्यनेन प्रतिपादकः परामृश्यते । तस्य निश्चयः अनुमेयप्रतिपत्तिः तेन तुल्यं वर्त्तते इति **तद्वद् अन्येषां** प्रतिपाद्यानाम् **निश्चयोत्पादनाय** अनुमेयप्रतीतिजननाय **पक्षपरिग्रहात्** प्रतिपादकस्य कारणात् **जिज्ञापयिषितविशेषः** स इत्युच्यते । यत्र हि परं प्रति असिद्धो धर्मः प्रतिपादयितुमिष्टो भवति स एव तथोच्यते । § 1871

ननु स्वनिश्चयवदन्येषां निश्चयोत्पादनाय पक्षपरिग्रहेऽपि यदि प्रतिपाद्याभिमतस्य तत्र धर्मजिज्ञासा नास्ति कथमसौ जिज्ञापयिषितविशेषः

374/mkj
/ms
/ms

१ च] तुलना--चन्द्रादेर्जलचन्द्रादिप्रतिपत्तिस्तथाऽनुमा ।--लघी॰ श्लो॰ १३ । सास्नाविषाणयोरेवं चन्द्रार्वाक्परभागयोः । --न्यायवि॰ २ । १७१ ।
७ तां] तदसत्तां
९ श] शब्दानित्यत्वे साध्ये ।
९ ये] साध्ये ।
१० त्वेवेतिं] कत्वम् एति
१६ म्] चेत्
२० न] ननु इति वितर्के ।
२३ दार्थं] परार्थं
२५ चेद्] यत्
२५ श्च] स्व

? तत्र विशेषं ज्ञातुम् इच्छन्तं प्रतिपादयितुमिष्टविशेषः जिज्ञापयिषितविशेष इत्युच्यते इति चेत्; अत्राह--**सत्यां च** इत्यादि । सत्यामेव **परस्य** प्रतिपाद्यस्य **जिज्ञासायां** जिज्ञापयिषितविशेषो धर्मी पक्ष उच्यते । § 1872

ननु तत्र तस्य यदि जिज्ञासा [स्या]त्तर्हि यथा स्वार्थे अनुमाने तद्वत एव पक्षव्यपदेशः तथा परार्थेऽपि परस्य तद्वतः तद्व्यपदेश इति तद्गुणदोषाभ्यां परस्यैव सम्बन्धो न प्रतिपादकस्येति चेत्; अत्राह--**वक्तृभिप्रायस्यैव** इत्यादि । **सत्यां च** इत्यादि अनुवर्त्तते । ततोऽयमर्थः--सत्यामपि परस्य जिज्ञासायां **तत्** अप्रतीतार्थं **प्रतिपादयिषोः** प्रतिपादकस्य इत्यर्थः । पक्षेण व्यपदेशः **पक्षव्यपदेशः** तस्य स पक्ष इति यावत् नेतरस्य । कुतः ? इत्यत्राह--**वक्तुः** प्रतिपादकस्य योऽ**भिप्रायः** तदप्रतीतार्थप्रतिपादनाभिसन्धिः **तस्यैव** न इतराभिप्रायस्य **प्रत्यासत्तेः** कारणात् । तथाहि--प्रथमं परस्य तत्त्वबुभुत्सा तदनन्तरं तन्निवेदनं पुनः प्रतिपादकस्य तत्प्रतिपादनाभिप्रायः पक्षपरिग्रहश्च इति पक्षपरिग्रहं प्रति वक्तृभिप्रायस्य प्रत्यासत्तिः । [उभ]यत्र *साधितं निदर्शनमाह--**परार्थव्यपदेशवद्** इति । § 1873

375/mkj

एवं पक्षस्य लक्षणं प्रतिपाद्य प्रयोगं दर्शयन्नाह--**तादृशस्य** उक्तरूपस्य **पक्षस्य धर्मः** तदाश्रितत्वात् । अत्र पूर्वापरावधरणनियमचिन्ता न कृता उभयत्रापि दोषाभावस्य निरूपयिष्यमाणत्वात् । हेतुः इति सम्बन्धः । किंभूतः ? **व्याप्तः** इति । तत्र व्याप्तियोगाद् व्याप्त उच्यते । व्याप्तिश्च व्याप्यव्यापकोभयगता । व्याप्यगता तत्रैव तत्र भावः, व्यापकगता तत्र भाव एव व्यापकस्य इति । केन ? इत्याह--**तदे दंशेन** तच्छब्देन [पक्षः] परामृश्यते । यद्यपि च शाब्द्या वृत्त्या *पक्षस्य धर्मविशेषणतया अप्राधान्यं तथापि आर्थन्यायानुसारि तस्य प्राधान्यं तदाश्रितत्वाद् धर्मस्य इति । तस्य अंशेन अवयवेन । *अनेन सर्वेण पक्षधर्म-*अन्वय-*व्यतिरेकलक्षणं रूपत्रयमस्य दर्शयति । किंभूतस्य ? इत्यत्राह--**निरुपचरितस्**य मुख्यस्य इत्यर्थः । § 1874 /ms

---

४ अनुमाने] जिज्ञासावतः ।
५ तः] जिज्ञासावतः ।
५ दोषाभ्यां] प्रतिपाद्यस्यैव ।
१३ *] प्रसिद्धमित्यर्थः ।
१९ ता] व्याप्तिर्हि व्यापकस्य तत्र भाव एव, व्याप्यस्य वा तत्रैव भावः ।--हेतुबि° पृ° ५३ ।
१९ त्रैव] व्यापके साध्ये सत्येव, न तु व्यापकाभावे ।
१९ त्र] तस्य[[व्याप्यस्य ।]]
१९ त्र] व्याप्ये सति ।
२० एव] सद्भाव एव न तु कदाचिदप्यभाव इति ।
२० दंशेन] तदंशेन
२१ वृत्त्या] व्याकरणानुसारिसमासेन ।
२१ *] पक्षधर्म इत्यत्र ।
२२ स्य] पक्षस्य ।
२२ प्राधान्यं] पक्षाश्रितत्वात् ।
२३ *] एतेन अन्वयो व्यतिरेको वा पक्षधर्मश्च यथास्वं प्रमाणेन निश्चित उक्तः ।--हेतुबि° पृ° ५३ ।
२३ *] सपक्षसत्त्वम् ।
२३ *] असपक्षेऽसत्त्वम्, विपक्षाद्व्यावृत्तिरित्यर्थः ।

**तदंश**पदं व्याचष्टे--तस्य पक्षस्य अंशः **तदंशः** । अंशपर्यायम् आह--**तद्धर्मः** । पुनरपि तदन्तरमाह--**तदेकदेश** इति । § 1875

ननु यदि धर्मः; न तद्वेशः तदवयवः । *स चेत्; न तद्धर्मः । [तद्धर्मश्च] तदेकदेशश्च इति परस्परविरुद्धमेतत्, तयोर्भेदात् । अत एव ध र्म की र्ति ना उक्तम्--**तद्धर्मो न तदेकदेशः** हेतुबि॰ टी॰ पृ॰ १७ इति चेत्; नैतत्सारम्; धर्मैकदेशयोः भेदाभावाभिप्रायेण एवं वचनात् । भेदाऽभेदात्मके हि ज्ञेये भेदाः कदाचिद् धर्मशब्देन कदाचिद् अंशशब्देन कदाचिद् एकदेशशब्देन भेदशब्देन पर्यायशब्देन अनेन बोध्यन्ते , तदात्मके ज्ञेय इति द्रव्यपर्यायात्माऽर्थः इति वस्तुभूतांधर्माधिष्ठानं भावः इत्यादि व्यवहारदर्शनात् । *कीर्त्तिः पुनः **कोऽन्यो न दृष्टो भागः स्यात्** प्र॰ वा॰ ३ । ४४ इति **दृष्ट एव अखिलो गुणः** प्र॰ वा॰ ३ । ४२ इति **धर्मधर्मितया** प्र॰ वा॰ स्ववृ॰ पृ॰ २४ इति च वदन्नेव धर्मैकदेशयोः भेदं स्ववचनविरुद्धं वदन्तीति
/ms दर्शयितुमिदमुक्तम्--**तद्धर्मः तदेकदेश** इति । समुदायपक्षेकदेशस्य उपचरितप्रदेशस्य धर्मिण एकदेश इति चेत्; अत्राह--**पक्षशब्देन समुदायवचनात्** । निरूपितमेतत् । § 1876

एवं तावत् परप्रतिपाद्ये सति मुख्ये किं गौणकल्पनया इति वा र्ति क-हे तु बि न्दु शा स्त्रे उपचरितं परोपचरितं परोपदर्शितं पक्षं दूषयितुम्
376/mkj उपदर्शयन्नाह--**पक्षो धर्मी** इत्यादि । **पक्षो धर्मी** इत्येवम् **उपचारे** धर्मधर्मिसमुदायं वा अविनाभावतः पक्षधर्मस्य तदेकदेशे धर्मिणि एकदेशाभावेन परमार्थतोऽध्यारोपे अङ्गीक्रियमाणे । किम् ? इत्याह--**तद्** इत्यादि । स साध्यो धर्मो यस्य तस्य भावः **तद्धर्मता सापि न सिद्धा** इति । धर्मिणः इति [ताषष्ठी ।] विभक्तिपरिणामेन सम्बन्धः । **अपि**शब्दात् न केवलं तदेकदेशता न सिध्यति । यथैव हि निरंशस्य धर्मिणो न एकदेशसंभवः स्वयं समुदायप्रसङ्गात् तथा [न] तद्धर्मस्यापि संभवः, धर्मधर्मिरूपसमुदायप्राप्तेरनिवारणात् । कथमन्यथा **प्रयोगकाले धर्मधर्मिसमुदायः पक्षः** इत्युच्यते इति मन्यते । § 1877

---

३ द्वेशः] तदंशः[[न तदंशपदस्य तदवयवः इत्यर्थः स्यात् ।]]
३ *] यदि तदंशपदेन अवयवः परिगृह्यते तर्हि ।
३ न] स अवयवः तद्धर्मपदेन न वक्तुं शक्यते इत्यर्थः ।
४ त] धर्म-अवयवयोः ।
५ ना] तुलना--तच्छब्देन पक्षः परामृश्यते न धर्मः । धर्मस्य धर्मासंभवात् । अंशश्च धर्मो नैकदेशः । [पक्षशब्देन धर्मिमात्रवचनात् न तदंशः तस्य एक] देशाभावादिति ।--हेतुबि॰ टी॰ पृ॰ १७ ।
८ न्ते] अन्येन वोच्यन्ते
९ स्तुभूतां] त
१० *] धर्मकीर्तिः ।
१२ इति] धर्मधर्मितया भेदो बुद्ध्याकारकृतः ।--प्र॰ वा॰ स्ववृ॰ ।
१२ न्तीति] वदतीति
१६ इति] प्रमाणवा॰ स्ववृ॰ पृ॰ १२ ।
१७ हे] पक्षो धर्मी अवयवे समुदायोपचारात्--हेतुबि॰ पृ॰ ५२ ।
१७ रितं] परोपचरितं इति द्विर्लिखितम् ।
१९ मुदायं] ये
२५ ते] तत्र हेतुलक्षणे निश्चेतव्ये धर्मी अनुमेयः, अन्यत्र तु साध्यप्रतिपत्तिकाले समुदायोऽनुमेयः । व्याप्तिनिश्चयकाले तु धर्मोऽनुमेयः--न्यायबि॰ टी॰ पृ॰ ९७ ।

ननु धर्मदेकदे कथमुच्यते न केवलं तदेकदेशता अपि तु तद्धर्मता न सिध्येदिति; सत्यम्; नैवं वक्तव्यं परापेक्षया तूक्तम् । सत्यम् एकदेशवत् तत्र वस्तुनो धर्मोऽपि न संभवति, साधयितुं तत्रेष्टि इति चेत्; अत्राह-- **नहि** इत्यादि । नत्र खलु **तत्र** निरंशे धर्मिणि **साधयितुम् इष्टः तद्धर्मः** तस्य धर्मिणो धर्मः । नहि पुरुषेच्छावशाद् भावोऽन्यथा भवति, तदेकदेशता अन्यथा अस्तु इति मन्यते । दूषणान्तरं दर्शयन्नाह--**तथा च** इत्यादि । **तथा** तेन तत्र साधयितुम् इष्टः तद्धर्मः इत्यनेन **च** प्रकारेण **सर्वो** नीलादिः अर्थः **सर्वधर्मा** सर्वः पीतत्वादिको धर्मो यस्य इति स तद्धर्मा **स्यात्** इति । § 1878 /ms

ननु यथा शब्दे नित्यत्वं साधयितुं जनो वाञ्छति नैवं नीलादौ पीतत्वादिकम्, अतोऽयमदोषः इति चेत्; **निरङ्कुशत्वात्** निवारकाभावात् । कस्याः ? इत्याह--**इच्छायाः** काककोकिलकुलादिकं पीतं सत्वात् कनकवत् इति साधयतो निवारकाभावात् । § 1879

ननु पक्षबाधकं तस्याः, यत्र तु तन्नास्ति तत्र साधयितुम् इष्टः तद्धर्मः इति चेत्; अत्राह— **तदनिराकृतौ** तस्य साधयितुम् इष्टस्य धर्मस्य प्रत्यक्षादिनाऽ**निराकृतौ** अनिराकरणे **साधयितुम् इष्टः तद्धर्मः** इत्यङ्गीक्रियमाणायां **सन्देहः स्यात् तदनिराकृतौ** इति सम्बन्धः । एवं मन्यते--अनित्यः शब्दः सत्वात् घटवत् इत्यादावपि तदिच्छाकाल एव नहि तदनिराकृतिः अवसीयते, अनवसितत्वे न लक्षणमिति । तदसन्देहे दूषणमाह--**अन्यथा** अन्येन तदनिराकृतसन्देहप्रकारेण **हेतुवचनानर्थक्यात्** हेतोः सन्देहः स्यात् इति पदघटनात् । तथाहि--तत्र धर्मिणि साध्यविनिश्चयात् तदनिराकृतिनिश्चये न सन्देहनिवृत्तिः हेतूपन्यासाच्च प्रागेव तद्विनिश्चये किं तेनेति ? § 1880

स्यान्मतम्--न साध्यविनिश्चयात् तत्सन्देहविनिवृत्तिः, विनिश्चयोऽपि त तत्र प्रतिबद्धलिङ्गदर्शनादिति; तन्न सारम्; यत एवं वै परमार्थतः तद्धर्मः, इतरथा न तत्प्रतिबद्धलिङ्गस्य तत्र दर्शनम् । न च निरंशे तदुपपन्नम्, न पुनः साधयितुम् इष्ट एव तद्धर्मः । न वै सधूमः प्रदेशः स्या ग्निमनिच्छन्तं प्रत्य [न्य]था भवतीछन्नं प्रति साग्निर्भवति इति न्यायोऽस्ति । न च निरंशं नाम किंवा न निरूपितं निरूपयिष्यते चात्रैव । § 1881 /ms

377/mkj

स्यादेतत् [न] तत्र बाधितो निश्चितो वा अपि तु सन्दिग्धः तद्धर्मः इति चेत्; अत्राह— **तत्र** धर्मिणि **उपचरितपक्षःव्यपदेश सन्दिग्धं धर्ममिच्छन्**

१ दे] धर्मः तदेकदेशः
३ त्र] निरंशस्य ।
३ त्रेष्टि] ष्टम्
४ त्र] न
१४ स्याः] इच्छायाः ।
२२ त] साध्यनिश्चये ।
२२ किं] हेतुना ।
२३ त] न
२६ स्या] सा
२७ न्नं] ति, इच्छन्तं
२८ न] किंचन[[वस्तु ।]] इति
३० क्षः] क्ष
३० देश] शः

**कथम् असिद्धम् आशङ्क्येत** । कस्य ? इत्याह--**हेतोः** इति, नैव आशङ्केत । कस्मिन् ? इत्याह--**पक्षस्य धर्मत्वे** हेतोः अङ्गीक्रियमाणे । किं भूतस्य ? इत्याह--**सन्दिग्धधर्मणः**, सन्दिग्धः साध्योऽनित्यत्वादिधर्मो यस्य तस्य इति । एतदुक्तं भवति--यथा सन्दिग्धेन तद्धर्मेण हेतोः व्याप्तिरिष्यते तथा सन्दिग्ध-सिद्धधर्मधर्मिसमुदायः पक्ष इष्यताम् इति न युक्तमेतत्--**यदि हेतुप्रयोगात् पूर्वं समुदायसिद्धिः किं हेतुना ? तदसिद्धौ हेतोः तद्धर्मता[ऽ]सिद्धिः** इति । § 1882

किंभूतामसिद्धिं कथम् असिद्धिं कथमाशङ्केत ? इत्यत्राह--**यतो** य-स्मात् तदसिद्धिशङ्कनाद् **अयं** *की र्तिः **उपचारम् आश्रयेत पक्षो धर्मा वयवे समुदायोपवाद्** * हेतुबि० पृ० ५२ इत्यनेन इति । **यत** इति वा आक्षेपे नैव तमाश्रयेत । को हि अनुन्मत्तः सन्दिग्धेन धर्मेण हेतोर्व्याप्तिमिच्छति न पुनः समुदायमिति । § 1883

ननु मया यथा सन्दिग्धेन समुदायो नेष्यते धर्मेण तथा व्याप्तिरपि हेतोर्नेष्यते, किन्तु असन्दिग्धेन इति चेत्; अत्राह--**यदि** इत्यादि । ननु एतद् आशङ्क्य **अन्यथा हेतुवचनानर्थक्यात्** इत्यनेन परिहृतं किमर्थं पुनः आशङ्क्यते इति चेत् ? अधिकदूषणप्रतिपादनार्थम् इति । आदौ यो **यदि** इति पराभिप्रायस्य, **पुनः** इति पक्षान्तरस्य द्योतकः । **उपचरितस्य** प-क्षस्य । कस्य ? **धर्मिणः** न समुदायस्य **असन्दिग्धेन** निश्चितेन, धर्मेण /ms इत्यनुवर्त्तते **व्याप्तो हेतुः** इष्यते इत्यध्याहारः । अत्र दूषणम्-- **शब्दस्य नित्यत्वे** [अ]कृतकत्वे साध्ये **कृतकत्वादिः** आदिशब्देन उत्पत्त्यादिपरिग्रहः **हेतुः स्यात्,** विरुद्धो न स्यादिति मन्यते । न केवलम् **दर्शनस्य परार्थत्वात्** जैमिनिसू० १ । १ । १८ इत्यादिरेव इति **अपि** शब्दार्थः । किंभूतः ? **व्याप्तः** । केन ? इत्याह--**सत्त्वप्रमेयत्वादिना न तद्धर्मिण** पक्षधर्मिधर्मिण । न हि सत्त्वादिकमन्तरेण कृतकत्वादिरस्ति, इति तेन व्याप्त उच्यते । अथ य एव साधयितुमिष्यते तेनैव व्याप्तो हेतुः नान्येन, *सोऽसन्दिग्धो न भवति; हेतुवचनानर्थक्यप्रसङ्गात् इत्युक्तम् । § 1884

स्यान्मतम्--दृष्टान्ते सोऽसन्दिग्धः न पक्षे, तत्र तु साधयितुमिष्टत्वात्, सेत्स्यति इति वा तस्य इत्युच्यते इति; तन्न सारम्; यतो हेतोः पुनः स-

---

४ त] साध्यधर्मेण ।

६ इति] तुलना--पक्षधर्म इत्यत्र हेतुलक्षणेऽपि क्रियमाणे यदि समुदायः पक्षो गृह्यते योऽनुमानविषयः तदा सर्वो हेतुरसिद्धः, सिद्धौ वा अनुमानवैयर्थ्यमित्याह पक्षो धर्मीति ।--हेतुबि० टी० पृ० १७ ।

८ असिद्धिं] कथमसिद्धिम् इति द्विर्लिखितम् ।

९ *] धर्मकीर्तिः ।

९ र्मा] र्मी अ

१० *] चारात्

२१ द] दर्शनस्य उच्चारणस्य परार्थत्वात् नित्यः शब्दः । न ह्यनित्यस्य पुनरुच्चारणं घटते इति ।

२३ र्मिण] तद्धर्मेण

२४ र्मिण] धर्मेण

२५ *] साधयितुमिष्टः ।

२७ दृष्टान्ते] साध्यः ।

मुदाय सिद्धे स तस्य भविष्यति इति प्रागपि तस्यैवोच्यताम् न धर्मिमात्रस्य । यथा कश्चित् कश्चित् पचन्तमुपलभ्य अन्यं पृच्छति कस्य अयं पक्षा इति ? स पृष्ट आह--ओदनस्य इति । न तदा ओदनस्य; प्रयत्नवैफल्य-प्रसङ्गात् । अस्ति च तथाव्यपदेशः । ततो मन्यामहे--यस्मिन् ओदने जाते अस्य इति व्यपदेशभाक् स भविष्यति तेन पूर्वं व्यपदिश्यत इति धर्मिणि 378/mkj
पक्षोपचाराऽनर्थक्यम् । § 1885

तदुपचारमभ्युपगम्य दूषणं दर्शयन्नाह--**न च** इत्यादि । **न च** नैव **स-मुदायवृत्तिः अयुक्ता** समुदाये वर्त्तनं नाऽयुक्तम् । कस्य ? **समुदायशब्दस्य** धर्मधर्मिसमूहवाचिपक्षशब्दस्य । किंभूतस्य ? **स्वयम्** आत्मना **एकस्मिन्** देशे समुदायैकभागे धर्मिणि **उपचारेण वृत्तिः** वर्त्तनं यस्य तस्य तद्वृत्तेः । पुन-रपि किंभूतस्य ? इत्याह--**पुनः** पश्चात् **सर्वनाम्ना** तदंशेन इत्यत्र तच्छब्देन /ms
**परामृश्य** । **यतो** यस्मात् तद्वृत्तेः अयुक्तत्वात् **तदंशः तद्धर्मो न तदेकदेशः**, कुतः **पक्षशब्देन समुदायस्यावचनात्** धर्मिण एव वचनात् इत्येवं **सूक्तं** नैव **स्यात्** इति । एवं मन्यते--समुदायशब्दस्य उपचारात् तदेकदेशवृत्तस्यापि यदा समुदायवृत्तिर्न विरुध्यते तदा तस्यैव तच्छब्देन परामर्शः--तदंशः त-देकदेशः इति न विरुध्यते इति । अत्र दृष्टान्तमाह— **ग्राम [स्थे]** त्यादि । **ग्रामस्य** तदेकदेशस्य न सर्वस्य, अन्यथा **तदेकदेशस्थितोऽहम् अद्राक्षम्** इत्यस्यानुपपत्तिः । अनेन ग्रामशब्दस्य उपचारेण तदेकदेशे वृत्तिम् आह । अदाहम् * **अद्राक्षम्** । क्व स्थितः ? इत्यत्राह--**तदेकदेशस्थितः** । त-च्छब्देन अत्र मुख्यस्य समुदायरूपस्य ग्रामस्य परामर्शः न तदनेकदेशस्य, पाटकान्तरव्यवस्थितस्य एवं प्रयोगात् तस्य एकदेशे तिष्ठति इति तत्स्थः । **यथा** इति दृष्टान्तार्थः । § 1886

उक्तमर्थं निगमयन्नाह--**तदेतद्** इत्यादि । यत एवं **तत्** तस्मात् **एतत्** परेण क्रियमाणम् । किम् ? इत्याह--**मुख्यशब्दार्थलङ्घनम्** मुख्यश्चासौ शब्दार्थश्च । तथाहि--अंशशब्दस्य मुख्यो लोको र्थः भागः, पक्षशब्दस्य धर्मधर्मिसमुदायः तस्य अतिलङ्घनं अतिक्रमणम् । तत् किं करोति ? इत्याह--**गङ्गास्नानभयात्** यः **कर्कटीभक्षणन्यायः** तम् **अनुसरति** । § 1887

ननु तद्भयात् कर्कटीतक्षणे वधबन्धादिको दोषोऽस्ति न तल्लङ्घने तत्कथ-मुच्यते--तन्न्यायमनुसरति इति चेत् ? अत्राह--**तत्रैव** इत्यादि । **तत्र** उल्लङ्घने **दोषात्** न तल्लङ्घन इति **एवकारार्थः** । निरूपितम् । ततः स्थितम्--**जिज्ञासित** इत्यादि, न पुनः पक्षो धर्मी इत्यादि । § 1888

---

१ मुदाय] ये
२ क्षा] पक्ता
३ स्य] किन्तु अपक्वतन्दुलस्य पक्ता ।
१९ *] अहम्
२० अत्र] यथा ग्रामस्य तदेकदेशस्थितोऽहमद्राक्षम् इत्यत्र ।
२४ रेण] धर्मकीर्तिना ।
२५ लोको] केऽ
२५ र्थः] अभिधेयः ।
२७ टीभ] त
२८ त] गङ्गास्नानभयात् ।

/ms एवं **पक्षधर्मः तदंशेन** इत्येतद् द्वयं व्याख्याय **व्याप्तः** इत्येतद् व्याचष्टे—**व्याप्तिः** इत्यादिना । इदमत्र तात्पर्यम्--व्याप्तियोगाद् व्याप्त उच्यते । सा च व्याप्यव्यापकोभयाश्रितेति **व्याप्तिः व्यापकस्य** सम्बन्धिनी यत्र असौ व्याप्यो धर्मो धर्मिणि वर्त्तते **तत्र,** न पुनः धर्म एव तत्र अन्यधर्माऽभावात्, **भाव एव व्याप्यस्य** व्याप्तिः इत्यनुवर्त्तते, **वा** शब्दः समुच्चये यत्रैव धर्मिणि व्यापको धर्मो विद्यते **तत्रैव** नान्यत्र **भावः** । किमेवं सति जातम् ? इत्यत्राह--**तत्र** तस्यां व्याप्तौ अङ्गीक्रियमाणायाम् **अन्यथा** साध्याभावप्रकारेण हेतोः **अनुपपत्तिरेव नान्यद् रूपम्** उक्तम् इत्यध्याहारः । अनेन **पक्षधर्मः तदंशेन व्याप्तः** हेतुतामेति, **अन्यथानुपपन्नोऽयं चेत् तर्केण लक्ष्यते** इति समर्थितम् । § 1889

तदनभ्युपगमे दोषं दर्शयन्नाह--**न चेद्** इत्यादि । अन्यथानुपपत्तिर्यदि 379/mkj न **किं** साध्यम् **कस्य [व्याप्यं]** साधनं **व्यापकं** चित् । कस्यचित् साध्याभिमता भावेऽपि अन्यस्य भावादिति मन्यते [इति] पृष्टमिव आत्मानं मन्यमानः परः प्राह--**कारणं** पावकादिकं **कार्यस्य** धूमादेः **स्वभावो** वृक्षत्वादिः **भावस्य** शिंशपात्वादेः **व्यापकम्** इत्यनुवर्त्तते । **चेत्** शब्दः पराभिप्रायसूचकः । तत्र उत्तरं दर्शयन्नाह--**क्षणिकस्य** इत्यादि । यदि कारणं कार्यस्य स्वभावो भावस्य नियमेन व्यापक इष्यते तर्हि तदभावे अवश्यं तन्न भवति इति अन्यथानुपपत्तिरेव समर्थिता । सा च अनेकान्त एव संभवतीति **क्षणिकस्य** इत्यनेन दर्शयति । **क्षणिकस्य** उत्पत्तिसमयानन्तरं निरन्वयनाशिनः /ms **कारणस्य** पराभिप्रायेण इदमुक्तम्, तत्त्वतः तन्न कारणम् । किंभूतस्य ? **कार्यकालम् अप्राप्नुवतः** कार्योत्पत्तेः प्रागेव नस्तस्य * **कथं** न कं श्चिद् **व्याप्तिर्नाम** । कारणस्य हि व्यापकस्य व्याप्तिः, यत्र कार्यं तत्र भाव वच । न च प्रागेव नष्टस्य स लभ्यते । एवं हि कार्यमहेतुकं तदभावे भवत् केन वार्यते ? शेषमत्रोक्तमिति भावः । § 1890

स्वभावहेतुं दूषयन्नाह--**भावस्वभावयोश्च** सत्त्वक्षणिकत्व[यो]श्च **अभेदैकान्ते** अङ्गीक्रियमाणे **किं केन व्याप्यते** व्याप्यव्यापकद्वयविरहात् । *तत्र च सामान्यविशेषाभाववत् * । तदभावे व्याहतमेतत्-- § 1891

२ सा] व्याप्तिः ।
४ एव] धर्मो वर्तते ।
४ त्र] धर्मे ।
४ भाव] सद्भाव एव न तु कदाचिदप्यभावः ।
१२ चित्] चेति
१३ ता] तस्या
१४ मानः] बौद्धः ।
१७ र्हि] व्यापकाभावे ।
१७ श्यं] व्याप्यम् ।
२० न्न] क्षणिकम् ।
२१ *] नष्टस्य
२१ कं] कथ
२२ च] वचनम्
२३ स] सद्भावः ।
२३ हेतुकं] कारणाभावे ।
२६ *] अभेदैकान्ते ।
२७ *] भावात्

*व्यापकं तदतन्निष्ठं व्याप्यं तन्निष्ठमेव वा । इति ।§ 1892

यत्पुनरेतत्--नित्या कल्पितेन अनित्यत्वेन असत्त्वव्यावृत्त्या कल्पितं सत्त्वं व्याप्येत इति; तदपि तदेकान्ते दुर्लभम्; विकल्पाभावे तत्कल्पनस्य अत्यन्त[म]संभवात् । तद्भावे वा अभिलाप्येतराकारयोः कथञ्चिद् विरुद्धयोः एकत्र संभवाद् अ पो ह वा र्तिका य निरवशेषाय दत्तो जलाञ्जलिः । एवमर्थं चाऽभेदैकान्ते इत्युक्तम् । § 1893

अत्राह प्र ज्ञा क र गु प्तः-- **कारणं न कार्यस्य स्वभावो वा भावस्य नाव्यापकः प्रमाणाभावेन तयोरभावात् । यत्तु कार्यादेः कारणादिकं प्रति हेतुत्वमुच्यते, तद् व्यवहर्तुः अभिप्रायवशात् प्रामाण्यं व्यवहारेण** प्र० वा० १ । ६ **इति वचनात्** इति; तं प्रत्याह--**व्यवहर्तुरभिप्रायवशात्** व्यवहर्त्तारः शास्त्रसंकाररहिता लोका न तत्संस्कारवन्तो नैयायिकादयः तेषामन्यथाभिप्रायात्, तेषां **व्यवहर्तॄणाम्** परमार्थयोः हेतुफलयोः भावस्वभावयोरभावेऽपि सर्वत्र अग्नेरेव धूमः वृक्ष एव शिंशपा इत्य**भिप्रायः** तद्वत् सा * **तादात्म्यतदुत्पत्तिव्यवस्थायां** क्रियमाणायाम् । किं कृत्वा ? **असमीक्ष्य** । किम् ? **तत्त्वम्** हेतुफलादीनां परमार्थरूपम् । अथवा तत्त्वं प्रतिभासाद्वैतं समीक्ष्यते, त- /ms त्समीक्षणे तदव्य वस्थायोगात् । तस्यां किम् ? इत्याह--स तदभिप्रायः **प्रमाणान्तरं** प्रत्यक्षानुमानाभ्याम् अन्यत् प्रमाणं **प्रसज्येत** । न तावत् प्रत्यक्षस्य अन्तर्भावः; सविकल्पकत्वात् । व्यवहारेणापि अविकल्पं परेण 380/mkj प्रत्यक्षमुच्यते । तत्र तदन्तर्भावे वा प्रत्यक्षवशात् तद्व्यवस्था इति सांवृतत्वमनुपपन्नमस्य । तत्त्वसंवरेण संवृतेः विकल्पात्मकत्वात् । नाप्यनुमाने; अन्योऽन्यसंश्रयदोषात् । तथाहि--तादात्म्य-तदुत्पत्तिव्यवस्थायाम् अनुमानम्, अतः तद्व्यवस्थितिः । § 1894

किंच **न अननुकृतान्वयव्यतिरेकं कारणम् नाऽकारणं विषयः** *इति वचनात् अनुमानं तद्व्यवस्थायाः कार्यं सद् व्यवस्थापकम्; तच्च तत्कार्यं तदभिप्रायात्, स च अनुमानम्, तत्रापि तदेव चोद्यं तदेव उत्तरम्, अनवस्था च । ततः सः प्रमाणान्तरमिति स्थितम् । § 1895

ननु [सः] प्रमाणमेव न भवति तल्लक्षणाभावात् कथं तदन्तरमिति चेत् ? अत्राह— **अविसंवादकत्वात्** तद्व्यवस्थाऽव्यभिचारित्वात् । अपिसंवाद-

---

१ कं] व्याप्यसद्भावे व्याप्याभावे च भवति ।

१ व्याप्यं] परं व्याप्यं व्यापकनिष्ठमेव, न कदाचिदपि व्यापकाभावे भवति ।

२ नित्या] नित्यत्वव्यावृत्त्या

५ वाद्] प्रमाणवार्तिके यदपोहप्रकरणं तस्मै ।

८ कः] न अव्यापकः किन्तु व्यापकः ।

८ माणाभावेन] कार्यस्वभावयोः ।

१३ *] तद्वशात्

१६ व्य] तद्व

१८ स्य] क्षे तस्य[[विकल्पाभिप्रायस्य ।]]

१९ त्र] प्रत्यक्षे ।

२० स्य] विकल्पस्य ।

२० रेण] तत्त्वाच्छादनेन ।

२३ *] द्रष्टव्यम्--पृ० १८८ टि० ७ ।

२४ अनुमानं] तादात्म्यतदुत्पत्तिव्यवस्थायाः ।

२६ सः] विकल्पः ।

२७ नु] विकल्पः ।

२७ णाभावात्] प्रमाणलक्षणाभावात् ।

२७ थं] प्रमाणान्तरम् ।

२८ अपि] वि

कं च ज्ञानं **प्रमाणमविसंवादिज्ञानम्** प्र० वा० १ । ३ इति वचनात् परेण प्रमाणमिष्यते । असिद्धोऽयं हेतुरिति चेत्; अत्राह--**विसंवादकत्वे** अविसंवादकत्वाभावे तदभिप्रायस्य अभ्युपगम्यमाने **तदाश्रयणं** तस्य तदभिप्रायस्य अङ्गीकरणम् **अप्रेक्षाकारित्वं** बौद्धस्य । कुतः ? इत्याह--**प्रकृतानुपयोगात्** । प्रकृतायां तद्व्यवस्थायाम् अनुपयोगात् । तथाहि--यद् /ms विसंवादं तद् व्यवहारेऽपि नाभिमतव्यवस्थोपयोगि यथा मरीचिकाजलज्ञानम्, विसंवादी च तदभिप्रायः । यद् यद्व्यवस्थोपयोगि न भवति न तत् तदर्थिना उपगम्यते यथा जलार्थिना तदेव ज्ञानम्, तद्व्यवस्थानुपयोगी च तदभिप्रायः । तदेवं तदभिप्रास्य अविसंवादकत्वे परस्य प्रमाणान्तरमापतति, अन्यथा तदनाश्रयणात् तन्निबन्धनव्यवहारविलोप इति स्थितम् । § 1896

*अयमपि न दोषः अभ्युपगमादिति चेत्; आस्तां तावदेतत् । अन्यदुच्यते--सत्यामपि तद्व्यवस्थायाम् अव्यापकत्वम् । एतदेव दर्शयन्नाह--**तद् एतस्मिन्** इत्यादि । **तस्मिन्** परमतगते **एतस्मिन्** उच्यमाने **प्रतिबन्धनियमे** तादात्म्यादिरूपे अङ्गीक्रियमाणे **कथम् अर्वाग्भागदर्शनात् परभागोऽनुमीयेत** । कस्य ? **चन्द्रादेः** इति । कथम् ? इत्याह--**नानयोः** अर्थात् सागावरभागयोः **कार्यकारणभावः** । कुतः ? **सहैव भावात्** । **न च** नैव **तादात्म्यं लक्षणभेदात्** । कुतस्तर्हि तदनुमानम् ? इत्याह--**अलम् अन्यथाऽनुपपत्तेः अनुमानम्** । विसंवादि स्यादिति चेत्; अत्राह--**अनवद्यम्** अव्यभिचारि । § 1897

**किं पुनः** इत्यादि परमतमाशङ्कते--**किं पुनः** कारणम् **अन्यथा** परभागाभावप्रकारेण **उपपद्यते** अर्वाग्भाग इति चेत् ? अस्योत्तरम्--**नवै** नैवाः **पर्यनुयोगम् अर्हन्ति** किमेवं भवन्तो भवति इति ? केवलं यथा ते बाधबोध प्रतिभान्ति तथैव अङ्गीकर्त्तव्याः प्रज्ञालोचनैः । पादप्रसारिका एवं स्यादिति चेत्; अत्राह--**तादात्म्य** इत्यादि । **[तादात्म्ये] किं पुनः** 381/mkj **कारणं वृक्षस्वभावो शिंशपा धूमः अग्निकार्यम्** इत्येवं **प्रसङ्गात्; अत्रापि** /ms **तदेवोत्तरम्--नवै भावाः* पर्यनुयोगमर्हन्ति** इति । § 1898

भवतु तर्हि अर्वाग्भागोऽन्यथाऽनुपपत्तेरेव परभागस्य हेतुरिति चेत्; अत्राह--**परभाग** इत्यादि । § 1899

...3 परभागोऽविनाभावमर्वाग्भागस्य कल्पयन् ।

---

२ रेण ] बौद्धेन ।
३ त्वाभावे ] व्यवहर्त्रभिप्रायस्य ।
६ विसंवादं ] वादि
९ स्य ] बौद्धस्य ।
११ * ] विज्ञानवादी प्राह ।
१६ भाग ] अर्वाग्भागपरभाग
१६ भावात् ] सहभाविनोरपारतन्त्र्यात् कार्यकारणभावाभावात् ।
२२ नैवाः ] नैव भावाः
२२ ति ] भवन्तु
२३ बोध ] तेऽबाधबोधे
२६ * ] भावस्वभावाः

## स्वभावं कार्यहेतुञ्च तत्रान्तर्भावयेन्न किम् ॥ ३

||§ 1901

तदर्वाग्भागस्य परभागाविनाभावस्वभावं कल्पयता धूमस्यापि पावकाविनाभावस्वभावादेव तत्र गमकत्वं प्रतिपत्तुं युक्तं किं तदुत्पत्त्या ? तस्यां च सर्वथ गम्यगमकभावः सर्वथा जन्यजनकभावात् । भावानामंशेन जन्यजनकभावः प्रसज्येत । § 1902

**परभागोऽविनाभावम्** अन्यथानुपपत्तिलक्षणं **कल्पयन्** वादी । कस्य ? **अर्वाग्भागस्य** । किं कुर्यात् ? इत्यत्राह--**स्वभावं कार्यहेतुं च तत्र** अन्यथानुपपत्तौ **अन्तर्भावयेत् न किम् ?** अन्तर्भावयेदेव । § 1903

कारिकां व्याख्यातुमाह--**तदर्वाग्भागस्य** इत्यादि । **तस्य** चन्द्रादयो **अर्वाग्भागः** तस्य **परभागाविनाभावस्वभाव** तदव्यभिचारिस्वरूपं **कल्पयता** न केवलमस्यैव अपि तु **धूमस्यापि पावकाविनाभावस्वभावादे [व]** तत्र पावके **गमकत्वं प्रतिपत्तुं युक्तम् इति** । ततः किम् ? इत्याह--**किं** न किञ्चित् **तस्मात्** पावकात् **उत्पत्त्या** धूमस्य इति सम्बन्धः । अथ तदुत्पत्त्यैव धूमस्य तत्र गमकत्वम्; इत्यत्राह--**सा च** तदुत्पत्तावेव गमकत्वे अभ्युपगम्यमानायां **सर्वथा** सर्वेण प्रकारेण **गम्यगमकभावः** पावकधूमयोः स्यात् इत्यध्याहारः । यथा पावको दाहपाकादिकारिणा सामान्यप्रकारेण गम्यः तथा सजातीयविजातीयव्यावृत्तासाधारणेन देशकालाकारनियतेनापि स्यात् इति प्रत्यक्षवत् स्वलक्षणविषयता अनुमितेः इति नातो विशेषः । अवैशद्याद् विशेषः; इत्यपि वार्त्तम्; विशेषविषयत्वे तदयोगात्, *परस्य तथाभ्युपगमाभावात् । कथमेवं सति विषयसंप्लवात् प्रमेयद्वैविध्यात् प्रमाणद्वैविध्यमिति चेत्; अयमपरोऽस्य दोषोऽस्तु । § 1904

यत्पुनरेतदुक्तम्-- **तदविनाभाव धूमविशेषावसाय इष्यते एव सर्वथा गम्योऽग्निः कुङ्कुमचन्दनागुरुजनितधूमावधारणे ततः तत्प्रतिपत्तिदर्शनात्** /ms इति; तदनेन निरस्तम्; तत्रापि कुङ्कुमादिसामान्यधर्मानुमितेः, इतरथा अन्त्यविशेषविषयत्वाद् अनुमितेः ततस्तत्र सन्देहः कुतः ? विशेषानुमाने अन्वयाभावश्च चिन्त्यः । निरूपयिष्यते चेदमनन्तरम् । तथा धूमः सर्वथा गमक इति विशेषधर्मेण च कण्ठाक्षविकारकारिणा सामान्यधर्मेणापि सत्त्वादिना स्यादिति धूमे संशयादिभावेऽपि सत्त्वादिविनिश्चयं ततोऽग्निप्रतिपत्तिरस्तु, ततः सन्दिग्धाद्यसिद्धताकीर्त्तनमसारमिति मन्यते । § 1905

---

९ यो] देर्यः
१० भाव] वं
१४ त्र] पावके ।
१४ च] तस्यां च
१४ त्वे] त्वम्
१८ नातो] प्रत्यक्षात् ।
१९ *] बौद्धस्य ।
२० वात्] एकस्मिन् स्वलक्षणविशेषे द्वयोः प्रमाणयोः प्रवर्तनात् ।
२२ विनाभाव] वात्
२३ त] चन्दनागुरुवह्निप्रतीतिदर्शनात् ।
२५ त्र] विशेषे ।
२७ च] णेव
२८ यं] ये

382/mkj

स्यान्मतम्--पावकस्य सामान्यधर्मा एव जनकाः, ततः तैरेव गम्यः, धूमस्य विशेषधर्मा एव जन्या इति तैरेव गमक इति चेत्; अत्राह--**सर्वथा** सर्वप्रकारेण **[जन्य]जनकभावात्** । अस्यानभ्युपगमे दोषमाह--**भावानाम्** इत्यादि । बहुवचनं सर्वथा अर्थपरिग्रहार्थम्, **अंशेन** अवयवेन **जन्यजनकभावः प्रसज्येत** यथा पावकः सामान्यधर्मैः न विशेषधर्मैर्जनको धूमो विशेषधर्मैर्न सामान्यधर्मैः जन्यः तथा सर्वे भावा इति । तत्र ग्राह्यग्राहकभावोऽपि तन्निबन्धनो ज्ञानैव इति न युक्तमेतत्--**एकस्यार्थस्वभावस्य** प्र० वा० ३ । ४२ इत्यादि । § 1906

यदि मतं सर्वथा जन्यजनकभावः सर्वथा [गम्य]गमकभावश्च इष्यते, एवं तज्जन्यविशेषावसाय इति; तत्राह--**तज्जन्यविशेष** इत्यादि । § 1907

...4 तज्जन्यविशेषः कः स्वयमभिमतोऽपरः ।
सैवाऽन्यथानुपपत्तेः अन्यत्राभिमतेऽपि [च] ॥ ४ ॥§ 1909

तादात्म्याविशेषेऽपि व्याप्यस्यैव गमकत्वं कथयन् एकलक्षणमेव समर्थयते पक्षधर्मत्वाद्यनपेक्षणात् । § 1910

**स** धूमगतोऽवान्तरो भेदोऽयं **जन्यो** यस्य स तथोक्तः, स चासौ **विशेषश्च** पावकगतो भेदः । कः ? न कश्चिद**भिमतः स्वयं** सौगतेन गम्यः इति सम्बन्धः । किंभूतः ? इत्याह--**परो** विद्यमानः परो विशेषो यस्माद् इत्य**परो**ऽसाधारण इत्यर्थः । किं सर्वथा नाभिमतः ? इत्यत्राह--**अन्यत्र अन्यथाऽनुपपत्तेः** अन्यथानुपपत्तिमन्तरेण तस्यास्तु अभिमत एव, निदर्शनमन्तरेण तद्गम्यत्वोपगमात् । § 1911

/ms

इदमपरं व्याख्यानम्--**तेन** अग्निना जन्यते इति **तज्जन्यः** स चासौ धूमत्वविशेषणः सत्त्वादिः धूमगतो विशेषश्च **तद्विशेषः कोऽपरो**ऽन्यः **अभिमतः स्वयं** सौगतेन । **अन्यत्र अन्यथानुपपत्तेः सैव अभिमतेऽपि** । तथाहि--धूमे धर्मिणि धूमत्ववत् सत्त्वादेरपि पावककार्यत्वाऽविशेषेऽपि धूमत्वमेव तदन्यथानुपपत्त्या गमकं नेतरदिति निरस्ता तदुत्पत्तिः । § 1912

तादात्म्यं दूषयन्नाह--**तादात्म्याविशेषेऽपि** । व्याप्यव्यापकयोः इत्यपेक्षम् । **व्याप्यस्यैव** सत्त्वादेर्न व्यापकस्य अनित्यत्वादेः **गमक[त्वं] कथयन्** पर

२ तैरेव] विशेषधर्मैरेव ।
६ त्र] तन्न
७ ज्ञानैव] ?
८ इ] प्रत्यक्षस्य सतः स्वयम् । कोऽन्यो न दृष्टो भागः स्यात् यः प्रमाणैः परीक्ष्यते ॥ इति शेषः ।
१९ त] अन्यथानुपपत्तेस्तु ।
२५ नेत] सत्त्वादि ।
२६ पेक्ष] क्ष्य
२७ र] बौद्धः ।

**एकलक्षणमेव समर्थयते पक्षधर्मत्वाद्यपेक्षणाया** आदिशब्देन तदंशव्याप्तिग्रहणम् । § 1913

ननु साधर्म्यवैधर्म्यदृष्टान्तयोरन्यतराभावे न हेतुः इति चेत्; अत्राह--**तद्** इत्यादि । § 1914

...5 तत्सिद्ध्यसिद्ध्योः सत्योः बहिर्व्याप्तेरसाधनात् ।
साधनं सकलव्याप्तेरुभयदोषानतिक्रमात् ॥ ५ ॥§ 1916

**तस्याः** अन्तर्व्याप्तेः **सिद्धिश्च** ज्ञप्तिः आत्मलाभो वा **असिद्धिश्च** विपर्ययः तयोः सत्योः **बहिर्व्याप्तेः** पक्षादन्यत्र व्याप्तिः बहिर्व्याप्तिः, तयोः सकाशाद् **असाधनात्** साधना भावात्, ताम् आश्रित्य [न] किञ्चित् साधनं भवतीति 383/mkj
। यदि वा, तस्याः साध्यभावात् । अथवा, तस्याः असाधनत्वात् इति सा न **साधनम्** इति यावत् । तर्हि सकलव्याप्तेः हेतुः, इत्यत्राह--**सकल** इत्यादि । पक्षे अन्यत्र च व्याप्तिः **सकलव्याप्तिः** तस्या **उभयदोषानतिक्रमात्** तदेव समर्थयत इति ३०८ । तथाहि--नान्तरेण अन्तर्व्याप्ति[म्] सकलव्याप्तिः, स चेत् सिद्धा कुतश्चित्; किमपरेण ? न चेत्; का सकलव्याप्तिः ? तथा विना बहिर्व्याप्त्यापि न सा युक्ता, तात्तरया । § 1917

सत्यम्, अर्वाग्भागदर्शनात् चन्द्रादेः परभागोऽनुमीयते, स तु नान्यथानुपपत्तेरपि तु एकसामग्र्यधीनतया इति; एतत्कदर्थयन्नाह--**चित्तभ्रान्ति** इत्यादि । § 1918

...6 चित्तभ्रान्तिस्वसंवित्त्योस्तादात्म्यं चेद्विलक्षणैः ।
दृष्टैर्भाव्यं स्वभावैः स्वैर्नश्वराणामनश्वरैः ॥ ६ ॥§ 1920

भ्रान्तिः...तथा च । § 1921

**भ्रान्तिश्च** अतस्मिन् तद्ग्रहः । उपलक्षणमेतत् तेन विकल्पसंशयविपर्यासादीनां ग्रहणम्, **स्वसंवित्तिश्च** स्वसंवेदनाध्यक्षम् । एतदपि उपलक्षणमिति निर्विकल्पकत्वप्रत्यक्षादीनाम् । **चित्तस्य** ज्ञानस्य **भ्रान्तिस्वसंवित्ती** तयोः **तादात्म्यं चेद् विलक्षणैः** विसदृशैः **दृष्टैः** इन्द्रियगोचरैः **भाव्यम्** भवितव्यम् । केषां कैः इत्याह--**नश्वराणाम्** प्रतिक्षणभङ्गुराणाम् **अनश्वरैः** स्थितैः । किंभूतैः

---

१ णाया ] द्यनपेक्षणात्
९ ताम् ] बहिर्व्याप्तिम् ।
१० भावात् ] असिद्धत्वादित्यर्थः ।
१३ व्याप्तिः ] सिध्येत् ।
१४ स ] सा
१५ सा ] सकलव्याप्तिः ।
१५ या ] ?

? **स्वभावैः** स्वरूपैः । किं सर्वैः ? न इत्याह--**स्वैः** आत्मीयैः न बुद्ध्यन्तरगतैः । § 1922

कारिकां व्याचष्टे--**भ्रान्ति** इत्यादिना । व्याख्यातमेतत् प्रथमप्रस्तावे । यद्यपि च भ्रान्तिग्रहेणन विपर्यास उक्तः तथापि द्वयोः उपादानं बाह्येतरविभ्रमप्रतिपादनार्थम् । § 1923

एवं सति किं लब्धम् ? इत्याह--**तथा च** इत्यादि । ते च नश्वराणाम् अनश्वरस्वभावप्रकारेण च । § 1924

...7 यथानुदर्शनं तत्त्वप्रतिपत्तिर्न लङ्घ्यते ।
तादात्म्यमती सूक्ष्माणां भिन्नानां सुपरीक्षितैः ॥ ७ ॥ § 1926

...8 स्थूलैरभिन्नैः स्वभावैः स्वैः चाक्षुषाणामचाक्षुषैः ।
अप्यन्यथानुपपन्नैः यथा लोके प्रतीयते ॥ ८ ॥ § 1928

...9 स्कन्धोऽर्वागूर्ध्वपरमध्यभागात्मैकः कथञ्चित् ।
अनुमेयः केनचित्कश्चिद् बुधैः रूपरसादिवत् ॥ ९ ॥ § 1930

प्रत्यनीकस्वभावतादात्म्यमन्यथानुपपत्त्या क्वचित् सिद्धमुपयन् एकान्त[भिन्नविषयं] प्रतीतिविरुद्धमविकल्पं निर्विषयं चानुमानं परिकल्प्य ततस्तत्त्वसिद्धिं व्यवस्थापयतीति किमतः परमयुक्तम् अन्यथानुपपत्तेरतिक्रमात् । ततोऽपरः 384/mkj सहभाविनां रूपादिपर भागादीनाम् रसार्वाग्भागादिभिः प्रक्लृप्तः प्रतिबन्धनियमश्च स्वमतघाती, उपयुक्तरसानुमेयोपादानशक्तितः रूपसिद्धौ प्रतीतिं स्वलिङ्गसंख्याश्च लङ्घयेत् । उपयुक्ताद्रसात् रूपाद्युत्पत्तौ सहकारित्वं तदुपादानस्वभावं प्रतिपन्नवान्, पुनः तत्कार्यं रूपादिकं प्रत्येति । स्वोपादानस्य शक्तिप्रवृत्त्या विना न रसोत्पत्तिः सैव रूपादिकारणमिति अतीतैककालानां गतिर्नानागतानां व्यभिचारात् इति कोऽयं प्रतिपत्तिक्रमः तथैव व्यवहाराभावात् । तथा च कारणात् कार्यानुमानम् । सहभाविनश्च रसात् पारम्पर्येण रूपाद्यनुमानं न केवलं प्रतीतिप्रसिद्धिमुपरुणद्धि किन्तु अनुमीयमानं प्रतिबन्धनियमं च । § 1931

**यथानुदर्शनं** दर्शनानतिक्रमेण । **नु** वितर्के । **तत्त्वप्रतिपत्तिर्न लङ्घ्यते** न निराक्रियते । किंभूता सा ? इत्यत्राह--**तादात्म्यमती** वि शब्दोऽत्र

६ च ] तथा च तेन च
२७ वि ] अपि

द्रष्टव्यः । केषाम् ? इत्यत्राह--**सूक्ष्माणाम्** । किंभूतानाम् ? **भिन्नानाम्** अन्योऽन्यव्यावृत्तानाम् । कैः ? इत्यत्राह--**स्थूलैः** । किंभूतैः ? **अभिन्नैः**, अनेकावयवसाधारणैः । पुनरपि किंभूतैः ? **सुपरीक्षितैः** कथं सुपरीक्षकैः ? * इत्याह--**अन्यथानुपपन्नैः** इति । **स्वैः** आत्मीयैः । न केवलं तैः तेषामेव /ms तत् किन्तु **चाक्षुषाणाम्**, उपलक्षणमेतत् सत्त्वं न्द्रियाणाम् । **अचाक्षुषैः** एतदप्युपलक्षणम् । किंभूतैः ? **स्वप्तावैः अपि** शब्दः **चाक्षुषाणाम्** इत्यत्र पति तव्यः । **यथा लोके प्रतीयते** इत्यनेन च प्रतीतिसिद्धश्चानेकान्तं दर्शयति । प्रकृते कोऽस्य उपयोग इति चेत् ? अत्राह--**स्कन्धोऽर्वाग्भागे**त्यादि । **स्कन्धः** चन्द्रादिः अवयवी । किंभूतः ? **अर्वागादीनां** द्वन्द्वः, पुनः **भाग**शब्देन कर्मधारयः, ते **आत्मानो** यस्य स चासौ **एकश्च** तदात्मैको **यथा लोके प्रतीयते** । तत्र स्कन्धे **केनचिद्** अर्वाग्भागेन **कश्चिद्** भागो मध्यादिः **अनुमेयः** स्यात् । कैः ? **बुधैः** परीक्षकैः । निदर्शनमाह--**रसाद् रूपादिवद्** इति । यथा कथञ्चित्तादात्म्यात् रसाद् रूपादिरनुमेयः, नैकसामग्र्यधीनत्वेन तत्रां तत्र केनचिद् भागेन कश्चिद् भागोऽनुमीयते इति निदर्शनार्थः । § 1932

कारिकात्रयं सुगमत्वाद् अव्याख्याय निदर्शनं समर्थयितुकामः [आह] **प्रत्यनीक** इत्यादि प्रत्यादि । **प्रत्यनीकौ** अन्योऽन्यविरुद्धौ यौ **स्वभावौ** विकल्पाऽविकल्पौ भ्रान्ति-प्रत्यक्षौ विपर्ययप्रत्यक्षेसंशयप्रत्यक्षौ तयोः **तादात्म्यम्** एकत्वम् **क्वचिद्** विज्ञानादौ **सिद्धं** प्रमाणनिश्चितम् उपपन्नम् अभ्युपगच्छन् । कया ? इत्यत्राह--**अन्यथा** इत्यादि । **अन्यथा** अन्येन तादात्म्याभावप्रकारेण तयोः स्वभावयोः या **अनुपपत्तिः** तया इति । तथाहि--निर्विकल्पस्वभावाद् विकल्पस्वभावाद्वि भेदैकान्ते कुतः तद्वेदनं यतः तत्कल्पनम् ? अज्ञातकल्पने अतिप्रसङ्गात् । तथा च **अभिलापसंसर्गयोग्यप्रतिभासा** /ms **प्रतीतिः कल्पना** न्यायबि० १ । ५ यवि कल्पनयापि न लभ्यत इति दूरं संवृतिवार्ता । स्वत इति चेत्; तर्हि विकल्पस्वभावोऽविकल्प इति तदवस्थाप्रसङ्गः **सर्वचित्तचैतसिकानाम्** न्याय बि० १ । १० इत्यादि कथम् ? अन्यथा तत्रापि अपरतत्स्वभावकल्पनम् उक्तदोषम् अनवस्थामन्वाकर्षति । यदि पुनः अविकल्पस्वभावाद् अन्येन अन्यवेदनम् इति निराकारदर्शनम्, असतश्च ततस्तस्य वेदनमिति स्वपरयोः प्रत्यनीकयोः तादात्म्यम्; अत्रापि

---

४ *] क्षितैः ?
५ त्त्वं] सर्वे
६ म्] सर्वेन्द्रियगोचराणाम् ।
६ प्तावैः] स्वभावैः
७ ति] पठि
१३ नुमेयः] अस्ति मातुलिङ्गे रूपं रसात् इत्यादि ।
१३ त्रां] तथा
१६ प्र] प्रत्यादि इति निरर्थकमत्र ।
१७ क्षे] क्षौ
१८ म्] उपयन्
२१ भावाद्वि] वस्य
२१ त] विकल्पस्वरूपसंवेदनम् ।
२३ वि] इति
२५ स्था] स्थः
२५ सिकानाम्] सर्वचित्तचैत्तानामात्मसंवेदनं स्वसंवेदनम्--न्यायबि० ।
२५ म्] सूक्तं स्यात् इति सम्बन्धः ।

भेदैकान्ते म * प्रकृतमनुवर्त्तत इति चक्रकम् । एतेन शेषमपि चिन्त्यम् । ततस्तयोः तादात्म्यमन्वेष्यम् । **तदुपयन् व्यवस्थापयति इति किमतः परमयुक्तम् ?** इदमेव अयुक्तमिति । किंभूतं किंभूत्वा कुतः किं व्यवस्थापयति ? इत्यत्राह--**अविकल्पं परिकल्प्य** । किम् ? इत्याह--**एकान्त** इत्यादि । किंभूतम् ? **प्रतीतिविरुद्धम्** । नहि एकैकपरमाणुपर्यवसितवपुः अध्यक्षं प्रतीत्यारूढं लक्ष्यते दृश्यानुपलब्धिः अभावप्रसङ्गात् एकज्ञानसंसर्गिपदार्थद्वयाभावात् । कथमेवं विभ्रमतोऽपि स्थूलदीर्घादिप्रतीतिः, यतः पर्वतादिव्यवस्था इति चेत् ? अयमपरो दोषोऽस्तु । § 1933

यदि पुनः अनेकपरमाणुविषयं साकारमेकं दर्शनम्; किं स्यात् ? उक्तमत्र **प्रत्यनीक** इत्यादि । **निर्विषयं च अनुमानं परिकल्प्य** । अत्रापि **प्रतीतिविरुद्धम्** इत्यनुवर्त्तते । क्वचित् प्रत्यनीकस्वभावयोः प्रमाणसिद्धतादात्म्योपगमे नित्यत्वानित्यत्व-कृतकत्व-सत्त्वादीनां प्रत्यनीकस्वभावनाम् शब्दे तादात्म्यसिद्धेः प्रतीतिविरुद्धं निर्विषयं तदिति मन्यते । **ततो**ऽविकल्पात् /ms प्रत्यक्षात् तद्विरुद्धा[त्] निर्विषया[च्च]अनुमानात् **तत्त्वसिद्धिम्** इति । कुत इदमेव अयुक्तम् ? इत्यत्राह--**अन्यथा** इत्यादि । यतः **अन्यथानुपपत्तेः** क्वचित् प्रत्यनीकस्वभावयोः तादात्म्यमभ्युपैति सौगतः, तस्या एव ततः तत्त्वसिद्धिं व्यवस्थापयतो**ऽतिक्रमात्**, ततो न क्वचित् तयोः तादात्म्यमिति, इदमेव अयुक्तमिति भावः । § 1934

इदमत्र तात्पर्यम्--रसादिक्षणिकपरमाणूनां विवेकैकान्ते विकल्पाभावात् कुतो निर्विषयमप्यनुमानम्, यतः तत्त्वव्यवस्था ? तदस्ति चेत्; विकल्पाविकल्पप्रत्यनीकस्वभावयोः क्वचित् तादात्म्यं सिद्धम्, रसादीनामपि तदस्ति इति न दृष्टान्तासिद्धिः । § 1935

यस्तु मन्यते--अर्वाग्भागा[त्] संयोगिनः परभाग[गः] रसाद् एकार्थसमवायिनो रूपादिः अनुमीयते, न तादात्म्याद् अन्यतो वेति; सोऽप्यनेन निरस्तः; शक्यं हि वक्तुं **प्रत्यनीकस्वभावयोः** सामर्थ्येतरयोः अन्ययोर्वा **तादात्म्यम् अन्यथानुपपत्त्या क्वचित्** तादात्म्यादौ * **सिद्धम् उपयन्** वैशेषिकादिः **प्रतीतिविरुद्धम्** एकान्तभिन्नस्वभावद्रव्यगुणकर्माक्षणक्षयप्रध्वंस **[म]विकल्पं** निरंशैकार्थम् नियतं **परिकल्प्य** तत्पूर्वकत्वेन **निर्विषयम् अनुमानं** चेति । शेषं पूर्ववदिति । § 1936

ननु यद्यपि अर्वाग्भाग-परभागयोः रूपादिरसाद्योः तादात्म्यं तथापि न तदन्यथानुपपत्त्या गम्यगमकभावः, अपि तु पूर्वविशिष्टकारणस्य अनुमानेन, तत एव तादात्म्यस्यापि भावादिति चेत्; अत्राह--**ततोऽपरः** इत्यादि । त-

---

१ म] म इति निरर्थकमत्र ।

१ *] ?

२ योः] प्रत्यनीकस्वभावयोः विकल्पाविकल्पयोः ।

६ ब्धिः] ब्धेः

१६ स्या] अन्यथानुपपत्तेरेव ।

२१ त] एकस्मिन् द्रव्ये तादात्म्यमिति ।

२३ य] वैशेषिकः ।

२६ *] तादात्म्यम् आत्मादौ

तः तादात्म्याऽन्यथानुपपत्तेः **अपरः** अन्यः **स्वयम्** आत्मना सौगतेन न लोकेन प्रमाणेन वा **प्रक्लृप्तो** रचितः । अनेन परस्य तत्र स्वातन्त्र्यं दर्शयति । कः ? इत्याह--**प्रतिबन्धनियमः** । **च** शब्दो न केवलं प्रत्यक्षादिकं प्रस्तावाद् अर्वाग्भागपरभागयोः रूपादिरसाद्योः इति गम्यते । यदि वा, **ततः** साक्षात् तादात्म्यतदुत्पत्तिप्रतिबन्धाद् **अपरो**ऽन्य एकसामग्र्यधीनतालक्षण इति व्याख्येयम् । कुतः स प्रक्लृप्तः ? इत्याह— **सहभाविनाम् अनुमानप्रसङ्गात्** । केषाम् ? इत्याह--**रूपादिपरभागादीनाम्** । कैः ? इत्यत्राह--**रस-अर्वाग्भागादिभिः** । स किंभूतः ? इत्यत्राह--**स्वमतघाती** । **स्व** इत्यनेन सौगतपरामर्शः तस्य **मतघाती** । कुतः ? इत्यत्राह--**उपयुक्तरसेन** इत्यादि । **उपयुक्तेन** आस्वादितेन **रसेन अनुमेया** या **उपादानस्य** उपयुक्ततत्सहभाविरसरूपपरिणामिकारणस्य **शक्तिः** सामर्थ्यं रसस्य रसोत्पत्तौ उपादानशक्तिः रूपोत्पत्तौ सहकारिशक्तिः रूपस्यापि रूपोत्पत्तौ उपादानशक्तिः अन्यत्र सहकारिशक्तिः **ततः रूपसिद्धौ** रूपानुमितौ क्रियमाणायां **प्रतीतिं** लोकप्रसिद्धिं **लङ्घयेत्** सौगतः । नहि पूर्वम् उपयुक्ताद् रसात् सामग्रीविशेषानुमानम् [ततो रूपानुमानम्] इति लोके परम्पराप्रतीतिरस्ति; तत्र उपयुक्तरसादेव रूपानुमितिप्रतीतेः । तथापि तत्कल्पने **शक्यं हि बोद्धुम् स्वभावहेतुर्भावम्** इत्यादिना दूषणं निरूपयिष्यते । अथ प्रतीतिलङ्घने कथं स स्वमतघाती इति चेत् ? उक्तमत्र दूषणं निरूपयिष्यते इति । /ms, 386/mkj

§ 1937

किञ्च लोकानुमानस्य मननं यच्च कीर्त्तितं की र्त्ति ना तन्व किं तस्य प्रतीतिविलंघमेनतः तत्सिद्धौ दूषणान्तरमाह-- **स्वलिङ्गसंख्यां** कार्यस्वभावानुपलब्धिगोचरां **च लङ्घयेत्** । /ms

§ 1938

एवं कारणलिङ्गोपगमात् **रसाद् उपयुक्ताद्** इत्यादिना कारिकां विवृणोति--**रसात्** । किं भूतात् ? **उपयुक्तात् प्रतिपन्नवान्** सौगतो लोको वा । किम् ? इत्याह--**सहकारित्वम्** । क्व ? इत्याह--**रूपाद्युत्पत्तौ** । किंस्वभावम् ? इत्याह--**तदुपादानस्वभावम्** । तस्य उपयुक्तरसस्य यद् उपादानं तत्स्वभावम्, **पुनः** पश्चात् **तत्कार्यम्** तस्य तत्र तत्स्वभावस्य सहकारित्वस्य कार्यम् । तदेवाह--**रूपादिकम्** । तत् किं करोति ? इत्याह--**प्रत्येति** । कुतः ? इत्याह--**त** * ***शक्तीत्यादि** । **शक्तेः प्रवृत्तिः** कार्ये व्यापारः तया **विना न रसोत्पत्तिः** उपयुक्त-रसात्मलाभः । कस्य तया विना ?

---

१० उ] उपयुक्तस्य रसस्य तत्सहभाविनो रूपस्य च परिणामिकारणस्य उत्तररसात्मकत्वेन उत्तररूपात्मकत्वेन च स्वयं परिणामिनः ।

११ र] उत्तररसोत्पत्तौ ।

१३ अ] उत्तररसोत्पत्तौ ।

१६ त्र] लोके ।

२० ना] धर्मकीर्तिना ।

२० न्व] तत्र

२१ तः] विलङ्घनेन ? ततः

२७ स्य] रसस्य ।

२९ त] त इति निरर्थकमत्र ।

२९ *] ?

२९ *] शक्तिप्रवृत्त्या न विना रसः सैवान्यकारणम् । इत्यतीतैककालानां गतिस्तत्कार्यलिङ्गजा ॥... ...

इत्याह--**स्वोपादानस्य** उपयुक्तरसोपादानस्य किन्तु तत्प्रवृत्त्या तदुत्पत्तिः । ततः किम् ? इत्याह--**सैव** तस्य शक्तिप्रवृत्तिरेव **रूपादिकारणम् इति** हेतोः *__अतीतैककालानां गतिः__ प्रतीतिः **नानागतानाम्** । कुतः ? **व्यभिचारात्, इति** शब्दः परपक्षसमाप्तौ । तत्र दूषणमाह— **कोऽयम्** इत्यादि । पूर्वम् उपयुक्तरसात् तदुपादानरसस्य रूपसहकारिणः प्रतिपत्तिः पुनः ततो रूपस्य इति **प्रतिपत्तिक्रमोऽयं** परेण उच्यमानः **कः** कुत्सित इत्यर्थः । कुतः ? इत्याह--**तथैव व्यवहाराभावात्** । यद्वा, **अतीतैककालानां गतिः नानागतानाम् इति प्रतिपत्तेः क्रमः** परिपाटिः न्यायानतिलङ्घनम् **कोऽयम्** । कुतः
387/mkj
? इत्याह--**तथैव** इत्यादि । **तथैव अतीतैककालानां गतिर्नानागतानाम्** प्र° वा° स्ववृ° १ । १२ इत्यनेनैव प्रकारेण **व्यवहाराभावाद्** अन्यथापि
/ms
व्यवहारात् सौगतस्य इति द्रष्टव्यम् । स्वयमेव उपयुक्तरसानुमितरसादिना तदपेक्षया ना नागतस्य रूपादे[र]व्यभिचारगतेः इत्युपगमात् । दूषणान्तरमाह--**तथा च** तेनैव परपरिकल्पितप्रकारेण **कारणात् कार्यानुमानम्** ।
§ 1939

यस्तु मन्यते--भावि कारणम् इति; अस्मिन् दर्शने कार्या[त् कारणा]नुमानम्, न कारणात् कार्यानुमानम् इति; स की र्तेः अनन्तरवचनं कृत्यति; तस्यापि उपयुक्तरसेन पूर्वरसप्रतिपत्तिः कारणात् कार्यानुमानं स्यात् । तदनभ्युपगमे **एकसामग्र्यधीनस्य** प्र° वा° ३ । १८ *इत्यादि निरर्थकम् । अन्योऽन्यहेतुफलभावे अन्योऽन्यसंश्रयः । एवमनेन **प्रतीतिं स्वलिङ्गसंख्यां च लङ्घयेत्** इति व्याख्यातम् । § 1940

अधुना साः कृताभ्यागमदोषं दर्शयन्नाह--**राह[सह]भाविनश्च** इत्यादि । अनुमीयमानरूपादिना **सह भवनशीलाद् रसात् समकालरूपाद्यनुमानम्** । कथम् ? इत्याह— **पारम्पर्येण** वर्णितप्रकारेण । तत् किं करोति ? इत्याह--न केवलं **प्रतीतिप्रसिद्धिम् उपरुणद्धि** निराकरोति । अनेन कृतनाशो दर्शितः, किन्तु **प्रतिबन्धस्य** तादात्म्यतदुत्पत्तिलक्षणस्य **नियमं च विरुणद्धि** । कथम् ? **अनुमीयमानम्** रूपेण सह प्राक्तनरसादेः तादात्म्याद्यभावेऽपि प्रतिबन्धान्तराद् गमकत्ववर्णनात् । एतेन अकृताभ्युपगमः कथितः । § 1941

---

३ *] अतीतैककालानां गतिर्नानागतानां व्यभिचारात्--प्र° वा° स्ववृ° १ । १२ ।
५ स्य] पूर्वरसस्य ।
८ इति] प्र° वा° स्ववृ° १ । १२ ।
११ सादिना] एकसामग्र्यन्तर्गतपूर्वरस-पूर्वरूपादिना । पूर्वरूपं हि स्वसजातीयं उत्तररूपमुत्पाद्यैव उत्तररसोत्पादकसामग्र्यामनुप्रविशति इति आस्वाद्यमानरसात् सामग्र्यनुमानं यद्यपि कार्यात् कारणानुमानं तथपि एकसामग्र्यन्तर्गतपूर्वरूपात् उत्तररूपानुमानं कारणात् कार्यानुमानमेव इति भावः ।
१२ ना] चा
१५ ते] प्रज्ञाकरः ।
१६ स] प्रज्ञाकरः ।
१६ र्तेः] धर्मकीर्तेः ।
१८ *] एकसामग्र्यधीनस्य रूपादे रसतो गतिः । हेतुधर्मानुमानेन धूमेन्धनविकारवत् ॥--प्र° वा° ।
२१ साः] कृतनाशाऽ
२७ राद्] एकार्थतादात्म्यात् ।

स्यान्मतम्--न तया परमार्थतः पूर्वम् उत्तरस्य उत्तरं वा पूर्वस्य कारणं लिङ्गं च इष्यते येनायम् अन्योऽन्यसंश्रयादिदोषः स्यात्, अपि तु व्यवहारिणा केवलं तन्मतानुसारिणा अनुमीयते, तदेव अनूद्यते । तत्रापरः प्राह--स तर्हि साक्षाद् रसाद् रूपप्रतिपत्तिं कुर्वन् किमिति प्रतिक्षिप्तः /ms ? तत्प्रतिबन्धाभावादिति चेत्; पूर्वोत्तरयोः कः प्रतिबन्धः ? तदुत्पत्तिरिति चेत्; *प्रमाणतः सिद्धा, किमुच्यते व्यवहारिणेति ? प्रमाणसिद्ध[स्योभ]योरपि अभ्युपगमार्हत्वात्, अन्यथा त्परतः प्रामाणिकत्वाद्वो येन । व्यवहार्यभ्युपगमात् चेत्; अत एव प्रतिबन्धान्तरमस्तु । न च अप्रमाणाभ्युपगमसिद्धेर्द्वैस स न्यायो न्यायानुसारिणां युक्तः । तदपि अस्तु इति चेत्; अत्राह--**सहभाविनश्च** इत्यादि । **सहभाविन एव रसात्** समकाल**रूपाद्यनुमानं** न केवलं पारम्पर्येण या प्रीति सौगताभ्युपगता तामु**परुणद्धि** किन्तु **प्रतिबन्धनियमं च उपरुणद्धि** इत्यनुवर्त्तते । सहभाविनोः प्रतिबन्धान्तरसिद्धेः नीलतद्धिज्ञानवदिति । § 1942

तदेवं दृष्टान्ते निराकुलीकृते पर आह--यदुक्तम्--भ्रान्तिप्रत्यक्षयोः तादात्म्येन भवितव्यम् इति; तन्न सारम्; प्रत्यक्षाद् आत्मसंवेदनरूपाद् भ्रान्तेः 388/mkj चित्राकारनिर्भासरूपायाः विरुद्धधर्माध्यासेन भेदादिति चेत्; अत्राह--***स्वं स्वं खण्डशश्चेद्** इत्यादि । § 1943

...10 स्वं खण्डशश्चेत्संवित्तिः बहिर्वेद्यं न किं तथा ।
सामग्रीभेदाद् भिद्येरन् यतः पुद्गलसंविदः ॥ १० ॥ § 1945

पुद्गलस्यैकस्यैव चक्षुरादि[सामग्रीभेदात्]रूपादिज्ञानप्रतिभासभेदः विज्ञानस्यैव तद्भ्रान्तिकल्पनायामुभयाकारानतिक्रमात् तदवस्थं चोद्यम् । § 1946

**स्वम्** आत्मानं **खण्डशः** सच्चेतनादिरूपेण न विभ्रमाकारविवेकरूपेण सताऽपि भ्रान्तेरभावप्रसङ्गात् **संवित्तिः** विषयीकरोति **वित्तिः** बुद्धि**श्चेद्** यदि । तत्र दूषणम् **बहिर्वेद्यं** घटादि **किन्न खण्डशः संवित्तिः** इति पदघटना । संवेते तथैव प्रतीतेः इति मन्यते । कथं खण्डशः स्यात् तत्संवित्तिः ? इत्यत्राह--**सामग्री** इत्यादि । **यतो** यस्मात् खण्डशः संवेदनाद् **भिद्येरन्** भिन्नाः स्युः परस्परम् । काः ? इत्यत्राह--**पुद्गलसंविदः** रूपरसगन्धस्पर्शात्मकघटादिबुद्धयः । कुतः ? इत्याह--**सामग्रीभेदात्** चक्षुरादिकारणकलापभेदात् /ms । एकस्य तद्विषयत्वादिति भावः । § 1947

६ *] तर्हि तदुत्पत्तिः ।
७ येन] परस्यापि न प्रामाणिकत्वम्
९ स] द्धेः अर्धवैशस
९ न्यायो] द्रष्टव्यम्— पृ० २६३ टि० ११
।
११ प्रीति] **प्रतीतिः**
१६ *] स्वं इति द्विर्लिखितम् ।
२५ संवेते] संवित्तेः

पूर्वार्धस्य सुगमत्वाद् व्याख्यानमकृत्वा परमर्धं व्याचष्टे--**पुद्गलस्य** रूपादिमयघटादेः **एकस्यैव** स्वगुणपर्यायसाधारणात्मन एव न परकल्पित-रूपादि-परमार्थैकान्तभिन्न+अवयव-अवयविरूपस्य **रूपादिज्ञानप्रतिभासभेदः** केवलं न स्वरूपभेद इत्यर्थः । कुतः ? इत्याह--**चक्षुरादि** इत्यादि । तत्र दृष्टान्तमाह--**विज्ञानस्यैव** इत्यादि । § 1948

ननु च ग्राह्याकाराद् भिन्नं ज्ञानमाश्रित्य कारिका प्रवृत्ता तत्कथमिदमुच्यते इति चेत्; न; एकस्य दृश्येतरसंभववद् बाह्याकारसंभवाविरोधाभिप्रायेण एवमभिधानात् । § 1949

यदि मतम्--न ज्ञानस्य ग्राह्याद्याकाराद् भेदो नापि परमार्थतः तत्तदात्मकम् तदाकारस्य भ्रान्तस्य ततः तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वात् । तदुक्तम्--
§ 1950

*वस्तुन्येष विकल्पंविवेद वस्त्वनुरोधतः । इति ।§ 1951

*मन्त्राद्युपप्लुताक्षाणाम् प्र° वा° २ । ३५५ इत्यादि ।§ 1952

*अविभागोऽपि प्र° वा° २ । ३५४ इत्यादि वेति ।§ 1953

तत्राह--**तद्भ्रान्तीत्यादि** । **तस्य** ग्राह्यादिनिर्भासभेदवतो ज्ञानस्य **भ्रान्तिकल्पनायां** क्रियमाणायां **उभयाकारानतिक्रमात्** स्वपररूपापेक्षया अविभ्रमेतराकारानतिलङ्घनात् **तदवस्थं चोद्यम्** कथमेकम् अनेकात्मकम् इति ?
§ 1954

अथ पररूपवत् स्वरूपेऽपि तद्भ्रान्तमिष्यते; तत्राह--**यथास्वम्** इत्यादि । § 1955

389/mkj

...11 यथास्वं न चेद्बुद्धेः स्वसंविदन्यथा पुनः ।

२ प] रूपादयः एव एकान्तभिन्नाः परमार्था इति बौद्धकल्पितम्, अवयव-अवयविनौ एकान्तभिन्नाविति यौगैः परिकल्पितम् ।
५ स्यैव] स्येव
६ कृत्ता] प्रवृत्ता
१० त्वाभ्या] भ्याम
१२ ल्पंविवेद] कल्पः स्याद्विधेः
१२ इति] उद्धृतोऽयम्--न्यायवि° वि° द्वि° पृ° १४ ।
१३ इ] यथा मृच्छकलादयः ।
अन्यथैवावभासन्ते तद्रूपरहिता अपि । इति शेषः ।
१४ इ] अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकंवित्तिभेदवानिव लक्ष्यते ॥
१४ वेति] चेति
१६ अ] स्वरूपेऽविभ्रमाकारः पररूपे च विभ्रमाकारः ।

स्वाकारविभ्रमात् सिध्येद् भ्रान्तिरप्यनुमानधीः ॥ ११

||§ 1957

प्रत्यक्षानुमानयोः स्वभावविभ्रमात् अनेकान्तमन्तरेण प्रत्यक्षस्यापि स्वार्थसंवेदनानुपपत्तेः सुव्यवस्थितं तत्त्वम् ! § 1958

**बुद्धेः** न **चेद्** यदि नास्ति । किम् ? इत्याह--**स्वसंवित्** स्वरूपवेदनम् । किं सर्वथा ? न इत्याह--**यथास्वं सर्वचित्तचैत्तानाम् आत्मसंवेदनं प्रत्यक्षम्** /ms न्यायबि० १ । १० अविकल्पकं बुद्धेः स्वरूपम् **प्रभास्वरमिदं चित्तं प्रकृत्या** प्र० वा० १ । २१० इत्यभिधानात्, तदनतिक्रमेण । **अन्यथा पुनः** विद्यते । कुतः ? इत्याह--**स्वाकारविभ्रमात्** बुद्धेः **स्व** आत्मीय **आकारः** स्वप्रकाशता **स्वयमेव प्रकाशते** प्र० वा० २ । ३२७ इति तस्य तत्र वा **विभ्रमात्** । ततः किम् ? इत्याह--**सिध्येत्** स्वलक्षणबुद्धेः भ्रान्तिरूपम् । केन प्रमाणेन ? [न] केनचित्, स्वयं भ्रान्तात् प्रत्यक्षात् तदसिद्धेः बहिरर्थवत् । अनुमानेन इति चेत्; अत्राह--**भ्रान्ती**त्यादि । **अपि**शब्दो भिन्नप्रक्रमः, **अनुमानधीरपि भ्रान्तिः** । § 1959

कारिकार्थं दर्शयन्नाह--**प्रत्यक्ष** इत्यादि । **सुव्यवस्थितं तत्त्वम् सर्वं भ्रान्तत्वम** पहसनवचनमिदम् । स्वसंवेदनप्रत्यक्षमेव अभ्रान्तमिति चेत्; अत्राह--**अनेकान्तमन्तरेण** इत्यादि । एवं मन्यते--तत् स्वसंवेदनप्रत्यक्षं नीलमहं वेद्मि इति ग्राह्यग्राहकसंवेदनस्वभावम्, ततोऽन्यद्वा स्यात् ? प्रथमपक्षे **अनेकान्तमन्तरेण** न केवलमनुमानस्य अपि तु **प्रत्यक्षस्यापि स्वार्थसंवेदनानुपपत्तेः सुव्यवस्थितं तत्त्वम्** स्वयमेव स्वस्य वा अर्थः इति । द्वितीये सुखनीलादौ का वार्त्ता ? भ्रान्तत्वमिति चेत्; अन्यस्य तद्विपरीतस्य अदर्शनेनाऽसत्त्वात् । दर्शनेऽपि तद्वदेव, ततः तदेव चोद्यम् **प्रत्यक्षानुमानयोः स्वभावविभ्रमात् सुव्यवस्थितं तत्त्वम्** इति । § 1960

स्यान्मतम्--तद् विभ्रमविवेकनिर्मततया यद्यथात्मानं न दर्शयति तथापि तच्चेतनदया दर्शयति इतरस्य विभ्रमाभाव इति; तत्राह--**सुव्यक्त** इत्यादि । § 1961

...12 स्वव्यक्तसंवृतात्मानौ व्याप्नोत्येकं स्वलक्षणम् ।
यदि हेतुफलात्मानौ व्याप्नोत्येकं स्वलक्षणम् ॥ १२

||§ 1963

---

९ मेव] यं सैव
९ इति] नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः । ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥--प्र० वा० ।
१५ म] न्तं तत्त्वमु-
२३ त] ल
२३ था] द्यप्या
२४ या] सच्चेतनादितया
२४ सु] स्व

न बुद्धेर्ग्राह्यग्राहककाकारौ भ्रान्तावेव स्वयमेकान्तहानेः । तौ चेद् भ्रान्तौ किमभ्रान्तं यत् प्रत्यक्षं स्यात् ? तौ हि तदात्मानौ तद्व्यतिरेकेण एकान्तस्यानुपलब्धेः । कथञ्चिदुपलब्धौ सत्याञ्च तद्विवेकानुपलब्धौ उपलब्धस्यापि संवृतौ चेतःस्वलक्षणस्य सकृद् व्यक्तेतरस्वभावौ व्याप्नुवतः क्रमेण हेतुफलव्याप्तौ कः प्रतिबन्धः ? § 1964

/ms **व्यक्तः** प्रत्यक्षः संविदेत बोधस्वभावः **संवृतः** तद्विपरीतो वेद्यवेदकाकारविवेक इत्येके **स्वं खण्डशः चेत् संवेत्ति** इत्यादि नानार्थमेतद् 390/mkj इत्यपरे । तस्मात् सचेतनादिरूपेण इव विभ्रमविवेकरूपेणापि बुद्धिः चकास्ति केवलं तदुत्तरकालभाविनी विकल्पबुद्धिः तत्रासन्तं ग्राह्याद्यावरणपटं परिकल्प तद्विवेकं संवृणोति नेतरद् रूपम् । तदुक्तं केनचित्-- § 1965

*अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ प्र० वा० २ ।
३५४§ 1967

विकल्पेन निश्चीयते इति । तत्राह--**सु व्यक्त** इत्यादि । **व्यक्तो**ऽसंवृतः चेतनादिस्वभावः, तत्संवरणे क्षणविवेकवत् बुद्धिव्यवहारोच्छेदः । **संवृतो** दर्शितः तदभावे विभ्रमविरहात् शास्त्रमनर्थकम् । **स्वौ** व तो **व्यक्तसंवृतात्मानौ** च **व्याप्नोति** तदात्मकं भवति **एकं स्वलक्षणं** बुद्धिवस्तु **यदि** इत्यनेन पराभ्युपगमं दर्शयति । तर्हि इति अत्र द्रष्टव्यम् । **हेतुफलात्मानौ व्याप्नोति एकं स्वलक्षणम्** । तदेवं क्रमाऽनेकान्तसिद्धेः एकस्य कार्यकारणभावनिषेधनं सौगतमतघाति । § 1968

ग्राह्याद्याकारविवेकं निर्मलं विज्ञानं तावत् न संभवति इति **न बुद्ध**त्यादिना प्रतिपादयन् तदभ्युपगम्य चेयं कारिका कृता इति च **कथञ्चिद्** इत्यादिना **व्यक्तेतर** इत्यादिना कारिकां विवृण्वन्नाह--**न बुद्धेः** इत्यादि । **न बुद्धेः ग्राह्यग्राहककाकारौ भ्रान्तावेव** मनोविकल्पभ्रान्तिरचितावेव न तात्त्विकौ इति एवकारार्थः । कुतः ? इत्यत्राह--**स्वयं** सौगतस्य योऽयम् सर्वमविभागं /ms ज्ञानम् इति **एकान्तः** तस्य **हानेः** विकल्पे तो भावतः स्याताम्, कथमन्यथा **अविभागोऽपि बुद्ध्यात्मा, ग्राह्यग्राहकसंवित्तिभेदवानिव** विकल्पेन **लक्ष्यते** । प्र० वा० २ । ३५४ इति सुभाषितं त[स्य] स्यात्, तदेकान्ते विकल्पभावात् । सोऽपि तदन्तरेण न; इत्यपि वार्त्तम्; तत्रापि तथाकल्पने अनवस्थानात् । **विकल्पो वस्तु तस्व द्वा** नान्यदिति किं कृतोऽयं विभाग इति मन्यते । § 1969

७ संवेत्ति] संवित्तिः
१० ल्प] प्य
१३ सु] स्व
१५ तो] च तौ
२१ त्या] बुद्धेरित्या
२५ तो] तौ
२९ द्वा] ऽवस्तुनिर्भासः

तत्रैव दूषणान्तरमाह--**तौ** वेदिनौ ग्राह्यग्राहककाकारौ **चेत्** यदि **भ्रान्तौ** निरंशबुद्धौ विकल्पारोपितौ **किम् अभ्रान्तम्** तदाकाररहितम् न किञ्चित् **यद्** अभ्रान्तं **प्रत्यक्षं स्यात्** । इदमत्र तात्पर्यम्--यदि अविभागो बुद्ध्यात्मा कदाचित् प्रतिपन्नः स्यात् तद् विकल्पेन तौ तत्र आरोपितौ इति, नान्यथा । नहि शुक्तिकाऽसिद्धौ तत्र रजतारोपसिद्धिः, रजतत्ववद् रजते विकल्पे च तौ यदि सिद्धौ भवतः । न चैवमिति । § 1970

ननु प्रतिभासि सर्वदा तदात्माऽविभागः, तौ च विकल्पारूढौ इति चेत्; अत्राह--**तौ** ग्राह्यग्राहककाकारौ **हि** खलु **तस्य** बुद्ध्यात्मनः **आत्मानौ** स्वभावौ । कुतः ? इत्याह— **तद्व्यतिरेकेण** तदाकारव्यतिरेकेण **एकान्तस्य** एको ग्राह्यादिरहितोश्चेतनैव **अन्तो** धर्मो यस्य तस्य **अनुपलब्धेः** । तदुपलम्भमभ्युपगम्य दूषणमाह--**कथञ्चिद्** इत्यादि । शब्दादिरूपेण न विवक्षितरूपेण **उपलब्धौ** संशयादिव्यवच्छेदेन निर्णीतौ **सत्यां च तद्विवेकानुपलब्धौ** तस्य विभ्रमस्य विवेकस्य अनुपलब्धौ **उपलब्धस्यापि संवृतौ सत्यां च** इत्यनु वर्त्तते । किम् ? इत्याह--**व्यक्तेतरस्वभावौ सकृद् व्याप्नुवतः** । कस्य ? **चेतःस्वलक्षणस्य क्रमेण स्वहेतुफलव्याप्तौ कः प्रतिबन्धः ?** § 1971 391/mkj /ms

ननु फले वृत्तिमद् विज्ञानं न हेतौ वृत्तिमत् स्वकाले तदभावात्, अत एव हेतौ वृत्तिमत् न फले, तत्कथं चेतःस्वलक्षणस्य स्वहेतुफलव्याप्तिप्रतिपत्तिः यतः तत्र **कः प्रतिबन्धः** इति स्यादिति चेत्; अत्राह--**संवृणोत्येव** इत्यादि । § 1972

...13 संवृणोत्येव यथा वित्तिः सामान्येन स्वार्थयोः ।
विशेषाहितफलैकान्तभेदानवभासेत स्वतः ॥ १३
॥§ 1974

...14 प्रत्यासत्त्या ययैक्यं स्यात् भ्रान्तिप्रत्यक्षयोस्तथा ।
स्वहेतुफलयोरैक्यं ततस्तत्त्वं त्रयात्मकम् ॥ १४
॥§ 1976

१ वेदिनौ] वेदिनः
४ तौ] ग्राह्यग्राहककाकारौ ।
४ त्र] अविभागबुद्धौ ।
६ च] ग्राह्यग्राहककाकारौ ।
७ तिभासि] भासते
१० नैव] तोऽन्तश्चेतनैव
१६ स्व] ज्ञानकाले ।
१६ त] ज्ञानकारणस्य फलस्य अभावात् ।
२२ प्र] एतदेव स्वयं देवैरुक्तं सिद्धिविनिश्चये । प्रत्यासत्त्या ययैक्यं स्यात् भ्रान्तिप्रत्यक्षयोस्तथा । भागतद्वद्भेदेऽपि ततस्तत्त्वं द्वयात्मकम् ॥ --न्यायवि॰ वि॰ प्र॰ पृ॰ १६८ ।

क्वचिदेकान्तसंभवे अनेकान्ता प्रतीतिरियं क्रियेत । यावता बुद्धेः खण्डशः स्वार्थसंवेदनं भवत् साकल्येन तावदान्ध्यविजृम्भणम् । परस्पर... § 1977

**संवृणोत्येव** स्थागयत्येव । का ? इत्याह **वृत्तिः** ज्ञानम् । कान् ? इत्याह— **विशेषाहितु फलैकान्तभेदान्** । कयोः ? इत्यत्राह--**स्वार्थयोः** स्वस्य अर्थस्य च । **स्वतः** आत्मना । केन ? इत्यत्राह--**सामान्येन** पूर्वापरैकत्वेन **स्वार्थयोः** इत्येतद् अत्राप्यपेक्षं भेदैकान्तविरोधिसामान्यात्मकहेतुफलग्राहिणी इति यावत् । नन्वेवं भवता कल्प्यते, नन्वेवं सा प्रतिभासते इति चेत्; अत्राह--**अवभासेत** इत्यादि । **यथा** शब्दश्रवणा[त्] तथाशब्दानुमानम् यत्तदोर्नित्यसम्बन्धात् । ततोऽयमर्थः--**यथा** येन प्रकारेण लोके प्रतीयते वित्तिः तथावभासेत । संवृतविशेषा च सामान्येन स्वार्थयोः लोके प्रतीयते अतः तथैवावभासते । न च हेतो वृत्तस्य ज्ञानस्य फलग्रहणाभिमुख्यं विरुद्धम्, अन्यथा स्वात्मनि वृत्तस्य परत्र वृत्तिर्विरुद्धा भवेदिति सर्वस्य क्षणिकतापिसाधनमनवसरम् । एतावाँस्तु विशेषः एकत्र देशस्य अन्यत्र कालस्य भेद इति । § 1978

ननु हेतुफलसामान्यानां प्रतिभासते अन्योऽन्यविविक्तं वस्तुत्रयमापतितं
/ms नैकं तदात्मकम्, इतरथा नानैकं स्याज्जगत् इति चेत्; अत्राह--**प्रत्यासन्न** इत्यादि । **प्रत्यापोद्यतया यथा** तथाऽवभासलक्षणया, स्वहेतोः तथोत्पत्तिलक्षणया अशक्यविवेचनरूपया वा **ऐक्यं** तादात्म्यं **स्यात्** । कयोः ? इत्यत्राह--**भ्रान्तिप्रत्यक्षयोः** । तथाहि--यदेव पतिशङ्खज्ञानम् अर्थक्रियास्थितिविरहात् भ्रान्तं तदेव स्वरूपे अभ्रान्तं संस्थानमात्रे वा [ऽ]विपर्ययात् । न च तत्र ज्ञानान्तरस्य अविसंवादकल्पना, तत एव तद्दर्शनात्, अन्यथा अन्यतोऽपि
392/mkj न भवेत्, ततोऽपि अन्यत एव कल्पनादित्यव्यवस्थानात् । यथैव हि शङ्खे पीतज्ञानस्य पीतसम्बन्धार्थ क्रियाविरहः तथा संस्थाने साधारणास्पष्टानुमानाकारार्थक्रिया[ऽ]भावः अन्यथा सामान्यवस्तु । व्यवहारी नैवं मन्यते इति चेत्; पीतज्ञाने संस्थानप्रतिभासे सम । व्यवहारे तदैक्यमिति चेत्; तत्रैव क्षणभङ्गादिखण्डनम्, परस्तु परमार्थोऽपि चिन्तितः । तदैक्ये किम् ? इत्याह--**तया** प्रत्यासत्त्या **स्वहेतुफलयोः ऐक्यम्** । **तत** ऐक्यात् **तत्त्वं त्रयात्मकम्** उत्पादाद्यात्मकम् । § 1979

प्रथमकारिकां व्यतिरेकमुखेन व्याख्यातुकाम आह--**क्वचिद्** इत्यादि । **क्वचिद्** बहिरन्तर्वा यद्वा विभ्रमे अन्यत्र वा व्यवहारे परमार्थे वा **एकान्त-**

---

३ वृत्तिः ] वित्तिः
४ विशेषाहितु ] हित
६ पेक्षं ] क्ष्यम्
७ न्वेवं ] नत्वेवं
११ हेतो ] तौ
१३ तापि ] ताप्र
१५ ते ] ने
१५ व ] हेतुः पूर्वपर्यायः फलमुत्तरपर्यायः तयोश्च अन्वितं सामान्यं द्रव्यमिति वस्तुत्रयम् ।
१६ न्न ] सत्त्या
१७ था ] प्रत्यासत्त्या यया
२३ न्धार्थ ] म्बन्ध्यर्थ
२४ स्तु ] सामान्यं वस्तु स्यात्[[अर्थक्रियाकारित्वात् ।]]
२५ म ] च समत्वम्

**संभवे एकान्तस्य** अशेषपरवादिमतस्य प्रमाणबलात् **संभवे** सति **प्रतीतिः अयं [इयं] क्रियेत** । किंभूता ? इत्याह--**अनेकान्ता** इत्यादि । समस्ति तत्संभवः ततस्तदपलाप इति; अत्राह--**यावता** इत्यादि । **स्वार्थयोः संवेदनं** ग्रहणं **बुद्धेः खण्डशः** स्वसंवेदनम् स यदि रूपेण न विभ्रम- विवेकस्वरूपेण /ms
इति ध र्मो त्त रा दिः । तथा ज्ञानरूपेण न उत्तरार्थक्रियासम्बन्धिना स्वभावेन **द्विष्ठसम्बन्धसंवित्तिः** प्र० वार्तिकाल० २ । १ इत्यादि वचनात् । इतरथा साधनज्ञानप्रतीतिकाले एव प्रमाणतायाः प्रतीतेः तत्परीक्षणं बाल-विलसितम् । यदि पुनः तत्सन्धिता तद्ग्रहणात्, गृहीतोपि अर्थक्रिया दर्शने[न] न निश्चीयते; न तर्हिगृहीता । नहि व्यवहारी गृहीतमनिश्चितं मन्यते । तदनुसारी च भवान्, परमार्थतः कार्ये कारणभावोभावेऽपि त-दिच्छया तदङ्गीकरणात्, § 1980

*परमार्थाविकल्पेन सांवृतत्वं विहन्यते ।
तद्ग्रहे सांवृतत्वे तु तद्ग्रहोऽस्तु विकल्पतः ॥ इति§ 1982

प्र ज्ञा क रः । तथा अर्थवेदनमपि नीलादितया न जातया * इति सौत्रान्तिकः । द्रव्यादेः तद्रूपेण न सकल तजन्येकलंनक शक्तिरूपेण, तत्र अविवादप्रसङ्गात्, शक्तेः ततो भेदैकान्तेऽपि उक्तम्, इति वैशेषिकादिः । **भवत्** जायमानम् । किं करोति ? इत्याह--**साकल्येन** इत्यादि । **ताव-द्भ्रान्त्यविद्यंभणं** तत्त्वपरीक्षायाम् मध्यस्थं यदि चेतः, तद्विज्ञभणे तु नेति । § 1983

द्वितीयां विवृण्वन्नाह--**परस्पर** इत्यादि । सर्वं सुगमम् । § 1984

परमपि अन्यथानुपतत्तादाहरणं दर्शयन्नाह--**परस्पर** इत्यादि । § 1985

...15 परस्पराविनाभूतौ नामोन्नामौ तुलान्तयोः ।

---

२ स्ति] नास्ति
४ दि] सा[[इह च रूपादौ वस्तुनि दृश्यमाने आन्तरः सुखाद्याकारस्तुल्यकालं संवेद्यते । न च गृह्यमाणाकारो नीलादिः सातरूपो वेद्यते इति शक्यं वक्तुम्; यतो नीलादिः सातरूपेणानुभूयते इति न निश्चीयते ।--न्यायबि० टी० १ । १० ।]]तादि
७ त] प्रमाणतापरीक्षणम् ।
८ न्धिता] तत्सम्बन्धिना
८ गृहीतोपि] तापि
१० कार्ये] कार्य
१० भावो] वा
११ या] व्यवहारिजनेच्छया ।
१४ *] जडतया
१५ क] तज्जन्यफलजनक
१८ णं] तावदन्ध्यविजृम्भणं
१८ णे] तद्विजृम्मणे
२१ त्ता] पपत्तेरु
२२ तु] तुलना--तुलोन्नामरसादीनां तुल्यकालतया न हि । नामरूपादिहेतुत्वं न च तद्व्यभिचारिता ॥ तादात्म्यं तु कथञ्चित् स्यात् ततो हि न तुलान्तयोः ।--न्यायवि० २ । ३३८ । प्रमाणसं० पृ० १०७ ।

स्थाल्यादौ लिङ्गमीदृक् चेत् सर्वं कार्यं न किं पुनः
॥ १५ ॥§ 1987

393/mkj

तुलान्तयोर्नामोन्नामयोरेकतरस्य दर्शनादन्यतरस्यानुमानम्, *वृक्षादेः छायाद्यनुमानं कार्यलिङ्गं संभावयन् स्वभावहेतुमुपरुणद्धि । शक्यं हि वक्तुम्--भावः सत् कृतकं वा वस्तु जनयन् अनश्वरमेवं जनयति । अतः स्वकारणस्वभावानुमानात् कारणात्मनः प्रतिपत्तिरिति दुःखं वतायं तपस्वी, तस्य स्वोरस्ताडं क्रन्दतोऽपि लोकानिवृत्तेः । § 1988

**तुलान्तयोः नामोन्नामौ परस्परविनाभूतौ**अनुमीयेते इत्यध्याहारः । उन्नामाविनाभावी नामस्तदविनाभावी चोन्नामः अन्यथानुपपत्तेः इत्यनुवर्त्तते । **स्थाल्यादौ** आदिशब्देन जले चन्द्रादिग्रहणम्, सति द्रव्यमेघादौ अनुमीयते /ms इत्युपस्कारः । अत्रापि अन्यथानुपपत्तेः इत्यनेन घटना । अथ पूर्वम्, एतच्च पूर्वसामग्रीकार्यमिति, अतः सैवाऽनुमीयते; इत्यत्राह--**ईदृग्** इत्यादि । कार्यम् **इदृग् लिङ्गं चेद्** यदि [इ]ति **किं पुनर्न कार्यम्** सत्त्वादिकमपि कार्यमेव स्यादिति । § 1989

**ईदृग्** इत्यादि भागं विवृण्वन्नाह--**तुलान्तयोः** इत्यादि । **तुलान्तयोः** यौ **नामोन्नामौ** तयोः **एकतरस्य** नामस्य उन्नामस्य वा **दर्शनाद् अन्यतरस्य** उन्नामस्य नामस्य वा **अनुमानम्** तथा **वृक्षादेः** सकापा **द्यनुमानम्** अथवा **वृक्षाः** सम्बन्धि **छायादिना अनुमानम् कार्यलिङ्गं संभवं** भवन् सौगतः **स्वभावहेतुम् उपरुणद्धि** निराकरोति, कार्यं हेतुं तं ब्रूयात् । एतदेव दर्शयन्नाह--**शक्यं हि** इत्यादि । **[शक्यं हि वक्तुम्] भावं** * **सत्** तत् **कृतकं वा** अपेक्षितपरव्यापारं वा **वस्तु जनयतु[यन्]** स्वरमेवां [अनश्वरमेव] नित्यरूपमेव **जनयति** घटादौ तथा दर्शनात् इति मन्यते । ततः किम् ? इत्याह— **[य]** तः कारणाद् अतो वा लिङ्गात् **स्वकारणस्वभावानुमानाद्** भावस्य कृतकस्य वा यत् कारणं तस्य यः स्वभावो नश्वरश्च कार्यजननरूपः तस्य अनुमानात् **कारणात्मनः** कृतकस्य **वा प्रतिपत्तिः** इति न साक्षात् तत्कालभाविना ता न श्वरत्वमनुमीयत इति भावः । अथ यदा अतः स्वकारणस्वभावानुमितिः तदा कार्यं सत्त्वादि, यदा तु स्वभावभूतं नश्वरत्वं

३ *] तुलना--न हि वृक्षादिः छायादेः स्वभावः कार्यं वा । न चात्र विसंवादोऽस्ति । चन्द्रादेर्जलचन्द्रादि प्रतिपत्तिस्तथानुमा । न हि जलचन्द्रादेः चन्द्रादिः स्वभावः कार्यं वा ।--लघी॰ स्ववृ॰ श्लो॰ १२--१३ ।
१७ कापा] सकाशात् **छाया**
१८ वृक्षाः] क्षादेः
१८ न्] **संभावयन्**
२० *] वः
२१ वा] अपेक्षितपरव्यापारो हि भावः स्वभावनिष्पत्तौ कृतक इति ।--न्यायबि॰ ३ । १२ ।
२६ न] तन्न

तदा स्वभाव इति चेत्; तर्हि यदा रसादेः स्वभावानुमानं तदा कार्यत्वं यदा तु समानकालरूपाद्यनुमानं तदा लिङ्गान्तरत्वम् । प्रकृते तादात्म्यसम्बन्धो /ms नात्रेति चेत्; अत्रापि योग्यता इति समानम् । यथैव वा अर्थान्तरयोः अकार्यकारणयोः क्वचित् कदाचित् सहदर्शनेभावेऽपि पुनः एकाभावेऽपि तददर्शनात् सर्वत्रानाश्वासः तथा अनर्थान्तरयोरपि क्वचित्तादात्म्यदर्शनेऽपि तदन्यथादर्शनात्, यथा वृक्षत्वाभावेऽपि चूतत्वस्य इति सर्वत्र अनाश्वासः । एवं परीक्षणे लोकस्य व्यवहारविलोपः । न चायं पक्षः क्षमो भवता तद-ङ्गीकरणात्, सौगतस्य कथं क्षमः तेनापि अयमङ्गीकृतः ? प्रागद्वैतावतारात् लोकात् तादात्म्यादिप्रतिबन्धसिद्धिवत् सहभाविनां रूपादीनाम् अयथानुप-पत्तिप्रतिबन्धसिद्धिरपि अस्तु विशेषाभावादे वाह--**दुःखम्** इत्यादिना । 394/mkj **दुःखं** यथा भवति तथा जीवति इत्यनुसन्धिः, **वत** इति विषादे । **अयं** सौगतः **तपस्वी** वराकः । किं कुर्वन् ? इत्याह--**लोक** इत्यादि । कुतः ? इत्याह--**तस्य** सौगतस्य **सपादो दरसि र स्तानं** क्रियाविशेषणमेत-त् । **क्रन्दतोऽपि** रुदतोऽपि **लोकस्य अनिवृत्तेः** अन्यथानुपपत्त्या प्रवृत्ताद् व्यवहारात् इति सम्बन्धः । § 1990

अत्रैव उदाहरणान्तरं दर्शयन्नाह--**तथैव** इत्यादि । § 1991

...16 तथैव ज्योतिषां मध्ये उदिताज्ज्योतिषोऽनुमा ।
उदेष्यति कुतो हेतोः कृत्तिकादेः भवेदिति ॥ १६
॥§ 1993

प्रतिबन्धपरिसंख्यायाम् उदेष्यति शकटं कृत्तिकोदयादिति किं प्रमाणम् ? न चात्र कश्चिद् व्यभिचारोऽस्ति । नो चेत्; प्रमाणसंख्या प्रतिब-न्धपरिसंख्याघातिनीव लक्ष्यते । ज्योतिषामनागतोदयास्तमयादिफलज्ञान-मनुमानमनिच्छतः प्रमाणान्तरप्रसङ्गात् । तादात्म्येन कुतश्चित् अतीतैक-कालानां गतिर्नानागतानां व्यभिचारात् [प्र॰ वा॰ स्ववृ॰ पृ॰ ४९] इति व्याप्तिमेव प्रतिक्षिपन् न केवलमनुमानमुद्रां भिनत्ति किन्तु समस्तप्रमाणप्र-मेयव्यवस्थामपि । § 1994

यथैव अन्यथानुपपत्तेः नामोन्नानयोः एकतरदर्शनाद् अन्यतरानुमानं वृ-क्षादेः छायाद्यनुमानं **तथैव** तेनैव प्रकारेण **अनुमा** भवेत् इति सम्बन्धः । कुतः क्व ? इत्याह--**ज्योतिषां मध्ये उदिताद्यो तिषः कृत्तिकादेः हेतोः** लि-

---

४ ने] न
६ स्य] आम्रलतासंभवात् ।
१० विशेषाभावादे] वात् । एतदे
१३ स्तानं] स्वोरस्ताडं
१९ रिसंख्यायाम्]
तुलना--भविष्यत्प्रतिपद्येत कृत्तिकोदयात् ।
श्व आदित्य उदेतेति ग्रहणं वा भविष्यति ॥
तदेतत् भविष्यद्विषयमविसंवादकं
प्रतिबन्धसंख्यां प्रमाणसंख्यां च प्रतिरुणद्धि
।--लघी॰ स्व॰ श्लो॰ १४ ।
२८ उदिताद्यो] ज्ज्यो

/ms ज्ञाद् **उदेष्यति** ज्योतिषि शकटादौ **इति** भवन् शेष्यते सौगतैः इति चेत्; अत्राह--**कुतो** नैव भवेत् ? **अतीतैककालानां गतिः** प्र० वा० स्ववृ० पृ० ४९ प्रतिपत्तिः नो चेत्; न यदि भविष्यतां व्यभिचारादिति व्यवहारानुसारिणोऽपि तद्व्यवहारविलोपः । § 1995

न कृत्तिकोदयात् भविष्यच्छनुमानम् अपि तु द्वयोः कारणभूतयोः सामग्र्या इत्येके । तेषां तयोः यौगपद्यम्, इतरथा रसादीनामपि तु न स्यादिति निरर्थकम्--**अतीतैककालानां गतिः** प्र० वा० स्ववृ० इति । § 1996

किञ्च, एकसामग्र्यधीनत्वेऽपि दयोरयौगपद्ये मानसाध्यक्षविषय इन्द्रियज्ञानसहकारीन स्यात् । § 1997

ननु कथञ्चित् सामग्रीस्वभावानुमानेऽपि न भाविशकटोदयात्मानम् **अतीतैककालानां गतिः** प्र० वा० स्ववृ० इत्यस्य विरोधा वे विदं स एव जानाति य एवं वदन्ति । § 1998

395/mkj साध्यपि कारणम्, कृत्तिकोदयात् शकटोदयस्य करणस्य अनुमानम् इत्यपरे । तेषां स्वग्रन्थे श्व आदित्य उदेता अद्य तद्व इन्द्रियात् *इत्यनुमाननिषेधंकथा प्रमाणानाम् अयुक्तम् । उभयोः अनभ्युपगमे कथमनाभावि निवृत्तिः ऐकान्तिकी स्यात् ? पूर्वभावित्वे च कार्यस्य सुगतस्य सुगतत्वा प्रोक्तनीया दसासर्वा * कार्यभूता उत्तरा कारणरूपा ततः तदर्थं प्रवृत्तेः । तथा च **अत्र भगवतो हेतुफलसंपत्त्या प्रमाणभूतत्वंन स्तोत्राभिधानम्, तत्र हेतुः आशयप्रयोगसम्पत् सांव्यवहारिकप्रमाणापेक्षया, आशयो जगद्धितैषिता, प्रयोगो जगछन्नाछासृत्वं फलं स्वपयत् स्वार्थसंपत् सुगतत्वेन** प्र० समु० वृ० १ । १ इत्यादि सर्वमयुक्तम्; संव्यवहारापेक्षयैवं

---

१ ते] न चेष्यते
८ त्वेऽपि] कृत्तिकोदय-शकटोद ।
८ य] इन्द्रियज्ञानविषयस्य अनन्तरो विषयः इन्द्रियज्ञानस्य सहकारी भवन् मनोविज्ञानमुत्पादयति स्यादिति भावः ।
१० यात्] नु
११ विदं] धादिति चेत्; इदं
१२ न्ति] ति
१३ पि] भाव्यपि
१३ स्य] कारणस्य
१४ रे] भाविकारणवादिनः प्रज्ञाकरगुप्ताः ।
१४ तेषां] तुलना--तेन यदुच्यते भट्टेन--यः सवित्रुदयो भावी न तेनाद्योदयोऽन्वितः । अथ चाद्योदयात् सोऽपि भविता श्वोऽनुमीयते ॥...तदपास्तम्, यतश्च यथोपवर्णितः साध्यान्वयो हेतुर्विद्यते ।--प्र० वा० स्ववृ० टी० पृ० १८ । यच्चाद्योदयात् श्वः सूर्योदयाद्यनुमानं न तदनुमानं नियामकलिङ्गाभावात्, अद्य गर्दभदर्शनात् श्वः सूर्योदयानुमानवत् ।--प्र० वा० स्ववृ० टी० पृ० ४९ ।
१५ इन्द्रियात्] तदुदयात्
१५ *] श्व आदित्य उदेतेति ग्रहणं वा भविष्यति--लघी० श्लो० १४ ।
१५ निषेधं] ध
१५ म्] क्ता
१६ नाभावि] नागामि
१७ *] सुगतत्वात् प्राक्तनी या दशा सा सर्वा
१८ त्वं] त्वे
१९ म्] शास्त्रादौ शास्त्रार्थत्वात् । भगवानेव हि प्रमाणभूतोऽस्मिन् प्रसाध्यते ।--प्र० वार्तिकाल० पृ० १ ।
२० न्नाछासृत्वं] जगच्छासनात् शास्तृत्वं
२० त्] स्वार्थसम्पत्
२१ इत्यादि] अत्र च भगवतो हेतुफलसम्पत्त्या प्रमाणभूतत्वेन स्तोत्राभिधानं प्रकरणादौ प्रसादजननार्थम् ।

व्याख्याने अग्निः कारणं दाहाद्यर्थक्रिया तत्फलम् इत्यनभ्यासे अग्निकार- /ms णलिङ्गदर्शनात् तत्फले प्रवृत्तिः इति प्रसक्तम्, तथापि तत्क्रिया[या] एव कारणत्वे वह्लीदाहः फलपर्णकौघः कारणम्, अतः तद्दाहानुमानं कारणात् कार्यानुमानम् । कथमेवं सुगतत्वं तायित्वं व हेतुः आशयप्रयोग[ः] तत्फलं न स्यादिति तदवस्थः पूर्वो व्याघातः स्यादिति चेत्; कुत एतत् ? सुगतत्वाभावे आश्रय प्रयोगसंपदोऽप्य [भावात्, आशयप्रयोगसम्पदभावे ।तद]भावे न सुगतत्वम् । अन्यत्रा *हेतुत्वम् । अन्योऽन्यहेतुकत्वे वा अन्ये [अन्योऽन्य]समाश्रयान्नैकतरस्यापि सिद्धिः । संव्यवहाराश्रयात् सर्वत्र हेतुफलभावम् अन्योश्रयदोष+इष्टमध्यभी ष्टमिच्छति न पुनः अकारणभूतात् कृत्तिकोदयाद् अन्यथानुपपन्नात् तद्दोषपरिवर्जितात् शकटोदयानुमानमिति सत्यं परोगुप्तप्रज्ञेः । एतेन अरिष्टादेः मरणाद्यनुमानं चर्वितंचर्वितम् ।
§ 1999

कारिकार्थं व्याचष्टे--**प्रतिबन्ध** इत्यादिना । **प्रतिबन्धस्य** अविनाभावस्य **परिसंख्यायां** तादात्म्यतदुत्पत्तिरूप एव नान्यः प्रतिबन्ध इति परिगणने क्रियमाणे **उदेष्यति शकटं कृत्तिकोदयात् इति किं प्रमाणम् ?** इति पृच्छति । न प्रत्यक्षम्; लिङ्गाश्रयणात् । ना[नुमा]नम्; परप्रतिबन्धमन्तरेण भावात् । प्रमाणान्तरं स्यादिति भावः । यद्वा परस्य **किं नैव प्रमाणम्** इति व्याख्येयम् । व्यभिचा[रा]न्न प्रमाणमिति चेत् [अत्राह--] **न चात्र** इत्यादि । देशकालाकारविपर्ययग्रहणलक्षणानां **व्यभिचाराणां** मध्ये नैकोऽ**प्यस्ति** इति **कश्चिद्** ग्रहणम् । कुत एतत् ? इत्यत्राह--**कृत्तिका** इत्यादि । § 2000 396/mkj

यदि वा, तत्प्रमाणम् । कुतः ? इत्यत्राह-- **कृतात्यादि** । ननु तदन्य- /ms थानुपपत्तिः कुतोऽवगम्यते ? विवक्षितशकटोदयाभावे अदर्शनादिति चेत्; तन्न; सर्वदर्शिनोऽदर्शनं सर्वत्र अर्थाभावं गमयति, नान्यस्य व्यभिचारात् । एकदा तदा दृष्टानां सकषायधात्रीफलानां पुनरन्यथापि दर्शनात् । नाऽयं सौगतपक्षे दोषः तदवगमनिमित्तस्य तादात्म्यादिप्रतिबन्धस्य भावादिति चेत्; नैतत्सारम्; यतो यथैव बहुलं शिंशपायाः वृक्षस्वभावदर्शनात् [तदविना]भूतं

---

तत्र हेतुराशयप्रयोगसम्पत्, आशयो जगद्धितैषिता, प्रयोगो जगच्छासनात् शास्तृत्वम्, फलं स्वार्थसम्पत् । स्वार्थसम्पत् सुगतत्वेन त्रिविधमर्थमुपादाय । प्रशास्तार्थं सुरूपवत् । अपुनरावृत्त्यर्थ सुनष्टज्वरवत्, निःशेषार्थं सुपूर्णघटवत्...--प्र॰ समु॰ वृ॰ ज॰ १ । १ ।
३ ह्लीदाहः] हे
४ व] च
५ व्याघातः] सुगतत्वाभावेऽपि तत्सद्भावात् ।
६ य] आशय
७ *] थाऽ
९ भी] अन्योऽन्याश्रयदोषदुष्टमप्यभी
११ गो] प्रज्ञाकरगुप्तः नष्टप्रज्ञः इत्यर्थः ।
११ ज्ञेः] ज्ञ एव
११ र्वितं] त
२१ त्यादि] **कृत्तिके**त्यादि
२३ स्य] न चानुमाता सर्वदर्शी विद्यते, अनुमानवैफल्यात् ।
२४ दा] तथा
२४ थापि] देशान्तरे कालान्तरे द्रव्यान्तरसम्बन्धे च मधुराणामपि दर्शनात् ।
२५ त] अविनाभावावगम ।
२५ तादात्म्यादिप्र] आदिपदेन तदुत्पत्तिर्ग्राह्या ।

सर्वत्र सर्वदा वृक्षस्वभावस्य इति गम्यते अन्यथा सकृदपि तत्स्वभावा न भवेत्, तथा कृत्तिकोदयः बहुलं [शक्टोदया]विनाभाविस्वभावः प्रतीयमानः सर्वत्र सर्वदा तत्स्वभावः, अन्यथा सकृतदपिस्व  तत्स्वभावताऽयोगादिति गम्यते । अत्र अदृष्टव्यभिचाराशङ्का न शिंशपायामिति किंकृतो विवेकः ? यथा च वृक्षाभावेऽपि तद्भावो निःस्वभावता तस्याः तथा कृत्तिकोदयस्य तदविनाभाविस्वभावविरहे तदवस्थैव निःस्वभावता । न चेदमत्र चोद्यम्— तत्स्वभावता तस्य कुतः इति; शिंशपायामपि तुल्यत्वात् । न तुल्यम्; तस्याः स्वकरणात् * । अत्रापि इदमेव उत्तरमस्तु । तदनुमानप्रसङ्गश्चेत्; शिंशपायामपि इति । § 2001

स्वभावहेतवे दत्तः सांप्रतं किं जलाञ्जलिः ।
येनैर्व  सौगते  ब्रूते नो चेत् लिङ्गान्तरं न वित्  ॥§ 2003

अत्रैव दूषणान्तरं दर्शयन्नाह--**प्रमाण** इत्यादि । एवं मन्यते-- अस्य अनुमाने अन्तर्भावात्तु द्वे प्रमाणे इति **प्रमाणसंख्या प्रतिबन्धप-**
/ms **रिसंख्याघातिनी[व]** द्विविध एव प्रतिबन्ध इति तत्परिसंख्या प्रमाण परिसंख्याघातिनी **लक्ष्यते । इव** शब्देन अनादरं दर्शयति । कुतः ? इत्यत्राह--**ज्योतिषां** ग्रहादीनां यौ **अनागतोदयास्तमयौ** तौ **आदी** यस्य **तत्फलस्य** तस्य **ज्ञानम्** उक्तप्रतिबन्धाद् **अनुमानमनिच्छतः प्रमाणान्तरप्रसङ्गात्** । उपलक्षणमेतत्--तेन इच्छतः *प्रतिबन्धान्तरप्रसङ्गादिति गम्यते । § 2004

पुनरपि तद्दर्शयन्नाह--**तादात्म्येन** इत्यदि । **कुतश्चित्** लिङ्गा[त् अतीतैककालानां गतिः] **नानागतानाम्** । कुतः ? **व्यभिचारात्, इ**त्येवं न केवलम् **अनुमानमुद्रां भिनत्ति** । किं कुर्वन् ? **प्रतिक्षिपन्** । काम् ? **व्याप्तिमेव** *तद्ग्राहकप्रमाणाभावादिति भावः । तथाहि— तत्प्रतिबन्धनियमसमये बुद्धेः नाऽकारणम् अर्थो विषयः, न च साकल्यव्याप्तिविष[या]याः तस्याः सर्वम् अतीतं वर्त्तमानमनागतं च कारणम्; अनन्तरातीतस्यैव सर्वत्र कारणत्वोपगमात्, इतरथा तत् स्वान्यकार्यदेशादिसङ्गतां कुर्यादिति । § 2005
397/mkj

१ त] वृक्षस्वभावा ।
३ पिस्व] सकृदपि तस्य
५ द्भावो] वे
५ स्याः] शिंशपायाः ।
८ *] स्वकारणात्[[तत्स्वभावाया एव उत्पन्नत्वात् इति सम्बन्धः ।]]
८ त] कारणानुमानप्रसङ्गः ।
११ येनैर्व] वं
११ ते] तो
११ वित्] किं
१८ तः] शकटोदयाद्यनुमानं स्वीकुर्वतः ।
१८ *] तादात्म्य-तदुत्पत्तिव्यतिरिक्तपूर्वोक्तरचरस्वरूप-अविनाभावस्वीकारापत्तेः ।
२३ *] व्याप्तिग्राहक ।
२४ यः] इति नियमानुसारेण ।
२४ स्याः] बुद्धेः ।
२६ था] कारणम् ।
२६ तां] तं[[अन्यदेशे अन्यकाले च कार्यं कुर्यादितिः ।]]

नास्माकं प्रतिभासाद्वैतवादिनां तन्मुद्राभेदो दोषाय सूत्वाद् इत्यपरे। तत्राह--**किंचिद्** इति। **किन्तु** अपि तु **समस्तप्रमाणप्रमेयव्यवस्थामपि भिनत्ति** इत्यनुवर्त्तते। अनुमानाभावे तदयोगात्, इतरथा **प्रमाणेतरसामान्यस्थितेः*** *इत्यादिकमनर्थकम् अन्यत् सर्वम्। § 2006

तद्व्यवस्थाभेदेऽपि प्रत्यक्ष[ं] प्रमाणप्रमेयव्यवस्थाभेद इति चेत्; अत्राह--**प्रत्यक्ष**। इत्यादि। § 2007

...17 प्रत्यक्षमेकान्तेन स्वलक्षणविलक्षणम्।
मिथ्यानुमाऽसदर्था स्व-लक्षणं मुख्यलक्षणम्॥ १७ ॥§ 2009

विशद...कालान्तर...तथा संवित्तिं ग्राह्यग्राहकविकल्पविभ्रमात्मिकां संपश्यामो न पुनरेकान्तम्। § 2010

*तस्य हि लक्षणं देशान्तरादिव्याप्त्या विधातव्यम्। न च स्वसंवेदनव्यक्तिभिः स्वयमलक्षिताभिः तच्छक्यमिति तात्पर्यम्। युक्तमेतत्--यदि साकल्येन चतुर्विधप्रत्यक्षलक्षणमुच्येत, न चैवम् तदभावात्, विपर्ययात् स्वसंवेदनस्यैवोच्यते *तत् प्रत्यक्षसिद्धमिति चेत्; अत्राह--**प्रत्यक्षम्** इत्यादि /ms । **प्रत्यक्षं** स्वसंवेदनाख्यम् अन्यद्वा। किंभूतम्? इत्याह--सुगतस्य सम्बन्धि यद् **एकान्तेन** असाधारणत्वेन एकेन असहायेन अन्तेन धर्मिना उपलक्षितं **स्वलक्षणं** तेन **विलक्षणं** विसदृशं न तदाकारं ततो विमुखं वा। अनुमितेः तत्सिद्धिरिति चेत्; अत्राह--**मिथ्या** विसंवादिनी **अनुमा**। कुतः? इत्यत्राह--**असदर्था** निर्विषया निष्प्रयोजना वा, प्रतिभासाद्वैतस्य स्वतःसिद्धेरभ्युपगमात्। यद्वा **असन्नर्थो** हेतुलक्षणप्रमाश्च भावेन यस्या इति। ततः किम्? इत्याह--**स्वलक्षणं** परकीयं **मुख्यलक्षणम्,** अनेन स्वलक्षणशब्दनिरुक्तं करोति। § 2011

कुतः पुनः प्रत्यक्षं तद्विलक्षणम्? इत्यत्राह--**विशद** इत्यादि। यथैव च युगपद् एकस्य स्थवीयसो ग्रहणसंभवः तथा कालान्तरस्थायिनोऽपीति;

---

१ सूत्वाद्] सूक्तत्वात्
२ किंचिद्] किन्तु
३ अनुमानाभावे] प्रमाणप्रमेयव्यवस्थाऽयोगात्।
३ *] यदा हि प्रमाणप्रमाणाभासयोः सामान्या स्थितिर्भवति तदा इदं प्रमाणम् इदश्चाप्रमाणमिति विभागः अविसंवादिहेतुमूलकेन अनुमानेनैव भवति।
४ *] अन्यधियो गतेः। प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् इति शेषः। श्लोकोऽयं धर्मकीतिरप्येतदाह इति कृत्वा उद्धृतः प्रमाणमीमांसायाम् पृ० ८ उद्धृतश्च प्रमाणप० पृ० ६४ प्रमेयक० पृ० १८० स्या० रत्ना० पृ० २६१ इत्यादिषु।
११ *] प्रत्यक्षस्य।
१४ *] स्वसंवेदनम्।
१७ र्मिना] धर्मेण
२२ निरुक्तं] क्तिं
२३ क्षं] स्वलक्षणविलक्षणम्।

अत्राह--**कालान्तर** इत्यादि । अनेन तदप्रत्यक्षत्वासाधने विरुद्धोपलब्धिं दर्शयति । § 2012

यद्येकस्मिन् तदद्वैतवाञ्छा तेऽत्र स्थवीयसि ।
पूर्वोत्तरानुगभागे मुक्त एवासि सर्वथा ॥ इति मन्यते ।§ 2014

यदि पुनः ततो भिन्नं तदद्वैतम्; तत्राह--**यथासंवित्तिम्** इत्यादि । तथा **संवित्तिं संपश्यामः ग्राह्यग्राहकावेव विकल्पौ** भेदौ ताभ्यां **विभ्रमात्मिकाम्**
398/mkj । एवं मन्यते--यदि स्तम्भादिव्यतिरिच्य मानशरीरं तदद्वैतम् स्तम्भादि किं भविष्यति ? [भविष्यति] चेत्; स्वतोऽस्यावभासनोत व *योगात्, स्वसंवेदनविभ्रमप्राप्तेः । अन्यतः चेत्; सिद्धं नः समीहितम् । एकान्तमपि संपश्यन्ति भवन्त इति चेत्; अत्राह--**न पुनः** इत्यादि । § 2015

/ms तदेवं बहिरन्तश्च अनेकान्ते सिद्धे यत् प्राप्तं तद्दर्शयन्नाह--**स्वभावो व्यवहारोऽपि** इत्यादि । § 2016

स्वभावो व्यवहारेऽपि हेतुस्तत्त्वप्रवर्तनात् ।
संपश्यतामनेकान्तं तन्मिथ्याभिनिवेशिनाम् ॥ १८ ॥
तत्तद्विरुद्धादिशब्दज्ञानतर्कप्रयोगतः । [१/२] ।§ 2019

स्वभावोपलम्भः भावस्वभाव एव । ततः व्यवहारोऽनेकान्तविषयः साध्यः । तत्र विषयप्रतिपत्तौ अप्रतिपन्नविषयिणो दर्शनात् न युक्ता । तन्नैतत्सारं कार्येत्यादि । अनुपलम्भः पुनः व्यतिरेकव्यवहारसाधनः । तदयं बहिरन्तश्चानेकान्तं पश्यन्नेव तत्त्वदृष्टिपराङ्मुखः समयावष्टम्भादन्यतो वा तर्कप्रयोगैस्तद्व्यवहारमवतार्यते । सत्त्वाद्यनुपलब्धेः तथैव भावः अनेकान्तात्मक एव । बहिरपि एकान्तानुपलब्धेः, अन्यथाऽनुपपत्तेः । § 2020

भिन्नप्रक्रमोऽपिशब्दः **स्वभाव** इत्यस्यानन्तरं द्रष्टव्यः । ततो न केवलम् अलंभः * अपि तु स्वभावोऽपि अनेकान्तोपलम्भोऽपि **हेतुः** लिङ्गम् । क्व ? इत्यत्राह--**व्यवहारे**, प्रक्रमाद् अनेकान्तस्य इति गम्यते । ननु तदुपलम्भादेव साक्षाद् अनेकान्तसिद्धेः कुतोऽसौ हेतुः ? इत्यत्राह--**तत्त्वे** अनेकान्तस्वरूपे **प्रवर्त्तनाद्** अन्तर्भूतणिजर्थो या द्रष्टव्यः । केषाम् ? इत्याह--**संपश्यताम्** । अपिशब्दोऽत्रापि द्रष्टव्यः । किम् ? इत्याह--**अनेकान्तं तन्मिथ्याभिनिवेशिनाम्** । तस्मिन् अनेकान्ते **मिथ्या** योऽभिनिवेशः एकान्ताभिनिवेशः तद्वतां तन्निरासार्थम् इत्यर्थः । एतदुक्तं भवति--यथा स्व-

---

१ त्वा ] त्व
८ तोऽस्या ] स्तम्भादेः ।
८ * ] ने [[स्तम्भादित्वायोगात्, स्वसंवेदनरूपताप्राप्तेरित्यर्थः ।]]तद
९ चेत् ] प्रतिभासते स्तम्भादिकम्, तदा ।
१२ हारोऽपि ] रेऽपि
२३ * ] उपलम्भः
२६ या ] ऽयं

भावहेतुरपि अनुपलम्भः साध्याभेदाद् भिन्ने उच्यते तथाऽयं स्वभावोपलम्भोऽपि कार्यव्याप्यस्वभावाभ्यां भिन्न इति **त्रीण्येव लिङ्गानि** न्यायबि° २ । ११ इति व्याहन्यते, इति प्र ज्ञाक र प्रयुक्तस्य हेतोः पक्षस्य च स्वयं तेन दर्शितो बाधः । § 2021

बोध्ये निरंशैकान्तसाधने कथं तत्र स हेतुः इत्य था **तत् तद्विरुद्ध** इत्यादि । **तच्छब्देन** अनेकान्तंपरामृश्यते, **तद्विरुद्ध** इत्यनेन वा अनेकान्तःविरुद्धो नित्याद्येकान्तः तौ **आदी** येषां ते तथोक्ताः । **आदिशब्दः** प्रत्येकमभिसम्बध्यते--तदादयः तद्विरुद्धादय इति । तत्र आद्येन आदिशब्देन अनेकान्तकारणकार्यसहचा रादीनां ग्रहणात्, द्वितीयेन एकान्तकारणादीनाम्, तेषां यथासंख्येन **[शब्दश्च] ज्ञानं** च तयोः **तर्केण** विपक्षे सद्भावबाधकोहेतु**प्रयोगतः** प्रयोगेण तत्प्रतिपादकवाक्योच्चारणेन । उदारप्रपञ्चस्तु नेहोक्तो ग्रन्थ गौरवात्, प्र मा ण सं ग्र हा त् ज्ञेयः पण्डितैर्मानसाभिः । § 2022 399/mkj, /ms

कारिकामाविष्कुर्वन्नाह--**स्वभावोपलम्भ** इत्यादि । स्वभावोपलम्भः, **स्वभाव एव** अनेकान्तभावस्वरूपमेया उपलभ्यते इति **उपलम्भः** स्वभावश्चासौ उपलम्भश्च इति व्युत्पत्तेः । यदि वा, तदुपलम्भे न स्वभावः सत्विति व्यवस्थाप्यत इति विषयीशब्दस्य विषय उपचारो पवृत्तेः तदुपलम्भस्वभाव इत्युच्यते । ततः किं क्रियते ? इत्याह--**ततः** स्वभावाद् **व्यवहारोऽनेकान्तविषयः** सदिति ज्ञानादिः **साध्यः** । § 2023

ननु स्वभावोपलम्भे सोऽपि सिद्ध एवेति कथं साध्य इति चेत् ? अत्राह--**तत्र** इत्यादि । **तत्र** अनेकान्ते **विषयस्य** तदुपलम्भस्य **प्रतिपत्तौ** सत्यां **अप्रतिपन्नो विषयी** येन **तस्य** सौगतादेः **दर्शनात्** [तदुप]लम्भरूपोऽनुपलम्भोऽविकल्पः ततः तत्प्रतिपत्तावपि विषयिणोऽप्रतिपत्तिः युक्ता, न भवतोऽनेकान्तोपलम्भस्य व्यवसायरूपत्वात् । न च अतः परो व्यवहारः यस्ततः साध्यः इति चेत्; उक्तमत्र **तत्र** इत्यादि । दृश्यते हि अनेकान्तोपलम्भवतोऽपि विपरीतारोपः । न च दृष्टेऽनुपपन्नं नाम । अत एव उक्तं **दर्शनात्** इति । न च भूतलदर्शनमविकल्पकम् इत्युक्तं प्रथमपरिच्छेदे इति यत्किञ्चिदेतत् । § 2024

ततः किं जातम् ? इत्याह--**तन्नेतत्सारम्** इत्यादि । यत एवं **तत्** तस्मात् **एतत्** [किम्] इत्यत्राह--**कार्येत्यादि** । **अनुपलम्भः**, **पुनः** इति

---

१ साध्या] ध्य
१ भिन्ने] न्न
१ थाऽयं] तथाऽयं
३ इति] त्रिरूपाणि च त्रीण्येव लिङ्गानि--न्यायबि° ।
५ था] इत्यत्राह--
६ अनेकान्तं] न्तः
६ वा] च
७ अनेकान्तः] न्त
९ चा] च
११ को] क
१२ त्] एतन्नामकात् ग्रन्थात् । द्रष्टव्यम्--प्रमाणसं° पृ° १०४ ।
१३ साभिः] र्मानशालिभिः
१५ मेया] रूपतया
१६ त्विति] सन्निति
१७ यी] यि
१७ वृत्तेः] चारोपपत्तेः

पक्षान्तरद्योतने **व्यतिरेकतद्व्यवहारसाधनो** भावाभावव्यवहारयोः साधन इति स्वभावोपलम्भः इत्यादिरपि व्यवहारणो वा साधनत्वादिति मन्यते । § 2025

प्रकृतं निगमयन्नाह--**तद्वयम्** इत्यादि । यत एवं **तत्** तस्मात् **अयम्** /ms एकान्तवादी सौगतादिः **अनेकान्तं पश्यन्नेव** । क्व ? इत्याह--**बहिरन्तश्च** । स किम् ? इत्याह— **तत्त्वस्य** अनेकान्त-जीवादेर्या **दृष्टिः** तस्याः **पराङ्मुखो** विमुखः तत्त्वं पश्यन्नपि न पश्यामि इति मन्यते इति भावः । कुतः ? इत्याह--**समयावष्टम्भात्** स्वागमाग्रहग्रहावेशात् **अन्यतो वा** पूर्वक नर्म्म । स किं क्रियते ? इत्यादि यमोऽर्थन्यवहारमवतापि त कैः ? इत्याह--**तर्कप्रयोगैः** तर्कमूलैः साधनवाक्यैः ता * दर्शयन्नाह--**सत्त्व** [इ]त्यादि । [आदि]शब्देन स्वपरसमयप्रसिद्धनिखिलहेतुपरिग्रहः । अनेन **ज्ञानतर्कप्रयोगतः** इति व्याख्यातम् । अधुना तद्विरुद्धाद्यज्ञानतर्कप्रयोग इति व्याख्यातुमाह--**स्वभाव** इत्यादि । **स्वभावो**ऽनेकान्तस्वरूपं **तद्विरुद्धो** नित्याद्येकान्तः उपलक्ष्य[ते, उपलक्षण]मेतत् तेन नत्कुर्यादि परिग्रहः । तस्या **अनुपलब्धेः** **तथैव** तेनैव प्रकारेण **भावः अनेकान्तात्मक इव** इति सम्बन्धः । असिद्धो हेतुः इति चेत्; अत्राह--**बहिरपि एकान्तानुपलब्धेः** इति । चिन्तितमेतत् । § 2026

ननु तदनुपलब्धिश्च स्यात् नापि भावोऽनेकान्तात्मको विरोधाभावात् 400/mkj [इति] सन्दिग्ध विपक्षव्यावृत्तिको हेतुरिति चेत्, अत्राह--**अन्यथा** अन्येन भावस्य अनेकान्तात्मकत्वाभावप्रकारेण **अनुपपत्तेः** तत्र तदनुपलब्धिरिति । तथाहि--तदनुपलब्धिः उपलब्धिनिवृत्तिम् अन्योपलब्धिः वा ? प्रथमपक्षोऽनभ्युपगमाद् दत्तोत्तरः, प्रमाणाऽसत्त्वेन असत्त्वात् । द्वितीयः पुनर्नानेकान्तमन्तरेणेपिति निश्चितम् । § 2027

तत्राह --बहिरर्थविभ्रमैकान्तवादी बहिर्विभ्रमैकान्तोपलब्धिः तत्र असिद्धो /ms हेतुरिति; तन्मतमाशङ्क्य दूषयन्नाह--**प्रत्यक्षैक** इत्यादि । § 2028

...19 प्रत्यक्षैकस्थिरस्थूलस्वभावैश्चेद्विलक्षणैः ।
एकान्तभ्रान्तस्वभावान्न भाव्यमप्रमादिभिः ॥ १९
॥§ 2030

२ वा] रेणैव
३ म्] तदयम्
८ र्म्म] पूर्वकर्मतः
८ त] इत्याह
तद्व्यवहारमर्थव्यवहारमवतार्यते
९ *] तमेव
११ इति] तद्विरुद्धादि
१३ त्कुर्यादि] तत्कार्यादि
१४ इव] एव
१७ त] एकान्तानुपलब्धिश्च ।
२० ब्धिनिवृत्तिम्] त्तिः,
२१ द्वितीयः] अन्योपलब्धिरूपा अनुपलब्धिः अनेकान्तमन्तरेण न सिद्धिमुपयाति ।
२२ रेणेपिति] णेति
२३ त्राह] अत्राह
२३ ब्धिः] ब्धेः

स्वलक्षणानां दृश्यैकस्थिरस्थूलस्वभावविरोधात् व्यतिरेके वृत्ति विकल्पानवस्थादिदोषप्रसङ्गात् बहिरर्थनिराकृतौ विज्ञप्तेरपि सर्वं समानम् । वेद्यवेदकभ्रान्तिसंवेदनविकल्पाविकल्पादीनां परस्परं सर्वथा तादात्म्यासंभवात् न किञ्चित् भ्रान्तं ज्ञानं स्यात् । व्यतिरेके सन्तानान्तरवत् अन्योऽन्यं सम्बन्धासिद्धेः । न च भावानां साकल्येन नैरात्म्यं प्रतिपत्तुं युक्तम् प्रमाणाभावात् । प्रतिपक्षैकान्तवत् तत्प्रमाणोपगमविरोधात् । § 2031

**एकश्च स्थिरश्च स्थूलश्च एकस्थिरस्थूलाः** ते च ते **स्वभावाश्च** पुनरेतेषां कर्मधारयः कार्यः तैः, **ना भाव्यम्** । किंभूतैः ? **विलक्षणैः** अन्योऽन्यविसदृशैः**चेद्** यदि । कुतः ? इत्याह--**एकान्तभ्रान्तस्वभावाद् एकान्तेन** अवश्यंभावेन **भ्रान्तो** यः **स्वभावः** तेषामेव, ततः तस्मात् तेन हेतुना । भावप्रधानो वा निर्देशः, **एकान्तेन भ्रान्तः स्वभावो** येषां तेषां भावात् **तत्त्वात्** इति द्रष्टं । तथाहि--नैते स्वभावाः सन्तः सद्भिः अभ्युपगन्तव्या एकान्तभ्रान्तस्वभावत्वात् स्वप्नदृष्टराजादिस्वभाववत् । एकान्तभ्रान्तस्वभावत्वं च ग्राह्यसमानाधिकरणतया अवभासनात्, एकत्र विरोधाद्वा दूरस्थितविरलकेशी * तत्स्वभाववत् । § 2032

एवं परमतमुपदर्श्य अत्र दूषणमाह--**अप्रमादिभिः इति** । इदमत्र तात्पर्यम्--एकस्थिरस्थूलस्वभावानां विलक्षणानाम् एकान्तभ्रान्तस्वभावोपगमे तदावेदकं प्रमाणमन्वेष्यम्, इतरथा अर्थवत्तदसिद्धेः । तत्र तत्प्रतिभासनं च अन्यथा तेन तद्विभ्रमाऽग्रहणात्, परचित्तार्थग्रहणे तदेकार्थाग्रहणवत् । तदन्वेषणे च यत एव असन्त [ ः] तत्र तत्स्वभावाः प्रतिभान्ति तत एव तदप्रमाणम्, यत एव च तेषाम् एकान्तेन विभ्रमस्वभाववेदकम् अत एव [अ]प्रमाणम्, ईषत् प्रमाणम् **अप्रमा आदिर्येषां** विकल्पादिस्वभावानां तैरपि **न भाव्यम्** । एतदुक्तं भवति--प्रमाणेतरस्वभावयोः ऐक्यम् एकान्तेन भ्रान्तस्वभावं तत्त्वाद् अवयवरूपाद्यैक्यवत् पूर्वापरभागैक्यस्थिरत्ववत् बह्ववयवसंसर्गैकत्वपरिणामस्थौल्यवद्वा । तथा च न केवलं बहिः स्वप्नाऽस्वप्नविभागो दुर्लभः किन्तु ज्ञानयादो ज्ञानार्थविभागोऽपि । § 2033 /ms

401/mkj

तत्र यदुक्तं द्वितीयः पुनः अनेकान्तमन्तरेण नेति निश्चितमिति यदुक्तम्--यद्यनेकक्षणिकसूक्ष्मस्वभाववद् एकस्थिरस्थूलस्वभावा अपि प्रत्यक्षसिद्धा एकत्र स्युः, न चैवं विचारायोगात्, केवलम् अने कल्पिता तत्त एव भ्रान्ताः इति चेत्; एतदेवोपदर्श्य दूषयन्नाह--**प्रत्यक्षैक** इत्यादि । **न** भाव्यम् बहिरन्तरपि इति सम्बन्धः । कैः ? इत्याह--**प्रत्यक्षैकस्थिरस्थूलस्वभावैः** । प्रत्यक्षविशेषणात् सांवृतैकस्थिरस्थूलस्वभावैः भाव्यम् इति गम्यते । इतरथा

---

८ ना] न

१० तेषामेव] प्रतिवादिनामेव ।

११ ष्टं] ष्टव्यम्

१४ *] ज्ञानां

२६ यादो] वादे

२९ अने] यत एव

२९ त्त] तत

सामान्येन एकादिग्रहणं क्रियेत । दूषणमाह--**विलक्षणैः** इत्यादि । **विलक्षणैः** सर्वतो व्यावृत्तैरपि इति । **अपि** शब्दः अत्र द्रष्टव्यः, **न भाव्यम्** इति । किंभूतैः ? इत्यत्राह--**अप्रमाऽऽदिभिः** । **न** विद्यते **प्रमा आदि**शब्देन हेतुफलभावादिः येषां तैः इति । कुतः ? इत्यत्राह--**एकान्तभ्रान्तस्वभावात्** । एतदुक्तं भवति--यथा एकादिस्वभावा विशदतया अवभासमाना अपि कल्पिता इष्यन्ते तथा विलक्षणाश्च विशेषाभावादिष्यताम् । § 2034

कारिकां विवरीतुमाह--**स्वलक्षणानाम्** इत्यादि । स्वलक्षाणानां बाह्यविशेषाणां **दृश्यैकस्थिरस्थूलस्वभावविरोधात्** कारणात् **बहिरर्थनिराकृतौ** । तत्र हेत्वन्तरमाह--**व्यतिरेके** स्वलक्षणेभ्यः तत्स्वभावस्य भेदे अङ्गीक्रियमाणे **वृत्तिविकल्प-अनवस्थादिदोषप्रसङ्गात्** । च शब्दः अत्र द्रष्टव्यो हेतुसमुच्चयार्थः । § 2035

ननु तत्स्वभावविरोधात् तद्दोषप्रसङ्गाच्च तत्स्वभावस्यैव बहिर्निराकृतिरस्तु न स्वलक्षणानावत् कथम् अविशेषेणोच्यते **बहिरर्थनिराकृतौ** इति ? एवं
/ms मन्यते--यथोक्तहेतुद्वयेन तत्स्वभावस्य दृश्यस्यापि निराकृतौ अन्यत्र कः समाश्वासः ? एवमर्थं च पूर्वफक्किकायां दृश्यग्रहणम्, अतत्स्वभावलक्षणानाम् अनुपलम्भाच्च । तस्यां किम् ? इत्याह--**विज्ञप्तेरपि** । न केवलं बहिरर्थश्च **सर्वम्** उक्तमनुक्तं च दूषणं **समानं** साधारणम् । तथा च निरूपित निरूप्यते च **वेद्य** इत्यादिना । **वेद्यश्च** स्तम्भादिग्राह्याकारः **वेदकश्च** तद्ग्रहणयोग्यो ज्ञानाकारः **तावेव भ्रान्तिः** सा च **संवेदनं** च आदी येषां **विकल्प्याविकल्प्या *दीनां** तेषाम् । यद्वा **वेद्य**शब्देन नीलादय आकारा उच्यन्ते, **वेदक**शब्देन तदाकारं तद्ग्राहकं ज्ञानम् । यच्चेदमुक्तम्-- § 2036

*विपयाकारभेदाच्च अधिगमभेदानां ।
भावादेवास्य तद्भावे स्वरूपस्य स्वतो गतिः ॥§ 2038

प्र॰ वा॰ १ । ६ इति § 2039

**भ्रान्ति**शब्देन ग्राह्यग्राहकसंवेदनभेदो बुद्धेः गृह्यते **मन्त्राद्युपप्लुताक्षाणाम्** प्र॰ वा॰ २ । ३५५ इत्यादेः, **अविभागोऽपि बुद्ध्यात्मा** प्र॰ वा॰ २ । ३५४ इत्यादेश्च वचनात् **संवेदन**ध्वनिना अद्वयं वेदनम्, एतेषां कृतद्वन्द्वानाम् **आदि**शब्देन विकल्पादिग्राहिणां बहुव्रीहि[ः] कार्यः तेषाम् । किंभूतानाम् ? इत्याह--**परस्पर** इत्यादि । **सर्वथा** सर्वप्रकारेण **तादात्म्यस्य** ऐक्यस्य
402/mkj वा अनेन **असंभवात्** कारणात् **न किञ्चिद् भ्रान्तं ज्ञानं स्यात्** । अयम-

६ णाश्च] कल्पिता एव स्वीकर्त्तव्या इति भावः ।
१० वृ] एकदेशेन वृत्तिः सर्वात्मना वा इत्यादयो वृत्तिविकल्पाः ।
१३ त्] णानां, तत्
१७ श्च] स्य
१८ निरूपित] तं
२० ल्प्या] पा
२० *] पा
२२ भेदानां] धियोऽधिगमभेदतः
२६ इ] द्रष्टव्यम् पृ॰ ३८८ टि॰ ४ ।
२७ इ] द्रष्टव्यम्--पृ॰ ३८८ टि॰ ५ ।

भिप्रायः--वेद्यवेदकभ्रान्तिसंवेदनयोः एकान्तेन ऐक्ये संवेदनमेव भ्रान्तिमात्रमेव वा प्रमाणकं स्यात् । यदि वा, वेद्यवेदकयोः सर्वथा तादात्म्ये अन्यतरदेव स्यात् इति न चित्रमेकं ज्ञानम्, तथा नीलमात्रेऽपि, परीक्षायां नाप्यचित्रम् इति **न किञ्चित्** चित्रमचित्रं वा **ज्ञानं स्यात्** इति व्याख्येयम् । तथा भ्रान्तिसंवेदनयो तथा तत्त्वे अन्यतरदेवेति न किञ्चिद् ग्राह्यमन्यद् भ्रान्तम् /ms । § 2040

तर्हि तेषां व्यतिरेक इति चेत्; अत्राह--**व्यतिरेके** तद्भेदे संबन्ध इत्यनुवर्त्तते, **सन्तानान्तराणामिव** तद्वत् तेषाम् **अन्योऽन्यसंबन्धासिद्धेः** कारणात् **न किञ्चिज्ज्ञानं स्यात्,** इति रिक्ता वाचोयुक्तिः--**स्वरूपस्य स्वतो गतिः** प्र° वा° १ । ६ इति न किञ्चिद् भ्रान्तं स्यात् इति । **प्रामाण्यं व्यवहारेण** प्र° वा° १ । ७ इति च, भ्रान्तिविकल्पाभावे तदयोगात् । तर्हि बहिरिव अन्यत्रापि तत्त्वस्य विचार्यमाणस्याऽयोगात् साकल्येन शून्यता । तदुक्तम्--**तदेतद्भूत[तन्नून]मायातम्** प्र° वा° २ । २०९ *इत्यादि इति चेत्; अत्राह--**न च** नैव **प्रतिपत्तुं युक्तम्** । किम् ? **नैरात्म्यं** निःस्वभावत्वम् । केषाम् ? **भावानाम्** । कथम् ? इत्याह--**साकल्येन** सामस्त्येन पररूपेण इव स्वरूपेणापि । कुतः ? इत्याह--**प्रमाणाभावात्** तन्नैरात्म्य इति विभक्तिपरिणामेन सम्बन्धः । अत्र दृष्टान्तमाह--**प्रतिपक्षैकान्ते** इव तद्वदिति भावैकान्तवदिति । तत्र प्रमाणोपगमे दूषणमाह--**तत्प्रमाणे**त्यादि । **तस्य** नैरात्म्यस्य तस्मिन् वा यत् **प्रमाणं** तस्य **उपगमविरोधात्** । तथाहि--यदि साकल्येन भावानां नैरात्म्यं न तत् प्रमाणं विचारस्याप्ययोगात् । *तच्चेदस्ति; न तु नैरात्म्यम् । § 2041

स्यान्मतम्--न कश्चित् सकलप्रतिभासवैकल्यं नैरात्म्यमाह--**मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽपि अदोषः** प्र° वार्तिकाल° ३ । २११ इति वचनात्, स्तम्भादिप्रतिभासमात्रस्य भ्रान्तस्य भावा[द्] विभ्रमेतररहितस्यावेति; तत्राह--**मिथ्यैकान्त** इत्यादि । § 2042

...20 मिथ्यैकान्तधियाऽनर्थास्थिरधीचित्रसन्ततेः ।
नो वेद बहिस्तत्त्वं कृतान्तविषमग्रहम् ॥ २० ॥§ 2044

चित्रपतङ्गनिर्भासादेर्नैकयोगक्षेमत्वं प्रतिभासस्य स्वभावभेदं न निराकरोति सन्तानैकत्वप्रसङ्गात्, बहिरपि स्वभावभेदादेव स्वलक्षणानामेकस्वभावानभ्युपगमात् । § 2045

५ त्त्वे ] तादात्म्ये ।
११ हिरिव ] अन्तरपि ।
१३ *] इदं वस्तुबलायातं यद्वदन्ति विपश्चितः । यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा ॥--प्र° वा° ।
२० माणं ] प्रमाणात्मकविचारस्याप्यभावात् ।
२० *] प्रमाणं चेदस्ति ।
२३ स्या ] स्य

**मिथ्या** इति भावप्रधानोऽयं निर्देशः तेन **मिथ्यात्वम् एकान्तो** यस्या **धियः** तया **तत्त्वं** स्वरूपं तस्या एव धियो मिथ्यैकान्तत्वं **वेद** वेत्ति सौगत इति **कृतान्तविषमग्रहम्** विभ्रमाद् विभ्रमासिद्धेः इत्युक्तत्वात् । तथा पर- /ms मपि परस्य तदग्रहं दर्शयन्नाह--**अनर्थ** इत्यादि । न विद्यते **अर्थो** बहिः ग्राह्यो यस्याः सामर्थ्यं स्वरूपालम्बना इत्यर्थः, न **स्थिरा** अस्थिरा क्षणिका 403/mkj इत्यर्थः, अनर्था च साऽ**स्थिरा** च, सा च सा **धीश्च** तस्याः **चित्रं** चित्रत्वं भावप्रधानत्वात् निर्देशस्य, तेन वा **सन्ततिः** तस्याः **तत्त्वम्** एकत्वं **वेद** । एतदुक्तं भवति--हेतुफलादीनामभावं वदता सरूपोऽसौ वक्तव्यः, अन्यत्र प्रमाणनिषेधात्, सोऽपि चित्रैकप्रतिभासात्मकः, अन्यथा सकलशून्यम् इत्युक्तम् । तत्प्रतिभासोऽपि पूर्वापरक्षणैकत्वनान्तरीयक इति **बहिः** घटादौ **न तत्त्वं वेद** अयमपि सिद्धान्तविषमग्रहः उभयत्राविशेषादिति । शेषस्य पूर्वमेव गतत्वात् । § 2046

**अनर्थास्थिरधीचित्रसन्ततेः तत्त्वं वेद बहिर्न** इत्येतद् व्यतिरेकमुखेन व्याख्यातुकाम आह--**चित्र** इत्यादि । **चित्रपतङ्गस्य निर्भासः** तदाकारं ज्ञानम् **आदिर्यस्य** चित्रास्तरणादिनिर्भासस्य प्रत्यक्षेतरादिनिर्भासस्य वा स तथोक्तः, तत्र **नैका[क]योगक्षेमत्वं योगः** उत्पादः **क्षेमः** उत्पन्नस्य संरक्ष[ण]म् अनुभवन् यस्य, अस्थिरज्ञानपक्षे संरक्षणस्याभावात् । अथवा **क्षेमो** विनाशः, तत्र तच्छब्दस्य सङ्केतात् द्विष्टेभ्रद्रिकाशब्दवत्, **एकम्** अभिन्नं **योगक्षेमं** यस्य तस्य भावः तत्त्वं **प्रतिभासस्य** चित्रपतङ्गबुद्धेः **स्वभावभेदं न निराकरोति** । कुतः ? इत्यत्राह--**सन्तानैकत्वप्रसङ्गात्** इति । **सन्तानानाम् एकत्वम्** अभेदः तस्य **प्रसङ्गात्** । यदा हि एकं ज्ञानमुत्पद्यते वेद्यते वा तदा सन्तानान्तरज्ञानान्यपि; अन्यथैकज्ञानसन्तानमात्रं जगत्, तथा च सति सुगतज्ञानसन्तानान्त /ms पर-*मिति यदुक्तं केनचित् --**स्वसंवेदनमेव एकं प्रत्यक्षं प्रमाणम् नापरम्, प्रपञ्चस्तु विनेयजनानुरोधात्** इत्यादि; तत्सर्वं प्लवते; विनेयजनाभावात् । तस्माद् एकज्ञानोदयकाले अन्यज्ञानोदयोऽभ्युपगन्तव्य इति सन्तानानाम् एकयोगक्षेमत्वं स्वभावभेदं निराकुर्यादिति पुनरपि नानन्तरदोषःपरिहारः । न चैवम्, अतः तत् स्वभावभेदनिराकरणे अकिञ्चित्करपिति मन्यते । § 2047

ननु त्रिपदंग निर्भासादौ प्रतिभासस्य यद्यपि एकयोगक्षेमत्वं स्वभावभेदं न निराकरोति तथापि एकत्वं स्यादिति चेत्; अत्राह--**बहिरपि** इत्यादि । न केवलम् अन्तः किन्तु **बहिरपि स्वभावभेदादेव** नान्यतः **स्वलक्षणानां** रूपादिपरमाणूनाम् **एकस्वभावाऽनभ्युपगमात्** परेण, इति कारणात् त-

---

४ द] द्

५ र्थ्यं] साऽनर्था

१६ त्वं] अलब्धधर्मानुवृत्तिर्योगः, लब्धधर्मानुवृत्तिः क्षेमः ।--प्र० वा० स्ववृ० टी० १ । २४ ।

१७ न्] वनं

१८ द्विष्टे] दुष्टे ।

२३ *] न्तान्नापर

२६ दोषः] ष

२७ अतः] अभिन्नयोगक्षेमत्वम् ।

२७ पि] मि

२८ दंग] चित्रपतङ्ग

स्यास्तं तस्य निराकरोति इति । एतदुक्तं भवति--यथा स्वभावभेदात् नैकत्वं बहिःपरमाणूनां तथा अन्तरपि इति । § 2048

किं स्यात् सा चित्रैकस्यां न स्यात्प्र° वा° २ । २१० इत्यादि वचनाददोषोऽयमिति चेत्; अत्राह--[अ] सिद्ध इत्यादि । § 2049

...21 असिद्धः सि द्ध से न स्य विरुद्धो दे व न न्दि नः ।
द्वेधा स म न्त भ द्र स्य हेतुरेकान्तसाधने ॥ २१

||§ 2051

404/mkj

सत्त्वादेर्वस्तुधर्मस्य असिद्धत्वं साकल्येन क्षणिकेतरैकान्तयोरसिद्धेः । अन्यथानुपपत्तेरनेकान्तसाधनाद् विरुद्धत्वम् । अनैकान्तिकत्वं पुनः सत्त्वादेः क्षणक्षयादिसाधने असमीक्षिततत्त्वार्थैः लोकप्रतीतिं प्रमाणमाश्रित्य तथा हेतुरुभयत्र वर्तते स्वपक्षविपक्षयोः, प्रागेव तत्करणसमर्थात् कारणात् पुनः स्वकालनियतकार्योत्पत्त्यविशेषेण संभवात् । न च स्वकारणसत्तया कार्योत्पत्तिर्विरुध्येत यतोऽक्षणिक एव दोषः स्यात् निर्णीत...तत्सूक्तमेतत् । § 2052

स्वलक्षणैकान्तस्य साधने सिद्धो अङ्गीक्रियमाणायां सर्वो हेतुः सि द्ध से न स्य भगवतः असिद्धः । कथमिति चेत् ? उच्यते--बहिरिवेतिसूक्ष्मपरीक्षया अन्तरपि सकलं प्रतिभासविकलमिति किं साधनज्ञानं यतो भाविनः प्राप्यस्य अनुमानादभ्यासे तत्र प्रवृत्तिः स्यात् ? किं वा पूर्वापरविविक्तमध्यदर्शनं यस्माद् यद् यथाऽवभास इत्यादि क्षणभङ्गसाधनमवतिष्ठेत ? किं वा नीलाद्यवभासनं येन यदवभासते तज्ज्ञानम् इत्यादि सिध्येत् ? एतेन सत्त्वादयोऽपि चिन्तिताः । अभावैकान्तवत् भावैकान्तेऽपि तस्य सर्वो हेतुः असिद्धः, अनुपलम्भेन तदभावात्  सर्वसङ्कराच्च । परस्पराऽनात्मकभावाऽभावैकान्तसाधने तु परस्य न अनन्तरपक्षाद् विशेषः, सर्वस्य सर्वात्मकत्वं प्रागभावा[द्यभावा]दिति । सम्बन्धाभावे अन्यस्य च अन्येन समवायादिसम्बन्धनिषेधात् । न चैवं वादिनः प्रागभावादीनामन्योऽन्यम् अन्यतो वा भेदः सिध्यति, अनवस्थाभयाद् अपरप्रागभावाद्यभावात् । ततः सूक्तम्--एकान्तसाधने हेतुरसिद्धः सि द्ध से न स्य इति । § 2053 /ms

३ इ] तस्यां मतावपि । यदीदं स्वयमर्थेभ्यो रोचते तत्र के वयम् इति शेषः ।
६ ने] असिद्धः...सत्त्वादिरचलात्मनि ।--प्रमाणसं° पृ° ११४ । प्रकृतपाठः न्यायवि° वि° द्वि° पृ° १८१ । असिद्धः...विरुद्धो मल्लवादिनः ।...--जैनतर्कवा° पृ° १०७ । स्या° रत्ना° पृ° १०३२ ।
१५ हिरिवेति] वाति
२० स्य] सिद्धसेनस्य ।
२२ प] नैयायिकस्य ।
२२ अ] क्षणिकपक्षात् ।

कश्चित् स्वयूथ्यः अत्राह--सि द्ध से ने न क्वचित्तस्य असिद्धस्याऽवचनादयुक्तमेतदिति; तेन कदाचिदेतत् श्रुतम् ? § 2054

*जे सच्चपायवायदोसे सक्कोलूया भणंति संखाणं ।
संखा वि असव्वा+ए तेसिं सव्वेवि ते सव्वा ॥§ 2056

सन्मति° ३ । ५० इति । § 2057

अथातो रूपात् चित्रमेकं ज्ञानमिष्यते; तत्राह--**विरुद्धो** दे व न न्दि नः **हेतुः एकान्तसाधने,** क्रमेणेव [अ]क्रमेणापि चित्रैकविरोधात् । तथा च कथञ्चिदेव क्षणिकत्वेन अवभासनात् ततस्तथैव भावानां क्षणिकत्वसिद्धिः । एवं सत्त्वादयोऽपि भाव्याः । § 2058

ननु यस्य वैशेषिकादेः निराकारज्ञानवादिनो नैकं ज्ञानं नीलादिनिर्भासैः चित्रं [तं] प्रति केन दृष्टान्तेन सर्वस्य अनेकान्तात्मकत्वं सिध्यति येन तदीयैकान्तसाधने विरुद्धो हेतुः स्यादिति चेत्; न; तस्यापि प्रतिप्राणि त्रिकालविषयानेकव्याप्यव्यापकपदार्थग्रहणानेकशक्त्यात्मकैकमानसज्ञानसद्भावात् । इतरथा कुतो लिङ्गलिङ्गिनोः साकल्येन व्याप्तिग्रहो यतोऽनुमानम् ? न च
405/mkj यैव तस्य अतीतग्रहणे अश्वता सैव वर्त्तमानादिग्रहणोन्मुखता; ग्राह्यैक-
/ms त्वप्राप्तेः । नहि चक्षुरादिज्ञानेषु यैव रसग्रहणोन्मुखता सैव रूपादिग्रहोन्मुखता; ज्ञानभेदवैयर्थ्यापत्तेः । तत्रापि शक्तयः तत एकान्तेन व्यतिरिच्यन्ते । सम्बन्धाभावेन समवायनिषेधात् तस्य ता इति व्यपदेशविलोपात् । तदुपकारशक्तिकल्पनायाम् अनवस्था । ततोऽनेकशक्त्यात्मकमेकं ज्ञानं तेनापभ्युपगन्तव्यमिति । कथञ्च अनेकं कस्य चित्रं ज्ञानम् ? ततः स्थितम्--**विरुद्धो** इत्यादि । तदुक्तम्--**सिद्धिः अनेकान्तात्** जैनेन्द्रव्या° १ । १ । १ शब्दार्थसम्बन्धानां सिद्धिः निष्पत्तिः आत्मसत्ताज्ञप्तिर्वा अनेकान्तात् नान्यतः इति । § 2059

अपरस्त्वाह--न मया प्रतिभासाद्वैतवादिना परमार्थतः क्वचिद् हेतुः इष्यते, यस्तु इष्यते स व्यवहारेण **प्रामाण्यं व्यवहारेण** प्र° वा° १ । ४ इत्यभिधानादिति; तं प्रत्याह— **द्वेधा स म न्त भ द्र स्य हेतुः एकान्तसाधने** इति । पक्षवद् विपक्षेऽपि वर्त्तते इति **द्वेधा** अनैकान्तिक इति यावत् । तथाहि--सत्त्वम् अर्थक्रियाकारित्वम्, अक्षणिकवत् क्षणिकेऽपि स्वसदसत्समये भावतोऽसंभवि; कल्पनया पुनः उभयत्रापि न वार्यत इत्युक्तम् । एतेन **उपलम्भः सत्त्वम्** प्र° वार्तिकाल° पृ° २३१ इति निरूपितम् । यथैव हि

---

३ वाय] संतवाय
४ व्वा+ए] असब्भावे
४ व्वा] सच्चा
५ इति] यान् सद्वाददोषान् शाक्यौलूक्या भणन्ति सांख्यानाम् । सांख्या अपि असद्वादे तेषां सर्वेऽपि ते सत्याः ।
७ नः] पूज्यपादस्य ।
१२ त] वैशेषिकस्यापि ।
१४ था] तथाभूतमानसज्ञानाभावे ।
१५ ता] णोन्मुखता
१८ ता] शक्तयः ।
२० स्य] तस्य
२९ ये] परमार्थतः ।

एकस्य कालत्रयानुयायित्वं नित्यत्वं न कुतश्चित् प्रत्येतुं शक्यं तथा एकपरमाणुपर्यवसितं क्षणिकत्वमिति च । तथापि तत्प्रतिपत्त्यभ्युपगमे सर्वस्य त्रिकालगोचराऽशेषावस्थानुयायिद्रव्यदर्शनं किन्न अभ्युपगम्यते ? यत इदं स्यात्--**यद् यथावभासते तत् तथैव परमार्थसत् यथा सुखं तत्त्वेनावभासमानं तथैव परमार्थसत्, अवभासन्ते च भावा [अ]नित्यत्वेन** इति । तथा व्यवहारा वा ऽन्यत्रापि सर्वस्य सर्वदर्शित्वम् इत्यपि नोत्तरम्; एकैकपरमाणुनियतक्षणिकत्वदर्शनेऽपि सर्वस्य सुगतत्वात् । नहि तथादर्शिनो भावतः सौगतैः अन्यः सुगत इष्यते । तथेष्टत्वाददोषश्चेत्; प्रकृतेऽप्यस्तु तदुत्तरम् । संसारीतरव्यवस्थाऽभाव इति चेत्; सुगतेतराभावोऽपि तथा न किम् ? परमार्थतो यथाऽस्याभावः तथा अन्यस्यापि । व्यवहारेण उभयोरपि सिद्धिः न वा कस्यचित् । § 2060 /ms

यत्पुनरेतत्--*प्रथमक्षणदर्शनसमये अतीताऽनागतदशादर्शने तदैव उत्पन्नमृतप्रतीतिः स्यादिति; तदपि न सुन्दरम्; [उभयत्रापि स] मत्वात् । यो हि पूर्वापरविविक्तमेकं परमाणुं पश्यति स नितरां तदैव उत्पन्नमृतम् आत्मानं पश्यति इति न कस्यचित् क्वचित् प्रवृत्तिः निवृत्तिर्वा कुतश्चिदिति प्राप्तम् । *तदभ्युपगमे सकलकालकालीनदशास्थितान्स दर्शिनोऽपि सदभ्युपगमः केन वार्यते ? अथ मध्यक्षण एव उत्पन्नो मृतश्च स्यादिति मतिः; सापि न युक्ता; यथासमयमेव तद्ग्रहणात् । अस्याऽनभ्युपगमे अन्यत्र कः समाश्वासः ? ततोऽक्षणिकवत् क्षणिकस्यापि न तत्त्वतो दर्शनम् । कल्पनया तु द्वयोरपि, इति साधूक्तम्--**द्वेधा स म न्त भ द्रस्य** इति । क्व पुनरनेन भगवता एकान्तवादिहेतूनामनैकान्तिकत्वमुच्यत इति चेत्; न; § 2061

406/mkj

*ये परस्खलितोन्निद्राः स्वदोषेभनिमीलिनः ।
तपस्विनस्ते किं कुर्युरपात्रं त्वन्मतश्रियः ॥ बृहत्स्व० श्लो०
९९§ 2063

इत्येतेन उद्भावनात् । अस्यायमर्थः--ये वादिनः अपात्रम् अभाजनम् । कस्य ? इत्याह— तन्मतश्रियः इति । तव अरजिनस्य भगवतो /ms मतभासन्नं तस्य श्रीः सर्वपदार्थव्यापि-अनेकान्ताभिधेयम्, तस्याः, एकान्तवादिनः इति यावत् । ते किं कुर्युः ? नैव किञ्चित्, स्वपरपक्षसिद्धिनिषेधौ नैव कुर्युः इत्यर्थः । किंभूताः ? तपस्विनो वराकाः । कुतः ? इत्याह--परस्खलितोन्निद्रा इत्यादि । परस्य सौगतापेक्षया नित्यवादिनः तदपेक्षया

६ वा] राभावश्चा
१२ *] नित्यपक्षे ।
१६ *] प्रवृत्तिनिवृत्तिस्वीकारे ।
१६ शास्थितान्स] तात्म
२६ त] त्वन्मत
२७ न्नं] मतं शासनं
३० वादिनः] नित्यवाद्यपेक्षया ।

सौगतस्य, स्खलितं क्रमयौगपद्याभ्याम् अर्थक्रियाऽसामर्थ्यं ततोन्निद्रा त-द्द्रष्टारः । स्वदोषेभनिमीलिनः स्वदोषान् पश्यन्तोऽपि अपश्यन्त इव वर्त्तन्ते । ततः सत्त्वादेः क्षणिकत्ववद् अक्षणिकत्वसाधनमपि समानमिति । § 2064

कारिकां व्याचष्टे--**सत्त्वादेः** इत्यादिना । **सत्त्वम्** अर्थक्रियाकारित्वम् उपलम्भम् अन्यद्वा **आदि**र्यस्य एकान्तवादिसम्बन्धिनिखिलहेतोः स तथोक्तः तस्य । किंभूतस्य ? **वस्तुधर्मस्य असिद्ध[त्व]म्** एकान्तवस्तुन एव कस्य-चिदभावात् तद्धर्मोऽपि तादृश एवेति मन्यते । § 2065

ननु नित्यैकान्ते तदभावेऽपि क्षणिकत्वे तद्भावात् नाऽसिद्धत्वमिति चेत्; अत्राह--**साकल्येन** सामस्त्येन **क्षणिकेतरैकान्तयोः असिद्धेः** सत्त्वादेः इति । § 2066

स्यान्मतम्--एकान्तवादिपरिकल्पिततत्त्वसमीक्षायां तदसिद्धिरस्तु, यथाद-र्शनं तदङ्गीकरणे अयमदोष इति; तत्राह--**अन्यथाऽनुपपत्तेः** इत्यादि । **विरुद्धत्वम्** सत्त्वादेः इत्यनुवर्त्तते । कुतः ? इत्याह--**अनेकान्तसाधनात्** । एतदपि कुतः ? इत्याह--**अन्यथा** अनेकान्ताभावप्रकारेण **अनुपपत्तेः** य-थादर्शनं सत्त्वादेः इति । § 2067

/ms अपरः पुनराह--सर्वविकल्पातीतं तत्त्वतः व्यवहारेण क्षणभङ्गादिसाध-नम् । तत्राह--**अनैकान्तिकत्वम्** इत्यादि । व्यभिचारित्वं सत्त्वादेः । **पुनः** इति वितर्के । **क्षणक्षयादिसाधने** क्रियमाणे अशेषैकान्तवादिसाध्यपरिग्र-हार्थम् **आदि**ग्रहणम् । कुतः तत्साधने ? **सत्त्वादेः** इति । कैः ? इत्याह--**असमीक्षिततत्त्वार्थैः** असमीक्षितो विपरीतारोपनिरासेन न सम्यग् ईक्षितः तत्त्वार्थः प्रतिभासाद्वैतलक्षणो यैः तैः, पृथग्जनैः इत्यर्थः । किं कृत्वा ? **आश्रित्य** । किम् ? **लोकप्रतीतिम्** भेदविषयां विकल्पबुद्धिम् । तदुक्तं कैश्चित्--**प्रमाण-मविसंवादिज्ञानम् इत्यादि प्रमाणलक्षणं संव्यवहारापेक्षया** प्र॰ वार्तिकाल॰ १ । ५ किंभूताम् ? इत्याह--**प्रमाणमिति** परमार्थतः इति मन्यते । कथम-नैकान्तिकत्वम् ? इत्याह--**स्वपक्ष** इत्यादि । तदा **तेन** परिकल्पितप्रकारेण अर्थक्रियालक्षणो हेतुः **उभयत्र** पक्षवद् विपक्षेऽपि **वर्तते** यतः । कुतः ? इत्याह— **प्रागेव** कार्योत्पत्तेः पूर्वमेव **तत्करणसमर्थात्** कार्योत्पादनशक्तात् कारणात् **पुनः** उत्तरकालं **स्वकालनियतकार्योत्पत्तेः अविशेषेण** विशेषाभावेन **संभवात्** । क्व ? **स्वपक्षविपक्षयोः** क्षणिकाऽक्षणिकस्वभावयोः । ततो य-
407/mkj दुक्तं केनचित्--**यदि नित्यो महेश्वरो भावीनि सर्व कार्याणि कर्तुं प्रागेव शक्तः तानि युगपत् कुर्यात् प्रागेव, पुनः ततोऽपि प्रागेव पुनः ततोऽपि प्रागेव इति न कार्योत्पत्तिकालव्यवस्था** । इति; तन्निरस्तम्; कथम् ? चेतनालक्षणं क्षणिकं कर्म चेत् स्वकार्योत्पत्तौ वैचित्र्यं स्वसत्तासमये कर्त्तुं
/ms शक्तम्; तदेव कुर्यात्, तस्यापि चेतनालक्षणस्य कर्मणो यत् सर्वम् अन्यद्वा कार्यं स्वसत्तासमये करोतु तस्यापि कारणं स्वं फलं तदा जनयति इति क्षणिकपक्षेऽपि कार्योत्पत्तिकालव्यवस्था दुर्घटा, इति न युक्तम्-- § 2068

१ तोन्निद्रा ] तत्रोन्निद्राः

*स्थित्वाप्रवृत्ति-संस्थानविशेषाऽर्थक्रियादिषु ।
इष्टसिद्धिः सिद्धसाधनम् । प्र° वा° १ । २० इति ।§ 2070

यदि पुनः प्रागेव समर्थादपि क्षणिकात् कारणात् कालान्तरे कार्योत्पत्तिः प्रार्थ्यते, कथमन्यथा सुप्तस्य चिरोत्थितस्य पूर्वाऽभ्यासाद् विकल्पा इति; तथा नित्यादपि प्रार्थ्यताम्, इति न युक्तम्--**नित्यादुत्पत्तिविश्लेषात्** प्र° वा° १ । ९ इति । § 2071

ननु पूर्वं समर्थमपि नित्यं पश्चात् स्वकार्यं करोतु, तथापि तेनैव कार्योत्पत्तेः, ऊर्ध्वं तस्य स्थाने पुनरपि तदेव कर्त्तव्यमिति कार्यस्योपरमः कथमिति चेत् ? उक्तमत्र--पुनः स्वकालनियतकार्योत्पत्तेः संभवादिति पुनः पुनः तस्यैव करणे न स्वकालनियतकार्योत्पत्तिसंभवः । क्षणिकपक्षेऽपि सर्वं समानम्; तथाहि--येन स्वभावेन प्रदीपः प्रमातरि ज्ञानमुपजनयति तेनैव चेद् अन्यत्र कज्जलम्; तत्र तज्ज्ञानमपि जनयेत् प्रमातरि वा कज्जलम् इति । § 2072

ननु कार्यकालं प्राप्नुवतः कारणस्य तत्त्वं विरुध्यत इति चेत्; अत्राह--**नचे**त्यादि । **नच** नैव **कार्योत्पत्तिः स्वकारणसत्तया विरुध्येत** । विरोधे कारणसत्तया विरुध्यते यथा अग्निसत्तया शीतोत्पत्तिः इति । स्वाकारणग्रहणं कुतो न विरुध्यते इति चेत् ? विरोधद्वयस्याप्यभावात् । नहि तदुत्पत्तेः तत्सत्तया सहानवस्थानलक्षणो विरोधः; अविकलकारणायाः कस्याश्चिद् भवत्याः तदन्यतरस्याः सन्निधाने नियमेन निवृत्त्यदर्शनात्, पटोत्पत्तिसमयेऽपि /ms तत्कारणतन्तुदर्शनात् । नापि परस्परपरिहारस्थिततालक्षणः; सुवर्णात्मककटकप्रतीतेः । § 2073

न चेदमत्र चोद्यम्--*पूर्वापरैकता केन प्रतीयते इति ? कृतोत्तरत्वात् । किंभूतः स नास्ति ? इत्याह--**यतो** विरोधाद् **अक्षणिक** एव न क्षणिके **दोषः स्याद्** अर्थक्रियाभावलक्षणः । कृतप्रतिक्रियत्वमस्य दर्शयन्नाह--**निर्णीते**त्यादि । निगमयन्नाह--**तत्सूक्तमेतद्** इत्यादि । § 2074

यत्पुनरुक्तम् अ र्च टे न--**सत्त्वम् अर्थक्रियया व्याप्तम्, साऽपि क्रमयौगपद्याभ्यां प्रकारान्तराभावात् तत्करणस्य, ते च अक्षणिकान्निवर्तमाने**

---

२ इति] स्थित्वा प्रवृत्तिसंस्थानविशेषाऽर्थक्रियादिषु । इष्टसिद्धिरसिद्धिर्वा दृष्टान्ते संशयोऽथवा ॥ १० ॥ ते एते कार्यहेतुत्वेनाभिमताः स्थित्वाप्रवृत्त्यादयो नैते सम्यग्घेतवः । यत एषु सत्स्वपीष्टस्यैव सिद्धिः सिद्धसाधनम् । न च सिद्धः पक्षो भवतीति...--प्र° वार्तिकाल° ।

६ इति] अपेक्षाया अयोगतः । इति हेत्वंशः ।

७ थापि] तदापि

१२ अ] भित्तौ गवाक्षे वा ।

१४ त] कारणत्वम् ।

१७ विरोध] द्विविधो हि पदार्थानां विरोधः । अविकलकारणस्य भवतोऽन्यभावे अभावाद् विरोधगतिः । शीतोष्णस्पर्शवत् । परस्परपरिहारस्थितलक्षणतया वा भावाभाववत् । --न्यायबि° ३ । ७२-७५ ।

१९ स्याः] तद्भिन्नायाः ।

२२ *] पूर्वापरपर्याययोः ।

२७ ते] क्रमयौगपद्ये ।

**तामर्थक्रियामादाय निवर्त्तेते,** *सापि सत्त्वमिति तीरादर्शिशकुनिन्यायेन क्ष-
408/mkj **णिकत्वम् अवलम्बते सर्वं पक्षान्तराभावात्,** तत्कथं **क्षणिकत्वे तदैकान्तिकम्** । इति; तदेतत् पक्षान्तरेऽपि समानमिति दर्शयन्नाह— **स्यात् सत्ता** इत्यादि । § 2075

...22 स्यात् सत्ता हेतुरक्षणिके विपक्षेऽर्थक्रियाऽग्रहात् ।
व्यापकानुपलब्धेश्चेद् व्यतिरेकः प्रसिध्यति ॥ २२ ॥ § 2077

यत् सत् तत्सर्वं क्षणिकं विपक्षे क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् । तल्लक्षणा सत्ता ततो निवर्तमाना पक्षं सन्तं तथाभूतं प्रसाधयति । यदि स्वपक्षे प्रत्यक्षवृत्त्या तत्र व्यापकानुपलब्धिर्निर्णीयेत् । विपक्षव्यावृत्त्या पक्षे प्रत्यक्षवृत्तिः, पक्षे प्रत्यक्षवृत्त्या च विपक्षाद्व्यावृत्तिरिति परस्पराश्रयं चक्रकम्, यतः तद्व्यवस्थैव न स्यात् । नन्वक्षणिके अर्थक्रियायाः सत्यं प्रत्यक्षमस्ति ? अन्यथा किं तत्रानुमानेन ? विप्रतिपत्तिस्तत्र अन्यथाऽर्थक्रियानुपपत्तिप्रयोगात् निराक्रियते । तद्द्वयमयुक्तम् । § 2078

**स्याद्** भवेत् । **सत्ता हेतुः** लिङ्गम् । क्व ? इत्याह--**अक्षणिके** अर्थे इत्यध्याहारः । कुतः ? इत्याह--**विपक्षे** क्षणिके **अर्थक्रियायाः** क्रमयौगपद्याभ्यां व्याप्तायाः सत्त्वस्य व्यापिकायाः **अग्रहात्** कुतश्चिदप्रतिपत्तेः । शक्यमनेनाप्येवं वक्तुम्--क्षणिकात् सत्त्वं स्वव्यापकनिवृत्त्या व्यावर्त्तमानं गत्यन्तराभावाद् अक्षणिके व्यवतिष्ठते इति । § 2079

स्यान्मतम्--विपक्षे क्षणिके त्वंक्रियाः व्यापारानुपलब्धेरभाव[ः] सिध्येद् यदि सा अक्षणिकात् निवर्त्तेत, अन्यथा अनैकान्तिकी कथं तत्र *तदभावं साधयेत् ? *ततः *तन्निवृत्तिश्च क्रमयौगपद्याभ्याम् अक्षणिके अर्थक्रियादर्शने

---

१ *] अर्थकिया ।
२ दे] दनै
३ इति] तथाहि क्रमयौगपद्याभ्यां कार्यकिया व्याप्ता प्रकारान्तराभावात् । ततः कार्यकियाशक्तिव्यापकयोः तयोरक्षणिकत्वे विरोधान्निवृत्तेस्तद्व्याप्तायाः कार्यक्रियाशक्तेरपि निवृत्तिरिति सर्वशक्तिविरहलक्षणमसत्त्वमक्षणिकत्वे व्यापकानुपलब्धिराकर्षति विरुद्धयोरेकत्रायोगात् । ततो निवृत्तं सत्त्वं क्षणिकेष्वेवावतिष्ठमानं तदात्मतामनुभवतीति यत् सत् तत् क्षणिकमेवेति अन्वयव्यतिरेकरूपायाः व्याप्तेर्निश्चयो भवति पृ° १४६, ४७ तस्मात् तीरादर्शिनेव इत्यादि । यथा किल बहनारूढैर्वणिग्भिः शकुनिर्मुच्यते अपि नाम तीरं द्रक्ष्यतीति । स यदा सर्वतः पर्यटँ स्तीरं नासादयति तदा वहनमेव आगच्छति तद्वदेतदपि द्रष्टव्यम् । पृ° १९३ --हेतुबि° टी° ।
१७ क] व्यापके क्रमयौगपद्ये ।
१९ त्वंक्रियाः] त्वर्थक्रियायाः
२० सा] अर्थक्रिया ।
२० अनैकान्तिकी] अनेकान्ता वर्तमाना, अथवा पक्षविपक्षयोर्वर्तमाना ।
२० त्र] क्षणिके ।
२० *] सत्त्वाभावम् ।
२१ *] क्षणिकात् ।
२१ *] सत्त्वनिवृत्तिश्च ।
२१ णिके] सति भवति ।

। न च तत्र *तद् इति; तत्राह--**व्यापक** इत्यादि । **व्यापकयोः** क्रमयौगपद्ययोः याऽ**नुपलब्धि** [र]क्षणिकासत्त्वसाधनायोपन्यस्ता तस्याः **व्यतिरेकः** क्षणिकाद् विपक्षाद् व्यावृत्तिः प्रसिद्धा, नित्ये प्रतिभातस्य क्रमेतराभ्याम् अर्थक्रियाकारित्वस्य व्यवस्थापितत्वादिति मन्यते । **चेत् शब्दः** अवधारणार्थः, निपातानाम् अनेकार्थत्वात् **अर्थक्रियाग्रहाद्** इत्यस्यानन्तरं द्रष्टव्यः । भवतु तर्हि सत्ताऽक्षणिके हेतुः तथापि जैनस्य [प्र]कृतं हीधते इति चेत्; अत्राह--**स्याद्** इत्यादि गतार्थमेतत् । **व्यापकानुपलब्धेश्चेद्** यदि **व्यतिरेकः प्रसिध्यति,** स तु न प्रसिध्यति इति मन्यते । एवं तर्हि क्षणिके हेतुः स्याद् वस्तुधर्मस्य गत्यन्तराभावात्, कथमनैकान्तिकत्वमिति चेत्; अत्राह--**स्याद्** इत्यादि । § 2080 /ms 409/mkj

कारिकाम् **यत् सत् तत् सर्वम्** इत्यादिना व्याचष्टे । **यत् सद्** अर्थक्रियाकारि **तत् सर्वं सत् क्षणिकम्, वा**शब्द इवार्थः **क्षणिकम्** इत्यस्यानन्तरं द्रष्टव्यः । क्षणिकमिव इत्यर्थ[ः] । निदर्शनमत्र नोम् अ र्च टे न तदन्तरेण अस्य गमकत्वोपवर्णनात् । कुतः ? इत्याह— **विपक्षे** इत्यादि । **विपक्षः** अक्षणिकापेक्षया क्षणिकः, तत्र **क्रमयौगपद्याभ्यां** क्रमेण यौगपद्येन च **अर्थक्रियाविरोधात्** । तथाहि--न तावत्तत्र क्रमेण अर्थस्य करणम्; एकं कृत्वा पुनः तेनैव परस्य करणं क्रमेण तत्करणम्, न च नित्यवदि चं तस्यापि निरंशैकस्वभावस्य *तत् संभवति । § 2081

एतेन जाग्रच्चेतसः समनन्तरचिरभाविप्राणादिप्रबोधकार्यद्वयं तिरस्तं यदुक्तं प्र ज्ञा क रे ण-- § 2082

*तस्मात्
कारणं यदि तज्ज्ञानं स्वभावो वार्थजन्मनः ।
कार्यं वा सर्वथा तेन ज्ञाप्यतेऽर्थक्रियोदयः ॥ प्र॰ /ms
वार्तिकाल॰ १ । ५ इति; § 2085

तत्रेदं चिन्त्यते--यदि कारणम्; कथमतोऽभ्यासे प्रवृत्तिः पुनः अर्थक्रियोदयः इति क्रमभाविकार्यद्वयम् ? यदि पुनः प्रवृत्तिः ततो नेष्यते कथमुक्तम्--**अभ्यासे भाविनि प्रवर्त्तकत्वात् प्रत्यक्षं प्रमाणम्** इति ? **अनभ्यासेऽपि पूर्वम् अतोऽनुमानं पुनः तदुदयः** इति च । तन्न नित्यादिवत् क्षणिकात् क्रमेण अर्थक्रियोदयः । नाप्यक्रमेण; एकेन युगपदनेकस्य करणं

१ च] अक्षणिके ।
१ *] अर्थक्रियादर्शनम् ।
६ ते] हीयते
१३ नो] क्त
१४ न] दृष्टान्तमन्तरेण ।
१६ त्र] क्षणिके ।
१७ पुनः] स्वभावेन ।
१८ स्यापि] वदितरस्यापि
१८ स्यापि] क्षणिकस्यापि ।
१८ *] क्रमकरणम् ।
१९ सः] जाग्रच्चित्तं हि अनन्तरं प्राणादि जनयति सुषुप्त्यनन्तरं प्रबोधं च उत्पादयति ।
१९ तिस्तं] निरस्तम्

*तथोक्तं भवेत्, तच्चनित्यस्य कालभिन्नमिव इतरस्य एकस्वभावत्वे देशभिन्नमपि न संभवति इत्युक्तम् । माभूत् क्षणिकेऽर्थे काचिदर्थक्रिया को दोष इति चेत्; अत्राह--**तल्लक्षणा** अर्थक्रियालक्षणा **सत्ता ततः** क्षणिका**न्निवर्त्तमाना पक्षं** साध्यं **सत्त्वं तथाभूतम्** अक्षणिकं **प्रसाधयति** इति युक्तम् । § 2086

अत्र अ र्च ट मतमाशङ्कते दूषयितुं **यदि** इत्यादि । **व्यापकयोः** [क्रमाऽ]क्रमयोः **अनुपलब्धिः** व्यतिरेकः अक्षणिकाद् व्यावृत्तिः **यदि निर्णीयेत तदा पक्षं सत्त्वं साधयति** इति युक्तम्, नचैवमिति मन्यते । कया नीत्या ? ह्व **स्वपक्षे** अक्षणिके **प्रत्यक्षवृत्त्य** * **तत्र** क्रमाऽक्रमयोः, प्रत्यक्षवृत्त्या तदनुपलब्धिर्बाध्यते नान्यथा । अथ [य]त एव अक्षणिकापेक्षया यो विपक्षः क्षणिकः तस्माद् व्यावृत्तिर्बाध[क]स्य अत एव स्वापक्ष प्रत्यक्षवृत्तिः इति चेत्; अत्राह--**विपक्ष** इत्यादि । **विपक्षाद् व्यावृत्तिः** या व्यापकस्य तया **पक्षे** क्षणिके **प्रत्यक्षवृत्तिः** तत्र व्यापकदर्शनं **पक्षे प्रत्यक्षवृत्त्या च विवक्षावृत्तिः इत्येवं परस्पराश्रयं** चक्रमिव आवर्त्तते **चक्रकम् यत** एवं ***तयोर्व्यवस्थैव** व्यवस्थितिर्न कस्यचित् **स्यात्** । § 2087

/ms
410/mkj

अत्रोत्तरमाह नित्यवादी--**न स्व क्षणिक** इत्यादि । **ननु** इति सौष्ठवे **[अ]क्षणिके** या **अर्थक्रिया** क्रमाऽक्रमाभ्यां यदर्थकरणं तस्याः **प्रत्यक्षमस्ति** ग्राहकम् इत्युपस्कारः । किंभूतम् ? इत्याह--**सत्यम्** अवितथम् अकल्पितं वा । तथाहि--पश्यन्नयम् इन्द्रियैः कालत्रयानुयायिनमर्थं पश्यति **अन्यथा** क्षणस्थायिनमपि न पश्येत् **किं तर्हि तत्र अनुमानेन ? न**हि प्रत्यक्षानुमानमर्थं तद् इति चेत्; अत्राह--**विप्रतिपत्तिस्तत्र** गृणिके * सौगतानां [अ]क्षणिकारोपलक्षणा **निराक्रियते** । कुतः ? इत्याह--**अन्यथा** क्षणिकत्वाभावप्रकारेण या **अर्थक्रियाया अनुपपत्तिः तत्प्रयोगात्** तत्प्रतिपादकवाक्योच्चारणादिति । § 2088

इदमपरं व्याख्यानम्--यत् सत् तत्सर्वं क्षणिकम् इति सौगतः, अक्षणिकम् इति नित्यवादी, सत्त्वाद् इति गम्यते । उभयत्र अनेन एतत् कथयति--यथा अनित्यः शब्दः पक्षसपक्षान्यतरत्वात् इति कल्पितः तथा सद् इति रण्यकात इति । विपक्षे बाधकं महा * **विपक्षे** इत्यादि । क्षणिकापेक्षया अक्षणिकः तदपेक्षया इतरो विपक्षः । शेषं पूर्ववत् । **तद्द्वयम्** आचार्यः स्वयं दूषयन्नाह--**अयुक्तम्** इत्यादि । व्याख्यातमेतत् । § 2089

---

१ *] युगपत्करणम् ।
१ मिव] क्षणिकस्य ।
९ ह्व] इत्याह--
९ *] वृत्त्या
११ क्ष] स्वपक्षे
१३ क्षावृत्तिः] विपक्षाद्व्यावृत्तिः
१४ *] प्रत्यक्षवृत्ति-विपक्षव्यावृत्त्योः ।
१६ स्व] नन्व
१९ म्] प्रतिपत्ता ।
२० न] पि तत्
२१ द्] प्रत्यक्षमर्थमनुमातुं तत्
२१ *] क्षणिके
२८ कात] इष्यते
२८ *] बाधकमाह

ननु क्षणिके प्रत्यक्षवृत्तिरस्ति न ततो न परस्पराश्रयमिति चेत्; अत्राह--**चक्रकं** पुनः पुनरुक्तस्य प्रवृत्तेः इति । किमनेन वृत्तिरस्ति । येन लत्साधनेदं मदो मत्या दित्यभिप्रायमान् परः पृच्छति--**ननु अक्षणिके** परणामभिन्येव-स्तुत्य **र्थक्रियायाः** सबन्धि **प्रत्ययक्ष सखि** नैवास्ति । **ननु** इत्यस्यक्षेपार्थत्वात् । आचार्य उत्तरमाह--**सत्यसि** ति । यदुक्तम्--**अक्षणिकेअर्थक्रियायाः प्र-** /ms
**त्यक्षमस्ति** इति तत् **सत्**यमवितथम् । हेतूपन्यासः तर्हि तत्र अनर्थक इति चेत्; अत्राह— **विप्रतिपत्तिः** इत्यादि । § 2090

स्यान्मतम्--एकस्य अनेकस्वभावविरोधात् तत्रापि न तदिति चेत्; अत्राह--**स्वभावे** इत्यादि । § 2091

...23 स्वभावेऽविभ्रमे भ्रान्तः सविकल्पेऽविकल्पकः ।
संशयेऽसंशयो भावो नित्येऽनित्योऽनुबुध्यते ॥ २३ ॥ § 2093

नित्यं द्रव्यम् अनित्यस्वभावानुपपत्तेः । स्वसंवेदनं प्रत्यक्षमेकस्वभाव-मन्तरेण भ्रान्तीतरादिस्वभावाः निःस्वभावाः स्युः स्कन्धान्तर...स्वभावभेदस्य भेदकत्वे किं प्रतीतिविपर्यासकल्पनया ? § 2094

**भावो** ज्ञानलक्षणोऽन्यो वा चन्द्रादिः, **स्वभावे** स्वरूपे सति । किंभूते ? **[अ]विभ्रमे** विभ्रमविवेकनिर्मले सच्चेतनाधावल्यादिलक्षणो **भ्रान्तः** सविभ्रमो ग्राह्याद्याकारद्वित्वादिना, तथा **सविकल्पे** अभिलापसंसर्गयोग्यप्रतिभासे **स्वभावे** इत्यनुवर्तते **विकल्पः** कल्पनारहितो **भावः** इति पदघटना । यद्वा **सविकल्पे** सभेदे नीलादिनिर्भासवत्य कुल्पो भिन्नः । तथा **संशये** स्थाणुः पुरुषः इति स्वभावे **असंशयो** विद्यमानसंशयोऽयम् इत्युल्लेख- 411/mkj
रूपेण भावो भवतीति काङ्क्षा व्याख्येयम् । अत्र सिद्धान्तः **नित्ये** स्वभावे **अनित्यो** नित्य **नुबुध्यते** ज्ञायते भावः । यदि वा, अनित्ये नित्य इति वैशेषिकादिरपि एकान्तेन नित्येतरस्वभावयोः भेदं कल्पयन् एतेन निरस्तः; तस्यापि अर्थावधारणानवधारणात्मकस्य संशया प्रत्यस्यनावो विरोधात् । § 2095

सोपपत्तिकं कारिकार्थं दर्शयति--**नित्यदिन** * । **द्रव्यम्** उक्तलक्षणं धर्मि **नित्यं** कालान्तरस्थायि इति तत्साध्यं परिणा[मि]नित्यत्वम् अत्र साध्यम्

१ स्ति ] न इति निरर्थकम् ।
३ त्या ] येन तत्साधनेनेदं स्या
४ स्तुत्य ] अपरिणामिन्येव वस्तुन्य
४ खि ] प्रत्यक्षमस्ति ?
४ स्य ] स्या
५ सि ] मि
१६ णो ] णे
१८ ल्पः ] अविकल्पकः
१९ भिन्नः ] वति **अविकल्पकः** अभिन्नः
२० पुरुषः ] षो वा
२२ नित्य ] त्योऽयमिति **अ**
२४ नावो ] संशयस्य प्रत्याख्यान
२६ *] नित्यमित्यादिना
२७ प ] परिणामे सत्यपि नित्यत्वम्, उत्पादव्ययध्रौव्यात्मकत्वमित्यर्थः ।

अन्यस्याऽनिष्टेः । कुतः ? इत्याह--**अनित्यस्वभावानुपपत्तेः** एकान्ताऽनित्यरूपस्य अघटनात् । उपलक्षणमेतत् तेन अनित्यं द्रव्यं नित्यस्वभावानुपपत्तेः
/ms इति च द्रष्टव्यम् । § 2096

ननु रूपादिव्यतिरेकेण अन्यस्य द्रव्यस्याप्रतिभासेन असत्त्वाद् आश्रयासिद्धो हेतुरिति चेत्; अत्राह--**भ्रान्तीत्यादि** । **भ्रान्त्यादीनां** कृतद्वन्द्वानाम् **आदिशब्देन** बहुव्रीहिः, पुनः **स्वभावाः** इत्यनेन षष्ठीसमासः ते **निःस्वभावाः स्युः** । किमन्तरेण ? इत्याह--**स्वसंवेदनम्** इत्यादि । **एकं** साधारणं स्वभाव**मन्तरेण** । किंभूतम् ? **प्रत्यक्षं** प्रत्यक्षग्राह्यमेत+इ बहिर्द्रव्यम् । पुनरपि किंभूतम् ? **स्वसंवेदनम्,** एतच्च अन्तःप्रत्यक्षमपि विशेषणम् अव्यभिचारादत्र युक्तम् । कुतः ? इत्यत्राह--**स्कन्धान्तर** इत्यादि । एवं मन्यते--यथा रूपादीनाम् अनेकान्तेन परस्परभेदः तथा विभ्रमेतरादीनां स यदि स्या[त्] तत्प्रसङ्गो दुर्निवार्यः । न च तथा तत्त्वव्यवस्थेति निःस्वभावाः स्युः इति भावः । भवतु तर्हि विभ्रमेतरादिनिर्भासैः एको भावः इति चेत्; अत्राह--**स्वभावभेदस्य** इत्यादि । भावस्य यः **स्वभावभेदः** तस्य **भेदकत्वे** अङ्गीक्रियमाणे **किं न किञ्चित् प्रतीतेः** बहिरन्तश्च एकानेकरूपायाः **विपर्यासकल्पनया** इति सिद्धं द्रव्यम् । ततो यदुक्तं केनचित् **स्वरूपस्य स्वतो गतिः** प्र० वा० १ । ६ इति, तत्र यदि एकानेकरूपस्य; सिद्धं नः समीहितम् । अथ अन्यथाभूतस्य **निःस्वभावा[ः] सर्वेभावाः** इति, बालिशगीतमेतत् **अज्ञातार्थप्रकाशो वा इति पारमार्थिकं प्रमाणलक्षणम्** इति प्र० वार्तिकाल० पृ० ३० । § 2097

स्वभावनैरात्म्यं न दोषाय इष्टत्वात् इत्यपरः; तं प्रत्याह--**येन भाव** इत्यादि । § 2098

...24 येनाभावः प्रमेयः स्यात्तज्ज्ञानं चेन्न तत्त्वतः ।
स्वार्थसिद्धिर्न बाध्येत विरुद्धानुपलम्भतः ॥ २४
॥§ 2100

बहिरन्तश्च धर्मनैरात्म्यं प्रमाणतः प्रतिपत्तुं नार्हत्येव विप्रतिषेधात् । प्रमाणाभावे परमार्थतो नैरात्म्यप्रतिपत्तेरभावात् । ततो भावोपलब्धिर्भवत्येव अनेकान्तसिद्धिः स्वभावविरुद्धानुपलब्धेः । § 2101

412/mkj, **येन ज्ञानेन प्रमेयः** परिच्छेद्य[ः] । कः ? इत्याह--**अभावः** सक-
/ms लव्यावृत्तिः **तज्ज्ञानं चेत् न तत्त्वतो** विद्यते इत्यध्याहारः । तत्र दूषणं

---

१ अ] कूटस्थनित्यत्वस्यानिष्टेः ।
८ मेत+इ] मेतद् इति
१८ इति] कथनात् । सर्वे भावा निःस्वभावत्वात् शून्याः इति ।--विग्रहव्या० श्लो० १ । अतो लक्षणशून्यत्वान्निःस्वभावाः प्रकाशिताः ।--प्र० वा० २ । २१५ ।
१८ त्] अनन्तरोक्तम् ।
२० रः] शून्यवादी ।
२० येन] येना

**स्वार्थसिद्धिर्न बाध्येत** इति । स्तं वा **र्थश्च** तयोः **सिद्धिः** आत्मलाभो ज्ञानज्ञेयसिद्धिः इति यावत् । **न बाध्येत** न निराक्रियेत । ग्राह्यग्राहकभावेऽप्यभायतद्भावस्यापि सिद्धेरनिवारणादिति मन्यते । § 2102

यदि वा, यदा सौगतः अभ्युपगताऽभावज्ञानेनापि वर्जितो भवति तदा बन्ध्यासुतवत् जैनाभ्युपगतस्वार्थयोः सिद्धिं ज्ञप्तिं प्रति न किञ्चिद् बाधकं ब्रूयात् । वदित्वा कथन्न स्ववचनविरोधी, इति स्वार्थयोः ज्ञप्तिर्न बाध्येत लोकसिद्धा । तत्र प्रमाणं तत्त्वतो न भवति **प्रामाण्यं व्यवहारेण** प्र० वा० १ । ६ इति वचनादिति चेत्; अत्राह--**येन अभावः प्रमेयः तद्विज्ञानं** प्रमाणं **चेत् न तत्त्वतः** परमार्थतः किन्तु संवृतिरूपव्यवहारतः । अत्र दूषणं **स्वार्थ** इत्यादि । इदमत्र तात्पर्यम्--अथ प्रमाणाद् अभावप्रतिपत्तेः भावप्रतिपत्तिरपि स्यात् इति । यद्वा अप्रमाणसिद्धो नाभावः पारमार्थिकः इति तदवस्थो भाव इति । तत्र हेतुमाह--**विरुद्धानुपलम्भतो विरुद्धस्य** अत्यन्ताभावस्य [अनुपलम्भतः] अप्रतिपत्तेः । § 2103

कारिकार्थं दर्शयति **बहिः** इत्यादिना । **वहिरन्तश्च धर्मनैरात्म्यं** सकलशून्यत्वं **प्रमाणतः प्रतिपत्तुं** बौद्धो **नार्हत्येव** । कुतः ? इत्याह--**विप्रतिषेधात्** सकलाभावप्रमाणसत्त्वयोः अन्योऽन्यं विरोधात् । अप्रमाणात्तर्हि तत्प्रतिपत्तुमर्हति इति चेत्; अत्राह--**परमार्थतो नैरात्म्यप्रतिपत्तेरभावात्** । कस्मिन् सति ? इत्याह--**प्रमाणस्याभावे** । **ततः** किं जातम् ? इत्याह— **भावोपलब्धिः भवत्येव अनेकान्तसिद्धिः** । अथ एकान्तभावोपलब्धेनैव नैवम्; अत्रार्थ /ms **स्वभाव** इत्यादि । अनेकान्त**स्वभावविरुद्ध[स्य]** एकान्तस्याऽ**नुपलब्धेः** । § 2104

यदुक्तं भावोपलब्धिरिति; तत्रास्ति तावन्नीलादेः उपलब्धिः, सा तु भावस्य इति कुतः ? तस्य तत्त्वसाधनाभावात् । उपलब्धिरेव तत्साधु केति चेत्; न; स्वप्नेऽपि तस्यास्तं तत्त्वम् इति न सत्येतरप्रविभागः पारमार्थिकः । न च तस्याः क्वचित् बाधकसद्भावेतरकृतो विशेषः; साकल्येन बाधकाभावव्यवस्था[नात्] । नाप्यर्थक्रियातः; नित्याऽनित्ययोः तदभावात्, स्वप्नेऽपि भावाच्च । सा अर्थक्रिया न भवतीति चेत्; कथमन्या ? प्रतिभासात्; अन्यत्र समानम् । बाधकाभावोऽपि तादृगेव । § 2105

---

१ वा] स्त्वं च अ
१९ ब्धिः] ब्धेः
१९ ब्धेनैव] ब्धेः
२० अत्रार्थ] अत्राह
२२ ब्धि] ब्धे
२२ सा] नीलाद्युपलब्धिः ।
२३ स्य] भावस्य ।
२३ त] भावरूपत्वसाधकाभावात् ।
२३ त्साधु] तत्साधि
२४ स्यास्तं] तस्याः[[उपलब्धेः सद्भावात् ।]]
२४ त] भावरूपत्वम् ।
२५ त] उपलब्धेः ।
२६ क्रियातः] विशेषः ।
२६ नित्याऽ] उभयैकान्तयोः ।
२७ सा] स्वप्नभाविनी ।

किंच, अर्थक्रियापि तदन्तरात् चेद् भावरूपा; अनवस्था तत्रापि तदन्तरापेक्षणात् । भावजन्यत्वाच्चेत्; अन्योऽन्यसंश्रयः । स्वतश्चेत्; घटादिरपि तथास्तु । परितोषहेतुत्वात्; स्वप्नेऽपि अत एव सा तथास्तु अविशेषात् । तन्न भावोपलब्धिर्नाम इति; तत्राह--**मिथ्येत्यादि** । § 2106

...25 मिथ्यार्थाभास्थिरज्ञानचित्रसन्तानसाधकः ।
तत्त्वज्ञानगिरामङ्ग दूषकस्त्वं विदूषकः ॥ २५ ॥§ 2108

413/mkj

स्वसंवित्तेः भ्रान्तया अर्थसंवित्त्या तादात्म्यं प्रतियतः कथमेकत्र कृतकाकृतकयोः स्थूलसूक्ष्मयोर्वा विरोधः ? तत्र मिथ्याबुद्ध्या अन्तर्ज्ञेयं साकल्येन परमार्थतो भ्रान्तमन्यथा वा प्रतियतः बहिरर्थेन कोऽपराधः कृतः यतः प्रतिक्षिपेत् ? तद्विधिप्रतिषेधतत्त्वप्रतिपत्तेः मिथ्यैकान्ते विरोधाविशेषात् । तदयं ततोऽन्तर्बहिश्च तत्त्वमेकान्तभ्रान्तया मिथ्यात्वं च व्यवस्थापयितुकामः क्षणिकेतरपक्षविधिप्रतिषेधवादिनं न विजयते साधनप्रयोगप्रतिषेधात् । § 2109

अस्यायमर्थः--**ज्ञानानि** च **गिरश्च** ज्ञानगिरः, गिरां ग्रहणं बहिरर्थोपलक्षणार्थम्, **तत्त्वानि** च ताः **ज्ञानगिरश्च** तासां **तत्त्वज्ञानगिरां** तत्त्वज्ञानानां तत्त्वार्थानां च **दूषकस्त्वम् अङ्ग** यतः सौगतः, ततो **विदूषक** उपसहनकारी बहिरर्थवस्त्वभिमतज्ञानतत्त्वदूषणात् । उभयत्र उक्तन्यायसाम्यात् । तथाहि--यथा प्रतिभासात् जाग्रद्दशायां स्तम्भादीनां परमार्थसत्त्वे स्वप्नावस्थायां तत्स्यात् इत्युच्यते तथा तत एव ज्ञानानां परमार्थसत्त्वे बहिः स्तम्भादीनामपि तद् इति [न] ज्ञानैकान्तवादावतार इति ३३० व्याहतम्--**अद्वयं नाग मुत्तमम्** इति । यथा वा प्राति भासाध्यासिततनवोऽपि स्वप्नघटादयो न परमार्थसन्तः तथाऽन्येऽपि इति कथ्यते तथा प्रतिभासवन्तोऽपि जाग्रद्धटादयोऽसन्तः[इति]ज्ञानेषु कः समाश्वासः इति बहिरर्थवत् तत्परित्यागो न्याय्यः । तथा च कुतो ज्ञानवादी परः । शेषमत्रापि पूर्ववत् सर्वं वक्तव्यम् । बहिरर्थवद् विज्ञानस्यापि न परमार्थसत्त्वम् इति चेत्; अत्राह--**मिथ्या** इत्यादि । **अर्थस्य आभा** प्रतिभासो येषां तानि **अर्थाभानि,** न स्थिराणि **अस्थिराणि**

१ रात्] अर्थक्रियान्तरात् ।
२ यः] भावजन्यत्वात् अर्थक्रियाया भावरूपता, अर्थक्रियायाश्च भावस्य भावरूपतेति ।
२ श्चेत्] अर्थक्रियायाः भावरूपत्वश्चेत् ।
६ ज्ञान] वचनानाम् ।
६ ङ्ग] अङ्ग इति सम्बोधने ।
१८ त] परमार्थसत्त्वम् ।
१८ त] प्रतिभासादेव ।
१९ द्] परमार्थसत्त्वमिति ।
१९ नाग] यान
२० इति] द्रष्टव्यम्--पृ० १ टि० ८ ।
२० प्राति] प्रति
२० वोऽपि] प्रतिभासमानशरीराः ।
२१ थाऽ] स्तम्भादयः ।
२२ न्तः] यदि असन्तः तर्हि ।
२२ त] ज्ञानस्यापि परित्यागः ।
२३ रः] विज्ञानवादी बौद्धः ।

क्षणिकानि इत्यर्थः, **अर्थाभानि** च तानि **अस्थिराणि** च पुनः तानि च तानि **ज्ञानानि** च, मिथ्या च तानि ज्ञानानि च तेषां **चित्रा** नानाकाराः **सन्तानाः** तेषां **साधकस्त्वम् अङ्ग** यतः ततो **दूषकः [त्वं विदूषकः]** विभ्रमैकान्ते तत्साधकत्वायोगात् । § 2110

कारिकां विवृण्वन्नाह--**स्वसंवित्तेः** इत्यादि । सर्वचित्तचैत्तानां या **स्वसंवित्तिस्तस्याः अर्थसंवित्त्या** बहिरर्थग्रहणेन । किंभूतया ? **भ्रान्तया** स्वप्नवदसदर्थविषया**भ्रान्तया, तादात्म्यं** तौ भ्रान्तौ आत्मानौ यस्याः तस्या भावः **तादात्म्यं प्रतियतः** सौगतस्य । एतदुक्तं भवति--यथा अर्थसंवित्तिः याथात्म्यसंवित्तिः भ्रान्ताऽभ्रान्ता वा तथा [स्व] संवित्तिरपि यदि भ्रान्ता अन्यथा वा स्यात्, एकान्तेन तत्र अर्थसंवित्त्या भ्रान्तया तस्याः तादात्म्यं प्रतियतः **कथमेकत्र** बाह्ये वस्तुनि **कृतकाकृतकयोः स्थूलसूक्ष्मयोर्वा** धर्मयोः **विरोधः ?** स्वसंवित्तिवत् *तत्संवित्तेरपि अभ्रान्तत्वाद् इति मन्यते । § 2111

*इदं व्याख्यानं कस्मान्न भवति--**स्वसंवित्तेः अर्थसंवित्त्या** बाह्यनिर्भासेन भ्रान्तेन अभ्रा न्तेन वा **तादात्म्यम्** एकत्वं **प्रतियतः कथमेकत्र तयोर्विरोधो** विरुद्धधर्माध्यासस्य ज्ञानेऽप्यनिवारणात् इति ? **स्वभावेऽविभ्रमे भ्रान्तः** सिद्धिवि° ६ । २३ इत्यादिना पुनरुक्तताप्रसङ्गात् । **अर्थसंवित्त्या** भ्रान्तया सह तस्याः तादात्म्यं भ्रान्तत्वं प्रतियतः **तत्र** तस्यां स्वसंवित्तौ **मिथ्याबुद्ध्या** भ्रान्तया धिया **अन्तर्ज्ञेयं** ज्ञानस्वरूपं **भ्रान्तम् अन्यथा वा प्रतियतः साकल्येन** अनवयवेन **परमार्थतो** न व्यवहारेण **कोऽपरोधो** न कश्चिद्दोषो **बहिरर्थेन कृतः यतो**ऽपराधात् **प्रतिक्षिपेत् सौगतः** बहिरर्थम् इति विभक्तिपरिणामेन सम्बन्धः । § 2112 414/mkj, /ms

एवं मन्यते--मिथ्याबुद्ध्या अन्तर्ज्ञेयं साकल्येन परमार्थतो भ्रान्तम् अन्यथा वा यथा परः प्रतिपद्यते तथा सन्तं बहिरर्थं प्रतिपद्यताम् अविशेषात् । § 2113

स्यान्मतम्--यदि तया बहिरर्थं प्रतिपद्यते; कथं सा मिथ्या ? तथा चेत्; न तया किञ्चित् प्रत्येति । तथा प्रत्येति मिथ्या च सा इति विरुद्धमिति; तत्राह--**तद्** इत्यादि । **तयोः** अन्तर्ज्ञेय-बहिरर्थयोः यौ **विधिप्रतिषेधौ** अन्तर्ज्ञेयस्य बहिरर्थस्य च यो विधिप्रतिषेधौ इत्यर्थः, तयोर्या **तत्त्वप्रतिपत्तिः** याथात्म्यसंवित्तिः **तस्या मिथ्यैकान्ते विरोधाविशेषात्** । अयमभिप्रायः--यथा तदेकान्ते कस्यचिद् विधेः तत्त्वतः प्रतिपत्तिर्नास्ति तथा प्रतिषेधस्यापि इति तन्निषेधाभावे न तदेकान्तसिद्धिरिति । § 2114

---

३ अङ्ग] सम्बोधने ।
७ या] षयया
९ भ्रान्ता] अभ्रान्ता ।
१० स्याः] स्वसंवित्तेः ।
१२ *] बहिरर्थे विरुद्धधर्मप्रतिभासस्यापि ।
१३ *] अनन्तरोक्तम् ।
१५ इति] शङ्कायाः ।
१६ इत्यादिना] पूर्वश्लोकेन ।
१७ स्याः] स्वसंवित्तेः ।
२२ अ] अभ्रान्तम् ।
२५ या] संवित्त्या ।
२५ त] मिथ्या चेत् ।
२६ था] तया
२८ यो] यौ
३१ त] बहिरर्थप्रतिषेधाभावे ।
३१ त] विज्ञानैकान्तवादसिद्धिरिति ।

प्रकृतं निगमयन्नाह--**तदयम्** इत्यादि । यत एवं **तत्** तस्माद् **अयं** सौगतः **व्यवस्थापयितुकामः** । कुतः ? इत्याह--**ततो बुद्धिं सत्त्वं** व्यवस्थापकात् न्यायात् । किं व्यवस्थापयितुकामः ? इत्याह--**अन्तर्बहिश्च । च** /ms इति भिन्नप्रक्रम इवार्थो **अन्तः** इत्यस्या नन्तरं द्रष्टव्यः । **अन्तरिव बहिस्तत्त्वं** परमार्थसत्त्वमिति । तथाहि--स्वप्नाऽस्वप्नप्रयोरविशेषं प्रतिपाद्य बहिरर्थं निराकुर्वतापि बुद्धिः परमार्थरूपा अभ्युपगन्तव्या, परमार्थसांव्यवहारिकप्रमाणलक्षणप्रणयनात् । तदभ्युपगमे न्यायो बहिरपि न राजदण्डवारित इति भावः । तत्कामः किं करोति ? इत्याह--**क्षणिकेतर** इत्यादि । **क्षणिकश्च इतरश्च** [अ]क्षणिकः, तयोः तावेव वा **पक्षे** तयोर्याथासंख्येन **विधिप्रतिषेधौ** वदति इत्येवं शीलस्**तद्वादी तं न विजयते** । यथा क्षणिकपक्षविधिवादी स्वन्यायेन क्षणिकपक्षं विदधाति, *तन्निषेधवादी तद्दोषेण क्षणिकपक्षं निषेधति, तथा अयमपि इति । तर्हि बहिरिव स्वरूपविभ्रान्ता बुद्धिरिति चेत्; अत्राह—**मिथ्यात्वं च । तदयम् अन्तर्बहिः** इत्यनुवर्त्तते, **स्वयम्** आत्मना **व्यवस्थापयितुकामः**, कया ? **एकान्तभ्रान्त्या** । शेषं पूर्ववत् । अयं तु विशेषः--यथा क्षणिकवादी कल्पनया स्वपक्षं साधयन् विपक्षं न जहाति विपक्षं वा निषेधन् नित्यग्राहकप्रमाणप्रतिविधानेन स्वपक्षं तिरस्करोति तथाऽयमपि इति ।
§ 2115

415/mkj न त्वक्तं विधिना क्षणिकेतरपक्षविधिप्रतिषेधवादिनो न तत्त्वसाधनमस्ति, अस्य तु विद्यते इति कथमुच्यते **न तद्वादिनं विजयते** इति चेत् ? अत्राह--**साधन** इत्यादि । इदमत्र तात्पर्यम्--विज्ञप्तिमात्रं परमार्थसद् बहिरर्थः पुनः तद्विपरीत [इति] दर्शने विज्ञप्तिवद् अन्यस्यापि प्रत्यक्षतः सिद्धे तन्मात्रसाध- /ms ने पक्षस्य प्रत्यक्षबाधनमिति न तत्र हेतूपन्यास [ ] तदुक्तम्--**न तस्य हेतुभिस्त्राणम् उत्पन्ने च यो हतः** इति । **साधनस्य** तन्मात्रलिङ्गस्य **प्रयोगो** वचनं तस्य **प्रतिषेधात्** निराकरणात्, निराकृते तदनुपयोगात् । बहिरर्थवत् तन्मात्रस्यापि न परमार्थसत्त्वम् इति मते साधनमपि तथाविधमेव । नचाऽसत् असतो लिङ्गम्; अतिप्रसङ्गात् । ततः **साधनप्रयोगप्रतिषेधात्** असतः प्रयोगवैफल्यात् इति मन्यते । यदि वा, तत्प्रयोगस्य प्रतिषेधात्, भ्रान्तिमात्रे तद्वचनस्य स्वयमेव निराकरणा[त्] तदयं तद्वादिनं न विजयते इति । § 2116

२ त्त्वं ] बुद्धिसत्त्व
७ मा ] अज्ञातार्थप्रकाशो वा इति पारमार्थिकं प्रमाणलक्षणम् । अविसंवादिज्ञानम् इति तु व्यावहारिकमिति ।
७ मे ] बहिरर्थस्वीकारेऽपि ।
९ क्षे ] पक्षौ
११ * ] क्षणिकपक्षनिषेधकः ।
१४ भ्रान्त्या ] न्तया
१८ त्क्तं ] नन्वुक्त
१९ अ ] विज्ञानवादिनः ।
२१ त ] अपरमार्थसन् ।
२१ अ ] अर्थस्यापि ।
२१ त ] विज्ञप्तिमात्र ।
२३ च ] उत्पतन्नेव
२५ न्मा ] विज्ञप्तिमात्रस्यापि ।
२५ त ] अपरमार्थसदेव ।

अत्र अपरः प्राह--न चित्प्रतिभासमानस्य चित्प्रतिषेध उच्यते येनाऽयं दोषः स्यात् अपि तु परमार्थसत्त्वारोप एव विवादगोचरे घटादौ निराक्रियते तैमिरिककेशादिनिदर्शनेन इति; सोऽपि अनेन निरस्तः। तथाहि--तैमिरिककेशादौ परमार्थसद्भावः कुतश्चित् परमार्थतो यदि सिद्धः; तर्हि तेनैव तद्व्यवच्छेदहेतोः व्यभिचारः इति **साधनप्रयोगप्रतिषेधात्** सव्यभिचारात् साधनस्य अप्रयोगात्। नो चेत्; न तर्हि तत्र कस्यचित् साधनस्य तेन व्याप्तिरिति साध्यविकलो दृष्टान्तः। अत आह--**साधन** इत्यादि। साध्याव्याप्तसाधनस्याप्रयोगार्हत्वात्। § 2117

अम व्यवहारिणा तत्र तदभाव इष्यते तेन तद्व्याप्तिः; तर्हि सौगतेन ज्ञानेषु स्वसंवेदने परमार्थसत्तयोपगतेन उपलम्भस्य व्याप्तेः यदुपलभ्यते तत् परमार्थसद् यथा स्वसंवेदनम् उपलभ्यते च जाग्रत्स्वप्नदशायां बहिरर्थः इति बहिरर्थसत्यैकान्तवादी अथ स्यात् * न तेन स्वसंवेदनं परमार्थसद् इष्यते; व्यवहारिणापि तत्र तदभावो नेष्यते इतिसमानम्। कथं तस्य सत्येतर प्रविभाग इति चेत्; इतरस्य कथं परमार्थसंव्यवहार प्रमाणलक्षणाभेदः /ms ? कथं वा तदपरमार्थसत्त्वे बहिरर्थाद् विशेष्या येन बहिरर्थः त्यज्यते न तदिति ? सोऽयं स्वसंवेदनकृतां सर्वविकल्पाभावसिद्धिमुपजीवति न तत्परमार्थसत्त्वम् [इच्छति] इतरथा परसंवेदनस्य अपरमार्थसत्त्वेऽपि ततो बहिरर्थसिद्धिः स्यात्। एतेन परोपगतेन साध्येन दृष्टान्तेन हेतोर्व्याप्तिः इति निरस्तम्। § 2118

किंच, व्यवहारिणा तत्र प्रमाणमन्तरेण यदि नाम तदभावोऽभ्युपगतो नैतावता सर्वत्र तदभाव इति क्वचिद् बहिरर्थेऽपि परमार्थसत्त्वाशङ्काऽनिवृत्तेः कथं मतिमतं सौगतमत एव मतिः ? अन्यथा क्वचित् पुरुषे स सर्वज्ञत्वाभावस्तेन उपगतः इति सर्वत्र तदाभावः तथा च मीमांसकपक्षे परस्य 416/mkj प्रद्वेषो निर्निबन्धनं। आह **साधन** इत्यादि। सन्दिग्धविपक्षव्यावृत्तिकत्वेन **साधनप्रयोगप्रतिषेधात्**। § 2119

ननु ज्ञानवद् यदि अर्थोऽप्युपलभ्येत युक्तमेतत् उभयोरविशेषेण सत्त्वमसत्त्वं वा यावता ज्ञानमेव उपलभ्यते, नीलादेः सहोपलम्भनियमेन तद्रूपत्वादिति चेत्; अत्राह--**सहोपलम्भ** इत्यादि। § 2120

---

१ न] चित्त्वेन प्रतिभासमानस्य।
४ श्चित्] प्रमाणात्।
४ तेनैव] प्रमाणेन।
६ चेत्] यदि तैमिरिककेशादीनां न परमार्थसद्भावः तर्हि।
६ त्र] तैमिरिककेशादौ।
६ तेन] स्वसाध्येन।
९ अम] अथ न
९ द्व्याप्तिः] स्वीक्रियते।
१० ने] नेन
१२ *] स्यात्। अथ
१३ स्य] व्यवहारिणः।
१४ णा] ण
१५ विशेष्या] षो
१७ त] स्वसंवेदनस्य परमार्थसत्त्वम्।
१७ था] अपरमार्थसत्त्वेऽपि तस्मादिष्टसिद्धौ।
२२ तं] मतां
२२ स] स इति निरर्थकम्।
२३ दा] द
२३ स्य] बौद्धस्य।
२४ नं] नः
२४ आह] ?
२८ त] ज्ञानरूपत्वात्।

...26 सहोपलम्भनियमात् स्याद्भेदो नीलतद्धियोः ।
असहानुपलम्भश्चेदसिद्धः पृथगीक्षणात् ॥ २६
॥§ 2122

सहोपलम्भनियमादभेदैकान्तसाधने भ्रान्तिप्रत्यक्षयोरन्यतरस्याभावात् न क्वचिद् भ्रान्तिज्ञानं स्यात् तदेकान्तेन भ्रान्तिविविक्तप्रत्यक्षस्वभावोपपत्तेः सुषुप्तवत् । बहिरन्तश्च नीलतद्धियोर्दर्शनात् कुतः सहोपलम्भनियमः सिद्धः । सकृदेकार्थोपनिबद्धदृष्टीनां परज्ञानानुपलम्भेऽपि तदर्थदर्शनात् कुतो नियमः ? तदेकक्षणवर्तिनां सहोपलम्भनियमात् स्वयं वेदनेनोत्पत्तेः सकलं जगदेकसन्तानं प्रसज्येत । यदि पुनरेकज्ञानोपलम्भनियमो हेतुः; असिद्धः अनैकान्तिकश्च, नीलस्य सकृदनेकेन ज्ञानेन उपलम्भसंभवात्, बहूनामपि द्रव्याणामेकज्ञानोपलम्भाप्रतिषेधात् । यदि पुनरसहानुपलम्भ इति; को विशेषः ? प्रसज्यप्रतिषेधमात्रमसाध्यसाधनम् शशविषाण-खरविषाणयोरिव, अर्थादर्थगतिलक्षणात् । विज्ञानस्य...भ्रान्तैकान्तवत्...। § 2123

नीलतद्धिष[य]योः नीलनीलज्ञानयोः यः **सहोपलम्भनियमो** यौगपद्योपलम्भनियमः परेण तदभेदभावनाय उपन्यस्तः तस्माल्लिङ्गात् **स्यात्** भेदे **भेदो** नानात्वं **नीलतद्धियोः** इति आवृत्त्या सम्बन्धः । तन्नियमस्य तर्कतो भेदनिष्ठत्वात्, ततः तत्सिद्धेर्विरुद्धोऽयमभेदसाधन इति मन्यते । नहि एकत्वे /ms तत्सम्भवो । न खलु नीलस्यैव उपलम्भे नीलपीतयोः सहोपलम्भ इति युक्तम् । § 2124

ननु चन्द्रद्वयस्य अभेदेऽपि तन्नियमः तत्कथमस्य भेदेन व्याप्तिरिति चेत् ? उक्तमत्र सहोपलम्भो न स्यात् तदन्यरवत् इति । सहशब्दस्य यौगपद्यार्थम् उक्त्वा तदर्थान्तरं परिकल्पितमाशङ्क्य दूषयन्नाह--*असहानुपलम्भश्चेद्

---

१४ प] बौद्धेन विज्ञानवादिना ।
१४ स्तः] सकृत्संवेद्यमानस्य नियमेन धिया सह । विषयस्य ततोऽन्यत्वं केनाकारेण सिध्यति ॥ विषयस्य हि नीलादेः धिया सह सकृदेव संवेदनं धिया सह न पृथक्...--प्र॰ वार्तिकाल॰ ३ । ३८८ । धर्म्यत्र नीलाकारतद्धियौ तयोरभिन्नत्वं साध्यधर्मः यथोक्तः सहोपलम्भनियमो हेतुः । ईदृश एवाचार्यीये प्रयोगे हेत्वर्थोऽभिप्रेतः ।— तत्त्वसं पं॰ पृ॰ ५६७ ।
१४ भेदे] भेदे इति निरर्थकम् ।
१५ स्य] सहोपलम्भस्य ।
१६ तः] सहोपलम्भनियमात् ।
१६ त] भेदसिद्धेः ।
१७ वो] तत्सहभावः
१७ इति] वक्तुं युक्तम् ।
१९ नु] भ्रान्तविज्ञानस्थले ।
१९ स्य] एकत्वेऽपि ।
१९ मः] सहोपलम्भनियमः ।
२१ *] तुलना--तत्र भदन्तशुभगुप्तस्त्वाह--विरुद्धोऽयं हेतुः, यस्मात् सहशब्दश्च लोकेऽन्यो[[स्या]] नैवान्येन विना क्वचित् । विरुद्धोऽयं ततो हेतुर्यद्यस्ति सहवेदनम् ॥ पुनः स एवाह--यदि सहशब्द एकार्थः तदा हेतुरसिद्धः । तथाहि--नटचन्द्रमल्लप्रेक्षासु न ह्येकेनैवोपलम्भः । तथाहि--नीलोपलम्भेऽपि तदुपलम्भानामन्यसन्तानगतानामनुपलम्भात् । यदा च सत्त्वं प्राणभृतां सर्वे चित्तक्षणाः सर्वज्ञेनावसीयन्ते तदा कथमेकेनैवोपलम्भः

इति । अस्यायमर्थः--सहानुपलम्भः पर्युदासवृत्त्या पृथगुपलम्भः, तस्य न- 417/mkj
ञा प्रसज्यप्रतिषेधवाचिना, न पर्युदासवाचिना उक्तार्थप्रसङ्गात्, अभिसम्बन्धे पृथगुपलम्भाभावः **असहानुपलम्भः** सहोपलम्भः । सहशब्दस्य अनेकार्थत्वात् । **चेत्** शब्दः पराभिप्रायद्योतकः । अत्र दूषणम् **असिद्धो हेतुः** अस्मिन्नर्थे सहोपलम्भलक्षणः । कुतः ? इत्याह--**ईक्षणात्** नीलतद्धियोः **पृथग्** दर्श-नात् । तथाहि--प्रमातरि अहमहमिकया ज्ञानं प्रतीयते अन्यत्र घटादिकं समानकालेऽपि । तथा अन्यदा स्मर्यमाणोऽर्थः अन्यदा स्मरणम् । अस्य च निर्विषयत्वे अननुमानम्, तत्काले सम्बन्धाऽग्रहणात् । पूर्व तद्ग्रहत्त-द्भावे तदहद्ग्रहाद् * वृद्धदशायां तद्भावप्रसङ्गः । अरिष्टादिलिङ्गाद् भाविनो मरणादेरनुमाने कालपृथक्त्वेन अनुमानानुमेययोः प्रतिभासनं सिद्धमेव ।
§ 2125

एतेन यौगपद्योपलम्भनियमोऽपि चिन्तितः; सर्वत्राभावात् । अथ स्व-रूपा[न्ना]न्यत्र ज्ञानवृत्तिः तेनायमदोषः; उक्तमत्र अन्यत्रापि तद्वृत्तिदर्शनात् । § 2126

किंच, नीलतद्धियोरभेद स्यात्मानेनाऽविषयीकरणे किं सहोपलम्भनियमोपन्यासेन ? समारोपव्यवच्छेदोऽपि चिन्तितोऽस्माभिरन्यत्र । धर्मिसाध्य-धर्मानुमा नानाम् अभेदो अभिन्न- *वेदने सिद्धं पृथगुपलम्भनम् । § 2127 /ms

सहशब्दस्य एकार्थवाचित्वात् एकस्य ज्ञानस्यैव उपलम्भनियमः सहोप-लम्भनियमः इति एतेन निरस्तम्; उभयोरुपलम्भात् । यदि वा, स्याद् इति निपातोऽयम्, अतः शेषहेत्वादिदोषपरिग्रहः । § 2128

कारिकां विवृण्वन्नाह--**सहोपलम्भ** इत्यादि । [सहोपलम्भनियमात्] यौगपद्योपलम्भनियमाद् **अभेदैकान्तसाधने** अङ्गीक्रियमाणे **नीलतद्धियोः**

---

सिद्धः स्यात् । किंच, अन्योपलम्भनिषेधे सत्येकोपलम्भनियमः सिध्यति । न चान्योपलम्भप्रतिषेधसंभवः स्वभावविप्रकृष्टस्य विधिप्रतिषेधायोगात् । अथ सहशब्द एककालविवक्षया; तदा बुद्धज्ञेयचित्तेन चित्तचैत्तैश्च सर्वथा अनैकान्तिकता हेतोः । यथा किल बुद्धस्य भगवतो यद्विज्ञेयं सन्तानान्तरचित्तं तस्य बुद्धज्ञानस्य च सहोपलम्भनियमेऽप्यस्त्येव च नानात्वम्, तथा चित्तचैत्तानां सत्यपि सहोपलम्भे नैकत्वमित्यतोऽनैकान्तिको हेतुरिति ।...स्यादेतत् यद्यपि विपक्षे सत्त्वं न निश्चितं सन्दिग्धं तु, ततश्चानैकान्तिको हेतुः सन्दिग्धविपक्षव्यावृत्तिकत्वात् ।--तत्त्वसं० प० पृ० ५६७--६९ । सहोपलम्भनियमान्नाभेदो नीलतद्धियोः । विरुद्धासिद्धसन्दिग्धव्यतिरेकानन्वयत्वतः ॥--न्यायवि० १ । ८३ । शाबरभा० बृह० पं० १ । १ । ५ । शा० भा० भामती २ । २ । २८ । योगसू० तत्त्ववै० ४ । १४ । न्यायकणि० पृ० २६४ । अष्टश० अष्टस० पृ० २४२ । प्रमेयक० पृ० ७९ । न्यायकुमु० पृ० १२२ । सन्मति० टी० पृ० ३५२ । स्या० रत्ना० पृ० १५२ ।

६ त्र] भूतलादिप्रदेशे ।
७ दा] अतीते ।
७ दा] वर्तमाने ।
७ अस्य] स्मरणस्य ।
८ अ] अनुमानोत्पत्तिर्न स्यात् ।
८ स] अविनाभावसम्बन्ध ।
९ *] पूर्वं तद्ग्रहात्तदा तद्भावे बाल्ये तद्ग्रहाद्
१३ अ] घटादौ बहिरर्थे ।
१५ स्यात्] दस्यानु
१७ *] अभेदे नानुमानम् । भिन्न
१९ इति] मतम् ।
१९ उ] ज्ञानस्य अर्थस्य च ।

इति वक्ष्यमाणेन सम्बन्धः । किम् ? इत्यत्राह--**भ्रान्ती**त्यादि । **भ्रान्ति**शब्देन **भ्रान्तिरपि सम्बन्धतः प्रमा** इति वचनात् नीलतद्धिज्ञानयोः अभेदैकान्तानुमानस्य अनुमेये विभ्रमो गृह्यते । **प्रत्यक्ष**शब्दे **सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षमविकल्पकम्** न्यायबि० १ । १० इत्यभिधानात्, 418/mkj तस्य आत्मवेदनम् **तयोरन्यतरस्य** भ्रान्तेः प्रत्यक्षत्य **वा [अ]भावात् न क्वचित्** तदभेदेऽन्यत्र वा **भ्रान्तिज्ञानं** मिथ्यानुमानं **स्याद्** भवेत्, ततो लाभमिच्छतो मूलोच्छेदः । अनुमानेन तद्भेदसिद्धिमिच्छतोऽनुमानमेव नष्टम् । तदभावः कुतः ? इत्यत्राह--**तदेकान्तेन** इत्यादि । तन्नियमाद् योऽसौ भ्रान्तिप्रत्यक्षयोः **तदेकान्तो** भेदैकान्तः **तेन** हेतुना **भ्रान्त्या** साधारणाऽस्पष्टनिर्भासेन **विविक्तो** विकलः **प्रत्यक्षस्य** स्वलावेदनाध्यक्षस्य यः **स्वभावः** तस्य **उपपत्तेः** कारणात् । एतदुक्तं भवति--यदा भ्रान्तिः प्रत्यक्षादभिन्ना भवति तदा तदेव सा । यद् यस्मादभिन्नं तत् तदेव भवति यथा प्रत्यक्षस्वरूपम्, अभिन्ना च भ्रान्तिस्तत इति । प्रत्यक्षविविक्तभ्रान्तेः प्रसङ्गात् कारणात्, **तदभावात् न क्वचिद् भ्रान्तिज्ञानं स्यात्** । अत्रायम *दृष्टान्तमाह--**सुषुप्तवद्** इति । गाढनिद्राक्रान्तः **सुषुप्तः** तस्य इव **तद्वत्** । एवं मन्यते--भ्रान्तेः प्रत्यक्षस्याभेदे सैव तद् इति साधारणविशदाकारमात्रं स्वसंवेदनरहितं प्रमाणत्राणश्च न्यं प्रसक्तम् । न चैवं पराभ्युपगमः । ततोऽनुमानाभ्युपगमाद् भ्रान्तिप्रत्यक्षयोः भेद एव तन्नियमसद्भावाद् विरुद्धो हेतुः इति भावः । अनेन व्यतिरेकमुखेन **सहोपलम्भनियमात् स्याद्भेदो नीलतद्धियोः** इति व्याख्यानम् * । § 2129

*निपातस्याच्छब्दलब्धमर्थं दर्शयन्नाह--**नील** इत्यादि । **नीलतद्धियोर्दर्शनात्** । क्व ? इत्यत्राह--**बहिरन्तश्च** नीलस्य **बहिः** तद्धियोऽन्तः, **च**शब्दाद् अन्य[दा] स्मर्यमाणानुमेयार्थयोः अन्यदा स्मरणानुमानयोः इति दर्शयति । ततः किम् ? इत्याह--**कुत** इत्यादि । **कुतो** न कुतश्चित् मानात् **सहोपलम्भनियमः सिद्धो** हेतुः इत्यर्थः । प्रकारान्तरेण तदसिद्धतां दर्शयन्नाह--**सकृद्** एकहेलया **एकस्मिन्नर्थे** नर्त्तक्यादौ **उपनिबद्धा** व्यापृता **दृष्टिर्**येषां ते तथोक्ताः पुरुषाः **तेषां परज्ञानानुपलम्भेऽपि** न केवलं पुरुषविशेषाणामुपलम्भे **तदर्थदर्शनात्** तेषां पुरुषाणां ज्ञानानां च अर्थस्य दर्शनात् **कुतो नियमः** सहोपलम्भस्य ? § 2130

ननु तज्ज्ञानानुपलम्भे कथमयं तदर्थ इति ज्ञायते ? **द्विष्ठसम्बन्धसंवित्तिः** प्र० वार्तिकाल० २ । १ *इत्यादि वचनात् । अथ पुरुषाणां तत्र प्रवृत्तिद-

२ इति] द्रष्टव्यम् --पृ० ८२ टि० ४ ।
३ ब्दे] ब्देन च
५ स्य] भ्रान्तिज्ञानस्य ।
५ म्] गृह्यते ।
८ माद्] यौगपद्योपलम्भात् ।
१० ला] स्वसं
१२ देव] प्रत्यक्षमेव ।
१२ सा] भ्रान्तिः ।
१३ त] प्रत्यक्षतः ।
१४ *] अत्रान्वय
१६ स्याभेदे] भ्रान्तिरेव ।
१६ द्] प्रत्यक्षम् ।
१६ न्यं] प्रत्यक्षप्रमाणश्च
१९ *] तम्
२० *] स्यादिति निपातलब्धम् ।
३० *] नैकरूपप्रवेदनात् ।
द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम् ॥ इति शेषः ।

र्शनात् तज्ज्ञानविषयीकृतोऽसौ अर्थः इति परिच्छिद्यते; एवं तर्हि य ए[व] केनचिदुपलभ्यते स एव परेणापि इति अनुमानादवगम्य[ते] तथा च द्वयोः समानप्रवृत्तिदर्शनात् समानार्थदर्शनं सिध्येत् । सामान्यविषय त्वादनुमानस्य /ms नैकार्थदर्शनम्, अन्यथा सदृशरोमाञ्चकञ्चुकितत्वदर्शनात् एकसुखप्रतिपत्तिः स्याद् इति चेत्; तदसत्; यतः पशवोऽपि स्वदर्शनाभिलषितां पशुयोषितम् अन्यैरभिलषितां प्रतिपद्यमानाः तैः सार्द्धं बु ध्यमाना दृश्यन्ते । यादृश्यस्माभिरभिलषिता तादृशी अन्यैः इति प्रतिपत्तौ तदयोगात् । कुतस्ते तथा प्रतिपद्यन्ते इति चेत्; कार्यविशेषा वधारणाद् इति सिद्धः कथमन्यथा 419/mkj **तद्विशेषावधारणे इष्यत एव सर्वथा गम्यगमकभावः** इति वचनं शोभेत ? न चायमेकान्तः दृष्टान्तसाधर्म्यात् सामान्यमेव अनुमेयम् इति, **विदुषा वाच्यो हेतुरेव हि केवलः** प्र० वा० ३ । २६ *इति वचनात् । मा वा भूत्--यमर्थं पश्यत्ययं तमेव अन्योऽपि इति निश्चिता प्रतीतिः, तथापि परेण तद्दर्शननिषेधाभावात् तन्नियमस्य सन्दिग्धाऽसिद्धता । अथ नर्थक्य न्यदर्शनविकला प्रतीतिनियत इति तद्बाधनम्; तर्हि खलविलान्तर्गतबीजाद् अङ्कुरं तद्विविक्तं प्रतीयते इति न तत्र तद्व्यापारः । ततो यथा कार्ये [अ]दृष्टस्यापि कारणस्य व्यापारः तथा प्रमेये अन्यज्ज्ञानस्य संभाव्येत । हेतुफलभावानभ्युपगमे च तन्नियमात् नीलतद्धियोरभेदस्य अनुमानमयुक्तम् । व्यवहारेण तदङ्गीकरणं, तेनैव तन्नियमस्य सन्दिग्धासिद्धतामन्वाकर्षति इति यत्किञ्चिदेतत् । § 2131

स्यान्मतम्--यज्ज्ञानस्याकारोऽसौ तेन वेद्यते नान्येन; तन्न; यतः तदाकारता तस्याः * कुतः सिद्धा ? *तन्नियमादिति चेत्; अन्योऽन्याश्रयात् --सिद्धे तदाकारत्वे तन्नियमः सिध्यति, ततः तदाकारत्वम् । अन्यतश्चेत्; /ms अस्य वैफल्यम् । § 2132

सिध्यतु वा कुतश्चित् तदाकारत्वम्, तथापि सुगतेन तद्वेद[ने तद]वस्थोऽपि दोषः । [त]तस्तद्विज्ञानावेदनेऽपि पृथग्गतेन तदर्थवेदनात् कथं सुगतः सर्वज्ञ स्त तदतात् कथं सुगतः सर्वज्ञस्ते तदवेदने ? § 2133

अपरस्तु मन्यते-- § 2134

*ग्राह्यं न तस्य ग्रहणं न तेन ज्ञानान्तरग्राह्यःतयापि शून्यः ।

---

६ बु] यु
८ सिद्धः] ?
११ विदुषा] षां
११ *] तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः । ख्याप्येते... इति शेषः ।
१४ क्य] नर्तकी अ
१४ त] ता
१५ त्र] अङ्कुरे ।
१७ मात्] सहोपलम्भनियमात् ।
१८ णं] णे
१८ तेनैव] व्यवहारेणैव ।
२० स्याकारोऽसौ] तज्ज्ञानेनैव ।
२१ *] तस्य[[ज्ञानस्य ।]]
२१ *] सहोपलम्भनियमात् ।
२५ तेन] ग्तनेन
२६ तः] एतदन्तर्गतः पाठो द्विर्लिखितः ।
२८ ग्राह्यः] ह्य

तथापि च ज्ञानमयः प्रकाशः प्रत्यक्षपक्षस्य तथाविवासीद्
॥§ 2136

इति वचनात् नाऽशेषज्ञाता तस्य सर्वज्ञता अपि तु स्व[रूपज्ञता], तस्याप्येतन्न सुन्दरम्; इतरस्मात्तदविशेषात् **प्रमाणभूताय** प्रमाणसमु° श्लो° १ *इत्यादेः आनर्थक्यप्रसङ्गात् । व्यवहारेण तदभिधानेऽप्युक्तम्--तेनैव हेतोरसिद्धत्वम् इति । § 2137

यदि च स तथाविधो न कुतश्चित् प्रतिपन्नः; कथमस्ति येन तथा स्तूयते ? तदिदमायातम्--यथा ईश्वरे नित्येऽप्यप्रमाणता तथा सुगतेऽपि प्रमाणशून्यता । अथ प्रतिपन्नः; तर्हि भवता सुगतोऽपि ज्ञायते न तेन परं किञ्चिदिति मूढता । ततस्तस्य अस्तितत्त्वगम्यते विशेष वाभ्युपगच्छता... ... ...मिति कथं न प्रकृतो दोषः ? तत्[ः] स्थितं **कुतो नियमः** इति । § 2138

420/mkj

स्याच्छब्दःप्रापितं परमप्यर्थ दर्शयन्नाह--**तदेक** इत्यादि । **तेन** विवक्षितनीलज्ञाने[न ए]**कस्मिन् क्षणे वर्त्तितुं** शीलानाम् एकक्षणभाविसन्तानान्तरज्ञानानाम् इत्यर्थः । **सहोपलम्भनियमात्** । तदपि कुतः ? इत्याह--**स्वयम्** आत्मनो वा **वेदनेनोत्पत्ते[ः]** । ततः किम् ? इत्याह--दि [सकलं जगदिति] । न चैवम्, अतो व्यभिचारी हेतुः इति भावः । § 2139

/ms स म न्त भ द्र स्य तु मतम्--**ययोः... ... ...सहोपलम्भ** इत्यादिना तदभेदे च न ग्राह्यग्राहकतया तन्नियम इति च ग्राहकाभिमता[त्] ग्राह्यस्य भेदे न तेनास्य ग्रहणम् अ[न]न्यवेद्यनियमाद् अपि तु स्वयमेव तदपि प्रतिभाति, तथापि सहोपलम्भनियमात् तयोरभेदे **तदेके**त्याद्युक्तम् । तदेतदित्थम् अन्ये परिहरन्ति--नीलतद्धियोरभेदे नैकत्वम् अपि तु ज्ञानत्वेन सदृशत्वम्, यथा ज्ञानं ज्ञानं तथा नीलमपि सहोपलम्भनियमात्तथा... ... ...दस्ति इति न तैः व्यभिचारो हेतोः विपक्षे[ऽ]गमनादिति; ते न युक्तकारिणः; यतो यदि यज् ज्ञानेन सह उपलभ्यते तदपि ज्ञानं तर्हि नीलज्ञानैकक्षणवर्त्तिनां ज्ञानान्तराणां सहोपलम्भनियमात् नीलत्वमापद्येत । पुनः तत्कार्यस्यापि ज्ञानस्य नीलत्वे तदवस्थो दोषः पुनरपि तदवस्थ इति

१ थाविवा] रा
२ ज्ञाता] ज्ञता
२ स्य] सुगतस्य ।
४ *] जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तायिने । प्रमाणसिद्ध्यै स्वकृतिप्रकीर्णनात् निबध्यते विप्रसृतं समुच्चितम् इति शेषः ।--प्रमाणसमु° । जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तायिने । कुतर्कसम्भ्रान्तजनानुकम्पया प्रमाणसिद्धिर्विधिवद्विधीयते । इति शेषः--प्र° वार्तिकाल° पृ° १ ।
६ स] सुगतः ।
६ श्चित्] प्रमाणात् ।
६ येन] प्रमाणभूताय इत्यादिरूपेण ।
८ तेन] सुगतेन ।
९ त्त्व] स्तित्वमव
९ विशेष] षं
१२ ब्दः] ब्द
१२ र्थ] र्थं
२६ दोषः] नीलत्वापत्तिलक्षणः ।

नीलमात्रं जगत् । तदाह **तदेके**त्यादि । **तेन** नीलज्ञानेन **एकक्षणवर्त्तिनां स्वयम्** आत्मनो **वेन** *__नोत्पत्तेः__ कारणात् अनेन सहवृत्तिवद् वेदनमपि सहैव दर्शयति--**सहोपलम्भनियमात् सकल जगद् एकसन्तानं** सदृशसन्तानं **प्रसज्येत** । न चैवं परेस्ति स्ततो व्यभिचारी हेतुः । तत्र न तन्नियममात्रात् नीलं ज्ञानमिति गम्यते अपि तु ज्ञानवत् स्वयं प्रतिभासनात् । न च नियतनीलज्ञानवत् सर्वज्ञज्ञानं नीलतया चकास्ति येनातिप्रसङ्गः स्यादिति चेत्; तर्हि नीलं ज्ञानं स्वयं प्रकाशनात् तज्ज्ञानवत् इत्येवास्तु किं व्यभिचारिणा तन्नियमेन ? तदेवास्तु इति चेत्; न; परत एव तत्प्रतिभासप्रतिपादनात् /ms
। § 2140

परस्य तु दर्शनं विवेक ज्ञान द्वैताभ्युपगमात् सकलं जगद् एकज्ञानमिष्यते न पुनः एकसन्तानं तदभावात् इति न तेन तद्व्यभिचार इति; तन्न सूक्तम्; नीलमात्रदर्शिनोऽपि सकलजगदपेक्षचित्रत्वप्रतीतिप्रसङ्गात् अन्यथा नानेकम् इत्युक्तं भवेत् युगपदिव क्रमेणापि च तत्प्रसङ्गात् । अत आह--**सकलम्** इत्यादि । § 2141

एवं यौगपद्यार्थं सहशब्दं निरूप्य निपातानामनेकार्थत्वात् एकार्थं निरूपयन्नाह--**यदि** इत्यादि । **यदी**ति पराभ्युपगमसूचकः, **पुन**रिति पक्षान्तरस्य, **एकज्ञानोपलम्भनियमः** एकस्य ज्ञानो पलम्भो नार्थस्य इति तन्नियमः, एकेन ज्ञा[ने]नोपलम्भो नीलस्य न तदन्तरेण इति वा तन्नियमो **हेतुः** सहोपलम्भनियमो **यदी**त्यर्थः । आद्ये पक्षे दूषणमाह--**असिद्धो हेतुः** इत्यनेन सम्बन्धः, अर्थस्याप्युपलम्भात् । द्वितीये आह--**अनैकान्तिकश्च** इति । अनैकान्तिको व्यभिचारी । **च** शब्दाद् असिद्धो हेतुः इति । असिद्धतां दर्शयन्नाह--**नीलस्य** इत्यादि । कस्यचिन्नर्त्तक्यादिगतस्य **सकृच्छ**ब्देन सहिति व्याख्यातम्, **अनेकेन ज्ञानेन उपलम्भ [संभ]वादिति** । अनेन सन्दिग्धासिद्धतां दर्शयति 421/mkj
। विचारितं चैतदनन्तरम् । अनैकान्तिकतामाह--**बहूनामपि** न केवलमेकस्य **द्रव्याणाम्** । अनेन तत्पक्षीकरणं निषेधति, नहि जीवादीनाम् एकज्ञानो पक्षीकरणमात्रेण एकत्वं प्रमाणबाधनात् । पर्यायाणाम् इत्युच्यमाने तेषां द्रव्यापेक्षया एकत्वात् स्यादपि पक्षीकरणम् । **एकज्ञानोपलम्भः एकेन ज्ञानेन [उपलम्भस्य]** दर्शनस्य **अप्रतिषेधात्** निषेधाभावात् । अन्यथा व सकलशून्यतेत्युक्तम् । § 2142 /ms

अर्थान्तरमाशङ्कते दूषयितुं **यदि** इत्यादिना । सहोपलम्भनियमाद् इति हेतुः स **यदि पुनः असहानुपलम्भ** इति स्यात्; तत्र दूषणं **को विशेष**

---

१ त्] स्यादिति ।
२ *] वेदने
३ ल] लं
४ रेस्ति] परेष्टि
४ न] सहोपलम्भनियममात्रात् ।
८ मेन] सहोपलम्भनियमेन ।
८ एव] नीलप्रतिभास ।
१० ज्ञान] चित्रैकज्ञाना
११ न्तानं] सन्तानाभावात् ।
१३ म्] अनेकमेकरूपम् ।
१५ त्वात्] सहशब्दम् ।
१६ स्य] सूचक इति ।
१७ ज्ञानो] ज्ञानस्य उ
२२ हिति] सह इति
२६ ज्ञानो] ज्ञाने
२८ व] च

**इति** पूर्वोक्तादर्थात् न कश्चिदस्य भेदः । तथाहि--पर्युदासवृत्त्या सहानुपलम्भः पृथगुपलम्भः अस्य नञाति सम्बन्धे तद्वृत्त्या सहोपलम्भ इति प्राप्तिः । अथात्र प्रसज्यप्रतिषेधोऽपेक्षा तर्हि साध्यमपि तथाविधमस्तु अन्यथा सम्बन्धाऽसिद्धेः । तथेति चेत्; अत्राह--**प्रसज्येत्यादि** । **प्रसज्यप्रतिषेधमात्रमसाध्यसाधनम्** साध्यं न भवति साधनं च न भवति इत्यर्थः । कयोरिव ? इत्यत्राह--सस्येव इत्यादि । कुतः ? इत्याह--**अर्थाद्** धूमादेः [स]काशाद् **अर्थस्य** अग्न्यादेर्या **गतिः** प्रतिपत्तिः तस्या **लक्षणाद्** दर्शनात् । अथवा [अर्थ]सम्बन्धि यल्लक्षणम्--**अर्थो ह्यर्थं मयता** इति शास्त्रं तदाश्रित्येति । § 2143

आह उक्त भवता--नीलाकारस्य ज्ञानस्यैकस्य उपलम्भो नार्थस्य तन्नियम न्यत्र * असिद्धो हेतुः अर्थस्याप्युपलम्भात् इति; तन्न युक्तम्; अर्थस्य स्वसदसत्समयभाविन [ः] केनचिदग्रहणात् । न चैकस्य उभयत्र व्यापारो विरोधात् इति चेत्; अत्राह--**विज्ञानस्य** इत्यादि । चर्चितमेतद् बहुशः पुनर्न चर्चनमर्हति । § 2144

**भ्रान्तैकान्तवद्** इति निदर्शनं सावपि तु भ्रान्तैकान्ते [त्यु] पन्यस्य दूषयति--**विप्लुताक्षा** इत्यादिन । § 2145

...27 विप्लुताक्षा यथा बुद्धिर्वितथप्रतिभासिनी ।
तथा सर्वत्र किन्नेति जडाः सम्प्रतिपेदिरे ॥ २७
॥§ 2147

विप्रतिपत्तिविषयापन्नज्ञानानां [निर्विषयतासाधने] सर्वज्ञानानां स्वयमविषयीकृतानां निर्विषयतासिद्धेः स्याद्वादलङ्घने इष्टविघातकृत् विरुद्धः बहिरर्थाविशेषात् स्वसंवेदनं च न सिध्येत् । तदभ्रान्तैकान्ते सहोपलम्भविरोधात् सह पृथग्वा द्विचन्द्रनिर्भासवत् नीलतद्धियोरनुपलब्धेरेव भेदाभेदयोरभावसाधने व्यतिरेकसिद्धिर्विरुध्येत । § 2148

---

२ न्धे] नञा[[असहानुपलम्भ इत्यत्र नञ्समासे ।]] अभिसम्बन्धे
३ तिषेधोऽपेक्षा] क्ष्यते;
३ पि] अभावरूपमेव ।
६ स्येव] **शशविषाण-खरविषाणयोरिव**
८ ता] गमयति
८ शास्त्रं] अर्थादर्थगतेः--प्र० वा० ४ । १५ ।
१० उक्त] क्तं
११ *] मः, तत्र
१२ स्य] ज्ञानकालीनस्य अर्थस्य ज्ञानं प्रति कारणत्वाभावात् सहभाविनोः कार्यकारणभावाभावात् । ज्ञानकालेऽविद्यमानस्य ग्राह्यत्वे सकलातीतानागतस्य ग्रहणप्रसङ्ग इति भावः ।
१५ तु] साधयितुं
१६ इत्यादिन] ना
१७ य] पूर्वपक्षः--यथास्वं प्रत्ययापेक्षादविद्योपप्लुतात्मनाम् । विज्ञप्तिर्वितथाकारा जायते तिमिरादिवत् ॥--प्र० वा० २ । २१७ ।

**विप्लुतानि अक्षाणि** यस्याः सा तथोक्ता **बुद्धिः** कामलाद्युपहतेन्द्रिय-केशोणु कादिबुद्धिरिति **यथा** येन ग्राह्यग्राहकादिप्रवृत्तप्रकारेण अन्येन वा 422/mkj, चि **तथा प्रति भासिनी** असदर्थप्रतिभासवती **तथा** तेन प्रकारेण **सर्वत्र** /ms स्वपररूपयोः अथवा जाग्रत्स्वप्नयोः या बुद्धि[ः] वितथप्रतिभासिनी **किन्न** वितथप्रतिभासिन्येव प्रतिषेधद्वयेन प्रकृतार्थगतेः । एततत् दूषयति **इति** एवं **जडाः** प्रज्ञाहीनाः सौगताः **संप्रपेदिरे** ज्ञातवन्तः । § 2149

कारिकां विवृण्वन्नाह--**विप्रतिपत्ती**त्यादि । तत्र दूषणमाह--**सर्वे**त्यादि । तात्पर्यमत्र— अनेनानुमानेन **विप्रतिपत्तिविषयापन्नज्ञानानां** निर्विषयता साध्येत, सविषयतासमारोपव्यवच्छेदो वा क्रियेत गत्यन्तराभावात् इति ? तत्र आद्ये पक्षे अनेन धर्मिणां ज्ञानानामपरिच्छेदे न तद्धर्मस्य निर्विषयत्वस्य परिच्छेदो देवदत्ताग्रहणे तच्छ्यामत्ववत् । तथा च अकिञ्चित्करो हेतुः । तदाह--**सर्वज्ञानानां** विवादास्पदीभूतवेदनानां **स्वयम्** आत्मानुमानेन **अविषयीकृतानाम् निर्विषयताऽसिद्धिः** कारणाद् **इष्टविघातकृत्** वादिन इच्छेष्टं तस्य खण्डनकृत्, अतश्च **हेत्वाभासः** । किन्नामेह **विरुद्धः** किञ्चित्करत्वविपरीतेन अकिञ्चित्करत्वेनारुद्धः क्रोडीकृतो **विरुद्धः** । तेषाम् अनेन परिच्छेदे; सिध्यति विषयता * किन्तु तद्वदन्येषामपि प्रतिभासिनाऽर्थेन विषयत्वसिद्धिः, इतरथा अस्यापि न स्यात् इति तदवस्थमकिञ्चित्करत्वम् । एतदेवाह--**सर्वज्ञानानां स्वयम् अविषयीकृतानां निर्विषयतासिद्धेः** इत्यभिप्रायः । **इष्ट [वि] घातकृत् इष्टं** सौगतस्य जाग्रत्स्वप्नप्रत्ययानां निर्विषयत्वम् तस्य **विघातकृत् विरुद्धो हेत्वाभासः** । तथाहि--अतद्व्याप्तः तद्व्याप्तिविभ्रमोषितो विरुद्ध इति मनीषिणो मन्यन्ते । [प्र]कृतानुमाने च ग्राह्यग्राहकसंवेदनाकारत्वम् अन्यद्वा विषयत्वेन व्याप्तं सिद्धम् । तत एवं वक्तव्यम्--जाग्रत्स्व- /ms प्नप्रत्ययाः सविषव ग्राह्यग्राहकसंवेदनाकारत्वाद् अन्यतो वा परकीयहेतोः प्रकृतानुमानवद् इति । स्वप्नज्ञानस्य सविषयत्वसाधने प्रसिद्धिबाधादिदोष इति चेत्; जाग्रद्विज्ञानस्य निर्विषयत्वसाधनेऽपि समानः । कस्मिन् सति विरुद्धः ? इत्यत्राह--**स्याद्वादलङ्घने** । किञ्चिद्विज्ञानं सविषयं किञ्चिद् विपरीतम् तदपि कथञ्चित् इति **स्याद्वादः** तस्य **लङ्घने** परित्यागे सति । एवं मन्यते--यदा यथा बौद्धेन परप्रसिद्धमिथ्यास्वप्नज्ञाननिदर्शनेन सर्वज्ञानस्य मिथ्यात्वं साध्यते तथा परेणापि बौद्धप्रसिद्धसत्यानुमाननिदर्शनेन सर्वज्ञानस्य सत्यता, तदा विरुद्धः । तदा तु स्याद्वादमवलम्ब्य स्वप्नज्ञानस्य

---

२ केशोणु] ण्डु
२ कादिबु] निरालम्बे नभसि केशाकारा उण्डुकाकारा--मशकाद्याकारा या बुद्धिः ।
३ था] वितथ
१३ ताऽसिद्धिः] द्धेः
१३ इच्छेष्टं] वादिना यदिष्टं
१४ किन्नामेह] किन्नामा ? इत्याह--
१५ त्वेना] त्वेन
१५ विरुद्धः] विपरीतेन रुद्धः विरुद्ध इति ।
१५ तेषाम्] विवादास्पदीभूतवेदनानाम् ।
१६ *] सविषयता
१६ किन्तु] न केवलमस्यैव ।
२० द्व्याप्तः] तद्व्याप्तिशून्यः ।
२० त] तद्व्याप्तिविभ्रमकारीत्यर्थः ।
२१ मोषितो] मोपेतो
२३ व] याः
३० ता] साध्येत इति ।
३० दा] यदा

मिथ्यात्वेऽपि प्रकृतानुमानवत् तदाकारत्वेऽपि किञ्चिद्विज्ञानं सालम्बनं स्यात् इति साधयति परः, तदाऽनैकान्तिको हेत्वाभास इति । § 2150

यदि पुनः समारोपव्यवच्छेदः क्रियते; तत्राप्युच्यते--निर्विषयेषु सविषयताविकल्पः समारोपः । तदनुमानात् प्राक् तत्र प्रमाणान्तराप्रवृत्तौ कथं निर्विषयतासिद्धिर्यतः तद्विकल्पः समारोपः, तद्व्यवच्छेदकरणाच्च अनुमानमर्थवद्भवेत् । 423/mkj एतदेवाह--**सर्वज्ञानानां** स्वप्नेतरप्रत्ययानां **स्वयं** सौगतेन, अन्येन तद्विषयीकरणेऽपि तस्य तन्निर्विषयताऽसिद्धेरिति भावः, **अविषयीकृतानाम्,** कस्मिन् सति ? इत्याह--**स्याद्वादलङ्घने** स्वरूपवत् पररूपेऽपि एकस्य ज्ञानस्य /ms ग्रहणशक्तिसद्भावः स्याद्वादः तस्य लङ्घने स्वरूपमात्रपर्यवसितज्ञानपक्ष इत्यर्थः **निर्विषयतासिद्धेः** कारणात् **इष्टविघातकृतं स्वयम्** इत्यनुवर्त्तते स्वयमिष्टो वादिना समारोपः तस्य व्याघातोऽभावः तस्य तत्करणम् । ततः किम् ? इत्याह--**विरुद्धः** पूर्ववद् अकिञ्चित्करो **हेत्वाभासः** । अथ स्वयं तेषां विषयीकृतानामेव सर्वमेतदिच्छेत्; तत्राह--**सर्व** इत्यादि । पूर्वद्वितीयव्याख्यानवदत्र व्याख्यानम् । अयं तु विशेषः येन प्रत्यक्षेण सर्वज्ञानंनिर्विषयतां प्रतिपद्यते तेन विरुद्धोऽनैकान्तिकश्च हेत्वाभासः पूर्ववद् योज्यः । § 2151

ननु तदपि प्रत्यक्षमानं च निर्विषयमेव तेनायमदोष इति चेत्; अत्राह--**बहिरर्थाविशेषात्** इत्यादि । **स्वयम्** इत्येतदत्रापि अनुवर्त्तते । **स्वयं** बौद्धस्य न केवलं बहिरर्थाविशेषात् सन्तानान्तरे स्वहेतुफलसिद्धिः न भवति अपि तु किन्तु **स्वसंवेदनं च न सि[ध्ये]त्** । तथा च कुतो विभ्रमोऽन्यो वा सिध्येदिति भावः । ततो यथा बहिरर्थविशेषेऽपि स्वसंवेदनस्यैव सत्त्वम् न बहिरर्थस्य तथा स्वप्नेतरप्रतिभासाविशेषेऽपि जाग्रद्घटादेरेव तत् इति कथं नाऽसिद्धो हेतुः । § 2152

अत्राह प्र ज्ञा क रः--जाग्रद्घटादिवत् स्वप्नघटादेरपि सत्त्वम् । तदुक्तम्--
§ 2153

*व्यवहारमात्रकमिदं सत्यताऽसत्यतेति च ।
स्वरूपसाक्षात्करणे सत्यतेत्यादि दुर्घटम् ॥ प्र० वार्तिकाल० २ । ३७ इति; § 2155

तत्राह--**तदभ्रान्तैकान्ते तयोः** स्वसंवेदन-बहिरर्थ[योः अ]**भ्रान्तैकान्ते** अङ्गीक्रियमाणे । अत्रायमभिप्रायः--**सत्यवादीतिं दुर्घटम्** इति कोऽर्थः ? य-

१ त] ग्राह्यग्राहकाकारत्वे सत्यपि ।
२ रः] विज्ञानवादी ।
३ च्छेदः] प्रकृतानुमानेन सविषयतासमारोपव्यवच्छेदः क्रियते अस्मिन् विकल्पे दूषणमाह ।
५ ल्पः] सविषयताविकल्परूपः समारोपः स्यात् ।
१० कृतं] त्
११ व्या] वि
१४ ज्ञानं] न
१५ ते] तत् प्रत्यक्षं निर्विषयताविषयकत्वात् सविषयमिति भावः ।
२० र्थ] र्था
२१ त्] सत्त्वम् ।
२८ वादीतिं] सत्यतेत्यादि

दि सर्वमसत्यम्, सत्यासत्यविभागशून्यं वा; तत्रोक्तं **बहिरर्थाविशेषादि**त्यादि । अथ सत्यम्; तत्रेदमुच्यते--**सहोपलम्भविरोधाद्विरुद्धो हेत्वाभासः**, द्विच- /ms न्द्रादावपि सहोपलम्भस्य भेद एव भावादिति भावः । § 2156

अथवा यदुक्तम्--**बहिरर्थाविशेषात् स्वसंवेदनं च न सिध्येत्** इति तत्र स्वसंवेदन [नं] प्रतिभासात् सिध्यति, बहिरर्थः विपर्ययात् इति परः; तत्राह--**तदभ्रान्तैकान्त** इत्यादि । अत्र द्वैतं निरंशं क्षणिकं तत्स्वसंवेदनम्, चित्रमेकं वा ? तत्र द्वितीये पक्षे--**तत्र** इत्यादि वक्ष्यमाणं दूषणमिति । प्रथमे दूषणम्--**तद्** इत्यनेन स्वसंवेदनं परामृश्यते तस्य **[अ]भ्रान्तो** य **एकः** असहायः सर्व्वतोधर्मधर्मित्तसु पगम्यमाने **सहोपलम्भविरोधात्** नीलरूपस्य एकस्य ज्ञानस्यैव, एकेनैव एकस्यैव [वा] उपलम्भस्य **विरोधाद**भावात्, बहिरन्तर्वा असहायस्य उपलम्भनिषेधेन, कारणात् **सह** यौगपद्येन **पृथग् वा** कालादिभेदैन, **वे**ति समुच्चये, **नीलतद्धियोः** येनमु **नुपलब्धि**रदर्शनम् तस्या **एव** न  सहोपलम्भात् इत्येवकारार्थः, **भेदाऽभेदयोः** भेदस्य अभेद- 424/mkj स्य **वाऽभावसाधने** नीलतद्धियोः अङ्गीक्रियमाणे तु । दृष्टान्तमाह--**द्विचन्द्रनिर्भासवत्** इति । यथा द्विचन्द्रनिर्भासयोरन्योऽन्यं न भेदो नाप्यभेदः, तयोः वस्तुनिष्ठत्वात्, तन्निर्भासयोरवस्तुत्वात् तथा प्रकृतयोरपि इति । तत्र दूषणमाह--**अनुपलब्धेः** [भेदा]भेदयोरभावसाधने हेतुत्वेन उपन्यस्तायाः **व्यतिरेकसिद्धिः विपक्षाद्** भावरूपाद् **व्यतिरेकस्य** व्यावृत्तेः **सिद्धिः** निर्णीति**र्विरुध्येत** निरंशस्वसंवेदनभावेऽपि तस्या भावात् । न चाऽनिश्चितव्यतिरेको हेतुः /ms गमक इति मन्यते । § 2157

ननु न तद् एकान्त[अभ्रान्त]रूपम् इष्यते किन्तु [स्व]रूपे अभ्रान्त ग्राह्याकारे अन्यथा इति चेत्; अत्राह--**नन्वमित्यादि** § 2158

...28 तत्त्वमिथ्याग्रहैकान्ते बुद्धेः स्वार्थोपलम्भयोः ।
सहोपलम्भनियमः क्वान्तर्ज्ञेयतत्त्वधीः ॥ २८ ॥ § 2160

न चानेकान्तमन्तरेण नीलतद्धियोः सहोपलम्भनियमः । तमन्तरेण स्वयमन्तर्ज्ञेयतत्त्वस्य बहिरन्तस्याप्यसत्त्वात् कथञ्चिदनेकान्ते नैकान्तेनैकत्वम् । § 2161

**बुद्धेः स्वोपलम्भे अर्थोपलम्भे** च याथासंख्येन **तत्त्वाग्रहैकान्ते मिथ्याग्रहैकान्ते** वा अभ्युपगम्यमाने **सहोपलम्भनियमः क्व** ? न क्वचित् । निरंशसंवेदनानुभवाभावेन अर्थोपलम्भस्यापि दुर्घटत्वात् **अप्रत्यक्षोपलम्भस्य नार्थ-**

---

५ रः ] प्रज्ञाकरः ।
९ सु ] स **चान्तो** धर्मः तस्मिन् अभ्यु
११ अ ] निरंशस्य ।
१२ मु ] येयम् अ
१५ योः ] भेदाभेदयोः ।
१६ त ] द्विचन्द्रनिर्भासयोः ।
२१ अभ्रान्त ] न्तं
२२ था ] भ्रान्तम् ।
२२ त्यादि ] **तत्त्वमिथ्ये**त्यादि ।

**दृष्टिः प्रसिध्यति** इति मन्यते । तदनुभवभावे व्यर्थव्युक्तस्यापि अलीकत्वात् । क्षांतर्ज्ञे * **तत्त्वधीः** । § 2162

कारिकां व्याचष्टे--**न च** इत्यादिना । **न च** नैव **अनेकान्तमन्तरेण** एकान्ते इत्यर्थः । **नीलतद्धियोः सहोपलम्भनियमः**, तयोः उपलम्भस्यैव अभा[वा]दिति भावः । तदुपलम्भेऽपि **तमन्तरेण स्वयम् अन्तर्ज्ञेयतत्त्वस्य न च** इति पदघटना **बहिरन्तस्याप्यसत्त्वात्** । अन्तर्बहिश्च भवत्वनेकान्त इति चेत्; अत्राह--**अनेकान्ता** ज्ञार्नायोः एकानेकात्मकत्वे अङ्गीक्रियमाणे **कथ-ञ्चित्** न सर्वथा । किम् ? इत्याह--**न** इत्यादि । एवं मन्यते--तत्र बहिरन्तर्वा भेदाऽभेदयोः तन्नियमेऽपि **नेकान्तेनैकत्वं** तथा नीलतद्धियोरपि । यदि च उपलम्भाऽविशेषेऽपि स्वोपलम्भे तत्त्वग्रहैकान्तः अर्थोपलम्भे मिथ्याग्रहैकान्त इत्य**नेकान्ते कथञ्चित्** जाग्रद्दशायां स्वप्नदशायां शेषं पूर्ववत् । अथवा, [स्व]रूपे विभ्रान्तं ज्ञानम् अर्थे[पी]त्य**नेकान्ते** बहिरर्थतत्त्वं **कथञ्चित्** प्रत्यक्ष-
/ms परोक्षात्मकं यथा प्रमाणं व्यवस्थितमेव । अनेन तन्नियमस्य भागासिद्धतां दर्शयति--चेतनानीलतारूपेण तद्भावेऽपि क्षणक्षयाद्यात्मना अभावात् । § 2163

ननु बुद्धेर्मिथ्याकारो न स्वाकारः किन्तु पराकारः, ततोऽयमदोष इति चेत्; अत्राह— **स्वप्रत्यक्ष** इत्यादि । § 2164

...29 स्वप्रत्यक्षपरोक्षात्मज्ञानसिद्धौ न सिध्यति ।
अर्थः प्रत्यक्षपरोक्षात्मा एकः कालादिभेदतः ॥ २९ ॥ § 2166

425/mkj

स्वभावनानात्वं यदि भावस्य भेदकं न भवेत् किं पर-व्यावृत्तेः कार्यकारणसन्तानकर्मफलसम्बन्धप्रभृतितदर्थस्मरणाद्यनेकच्छिद्राश-क्यपिधानानर्थनिबन्धनया निरन्वयकल्पनया ? § 2167

अयमभिप्रायः--परस्य सुखादिनीलादिशरीरव्यतिरिच्यमानप्रतिभासं स्व-संवेदनम् । न च *तस्य नानैकत्वविरुद्धधर्माध्यासिना तादात्म्यम् । अतो भेदेऽपि तादात्म्यावभासो भ्रान्त्या, अन्यथा अनेकान्त इत्युक्तम् इति **[स्व]प्रत्यक्षं** च चेतनादिरूपेण **परोक्षश्च** सुखादिविरोधवदाकारविवेकः तौ च तावात्मानौ च **स्वौ प्रत्यक्षपरोक्षात्मानौ** यस्य तत्त[थो]क्तं तच्च **तज्ज्ञानं** च तस्य **सिद्धौ** अङ्गीक्रियमाणायां **न सिध्यति** किं सिध्यत्येव । किमि-

१ त] निरंशसंवेदनानुभवसद्भावेऽपि ।
१ स्यापि] ऽप्यर्थवत् त[[अनुभवस्यापि ।]]स्यापि
२ *] क्वान्तर्ज्ञेय
७ अनेकान्ता] न्ते
७ ज्ञार्नायोः] ज्ञानार्थयोः
९ त] सहोपलम्भनियमेऽपि ।
११ शायां] ?
२३ *] स्वसंवेदनस्य ।

त्य व  किमित्याह--**एकोऽर्थः** । किंभूतः ? **प्रत्यक्षपरोक्षात्मा** । केन ? इत्याह--**कालादिभेदतः** कालक्षेत्रादिभेदेन । एवं मन्यते--यस्माद् विज्ञानमेकं प्रत्यक्षपरोक्षात्मकं तस्मात् प्रत्यक्षपरोक्षात्मैकः सिध्यति । यस्माच्च ज्ञानत-द्विवेकयोरभेदेन पक्षीकृतयोरपि तन्नियमोऽविद्यमानत्वेन भागासिद्धः तस्माद-र्थः सिध्यति इति । § 2168

**स्वभावेत्यादिना** कारिकार्थमाह--प्रत्यक्षपरोक्षरूपेण यत् **स्वभावनानात्वं** ज्ञानस्य **तद्भावस्य** तस्यैव **भेदकं** नानात्वापादकं **यदि न भवेत् परस्मात्** सजातीयाद् विजातीयाच्च या **व्यावृत्तिर्भावस्य** तस्याः सकाशात् **किं निर-न्वयकल्पनया** ? किंभूतया ? इत्याह--**कार्येत्यादि** । **कार्यं च कारणं च सन्तानश्च  कर्म च** वासनारूपं **चेतना कर्म** अभिध° को° ४ । १ इति /ms
वचनात्, **फलं** च देहान्तरसंचारादि, तयोः **सम्बन्धश्च** तदुत्पत्तिः, पुनः एतेषां **प्रभृति**शब्देन बहुव्रीहिः, **तदर्थः स्मरणादिः** तस्य **अनेकम्** अनन्तरोक्तं **छिद्रं** दूषणम् तस्या**शक्यं पिधानम्** उत्तरं तदे**वानर्थनिर्चन्वो**  यस्यां **तया** इति । § 2169

ननु नार्थवद् बुद्धेः स्वरूपं भ्रान्तम्, नापि स्वपररूपयोः अभ्रान्तेतरस्वभावं स्वग्राह्याकारस्वभावं स्वग्राह्याकारविवेकापेक्षया दृशो तरस्वभावं वा येनाय दोषः स्यात्, अपि तु सुखादिनीलादिशरीराकारमेव तन्नियमात् इति चेत्; एतद् बुद्धज्ञान-तद्वेद्याभ्यां व्यभिचारयन्नाह-- § 2170

*तन्नियमेऽपि तयोर्भेदे अन्यथा अनेकान्तं साधयन्  प्रत्यक्षेत्यादि । § 2171

तन्नियमेऽपि तयोर्भेदेऽन्यथाऽनेकान्तसाधनम् ।
प्रत्यक्षो मध्यरूपार्वाग्भागार्थस्तदात्मनः ॥ ३० ॥
परोक्षता पूर्वरूपापरभागादिभिर्बुद्धबुद्धिवत् । [१/२]
|§ 2174

न केवलं सन्तानक्षणानां तन्नियमादेकसन्तानत्वमपि तु सन्तानान्तराणाम् । बुद्धश्चेत् सन्तानिनां सन्तानान्तराणां च बोद्धा, तदेकोपलम्भात् सन्ततिर्न भवेत्तदेकतापत्तेः । संवित्तेः पुनरनन्यवेद्यनियमे कथं मिथ्याविकल्पमन्तरेण स्वपरसन्तानविकल्पमात्रोपदेशः ? तन्मिथ्याविकल्पानामनेकान्तात्मकत्वम् । 426/mkj
पूर्वापरकोट्योरदृश्यात्मना कथमुपलभ्यमध्यस्वरूपं न वर्तेत । दृश्य...इत्यलं

१ व ] किमिव
४ पि ] सहोपलम्भनियमः ।
१० इ ] चेतना मानसं कर्म--अभिध° ।
१३ न्वो ] निबन्धो
१६ दृशो ] दृश्ये
१६ येनाय ] यं
१७ मेव ] सहोपलम्भनियमात् ।
१९ * ] सहोपलम्भनियमेऽपि ।
१९ त ] बुद्धचित्त-तद्ग्राह्यसकलपदार्थयोः ।
१९ न् ] साधनम्

प्रसङ्गेन । तन्न बहिरन्तर्वा मिथ्यैकान्तैः तत्त्वं प्रतिपत्तुमर्हति । प्रत्यक्षेणापि--
§ 2175

नन्वेतत् पूर्वमुक्तम् अस्माभिः न शास्त्रकृता इति । **प्रत्यक्षः मध्यरूपो** मध्यस्वभावोऽ**र्वाग्भागो** यस्य स तथोक्तः सचा [सा]**वर्थश्च** तस्मात्मनः स्वरूपस्य **परोक्षता** । तत्परोक्षता कैः ? इत्यत्राह--**पूर्व** इत्यादि । अत्र **आदि**शब्देन रसादिपरिग्रहः । दृष्टान्तमाह--**बुद्धबुद्धिवत्** इति सुगतबुद्धेरिव तद्वत् इति । एतच्च निदर्शनम् *अनेकान्तापेक्षया न दृश्येतररूपापेक्षया ।
§ 2176

कारिकां विवृण्वन्नाह--**न केवलम्** इत्यादि । अस्याऽयमर्थः--यदा सुगत आत्मसन्तानतत्सन्तानातीतानाद्यनन्तक्षणान् अन्यसन्तानतत्क्षणांश्च पश्यति वा, न वा ? प्रथमपक्षे **न केवलं सन्तानक्षणानां** सहोपलम्भनियमाद् येन ज्ञानेन ते उपलभ्यन्ते तेन सह **तन्नियमाद् एकसन्तानत्वं एको**ऽभिन्नः कथञ्चिदन्योऽन्य**सन्तानः** *सन्तानं येषां [तेषां] भावः तत्त्वम्, **अपितु स-** /ms **न्तानान्तराणाम्** एकसन्तानत्वं सुगतज्ञानेन सह स्यात् इत्यध्याहारः **बुद्धश्चेद्** यदि **बोद्धा सन्तानिनां सन्तानान्तराणां च** । तथा च तद्व[द]न्यत्रापि दृश्येतररूपतया । अथ यथादेशकालां तेषामसौ बोद्धा; अनैकान्तिको हेतुः इति भावः । अथ एतद्दोषद्वयभयाद् एकान्तेन न सहैकत्वमिष्यते तेषाम्; तत्राह--**तदेक** इत्यादि । **तस्य** बुद्धस्य विवक्षितं **यदेकम्** अतनसज्ञानं तेन **उपलम्भात्** कारणात् सन्तानिनां सन्तानान्तराणां च **सन्ततिर्न भवेत्** । कुतः ? इत्यत्राह--**तदेकतापत्तेः** तेन उपलम्भकेन नै कतापत्तेः तेषामिति । अथ [स्व]रूपमात्रपर्यवसानात् न बुद्धस्तेषां बोद्धा; तत्राह— **पुन**रित्यादि । **पुनः** अतो दोषात् पश्चात् **संवित्ते**र्ज्ञानस्य बुद्धस्य इति विभक्तिपरिणामेन सम्बन्धः । **अनन्यवेद्यनियमे** अङ्गीक्रियमाणे । किम् ? इत्याह--**स्वपर** इत्यादि । **स्वश्च परश्च** तावेव **सन्तानौ** तयो**र्विकल्पः** क्षणक्षयादिभेदः स एव त**न्मात्र**शब्देन बहिरर्थाभावमाह, तस्यो**पदेशः कथं** न कथञ्चित् बुद्धस्य । यो यन्न पश्यति न स तदविपरीतम् उपदिशति परेभ्यः यथा रथ्यापुरुषः शास्त्रार्थम्, न पश्यति च बुद्धः तद्विकल्पमात्रमिति कारणानुपलब्धिः । तन्न युक्तम्--**अत्र भगवानेव धर्मादौ प्रमाणभूतत्वेन साध्यते** प्र° वार्तिकाल° पृ° १ *इति भावः । § 2177

४ नः] **तस्य आत्मनः**
७ *] बुद्धज्ञानं हि सकलार्थैः समम् उपलभ्यते न च तैः सह तस्य एकत्वमिति सहोपलम्भोऽनेकान्तः व्यभिचारीत्यर्थः ।
१३ *] सन्तानं इति पुनरुक्तंभाति ।
१६ कालां] लं
१८ ज्ञानं] मानसज्ञानं
२० नै] लम्भेन ए
२१ स्तेषां] सन्तानानां सन्तानान्तराणां च ।
२८ *] अत्र भगवतो हेतुफलसम्पत्त्या प्रमाणभूतत्वेन स्तोत्राभिधानं शास्त्रादौ शास्त्रार्थत्वात्, भगवानेव हि प्रमाणभूतोऽस्मिन् प्रसाध्यते ।--प्र° वार्तिकाल° ।

स्यान्मतम्--**स्वरूपस्य स्वतो गतिः** प्र० वा० १ । ६ इति वचनात् स्वरूप-भापर्व्य वसितेषु ज्ञानेषु न बुद्धेतरप्रतिभागो भावतोऽस्ति । तन्मात्रोपदेशः पुनः ततोऽन्यस्य विचार्यमाणस्याऽयोगात् इति; तत्राह--**मिथ्येत्यादि** । 427/mkj काकाक्षगोलकन्यायेन **कथं** शब्द उभयत संबध्यते ततो बुद्धस्येतरस्य वा /ms मिथ्याविकल्पमन्तरेण तदुपदेशः कथं संभवति निर्विकल्पेन तद्विचारायोगात् इति भावः । अस्त्येव तद्विकल्प इति चेत्; अत्राह— **तन्मिथ्येत्यादि** । तयोः बुद्धेतरयोः **मिथ्याविकल्पानाम्** । § 2178

ननु च विकल्पानाम् इत्युक्तेऽपि मिथ्यात्वं लभ्यते तद्रूपत्वात्तेषाम् तन्मिथ्येतिवचनमनर्थकमिति चेत्; उच्यते--सुगतस्य केचिदलिङ्गजं विकल्पज्ञानमिच्छन्ति । तद्यदि यथार्थम्; प्रमाणान्तरं स्यात् प्रत्यक्षेऽनन्तर्भावात् । अन्तर्भावे वा तद तस्यापि सविकल्पं प्रत्यक्षं स्यात् गृहीतग्रहणात् । तत् प्रमाणं न भवति कथं तदन्तरमिति चेत्; तस्य निर्विकल्पवत् सविकल्पस्यापि सन्तानवृत्तिसंभवे तद्गृहीतग्रहणात् अविकल्पमप्रमाणमस्तु तन्नद्य तार्थम् इत्यस्य प्रतिपादकमिति । यदि वा, परापेक्षयैव तथाभिधानाददोष इति । **अनेकान्तात्मकत्वं** भ्रान्तेतरात्मकत्वम् भवत्वेवं को दोष इति चेत् ? अत्राह--**कथम्** इत्यादि । **उपलभ्यं मध्यस्वरूपं** यस्य वस्तुनः तत् **कथं न वर्त्तेत** ? वर्त्ततैव । क्व ? **पूर्वापरकोट्योः** । केन ? **अदृश्यात्मना** । § 2179

एवं क्रमाऽनेकान्तं प्रतिपाद्य स्कन्धेऽक्रमानेकान्तं कथयन्नाह--**दृश्य** इत्यादि । **कथं न** इति सम्बन्धः । **इति** एव**मलं प्रसङ्गेन** । प्रकृतं निगमयन्नाह--[तन्ने] त्यादि । यत एवं **तत्तस्मात् न बहिरन्तर्वा तत्त्वं प्रतिपत्तुमर्हति** । कैः ? इत्याह--**मिथ्यैकान्तैः दर्शनैः** विकल्पैश्च सौगतः । यथायं तथा भवानपि तत्त्वमनेकान्तं न प्रतिपत्तुमर्हति इति चेत्; अत्राह--**प्रत्यक्षेणापि** /ms इत्यादि । § 2180

ननु प्रत्यक्षं वर्त्तमानक्षणमात्रग्रहणमनर्थ न पूर्वापरकोटिवीक्षणपद्ध तिप्रसङ्गात् । तथा तदत्र अर्वाग्भागदर्शनं मग्नं न परभागादि वीक्षते अतो न तत्तदेकत्वं प्रत्येति । अत एव नानुमानं तत्तत्कर्यवद् दृश्येतरात्मकत्वं कस्यचित् प्रतिपद्यते इति चेत्; अत्राह--**पश्यन्** इत्यादि । § 2181

---

२ र्व्य] पमात्रपर्य
२ ति] वि
२ भा] परमार्थतः ।
२ त] स्वपरसन्तानविकल्पमात्रोपदेशः ।
३ स्य] कपिलादेः ।
४ त] त्र
८ त्वात्तेषाम्] विकल्पानां मिथ्यारूपावात् ।
११ द] तद्वत्
१२ त्] विकल्पज्ञानम् ।
१२ त] प्रमाणान्तरमिति ।
१३ त] सविकल्पेन गृहीतस्य ग्रहणात् ।
१४ द्य] तन्न ग
१४ प] बौद्धमतापेक्षयैव मिथ्या इति विशेषणं प्रदत्तमिति ।
२२ पि] जैनोऽपि ।
२४ र्थ] मग्नं
२५ द्ध] पट्ट, अ
२५ त्र] प्रत्यक्षम् ।
२५ नं] ने
२६ त्वं] पूर्वापरैकत्वम् ।
२६ द्] तत्कार्यवत्

...31 पश्यन् जीवः स एवैकः सत्तामात्रं विकल्पयन् ।
अन्यथानुपपत्त्या च तमेवाभिनिबुध्यते ॥ ३१

॥§ 2183

मतिः स्मृतिः संज्ञा चिन्ताभिनिबोध इत्यनर्थान्तरम्त॰ सू॰ १ । १३ इति मत्यादीनां तादात्म्यलक्षणं सम्बन्धमाह सू त्र का रः । तदन्यतमस्याप्यतादात्म्यैकान्ते अर्थप्रतिपत्तेरनुपपत्तेः सन्तानान्तरवत् । § 2184

**जीव** आत्मा **अभिनिबुध्यते** पूर्वापरयोः अभि समन्ताद् एकत्वं जानाति । किं वैशेषिकाद्यभ्युपगतः, न इत्याह--**स** इत्यादि । अत्रैव पूर्वं प्रसाधित 428/mkj इत्यर्थः । ननु ज्ञानात्मकोऽ सौ ज्ञानानां च एकान्तेन भेदात् सोऽपि भिन्न इति चेत्; अत्राह--**एक** इति । पूर्वापरस्वपर्यायसाधारणः । कया युक्त्या ? इत्याह--**अन्यथानुपपत्त्या** । **अन्यथा** एकत्वाभावप्रकारेण या जीव तरस्येस्य वा उक्तविधिना **अनुपपत्तिः** तया । स यदि सत्तामात्रेण अभिनिबुध्यते सर्वस्य सर्वदर्शित्वमिति चेत्; अत्राह--**पश्यन् सत्तामात्रं** चेतनेतरसाधारणं दर्शनेन विषयीकुर्वन् । तथाहि--चेतनेतरत्वादिसामान्यविशेषव्यवसायः ततोऽपरसामान्यदर्शनपूर्वकः, विशेषव्यवसायत्वात् दूरे स्थाणुत्वादिव्यवसायवत् । न च सत्तायाः परं सामान्यम्; यतोऽनवस्था स्यात् । अथ निकटे सामान्यग्रहणमन्तरेणापि विशेषव्यवसायः ततो व्यभिचारः; न; तत्रावग्रहादिभेदस्य सतोऽप्यनुपलक्षणात् । § 2185

नन्वेवमपि सत्तामात्रमस्तु ग्रहणात्, न विशेषो विपर्ययात् इति चेत्; /ms अत्राह--**विकल्पयन्** तदेव सत्तासामान्यं चे[तने]तरत्वादिविशेषभिन्नम् अवग्रहादिधारणापर्यन्तज्ञानेन **विकल्पयन्** व्यवस्यन् पूर्वं पश्चाच्च तथा स्मृत्वा प्रत्यभिज्ञाय चिन्तयन् **अभिनिबुध्यते** इति । § 2186

इदमपरं व्या[ख्या]नम्--उपलभ्यमध्यरूपस्य पूर्वापरकोट्योः अदृश्यात्मानं दृश्यार्वाग्भागस्य परोक्षं परभागस्य [रसस्प]र्शादिकम् अभिनिबुध्यते अनुमिनोति । कया ? इत्याह— **अन्यथा** इत्यादि । दृश्यपूर्वापरकोट्योः अदृश्यात्माभावप्रकारेण अनुपपत्त्या । चर्चितमेतत् । किं कुर्वन् ? इत्याह--**पश्यन्** इत्यादि । व्याख्यातमेतत् । § 2187

कारिकां विवृण्वन्नात्मनः तत्र का रे णैकवाक्यतां दर्शयति--[मति]रित्यादिना । **अनर्थान्तरं** पदं व्याचष्टे--**मत्यादीनां तादात्म्यलक्षणं** कथञ्चिदेकत्वस्वरूपं **सम्बन्धमाह अनर्थान्तरम्** इत्यनेन **सू त्र का रो** न पर्यायपदत्वम्, प्रतीतिविरोधादिति । कुतः ? इत्यत्राह— **तदन्यतम** इत्यादि

---

४ सू] उमास्वाम्याचार्यः ।
८ सौ] जीवः ।
११ वा] जीवस्य इतरस्य वा
११ स] जीवः ।
१४ सा] अपरं भिन्नं सामान्यं सत्ताख्यम् ।
१९ अ] अवग्रेहावायधारणारूपेण ।
२७ त्र] सू[[तत्त्वार्थसूत्रकारेण ।]] त्र

। तेषु मत्यादिषु **अन्यतमस्यापि** न केवलं सर्वेषाम् **अतादात्म्यैकान्ते** भेदैकान्ते सति **अर्थस्य** घटादेः अनुमेयस्य वा वह्न्यादेः **प्रतिपत्तेः** अध्यक्षबुद्धेः, सर्वतो व्यापृतस्य परमाणुमात्रस्य दर्शनाभावात्, **अनुपपत्तेः सन्तानान्तरवत्** । यथा सन्तानान्तरं परस्य अदृश्यं तथा परमाणवः सर्वस्य । तथापि दृश्यत्वकल्पने सन्तानान्तरे कः प्रद्वेषः यतः तदनुमेयत्वं तदभावं वाऽदर्शनात् कश्चिद् आचक्षीत ? **प्रतिपत्तेः** अनुमानबुद्धेर्वा **अनुपपत्तेः सन्तानान्तरे** इव **तद्वद्** इति । यथैव अन्यस्य धूमदर्शनाद् अपरस्य तददर्शिनोऽस्मरणात्, अपरतत्स्मरणात् पुरुषान्तर[स्याऽ]प्रत्यभिज्ञानात्, इतरस्य तर्काभावात् न सन्तानान्तरे अनुमानम्, तथा प्रकृतेऽपि । § 2188 /ms

यदि पुनः कुतश्चित् प्रत्यासत्तेः एकसन्ताने, नान्यत्र, पूर्वपूर्वदर्शनादेः उत्तरस्मरणादिवृत्तेः अयमदोषः कल्प्यते; तन्न; यतः तत्रा हेतुफलभावनियमेऽपि उपादानेतरकारणवि[भागा]भावप्रसङ्गात् । यद्धि यद्रूपतया परिणमते तत् तस्य उपादानम् । न चैतद् भेदेऽस्ति । नापि तद् रूपान्तरं 429/mkj सन्तानकारणकारणम् उपादानकारणमिति चेत्; कोऽयं सन्तानो नाम ? हेतुफलप्रवाह इति चेत्; न; सुगतेतरयोः एकसन्तानत्वप्रसङ्गात् । सुगतश्चेद् इतरस्य दुष्टा *; तत्कार्यतया [एव भवितुमर्हति] । सदृशः तत्प्रवाहः सः; इत्यपि नोत्तरम्; हेतुफलावस्थयोः सुगतैकसन्तानापत्तेः । ज्ञानत्वेन सादृश्ये, न प्रकृतदोषपरिहारः । § 2189

अथ उपादानोपादेयक्षणप्रबन्ध इष्यते तच्चैतदेव बुभुत्सितम्--भेदैकान्ते किमुपादानम् इतरद्वा इति ? यदि पुनः एकस्मिन् सन्ताने पूर्वम् उपादानं परम् इतरत्; तर्हि सिद्धे सन्ताने सति उपादानेतरसिद्धिः, तस्याः स्वसन्तानसिद्धिः इत्यन्योऽन्यसंश्रयः । अथ यद्विकारेण यद् विक्रियते तदुपादानम् इतरद् उपादेयम्; केयं यद्विकारेण यद्विक्रिया नाम ? शास्त्रादिना संस्कृतचित्तात् तादृशचित्तोत्पत्तिः; ततो योगिज्ञाना तयुषं *तादृशं किन्न भवति येनैवम् । § 2190

किं च, शास्त्रादिना प्रथमसंस्क्रियमाणं चित्तं पूर्वस्मात् तदसंस्कृतादेव ततो जायते इति न युक्तम्--यद्विकारेण इत्यादि । तस्यापि तेन संस्कार

३ स्य] व्यावृत्तस्य
५ दृ] परमाणूनाम् ।
६ क] चार्वाकः ।
७ अ] पुरुषस्य ।
८ भिज्ञानात्] प्रत्यभिज्ञानं न भवतीत्यर्थः ।
११ त्रा] तत्र
१५ ए] यदा सुगतः इतरजनचित्तं जानाति तदा इतरजनचित्तं सुगतचित्तस्य कारणं भवति, अतस्तयोः एकसन्तानतापत्तिः ।
१६ *] द्रष्टा
१७ सः] सन्तानः ।
१७ योः] घटपूर्वोत्तरक्षणयोः ज्ञायकेन सुगतज्ञानेन सह एकसन्तानत्वापत्तिः ।
१८ प्र] इतरजनज्ञान-तज्ज्ञायकसुगतज्ञानयोरेकसन्तानत्वापत्तिः ज्ञानत्वेन सादृश्यात् ।
१९ म्] ज्ञातुमभिलषितम् ।
२१ त्] उपादेयम् ।
२४ चित्तात्] संस्कृतचित्तोत्पत्तिः ।
२४ तो] संस्कृतचित्तात् ।
२४ युषं] ज्ञानं तेषु[[योगिषु ।]]
२४ *] संस्कृतमेव ।
२७ तो] चित्तात् ।

इत्यपि नोत्तरम्; अनवस्थाप्रसङ्गात् । ततो यद् उपादेयत्वेन परिणमते /ms तदुपादानम् । § 2191

ननु सुप्तस्य स्वप्नदर्शिनो जाग्रद्विज्ञानं प्रबोधरूपेणापरिणममाणमपि तदुपादानम्, अतो व्यभिचारः; उक्तमत्र परिच्छेदे । कुतश्च तत्तस्योपादानम् ? तद्रूपप्रबोधदर्शनात्; सुगतज्ञानमपि तद्रूपं त्वया इष्यत एव तथा च तज्ज्ञानमुपादानम् बुद्धज्ञानमुपादेयम् इति प्रसक्तम् । देशभेदान्नेति चेत्; *अन्यत्र सुप्तस्य अन्यत्र प्रबोधे न स्यात् । § 2192

एतेन स्वप्नान्तिकशरीरचित्तं तदुपादेयं निरस्तम् । अथ सुप्तस्य शरीरवत् चित्तस्याप्युत्पत्सन्तानतया देशान्तरगमनमिष्यते; कालान्तरगमनपरीष्यताम् अविशेषात् । तस्मादुक्तमेव उपादानं युक्तमिति सूक्तम्--**तदन्येत्यादि** । § 2193

एवं तावत् **असिद्धः सि द्ध से न स्य** इत्यादिना मिथ्यैकान्ते हेत्वभावं प्रदर्श्य अधुना एकलक्षणविरहे सर्वत्र तदभावं दर्शयन्नाह--**एकलक्षणेत्यादि** । § 2194

...32 एकलक्षणसामर्थ्याद्धेत्वाभासा निवर्तिताः ।
विरुद्धानैकान्तिकासिद्धाज्ञाताकिञ्चित्करादयः ॥ ३२ ॥§ 2196

430/mkj

अन्यथानुपपत्तिनिर्णीतो हेतुः गमक इति हेत्वाभासा निराकृताः । कथम् ? अन्यथैवोपपत्त्या विरुद्धः । तथा च अन्यथा चोपपत्त्या अनैकान्तिकः । अन्यथा च संभूष्णुरसिद्धः । तदज्ञाने पुनरज्ञातोऽकिञ्चित्करः । तथैवोदाहरणम् । न ह्येकलक्षणाभावे त्रिलक्षणं गमकम् ? अनुपलब्धिः...। कुत एतत् ? उपलब्धिस्तावच्चित्रा निश्चेतुमशक्यैव । कथम् ? § 2197

---

३ माण] न
४ श्च] जाग्रद्विज्ञानं प्रबोधस्योपादानमिति ।
७ *] गच्छच्छकटे देशान्तरे सुप्तस्य अन्यत्रच प्रबोधे ।
८ एतेन] यथा स्वप्नान्तिकः कायः त्रासलङ्घनधावनैः ।--प्र॰ वार्तिकाल॰ २ । ३७ ।
९ री] नमपी
१६ यः] तुलना— असिद्धस्त्वप्रतीतो यो योऽन्यथैवोपपद्यते । विरुद्धो योऽन्यथाप्यत्र युक्तोऽनैकान्तिकः स तु ॥--न्यायावता॰ श्लो॰ २३ । अन्यथासंभवाभावभेदात् स बहुधा स्मृतः । विरुद्धासिद्धसन्दिग्धैरकिञ्चित्करविस्तरैः ॥ --न्यायवि॰ श्लो॰ ३६५--३६६ । स विरुद्धोऽन्यथाभावाद् असिद्धः सर्वथाऽत्ययात् । व्यभिचारी विपक्षेऽपि सिद्धेऽकिञ्चित्करोऽखिलः । अज्ञातः संशयासिद्धव्यतिरेकानन्वयादितः ॥--प्रमाणसं॰ श्लो॰ ४८-४९ ।

[एकलक्षणसामर्थ्यात्] अन्यथानुपपन्नत्वमाहात्म्याद् **हेत्वाभासाः** हेतुप्रतिरूपका **निवर्त्तिताः** हेतुसामर्थ्यात् पृथक्कृताः । के ते ? इत्याह--**विरुद्धे**त्यादि । **विरुद्धादीनां द्वन्द्वं कृत्वा आदिशब्देन** बहुव्रीहिः कर्त्तव्यः । तत्र **आदिशब्देन** सन्दि[ग्ध]परिग्रहः । § 2198

कारिकां विवृण्वन्नाह--**अन्यथा** इत्यादि । [अन्यथा] साध्याभावे नियमेन या **अनुपपत्तिः** तया **निर्णीतः** पदार्थो **हेतुः गमकः** इत्येवं सामर्थ्याद् **हेत्वाभासा** विरुद्धादयो **निराकृता** [हे]तुत्वेन । पर[ः] पृच्छति **कथम्** इति ? सूरिराह--**अन्यथैव** साध्याभावप्रकारेणैव साध्यान्तर एव **उपपत्त्या विरुद्धः । तथा च** साध्यभावप्रकारेण च **अन्यथा च** साध्याभावप्रकारेण च **उपपत्त्या अनैकान्तिको** व्यभिचारी । तथा, **अन्यथा च संभूष्णुः असिद्धः । तदज्ञाने तस्य** हेतोः सतोऽपि संशयादिनाऽज्ञाने अनिर्णये **पुनरज्ञातः असिद्धः** इत्यनुवर्त्तते । यदि वा, **तस्य** हेतुलक्षणस्य पक्षे अन्यत्र वाऽज्ञाने **पुनरज्ञातोऽकिंचित्करः** । अनेन **संदिग्ध** इत्यादि विवृतम् । अत्रोदाहरणं किम् ? इत्यत्राह--**तथैव** यथैव **असिद्धः सिद्धसेनस्य** इत्यादौ उक्त**मुदाहरणं** प्रतिपत्तव्यम् । § 2199 /ms

ननु नैकलक्षणविरहाद् विरुद्धादिर्निराकृतः किन्तु पक्षधर्मत्वादिविरहादिति चेत्; अत्राह--**नह्येकलक्षणाभावे त्रिलक्षणं** त्रीणि पक्षधर्मत्वादीनि लक्षणानि यस्य तत्तथोक्तं वस्तु **गमकं** लिङ्गम् अपि तु तत् तद्भाव एव । एवं मन्यते--यदि त्रिलक्षणं व्याप्तं गमकत्वं तर्हि स्यादेतत् तदभावे न स्यात् इति, यावतैव लक्षणव्याप्तं तदभावे एव न भवेत् इति [किं त्रिलक्षणेन ?] किं तत् त्रिलक्षणं लिङ्गमिति चेत्; अत्राह--**अनुपलब्धिः** इत्यादि । **कुत एतत् ?** तदभावे तद्गमकम् इत्येतत् कुत इति परः । सिद्धान्तवादी आह--**उपलब्धि** इत्यादि । **तावच्छब्दः** क्रमवाची, **चित्रा** नानारूपा **निश्चेतुमशक्यैव** । न चानिश्चिता गमिका इति मन्यते । परः पृच्छति **कथमिति** केन प्रकारेण निश्चेतुमशक्या इति ? § 2200

तत्रोत्तरमाह--**न दृश्यलक्षणप्राप्त** इत्यादि । § 2201

...33 न दृश्यलक्षणप्राप्ते दृश्यादृश्यार्थलक्षणे ।
यतः परस्पराभावस्स्वस्वभावव्यवस्थितिः ॥ ३३
॥§ 2203

तत्र उपलब्धिलक्षणप्राप्तिः उपलम्भप्रत्ययान्तरसाकल्यं स्वभावविशेषश्च । नहि उपलम्भप्रत्ययान्तरसाकल्यं तद्विरहो वा स्वयमुपलब्धिलक्षणप्राप्तं यतः तदन्योऽन्याभावरूपेण निर्णयः स्यात् । § 2204

---

१७ णाभावे] त्रैरूप्यं पुनः लिङ्गस्यानुमेये सत्त्वमेव ॥ ५ ॥ सपक्षे एव सत्त्वम् ॥ ६ ॥ असपक्षे चासत्त्वमेव निश्चितम् ॥ ७ ॥(?")--न्यायबि॰ परि॰ २ ।

१९ त्वं] कं

२० तैव] तैक

431/mkj

**दृश्यस्य लक्षणं** वक्ष्यमाणं **प्राप्तं** यकाभ्यां ते तथोक्ते **न** भवतः । के ? इत्यत्राह— **दृश्येत्यादि** । **दृश्यादृश्यार्थयोर्लक्षणे यतो** दृश्यलक्षणप्राप्तत्वात् । किम् ? इत्याह— **परस्पर** इत्यादि । दृश्यार्थलक्षणे [अ]दृश्यार्थलक्षणस्य, तत्र वा दृश्यप्रव्यथार्थ लक्षणस्याभावः **परस्परभावः** तेन **स्वस्वभावव्यवस्थितिः** /ms तल्लक्षणयोर्व्यवस्थिति हेतुत्वात् । निर्णयो व्यवस्थितिशब्देन उच्यते । **परस्पराभावस्वभावव्यवस्थितः** इति पाठान्तरम् । स्वेन रूपेण व्यवस्थितो निर्णीतः दृश्योऽत्र लक्षणस्य इतरत्र तस्य च प्रकृत एव अभावो न सङ्करव्यतिकरौ इत्यर्थः । अत्रायमभिप्रायः--यदा दृश्यार्थलक्षणमवसितं भवति तदा लक्षणप्राप्तिः क्वचिदवगम्यते, अनुपलम्भाच्च तया स्या भावः, न चैवम् इति ।
§ 2205

अत्राह परः--दृश्यार्थलक्षणं प्रत्ययान्तरसाकल्ये सति स्वविषयविज्ञानोत्पादनयोग्यत्वम् । तच्च टादे रवस्तुत्वभयान्नार्थान्तरम् इति तस्यावभासे अवभासते **एकस्यार्थस्वभावस्य** प्र॰ वा॰ ३ । ४२ इत्यादि वचनात् । कथन्न दृश्यलक्षणं प्रत्ययान्तराणां घटादिसहचारिणां साकल्यं नमस्कारा दीनां न तेभ्यो व्यतिरिच्यत इति दृश्यलक्षणपरिहारेण प्राप्तत्वे तादृशमेव । अदृश्यार्थलक्षणं पुनः तद्विपर्ययः । सोऽपि पर्युदासवृत्त्या उक्तभावस्वभाव इति न युक्तम् **न दृश्यलक्षणप्राप्ते** इत्यादि । भवतु वा दृश्यार्थलक्षणं न दृश्यार्थलक्षणप्राप्तमंत्येभः तथापि तस्य इतरत्र तादात्म्यनिषेधो न विरुध्यते इति । § 2206

अत्र प्रतिविधीयते--स्वभावविशेषः प्रत्ययान्तरसाकल्यं च विषयस्य प्रत्ययान्तराणां च रूपादिज्ञानकार्यजननयोग्यता । सा च न दृश्यलक्षणप्राप्ता, कारणशक्तेः अस्मादृशां नित्यं कार्यानुमेयत्वात् । अन्यथा कारणदर्शिनो न कार्ये सन्देहः इति न परलोकानुमानम् अर्थवत् । यद्वक्ष्यति **मन्त्रौषधादिशक्तेश्च दृश्यलक्षणानुपपत्तेः** सिद्धिवि॰ ६ । ३५ इति । न च /ms तावन्मात्रापेक्षं तद्वचनम्, अन्यत्रापि तदविशेषात् । दृश्यसादृश्यरूपाविरोधश्चोक्तः । अदृश्यार्थलक्षणमपि तद्योग्यताविरहः; सोऽपि न दृश्यलक्षणप्राप्तः । न दृश्यस्य धर्मादिरभावः *तत्प्राप्तो युक्तः । तदेवम् उभयो[र]दृश्य-

---

४ त] अदृश्यार्थलक्षणे ।
४ थार्थ] दृश्यार्थ
४ र] रा
९ स्या] तस्या
११ प्र] प्रतियोगिव्यतिरिक्त-उपलम्भकारणान्तराणां समुदाये सति ।
१२ टादे] घटादे
१२ त] घटस्य ।
१३ इ] प्रत्यक्षस्य सतः स्वयम् । कोऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते ॥ इति शेषः ।
१५ स्कारा] म[[मनस्कारः चेतसः आभोगः--उपयोग इति यावत् ।]]नस्कारा
१७ णं] एतदन्तर्गतः पाठो द्विर्लिखितः ।
२० स्व] तत्र उपलब्धिलक्षणप्राप्तिः उपलम्भप्रत्ययान्तरसाकल्यं स्वभावविशेषश्च ।--न्यायबि॰ २ । १४ ।
२१ सा] योग्यता शक्तिरूपा ।
२३ म्] परलोकगामिनो जीवस्य प्रत्यक्षत्वे तद्योग्यताया अपि साक्षात्करणं यतो जातम् ।
२७ *] दृश्यलक्षणप्राप्तः ।

त्वेन परस्पराभावस्वस्वभावपरस्थिति । न खलु परमाणुपिशाचयोः तद्व्यवस्थितिः । अत एव न तादात्म्यनिषेधोऽपि; दृश्येऽन्यस्याभ्युपगमात् । अथ विरोधात् दृश्यार्थलक्षणे अदृश्यार्थलक्षणाभावः; तदपि न; दृश्यात्मनामे[व] परेण विरोधोपगमात् । **दृश्यात्मनामेव तेषां तद्विरुद्धानाम्** इत्यादि वचनात् । यदि पुनः कार्यानुमेयायां योग्यतायाम् इतराभावसिद्धिः प्रार्थ्यते, तदपि प्रार्थनमात्रमिति प्रतिपादयिष्यते **अदृश्यस्य** इत्यादिना । § 2207

432/mkj

कारिकां विवृण्वन्नाह--**तत्रोपलब्धि** इस्यादि । तत्र पक्षद्वयम्--उपलब्धिलक्षणप्राप्तिः उपलम्भप्रत्ययान्तरसाकल्यं स्वभावविशेषश्च दर्शनविषयता वा । प्रथमपक्षे **तत्र उपलब्धिलक्षणप्राप्तानुपलब्धिः अभावहेतुः** हेतुबि° पृ° ६४ इति ग्रन्थे **उपलब्धिलक्षणप्राप्तिः** उपलब्धेः बुद्धेः लक्षणं कारस्मिन् सति सा लक्ष्यते तत्प्राप्तिः **उपलम्भस्य प्रत्ययान्तराणि** घटप्रत्ययापेक्षया इन्द्रियादीनि तेषां **साकल्यं** तज्जननयोग्यदशाप्राप्तिः **स्वभावविशेषश्च** घटस्य स्वभावविशेषः तत्र योग्यता । **च** इति समुच्चये । ततः किम् ? इत्याह--**नहि उपलम्भ** इत्यादि । [न हि] नैव **उपलम्भप्रत्ययान्तराणां साकल्यम्,** उपलक्षणमेतत् [तेन] स्वभावविशेषोऽपि गृह्यते । कल्पं वा **तद्विरहो वा स्वयमुपलब्धेः लक्षणप्राप्तं यतः** तत्प्राप्तत्वात् **तयोः** साकल्यवैकल्ययोः **अन्योऽन्याभावरूपेण निर्णयः स्यात् । यत** इति वा आक्षेपे । नैव स्यात् । /ms

§ 2208

ततः किम् ? इत्यत्राह--**कार्येत्यादि** । § 2209

...34 कार्यस्वभावयोश्चैवं व्यतिरेको न सिध्यति ।
त्रिकालविषयं [यस्मादविनाभावः परस्परम्] ॥ ३४ ॥§ 2211

उपलब्धि...तदैकान्तिकं न कस्यचित् स्यात् । अतीतस्य वर्तमानस्य प्रतिपत्तृप्रत्यक्षस्य निवृत्तिर्यदि पर्युदासात्मिका; नावृक्षः शिंशपा भविष्यति धूमोऽनग्निजन्मा वेत्यजानन् कथं व्याप्तिज्ञः ? पुनस्तत्रानुमानं कुर्यात् ? तन्नायमेकान्तः--उपलब्धिलक्षणप्राप्तस्यानुपलब्धिरभावसाधनीति । § 2212

**च** शब्दाद् अनुपलब्धेश्च **व्यतिरेको न सिध्यति** साध्याभावे साधनाभावो न सिव्यति । दृश्यस्या र्थलक्षणयोः दृश्यलक्षणप्राप्तत्वाभावे दृश्यार्थलक्षणस्य इतरलक्षणविधुरस्य अनिर्णयात् न दृश्यार्थलक्षणं कारणे कार्ये भावे स्वभावे वा सिध्यति । तथा च कारण-भावयोः क्वचिन्निवृत्त्यसिद्धेः कुतः त-

---

१ स्थिति ] व्यवस्थितिः
११ स्मिन् ] कस्मिन्
१५ वा ] ?
२७ स्या ] दृश्यादृश्या
२८ इ ] अदृश्यार्थलक्षणरहितस्य ।

न्निवृत्तिपूर्विका कार्यस्वभावनिवृत्तिः इति मन्यते । मा भूद् व्यतिरेकसिद्धिः, अन्वयमात्रेण कार्यादिर्गमकत्वमिति चेत्; अत्राह--**त्रिकालविषयम्** इत्यादि । [ता] त्पर्यमिदमत्र--व्यतिरेकासिद्धावन्वयोऽपि न सिध्यति, परेण परस्परम् अविनाभावोपगमादनयोः । तथा च तन्निबन्धनतादात्म्यादि प्रतिबन्धोऽपि न सिध्यति । केवलम् अस्य साध्यसाधनयोरनवयवेद दर्शनं प्रतिबन्धसाधकम्, तच्च नास्तीति । § 2213

कारिकां विवृणोति **उपलब्धि** इत्यादिना । सुगमम् । ततः किम् ? इत्याह--**ततः** तस्माद् उक्तन्यायाद् **ऐकान्तिकम्** अव्यभिचारित्वं कार्यादीनां मध्ये **न कस्यचिद्** हेतोः **स्यात्** । एवं परस्य उपलब्धिलक्षणप्राप्त्यभावं तस्मिंश्च सति दूषणं यत् तदपि प्रतिपाद्य, इदानीम् अनुपलब्धिं व्यतिरेक- /ms प्रसाधिकां दूषयितुं पृच्छति--**निवृत्तिः पर्युदासात्मि [का] यदि** । कस्य निवृत्तिः ? इत्याह--**प्रतित्व प्रत्यक्षस्य** यो वृक्षस्याभावे शिंशपात्वस्य वह्नेर- 433/mkj भावे धूम त्वस्य अभावं प्रतिपद्यते तत्प्रत्यक्षस्य न पुरुषविशेषप्रत्यक्षस्य । किंभूतस्य ? इत्याह--**अतीतस्य वर्त्तमानस्य** । चशब्दोऽत्र द्रष्टव्यः समुच्चयार्थः । अन्यस्य निवृत्तावपि भावनिवृत्त्यसिद्धेः इति भावः । अत्र दूषणमाह--**नावृक्ष** इत्यादि । **शिंशपा न भविष्यति** इतेवमजानं **अवृक्षो** वृक्षो यो न तथा **धूमो न भविष्यतीत्येव**मजानन् । किंभूतः ? **अनग्निजन्मा [न]** विद्यते अग्नेर्जन्म [य]स्येति । **कथं व्याप्तिज्ञे** न कथञ्चित् सौगतः, व्याप्तिज्ञत्वस्य साकल्येन अन्वयव्यतिरेकज्ञातारूपत्वात् । **पुनः** पश्चात् **तत्र** वृक्षे अग्नौ वा **अनुमानं कुर्यात्** कथमति सम्बन्धः । तदज्ञस्य तत्करणयोगात् । उपसंहारमाह—**तन्नायमेकान्त** इत्यादि । तत् तस्मात् **नायमेकान्तो** निर्णयः । कस्य ? **उपलब्धिलक्षणप्राप्तस्य** । उपलक्षणमेतत्, तेन तद्विपरीतस्य वा **अनुपलब्धेः अभावसाधनीति** नायमेकान्तः । कः ? इत्याह--**उपलब्धिलक्षणप्राप्तस्य** । एवकारोऽत्र द्रष्टव्यः । **अनुपलब्धिः** निषेध्याकारविविक्तभावान्तर-तज्ज्ञानरूपा **[अ]भावसाधनीति** । भाविनोऽदृश्यस्य कालादेः, अदृश्येन शिंशपात्वादिना वृक्षत्वाद्यभावेन प्रसाधनात् इति भावः § 2214

२ इत्यादि] अत्र ग्रन्थस्त्रुटितो भाति ।
४ योः] अन्वयव्यतिरेकयोः ।
५ वेद] वेन[[साकल्येन ।]]
६ म्] अविनाभावसाधकम् ।
१२ तित्व] प्रतिपत्तृ
१६ जानं] इति एवम् अजानन्
१८ व्याप्तिज्ञे] व्याप्तिज्ञो
१९ ज्ञाता] ज्ञता
२० ति] कथम् इति
२० त] अज्ञातव्याप्तिकस्य ।
२० त] अनुमानकरणाभावात् ।
२० ण] णा
२२ त] अनुपलब्धिलक्षणप्राप्तस्य ।
२३ ब्धेः] ब्धिः
२४ ज्ञान] तज्ज्ञान

नन्वेतत् हे तु बि न्दौ चोदितं प्ररहृत  न देशान्तरादौ कारणादेरभावेन कार्याद्यभावः साध्यते किन्तु तत्र तदभाव३४६ स्याऽनिर्णयात्, केवलं वृक्षाभवश्चत्  न शिंशपया भवितव्यम्, *निःस्वभावतापत्तेः, अग्नेरभावे न धूमेन निर्हेतुकत्वं स्यादिति प्रसङ्गसाधनमुच्यते इति चेत्; उक्तमत्र अन्वयव्यतिरेकाऽनिर्णये प्रतिबन्धाऽनिर्णयान्नैवमिति । कथं च शिंशपा वृक्षस्वभावा येन तदभावे न स्यात् ? तथा दर्शनात्; यदि सर्वत्र; प्रतिपत्तुः सर्वज्ञत्वम् । क्वचिच्चेत्; अनित्यस्य प्रयत्नानन्तरीयकस्वभावता घटादौ तथा दर्शनात् । अथ वनकुसुमादौ अन्यथापि दर्शनात् तस्य न तत्स्वभावता; शिंशपा वृक्षाभावे न भविष्यति इति तथैव न प्रमाणम् । एतेन धूमो व्याख्यातः । तदभावे [अ]भावात् तस्याः तत्स्वभावता; अन्योऽन्यसंश्रयः--सिद्धे तत्स्वभावे [तवृक्षाभावात् ।दभा] वात्तस्या अभावः सिध्यति, ततः तत्स्वभावता इति न किञ्चिदेतत् । § 2215

434/mkj

ननु भवतु **दृश्यादृश्यार्थलक्षणे न दृश्यलक्षणप्राप्ते** इति, तथापि चक्षुरुन्मीलनादिसन्निधौ रूपादिज्ञानकार्यदर्शनात् क्वचिद् दृश्यार्थलक्षणे विविक्तं प्रतीयते, तददर्शनाददृश्यार्थलक्षणम् इतरविविक्तमिति चेत्; अत्राह--**[अ]दृश्यस्ये**त्यादि । § 2216

---

१ न्दौ] यदि कारणाव्यापकौ तदन्यभावसिद्ध्या अनुपलब्ध्या सिद्धसद्व्यवहारौ अन्यस्याभावमभावव्यवहारं च साधयतः, सा च तयोरुपलब्धिलक्षणप्राप्तावेवासद्व्यवहारस्य साधिकेति कथं तयोः कारणव्यापकानुपलब्ध्योः परोक्षेऽर्थे प्रयोगः ? नैव प्रयोगः प्रमाणतया लिङ्गस्यानिश्चयात् । केवलं कारणव्यापकयोर्हि सिद्धसम्बन्धयोर्यद्यभावः परस्याप्यवश्यं नियमेनाभाव इत्येतस्य दर्शनार्थमेते क्वचित् प्रयुज्येते इति ।[[हेतुबि° पृ° ६८]]कारणव्यापकयोर्हि कार्यकारणभावप्रसाधकेन पूर्वोक्तेन प्रमाणेन व्याप्यव्यापकभावसाधकेन च तदुत्पत्तिलक्षणे तादात्म्यलक्षणे च सम्बन्धे साधिते सिद्धसम्बन्धयोर्यद्यभावः यत्र यत्र अभावः स्यात् परस्यापि कार्यस्य व्याप्यस्य वा अवश्यं नियमेनाभावः, अन्यथा अहेतुकत्वप्रसङ्गाच... ...--हेतुबि° टी° पृ° २०३--४ ।

१ हृत] परिहृतम्

२ त्र] देशान्तरादौ ।

३ त्] वृक्षाभावश्चेत्

३ *] अन्यथा ।

४ धूमेन] भवितव्यम्, अन्यथा ।

५ प्र] अविनाभाव ।

५ भावा] सिद्धा ।

६ त] वृक्षाभावे ।

६ त्र] तथादर्शनम् ।

७ चिच्चेत्] तथादर्शनं तर्हि ।

७ ता] स्यात् ।

८ कुसुमादौ] प्रयत्नाभावेऽपि अनित्या दृश्यन्ते इति चेत् ।

८ त] अनित्यस्य ।

९ म्] वृक्षाभावेऽपि शिंशपालतायाः संभाव्यमानत्वादिति ।

१० भावात्] शिंशपायाः ।

१० ता] वृक्षस्वभावता चेत् ।

११ स्या] शिंशपायाः ।

१४ णे] णं

...35 *अदृश्यास्याननुमेयस्य दृश्यस्यानुपलम्भवत् ।
कथन्नाभावोऽनुमाभावकारणासंभवे सति ॥ ३५

॥§ 2218

यथैव दर्शनाभावकारणासंभवे दृश्याभावोऽनुपलब्धेः सिध्यति तथैव अनुमानाभावकारणासंभवे अनुमेयस्य परचित्तादेः भवत्यभावसिद्धिः अन्यथा निश्चेतनपरशरीरप्रतिपत्तेरनुपपत्तेः । तदयं भूतचैतन्यवादिनमपि धार्ष्ट्याद्विजयते सर्वथा अनुमानोच्छेदप्रसङ्गात्, दृष्टार्थापलापात् क्वचिद् व्यवस्थित्यभावात् परपक्षाक्षेपमात्राग्रहात् स्वपक्षप्रतिक्षेपाच्च । कथम् ? § 2219

**अदृश्यस्य** अनुपलभ्यरूपस्य । किंभूतस्य ? **अननुमेयस्य** अनुमानाऽपरिच्छेद्यस्य अप्रदर्शितकार्यादेः इत्यर्थः । किम् ? इत्याह--**कथं नाऽभावः** [प्रतीयते ?] प्रतीयत एव । कस्मिन् सति ? इत्याह--**अनुमाभावकारणासंभवे** इति । **अनुमाया अभावो**ऽसत्त्वं तस्य **कारणम्** अनुमात्राद्यभावः तस्यासंभवे तद[स]द्भावे **सति** । § 2220

स्यान्मतम्--यदि सर्वदा साध्यमदृश्यं कथं तत्र किञ्चित् प्रतिबद्धं सिध्यति ? किंच, न कार्याद्यभावेन नियमेया भावः, अन्यथा धूमशिंशपयोरभावो अग्निवृक्षयोः तथाभावः स्यात् । न चैवमिति चेत्; अत्राह--**दृश्यस्य अनुपलम्भवद्** इति । **दृश्य[स्य]** दृश्यार्थलक्षणोपेतस्य, उपलभ्यते इति उपलम्भः दृश्य इत्यर्थः, उपलभ्यतेऽनेन इति वा, न उपलम्भोऽ**नुपलम्भः** तेन इव तद्वत् इति । एतदुक्तं भवति--यथा दर्शनाभावकारणासंभवे द्रष्टादिसंभवे दर्शनाभावेन दृश्यलक्षणप्राप्तस्यापि, दृश्यलक्षणे[ऽ]भाव उपलम्भस्य, अदृश्ये[ऽ]भावो ग्राह्य तथा प्रकृतस्यापीति । § 2221

/ms

यत्पुनरुक्तम्--अदृश्ये कथं कस्यचित् प्रतिबन्धः इति; त[द]युक्तम्; दृश्यलक्षणशक्तेरदृश्यत्वे कथं तत्र दर्शनप्रतिबन्ध इति चिन्त्यम् । § 2222

यच्चान्यत्--न धूमाभावात् धूमध्वजाभाव इति; तदपि सुपरिहारम्; यतः दर्शनस्य घटादिकार्यस्याभावे कथं क्वचिद् घटाभावसिद्धिः ? शक्यं हि

---

१ *] तुलना--अदृश्यानुपलम्भाद-भावासिद्धिरित्ययुक्तं परचैतन्यनिवृत्तावारेकापत्तेः संस्कर्तॄणां पातकित्वप्रसङ्गात्, बहुलमप्रत्यक्षस्यापि रोगादेर्विनिवृत्तिनिर्णयात् ।--अष्टश॰ अष्टस॰ पृ॰ ५२ । अदृश्यपरचित्तादेरभावं लौकिका विदुः । तदाकारविकारादेरन्यथानुपपत्तितः ॥--लघी॰ श्लो॰ १५ ।

६ ङ्गात्] यदि पुनरयं निर्बन्धः विप्रकर्षिणामभावासिद्धेस्तदा कृतकत्वधूमादेर्विनाशानलाभ्यां व्याप्तेरसिद्धेर्न कश्चिद् हेतुः । ततः शौद्धौदनिशिष्यकाणामनात्मनीनमेतत् अनुमानोच्छेदप्रसङ्गात् ।--अष्टश॰ अष्टस॰ पृ॰ ५२ । लघी॰ स्ववृ॰ श्लो॰ १५ । प्रमाणसं॰ पृ॰ १०८ ।

११ अनु] अनुमानकर्तुरभावः हेत्वाद्यभावश्च ।

१४ मेया] नियमेन कारणाद्य

१५ भावो] वे

१५ थाभावः] अभावः स्यादित्यर्थः ।

१७ वा] उपलम्भः ।

१८ वे] द्रष्टुः प्रकाशादेर्वा सद्भावे ।

१९ ष्टा] ष्ट्रा

१९ दृ] दृश्ये वस्तुनि आधारभूते ।

२४ स्य] प्रत्यक्षस्य ।

वक्तुम्--नावश्यं कारणानि कार्यवन्ति भवन्ति इति । अप्रतिबद्धसामर्थ्यस्य 435/mkj भवत्येव तत्सिद्धिः इत्यपि नोत्तरम्; सामर्थ्यस्य अदृश्यत्वा[त्] प्रतिबद्ध-सामर्थ्येतरविभागानवधारणात् । § 2223

किं च, प्रतिबद्धसामर्थ्यस्य समर्थ्यस्य सतोऽपि सर्वस्य सर्वत्राऽभावाऽविनिश्चयाद् भावशङ्कया न केनचित् प्रवर्तितव्यं निवर्तितव्यं वा कुतश्चिद् इत्येतदापतितम् । § 2224

कारिकां व्याचष्टे **यथैव** इत्यादिना । **दृश्यवस्तुनोऽभावोऽनुपलब्धेः** दर्शनाभावात् **सिध्यति यथैव** । कस्मिन् सति ? इत्याह--**दर्शन** इत्यादि । **दर्शनस्याऽभावो**ऽनुत्पत्तिः तस्य **कारणं** प्रत्ययान्तरवैकल्यं **तस्यासंभवे** प्रत्ययान्तरसाकल्य इत्यर्थः । एतदुक्तं भवति--प्रत्ययान्तरसाकल्येऽपि यदा भूतलघटे दर्शनं नोत्पद्यते तदा तदभावः प्रतीयते दृश्या भा सिद्धिमुपदर्श्य दर्शनकारणसंभवमुपदर्शयता तदेवाङ्गीकृतम् इति । /ms **तथैवानुमेयस्य** अनुमातुं योग्यस्य **परचित्तादेः भवत्यभावसिद्धिः** । कस्मिन् सति ? इत्याह--**अनुमानाभावकारणासंभवे** इति । **अनुमानाभावस्य कारणम्** अनुमातृपक्षदृष्टान्तादीनामभावः, **तस्यासंभवे** *तेषां संभवः इत्यर्थः । कुतस्तत्संभवे तस्य भवत्यभावसिद्धिः इति चेत् ? अत्र हेतुः **अनुपलब्धेः** इत्यनुवर्त्तनीयः अनुमानोपलब्धेरभावात् । नन्वनुमानम् अनुमेयकार्यम्; अतोऽस्याभावे कथं तदभाव इति चेत् ? अत्राह--**अन्यथा** इत्यादि । **अन्यथा** अन्येन अनुपलब्धिः तत्संभवे तदभावासिद्धिप्रकारेण **निश्चेतनपरशरीरप्रतिपत्ते[रनुपपत्तेः] भवत्यभावसिद्धिः अनुमेयस्य** इति । § 2225

स्यान्मतम्--चेतनाकार्यस्य व्यापाराध्या हारादेः अदर्शनात् परवपुषि चेतनाविरहसिद्धिः, न च कार्याभावात् कारणाभाव, प्रतिबद्धसामर्थ्यस्य [कारणान्तरवैकल्यस्य] वा शङ्काऽनिवृत्तेः, ततो **निश्चेतनपरशरीरप्रतिपत्तेरनुपपत्तेः** इति सिद्धं साध्यत इति चेत्; अत्राह--**तदयम्** इत्यादि । **तद्** इत्येतत् सः इत्यस्यार्थे । सोऽयं सौगतो **भूतचैतन्यवादिनं** यत् कालत्रयेऽपि नाभूतं **तद्भूतम्,** तदा सत्वे तद्वादिनं सांख्य **धार्ष्टान विजयते** । यथा असौ सर्वं सर्वत्रादृष्टमभ्युगपच्छति तथायमपि परशरीरे प्रतिबद्ध-

१ इति] न च कारणान्यवश्यं कार्यवन्ति भवन्ति--न्यायबि° टी° २ । ४८ ।
१ स्य] कारणस्य ।
२ त्सिद्धिः] कार्यसिद्धिः ।
४ स्य] अर्थस्य
४ स] प्रतिपत्तुः । कारणस्य वा ।
५ भा] सामर्थ्यप्रतिबन्धसद्भावाशङ्कया ।
११ टे] भूतले घट
११ भावः] घटाभावः ।
११ भा] दृष्टान्ता
१५ *] अनुमातृपक्षदृष्टान्तादिसद्भावे ।
१६ त] परचित्तादेः ।
१७ स्या] अनुमेयस्याभावे ।
१८ भाव] अनुमानाभावः ।
१९ ब्धिः] ?
२० इति] सम्बन्धः ।
२१ व्यापाराध्या] व्यापारव्या
२१ हारादेः] व्याहारो वचनम् ।
२२ णाभाव] वः
२६ त्वे] तदेव **चैतन्यम्**
२६ सांख्य] सांख्यं
२६ धार्ष्टान] र्ष्टात्
२७ असौ] सांख्यः ।

सामर्थ्यचैतन्यवत् स्वज्ञाने प्रतिबद्धसामर्थ्यस्य सर्वत्र सर्वस्य भावोपगमात् । यदि वा, **भूतान्येव चैतन्यं तद्वादिनमपि** इति ग्राह्यम् । यथा, तेन भूतेषु अनुद्भूतमपि चैतन्यमिष्यते तथाऽनेन सर्वं सर्वत्र इति । कथं विजयते ? इत्याह--[सर्वथा इत्यादि । सर्वथा] सर्वप्रकारेण । § 2226

/ms ननु सौगतस्य अनुमानमस्ति न तस्य तत्कथं धार्ष्ट्येनैव विजयते इति चेत् ? अत्राह--**अनुमानोच्छेदप्रसङ्गात्** । कुत एतत् ? इत्यत्राह--**दृष्ट** 436/mkj इत्यादि । पावकादेर्धूमादि जायते वृक्षादिस्वभावः शिंशपादिरिति **दृष्टोऽर्थः**, सौगतेन तस्यापि न केवलम् अन्यस्य ईश्वरादेः **अपलापात्** । यथैव हि मुतत्र शरीरे अदृष्टकार्यस्वभावमपि चैतन्यं सदिति शङ्क्यते **अप्रतिबद्धसामर्थ्यस्यैव कारणस्य कार्याभावोऽभावं गमयति** । इति वचनात्, तथैव अग्निवृक्षादेः पूर्वं पश्चाद्वा अदृष्टज्ञानकार्यधूमशिंशपादिसत्ता शङ्क्यत इति न प्रतिबन्धसिद्धिरिति मन्यते । तदपि कुतः ? इत्याह--**क्वचिद्** इत्यादि । **क्वचित्** नियतदेशादौ **व्यवस्थितेरभावाद्** अनवस्थितेर्भावस्य । तत्रैव हेत्वन्तरमाह--**पर** इत्यादि । जीवच्छरीरे आत्मनः घटादौ तस्माद् आत्मनिवृत्तौ प्राणिनिवृत्तिः इति **परस्य** जैनादेः **पक्षः** तस्या**क्षेपो** निरासः । तथाहि— परात्मनः पूर्वापरस्वभावानुगतचेतनालक्षणस्य न घटादौ दृश्यतारहितस्य प्रत्यक्षेणाऽनुपलम्भादभावः, अतिप्रसङ्गात् । नापि कार्यादर्शनात् मृतशरीरवद् अतस्तत्र तदभावसिद्धिः, न तत आत्मनिवृत्तिपूर्विका प्राणादिनिवृत्तिः । स एव **तन्मात्रं** तत्रा**भिनिवेशाद्** आग्रहात् **स्वपक्षप्रतिक्षेपाद्** अग्निनिवृत्तौ कुड्यादेः धूमनिवृत्तिः कार्यहेतोः विपक्षाद् व्यतिरेकः इति **स्व** आत्मीयः सौगतस्य यस्तस्य **प्रतिक्षेपः** प्रतिहतिः । तद्यथा मृताभिमतशरीरे प्रतिबद्धसामर्थ्यं /ms स्वकार्यमकुर्वदपि चैतन्यं घटादौ वा यथा संभाव्यते तथा कुड्यादौ अग्निः संभाव्यते इति नाग्निनिवृत्तिपूर्विका ततो धूमनिवृत्तिः इति तस्मात् । न शब्दः पूर्वसमुच्चये । § 2227

आचार्यीयमभिप्रायमजानन् परः पृच्छति **कथम्** इति ? तं प्रति उत्तरम् **अदृश्य** इत्यादि । § 2228

---

२ तेन] चार्वाकेण ।
५ स्य] चार्वाकस्य ।
८ स्यापि] दृष्टस्यापि ।
९ त्र] मृताभिमत
१० इ] तुलना--कारणानि च नावश्यं कार्यवन्ति भवन्तीति कार्यादर्शनादप्रतिबद्धसामर्थ्यानामेवाभावः साध्यः नत्वन्येषाम् ।--न्यायबि० टी० २ । ३२ ।
११ अ] अदृष्टं ज्ञानाख्यं कार्यं येषां धूमशिंशपादीनाम् । एवंभूता धूमशिंशपादयः, ये स्वविषयकं ज्ञानमपि नोत्पादयन्ति । अनुपलब्धाः इत्यर्थः ।
१२ न्ध] अविनाभावसिद्धिः ।
१४ नः] सद्भावः ।
१५ प्राणि] ण
१८ अ] कार्यादर्शनात् ।
१८ त्र] घटादौ ।
१८ त] घटादेः ।
१९ कु] भित्त्यादेः ।
२१ स्य] **पक्षः** तस्य
२३ नाग्निनिवृत्तिपूर्विका] भित्त्यादेः ।
२३ न] **च**

...36 *अदृश्यानुपलम्भारेकैकान्तेऽयं न लक्षयेत् ।
पिशाचो नाहमस्मीति दृश्यादृश्यविकल्पधीः ॥ ३६
‖§ 2230

स्वलक्षणं परस्परविविक्तक्षणिकपरमाणुलक्षणं स्वरूपं पररूपं वा सजातीय [विजातीयव्यावृत्तं] स्वस्व [भावव्यवस्थितेः] पश्यतः कथम् अनुपलब्धिलक्षणप्राप्तनिरंशार्थस्वभावासिद्धौ तद्व्यावृत्तस्य भावस्य दर्शनम् ? तदभावे साकल्येन दृश्यादृश्यस्वभावविवेकसिद्धेरतिनिद्रायितं जगत् स्यात् । § 2231

न च **न दृश्यलक्षणप्राप्ते** इत्यादिना उक्तमेतदिति चेत्; **उपलब्धिलक्षणप्राप्तिः प्रत्ययान्तरसाकल्यं स्वभावविशेषश्च** इत्यत्र तदुक्तम्, इदं तु दर्शनविषयता तल्लक्षणप्राप्तिः इत्यत्र उच्यते । **अयं** सौगतादिर्न **लक्षयेत्** । किम् ? इत्याह--**पिशाचो नाहमस्मि** न भवामि **इति** । उपलक्षणमेतत्, तेन चेतनोऽचेतनो न भवति, अचेतनश्चेतनो न भवति इति **न** च **लक्षयेत्** । एवं नीलादावपि वाच्यम् । किंभूतः ? इत्याह--**दृश्याऽदृश्ययोर्न** विद्यते 437/mkj **विवेके** भेदे **धीर्यस्य** स तथोक्तः, गुडगोरसकारी इति यावत् । कस्मिन् सति ? इत्याह--**अदृश्यानुपलम्भारेकैकान्ते** सति इति । § 2232

कारिकां विवृण्वन्नाह--**स्वलक्षणम्** इत्यादि । **स्वलक्षणं परस्पर विक्रिक्षणि परमाणुलक्षणम् स्वरूपम्** आत्मस्वभावं **पररूपम्** अर्थस्वभावं **वा** । किंभूतम् ? इत्याह— **सजातीय** इत्यादि । कुतः ? इत्याह--**स्वस्व** इत्यादि । तत्किम् ? इत्याह--**पश्यतः** सौगतस्य । किं जातम् ? इत्याह--**कथम्** इत्यादि । **कथं** न कथञ्चित् तद्विवृत्तस्य सजातीयविजातीयाव्यावृत्तस्य **स्वभावस्य दर्शनम्** । कस्मिन् सति ? इत्याह--**अनुपलब्धि** इत्यादि । **अनुपलब्धिलक्षणं प्राप्तो** दर्शनागोचरो **निरंशो** यो **अर्थ**[स्त]स्य **स्वभावासिद्धौ** सत्याम् । नहि अदृश्यखण्डादिपरमाणुषु तथाविधकर्क्कादिपरमाणूनामभावः सिध्यति । तन्न युक्त[म्--] **सर्व भावाः** प्र॰ वा॰ ३ । ३९ इत्यादि /ms का[रिका]त्रयम् । § 2233

माभूत् तद्दर्शनं को दोष इति चेत्; अत्राह--**तदभावे** तद्दर्शनाभावे **साकल्येन** अनवयवेन **दृश्यादृश्यस्वभावविवेकाऽसिद्धेः** सुखादिनीलादयो **दृश्यस्व-**

---

१ *] इदमेवाकलय्य देवैरन्यत्रोक्तम्--अदृश्यानुपलम्भारेकैकान्ते— न्यायवि॰ वि॰ द्वि॰ पृ॰ २६ ।
९ त] उपलब्धिलक्षणप्राप्तिः ।
१४ म्भारेकैकान्ते] अदृश्यानुपलम्भाद् आरेकैकान्ते संशयैकान्ते सति ।
१६ णि] विविक्तक्षणिक
१९ स्य] **तद् व्यावृत्तस्य**
१९ विजातीया] य
२२ ख] खण्डमुण्डादिगोविशेषेषु ।
२२ क] कर्कादि--श्वेताश्वादि ।
२३ र्व] सर्वे
२४ म्] सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थितेः । स्वभावपरभावाभ्यां यस्माद् व्यावृत्तिभागिनः ॥ तस्माद् यतो यतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः । जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ॥ तस्माद्यो येन धर्मेण विशेषः संप्रतीयते । न स शक्यस्ततोऽन्येन तेन भिन्ना व्यवस्थितिः ॥--प्र॰ वा॰ ३ । ३९-४१ ।

भाव ईश्वरादयोऽ**दृश्यस्वभावा** इति यो **विवेको** विभागः तस्य **असिद्धेः** कारणात् **अतिनिद्रायितं जगत् स्यात्** । § 2234

अनभ्यासो नवाऽभ्यासो नाद्वयं वेदनं तथा ।
मानत्राणविनिर्मुक्तेः शून्यत्वे लोकसुस्थितिः ॥§ 2236

स्यान्मतम्--न क्वचित् मया परमाणव इष्यन्ते यथाव्याहारं तत्त्वोपगमात् तेनायमदोष इति; तत्राह--**प्रत्यक्षम्** इत्यादि । § 2237

...37 **प्रत्यक्षं विश्वतः पश्यन्न चेद् व्यावृत्तमन्यतः ।**
**स्वलक्षणमदृश्यार्थस्वभावाभावदृक् कथम् ॥ ३७**
॥§ 2239

यथैकं पश्यन् तदर्थान्तरस्वभावाभावं नियमेन पश्यति तथा उपलब्धि [लक्षणप्राप्तस्य] अन्यथा असङ्कीर्णस्वभावोपलब्धेरनुपपत्तेः । तथा च-- § 2240

दध्यादौ न प्रवर्त्तेत बौद्धः तद्भुक्तये जनः ।
अदृश्यां सौगतीं तत्र तनूं संशङ्कमानकः ॥§ 2242

दध्यादिके तथा भुक्ते न भुक्तं काञ्जिकादिकम् ।
इत्यसौ वेत्तु नो वेत्ति न भुक्ता सौगती तनुः ॥ इति ।§ 2244

व्याधिभूतग्रहेन्द्रियादीनामेकान्ते निवार्यमाणे प्रवृत्तिनिवृत्त्योः कुतः सिद्धिर्यतः प्रत्ययान्तरसाकल्यं वैकल्यमन्यद्वा प्रवर्तेत मन्त्रौषधादिशक्तेश्च दृश्य [लक्षणानुपपत्तेः] । न चायमेकान्तः दृश्यस्य आत्मशक्तिर्दृश्यैव इत्यलमतिप्रसङ्गेन । § 2245
438/mkj

**प्रत्यक्षं** कर्त्तृ **विश्वतो** विश्वमाश्रित्य यद् व्यवस्थितम् । तत् किं कुर्यात् ? इत्यत्राह— **स्वलक्षणं पश्यन्** । किंभूतम् ? **अन्यतः** सजातीयविजातीयाद् **व्यावृत्तं चेत्** यदि; कथम् **अदृश्याऽर्थस्वभावाभावदृग् न** तत् अदृश्यार्थस्वभावस्य अभावदृग् कथं न ? भवत्येव । अन्यथा अन्यतो व्यावृत्तं स्वलक्षणं तत् कथं पश्येत् । § 2246

कारिकाम् आविष्कुर्वन्नाह--**यथैकम्** इत्यादि । **यथा** येन व्यारि जनानुरोधप्रकारेण **एकं** भूतलादि **पश्यन्** सौगतः उपलब्धिलक्षणप्राप्ता[त्] **तदर्थान्तरस्वभावाभावं पश्यति नियमेन** अवश्यंभावेन **तथा** तेन प्रकारेण ।

१ भाव] वाः
५ या] विज्ञानवादिना ।
५ थाव्याहारं] व्यवहारं
२१ त्] प्रत्यक्षम् ।
२३ त] प्रत्यक्षम् ।
२४ व्यारि] व्यवहारि

किं करोति ? इत्याह--**उपलब्धि** इत्यादि । **पश्यन्ति** इति सम्बन्धः । न ह्यसौ दव्यादिकं स्वलक्षणप्राप्तो रज्ञादेते रेवाभावं पश्यति न पुनरदृश्य वो विसत्व समूहस्य । अस्यानभ्युपगते * दूषणमाह--**अन्यथा** इत्यादि । अनेन उक्तविपरीत प्रकारेण **अनुपपत्तेः** । कस्याः ? **असंकीर्णस्वभावोपलब्धेः** । **तथा च**-- § 2247 /ms

दध्यादौ न प्रवर्त्तेत बौद्धः तद्भुक्तये जनः ।
अदृश्यां सौगतीं तत्र तनूं संशङ्कमानकः ॥§ 2249

दध्यादिके तथा भुक्ते न भुक्तं काञ्जिकादिकम् ।
इत्यसौ वेत्तु नो वेत्ति न भुक्ता सौगती तनुः ॥ इति ।§ 2251

दूषणान्तरमाह--**व्याधीत्यादि** । **व्याधिभूतग्रहेन्द्रियादीनाम् एकान्ते[ऽ]स्मिन् विवार्यमाणे प्रवृत्तिनिवृत्त्योः** सद्भा[वाऽ]सद्भावयोः **कुतः सिद्धिः** ? न कुतश्चित्, **यतः** सिद्धेः **प्रत्ययान्तराणां साकल्यं वैकल्यम् अन्यद्वा प्रतिपद्येत** । पुनरपि तदन्तरमाह--**मन्त्रौषधादिशक्तेश्च प्रवृत्तिनिवृत्त्योः कुतः सिद्धिः** इत्यादिना सम्बन्धः । नायं दोषः तस्याः दृश्यत्वात् इति चेत्; अत्राह--दृश्येत्यादि । **न चायम् एकान्तः दृश्यस्य आत्मशक्तिः दृश्यैव** इति, क्षणभङ्गेन व्यभिचारितत्वात् ***इत्यलमतिप्रसङ्गेन** दूषणपरम्पराया । § 2252

ननु व्यवहारे अदृश्यानुपलब्धिः संशयहेतुः उक्ता, तत्र चायं दोषोऽस्तु न पुनः प्रतिभासाद्वैते, तत्र अदृश्यस्यापि परचिंतादेर्निषेधादिति चेत्; अत्राह--**स्वभाव** इत्यादि । § 2253

...38 स्वभाव [विप्रकृष्टत्वे] चित्रैकानंशसंविदाम् ।
क्षणिकत्वं कुतः सिद्धं सत्त्वस्यानुपलम्भतः ॥ ३८
॥§ 2255

२ व्यादिकं] दध्यादि
२ प्राप्तो] प्राप्तौ
२ ज्ञादेते] रजतादे
३ त्व] बोधिसत्व
३ *] गमे
४ अनेन] अन्येन
६ त] दधिभक्षणाय ।
७ त] शरीरम् ।
८ म्] दध्यादिनिष्पन्नम् ।
९ सौ] भक्षको भिक्षुः ।
११ वि] नि
१३ त] दूषणान्तरमाह ।
१६ *] क्षणभङ्गो हि दृश्यघटादेरात्मभूतोऽपि अदृश्यो भवति ।
१६ राया] रया
१७ उक्ता] विप्रकृष्टविषया पुनरनुपलब्धिः प्रत्यक्षानुमाननिवृत्तिलक्षणा संशयहेतुः ।--न्यायबि° २ । ४७ ।
१८ चिंतादे] चित्तादे

संविदां तत्त्वमनंशमदृश्यं कथमस्ति ? कथं च न ? स्वभाव [विप्रकर्षात्] । अत एव स्वपरभावाभ्यां व्यावृत्तिर्न सिध्येत् । अप्रत्यक्षोपलब्धेः कुतो बहिरर्थसिद्धिः संभाव्येत । न च सत्तानुमानं युक्तं यतः । § 2256

इदमत्र तात्पर्यम्--निरंशैकपरमाणुरूपं तत् संवेदनं **चित्रम्, एकं** वा ?
439/mkj प्रथमपक्षे सत्त्वान्तरवदनुपलब्धेः तदभाव इति **क्षणिकत्वं कुतः सिद्धम् ?** न कुतश्चित् । केषाम् ? इत्याह--**अनंशसंविदाम्** । कुतः ? इत्याह--**सत्त्वस्य** [स्व] भावविप्रकर्षात् [अनुपलम्भतः] । अनुपलम्भेन तत्सत्त्वस्यैवाभावात् इति भावः । कस्मिन् ? इत्याह--**स्व** इत्यादि । § 2257

/ms कारिकाविवरणमाह--**संविदाम्** इत्यादि । **संविदां तत्त्वं** स्वरूपम् **अनंशमदृश्यम**नुपलभ्यम् अतो न **अस्ति** इति मन्यते । ततः किं जातम् ? इत्याह--**कथम्** इत्यादि । **कथं च न** इति परस्य प्रश्नः । तत्र हेतुरुच्यते--**स्वभाव** इत्यादि । **अत एव** स्वभावविप्रकर्षादेव **स्वपरभावाभ्यां व्यावृत्तिर्न सिध्येत्** । **सन्धिवाम् [संविदाम्]** इति सम्बन्धः । § 2258

ननु मिथ्याग्राह्याकारदर्शना[त्] तदस्तीत्यनुमीयते तत्कथमुक्तं नास्ति इति चेत् ? अत्राह--**कुतो बहिरर्थोपलब्धिः अप्रत्यक्षोपलब्धेः** सकाशात् अप्रत्यक्षोपलब्धेः **संभाव्येत** संविदां तत्त्वम् इति । दूषणान्तरमाह--**न च** नैव **सत्तानुपमानमितं बौद्धैः सत्तायां हि साध्यायां सर्वो हेतुः त्रयीं होष्यैर्जगतां नापि व र्त्तसे** प्र० वा० स्ववृ० १ । १९३ इति वचनात् **युक्तं** वा **न च सत्तानुमानम्** इति हेतोरभावादिति भावः । अत्रापि यतः सत्तानुपमा नात् संभाव्येत इति व्याख्येयम् । § 2259

उपसंहारकारिकां **दृश्यस्वभाव** इत्यादिकामाह-- § 2260

...39 दृश्यस्वभाव एकान्ते नैवान्तर्बहिः क्वचित् ।
कुतः का क्व [च] भावः [स्यात्]क्वाभावव्यवहारकृत्
॥ ३९ ॥§ 2262

बहिरन्तर्वा संशयस्यापि सिद्धेरयोगात् किं केन व्यवस्थाप्येत ? तदयं भूतचतुष्टयवादिनः पापीयान् । § 2263

**एकान्ते क्वचिद् दृश्यस्वभाव** उपलभ्यस्वभावो **नैव अन्तर्बहिः** । [कुतः] किं जातम् ? इत्याह--**कुतः** प्रमाणात्, **का** उपलब्धिः, **क्व भावः** स-

---

१६ अ] अप्रत्यक्षोपलब्धेः इति द्विर्लिखितम् ।
१७ नैव] नुमानम् अनुमितं
१८ से] त्र[[असिद्धविरुद्धानैकान्तिकसंज्ञिकाम् । सत्तासाध्ये भावधर्मो हेतुरसिद्धः, अभावधर्मो विरुद्धः, उभयधर्मश्च अनैकान्तिक इति ।]]यीं दोषजातिं नातिवर्तते
१९ मा] नुमा
२६ भावो] वे

त्ता उपलब्धिनिबन्धनत्वात्तस्याः । तदभावेऽभावादिति **क्व अभावव्यवहारकृत्** सौगतः, तद्व्यवहारनिबन्धनस्य अन्योपलम्भस्याऽभावात् । § 2264

कारिकां व्याचष्टे--**बहिरन्तर्वा** इत्यादिना । संशयस्तर्हि स्यादिति चेत्; अत्राह--**संशयस्यापि** न केवलमन्यस्य **सिद्धेः** प्रतिपत्तेर**योगात्**, तस्यापि ज्ञानत्वात् निरंशत्वेन अन्यसमानत्वात् । अथवा, **सिद्धेः** निष्पत्तेर**योगात्** तन्निबन्धनभावाभावसाधारणोपलब्धेरभावात् । अस्तु सकलशून्यत्वं तदपि /ms बौद्धाभिमतमेवेति चेत्; अत्राह--**किं शून्यत्वे केन** प्रमाणेन **व्यवस्थाप्येत** न किञ्चित् केनचित् । यत एवं **तत्** तस्मा**दयं** सौगतः **भूतचतुष्टयवादिनः पापीयान्** तेन प्रत्यक्षप्रतीतस्य आत्मन एव निषेधः कृतः अनेन सर्वस्य इति मन्यते । § 2265

440/mkj

मा भूत् सकलप्रतिभासवैकल्यमात्रमप्रमाणकं शून्यत्वम्, अपि तु **प्रतिभास एव एकानेकत्वादिधर्मशून्यः तथैव च सांवृतः कार्यकारणभावः** इति प्र ज्ञा क रः; तत्राह— **प्रत्यक्षत्वम्** इत्यादि । § 2266

...40 प्रत्यक्षत्वमभावानां कार्यकारणतेत्यपि ।
तेषामेव प्रसज्येत निरंशानु पलम्भनात् ॥ ४० ॥§ 2268

परमार्थसतोऽनुपलब्धेः । प्रत्यक्षानुमानयोः साकल्येन अवस्तुविषयत्वात्, कार्यस्वभावहेत्वोरवस्तुरूपत्वात् कुतस्ततः किञ्चित् सिध्येत् । न चैतत् निरंशं तत्त्वं सांव्यवहारिकं प्रमाणं प्रतिपत्तुं युक्तं प्रतीतिविपर्यासात्, तदेकान्तेऽनुपपत्तेः । § 2269

**प्रत्यक्षत्वं** तद्विषयत्वं वा**ऽभावानां** वन्ध्या सुतादीनां **कार्यकारणता** हेतुफलभावः **इत्यपि तेषामेव प्रसज्येत** न वस्तूनाम् । कुतः ? इत्याह--**निरंशस्य** तत्त्वस्य सर्वविकल्पातीतसंवेदनस्य अन्यस्य वा **अनुपलम्भनात्** । § 2270

कुत एतत् ? इत्यत्राह--**परमार्थसत** इत्यादि । निरंशपरमाणुभागचित्राद्वैतस्य **परमार्थसतोऽनुपलब्धेः** । कुतः ? इत्यत्राह--**प्रत्यक्ष** इत्यादि । **प्रत्यक्षस्य** वचनवद**वस्तुस्थूलाकारविषयत्वात्, अनुमानस्य** तथाविधसामान्यगोचरत्वात्, **साकल्येन** अ[न]वयवेन । § 2271

१ स्याः ] सत्तायाः ।
१ त ] उपलब्ध्यभावे ।
२ अ ] अर्थान्तरोपलम्भस्य ।
७ त्वे ] त्वं
८ वादिनः ] चार्वाकात् ।
१२ सांवृतः ] काल्पनिकः ।
२० न्या ] वन्ध्या
२१ पि ] अभावानामेव ।
२५ व ] शब्दवत् ।
२५ त ] अवस्तुभूत ।

नन्वनुमानस्य अवस्तुविषयत्वेऽपि वस्तुसाधनत्वं तत्र प्रतिबन्धादिति चेत्; अत्राह— **कार्य** इत्यादि । **कार्यस्वभावहेत्वोरवस्तुरप  त्वात्** मरीचिकाजलवत् असत्स्वभावत्वात् । यदि वा; निरंशत्वादनुपलम्भेन तयोरपि वस्तुरूपत्वाभावात् । एतदुक्तत्वं भवति--यदि कार्यस्वभावयोः परमार्थतः तत्त्वम्; तर्हि तयोः साध्ये प्रतिबन्धात् तज्ज्ञाति तस्यानुमानस्यापि संभवेत् । न चैवम् इति **कुतः** कारणात् **ततः** ताभ्यां कार्यस्वभावहेतुभ्यां **किञ्चित्** पराभिमतं /ms **सिध्येत्** न कुतश्चित् । यद्वा, प्रत्यक्षा  नुमानाभ्याम् इति ग्राह्यम् । अथ व्यवहारिणा अभ्यासानभ्यासयोः यथा ताभ्यामेव तिद्वेष याभ्यां भाविवस्तुसिद्धिः उपायान्तराभावात् तथा ममापि निरंशत्वसिद्धिः इति; तत्राह--**न चैतद्** इत्यादि । **न च** नैव इति * **निरंशं तत्त्वं** कर्त्तृ **प्रतिपत्तुम्** आश्रयितुं **युक्तं** शक्तम् । किम् ? इत्याह--**सांव्यवहारिकं प्रमाणम्** । कुतः ? इत्याह--**प्रतीतिविपर्यासात्** । यथा पूर्वं पश्चाच्च सांव्यवहारिको प्रतीति-तद्विपर्यासेन तत्त्वोपगमात्, प्रतीत्यनुसारेण च तद्व्यवस्था; तर्हि निरंशस्य अनुपलब्धेः उपलभ्यमानस्य च विचारासहत्वात् चेति । § 2272

मात्रवस्तु **मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽप्यदोषः** प्र° वार्तिकाल° ३ । २१९ इति चेत्; अत्राह--**तदि***त्यादि । [तदेकान्ते] मिथ्यैकान्तेऽभ्युपगम्यमाने **अनुपपत्तेः** । **प्रत्यक्षत्वम्** इत्यादिना सम्बन्धः । § 2273

441/mkj

विभ्रमाऽसिद्धेः इति चेत्; अत्रोत्तरम्-अन्तर्वृत्तेन **तादात्म्य** इत्यादिना दर्शयति । § 2274

...41 तादात्म्यादि प्रतीमः एकलक्षणविदो वयम् ।
सहक्रमविदामेकं तर्कात् स्वसंवेदनम् ॥ ४१
॥§ 2276

...42 यतस्तत्त्वं यथा युगपत् प्रत्यक्षेतरत्वयोः ।
समुदाय्यपि सम्बन्धात् तथैव समुदायिनाम् ॥ ४२
॥§ 2278

१ त्र ] वस्तुनि ।
२ प ] रूप
३ त ] कार्यस्वभावहेत्वोरपि ।
४ त्वं ] क्तं
५ ज्ञाति ] तज्ज्ञनि
५ स्यापि ] तत्त्वम् ।
८ ता ] कार्यस्वभावहेतुभ्यामेव ।
८ तिद्वेष ] तद्विष
१० * ] एतत्
१५ स्तु ] नन्वस्तु
१६ * ] तदे इ

...43 गुणीति गुणसमुदायः एकान्तः क्व नु संभवेत् ।
यदिदं प्रतीयमानं नोल्लङ्घ्यमपरैः जनैः ॥ ४३ ॥§ 2280

**तादात्म्यं** साध्यसाधनयोः दृश्य-प्राप्ययोः कथञ्चिदेकत्व**मादिर्यस्य** हेतुफलभावैकत्वानेकत्वादिनाः तत्तथोक्तं **प्रतीमः** । के ? इत्याह--**एकलक्षणविदो वयं** जैनाः [कस्मात् ?] इत्याह--**तर्कात्** विचारात् । § 2281

ननु पूर्वपर्यायपर्यवसितज्ञानानन्तरपर्यायवृत्तिमत् तत् कथं तादात्म्यादिकं प्रतीमः इत्युच्यते इति चेत्; अत्राह--**सहे**त्यादि । [सहविदां रूपरसादिगुणग्रहणानाम्] **क्रमविदां** मृत्पिण्डशिवकछत्रकादिपर्यायग्रहणानाम् **एकमभिन्नं स्वसंवेदनं स्वम्** आत्माऽयम् **संवेदनं** आत्मापरनामकं **तर्कात् प्रतीमो यतः** इति । कदा कयोरिव ? **युगपत् प्रत्यक्षेतरत्वयोः** । यथैव संवेदनं ततः प्रतीमः इति **तथा सम्बन्धात्** संयोगात् । केषाम् ? **समुदायिनाम्** अवयवासहतां हस्तपादादीनां यः **समुदायि** **श**रीरव्यपदेशभाक् सोऽपि **तत्त्व**मेकत्वं प्रतीयते इति विभक्तिवचनपरिणामेन सम्बन्धः । /ms [यथा] परमाणुसन्निवेशमात्रं **तथैव गुणानां** रूपादीनां **समुदायः तत्त्वं** प्रतीयते । यस्या पर्यायमाह--**गुणीति** । **इति** हेतोः **एकान्तः क्व नु संभवेत्** ? न क्वचित् । **यद्** यस्माद् एकान्तसंभवाद् **इदं प्रतीयमानं** स्वलक्ष्यात्मलक्षणम् अनेकान्तरूपत्वमु **लङ्घ्यमपरैः जैनैः** । § 2282

इति सि द्धि वि नि श्च य टी का याम् अ न न्त वी र्य विरचितायां हेतुलक्षणसिद्धिः षष्ठः प्रस्तावः ॥ छ ॥ § 2283

# सप्तमः प्रस्तावः : ७ शास्त्रसिद्धिः

442/mkj

प्रत्यक्षादिवत् शब्दोऽपि अर्थप्रसाधकः, तत्र च अविप्रतिपत्तेः तद्व्युत्पादनार्थमाह— **शास्त्रम्** इत्यादि । § 2284

...1 शास्त्रं शक्यपरीक्षणेऽपि विषये सर्वं विसंवादकम्,
मिथ्यैकान्तकलङ्कितं बहुमुखैरुद्वीक्ष्य तर्कागमैः ।
स्यात्कारश्रुतसत्यलाञ्छनमुपादेयं सतां शासनम्,

४ त्वादिनाः ] दीनां
८ मृ ]
मृत्पिण्डशिवकछत्रकस्थासकोशकुशूलघटाः
क्रमवर्तिनः पर्यायाः मृदो
घटाकारभवनोन्मुखायाः ।
१२ तां ] अवयवसंहतानाम्[[अवयवरूपेण
संहतानाम् एकत्रीभूतानाम् स्कन्धानाम् ।]]
१२ मुदायि ] यी
१५ स्या ] अस्य
१६ एकान्त ] न्ता
१७ मु ] त्वं नो
१७ जैनैः ] जनैः

कारेकाऽत्र परीक्षणक्षमधियामेकान्तधार्ष्ट्यैरलम् ॥ १

॥§ 2288

**शास्त्रं** महदर्वा न्तरवाक्यात्मकं वचनम्, केवलस्य वर्णस्य पदस्य च व्यवहारानुपयोगात् । तत् किम् ? **उपादेयम्** आश्रयप्रणीयं प्रमाणीकं कर्त्तव्यम् इत्यर्थः । कथम् ? इत्याह--**परीक्षणक्षमधियाम्** । कर्त्तरि ता **कर्तृकर्मणोः कृति** पाणिनि° सू° २ । ३ । ६५ इति । **तत्त्वपरीक्षणक्षम-बुद्धिभिः** इत्येके *त्याह--**शक्यपरीक्षणेऽपि** । **शक्यं परीक्षणं** यस्मिन् लिङ्गादौ न केवलम् अत्यन्तपरोक्ष एव **विषये** । किं किञ्चिदेव ? न; इत्याह--**सर्वं** सर्वज्ञेतरप्रणीतम् । किंभूतम् ? इत्याह--**स्यात्कार** इत्यादि । स्यात् इति करणम् उच्चारणं यस्य तत् **स्यात्कारं** तच्च तत्र **श्रुतं च** शब्दः तदेव **सत्यम्** अवितथं **लाञ्छनं** यस्य तत्तथोक्तम् । कुतः ? इत्याह--**सतां** विद्यमानानां जीवादीनां **शासनं** प्रतिपादकम् । अथवा सताम् अर्हतां ज्ञापकम् तत्कार्य-त्वेन यतः । इत्थम्भूतत्वमस्य सन्दिग्धमिति चेत् ? अत्राह--कालकोविदारेका
/ms संशीतिः **अत्र** सतां शासने । केषाम् ? इत्याह--**परीक्षणे**त्यादि । § 2289

नन्वत्रैकान्तवादिप्रयुक्ता दोषाः सन्ति तत्कथमुपादेयमिति चेत् ? अत्राह--**एकान्ते**त्यादि । विषयिण्येकान्तवादिनि विषयस्य एकान्तस्य उपचारात् **एकान्तधार्ष्ट्यैः** तद्वादिव्यामोहैः **अलं** पर्याप्तमात्रेति सम्बन्धः, तद्दोषाणां निराकरणादिति मन्यते । किं कृत्वा तदुपायम् इत्याह--**विसंवादकम्** इत्यादि । **मिथ्यैकान्तकलङ्कित विसंवादक बुद्धीक्ष्य** ज्ञात्वा **शास्त्रम्** इत्यादि अत्रापि सम्बध्यते । कैः ? इत्यत्राह--**तर्कागमैः, तर्केण** तस्यैव
443/mkj दृष्टेऽपि युक्तेतरविवरणात् न्यायाराद् **आगमैश्च** तरवाक्यैः इति । किंभूतैः ? इत्याह--**बहुमुखैः** बहुभेदैः । § 2290

ननु सांव्यवहारिकप्रत्यक्षानुमानाभ्यामेव सकलार्थसिद्धेः किमर्थंशास्त्र-मुपादेयमिति चेत् ? अत्राह--**श्रुतम्** इत्यादि । § 2291

...2 श्रुतं श्रेयःपथः पुंसां बोद्धृणां परिणामिनाम् ।

---

२ म] महावाक्यमवान्तरवाक्यञ्च शास्त्रे भवतः ।
२ र्वा] महदवा
३ माणीकं] आप्तप्रणीतं प्रामाणिकम्
४ ता] षष्ठी ।
५ इति] कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्--सि° कउ २ । ३ । ६५ ।
६ *] इत्यर्थः । क्व ? इ
९ त्र] तत्
११ त] भगवदर्हतः कार्यं श्रुतम् ।
१३ कोविदारेका] का ? न काचित्
आरेका
१६ धार्ष्ट्यैः] धार्ष्ट्यैः
१६ मात्रेति] पर्याप्तम् अत्र इति
१६ त] एकान्तवादिप्रयुक्तदोषाणाम् ।
१७ म] त[[शास्त्रमुपादेयम् ।]]दुपादेयम् ?
१८ ङ्कित] तं
१८ बुद्धीक्ष्य] कम् उद्वीक्ष्य
२० न्यायाराद्] यात्
२० वाक्यैः] तद्वाक्यैः

सोपायोपेयतत्त्वार्थं न वक्त्राकूतसूचनम् ॥ २ ॥§ 2293

करणं पुरुषस्य ऐकान्तिकात्यन्तिकानादिदुःखनिवृत्तेरुपायतया गुणपुरुषान्तरभेदतत्त्वं यथा यथा शृणोति गृह्णाति संधारयति विजानाति वितर्कयति अभिनिविशते तथा तथा चेतनोऽपरिणामी पुरुषः एतद्दर्शितं निर्वेदं पश्यन् कैवल्यमनुभवन् मोक्षमुपैति । पुनः करणं न दर्शयति । न चार्यपुरुषः औत्सुक्यनिवृत्तेः वक्ष्यति इति केचित् । तदुपायोपेयतत्त्वममृष्यन्तो नैयायिकाः कथं चिद्वृत्तिः अचेतनस्य करणस्य अतिप्रसङ्गात् ? कथं वाऽचेतनस्योपलब्धिः ? कथं करणमन्यकरणं विना पश्येत् ? कथं चेतनस्याप्यकर्त्तुरुपलब्धिः ? दृश्यदर्शनस्वभावयोः व्यापकयोः वा तदवस्थयोः कथं वा संयोगः ? इति आत्मादितत्त्वज्ञानात् मिथ्याज्ञाननिवृत्तौ दोषानुत्पत्तेः प्रवृत्त्यसंभवात् जन्मनिवृत्तौ अशेषगुणरहितस्यात्मनः स्वात्मन्यवस्थानं मोक्षमाहुः नैयायिकाः । सोऽयमात्मात्मीयग्रहः संसारहेतुतः अयोनिशो मनस्कारो यतः कथं मोक्षाय ? नित्यस्य वस्तुत्वमेव न संभाव्यम् इति चतुःसत्यभावनोपायं सकलसन्तानोच्छेदरूपं निर्वाणं ब्रुवाणाः सौगताः प्रत्यवस्थाप्येरन् । कथं चतुःसत्यप्रतिपादकवचनजनितमिथ्याज्ञानस्य अर्थाविषयत्वात् ततः तत्त्वप्रतिपत्तिः ? कथमतत्त्वभावनाप्रकर्षपर्यन्तजं तत्त्वज्ञानं निर्वाणं च । नैरात्म्येतरपक्षयोः मिथ्यैकान्ताविशेषे अस्ति वा कश्चिद्विशेषः ? प्रत्यक्षहेतुतदाभासविकल्पसम्बन्धभावाभावयोश्च, मिथ्याविषयताविशेषात्, यथालक्षणं स्वलक्षणविलक्षणजात्यन्तर लक्षणात् कुतस्तत्त्वप्रतिपत्तिः ? साध- 444/mkj
नवचनस्यापि तत्त्वानभिधानोपगमात्, ततः कीदृशी सुगतस्य तत्त्वदेशना ?

§ 2294

**श्रुत**मेव न प्रत्यक्षानुमाने, तयोरल्पविषयत्वात् । **श्रेयो** मोक्षः तस्य **पन्था** मार्गः, तन्मार्गस्य सम्यग्दर्शनादेः उपदेशात् श्रेयःपथः । केषाम् ? इत्याह-

---

६ केचित्] एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् । अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ ६४ ॥ ज्ञानं गुणपुरुषान्तरोपलब्धिरूपमित्यर्थः । प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ । ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥ ६८ ॥ इत्थमेकान्तमत्यन्ततः तापत्रयस्याभावात् उपरमादनुत्पत्तेः कैवल्यं मोक्ष इत्यर्थः, तमाप्नोति ।--सांख्यका° माठरवृ° ।

१२ माहुः] दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ।--न्यायसू° १ । १ । २ ।

१४ ब्रुवाणाः] अथवा, एतेसं अभिसम्बुद्धत्ता अरियभावसिद्धतोपि अरियसच्चानि । यथाह--इमेसं खो भिक्खवे चतुन्नं अरियसच्चानं यथाभूतं अभिसम्बुद्धत्तो तथागतो अरहं सम्मासम्बुद्धोत्ति वुच्चतीति सं° ५ । ४३३--विसुद्धि° १६ । २०-२२ । यद्विनिश्चयः--चतुरार्यसत्यदर्शनवदिति । आरात् पापकेभ्यो धर्मेभ्यो याता इत्यार्याः । अत एव तानि सत्यतया मन्यन्त इति तेषां सत्यानि । चतुष्ट्वाच्च तेषां चत्वारीत्युक्तम् । फलभूताः पञ्चसंक्लेशस्कन्धाः दुःखाख्यं सत्यमेकम् । त एव हेतुभूतास्तृष्णासहायाः समुदयाख्यं सत्यं द्वितीयम् । चित्तस्य निष्क्लेशावस्था निरोधाख्यं सत्यं तृतीयम् । तदवस्थाप्राप्तिहेतुनैरात्म्याद्याकारश्चित्तविशेषो मार्गाख्यं सत्यं चतुर्थमिति । --न्यायबि° ध° प्र° पृ° ६७ ।

२३ त] मोक्षमार्गस्य । सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः--त° सू° १ । १ ।

-**पुंसाम्** आत्मनां न क्षणिकचित्तसन्ततीनां तदभावात् । ज्ञानाद् एकान्तेन भिन्नानां स्यादिति चेत्; अत्राह--**बोद्धृणाम्** स्वपरस्वभाववेदकानाम् अन्येषां सदपि श्रुतमनुपयोगि, घटादीनामिव तस्य श्रवणे अर्थावधारणे तदनुष्ठाने तत्फले मोक्षे च सति [न] तेषां तदुपयोगि । न च ज्ञानात् भिन्नात्मनां तदस्ति गगनादीनामेवदितिनात्म्त कल्पनं फलवत् । § 2295

/ms अथात्मनां ज्ञानं बन्धो न गगनादीनां ततोऽयमदोषः; कथमदोषो यतः समवायसम्बन्धनिषेधात्, सतोऽपि सर्वत्राऽविशेषात् । न च भिन्नस्य आत्मनो दर्शने इह ज्ञानम् आत्मनि इति प्रत्ययोऽस्ति येन समवायोऽत्र स्यात्, अन्यथा खरशृङ्गे ज्ञानम् इत्यपि स्यात् । § 2296

अथ ज्ञानं द्रव्याश्रितं गुणत्वाद् रूपादिवत्, गुणतद्वतोश्च भेदः अन्यथा तदयोगादिति मतिः; सापि न युक्ता; व ततः सापि ज्ञानादिरूपादिभ्यो भिन्नस्य आधारस्य दर्शने सत्येव स्यात्, न च तदस्ति इत्युक्तं पुरस्तात् । तथापि तद्दर्शनकल्पने ततोऽप्यन्यस्य तदाधारस्य ततोऽप्यन्यस्य तदाधारस्य दर्शनकल्पनमित्यनवस्था स्यात् । तर्हि नानादि रूपादिमात्रमापन्नमिति नात्म नापि घटादिस्कन्ध इति शाक्यशासनं समस्तमिति चेत्; न; पूर्वापरीभूतैकज्ञानस्य आत्मत्वप्रसावना तथ रूपादिविशेषाणां कथञ्चिदेकत्वमुपगतानां घटादिस्कन्धस्थापनात् । तथाविधज्ञानस्य अपरद्रव्याश्रितत्वसाधने तपक्ष साधन हेतुश्च असिद्धः, तस्य गुणत्वाऽसिद्धेः **द्रव्याश्रय गुणवान् संयोगविभागेष्वकारणम् [अनपेक्षः] गुणः** वैशे॰ सू॰ १ । १ । १६ इति गुणलक्षणम् । न चास्य द्रव्याश्रयित्वम्; पूर्वापरज्ञानभेदेन वाऽस्य सम्बन्धात् द्रव्यगुणयोरविशेषः । अथ पूर्वोत्तरस्वभावयोः गुणत्वं तदाश्रितत्वं च उच्यते; अत्र परिहारः-- § 2297

ज्ञानाद्भिन्नस्तथा न स्यादात्मा स्त था मतिः ।
समवायस्तथैकार्थसमवायिविदा च वित् ॥§ 2299

ततः सूक्तम्--**बोद्धृणाम्** इति । एवमपि **चैतन्ये पुरुषस्य स्वं रूपमपिति** * योगभा॰ १ । ९ इति वचनात् सांख्यपुरुषाणां तत्स्यात् इति चेत्
/ms अत्राह--**परिणामिनाम्** इति । § 2300

१ त] सन्ततीनामभावात् ।
२ अ] ज्ञानाद् भिन्नानाम् ।
३ स्य] श्रुतस्य शब्दस्य ।
५ दितिनात्म्त] नामिव इति नात्म
६ न्धो] ज्ञानसम्बन्धः
७ तोऽपि] विद्यमानस्यापि सर्वगतस्य एकस्य ।
८ वायोऽत्र] आत्मनि ।
११ त] गुणत्वायोगात् ।
११ तः] यतः
१२ त] आधारदर्शनम् ।
१४ नानादि] ज्ञानादि
१५ नात्म] नात्मा
१६ थ] प्रसाधनात्, तथा
१७ त] पूर्वापरीभूतैकज्ञानस्य ।
१८ क्ष] [[जैनपक्ष ।]]मत्पक्ष
१८ न] नं
१८ य] य्य
२३ स्त] स्तु त
२३ तिः] सति
२५ न्ये] न्यं
२६ *] स्वरूपम्
२६ पुरुषाणां] श्रेयः ।

445/mkj

ननु साङ्ख्यस्य पुरुष इस्तारो वोद्ध पुनः प्रधानं बोधपरिणामात्, तत्कथमेवमाशङ्कितमिति चेत् ? न; बोधदर्शनयोरव्यतिरेकात् । § 2301

स्यान्मतम्--*नित्यं श्रुतं तेषां श्रेयःपथो[पायं स्यादिति चेत्; अत्राह--सोपायो]**पेयतत्त्वार्थम्** इति । **उपायो** हेतुः संसारस्य मिथ्यात्वादिः मोक्षस्य सम्यग्दर्शनादिः **उपेयं** फलं संसारो मोक्षश्च, सह उपायेन वर्त्तत इति **सोपायम्** तच्च तद् **उपेयं** च तदेव **तत्त्वम् अर्थो** विषयो यस्य तत्तथोक्तम् । [न] च नित्यं वेदश्रुतम् एवंविधिमिति निवेदयिष्यते । *पि टक त्र याख्यं तेषां तत्पथ इति चेत्; अत्राह--**न वक्त्राकूतस्त्व नम्** इति । पुरुषाभिप्रायसूचकं सौगतं वचः श्रेयःपथो न । § 2302

सांख्य नैयायिकेन नैयायिकं सौगतेन तं च स्वयं निराकुर्वन्, व्यातिरेकमुखेन कारिकां व्याचष्टे--**करणम्** इत्यादिना । तत्र सांख्यमतं तावद्दर्शयति--**करणं** श्रोत्रादि **यथा यथा शृणोति गृह्णाति** श्रुतं शास्त्रार्थमवगच्छति **संधारयति** कालान्तरस्मरणधारणविषयतां नयति **विजानाति** तदर्थपरिणतं भवति **वितर्कयति** युक्तमिदम् इदं वान्यथा इति विजयते **अभिनिविशते** युक्ते रुचिं करोति । किम् ? इत्याह--**गुणे**त्यादि । **गुणाः** सत्त्वादयः **पुरुषाः** पुमांसः तेषाम् **अन्तरं** भेदः स एव **तत्त्वं** तदिति । केन रूपेण ? **उपायतया** कारणतया । कस्य ? इत्याह--**अनादिदुःखनिवृत्तेः** । किंभूतायाः इत्यै **कान्तिके**त्यादि । कस्य सम्बन्धिन्याः ? इत्याह **पुरुषस्ये**ति । **तथा तथा पश्यन्** । किम् ? इत्याह— **निर्वेदं** वैराग्यं च । किंभूतम् ? इत्याह **एतद्दर्शितं** करणदर्शितम् । कः ? इत्याह— **पुरुषः** । किंभूतः ? **चेतनः** । पुनरपि किंभूतः ? **अपरिणामी** सत् पश्यन् किं करोति ? इत्याह--**मोक्षमुपैति** । किं कुर्वन् ? **अनुभवन्** । किम् ? **कैवल्यम्** । /ms
§ 2303

ननु मुक्तस्यापि पुनः संसारः स्यादिति चेत्; अत्राह--**पुनः** पश्चात् **तरणं न दर्शयति** आत्मानम् इत्यध्याहारः । **न च** नैवार्यपुरुषः **वश्यति** । कुतः ? इत्याह--**औत्सुक्यनिवृत्तेः इत्येवं केचित्** कापिलाः । § 2304

तत् नैयायिकेन दूषयन्नाह--**तद्** इत्यादि । **तत्** साङ्ख्यसम्बन्धि । किम् ? **उपायोपेयतत्त्वम् मृष्यतो** असहमानाः **नैयायिका मोक्षम् आहुः** इति

---

१ वोद्ध] पुरुषा द्रष्टारः, बोद्धृ
२ तिरेकात्] भेदाभावात् । बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्--न्यायसू° १ । १ । १५ ।
३ *] मीमांसकः प्राह ।
७ *] बौद्धः प्राह । सूत्रपिटकं विनयपिटकम् अभिधर्मपिटकं चेति त्रयम् ।
८ तेषां] पुरुषाणाम् ।
८ थ] श्रेयःपथः ।
८ व] सूच
१० सांख्य] ख्यं
१० तेन] सौगतम् ।
१४ ते] विचयते[[विचारं करोति ।]]
१७ स्य] स्याः
१८ इत्यै] इत्याह--ऐ
२१ त्] स तम्
२५ णं] करणं
२८ तो] अमृष्यन्तः

सम्बन्धः । कथं मृष्यत ? इत्याह--**कथमित्यादि** । **कथं चिदवृत्ति[ः] ज्ञानं** श्रवणादिरूपम् । कस्य ? इत्याह--**अचेतनस्य** प्रधानपरिणामस्य **करणस्य** । कुतः ? इत्याह--**अतिप्रसङ्गात्** घटादेरपि तत्प्रसङ्गात् । [वा] अथवा **कथं** केन प्रत्यक्षानुमानप्रकारेण **उपलब्धिः** प्रतिपत्तिः **अचेतनस्य** परकल्पितस्य न केनचित् तत्र तदभावात् कथं **करणम्** इत्यायुक्तम् । § 2305

ननु यदि तन्न स्यात् कथं तद्दर्शितं पुरुषः पश्येदिति चेत् ? अत्रोच्यते--
446/mkj करणं कथं पश्येत् **अन्यकरणं विना ?** अन्यथा अर्थमपि तथैव पश्येदिति किं कृतं करणकल्पनया ? तत्रापि तदन्तरकल्पने अनवस्था । तथापि तत्कल्पनायां दोषमाह--**अतिप्रसङ्गात्,** अन्यस्यापि तथा कल्पना स्यात् इति । तन्न युक्तं कारणम् इत्यादि । § 2306

यत्पुनरुक्तम्--**पश्यन्** इत्यादि; तत्राह--**कथं चे[त]नस्या[प्य]कर्त्तुरुपलब्धिः** अतिप्रसङ्गात् इति । **अकर्तुः** पुरुषस्य **अकर्त्ताऽगुणः शुद्धः पुरुषः कपिलदर्शने** । इति वचनात् कथम् **उपलब्धिः** अर्थसाक्षात्करणं चेतनस्य
/ms दर्शस्वा भावस्य । नहि अर्थसन्निधानात् प्राक् तद्दर्शने [ऽ]व्यापृतं रूप यहतः पुनः तद्दर्शनं युक्तम् *पूर्वं न युक्तं पूर्ववत् । परित्यागे कथ [न्न] कर्तृत्वं करणक्रिययेव दर्शनक्रिययापि श्लिष्टकर्तृत्वात् । अथ सर्वदा उदासीनः पुरुषो दर्पणसंस्थानायो यो यदा सन्निहितोऽर्थो भवति तं तदा पश्यति इति; तदायुक्तम्; औदासीन्यापरित्यागे तदयोगादिति । अथ सर्वदा पश्यत्यसौ;* तत्राह--**अतिप्रसङ्गादिति** । सर्वस्य सर्वदा सर्वत्र सर्वार्थोपलब्धिप्रसङ्गात् । § 2307

दूषणान्तरमाह--**दृश्येत्यादि** । **दृश्यदर्शनस्वभावयोः** प्रकृतिपुरुषयोः **व्यापकयोः कथं संयोगो वा** नचेद्वा शब्दो प्रसङ्गसमुच्चयार्थः । ननु कदाचित्तयोः अवस्थान्तरावाप्तिः ततोऽयमदोष इति चेत्; अत्राह--**तदवस्थयोः** कूटस्थयोः इत्यर्थः । ननु प्रधानस्य परिणामित्वात् **तदवस्थयोः** इत्ययुक्तमिति चेत्; न; पुरुषस्यापि तद्वत् परिणामित्वापत्तेरविशेषादिति मन्यते । यतः संयोगो भवेत्यम निवृत्तिरिति । एवं व्यतिरेकमुखेन **परिणामीति** व्याख्यातम् । § 2308

---

१ त] अमृष्यन्तः
५ त] पुरुषे ।
५ भावात्] उपलब्ध्यभावात् ।
५ इत्यायु] द्यु
६ थं] करणदर्शितम् ।
१० म्] **करणम्**
१२ अ] उक्तं च--अमूर्तश्चेतनो भोगी नित्यः सर्वगतोऽक्रियः । अकर्ता निर्गुणः सूक्ष्म आत्मा कापिलदर्शने ॥--षड्० बृह० पृ० ४२ ।
१४ स्वा] दर्शनस्व
१५ तः] रूपमजहतः
१५ *] पूर्वं न युक्तम् इति पुनर्लिखितम् ।
१६ र्तृत्वात्] द्रष्टापि दर्शनक्रियायाः कर्त्ता एव ।
१७ यो] नीयो
१८ दा] द
१८ त] दर्शनकर्तृत्वरूपद्रष्टृत्वायोगात् ।
१८ *] पुरुषः ।
२२ चेद्वा] **भवेत् ? वा**
२२ योः] प्रकृतिपुरुषोः ।
२५ त] प्रधानवत् ।
२५ तः] अतः
२६ म] भवेदित्यस्या

संप्रति नैयायिकमतं दर्शयति सौगतेन दूषयितुम् **आत्मा** इत्यादि । **आत्मादि** प्रधानं यस्य पदार्थसमूहस्य स एव **तत्त्वं** तज्ज्ञानात् **मिथ्याज्ञान-निवृत्तौ** सत्यां **दोषानुत्पत्तेः** दोषा रागादयः तेषामनुत्पत्तेः **प्रवृत्तेरसंभवात्** रागादिकार्य[धर्मा]धर्मयोरसंभवात् **जन्मनिवृत्तौ अशेषगुणरहितस्य आत्मनः स्वात्मन्यवस्थानं मोक्षमाहुः नैयायिकाः** । तदुक्तम्-- § 2309

**प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभास-छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः** । न्यायसू० १ । १ । १ § 2310

**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावात् [अप-वर्गः]**न्यायसू० १ । १ । २ इति । § 2311

एतद्दूषणमाह सौगतः--**सोऽयम्** इत्यादि । **सः** साङ्ख्यामितः **अयं** नैया-यिकेन उच्यमानः । कः ? इत्याह **आत्मात्मीयग्रहः कथं मोक्षाय ?** कुत इति चेत् ? आह--**संसारहेतुतः** । न च संसार[कारणमेव मोक्ष]कारणं युक्तम् अतिप्रसङ्गात् । एतदपि कुतः ? इत्याह--**अयोनिशो मनस्कारो यतः** *निर्विषयो विकल्पो यतः इति मन्यते । तदुक्तम्-- § 2312

447/mkj

*आत्मनि सति परसंज्ञा स्वपरविभागात् परिग्रहद्वेषौ ।
अनयोः संप्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ॥ प्र० वा० १ ।
२२१ इत्यादि ।§ 2314

दूषणान्तरमाह--**नित्यस्य** इत्यादि । **नित्यस्य** अविचलितरूपस्य **वस्तुत्व-मेवं संभाव्याऽनेन** * तथाद्धृणाम् । * इत्येतदपि व्याख्यातम् । § 2315

अधुना सौगतमतं स्वयं दूषयितुमुपन्यस्यति--**चतुःसत्य** इत्यादि । दुःख-सत्यादिदुःखसमुदायनि [रोधमार्गसंज्ञकानि चतुःसत्यानि] तेषां **भावनोपायो** हेतुर्यस्य स तथोक्तः तं **ब्रुवाणाः सौगताः** । किं तद् ? इत्याह--**निर्वाणम्** मोक्षम् । किंभूतम् ? इत्याह--**सकल** इत्यादि । **[सकलसन्तानोच्छेदरूपं] प्रत्यवस्थायेरन** पर्यनुयुज्येरन् **इति** । कथमिति चेत् ? अत्राह--**क-थमित्यादि** । चतुःसत्यप्रतिपादकवचनजनि[तं] तद्विषयं ज्ञानं **मिथ्याज्ञानम्** [तस्य] **अर्थ विषयत्वात्** अर्थाप्रतिबन्धात् साक्षात् तस्मादनुत्पत्तिः शब्दस्य च तैरेव [त]त्प्रतिबन्धानभ्युपगमात् **ततः कथं** न कथञ्चित् **तत्त्वस्य** चतुःसत्य-लक्षणस्य **प्रतिपत्तिः** । तथापि यदेव ततः प्रतीयते तदेव भाव[य]तां मुक्तिः /ms

---

९ त] तदव्यवहितपूर्वस्याभावात् ।
१४ अ] अयोनिशो मनस्कारः भ्रान्तः निर्णयः--अभिध० को० टी० ५ । ३४ ।
१५ *] भ्रान्तः इत्यर्थः ।
१९ *] मेव न संभाव्यम् । अनेन
१९ *] बोद्धृणाम्
२१ दा] द
२४ न] स्थाप्येरन्
२६ अर्थ] अर्थाऽ
२७ तैरेव] अर्थैरेव ।
२८ त] शब्दात् ।

स्यात् इति चेत्; अत्राह--**कथम्** इत्यादि । **कथम् अतत्त्वस्य** शब्दार्थस्य **भावनायाः** तस्याः **प्रष पर्यन्तः** प्रकर्षावसानं तस्माज्जातं **तज्जं तत्त्वज्ञानं** चतुःसत्यज्ञानं **निर्वाणं च** इति पूर्वदूषणसमुच्चये कामशोकाद्युपप्लुतज्ञानमिव अतत्त्वज्ञानमेव स्यादिति । न युक्तम्-- § 2316

*स्वर्गापवर्गमार्गस्य प्रमाणं भेदको नरः ।
अन्यस्याप्यपरिज्ञाने संभवेदपि तस्य तत् ॥ प्र॰ वार्तिकाल॰ २ । ३१ इति ।§ 2318

तत्रैव दोषान्तरमाह--**मिथ्यैकान्त** इत्यादि । नित्यात्मादिप्रतिपादकशास्त्रार्थज्ञानस्येव चतुःसत्यप्रतिपादकशास्त्रस्यापि **मिथ्यैकान्ताविशेषः तस्मिन्** सति **नैरात्म्येतरपक्षयोः नैरात्म्यम्** आत्मरहितत्वम् **इतरत्** सात्मकत्वं तयोः **पक्षौ** [तयोः] प्रतिज्ञेतरयोः **अस्ति वा कश्चिद्विशेषः ?** न कश्चिदस्ति इत्यर्थः । ततो यथा आत्मा भावनातो मुक्तिः तथा नैरात्म्यभावनातोऽपि इति मन्यते । § 2319

ननु किमुच्यते तयोर्न कश्चिद्विशेष इति, यावगनैरात्म्यपक्षादिकयावता तरात्म्य पक्षादिकमस्ति नेतरपक्ष ततः श्रुतादर्थमवगम्य पुनः प्रत्यक्षानुमानाभ्यां विचार्य भावयतां नैरात्म्यवादिनामेव मुक्तिरिति चेत्; अत्राह--**प्रत्यक्षेत्यादि** । **प्रत्यक्षं** च **हेतुश्च** लिङ्गं **तदाभासौ** च **प्रत्यक्षहेतुतदाभासौ** त एव **विकल्पा** भेदाः तेषां **सम्बन्धो** अर्थाविनाभाव[स्त]स्य
/ms **भावाभावौ** प्रत्यक्षहेतुविकल्पयोः अर्थसम्बन्धाभावः * प्रत्यक्ष हेतुत्वाभासविकल्पयोः सम्बन्धाभावः, तयोश्च **नैरात्म्येतरपक्षयोः अस्ति वा कश्चिद्विशेषः** इति सम्बन्धः । पक्षद्वयेऽपि प्रत्यक्षादिनिषेधात् । कल्पनया उभयत्रापि तत्समानमिति मन्यते । एतदपि कुतः ? इत्यत्राह--**मिथ्येत्यादि** । **मिथ्या** कल्पितो **विषयो** [गोचर] स्तयो **र्भावः तत्ता** तस्या **अविशेषात्** । सोऽपि
448/mkj कुतः ? [इत्यत्राह--यथालक्षणम्] इत्यादि । लक्षणानतिक्रमेण **यथालक्षणं** तच्च तश्चलणं च नैरात्म्येतरवादिकल्पितं वस्तु तस्माद् **विलक्षणं** विसदृशं **जात्यन्तरं** तस्य इति **लक्षणात्** । तन्न नैरात्म्यपक्षे तत्त्वज्ञानम् निर्वाणं युक्तम् । एवमस्तु इति चेत्; अत्राह--**कुतः** इत्यादि । कुतश्चित् प्रमाणात् **तत्त्वस्य प्रतिपत्तिः** सुगतस्येतरस्य वा । एवं तावत् स्वार्थसंपत्तिः सुगतस्य निषिद्धा । § 2320

---

२ ष] प्रकर्ष
४ न] तन्न
५ को] वेदको
८ शा] नैयायिकशास्त्र ।
८ शा] बौद्धशास्त्र ।
११ आत्मा] न आत्म
१४ स्ति] यावता नैरात्म्ये प्रत्यक्षादिकमस्ति
१४ क्ष] पक्षे[[आत्मवादपक्षे ।]]
१८ *] न्धभावः
२४ च] तत् **स्वलक्षणं च**
२५ जा] कथञ्चिन्नित्यानित्मकम् ।
२५ म्] नात्

अधुना [परार्थसं]पत्तिं निराकुर्वन्नाह--**साधन** इत्यादि । **साधनवचनस्यापि** त्रिरूपलिङ्गवचनस्यापि **यत् सत् तत् सर्वमनित्यम्** वादन्या° पृ° ६ इत्येवमादिकस्य न केवलम् **अग्निहोत्रं जुहुयात्** मैत्रा° ६ । ३६ इत्येवमादिकस्य **तत्त्वानभिधानोपगमात्** सौगतैः । [ततः] किम् इत्याह--**ततः कीदृशी** इत्यादि । वतुः **सत्या** * **देशना सुगतस्य कीदृशीति** । तन्न युक्तम्-- § 2321

*ज्ञानवान् मृग्यते कश्चित् तदुक्तप्रतिपत्तये ।
अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः ॥ प्र° वा° १ । ३२
इति ।§ 2323

ज्ञानवति सत्यपि तद्वचनात् तत्त्वाप्रतिपत्तेः, वक्तुरभिप्रायमात्रायप्रतिपत्तिः पुनरन्यवचनादपि । तत एवं वक्तव्यम्-- § 2324

ज्ञानवान् मृग्यते कश्चित् तदुक्तप्रतिपत्तये ।
न ज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः ॥ इति ।§ 2326

सुगतसन्निधानात् स्वयमेव जनस्य तत्त्वप्रतिपत्तिः, **कुड्यादिभ्यो वा देशनाः** । इति केचित्; तदयुक्तम्; यतः तत्सन्निधानात्तस्य तत्त्वप्रतिपत्तिः /ms अध्यक्षरूपा, विकल्परूपा वा स्यात् ? प्रथमपक्षे तत्सन्निधानोपाया जन्मिनां सर्वज्ञतेति प्रसक्तम् । चतुः [सत्यज्ञस्य] सर्वज्ञत्वम् इति परस्य मतम् । तदुक्तम्-- § 2327

*हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः ।
यः प्रमाणमसविस्तो न तु सर्वस्य वेदकः ॥§ 2329

दूरं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।
प्रमाणं दूरदर्शी चेदेन *गृद्धानुपास्महे ॥§ 2331

प्र° वा° १ । ३४-३५ इत्यादि । § 2332

तथा च तत्त्वाभ्यासोऽनर्थकः । द्वितीयपक्षे--विकल्पमात्ररूपा, अनुमानरूपा वा स्यात् ? अत्रापि प्रथमविकल्पे उक्तो दोषः **कथमतत्त्वभावना**

५ *] **तत्त्वस्य** चतुःसत्यस्य
९ मात्राय] र्थ
१० पि] नैयायिकादिवचनादपि संभवति ।
१४ इति] संभारावेधतस्तस्य पुंसश्चिन्तामणेरिव । निःसरन्ति यथाकामं कुट्यादिभ्योऽपि देशनाः ॥--तत्त्वसं° श्लो° ३६८० । सान्निध्यमात्रतस्तस्य... मी° श्लो° सू° २ श्लो° १३८ ।
१४ स्य] जगतः ।
१५ क्षे] सुगतसन्निधानमात्रेण ।
१८ स्य] हेयं दुःखसत्यम्, उपादेयं निरोधसत्यम्, तयोः अभ्युपायः समुदय--मार्गसत्ये ।
१९ विस्तो] मसाविष्टो
२१ चेदेन] एत आगच्छत ।
२१ *] पक्षिणो । दूरदर्शिनः दूरश्रुतींश्च ।

इत्यादि । [यदि] पुनस्तस्याः परमार्थविषयत्वमिष्यते, व्याहतमेतत्--**द्वे एव**
449/mkj **प्रमाणे** प्र° वार्तिकाल° ३ । १ इति **विक ल्पोऽवस्तुनिर्भासः** इत्यादि च । द्वितीयविकल्पे लिङ्गात् लिङ्गिनि ज्ञानम् अनुमानम् । लिङ्गस्य च स्वयं प्रतिपत्तौ ततः साध्यप्रतीतिरपि स्वयमेव इति किं तत्सन्निधानेन ? नहि धूमाद् अग्निं प्रतिपद्यमानं प्रति तदुपयोगि । अथ साध्यवल्लिङ्गज्ञानं तत एव; तच्चेत् प्रत्यक्षम्; अतीन्द्रियत्वाऽविशेषेऽपि लिङ्गे प्रत्यक्षं ततो न साध्ये इति किं कृतो विभागः ? यदि विकल्पमात्रम्; कथमतो लिङ्गप्रतिपत्तिः यतोऽनुमान [रूपत्वम्, अनुमान]त्वे प्रकृतमनुवर्त्तत इत्यनवस्था । तन्न तत्सन्निधानात् कस्यचित्तत्त्वप्रतिपत्तिः । § 2333

यत्पुनरुक्तम्--कुड्यादिभ्योऽपि देशनाः इति; तत्र ज्ञानमात्रेणापि वर्जितेभ्यः तेभ्यो देशनासंभवे कथमिदं सूक्तम्-- § 2334

/ms *विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः ।
तेषामन्योऽन्यसम्बन्धान्नार्थान् शब्दाः स्पृशन्त्यमी ॥ इति
?§ 2336

अथ अन्य एव ते शब्दा ये विकल्पाभावेऽपि भवन्ति; तर्हि अन्यदेव तच्चित्तं यत्ता [यत्तदचैतन्याभावेऽपि भूतमात्रात् ।]भावेऽपि स्यादिति परलोकसिद्धिः । कथं चैवं सति व्याहारादेः परशरीरे चैतन्यप्रतीतिः ? कथं च न स्यात् ? किं कुड्यादिकवत् कस्यचित् सन्निधानात् ध र्म की र्त्या द यो वदन्ति उत स्वयमेव इति शङ्काऽनिवृत्तेः । § 2337

किंच, तद्देशनाभ्यो यदि न कस्यचित्तत्त्वप्रतीतिः किं ताभिः ? अस्ति चेत्; सिद्धः शब्दः अर्थवाचकः । तद्वद् अन्योऽपि तत्सन्निधानात्तया इति चेत्; *अन्यसन्निधानाद् अन्या अपि, भावनियमाभावात् शक्तीनामिति । § 2338

यत्पुनरेतत्--**विवक्षाप्रतिबद्धजन्मानो विवक्षामेव गमयेयुः** । इति; तत्रापि कुड्यादिप्रतिबद्धजन्मानः ताः कुड्यादिकं गमयेयुः, तच्च तत्सन्निधानमिति दूरे तत्त्वप्रतिपत्तिः व्यवहिता वा स्यात् । ततः स्थितं **कीदृशी तत्त्वदेशना** इति । तथैवेतेन **सोपायोपेय** इत्यादि व्याख्यातम् । § 2339

ननु सुगतस्यापि विकल्पोऽस्ति ततो धर्मादिना इति चेत्; अत्राह--**सोपायोपेय** इत्यादि । § 2340

---

१ स्याः] विकल्पात्मकभावनायाः ।
२ इति] द्विविधमेव प्रमाणम् --प्र° वार्तिकाल° ।
४ किं] सुगतसन्निधानेन ।
५ ति] सुगतसन्निधानं सार्थकम् ।
६ क्षं] सुगतसन्निधानात् ।
११ र्जितेभ्यः] कुड्यादिभ्यः । कुट्यादिभ्यः इति पाठे मूलगन्धकुटीतः इत्यर्थः ।
१६ लोक] का
१७ चित्] सुगतस्य ।
२० या] था
२१ *] कपिलादि ।
२१ न्निधानाद्] कपिलादिदेशनाः अपि तत्त्वप्रतिपादिकाः स्युः ।
२३ न्मानो] शब्दाः ।
२४ ताः] देशनाः ।
२७ र्मादिना] धर्मदेशना

...3 सोपायोपेयतत्त्वश्चेद् बुद्धो निश्चित्य वाचकैः ।
परं निश्चाययेच्छब्दविकल्पास्तत्त्वगोचराः ॥ ३
॥§ 2342

सोऽयं परमार्थासंस्पर्शिभिः विकल्पैस्तत्त्वं निश्चिन्वन् तत्त्वानभिधानैः वाचकैर्विकल्पविषयं निश्चाययति इति क+इमं व्याघातभारमुद्वोढुं समर्थः अन्यत्रैकान्तविनश्वरात् । § 2343
450/mkj

**बुद्धः** सुगतः **निश्चित्य** विकल्पविषयतां नीत्वा [अ]विकल्पेनाऽनिश्चयात् । अनेन एतद्दर्शयति बुद्धस्य शुद्धनिर्विकल्पबोधसद्भावे न ततो वचनप्रवृत्तिरिति तत्कल्पनमनर्थकम् । § 2344

एतेन इदमपि निरस्तं यदुक्तं गा द्द ल की र्त्ति ना-- § 2345

*ये कल्पयन्ति कवयः सुगतस्य वाचस्ते कल्पनामपि मुनिः
परिकल्पयन्ति ।
तस्यामबाह्यतया चकास्ति दोषं तत[ः] स्तुतिपदैर्निगदन्ति
तेऽर्थात् ॥ इति ।§ 2347

कथम् ? तद्वचनाभावे किं तेन अनर्थकेन अर्था पोषितेन ? शेषं चिन्तितमनन्तरम् । अथा द्वैतमलखेद मुक्तम्, तेन तत्र सर्वमिदमुक्तमयुक्तम्; एतद्वचनार्थाऽभावात् । *ततो वचनप्रवृत्तो वा, तदर्थो वा ततः प्रतीयेत उभयथापि स्वलक्षणविषयत्वं शब्दानाम् । सौगताना स्यादिति चेत्; न; अन्यत्रापि तदनिषेधात् । न वस्तुगतं स्यैवा क्ष्मिमध्येक्षम् अन्यस्यापि स्वयं तदभ्युपगमात् । अत्यासं जं च तदस्ति **यस्य यावत मात्रा** प्र॰ वार्तिकाल॰ पृ॰ २३३ इति । न कस्यचिदविकल्पादन्यस्य विकल्पाद्वचनमिति युक्तम्; इतरथा धूमोऽपि क्वचिदग्नेः अन्यत्रा[न्य]तोऽपि स्यात् । *अर्थविषयं सुगतवद् अन्ययथे * । तथा बुद्धस्यापि निश्चलादे वचनमिति । /ms

---

८ त] बुद्धत्वकल्पनम् ।
१० मुनिः] नेः
१२ अर्था] अनर्थ
१३ खेद] अथ द्वैतमलखेद
१४ *] सुगतात् ।
१४ वृत्तो] त्तौ
१४ तः] वचनात् ।
१५ ब्दानाम्] इति दोषः ।
१५ ताना] सुगते न
१६ म्] न च सुगतस्यैव अविकल्पमध्यक्षम्;
१६ स्यापि] साधारणजनस्य ।
१७ जं] अभ्यासजं
१७ च] निर्विकल्पकम् ।
१७ त] ती
१८ न] सुगतस्य ।
१८ स्य] अस्मदादेः ।
२० *] यथा सुगतस्य वचनमर्थवत् तथा अन्यस्यापीति ।
२० *] अन्यस्यापि
२० लादे] निश्चयादेव

किं **निश्चित्य** ? इत्याह— **सोपाय** इत्यादि । स कैः किं कुर्यात् ? इत्यत्राह--**वाचकैः** शब्दैः **परम्** आत्मनोऽन्यं दिनेयज्ञातं **निश्चाययेत् चेद्** यदि । ततः किं जातम् ? इत्याह--**शब्दविकल्पाः तत्त्वगोचराः** सुलक्षणविषयाः स्युः इत्यध्याहारः । एवं मन्यते--योऽसौ सुगतस्य विकल्पः स जात्यादिविषयश्चेत्; इतरविकल्पवत् तद्वचनस्य तत्प्रतिबद्धत्वे ततः स एव प्रतीयते इति स एव दोषः **साधनवचनस्यापि** इत्यादिकः । अथ स्वलक्षणविषयः; तर्हि [न] नीलादिविकल्पोऽवस्तुगोचरः तत्त्वात् मरीचिकानिचये जलविकल्पवदिति । ततः **विकल्पोऽवस्तुनिर्भासो विसंवादादुपप्लवः** [इति कथन]मात्रम्, सुगतवचनस्यापि तदनिवारणात्, तथा च तत्प्रभवस्य शब्दस्यापि तद्विषयत्वमिति । § 2348

/ms व्यतिरेकमुखेन कारिकां व्याचष्टे--**परमार्थ** इत्यादिना । **सोऽयं** हेयोपादेयतत्त्व * **परमार्थः तदसंस्पर्शिभिः** तदगोचरैः । किं [भूतै] रित्याह--**विकल्पैः** । किं कुर्वन् ? इत्याह--**निश्चिन्वन्** व्यवस्यन् । किम् ? **तत्त्व** [तत्त्वम् । कः ? सोऽयम्] बुद्धः **शिष्यान् निश्चाययति** । कैः ? **वार कैः** । किम्भूतैः ? **तत्त्वानभिधानैः** । किम्भूतं किम् ? इत्यत्राह— **विकल्पविषयम्** स्पष्टसाधारणरूपं **तत्त्व[म्] इति क इमं व्याघातभारं** स्वनाशकदोषभारम् **उद्वोढुं समर्थः अन्यत्र एकान्तविनिश्वरार** *वोढुं समर्थः पूर्वापरपरामर्शशून्यत्वात् । § 2349

ननु शिष्याः सुगतवचोभिः तत्त्वं साक्षात् न प्रतिपद्यन्ते अपि तु तद-
451/mkj भिप्राय, पुनः स्वयमेव तत्त्वं युक्त्य वबुध्यन्ते इति चेत्; अत्राह--**शाब्दश्चेद्** इत्यादि । § 2350

...4 शब्दैश्चेद्वक्तृभिप्रायं प्रतिपद्य परीक्षकाः ।
युक्त्या तत्त्वं प्रतिपद्येरन् किन्नेवं चक्षुरादिभिः ॥ ४
॥§ 2352

न खलु युक्तायुक्तपरीक्षया तत्त्वेतरप्रतिपत्तौ दृष्टश्रुतयोरर्थयोः कश्चन अतिशयोऽस्ति यतः चक्षुरादिज्ञानमेव तत्त्वविषयम् । तत्समारोपव्यवच्छेदस्यैव प्रामाण्ये निर्विकल्पज्ञानस्य प्रामाण्यं न भवेत्, सर्वथा अन्यस्यापि प्रसङ्गः स्यात् । संवृतिप्रभृतेरेव स्यात् । तच्च [नास्ति] । § 2353

---

२ ज्ञातं ] विनेयजातं
३ सु ] स्व
५ स्य ] सुगतवचनस्य ।
५ त ] अर्थसम्बद्धत्वे ।
७ त्वात् ] विकल्पत्वात् ।
१२ * ] त्वं
१४ वार ] च
१७ रार ] विनश्वरात्
१७ * ] बोढुं समर्थः इति पुनर्लिखितम् ।
२० भिप्राय ] यम्
२० युक्त्य ] क्त्याऽ
२१ श्चेद् ] शब्दैश्चेत्
२३ तिप ] प्रप

**वक्तुः** सुगतस्य **अभिप्रायं** विवक्षां **प्रतिपद्य**। कैः ? इत्याह--**शब्दैः** इति। के ? इत्याह--**परीक्षकाः** तत्त्वचिन्तकाः। किं कुर्वीरन् ? इत्याह--**प्रतिपद्येरन्**। किम् ? **तत्त्व**मिति। कया ? **युक्त्या** प्रत्यक्षानुमानरूपया। **चेद्** यदि। दूषणमाह--**किं नैव** कस्मादेवं **चक्षुरादिभिः तत्त्वं** न **प्रतिपद्येरन् परीक्षकाः**। चक्षुर्ग्रहणम् उपलक्षणम् अन्येन्द्रियाणाम्। आदिशब्देन अनुमानपरिग्रहः। एतदुक्तं भवति--यदि सुगतव[च]ने प्रवृत्तेऽपि न ततः तत्त्वप्रतीतिः अपि तु युक्तिः प्रत्यक्षादिरूपायाः। तथा सति प्रत्यक्षादिविषयं तत्त्वम् इति तत एव तत्प्रतीतिः इति किं सुगतवचनेन ? इति व्यर्थम्--**शब्दैर्वक्तुरभिप्रायं प्रतिपद्य** इति। § 2354

कारिकाया व्याख्यानं सुगमत्वा तत्कृतं **शब्दैर्वक्तुरभिप्रायं प्रतिपद्य** इत्यत्रैव दूषणान्तरमाह--**नरवीत्यादि** * **नखल** तचेतन * **प्रतिपत्तौ** क्रिय- /ms माणायाम्। कया ? इत्याह--**युक्तायुक्तपरीक्षया** इति। इदं युक्तम् इदं वाऽयुक्तम् इति या परीक्ष तया। किम् ? इत्याह--**कश्चन अतिशयोऽस्ति** नैव कश्चेद्वेदो स्ति। कयोः ? इ[त्य]त्राह--**अर्थयोः**। किम्भूतयोः ? **दृष्टश्रुतयोः** इन्द्रिय-शब्दप्रतिपन्नयोः। एवं मन्यते--यद्रि यात्तत्त्वं प्रत्य पद्य नाभिप्रायं परीक्ष्य [परीक्ष]का युक्त्या तदेव तत्त्वं प्रतिपद्येरन्, तथा शब्दादपि तत्त्वं प्रतिपद्य नाभिप्रायं तदेव ते तया प्रतिपद्येरन् इति। कीदृशस्तयोरविशेषः अतिशयो नास्ति ? इत्याह--**यतो** यस्मात् अतिशयात् **चक्षुरादिज्ञानमेव तत्त्वंविषयं** न पुनः श्रुतज्ञानं भवेत् तत्त्वविषयं सोऽतिशयो नास्ति। § 2355

ननु श्रुतज्ञानं प्रवृत्तमपि स्वविषये समा[रो]पं न व्यवच्छिनत्ति अनित्यः शब्दः इत्युक्तेऽपि नित्यज्ञानाऽनिवृत्तेः, इतरथा साधनमनर्थकं भवेत्। *तद्व्यवच्छेदकं च प्रमाणमिति चेत्; अत्राह--**तदि**[त्यादि]। **तत्समारोपो** दृष्टश्रुतार्थसमारोप[स्तद्]**व्यवच्छेद**नुमानं [तस्यैव] तद्व्यवच्छेद**स्यैव** न श्रुतज्ञानस्य **प्रामाण्ये** अङ्गीक्रियमाणे **निर्विकल्पज्ञानस्य प्रामाण्यं न भवेत्** तद्व्यवच्छेदकत्वाभावादिति मन्यते। कथं न भवेत् ? इत्याह--**सर्वथा** *तद्व्यवच्छेद प्रकारेणेव अर्थग्रहणप्रकारेणापि **अन्यस्यापि प्रसङ्गभयात** अथवा, क्षणिकत्व 452/mkj *प्रकारेणेव नीलादिप्रकारेणापि, अत्रापि विकल्पापेक्षणात्। यदि वा अनभ्यास [प्रकारेणेव अभ्यास] प्रकारेणापि, तदापि दृश्यप्राप्यैकत्वसमारोपभावात् कथमन्यथा प्रत्यक्षं [भाविनि]प्रमाणम् ? तर्हि क[स्याः] स्यादिति /ms

२ तिप] प्रप
४ नैव] वं
६ तः] सुगतवचनात्।
७ युक्तिः] क्तेः
१० त्कृतं] त्वान्न कृतम्
११ *] न खल्वित्यादि
११ ल] लु
११ *] तच्चेतस्
१३ रीक्ष] क्षा
१४ श्चेद्वेदो] कश्चिद्भेदोऽ
१५ द्रि] यथैवेन्द्रि
१५ त्य] प्रति
१९ त्त्वं] त्त्व
२१ था] शब्दः क्षणिकः सत्त्वात् इत्यादि।
२२ *] समारोपव्यवच्छेदकम्।
२३ मारोप] दोऽ
२५ *] समारोपव्यवच्छेद।
२६ यात] ङ्गः स्यात्
२७ *] कत्व

चेत् ? अत्राह--**संवृतीत्यादि** । भेदसंवरणात् **संवृतिः** अवयव्यादिविज्ञान **तत्प्रभृतेः** तदाः प्र भृतिशब्देन स्मरणादिपरिग्रहः, विकल्पस्यैव **स्यात्** । भवतु को दोष इति चेत्; अत्राह--**तच्च** इत्यादि । प्रमाणनियमा[भावा]पत्तेः इ[ति] भावः । § 2356

एवं सुगतस्य तत्त्वदेशना कीदृशी इति सामान्येन प्रतिपाद्य संप्रति तदुक्तनैरात्म्यलक्षणमार्गनिषेधविशेषणा कीदृशी तत्त्वदेशना इत्येतद् दर्शयन्नाह--**नीत्येत्यादि** । § 2357

...5 नीता नैरात्म्यशङ्काऽस्तं निर्विकल्पेतरात्मना ।
सहक्रमभवान्योऽन्यव्यावृत्तैकात्मसंविदाम् ॥ ५
॥§ 2359

स्वतोऽन्यतो वा स्वपरचेतसां सत्यपि सदृशेतरपरिणामातिशये जीवोऽयं पृथक् प्रत्यात्मवेदनीयः सङ्करव्यतिकरव्यतिरेकात् स्वपरचेतसामस्खलत्तादात्म्यसामान्यगोचरप्रत्ययविषयतां प्रथयन् स्वयं प्रतिक्षिपन्तं दुर्विदग्धबुद्धिं तिरस्करोत्येवेति अत्र किन्नश्चिन्तया ? न चेत्तमोविजृम्भणम् । स्वपरदर्शनविकल्पक्रमपरिणामस्वभावजीवमन्तरेण एकान्तविशेषाणां क्षणस्थितेरदृष्टेरनुपपत्तेश्च । § 2360

**नीता** प्रापिता **अस्तम्** अभावम् । का ? इत्याह--**नैरात्म्यशङ्का** नेन * इत्याह--**निर्विकल्पेतरात्मना** इति । निर्विकल्प इतरश्च स्व विकल्पः आत्मा स्वभावो यस्य विकल्पज्ञानस्य तेन । तदुक्तम् अत्रैव प्रथमपरिच्छेदे **प्रतिभासैक्यनियमे** सिद्धिवि° १ । १० इत्यादिना । केषाम् ? इत्याह--**सह** इत्यादि । सहक्रमाभ्यां भवती ति **सहक्रमभवाः** ताश्च ताः **अन्योऽन्यं** परस्परं **व्यावृत्ता** स्वे पुनरपि तास्ताः **एकात्मनः** एकसन्तानश्च **संविदश्च** तासाम् इति । § 2361

*अन्ये **क्रमभावान्यान्यतावृत्ते कात्मसंविदा*** इति पठन्ति । तत्रायमर्थः--**कमभवाश्च अन्योऽन्यव्यावृत्ताश्च** सुखादस्तेषु **एकस्यात्मनो** जीवस्य या **सम्बन्धितया**[संविदः तासाम्] इति । स्वरपप्रसिद्ध्या युक्त द्वयमत्र । § 2362

१ व्यादिविज्ञान] नं
२ प्र] तत्प्र
६ त] सुगतोक्त ।
६ निषे] निरो[[निर्वाण ।]]
७ नीत्ये] ते
१७ *] केन ?
१७ स्व] स
१८ अ] ग्रन्थे ।
२० ती] न्ती
२१ स्वे] श्च
२१ नः] त्मानः
२१ श्च] नाश्च
२३ *] व्याख्याकाराः ।
२३ *] क्रमभवान्योऽन्यव्यावृत्तैकात्मसम्बन्धिसंविदाम्
२४ सुखाद] य
२५ या] न्धिन्यः
२५ प] स्वपर
२५ युक्त] क्तं

स्यान्मतम्--क्वचिज्ज्ञाने सविकल्पेतराकारयोः एकत्वदर्शनानुक्र संविदामेकत्वसाधनमयुक्तम्, अन्यथा अर्के कटुकत्वदर्शनार्थ गुडेऽपि किन्न तत्साध्यते ? प्रत्यक्षबाधनं क्रमविदामेकत्वसाधनेऽपि । । § 2363 /ms

तास मेकत्वं चेतनारूपतां विहाय अपरं प्रत्यक्षगम्यम् । तद्रूपता च सन्ताना न्तरापेक्षयापि इति सर्वात्मनामेकात्मकत्वम् । देशादिभेदो विवक्षितसंविदामपि इति नात्मसिद्धिः । ए[ते]न द्वितीयं व्याख्यानं चिन्तितमिति चेत्; अत्राह--**स्वतोऽन्यतो वा** इत्यादि । **स्वा [नि]** स्वसन्तानपतितानि [पराणि] पुत्राणि सन्तानान्तरभूतानि तानि च तानि **चेतांसि** तेषां **सत्यपि** विद्यमाने वि **सदृशेतरपरिणामा विषये** विसदृशपरिणामातिशये । कुतः ? इत्याह--**स्वतः** सोपादा नकारणा [त् अ]**न्यतो वा** सहकारिकारणात् वेति समुच्चये । तदुक्तम्--**स्वतोऽन्यतो वा विवर्त्तेत क्रमा[द्] हेतुफलन्याति** । सिद्धिवि॰ ३ । १९ इति । तस्मिन् सत्यपि कुतः किं कुर्वन् कः किं करोति ? इत्याह--**सङ्करे**त्यादि । **जीवो य** स्वसंवेदनाध्यक्षविषयः **तिरस्करोत्ये [व]** । कम् ? इत्याह--**दुर्विदग्धबुद्धिं** सौगतं चार्वाकं च । किं कुर्वन्तम् ? **प्रतिक्षिपन्तम्** । किम् ? **स्वयं** जीवमेव । केषां कुर्वन्ति इत्याह--**स परचेतसामस्खलत्तादात्म्यसामान्यगो[चर]प्रत्ययविषयतां** स्वचेतसाम् अस्खलत्तादात्म्यप्रत्ययविषयतां पराद् तसां स्वापेक्षयाऽस्खलत्सामान्यप्रत्ययविषयतां **प्रथयन्** प्रसिद्धिं तदा न । कुतः ? इत्याह--**सङ्कर** इत्यादि । **सङ्करे** स्वस्वचेतस्सु तादात्म्यप्रत्ययविषयतावत् सामान्यप्रत्ययविषयता, परचेतस्सु सामान्यप्रत्ययविषयतावत् [ता] दात्म्यप्रत्य[य]विषयता, **व्यतिकरश्च** स्वचेतस्सु तथाविधसामान्यप्रत्ययविषयता परचेतस्सु तादात्म्यप्रत्ययविषयता तयो **र्व्यतिरेको**ऽभावः **तस्मात्** तं वा प्राप्य । § 2364 /ms

ननु सर्वत्र एक एव जीवः, इति न युक्तं **स्वतः** इत्यादिकमिति चेत्; अत्राह--**पृथग्** इति । **पृथग्** भिन्नः । किंभूतः ? **प्रत्यात्मवेदनीयः, अत्र** अस्मिन् न्याये सति जीवे वा **किं नश्चिन्तया** अनुमानेन ? किमर्थं तर्हि तत्र **[क्र]मोपलब्धि** इत्यादि वक्ष्यते तद् इति चेत् ? अत्राह--**न च** इत्यादि । **तमसो**ऽज्ञानस्य **विजृम्भणं [चेत्]** यदि **न** तर्हि **किन्नश्चिन्तया** । तद्विजृम्भणात्

१ नानुक्र] नात् क्रम
२ नार्थ] नात्
२ किन्न] कटुकत्वम् ।
४ तास] ननु न ता[[तासां क्रमसंविदाम् ।]]सा
४ त] चेतनारूपता ।
५ देशादिभेदो] क्रमभाविनीनां संविदाम् ।
८ पुत्राणि] दि
९ वि] ऽपि
९ ये] तिशये
१० सोपादा] स्वोपादा
११ न्याति] लात्मना
१३ य] ऽयं
१६ स] स्व
१७ राद्] परचे
१८ न] तन्वन्
१९ स] सर्वेषां युगपत्प्राप्तिः सङ्करः ।
१९ रे] रः
२० व्य] परस्परविषयगमनं व्यतिकरः ।
२१ त] अस्खलत् ।
२३ न] वेदान्तवादी प्राह ।
२५ त] जीवे ।
२६ इ] अग्रिमश्लोके ।
२६ द्] अनुमानम् ।
२६ च] चेत्

तदिष्यते, तद्व्यवच्छेदार्थमिति भावः । कस्य ? इत्याह--**एकास्न** * इत्यादि । स्वपरचेतसां तद्विषयतां प्रथयन् इति । एतदपि कुतः ? इत्याह--**स्वपरे**त्यादि । **स्वपरयोः दर्शनं** चाव**ग्रहो विकल्पश्च** स्मरणादिः तावेव **क्रमपरिणामः** स एव **स्वभावो** यस्य स तथोक्तो **जीवो**ऽन्यपदार्थः तम**न्तरेणा**ऽ**दृष्टेः** । कथम् ? इत्यत्राह--**एकान्तविशेषाणाम्** । परस्परं विशिष्यन्ते इति **विशेषा** द्रव्यादयः अत एव तद्वादी वैशेषिक इत्युच्यते, **एकान्तेन विशेषा एकान्तविशेषा**[ः]तेषामिति । न केवलं तेषामेव अपि तु **क्षणस्थितेः च** शब्दोऽत्र द्रष्टव्यः, **अदृष्टे**रिति । हेत्वन्तरमाह--**अनुपपत्तेश्च** इति । **एकान्तविशेषाणां क्षणस्थितेश्च** इति सम्बन्धः । § 2365

तदनुपपत्तिं दर्शयन्नाह--**क्रमोपलब्धि** इत्यादि । § 2366

...6 क्रमोपलब्धिनियमात् स्यादभेदः स्वसंविदाम् ।
सुखःदुखादिभेदेऽपि सहवीक्षानियामवत् ॥ ६ ॥§ 2368

454/mkj

भेदैकान्तेऽपि क्षणिकस्य उत्पत्तिविनाशयोस्तादात्म्यं सिद्धं क्रमोपलम्भनियमात् । हेतुफलविनाशोत्पादयोः समानकालोपलम्भाभ्युपगमात् । न च स्थितिरेव भावस्य विनाशः यतः सहोपलम्भनियमः । विधिमुखप्रतिषेधफलो हि नियमः । क्षणस्थितेः प्रत्यक्षानुपलम्भयोः बहिरपेक्षया विना एकस्वभावविषयतानुपपत्तेः । तथा च सहोपलम्भनियमात् हेतुफलविनाशोत्पादयोरैक्यं स्यात्, यतः पूर्वस्य वैकल्यमपरस्य कैवल्यम् । न चान्योऽन्यविरुद्धस्वभावयोरनयोः कथञ्चित्तादात्म्यं विरुद्धम् निश्चय...स्थित्या सह जन्मविनाशयोरैक्यमुपयन् कालादिभेदेऽपि सुखादिव्यापिनं प्रत्यक्षं भावं कथं प्रतिक्षिपेत् ? स्वलक्षणं परस्परव्यावृत्तिलक्षणं यतः प्रतिक्षणं त्रिलक्षणम् । § 2369

स्वस्य स्वा वा संविदः **स्वसंविदः** स्वसंविदो न परसंविदः तासाम् । किम् ? इत्याह— **अभेद** ऐक्यम् । तर्हि विवक्षितैकक्ष[ण]मात्रः स्यादात्मा सर्वस्य तत्र प्रवेशात् इति [स्यात्] कथञ्चित् न सर्वात्मना इति । § 2370

१ त] अनुमानम् ।
१ *] न्त
६ त] विशेषपदार्थवादी ।
१९ तः] तुलना--तस्यान्यस्य प्रदेशस्य केवलस्य यत्तत् कैवल्यम् एकाकित्वमसाहयता तदेव अपरस्य प्रतियोगिनो घटादेः वैकल्यम् अभाव इति ।--हेतुबि°, टी° पृ° १८८ ।
२५ त] बौद्धः प्राह ।

स्यान्मतम्--सुखदुःखादिभेदाद् भेद एव तासां भेद इति; तत्राह--**सुखदुःखादिभेदेऽपि** क केवलम् अभेदे । § 2371 /ms

ननु [भेदा]भेदयोरन्योऽन्यपरिहारस्थितलक्षणयोः किमिव ऐक्यमिति चेत् ? अत्राह— **सहवीक्ष्यानियामवत्** इति । **वि** चित्रा नाना विभ्रमेतराद्याकारा **ईक्षा** दृष्टिः **वीक्षा** तस्या **नियमः** ऽवश्यम्भावः, अन्यथा सकलशून्यता इत्युक्तम्, **सहवीक्ष्यानियम** स्य इव तद्वदिति । § 2372

अथ मतम्--न दृष्टान्तमात्रात् साध्यं सिध्यति अतिप्रसङ्गात् अपि तु हेतोः, अतः स एव उच्यतामिति; तत्राह--**क्रम** इत्यादि । पूर्वम् उपादानस्य पुनः उपादेयस्य उपलब्धिः **क्रमेणोपलब्धिः** तस्या **नियमात्** इति । § 2373

ननु यद्यपि कदाचित् घटपटयोरुपलब्धिः तथापि नियमाभावात् नैक्यमिति सिद्ध्यति, तथापि यथा सहभाविनां सन्तानान्तरसंवित्क्षणानां भेदेऽपि सहोपलम्भनियमस्य भावाद् व्यभिचारः तथा क्रमभाविनां तेषामेव क्रमोपलम्भनियमस्य भेदेऽपि भावाद् व्यभिचारस्तदवस्थ एव निशादिवसयोश्च इति चेत्; उच्यते--**क्रम**शब्देन प्रक्रमाद् उपादानोपादेयभूतस्वपरदर्शन-विकल्पक्रमो गृह्यते तस्योप**लब्धेः**, अन्यथाऽभावो **नियमः**, तस्मादिति । एतदुक्तं भवति--स्वसंविदां पूर्वस्याः पूर्वस्या उपादानत्वेन परस्याः परस्या उपादेयत्वेन च येयं क्रमेणोपलब्धिः तस्या नियमाद् अन्यथानुपपत्तेः तासां **स्यादभेद** /ms
इति । अत एव दृष्टान्तापेक्षणमत्राऽयुक्तम् । § 2374

अन्ये पुनराचार्याः **क्रम**मविशिष्टमादाय **तदुपलब्धेः नियमाद्** अवश्यम्भावात् इति हेतुमभिधाय **सहवीक्ष्यानियामवत्** सहोपलम्भनियामवत् 455/mkj
इति दृष्टान्तं ब्रुवते; तेषां कथमुक्तव्यभिचारपरिहारः तत्र क्रमोपलब्धिनियमा [मभावेऽपि अभेदा] भावात् ? कथन्न साधनविकलता दृष्टान्तस्य उपलम्भनियममात्रस्य भावेऽपि सकलहेतोरभावात् । न चानेकशः स्वयं दूषितं पुनः स्वपक्षसिद्धये अङ्गीकर्तुं युक्तम् । साध्यविकलता च वादिनं प्रति, नीलज्ञानयोस्तेन अभेदानभ्युपगमात् । *परापेक्षया इदं निदर्शनमिति चेत्; तं प्रति साध्यविकलता, कथञ्चिदभेदस्याऽनभ्युपगमात् । तन्न किञ्चिदेतत् । § 2375

परेणापि अतो हेतोः क्षणिकस्य उत्पादविनाशयोः तादात्म्यम् अभ्युपगम्यमिति पायत् * कारिकां व्याचष्टे **भेदैकान्ते**ऽपीत्यादिना । न केवलं

१ ता] संविदाम् ।
४ वीक्ष्या] क्षा
४ वीक्ष्या] नियमः नियामः इत्येकार्थौ ।
५ मः] नियामो
६ म] वीक्षानियाम
१३ योश्च] चशब्द इवार्थः ।
१४ प्र] प्रकरणात् ।
१७ ता] संविदाम् ।
१९ राचार्याः] व्याख्याकाराः ।
१९ विशिष्ट] साधारणं न तु उपादानोपादेयतया क्रमम् ।
२० वीक्ष्या] क्षा
२१ भिचार] सन्तानान्तरसंवित्तिभिः क्रमवर्तिनीभिः ।
२३ भावेऽपि] क्रमोपलम्भात् इति समग्रस्य हेतोः ।
२५ योस्तेन] वादिना ।
२५ *] विज्ञानवाद्यपेक्षया ।
२८ रेणापि] क्रमोपलब्धिनियमात् ।
२९ *] पातयन्[[दूषणं ददन् ।]]

स्यादभेदे अपि तु **भेदैकान्तेऽपि** सौगतवैशेषिकसम्बन्धिन्यभ्युपगम्यमाने **क्षणिकस्य** भावस्य प्रध्वंसवत् उपलक्षणमेतत् तेन अनित्यस्य सर्वस्य ग्रहणम्, यौ **उत्पत्तिविनाशौ** तयो**स्तादात्म्यं** कथञ्चिदेकत्वं **सिद्धम्** । कुतः ? इत्याह- **-क्रमोपलम्भनियमाद्** इति । पूर्वम् उत्पत्तेः, पुनः तत्परिणामस्य विनाशस्य उपलम्भः तस्या नियमात् । यदि पुनः उत्पद्यमानात् उत्पत्तिः अन्या स्यात्; तया तत्सम्बन्धाभावा[त्] न कश्चित् तद्वान् इति न कश्चित् उत्पद्येत इति, /ms न विनश्येत् खरविषाणवत्, अन्यथा आत्मादेरपि तत्सम्बन्ध इति सोऽपि उत्पद्यते इति स्यात् । § 2376

अथ प्रागसतः स्वकारणसमवायः सत्तासमवायो वा उत्पत्तिः, न सा आत्मादेः सर्वदा सत्त्वात् इति मतिः; कुतः प्राक् ? उत्पत्तेः इति चेत्; कस्योत्पत्तेः ? घटादेरिति चेत्; उक्तमत्र भिन्ना कथं तस्य ? [अन्यथाभिन्नापि यद्युत्पत्तिः घटादेर्व्यपदिश्यते तदा ।] आत्मादेरपि न स्यादिति । न च निराश्रया सा, इति कथं पूर्वं तदुपलम्भः ? खरविषाणवत् अलब्धात्मरूपस्य कः स्वकारणेन सत्तया वा समवायः ? लब्धात्मरूपत्वे तदेवोत्पत्तिः इत्यलं भिन्नोत्पत्तिकल्पनया । § 2377

तथा यदि भावाद् विनाशोऽन्यः, न तेन तस्य सम्बन्ध इति कथं भावो [विनष्टो] नाम, अतिप्रसङ्गात् । भावो विशेष्यः अभावो [विशेषणम् अतः] विशेषणीभावस्तेन तत्सम्बन्ध इति चेत्; विशेषणकाले विशेष्यसद्भावे युक्तो विशेषणविशेष्यभावः, किन्तु कथं भावे सति अभावः ? नहि जीवत एव देवदत्तस्य मरणम् । भावयोः सहदर्शनं च नीलोत्पलयोरिव । अर्थावे नाशेन प्रच्छादनान्न भान्न भावोपलम्भः; तर्हि न तदनुरक्तभावोपलम्भः इति । न [च] विनाशो विशेषणम् । स्वानुरक्तं विशेष्ये प्रतीतिमुपजनयत् विशेषणमुच्यते; नीलत्वं तदनुरक्तं तत्प्र तीतौ वा, न तत्प्रच्छादनम् । यदि पुनर्न विनाशसमये भावसद्भावः; कथमन्यकालेऽन्यस्याभावो यद्यसौ 456/mkj स्वयं निवर्त्तेत, अन्यथा पटोत्पत्तिकाले घटाभावः स्यात् । असम्बन्धान्नेति चेत्; कः पुनः भावविनाशयोः सम्बन्धः ? विशेषणीभावश्चेत्; उक्तमत्र— *तस्यापि ताभ्यां भेदात् सोऽपि तयोः क[थम्] इति ? सम्बन्धान्तरकल्पने /ms अनवस्था । *तदभावेपि सा तयोरिति चेत्; समवायाद्यभावेऽपि गुणाद-

२ त्] वतः
५ स्या] तस्य
५ अन्या] भिन्ना ।
६ द्वान्] उत्पत्तिवान् ।
७ सोऽपि] आत्मादिरपि ।
९ त्तिः] स्वकारणसत्तासम्बन्धः, तेन सता कार्यमिति व्यवहारात् ।--प्रश॰ व्यो॰ पृ॰ १२९ ।
११ स्य] घटादेः इति व्यपदिश्येत ।
१२ न] पि सा
१४ त्वे] लब्धात्मरूपत्वमेव ।
१८ स्तेन] भावेन ।
१८ त] विनाशसम्बन्धः ।
२१ अर्थावे] अथ वि
२१ नान्न] भान्न इति पुनर्लिखितम् ।
२१ त] विनाशोपरक्तः विनष्ट इत्यर्थः ।
२३ त] नीलानुरक्त ।
२३ त्प्र] रक्तोत्पल प्र
२३ म्] दकम्
२७ *] विशेषणीभावस्यापि ।
२७ स्यापि] भावविनाशाभ्याम् ।
२८ *] सम्बन्धाभावेऽपि उत्पत्तिः ।
२८ सा] स
२८ सा] विशेषणीभावः ।

यः तद्वतः स्युः अविशेषात् । न स कस्यचिद् इत्यपि नोत्तरम्; अध्यक्षेण तदग्रहणप्रसङ्गात्, इन्द्रियेण तदसन्निकर्षात् । सन्निकर्षे वा, स न संयोगः; तत्सम्बन्धस्याऽद्रव्यत्वात् । नापि संयुक्तसमवायादिः; *तत्स्वातन्त्र्यापगमात् । साक्षात् सन्निकर्षे सुखादावपि तथैव इत्यलं तत्र सम्बन्धसम्बन्धकल्पनया । तन्न भावविनाशोप्य विशेषणीभावंध । विरोध इत्येके; सोऽपि न युक्तः; अग्निनेव शीतस्य तेन भावर्त्तनात् न वा *निवर्त्तको धर्मो विरोधी नाम, अतिप्रसङ्गात् । निवर्त्तने वाऽस्य ततो व्यतिरेकप्रसङ्गः पूर्ववद्भवेद् अनवस्था च । अव्यतिरेके विनाशेन क्रियमाणो विनाशः तदव्यतिरिक्तो नान्य इति न युक्तो विभागः । ततः सूक्तम्--**क्रमोपलम्भ** इत्यादि । § 2378

ननु भवतु **क्षणिकस्य उत्पत्तिविनाशयोः तादात्म्यं सिद्धम्** इति, तत्तु न **क्रमोपलम्भनियमात्,** अपि तु सहोपलम्भनियमादिति चेत्; अत्राह--**हेतु** इत्यादि । **हेतुः** कारणम् **फलं** कार्यम् तयोर्यथासंख्येन यौ **विनाशोत्पादौ** तयोः **समानकालोपलम्भाभ्युपगमात्** । तथाहि--यदैव मृत्पिण्डस्य विनाशोपलम्भः तदैव शिवकोपलम्भः न पुनर्हेतुविनाशोत्पादयोः, इतरथा उत्पादविनाशयोः परस्परं विरोधिनोः एकत्र एकदा भावेन बाध्यबाधकभावे न किञ्चित् स्यादिति मन्यते । विनाशः फलात्मया विविक्तता, सा च तस्य उदयकाल एव प्रतीयते इति; तदसत्यम्; यतः तथाभ्युपगमात् । यथैव हि फलकाले हेतोरभावः प्रतीयते तथा हेतुकाले फलस्यापि केवलं नस्त /ms रूपस्य तदभावः । एतदेवाह--**न च** इत्यादिना । **न च** नैव **स्थितिरेव** उत्पत्तिसमयस्थानमेव **भावस्य विनाश[ः] स्वरूपस्य** निवृत्तिः **सहोपलम्भनियमो यतः** स्थितिरेव विनाशात् [शः] स्यात् । **यतः** इति वा आक्षेपे, **यतः सहोपलम्भनियमः** स्यात् । नैव स्यात्, स्थित्या विनाशस्य तेन स्थितेर्बाधनात् । एतदपि कुतः ? इत्यत्राह--**विधि** इत्याह । यदा हेतोः उत्पादस्य तदा विनाशस्य उपलम्भो **विधिः मुखं** प्रधानं यस्य **प्रतिषेधस्य,** न पूर्वं तदुदयस्य पश्चाद् विनाशस्य इत्येवं रूपस्य, स तथोक्तः स एव **फलं** यस्य सोऽपि तथोक्तः । कोऽसौ ? इत्याह--**नियमः । हि** शब्दो यस्मादर्थे । न च विधिरत्रास्ति इति दर्शयन्नाह--**क्षणस्थितेः** इत्यादि । **क्षणस्य** परकल्पितस्य या **स्थितिः** आत्मलाभः तस्याः यौ **प्रत्यक्षानुपलम्भौ** [दर्शना] दर्शने तयोः **एकस्वभावविषयतानुपपत्तेः** एकस्वभावो विषयो ययोः तयोर्भावः तत्ता, तस्या

१ तः] द्रव्यस्य ।
३ त्वात्] द्रव्य-द्रव्ययोरेव संयोगात् ।
३ *] संयुक्तसमवायादिर्हि परतन्त्राणां गुणकर्मजात्यादीनां भवति ।
४ त्र] संयुक्तसमवायरूपः सम्बन्धसम्बन्धः मनःसंयुक्ते आत्मनि सुखादीनां समवायात् ।
५ विनाशोप्य] नाशयो
५ णीभावंध] भावः सम्बन्धः
६ नात्] भावानिवर्तनात् ।
६ *] चाऽ
१६ किञ्चित्] उत्पादेन विनाशस्य तेन वोत्पादस्य बाधनात् न उत्पादो विनाशो वा स्यादित्यर्थः ।
१९ स्त] नष्ट
२० य] मव
२३ इत्याह] दि
२५ स्य] क्रमवर्तिनः ।

457/mkj अनुपपत्तेः । केन विना ? इत्याह--**बहिरपेक्षया** इति । प्रथमक्षणे **प्रत्यक्षं** द्वितीयादौ **अनुपलम्भो बहिरपेक्षया विना,** युगपत् प्रत्यक्षानुपलम्भापेक्षया तदनुपपत्तेः इत्यर्थः । § 2379

स्यान्मतम्--भवतु क्षणस्थितेः प्रत्यक्षानुपलम्भयोः बहिरपेक्षया एकस्वभावविषयतोपपत्तिः, तथा च किं स्यात् ? इत्यत्राह--**तथा च** इत्यादि । **तथा च** तेन च प्रकारेण **हेतुफलविनाशोत्पादयोः ऐक्यं** कथञ्चित्तादात्म्यं **स्याद्** भवेत् **सहोपलम्भनियमात्** । कुतः ? इत्यत्राह— **पूर्वस्य** कारणस्य /ms **वैकल्यम्** अभावः **अपरस्य** फलस्य **कैवल्यम् यतः** अनेन भिन्नमभावं निषेधति । § 2380

ननु हेतोर्निवृत्तिरूपः प्रध्वंसः फलस्य च उत्पादः प्रागसतः कारणादात्मलाभः सत्तास्वभावः, तदनयोः अन्योऽन्यविरुद्धस्वभावयोः कथमैक्यमिति चेत् ? अत्राह--**न च** इत्यादि । **अनयोर्विनाशोत्पादयोः** । किंभूतयोः ? इत्याह--**अन्योऽन्य** इत्यादि । [अन्योऽन्यविरुद्धस्वभावयोः न च] नैव **कथञ्चित्तादात्म्यं विरुद्धम्** तथाप्रतीतेरिति मन्यते । दृष्टान्तमार्हंश्चयेत्यादि । तर्हि हेतुफलयोः विनाशोत्पादयोः ऐक्यं यदि परोऽभ्युपगच्छेत् को दोषः स्यात् ? इत्यत्राह--**जन्म** इत्यादि । फलस्य य**ज्जन्म** हेतोर्यश्च **विनाशः** तयो**रैक्यमुपयन्** अभ्युपगच्छन् सौगतः । केन ? **साहस्थित्याह** स्थित्या [केन ? इत्याह--सहस्थित्या] किं कुर्यात् ? इत्याह--**भावं कथं प्रतिक्षिपेत् ?** किंभूतम् ? **प्रत्यक्षम्** अध्यक्षपरिच्छेद्यम् । पुनरपि किम्भूतम् ? इत्याह— **सुख** इत्यादि । § 2381

ननु सुखदुःखादीनाम् एकसन्ततिपतितानाम् सच्चेतनाऽभेदात् यदि **तद्व्यापिन** मुच्यते तर्हि सन्तानान्तरगतानामपि तदविशेषात् तदुच्यताम् । अथात्र कालादिभेदान्नैवमुच्यते; अन्यत्रापि नोच्यतां तदविशेषादिति चेत्; अत्राह--**कालादि** इत्यादि । अत्र **आदि**शब्देन देशादिपरिग्रहः । चिन्तितमेतत्--**स्वतोऽन्यतो वा स्वपरचेतसाम्** इत्यादिना । न हि साङ्ख्यकल्पितं भावं तद्व्यापिनं कथं प्रतिक्षिपेदिति चेत् ? अत्राह--**स्वलक्षणम्** इत्यादि । स्व आत्मा लक्षणं यस्य स तथोक्तः तमिति । कुतः ? इत्यत्राह--**परस्पर** इत्यादि । **परस्परं व्यावृत्तिः लक्षणं** यस्य तं **यतः** । **प्रत्यक्षम्** इत्येतदत्रापि /ms योज्यम् । वैशेषिकादि सम्बन्धिनं तं कथं प्रतिक्षिपेत् ? इत्यत्राह--**प्रतिक्षणं त्रिलक्षणं** प्रत्यक्षमिति । § 2382

ननु च स्वसंविदां क्रमोपलब्धिनियमः कार्यकारणभावाद् एकसन्तानत्वाद्य न पुनरभेदात्, ततोऽन्यथासिद्धो हेतुः इति किमर्थमुच्यते--**क्रमोपलब्धिनियमात् स्यादभेदः स्वसंविदाम्** इति चेत् ? अत्राह--**कार्यकारणता** इत्यादि । § 2383

---

१० फ] कार्यस्य ।
१४ मार्हं] माह--**निश्चये**
२२ न] **त्व**
२२ त] सत्त्वेन चेतनत्वेन च अभेदात् ।
२२ अथात्र] सन्तानान्तरगतानाम् ।
२५ न] स

...7 कार्यकारणता नास्ति क्षणिकानां क्व सन्ततिः ।
निरन्वयात् कुतस्तेषां सारूप्यमितरार्थवत् ॥ ७

॥§ 2385

सद्रूपसंस्थनादिविवर्त-विचित्रग्राह्यग्राहकाकारैकसाधारणज्ञानानुभवाविरुद्धं पूर्वोत्तरस्वभावभेदात् हेतुफलभूतं भावनैरात्म्यवादी प्रतिक्षिपतीति क्षणिकभावं समक्षमति लङ्घयति । सति क्षणिके कारणे यदि कार्यं स्यात् 458/mkj
तदिदं जगत् क्षणिकमक्रमं निःसन्तानि च स्यात् । तस्मिन्नसति भवतः कुतः पुनः तदनन्तरोत्पत्तिनियमः यतस्तदनिष्टकालोत्पत्तिर्न भवेत् । सदेव तत्समर्थं कारणं स्वसत्ताकालमेव कार्यं प्रसह्य जनयेत् । स्वरसतः कार्योत्पत्तिकालनियमे स्वतन्त्रस्य कुत एव कार्यत्वम् । नैरन्तर्यमात्रात् प्रभवनियमे सर्वत्र सर्वेषामविशेषे कुत एव नियमः । द्रव्यस्य प्रभवनियमे न किञ्चिदतिप्रसज्यते स्वहेतूपादानस्य परप्रत्ययतायाम् । न च निरन्वयानां भावानां सादृश्यात् प्रभवः सन्ततिर्वा व्यवस्थाप्येत तद्विपर्ययेऽपि तथोपलब्धेः । भेदैकान्ते सादृश्यं च यथा यथा विचार्यते तथा तथा विशीर्यते नीलनिर्भासज्ञानवत् ।

§ 2386

**क्षणिकानां** भावानां हेतुफलभावो **नास्ति,** तदभावात् **क्व** बहिरन्तर्वा **सन्ततिः** सन्तानः, तस्य तदात्मकत्वात् । तदभावोऽपि कुतः ? इत्यत्राह--**निरन्वयात्** । क्षणिकानां स्वफलकाले सर्वथा विलयात् । सत्यपि कार्यकारणाभावे पूर्वापरयोः सारूप्यम् एकसन्ततिव्यपदेशनिबन्धनं गत्यन्तराभावात् [स्यात्] तच्च नास्ति इति दर्शयति--**कुतः** कारणात् प्रमाणाद्वा **तेषां** क्षणिकानां **सारूप्यं** समानरूपता । निदर्शनमाह--**इतरार्थानामिव** इति ।

§ 2387

स्यान्मतम्--सकलशून्यतायाः निरंशप्रतिभासाद्वैतस्य चोपगमात् न सौगतानामयं दोष इति चेत्; अत्राह--**सद्रूप** इत्यादि । **भावं प्रतिक्षिपति** इत्ययुक्तम्, तत्प्रतिक्षेपे प्रमाणप्रतिक्षेपायोग इति मन्यते । किंभूतम् ? इत्याह--**समक्षम्** । अनेन तत्प्रतिक्षेपे प्रत्यक्षबाधां दर्शयति । पुनरपि किंभूतम् ? इत्याह--**सद्रूप** इत्यादि । सदिति भावप्रधानोऽयं निर्देशः । तेन सत्त्वं स्वरूपं स्वभावो यस्य **संस्थानादेः,** आदिशब्देन सकलक्रमभाविबाह्यधर्मपरिग्रहः, स तथोक्तः, सद्रूपपदेन संस्थानादे[ः] कल्पितत्वं निषेधति, **स विवर्त्तो** यस्य घटादेः स तथोक्तः । **विचित्रौ** नानाप्रकारौ यौ /ms
**ग्राह्यग्राहककाकारौ** तयोः **एकं** च तत् **साधारणज्ञानं** च तदपि तथोक्तम्, पुनरनयोर्द्वन्द्वः तयो**रनुभवः** तेना**ऽविरुद्धम्** । अनेनापि प्रतिभासाद्वैतमपि

१६ त] सन्तानस्य हेतुफलभावरूपत्वात् ।
१६ त] कार्यकारणभावाभावोऽपि ।
१८ णा] णभावा
२४ योग] येन प्रमाणेन तत्प्रतिक्षेपः क्रियते तस्य भावरूपत्वादिति भावः ।
२७ स्व] रूपम् ।

प्रत्यक्षबाधितं दर्शयति । तत एव क्रमानेकान्तोऽप्यविरुद्ध इति दर्शयन्नाह-- **हेतुफल** इत्यादि । कुत एतत् ? **पूर्वम् उत्तरं** चेति चेत्राह **स्वभावभेदात्** स्वरूपत्वाभावान्नावस्य इति सम्बन्धः । कः प्रतिक्षिपति इत्यादि **भावे**त्यादि । सौगतः इत्यर्थः । § 2388

अथ मतम्--**क्षणिकभावं समक्षमतिलङ्घयति** इत्युक्तम्, * तस्य सकलहेतुफलभावव्यवहारनिबन्धनत्वात् नान्यं विपर्ययात् इति चेत्; अत्राह-- **सतीत्यादि** । **सति** विद्यमाने **क्षणिके** क्षणमात्रावलम्बिनि **कारणे यदि कार्यं स्याद्** उत्पद्येत **तत्** परेणोपगत**मिदं** विचार्यमाणं **जगत्** स्यात् । कथम्भूतं तत् ? इत्याह--**क्षणिक**मिति । किम्भूतं स्यात् ? इत्याह--**अक्रममेव** क्षणप्रतिष्ठं स्यात् इत्यर्थः । तथा च परलो[का]दिसाधनं परस्य स्ववचन-
459/mkj बाधितं भवेदिति मन्यते । पुनरपि किम्भूतं स्यात् ? इत्याह--**निःसन्तानि** सन्तानिनः उपादानोपादेयभूतक्षणाः तेभ्यो निष्क्रान्तं निरस्ते वा येन **तन्निःसन्तानि** सव्येतरगोविषाणवत् । अक्रमाणां हेतुफलभावविरोधात् इति भावः । यदि वा, यत एवाक्रमत एव निःसन्तानि श्रमात्र रहितं भवेत् । पूर्वोत्तरहेतुफलयोरभावे कार्यकारणत्वादव स्यादित्यर्थः । तथापि सत्त्वे न सामान्यादिनिषेधः । एतदुक्तं भवति--स्वोत्पत्तिसमये क्षणिकं कारणं सत्,
/ms तदैव कार्यभावे हेतुफलयोः समसमयता इति । अथवा साम्प्रतिकं कार्यं पूर्वमुत्तरं वा कारणं स्वकाले जनयति, तदपि स्वकारणस्वकाले तदपि स्वकारणं स्वकाले इति उत्पत्तिकालानवस्थितेः अक्रमम् । उपलक्षणमेतत्, तेन असहभावि च स्यादिति । § 2389

अथ मा भूदयं दोष इति कालभूतो हेतुफलयोरिष्यते; तत्राह--**तस्मिन्नसति** इत्यादि । **तस्मिन्** क्षणिके कारणे **असति** अतीते विनाशे, न भाविन्यनुत्पन्नसत्त्वेन, कार्यकाले अविद्यमाने **भवतो** जायमानस्य कार्यस्य **कुतो** निमित्तात् न कुतश्चित् । **पुन**रिति वितर्के **त[दनन्त]रोत्पत्तिनियम[ः]** **तस्य** कार्यस्य **कारणानन्तरोत्पत्तिनियमः** । **तस्य** वा कारणस्य यो**ऽनन्तरः** कालः तत्रो **त्पत्ति नियम** इति । **यतः** तन्नियमा**न्न भवेत्** । किम् ? इत्यादि । **तस्य** कार्यस्य **अनिष्टकालोत्पत्तिः** पूर्वभावि[त्वे]नाभिमतं पश्चात् स्यात्,

---

२ चेत्राह] चेति, हेतुः पूर्वं फलश्चोत्तरमिति
३ स्य] वात् भावस्य
३ इत्यादि] इत्याह--
५ *] इत्ययुक्तम्
५ स्य] क्षणिकस्य ।
१० मेव] मेक
१० तिष्ठं] सति कारणे यदि कार्यं तदा सर्वेषामुत्तरोत्तरकार्यभूतक्षणानां पूर्वपूर्वकारणकाले संक्रमात् एकक्षणमात्रं जगत् ।
१२ स्ते] स्तं
१४ त] मं तत
१४ मात्र] क्षणसन्तान
१५ व] त्वाद्यभावः
१५ त] अर्थक्रियाकारित्वाभावेऽपि ।
१६ सा] नित्य ।
१७ का] पूर्वमुत्तरं वा कारणं साम्प्रतिकं कार्यं स्वकाले पूर्वकाले उत्तरकाले वा जनयति । पूर्वं कारणं भवत्येव । उत्तरं तु भाविकारणापेक्षया उक्तम् ।
१८ स्व] पूर्वत्र उत्तरत्र वा ।
१८ काले] कारणकाले
१९ काले] कारणकाले
२१ भूतो] कालभेदो
२७ इत्यादि] इत्याह

पश्चाद्भावित्वेन वा पूर्वं स्यात्, इति नानुमेयादिव्यवहारो नियतः स्यादिति मन्यते । कारण सति भावतोहेतुकत्वम् अहेतोश्च न देशादिनियमः इति । यदुक्तं स्वयमेव परेण **नित्यं सत्त्वमसत्त्वं वा** प्र॰ वा॰ १ । १८२ इत्यादि । § 2390

स्यादेतत् कालान्तरे स्वयमेव भवतः कार्यस्यायं दोषो न कारणात् भिन्नदेशमिव भिन्नकालमपि कारणं कारणमेव, यथादर्शनं तद्व्यवस्थानात् । दृश्यते च प्रबोधकाले असदपि जाग्रद्विज्ञानं तत्कारणमिति; तत्राह--**सदेव** इत्यादि । **सदेव** नान्तं * **समर्थं** कार्यजननयोग्यं **कारणं** कर्तृ **कार्यंजन-** /ms **येत्** । किं कालम् ? इत्याह--**स्वसत्ताकालमेव** आत्मसत्ताकालमेव **प्रसह्य** हठादिति । अत्रायमभिप्रायो यथा नित्यं यदैव स्वयं समर्थं तदैव प्रसह्य कार्यं जनये[त्] [इ] त्युच्यते तथा क्षणिकमपि । यदि पुनः पूर्वं समर्थमपि क्षणिकं कार्यकालमेव कार्यं जनयेत् तत्स्वभावत्वात्; तथा नित्यमपि । तदुक्तम्--**यद्यदा कार्यमुत्पित्सु** सिद्धिवि॰ ३ । ११ इत्यादि । तन्न युक्तम्--क्षणिकत्वेन कार्यजनकत्वं व्याप्तम् इति, अन्यत्राप्यविशेषात् । अथ स्वकाले समर्थेऽपि कारणे कार्यं स्वभावतः पश्चाज्जायते; तत्राह--**स्वरसतः** इत्यादि । **स्वरसतः** स्वभावतः **कार्यस्य उत्पत्तिकालनियमे** कस्यचिदनन्तरम्, अपरस्य कालान्तरे उत्पत्तिनियमः उत्पत्तिकालनियमः तस्मिन्नङ्गीक्रियमाणे **स्वतन्त्रस्य** स्वप्रधानस्य **कुत एव कार्यत्वं** नित्यपक्षवत् इति मन्यते । परतन्त्रं हि 460/mkj कार्यम्, परस्मिन् समर्थे अवश्यं जायते इति । परस्य तु दर्शनम्—पूर्वमनन्तरं कारणम् अपरं कार्यमिति; तत्राह--**नैरन्तर्ये**त्यादि । कार्यकारणयोः **नैरन्तर्यं** व्यवधानाभावः तन्मात्रात् **प्रभवनियमे** हेतुफलनियमे **कुत एव नियमो** न कुतश्चित् ? कुतः ? इत्याह--**सर्वत्रे**त्यादि । **सर्वत्र** कार्ये अन्यत्र च **सर्वेषां** कारणानाम् इतरेषां च **अविशेषे** निरन्तरत्वसंभवात् **कुत एव नियम** इति । § 2391

ननु सर्वत्र कार्यकारणा भावेऽयं दोषः इति स न भवेत् इति चेत्; अत्राह— **द्रव्यस्य** इत्यादि । **द्रव्यस्य** जीवादेः **प्रभवनियमे** अङ्गीक्रियमाणे **न कश्चिद** *नन्तरमतिप्रसज्यते । किम्भूतस्य ? इत्याह--**स्वहेत्वि**त्यादि । /ms कदा ? इत्याह— **परे**त्यादि । **परो**ऽन्यः **प्रत्ययः** सहकारिकारणं यस्य तस्य भावः तत्ता **तस्याम्** । चर्चितमेतत्-- § 2392

---

१ वा] अभिमतम् ।
२ म्] कारणेऽसति भवतोऽहेतुत्वम्
२ अ] अकारणस्य ।
३ इ] हेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः । इति शेषः ।
५ त्] प्रज्ञाकरः प्राहः ।
५ स्व] कारणमन्तरेण ।
६ णात्] उत्पन्नस्य ।
८ *] तत्
१९ स्य] बौद्धस्य ।
२० रं] अव्यवहितम् ।
२० अ] उत्तरमनन्तरम् ।
२५ णा] ण
२५ स] कार्यकारणभावः ।
२७ *] किञ्चिद

*अनादिनिधनं द्रव्यमुत्पित्सु स्थास्नु नश्वरम् ।
स्वतोऽन्यतो विवर्त्तेत क्रमाद्धेतुफलात्मना ॥ सिद्धिवि॰ ३ ।
१९ इत्यादिना ।§ 2394

स्यादेतत् नानन्तर्यमात्रात् तन्नियमः अपि तु सादृश्यात्, पूर्वं सदृशमुपादानम् इतरद् उपादेयमिति चेत्; अत्राह--नचेत्यादि । [न च] नैव **निरन्वयानाम्** अन्वयरहितानाम् । केषाम् ? **भावानां सादृश्यात्** समानरूपत्वात् **प्रभवः** कार्यकारणभावः **सन्ततिः** सन्तानः, **वे**ति समुच्चये, **व्यवस्थाप्येत** । कुतः ? इत्यत्राह--**तदि**त्यादि । **तद्विपर्ययेऽपि** सादृश्यविपर्ययेऽपि न केवलमविपर्यये **तथा** प्रभवसन्ततिप्रकारेण **उपलब्धेः** भावानाम् इति सम्बन्धः । तथाहि— काष्ठभस्मनोः अनुमान-सुगतज्ञानयोः सादृश्याभावेऽपि तथोपलब्धिरिति । यदि वा, **तद्विपर्ययेऽपि** प्रभवादिविपर्ययेऽपि **तथा** सादृश्यप्रकारेण यमलकादिवद् भावानाम् **उपलब्धेः** इति । सादृश्यमभ्युपगम्य इदमुक्तम्, यावता भेदैकान्ते तदेव नास्ति इति दर्शयन्नाह--**सादृश्यं च** इत्यादि । **सादृश्यं च** शब्दो दूषणसमुच्चये **यथा यथा** येन येन भेदाभेदादिप्रकारेण **विचार्यते तथा तथा विशीर्येत** । क्व ? **भेदैकान्ते** । प्र ज्ञा क र गु प्त स्य च नित्यत्ववत् सादृश्येऽपि कथं प्रमाणवृत्तिः इति चिन्त्यताम् ? यथैव हि /ms मध्यक्षणग्राहिणा प्रत्यक्षेण पूर्वापर क्षणयोरग्रहणे न तद्गतैकत्वस्य ग्रहणं तथा सादृश्यस्यापि । अत्र निदर्शनमाह--**नीले**त्यादि । **नीलो निर्भास** आकारो यस्य तच्च **तज्ज्ञानं** चेति तस्येव **तद्वदि**ति । § 2395

एवं नैरात्म्ये निरस्ते सति यत्सिद्धं तद्दर्शयन्नाह--**प्राप्ते**त्यादि । § 2396

...8 प्राप्तव्यक्तितिरोभावो जीवः सिद्धः प्रतिक्षणम् ।
स स्वापादिप्रबोधात्माऽनादिः संसारमुज्झति ॥ ८
॥§ 2398

द्रव्याश्रयस्य गुणान्तराधानस्य प्रतिषेद्धुमशक्यत्वात् । प्रतिक्षणं व्य- 461/mkj क्तितिरोभावौ समनुभवतः क्रमवृत्तेस्तथैवाऽप्रतिषेधात् । स्वापप्रबोधान्यथानुपपत्तेः अनादिरयम् । सन्तानस्यापि परिणामिनमन्तरेण नियमासंभवात् । परत्वव्यावृत्तेः संसारे निर्वाणे वैकः सिद्धः । § 2399

**जीव** आत्मा **सिद्धो** निश्चितः । किंभूतः ? इत्याह--**प्राप्तौ व्यक्तितिरोभावौ** येन स तथोक्तः । क्व ? **प्रतिक्षणं** क्षणं क्षणं प्रति । तथाहि--सच्चेतनादिरूपेण

---

३ त] कार्यकारणनियमः ।
९ अ] श्रुतमयी भावना परार्थानुमानरूपा चिन्तामयी च भावना स्वार्थानुमानरूपा, ताभ्याम् अनुमानरूपाभ्यां योगिज्ञानं निर्विकल्पकं जायते इत्यर्थः ।
१२ देव] सादृश्यमेव ।
१४ विशीर्येत] र्यते
१६ त] पूर्वापरगतैकस्य ।
१७ सा] पूर्वापरसादृश्यस्यापि न ग्रहणमिति ।

प्राप्तव्यक्तिभावः क्षणक्षयादिरूपेण प्राप्ततिरोभावः । न चैकत्र दृश्येतरस्वभाव-विरोध इति निरूपितम् । § 2400

ननु दृश्याद् यदि अदृश्यं रूपम् अभिन्नम्, दृश्यमेव स्यादिति चेत्; स्यादेव तदेवं * यदि वस्तुसत्तापेक्षाणि ग्रहणानि स्युः यावता पुरुषशक्त्य-पेक्षाणि । पुरुषो [य]दि समर्थः किञ्चित् अत्यन्तमपि भिन्नेन सह गृह्णाति यथा चन्द्रमसा स्वाङ्गुलिम् । विपरीतः पुनरपि भिन्नेनापि सह न गृह्णाति यथा चन्द्रपर्वतयोः संलग्नतादर्शी तद्विवेकेन ताविति । अथ दृश्यस्य अदृश्येन स-हैकत्वे खरविषाणेनापि स्यात्; तर्हि दृश्यस्य नीलाकारस्य ज्ञानस्य दृश्येनापि पीताकारेण एकत्वे सर्वस्य स्यादविशेषात् । एकत्वाभावे सर्वाभाव इत्युक्तम् । अथ यथा कस्यचिन्नीलज्ञानस्य केनचित् पीताकारेण एकत्वं प्रतीयते, नैवं सर्वस्य सर्वेण; तर्हि यथा चन्द्रपर्वतयोः तद्विवोकन नैवं खरविषाणेन इति समानम् । अनुपलब्धि न कथमिति चेत् ? पुरुषान्तरेणोपल-म्भमानेन स्यात्, अन्यथा अनुमानेनापि प्रतीयमानेन क्षणिकत्वेन एकत्वं /ms शब्दादेर्न स्यात्, स्वयं वा पुनरुपलभ्यमानेन । कुतः पश्चाद् उपलभ्यमानं पूर्वोपलब्धस्य रूपमिति चेत् ? तथाप्रतीतेः इति ब्रूमः, अक्रमेणेव क्रमेणापि चित्रैकवस्तुग्रहणप्रसाधनात् । ततः **प्राप्तव्यक्तितिरोभावः** इति युक्तम् । § 2401

ननु यद्यात्मा बोधस्वभावः, सर्वदा तद्रूपत्वात् स्वापाद्यवस्थाभावश्चेत्; अत्राह--**स** जीवः **स्वापादिप्रबोधावात्मानौ यस्य** इति । एवं मन्यते--यथा प्रबोधरूपेऽपि प्रतिबन्धकारणवशात् प्राप्तव्यक्तितिरोभावौ युगपत् तथा क्र-मेणापि स्वापादिप्रबोधात्मेति । यस्तु मन्यते--स्वापादावनुपलम्भात् तदभाव इति; तस्य तत एव सर्वत्र क्षणक्षयाभावः । तदुपलम्भे स्वापादौ जीवोपलम्भः किन्न स्यात् ? अत्र तदभावः; अन्यत्र अनुमानाद्यभावः । § 2402

ननु यथा क्षणिकत्वव्यवस्थापकं सत्त्वादि लिङ्गम्, नैवं तत्र आत्मव्य-वस्थापकं किञ्चित् इति [चेत् ?] प्रबोधः [इति] शिष्मः । नहि चिरव्य-तीते उपादाने जायमाने कार्ये उभयप्रसिद्धमुदाहरणमस्ति । सर्वं सर्वस्य तथाविधम् उपादानम्, चिरविनष्टं चेदुपादानम् । सादृश्यं व कृतोत्तरम् । ततो युक्तम्--**स्वापे**त्यादि । [यदि] पुनरेतन्मतं परस्य गर्भादिमरणपर्यन्त एव जीवः सिद्धो नानाद्यनन्तः प्रमाणाभावात् । न च तेन परलोकवादिनः सिद्धेनापि किञ्चिदिति । तत्राह--**अनादिः** इति । अनन्तश्च उपलक्षणत्वादस्य

---

४ *] स्यादेतदेवं
४ णानि] ज्ञानानि ।
५ किञ्चित्] वस्तु ।
५ भिन्नेन] वस्तुना ।
६ रीतः] असमर्थः ।
११ नैवं] तद्विवेको नैवं
१२ न] ब्धेन
१३ म्भ] लभ्य
१७ त्वात्] बोधरूपत्वात् ।
२१ त] क्षणक्षयो पलम्भे ।
२२ भावः] जीवाभावः ।
२३ त्र] स्वापादौ ।
२४ शिष्मः] ब्रूमः ।
२६ त] चिरविनष्टम् ।
२६ व] च
२७ तं] चार्वाकस्य ।
२९ सिद्धेनापि] किञ्चित् प्रयोजनम् ।

/ms । तथाहि--यद् द्रव्यं तदनाद्यनन्तात्मकं यथा पुद्गलद्रव्यं पृथिव्यादिद्रव्यं [च] 462/mkj जीवः । जीवो **द्रव्यम्** गुण पर्यायात्मकत्वात् तद्वत् । तत्र गुणाः ज्ञानादयः पर्यायाः सुखादयश्चोक्ताः । न च जीवः पृथिव्यादिपर्यायः, तन्निषेधात् । शेषमत्र चिन्तितम् । § 2403

नन्वसौ जीवः संसारस्वभावोऽन्यथा वा भवेत् ? प्रथमपक्षे--निर्वाणप्रहाणम् । द्वितीये संसारापसारः । कदाचित् संसाररूपः अन्यदा अन्यथा इति चेत्; अनित्यत्वमिति तदभावः इति चेत्; अत्राह--**संसारम् उज्झति** इति । **संसारं** गर्भादिसंचरणम् तत्कारणं भाव[कर्मरागादि ।] *द्रव्यकर्म च **उज्झति** त्यजति सामग्रीविशेषवशात् । कथञ्चिदनित्यत्वं च नाऽनिष्टम् अनेकान्तवादिनाम् इति । § 2404

कुत एतत् ? इति चेत्; अत्राह--**द्रव्ये**त्यादि । संसरणलक्षणात् **गुणात्** स्वरूपाद् मोक्षरूपो गुणः **तदन्तर तस्याधानं** सम्यग्दर्शनादिना स्वाधारव्यवस्थापनम्, तस्य **प्रतिषेद्धुमशक्यत्वात्** । किंभूतस्य ? इत्याह--**द्रव्याश्रयस्य** द्रव्यम् आश्रयो यस्य इति । अनेन सौगतनैयायिकादिकल्पितस्य निराश्रयस्य शक्यनिषेधतां दर्शयति । नहि नित्यैकस्वभावः तस्य आत्मा आश्रयो युक्तः । आश्रितस्य ततोऽव्यतिरेके मोक्षसंसारयोरन्यतर एव ऐकान्तिकः । व्यतिरेके न तस्य तौ; असम्बन्धात्, समवायनिषेधात् । तदनिषे[धेऽ]प्यतिप्रसङ्गात्, तस्यापि ततो व्यतिरेकात् । प्रतिषेद्धुमशक्यत्वं च कुतः ? इत्याह--**प्रतिक्षणम्** इत्यादि । क्षणं क्षणं प्रति **व्यक्ति-विरोधाभावौ समनुभवतो** जीवस्य **क्रमवृत्तेः तथैवाऽप्रतिषेधात्** । § 2405

ननु यस्यां प्रतिबोधावस्थायां व्यक्तिः न तस्या तिरोभावः, यस्यां /ms स्वापाद्यवस्थायां तिरोभावो न तस्यां व्यक्तिः, अतो[ऽ]दर्शनात् तत्र तं भाव इति चेत्; अत्राह--**स्वाप** इत्यादि । निरूपितमेतत् । तदनुपपत्तेः किं जातम् ? इत्याह--**अनादिरयं** स्वसंवेदनप्रत्यक्षग्राह्यो जीवः । एवं मन्यते--यथा स्वापादिदशापरिगतः पुनः प्रबुद्धो भवति, प्रबुद्धो वा तद्दशापरिगतः, तथा जीवोऽनादिः । [न जीवोऽनादिः] अपि तु ज्ञानक्षणसन्तानः, तत्रैव बन्धमोक्षव्यवस्थेति चेत्; अत्राह--**सन्तानस्यापि** इत्यादि । सन्तानस्यापि न केवलं बन्धमोक्षयोः[ः] **परिणामिनं भावमन्तरेण नियमासंभवात्** । सर्वः सन्तानः सर्वस्य यस्या तन्नियामकस्य प्रभवादेर्व्यभिचारात्, **संसारे निर्वाणे वा एक[ः] सिद्धः** । § 2406

२ त्] पृथिव्यादिवत् ।
७ भावः] जीवाभावः ।
८ *] पुद्गलात्मकम् ।
९ क] जीवस्य ।
१२ र] रं
१६ त] नित्यद्रव्यादभेदे ।
१७ न्धात्] सम्बन्धाभावात् ।
१८ स्यापि] समवायस्यापि ।
१९ विरोधाभावौ] तिरोभावौ
२१ स्या] स्यां
२३ भाव] तदभावः
२३ त] स्वापप्रबोधान्यथानुपपत्तेः ।
२५ त] स्वापादिदशापरिगतो भवति ।
२९ स्या] स्यात्

तनु योऽसौ संसारनिर्वाणयोरेकः ततस्तयोरव्यतिरेके अभेदः स्यात् । यो हि अभिन्नादभिन्नः सोऽप्यभिन्न एव [यथा] स्वरूपम्, अभिन्नौ च अभिन्नात् संसारमोक्षौ इति चेत्; अत्राह--**परत्वव्यावृते*** । **परत्वं** नानात्वं संसारनिर्वाणयोः ऐकान्तिकं यत् तस्य **व्यावृत्तेः** तत्र **एकः सिद्धः** । *तयोः नैकान्तेन अभेदो भेदो वा; अन्यथा संसारनिर्वाणयोरेकाधिकरणत्वाभावात् अनुपादानं निर्वाणं स्यादिति भावः । § 2407

463/mkj

ननु हेतुफलभूताः क्षणा एव प्रत्यक्षा नात्मा कश्चित् । तेषु एकप्रतीतिस्तु सतो पलम्भेन सदृशापरोत्पत्त्या वा विप्रलम्भेन आरोपितविषया यमलकवत् मायामालकवच्च । ततो चेतत्क्षणे एव परमार्थसन्तः नैकत्वमिति चेत्; अत्राह--**[अ]क्रमम्** इत्यादि । § 2408

...9 अक्रमं कमजन्माद्यैः सदसद्भिर्भात्यविद्यया ।
बहिरन्तर्मुखाकारैः सद्भिस्तत्त्वमिव स्वयम् ॥ ९
॥§ 2410

...10 भेदोऽपि न परमार्थः तद्वदित्यपरे विदुः ।
भेदैकान्तेऽपि न वै कारकज्ञापकस्थितिः ॥ १०
॥§ 2412

नापि बहिरन्तर्वा प्रतिक्षणं परमार्थतो भेदोपलब्धिर्यथा व्यावर्ण्यते, प्रत्यक्षस्य विप्रतिपत्तिविषयत्वात् निर्विषयत्वाच्चानुमानस्य । न वै किञ्चिज्ज्ञानं सन्मात्रतत्त्वं व्यभिचरति भेदेष्वेव व्यभिचारात् । स्वपरसन्तानविकल्पस्य मिथ्यावभासाद् भेदैकान्तेऽपि कुतः सिद्धिः ? व्यापारादिबुद्धेश्च समीहामात्रव्यभिचारे पारम्पर्येणापि क्रियाऽव्यभिचारः किन्न स्यात् यतो बहिरर्थसिद्धिर्न भवेत् ? स्वपरक्रमविकल्पानां सर्वथाऽविद्यात्मकत्वात् सर्वविकल्पातीतं तत्त्वमिति; तदनुपपत्तिः प्रमाणाभावात् भेदैकान्तवत् । § 2413

---

१ नु] ननु
१ योरेकः] संसारनिर्वाणयोः ।
३ अभिन्नात्] जीवात् ।
३ *] त्तेः इति
४ *] संसारनिर्वाणयोः ।
७ तेषु] हेतुफलभूतक्षणेषु ।
८ स] तां पुनरनित्यतां पश्यन्नपि मन्दबुद्धिर्नाध्यवस्यति सत्तोपलम्भेनसर्वदा तद्भावशङ्काविप्रलब्धः सदृशापरोत्पत्तिविप्रलब्धो वा...--प्र० वार्तिकाल० २ । २०८ ।
८ तो] सत्तो
९ मायामा] गो
९ च्च] क्वचित्तदपरिज्ञानं सदृशापरसम्भवात् । भ्रान्तेरपश्यतो भेदं मायागोलकभेदवत् ॥--प्र० वा० २ । १०४ । हेतुबि० टी० पृ० १२० ।
९ णे] चित्तक्षणाः

**सत्** सत्ता भावप्रधा[नत्वा]न्निर्देशस्य । **नाति** प्रतिभासते । किंभूतम् /ms ? इत्याह--**अक्रम** हेतुफलादिक्रमरहितम् । कैः सह भाति ? इत्याह—**असद्भिरविद्यमानैः** । केन कारणेन तथाविधैः तैः तदाभाति ? इत्याह--**अविद्यया** इति । **अविद्यया** मिथ्याज्ञानेन, न पुनर्विद्याया अभावेन तस्य हेतुत्वायोगात् । न्याप्यन्येन; विद्यायाः सत्तालक्षणायाः अन्यस्याभावात् । अवस्तुभूता[या]स्त्वविद्यायाः ततः तत्त्वान्य त्वभ्यामवाच्यत्वादिति । अत्र सौगतप्रसिद्धं निदर्शनमाह--**बहिरि**त्यादि । यथा अर्थे **इव** शब्दः । **तत्त्वं** ज्ञानलक्षणं यथा **बहिरन्तर्मुखाकारैः सद्भिः आभात्यविद्यया** तथा **सत्** । ततोऽभेदवत् **भेदोऽपि न परमार्थ इत्येवमपरे** सौगतादन्ये सत्तैकान्तवादिनो **विदुः** इति । इदं व्याख्यानं सुन्दरं यद्वक्ष्यति वृत्तौ--**नवै किञ्चिज्ज्ञानं सन्मात्रतत्त्वं व्यभिचरति भेदेष्वेव व्यभिचारात्** इति । अथवा यदुक्तम्--***संसारे निर्द्वाणा वैक सिद्धः** इति; तत्सत्यम्; किन्तु स सकलपुरुषपरिणामादिकल्पित[ः] स्यात् । यदुक्तम्--**पुरुष एवेदम्** ऋक्° १० । ९० । २ इत्यादि । **विश्वः सन्मात्रदेहो विविधकृतिरिह द्रव्यमेकं * पदार्थः** । इत्यादि च । यदि वा ब्रह्मैव परमार्थसत् अपरविद्यावशादाभातीति वादिकल्पितः स्यात् । एतदप्युक्तम्-- § 2414
464/mkj

*यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
संभिन्नमिव मात्राभिर्भिन्नाभिरभिमन्यते ॥§ 2416

तथेदममलं ब्रह्म निर्विकल्पमविद्यया ।
/ms कलुषत्वमिवापन्नं भेदरूपं प्रपद्यते ॥ § 2418

बृहदा° भा° वा° ३ । ५ । ४३, ४४ । इति § 2419

दर्शयन्नाह--**अक्रममित्यादि** । **तत्त्वमाभाति इत्यपरे** पुरुषवादिनो **विदुः** । किंभूतम् ? **अक्रमम् स्वयम्** उत्पत्तिविनाशादिवर्जितम् । कैराभाति ? इत्याह--**क्रमजन्माद्यैः** इति । किंभूतैः ? इत्याह--**असद्भिरि**ति । **सद्भिः** इत्यनेनात्र सम्बन्धः । § 2420

ननु यदक्रमं तत्कथं क्रमवदाभाति इति चेत् ? अत्राह--**बहिरि**त्यादि । अस्याऽयमर्थः— यथाऽक्रमं विज्ञानतत्त्वं भेदवादिनः **बहिरन्तर्मुखाकारैः सद्भिराभाति** तथा प्रकृतमपि इति । अनेन **पुरुष** ऋक्° इत्यादि द-

---

१ नाति ] भाति
२ म ] मं
४ त ] ज्ञानाभावस्य ।
७ था ] इवशब्दः यथा इत्यस्यार्थे ।
१० वृत्तौ ] अस्मिन्नेव श्लोके ।
११ * ] पूर्वश्लोके ।
१२ निर्द्वाणा ] निर्वाणे
१२ वैक ] कः
१४ * ] कः
१५ र ] रोऽ

र्शितम् । तथा अक्रमं तत्त्वमाभाति । कैः ? **क्रमजन्मादेः** । किंभूतैः ? इत्याह--**असद्भिरिति** । संभवतो विशेषणविशेष्यभावः इति **अविद्यया** इति विशेषणम् अ[ने]नैव सम्बध्यते न पूर्वेण । **बहिरित्यादि** निदर्शनम् । अविद्यया बहिरन्तः तत्त्वमाभाति इति । § 2421

ननु यदि सत्तामात्रं तत्त्वं कथं कारकादिभेदप्रतीतिः इति चेत् ? अत्राह--**भेदैकान्ते**ऽपीत्यादि । न केवलम् अभेदैकान्ते सत्तैकान्ते किन्तु **भेदैकान्ते**ऽपि कार्यकारणभावनिषेधात् **कार [काणां]** कर्त्रादीनां **ज्ञापकानां** प्रत्यक्षादीनां **स्थितिः नवै** नैव **परमार्थतः** किन्तु कल्पनातः । कल्पना च अन्यत्रापि । § 2422

ननु भेदैकान्तस्य प्रमाणविषयत्वात् तत्र तत्स्थितिः परमार्थत इति चेत्; अत्राह--**प्रतिक्षणम्** इत्यादि । क्षणं क्षणं प्रति **नापि भेदोपलब्धिः** । क्व ? इत्याह--**बहिरन्तर्वा** । कथं नास्ति ? इत्याह--**यथा** येन क्षणिकैकपरमाण्वाकारप्रकारेण **व्यावर्ण्यते** सौगतैः भेदोपलब्धिः तेन प्रकारेण । कुत एतत् ? इत्यत्राह--**प्रत्यक्षस्य** इत्यादि । **प्रत्यक्षस्य** परकल्पितकल्प- /ms
नापोढाभ्रान्तज्ञानस्य **विप्रतिपत्तिविषयत्वाद्** विवादगोचरत्वात् । नहि तद् वादिप्रतिवादिनोः अविगानेन प्रसिद्धम्, येन ततः किञ्चित् सिद्धं चेत् अविवादं स्यादिति न सौगतेन तदेकान्ते साधनं वाच्यम् । न चान्यकल्पनया सिद्धं नाम कस्यचित् साधनं वा अन्यथा बुद्धिचैतन्ययोर्भेदसिद्धिरेवं किन्न स्यात् ? § 2423

स्यान्मतम्--मा भूत् एकैकपरमाणुनिष्ठस्य प्रत्यक्षसिद्धिः ततो वा वस्तुनः; व्यवहारात्तु परस्य स्यात्, ततो भेदोपलब्धिरपि स्यादिति चेत्; अत्राह--**प्रत्यक्षस्य विरुद्धा** विचित्रा वा **प्रतिपत्तिः** अनेकान्तप्रतिपत्तिः **तद्विषयत्वात्** । नापि भेदोपलब्धिः यथा व्यावर्ण्यत इति । मा भूत् प्रत्यक्षात्तदुपलब्धिः अनुमानात् स्यादिति चेत्; अत्राह--**निर्विषयत्वाच्च अनुमान स्येति** 465/mkj
। सामान्यविषय[मनु]मानम् **अन्यत् सामान्यं सोऽनुमानस्य विषयः** न्यायबि० १ । १६, १७ इति वचनात् । सामान्यं च परस्य न किञ्चित्, ततो मरीचिकाजलज्ञानवत् नातो वस्तुसिद्धिरिति भाविभक्तिपरिणामेन सम्बन्धः । एतदुक्तं भवति--यदि प्रत्यक्षं पूर्वं पश्चाच्च भेदैकान्तविषयं स्यात् युक्तमेतत्--तत उत्पत्तेः तदव्यभिचाराच्च तत्रानुमानं प्रमाणमिति, न चैवमिति । § 2424

यत्पुनरेतत् परस्य मतम्--यद्यपि बहिरन्तश्च भेदवदभेदस्यापि प्रतिभासः तथापि भेद एव पारमार्थिकोऽव्यभिचारात् नभेदो विपर्ययादिति; तत्राह-

---

५ का] कारकक्रियादीनां भेदप्रतीतिः ।
१० त] कारकज्ञापकस्थितिः ।
१४ क] प्रत्यक्षं कल्पनापोढमभ्रान्तमिति--न्यायबि० १ । ४ ।
१७ त] क्षणिकैकान्ते ।
१८ बु] सांख्यमतीय ।
२६ स्य] बौद्धस्य ।
२७ नातो] अनुमानात् ।
२७ भा] भा इति तृतीयाविभक्तिः ।
३१ स्य] बौद्धस्य ।
३२ न] ना

/ms **-न वै किञ्चिदि** [त्यादि] **नवै** नैव **किञ्चित्** प्रत्यक्षम् अन्यद्वा **ज्ञानम् तन्मात्रतत्त्वं व्यभिचरति** । क्व तर्हि तस्य व्यभिचारः ? इत्याह--**भेदेष्वेव व्यभिचारात्** ज्ञानस्येति । तथाहि--द्विचन्द्रादिज्ञानं द्वित्वं व्यभिचरति । ततो भेदवदभेदस्यापि न वा कस्यचित् सिद्धिरिति । § 2425

ननु सत्तामात्रं चेत् तत्त्वम्; तर्हि प्रतिपाद्यप्रतिपादकभेदविरहात् कुतः कः तत्त्वं प्रतिपाद्यत इति चेत् ? अत्राह--**स्वेत्यादि** । **स्वो** वादी **परः** प्रतिवादी तयोः **सन्तानौ** तयो**र्विकल्पस्या** व्य वसायस्य भेदस्य वा **मिथ्यावभासाद् भेदैकान्तेऽपि कुतः सिद्धिः** भेदैकान्तस्येति । तथाहि— स्वसन्तानप्रत्यक्षस्य विप्रतिपत्तिविषयत्वात्, अनुमानस्य निर्विषयत्वात्, परसन्तानविषयस्य स्वप्ने तदभावेऽपि व्यापारादिलिङ्गभावादिति भावः । अथ जाग्रद्दशायां परचेतसो व्याहारादिः साक्षात्, स्वप्ने परम्परया, ततो न व्यभिचार इति; अत्राह--**व्यापार** इत्यादि । **व्यापारादिबुद्धेश्च समीहा** चेष्टा सैव **तन्मात्रम् तत्राव्यभिचारे** अङ्गीक्रियमाणे । केन प्रकारेण ? इत्याह— **पारम्पर्येणापि** । **अपि** शब्दात् साक्षात् तदव्यभिचारे इति ग्राह्यम्, **क्रियाऽव्यभिचारः क्रिया** व्यापारव्याहारात्मिका इह गृह्यते, क्रियाग्रहणम् उपलक्षणं तेन घटादेरपि ग्रहणम्, **तदव्यभिचारः किन्न स्यात्** ? स्यादेव **तद्बुद्धेः** इति सम्बन्धः, **यतोऽव्यभिचारस्या** भवनाद्, **बहिरर्थसिद्धिर्न भवेत्** । एवं मन्यते--यथा स्वप्ने अर्थरूपक्रियाविरहेऽपि तदवभासदर्शनात् अन्यदापि तद्विरहेऽपि तदवभास /ms इति नार्थसिद्धिः तथा स्वप्ने परम समीहा[ऽ]भावेऽपि व्यापारव्याहारनिर्भासबुद्धेर्भावाद् अन्यत्रापि तदभावेऽपि तद्भाव इति न सन्तानान्तरसिद्धिः इति । § 2426

एतेन स्वप्रान्तिकशरीरमवितथं कल्पयन् विनिवारितो द्रष्टव्यः बहिरर्थाऽनिराकरणात् । § 2427

अत्र प्र ज्ञा क र मतमाशङ्कते दूषयितुं **स्वपरेत्या**[दि] । **सर्वविकल्पातीतं तत्त्वम्** इति । कुतः ? इत्यत्राह--**सर्वथा[ऽ]विद्यात्मकत्वात्** । कस्य ? इत्याह--**स्वेत्यादि** । **स्व स्व [श्च] परश्च** क्ष *मश्च हेतुफ[ल]भावः तेषां **विकल्पो** व्यवसायः । अनेन तेषां प्रत्यक्षविषयतां दर्शयतां दर्शयति तस्य । 466/mkj अत्र दूषणमाह--**प्रमाणाऽभावाद्** इत्यादि । तस्य सर्व विकल्पातीतस्[य] तत्त्वस्य **अनुपपत्तिः तदनुपपत्तिः** । कुतः ? **प्रमाणाभावात्** । तथाहि--न तत्र प्रत्यक्षं प्रमाणम्, अनेकान्तात्मकसुखादिघटादिव्यतिरेकेण तदनुपलब्धिः । न च धर्मधर्मिविकल्पाभावे अनुमानं विकल्पेतरस्वरूपाभावे च । अत्र

७ व्य] ध्य
९ स्य] अनुमानस्य ।
१० भावेऽपि] परसन्तानाभावेऽपि ।
१७ स्या] स्य
१८ दापि] जाग्रद्दशायामपि ।
१८ हेऽपि] अर्थक्रियाविरहेऽपि ।
१९ म] पर
२० त्रापि] जाग्रद्दशायामपि ।
२० भावेऽपि] सन्तानान्तराभावेऽपि ।
२० द्भाव] व्यापारव्याहारादिसद्भावः ।
२२ न्] प्रज्ञाकरः ।
२६ *] क्र
२७ तां] ता सत्तां
३१ ब्धिः] ब्धेः

निदर्शनमाह--**भेदवदिति** । नीलादिसुखादिनानात्वस्येव **तद्वद्** इति । एतेन प्रथमार्थेन कारिका व्याख्याता । § 2428

इदमपरं व्याख्यानम्--**भेदैकान्तेऽपि** इत्यादेः । न केवलमभेदैकान्ते अपि तु **भेदैकान्तेऽपि कारकज्ञापकस्थितिः न वै** नैव **परमार्थतः** किन्तु पुरुषपरिणामपक्ष इति भावः । अनेन **अक्रमं क्रमजन्मादेः सद्भिराभाति** इति व्याख्यातम् । कुत एतदिति चेत् ? अत्राह--**प्रतिक्षण**मित्यादि । सुगमम् । एतदपि कुतः ? इत्याह--**प्रत्यक्षस्य** इत्यादि । स्वसंवेदनाध्यक्षस्य ग्राह्यग्राहकसंवित्तिभेदरूपस्य **विप्रतिपत्तिविषयत्वात्,** इन्द्रियप्रत्यक्षस्यापि /ms
अनेकावयवरूपाद्यात्मकधाति पत्तिविषयत्वात्, **निर्विषयत्वाच्च** मिथ्याविकल्पवासनोपकल्पितस्वांशमात्रविषयत्वाद्वाऽ**नुमानस्य कुतः** प्रत्यक्षादनुमानाद्वा **भेदैकान्तस्य सिद्धिः** परिणामस्यैव स्यादिति मन्यते । § 2429

अनेन **बहिरन्तराभाति तत्त्व**मिवेति निगदितम् । **न वै** न खलु । किम् ? **विज्ञानं सन्मात्रतत्त्वं** संवेदनं मात्र तत्त्वं सदनं [सत्]संवेदनमित्यर्थः । सदि गत्यर्थस्या वेदनार्थत्वात् । **व्यभिचरति सर्वेषाम्** आत्मनाम् संवेदनापेक्षया **एकात्मकत्वाद्** एक एवात्मा परमार्थसन्नित्यर्थः । क्व तर्हि व्यभिचारः ? इत्याह--**भेदेष्वेव** सुखादिष्वेव **व्यभिचारात्** ज्ञानस्येति । § 2430

ननु स्वपरसन्तानभेदात् कथं पुरुषमात्रमिति चेत् ? अत्राह--**स्वपरे**त्यादि । अनेन **अक्रमं क्रमजन्मादेरसद्भिरविद्यया भाति** इति व्याख्यातम् । उपसंहारमाह--**स्वपरे**त्यादि । **सर्वविकल्पातीतं** सर्वभेदरहितं **तत्त्वं** पुरुषस्वरूपम् । **इति** शब्दः पूर्वपक्षसमाप्त्यवचो [र्त्तौ । अत्रोत्त]रमाह--**प्रमाणाभावात्** इत्यादि । तस्यात्मनः सकलपरिणामात्मतोपपत्तिः । कस्य चे [कस्येव ? इ]त्याह--**भेदवद्** इति । सर्वस्य सर्वतो व्यावृत्ति [ः] **भेदः** [तस्य एकान्तः] तस्येव तद्वद् इति । कुतः ? इत्याह--**प्रमाणाभावात्** सर्व पुरुषस्यैकस्य परिणामः इत्यत्र प्रत्यक्षस्य प्रमाणस्याभावात् । नहि यथा एकसन्तानपतितेषु सुखादिषु अहमहमिकया अस्खलदेकत्वप्रत्ययविषयत्वं तथा सर्वस्य तनोत्तसुर सुखादिषु घटादिषु च । योऽपि तत्र यच्चेत वीति प्र- /ms
तीतिः सोऽपि समानपरिणामविषया, नैकत्वविषया, तत्तथाननुभवनात् । न चान्यप्रतीतेः अन्यविषयसिद्धिः, अन्य[था]नीलप्रतीतेः पीतसिद्धिः स्यात् । ततः प्रत्यक्षस्य अत्राभावः, तदभावादनुमानस्यापि तत्पूर्वकत्वादस्य । न चैकात्मपरिणामित्वमन्तरेण जगतः किञ्चिदनुपपन्नं यतः तत्परिकल्पनं स्यात्

९ धाति] कस्य विप्रति
१३ मात्र] दनमात्रं
१३ स] सदनं गमनमित्यर्थः ।
१४ दि] सदे
१४ स्या] स्य
२२ द्] भेदैकान्तवत्
२३ र्व] र्वं
२६ सुर] सर्वसन्तानान्तर
२६ योऽपि] यापि
२६ त्र] पटादिषु सुखादिषु च ।
२६ वीति] सच्चेतनादिना एकत्व
२७ सोऽपि] सापि
२९ स्य] अनुमानस्य ।

। सर्वस्य स्वसामग्रीतः एव भावात् । स्वपर-दातृगृहीतृ-बध्यबधकादिव्यवहारोऽप्यत्र दुर्घटः । तन्न अनुमानात् [तत्सिद्धिः ।] § 2431
१ 467/mkj

ननु **प्रमाणाभावात्** इत्यसिद्धम्, **पुरुष एवेदम्** ऋक्० १० । ९० । २ इत्यादि आगमस्य भावादिति चेत्; न; अस्य अध्यक्षबाधितत्वेन अनागमत्वात् पि ट क त्र या दिवत्, तदन्तरसद्भावाच्च । यदि वा, तस्यामलस्य निर्विकल्पस्य ब्रह्मणा[णो]ऽनुपपत्तिः **तदनुपपत्तिः** । कस्येव ? इत्याह-- **भेदैकान्तवद्** इति । भिद्यते अन्यस्मात् सर्वतः इति भेदा [दः] निरंशज्ञानं तस्येव तद्वद् इति । कुतः ? **प्रमाणाभावात्** । तदभावोऽपि **प्रत्यक्षस्य विप्रतिपत्तिविषयत्वात्** चेतनेतरभेदविषयत्वात्, **निर्विषयत्वाच्च अनुमानस्य** । तत्रापीदं वक्तव्यम्--कुतः सिद्धिः अभेदैकान्तस्य इति ? आगमोऽपि यदि ततोऽनन्यः; तद्वदसिद्धिः । न च तदेव प्रतिपाद्यं प्रतिपादकं च, विरोधात् । आगमप्रतिपत्तिरेव वा अस्मिन् दर्शने तत्प्रतीतिः इति कस्तत्र आगमस्योपयोगः ? § 2432

किंच, आगमाद् ब्रह्म वा तत्स्वरूपं प्रतिपद्येत, अन्यो वा ? प्रथमपक्षे--
§ 2433

...1 स्ववित्तिरहितं ब्रह्म यदि वेत्ति, ततः कथम् ।
आत्मानं घटवत् पूर्वमिति सर्वं निरूपितम् ॥ १ ॥§ 2435

/ms ...2 विद्याऽविद्याविभागोऽयं निक्षिप्तोऽवि त्तिक्त एकोके ।
नेत्याहो ध्रियते तस्मान्मानत्राणविवर्जितः ॥ २ ॥§ 2437

...3 तस्यात्मवेदनं नित्यं तच्चेत् प्रागपि विद्यते ।
आगमादस्य वैफल्यं सिद्धस्यास्तु क्रिया कुतः ॥ ३ ॥§ 2439

...4 आगमेन कृतत्वेऽस्य कथं नित्यत्वमुच्यताम् ।
तदनित्यत्वतः प्राप्तमात्मनोऽपि तदेव तु ॥ ४ ॥§ 2441

...5 अविकल्पात्मसंवित्तेरन्या चेदागमाद् भवेत् ।

१. सद्गमने धातोः ।

२ त्र] एकात्मपरिणामस्वीकारे ।
४ अस्य] आगमस्य ।
५ त] भेदसाधक-आगमान्तरसद्भावाच्च ।
११ त] ब्रह्मणः ।
११ सिद्धिः] द्धेः
१२ अस्मिन्] अभेदवादे ।
१२ तीतिः] ब्रह्मप्रतीतिः तयोरभेदात् ।
१४ त] अभेदस्वरूपम् ।
१८ एकोके] ऽविविक्तके
१९ नेत्याहो] नेत्यपो
२२ त्वेऽस्य] आत्मवेदनस्य ।
२३ नोऽपि] अभेदात् ।
२४ संवित्ते] त्ति

आत्मभूतैव तस्येह ध्रुवता कथमुच्यते ॥ ५ ॥§ 2443

...6 न चान्ययात्मसंवित्तिशून्यया वेत्ति कश्चन ।
आत्मानमन्यथा प्राप्तम् आत्मवैफल्यमञ्जसा ॥ ६ ॥§ 2445

...7 तन्न वेत्त्यात्मना रूप स्वसं  ब्रह्म ततः पुनः ।
अन्येन वेदने तस्य तदद्वैतं कथं भवेत् ॥ ७ ॥§ 2447

...8 अविद्यानिर्मितोऽन्यश्च स कथं प्रतिपद्यताम् ।
ब्रह्मरूपं जलभ्रान्तेः पिपासानाशकं न हि ॥ ८ ॥§ 2449

...9 अन्योऽपि वेत्तिमात्मानं  यदि सोऽस्तु कथं हि सन् ।
अन्येन वेदने तस्य वार्यते नानवस्थितिः ॥ ९ ॥§ 2451

...10 अन्यस्यापि ततोऽन्येन यस्मात् वित्तिपरिग्रहः ।
ब्रह्मवद् वित्तिसद्भावः तस्य स्यात् स्वयमेव चेत् ॥ १० ॥§ 2453
468/mkj

...11 अविद्यानिर्मितत्वेऽस्य का वार्त्ता वत भण्यताम् ।
ब्रह्मणा वेदनं तस्य यदि भण्येत भावतः ॥ ११ ॥§ 2455

विद्येतरात्मता प्राप्ता ब्रह्मणि स्वात्मवेदने ।§ 2456
तन्न कस्यचित् ब्रह्मप्रतिपत्तिः । तन्न युक्तम्-- § 2457

*अनि न्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥ वाक्यप॰ १ ।
३८ इति ।§ 2459
कस्यचिद् दृष्टेरेवाभावादिति । § 2460

आगमस्य ततोऽन्यत्वे तदद्वैतं कथं मतम् ।
तेनास्य वेदने  प्राप्तो ग्राह्यग्राहकतानयः ॥§ 2462 /ms

अवेदने कथं सिद्धिरागमस्यास्तु तत्त्वतः ।
अविद्यैव मतः सोऽपि त्वया चेदागमः कथम् ॥§ 2464

४ सं ] पं स्वं सद्
८ वेत्तिमात्मानं ] चेत्तमात्मानं
१६ अनि ] अती

ततस्तत्त्वं प्रतीयेत स वा केन प्रतीयताम् ।
अप्रतीता तथा वाच्या अन्यत्वेनेतरेण वा ॥§ 2466

अविद्या कथमुच्येत विद्यायाः पण्डितैः स्वयम् । इति ।§ 2467

ततः स्थितम्--**प्रमाणाऽभावात्** इत्यादि । § 2468

इतश्च नैकान्ततो भेदोऽभेदो वाऽर्थानामिति दर्शयन्नाह--**भेदा[भेदा]त्मक** इत्यादि । § 2469

...11 भेदोऽभेदात्मकोऽर्थानामन्यथानुपपत्तितः ।
भेदात्मकस्तथाऽभेदः तत्त्वं नैकान्ततस्ततः ॥ ११
॥§ 2471

लोकस्य मार्गप्रतिपत्तेः प्रमाणं अन्धयष्टिकल्पम् । तदविद्यात्मकं चेत् केनायं प्रतिपक्षमन्धायति ? समारोपव्यवच्छेदस्यापि तत्त्वाप्रतिपत्त्यात्मकत्वात् कुतस्तत्त्वं प्रतिपद्येत ? यदिमौ नान्योन्यमतिशयाते यतः परमार्थसत्त्वाभावः प्रतीयते । तन्न यथादर्शनमेवेयं मानमेयफलस्थितिः अपि तु परमार्थतः, परमार्थाभ्युपगमान्यथानुपपत्तेः अव्यवस्थाप्रसङ्गादिति । भेदैकान्ते संविदितस्य असंविदिताकारासंभवे भ्रान्तिरेव न क्वचित् स्यात् । संवेदनस्य कंचनाकारंसंवृण्वतो विभ्रमस्यैवायोगात् व्यक्ताकारत्ववत् । § 2472

प्रस्तावाद् **अर्थानाम्** एकसन्तानसुखादीनाम् न सन्तानान्तराणां तत्र [अ]भेदाऽनभ्युपगमात् । **भेदो** नानात्वम् । स किम् ? इत्याह-- **अभेदात्मकः** कथञ्चिदेकत्वस्वभाव इत्यर्थः । कुतः ? इत्याह--**अन्यथानुपपत्तितः** इति । **अन्यथा** अन्येन भेदस्याऽभेदात्मत्वाभावप्रकारेण **अनुपपत्तितः**
469/mkj **भेदस्य अर्थानाम्** इति वा योज्यम् । यथैव हि तेषां भेदाऽभावे नार्थक्रियादयः तथा [अ]भेदाऽभावेऽपि । **भेदात्मकः तथा** तेन अन्यथानुपपत्तिप्रकारेण **अभेदः तत्त्वमने कान्ततः ततः** । § 2473

ननु सर्वस्य ग्राह्यस्य तैमिरिककेशादिवदसत्त्वात् **अर्थानाम्** इत्ययुक्तमिति चेत्; अत्राह--**प्रमाणम्** इत्यादि । **प्रमाणं** प्रत्यक्षादि **अन्धयष्टिकल्पम्** । कस्य सम्बन्धि ? इत्याह— **मार्गप्रतिपत्तेः** यो येनाभ्युपगतो मोक्षोपायः स तस्य मार्ग इष्यते । [अभ्युपगता] च सौगतेन प्रमेयासत्यता निर्वाणोपायः,

---

१ त] आगमात् ।
१ स] आगमः ।
२ अ] भिन्नत्वेन अभिन्नत्वेन वा ।
१२ था] यथानुदर्शनञ्चेयं मानमेयफलस्थितिः । क्रियतेऽविद्यमानापि ग्राह्यग्राहकसंविदाम् ॥--प्र° वा° २ । ३५७ ।
१५ नाकारं] रम
१६ प्र] प्रकरणात् ।
१६ राणां] सन्तानान्तरगतसुखादीनाम् अभेदो नास्ति इत्यर्थः ।
२२ ने] त्वं नै
२३ न] विज्ञानवादी प्राह ।

ततः सैव तस्य **मार्गः**, तस्य **प्रतिपत्तेः** । न हि सा प्रमाणतामन्तरेण सिध्यति विषयवत् । कस्य स त्तथाभूतम् ? इत्याह--**लोकस्य** तथागतजनस्य । ततः किम् ? इत्याह--**तच्चेद्** इत्यादि । **तत्** प्रमाणं **चेद्** यदि **अविद्यात्मकं** /ms स्वरूपेऽपि च भ्रान्तम् । एवं मन्यते--स्वप्ने घटादेरविद्यात्मकत्वदर्शनात् अन्यदापि परेण तस्य तत्त्वमिष्यते, तदुभयत्र तत्त्वदर्शनात् प्रमाणस्यापि तदिष्यताम् इति **केन** हेतुना **अयं** सौगतलोकः **प्रतिपक्षं** सकलस्य परमार्थसत्त्वे मन्धामति । न् । ते  न केनचिद् इत्यर्थः । परमार्थप्रमाणाभावे प्रतिपक्षवस्त्व पक्षस्याप्यसिद्धेः इति । § 2474

ननु न सौगतः कस्यचित् केनचित् तत्त्वतोऽसत्त्वं साधयति येनाऽयं दोषः, किन्तु परमार्थसत्त्वाभावे यदारोपितं बहिरन्तर्वा परेण तत्सत्त्वं तदेव अनुमानेन अविद्यात्मनापि निराक्रियते इति चेत्; अत्राह--**समारोप** इत्यादि । परमार्थसत्त्वरहितेऽपि परमार्थसत्त्वज्ञानं **समारोपः** तस्य **व्यवच्छेदो** निरासः तदनुमानं वा तस्यापि न केवलं प्रत्यक्षस्य **तत्त्वाप्रतिपत्त्यात्मकत्वात्** । **तत्त्वम्** अविद्यात्मकत्वं तस्याऽप्रतिपत्तिः तदा**त्मकत्वात्** । यथैव हि प्रत्यक्षात् तथा तद्व्यवच्छेदादपि न तत्त्वप्रतिपत्तिरिति । [न] ततोऽपि तत्प्रतीतिरिति चेत्; अत्राह--**कुत** इत्यादि । **तत्त्वं** मिथ्यात्वं **प्रतिपद्येत** विभ्रमाऽसिद्धेः इति भावः । **यद्** यस्मात् तत्त्वप्रतिपत्तिरूपा**दियौ** * विचार्यमाणौ भेदाऽभेदैकान्तौ द्रव्यपर्यायैकान्तौ **न अन्योन्यमतिशयते यतः परमार्थसत्त्वाभावः प्रतीयते** ।
§ 2475

तदस्ति  स्वसंवेदनाध्यक्षं परमार्थत इति चेत्; अत्राह--**तन्न** इत्यादि । **तत्** तस्मात् सर्वविकल्पाभावप्रतीतिरूपात् स्वसंवेदनात्  **न *यथादर्शनमेवेयं मानमेयफलस्थितिः** । प्र० वा० २ । ३५७ कथं तर्हि सा ? /ms इत्याह--**अपि तु** किन्तु **परमार्थतः** । कुतः ? इत्यत्राह--**परमार्थे**त्यादि । **परमार्थस्य** सकलविभ्रमादिस्वभावस्य योऽभ्युपगमः **तस्य अन्यथा** अन्येन तत्त्वतो मानमेयस्थित्यभावप्रकारेण **अनुपपत्तेः** हेतोः तत्त्वतः *सा इति सम्बन्धः । § 2476

ननु तदभ्युपगमश्च स्यान्न च तत्त्वतः तत्स्थितिः; इत्याह--**अव्यवस्थाप्रसङ्गादिति** । विभ्रमादिकमेवास्ति न नित्यत्वादिकम् इत्यभ्युपगमस्य या **व्यवस्था** तदभावोऽ**व्यवस्था** तस्याः **प्रसङ्गात्** तत्त्वतः तत्स्थितिः इति । अनेन **अर्थानाम्** इति समर्थितम् । § 2477

---

१ सैव] प्रमेयासत्यता ।
२ स] त
४ अ] जाग्रदवस्थायामपि ।
५ त] अविद्यात्मकत्वम् ।
५ त] अविद्यात्मकत्व ।
५ त] अविद्यात्मकत्वम् ।
७ ते] सत्त्वम् **अन्धायति[[प्रतिपक्षम् अन्धकल्पितमिव ब्रूते ।]]**
८ स्व] वत् स्व
१० रेण] बाह्यार्थवादिना ।
१५ त] समारोपव्यवच्छेदरूपादनुमानादपि ।
१७ *] दिमौ
१८ य] या
२० स्ति] नन्वस्ति
२१ *] दर्शनानुसारेण व्यवहारेणेत्यर्थः ।
२५ *] मानमेयफलस्थितिः ।
२७ नु] सकलविभ्रमाभ्युपगमश्च ।
२७ तः] मानमेयफलस्थितिः ।

470/mkj

ननु भवतु अर्था बहिरन्तश्च, तथापि तेषां भेदात्मकोऽभेदो [अभेदो] वा भेदात्मकः कुतः, विरोधादिति चेत् ? अत्राह--**भेद** इत्यादि । **भेदैकान्ते संविदितस्य** चेतनस्य इतरस्य वा ज्ञानेन विषयीकृतस्य वस्तुनः **असंविदितः** तदेव तेनैव ज्ञानेन [अ]विषयीकृतो य **आकारः** क्षणिककार्यजनन-सामर्थ्यविषयाकारविवेकादिलक्षणः तस्या**ऽसंभवे** तस्य सर्वात्मना संवेद-नाङ्गीकरणे इत्यर्थः, **भ्रान्तिरेवे न क्वचिद्** बहिरन्तर्वा याद भ्रान्तिः सर्वत्र **स्यात्** इत्येवकारार्थः । तथा **भेदैकान्ते संविदितस्य** [चेतनस्य इतरस्य] वा सचेतनादिरूपेण **असंविदितस्या**विद्याविवेक**रूपस्याऽसंभवे भ्रान्तिरेव न क्वचित् स्यात्** । कुत एतत् ? इत्यत्राह--**संवेदनस्य** इत्यादि । **संवेदनस्य** स्वपरगोचरज्ञानस्य **कंचन आकारं** क्षणि[क]त्वादिकं रूपं **संवृण्वतो**
/ms **विभ्रमस्यैवाऽयोगात्** । अत्र निदर्शनमाह--**व्यक्ताकारत्व वदिति** । तथा च प्रयोगः--यस्य यो विषयोऽसंवृतः तस्य न तत्र भ्रान्तिः, यथा विवक्षितसंवेद-नस्य सचेतनाद्याकारे, असंवृतश्च ज्ञानस्य सुखादर्विवादास्पदीभूत आकार इति नानुमानं भ्रान्तिव्यवच्छेदफलं नाम । इष्यते च परेण भ्रान्तिः, ततो मन्यामहे--संविदिताकार इति । अनेन **भेदोऽभेदात्मक** इत्यादि समर्थितम् । § 2478

ननु भवन्मतेऽपि यथावस्थिताशेषपदार्थग्रहणस्वभावस्य जीवस्य कथं भ्रान्त संभव इति चेत् ? अत्राह--**जीवस्य** इत्यादि । § 2479

...12 जीवस्य संविदो भ्रान्तिनिमित्तं मदिरादिवत् ।
तत्कर्मागन्तुकं तस्य प्रपञ्चोऽनादिरिष्यते ॥ १२ ॥§ 2481

ज्ञानस्वभावो जीवः चेतनस्यापरिणामिनः अचेतनस्याऽपरिणामिनः जीव-स्य निषेधात् नैरात्म्यासिद्धेश्च तदन्यथात्वं द्रव्यान्तरसम्बन्धात् मदादिवत् । य-दि पुनः कर्मणामेव कर्तृत्वभोक्तृत्वप्रबन्धोऽनादिः; निरात्मकादयन्न विशिष्येत, स्वभावान्तरानवधारणात् क्षणक्षयादिवत् । आत्मनस्तथापरिणाममन्तरेण प्रय-त्नसुखदुःखादिदर्शनबुद्धीनां समवायिकारणतानुपपत्तेः अनुपयोगादिति । चेत-नस्य तदेव कर्म साक्षात् संसारनिमित्तं न पुनः प्रयत्नसधर्मा जीवपरिणामः । द्रव्यान्तरसम्बन्धोदयोदीरणादिवशात् मिथ्यादर्शनादिविकारदर्शनात्, तत्प-रिक्षयान्मोक्षः । ईश्वरादिकं कल्पयतापि अतिप्रसङ्गात् । तस्यापि ईश्वरः

१ तु] न्तु
४ क] कत्व
६ भ्रान्तिरेवे] रेव
६ याद] स्याद
१३ सुखाद] दे
१७ भ] जैनमतेऽपि ।
१८ भ्रान्त] भ्रान्ति
२० ते] उद्धृतोऽयम्--न्यायवि॰ वि॰ प्र॰ पृ॰ १७९ । प्र॰ नि॰ पृ॰ ७१ ।

संसारनिमित्तं स्यात् जीवाविशेषात् । यथाकर्मसम्बन्धं विपर्यये वा प्रवर्तने पारमैश्वर्यानुपपत्तिः । § 2482

**जीवस्य** आत्माऽपरनामकस्य । किंभूतस्य ? इत्याह--**संविदि[द]** इति । समीचीना, यथावस्थिताशेषवस्तुग्रहणरूपा वा, तत्तदास्येन स्थिता वा विभ्रमहेतुत्वाऽयोगात्, इतरथा यस्य कस्यचित् कर्मणो यस्य कस्यचिद् भ्रान्तिः इति नाभ्रान्तिः कश्चित् स्यात् । किमिव तन्नास्य [इ]ति चेत् अत्राह--**मदि[रादि]वत्** । आदिशब्देन मदन-त्वोप्रादि * परिग्रहः । यथैव 471/mkj हि देवदत्तविभ्रमहेतुः मदिरादिः तस्य तथैव कर्मापि । अथ अतदीयोऽपि सूर्यग्रहणादिः तद्विभ्रमे हेतुः, शुक्ले वस्त्रे ततः पीतज्ञानदर्शनात् ततो व्यभिचार इति चेत्; न; तत्सम्बन्धे तद्रश्मीनां तदीयत्वात् । एवमन्य[द]पि कुचोद्यं चिन्त्यम् । § 2483

ननु कर्मसम्बन्धे जीवस्य न चेत् स्वरूपहानिः; न ततस्तद्भ्रान्ति [ः, अतः] मुक्तेतराविशेषः । तद्धानि स्वेद नित्यत्वमात्मनः इत्यभावः । न चैतदिष्यते तद्वादिना । तदुक्तम्-- § 2484

*यस्यात्मा वल्लभः तस्य समासं कथमिच्छति ।§ 2485

प्र° वा° १ । २३६ इति चेत्; § 2486

अत्राह--**जीवस्य** इत्यादि । **मदिरादिवत् तत्कर्म हद्भ्रान्ते निमित्तम्** । एतदुक्तं भवति-- यथा मदिरादिसम्बन्धे तस्य कथञ्चिदन्यथाभावः, अन्यथा /ms मत्तेतराऽविशेषः सन्तानभेदो वा, [तथा] कर्मसम्बन्धेऽपि इति । § 2487

योऽपि मन्यते--न तस्य मदिरादेरपि स्व[रू]पान्यथाभावो नित्यत्वात् अपि तु मदावस्था ततोऽर्थान्तरभूता जायते इति; तस्योत्तरम्--तदवस्थायास्ततो भेदे न स मत्तः स्याद् आत्मान्तरवत् । *तस्याः तेन अनुभा वात् मत्त इति चेत्; कथमेवं योगी न स्यात् । समवायभावात् न ततो विशेषः । अथ अवस्था तत्कार्यत्वात् तस्य इत्युच्यते; ईश्वरादेरपि उच्यताम् अविशेषात् । निषिद्धश्च नित्ये हेतुफलभाव इति न किञ्चिदेतत् । § 2488

स्यान्मतम्--तत्कर्मास्तित्वे किं प्रमाणमिति ? तत्राह--**जीवस्य** इत्यादि । **जीवस्य** स्वपरावभासनस्वभावस्य या **भ्रान्तिः** तस्याः **तत्कर्म मदिरादिवत्**

---

४ दास्येन] तत्तादात्म्येन

४ वा] अन्यथा ।

६ श्चित्] कस्यचित्

७ ब्देन] कामोद्रेग ।

७ *] क्रोद्रवादि

९ तः] सूर्यग्रहणात् ।

१३ स्वेद] [[स्वरूपहानिश्चेत् ।]]तद्धानिश्चेत्; अ

१५ मासं] स नाशं

१७ द्भ्रान्ते] तद्भ्रान्तेः

२२ *] मदावस्थायाः ।

२३ अनुभा] भ

२३ न] मत्तः न स्यात् तेन मदावस्थायाः प्रत्यक्षेणानुभवात् ।

२३ स] योगिनि तदवस्थायाः समवायो नास्तीति चेत् ।

२३ वाय] या

२३ न] समवायस्य नित्यत्वात् सर्वगतत्वाच्च न ततो विशेषः, तस्य सर्वत्राविशेषात् ।

प्रतीयते इत्यध्याहारः । किं पुनः तत्तस्या यतोऽनुमीयत इति चेत् ? अत्राह--**निमित्त**मिति । यतो नित्यत्वाद्येकान्तभ्रान्तेः म[दिरा]दिवत् कर्म निमित्तम्, ततः तत्ततः प्रतीयते । तथाहि--प्राणिनां नित्यत्वाद्येकान्तभ्रान्तिः तत्सम्बन्धद्रव्यान्तरविशेषपूर्विका, तत्त्वात्, मदिराद्युपयोगिनो दिगादि[भ्रा]न्तिवत् । योऽसौ तद्द्रव्यान्तरविशेषः स नः कर्म इति मे । § 2489

परे प्राहुः--उपलादौन कदाचिद् भ्रान्तिर्भवतु तदुपयुक्तद्रव्यविशेषपूर्विका तथा दर्शनात्, क्षणक्षयाद्येकान्तभ्रान्तिस्तु सत्पूर्वभ्रान्तिनिमित्ता, परस्य कर्मणोऽन्यस्य वा निमित्तस्यादर्शनादिति । नन्वेवम् अङ्कुरोऽपि अदृष्टबीजः तत्पूर्वको न भवेत् । अथ तज्जाती *यस्य तत्पूर्वकत्वदर्शनात् तस्यापि तथानुमानम्; /ms 472/mkj प्रकृतेऽपि समानमिदम् । यथा च इन्द्रियभ्रान्तयः तथा मनोभ्रान्तयोऽपि मत्तस्य द्रव्यान्तरसम्बन्धात् प्रतीयन्ते । अथा * विशिष्टोपदेशादपि तद्भ्रान्तयो दृश्यन्ते; ता अपि तदुपदेशसहकारिणः कर्मणः कर्मण एव मदिरादिवत् । अपि च तद्भ्रान्तेरेव भ्रान्तिसंभवे चिरगाढसुप्तोत्थितस्य कुतः तत्संभवः, स्वापादौ मनोभ्रान्तेरभावात्, पुनस्तथैवाऽस्मरणात्, तथापि तत्र तदभ्युपगमे न संहृताशेषविकल्पावस्थासंभवः कस्यचित् । *तज्ज्ञानमात्रस्यापि तत्रानभ्युपगमः; न च व्यवहितं कारणम् इत्युक्तम् । ततः तस्याः कर्म निमित्तमिति । *तन्नित्यत्वे भ्रान्ते न उपरम इति चेत्; अत्राह--**आगन्तुक**मिति । तत्कार्यभ्रान्तेः कादाचित्कत्वात् तत् कादाचित्कमित्यर्थः । नहि नित्यकार्यं कादाचित्कं युक्तम् । तदुक्तम्-- § 2490

*कारणस्याक्षये तेषां कार्यस्योपरमः कथम् । न्यायवि° १ । १०३ इति । § 2491

एवमपि पूर्वं शुद्धस्य ततो मुक्तवत् कथं कर्मणा सम्बन्ध इति चेत् ? अत्राह— **तस्य** इत्यादि । **तस्य** कर्मणः **प्रपञ्च** प्रवाहो**ऽनादिरिष्यते,** तत्कार्यप्रबन्ध[स्या]नादित्वप्रसाधनात् तद्वतिः । § 2492

---

१ पुनः] तत्कर्म ।
१ स्या] भ्रान्तेः ।
४ न्ध] तत्सम्बद्ध
५ स] अस्माकं जैनानाम् ।
५ मे] मे इति निरर्थकम् ।
६ लादौन] उत्पलादौ[[नीलोत्पले पीतभ्रान्तिः पित्तादिसंक्षोभात् भवति ।]]
७ त्पूर्व] तत्पूर्व
८ म] अदर्शनाद् यद्यभावः ।
९ *] अङ्कुरस्य ।
९ स्य] बीजपूर्वकत्व ।
११ अथा] अथ
११ *] जीवस्य ।
१२ पि] मनोभ्रान्तयः ।
१२ णः] कर्मणः इति पुनर्लिखितम् ।
१३ च] पूर्वभ्रान्तेरेव ।
१५ त] स्वापादौ ।
१५ *] तस्मात् ज्ञानमात्रमपि स्वापादौ न स्वीक्रियते इति शङ्काकर्तुः प्रज्ञाकरस्याभिप्रायः ।
१७ *] कर्मणो नित्यत्वस्वीकारे ।
१७ न] र्न
१८ त्वात्] कर्म ।
२१ तो] सतो
२२ ञ्च] ञ्चः

कारिकां विवृण्वन्नाह--**ज्ञान** इत्यादि । [ज्ञानस्वभावो जीवः] कुत एतत् ? इत्यत्राह— **चेतनस्याऽपरिणामिनः** साङ्ख्यकल्पितस्य **अचेतनस्याऽपरिणामिनो** वैशेषिककल्पितस्य, **जीवस्य निषेधात्** निराकरणात् **नैरात्म्याऽसिद्धेश्च** कारणादिति । ज्ञानस्वभावस्य अन्यथात्वं कुत इति चेत् ? अत्राह--**तदन्यथात्व**मिति । **तस्य** जीवस्य **अन्यथात्वं** भ्रान्तत्वं **द्रव्यान्तरसम्बन्धात्** आत्मद्रव्याद् अन्यत् कर्मद्रव्यं दनंतरं तेन सम्बन्धात् । /ms निदर्शनमाह--**मद** इत्यादि । यथा **मदादि** तदन्यथात्वं तत्सम्बन्धात् तथा प्रकृतम् । § 2493

*ननु न कुतश्चित् तस्य अन्यथात्वं नित्यत्वेन अनाधाराऽप्रहेयातिशयत्वात्, केवलं कर्मणां प्रकृतिपरिणामविशेषाणां शरीरेन्द्रियादिकरणात् कर्तृत्वं सुखदुःखादिनंद्यति व्यक्तिहेतुत्वाद् भोक्तृत्वम् । पुरुषे तु भोक्तृत्वमुपचारेणाकर्तृ[त्वात्] परमार्थेन तदभावादिति चेत्; एतदेव दर्शयन्नाह--**यदी**त्यादि । परमतस्य सूचने **यदी**ति, पक्रान्तरस्स **पुनरति** * **कर्मणामेव** नात्मनः इत्येवकारार्थः । किम् ? इत्याह--**कर्तृत्वभोक्तृत्वप्रबन्धः** । किंभूतः ? इत्याह **अनादिः** इष्यते इत्यध्याहारः । एतद् दूषयन्नाह--**निरात्मकान्न विशिष्य** *तेति--**निरात्मकाद्** आत्माभावपक्षाद् **अयं पक्षो न विशिष्येत** न भिद्येत, कर्तृत्वभोक्तृत्वरहितस्य सतोऽप्यात्मनो[ऽ]सदविशेषात् इति भावः । § 2494

अथ मतं द्रव्यान्तरसम्बन्धकृतान्यथात्वलक्षणं भोक्तृत्वं तस्य न विद्यते अर्थान्तरभूतस्य सुखादेरनुभवनलक्षणं तु विद्यते **चैतन्यं पुरुषस्य स्वरूपम्** योगभा० १ । १ । ९ इति वचनात्, इति चेत्; अत्राह--**स्वभावे**त्यादि । चैतन्यात्मकसुखाद्यनुभवरूपभोक्तृत्वस्वभावादन्यो *नित्यनित्यनिरवयवदर्शनस्वभावः **तदन्तरं तस्य अनवधारणाद्** अनिश्चयात् **क्षणक्षयादिवत्** । एको 473/mkj हि हर्षविषादादिविवर्त्तनाचैतन्यस्वभावोऽनुभूयते नाऽपरम् इति । तर्हि प्रयत्नस्य समवायात् कर्तृत्वं सुखदुःखादिदर्शनस्य भोक्तृत्वम् आत्मनो न /ms कर्मणाम् इत्येके । तान् प्रत्याह--**आत्मन** इत्यादि । **आ[त्म]नो** जीवापरनाम्नः **तथा** तेन प्रयत्नसुखादिदार्शप्रकारेण यः **परिणामस्तमन्तरेण प्रयत्नश्च सुखदुःखादि** वा दिशब्देन इच्छादिपरिग्रहः **दर्शनं** च प्रयत्नादे रूपादेश्च **बुद्धिः** तेषां **समवायिकारणस्य** भावः तत्ता तस्या **अनुपपत्तेः** तदन्यथा[त्व]मिति प-

---

६ रं] तदन्तरं
७ द] मदादि
९ *] सांख्यः प्राह ।
९ श्चित्] जीवस्य ।
९ त्वेन] अनाधेयाप्रहेयातिशयत्वात् । न कश्चिदतिशयः आधातुं प्रहातुं वा शक्यते इत्यर्थः ।
११ ति] दुःखाद्यभि
१३ *] प्रक्रान्तरस्य पुनरिति
१५ *] ष्ये
१७ विशेषात्] असत्तुल्यत्वात् ।
१८ णं] विकारित्वं ।
२१ *] नित्य इति पुनर्लिखतम् ।
२२ ए] तुलना--एकमेवेदं हर्षविषादाद्यनेकाकारविवर्तं पश्यामः तत्र यथेष्टं संज्ञाः क्रियन्ताम् ।--प्र० वार्तिकाल० ३ । २७७ ।
२३ ना] न
२४ स्य] समवायात् ।
२५ इत्येके] वैशेषिकाः ।
२६ सुखादिदार्श] दर्शन
२७ वा] श्च, आ

दघटना । कुत एतत् ? इत्याह--**अनुपयोगा**दिति प्रयत्नादिरूपेणपरिणामात्, परिणामिकारणस्यैव समवायिकारणतोपपत्तेः इति भावः । § 2495

कारणात् कार्यभेदैकान्ते समवायसमवायिनिमित्तकारणभेदाऽपरिज्ञानम् । यत्रोत्कलितं कार्यं जायते तत् समवायिकारणमिति चेत्; किमिदं यत्रोत्कलितम् इति ? यत्र समवायेन सम्बधम् इत्युक्तं । न च घटतदवयवव्यतिरेकेण [त]दन्तरालस्थितमपरं पश्मामः । तथापि तद्दर्शनकल्पने वरम् अवयवाऽवयविनोः गुणगुणिनोः जातितद्वतोः कथञ्चित्तादात्म्यमविगानदृष्टमस्तु । तथा च कृतनाशाऽकृताभ्यागमदोषपरिहारः । न केवलं तयोस्तादात्म्येमेव विरुद्धम् अपि तु दर्शनकल्पनमपि, अदृश्यस्य । कथञ्चित्तादात्म्यं च तथादर्शनाद् वस्तुनो रूपम् । न च स्वरूपेण कस्यचिद् विरोधः; निःस्वभावतापत्तेः । § 2496

ननु [न] दर्शनात् समवाय[व्य]वस्था, अपि तु तत्कार्यतः । तच्च कार्यम् [किम् ?] इत्याह--अवयवेषु अवयवी इति प्रत्ययः इति चेत्; न;
/ms तादात्म्येऽपि तदुपपत्तेः । इह तन्तुषु पटः इति कोऽर्थः ? तेषु कथञ्चित्तादात्म्येन वर्त्तते इत्यर्थः, यतो विवक्षातः पटे तन्तवः इत्यपि प्रतीयते । तदेवं समवायाऽसिद्धेः यत्रोत्कलितम् इत्युक्तम् । § 2497

एते[न] स्वकारणकारणासमवाय्यसमवायिकारणम् इति निरस्तम् । न च प्रथमं रूपादिरहितस्य पटस्योत्पत्तिः प्रतीयतेऽध्यक्षतः येन तद्रूपाद्युत्पत्तौ तन्तुरूपादीनाम् असमवायिकारणता स्यात्, रूपादिसहितस्यैव उत्पत्तिदर्शनात् । आशुवृत्तेः तथादर्शनाभिमान इत्यपि वार्त्तम्; सर्वत्र तथा प्रसङ्गात् । ततः स्थितम् **आत्मन** इत्यादि । § 2498

अथ मतम्--भवतु आत्मनः तथापरिणामे प्रयत्नादिसमवायिकारणतोपपत्तिः, तथापि जैनस्य किं सिद्धम् ? इत्याह--**चेतनस्य** इत्यादि । **चेतनस्य** प्रयत्नसुखदुःखादिदर्शनपरिणामस्य **तदेव** द्रव्यान्तररूपमे[व] **कर्म संसारनिमित्तम्** इष्टानिष्टशरीरादिकारणं **साक्षात्**, तदन्तरं * हीनस्थानपरिग्रहदर्शनात् मत्तस्य अशुचिस्थानपरिग्रहवत् । न पुनः प्रयत्नसधर्मा जीवपरिणामः; तस्य [अ]कारणत्वात् । अथ देशादिप्राप्तेर्वाञ्छापूर्वकत्वदर्शनात् सौ च तन्निमित्तम्; न; अशुचिस्थानपातिना मत्तेन व्यभिचाराद् इत्येवकारार्थः । कुत एतत् तदेव कर्म तन्निमित्तम् ? इत्यत्राह--**द्रव्यान्त**रेत्यादि । **द्र-**
474/mkj **व्यान्तरं** व्याख्यातम्, तेन **सम्बन्धस्य उदयो** यथाकालफलदानम् **उदीर-**

१ त्वादिरूपेण ] णाऽ
३ वाय ] य्य
५ ध ] द्ध
५ इत्युक्तं ] इत्ययुक्तम्
६ रं ] समवायम् ।
९ मेव ] तदेवा
१६ इत्यु ] त्ययु
१७ स्व ] स्वशब्देन पटरूपं गृह्यते, तस्य कारणं पटः, तत्कारणेषु तन्तुषु समवायि तन्तुरूपं पटरूपं प्रत्यसमवायिकारणम् ।
१७ णा ] ण
१८ त ] पटरूप ।
१९ स्यैव ] पटस्य ।
२५ * ] तदनन्तरं
२७ च ] सापि

**णा** अपक्वपाचनम् **आदिशब्देन** द्रव्यान्तरसंस्कारादिपरिग्रहः, तस्य **वशात् मिथ्यादर्शनादेः** मिथ्यारुच्यादेः आदिशब्देन मिथ्याज्ञानपरिग्रहः, **विकारस्य** /ms जीवपरिणामस्य **दर्शनात्** । एवं मन्यते--संसारिणो जीवस्य आगन्तुकसुखदुःखादिकं द्रव्यान्तरबन्धोदयोदीरणवशात् आगन्तुकत्वात् मिथ्यादर्शनादिवत् । § 2499

तयो यदुक्तं परेण--**विवादास्पदीभूतं सुखदुःखादिकं संसारिणः प्रयत्नसधर्मणा तद्गुणेन कृतम्, कार्यत्वे सति तदुपका[र]कत्वात् ग्रासादिवत्** इति; तन्निरस्तम् । यदि परम्परया; सिद्धसाधनम् । अथ साक्षात्; तर्हि द्रव्यान्तरसम्बन्धात् तद्विकारस्य साक्षाद् दर्शनेऽपि अन्यहेतुकल्पने अनवस्था । भवतु तदेव संसारकारणमिति चेत्; अत्राह— **तत्परिक्षयात्** कर्मपरिक्षयात् **मोक्ष** इति । तथाहि [यत्] यन्निमित्तं तत् तदभावे न भवति यथा बीजाभावे अङ्कुरः, कर्मनिमित्तश्च संसार इति । § 2500

परः प्राह-- § 2501

*अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
**ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव च** ॥ § 2503

महाभा° वनप° ३० । २८ इति § 2504

ईश्वरः तन्निमित्तम् इति । § 2505

**कालः पचति भूतानि**महाभा° आदिप° १ । २७३-७५ इत्यादि वचनात् कालः तन्निमित्तम् इति । § 2506

**पुरुष एव**ऋक्° १० । ९० । २ इत्याद्यभिधानात् पुरुषः कारणम् । § 2507

**प्रकृतेर्महान्**साङ्ख्यका° २२ इत्यादिवचनात् प्रकृतिः कारणम्, [न] कर्मैव इति; § 2508

तत्राह-- § 2509

**ईश्वरादिकं संसारनिमित्तम्** इत्यनुवर्त्तते । **कल्पयताऽपि** इति पदेन एतेन एतद्दर्शयति--उक्तविधिना न तत्र किञ्चित् प्रमाणम्, केवलं कल्प-

---

६ यो] ततो
६ रेण]
तुलना--देवदत्तविशेषगुणप्रेरितभूतकार्याः तदुपगृहीताश्च शरीरादयः कार्यत्वे सति तदुपभोगसाधनत्वात् गृहवदिति ।--प्रश° किरणा° पृ° १४९ ।
७ द्गुणेन] अदृष्टेन ।
९ अ] अव्यवस्था स्यादित्यर्थः ।
१८ इ] कालः सृजति भूतानि कालः संहरते प्रजाः । संहरन्तं प्रजाः कालं कालः शमयते पुनः ॥ कालो विकुरुते भावान् सर्वाल्लोके शुभाशुभान् । कालः संक्षिपते सर्वाः प्रजा विसृजते पुनः ॥ कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः । कालः सर्वेषु भूतेषु चरत्यविधृतः समः ॥ अतीतानागता भावा ये च वर्तन्ति साम्प्रतम् । तान् कालनिर्मितान् बुद्ध्वा न संज्ञां हातुमर्हसि ॥--महाभा° ।
२० इ] पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्--ऋक्° ।
२२ इ] प्रकृतेर्महान् ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः । तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥--सांख्यका° ।

नामात्रमिति । **तदभावे** कर्माभावे **अतिप्रसङ्गात्** । अतिप्रसङ्गं दर्शयन्नाह-- **तस्यापि** इत्यादि । केवलम् अन्येषां मुक्तात्मनां संसारिणां चाविशेषेण तत् /ms तन्निमित्तं स्याद् अपि तु **तस्यापि** ईश्वरस्यापि **ईश्वरः संसारनिमित्तं स्यात्** । 475/mkj कुत एतत् ? इत्यत्राह--**जीवावि[शे]षात्** । **जीवैः अविशेषाद्** ईश्वरस्येति । यथैव हि निःकर्मणां जीवानामसौ संसारकारणं तथा तथाविधस्यन्मानोऽपि स्यात् । अथ सर्वज्ञत्वाद् आत्मनत्त दुःखेन योजयति; [त]त एव परमपि निर्दोषं न तेन योजयेत् शुद्धविपस्तद संवात् । § 2510

एतेन क्रीडा तत्र निषिद्धा । तस्य तया तन्निमित्तत्वे आत्मन्यपि स्यात् । दृश्यन्ते हि तया प्ररणिका [पूइन्द्रजालकारिणः ।रणिकाः] आत्मानं चित्सारयन्तः । स्वभावत एव स तन्निमित्तम् इत्यपि नानेन परिहृतम् । न चादर्शने परत्रैव स तस्य स्वभावो नात्मनि इति विभागो [यु]क्तः । यदि वा तस्यापि ईश्वरस्यापि संसारनिमित्तम् अन्ये जीवाः । कुत एतत् ? इत्यत्राह-- **जीवाऽविशेषात्** । अकर्मणां हि सर्वज्ञत्वादिना गुणेन जीवानां विशेषाभावात् । § 2511

ननु किमुच्यते तदभाव इति, यावता तद्भावे स तन्निमित्तमिति चेत्; अत्राह--**यथाकर्मसम्बन्धम्** इत्यादि । अत्रायमभिप्रायः--न कर्मणा [ई]श्वरस्य ते[न] वा कर्मणः किञ्चित् क्रियते, केवलं तयोरन्योऽन्यसहकारिणोः कार्ये व्यापारः । कर्मणा वा प्रेरित ईश्वरः कार्यं जनयति नकर्मेतरवत् , ईश्वरेण वा कर्म अचेतनत्वाद् वास्यादिवत् इति ? तत्र प्रथमपक्षे **यथाकर्मसम्बन्धम्** इत्यादि । अन्यत्र **विपर्यये च** इत्यादि । यस्य प्राणिनो यः कर्मसम्बन्धः सुरूपान्यथा वा झटिति फलदायान्य था वा तदनुसारेण **यथाकर्मसम्बन्धं प्रवर्त्तने** *तत्सम्बन्ध सहकारिणमाश्रित्य कार्यजन्मनि ईश्व- /ms रस्य प्रवृत्तावङ्गीक्रियमाणायां **परमैश्वर्यानुपपत्तिः अतिप्रसङ्गात्** इत्येतद् अत्राप्यनुवर्त्तते । **तदेव कर्म संसारनिमित्तम्** इति सम्बन्धः । तथाहि--कर्मसहकारिणः तस्य कार्यं कुर्वतोऽपि यदि पारमैश्वर्यम्; कालादेरपि स्यादविशेषात् । अथ ईश्वरो ज्ञत्वाज्ञत्वात् कार्यकारणकलापं कार्यं जनयति अन्यथा कालादिः विपर्ययात्, ततोऽयं विशेष इति चेत्; कुतस्तस्य तत्परिज्ञानसिद्धिः ? *जननात्; कालादिना व्यभिचारः । आत्मत्वे

५ सौ] ईश्वरः ।
६ न्मानोऽपि] स्य आत्मनोऽपि
६ त्त] आत्मानं न
७ संवात्] शुद्धधियस्तदसंभवात्
९ त] क्रीडया ।
१० स] ईश्वरः ।
११ स्य] ईश्वरस्य ।
१९ त्] कर्मान्तरवत्
१९ वा] प्रेरितं ।
२१ सुरूपा] पोऽ
२१ दायान्य] दायी अन्य
२२ *] कर्मसम्बन्धात्मकं सहकारिणम् ।
२२ न्ध] न्धं
२३ प] पा
२३ त्तिः] त्तेः
२५ स्य] ईश्वरस्य ।
२६ त्वात्] ज्ञत्वात् ज्ञात्वा
२७ यात्] अज्ञत्वात् ।
२८ स्य] ईश्वरस्य ।
२८ *] उत्पादनाच्चेत् ।

सति तज्जननात् इत्यपि नोत्तरम्; गाढसुप्तेन स्वव्यापारव्याहारहेतुना व्यभिचारः । सर्वव्यामोहरितत्वे सति इति चेत्; तदपि कुतः ? सर्वज्ञानात्; अन्योऽन्यसंश्रयः--सर्वव्यामोहविरहसिद्धौ तत्परिज्ञानम्, अतः तत्सिद्धिरिति । तन्न कालादेरस्य विशेषः । भवतु वा तत्परिज्ञानम्, तथापि ततोऽस्य न विशेषः अकिञ्चित्करत्वात्तत्परिज्ञानस्य । यो हि कर्मवशात् अकर्त्तव्ये प्रवर्त्तमानमज्ञं ज्ञात्वा कर्त्तव्ये प्रवर्तयति जनम्, तस्य परिज्ञानं फलवत्, *अयं पुनः *तत्रैव । यदि यादिव **यथाकर्मसम्बन्ध प्रवर्त्तने** सर्वज्ञत्वादिना गुणेन यत् **पारमैश्वर्यं** तस्याऽनुपपत्तेः **कर्मैव तन्निमित्तम्** । § 2512

अत्र **अतिप्रसङ्गात्** इति नापेक्षणीयम् । तथाहि--कर्म अचेतनमपि यदि यथाकालं कार्यजननसमर्थम्; तत एव तन्निष्पत्तेः किम् ईशेन तज्ज्ञेन ? नहि तथाजननासमर्थम् अन्यसन्निधानेन जनयति, अन्यथा यवबीजं शाल्यङ्कुरं तत्परिज्ञानवतः सन्निधाने कुर्यात् । ज्ञानं च सहकारि निषेद्धुमशक्यम् 476/mkj
। न चेशस्तथा । अथ तस्य तत्सामर्थ्यं तेन क्रियते; तर्हीशेन क[र्म] /ms
जन्यते न कार्यम् इति कथं स तत्सहकारी तज्जनयति ? द्वयमपि स एव इति चेत्; कुत एतत् ? अन्यतः तथाविधजनककर्माऽसंभवादिति चेत्; ईश्वरस्य तत्कार्यद्वयजनने कुतः सामर्थ्यमायातम् ? *अहेतुकम्; सर्वत्र स्यात्, इतरथा अन्यत्रापि किं हेतोः कार्यनियमकल्पनेन ? तत्सामर्थ्यस्य नित्यत्वाददोष इति चेत्; न; तन्निषेधात् । स्वहेतोः इति चेत्; कर्मणोऽपि तत एव इति किम् ईशेन ? इति स्थितम्--**यथा** इत्यादि । अथ कर्मणा ईश्वरः प्रेरितः, तेन वा कर्म कार्यकृत् इष्यते; तत्राह--**विपर्यये वा** इत्यादि । उक्तक्रमाद् अन्यः क्रमो विपर्ययः, स च सेश्वरकर्मवादिमते[ऽ]नन्तर एव संभवति, तस्मिंश्च **प्रवर्त्तने पारमैश्वर्यानुपपत्तेः कर्मैव तन्निमित्तम्** । तथाहि--पृथग्जनवत् कर्मणा प्रेरितस्य तस्य प्रवर्त्तने न ततो विशेषः । § 2513

किञ्च, तेन प्रेरितः, पृथग्जन एव स कार्यं विदधातु किमीशप्रेरणेन ? अचेतनमपि तत् ईशं प्रेरयति न तज्ज्ञा नमिति [किं]कृतो विभागः ? अन्येन प्रेरितमीशं प्रेरयति इत्ययुक्तम्; अनवस्थापत्तेः । तन्न कर्म ईश्वरं प्रेरयति । नापि ईश्वरः कर्म; पारमैश्वर्यानुपपत्तेः । तथाहि--वरं कार्यमेव

---

२ त्वे] रहितत्वे
४ स्य] ईश्वरस्य ।
४ थापि] कालादेः ।
४ तोऽस्य] ईश्वरस्य ।
७ *] ईश्वरः ।
७ *] प्रवर्तयति इति सम्बन्धः ।
७ यादिव] यदि वा
७ न्ध] न्धं
१३ स्य] कर्मणः ।
१३ तेन] ईशेन ।
१४ स] ईश्वरः ।
१४ कारी] कार्यम् ।
१४ स] ईश्वर एव ।
१६ *] यदि कारणं विना तर्हि ।
२३ स्य] ईश्वरस्य ।
२४ तेन] कर्मणा ।
२४ स] स्व
२५ पि] कर्म ।
२५ ज्ञा] [[पृथग्जनम् ।]]तज्ज्ञ
२६ अन्येन] अथ तेन[[कर्मणा ।]]

तेन कृतं किं कर्मप्रेरणेन ? *यस्य कार्येऽसामर्थ्यं तस्य तत्प्रेरणे सामर्थ्यम् अतिश्रद्धेयम् । कर्मण एव वा तदस्तु किं तत्प्रेरकेण । § 2514

अथ अचेतनं तद् वास्यादिवत् चेरना निश्चितमेव  कार्ये [प्र]वर्त्तते तदधिष्ठापकस्य ज्ञानादे[◌ः] कथं चेतनत्वं घटादिवत् ? अस्मदादिवत् स्यादिति चेत्; तदेतदसत्; *यदसता समुदायहृतम् ; अस्मदादेरपि ततो भेदे; न चेतनत्वम् । ज्ञानसमवायाच्चेतनत्वं चेत्; न; तन्निषेधात् । सतोऽपि सर्वगतत्वेनाऽविशेषात् किं क्व ज्ञानम् ? अथ सम्बन्धाविशेषेऽपि सम्बन्धविशेष इष्यते; कुत एतत् ? स्वभाव[त] इति चेत्; *तदपि कुतः ? तथा दर्शनात्; युक्तमेतद् यदि गगनादिपरिहारेण ईश्वर एव किं देव  ज्ञानं दृश्येत । स एव पश्यतीति चेत्; कोशपानात् प्रत्येयम् । एतेन योगिनिश्चिन्तिताः । स्वभावत एव च सम्बन्धिनियमे किं समवायेन ? इहेति प्रत्ययोऽपि तत एव भविष्यति । तन्न परस्य कश्चित् चेतनो यः तस्य अधिष्ठाता स्यात् । ज्ञानातस्याभेदे अन्यत्रापि गुणगुणिनोर्भेदैकान्तो विशीर्येत । तथा च अनीश्वरस्य अनित्यज्ञा[ना]दिस्वभावस्य कार्यत्वम् इति, *तद्दृष्टान्तेन ईश्वरस्यापि तत्प्रसक्तमिति तस्यापि अन्यो धीमान् कर्त्ता, ततः पारमैश्वर्यानुपपत्तिः इति । § 2515

477/mkj

किंच, यदि सर्वमचेतन [नं चेतना]धिष्ठितमेव कार्ये प्रवर्त्तते इत्येकान्तः; तर्हि यस्य यत् कर्मादि स एव तस्यापिधिष्ठाता इति व्यर्थम् ईश्वरकल्पनम् । नहि तस्यापि तत्र सन्निधानादपरम् अधिष्ठातृत्वम् । प्रेरकत्वमिति चेत्; *अन्यस्याप्यस्तु । तदज्ञाने तत्कथम् इत्यपि नोत्तरत्वात्क्लोत्तरत्वात् सुप्तस्याऽज्ञानेऽपि स्वाङ्गावयवप्रेरणंदर्शनादिति । § 2516

१ *] ईश्वरस्य ।
१ स्य] कर्मप्रेरणे ।
२ वा] कार्योत्पादकत्वमस्तु ।
३ द्] कर्म ।
३ मेव] चेतनाधिष्ठितमेव
३ ते] प्रधानपरमाणुकर्माणि प्राक् प्रवृत्तेः बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते अचेतनत्वात् वास्यादिवत् ।--न्यायवा० पृ० ४५७ ।
४ स्य] ईश्वरस्य ।
५ *] असिद्धस्य उदाहरणरूपेण कथनं कृतम् ।
५ म्] तः समुदाहृतम्
५ पि] चेतनत्वात् ज्ञानाद्वा ।
६ न्निषेधात्] समवायनिराकरणात् ।
७ न्धा] न्ध्य
८ *] ईश्वरस्वभावं ज्ञानमिति ।
९ नात्] इति चेत् ।
९ देव] किञ्चिदेव
१० पानात्] एतदुच्यमानं मद्यपानादेव बुद्धौ समाविशति ।
१० योगिनि] न
११ योऽपि] स्वभावादेव ।
१२ स्य] कर्मणः ।
१३ ज्ञानात] त्त
१४ *] अस्मदादिदृष्टान्तेन ।
१५ स्यापि] कार्यत्वं ।
१८ स्यापि] तस्या
१९ हि] ईश्वरस्यापि ।
२० *] अस्मदादेरपि ।
२० ज्ञाने] प्रेरकत्वम् ।
२० त्वात्] न; उक्तोत्तरत्वात्
२१ णं] ण

यदि पुनरिदं चोद्यम्--शरीरसम्बन्धात् प्राग् अशरीरस्य कथं तदधिष्ठातृत्वमिति ? तदीश्वरेऽपि समानमिति दर्शयन्नाह--**जीवोपयोग** इत्यादि । § 2517

...13 जीवोपयोगयोग्यैरीश्वरस्यानुमीयते ।
वितनोश्चेच्छा तद्धेतुः शरीरकरणादिभिः ॥ १३
॥§ 2519

शरीरेन्द्रियादिसङ्गमनुभवतोऽनिष्पन्नकायकरणस्य उत्पत्तुः कथमात्मोपभोगयोग्यनिष्पादनसामर्थ्यम् ? तत्परिग्रहात् निष्पन्न[स्य]तत्कृतिर्न संभाव्येत । पारिशेष्यादीश्वरः कारणमिति वैशेषिकादयः । वितनुकरणस्य पुनरिच्छया जीवोपभोगयोग्यशरीरादिकरणं कथं संभाव्येत ? तदुत्पत्त्रविशेषात्, प्रतिषिद्धं च । तत्परिणामोपगमेऽपि समवायिकारणत्वस्थित्वाप्रवृत्त्यादेश्च परिणामिन एव संभवात् प्रवर्तनालक्षणाः दोषास्तज्जन्महेतवः कथन्न स्युः ? अत एव कर्मसम्बन्धोपपत्तेः । चेतनकृतं किञ्चिदुपभोगयोग्यं संप्रेक्ष्य सर्वत्र कल्पनायां सतनुकरणकृतिः किन्न प्रसज्येत ? तथा च अनवस्था । दृष्टव्यतिक्रमे स्वकर्मणः तत्सामर्थ्यं कल्पयितुं युक्तम् । § 2520

**च** शब्दो अप्यर्थो भिन्नप्रक्रमः **ईश्वरस्य** इत्यस्यानन्तरं द्रष्टव्यः । न /ms
केवलमन्यस्य अनीश्वरस्य अपि वी[तु ई]**श्वरस्यापि** । किंभूतस्य ? **वितनोः** अशरीरस्य । किम् ? **अनुमीयते** । कैः ? इत्याह--**शरीरकारणादिभिः** आदिशब्दाद् भुवनादिपरिग्रहः, अभेदोपचारात् तद्गताः कार्यत्वादयः **शरीरकरणादयः** उच्यन्ते । किंभूतैः ? इत्याह--**जीवापयोगयोगैः** ईश्वराद् अन्य**जीवा** गृह्यन्ते, तस्य **ईश्वरस्य** इत्यनेन अभिधानात्, तेषामु**पयोगः** तज्जननव्यापारः तत्र **योग्यैः** यथा ईश्वरेण ते निष्पादयितुं शक्याः तथा अन्यैरपि इत्यर्थः । तस्य का किमनुमीयते ? इत्याह— **इच्छा** सिसृक्षा । किंभूता ? इत्याह--**तद्धेतुः** शरीरकरणादिकारणादिकारणम् । यथा वितनोरन्यस्य तद्धेतुः सोनानुमीयते तथा ईश्वरस्यापीति भावः । यदि वा **च**शब्दः अवधारणे, ईश्वरस्येव किमनुमीयताम् ? § 2521

ननु यथा ईश्वरस्य तत्करणे सामर्थ्यम्, नैवमन्यस्येति चेत्; युक्तमेतद् यदि तथादर्शनं स्यात् । नहि दृष्टेऽनुपपन्नं नाम । अथ ईश्वरेण सर्वस्य जननात् किमन्येनेति चेत् ? एतदपि युक्तं यदि कुतश्चित् सिद्धं

१७ का] क
१९ योगैः] जीवोपयोगयोग्यैः
१९ अन्य] न्ये
२२ का] का इति प्रश्ने ।
२३ णादिका] कारणादि इति निरर्थकं पुनर्लिखितम् ।
२४ सो] सा
२५ स्येव] स्यैव
२६ स्य] शरीरादिकरणे ।

स्यात्, यावता शरीरादिकार्यदर्शनात् ईशोऽप्यनुमीयते । *तच्च नानाविध- 478/mkj मिति तथाविधम् आत्मनः कर्त्तारमनुमापयन्ति घटपटनगरारामादिवत् । अथ केनोच्यते--[ए]कस्य करणदर्शनाद् एकः प्रतीयते ? प्रतीयताम् यदि कार्ये तद्विज्ञानानुगमः स्यात्, न चैवम् शब्दह श्चेवंननिधत्रत्यत्रापरा /ms प्राह--सकलं जगद् एकोऽवयवी तस्य प्रासादवद् अनेककर्तृसंभवेऽपि सूत्रधारसमानेन एकेन सकलकारकग्रामवेदिना भवितव्यम् इति; तदप्ययुक्तम्; यतः एकस्यापि भागशः अनेकसूत्रधारसंभवात् । § 2522

**वितनुकारणस्य** इत्यादिना कारिकां व्याख्यातु **शरीरेन्द्रिये**त्यादि पूर्वमुपचति * तन्वादि**सङ्गमनुभवति**संसारिण इत्यर्थः । **स्वयम्** आत्मना[न] ईश्वरादिना, **उत्पत्तुः** गतदिसंबन्धितया जायमानस्य । किंभूतस्य ? इत्याह--**अनिष्पन्नकायकरणस्य कथम् ?** न कथञ्चित्, **आत्मापयोग्ययोग्यनिष्पादनसामर्थ्य[म्]** । कुतः ? इत्याह--**तत्परिग्राहे**त्यादि । नोत्पत्तुः तन्निष्पादनसामर्थ्यमपि तु तद्विपरीतयोः पित्रोः इति चेत्; अत्राह--**निष्पन्ने**त्यादि । मैथुने तद्व्यापारात् । न च तदेव तत्र व्यावृत्तिः प्रतिमैथुनमपत्योत्पत्तिप्रसङ्गात् इति भावः । कर्म्मणातत्र व्यावृत्ति *रिति चेत्यादि **तत्कृतिः** शरीरेन्द्रियादिर्न **संभाव्येत** । कुतः कस्य *सा संभाव्यत [इत्याह--पारिशेष्यात्] इत्यादि । प्रसक्तप्रतिषेधे अन्यसिद्धि[ः] **पारिशेष्यं** तस्माद् **ईश्वरः कारणम्** । तथाहि--शरीरे तिपादिकार्यं कारणाविनाभावि, तस्य च उक्तविधिना [ना]न्यत् कारणम् इति पारिशेषाद् ईश्वरः इत्येवं **वैशेषिकादयः** । *तत्त्वदूषकादयः । तत्त्वदूषणमाह--**वितनुकरणस्य** इत्यादि । **वितनुकरणस्य** ईश्वरस्य इति विभक्तिपरिणामेन सम्बन्धः । **पुनरिति** वितर्के । **इच्छया शरीरादिकरणं** वाञ्छया **कथं संभाव्येत ?** किम् ? इत्याह--**जीवोपभोग** इत्यादि । इतरथा[तथा]विधस्य स्वयमुत्पत्तुः इच्छया तन्निष्पत्तिः संभाव्येत । तस्येच्छा /ms तादृशी कुतोऽवगम्यते ? ईश्वरस्य कुतः ? कार्यनिष्पत्तेः; अन्यत्र समानम् । जन्मोत्तरकालं तदिच्छातः कुतो न कार्यम् इत्यपि नोत्तरम्; ईश्वरेच्छासर्वेक कार्यनियातं । तत्र प्रमाणाभा वाहयनिवारः * संभाव्येत । सक्षदुत्पन्नेऽपि ततो जगत्कार्ये पुनस्तस्यामपि तन्नोत्पद्यते । § 2523

---

१ *] कार्यम् ।
२ न्ति] ति
४ रा] चैवमिति । अत्रापरः
८ नुका] क
८ व्याख्यातु] तुं
९ *] पूर्वपक्षमुपन्यस्यति
९ ति] तः
१० दि] कृत्यादि
११ योग्य] आत्मोपभोग
१२ रिग्रा] ग्र
१४ व्यावृत्तिः] व्यापृतिः
१५ णा] णां
१५ *] पृति
१५ चेत्यादि] चेत्; इत्याह--
१६ *] तत्कृतिः ।
१८ तिपादि] न्द्रियादि
१९ पारिशेषाद्] ष्यात्
१९ *] तत्त्वदूषकादयः इति पुनर्लिखितम् ।
२४ स्येच्छा] शरीरादिकरणरूपा ।
२६ रेच्छा] च्छया
२६ नियातं] सर्वैककार्यनिपातः स्यात्
२६ *] वोऽन्यत्राप्यनिवार्यः
२७ क्ष] साक्षा

स्यान्मतम्--आत्मनः शरीरादिसम्बन्धकरणे न कस्यचिद् इच्छा अस्ति, सती वा कथं नेदानीं सर्वैः स्मर्यते इति; [तन्न] सारम्; यतः त-स्यार्थस्यमरणेप्यनिवारणात् अस्मरणं मथापि विशिष्टम्, सामर्थ्यम् उभयत्र सन्दिग्धमिति मन्यते । एतदेवाह— **तद्** इत्यादि । स चासौ ***उत्पत्ता** वनेना* **विशेषाद्** ईश्वरस्येति । यत एव विशेषोऽत एव वरमीश्वरण सिष्टः एवं तदाराधनाद् धर्मसिद्धेः इति चेत्; अत्राह--**प्रतिषिद्धं च** इत्यादि ।

§ 2524

479/mkj

ननु मम बुद्धिमत्कारणमात्रसिद्ध्या प्रयोजनम्, तत्कारणम् ईश्वरो भवतु परो वा परिणाम्येव इति चेत्; अत्राह--**समवायीत्यादि** । **तस्य** ईश्वरस्य अन्यस्य वा **परिणामोपगमेऽपि,** अपिशब्दः पक्षान्तरसूचकः । कुतः त-दुपगमः ? इत्याह--**समवायीत्यादि** । **समवायिकारणत्वं च स्थित्वाप्रवृत्तिश्च आदिशब्देन** निमित्तकारणत्वादिपरिग्रहः तस्य **परिणामिन एव संभवात्** इति । तत्र दूषणम्--**प्रवर्त्तनेत्या** [दि । प्रवर्तनालक्षणा] **दोषा** रागादयः **कथं न स्युः** नैव ईश्वरस्येति । किंभूताः ? इत्यत्राह--**तज्जन्महेतवः** तच्च तनु शरीरेन्द्रियादिसम्बन्धलक्षणं **जन्म** तस्य **हेतवः,** तस्यापि संसार इतर-जीववत् स्यादित्यर्थः । तस्य दोषास्तित्वे किं प्रमाणमिति चेत् ? अत्राह-- /ms प्रवर्त्तमानानां जन्तूनां प्रेरणा **प्रवर्त्तना** सैव **लक्षणं** चिह्नं येषां ते तथोक्ताः । तथाहि--यः परममिष्ट कर्मणा योजयति स रागादिनामवे * तनो यथा ध्यानो [?] योजयति च तेन परमीश्वर इति । रागाद्यभावेऽपि तस्य तत्प्रवर्त्तना[ऽ]विरोधादनैकान्तिको हेतुरिति चेत्; अत्रोत्तरम् **तन्वादिकर-णाद्** इत्यादि भविष्यति । सतोऽपि तस्य रागादयो न कर्मसम्बन्धकारणं देवताविशेषत्वाद् यथा मयूरस्य विषं न रमण कारणम् । **अत एव** दोषस-द्भावत एवं **कर्मसम्बन्धोपपत्तेः तज्जन्महेत[वः] कथन्न स्युः** इति ? अन्यथा सर्वस्यापि ततस्तत्सम्बन्धभाव इति मन्यते । § 2525

एवं तायत् स्वयुक्त्या संसारित्वं तस्य दर्शनम् । अधुना परयुक्त्या दर्शयन्नाह--**चेतनकृतम्** इत्यादि । **चेतनकृतं सूपादि किञ्चित्,** न सर्वं त-था, प्रमाणाभावात् परस्य इति निरूपितम् **भूता भव्याः** सिद्धिवि॰ ३ । ८ इत्यादिना । किंभूतम् ? इत्याह— **उपभोगयोग्यम्** प्राणिनाभोगमित्यर्थः ।

३ णे] तस्य अर्थस्मरणे
३ थापि] णमन्यत्राप्य
४ *] उत्पद्यते इति उत्पत्ता ।
५ *] च तेनाऽ
६ सिष्टः] रेण सृष्टः
१५ नु] तत्
१५ त] ईश्वरस्य ।
१८ मिष्ट] परम् इष्टानिष्ट
१८ *] दिमानेव
२१ तोऽपि] सन्तोऽपि
२२ ण] मरण
२३ एवं] व
२४ त] दोषात् ।
२४ न्ध] न्धा
२४ भाव] कर्मसम्बन्धाभावः स्यात् ।
२५ त्] तावत्
२५ त] ईश्वरस्य ।
२५ म्] दर्शितम्
२८ प्राणिना] नां
२८ भोग] ग्य

तत्किं कृत्वा ? इत्याह--**संप्रेक्ष्य** दृष्ट्वा **सर्वत्र** सर्वस्मिन् उपभोगयोग्य**कल्पनायां** क्रियमाणायां **चे[त]नकृतत्वस्य** इति सम्बन्धः । तथा च परप्रयोगः--राज्यादिवान्नरेन्द्रादिभिः केनचित् चेतनावता कल्पितं भुज्यते, भोग्यत्वात्, सूपादिवत् । योऽसौ ते *कः संभवावान् महेश्वर इति । तत्र परिहारः— **सतनुकरणकृतिः** तनुकरणवता करणम् उपभोगयोग्यस्य **किन्न प्रसज्येतौ** च अत्रापि स एव प्रयोगो दृष्टान्तोऽपि सूपकार एव **तथा च** /ms तेना च स्वशरीरादिकम् अन्ये[न] तदनुभुज्यते, तेनाप्यन्येन **इत्यनवस्था** इति भावः । अथासौ अतनुकरण इष्यते अन्येन वा दत्तं शरीरादि भुङ्क्ते; न; अत्राह--**दृष्टे**त्यादि । परोपभोगयोग्यस्य सूपादेः करणम्, दान *वा सतनुकरणस्य सूपकारादेः अन्यदत्तं जातस्य वा **दृष्टम् तद्व्यतिक्रमे** क्रिया [?] क्रियमाणे **स्वकर्मणः** भोक्तुर्यदात्मीयं कर्म तस्य **तत्सामर्थ्यं** भोक्तुपभोगयोग्यकरणसामर्थ्यं **कल्पयितुं युक्तम्** । यथा [अ]चेतनस्य चेतनानधिष्ठितस्य तत्सामर्थ्यं न दृष्टं तथा चेतनस्य वितनुकरणस्यापि न दृष्टम् । कल्पनम् अन्यत्रापि समानमिति भावः । § 2526

480/mkj

ननु स्वशरीरकरणसंचरणकरणं प्राणभृतो वितनुकरणस्यैव सर्वस्य दृष्टम्, तत्संचरणकरणे अपरतनुकरणादेरभावात्, तत्तेन दृष्टव्यतिक्रम इति चेत्; उच्यते--स्वापाद्यवस्थस्य विचेतनस्यापि न दृष्टव्यतिक्रमः । नहि तस्यामवस्थायां परेण चेतनाऽभ्युपगम्यते यतस्तदा चेतनः पुरुषः स्यात् । अन्यदा ससाप्य नुपयोगिनी । जैनोपगमा[त्] तदा तदस्तित्वे तदुपगमादेव सर्वस्य शरीरान्तरं कार्म्मणं तत्संचरणकारणं सिध्येत् । अथेश्व[रः] तदवस्थस्य तत्संचरणकारणं ततोऽयमदोषः; तर्हि स एव सतनुकरणप्राणभूतः तत्संचरणकारणमिति नातनुकरणस्य तत्संचरणहेतुत्व दृष्टं कुतः विचेतनातात्प्रेरकस्य ? तथादर्शनात्; सतनुकरणस्यापि । ततो न कश्चिदेतत् । § 2527

अत्राह परः--नेश्वरस्य जन्महेतवो[दो]षाः, तद्रहितस्यापि च संसारनिमित्त[त्व]म् इति; तत्राह--**तत्त्वाद्** इत्यादि । § 2528

३ राज्यादिवा] व
४ ते] अन्ते
४ *] परमात्मा ।
४ वावान्] स भगवान्
६ च] ज्येत ?
७ तेना] न
८ अथासौ] ईश्वरः ।
१० *] नं
१० स्य] प्राप्तं
१३ स्य] उपभोगयोग्यकरणसामर्थ्यम् ।
१५ णं] परलोकशरीरान्तरसंचरणम् ।
१५ भृतो] प्राग्भवीयशरीरादिरहितस्य ।
१८ रेण] बौद्धेन ।
१९ साप्य] [[सती अपि ।]]सत्यप्य
१९ दा] स्वापाद्यवस्थायाम् ।
२० णं] यतः आत्मा परलोके शरीरान्तरं प्रति संचरति ।
२१ स्य] शरीरान्तरसंचरण ।
२२ हेतुत्व] त्वं
२३ नाता] तनता त
२४ श्चिदे] किश्चिदे
२५ स्यापि] दोषरहितस्य, शरीरादिरहितस्य वा ।
२६ त्त्वाद्] तन्वादि

…14 तन्वादिकरणात् सत्त्वान् भवक्लेशेन योजयेत् ।
बुद्धिमानन्यथा कस्मात् स्वयं द्रोहमकुर्वतः ॥ १४
‖§ 2530

…15 सकर्मणां वा जन्तूनां हेतुर्देहादि कर्मणि ।
ईश्वरेच्छाप्रवृत्तिः किं प्राणिस्थन्नेश्वराद्विना ॥ १५
‖§ 2532

मुक्तात्मनां तनुकरणादिदुःखोपयोगमकुर्वतः स्वयं स्वप्रेरकं कर्म ईश्वरोऽवश्यमपेक्षते यतः तदिच्छामात्रं सन्निधापयति तत एव देहादिकं निष्पादयेत् किमीश्वरेच्छया ? तद्वरमीश्वर एव § 2533

**तद्यादी नां करणाद् भवक्लेशेन** संसारदुःखेन **कस्मात्** कुतः कारणात् /ms
न कुतश्चित् **योजयेत् सत्त्वान्** प्राणिनः **स्वयम्** आत्मना **द्रोहम्** अपराधम**कुर्वतः** ईश्वरः, सर्वस्यात्मनो बुद्धिमत्त्वाऽव्यभिचारा[त्] । **बुद्धिमानिति** वचना[त्] निर्दोषया सकलविषयया बुद्ध्या **तद्यात्** गृह्यते जन्तुभिः इत्यादिना । अथापराधमकुर्वतोऽपि तान् तैर्योजयति; तत्राह्यन्य **था** अपराधम् *कुर्वतोऽपि योऽपि योजयति इत्य**न्यथा**शब्दार्थः, प्रेक्षापूर्वकारितानुपपत्तिः । तत्र यद्यसौ तांस्तैर्न योजयति संसाराभावः स्यादि[ति] संसारप्रवृत्त्यर्थं तैस्तान् योजयतीति चेत्; अत्राह— **भवक्लेश** इत्यादि । तादृशेन प्रेक्षापूर्वकारिणा न भवक्लेशहेतुना इति भावः । § 2534

यदि पुनर्मतम्--नाऽकृतापराधतान् स्वयमीश्वर[ः] संसारदुःखैर्जन्तून् योजयति, अपि [तु] भूतैरेव तादृशानि कर्माणि कृतानि यः प्रेर्यमान तैः तद्योजने क्षमय्यौ *दासीन्यं न [ल]भत इति; तत्राह--**सकर्मणां वा** 481/mkj
इत्यादि । **सकर्मणामेव** न निष्कर्मणां **जन्तूनां देहादिकर्मणि हेतुः** । का ? **प्रवृत्तिः** । कस्याः ? **ईश्वरेच्छायाः** अद्येषां तत्प्रेर[क]कर्माभावादिति मन्यते । अत्र दूषणम्--**प्राणिस्थ**मित्यादि । **प्राणिस्थं देहादिहेतुः किन्न ईश्वराद्विना** ईश्वरमन्तरेण **सकर्मणाम्** इति सम्बन्धः । एवं मन्यते--यया प्रत्यासत्त्या कर्माणि ईश्वरं प्रेरयन्ति तयन्ति तया देहादि हादिकुन्विति * । § 2535

---

२ तः] अद्रोहकृत्सु तन्नायं निग्रहस्तेन योजयेत् । कर्तुं बुद्धिमता दैवैरिदमन्यत्र भाषितम् ॥ तन्वादिकरणात्...--न्यायवि० वि० द्वि० पृ० २३१ ।
८ द्यादी] तन्वादी
११ द्यात्] तद्वान्
१२ तोऽपि] सत्त्वान् ।
१२ न्य] तत्राह--अन्य
१२ *] म
१३ तोऽपि] ईश्वरः ।
१४ सौ] ईश्वरः ।
१७ तान्] धकान्
१८ यः] यैः
१९ मान] णः
१९ *] क्षमोऽपि औ
२१ अद्येषां] अन्येषां
२४ न्ति] तयन्ति इति पुनर्लिखितम् ।
२४ *] कुर्वन्तु इति

ननु देहादिकर्मणीश्वरेच्छायाः प्रवृत्तिर्हेतुरिति पूर्वः पक्षः कृतः, दूषणं /ms पुनरीश्वर एवोच्यते, पूर्वपक्षानुसारिणा च दूषणेन भवितव्यमिति चेत्; न; तास्थाता[तात्स्थ्यात् त]च्छब्दमिति इच्छया ईश्वरः तेन च साध्य इति न दोषः । § 2536

कारिकां विवृण्वन्नाह--**मुक्तात्मनाम्** इत्या[दि] । **मुक्तात्मनां तनुकरणादिदुःखोपयोराम कुवर्वकुतः** अकर्मकत्वात्तेषाम्, सकर्मणामेव कुर्वन्ति इत्यर्थः । **कर्म** तत्रोपसी यत इति अध्याहारः । ततः किम् ? इत्याह--**स्वयमित्यादि** । **स्वयं स्वस्य प्रेरकम् ईश्वरोऽपेक्षते कर्मे[त्या]द्यवश्य** नियमेन । तथा वा चेतनंकर्ममाहात्म्याद् नियमेन । **यतः** यस्मात् सामर्थ्या[त्] **तदिच्छामात्रम्** ईश्वरेच्छामात्रं **सन्निधापयति** तत एव माहात्म्यात् देहादिकं **ततो निष्पादयेद**चेतनम् **किम् ईश्वरेच्छया** ? दूषणान्तरमाह—**तद्व[र]मित्यादि** । § 2537

ननु न केनचित् प्रेरितोऽसौ तन्निमित्तम्, अपि तु क्रीडया इति चेत्; अत्राह--**मुक्तात्मनोऽपि** इत्यादि । § 2538

...16 मुक्तात्मनोऽपि देहादि कुर्वन् स्यात् क्रीडनोऽन्यथा ।
बुद्धिमान् योजयेज्जन्तून् कथं भवितव्यतावशात् ॥ १६ ॥§ 2540

यदि...। § 2541

न केवलं सकर्मणाम् अपि तु **मुक्तात्मनोऽप्यकर्मणोऽपि कुर्वन् स्यात्** देहादीः * क्रीडानः **नान्यथा** । न सिष्ट परिहारेण राजा कृतदोषं वधबन्धनादिना योजयन् क्रीडनो नाम । मुक्तात्मनोऽपि तत्करणे सिष्ट न स्यादिति चेत्; किं क्रीडनस्य ।तया तस्यापि करोतीति चेत्; अत्राह--**किं बुद्धिमान्** नैव क्रीडन इति सम्बन्धः । § 2542

किंच, यदि क्रीडनः सन् देहादीन् देहिनां विदधाति महेश्वरः, तदा शुभकारिणोऽपि नरकादिना योजयेद् अशुभकारिणोऽपि स्वर्गादिना इति तदाराधनादिकमनर्थकम्; एतदेवाह--**योजयेदि** [त्यादि] । **योजयेत् जन्तून्** /ms देहादिभिः इति [वि]भक्तिपरिणामेन सम्बन्धः । कुतः ? इत्याह--**भवित-**

६ कुतः] पयोगमकुर्वतः
७ सी] ची
८ श्य] श्यं
९ वा] चा
९ नं] न
१३ प्रेरितोऽसौ] ईश्वरः ।
१९ *] दि
१९ क्रीडा] ड
१९ सिष्ट] शिष्ट
२० सिष्ट] शिष्टः
२१ स्य] डनः स्यात् ?
२१ त] क्रीडया ।

**व्य[ता]वशात्** न शुभाशुभकर्मवशात् **कथं** नैव सङ्करेण योजयेत् इत्यर्थः । § 2543

कारिकार्थं स्पष्टयन्नाह--**यदी**त्यादि । सर्वं गतार्थम् । § 2544
482/mkj

एतेन पद्मविकासकारणभास्वत इव तस्य देहादिकरणे स्वभावः चिन्तितः । कर्मणो जीवस्य वा संसारिण[ः] तत्स्वभावकल्पनापत्तेः । § 2545

ननु देहादीनामारम्भका अवयवा बुद्धिमदधीनाः स्वकारित्वात् तन्त्वादिवत् । तथा, शरीरादयो बुद्धिमत्का[रणकाः स्वा]रम्भकावयवसन्निवेशविशिष्टत्वाद् अचेतनोपादानत्वात् कार्यत्वात् पटादिवत् इति चेत्; अत्राह--**स्थित्वा प्र-वृत्ती**त्यादि । § 2546

...17 स्थित्वा प्रवृत्तिसंस्थानविशेषार्थक्रियादयः ।
अन्यथैवोपपद्येरन् ततो नेश्वरहेतवः ॥ १७ ॥§ 2548

नैव तनुकरणादीनां बुद्धिमद्धेतुकत्वे स्थित्वाप्रवृत्तिः अर्थक्रियाकारित्वं वा हेतुः व्यभिचारात् । नित्येषु [आत्मादिषु] स्वयमभिमतत्वात् । स्वारम्भकाव-यवसन्निवेशनिमित्तत्वं सतनुकरणस्य घटादेरिव हेतुः स्यात् । बुद्धिमत्कार-णपूर्वतामात्रं परेषामिष्टमेव । वितनुकृतेः...तत् । § 2549

नन्वेतद् ईश्वरसाधकं प्रमाणं पूर्वं **जीवोपयोगयोग्यैः** इत्यादिना दूषि[त]मपि किमर्थं पुनर्दूष्यते इति चेत् ? न; पूर्वम् इतरद् वित-नोः शरीरादिकरणसामर्थ्यं निरस्तम्, इदानीं तत्साधनं निराक्रियते इति

---

४ त] सूर्यस्य ।
४ स्य] ईश्वरस्य ।
६ नु] महाभूतचतुष्टयमुपलब्धिमत्पूर्वकं कार्यत्वात्...सावयवत्वात् --प्रश० कन्द० पृ० ५४ । प्रश० व्यो० पृ० ३०१ । वैशे० उप० पृ० ६२ । शरीरानपेक्षोत्पत्तिकं बुद्धिमत्पूर्वकं कारणवत्त्वात्...--प्रश० किरणा० पृ० ९७ । न्यायली० पृ० २० । न्यायमुक्ता० दि० पृ० २३ । बुद्धिमत्कारणाधिष्ठितं महाभूतादिव्यक्तं सुखदुःखादिनिमित्तं भवति रूपादिमत्त्वात् तुर्यादिवत् । धर्माधर्मौ बुद्धिमत्कारणाधिष्ठितौ पुरुषस्योपभोगं कुरुतः करणत्वात् वास्यादिवत् ।...बुद्धिमत्कारणाधिष्ठितानि स्वासु स्वासु धारणादिक्रियासु महाभूतानि वाय्वन्तानि प्रवर्तन्ते अचेतनत्वात् ।--न्यायवा० पृ० ४५७— ६७ । विवादाध्यासिताः तनुतरुमहीधरादयः उपादानाभिज्ञकर्तृका उत्पत्तिमत्त्वात् अचेतनोपादानत्वाद्वा... यथा प्रासादादि ।--न्यायवा० ता० टी० पृ० ५९७ । न्यायमं० पृ० १९४ । कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः । वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥--न्यायकुसु० ५ । १ । तत्राविद्धकर्णोपन्यस्तम् ईश्वरसाधने प्रमाणद्वयमाह--यत्स्वारम्भकेत्यादि । यत्स्वारम्भकावयवसन्निवेशविशेषवत् । बुद्धिमद्धेतुगम्यं तत्तद्यथा कलशादिकम् ॥ द्वीन्द्रियग्राह्यमग्राह्यं विवादास्पदमीदृशम् । बुद्धिमत्पूर्वकं तेन वैधर्म्येणाणवो मताः ॥ तन्वादीनामुपादानं चेतनावदधिष्ठितम् । रूपादिमत्त्वात्तन्त्वादि यथा दृष्टं स्वकार्यकृत् ॥--तत्त्वसं श्लो० ४७-४९ ।
६ स्व] वि
१६ इ] पृ० ४७७ ।
१८ नोः] शरीररहितस्य ।

विभागः । **स्थित्वा प्रवृत्तिश्च** विरम्य कार्ये व्यापारः **संस्थानविशेषश्च** स्वारम्भकावयवसन्निवेशभेदः **अर्थक्रिया** च कार्यः कारणान्ताः **आदयो** येषाम्, **आदि**शब्देन कार्यत्वादिपरिग्रहः, ते, **अन्यथैव ईश्वरा**[भा]वप्रकारेण **उपपद्येरन्** ततो विरुद्धा इति । § 2550

ननु विपक्ष एव भवन् विरुद्धो हेतुः, अयं तु सपक्षेऽपि घटादौ वर्त्तते, व्यभिचारी तु स्यात् । अथ नित्येश्वरविरुद्धे परिणामिनि वर्त्तते इति विरुद्ध उच्यते; तस्यैव साधने कथं विरुद्धः ? नित्यत्वप्रतिज्ञाव्याघात इति चेत्;
/ms न; भवतोऽपि **लोकं खलु अकृत्रिमः** इत्यस्य तत्साधनेऽपि विरोधः । न च सेश्वरसाङ्ख्यवादिनः तत्प्रतिज्ञा । § 2551

483/mkj

चे तस्य परिणामित्वे कार्यत्वेन अन्येश्वरपूर्वकत्वम् अनवस्थाकारि, अन्यथा अनैकान्तिको हेतुः इति चेत्; अयमेव तर्हि दोषोऽस्तु किमपरेण इति चेत्; न; अन्यथा व्याख्यानात् । एवकारो निपातत्वाद् अपिशब्दार्थः, ततः **अन्यथाप्युप च रंस्ततो नेश्वरहेतवः** इत्यर्थः । **नैव तनुकरण** इत्यादि वृत्तिर्भविष्यति । यदि वा, य एवं वदति नित्योऽशरीरो महेश्वरः शरीरादिकारणम् इति; तदपेक्षया एवकारो[ऽव]धारणे, **अन्यथैव** न भाव एवोप**पद्येरन् ततो न ईश्वरहेतवो** विरुद्धत्वात् । एवमनर्थं चेश्वरग्रहणम्, इतरथा बुद्धिमद्ग्रहणं कुर्यात् । अत्र वृत्तिः **स्वारम्भक** इत्यादि । § 2552

कारिकां विवृण्वन्नाह--**तनुकरणे**त्यादि । **स्थित्वा प्रवृत्तिः अर्थक्रियाकारित्वं** वा **[न] हेतुः** । कुतः ? **व्यभिचारात्** । अयमपि कुतः ? इत्याह--**नित्येषु** इत्यादि । **स्वयम्** आत्मना ईश्वरवादिनाऽ**भिमतत्वा[त्]** स्थित्वाप्रवृत्तेः अर्थक्रियाकारित्वस्य च । नित्यग्रहणेन तत्रायम् बुद्धिमत्कारणाभावं दर्शयति, **आत्म**ग्रहणेन स्वकार्येऽनचेतनाधिष्ठितत्वाभावम्, अन्यथा अनवस्था स्यात् । **स्वारम्भकावयवसन्निवेशनिमित्तत्वं स्यात् हेतुः** इत्यनुवर्त्तते । कस्य ? इत्याह--**मतनु करणस्य** । कस्येव ? इत्याह--**घटादेरिव** । अनेन इष्टसाध्यविपर्ययसाधनाद् विरुद्धमुक्तम् । एतेन कार्यत्वादिकं चिन्तितम् । § 2553

यस्तर्हि सशरीरमनित्यज्ञानम् ईश्वरं कारणमिच्छति तस्य कथं दोषः
/ms ? इत्याह--**परेषाम्** इत्यादि । **परेषाम्** जैनैः **इष्टमेव** । किम् ? इत्याह--**बुद्धिमत्कारणपूर्वतामात्रं** तनुकरणभुवनादीनाम् इति सम्बन्धः । **च** शब्दः पूर्वसर्वदूषणसमुच्चयार्थः । एवं मन्यते--ईश्वरस्य ज्ञान-तनुकरणभुवनादीन्युपकरणानि यदि तत्कर्मणो भवन्ति परस्यापि तत एवेति किम् ईश्वरेण ?

---

२ णान्ताः ] कार्यकरणम्, ताः
७ त ] ईश्वरस्यैव ।
८ लोकं ] कः
८ इत्य ] लोगो अकिट्टिमो खलु--मूला० गा० ७१२ ।
१० चे ] नन्वे
१० स्य ] ईश्वरस्य ।
१३ च ] प्युपपद्ये
१६ र्थं ] एवमर्थं
२२ कार्येऽन ] ऽन्य
२२ था ] नित्यस्य ईश्वरस्यापि अन्यचेतनाधिष्ठितत्वे ।
२४ नु ] सतनु
३० णो ] ईश्वरकर्मणः ।
३० प ] अन्यजनस्यापि ।

तदधिष्ठितादिति चेत्; एतदपि नाऽनेन उत्सृष्टम् । ईश्वरादेव इति चेत्; तद्व्याघातः अकर्मवादश्च । अति त्यज्ञानस्य दे श्वरस्य सकलोपकरणादिज्ञानं प्र मा ण सं ग्र हभा ष्ये निरस्तम् । § 2554

किंच, स्वतन्वादिकरणे यद्यत् याव[त्] परं तदपेक्षेत संसारित्वम् इतरवत् । अनपेक्षणे अन्यतन्वादिकरणेऽपि किं तदपेक्षणेन ? वितनुकरणोऽपि स्वस्य देहादिकं सम्पादयन्ति न परस्य इति महती प्रेक्षापूर्वकारिता ! एतदेव दर्शयन्नाह--**वितनुकृतेः** इत्यादि । निगमनमाह— **तदित्यादि** । § 2555

क ण च र स्य अ क्ष पा द स्य च देहादीनाम् ईश्वरं कारणं वदतः स्ववचनविरोधम् इदानीं दर्शयन्नाह--**संसार** इत्यादि । § 2556

...18 संसारसुखसंवित्तिक्षयात् मोक्षात्मकं वदन् ।
देहादेरीश्वरो हेतुर्यदि शास्त्रं विहन्यते ॥ १८ ॥§ 2558

सू त्र का रः आत्मादितत्त्वज्ञानात् निःश्रेयसाधिगमं परं पुरुषार्थमाह । स एव संसारं परं सूचयति, यतः देहादिरीश्वरहेतुः । तदनयोः परस्परविरोधात् सू त्र का र स्य बुद्धिमत्त्वं कथं कल्प्येत ? कः प्रेक्षावानपवर्गमचैतन्यं प्रतीयते तद्विषयं शास्त्रं कुर्यात् यतो नेश्वरो बुद्धिमान् ? तन्न, अन्यस्याऽसंभवात् । § 2559 484/mkj

**देह आदिर्यस्य** सकलकार्यग्रामस्य स तथोक्तः तस्य **ईश्वरो** नित्यो व्यापी यदि हें * **शास्त्रे** क ण च रा देर्वचन स वा **विहन्यते** बाध्यते । किं कुर्वन् ? इत्याह--**वदन्** कथयन् । किम् ? इत्याह--**मोक्षात्कथं** मोक्षमित्यर्थः । कुतः ? इत्याहा **संसार [सुख]संवित्तिक्षयात्, संसारो** जन्ममरणादिप्रबन्धः **सुख**ग्रहणमुपलक्षणं दुःखादेः, **संवित्ति[ः]बुद्धिः** दुःखादिवित्सं चेतैरपि ग्रहणे प्राप्ते तदुपादानं पृथक् मोक्षस्यास्याऽयुक्ततां प्रतिपादयितुम्, ***तासां क्षयात्** । एतदुक्तं भवति--यदा सर्वोत्पत्तिमताम् एकस्वभावो नित्यो व्यापीश्वरः कारणम्; तदा सर्वं सर्वदा सर्वेषामविशेषेण देहादय इति न तत्क्षयात् मोक्षः । तदुक्तं न्या य वि नि श्च ये-- § 2560 /ms

---

२ अति ] अनि
२ दे ] महे
५ णोऽपि ] ईश्वरः ।
६ न्ति ] यति
१८ * ] हेतुः
१८ शास्त्रे ] स्त्वं
१८ स ] नं तदेव
२० थं ] मोक्षात्मकम्
२० इत्याहा ] ह--
२२ णे ] दुःखादिवत् संवित्तेरपि तेनैव ग्रहणे
२२ क् ] पृथक्संवित्तिपदस्य ग्रहणम् ।
२३ * ] संसारसुखसंवित्तीनाम् ।

*कारणस्याक्षये तेषां कार्यस्योपरतिः कथम् । न्यायवि॰ १ । १०३ इति ।§ 2561

भव नित्यस्या भावे या ऽतिशयस्य काचिदपेक्षा इत्युक्तम् । तनु तत्कृय स्यापि स एव कारणं तत्कथं तदनुपपत्तिरिति चेत्; संसारनिर्वाणपुरप्रवेशः । ततो मोक्षमिच्छता प्रकृत्यादिवद् ईश्वरोऽपि तत्कारणं नाभ्युपगन्तव्य इति । § 2562

यदि चैवं व्याख्यायते--**देहादीश्वरो हेतुः यदि** । किं कुर्वन् ? **वदन् ?** किम् ? **शास्त्र[म्]** । किं भूतम् ? इत्याह--**मोक्षाह्वकं** मोक्षस्य [स]न्निधानं यस्मिन्निति । कुतः ? इत्याह--**संसारे**त्यादि । तर्हि **विहन्यते** परस्परविरोधेन खरो * निराक्रियते । तथाहि--सर्वदा आत्मनो देहादिकर्तृत्वं प्रतिपद्यमान एव संसारोदिक्षो *यान् मोक्षह्वकं शास्त्रं वदन् तदभावं वदतीत्येष विरोधः । अथ तच्छास्त्रं तत्प्रणीतं [न] भवत्यन्यतो भावात्; न सर्वमीश्वरकृतम्, तेन व्यभिचारात् । § 2563

अथवा, यदुक्तम् कर्मपरवशः किं बुद्धिमानवेनम तिशेते संसारिणं वाऽऽत्मानम् इति ? तत्त्व परकीयं तद्बुद्धिमत्त्वसाधनमाशङ्क्य दूषयन्नाह--**संसारे**त्यादि । **देहादेरीश्वरो हेतुः यदि** प्रतीयेत [इ]त्यध्याहारः । किं

/ms कृत्वा **तद्धेतुरसौ ?** इत्याह--**संसारसुखसंवित्तिक्षयात्** तत्क्षयमाश्रित्य शुद्ध-सुखसंवित्ती[ः] समाश्रित्य इति यादेव मर्थं च संसारग्रहणम्, इतरथा सुखसंवित्तिग्रहणमेव कुर्यात् । किं कुर्वन् समाश्रित्य तद्धेतुः प्रतीयते ? इत्याह--**वदन् मोक्षात्मकं शास्त्रम्**, मोक्षग्रहणं तदुपज्ञाशेषतत्त्वोपलक्षणार्थम् । अत्र दूषणम् **विहन्यते ईश्वर** इति । तद्यथा--यदि शुद्धं सुखं संवेदनं चेश्वेष्टं तदेव परेषामपि विधातव्यम्, न शरीरादि । यदि पुनः न शरीरा

485/mkj ये च [?] आत्मानोऽपि तदेव कुर्यात् । अथ कर्मणः सहकारिणः पर-त्र भावात्तत्रैव तत्कुर्या[त्] नात्मनि विपर्ययात्; कर्मापि इष्टतया आत्मनि विधातव्यम्, अन्यथा नान्यत्रापि । तस्य तदा [तद]हेतुत्वे कथमव्यभिचारो हेतूनाम् ? अथ[वा] शास्त्र विहन्यत प्रमाणेन इति व्याख्यातव्यम् । अत्र **कः प्रेक्षावान्** इत्यादि वृत्तिर्भविष्यति । § 2564

---

१ का] कार्यस्योपरमः कथम्— न्यायवि॰ ।
२ व] न च
२ स्या] स्त्र
२ या] अन्या
३ त्कृय] ननु तत्क्षय
३ स] ईश्वर एव ।
३ संसार] संसारावस्थायामेव मोक्षः स्यादित्यर्थः समर्थकारणसद्भावात् ।
६ चैवं] वा, एवं
६ देहादी] देरी
७ मोक्षाह्व] त्म
९ *] ईश्वरो
१० *] संसारादिक्ष
१० कं] क्षात्मकं
११ तो] ग्रन्थकारादेः ।
१२ तेन] अन्यकृतशास्त्रेण ।
१३ म] नचेतनम
१४ त्त्व] तत्र
१७ यादेव] यावत् । एव
२१ चेश्वेष्टं] चेश्वरस्येष्टम्,
२२ प] अन्यप्राणिषु ।
२४ त] कर्मणः ।
२४ हेतुत्वे] ईश्वराहेतुकत्वे ।
२५ हेतूनाम्] कार्यत्वादीनाम् ।
२५ शास्त्र] स्त्रं
२५ त] ते

कारिकां व्याख्यातुमाह--**सू त्र का र** इत्यादि । **सू त्र का र**ः अ क्ष पा दा दिः **परं पुरुषार्थमाह** । किम् ? **निःश्रेयसाधिगमं** निःशेषवैशेषिकगुणप्रहाररूपनिर्वाणप्राप्तिम् । कुतः ? इत्याह--**आत्मादेः तत्त्वज्ञानात्,** नेश्वरात्; अन्यथा तद्वैफल्यम् । ईश्वरा यावत् तत्त्वज्ञानोत्पादनात्याया त्मानं क्लेशयति तावन्मोक्षमेव विदधातु इत्येतदनेन दर्शयति । **स एव सू त्र का र**ः **संसारं** मुक्तेः **परं** प्रकृष्टं **सूचयति** । कुतः ? इत्याह--**देहादिरीश्वरहेतुः इति** शब्दोऽत्र द्रष्टव्यः । इत्येवमाह **यतः** । निगमयन्नाह--**तदित्यादि** । यत एवं **तत्तस्मात् अनयोः** सू त्र का र वचसोः **परस्परविरोधात् बुद्धिमत्त्वं कथं** /ms **कल्प्येत सू त्र का र स्य** इति । यदि वा, **सूत्रकारो** महेश्वरः सर्वस्य तत्पूर्वकत्वात् अपरं पूर्ववत् । अयं तु विशेषः **बुद्धिमत्त्वं कथं कल्प्येत** ईश्वरस्य इति । अथवा, अ क्ष पा दा त्यिप्रेप **साधिग[म]माह, देहादिः सूचयती**ति वाक्यभेदेन व्याख्यातव्यम् । **देहादिहेतुरीश्वर**ः इति च पाठोऽस्ति । तत्राप्येवं वाक्यभेदः **तदनयोः ईश्वरकारयोः सूत्रकारये बुद्धिमत्त्वं कथं कल्प्येत ?** परस्य ईश्वरबुद्धिमत्त्वसाधकं **कः** इत्याद्याशङ्कते दूषयितुम्— **कः प्रेक्षावान्** अतीन्द्रियार्थदर्शी **अपवर्गम्** उपलक्षणमेतत् अशेषाऽऽत्मादितत्त्वस्य । किंभूतम् ? **अचैतन्यं** चेतनारहितत्वं **प्रतीयते,** त **तद्विषयं शास्त्रं कुर्यात्** न कश्चित् ? सुगतादेरसम्बंधाभिधायित्वात् क ण च रा दे श्च तदुपदेशादेह समीहितसिद्धेः **यतोऽ**न्यस्य तंप्रतिपन्ना **नेश्वरो बुद्धिमान्** । **यत** इति वाऽऽक्षेपे **यतो न बुद्धिमान् ?** तद्वानेव । अत्र दूषणमाह--**नेत्यादि** । यदुक्तं **तन्न** । कुतः ? उक्तप्रकारा**दन्यस्य** मुक्तिप्रकारस्य **संभवा**वेवमन्यन्ते यथा ईश्वरस्य अनन्तज्ञानस्वभावस्य सतः तद्विवनुक कर्मापाये यदा सर्वज्ञत्वं न कदाचिदाचैतन्यं तथाऽन्यस्यापि । विशेषः पुनरयमेव भवन्स्यापगमेन कस्यचित् स्वाभाविकस्तदपायोऽन्यस्योपायात्, ततोऽन्याविमुक्तिं प्रति यतत इति । § 2565

एतदेव **दर्शयन्नाह--आत्मलाभमित्यादि** । § 2566

२ गुण] बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा विशेषगुणाः ।
४ त] तत्त्वज्ञानं व्यर्थं स्यात् ।
४ रा] रो
४ नात्याया] नाया
१० त] महेश्वरपूर्वकत्वात् ।
१० त्] व्याख्येयम् ।
११ त्यिप्रेप] अ क्ष पा दो **निःश्रेय**
१३ ये] ईश्वरसूत्रकारयोः
१६ त] यतः
१७ म्बंधा] रसम्बद्धा
१७ त] ईश्वरोपदेशादेव ।
१८ देशादेह] देव
१८ न्ना] तत्प्रतिपत्तौ
२० न्ते] **संभवात्** । एवं मन्यते
२१ नुक] तद्विघातक
२२ दाचिदा] द
२२ मेन] मलस्यापगमेन
२३ तोऽन्या] न्यो

...19 *आत्मलाभं विदुर्मोक्षं जीवस्यान्तर्मलक्षयात् ।
नाभावं नाप्यचैतन्यं नचैतन्यमनर्थकम् ॥ १९
॥§ 2568

486/mkj

न वै निर्वाणम् अभवितुः निरात्मकम् अशेषगुणवैकल्यं सात्मकं दृश्य[दर्शनरहितम्] शिष्मः द्रव्यान्तरवत् । किं त- र्हि ? मल[क्षयात्] जीवस्य आत्मलाभं मणिवत् । अन्यथा व्यर्थः प्रयासः । तथा सति नेश्वरो बुद्धिमान् अशेषगुणवैक- ल्यरूपमोक्षाभिधानात्, न कणभक्षादिः तदर्थं तद्वचनात् प्रवृत्तेः, परस्परविरुद्धाभिधानात् बुद्धवत् । § 2569

**जीवस्य आत्मलाभम्** अ[न]न्तज्ञानादिस्वभावलाभं **विदुर्मोक्षं** । तंलाभः /ms * कुतः ? इत्याह--**अन्तर्मलक्षयात्** जीवस्य स्वभावाऽन्यथाभावोऽन्तर्मलम् तस्य क्षयात् । अनेन सामर्थ्याद् द्रव्यमलक्षयोऽप्युक्तः, तदभावे तदभावात् । **नाभावं जीवस्य मोक्षं विदुः** अस्याऽप्रमाणत्वात् । नापि तस्या**चैतन्यं** चेतनार- हितत्वम् । किं **विदुः ? [मोक्षं]** अत एव **न चैतन्यमनर्थकं** ग्राह्यशून्यं तस्य तं विदुः । स्वपरप्रकाशनलक्षणस्य प्रतिबन्धाभावे नितरां लक्षणाभिव्यक्तिः न

---

१ *] तुलना--न हि गुणादिविनाशात् जडः, गुणगुणिविनाशात् शून्यः, भोग्यविरहात् तदभोक्ता--लघी० स्ववृ० श्लो० ७६ । स्वरूपावस्थितिः पुंसस्तदा प्रक्षीणकर्मणः । नाभावो नाप्यचैतन्यं न चैतन्यमनर्थकम् ॥--तत्त्वानु० श्लो० २३४ ।
३ म्] तुलना--तस्मादनादिसन्तानतुल्य- जातीयबीजिकाम् । उत्खातमूलां कुरुत सत्त्वदृष्टिं मुमुक्षवः ॥ --प्रमाणवा० २ । २५६ । तत्र निरवशेषस्याविद्यारागादिकस्य क्लेशगणस्य प्रहाणात् सोपधिशेषं निर्वाणमिष्यते । तत्रोपधीयते अस्मिन्नात्मस्नेह इत्युपधिः । उपधिशब्देन आत्मप्रज्ञप्तिनिमित्ताः पञ्चोपादानस्कन्धा उच्यन्ते । शिष्यते इति शेषः । सह उपधिशेषेण वर्तते इति सोपधिशेषं । किं तन्निर्वाणम् ? तच्च स्कन्धमात्रकमेव केवलं सत्कायदृष्ट्यादिक्लेशतस्कररहितमवशिष्यते निहताशेषचौरगणग्राममात्रावस्थानसाधर्म्येण । तत्सोपधिशेषं निर्वाणम् । यत्र तु निर्वाणे स्कन्धमात्रमपि नास्ति तन्निरुपधिशेषं निर्वाणम् । निर्गत उपधिशेषोऽस्मिन्निति कृत्वा, निहताशेषचौरगणस्य ग्राममात्रस्यापि विनाशसाधर्म्येण । तदेव चाधिकृत्योच्यते... असंलीनेन कायेन वेदनामध्यवासयत् । प्रद्योतस्येव निर्वाणं विमोक्षस्तस्य चेतसः ॥--माध्य० वृ० पृ० ५१९--२० ।
३ ल्यं] नवानामात्मगुणानामत्यन्तोच्छित्तिर्मोक्षः ।--प्रश० व्यो० पृ० ६३८ । यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः । तावदात्यन्तिकी दुःखव्यावृत्तिर्नावकल्प्यते ॥ ननु तस्यामवस्थायां कीदृगात्मावशिष्यते । स्वरूपैकप्रतिष्ठानः परित्यक्तोऽखिलैर्गुणैः ।--न्यायम० पृ० ५०८ । प्रश० कन्द० पृ० २८७ । प्रश० किर० पृ० ६ ।
४ दृश्य] तुलना--तस्मात्तत्संयोगाद् दृश्यस्योपलब्धिर्या स भोगः, या तु द्रष्टुः स्वरूपोपलब्धिः सोऽपवर्गः ।--योगभा० २ । २३ ।
१० *] तल्लाभः
११ द्र] द्रव्यकर्माभावः ।
११ त] अन्तर्मलरूपभावकर्माभावे ।
१२ त] जीवस्य ।
१३ त] जीवस्य ।
१४ तं] मोक्षम् ।

पुनरभावः । नहि भानुः जलदपटलविलये स्वपरप्रकाशनरूपं विजहाति । § 2570

[कारि]कां विवृण्वन्नाह--**नवै** नैव **निर्वाणंशिष्यः** । किम्भूतम् सविते रनुत्पत्तिमात्रस्य । वैशेषिकनिर्वाणाद् विशेषमाह--**निरात्मकम्** । तथा **न चैव निर्वाणं शिष्यः** । किम्भूतम् ? **अशेषविशेषगुणवैकल्यम्** बुद्ध्यादित-त्वम् । सौगतादस्य विशेषमाह--**सात्मकमिति** । कस्येव तद्वैकल्यं नवै ? इत्याह--**द्रव्यान्तरवदिति** । जीवा**द्रव्यादन्यद्** द्रव्यं पृथिव्यादि तद**न्तरम्** तस्येव **तद्वत्** । यथा निःस्वभावताभयात् न पृथिव्यादेरशेषगुणवैकल्यं त-था जीवस्यापि । अनेन परस्य तद्वैकल्य दृष्टान्ताभावमाह । **तथा नवै निर्वाण शिष्मः** । कथम्भूतम् ? इत्याह--**दृश्ये**त्यादि । किंभूतं तर्हि तद्व-वन्तः कथयन्ति ? इत्याह--**किं तर्हि** इत्यादि । **किं तर्हि** किन्तु **जीवस्य** ज्ञस्वभावस्य **आत्मलाभं निर्वाणं शिष्मः** । कुतः ? इत्याह--**मले**त्यादि । 487/mkj
कस्य वा ? इत्याह--**मणी**त्यादि । तदनभ्युपगमे दूषणभावान्यथे *त्यादि । निर्वाणस्यास्याभावप्रकारेण **अन्यथा** मोक्षार्थिनां **व्यर्थः प्रयासः** । सभावस्य नाशयितुमशक्तेः प्रयोजनाभावाच्च इति भावः । एवं जीवस्य आत्मलाभल-क्षणो मोक्षे सति यज्ञातं परस्य तद्दर्शयन्नाह--**तथा सती**त्यादि । **तथा** तेन /ms
प्रकारेण **सति** जीवस्य आत्मलाभलक्षणे मोक्षे **नेश्वरो बुद्धिमान् अशेष-विशेषगुणवैकल्यरूपस्य मोक्षस्या नभिधानात्, न करण भक्षादिः** बुद्धिमान् **तदर्थं तद्वचनात् प्रवृत्तेः** । एतदेव दर्शयन्नाह--**परस्परे**त्यादि । स्वात्मन्यव-स्थानम् आत्मनोऽशेषगुणवैकल्येन, तस्मिन् सति तदभावापत्तेः **विरुद्धं** तदपि तस्य तत्रावस्थानेन, तस्या**भिधानात्** । निदर्शनमाह— बुद्धेन तुल्यं वर्त्तते इति **बुद्धवत्** । § 2571

बुद्धस्याऽबुद्धिमत्त्वं दर्शयन्नाह--**तत्त्वमि**त्यादि । § 2572

---

३ निर्वाणंशिष्यः ] शिष्मः
४ विते ] तस्य ? अभवितु
५ शिष्यः ] ब्रूमः ।
५ शिष्यः ] शिष्मः
७ जीवा ] व
९ अनेन ] वैशेषिकस्य ।
९ ल्य ] ल्ये
१० निर्वाण ] णं
१२ निर्वाणं ] शिवमजरमरुजमक्षयमव्याबाधं विशोकभयशङ्कम् । काष्ठागतसुखविद्याविभवं विमलं भजन्ति दर्शनपूताः ॥--रत्नक० श्लो० ४० । सर्वार्थसि० पृ० १ ।
१३ वा ] वा इवार्थे ।
१३ * ] दूषणमाह--अन्यथा इ
१४ स्य ] अभावस्य
१६ णो ] णे
१८ भि ] स्याभि
१८ ण ] कण
१८ क्षादिः ] कणाद-अक्षपादादयः ।
१९ त ] मोक्षार्थम् ।
१९ त ] ईश्वरवचनात् ।
२० त ] अशेषगुणवैकल्ये सति ।
२० त ] स्वात्मन्यवस्थानस्य अभावः स्यात् ।
२० त ] अशेषगुणवैकल्यम् ।
२१ त्रा ] स्वात्मन्यवस्थानेन ।
२१ स्थानेन ] विरुद्धमिति ।

...20 तत्त्वं शून्यं पदार्थानां येषां ते निरात्मनः ।
निर्वाणं किं विशिष्येत तदर्थश्च तपश्चरेत् ॥ २०

॥§ 2574

पञ्च[स्कन्ध]अपुनर्भवलक्षणं निर्वाणं स्वरसतः सिद्धं यदर्थं तपस्तपेत् । सन्तानस्य असंस्कृतत्वादसत्त्वात् । चरमचित्तस्य अकिञ्चित्करत्वेन अवस्तुत्वे तद्धेतुपरम्परायाः अपि तथाऽभावात् । द्रव्यसन्तानानां स्वहेतुफलप्रवृत्तिरेव लक्षणं परस्परप्रत्ययात्मकत्वात् । कथमन्यथा यस्मिन् सत्येव यद्भाव एव विकारे च विकारः तत् कार्यमितरत् कारणम् इति लक्षणं व्यवतिष्ठेत ? न चापरमन्योऽन्यप्रत्यक्षलक्षणम् । यदि पुनश्चिन्तामयीमेव प्रज्ञामनुशीलयतां विभ्रमविवेकनिर्मलमनःप्राप्तिः निर्वाणम्; तदपि मिथ्याभावनायां न संभवति [कामशोकभयोन्मादादिवत्] नैरात्म्यम्... § 2575

ते तव । कस्य ते ? इत्याह--**निरात्मनः** सौत्रान्तिकादिमनवतो बुद्धस्य इत्यर्थः । ये **पदार्थाः** रूपादयः पञ्चस्कन्धः , बहिरर्थशून्याः विज्ञानसन्तानाः, सकलशून्यता वेति **तेषां तत्त्वं** स्वरूपं **शून्यं** निःस्वभावं निरूपितविधिना तत्तत्त्वस्य घटनायोगात् । तथा सति [किम् ? इ]त्याह--संसार **किम्विष्येत निर्वाणं** तेनैव भिमतरयोः अविशेष इति यावत् । दूषणान्तरमाह--**तदर्थम्** । किम् ? **तपः चरेत्ते** जनः । **च** शब्दो दूषणसमुच्चये । § 2576

[कारि]कार्थं दर्शयन्नाह--**पञ्चे**त्यादि । **निर्वाणं सिद्धम्** । किं रूपमपि त्याह--**[अ]पुनर्भवलक्षणम्** । कुतः ? इत्याह--**स्वरस्वतः** । कारणमन्तरेण कस्यचिदभावे पुनर्भवाभावादिति भावः । **यदर्थ** यस्य निर्वाणस्य 488/mkj निमित्त यस्तस्येत तत्स्वत एव सिद्धम् । सन्तानक्षयार्थं तपस्तप्यत इत्येवं चेत्; अत्राह--**[सन्ता]ने**त्यादि । **असंस्कृतत्वात्** सन्तानिभ्यो भिन्नस्याभिन्नस्य वा **सन्तानत्व स्या सत्त्वात्,** ततः तत्क्षयार्थो यत्नः किंशुकरागवद्विफल एव इति भावः । /ms इतश्च न तत्क्षयार्थो यत्न इति दर्शयन्नाह--**चरमे**त्यादि । यस्य न कदाचिदपरं सजातीयं चित्तं भविष्यति **तच्चरमचित्त**[त] **स्याकिञ्चित्करत्वे**नानर्थक्रियाकारित्वेन **अवस्तुत्वे** सति **तद्धेतुपरम्पराया**

११ तो] [[मतवादिनः ।]]मतवतः
१२ न्धः] न्धाः
१४ संसार] रात्
१५ किम्विष्येत] किं विशिष्येत
१५ योः] अभिमतेतरयोः
१६ रेत्ते] ते तव ।
१८ पि] पम् ? इ
१८ स्व] स
१९ र्थ] र्थं
२० निमित्त] त्तं
२० स्येत] तपस्तपेत्
२१ अ] उत्पादादित्रयरहितत्वात् असत्त्वादित्यर्थः । उक्तं हि भगवता त्रीणीमानि भिक्षवः संस्कृतस्य संस्कृतलक्षणानि । संस्कृतस्य भिक्षव उत्पादोऽपि प्रज्ञायते व्ययोऽपि स्थित्यन्यथात्वमपि इति । न चाविद्यमानस्य खरविषाणस्येव जात्यादिलक्षणमस्ति ।--माध्य० वृ० पृ० १४५ ।
२१ स] क्षणेभ्यः ।
२२ स्या] नस्याऽ
२२ त] सन्तानक्षयार्थः ।

**अपि तथा** तेन अवस्तुत्वप्रकारेण **अभावाव** सन्तानक्षयार्थं तपस्तप्यत इति । ततो विजातीयोगिज्ञानाभावाददोष इति चेत्; अत्राह--**स्वेत्यादि** । स्व वत **हेतुफलं च** स्वोपादानोपादेय इत्यर्थः, ताभ्यां **प्रवृत्तिः** । केषाम् ? इत्याह--**द्रव्यसन्तानानां** गुणपर्यायवन्ति द्रव्याणि, तत्सन्तानानां द्रव्याणां च तत्प्रवृत्तिरेव **लक्षणं** तथैव दर्शनात् । न च यस्य यल्लक्षणं तत्तदभावे भवति, स्ववेदनाभावे ज्ञानवत् । ततो यथा ज्ञानात् तत्संवेदनसिद्धिः तथा द्रव्यात् तत्प्रवृत्तिसिद्धिः इत्यस्य पुनर्दर्शनार्थं द्रव्यग्रहणम् । इतश्च तत्प्रवृत्तिरेव तेषाम्, इत्याह--**परस्परेत्यादि** । **परस्परमन्योन्यं प्रत्ययः** कारणं भावप्रधानोऽयं निर्देशः, **स** एव **आत्मा** स्वभावो येषां तेषां भावात् **तत्त्वात्** तेषां प्रवृत्तिरेव । एवं मन्यते--यथा योगिनोऽन्यस्य वा अचरमचित्तं सहकारिकारणम् अन्यथा विषयत्वायोगात्, तथा सचि त्तस्यापि योग्यन्यो वा, अन्यथा रूपस्य रसं प्रति सहकारित्वेऽपि न रसस्य तत्प्रति तद् इति **एकसास्तामप्य धीनस्य** प्र° वा° ३ । ८ इत्यादि प्लवते । तथा सति उपादानसहकारिप्रत्ययसानिध्य * विजातीयवद् अन्यदवि कार्य केन वार्यते ? § 2577

एतेन वमस्योपादानशक्तिवैकल्यं निरस्तम्, अन्यत्रापि प्रसङ्गात् । अथापि स्यात् सजातीयानुसत्त्वा तस्य तृष्णापि कारणम् इति तदनु[बन्धा]भावादननुसन्तानं [नः] । तदुक्तम्-- § 2578 /ms

*दुःखे विपर्यासमतिः तृष्णा वा बन्धकारिणम् ।
प्राणिनो यस्य ते न स्तो न स जन्माधिगच्छति ॥ प्र° वा° १ । ८३ § 2580

इति चेत्; न; तत्कार्यस्य हीनस्थानानु सत्त्वा नस्य तदभावेऽभावात् न चित्तमात्रस्यस्यातत्कायत्वा हि तृष्णेऽपि ध्यानिनि भावात् । § 2581

अथ मतम्--शुद्धाशयानां बहाव रुणावशात् सदवस्था न तदुक्तम्—**तिष्ठन्त्येव पराधीना येषां तु महती कृपा** । प्र° वा° १ । २०१ सन्तानोच्छेद-

१ व] न्त्र
१ इति] युक्तम् ।
२ विजाती] य
२ योगिज्ञाना] न
३ त] स्वं च तत्
७ त] हेतुफलभावप्रवृत्तिरेव ।
११ चि] स्वचि
१२ वा] कारणम् ।
१२ त] उत्तररसं प्रति ।
१२ त] उपादा नकारणत्वम् ।
१३ प्य] सामग्र्य
१३ इ] रूपादे रसतो गतिः ।
हेतुधर्मानुमानेन धूमेन्धनविकारवत् इति शेषः ।
१४ *] सान्निध्ये
१४ वि] पि
१४ कार्य] र्यं
१६ म] चरम
१७ त्वा] नुबन्धात्
१७ इति] तृष्णानुबन्धाभावात् ।
१८ न्तानं] न अनुसन्तानः अननुसन्तानः, पश्चात् सन्तानाभाव इत्यर्थः ।
१९ म्] कारणम्
२१ त्वा] नानुबन्धसन्ता
२२ हि] त्रस्यातत्कार्यत्वात् वि
२३ हाव] महाक
२३ न] सदावस्थानम्

489/mkj वतां तु तदभावात् सदानवस्थायित्वमिति; तदयुक्तम्; अचेतनवत्तदभावेऽपि स्वहेतोरेव प्रबन्धाऽनिवृत्तेः । तत[ः] स्थितम्--**परस्परप्रत्ययात्मकत्वात्** इति । § 2582

स्यादेतत् चरमचित्तस्योभयशक्तियोगेऽपि परत्र बहुलं तथा दर्शनात्तदनुरूपं या[वद]दृष्टकल्पनं युक्तम्, अन्यथा ज्ञानमनवयवेन स्वावभासि कथं सिध्येत् ? बा[ध]कमन्यत्रापि दर्शितम् रसाद् रूपप्रतिपत्तिर्न स्यात् इति । विजातीयवत् सजातीयं कार्यं स्वयमेव न जायत इति कथमुच्यते--**स्वहेतुफलप्रवृत्तिरेव द्रव्यसत्ता[ना]नाम्** इति ? तत्राह--**कथमन्यथा** इत्यादि । तत्प्रभवेकारेणान्यथा **यस्मिन्** कारणाभिमते **सत्येव** नासति **यद्भावो** यस्य कार्याभिमतस्य भावः उत्पाद **एव** इत्यवधारणीयम् **विकारे च** यस्य विकृतौ च **विकारो यद्विकारः** इति द्रष्टव्यम्, इदम् उपादेयस्य, पूर्वं कार्यमात्रस्य लक्ष[णम्] **तत्तस्य कार्यं** तथेतरत् **कारणम्** इति च द्रष्टव्यम् **इत्येवं**
/ms **लक्षण[णं]** कार्यकारणयोः **कथं** न कथञ्चिद् **व्यवतिष्ठेत ?** यथैव हि चरमचित्ताभिमते समर्थेऽपि स्वयमेव न भवति, तथा अस्मिन् सत्यपि स्वयमेव भविष्यति, यथा सभागमकुर्वतोऽपि विसभागकरणम् तथा विसभागमकुर्वतोऽपि अन्यकरणमिति न सामग्रीजन्यता कार्यस्य, कदाचिदुभयं वा स्वयमेव न भविष्यति, इति कार्यमकुर्वतोऽपि चरमस्य सत्त्वे नित्यस्यापि तमिति भावः । § 2583

यदि मतम्--उपादानेन सहकारिकारणस्ते दानस्यातिशयापादनं न सहकारित्वम् अपि तु सर्वेषाम् एकत्र कार्ये व्यापारः, स चरमस्यापि न विरुध्यते इति; तत्राह— **नचेत्यादि** । **नचापरम्** उक्तादन्यत् **अन्योऽन्यप्रत्ययलक्षणं** किन्तु एतदेव । न हि सदा स्वं नित्यस्य समर्थस्य परापेक्षा इत्युक्तम् । एतेन अन्त्यशब्दस्य ककालीयानारंभे सत्त्वं निरंशंसन्ना सम्बन्धोऽपि चिन्तितः । § 2584

ननु मा भूत् चित्तसन्ताननिवृत्तिर्निर्वाणम्, आस्रवविरोधो निरास्रवचित्तोत्पत्तिः *तत् स्यात्; एतदेव दर्शयति दूषयितुं **यदि** इत्यादिना । **यदि पुनः विभ्रमविवेकनिर्मलमन[ः] प्राप्तिर्निर्वाणम्** । किं कुर्वताम् ? इत्याह-

१ त] महाकरुणाऽभावात् ।
४ प] दीपादौ ।
९ वे] भवा
१२ इ] सत्येव यस्मिन् यज्जन्म विकारे चापि विक्रिया । तत्तस्य कारणं प्राहुः...--प्र॰ वा॰ १ । १८२ ।
१४ ति] कार्यम् ।
१५ था] सजातीयम् ।
१५ तोऽपि] विजातीय ।
१८ मिति] [[सत्त्वमिति ।]]तदिति
१९ स्ते] णस्य तेन वोपा
२२ स्वं] स्वं इति निरर्थकम् ।
२३ कालीयानारंभे] सजातीयानारम्भे
२३ न्ना] निरंशसत्ता
२५ वि] नि
२६ *] निर्वाणम् ।
२७ म] कार्यकारणभूताश्च तत्राविद्यादयो मताः । बन्धस्तद्विगमादिष्टो मुक्तिर्निर्मलता धियः ॥...यथोक्तम्--चित्तमेव हि संसारो रागादिक्लेशवासितम् । तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते ॥--तत्त्वसं॰ प॰ पृ॰ १८४ ।

**-चिन्तामयीमेव** अनित्यत्वाद्यनुमानरूपामेव नान्यां **प्रज्ञां** बुद्धिम् **अनुशील-यताम्** अभ्यस्यताम् इति । तत्र दूषणमाह--**तच्चे**त्यादि । **तदपि** निर्वाणं **न संभवति** इत्युक्तम् । कथम् ? **अतत्त्वभावने**त्यादिना । कस्मिन् सति तन्न संभवति ? इत्याह— **मिथ्याभावनायां मिथ्या** परस्य सर्वस्यम् 490/mkj
नुमानं तस्य **भावनायां** सत्याम् । नहि मिथ्याज्ञा[ना]भ्यासात् तत्त्वज्ञानं कामशोकभयोन्मादादिवत् । § 2585

अपर आह--यथा आत्मन्यवैनतेयेऽपि वैन[ते]योऽहम् इति, /ms
*मिथ्याभावनायामपि विषापहारः तथा प्रकृतायामपि दोषापहार इति चेत्; न; आत्मादिभावनायामपि तत्प्रसङ्गा[त्], निदर्शनस्य चोभयत्र समानत्वात् । *वस्तुप्रतिबन्धात् मिथ्यात्वेऽपि न दोषः इत्यपि न यु[क्तम्, उ]क्तोत्तर-त्वा[त्] तदभावादिति । तन्निर्वाणमुपपन्नं न तत्कारणम् इत्यनेन दर्शयति । स्वयं च निर्बीजीकरणदृष्टान्तेन दीक्षया निर्वाणहेतुत्वं साधयन्तं निराकृत्य विषापहारनिदर्शनेन मिथ्याभावनयाः तत्साधयति इत्ययुक्तकारी । § 2586

ननु मिथ्यात्वाविशेषेऽपि **सर्वं दुःखमनित्यम्** इत्याद्युक्तेः विषयेषु वैराग्य-म् **उपस्थमूत्रछिःवत्** इत्युक्ते[ः] **नात्मावितत्त्वम्** इत्युक्ते[श्च] । ततो नैरात्म्यभावनैव मुक्त्यङ्गमिति चेत्; अत्राह--**[वैराग्य]** **मि**त्यादि । अत्राय-मभिप्रायः--आत्मैकोऽना[दि]निधनाज्ञानस्वभावः, तस्य आगन्तुका रागादयः, सचीरादयश्चेत्युक्तेऽपि तत्र तत्त्वविदो वैराग्यसंभवात्, यथा कस्यचित् म-हाद्भावस्य कुतश्चिदकर्त्तव्ये प्रवृत्तस्य पुनः कुलशौर्यादिवर्णने तत्र वैराग्यम्, अतत्त्वविदो मूत्रच्छिद्रम् इत्युक्तेऽपि न तत्र तत् । गलंगधिरादितच्छिद्रद-

---

१ यीमेव] वृत्तस्थः श्रुतचिन्तावान् भावनायां प्रयुज्यते । धियः श्रुतादिप्रभवा नामोभयार्यगोचराः ॥ ५ ॥ श्रुतादिभ्यः प्रज्ञा प्रभवति [[जायते]] तत्र श्रुतमयी प्रज्ञा नामार्थम्, चिन्तामयी उभयस्य नाम्नोऽर्थस्य च कृते । भावनामयी प्रज्ञा केवलमर्थस्य कृत इति वैभाषिकाः । सौत्रान्तिकाः [[वसुवन्धुः]] श्रुतमयी प्रज्ञा हि आप्तप्रमाणजो निश्चयः, चिन्तामयी प्रज्ञा युक्तिनिध्यान [[युक्त्या नितीरण]]जो निश्चयः, समाधिजो निश्चयः भावनामयी प्रज्ञा ।--अभिध० को० टी० पृ० १६१ ।

४ स्य] बौद्धस्य ।

४ म्] सर्वस्य क्षणिकत्वा

७ तेयेऽपि] गरुडभिन्नेऽपि ।

८ *] गरुडोऽहम् ।

१० *] कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः । अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव ॥--प्र० वा० २ । २८२ ।

१२ निर्बा] र्बी

१२ दीक्ष] क्षा

१२ निराकृत्य] इदानीं नास्ति सामर्थ्यं दीक्षादीनामजन्मने । यदि स्यान्मरणादूर्ध्वमिति नास्ति प्रमेदृशी ॥...निर्ह्रासातिशयात् पुष्टौ प्रतिपक्षस्वपक्षयोः ॥ २६७ ॥ दोषाः स्वबीजसन्ताना दीक्षितेऽप्यनिवारिताः । --प्र० वा०, प्र० वार्तिकाल० पृ० १६० ।

१३ याः] तस्माद् भूतमभूतं वा यद् यदेवाभिभाव्यते । भावनापरिनिष्पत्तौ तत् स्फुटाकल्पधीफलम् ॥--प्र० वा० ३ । २८६ ।

१५ म्] जायते ।

१५ छिः] छिद्र

१५ नात्मावि] दि

१७ ना] न

१८ ची] शरी

१९ स्य] महाकुलोद्भवस्य

२० त्] वैराग्यम् ।

२० धि] गलद्रुधि

र्शनेऽपि तस्य तत्र प्रवृत्तिदर्शनात्, *विपरीतस्य वराङ्गमित्युक्तेऽपि तदिति । *यदिति । § 2587

यदि वा, मदीये पक्षे मिथ्याभावनायां निर्वाणं न संभवति आत्मवादिमते तु तदर्थमनुष्ठानमपि । तथाहि-- § 2588

*यः पश्यतात्मानं तत्रास्याहमिति शाश्वतस्नेहः ।
स्नेहात् सुखेषु तृष्यति तृष्णा दोषास्तिरस्कुरुते ॥ § 2590

प्र° वा° १ । २१९ § 2591

इति चेत्; अत्राह--**चेतनोऽहम्** इत्यादि । § 2592

...21 चेतनोऽहं मम ज्ञानं स्वरूपं कर्मणाऽरिणा ।
तद्वैकल्यमितीहेत कैवल्यार्थमुपायतः ॥ २१ ॥ § 2594

१ 491/mkj

आ[त्मा]त्मीयतत्त्वमजानन्नेव कः दुःख[पीडितोऽपि] हिताहित-प्राप्तिपरिहारयोः प्रवर्तेत मत्तवत् ? यदा पुनः कुतश्चित् अनन्तज्ञानादिकं चैतन्यमात्मतत्त्वं तत्त्वज्ञानेन च तदुपेयं मिथ्यात्वादि कर्म हेयं प्रतिपद्येत तदा आत्मानं परं वा निर्व्याधितं कर्तुकाम इव निसर्गात् तदुपायेऽभियुज्येत नान्यथा । एकान्तपक्षे स्वपरश्रेयःप्राप्तेरत्यन्तमसंभवात् । § 2595

**चेतनः** स्वयंपरज्ञोऽहम् । कुतः ? इत्यत्राह--**मम ज्ञानं स्वरूपं** यतः

/ms अन्यथा घटादिवत्तदयोगात् । § 2596

*ननु ज्ञानसम्बन्धाच्चेतनो न ज्ञानस्य तत्स्वरूपत्वादिति चेत्; *सम्बन्धे तस्य प्राकृनार्थतन रूपपरित्यागे अनर्थकं तत्सम्बन्धकल्पनम्, तत्स्वरूपत एत एव चेतनोपपत्तेः । *तदपरित्यागे न चेतन[ः] स्यात्, तद्वाँस्तु भवेत् । नहि दण्डसम्बन्धाद् देवदत्तो दण्डो भवति । धनुः प्रविशति इत्यादिवत्

१. अनुमानस्य परम्परयावस्तुप्राप्तेः ।

१ नेऽपि] अतत्त्वविदः ।
१ *] तत्त्वज्ञस्य ।
१ स्य] श्रेष्ठमङ्गम् ।
१ क्तेऽपि] वैराग्यम् ।
२ *] यदिति निरर्थकमत्र ।
४ पि] न संभवति इति सम्बन्धः ।
५ ता] त्या
१७ यं] स्व
१९ *] नैयायिकः प्राह ।
१९ स्य] आत्मस्वरूपत्वात् ।
१९ *] ज्ञानसमवाये ।
२० न] प्राक्तनाचेतन
२१ एत] पत्यागत
२१ *] अचेतनस्वरूपापरित्यागे ।
२२ त्] उपचारात् ।

स्यादिति चेत्; न; उपचारमात्रं दृढप्रत्ययवर्जितं भवेवं । कथं च भिन्नज्ञानं [तस्य] ? सम्बन्धसिद्धिः । तदुपचाराच्चेत्; सोऽपि कुतः ? तत्सम्बन्धात्; अन्योऽन्यसंश्रयः । § 2597

किञ्च, ज्ञानस्यापि स्वग्रहणविक[ल]स्य कुतश्चेतनता, यतोस्योपि तत्सम्बन्धाच्चेतनः स्यात् । अर्थग्रहणादिति चेत्; न; स्वग्रहणाभावे तदयोगात् । स्वपरप्रकाशनं वरमात्मन एव कल्पितं किमपरेण ज्ञानेन ? ततः स्थितम्--**मम ज्ञानं स्वरूपम्** इति । § 2598

*सर्वस्य सर्वदर्शित्वं चेत्; अत्राह--**कर्मणा** [इ]त्यादि । **कर्मणा** । किम्तेन ? **अरिणा** तत्स्वरूपनाशकत्वाद् वैरिणा । **तद्विकल्पं** तस्य ज्ञानस्वरूपस्याऽसम्पूर्णत्वम् नियतप्रकाशनरूप**मिति** हेतोः **कैवल्यार्थं** केवलस्य कर्मविकलस्य आत्मनो भावः कैवल्यं तदर्थम् । **उपायतः** सम्यग्दर्शनादिकमुपादाय माश्रित्य **ईहेत** यतेत । को हि नाम ज्ञानवा[न् आ]त्मनो वैरिणं सोपायविलयं वीक्ष्यमाणोऽपि उपेक्षते तत्कृतागन्तुकसुखलेशपाशवशात् । § 2599

कारिकां व्याख्यातुमाह--**आत्मे**त्यादि । अत्रायमभिप्रायः--अतत्त्वज्ञो वाऽऽत्मदर्शी तदर्थं न प्रवर्त्तेत, तत्त्वज्ञो वा ? त[त्र] प्रथमपक्षे सिद्धसाधनमित्याह--**कोनत्रवे प्रवर्त्तेत** ? किम् ? इत्याह--**आत्मीयतत्त्वम्** /ms
अनन्तज्ञानादिकं यावद्द्रव्यभावित्वादिति निरूपयिष्यते, न शरीरादिकं तत्प्रभवं वा सुखादिकं विपर्ययात् परतन्त्रत्वाच्च । के *त्याह--**हिते**त्यादि । **हितं** निर्वाणं तत्साधनं च **अहितः** संसारः तद्धेतुश्च तयोर्याथासङ्ख्येन **प्राप्तिश्च परिहारश्च** तयोरिति । क इव ? इत्याह--**मत्ते**त्यादि । § 2600

ननु दुःखानुभवे तदजानन्नपि तत्र प्रवर्त्तत इति चेत्; अत्राह--**दुःखे**त्यादि । नहि बुभुक्षापीडितोऽपि बालकः उदनं तदुपायं च जानन् तत्र प्रवर्त्तते 492/mkj
। द्वितीयपक्षे आत्मदर्शी तदर्थं प्रवर्त्तते; इत्याह--**यदा** [इत्यादि] । **पुन**रिति पक्षान्तरद्योतने, **कुतश्चिद्** अनुमानादिप्रमाणा[त्] **प्रतिपद्येत** पुरुषः । किम् ? इत्याह--**आत्मतत्त्वं** जीवस्वरूपम् । किं तत् ? इत्याह--**चैतन्यम्** । § 2601

ननु तत् सर्वदा प्रतिपद्यते सर्वोऽपि, इति स तदर्थं प्रवर्त्तेत इति चेत्; अत्राह--**अनन्तज्ञान** इत्यादि । चैतन्यविशेषणम् अन्यत् । तत्किम्

---

१ वेवं ] भवेत्
१ भिन्न ] न्नं
२ न्ध ] न्धा
२ सिद्धिः ] द्धेः
२ न्धात् ] चेत्; ।
४ तोस्योपि ] यतोऽन्योऽपि
५ णाभावे ] अर्थग्रहणायोगात् ।
८ * ] तथा सति ।
९ किम् ] म्भू
९ ल्पं ] तद्विकल्यम्
१२ मुपादाय ] मुपाय
१३ वीक्ष्य ] क्ष
१७ वे ] कोऽजानन्नेव
१८ रीरादिकं ] आत्मीयं तत्त्वम् ।
१९ यात् ] यावदात्मद्रव्यं तावत् शरीरादिकं न भवति ।
१९ त्वाच्च ] इन्द्रियाद्याश्रितत्वात् ।
१९ * ] क्वे
२३ नं ] ओदनं
२७ त ] चैतन्यम् ।

? इत्याह--**उपेयम्** । तथा **यदि पुनः प्रतिपद्येत,** किम् ? इत्याह--**कर्म** । किंभूतम् ? **हेयम्** । केन ? इत्याह--**तत्त्वज्ञान** इत्यादि । यथा च तत्त्वे यं तथा प्रतिपादयिष्येते । पुनरपि किंभूतं तत् ? इत्याह--**मिथ्येत्यादि** । तत्प्रभवं तदात्मा चित्वा तदुपयुक्तमदिरादिवत् । तन्न कुतश्चिदिति । तत्कुतो जायते ? इत्याह--**निसर्गादितवा** * **तदुपाये** निर्वाणोपाये **भिश्र-क्ष्येत** * । क इव ? इत्याह--**आत्मानमित्यादि** । [आत्मानं] स्वं **परं वा निर्व्याधितं कर्तुकाम इव,** वैद्य इव इत्यर्थः । यथा आत्मानं पश्यन्नपि वैद्यः तत्त्वदर्शी स्वस्य परस्य ताधारो हानार्थं तदुपाये वमानादौ तदाधिकं सुखं मन्यमानः प्रवर्त्तते तथा प्रकृतोऽपि पुरुष इति, न्यषा नापरेण
/ms प्रकारेण तत्राभियुज्येत । कुतः ? इत्याह--**एकान्तपक्षे** [नित्यैकान्तपक्षे] क्षणिकैकान्तपक्षे च **स्वपरयोः श्रेयसो** मुक्तेः **प्राप्तेरत्यन्तमसंभवात्** । § 2602

एतदपि कुतः ? इत्याह--**चित्तेत्यादि** । § 2603

...22 चित्तस्वपरसन्तानभेदाभेदाव्यवस्थितेः ।
मैत्र्यादिर्विशेषेण क्रियासङ्करशङ्किनाम् ॥ २२ ॥§ 2605

स्वसंवेदनमेव लक्षणं चित्तस्य, अन्यथा सर्वचित्तचैत्तानामात्मसंवेदनं नोपपद्यते । न चैकान्तस्वसंवित्तिश्चित्तस्य भ्रान्तेरभावप्रसङ्गात् । यथादर्शनम् अनेकान्तात्मकत्वात्, यथाकूतं तत्त्वस्य स्वतः प्रतिपत्तेः । परतश्च न संभवत्येवाधिगतिः, ज्ञानान्तरस्य अतद्विषयत्वात् अनन्यवेद्यनियमात् अनेकान्तस्वरूपस्यापि ग्रहणाविरोधात् । तन्न स्वपरचित्तव्यवस्था । विषयाकारविवेकस्य स्वतोऽबोध्यस्य परत्वप्रसङ्गात् । परचित्तस्यापि सहोपलम्भादिभिः स्वस्वभावापत्तेः । चित्तानां कुतः सन्ततिः कार्य...स्वपर...यस्मिन् सति...खरविषाणवत् । न च...ततो नैरन्तर्यम् । कार्य...तथा चात्यन्तमसतः कार्यत्वं प्रतिषिद्धं वेदितव्यम् । कथं पुनः सतः कार्यत्वं कृतत्वात् कारणवदिति ? एकान्तानङ्गीकरणादनुकूलमाचरसि । यथैव तर्हि सत्कार्यं तथैव नोत्पत्तुमर्हति निष्पन्नत्वात्, यथा चासत् तथा च अत्यन्तमसंभवात् खपुष्पवत् इति । तच्चेदं कृतोत्तरम् । न क्वचिदेकान्तदर्शनं यदवलम्ब्य अनेकान्तसिद्धिः संशयादिना उपालभ्येत । तदपह्नवे क्व कस्य करणादयः
493/mkj ? स्वपरसन्तानभेदानुपलब्धौ सत्त्वभेदाभावात् । सत्यां च स्वपरसन्तान व्यवस्थायां कथमेवं पराप्रत्यक्षत्वात् कार्यादृष्टेश्च प्रमाणाभावात् गुणदोषान् कथञ्चिदजानानोऽयं यथाविषयं मैत्र्यादीन् भावयेत् ? § 2606

---

३ च] चैतन्य-कर्मणी ।
३ यं] यं इति व्यर्थम् ।
४ चित्वा] तदात्माऽनित्यत्वादिकं
५ *] **निसर्गादित्यादि, तदा**
६ *] अभियुज्येत
८ ताधारो] वा बाधारोग
८ मानादौ] वमनादौ
८ दा] द
९ षा] **नान्यथा**

**चित्तं** द्विविधम्--क्षणिकन व्यापकं सौकतकल्पितम्, नित्यं व्यापकं च साङ्ख्यवेदान्तवाद्यभिमतम्, तत्त्व **स्वे परो व** * **सन्तानश्च** सभागहेतुफल-प्रबन्धः, तदभावे विसभागप्रसन्तानो दूरोत्सारित एवं तदपेक्षत्वात्, तस्य **भेदश्च** प्रव्यादी नां नानात्वम् **अभेदश्च** तेषामेव एकत्वम् तेषाम् **अव्यवस्थितेः** कारणात् **एकान्तपक्षे** इति सम्बन्धः । तथाहि--निरंशं न किञ्चित् सदपि चित्तं स्वतोऽध्यक्षतः प्रतीयते । अत एव नाऽनुमानतोऽपि; हर्षविषादाद्य-नेकाकारविवर्त्तस्य स्वयमनुभवात् । विचारितं चैतद् विचारयिष्यते च । *तदप्रतीतौ च स्वपरेत्यादिव्यवस्थापि दुर्घटा । न केवल तत्र श्रेयःप्राप्तेरत्य-न्तमसंभवः किन्तु मैत्र्यादेरपि इति दर्शयन्नाह--**मैत्र्यादि**रित्यादि । न केवलं **आदि**शब्देन करुणादेरेव परिग्रहः किन्तु दीक्षादेरपि, स त्क सिष्ठे ऽन्यत्र वा न क्वचित्, अनुष्ठानवतः कस्यचिदभावादिति भावः । युक्त्यन्तरमाह--**विशेषेण**त्यादि । न्यायातिरेकमतेन दर्शयति । **क्रिया** व्यापारव्याहारादिः तस्याः **सङ्करः** सरागे वीतरागेचेष्टासंभवः *तत्र वा सरागाचरणंसंभवः तं किंतुनां शीलानां सौगतानाम् । क्व मिथ्यादौ * **मैत्र्यापि ?** तस्य सतो ज्ञातुमशक्यत्वात् । यदि वा तच्छङ्किनां साङ्ख्यानाम् । ते हि **सर्वं सर्वत्र विद्यते** *इति वदन्तः मैत्रीविषये उपेक्षाविषयं किन्न शङ्कते । एतेन वैशेषिकादिरपि चिन्तेतः गुणिनोर्भेदैकान्ते शिष्टत्वादिगुणाधारनियमाऽशिष्टेः । § 2607 /ms

कारिकार्थं कथयितुमाह--**स्वसंवेदनमेव** इत्यादि । अयमेवकारः स्थान-त्रये द्रष्टव्यः— **स्वसंवेदनमेव लक्षणमेव चित्तस्यैव** इति । § 2608

ननु परसंवेदनमपि तस्यास्ति तदपि लक्षणं कस्मान्नोक्तमिति चेत्; अव्यापकत्वात्, सुखादावसत्त्वात् । तदेव तल्लक्षणं कुत इति चेत् ? अत्राह--**सर्वे**त्यादि । स्वसंवेदनमेव चित्तस्यैव लक्षणमेव इत्यस्याभावप्रकारेण **अन्य-था आत्मसंवेदनं** स्वरूपग्रहणं **नोपपद्यते** तदेकार्थमसमर्थ समवेतानन्तर-ज्ञानेन अर्थापत्त्या वा तद्ग्रहणे अनवस्थाप्रसङ्गादिति भावः । अनेन तल्लक्ष-णमेव इति कथितम् । केषाम् ? इत्याह--**सर्वेषां चित्तानां** नीलादिज्ञानानां

१ न] कम
२ *] तद्य **स्वः परश्च**
३ स] गस
३ एवं] एव
४ व्यादी] पृथिव्यादी
८ *] निरंशचित्ताप्रतीतौ ।
८ ल] लं
१० सिष्ठे] सः शिष्ये
१२ म] मे
१३ रागे] ग
१३ *] वीतरागे ।
१३ णं] ण
१४ किंतुनां] **शङ्कितुं**
१४ *] शिष्यादौ
१४ मैत्र्यापि] दिः
१६ *] किं सांख्यमतमवलम्ब्य सर्वं सर्वत्र विद्यते । --प्र° वार्तिकाल° पृ° १८० ।
१६ ते] न्ते
१७ चिन्तेतः] चिन्तितः
१७ गुणिनो] गुणगुणिनो
१७ माऽशिष्टेः] मादृष्टेः
२० पि] आत्मनः ।
२३ र्थ] तदेकार्थ
२४ ज्ञानेन] तदात्मसमवेतद्वितीयज्ञानेन । नैयायिकापेक्षया ।
२४ त्त्या] मीमांसकापेक्षया ।

**चैत्तानां** सुखादीनामेव इत्यवधारणीयम्, *अन्यस्यापि प्रसङ्गात् । तदात्मवेदनाभावे च न विशेषव्यवस्था इति मन्यते । भवन्तस्य तदेव लक्षणमिति चेत्; अत्राह--**न** इत्यादि । **न च नै चि कान्त स्वसंवित्तिः** स्वस्य स्वयं गृहीतिश्चित्तस्य किन्तु कथञ्चि[दि]त्यर्थः । कुतः ? इत्यत्राह--**भ्रान्ते**रित्यादि । 494/mkj साङ्ख्यस्य पुरुषश्चेतनः यथा आत्मानं सचेतनादिरूपतया स्वलयमवगच्छति तथा चेत् प्रकृतिविविक्तया ; तर्हि सर्वदा प्रकृतिपुरुषान्तरतत्त्वपरिज्ञानाव कुत इयं भ्रान्तिः-- § 2609

*तस्मात्तत्संसर्गादचेतनं चेतनवदिह लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः ॥ सांख्यका० २०
इति§ 2611

यतः संसार स्यात् ? नहि निरंशयोस्तयोः संयोगेऽपि ततथातेदने /ms उपचारभ्रान्तिसंभवः । प्रकृतेः सा भ्रान्तिः न पुरुषस्य इति चेत्; तस्याः स्वरूपावेदने कुतस्तद्व्यवस्था ? न ह्यचेतनमेवमवैति--ममात्र भ्रान्तिः इति । *तद्वेदने पुरुषकल्पनाऽनर्थक्यम् । पुरुषोऽवैति चेत्; न; तेन प्रकृतेरवेदने तदयोगात् । वेदने यथा तस्यैव स्वप्रधानग्रहणं यथार्थम्, अयथार्थग्रहणं कुतश्चित्तथास्तु किं प्रकृतेर्विभ्रमकल्पे न । कथमेकस्य विभ्रमेतरकल्पनम् ? कथं प्रधानस्य ? परिणामित्वात्; पुरुषेऽपि तत्कल्पने को विरोधः ? ततः स्थितम्--**नचैक्यम्तेन स्वसंवित्ति[ः] भ्रान्तेरभावश्च * प्रसङ्गात्** इति । § 2612

एतेन ब्रह्मवाद्यमितिनिस्तः ब्रह्मणोऽप्येकान्तेन स्वसंवित्तिसंभवे कुत ए[ष] नगरा[रा]मादिविभ्रमः तेन तदवेदनात् ? स्वयं वेदने ब्रह्मणो वैकल्यमिति । § 2613

यस्तु मन्यते--[अ]नेकक्षणस्थायि स[त्] न क्षणिकं ज्ञानम् आत्मनि समवेतम्, तत्र समवेताः सत्तावय इति; सोऽप्यनेन योस्टष्टो यतः अर्थग्रहणरूपवदनेकक्षणसम्बन्धिवंस्यापि स्वत एव ग्रहणे कुतस्तत्र भ्रान्तिः ? यतस्तद्व्यवच्छेदार्थं शास्त्रप्रणयनम् । § 2614

१ *] अन्यथा ।
२ स्य] भवतु तस्य
३ कान्त] नैव **एकान्ते**
४ स्य] तिः **चित्तस्य**
५ य] स्वय
६ चेत्] प्रकृतिभिन्नरूपेण ।
६ या] क्तया
६ दा] प्रकृतिपुरुषयोर्भेदपरिज्ञानात् ।
६ रिज्ञानाव] नात्
१० योः] प्रकृतिपुरुषयोः ।
१० ने] तथा भेदज्ञाने
१३ *] ममेति स्वरूपसंवेदने ।
१३ पुरुषोऽवैति] स्वस्वरूपम् ।
१४ स्यैव] स्वज्ञानग्रहणं ।
१५ न] कल्पनेन
१५ स्य] पुरुषस्य ।
१६ स्य] एकस्य ।
१६ पुरुषेऽपि] परिणामित्वकल्पने ।
१७ म्तेन] नचैकान्तेन
१७ *] वस्य
१९ मितिनिस्तः] वाद्यपि निरस्तः
२० वैक] फ
२३ य] सत्तादयः
२३ ष्टो] नोत्सृष्टः[[खण्डित इत्यर्थः ।]]
२४ न्धिवं] त्व

एतेन तस्यात्मनि तत्र सत्तादीनां समवेतत्वं चिन्तितम् । § 2615

किंच, सत्तादेस्ततो व्यतिरेके किं तस्य रूपं यस्त्वयं जानीयात्, तेनचा * संबंध्ये त ? अर्थग्रहणमिति चेत्; **अर्थग्रहणं बुद्धिः** न्यायभा° ३ । २ । ४६ इति वचनात् तदपि ततो विभिन्नं कुतो न भवति सत्तावत्तत्रापि भेद-प्रत्ययस्याः यः अस्याः बुद्धेरिदमर्थग्रहणम् ? अस्या इदम् इति भावात् बुद्धिरेव तद्रूपं यथा नीलमेव नीलरूपं जातिरेव जातिरूपमिति चेत्; /ms उच्यते--अथ केयं बुद्धिरित्यर्थःग्रहमिति * चेत्; पुनः पुनसादेवावर्त्तत इति चक्रकम् । अपि च, § 2616

समवायस्य तेनैव वेदने विभ्रमः कुतः ।
तत्र तद्धेतुनाभावे सम्बन्धित्वगतिः कुतः ॥§ 2618

न च सत्तादिकं सम्बन्धशून्यं सम्बध्यते तया ।
स्वरूपं संविदक्षोपि यतः कल्पनमर्हति ॥§ 2620

495/mkj

स्वरूपेदगृहीते चेद् विभ्रमः स्यात्ततोऽपरः ।
तस्यापि सर्वतो वित्तौ दूषणं तदवस्थकम् ॥§ 2622

ततो यत्किंचिदेतत् । सौगतमतं तु **वित्तेर्विषयनिर्भासविवेकानुपलम्भतः** सिद्धिवि° १ । २० इत्यादिना चर्चितम् । § 2623

इतश्च एकान्तपक्षे **न चैकान्तेन श्वसंवित्तिश्चित्तस्य** इति दर्शयन्नाह--**य-थादर्शनमित्यादि** । दर्शनानतिक्रमेण **यथादर्शनम् अनेकान्तात्मकत्वात्** य-थाकथं यथापराभिप्रायं **तत्त्वस्य** चित्तस्वरूपस्य **[स्वतः]अप्रतिपत्तेः**, कुतः **स्वरूपस्य स्वतो गतिः** प्र° वा° १ । ६ ? अनेन-- § 2624

*यथादर्शनमेवेयं मानमेयफलस्थितिः ।
क्रियतेऽविद्यमानापि ग्राह्यग्राहकसंविदाम् ॥§ 2626

प्र° वा° २ । ३५७ इत्याद्यपि § 2627

अनेकान्त एव संभवति इति दर्शयति **यथाकूतम्** इत्यादिना । परस्य धर्माप्य सिद्धेः अनुमानाद्यभावात् कुतश्चिन्तामयी भावने[त्या]दि ? § 2628

---

१ एतेन] ज्ञानस्य ।
२ तो] ज्ञानात् ।
२ यं] यत् स्वयं
३ *] वा
३ संबंध्ये] सम्बध्ये
४ नात्] अर्थग्रहणमपि ।
७ *] बुद्धिरिति ? अर्थग्रहणमिति
७ सादेवा] नस्तदेवा
१० द्धेतुना] ता
११ त्तादिकं] दि
१२ क्षोपि] दन् कोऽपि
१३ रूपेद] ऽप्य
१७ श्व] स्व
१९ थं] यथाकूतम्
२५ र्माप्य] धर्म्माद्य

स्यान्मतम्--न कस्यचिद्विज्ञान[स्य] स्वतः संवित्तिः, आत्मनि क्रियाविरोधात् । [नापि] परतः, तस्य अज्ञेयत्वाद् घटादि[वदि]ति; तत्राह--**परतश्चे**त्यादि । **च** शब्दः समुच्चये । न केवलं **यथाकूतं तत्त्वस्य स्वतः प्रतिपत्तिर्नास्ति** किन्तु **परतश्च** प्रस्यक्षोत्तराद् अर्थापत्त्यादेर्वा त्र * /ms **संभवत्येवाधिगतिरि**[ति] । कुतः ? इत्याह— **ज्ञानान्तरस्य** इत्यादि । विवक्षित**ज्ञानादन्य**[त्] प्रत्यक्षादि **तदन्तरं तस्यान्तद्विषय** *त्वात् निरंशदित्ता विषयत्वात् । एतदुक्तं भवति--स्वात्मनि क्रियाविरोधान्न तत्र ज्ञानप्रतिभासः, परत्रापि [न] निरंशस्य प्रतिभास इति कथोच्छेदः । हेत्वन्तरमाह--**अनन्यवेद्य** [इत्या]दि । यमाच्च न विद्यते अन्यद् वेद्यमस्य नान्यस्य वेद्यं तस्य **नियमात्** । अथवा अन्यचे तद्वेद्यं च तस्य नियमो तदेव गृह्यते ज्ञानेन, पुनरस्य तत्रा भिसम्बन्ध तस्मात्, अनेकान्तेस्वरूपस्यापि ग्रहणविरोधात् । कथमन्यथा घटादिवर्त्तनार्थ ग्रहणम् ? प्राणादिवदसपक्षस्याप्यस्य गमकत्वमुक्तम् । § 2629

निरंशज्ञानसंवित्तौ यज्ज्ञानान्तरकल्पनम् ।
तदनर्थकमे[व] स्यादन्यतः कार्यसिद्धितः ॥ इत्यनेन दर्शयति
|§ 2631

यदि वा, अन्यस्य वेद्यं तस्य नियमः--ज्ञानान्तरेणैव ज्ञानं वेद्यते, न स्ववेद्यं नापि परोक्षं यत्त्व त्तेनार्थाग्रहणा[त्] । नान्यवेद्यनियमोऽ**नन्यवेद्यनियमः** तस्मात् । प्रथमद्वितीये विषमदोषत्वात्, अन्यथा किं द्वितीयकल्पेन ? चद्वा यदुक्तं साङ्ख्येन बुद्धि[ः] प्रत्यक्षा परोक्षा परोक्षः पुरुष इति; तत्राह--**अ[न]न्यवेद्यनियमात्,** वनान्यवेद्योरे नन्यवेद्यः पुरुषः तस्य नियमात्, ततश्च स्वतः परतश्च तस्याग्रहणात् सर्वाग्रहणमेव । § 2632

496/mkj

एतेन वेदान्तपक्षोऽपि चिन्तितः । § 2633

निगमयन्नाह--**तत्रे**त्यादि । यत एवं तत् तस्मात् **न स्वपरचित्तव्यवस्थेति** । § 2634

स्यान्मतम्--न चिन्तितं तदन्तरावेद्यं नापि परोक्षमेव सचेतनादिस्व-
/ms भावेन स्वयं प्रत्यक्षत्वात्, [इत्यत्राह--विषयेत्यादि] **विषयाकारा[र]विवेकः**

१ आ] स्वात्मनि ।
२ अ] ज्ञेयभिन्नत्वात् ज्ञानत्वादित्यर्थः ।
४ राद्] प्रत्यक्षादुत्तरात्
४ *] न
६ *] तस्य अतद्विषय
७ दित्ता] निरंशादितत्त्वा
९ माच्च] यस्माच्च
१० चे] अन्यं च
१० मो] मः
११ स्य] अन्यवेद्यनियमात् इत्यस्य ।
११ त्रा] न[[नञ्समासे सति, अनन्यवेद्यनियमात् इति सिध्यति ।]]त्राऽ
११ न्ध] न्धः
११ अनेकान्ते] न्त
११ ण] णा
१२ र्त्तनार्थ] वत् तेन अर्थ
१२ स] सपक्षरहितस्य ।
१७ व] अ[[सन्तानान्तरवत् ।]]न्यव
१९ रोक्षा] परोक्षा इति निरर्थकम् ।
२० वेद्योरे] न अन्यवेद्यः अ
२५ चिन्तितं] चित्तं
२५ त] चित्तान्तरवेद्यम् ।
२५ रा] न्तर

स्थूलस्तम्भाद्याकारशून्यत्वम्, यदि वा, विषयः प्रधानं तस्याकारः कर्तृत्वादि तेन विवेकः तस्य । किंभूतस्य ? इत्याह--**स्वतोऽचोद्यस्य** परोक्षस्य इत्यर्थः, **परत्वप्रसङ्गात्** सं चित्ते * सकाशादमत्त्वे प्राप्ते तत्र तद्व्यवस्थेति तस्य ततोऽन्यत्वे संविद्विषयाकारयोः तादात्म्यप्रसङ्गादिति भावः । § 2635

इदमपरं व्याख्यानम्--विषयो ज्ञानत्वादि ज्ञानवेद्यः ततो भिन्नः ततो विवेकस्येति । शेषं पूर्ववद् इति । § 2636

एतेन ब्रह्मणो[ऽ]विद्याविवेकोऽपि व्याख्यातः । § 2637

एतेन **अविभागोऽपि बुद्ध्यात्मा** प्र० वा० २ । ३५४ इत्यादि मतम्; तन्न; न विषयाकारादन्या संवित्ति[ः] नीलाद्याकारस्यैव तत्त्वात् । तच्च सहोपलम्भनियमादिभिः इति कश्चित् सौगतः; तत्राह--**परचित्तस्यापी**त्यादि । न केवलं विषयाकारस्य अपि तु **परचित्तस्यापि स्वस्वभावापत्तेः** विवक्षितज्ञानरूपतापत्तेः **तत्तद्** ***व्यवस्था** इति । कैः ? इत्याह— **सहोपलम्भनियमादिति** । गदि शब्दा[त्] सहोत्पत्त्यादिभिरिति । § 2638

ननु विषयाकारस्य विज्ञानाद एकस्य नानेकत्वमिति चेत्; अयमयतो दोषोऽस्तु । इतश्च न स्वपरचित्तव्यवस्था इति दर्शयन्नानाम् इत्यादि । [चित्तानां] चेतसा **कुत[ः] सन्ततिः ?** कुतो न स्यात् ? इत्याह--**कार्ये**त्यादि । ततः किं जातम् ? इत्याह--**स्वपरे**त्यादि । तदसंभवं दर्शयन्नाह--**यस्मिन् सती**त्यादि । विनष्टात् कारणात् तत्संभव इति चेत्; अत्राह--**नर विषाणस्येव** इत्यादि । न सति नाप्यसति कारणे तदसंभवः किं तद्यथेति चेत्; अत्राह--**न चे**त्यादि । गत्यन्तरस्यादृश्यस्यापि तर्कतोऽभो *वस्तस्य देशाद्यपेक्षा[ऽ]योगात् । अनन्त[रं] कारणमिति चेत्; अत्राह-- /ms **ततो नैरन्तर्य**मित्यादि । यतः खरविषाणस्येव असतः कथं हेतुत्वम् ? ततो नैरन्तर्यमयुक्तत [कुतः ?] इत्यत्राह--**कार्ये**त्यादि । नहि अत्यन्ताऽनन्तरविनष्टयोः कश्चिद्विशेष इति भावः । चिरविनष्टं तु कारणं नित्य[म]विशिष्टमिति न तदनपेक्ष्यते । तन्नासत्करणात् । नापि कार्यमिति दर्शयन्नाह--**तथा च** इत्यादि । [तथा च] तेनैव प्रकारेण **अत्यन्तमसतो** हेत्वस्थायामविद्यमानस्य **कार्यत्व प्रतिषिद्धम् वेदितव्यम् खरविषाणस्येव** इत्यनुवर्त्तते । § 2639

२ स्य] ऽवेद्यस्य
३ *] संवित्तेः
३ त्वे] दन्यत्वे
५ यो] ज्ञानत्वादि इति निरर्थकम् ।
८ इ] विपार्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥--प्र० वा० ।
९ त] संवित्तिरूपत्वात् ।
१२ *] न तद्
१३ मादिति] दिभिः
१३ दि] आदि
१४ विज्ञानाद] द्
१४ स्य] अभिन्नस्य ।
१५ तो] मपरो
१५ न्नानाम्] न्नाह--चित्तानाम्
१६ सा] सां
१९ र] खर
२१ *] भा
२३ त] क्तम् ।
२५ ते] तदपेक्षा इति
२५ णात्] त्कारणम्
२७ त्व] त्वं

ननु खरविषाणस्य सर्वदाऽसमा मा भूत् कार्यत्वम्, घटादेस्तु प्राग्भाग्भाववतः * स्यादिति चेत्; अन्योऽन्यसंश्रयः । उत्पन्नस्य, नानुत्पन्न-
497/mkj स्य खरविषाणवत्, सम्बन्धे वा उत्पत्तिरि [ति ?] न च वस्तुव्यतिरेकेण प्रागभावो नासं प्रमाणसिद्धोऽस्ति येन तद्वत[ः] कार्यत्वम् । कारणसत्तैव प्रागभाव इति चेत्; न सदेतत्; यतः कारणस्यैवाऽपरिज्ञानात् । प्रागभावि कारणं न चे तथाविधं सर्व भवेत् इत्यतिप्रसङ्गः । यस्यान्वयव्यतिरेकौ कार्यमनुकरोति तत् कारणमिति चेत्; किमिदम् अन्वयानुकरणम् ? तस्मिन् सति कार्यस्य भवनं चेत्; अनुबद्धः प्रसङ्गः--सहोत्पत्तिप्रसङ्गादिति । § 2640

किं वा व्यतिरेकानुविधानम् ? तदभावेऽभवनं चेत्; कार[ण]स्याभावे एव भवतः कथं तदनुविधानम् ? स्वकाले तस्य भावः; इत्यपि वार्त्तम्; सर्वस्य तत्काले भावात् । तन्नासतः कार्यत्वम् । § 2641

पर आह--**कथं पुनः** न कथञ्चित् **सतः** उत्पत्तेः प्राग् विद्यमानस्य **कार्य-**
/ms **त्वम्** । कुतः ? इत्यत्राह-- **कृतत्वात्** कारणव्यापारात् प्रागेव जनितत्वात् **कारणवदिति** । § 2642

नन्वपेक्षितपरव्यापारभावत्वं कृत[क]त्वमुच्यते, कृतकत्वात् कारणव्यापारात् प्रागवि * सत्त्वाद् इत्यर्थात्, करोतेः क्रियासामान्यवाचित्वात् । § 2643

यदि वा, कृतत्वात्, यद् यत् कार्यत्वं तत् **कथं पुनः सतः** इति व्याख्येयम् । अथवा **कथं पुनः सतः कार्यत्वं कारणवत्** सत्त्वात् इति गम्यते इत्येवं वाक्यम् । § 2644

ननु नासतो जन्यत्वात् कार्यत्वम् अपि तु सतोऽपि व्यङ्ग्यत्वा[त् घटा]दिवत्तदिति चेत्; अत्राह--**कृतं कारणवदिति** । **कृतत्वात्** परिहारस्य इत्यध्याहारः । सर्वथा यथैव सतो न जन्यत्वं तथा व्यङ्ग्यत्वमपि इति । सोत्तरमाह--**तदेकान्त** इत्यादि । अत्यन्तं सतः कार्यत्वम् **इत्येकान्तः**, तस्याऽ**नङ्गीकरणाद् अनुकूलमाचरसि** केतैरपि * तस्य कार्यत्वानभ्युपगमादिति भावः । कथञ्चित् सतोऽपि कार्यत्वे दूषणमस्तीति दर्शयन्नाह परः-**-यथैवे**त्यादि । [यथैव] येनैव प्रकारेण **तर्हि** हेत्ववस्थायां **सत्कार्या** तेनैव प्रकारेण **नोत्पत्तिमर्हति** । कुतः ? **निष्पन्नत्वात्** कारणवत् इति योज्यम् ।

---

१ मा] ऽसतो
२ *] प्रागभाववतः
२ यः] सिद्धे हि कार्यत्वे तत्प्रागभावसिद्धिः, ततश्च कार्यत्वमिति ।
४ नासं] नाम
६ चे] चेत्
६ र्व] सर्वं
६ य] तस्मादन्वयव्यतिरेकानुविधायित्वं निबन्धनम् । कार्यकारणभावस्य--प्र° वार्तिकाल° पृ° ६८ ।
८ अनुब] पूर्ववत् दोषः इत्यर्थः ।
११ त] कारणव्यतिरेकानुविधानम् ।
१७ *] प्रागपि
२३ कृतं] कृतत्वात्
२५ सो] स्वो
२६ *] जैनैरपि
२८ त्कार्या] र्यं तथैव
२९ त्ति] त्तु

**यथा च** येन च प्रकारेण **असत् तथा च नोत्पत्तुमर्हति, अत्यन्तमसंभवात् खपुष्पवत्** । **इति** शब्दः पूर्वपक्षसमाप्तौ । तस्योत्तरमाह--**तच्चेदं** तदपि **कृतोत्तरम्** इति । किमुत्तरं कृतम् ? इत्याह— **प्रतिक्षणम्** [सिद्धिवि॰] इत्यादि । ततो निराकृतमेवतत् --**अशक्तं सर्वम्** प्र॰ वा॰ २ । ४ इति, प्रत्यक्षादिप्रबाधनात् । § 2645

यदि विज्ञानमन्यद्वा अनेकान्तात्मकमुभयसिद्ध स्यादेवता नैवमे कान्तस्य भावादिति चेत्; अत्राह--**न** इत्यादि । **क्वचिद्** बहिरन्तर्वा **न एकान्तदर्शन यदेकान्तदर्शनमवलम्ब्य** आश्रित्य ३९२ द्रव्येष्व**नेकान्तसिद्धिः उपालभ्येत** । केन कृत्वा ? इत्यत्राह्--**संशय** इत्यादि । प्रत्यक्षविषये संशयादेरनवतार इति भावः । एकान्तवदनेकान्तअस्यापि तत्क्वचिद शेनमिति चेत्; अत्राह--**तदि**त्यादि । **तस्या**ऽनेका न्तस्य प्रत्यक्षस्या**पह्नवे क्व** न क्वचित् **कस्य** न 498/mkj कस्यचित् **करणादयः** । कुतः ? इत्यत्राह— **स्वपरे**त्यादि । **स्वस्य** निरंशचित्तस्य [परस्य च सन्तानभेदस्य] **अनुपलब्धौ** तत्प्रतिबद्धलिङ्गदर्शनात् परत्रापि नानुमानम् इति भावः । कुत एतत् ? इत्यत्राह--**सत्त्वभेदाऽभावादिति** । सत्त्वगुणाधिकादिप्राणिभेदाऽभावात् । § 2646

ननु **स्वपर** इत्यादिना गतार्थमेतदिति चेत्; न; तेन तत्सन्तानभेदस्य स्वरूपाभाव उक्तः, *अनेन स्वपरचित्तसन्तानभेदे सत्यपि सत्त्वानां भेदस्य गुणाधिक्यादिविशेषस्य प्रमाणाभावेनाभाव उच्यते । एतदेव दर्शयन्नाह--**सन्तावे** *त्यादि । सत्यामपि **स्वपरामत्त्व** ***व्यवस्थायां** न केवलमसत्यां **कथमयं** सौगतो **यथाविषयं** स[त्त्व]गुणाधिकादिविषयानतिक्रमेण **मैत्रादा भावयेत्** । किं कुर्वन् ? इत्याह--**अप्रतिपन्न कानतः कथश्चित्** केनापि प्रकारेण । कथं कान् ? इत्याह--**एवमि**त्यादि । सुगमम् । कुत एतत् ? इत्यत्राह--**परे**त्यादि । परसन्तानस्य**प्रत्यक्षत्वे** तद्गुणदोषा न प्रत्यक्षीभवन्तीति भावः । कायवाग्व्यवहारविशेषानुमेयाः स्युरिति चेत्; अत्राह--**कार्ये** त्यादि । तत एव **प्रमाणाभावादि**त्युच्यते इति । न केवलमेव न वेत्यन्यगुणदोषान् सङ्कर[व्यतिकर]व्यतिरेकेण कथश्चिदप्रतियन् कथमयं यथाविषयं मैत्र्यादीन्

४ त्] मेतत्
६ सिद्ध] द्धं
६ मे] देवं न चैवम् ए
८ न] नं
८ उ] दूष्येत ।
१० चिद] न्तस्यापि न क्वचिद्द
१७ *] सत्त्वभेदाभावात् इत्यनेन ।
१९ *] **सत्यां च इ**
१९ *] स्वपरसन्तान
२० स] मैत्र्यद्वेषः करुणा च मुदिता सुमनस्कता । उपेक्षाऽलोभः आकारः सुखिताः वत दुःखिताः । मुदिताः सत्त्वा वत च । मैत्रीभावनाया आकारः सुखितान् सत्त्वान् दृष्ट्वा सुखिताः वत सत्त्वाः, करुणाभावनायाः दुःखिताः वत सत्त्वाः, उपेक्षा माध्यस्थ्यरूपा । मुदितायाः मुदिता वत सत्त्वाः ।--अभिध॰ टी॰ ८ । ३० । सत्त्वेषु मैत्रीं गुणिषु प्रमोदं क्लिष्टेषु जीवेषु कृपापरत्वम् । माध्यस्थ्यभावं विपरीतवृत्तौ सदा ममात्मा विदधातु देव ॥--सामायिकपा॰ श्लो॰ १ ।
२० मैत्रादा] मैत्र्यादीन्
२१ तः] अप्रतिजानानः
२३ स्य] स्या
२४ कार्ये] काये
२५ मेव] लम् एवं

/ms भावयेत् अपि तु तानप्रतिजानानः सुगतमपि कथं जानीयादिति दर्शयन्नाह--**विप्रलम्भशङ्कानुबन्धात्** इत्यधिकां कारिकाम् । § 2647

...23 विप्रलम्भशङ्कानुबन्धात्
चेष्टते चेद्यथाकूतं वीतदोषः सदोषवत् ।
पुरुषातिशयो ज्ञातुं यद्यशक्यः किमिष्यते ॥ २३
॥§ 2650

वीतरागादयो विचित्राभिसन्धयः कायवाग्व्यवहारान् मिथ्यापि प्रवर्तयेयुः सदोषवत् । सरागादिवत् पुरुषातिशयः सन्नपि ज्ञातुं यद्यशक्यः; यदि पुरुषातिशयापेक्षि शास्त्रं प्रमाणमिष्टं स ज्ञातुं शक्येतेति ध र्म की र्ति वचनं पोप्लूयते । सुगतस्यापि तादृशः संभवात् । हरिहर... § 2651

499/mkj **विप्रलम्भो** वचनं तस्या **शङ्का** तस्या **अनुबन्धात्** कारणात् **पुरुषातिशयः किमिष्यते** नेष्टव्य इत्यर्थः । *तदतिशयो हि यथार्थदर्शनादिगुणलक्षण इष्यते[ऽ]विप्रलम्भार्थः । तदुक्तम्-- § 2652

*ज्ञानवान् मृग्यते कश्चित्तदुक्तप्रतिपत्तये ।
अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः ॥§ 2654

प्र० वा० १ । ३२ इति । § 2655

**वीतरागा अपि सरागा इव चेष्टन्ते** इति वचनात् ततोऽपि विप्रलम्भाशङ्कानुवृत्तेः किं तेन इति तदनुबन्धिकारणं दर्शयन्नाह--**चेष्टते** व्याप्रियते वेद्यादि *__यथाकूतम्__ । कः ? इत्याह--**वीतदोषो** वीतरागः । क इव ? इत्याह--**सदोषवदिति** । दूषणान्तरमाह— **पुरुषातिशयः** सन्नपि **ज्ञातुं यद्यशक्यः किमिष्यते** ? § 2656

तदशक्यत्वं दर्शयन्नाह--**चेष्टते चेदित्यादि** । **वीतराग आदिर्येषां** यथार्थदर्शनादीनां ते तथोक्ताः । किंभूतास्ते ? इत्याह--**विचित्राभिसंचयभा** *नाभिप्राया यतः । ततो यदि **कायवास्यव हारान्** मिथ्यापि न केवलं सत्यात् **प्रवर्त्त-**

५ ते] तुलना--तथान्यगुणदोषेषु संशयैकान्तवादिनाम् । पुरुषातिशयो ज्ञातुं यद्यशक्यः किमिष्यते ॥--न्यायवि० श्लो० ३८८ । प्रमाणसं० पृ० ११६ ।
८ पु] पुरुषातिशयापेक्षं यथार्थमपरे विदुः । इष्टोऽयमर्थः प्रत्येतुं शक्यः सोऽतिशयो यदि । अयमेवं नवेत्यन्यदोषा निर्दोषतापि वा । दुर्लभत्वात्प्रमाणानां दुर्बोधेत्यपरे विदुः ॥--प्र० वा० १ । २२०-२१ ।
१० नं] वश्चनं
१० स्या] तस्य
११ *] पुरुषातिशयः ।
१२ ते] अविसंवादार्थम् ।
१६ नात्] पुरुषातिशयस्वीकारेऽपि ।
१८ वेद्यादि] चेत् यदि
१८ *] यथाभिप्रायम् ।
२२ *] भिसन्धयः ना
२३ व] वाग्व्यव
२३ त्यात्] न्

येयुः । के इव ? इत्याह--**[स]दोषवदिति** । दूषणान्तरमाह--**पुरुषातिशयः सन्नपि ज्ञातुं-यद्य[शक्यः] सरागादय इवेति** । अत्र दूषणमाह--**पुरुषेत्यादि** । **पुरुषस्य अतिशयो** यथार्थदर्शनादिरूपः **तस्मिन् पेशी** यस्य तत्तथोक्तम् । किम् ? इत्याह--**शास्त्रं प्रमाणमिष्टम**भ्युपगतं सौगतै**र्यदि स** यथार्थदर्शनादिलक्षणोऽतिशयो **ज्ञातुं शक्येत इत्येवं ध र्म की र्ते र्वचनं पोप्लुतेन** * । कुत एतत् ? इत्यत्राह--**सुगतस्यापी**त्यादि ततः किम् ? इत्याह— तादृश इत्यादि । **तादृशः** संभवद सत्याभिधान[स्य] । दूषणान्तरं दर्शयन्नाह—**हरिहरे**त्यादि । § 2657 /ms

एवं तावत् **तायित्वात् प्रमाणो एवं न चतुरार्यसत्याभिधानलक्षणात् सुगततत्त्व मनुमीयते, ततोऽप्युपायानुष्ठानम्** इत्यादि व्याख्यानं **प्रमाणभूताय** प्र° समु° १ । १ *इत्यादिर्निरस्तम् । अधुना **जगद्धितैषित्वात् शास्तृत्वम्** उपायाभ्यासलक्षणम् **अनुमीयते, ततोऽपि सुगतत्वम्** इति व्याख्यानं निराकुर्वन्नाह--**तदेतस्मिन्नेकान्ते** इत्यधिकां **कार्यं** वेत्यादि कारिकाम् । § 2658

...24 तदेतदस्मिन्नकान्ते--
कार्यञ्च नानुमेयं चेत्समग्रादपि कारणात् ।
हेयोपादेयतत्त्वं वा सोपायं केन मीयते ॥ २४
॥§ 2661

500/mkj

प्रवृत्तिकामः प्रेक्षावान् सोपायं हेयोपादेयतत्त्वमन्वेषते न व्यसनेन । तच्चानागतविषयमप्रमाणम् समग्र[कारणत्वेऽपि] प्रतिबन्ध[संभवात्] । तदर्थानर्थयोः इदन्तया नेदन्तया वा प्रमातुमशक्यत्वात् कथमर्थे अनर्थे सन्दिग्धे प्रवर्तेत निवर्तेत वा ? स्वयमयोनिशो मनस्कारेऽपि भविष्यति प्रमाणाभावात्, तथा

३ पेशी] अपेक्षा
५ *] पोप्लूयते
७ द] संभवात्, अ
९ तायित्वात्] स्वदृष्टमार्गोपदेशकत्वात् । ततः प्रमाणं तायो वा चतुःसत्यप्रकाशनम्--प्र° वा° १ । १४७ । तस्माच्चतुरार्यसत्यप्रकाशनमेव तायः, तस्मात् । चतुःसत्योपदेशलक्षणात् कार्यभूतात् तायाद्धि भगवान् सुगत इति ज्ञायते ।--प्र° वार्तिकाल° पृ° १६४ ।
९ न] भगवान्
१० त्व] सुगतत्व
११ *] प्रमाणभूताय जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तायिने । प्रमाणसिद्ध्यै स्वमतात् समुच्चयः करिष्यते विप्रसृतादिहैकतः ॥--प्र° समु° १ । १ ।
११ इत्यादि] दे
१२ व्याख्यानं] उपायाभ्यास एवायं तादर्थ्याच्छासनं मतम्--प्र° वा°, वार्तिकाल° १ । १३९ ।
१३ वे] चे

दुःखसन्ततेः प्रवृत्तिनिवृत्त्योः, रसात् रूपादिवत् भूतैककालयोः नियमात् । नावश्यं [कारणानि कार्यवन्ति भवन्ति] § 2662

**तदेतस्मिन्नेकान्ते** सौगतैकान्ते इत्यर्थः । **कार्यं** च न केवलमकार्यम् अपितु कार्यमपि **नानुमेयं** नानुमानपरिच्छेद्यं **चेद्** यदि । कुतः ? इत्याह- -**समग्रादपि** न केवलमसमग्रात् **कारणात्** । *नावश्यं कारणानि कार्यवन्ति भवन्ति प्रतिबन्धवैकल्यसंभवादिति भावः । अत्र दूषण[माह]--**हेयोपादेय- तत्त्वमिति** । **हेयः** संसार **उपादेयो** मोक्षः तावेव **तत्त्वं केन** न केनचित् प्रमाणेन **मीयते** । किंभूत ? **सोपायं** संसारस्य कारणमविद्यादृष्टे मोक्षस्य नैरात्म्यंदर्शनं **वाशब्दः** अपिशब्दार्थः । § 2663

एतदुक्तं भवति--नातीतः संसारो हेयोऽत्र भूतत्वा[त्] । नापि वर्त्तमानः; नुयमानत्वात् । भावी तु हेयः स्यात् । स च [न] प्रत्यक्षतोऽनुमीयते, तत्र तदप्रवृत्तेः, अन्यथा चार्वाक नखिलं जगत् स्यात् । अथ प्रत्यक्षेऽपि तद्विपर्ययसमारोपाददोषोऽयम्; नैवम्; सर्वस्य सर्वदर्शित्वापत्तेः । शक्यं हि वक्तुं सर्वस्य सर्वदर्शित्वेऽपि तद्विपर्ययारोपान्नथा व्यवहार इति । § 2664

/ms ननु यदि न भावी संसारः प्रत्यक्ष[ः;] कथं भाविनि प्रत्यक्षं प्रमाणमुक्तं प्र ज्ञा क रे ण ? तत उत्पत्तेरिति चेत्; तदितरत्र समानम् । न हि परस्माद् अन्त्यं वित्त्यन्त * जायते अतद्रूपं वा, अन्यथा किञ्चिदपि भाविनो न भवेत् । लोकस्य तथा व्यवहाराभावात् ततस्तन्नेति चेत्; अत एव न प्राप्याट्टश्ययुक्तिः अन्यत्रापि विजृम्भितैव । § 2665

स्यान्मतम्--नान्य[त्] प्रत्यक्षं भाविनि संसारे प्रमाणं दृश्यैकत्वाव्यवसायाभावात्, प्राप्ये तु प्रमाण *विपर्ययात् । तत्र तदव्यवसायस्य किन्निमित्तम् ? हेतुफलभाव इति चेत्; प्रकृतेऽपि समानम् । वासना इत्यपि नोत्तरम्; अन्यत्र समत्वात्, कथमन्यथा सत्त्वदृष्टिः ? भवतु तर्हि तत्र संसारे तत्प्रमाणमिति चेत्; उक्तमत्र । § 2666

---

५ *] तुलना--नावश्यं कारणानि कार्यवन्ति भवन्ति प्रतिबन्धवैकल्यसंभवात्--हेतु बि॰ टी॰ पृ॰ २१० ।
६ न्ति] मन्त्रादिना ।
८ किंभूत] तम्
८ विद्यादृष्टे] तृष्णे
९ नैरात्म्यं] त्म्य
१० हेयोऽत्र] ऽनु
११ त्वात्] अनुभूयमानत्वात्
१२ त] भाविनि ।
१२ त] प्रत्यक्षस्याप्रवृत्तेः ।
१२ था] प्रत्यक्षमात्रप्रमाणकं स्यादिति भावः ।
१२ न] कमतम
१३ म्] न चार्वाकमतप्रसङ्गो दोष इति चेत् ।
१४ था] न्न तथा
१६ मुक्तं] ततो भाव्यर्थविषयं विषयान्तरगोचरम् । प्रमाणमध्यारोपेण व्यवहारावबोधकृत् ॥--प्र॰ वार्तिकाल॰ पृ॰ ५ ।
१७ *] चित्तं न
१९ युक्तिः] ?
२० त्वाव्य] ध्य
२१ माण] णं
२१ *] एकत्वाध्यवसायसद्भावात् ।
२१ त] प्राप्ये ।
२१ व्य] ध्य

किञ्च, पित्रादिचेतसोऽपि भावनि प्रत्यक्षत्वम्, स्पर्शादिवद् एकत्वव्यवसायनिमित्तस्य ऐक्यसामग्र्य धीनत्वस्याऽविशेषात् । तन्न हेयः संसारः प्रत्यक्षतो नीयते । नाप्यनुमानतः; तत्प्रतिबद्धलिङ्गाभावात् । तेयंचायतनं लिङ्गम् इति चेत्; तथा हि--शरीर तृ क्कं चित्तं मध्यावस्थायामनु स- 501/mkj
त्वान कारणमुपलब्धम्, उपलभ्यते तदन्त्यावस्थायामविकल । न वा विकले कारणे कार्यानुदयः, अत्कार्यप्रसङ्गात् इति; तन्न; यतः-- § 2667

कारणात् कार्यसंवित्तिः तथा सति भवेदियम् ।
*नियमो लिङ्गसंख्यायाः क्कवं व्रजति ते यया ॥§ 2669

स्यान्मतम्--नान्त्याद्विग्रहसतृष्णाचेतसो भाव्यनुसव्य नमनुमीयते, किन्तु तस्यैव तज्जननसामर्थ्यं स्वभावभूतम्, तावन्मात्रनिबन्धनत्वात्तदनुसन्धानस्य, ततः स्वभावहेतुरिति । तदुक्तम् -- § 2670 /ms

*हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते ।
अर्थान्तरानपेक्षत्वात् सः स्वभावोऽनुवर्णितः ॥§ 2672

प्र॰ वा॰ ३ । १० इति; § 2673

तदप्यसारम्; यतः ततः कार्यानुमाने को दोषः ? व्यभिचारश्चेत्; किं पुनर्योग्यतायामव्यभिचारः ? तथा चेत्; कार्येऽप्यस्तु । योग्यस्यावश्यंभाविकार्यत्वात् । न योग्यताप्य नियम *त्यनुमीयते अपि तु संभवः, तथाहि--अन्त्यं शरीरस तृष्णं वित्त प्रतिबन्धवैकल्याऽसंभवे वि[व]क्षितकार्ये योग्यं तत्वात् पूर्ववदिति चेत्; अत्रेदं चिन्त्यते— तच्चेतसोऽनु सत्वाने प्रतिबन्धाद्यसंभवि वा ? प्रथमपक्षे कारणात् कार्यानुमानमदूषितं स्यात् । § 2674

द्वितीये परलोकस्य प्रतिपत्तिर्न निश्चिता ।
प्रेक्षावतस्तथा च स्यात्तदभ्युपगमः कथम् ॥§ 2676

अभ्युपाये तथाप्यत्र मानचिन्ता वृथा भवेत् ।

---

१ नि] भाविनि
३ ते] ज्ञायते इत्यर्थः ।
३ तेयं] ?
४ क्कं] ?
५ त्वान] नुसन्धान
५ ल] लम्
५ वा] चाऽ
८ *] स्वभावकार्यानुपलब्धिभेदेन त्रित्वनियमः ।
८ वं] क्कायं
९ तृष्णा] ष्ण
९ व्य] सन्धा
१० ता] तज्जननसामर्थ्यमात्र ।
१७ *] तापि नियमव
१८ स] सशरीर
१८ वित्त] चित्तं
२० त्वाने] अन्त्यचेतसस्तदनुमानम्,
२३ मः] परलोकस्वीकारः ।

अन्यत्रापि वि  मानस्य सिद्धौ मानं करोतु किम् ॥§ 2678

संभवानुमितिर्मानं यदि नेति तयात्र किम् ।
संभवानुमितिर्मानं यदि किन्न विबन्धकम् ॥§ 2680

सन्दिग्धविषदां ज्ञानं मानं चेति विरूकम् ।
स्थाणुर्वा पुरुषो वेति ज्ञानं मानं भवेत्तथा ॥§ 2682

कादाचित्की यतोऽर्थस्य प्रप्तिस्तत्रापि विद्यते ।
अनिश्चितार्था मतिर्मानमतिसूक्तं च किमुतां  ॥§ 2684

अथ गत्यन्तराभावा[त्] संभवानुमितिर्मता ।
कार्ये तत्रोत्तरं पूर्वमुक्तं न पुनरुच्यते ॥§ 2686

विविधं ते यथा कार्यं कारणाव्यभिचारि ते ।
कारणं तद्वदेव स्यात् कार्यकावाभिचारि मे ॥ इति ।§ 2688

502/mkj, /ms ननु तच्चेतसि न प्रतिबन्धवैकल्यसम्भ[वः, त]थापि स्वभावहेतोरेव तत्र गमकत्वे  किं कारणकल्पनयेति चेत्; कारणस्य गमकत्वे किं स्वभावहेतुना इति समानम् ? किंवा , § 2689

प्रोक्तं हेतुपरीक्षायामुत्तरं ह्यत्र सुन्दरम् ।
एक एव स्वभावः स्याद्धेतुस्तस्माद्विचारणात् ॥§ 2691

अपर आह--तच्चित्तं भाव्यमसन्धानकार्य  तदव्यभिचारात् अर्थान्तरत्वे सति, भावि च कारणम्, कथमन्यथा अरिष्टादेर्मरणाद्यनुमानम्, ततोनसन्धाने  कार्यंहेतुरिति; स न युक्तकारी; यतः पूर्वजन्मान्त्यचित्तानुमानाभावः स्यात्, तच्चित्तस्य आद्यमैहिकं चित्तं कारणम् अर्थान्तरत्व  सत्यव्यभिचारात्, अन्यथा कथं भावि कारणम् ? कारणत्वेनाप्यभिमतस्यापि भाविनः तस्मा पेक्षया ऐहिकत्वात् । § 2692

किं च, अ[ना]द्यनन्तसंसारवादिनः सौगतस्य न भावी भवः, तदतीतकर्मविप्रतिपत्तिवादिशून्य  ततस्तं प्रति कथमतीतजन्मानुमान  कारणात्

१ वि ] हि
४ दां ] यं
४ म् ] असङ्गतम् ।
७ किमुतां ] क्तं किमुच्यताम्
११ कावा ] र्यस्याव्य
१४ किंवा ] किञ्च
१७ अ ] भाविकारणवादी प्रज्ञाकरः ।
१७ म ] व्यनु
१७ कार्य ] र्यं
१८ अ ] भाविमरणकार्यभूतात् ।
१८ तोन ] ऽनु
१९ न्धाने ] नं
१९ कार्यं ] र्य
२० त्व ] त्वे
२२ स्मा ] तस्या
२४ वादिशून्य ] ?
२४ न्मानुमान ] नं

कार्यानुमितिप्राप्तेः । अथ तज्जन्म तद्भवाष्यचेतसः कारणमिष्यते, नान्त्यचेतसो भाविभवानुमानं कारणात् कार्यप्रतिपत्तिप्रसङ्गात् । अन्योऽन्यहेतुत्वेऽप्युक्तम्--अन्योऽन्यसंश्रयान्नैकस्यापि सिद्धिरिति । तन्न परस्य हेयतत्त्वप्रतिपत्तिः । एतेन उपादेयमोक्षतत्त्वप्रतिपत्तिर्नास्ति इति दर्शितम्, उपायाभावात् । तदप्रतिपत्तौ च कथं मोक्षार्थी तदुपाये प्रवर्त्तेत ? § 2693

ननु किमुच्यते उपायाभावादिति, यावता किल नैरात्म्यादभ्यासः तदुपायः । तथाहि--यो यत्कारणमविकलमनुतिष्ठति स तत्फललाभी दृष्टः, यथाऽगेन्यथो रूप स माकारण *मविकलमनुतिष्ठन् तदुपशमफललाभी, /ms अनुतिष्ठति च कश्चिन् मोक्षकारणमविकलं नैरात्म्यदर्शनाभ्यासमिति चेत्; उच्यते--युक्तमेतद् यद्यधिवि *कलकारणादृयं [प्र]सवः । तथाभ्युपगमे ततः कार्यानुमानं केन वार्येत ? कार्यादर्शने तदपि ज्ञातुं न शक्यते, तद्दर्शने किं तत्रानुमानेन इति चेत् ? तर्हि मोक्षकार्यानुमानं त [न स्यात् तद]दर्शने जगति कस्यचित्तदविकलकारणानुष्ठानस्य ज्ञातुमशक्यत्वात्, सर्वत्र प्रतिबन्धवैकल्याशङ्काऽनिवृत्तेः । तद्दर्शनात्तत्प्रतीतिरिति चेत्; न; तद्दर्शनाभावात् । चतुरार्यसत्योपदेशात्तत्प्रतीतिश्चेत्; सिद्धमाप्तोपदेशादागमप्रमाण्यम् । इदं त्वसिद्धम्--**वीतरागा अपि सरागा इव चेष्टन्ते** इत्यादि । ततस्तत्सिद्धमभ्युपगच्छतो न तदुपदेशात्तत्प्रतिपत्तिरभ्युपगन्तव्येति न तदुपायानुष्ठानम् । § 2694

किंच, [क]थं कारणादर्शने कार्यप्रतीतिः, यतः ततस्तदनुमीयेत ? पूर्वदृष्टकार्यसाधर्म्यादिति चेत्; पूर्वदृष्टकारणसाधर्म्यात् कारणप्रतीतिरपि तथास्तु । § 2695

अथ मतम्--अन्त्यकारणदर्शनात् पूर्वतत्स्मरणतथाप्रतीतिर्नेतरथा, तथा सति तत्स्मरणकाल एव कार्यप्रत्यक्षीभवतीति किमनुमानेन इति; तदसत्यम्; कार्यात् पूर्वकाल भावि वा कारणमपि तथा प्रत्यक्षं किन्न स्यात् 503/mkj ? *खलविलान्तर्गतमन्यथापि दृश्यते इति चेत्; कार्यमपि तथा दृश्यत एव । तथाहि--शब्दादेर्दृश्यस्य सतोऽनन्तरभाव्यपि कार्यं नावश्यं दृश्यम्, *तदभावेऽप्युक्तम् । /ms यस्य तु व्यवहितमपि कारणम् तं प्रति सुपरिहारमिदम् । § 2696

---

१ वाष्य] द्य
५ त] मोक्षाप्रतिपत्तौ च ।
६ नैरात्म्याद] त्म्या
७ दुपायः] मोक्षोपायः ।
८ *] यथा रोगी व्याध्युपशमकारण
१० *] यद्यवि
१० णादृयं] णादवश्यं कार्य
१० वः] कार्योत्पत्तिः ।
१० त] कारणात् ।
११ पि] अविकलकारणत्वम् ।
१६ त्सिद्ध] द्धि
१७ त] आप्तोपदेशात् ।
१७ त्प्र] मोक्षप्रतीतिः ।
२२ ण] णं
२२ तीति] ते
२३ कार्य] र्यं
२५ *] खलविलान्तर्गतं बीजाख्यं कारणम् ।
२५ थापि] अङ्कुरानुत्पादकमपि ।
२६ *] शब्दस्य कार्यानुत्पादकत्वे अनर्थक्रियाकारित्वेन अवस्तुत्वं स्यात् इति भावः ।

किंच, यथा दृष्टान्तस्मरणाभावेऽपि कार्यादेर्गमकत्वं तथा यदि कारणस्यापि, अनर्थकत *चोद्यम् । अथ[त]दपि नेष्यते; तर्हि निरवकाशमिदम्--**तद्भावहेतुभावो हि** प्र० वा० ३ । २६ *इत्यादि । अथ तथापि न कारणस्य गमकत्वम्; न; उपादेयतत्त्वाप्रतीतेः । एतेन उपायप्रतीतिरपि चिन्तिता, कार्याऽपरिज्ञाने कारणापरिज्ञानात् । § 2697

कारिकां विवृण्वन्नाह--**प्रवृत्ती**त्यादि । **प्रवृत्तिकामः** । कः ? इत्याह--**प्रेक्षावान्** । किं कुरुते ? इत्याह--**अन्वेषते** । किम् ? इत्याह--**हेयोपादेयतत्त्वम्** । किंभूत[म् ?] इत्याह— **सोपायं** सकारणम् । न प्रवृत्तिकामतदद्वेषते अपि तु व्यसनेन इति चेत्; अत्राह--**न व्यसनेन,** अप्रेक्षावत्त्वाप्रसङ्गादिति मन्यते । भवत्वेवं को दोष इति चेत् ? अत्राह— **नच** इत्यादि । **तच्च** हेयोपादेयतत्त्वम् । किंभूतम् ? इत्याह--**अनागतविषयं** भाविकालयोरम् **अप्रमाणम्** अविद्यमानप्रमाणं भाविनि प्रमाणाभावादिति । एतदपि कुतः ? इत्याह--**समग्रे**त्यादि । एतदपि कुतः ? इत्याह--**प्रतिबन्धे**त्यादि । ततः किं जातं परस्य इत्याह— **तदर्थे**त्यादि । **तत्** तस्माद् उक्तान्न्यायाद् **अर्थो** मोक्षः तत्कारणं च **अनर्थः** संसारः तत्कारणं च तयोः **इदंतया** [अर्थतया नेदंतया अ]नर्थतया **वा प्रमातुमशक्यत्वात्** कारणात् **कथमर्थे** मोक्षादौ **प्रवर्त्तेत** परः । किंभूते । इत्याह--**सन्दिग्ध**तिवर्ततेया * **नर्थे** संसारादौ **सन्दिग्धे** सति ***तस्मादिद**मपेक्षम् । § 2698

/ms स्यान्मतम्--अर्थो मोक्षः साकान्तद्धेतु अतीन्द्रियत्वादस्तु सन्दिग्धः, अनर्थः पुनः संसारः तत्कारण व पिपर्ययावत् कुतः सन्दिग्ध इति चेत् ? अत्राह--**स्वेय मयोनिसोमनस्कारेऽपि** इत्यादि । अभिप्रायः— न खलु संसारः कण्टकवद् उद्धर्त्तुं शक्यः सति कारणे पुनः प्रवृत्तेः, अपि तु कारणक्षयेण । तच्च कारणमतीतं जातत्वानुशक्यं मासंतेतु । नापि वर्त्तमानम्; जायेसातत्वात् । * । भविष्यदेव तु प्रतिरुद्ध्यते, तदन्मयि विरुद्धाचरणेन । न च तत्र प्रमाणमिति । **स्वयम्** आत्मना **प्रमाणाभावात्** । **क्व** ? इत्याह--***अयोनिसो मनस्कारेऽपि** योनिम्--आर्यसत्यवष्मरूपं न यो मनस्कारः

२ *] कं
३ *] दृष्टान्ते तदवेदिनः । ख्याप्येते विदुषां वाच्यो हेतुरेव हि केवलः । इति शेषः ।
९ ते] कामस्तदन्वेषते
१० च] तच्च
११ म्] योग्यम्
१४ स्य] बौद्धस्य ।
१७ न्दिग्ध] ग्धे
१७ *] निवर्तेत वा अ-
१८ *] अनर्थे इत्यस्य पञ्चम्यन्तं अनर्थात् इतिरूपमपेक्ष्यम् ।
१८ म्] क्ष्यम्
१९ द्धेतु] स[[यथेच्छम् ।]]कामं तद्धेतुश्च विपर्ययात्[[इन्द्रियग्राह्यत्वात् ।]]
२० त्] --णं च
२१ स्वेय] स्वय
२१ योनिसो] शो
२१ अ] यम
२३ मासंतेतु] जातत्वान्न शक्यमपनेतुम्
२४ *] जायमानत्वात्
२४ यि] [[तत्प्रतिपक्षभूतचारित्रेण ।]]तदन्य
२६ *] अयोन्या अन्यायेन क्लेशयोगेन च प्रवृत्तो मनस्कारः ।--अभिध० को० टी० ४ । ९४ ।
२६ अयोनिसो] शो
२६ ष्म] वर्त्म
२६ न] --पं तस्मिन्नसति

तस्मिन्नमित् केवलम् अन्यस्मिन् **भविष्यति** तृष्णाविद्याचेतसि इत्यर्थः । किंभूते ? इत्याह— **भविष्यति** भाविभवभाविनि इत्यर्थः । **तथा दुःखसन्ततेः प्रवृत्तिनिवृत्त्योः प्रमाणाभावात्** भविष्यत्योरिति वचनपरिणामेन सम्बन्धः 504/mkj कार्यः । संसारकारणे संसारे तदभावे वभाविनि प्रमाणाभावादिति भावः । कुत एतत् ? इत्यत्राह--**रसादित्यादि** । **भूतश्च एककालश्च तयोर्नियमात्** प्रमाणस्य इत्यध्याहारः । परप्रसिद्धं निदर्शनमाह--**रसाद्** इत्यादि । § 2699

ननु दृश्याद् रूपात् प्राप्ये भाविनि रूपादौ रेणप्रमाणमिष्यते एव, तत्कथं निदर्शनमिति चेत् ? उक्तमत्र । किंच, कथमस्मिन् दर्शने भूतैककालस्य रूपादेः कुतश्चिहतिः, अप्रतिबन्धानुयत इदं सुभाषितम्--**भूतैककालानां गतिः** *इत्यादि । यदतीतं कारणं तदपेक्षमिदमिति चेत्; यदि तन्न कस्यचित् /ms प्रवृत्तिविषयः किं तेन ? तं वि *षयश्चेत्; न भातेन भाव्यम् । अथ भावि भूतं चैककार्यमिष्यते; न; भिन्नजालानाम् एकत्र सहकारित्वाभावात्, तथा[ऽ]व्यवहारात् चरमक्षणाभावश्चेति यत्किञ्चिदेतत् । यदि मतं भविष्यतोऽपि कारणं गतिरिति चेत्; तत्राह--**नावश्यमित्यादि** । भवतां तर्हि कथं नेदं चोद्यम् ? इत्याह--**एकलक्षणेत्यादि** । § 2700

कुत एतत् ? इत्यत्राह--**यन्नोपपद्यत** इत्यादि । § 2701

...25 यन्नोपपद्यते यस्मिन्नेष्यति चानुदेष्यति ।
तल्लिङ्गं लोकतः सिद्धमविनाभावैकलक्षणात् ॥ २५
॥§ 2703

कर्मफलसम्बन्धतत्कारणादिकं प्रशस्तपण्डितवेदनीयम् अरिष्टं तथा लक्षणं कृतम्, यथा अहं मरिष्यामि, प्रकृतजनमस्तके शृङ्गं नोदेष्यतीति च, अत्रापि संशीतिरवतरति । प्रवृत्तोऽयं व्यवहारः इतरथा दृष्टेऽपि कुतश्चिदाशङ्कायां न कस्यचित् प्रवृत्तिः स्यात् । § 2704

यसुनः कारणस्य अन्यस्य वा रूपं **नोपपद्यते** न घटते **यस्मिन्** कार्याभिमते अन्यस्मिन् वा शकटादौ । कस्मिन् ? इत्याह--**एष्यति** भविष्यति । किंभूते तस्मिन्नोपपद्यते ? इत्याह--**अनुदेष्यति** अनुत्पत्स्यमाने । **च** शब्दोऽवधारणे । **तद्रूपंलिङ्गं सिद्धम्** । कुतः ? इत्याह--**लोकत** इति । तदपि कुतः ? इत्याह--**अविनाभावेत्यादि** । § 2705

---

१ मित्] न्नपि न
३ त्योरिति] द्विवचन ।
४ व] च
७ रेण] परेण
९ श्चिह] द्ध
९ न्धानु] त्
१० *] अतीतैककालानां च गतिर्नानागतानाम्--प्र॰ वा॰ स्व॰ पृ॰ ४९ ।
११ *] तद्वि
११ भातेन] भूतेन
१२ जाला] काला
१४ णं] णात्
२३ सुनः] यत् पुनः
२३ स्य] कृत्तिकोदयस्य हेतोः ।
२४ टादौ] शकटोदयादौ साध्ये ।

कारिकार्थं न केवलं परस्य हेयोपादेयतत्त्वे सोपाये संशीतिरपि तु लोकव्यवहारेऽपि इति दर्शयन्नाह--**कर्म** च **फलं** च तयोः **सम्बन्धश्च** ते **आदयो** यस्य तत्तथोक्तं तत्कारणादिकम् । किंभूतम् ? इत्याह--**[प्रश- स्त] पण्डितेत्यादि** । **प्रशस्तपण्डितवेदनीय**तत्किम् ? इत्याह--**अस्तं विष्टं** नु मनुष्येणापण्डितरूपेण, **तथा लक्षण**रूपं **कृतं** निश्चितं **यथा** येन निश्चितलक्षणप्रकारेणा**हं मरिष्यामि,** अनेन भाविनि मरणेऽरिष्टादेरकार्यस्वभावस्यापि गमकत्वमाह **व्याजनमन मस्तके शृङ्गं नोदेष्यति इति च** तेन लक्षणं कृतम्, अनेन च स्वभावानुपलब्ध्यादेरपि भविष्यति शृङ्गोदयाभावे, परस्य **अत्रापि** न केवलं परलोकादौ **संशीतिरवतरति** । § 2706

505/mkj

/ms स्यान्मतम्--कस्य चिद्रसायनादेः सेनावनाभो देवतानुग्रहाद्वा तस्य मरणं न भविष्यति शृङ्गं रोदेष्यतीति संभावना यदा तदा संशीति[रिति] चेत्; अत्राह--**प्रवृत्त्ये[त्तोऽ]यमित्यादि** । विशिष्टाऽरिष्टदर्शने मरणं तदि ष्यति न तत्र कुतश्चित् प्रतिबन्धः संभवति इत्ययं **व्यवहारः** प्रसिद्धः, अन्यथा सर्वत्राऽनुमानविलोपः । तथा प्रा कृतपुरुषमस्तके शृङ्गे न भविष्यती व **प्रवृत्तोऽयं व्यवहारः, इतरथा दृष्टे** उदना**वपि** * **कुतश्चित्** कण्टकादुदेष्यतीत्या**शङ्कायां न कस्यचित् प्रवृत्तिः स्यात्** नेदानीं प्रवर्त्त्येत इति । § 2707

ननु प्रतिभासाद्वैतस्य स्वसंवेदनाध्यक्षसिद्धस्य भावान्न हेयोपादेयतत्त्वं तदुपायो वा, नापि तत्र संशीतिः निर्णीतिर्वा ततोऽयमदोष इति चेत्; अत्राह--**प्रत्यक्षेत्यादि** । § 2708

...26 प्रत्यक्षैकान्तचित्तानां कोपादेयेतरस्थितिः ।
संविदां विभ्रमः सिध्येत् स्याद्वादेन विना कथम् ॥
२६ ॥§ 2710

कथञ्चित् संविदां विभ्रमेऽपि आत्मसंवेदनं प्रत्यक्षमभ्रान्तमिच्छन् स्याद्वादमनुवर्तेत । सर्वथा मोक्षः संसारं नातिशेते । कथञ्च तद्भावनापरिनिष्पत्तौ दुःखसंवेदनं परिस्फुटमुपादेयम् ? सर्वथा विभ्रमविवेकनिर्मल-

२ द] दर्शयन् कारिकार्थमाह इति अन्वयः ।
४ नीय] यं
४ विष्टं] अरिष्टं
४ नु] न तु
५ ण] णं
७ न] प्रकृतजन
८ ति] भाविनि ।
८ याभावे] गमकत्वमाह इति सम्बन्धः ।
१० नाभो] सेवनतः
११ रो] वो
१२ दि] भवि
१४ प्रा] प्र
१४ शृङ्गे] ङ्गं
१४ व] तीति च
१५ *] ओदनादावपि
१५ कादु] द्यु
१७ नु] प्रतिभासाद्वैतवादी प्राह ।

त्वे न किञ्चित् क्वचिदिदमपरिस्फुटं ज्ञानं यत् परिस्फुटं स्यात् । न च रागादिक्लेशनिवृत्तिः दुःखसंवेदनस्य स्फुटतैव काम... § 2711

**एकोऽन्तो** धर्मो यस्य तच्च **तच्चित्रं** च निरंशचित्तमित्यर्थः । **प्रत्यक्षं** स्वसंवेदनवेद्यम् **एकान्तचित्तं** येषां सौगतानां तेषां **कोपादेयेतरस्थितिः ?** **उपादेयः** प्रतिभासाद्वैतलक्षणो मोक्षः तस्य परेण मोक्षत्वोपगमात्, तदुक्तम्--
§ 2712

*यद्यद्वैतेन तोषोऽस्ति मुक्त एवासि सर्वथा ।§ 2713

प्र॰ वार्तिकाल॰ पृ॰ ५७ इति । § 2714

**इतरो** हेयो भेदः तयोः **स्थितिर्व्यवस्था का ?** न काचित्, तन्निबन्धनप्रमाणाभावात् । न हि निरंशचित्तम् अन्यद्वा अनुभूयते, स्थूलनीलादिवेदनात्, यद स्तदुपादेयम् । नावि * भेदबाधक येन स हेयः प्रथत । देवान्वयं भ्रान्त्या तथा न भासते; तत्राह--**विभ्रम** इत्यादि । **विभ्रमो** भ्रान्तिः स्थूलादिप्रतिभासरूपः **संविदाम्** ऐत्त्यावार्थं * बहुवचनम्, **सिध्येत् स्याद्वादेन विना कथं** सर्वथा विभ्रमे तदयोगात् । नहि विभ्रमादेव विभ्रमसिद्धिः बहिरर्थवत् /ms कथञ्चिदेकान्तसिद्धिः । § 2715

कारिका व्याख्यातुमाह--**कथञ्चिदि**त्यादि । **कथञ्चित्** स्थूलग्राह्याकारेण न स्वसंवेदनकारेण **विभ्रमेऽप्यङ्गी**क्रियमाणे **संविदां** न केवल[म]विभ्रमे **स्याद्वादमतीष्ठमनुवर्त्तित** । कः ? इत्यत्राह--**आत्मसंवेदनं प्रत्यक्षमभ्रान्तम् इच्छेत्** * सौगतः इत्यर्थः । ततः स्वसंवेदनपरिहारेण स्थूलाकार एव विभ्रममभ्युपगच्छन्त * सत् संख्यादिकं निराकरोति इति कथं स्वस्थः ?
§ 2716

506/mkj

ननु निरंशमेव सुविदां स्वरूपमाभाति न क दाकार इति चेत्; अत्राह— **सर्वथे**त्यादि । **मोक्षः संसारं नातिशेते** मोक्षसंसारयोरविशेष इति यावत् । **ग्राह्यं न तस्य** इत्यादिवचनात् आत्मसंवेदन नैकान्तिकं मोक्षः, तच्च संसारेऽविशिष्टमिति भावः । § 2717

३ च्चित्रं] तच्चित्तं
११ द] यत
११ *] नापि
११ क] कं[[अनुभूयते ।]]
११ स] भेदः ।
११ थ] थे
११ यं] नन्वयं
१३ *] ऐक्याभावार्थं
१६ कारिका] कां
१७ न] ना
१८ तीष्ठ] मनिष्ट
१८ र्त्तित] वर्तेत
१९ *] इच्छन्
२० *] च्छन्
२० त्] तत्
२२ सु] सं
२२ क] त
२४ न] ने

अन्येषां दर्शन न संसारो नामास्ति अनुनु कल्पनायाम् इति; तेषां चित्रैकसंवेदने तदने तदप्रतिषेधः, इतरथा सकलशून्यतेति न मोक्षो नाम इत्युक्तम् । अस्मिन् दर्शने परमपि दोषं परस्य दर्शयन्नाह--**कथं च** इत्यादि । **च** शब्दो दूषणान्तरद मिति प्रदर्शने । **कथमुपादेयं** न कथञ्चित् । किम् ? इत्याह--**दुःखसंवेदनं** दुःखं संसारिणः स्कन्धाः, तेषां **संवेदनं** ग्रहणम् । किंभूतम् ? **परिस्फुटं** विशदम् । किन्निमित्तम् ? इत्याह--**तद्भावनापरिनिष्पत्तौ** दुःखभावनासमाप्तिनिमित्तम्, निमित्तलक्षणेयं सप्तमी । कथन्नोपादेयमिति चेत् ? उच्यते--**सर्वथा विभ्रमविवेकनिर्मलत्वं** सर्वचेतसां /ms **न किञ्चित् क्वचिदिदं** * **परिस्फुटं ज्ञानं यद्** भावनापरिनिष्पत्तौ **परिस्फुटं स्यात्** । न चात्मसंवेदनैकान्ते दुःखसंवेदनं नामेति । यतः तदुपादेयत्वा[त्] चित्तमेव परिस्फुटं भावतः स्यात्, नैव भवेत् । § 2718

[स्या]न्मतम्--रागाहिक्लेशविनिर्मुक्तिः भवान्तः, सा च दुःखसंवेदनस्फुटतेति वे *त्याह--**न चेत्यादि** । **न च** नैव **रागादिक्लेशनिवृत्तिः स्फुटतैव दुःखसंवेदनस्य** । अत्र निदर्शनमाह--**क्वोमे** त्यादि । अत्र स्पष्टतायामपि विभ्रमक्लेशभावादिति भावः । § 2719

ननु कामशोकादिषु स्विष्ट ता विकल्पेमात्रभावना[तः] उद्भवति भ्रान्तायुक्ता, न दुःखसंवेदनस्य स्पष्टता अर्थसम्बन्धानुमानमूलत्वादिति वेश नुमानाभ्यासे तद्विषये एव सामान्ये स्पष्टता न स्वलक्षण इत्यनिवृत्तेः । नहि चित्राभ्यासे धनुषि कर्मणः स्पष्टाद् आस्रवसंवरनिर्जरादिषु **श्रुतं प्रमाणं स्यात्कारलाञ्छनमविसंवादि** । § 2720

...27 प्रमाणमविसंवादि श्रुतं स्यात्कारलाञ्छनम् ।
ज्योतिर्ज्ञानादिचिन्तासुखदुःखाद्यदृष्टवत् ॥ २७
||§ 2722

सर्वथैकान्तविश्लेषात् सम्यग्दर्शनादिना सकलकर्मक्षयेण प्रतिलब्धात्मस्वभाव एव कैवल्यं भविष्यतीति सुनिश्चितं नश्चेतः । न हि तदभावे प्रमाणमस्ति

१ न] नम्--
१ अनुनु] ?
२ त] तदने इति व्यर्थम् ।
२ ने] ?
४ द] रं दत्त
५ न्धाः] दुःखं संसारिणः स्कन्धाः--प्र॰ वा॰ १ । १४९ । रूपवेदनाविज्ञानसंज्ञासंस्काराख्याः पञ्च स्कन्धाः ।
८ त्वं] त्वे
९ *] दम
१२ रागाहि] दि
१३ *] चेत्; इ
१४ क्वोमे] कामे
१६ स्विष्ट] स्पष्ट
१६ ल्पे] ल्प
१६ ति] न्ती
१७ ता] भ्रान्ता ।
१८ वेश] चेत्; अ
१९ ष्टाद्] स्पष्टता; इत्याह--
१९ आ] अत्र पाठस्त्रुटितो भाति ।

। भावे किम् ? अनुपदेशमलिङ्गमविसंवादं श्रुतज्ञानं ब्रूम इति । तत्प्रत्यनीकसाधनस्य स्याद्वादेन निराकृतत्वात् । स्वयं बहिरन्तश्च अर्वाग्भागमध्यपरभागादिविवर्तैकद्रव्यं दृश्याद्येकरूपं व्यावहारिकमलक्षयन् ज्योतिर्ज्ञानादिकमपरोपदेशं कथं प्रतिपद्येत ? न चैकान्तवादिनामत्र प्रमाणमस्ति । श्रुतेरतद्विषयत्वात् । § 2723

स्यान्मतम्--अविसंवादस्तत्र प्रमाणान्तरवृत्तिः, न च सा जीवादावस्ति इति; तन्न युक्तम्; स्वात्मनि प्रत्यक्षस्य अपरत्रानुमानस्य तदनाद्यनन्ततयोश्च 507/mkj
प्रमाणान्तरस्य वृत्तेरुक्तत्वात् । कर्मबन्धे च, तथा नि स्वभावशुद्धस्य आत्मनः शरीरे अशुचिनि सरावस्थानं तस्य तत्र स्थापकतत्संदंधपुद्गलविशेषपूर्वकं तत्त्वात् गाढनिगडनिबद्धस्य सावोवि । कारागारे अन्यतस्तत्र तस्य प्रवेशो वा तत्पूर्वकः तत एव, मत्रस्याश्च वि पूर्णगर्त्तप्रवेशवत् । व्याप्तिज्ञानं वा साधारणं स्वविषये[ऽ]स्पष्टत्वार रजोतीहाराद्यन्तरिततर्व्यापिज्ञानवत् । /ms
मिथ्यादृशाम् अनेकान्ते नित्याद्येकान्तज्ञानम् आवरणवत् अतस्मिंस्तद्ग्रहात्मकत्वात् मदिराद्युपयोगिनः स्थिरभूते भ्रमणानुभववत् । वासनादिनिषेधात् । तथा आस्रवे; तद्यथा--चेतनस्य जीवस्य सतोऽभिरतिसहितं शरीरादिष्ववस्थानं तदभिलाषाद्युपात्तपुद्गलविशेषपूर्वग तत्त्वात् अङ्गनाङ्गाभिरत्यभिलाषोत्पत्तौ षधविशेषस्य कामुकस्य तदङ्गस्था[न]वत् । तदभिलाषो वा तदवस्थाननिमित्तम् आत्मनि पुद्गलमवस्थापयति योषिदङ्गाभिवत्यभिलाषवदिति । एवमन्यत्रापि वक्तव्यम् । तदुक्तमत्रैव— **शुभाशुभैर्यथाम्य मास्रवैः स्वैः** सिद्धिवि° ४ । ९ इत्यादि । § 2724

ननु कस्यचित् तदौषधाभावेऽपि तदङ्गे तथावस्थानं दृष्टमिति चेत्; न; तस्यापि पक्षीकृतत्वात् न तेन व्यभिचारः । तदपि तथाविधकारणपूर्वकम्, अन्यथा सर्वस्य सर्वत्राङ्गनाङ्गे तत्स्थानं भवेत् । न चैवम्, स्वाङ्गनायामपि कस्यचिद् वैमुख्यदर्शनात् । नु रूपादयोऽपि व्यभिचारो नोत्तरं तस्यां तत्रापि तथाविधं किञ्चित् कारणमिति । § 2725

स्यान्मत तदभिलाष[ः] स्वस्य अत्र तु तदवस्थाननिमित्तं पुद्गलकारणम्, नावश्यं कारणानि कार्यवन्ति भवन्ति । नहि अङ्गनाद्वे तदभिलाषः

---

६ सा] प्रमाणान्तरप्रवृत्तिः ।
७ अ] सन्तानान्तरे ।
८ न्धे] अनुमानप्रमाणस्य प्रवृत्तिः ।
८ नि] तथा हि--
९ स्थानं] सदावस्थानं
९ त्संदंध] त्सम्बद्ध
१० सावोवि] साधोरिव
११ वि] मत्तस्य अशुचि
१२ णं] सावरणं
१२ त्वार] त्
१२ जोती] नी
१२ र्व्यापि] तर्वादि
१४ त्वात्] विपरीतत्वादित्यर्थः ।
१५ वे] प्रमाणास्तरस्य प्रवृत्तिः ।
१६ ग] कं
१७ त्तौ] त्पत्त्युपयुक्तौ
१७ त] अङ्गनाद्यभिलाषः ।
१८ ङ्गाभिव] भिर
१९ त्रैव] ग्रन्थे चतुर्थपरिच्छेदे ।
१९ थाम्य] स्व
२४ नु] न तु
२४ योऽपि] तन्निमित्तम् ।
२४ रं] चारात् । अतः
२६ त] तम्--
२६ ल] लं
२७ नाद्वे] नाङ्गे

सर्वोऽपि तदवस्थाननिमित्तं योगमात्मसात्करोति इति; तन्न सारम्; उक्तत्वात्--**कार्यं च नानुमेयं च** सिद्धिवि° ७ । २४ इत्यादि । § 2726

किञ्च, § 2727

स्वभावानुपलब्धिष्व व्यवहारे कथं [भवेत्] ।
लिङ्गं संयोग्यताया च  व्यामिचारो न किं स्वतः ॥§ 2729

उपलभ्यानुपम्भवत्  केवलस्तस्य कारणम् ।
विषयामिषलो कोऽपि भवबीजस्य कारणम् ॥§ 2731

/ms

क्वचित् दृष्टस्य तस्यास्तु विपरीते परत्र तु ।
प्रकृतेव्यौषधितस्य  केवलस्यैव हेतुता ॥§ 2733

ननु तदभिलाषो यावद् अन्यस्य कर्मण[ः] कारणं तावन्न तदवस्थानस्यैव इति चेत्; न; तस्मिंश्चिरविनष्टे कार्यानुदयप्रसङ्गात् । एतेन योगादेः कर्मत्वं निषिद्धम् । प्रयत्नसधर्मा आत्मविशेषगुण[ः] तत्साध्यः कर्म इति चेत्; न; प्रयत्नवत् पुद्गलविशेषसम्बन्धेऽपि देवदत्तं प्रति योषिदाद्युपसर्पणदृष्टेः तत्सधर्मताऽसिद्धेः । § 2734

508/mkj

किंच, तत्कर्म अचेतनं मूर्त्तमभ्युपगन्तव्यम् । कथमन्यथा देशान्तरस्थद्रव्याकर्षकम्, यतो विशेषादृष्टाकृष्टपरमाण्वारब्धं शरीरं स्यात् ? मूर्त्ता यदहय यस्कान्तादयस्तुयदा *कृष्टिहेतवो दृष्टा नात्मादयः, इतरथा आत्मन एव तत्सिद्धेः किं कर्मकल्पनया ? तद्विशेषोपपत्तेः नाऽविशेषकल्पनापि । § 2735

यदि मतम्--अमूर्त्तोऽपि मन्त्रः तदाकृष्टिहेतुः अतो व्यभिचार इति; न; शब्दस्य मूर्त्तत्वात् । ध्यानेनानेकान्त इति चेत्; न; तस्य मूर्त्तकर्म वेत्सि तत्त्वात्, अन्यथा आत्मैव तद्धेतुः इत्युक्तं स्यात्, तत्र च उक्तो दोषः । प्रयत्नेन इति चेत्; न; कर्मविशिष्टात्मप्रदेशत्वव्यतिरेकेण परं प्रति तदसिद्धेः । न च प्रयत्नस्य केवलस्य तद्धेतुत्वम्; तदभावेऽपि तद्भावात् । ततो मूर्त्तमेव

४ ब्धिष्व] श्च
५ सं] सत्
५ च] श्च
६ त्] श्चेत्
७ लो] याभिलाषः
९ स्य] तेऽप्यौषधेस्तस्य
१२ गुण] अदृष्टम् ।
१७ य] एव ह्य
१७ *] दयोऽयसा
२२ वेत्सि] विशिष्टस्य
२२ त्त्वात्] तदाकृष्टिहेतुत्वात् ।
२३ त्नेन] व्यभिचारः ।
२३ त्व] शस्पन्द
२३ तिरेकेण] जैनं प्रति ।
२३ ति] प्रयत्नस्यासिद्धेः ।

तदभ्युपगन्तव्यमिति कथं नाभिमतं परस्य न सिध्यति । तत्कुयेवा नुमानम् दे वा ग मा द वगन्तव्यम् । § 2736

ततोऽ**विसंवादि तत् श्रुत**मिति । केष्विवि त्याह--**ज्योतिर्ज्ञानादिवदि**ति । **ज्योति**र्नक्षत्रादि**ज्ञानम् चिन्ता सुखदुःखादि** तदादिर्येषां न *__दृष्टादीनां__ तेष्विव /ms **तद्वद्** इति । § 2737

कारिकां व्याख्यातुमाह--**सर्वथैकान्त** इत्यादि । **सकलस्य कर्मणः क्ष-येण** नाभ्यासमा[पे]क्षेण विशिष्टादृष्टमात्रेण अनेन वा **प्रतिलब्धो**ऽयम् **आत्मस्वभावो**तन्न ज्ञानादिलक्षणः स **एव कैवल्यं** तद् **भविष्यति [इति]** एवं **सुनिश्चितं नश्चेतः** । केन ? इत्याह--**सम्यग्दर्शने**त्यादि । तदपि केन ? इत्याह--**सर्वथैकान्त** इत्यादि । मृष्टार्थमेतदसकृत् । § 2738

स्यान्मतम्--अध्यक्षादिबाधितेयं प्रतिज्ञेयं तत् कैवल्यमस्तु इति; तत्राह--**नहि** इत्यादि । **तदभावे** कैवल्याभावे **न प्रमाणमस्ति** । विचारितमेतत् सर्वज्ञसिद्धौ । पर आह--**भाव** इत्यादि । तं प्रति उत्तरमाह--**श्रुते**त्यादि । न खलु ज्ञानविशेषमन्तरेण **अनुपदेशमलिङ्गमविसंवादं श्रुतज्ञानं संभवदिति** । षद्यदार्थादिश्रुतज्ञानं तद्विपरीते प्रमाणमिति चेत्; अत्राह--**तत्प्रत्यनीके**त्यादि । **तस्य** उक्तकैवल्यस्य **प्रत्यनीकं** यत् तस्य **साधनस्य** सिद्धेः **स्याद्वादेन निराकृतत्वात्** । श्रुतज्ञानस्य वा तद्भावे **श्रुतज्ञानं ब्रूम** इति । **[त]त्प्रत्य-नीकसाधनस्य** तदभावसाधनस्येति कस्मान्न व्याख्यायत इति चेत् ? न; **श्रुतज्ञानं ब्रूमः** इत्यनेन तन्निरासात् । नहि तदभावे सर्वत्र सर्वका[लं]सर्वज्ञे नास्ति इति वचनमविसंवादि संभवति । *तत् नापौरुषेयम्; निषेत्स्य-मानत्वात् । § 2739

ननु स्याद्वादाभावात् कथं तेन कस्यचिद्बाधनमिति चेत्; अत्राह--**दृश्ये**त्यादि । सुगतोऽन्यो वा क ण च रा दिः **स्वयम्** आत्मना **कथं** न /ms कंचन **प्रतिपद्येत** । किम् ? इत्याह--**ज्योतिर्ज्ञानादिकम्** । किंभूतम् ? 509/mkj इत्याह--**अपरोपदेशम्** अविद्यमानपरोपदेशेसाक्षादसौ तत्प्रतिपद्येत । अपि तु अन्यतः तत्साक्षात्कारिण इति भावः । **ज्योतिर्ज्ञानादिप्रति[पत्ति]र्यतः** त-स्य तत्प्रतिपत्तेः स्याद्वादमन्तरेणाप्युपपद्येत । यत इति वाऽऽक्षेपे न चेति । किंकुर्वन्नसौ कथं तत् प्रतिपद्येत ? इत्यत्राह--**अलक्षयन्** अनवधारयन् ।

---

१ ति] अपि तु सिध्यत्येव ।
१ त्कुयेवा] तत्क्षये चा
१ म्] दोषावरणयोर्हानिः निःशेषास्त्यतिशायनात् । क्वचिद् यथा स्वहेतुभ्यो बहिरन्तर्मलक्षयः ॥ --आप्तमी° १ । ४ ।
२ मा] आप्तमीमांसायाः अपरनाम देवागमः ।
३ केष्विवि] ष्विव ? इ
४ *] तद
७ अनेन] अन्येन
८ न्न] वः स च
१४ व] वे
१५ द्य] वैशेषिकाभिमत ।
१५ द्य] षद्व
१७ द्भावे] सद्भावे
१९ हि] श्रुतज्ञानाभावे ।
२० ज्ञे] ज्ञो
२० *] श्रुतम् ।
२४ न] कथंचन
२५ देशे] शं
२५ सौ] ज्योतिर्ज्ञानादिकम् ।

क्व ? **बहिः** । किम् ? इत्याह— **अर्वाग्भाग** इत्यादि । **अर्वाग्भागादीनां** द्वन्द्वः पुनः तेषाम् **आदिशब्देन** बहुव्रीहिः **विवर्त्ता** * स्तदर्थाः तेष्वे**कम्** अभिन्नं यद् **द्रव्यं** तदिति । पुनरपि किंभूतम् ? इत्याह--**दृश्येत्यादि** । **दृश्यादिरेकं** प्रधानं **रूपं** स्वभावो यस्य तत्तथोक्तम् । पुनरपि क्व किमि[ति] लक्षयन् ? इत्याह--**अन्तश्चे**त्यादि । किंभूतम् ? इत्याह--**व्यावहारिकम्** इति । दूषणान्तरं दर्शयन्नाह— **न च** इत्यादि । **न च** नैव **एकान्तवादिनां** वैशेषिकादीनां **अत्र** भाविनि जातिनादौ **प्रमाणमस्ति** । कथमिति चेत् ? उच्यते--अत्र न तावत्प्रत्यक्षमैन्द्रियम्; तेन इन्द्रियसंसर्गाभावात् । नहि असता भाविना इन्द्रियसंसर्गः, अतिप्रसङ्गात् । तत्संसर्गं च परस्य *तत्प्रत्यक्षम् **आत्मा मनसा युज्यते तद् इन्द्रियेण तदप्यर्थेन** न्यायम॰ पृ॰ ७४ इति वचनात् । एतन्मानसमपि तदत्र निरस्तम्; तदपि आत्ममनःसंयोगसहचारिणाऽर्थेन जन्यते । न च पूर्वतत्संयोगकाले सोऽस्ति; भा[वित्व]विरोधादिति । एवत तन्मनसापि भावि भविष्यति सः, न तदा संसर्गः प्राकृतस्याप्यस्ति ।
/ms परम्परासत्यत्वेऽप्यसता कीदृशः ? सत्वा[त्] कथं सर्वस्य तत्र ज्ञानं न जन[येत्]घटः ? तदग्रहणात्मकत्वात् । कुत एतत् ? अबुद्धित्वादिति चेत्; एतदपि कुतः ? अर्थग्रहणात्मकत्वात्; अन्योऽन्यसंश्रयः, तथाहि--घटादेरबुद्धित्वे तदग्रहणात्मकत्वम्, अतोऽबुद्धित्वमिति । अथ घटग्राहिणा प्रत्यक्षेण स *तद्ग्रहणविमुखः प्रतीयते ततोऽयमदोषः; किं पुनर्नित्येश्वरज्ञानं तद्ग्रहणाभिमुखं प्रतीयते ? न चेत्; कस्तस्य घटाद् विशेषः ? प्रतीयत इति चेत्; न स्वयम्, अस्वसंवेदनात्मकत्वात् अन्यथा परमतसिद्धिः । *तस्यैव तत्तथेति [चे]त्; किमेतद् ईश्वरचेष्टितम् ? तत्र यथा नित्यज्ञानं तस्यैव नेतरस्य, तथा स्वसंवेदनमपि कुतोऽयं विभागो लभ्यते ? नह्येकधर्मवैलक्षण्ये सर्वैरवि तथा भवति, अन्यथा तयोर्ज्ञानत्वादिनाऽपि वैलक्षण्यं भवेत् । अथ तेन *तयोर्न विरोधः; स्वसंवेदनेनापि न विरोधः । § 2740

२ *] विवर्त्ता
७ जाति] ज्योतिर्ज्ञा
९ च] र्गाच्च[[इन्द्रियसंसर्गात् ।]]
९ स्य] नैयायिकस्य ।
९ *] इन्द्रियप्रत्यक्षम् ।
१० इति] तच्चेदं प्रत्यक्षं चतुष्टयत्रयद्वयसन्निकर्षात् प्रवर्तते । तत्र बाह्ये रूपादौ विषये चतुष्टयसन्निकर्षाज्ज्ञानमुत्पद्यते— आत्मा मनसा युज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति । सुखादौ तु त्रयसन्निकर्षात् ज्ञानमुत्पद्यते, तत्र चक्षुरादिव्यापाराभावात्...--न्यायम॰ । उक्तं च--आत्मा सहैति मनस मन इन्द्रियेण...--बृहत्सं॰ ७४ । ३ ।
११ पि] मानसप्रत्यक्षम् ।
१३ त] एवं
१३ प्रा] प्र
१८ स] घटः ।
१८ *] अर्थग्रहण ।
२० त्वात्] ईश्वरज्ञानस्य स्वसंवेदनात्मकत्वे ।
२० *] ईश्वरस्यैव ।
२१ स्यैव] ज्ञानं स्वसंवेदि ।
२१ ज्ञानं] ईश्वरस्यैव ।
२२ र्म] र्मेण
२३ वि] पि
२४ तेन] ज्ञानत्वादिना ।
२४ *] ईश्वरज्ञानअस्मदादिज्ञानयोः ।

अथ इतरज्ञानस्य स्वसंवेदनप्रतिज्ञा अनुमानेन बाध्यत इति विपध त-थाहि— अनीश्वरज्ञानं ततो भिन्नेनैव ज्ञानेन वेद्यते ज्ञेयत्वात् पटादिवत् इति चेत्; ईश्वरज्ञानेन हेतोर्व्यभिचारः । यदि पुनः अनीश्वरज्ञानज्ञेयत्वात् इति विशिष्य उच्यते; तथाप्यगमक त्वं व्यतिरेकाऽसिद्धेः । नहि विशेषणमात्रेण 510/mkj तत्सिद्धिः; अतिप्रसङ्गात् । कथम् ? यदीश्वरस्य स्वपरग्राहिज्ञानं तावतैव स-कलप्रयोजनसिद्धिः किमीश्वरेणा वारमलरेण ? कथमवस्थानं तस्येति चेत्; कुत एतत् ? गुणत्वाद् रूपादिवदिति चेत्; अत एव अस्मदादिज्ञानवत् अस्वसंवेदनमस्तु । ततो यथा ज्ञानत्वाऽविशेषेऽपि तदेव स्वसंवेदनं ततो /ms *निराधारमप्यत्र ब्रूमहे । क[थ]मेवं सति तस्य गुणत्वम् ? युगपत् स्वपर-ग्रहणस्वभावद्वयवत् क्रमेणाप्यनेकस्वभावसंभवेप्रध्यत्वात् । अथैकस्वभावेन यथा कारणम् अनेककार्यं तत् तथेदं स्वपरग्राहकमिति चेत्; न; *परं प्रति दृष्टान्तासिद्धेः । § 2741

एतेन इदमपि निरस्तम्--अनेकस्य परस्येव स्वपरयोरपि तदेकमेव ग्राहकम् इति; तदितरवत् तदपि नात्मवेदनमिति न घटाद्विशेषः । § 2742

स्यान्मतम्--ईश्वरः स्वज्ञानस्य अर्थग्रहणात्मकत्वं प्रत्येति; तदपि चिन्त्य-ते--गृहीतस्य, इतरस्य वा ? न तावदितरस्य; इदंतया नेदन्तया वा त-स्य व्यवस्थापित्तमश न्तो ज्ञानकल्पनावैफल्यापत्तेः । गृहीतस्य इति चेत्; द्वितीयज्ञानाभावान्न युक्तमेवतत् । भावे वा नित्यमेकत्रानेकम्, अनवस्थान च विज्ञानं प्रसज्येत । § 2743

स्यान्मतम्--*तस्य ज्ञानद्वयमस्ति--एकं स्वतोऽन्यस्य सर्वस्य वेदकम्, *अपरं तस्येति; तन्न; यस्मादेकत्र यावदोद्रव्यभाविनः सजातीयस्य युगपद् गुणद्वयस्याऽयोगात् अन्यथा घटादौ यद्वयं तथा भवेत् । *अन्योऽन्यसंश्रय-श्चात्रोक्तः । अथ महेश्वरः तज्ज्ञान स्वयमेव तथा प्रत्येति; बहिरर्थमतितथेति

---

१ ध] विरोधः
३ भिचारः] तदपि ज्ञेयं न च ज्ञानान्तरवेद्यम् ।
६ रेण] णाऽवान्तरेण[[मध्यवर्तिना ।]]
६ स्थानं] ज्ञानस्य ।
८ त्वाऽविशेषेऽपि] ईश्वरज्ञानमेव ।
८ तो] तथा
९ *] ईश्वरं विनापि तज्ज्ञानं निराश्रयमेव भवतु ।
९ म्] द्रव्याश्रयिणः एव गुणत्वं भवति न तु निराधारस्य ।
१० त्वात्] वोऽस्तु अध्यक्षसिद्धत्वात्
११ कार्यं] करोति ।
११ *] जैनेन तस्यापि अनेकस्वभावस्वीकारात् ।
१४ त्] ईश्वरज्ञानमपि ।
१६ स्य] अगृहीतस्य ।
१७ न्तो] स्थापयितुमशक्तेः
१८ त्] मेतत्
१८ स्थान] नं
२० *] ईश्वरस्य ।
२० स्य] स्वभिन्नस्य ।
२० स्य] अर्थजातस्य ।
२१ *] द्वितीयं ज्ञानम् अर्थग्राहिज्ञानं वेत्ति ।
२१ दो] यावद्
२२ यं] रूपद्वयं
२२ *] द्वितीयेन ज्ञातं सत् प्रथमज्ञानमात्मसत्तां ख्यापयेत्, ख्यापितात्मसत्ताकश्च प्रथमं द्वितीयेन ज्ञायेत इति ।
२३ ज्ञान] नं
२३ ति] मपि

व्यर्थं सर्वत्र ज्ञानकल्पनम् । तथा प्रतिपद्यमानमात्मानं न चेदीशः प्रतिपद्यते; कुतस्तेन तत्परिच्छेद[ः] ? तदास्ति त्वं वा[स्वयं] प्रतिपद्यते चेत्; एकस्य स्वपरा[व]भासित्वम् । अ[त]श्चेत्; अनवस्थानम् । तन्नेश्वरज्ञानं /ms घटाद्विशिष्यत इति न ज्योतिर्ज्ञानादौ प्रमाणम् । § 2744

एतेन[वैशेषि]कस्यापि चिन्तितम्--तस्य अचेतना बुद्धिः परोक्षः पुमानिति । § 2745

सुगतज्ञानं तत्र प्रमाणमिति चेत्; यदि तत् सकलभेपान्कारि कथं क्वचिदप्येकान्तसंभवः ? तत एवोच्यते--न वैकान्तवादिनामिति । प्रत्याकारं भेदे; नैकः सुगतः ? तदाकारयितुः तेनादर्शनात् नापि सर्वज्ञः । कथत्या स्वमेकमनेकाकारं स्वयं प्रतिपद्यमानः परं निसंक्षणिकंध्रुवं स्वस्थः ? निराकारं चेत्; तथैतत् सर्वस्येति न युक्तम्-- § 2746

*अर्थेन घटयत्येनां नहि भज्ञ र्थरूपताम् ।§ 2747

प्र॰ वा॰ २ । ३०५*इत्यादि । § 2748

511/mkj

सुगतवत् सर्वोऽपि सर्वदर्शी स्यादिति चेत्; न; नियतशक्तित्वाद् भावानाम् । नहि एकस्य शक्तिरशेषस्य । नाप्येकस्यापि या एकत्वशक्तिः सैवान्यत्र; अन्यथा सकलस्य ग्रहणवत् ज्ञानमपि सुगतस्य स्यादिति नेश्वरबाधनम् । इतरथा स्वसन्तानज्ञानजननधिगत स्यादिति कथं वस्तुत्वम् ? अथ तस्य ग्रहणशक्तिरेव सर्वत्र, इतरा तु क्वचिदेव; यद्य कस्यैव नानात्मनि नितराम् । एकस्य सर्वग्रहणेऽपि, अन्यत्र विपर्ययात् । § 2749

नन्वे[व]म् एकस्य शक्तिद्वयात्मक[त्व]मिति चेत्; अयं परस्य दोषोऽस्तु । न चाऽशेषग्रहणशक्तिरेव प्रतिनियतजननशक्तिः, सा वा प्रकृता; ग्रहणजन[न]योरविशेषःप्रसङ्गात् । अनेकं वार्थ[म]नेकस्वभावेन प्रतियतः

---

२ दास्ति] तदस्ति
७ भेपान्कारि] भेदानुकारि;
८ वै] चै
१० त्या] कथमयं[[बौद्धः ।]]
१० मानः] बाह्यार्थम् ।
१० णिकंध्रुवं] निरंशं क्षणिकं ब्रुवन्
११ त्] निराकारत्वम् ।
१२ त्येनां] बुद्धिम् ।
१२ ज्ञ] नहि मुक्त्वाऽ
१३ *] तस्मात् प्रमेयाधिगतेः साधनं मेयरूपता । इत्युत्तरार्धः ।
१५ त्व] त्र
१६ पि] [[उत्पादकत्वमपि ।]]जननमपि
१७ म्] स्वयं सुगतस्य सृष्टिकर्तृत्वप्राप्तेः ।
१७ त] जननमपि न तस्य
१७ म्] अर्थक्रियाकारित्वाभावात् ।
१८ स्य] सुगतस्य ।
१८ त्र] अर्थेषु ।
१८ रा] जननशक्तिस्तु ।
१८ चिदेव] स्वसन्तानज्ञानजनन एव ।
१८ द्य] यद्येवम् ए
१९ राम्] अस्तु ।
२० प] बौद्धस्य ।
२१ सा] जननशक्तिः ।
२१ कृता] ग्रहणशक्तिः ।
२२ विशेषः] ष
२२ तः] जानानस्य ।

*स्वात्मतनेकान्तः । एकस्वभावेन त्रिकालार्थग्रहणवत् यदि तथाविधकार्यजननं निरालम्बनमिदम्-- § 2750

*नाऽक्रमात् क्रमिणो भावः प्र° वा° १ । ४५ इत्यादि
|§ 2751

किंच, योग्यताबले[न] *तदर्थस्य ग्राहकम्; प्रतिबन्धद्वयव्याघातेन लिङ्ग सङ्ख्यानियमवैयर्थ्यम् । तत उत्पत्तेश्चेत्; न भाविनः चिरभूतस्य वा ग्रहणं /ms तस्मादनुत्पत्तिः * । *उत्पत्तौ च; अपरतत्कार्यकाल एव तेन भव्यमिति तन्नियतकालता । § 2752

स्यान्मतम्--इतरजनापेक्षयार्थस्य वि[भिन्न]कालत्वं न सुगतापेक्षया, तस्य साक्षात् रूपेण सर्वज्ञंना त्मनि प्रतिभासमानं वर्त्तमानमेव, *साक्षात्करणमेव वर्तमानमेव साक्षात्करणमेव वत्त्व सम र्थस्य न वर्तमानकालसम्बन्धित्वं तदभावादिति; तदसारम्; यतः तद पेक्षयतेः तज्ज्ञनकमपि न किञ्चित् स्याद् वर्त्तमानेषु तदयोगात्, अनभ्युपगमाच्च । इतरापेक्षया अर्थादुत्पत्तिः तस्य, समकालयोः परमार्थतः कार्यकारणभावं प्रतियत् स भ्रान्तः स्यात् । तद्वलेन सुगतस्य परग्रहणे सोऽपि तथाविध इति न च वन्दनीयः । [एतेन] विभ्रमशून्यप्रतिभासाद्वैतपक्षाः निरन्ताः । तन्न सुगतप्रत्यक्षमप्यत्र प्रमाणम् । अत एव नानुमानमपि तत्स्वार्थकत्वाधस्य । ततः स्थितम्--**न चे**त्यादि । § 2753

ननु प्रत्यक्षम् अर्थसन्निकर्षमतो जन्मया पेक्षते नागमः, ततः स एवात्र प्रमाणमिति चेत्; अत्राह--**श्रुतेः** इत्यादि । **श्रुतेः** आगमस्य **अतद्विषयत्वात्** ज्योतिर्ज्ञानाद्यगोचरत्वात्, **न चैकान्तवादिनामत्र प्रमाणमस्ति** इति सम्बन्धः । एवं मन्यते— यदे कान्तवादिनां परोक्षविषयमध्यक्षं भवति तदा तत्पूर्विका 512/mkj श्रुतिरपि तद्विषया स्यान्नान्यथा, न चैवमिति । § 2754

---

१ *] स्वस्वरूपे ।
१ त] त्मन्य
१ दि] कालान्तरवर्ति ।
२ नं] स्यात् तदा ।
३ भावः] वाः
४ *] ज्ञानम् ।
४ म्] चेत् ।
४ व्याघातेन] तादात्म्यतदुत्पत्तिरूप ।
५ लिङ्ग] त्रित्वसङ्ख्या ।
६ *] त्तेः
६ *] चिरभूतात् भाविनश्चार्थात् सुगतज्ञानोत्पत्तिस्वीकारे ।
६ तेन] सुगतेन ।
६ भ] भा
७ मिति] अपरकार्यकालतायाम् कालान्तरस्थायित्वं स्यादिति भावः ।
९ ज्ञंना] सर्वम् आ
९ *] एतदन्तर्गतं पुनर्लिखितम् ।
१० म] च ज्ञत्वम
११ न्धित्वं] कालाभावात् ।
११ तेः] तदपेक्षया
१३ स्य] ज्ञानस्य ।
१३ त्] न्
१४ थाविध] भ्रान्तः ।
१५ न्ताः] निरस्ताः
१६ स्य] तत्पूर्वकत्वादस्य[[अनुमानस्य ।]]
१८ तो] र्षजम्, अतो
१८ या] [[उत्पत्तिमपेक्षते ।]]जन्मताम
१८ स] आगम एव ।
२१ दे] यद्ये
२२ या] परोक्षविषया ।

मीमांसक आह--स्वत एव परोक्षश्रुतिः प्रमाणं न तत्प्रत्यक्षापेक्षा । /ms तदुक्तम्-- § 2755

*स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् ।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते ॥§ 2757

मी॰ श्लो॰ सू॰ २ श्लो॰ ४७ इति; § 2758
तत्राह--**नाप्यभ्वे** त्यादि । § 2759

...28 नाप्यनया मार्गप्रतिपत्तिः यामाश्रित्य श्रुतेः स्मृतेः ।
मन्त्रं नित्यं प्राकृताः प्रतिपद्येरन् तदर्थकम् ॥ २८ ॥§ 2761

नित्यस्यानेकार्थसंभवात् न तस्मादर्थं प्रतिपत्तुमर्हति, कथमन्यथा विप्रतिपत्तिः स्यात् । यदि पुनः रागादिरहितस्य कस्यचिदुपलब्धिर्यतो वेदार्थप्रतिपत्तिः स्यात् । रागादिमत्त्वेऽपि यदि कश्चिद् विवक्षिततदर्थतत्त्वं जानीयाद् ब्रूयाद्वा किं तेन ? न ब्रूमः रागादिमत्त्वात् अपि तु परोपदेशापेक्षीति; कः पुनः तदर्थदर्शिनः परः सः यस्योपदेशमु प व षा द यः प्रमाणयन्तः क पि ला दी न तिशेरते ? तदनेकार्थसंभवात् कुतस्तत्त्वमिदन्तया नेदन्तया वा व्यवस्थापयेत् यतः पौरुषेयाद् विशेष्येत । § 2762

शब्दात् अर्थगतिनगरप्राप्तिहेतुत्वात् मार्ग इव **मार्गः** शब्दार्थसम्बन्धो वाच्यवाचकरूपः तस्य **प्रतिपत्तिः नापि** श्रोतुः । केन ? अन्व[य]परम्परैकान्तेनात्वा इवात्या जै मि न्या द यः शास्त्रार्थदर्शनविगुणत्वात्तेषाम् परे वैकान्तः तेन, न ह्यान्वेता * परोत्वो मार्गं प्रतिपद्यते । किंभूता सा नापीत्याह--**यस्या यामाश्रित्य श्रुतेः** वेदात् सकाशादकृतृमायास्**तत्त्वप्रतिपत्तिः स्या**दित्याध्याहारः । कुतो यामासुत्ये त्याह--**स्मृतेः** । एतदुक्तं भवति--पूर्वं साक्षात् शब्दार्थसम्बन्धदर्शनः सम्बन्धप्रतिपत्तिः परस्य पुनः शब्दश्रवणात् तत्प्रतिपत्तिः, न चैवमिति । यदि वा, स्वर्गापवर्गयोर्**मार्गो** यागादिः तस्य **प्रतिपत्तिः नापीति** व्याख्येयम् । शेषं पूर्ववदिति । माभूत् तेन तत्प्रतिपत्तिः, श्रुतेरेव तु तत्त्वप्रतिपत्तिः स्यादिति चेत्; अत्राह--**मन्त्रमि**त्यादि । **मन्त्र** घृताद्याहवनवाक्यं स्वर्गादिदानसमर्थं **प्रतिपद्येरन्** इदन्तया जानीयुः । के

६ भ्वे ] नाप्यनये
१८ इवात्या ] न्तेन ज्ञात्वा
१९ वैकान्तः ] परम्परैकान्तः
१९ * ] यद्यवेत्ता
१९ रोत्वो ] परान्
२० नापी ] स्ती
२० स्या ] ?
२० कृतृ ] कृत्रि
२१ यामासुत्ये ] माश्रित्ये
२२ नः ] र्शिनः
२५ न्त्र ] न्त्रं

? इत्याह--**प्राकृताः** शूद्रादयो जै मि न्या दि कं । तथा च तद्वत्तेऽपि तदर्थानुष्ठायिनः स्युः इति मन्यते । § 2763

जै मि न्या द य एव तत्प्रतिपद्यन्ते नान्यदिति चेत्; अत्राह--**नित्यमिति** । अयमभिप्रायः--यदा नित्यः सर्वगतो मन्त्रः पुरुषनिरपेक्षः स्वमर्थं प्रतिपादयति तदा सर्वत्र तदविशेषात् शब्दोऽपि प्र[ति]पद्येत, न वा कश्चित् । न ह्याकाशमेचं त्याहासमम्यं प्रत्यन्यथा । सासौ द्विजायैव तं प्रतिपादयति । /ms, कुत एतत् ? स्वभक्तत्वात् । पक्षपातिना किं तेन ? परोऽपि तद्भक्तः स- 513/mkj मुपलभ्यते । अथ तस्यैव आगम एव; तदपि कुतः ? तेन तदर्थानुष्ठानात्; अन्येनापि दृश्यते । विप्रोपदेशात्; किन्तेन, यदि मन्त्र एव समर्थं कथयति । § 2764

एतेन तेन पाठात्तस्येति निरस्तम् । § 2765

यदि पुनः द्विजाराधनातः तं प्रत्येव तत्प्रतिपादनसमर्थो जातः; कथं नित्यः ? § 2766

किं च, तदाराधनाक्रमो यदि मन्त्रार्थः; सोऽपि ततोऽन्येनापि प्रतीयते । नो चेत्; पुरुषकल्पितो नाभिमतफलदायी स्यात् अन्यथा किं मन्त्रेण ? अथ विप्र एव तद्ग्रहणानुष्ठाने योग्यः, न चैतावता मन्त्रोऽनित्यः, नित्यानामपि आत्मादीनां कार्यनियमदर्शनात् इति; तन्न सारम्; यतः स्यादेतदेवं यदि परोपदेशाददद्विजस्य तदर्थप्रतिपत्तिर्न स्यात्, अग्नेरिव धूमः, न चैवं ततः तद्दर्शनात् । द्विजस्यापि अपरोपदेशिका न तत्प्रतीतिः । § 2767

किंच, न ताव[त्] मन्त्रो द्विजोऽयम् इति स्वयं ज्ञात्वा तस्मै स्वसमर्थं निवदेयति अचेतनत्वात्, अन्यथा आत्मज्ञानकल्पनावैकल्यम् । नापि यस्मादहं ब्राह्मणः तस्मादहं मन्त्रार्थं गृह्णामि इति द्विजो जानाति; ब्राह्मणत्वप्रतिपत्तेः तस्यापि स्वयमसंभवात् । वेत्तितं प्रति *चैतद् वर्णैस्वयमेव शास्त्रकृता । ततो **मन्त्रं नित्यं प्राकृता[ः]प्रतिपद्येरन्** इति । कम् इति प्रश्ने उ[त्त]रमाह--तदर्थज्ञोऽयं[सम्]प्रदायाद् वृत्ततेमन्त्रार्थज्ञसम्प्रदायो भावप्रकारेण विशेष्यते तदभिद्यत यतः तत्सम्प्रदायमन्तरेण प्राकृतानां तत्प्रतिपत्तेः मन्त्रो नित्यः ने नात् पौरुषेयात्मत्वात् । नहि परोपदेशापेक्षणे /ms तस्य ततो भेदः । § 2768

कारिकां विवृण्वन्नाह--**नित्यस्य** इत्यादि । **न तस्माद्** नित्याद् वेदात् इति । कथम् ? इत्याह— **कथमित्यादि** । **अन्यथा** अन्येन ततः तस्य

१ कं] दिवत्
१ त्तेऽपि] शूद्रादयः ।
३ दिति] नान्य इति
५ ब्दोऽपि] शूद्रोऽपि
६ म्यं] मेकं प्रत्याकाशम् अन्यं
६ सा] अथा
९ र्थं] तमर्थं
११ एतेन] द्विजेन ।
११ स्येति] द्विजस्य ।
२१ र्थं] स्वस्यार्थं
२१ नावैक] फ
२३ *] निवेदितं
२३ र्णै] वृत्तौ
२५ ते] वर्तते
२६ त] ?
२७ नात्] स्यात्
३० थ] अर्थ

तत्प्रति[प्रत्ति]प्रकारेण **कथं विप्रतिपत्तिः स्यात्** *प्रतिव्याख्यात्रिव्याख्याभेदः स्यात् । नहि स्वयमेव नियतं स्वमर्थं निवदेयति वे ते नित्ये सति सा युक्ता । अथवा, प्रतिपत्त्यभावो **विप्रतिप्रत्तिः कथं** कस्यचित् **स्यादिति** चेत् ? तदेक एवार्थः ततः प्रतीयत इ[ति]नास्ति सा इति; तत्राह--**अनेक** इत्यादि । वेदस्य पुरुषापेक्षया **अनेकस्य** नियोगादि रूपस्या**र्थस्य संभवात्** कथं स्यादिति ? अथ, यानानर्थो वेदात् प्रतीयते स सर्वोऽपि तस्यैव, अन्यथा न कोऽपि स्यादिति चेत्; अत्राह--**नित्यस्य** इत्यादि । स्वर्गोऽर्थः, तस्य काम्यमानत्वात् **स्वर्गकामः*** इति वचना[त्] तस्मै तन्निमित्तं तत्त्वं * यागादि तत् **तस्मात् कथं प्रतिपत्तुर्महति** ? कुतः ? इत्याह--**अनेकार्थसंभवाद्** वेदस्य अनेकार्थोऽर्थतत्त्वम्, अन्यथा सारमेयमांसभक्षणात् स्वर्गः स्यात् एकः तस्यार्थ इति चेत्; अत्राह--**कथ**मित्यादि । अनेकार्थसंभवाभावप्रकारेण **अन्यथा** । § 2769

514/mkj

ननु न जै मि नि [ ः] वेदाद् अर्थनार्थेप्रत्येति, अपि तु स्वयं साक्षात् तत्प्रतिपद्य[ते]वीतरागत्वात्, वेदेन यावद् बोधयति परमिति चेत्; तदाह--**यदि पुनः** इत्यादि । कस्य च जै मि निब्रह्मणो वा रागायातस्यरूप लक्षणमेतत् यथार्थदर्शनस्य, **तद्यदि** स्याद् **यतो** रागादिरहितात् **वेदार्थप्रतिपत्तिः स्यात्** परस्य इत्यध्याहारः । /ms दूषणमत्र **कथं विवक्षित** इत्यादि । जै मि न्या दि ना हेतोर्व्यभिचारादि[ति]भावः । अथ तस्यापि पक्षीकरणान्न दोषः, तत्राह--**रा[गा]दिमत्त्वेऽपि** इत्यादि । **[विवक्षित]तदर्थतत्त्वं** वेदार्थतत्त्वं **कश्चिद**नन्तरज्ञेय **यदि जानीयाद् ब्रूयाद्वा किमन्यथा तेन** कुतः पौरुषेयस्य वचनस्य प्रामाण्यं न स्यात् ? स्यादेव । कुतः ? इत्याह— **रागादी**त्यादि । तत्त्वज्ञानात् इति च द्रष्टव्यम् । § 2770

परः प्राह--**न ब्रूमो रागादिमत्त्वादिति अपि[तु]परोपदेशोपेक्षी** वेत्ति ब्रूयाद्वा **इति** ब्रूमः, **इतिशब्दः** परपक्षसमाप्तौ । तत्र दूषणम्--**कः पुनरि**त्यादि । **यस्योपदेशम् उ प व र्षा द यो** जै मि न्या द यः **प्रमाणं यतः क पि ल**

१ *] व्याख्यातारं व्याख्यातारं प्रति प्रतिव्याख्यातृ ।
१ तिव्याख्यात्रि] तृ
२ ति] निवेदनकर्तृरि सति ।
२ ते] वेदे
२ ति] विप्रतिपत्तिः ।
५ नियोगादि] आदिपदेन भावनाविध्यादिपरिग्रहः ।
६ याना] यावा
८ *] अग्निहोत्रं जुहुयात् स्वर्गकामः इत्यादौ ।
८ *] तच्च
९ त्] तम्
११ एकः] अग्निहोत्रं जुहुयात् इत्यस्य अग्निं हन्तीति अग्निहः श्वा, तस्य उत्रं मासं जुहुयात् खादेत् इत्यर्थः स्यात् । तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ । खादेत् श्वमांसमित्येष नार्थ इत्यत्र का प्रमा ॥--प्र० वा० ३ । ३१८ ।
१३ नार्थे] अर्थं
१५ च] **कस्यचित्**
१५ नि] नेः
१६ रूप] **रागादिरहितस्य उपलब्धिः**, उप
२० ज्ञेय] न्तरोक्तो
२३ देशो] शा
२५ म्] मीमांसकाचार्याः ।
२५ तः] णयन्तः

**दी न तिसरते** । * उ प व र्षा द यस्तत्त्ववादिनो न क पि ला द य इति भिद्येरन् । **स कः परः** उ प व र्षा दि भ्योऽन्यः प्रकृष्टो वा कः ? [न]कश्चित् । कुतः ? इत्याह--**तदर्थदर्श न** इत्यादि । वेदार्थदर्शन इति । परोऽपि परोपदेशापेक्षी स[न्]स्वार्थं वेत्ति ब्रूयात् तासोऽपि तदुपदेशापेक्षी इत्यनादिरियम् उपदेशपरम्पराऽविसंवादिनी इति चेत्; अत्राह--**तदनेकार्थसंभवात्** कारणात् **कुतो** न कुतश्चित् प्रमाणदव्य **परः** इति पदघटना । किम् ? इत्याह--**तत्त्व**मित्यादि । इदन्तया अभिमतरूपतया **नेदं ब्रूयाना** नभिमतरूपतया वा **यतः** तत्त्वस्य व्यवस्थापनात् **पौरुषेयाद्** वचनाद् **विशेष्येत** वेद इति । एवं मन्यते--यदि तस्य एक एवार्थः स्यात् परमार्थः स्यात् परमार्थतः सन्नियतः तदा तस्य कल्पनाशतेनाप्यन्यथा कर्त्तुमशक्यत्वात् स्याद्यप्यताद्युपदेशपरम्परातः तत्त्वप्रतिपत्तिः, अनेकार्थसंभवेत्कस्तत्र /ms अनादिः को वा कल्पितः इति तज्ज्ञायेनार्थ शिष्टसंगृहीतोऽनादिरम्योत्य इति मतिः; [कः] शिष्टः ? ब्राह्मण इति चेत्; उक्तमत्र--तदनिर्णयात् इति । तत एव अनेकोऽपि तदर्थः स्यात् अविशेषात् । § 2771

किं च, सौगतमतानुसारेणाद्द्विजेन श्वपिशिताशनमुच्यमानं कुतोऽनादि न वेदार्थः ? अवान्तरकल्पना न, प्रमाणाभावात् । अथासौ न द्विजधुस्तर्हि सः ? ब्राह्मणःत्वंयोगी चेत्; किं पुनस्तस्य तद्योगो नास्ति ? तथा चेत्; कथं तदनुसरणात् पूर्वं स ब्राह्मणः ? न हि गोचैःसम्बन्धरहितः कर्कः कदाचनापि गौरिति । तदापि न ब्राह्मण इति चेत्; क इदानीं ब्राह्मणः ? यः कालत्रयेऽपि न मन्त्रान्तरायोगी ति चेत्; क एवप्रतिपद्यतां यतो देवदत्तादयः प्रतीयमानाः द्विजकार्या हो सः । तदाप्यसौ ब्राह्मणः तदनुप्रवेशे 515/mkj तु विपरीतः इति चेत्; ननु किं ब्राह्मणत्वं नष्टम् ? तथा चेत्; न नित्यं सामान्यमिति कर्कमध्यमध्यासीनो मुण्डो न गौः स्यात् । अथ न नष्टम्; तदनुप्रवेशेऽपि ब्राह्मण एव । वेदे भक्त्यभावान्नेति चेत्; किं तद्भक्तिरेव ब्राह्मण्यम्, अन्यद्वा ? प्रथमपक्षे न तत्सामान्यम् ज्ञानविशेषत्वात्तस्याः । त-

१ *] क पि ला दी न् अतिशेरते
३ र्शं] र्शि
३ न] र्शिन
४ ता] वा;
६ व्य] णाद् **व्यवस्थापयेत्**
८ ना] नेदन्तया वाऽ
९ एवार्थः] एतदन्तर्गतः पाठः पुनर्लिखितः ।
११ ता] स्यादप्यना
११ वेत्] तु
१२ ज्ञायेनार्थ] न ज्ञायेत । योऽर्थः
१२ म्योत्य] दिः सः अन्योऽन्यः[[कल्पितः ।]]
१५ तानुसारेणा] सारिणा
१६ र] अर्थान्तर
१६ धु] जः, क
१७ णःत्वं] णत्व
१७ स्य] ब्राह्मणत्वयोगः ।
१८ णात्] सौगतमतग्रहणात् प्राक् ।
१८ गोचैः] गोत्व
१८ र्कः] श्वेताश्वः ।
२० रायोगी] [[धर्मान्तरकारी ।]]मतान्तरयोगी
२० एव] वं
२१ द्विज] जाः
२१ सः] र्यहन्तारः
२१ णः] सुगतमतानुप्रवेशे ।
२३ मिति] अश्वमध्ये तिष्ठन् मुण्डः ।
२४ वेशेऽपि] सौगतमतस्वीकारेऽपि ।
२४ किं] वेदभक्तिरेव ।
२५ स्याः] भक्तेः ।

था च सुप्ताद्यवस्थस्य व्यापादना बधेऽपि न ब्रह्महत्यादिदोषः । द्वितीयपक्षे तदभावेऽपि तदवस्थं तदिति स एव दोषः । अथ तद्भक्त्या स एव ज्ञाप्यते; न; शूद्रेऽपि तद्भावात् । वेदपाठरहिते सत्यपि सा न ज्ञायत इति [चेत्;] कुतः तत्र द्विजत्वज्ञानम् ? गोत्रादेरिति चेत्; इतरत्र समानम् । § 2772

/ms एतेन तदर्थानुष्ठानं प्रत्युक्तम् । । तथाहि--*तदेव द्विजत्वम्, अन्यद्वा सामान्यम् ? तदेव चेत्; तद्रहितः सिसुःस न भते । [तथापि तदा]* तदभ्युपगमे अन्यदापि कुतः तदनुष्ठाना[त्] स्यात् ? अन्योऽपि स्यात् । तस्य तदभावान्नेति [चेत्;]कुत एतत् ? अद्विजत्वादिति चेत्; प्रकृतस्यापि तभवेत् । तदनुष्ठानात् स द्विज इति चेत्; अन्योऽन्यसंश्रयः--द्विजत्वे तदनुष्ठानम्, अतस्तदिति । § 2773

एतेन संस्कारादयोऽपि चिन्तिताः । सामान्यं तद् इति चेत्; *तदभावेऽपि तत्तदवस्थमिति नासावब्राह्मण[ः] । तन्न ब्राह्मणगृहीतोऽर्थः वेदस्य । बहुजनगृहीत इति चेत्; न; अनेकोऽपि तद्गृहीत एव समानसभक्षेऽपि बहुजनपरिगृहीतमेव । द्वेषेण तत्कल्पितम् अतो नार्थ इति चेत्; भक्त्या अन्योऽपि द्विजैः कल्पित इति समानम् । ततः स्थितम्— **तदनेकार्थ** इत्यादि । § 2774

वेदस्य प्रमाणत्वे परोक्तां युक्तिं दूषयितुं दर्शयन्नाह--**वेद** इत्यादि । § 2775

...29 वेदः प्रमाणं नित्यत्वात् कर्तुरस्मरणाद्यदि ।
स्वशास्त्रकर्तुः स्मर्ता अपलप्येत न किं परैः ॥ २९ ॥§ 2777

शब्दस्य अन्यस्य वा परिणामित्वं सिद्धम् इत्युक्तम् । अपरिणामेऽपि नचाक्षरराशेरपौरुषेयत्वं युक्तं येन वेदः स्वतः प्रमाणं स्यात्, शास्त्रान्तरस्यापि तदनुषङ्गात् विशेषाभावाच्च । कर्तुरस्मरणात् व्यभिचार्ययमपि । तावता प्र-

१ स्य] द्विजस्य मारणेऽपि ।
१ धेऽपि] व्यापादनेऽपि
२ क्षे] वेदभक्त्यभावेऽपि ।
२ त्त्या] वेदभक्त्या ।
३ द्भावात्] वेदभक्तिसद्भावात् ।
३ हिते] वेदपाठाधिकाररहिते शूद्रे ।
३ पि] विद्यमानापि ।
३ सा] भक्तिः ।
४ त्र] ब्राह्मणे ।
५ *] वेदार्थानुष्ठानमेव ।
६ सिसुः] शिशुः
६ स] द्विजः ।
६ ते] भवेत्
६ *] अनुष्ठानरहितत्वेऽपि शिशुकाले ब्राह्मणत्वस्वीकारे ।
७ दापि] यौवनाद्यवस्थायाम् ।
७ स्यात्] अद्विजोऽपि वेदार्थानुष्ठानात् द्विजः स्यात् ।
८ त] न
११ द्] द्विजत्वम् ।
११ *] वेदार्थानुष्ठानाभावेऽपि ।
१२ भावेऽपि] द्विजत्वम् ।
१२ मिति] सुगतमतानुसारी ।
१३ द्गृहीत] बहुजनगृहीत एव ।
१४ क्षेऽपि] श्वमांसभक्षणमपि
१५ अन्योऽपि] यागादिरूपः ।

माणत्वे शास्त्रान्तरस्यापि प्रमाणत्वं भवेत् न वा श्रुतेः । वर्णानां पदानां च न क्वचित् प्रामाण्यं न भवेत् । सङ्केतात्तदर्थप्रतिपत्तौ प्रकृतवाक्यराशेरितरं प्रति न कश्चिद्विशेषः ? पौरुषेय्या व्यक्त्या च । स्वतः प्रमाणत्वे सङ्केताद-र्शिनोऽपि प्रमाणं स्यात् । कर्तुरस्मरणेऽपि प्रबन्धानादित्वं स्यात् । तथापि कथं प्रामाण्यं तद्राशेः म्लेच्छव्यवहारवत् । तन्न अपौरुषेयस्यापि सङ्केतवशात् 516/mkj अर्थप्रतीतौ विश्वासः । सम्प्रदायाविच्छेदोऽपि पौरुषेयस्य विप्रतिपत्तिनिराक-रणोपायः स्यात्, तदर्थदर्शिभिः पुनः पुनः उच्छिन्नस्य उच्छिन्नस्य प्रवर्तनात् । § 2778

वेदः **प्रामाण्यं** । कुतः ? इत्याह--**नित्यत्वाद**पौरुषेयत्वात् । एवमन्य-ते--शब्दे [अ]प्रामाण्यरागादिकृत दृष्ट चित्वम्मनि । * रागादयश्च पुरुषा-श्रिताः, ततो वेदात् पु[रुषः]निवर्तमानः स्वाश्रयान् रागादीनादाय निवर्तते । रागादिनिवृत्तौ च तन्निबन्धनप्रामाण्यमपि निवर्तते इत्यौत्सर्गिकं प्रामाण्यम-वतिष्ठते । तथाहि--यद्यनिबन्धनं न तत्तदभावे भवति पावकाभावे धूमवत् । रागादिनिबन्धनं च शब्दे[अ]प्रामाण्यम् । ततो वेदे तदभावान्न भवति । तदुक्तम्-- § 2779

> *शब्दे दोषोद्भवस्तावद् वक्त्रधीन इति स्थितम् ।
> तदभावः क्वचित् सिद्धो गुणवद्वक्तृकत्वतः ॥
> वेदे वक्तुरभावानु  दोषाशङ्के च नास्ति नः ।  मी॰ श्लो॰ /ms
> चोदना॰ श्लो॰ ६२ इति ।§ 2782

कुतस्तत्र नित्यत्वमिति चेत् ? अत्राह **क[र्तु]रस्मरणात्** । तथाहि-- यदस्मर्यमाणकर्तृकं तन्नित्यं यथा गगनम् तथा वेदः । **यदि** शब्दः प-

---

९ प्रामाण्यं] प्रमाणम्
९ एव] वं
१० प्रामाण्य] ण्यं
१० *] कृतं दृष्टम्
विद्वन्मनि[[व्यभिचारिपुरुषे ।]]
१२ न] म
१३ नि] न्नि
१४ त] रागाद्यभावात् ।
१७ त] दोषाभावः ।
१७ तः] तद्गुणैरपकृष्टानां शब्दे
सङ्क्रान्त्यसम्भवात् । इति शेषः ।
१८ भावानु] त्तु
१८ च] शङ्कैव
१९ णात्] तेन वेदे व्यवहरद्भिः अवश्यं
स्मरणीयः सम्बन्धस्य कर्ता स्यात्
व्यवहारस्य च...तस्मात् कारणादवगच्छामो
न कृत्वा सम्बन्धं व्यवहारार्थं केनचिद् वेदाः
प्रणीता इति...तस्मादपौरुषेयः शब्दस्यार्थेन
सम्बन्धः ।--शाबरभा॰ १ । १ । ५ ।
बृहती॰ पृ॰ १७७ । यदा चाप्तप्रणीतत्वात्
शब्दोऽर्थं प्रतिपादयेत् । न स्वशक्त्या
तदाप्तत्वं मितौ न स्मर्यते कथम् ॥
तस्मादवश्यं स्मर्तव्यस्य वेदानां सम्बन्धानां
च कर्तुरस्मरणात्
योग्यानुपलम्भनादभावेऽवधारिते सिद्धं
वेदानां सम्बन्धानां च नित्यत्वमित्याह दृष्ट
इति ।--मी॰ श्लो॰ सम्बन्धा॰ श्लो॰ १२३,
१३० । न्यायरत्ना॰ । कथं पुनरपौरुषेयत्वं
वेदानाम् ? पुरुषस्य कर्तुरस्मरणात्
।--प्रक॰ पृ॰ १४० ।
कर्तुरस्मरणाच्चापौरुषेयत्वम्--भाट्टदी॰ पृ॰
३३ । नयवि॰ पृ॰ २७९ । स्मर्तव्यत्वे
सत्यस्मरणात् योग्यानुपलब्धिनिरस्तस्य
कर्तुरनुमानासंभवात्
समाख्याप्रवचननिमित्तत्वात् अपौरुषेया वेदा
इति ।--शास्त्रदी॰ पृ॰ ६९, ६१६ ।

राभिप्रायद्योतकः । अत्र दूषणम्--(?[)**स्वशास्त्रकर्तुः** इत्यादि । **स्वशास्त्रस्य** त्वामृतागमस्य प्रवचनादेर्यः **कर्त्ता** जिनादिः तस्य यः **स्मात्तासोऽपलप्येत न किं परैः** अपलप्येतैव जैनादिभिः । इदमत्र तात्पर्यम्— वेदवत् प्रधानस्यापि तदस्मरणं तेन तत्त्वमस्तु, तत्रेव वेदेऽपि हिरण्यगर्भादयः स्मर्यन्ते । तदपलापोऽन्यत्रापि इति न वेदेतरयोः विशेषः स्यात् । अन्यचिद् वेदेऽपि तव्यमिति । § 2783

[कारि]कायाम् अनुक्रांति नित्यत्वस्य असिद्धतां दर्शयन्नाह--**शब्दस्य** इत्यादि । **वा**शब्द इवार्थः । **अन्यस्य** सुवर्णादेरिव **शब्दस्य** अनेकान्तमन्तरेण अदः तत्र मित्युक्तम्, **अपूर्वम्यस्य परिणामित्वं सिद्धम्** कु मा रि ल स्येव [इति] दृष्टान्तः । § 2784

ननु परिणामनित्यत्वं न कूटस्थनित्यत्वम् हेतुः, तस्य च उभयासिद्ध-
517/mkj त्वात् नासिद्धो हेतुः इति चेत्; अत्राह--**परिणामेऽपि** परिणामनित्यत्वेऽप्यङ्गीक्रियमाणे **नवाक्षराशेरपौरुषेयत्वं युक्तम्** अपुरुषकर्तृकत्वम् उपपन्नम् **येन** पुरुषाश्रितदोषाभावात् **स्वतः प्रमाणं वेदः स्यात्** । कुतस्तन्न युक्तम् ? इत्याह--**शास्त्रान्तरस्यापि** इत्यादि । **तदनुषङ्गाद्** अपौरुषेयत्वानुषङ्गात् परिणामनित्यत्वत्य तत्रापि भावात् । न चैवम्, अतो व्यभिचारी हेतुः इति भावः । § 2785

अथ दुर्भणत्वादिमत्त्वे सति तन्नित्यत्वात् इति विशिष्टोऽन्यत इति न दोषः; तत्राह— **विशेषाभावाच्चेति** । तदन्तरपरिहारिण वेदे विशेषस्याभावात्,
/ms अशेषविशेषस्य अन्यत्रापि करणसंभवा[त्] । **च** इत्यवधारणे । परस्य तत्र नित्यत्वसावकां युक्तिं हन्तुमाह--**कर्तुरि**त्यादि । **व्यभिचारी अयमपि** हेतुः । दूषणान्तरमाह--**तावते**त्यादि । **तावता** कर्तुरस्मरेण नित्यत्वमात्रेण **प्रमाणत्वे वेदस्य** कर्त्तुस्मर्ता एननस्मत **शास्त्रान्तरस्यापि** न केवलं वेदस्य हिरण्यगर्भादिवत् ततः तस्यापि **प्रमाणत्वं भवेदिति** । अनेन उत्तरभागो व्याख्यातः । अथ शास्त्रान्तरस्य तथापि न प्रमाणत्वम्; तत्राह **श्रुतेः** इत्यादि । **प्रमाणत्व**मिति । § 2786

किंच, श्रुतेर्वर्णानां[पदानां वाक्यानां] वा प्रमाणत्वं भवेदिति पक्षाः । तत्रान्य पक्षद्वये दूषणमाह--**वर्णानां पदानां च न क्वचित् प्रमाण्यं न भ-**

---

२ त्वामृता] स्वमता
२ स्मात्ता] स्मर्ता
४ स्यापि] प्रवचनस्यापि
४ त] अपौरुषेयत्वं नित्यत्वं वा ।
४ त्रेव] प्रवचन इव ।
५ त्रापि] प्रवचनेऽपि ।
५ चिद्] अन्यथा
६ व्य] स्मर्तव्य
७ अनुक्रांति] अनुक्तां
९ स्य] ?
११ या] य
१३ वाक्ष] न चाक्षर
१८ त] शास्त्रान्तरात् ।
१९ त] शास्त्रान्तरपरिहारेण ।
१९ रिहारिण] हारेण
२१ कां] साधिकां
२२ रेण] स्मरणे
२३ त] कर्तुः स्मर्ता एव न स्मृतः
२८ त्रान्य] तत्राद्य

**वेत्,** अपि तु वेदवयादावपि * भवे[त्] प्रतिषेधद्वयेन प्रत्यक्षार्थगतेः । नहि लोके वेदे च वर्णपदःअग्न्यादिभयत्राविशेषात् । तृतीयपक्षे द्वैद्धतसङ्केतापेक्षाणाम्, अन्यथाभूतानां वा ? प्रथमपक्षे दूषणमाह--**सङ्केत** इत्यादि । **प्रकृतवाक्यराशेः** वैदिकवाक्यराशेः **इत्थं प्रति** पौरुषेयवाक्यराशिं प्रति **न कश्चिद्विशेषः** प्रमाणत्वेतरकृतो न भेदः । कस्मिन् सति ? इत्याह--**सङ्केतात् तदर्थप्रतिपत्तौ,** रागादिमान् पुरुषः सङ्केतं कुर्यादिति तन्नियतः सङ्केत इति मन्यते । दूषणान्तरमाह--प्रकृतवाक्यराशेः पौरुषेयवाक्यान्तरं प्रति न[क]श्चिद् विशेषः । **व्यक्तिः** सदा सतः तद्वाक्यराशेः प्रकाशनम्, न तदर्थस्य **सङ्केते**त्यादिना उक्तत्वादस्य । **पौरुषेयी** च सा **व्यक्तिः** चिति । **तया** तद्राशेः इतरं प्रति न कश्चिद् विशेषः । § 2787

एवं मन्यते--यथा[अ]सतो वाक्यराशेः रागादिमवाकरणे नेति नियतार्थता, तथा प्रकृतवाक्यराशेः सतोऽपि तथाविधपुरुषेण व्यक्तौ तदन्यथा व्यक्तिरिति स एव दोषः । § 2788 /ms

ननु यथा व्यङ्ग्यं तेनापि व्यक्तिः, घटादौ तथादर्शनादिति चेत्; न खड्गादौ * मुखादेरन्यथापि व्यक्तिदर्शनात् । अथ सर्वत्र प्रसृतस्य तद्वाक्यराशेः न केन चिदन्यथा व्यक्तिः क्रियते, जनापवादभयादनादेयताप्राप्तेश्च, या 518/mkj
भ्रान्त्या कस्यचिदनाथापि तद्व्यक्तिः सोऽव्यतस्तत्यातके स समुदायान्निवर्त्तते । [अ]त एवेन्द्रोत्सवे सहभूय वेदज्ञाः तत्पाठमद्यापि शोधयन्तीति चेत्; उच्यते--अनादावतीते काले तथैव सर्वत्रायं प्रकृत आसीदिति किमत्र प्रमाणम् ? न तावत् प्रत्यक्षम्; इदानीन्तनस्य कस्यचित् तत्कालाध्यक्षाभावात् । भावे द्युक्तं । तत्कालीन[स्य] स्यादिति चेत्; कोशपानं विधेयम् । नाप्यनुमानम्; तदभावात् । तद्धिदमस्ति--वेदः तत्काले सर्वत्र प्रकृत एव तत्त्वाद् यथेदानीम् इति चेत्; कथमेवं भ र तादिनां तत्काले प्रकृतत्वं न स्यात्

---

१ *] वेदवत् वर्णपदादावपि
१ क्षा] प्रकृता
२ दःअग्न्यादि] वर्णपदे अग्न्यादिरूपे भिन्ने, उ
२ तृ] वाक्यानां प्रमाणत्वमित्यत्र ।
२ त] द्वैतम्[[द्वैतमिति द्वौ विकल्पौ वक्ष्यमाणौ इत्यर्थः ।]], कृत
४ ति] इतरं प्रति
९ चिति] चिन्तिता
९ त] वैदिकवाक्यराशेः ।
१० इ] पौरुषेयवाक्यराशिं प्रति ।
११ वा] मता
१२ प्र] वैदिकवाक्यराशेः ।
१२ त] रागादिमता ।
१२ त] इष्टविपरीता अभिव्यक्तिः स्यात् ।
१४ था] यादृशम् ।
१४ तेनापि] तेनाभि
१५ *] खड्गादौ[[आयते खड्गे आयतः मुखः दृश्यते ।]]
१५ थापि] आयताद्याकारतया ।
१७ ना] न्य
१७ स] सापि अभ्यस्तास्तिक
१९ त्रायं] वेदः ।
१९ कृत] प्रसृत
२१ द्युक्तं] ऽप्युक्तम्
२२ द्धि] नन्वि
२२ कृत] प्रसृत
२२ त्त्वाद्] वेदत्वात् ।
२३ ता] भा[[महाभारतरामायणादीनाम् ।]] र ता
२३ त] अतीतकाले ।
२३ कृ] सृ

? व्या स कृतिबाधनादिति चेत्; न; *हिरण्यव्यक्तिबाधनमत्रापि । अस्य विलोपो अन्यत्र कः समाश्वासः ? अथ यथेदानीं तथा अन्यदापि वेद आसीदिति प्रसिद्धिः अत्र प्रमाणम्; अन्यदा हिरण्यगर्भादिकृत इत्यपि प्रसिद्धिः अविशिष्टास्ति । नाप्यागमः; तदभावात् । नहि आत्मनः सर्वदा सर्वत्र प्रसृतत्वप्रतिपादकः परस्य आगमोऽस्ति, कार्येऽर्थे तदभ्युपगमात् । § 2789

एतेन अनागते काले तत्प्रसृतद्वेदप्रमाणंचिन्तितम् । तदेवं सर्वदा त-
/ms त्प्रसृतत्वसिद्धेः कदाचिदन्यथापि व्यक्तिः संभाव्यत इति ना पौरुषेयादस्य विशेषः । § 2790

ननु यदुक्तम्--**सङ्केतवशात्तदर्थप्रतिपत्तौ** इति; तदयुक्तम्; *तद्वशात् पदस्यार्थः प्रतीयते न वाक्यस्य, प्रतिपन्नपदार्थस्यापूर्वस्यापि श्लोकस्यापि श्रवणे तदर्थप्रतीतिदर्शनात्, वाक्यार्थश्च वेदार्थ इति चेत्; अत्राह--**स्वत** इत्यादि । **स्वतः** स्वमाहात्म्यात् तद्वसन्निरपेक्षत्वात् **प्रमाणत्वे** स्वार्थप्रतिपादकत्वे प्रकृतवाक्यराशेः **सङ्केतादर्शनोऽपि प्रमाणं स्यादिति** । परिज्ञातपदार्थस्य सर्वस्यापि तद्वाक्यराशिश्रवणो दपरोपदेशतदर्थप्रतीतिः स्यात्, न चैव [न] च पण्डितोऽपि परकाव्यं तदुपदेशाद् यथावदवगच्छति । § 2791

स्यान्मतम्, यदुक्तम्--**पौरुषेयव्यक्ताप्रकृतवाक्यराशेः इतरं प्रति न कश्चिद् विशेषः** इति; तदनुपपन्नम्; तद्व्यक्तिरपि नित्यैव पुनः पुनः प्रवर्त्तते न पुनरपूर्वात्कदाचित् केनचित् कृतात् । तत्कर्तुरस्मरणादिति; तत्राह--**कर्तुरस्मरणेऽपि** इत्यादि । संभावनायाम् **अपि**शब्दः, तद्व्यक्तेः यः कर्त्ता तस्यास्मरणेऽपि **प्रबन्धानादित्वस्याद्** व्यक्तेः न पुनः नित्यत्वमेव । भवत्येवम् इति चेत्; अत्राह--**तथापि** इत्यादि । [तथापि] तत्प्रबन्धानादित्वप्रकारेणापि **कथं प्रामाण्यं तद्राशेः म्लेच्छव्यवहारवत्** । § 2792

519/mkj

---

१ व्या] महाभारतं व्यासकृतम् इति प्रसिद्धा ।
१ *] हिरण्यगर्भेण व्यक्तो वेदः इति प्रसिद्धा ।
२ विलोपो] पे
२ अ] अतीतकालेऽपि ।
४ सिद्धिः] हिण्यगर्भः समवर्तताग्रे, यो वै वेदांश्च प्रहिणोति इत्यादिना हिरण्यगर्भकृतो वेदः इति प्रसिद्धिः वेदेऽपि समानेति भावः ।
५ का] कुर्यात् इति विध्यंशे एव तत्प्रामाण्यस्वीकारात् ।
७ माणं] तत्वाद्वेदस्य प्रामाण्यं
८ ना] न
१० *] सङ्केतवशात् ।
१३ न्नि] तद्वकृनि
१४ र्श] र्शि
१५ द] णेऽपि
१५ देश] शादेव
१५ चैव] वम् ।
१६ काव्यं] परोपदेशादेव ।
१७ क्ता] क्त्या
१९ पूर्वात्] र्वा
१९ कृतात्] कृतेति
२१ न्धानादित्व] त्वं
२१ त्ये] त्वे
२३ त्] तुलना--म्लेच्छादिव्यवहाराणां नास्तिक्यवचसामपि । अनादित्वात्तथाभावः पूर्वसंस्कारसन्ततेः ॥ तादृशेऽपौरुषेयत्वे कः सिद्धेऽपि गुणो भवेत् ।--प्र॰ वा॰ ३ । २४५--४६ । अष्टश॰ अष्टस॰ पृ॰ २३८ ।

प्रकृतं निगमयन्नाह--**तन्न** इत्यादि । **न[अ]पौरुषेयस्यापि** वाक्यराशेः **सङ्केतवशादर्थप्रतीतौ** कथं **विश्वासः** इदीनीन्तस्य रागादिमत्त्वा[त्]सङ्केतविधातुः । यदि वा, व्यक्तिवत् तत्करणमपि अन्यथा संभाव्यते इति चेत्; अत्राह--**पौरुषेयस्य** इत्यादि । [पौरुषेयस्य] पुरुषवचनस्य **विप्रतिपत्तिनिराकरणोपायः स्यात्** । कः ? इत्याह--**समुपाया** *****विच्छेदोऽपि** न केवलं माहात्म्यमेव । सोऽपि कुतः ? इत्याह--**तदर्थदर्शिभिः** इत्यादि । शास्त्रार्थदर्शिभिः, **पुनः पुनः उच्छन्नस्य उच्छन्नस्य प्रवर्त्तनात्** सम्प्रदायस्य । § 2793 /ms

अथ मतम्--अपौरुषेयवत् पौरुषेयमपि शास्त्रम् अर्थे तादात्म्यादिप्रतिबन्धाभावात् प्रमाणं मा भूत्, अत्राह--**शास्त्रम्** इत्यादि । § 2794

...30 शास्त्रं शक्यविशेषरूपविषयाशेषं प्रमाणं स्वतः,
सर्वज्ञैः सह चेतसो विनियतं प्रतिपादकैः स्यात् परम् ।
कोऽन्यः शंसति वेद्यवेदकवचःशून्यं वचश्चेत्कथम्,
तत्त्वं वस्तुबलागतं जडधियः शुद्धोदनेः शिष्यकात् ॥ ३० ॥§ 2798

**शास्त्रं प्रमाणम्** । कुतः ? इत्याह--**स्वतः** स्वयोग्यतावशात् न तादात्म्यादिबलात्, कृत्तिकोदयवद् भविष्यति शकटे । सर्वं स्यादिति चेत्; अत्राह--**विनियतं** किञ्चिदेव न सर्वम् । किं तत् ? इत्याहा **शक्य** इत्यादि । **शक्यस्वामा** * **विशेषश्च** प्रत्यक्षादिरूपः तस्य **विषयो** गोचरोऽ**शेषो** यस्य तत्तथोक्तं प्रमाणान्तरादिसंवादकम् इति यावत् । अतीतानागतयोरसतोः प्रवर्त्तमान निर्विषयं तदप्रमाणम्; तत्राह--**सर्वज्ञैः सह तश्चेतःप्रमाणम्** । एवमन्यते--यथा सर्वज्ञात्मतीतादौ प्रवर्त्तमाना अपिस्वतः प्रमाणपरमार्थतः तथा इदमपि इति । ततः यदि च सामान्यं व्यक्तिर्वा[वा]च्यं शब्दानां भवेद् अतीतानागतं वाच्यं न स्यात् इति; तन्निरस्तम्; सर्वज्ञानवक्षा वृतस्यापि तत्रातिधारणात् । § 2799

---

२ इदीनीन्त] नीन्तन
३ त्] अभिव्यक्तिवत् ।
५ *] सम्प्रदाया
७ उच्छ] च्छि
७ उच्छ] च्छि
१५ ति] भाविनि ।
१६ इत्याहा] ह--
१७ *] शक्यश्चासौ
१८ रादि] वि
१९ मान] नं
१९ श्चेतः] चेतसः
२० एव] वं
२० ज्ञात्म] सर्वज्ञज्ञानम
२० अपि] नमपि
२० माण] णं
२२ इति] अतीतःनागतं वाच्यं न स्यादर्थेन तत्क्षयात्--प्र० ० २ । १८ ।
२३ णात्] सर्वज्ञज्ञानवत् अतीतानागतस्यापि तत्रावधारणात्

यत्पुनरेतत्-- § 2800

*अतीतानागतेऽप्यर्थे सामान्य[वि]निबन्धनाः ।
पिनिविशन्ते सद्धर्मः कथं भवेत् ॥§ 2802

प्र० वा० २ । ३४ इति; § 2803

तत्रेदं चिन्त्यते--कुतोऽतीतानागतयोर्न तद्धर्मः ? तयोरसत्त्वात् । क-
520/mkj दाऽसत्त्वम् ? स्व काले; वर्त्तमानमपितदनुषङ्गः, तस्याप्यनेकालापेक्ष-
/ms योऽतीतानाततत्रा । कथमेवं सर्वज्ञ निर्विषयाः शब्दयत्वस्यः तेषाम-
पि सामान्यं व्यक्तिर्वा विषयः । उभयत्रापि शब्दवत् प्रसङ्गः । अथान्य-
काले; स्वकाले तर्हि शब्दप्रसक्तमिति कथं तद्धर्मः सामान्यमसद्धर्मः ?
अथातीतादेर्वर्त्तमानस्यसत्त्वात्तदसद्धर्म इत्युच्यते; तर्हि चित्रैकज्ञाननीलाकारे
अविद्यमानेषु पीतादिषु वर्त्तमानमसद्धर्मः स्यादिति दुस्तरम् । § 2804

अथ अतीतादेः स्वरूपेण प्रतिभासने कथमतीतादि ? तदुयुक्तम् § 2805

*स्वरूपेण हि य वृष्टं तदतीतादिकं कथम् ?
नहि अदृश्याद् अतीतादि परं रूपादिभाव्यते ॥§ 2807

प्र० वार्तिकाल० ३ । २४ § 2808

इति चेत्; न सत्यमेतत्; यतः सर्वज्ञेषु स्वरूपेण प्रतिभासमानं कथम् अतीतादिकमति *समानम् । न समानम्, तेषु प्रतिभासमानस्य सर्वस्य वर्त्तमानत्वादिति चेत्; उक्तमत्र न तेषां किञ्चित् कारणं स्यात् वर्त्तमानानां तदनभ्युपगमात् । § 2809

किंच, सुगतश्चेत् स्वहेत्ववस्थानंप्रत्येति; कथं सर्वज्ञः ? प्रत्येति चेत् स्वात्मना वर्त्तमानतया; कथमात्मनः तत्त्वाभ्यासदशां हेतुं जानीयाद् ब्रूयाद् वा ? अन्यथा समकालं रूपं प्रतीयमानं रसस्य हेतुं जानीयादिति रसात्

---

३ न्ते] श्रुतयो निविशन्ते सद
४ इति] अतीतानागतेऽप्यर्थे सामान्यनिबन्धनाः सामान्याश्रयाः श्रुतयो निविशन्ते व्यवतिष्ठन्ते— सीत् घटो भविष्यतीत्यादयः । तथा चासतो घटस्य सामान्यं धर्म इत्युक्तं स्यात् तच्च सामान्यं सत् ऽतीतादेर्धर्मः कथं भवेत् ? न हि तैक्ष्ण्यं शशविषाणस्य भवति ।--प्र० वा० मनोरथ० ।
६ पि] नेऽपि
६ ने] प्यन्य
७ त्रा] पेक्षया अतीतानागतत्वात्
७ ज्ञ] सर्वज्ञाः
७ स्यः] ब्दवन्न स्युः
८ पि] सर्वज्ञानामपि ।
९ ब्दं] सत्
१० स्य] मानेऽ
१२ म्] तदप्युक्तम्--
१३ वृष्टं] यद् दृष्टं
१४ रूपादिभा] द्विभा
१६ ज्ञेषु] सर्वज्ञज्ञानेषु ।
१७ *] कमिति
१७ तेषु] सर्वज्ञज्ञानेषु ।
१८ तेषां] सर्वज्ञज्ञानानाम् ।
१९ मानानां] कारणत्वानभ्युपगमात्, अनन्तरपूर्वस्यैव कारणत्वस्वीकारादित्यर्थः ।
२० स्थानं] स्थां न
२१ हेतुं] हेतुत्वेन ।

सामग्र्यनुमानं कुर्वतीध र्म की र्त्ति ता *सुगतमतं न व्यज्ञायि । यदि पुनरात्मनः प्राग्भावितया; न तर्हि स्वरूपेण प्रतिभासमानं न वर्त्तमानता । अथ सुगतः स्वरूपादन्यन्न पश्यति; कुत एतेन **नान्योऽनुभाव्यो बुद्ध्यास्ति** प्र° वा° २ । ३२७ *इत्यादि वचनादि[ति]चेत्; कथमेवम् आगमप्रामाण्यं निराकुर्वतोयोगिनोनतिप्रकृता । तन्नयुक्तम्--**भूतार्थभावनाप्रकर्षजं योगिप्रत्यक्षम्** /ms न्यायबि° १ । ११ इति । स्वरूपमात्रदर्शिनो योगिन इति चेत्; सर्वेऽपि स्युः अविशेषात् । कथं चैवं स्वरूपमात्रयस्यवसानं सर्वज्ञानकस्यचित् सिध्येद् इत्युक्तम् । प्रतिभा[सा]द्वैतं च चिन्तितम् । कस्यचित् तत्सिद्ध्यभ्युपगमे सुगतस्यापि तत्सिद्धिरनिवारिता इति सर्वज्ञा इव शब्दा अप्यतीतादावप्रतिषिद्धप्रसंगइति सासक्तं **सर्वज्ञैः सहे**ति । § 2810

ननु शास्त्रं चेद् अर्थे प्रमाणम् शब्देन्द्रियज्ञानयोरविशेषः तदुक्तम्-- **सैवैकरूपाच्छब्दादेर्भिन्नाभासा मतिः कुतः ?** प्र° वा° २ । २४ *इति । यदि वा, *तत एव अर्थप्रतीतेः इन्द्रियसंहतेर्वैफल्यं स्यादिति । एत- 521/mkj दप्युक्तम्--शब्दाद् व्यक्तिरूपप्रतिपत्तौ ताच्छेवत्संहतेः साफल्यम्, वैफल्यं भवेदिति; तत्राह--**प्रतिपादकै**रिति । परात्वमव बोधयद्भिः । एतदुक्तं भवति--सर्वज्ञवचनाचेत् जनः तत्त्वमवैति स्वरूपेण; कथं न उक्तदोषद्वयम् ? नो चेत्; किं सर्वज्ञपरिकल्पनेन ? यतः इदं सुभाषितम्--**ज्ञानवान् मृग्यते** प्र° वा° १ । ३२ *इत्यादि । विकल्पाकारमिति चेत्; कथं तदप्रतिबद्धजन्मनः ? अथ सर्वज्ञेषु विकल्पोऽस्ति न युक्तमेतत्; उक्तोत्तरत्वात् । तथाहि--स्वलक्षणगोचरश्चेत् तेषु विकल्पः; न पूर्वदोषपरिहारः, परत्रापि तदनिवारणा[त्] नापि प्रमाणसंख्याव्यवस्था । अवस्तुसामान्यगोच[र]श्चेत्; अस्तु तेषु भ्रान्तता । तत्रकिञ्चिदेतत् । मानादिसर्वज्ञैः सह इति चेत्; अत्राह--**स्याद्** इत्यादि । § 2811

---

१ ती] ता
१ *] ना
२ नः] तत्त्वाभ्यासदशाम् ।
२ ता] सनं न वा वर्तमानतया
३ एतेन] एतत् ?
४ *] तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥
इति शेषः ।
५ तो] ता
५ कृता] न निराकृताः ?
७ स्युः] योगिनः स्युः ।
७ सानं] मात्रपर्यवसाने
७ ज्ञान] ज्ञत्वं
९ चित्] सर्वज्ञान ।
१० संग] प्रसराः
१० क्तं] साधूक्तम्
१२ *] सैव प्रत्यक्षाप्रत्यक्षाभासा
भिन्नाभासा मतिः एकरूपात् शब्दादेः,
आदिशब्दात् गन्धरसादेः कुतः ?
एकरूपविषया च भिन्नाभासा चेति विरुद्धम्
।--प्र° वा° मनोरथ° ।
१३ *] शब्दादेव ।
१४ तेः] त्तौ न तावदक्षसंहतेः
१५ व] परं तत्त्वमव
१८ *] कश्चित्तदुक्तप्रतिपत्तये...
इत्युत्तरांशः ।
२० श्चेत्] सर्वज्ञेषु ।
२१ स्था] प्रमेयद्वैविध्याद्धि
प्रमाणद्वित्वसंख्या व्यवस्थाप्यते ।
२२ ता] स्यादित्यर्थः ।
२२ त्र] तन्न
२२ मानादि] नन्वनादि

ननु वेदवेदकवचनानामभावात् कथं क्वचित् कस्यचित् शास्त्रस्त्वतः प्रमाणमिति चेत्; अत्राह--**कोऽत्र**इत्यादि । /ms सिद्धौदनेः शिका दिग्रादेः **कोऽन्यो** विपश्चित् **संसत्युच्चारयति**, किन्तु स एव । किम् ? इत्याह--**वचः** । किंभूतम् ? इत्याह--**वेद्यं** च घटादि **वेदकं** च ज्ञानं **वचश्च**घटाद्यभिधानम् तानि **शून्यानि** निःस्वभावितियस्मिंस्तत्तथोक्तम् । अनेन परस्य स्ववचनविरोधं दर्शयति । तथाहि--किञ्चिदपि चेन्नास्ति; [कथम्]केनेतत्प्रतिपादकं वचनम् ? *अस्ति चेत्; कथं न किञ्चिदस्ति इति ? स्वप्नादिवत् स्यादिति चेत्; कथं त[त्] ? भ्रान्त्या इति चेत्; उक्तमत्र विभ्रमैकान्ते तदसिद्धेरिति । सर्वविकल्पातीततयेति चेत्; अत्राप्युक्तम् । किंभूतात् ? इत्याह--**जडधियः** इदन्तया[नेदन्तया]वा तत्त्ववेदन[वि]मुखधियः । आनापिस्वसंवेदनाध्यक्षविरोधम् । तथा शून्यता चेत्, स्वसंवेदनाद्य ध्यान सर्वविकल्पातीतता, सा वेनसातद्वेद्येति । कुत एतत् ? इत्यत्राह--**तत्त्व**जीवा[दि]वस्तु, **वस्तुबलेनागतं यतः** । § 2812

इति र वि भ द्र पादपङ्कज च रा न न्त वी र्य विरचितायां सि द्धि वि नि श्च य टीकायां शास्त्रसिद्धिः सप्तमः प्रस्तावः । § 2813

# अष्टमः प्रस्तावः : ८ सर्वज्ञसिद्धिः

522/mkj

ननु **सर्वज्ञैः** इत्यवाच्यम्; *तदभावात् प्रमाणाभावेन इति चेत्; अत्राह--**सिद्धोऽर्थ** इत्यादि । § 2814

...1 सिद्धोऽर्थः सकलः
त्रिकालविषयोऽनेकान्ततत्त्वात्मकः,
बुद्ध्यात्मा परमार्थतः स्वविषये वैशद्यमासादयन् ।
आवरणातिशयः प्रहीणतिमिराक्षेन्दूपलम्भादिवत्,

---

१ शास्त्र] स्त्रं
२ कोऽत्र] न्य
२ शिका] **शुद्धोदनेःशिष्यकात्**
२ दिग्रादेः] दि ग्ना गा देः
३ संस] शंस
५ भाविति] निःस्वभावानि
६ केने] केन
६ म्] अस्ति इति कथ्यते ।
७ *] किञ्चिदस्तीति यदि उच्यते ।
८ मैकान्ते] विभ्रस्याप्यसिद्धेः ।
१० आनापि] अनेनापि
१० म्] दर्शयति ।
११ ध्यान] ज्ञाने
११ सा] चेतसा
१२ त्त्व] त्त्वं
१४ च] जभ्रम
१ *] सर्वज्ञाभावात् ।

हेतुः कर्मविमोक्षणाय न पुनर्द्रव्यस्य लोके श्रुतः ॥
१ ॥§ 2818

[अर्थः] स्वपरप्रकाशको भावः, **बुद्धिः** सैव **आत्मा** जीवः न पुनः बुद्धेरन्यः तत्प्रतिभासविरहात् । **सिद्धो** निश्चितो यथोक्तन्यायात् । यदि पुनः ततोऽन्यः स्यात् कुम्भकारस्यापि *तया सम्बन्धाभावान्नाभावात्न घटादिकम् उपलब्धिमत्कारण[मि]ति कुतः तद्बलात् कस्यचित् चेतनावतः तनुभुवनादिकर्तृत्वम्, यतः तस्य सकलहेतुफलग्रामपरिज्ञानं सिध्येत् । अथ तत्कार्यत्वाद्बुद्धिः /ms
तस्य इत्युच्यते; घटादेरपि उच्यताम्, प्रमेयकार्यत्वेनापि तदभ्युपगमात् । आलम्बनप्रत्ययत्वान्नेति चेत्; आत्मनःसंयोगस्य स्यात् । असमवायिकारणत्वान्नेति चेत्; कस्य तर्हि ? समवायिकारणस्य इति चेत्; न; हेतुफलयोः भेदैकान्तेन समवायीत करणविधिकस्यकर्तुमशक्यत्वात् । § 2819

अथ यत्र समवेतं चेति कार्यं तत् समवायिकारणम्; समवेतम् इति कोऽर्थः ? समवायेन वृत्तम्; कोऽयं समवायो नाम ? अयुतसिद्धयोराधाराधेयभूतयोः यः सम्बन्ध इहेतिप्रत्ययहेतुः[स]समवाय इति चेत्; न; हेतुफलविशेषयोरेव[तइहेतिप्रत्यय ।]त्प्रत्ययहेतुतोपपत्तेः । ननु हेतौ हेतुरिति बुद्धिः, फले फलमपि न मिति न हेतीति चेत्; तर्हि समवायेऽपि इहेतिबुद्धिः स्यात् न पुनः इदं सामान्यम् इदं सामान्यम् इत्यनुगतबुद्धिः, समवायस्यात्र प्रत्ययहेतुत्वं न पुनः प्रकृतहेतुफलयोः हेतुरिति किंकृ[त]मेतत् । § 2820

किंच, समवाय[ः]समवायिभिरसम्बद्ध्यमान एव योगिनोऽन्यस्य वा यदि अयं समवाय इति तन्तुषु पटः इति च बुद्धिमुत्पादयति स्वमाहात्म्यात् न आकाशादिः; तर्हि पटोऽपि तन्तुभिरनभिसम्बद्ध्यमान एव अयं पटः इति[स] च इहेति बुद्धिमुत्पादयेत् तत एव । अयमेव त्रान्यः पक्षःवृत्तेदं शाखा इत्यपि प्रतीतेः, तन्नद्वयोरपिसम्बन्धः । ततो यथा शाखा यां वृक्ष 523/mkj
इति ततो भवति बुद्धिः तदा तत्र शाखा इत्यपि इति चेत्; न; शाखाया

२ न्यः] भिन्नः ।
३ पुनः] बुद्धेर्भिन्नः ।
४ *] बुद्ध्या ।
४ न्धाभावान्नाभावात्] न्धाभावात्
५ लात्] घटदृष्टान्तात् ।
६ स्य] तनुकरणभुवनादिकर्तुः ।
७ स्य] ईश्वरस्य ।
८ त्वान्नेति] न घटस्य ।
८ नः] आत्ममनः
१० स्य] तरकारणविभागस्य
११ चेति] भवति[[उत्पद्यते ।]]
१३ वाय] अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः ।--प्रश॰ भा॰ पृ॰ ५ ।
१५ हेती] फलमिति, न इहेति इ
१६ स्यात्] अत्र पाठस्त्रुटितः इति ।
२२ येत्] स्वमाहात्म्यादेव ।
२२ क्षः] ?
२२ वृत्तेदं] वृक्षे
२३ न्न] तत्र
२३ पि] भि
२४ त्र] वृक्षे ।
तुलना--पटस्तन्तुष्वित्यादिशब्दाश्चेमे स्वयं कृताः । शृङ्गं गवीति लोके स्यात् शृङ्गे गौरित्यलौकिकम् ॥--प्र॰ वा॰ १ । ३५० । वृक्षे शाखाः शिलाश्चाग इत्येषा लौकिका मतिः ।...ताः पुनस्तास्विति ज्ञानं लोकातिक्रान्तमुच्यते ॥--तत्त्वसं॰ पृ॰ २६७ । लघी॰ स्ववृ॰ पृ॰ १४ ।

वृक्षारभ्युत्वप्रसङ्गा[त् । अ]थ यत् पूर्वं तदारं शाखाश्च पूर्वा इति; तन्न /ms सारम्; पूर्वातासामदर्शनात् पटात् पूर्वं तन्तुवत् । अनुमीयन्त इति चेत्; शाखाभ्यः पूर्वं वृक्षोऽस्तीत्यनुमीयताम् । सूक्ष्मस्थूलवत् स्थूलादपि सूक्ष्मस्य कपालादेर्दर्शनात् । अथ दृश्यस्य सतोऽदर्शनम् पूर्वबाधकम्; एतदन्यत्रापि समानमिति न किञ्चिदेतत् । न च कुण्डबदरसम्बद्ध्यमान एव कश्चिद् इह कुण्डे बदराणि इति प्रत्ययहेतुः प्रतिपन्नः, यतोऽन्यत्र तथा कल्पना स्यात् । तत्सम्बन्धः समवाय इति चेत्; इह समवायिषु समवायो वर्त्तते इति बुद्धिर्यदि अन्यसमवायनिबन्धना; अनवस्था । नो चेत्; अनयैव व्यभिचारस्तत्साधनस्य । § 2821

स्यान्मतम्--विशेषणीभावःसम्बन्धनिबन्धना तद्बुद्धिरिति; तन्न सारम्; समवायवत् जात्यादयोऽपि द्रव्यादीनां विशेषणम् इति सर्वत्र तदिबन्धत्वप्रसङ्गात् । विशेषणीभावेऽपि समवायवत् प्रसङ्गः चिन्त्यः । तन्न समवायो नाम । § 2822

अथ बुद्धिरूपतयात्मनः परिणाम[णामात् अबुद्धेः ।]स्यास्तत्र समवायः; तर्हि सिद्धमिदम् **बुद्धिः आत्मा** इति । ननु सौगतमतं स्यादिति चेत्; अत्राह--**अनेकान्ते त*** तत्त्वतः सिद्धः तदात्मा इत्य**नेकान्तः तत्त्वं** स्वरूपं यस्येति । एकस्याऽनेकधर्मात्मकत्वस्य कल्पितत्वाद् अनर्थः स भवेत् इति चेत्; अत्राह--**अर्थः** सिद्धो निरूपितनीत्या नियतविषय[ः] सिद्धः । ततो न विवादपरिसमाप्तिः इति चेत्; अत्राह--**त्रिकालविषय** इति । त्रिषु कालेषु व्यवस्थिताः पदार्था अपि त्रिकालशब्देन उच्यन्ते, **त्रयः कालविषयो** यस्य /ms इति । *तदभावे सकलव्याप्तेरसिद्धेर्न किञ्चिदनुमानं भवेत् । चोदना वा कस्मै[त्रि]कालविषयमर्थं निवेदयेत् ? यतः **चोदना हि** शाबरभा० १ । १ । २ *इत्यादि सुभाषितं भवेत् । § 2823

सर्वज्ञरहितं सर्वं चिन्तयंश्चारुचक्षुषा ।
स चार्वाकश्चिरं चित्रवधं नीतोऽनया दिसा ॥§ 2825

कश्चिदेव तथा स्यादिति वैशेषिकः; तत्राह--**सकलो** निरवशेषः, नहि कश्चिदेवात्मा चेतनः । साकल्येन व्याप्ति[ः]ज्ञेया । तथा चेत्; इतरो तरो ,

१ शाखाया] वृक्षोत्पाद्यत्व ।
१ भ्यु] रभ्य
१ दारं] तद् आरम्भकम्;
२ पूर्वा] पूर्वं
३ सूक्ष्म] क्ष्मात्
३ त्] घटात् ।
६ त्र] इह तन्तुषु पटः इत्यत्र ।
१० णीभावः] व
११ त्] सामान्यादयः ।
१२ त्व] तन्निबन्धनत्व
१२ त्] विशेषणीभावोऽपि स्वसम्बन्धिभ्यां सम्बद्धः असम्बद्धो वा इत्यादि ।
१४ त्र] आत्मनि ।
१६ *] न्तेत्यादि
२० काल] ला
२१ *] त्रिकालविषयकजीवाभावे ।
२३ *] चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवञ्जातीयकमर्थमवगमयितुमलं नान्यत्किञ्चनेन्द्रियादिकम्--शाबरभा० ।
२५ दिसा] शा
२७ रो] सर्वज्ञोऽपि सिद्धः स्यात् ।
२७ रो] इतरोऽपि

नानुमानो वा स्यात् । न चानुमानमन्तरेण अजातोऽपिजीवतीति निरूपितम् । § 2826

यदि मतम्--षट्प्रमाणकः तद्विषयः इति सिद्धसाधनम्; तदुक्तम्-- § 2827
524/mkj

*यदि षड्भिः प्रमाणैः स्यात् सर्वज्ञः केन वार्यते ।§ 2828

मी॰ श्लो॰ चोद॰ श्लो॰ ११० इति; § 2829

तत्राह--**स्वविषय** इत्यादि । स्वस्मि[न्] त्रिकालरूपे **विषयोवैशद्य-मासाद्यय**त्तत्र व **सकलः** इति न सम्बध्यते उत्तरग्रन्थविरोधात् । **स्व**ग्रहणेन नियतसर्वज्ञत्वनिषेधः । नहि सर्वस्वगोचरे निरावरणं ज्ञान नियतप्रकाशकं युक्तम् भानुमण्डलवत् । तदुक्तम्-- § 2830

*ज्ञो ज्ञेये कथमज्ञः स्यादिति प्रतिबन्धरि ।
दाहयोऽग्निः दाहको न स्याद[स]ति प्रतिबन्धरि ॥§ 2832

योगबि॰ श्लो॰ ४३१ इति । § 2833

यत्पुनरत्रोक्तं प्र ज्ञा क रे ण--**सकलविषयत्वे सति आत्मनो निरावरणत्वे तत्र वैशद्य सिध्यति तत्सिद्धौ च तद्विषयत्वं सिध्यति इत्यन्योऽनसमाश्रयः** । इति; तत् **त्रिकालविषयः** इत्यनेन निरस्तम् । न तस्यानुमानमन्तरेण प्रतिभासाद्वैतेऽपि जीवितमस्ति इत्युक्तम् । तच्च व्याप्तिग्रहणमन्तरेण नेत्यपि । विषयग्रहणेन कामशोकभयादिवद् वैशद्यमिति निषिद्धम् । नहि तद्विषये वैशद्यम् । § 2834 /ms

ननु त्रिकालविषयं मनोज्ञानम् अन्यस्य तददृष्टेः । तच्च किमिव तत्र विशदं यथार्थं वा स्यात्, दृष्टान्तयुक्त्याभावे तदसिद्धेः । तदुक्तम्-- § 2835

*मृष्यमाणो यथाङ्गारः शुक्लतान्नेति जातुचित् ।

---

१ नानुमानो] नं
१ अजातोऽपि] चार्वाकोऽपि
३ यः] त्रिकालविषयः ।
५ इति] मीमांसकः । एकेन तु प्रमाणेन सर्वज्ञो येन कल्प्यते । नूनं स चक्षुषा सर्वान् रसादीन् प्रतिपद्यते ॥--मी॰ श्लो॰ चोदनासू॰ श्लो॰ १११ ।
६ यो] ये
७ व] **सादयन्**, तत्र च
८ ज्ञान] नं
१० स्यादिति] स्यादसति
११ योऽ] ह्येऽ
१२ इति] उद्धृतमिदम्--जयध॰ प्र॰ भा॰ पृ॰ ६६ । अष्टस॰ पृ॰ ५० । असति प्रतिबन्धके...न स्यात्कथमप्रतिबन्धकः--योगबि॰ ।
१४ द्य] द्यं
१४ न्योऽन] न्य
१६ त] अनुमानम् ।
१६ पि] उक्तम् ।
१७ द्] काल्पनिकं भावनात्मकम् ।
१७ त] कामादिभावनाविषये ।
१९ त] मनोज्ञानम् ।
२० युक्त्या] क्त्य

मनोज्ञानं तथाभ्यासात् नैव याति सदर्थताम् ॥ इति;§ 2837

तत्राह--**प्रहीण** इत्यादि । **प्रहीणं तिमिरम्,** उपलक्षणमेतत् रजोनीहारादेः, यस्य तत्तथोक्तम् **अक्षम्** इन्द्रियं यस्य तस्येन्दूपलभ्य आदिर्यस्य वृक्षोपलम्भादेः सोऽपि तथोक्तः स इव **तद्वदिति** । एवं मन्यते--यथा चन्द्रादिज्ञानं स्वविषये अविशदमयथार्थं वा आवरणवशात् न स्वतः तथा मनोविज्ञानम्, यथा च तद् आवरणापाये विशदं तत्र यथार्थं च तथा मनोज्ञानमपीति । एवं हि भवदीयं भवेद् यदि तद् अविशदायथार्थग्रहणस्वभावं नित्यं वा स्यात्, तच्चायुक्तम् **अनेकान्ततत्त्व** इति वचनात्, सत्यं स्वप्नावावसत्याविशदयथार्थग्रहणदर्शनाच्च । तथापि तत्स्वभावं तद् इति वेचन्द्रादिज्ञानमपि तत्स्वभावम् इति न परतोऽप्रामाण्यम् । यथा चात्र तिमिरादि तत्कारणमुपलभ्यते तथा मनोज्ञानमनुमीयते । न च मीमांसकस्य अनुमान[म]प्रमाणं वेदनित्यताऽसिद्धिप्रसङ्गात् । § 2838

525/mkj

ननु[द्वि]चन्द्रादिज्ञानं यदि तत्स्वभावं कदाचनापि न ततो विशदस्य यथावस्थितस्य वाऽर्थस्य प्रतीतिः स्यादिति चेतिदितितत्रसमानम् । अथ सत्यस्वप्ने तस्य अन्यतः सत्यार्थता वैशद्यं च, तत एव चन्द्रादिज्ञाने ज्ञानेऽपि /ms इति स्वतोऽप्रामाण्यं परतः प्रामाण्यमिति प्रसक्तम् । अन्यस्यादर्शनमुभयत्र समानम् । § 2839

ननु तदुपलम्भवत् तस्य स्वविषये वैशद्यासादनेकोहेतुः इति चेत्; अत्राह--**[अ]तिशयो हेतुः** इति । **अतिशय** उत्कर्षः । कस्य इति चेत् ? उच्यते— [आवरणस्य] **प्रहीणतिमिराक्षेन्दूपलम्भादिवत् स्वविषये वैशद्यमासादयन्तीति यन्** इति वदता प्रहीणावरणतिमिर इत्युक्तं भवति । तस्माद् **आवरणातिशयो हेतुर्लिङ्गम्** । तथा च प्रयोगः--आवरणप्रहाणं पुरुषेषु क्वचित् परमकाष्ठानिष्ठम् अतिशयत्वात् तिमिरादिप्रहाणवत् । § 2840

ननु तत्प्रहाणवत् दृष्टिप्राहमव्यतिशयवद् उपलभ्यते ततोऽस्या अपि तद्वदभावः स्यात्, न चैवमिष्यते, ततो व्यभिचार इति चेत्; अत्राह--**कर्म** इत्यादि । **कर्मणां तिमोक्षणम्** आत्मनः सकाशाद् अपसारणं तस्मै तदर्थो हेतुः न पुनः तदत्यन्ताभावार्थः । कुतः ? इत्याह--**न पुनः** नैव **द्रव्यस्य** जीवस्य पुद्गलस्य अन्यस्य वा क्षयः अत्यन्ताभावोपलक्ष्यते यतः सतोऽत्यन्त-

---

१ इति] घृष्यमाणो हि नाङ्गारः शुक्लामेति जातुचित् । निजः स्वभावसम्पर्कः केनचिन्न निवार्यते ॥--प्र० वार्तिकाल० २ । २३४ ।
३ भ्य] तस्य **इन्दूपलम्भ**
९ त्या] सत्यस्वप्नादिवत् सत्य
१० वे] चेत् द्वि
१० प] दोषात् ।
१४ त्र] चेत्; तदितरत्र
१५ न्द्रादिज्ञाने] ज्ञाने इति द्विर्लिखितम् ।
१८ नेको] वैशद्याभावादनेकान्तो
२४ त] आवरणप्रहाणवत् ।
२४ दृ] दृष्टिर्ज्ञानम् ।
२४ व्य] प्रहाणमप्य
२४ तोऽस्या] दृष्टेरपि ।
२५ त] आवरणवत् ।
२६ ति] वि
२८ स्य] आकाशादेः ।
२८ ल] भावो ल

विनाशाभावात् इति प्रतिपादितमिति न पुनरुच्यते । ततो न यथात्मनःर्मणां तथा तस्यप्यनात्मना विमोक्षणसंभवान्न व्यभिचार इति भावः । यदि वा ज्ञानस्य थैसत्यस्यवा अतिशयो गृह्यते । § 2841

नन्वेवं **स्वविषये सद्यमासादयन् सिद्धो**ऽपि किं सुगतोऽन्यो वेति विशेषरूपतया न सिद्धः तत्प्रतिबद्धहेत्वभावादिति चेत्; अत्राह--**श्रुत** इत्यादि । **श्रुतेः**श्रवणविषयतामुपनीतो **लोके** अनन्तरप्रस्तावे नाः स्याद्वादः स्यात्कार-लाञ्छनो वाक्यराशिः प्रशस्तो वा कर्मफलसम्बन्धादिविशेषः **ततः**सिद्धिः त-द्विशेषः इत्यध्याहारः, वचनविशेषाद् वत्कुविशेषसिद्धे[र]प्रतिषेधात् । § 2842 /ms

ननु सुगतेनापि कल्पितः स्याद्वाद उक्त इति सोऽपि ततस्तत्र **वैशद्य-मासादयन् सिद्धः** स्यादिति चेत्; अत्राह--**परमार्थतः** । § 2843

स्यान्मतम्--ज्ञानस्य वैशद्यम् अक्षव्यापारात्; अक्षाणां च सन्निहिते व-र्त्तमाने व्यापारः, तत्कथं स तत्र वैशद्यमासादयन् सिद्धोऽपि सर्वज्ञः स्यात् । उक्तं च-- § 2844

*सन्निहितं वर्त्तमानं च गृह्यते चक्षुरादिना ।
न तत्स[मु]द्भवं ज्ञानं जायतेऽतीतभाविनि ॥ *इति ।§ 2846

चेत्; अत्राह--**धीः** इत्यादि । § 2847
१526/mkj

...2 *धीरत्यन्तपरोक्षेऽर्थे न चेत्पुंसां कुतः पुनः ।
*ज्योतिर्ज्ञानाविसंवादः श्रुताच्चेत् साधनान्तरम् ॥ २ ॥§ 2849

परोक्षज्ञानमिष्यत एव कथमनागतार्थविशेषेषु ज्योतिर्ज्ञानाविसं-वादः तत्स्वभावकार्ययोः प्रागग्रहणात्, श्रुतेश्च तत्र प्रामाण्यानभ्युपगमात्

१. दृष्टेः ।

२ ना] ततो यथा आत्मनः कर्मणां तथा तस्या अपि न आत्मनः
३ स्य] वैशद्यस्य
४ द्य] वैशद्य
५ त] तदविनाभावि ।
६ श्रुतेः] श्रुतः
६ नाः] वा
७ सिद्धिः] सिद्धः
८ त्कु] कृ
९ त] श्रुतात् कल्पितात् ।
१२ स] बुद्ध्यात्मा ।

१५ *] सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना--मी° श्लो° सू° ४ श्लो° ८४ ।
१७ *] उद्धृतोऽयम्--...श्रुताच्चेत्... प्र° मी° पृ° १२ ।
१८ *] तुलना--ग्रहादिगतयः सर्वाः सुखदुःखादिहेतवः । येन साक्षात्कृताः तेन किन्न साक्षात्कृतं जगत् ॥--न्यायवि° ३ । ४१४ । चन्द्रसूर्योपरागादेः ततः संवाददर्शनात् । अप्रत्यक्षेऽपि पापादौन प्रामाण्यं न युज्यते ॥--शास्त्रवा° २ । ३ ।

विध्यादिविषये नियमात्, प्रमाणान्तराभावात् । यदि पुनः त्रिकालविषया श्रुतिरिष्यते, प्राप्तं परोक्षाणां पुरुषज्ञानमिति । § 2850

धानन्तरोक्तो बुद्ध्यात्मा वैशद्यमासादयन्त **चेत्** न विद्यते यदि । **क्षा*त्यन्तपरोक्षेऽर्थे** धर्मादौ । स्वतः इति द्रष्टव्यं लिङ्गादिव्यपोहार्थम् । **कुतः** प्रमाणान्न कुतश्चित् । **पुनः** इत्यत्र वीप्सार्थो द्रष्टव्यः-- पुनः पुनः अनाद्यनन्तकाले, **ज्योतिर्ज्ञानाविसंवादः ज्योतीषि** ग्रहनक्षत्रादीनि तेषां **ज्ञानं** ग्रहणापरायप्रबद्धचारतत्फलतत्कारणाधारधर्मादिप्राणिक्षेत्रादिपरिच्छेदः तस्या**विसंवादः** तदभावे तदन्यकारणाभावात् । केषाम् ? इत्याह- -**पुंसाम्** पृथगतान्यम् अस्ति च तदविसंवादः ततोऽस्ति तत्र धीरिति । यस्तु क्वचिद् विसंवादः समास्तार्थसम्बन्धापरिज्ञानात् लिङ्गलिङ्गिसम्बन्धाऽज्ञानाद् अनुमेयज्ञानविसंवादवत् । तत्सवम्बपरिज्ञाने तदविसंवाददर्शनात् । अपौरुषेयं शास्त्रमस्ति ततः तदविसंवाद इति चेत्; अत्राह— [श्रुतात्] शास्त्रात् **चेत्** तदविसंवादः **साधनान्तरम्** अतिशयरूपात् सर्वज्ञस्यराधनादिदं शास्त्र-
/ms रूपम् अपरं साधनम् । [अ]विसंवादाद्वा तमन्तरेण तदभावात् । § 2851

कारिकां विवृण्वन्नाह--**परोक्षज्ञानमि**त्यादि । ननु परोक्षस्य अस्मदाद्यपेक्षया देशादिव्यवहितस्य धर्मादेर्ज्ञानं केन अनुमानमेवेष्यते, येनैवमोद्यते ? न सौगतादिना सर्वज्ञवादिता; प्रत्यक्षस्यापि तज्ज्ञानस्य तेनाभ्युपगमात् । नापि मीमांसकेन; आगमस्यापि तेनाभ्युपगमात् । न च लौकायतिकेन; नज्ञानस्यानुमानस्य अन्यस्य वा प्रमाणत्वेन तेनानभ्युपगमादिति चेत्; सौगतेन इति ब्रूमः । तथाहि--यस्माद् उत्पन्नं यदाकारानुकारं तस्यैव ग्राहकज्ञानं सुगतस्यापीति तदाकाराधायकः परोक्ष[ः] । स च तदाकारज्ञानव्यतिरेकानु * यथा अस्मदादिभिरनुमीयते तथा सुगतेनापीयितरथाप्रत्यक्षेण अनुमानेन वा[त]दर्थस्य तेनाऽपरिच्छेदात् पृथग्जनादप्यसौ पापीयान् । यदिवा, चा[र्वा]केणेति शिष्मः । तेनद्यसर्वज्ञागमजादिना व्यवहारमिच्छता परचैतन्यादाविव नष्टादावप्यनुमानमभ्युपगन्तव्यम्, अन्यथा न संपूर्णव्यवहारसिद्धिः । § 2852

३ रोक्तो ] धीः अनन्तरोक्ता
३ न्त ] यन् न
४ * ] क्व ? अ
४ र्मादौ ] धर्मादौ
६ ज्योतीषि ] ज्योतींषि
७ राय ] णोपराग
९ म् ] पृ[[असर्वज्ञानामित्यर्थः ।]]थगात्मनाम्
९ त ] अत्यन्तपरोक्षेऽर्थे ।
१० मास्तार्थ ] सः शास्त्रार्थ
११ म्ब ] तत्सम्बन्ध
१३ रा ] सा
१४ त ] सर्वज्ञसिद्धिमन्तरेण ।
१४ त ] शास्त्रेऽविसंवादाभावात् ।
१६ मो ] वं चो
१७ वादिता ] ना
१९ ज्ञा ] त[[परोक्षज्ञानस्य ।]]ज्ज्ञा
२० दाकारानुकारं ] रि च
२१ क ] कं
२१ ज्ञानं ] इति नियमात् ।
२२ तिरेकानु ] तदाकारज्ञानान्यथानुपपत्तेरित्यर्थः ।
२२ * ] कात्
२२ था ] पि, इतरथा
२४ द्य ] तेनापि अ
२४ जादिना ] वादिना[[सर्वज्ञागमनिराकरणवादिना ।]]

527/mkj

भवतु तत्तदेवेति चेत्; अत्राह--**कथमनागत** इत्यादि । **अनागतार्थ-विशेषेषु ग्रहणादिषु** भाविषु **ज्योतिर्ज्ञानविसंवादः कथं**[न कथं]चित् । कुतः ? इत्यत्राह--**तद्** इत्यादि, **तेषाम्** अनागतार्थविशेषाणां ये **स्वभावकार्ये** तयोः **प्रा[गग्रहणात्]** ग्रहणादेः पूर्वनिर्णयासंभवात् । एवं मन्यते--सुगतेन सह तत्स्वभावस्य निर्णये तेषामनागतार्थतांकुतः ? तद्रूपज्ञानस्य प्रश्नादेर्वा तत्कार्यस्यापि निर्णये स एव दोषः । नहि भावि कारणम् इति निरूपितम् । यदि वा, अनुमानप्रवृत्तिः प्राज्ञातनिर्णयासंभवात् एकद्विप्रमाणनियम-वादिनाम् इति द्रष्टव्यम् । तर्हि परोक्षज्ञानम् आगमोऽप्यस्ति ततोऽयमदोष इति; तत्राह— **श्रुतेश्च** इत्यादि । *श्रुतिजनितं परोक्षार्थज्ञानं **श्रुतिः** तस्याश्च **तत्र** अनागतनष्टादौ **प्रामाण्यानभ्युपगमात्** सौगतादिभिः । इदमत्र तात्पर्य-म्--यदा अनागतविषयं प्रत्यक्षमनुमानश्चा सुगतस्य अन्यस्य वा न विद्यते, तदा अपौरुषेयी श्रुतिः तत्र प्रमाणयितव्या । न च तत्कृतमिति मीमांसकैः तत्प्रामाण्यमिष्यत इति चेत्; अत्राह--**विध्यादी**त्यादि । **विधिः आदिर्यस्य** नियोगभावनादेः स एव **विषयः** तत्र **नियमात्**; श्रुतेस्तत्र प्रामाण्यानभ्युपग-मात् मीमांसकैरपि इति । अन्यदेव तत्र प्रमाणमिति चेत्; अत्राह--**प्रमाण** इत्यादि । निरूपितात् प्रमाणादन्यस्य [प्रमाणान्तरस्य]तत्रा**ऽभावात्** इत्यर्थः । अथ अविशेषेण **त्रिकालविषया श्रुतिः इष्यते**; तदाह--**यदि पुनः** इत्यादि । तत्रोत्तरमाह--**प्राप्तम्** इत्यादि । § 2853 /ms

अथ वेदः स्वयमेव परोक्षमर्थं प्रतिपादयति इति किं तत्र ज्ञानेन इति चेत् ? अत्राह— **त्रिकालविषयम्** इत्यादि । § 2854

...3 त्रिकालविषयं तत्त्वं कस्मै वेदो निवेदयेत् ?
अक्षय्यावरणैकान्तान्न चेद्वेत्ति तथा नरः ॥ ३ ॥§ 2856

पुरुषाः कुतश्चनापि तदविद्यावरणविच्छेदानिष्टेः न बोद्धुमर्हन्ति, तत्प्रक-र्षानिवारणात् । वेदो न कस्यचित् स्वतः प्रमाणम्, तदविनिश्चयात् । § 2857

**कस्मै** न कस्मैचित् **वेदो निष्पादयेत् तत्त्वम्** । किन्तु **त्रिकालविषयम्** अचेतनत्वात् इत्यभिप्रायः । चक्षुरादिवत् स्वयोग्यं तत्र ज्ञानं जनयेत् सर्वस्य

---

२ ज्योतिर्ज्ञान ] नाऽ
५ तार्थतां ] तार्थता
७ वृत्तिः ] त्तेः
७ प्राज्ञात ] प्राग् व्याप्ति
७ ए ] एकप्रमाणवादिनः चार्वाकस्य, द्विप्रमाणवादिनः बौद्धस्य च ।
९ * ] वेद ।
११ श्चा ] नं वा
१२ त्र ] अनागते ।
१२ मि ] प्रमाणं स्वीकृतम् ।
१४ त्र ] अनागतादौ ।
२२ रः ] उद्धृतोऽयम्--प्र० मी० पृ० १२ ।
२५ येत् ] निवेदयेत्
२५ किन्तु ] किं तत् ?
२६ योग्यं ] ग्ये

न वा कस्यचित् तत्र सङ्केतानर्थक्यम् । किमपिसेवेण न निवेदयेत् ? इत्याह--**अक्षय्यावरणेकान्तात्** कारणात् **न चेद्** यदि **वेत्ति** त्रिकालविषयं तत्त्वं **तथा** विशदप्रकारेण **नरः** तथा तद्वेदने निवेदयेत् सङ्केतकारिणो विशिष्टस्य नरस्य अभावादिति । § 2858

/ms

वेदार्थस्य साक्षात् कश्चित् ज्ञाताऽस्तु न तु सर्व इति चेत्; अत्राह--**पुरुषा** इत्यादि । तद्विषयदोषावरणविच्छेदाद् बोद्धुमर्हन्तीति निवेद[य]न्नाह-

528/mkj -**कुतश्चनापि** इत्यादि । न केवलं स्वत एव **अपि** तु **कुतश्चन** कारणात् सम्यग्दर्शनादेः तत्त्वरागादि **अविद्यावरणं** च तयो**र्विच्छेदस्य** नाशस्य **अनिष्टेः न बोद्धुमर्हन्तीति** । § 2859

ननु साकल्येन तदावरणविच्छेदो नास्ति पुरुषाणाम् अनाकमनोर्विद्यते इति चेत्; अत्राह--**तदि**त्यादि । **तस्य** तद्विच्छेदस्य **प्रकर्षस्य** अतिशयस्य सर्वज्ञा[ज्ञ]**सिद्धेरनिवारणात् प्राप्तं परोक्षाणां पुरुषज्ञानम्** इति । चर्चितमेतदनन्तरम् । § 2860

ननु सत्यम्, पुरुषा न वेदार्थं बोद्धुमर्हन्ति, वेदः पुनरपौरुषेय[ः]**स्वतः** स्वार्थं प्रतिवादयति । तदाह--**वेद** इत्यादिना । परः पृच्छति कस्य **प्रमाणम्** इति चेद् इति । तं प्रत्याह— **न कस्यचित्** सुकथस्येति । कुतः ? इत्यत्राह--**तदि**त्यादि । वेदार्थतत्त्वा**ऽविनिश्चयात्** *पुरुषत्वेन रथ्यापुरुषवत् स्वयं तर्हि निश्चयाभावात्, वेदस्य वाऽचेतनत्वेन तत्र विनिश्चयानुत्पादनात् इति भावः । § 2861

किंच, सर्वं वचनं[जन्यम्, अ]र्थप्रतिपादनं च पुरुषापेक्षम् आत्मनि दधदृष्टमपि यदि वैदिकं वचनमन्यथा संभाव्येत, तर्हि पुरुषेषु अर्थज्ञानं विशदं अक्षा[द्]दृष्टमपि *तदभावेऽपि स्यात् । § 2862

ननु वेदे कर्त्तु[र]स्मरणं साधनमस्ति नेह तदिति चेत्; न; अत्रापि ज्ञानातिशयोऽस्ति इति दर्शयन्नाह--**जीवानाम्** इत्यादि । § 2863

...4 जीवानामसहायाक्षादाशास्त्रार्थविदः क्रमात् ।
विज्ञानातिशये विद्वान्न वै विप्रतिपद्यते ॥ ४ ॥§ 2865

---

१ पिसेवेण] किमविशेषेण
२ णे] णै
६ त] त्रिकालविषय ।
८ त्त्व] तच्च
११ ते] ?
११ त] आवरणविच्छेदस्य ।
१२ प्राप्तं] अर्थानाम् ।
१५ तिवा] पा
१६ स्येति] स कथयेत्
१७ *] नास्ति कश्चित् वेदार्थतत्त्वज्ञः पुरुषत्वात् रथ्यापुरुषवत् इत्यनुमानेन ।
२१ ध] [[एतद्वयम् ।]]द्वयं
२१ था] अपौरुषेयम् नित्यं च ।
२२ दं] इन्द्रियात् ।
२२ *] इन्द्रियाभावेऽपि ।
२३ स्ति] अपौरुषेयत्वसाधकम् ।

स्थावरादेः शास्त्रार्थतत्त्वज्ञपर्यन्तस्य जीवराशेः उत्तरोत्तरबुद्धिप्रकर्षं प्रति न कश्चिद् विप्रत्तिपत्तुमर्हति अन्यत्र विप्रकृष्टसंशीतिवादिनः शौद्धोदनिशिष्यकात् । शास्त्रार्थविदां च तदर्थज्ञानप्रकर्षः स्वभावपाटवाभ्यासतारतम्यात् सर्वथाऽस्त्येव । कथम् ? उपनिबन्ध...तथैव कस्यचित् शास्त्रार्थनिरपेक्षं परोक्षज्ञानपाटवं यदि स्यात् किं विरुध्येत ? यतोऽसंभवत्प्रकर्षेषु स्वत एव वेदः प्रमाणं न स्यात् । यथा वचनत्वाविशेषेऽपि वेदः स्वत एव स्वार्थं प्रतिपादयति तथा पुरुषत्वाविशेषेऽपि कश्चिदेव अक्षनिरपेक्षः परोक्षार्थं विषयीकरोति । लोके कीदृशं प्रमाणं सर्वज्ञस्याभावसाधकम्, प्रत्यक्षादेः अभावविषयत्वविरोधादभावप्रमाणवैफल्यापत्तेरनभ्युपगमाच्च । तद्भावे शास्त्रं युक्त्यबाधितमस्ति । § 2866

नास्ति सर्वज्ञः अनुपलब्धेः खपुष्पवत् इत्यत्रोच्यते--यदि साधकप्रमाणनिवृत्तिः आत्मा वा तद्रहितोऽनुपलब्धिः; यथास्वं नैरात्म्यं प्रसज्येत । न ह्यसर्वदर्शी तथैव सर्वात्मविशेषान् साक्षात्कर्तुमर्हति । तत एव प्रत्यात्मविशेषाणामनुमातुमशक्यं लिङ्गा * भावात् । तदविशेषेण अनेकान्तात्मक- 529/mkj वस्तुतत्त्वसाधनात् । कुतश्चित्तत्प्रतिपत्तौ अप्रतिपन्नविशेषाविनाभाविनः प्रतिपन्नस्वभावस्यापि तथैवानात्मकत्वप्रसङ्गात् । ततो न कस्यचि दुपलब्धिरिति सर्वाभावः । श्रुतस्याप्येवं प्रसङ्गात् । न हि...विशिष्टविषयत्वात् पुरुषार्थसिद्धेः । अन्यथाऽनवधेयत्वमेव शास्त्रस्य । तदियं प्रतिपतृप्रमाणनिवृत्तिः सर्वसम्बन्धिनी प्रतिपत्तुमशक्येति न केवलं सर्वज्ञाभावं साधयति अपि तु सववस्तुव्यतिरेकं च । भावे तर्हि किं प्रमाणम् ? शास्त्रं ब्रूमः । तत्सद्भावप्रतिपादनात् चतुर्दशगुणस्थानोपवर्णनाच्च । कथमस्य प्रामाण्यम् ? चोदनायास्तर्हि कथम् ? नित्यत्वात्, तस्यास्तत्; तत एव प्रवचनस्यास्तु । कथं प्रवचनस्य नित्यत्वम् ? यथा चोदनायाः । कथं तर्हि चोदनायाः नित्यत्वम् ? कर्तुरस्मरणादिति; तत एव परमागमस्य । परमागमस्य तीर्थकराः कर्तारः स्मर्यन्ते इति चेत्; ननु क ण भ क्षा द यो वेदस्य कर्त्तारं स्मरन्ति । क ण भ क्षा दी नां स्मरणस्य अप्रामाण्ये पुनः इतरेषां परमागमकर्तृ विषयस्मृतेः प्रामाण्ये न कश्चिद्विशेषः । तदेतत् प्रवचनमपौरुषेयम्, तीर्थकराः समुत्सन्नं प्रवचनं प्रवर्तयन्तीति सर्वज्ञागमयोः प्रबन्धनित्यत्वेन नित्यत्वोपगमात् कुतस्त्र एवमन्योऽन्याश्रयणं स्यात् । तन्नानुमानं सर्वज्ञाभावसाधनं प्रवचनं चेति स्थितम् । न च नानेकान्तशासनं जीवानां नानापरिणामप्रतिपादकम् । न च तत्प्रत्यनीकं प्रमाणमस्ति स्याद्वादेन बाधितविषयत्वात् पिटकत्रयवदिति । स हि एकान्तो न संभवति निर्विषयं वेति राजपथीकृतमेतदिति । यदि

१४ *]
उद्धृतोऽयम्...विज्ञानातिशये...न्यायवि॰ वि॰ द्वि॰ पृ॰ २५२ ।
२८ त्वेन] तुलना--एवं
यत्केवलज्ञानमनुमानविजृम्भितम् । नर्ते
तदागमात् सिध्येत् न च तेन विनागमः ॥
सत्यमर्थबलादेव पुरुषातिशयो मतः ।
प्रभवः पौरुषेयोऽस्य प्रबन्धोऽनादिरिष्यते
॥--न्यायवि॰ ३ । ४१२--१३ ।

पुनः ते न सर्वज्ञाः वक्तृत्वादिभ्यः [वक्तृत्वात् पुरुषत्वात् रागादिमत्त्वात्] रथ्यापुरुषवदिति; जै मि नि रन्यथा [वेदज्ञः कुतः] ? नहि किञ्चित्साधर्म्यात् सर्वं तथैवेति प्रतिपत्तुं युक्तमतिप्रसङ्गात् । *तदिमे वक्तृत्वादयोऽहेतवः अन्यथानुपपत्तिरहितत्वात् विपक्षे बाधकाभावात् । सर्वज्ञो नास्त्यनुपलम्भात् इति व्याप्तिसाधने स्वोपलब्धिः [असिद्धा] सर्वप्रामाण्य...सर्वज्ञानां [स्वपरोपलम्भसंभवात्] § 2867

/ms **न** विद्यते [सहायो] यस्य **तदसहायम्** अतर्क्कमिन्द्रियम् तस्माद् एकेन्द्रियादेः **आशास्त्रार्थविदः जीवानां** प्राणिनां[क्रमात्]क्रमेण**[वि]ज्ञानातिशये न वै विद्वान् विप्रतिपद्यते,** यथा परमाणोः परिमाणाद् आरभ्य आगगनात् परिमाणातिशय इति । नन्वयमर्थः **ज्ञानस्यातिशयात् सिध्येद् विभुत्वम्** सिद्धिवि° ८ । ८ इत्यादिना प्रतिना प्रतिपादयिष्यते, तत्किमर्थमिह उच्यते ? तस्माद् अन्यथा व्याख्यायते— **विद्वान्** पठितेः शास्त्रेषु उक्तानुक्तपर्यालोचन-
530/mkj नपटुः **न[वै]नैव[वि]प्रतिपद्यते** अक्ष *****विज्ञानातिशये** अतीन्द्रियार्थग्रहणयोग्यतायां ज्ञानस्य । कस्य ? इत्याह--**[आ] शास्त्रार्थविदः आ** समन्तात् सकलान्शास्त्रस्य वेदस्य द्योतिः**शास्त्रस्य** वा **अर्थम्** अतीन्द्रियं वेत्तीति **तदर्थवित्** सर्वज्ञः तस्य । कुतस्तदतिशयः ? इत्याह--**अक्षकृत् सहाक्षा** *भावात् । अथ अक्षाभावे कुतः स इति चेत् ? अत्राह--**क्रमादि**ति आम्नायाद् आगताद् दर्शनादेः । **जीवानाम्** इति निर्धारणे षष्ठी । यो हि विद्वान् स्वयं शास्त्रानुक्रमर्थमभ्यूह्य जानाति स कथमन्यत्र असहा[या]क्षार्थस्य ज्ञातरि विप्रतिपद्ये[ते]ति भावः । § 2868

ननु तदतिशये यद्यपि वद्धांतविप्रतिपद्यते, संसतेअत्यन्तादृश्ये अनक्षज्ञाने गत्यन्तराभावात् । तदुक्तम्-- § 2869

*अनिश्चायकरं प्रोक्तम् ईदृक्षानुपलम्भनम् ।

---

३ *] तुलना--सर्वज्ञप्रतिषेधे तु सन्दिग्धा वचनादयः ।--न्यायवि° २ । ३४९ ।

५ ने] तुलना— सकलज्ञस्य नास्तित्वे स्वसर्वानुपलम्भयोः । आरेकासिद्धते तस्याप्यर्वाग्दर्शनतोऽगतेः ॥--न्यायवि° ३ । ४०६ । सर्वादृष्टिश्च सन्दिग्धा स्वादृष्टिर्व्यभिचारिणी । विन्ध्याद्रिरन्ध्रदूर्वादिरदृष्टावपि सत्त्वतः ॥--तत्त्वसं° पृ° ६५ । प्रमाणसं° पृ° १०० । त° श्लो° पृ° १३ । आत्मतत्त्ववि° पृ° ९४ ।

७ र्क्क] अक्ष

११ इत्यादिना] प्रतिना इति द्विर्लिखितम् ।

१२ ठितेः] पण्डितः

१३ *] अनक्ष

१५ लान्] सकलस्य

१५ द्योतिः] ज्योतिः

१६ *] असहायाक्षात् अक्षा

१९ म] माद

२१ द्धांत] विद्वान्न

२१ ते] संशेते

२१ न्तादृश्ये] अतीन्द्रियज्ञाने ।

२३ अनिश्चा] श्च

तन्नैरातीन्द्रियार्थानां सदसत्तादिविनिश्चयौ ॥§ 2871

प्र॰ वा॰ २ । ९४ § 2872

इति सौगतः, तत्राह--**स्थावरादेः** इत्यादि । **स्थावरो** वृक्षादिः **आदिर्यस्य शास्त्रार्थतत्त्वज्ञः पर्यन्तो** यस्य तस्य । कस्य ? इत्याह--**जीवराशेः** अनेन **जीवानाम्**इति व्याख्यातम् । **उत्तरस्योत्तरः** अधिकस्यापि अधिको **बुद्धिप्र-** /ms **कर्षो** यस्य स तथोक्तः तं **प्रति न कश्चित् विप्रतिपत्तुमर्हति** वक्ष्यमाणम् इति **अन्यत्र शौद्धोदनिशिष्यकात्** । किंभूतात् ? इत्याह--**अविप्रकृष्ट [विप्रकृष्टसंशीतिवादिनःविप्रकृष्टविषया पुनरनुपलब्धिः प्रत्यक्षानुमाननिवृत्तिलक्षणा संशयहेतुः ।--न्यायबि॰ २ । ४७ ।]** इत्यादि । स एव विप्रतिपत्तुमर्हति संशीतेर्विप्रतिपत्तिनिबन्धनत्वात् । अन्यः कस्मान्न विप्रतिपत्तुमर्हति इति चेत् ? अत्राह--**शास्त्रार्थविदां च** इत्यादि । **च** शब्दः अप्यर्थः, शास्त्रेण अर्थं विदन्तीति तदर्थविदः तेषामपि न केवलमन्येषां विवादगोचराणाम् **तदर्थज्ञानप्रकर्षः** शास्त्रार्थज्ञानाधिक्यम् **सर्वथा** सर्वप्रकारेण **अस्त्येव** । स कुतः ? इत्यत्राह--**स्वभाव** इत्यादि । **स्वभावेन पाटवं च अभ्यासश्च** तौ **आदी** यस्य औषधादिसेनादेः तस्य **तारग्यात्** । **कथम्** इति प्रश्ने तस्य उत्तरम् **उपनिबन्ध** इत्यादि । को हि नाम स्वयं शास्त्रार्थप्रतिपद्यमानः अन्यत्रापिप्रतिपद्यते ? अनेन **विद्वान्** इति प्रतिपादितम् । **तथैव** तेनैव स्वभावपाटवाभ्यासादितारस्यप्रकारेण **कस्यचित्** पुरुषविशेषस्य **शास्त्रार्थनिरपेक्षं परोक्षज्ञानपाटवं यदि स्यात् किंचिरुप्येत** न किञ्चित् । एतेन शेषं निवृत्तम् । § 2873

तदनभ्युपगमे दूषणमाह--**तथा** इत्यादि । **यतो** जै मि न्या देः प्राकृताद् विशेषात् स्वत एव पुरुषनिरपेक्ष एव **प्रमाणं वेदो न स्यात्** स्यादेव । ततः स्थितम्--**यथा वचनत्वाविशेषेऽपि वेद+ऐवं** पुरुषनिरपेक्षः **स्वार्थं प्रतिपाद-** 531/mkj **यति तथा पुरुषत्वाविशेषेऽपि कश्चिदेव अक्षनिरपेक्षः परोक्षार्थं विषयीकरोति इति** । § 2874

नन्वेवं स्वपरपक्षयोरविशेष एव उक्तः स्यात्, न पुनः स्वतःप्रामाण्य वेदस्य निराकृत स्यादिति चेत्; अत्राह--**संभवत्प्रकर्षेष्विति** । संभवद-

---

१ न्नैरा] वा
१ यौ] अनिश्चयकरं प्रोक्तं
ईदृक्क्वानुपलम्भनम् । तन्नात्यन्तपरोक्षेषु सदसत्ताविनिश्चयौ ॥--किन्तु ईदृगतीन्द्रियार्थविषयमनुपलम्भनमनिश्चयकरं प्रोक्तम्, सत्यप्यर्थे सम्भवात् । तत् तस्मात् अत्यन्तपरोक्षेषु सदसत्तानिश्चयौ न स्तः, सत्यपि प्रमाणावृत्तेः । प्रमाणनिवृत्तावपि अर्थाभावासिद्धेः ।--प्र॰ वा॰ मनोरथ॰ २ । ९४ ।
९ स] बौद्धः ।
१५ धादिसेनादेः] सेवनादेः
१५ ग्यात्] तारतम्यात्
१६ शास्त्रार्थ] र्थं
१७ त्रापि] त्र वि
१८ स्य] तारतम्य
१९ किंचिरुप्येत] किं विरुध्येत ?
२० म्] शेषः श्लोकांशः व्याख्यात इत्यर्थः ।
२२ वि] ताऽवि
२३ वेद+ऐवं] वेदः स्वत एव
२४ रोक्षार्थ] र्थं
२६ तःप्रामाण्य] ण्यं
२७ कृत] तं

तीन्द्रियार्थदर्शनेषु पुरुषविशेष **स्वत एव प्रमाणं वेदो न स्या**दिति सम्बन्धः, *तेभ्य एव तत्प्रमाणत्वभावादिति भावः । § 2875

स्यान्मतम्--वेदस्य परानपेक्षस्य अर्थप्रतिपादने न किञ्चित् प्रमाणं वाय-वमस्ति पुरुषस्य तु अक्षानपेक्षस्य अर्थविषयीकरणा[ऽसंभव एव] तद्बाधक-मस्ति तत्कथं साम्यमिति चेत् ? अत्राह--**प्रमाणमि**त्यादि । **लोके** निरवशेषे जागति क्वचित् तदभावसाधने सिद्धसाधनम् इति लोकग्रहणम्, **प्रमाणम् कीदृशं** न किञ्चित् प्रमाणमित्यर्थः **सर्वज्ञस्याभावसाधकं प्रत्यक्षादेः** प्रमाण-पञ्चकस्य **अभावविषयत्वविरोधाद् अभावप्रमाणवैफल्यापत्तेः अनभ्युपगमाच्च** । चार्वाकस्य नायं दोष इति चेत्; न; तस्य प्रत्यक्षैकप्रमाणवादिनः स-र्वत्र लोके तदभावसाधनमयुक्तम्, स्वयं सर्वज्ञतापत्तेः, अनुमानादेरभावात् । पराभ्युपगमात् तस्य तदिति नोत्तरम्; त एव अतीन्द्रियज्ञानप्रसङ्गात् । यथैव परस्य अनुमानमन्तरेण [न] तद्व्यवहारः तथा *तदपि न अतीन्द्रिय-ज्ञानमन्तरेण । अविशदं तदस्तु इति चेत्; न; अनुमाने जीवति विशदमपि *तदनिषेधनित्यास्तां तावदेतत् । अभावः तत्साधनम्; तदुक्तम्-- § 2876

*प्रमाणपञ्चकं यत्र वस्तुरूपे न जीवते ।
वस्तुसत्त्वावबोधार्थं तत्रभावप्रमाणता ॥§ 2878

मी॰ श्लो॰ अभाव॰ श्लो॰ १ § 2879

/ms इति चेत्; न; धर्मादेरपि स *तत्साधनम्, सर्वज्ञवत् प्रत्यक्षादेः *तत्रावृत्तेः । आगमस्य भावादसिद्धः तत्र प्रमाणपञ्चकाभाव इति चेत्; न; सर्वज्ञेऽपि तस्य भावात् । तदाह--**तदभावेसर्वज्ञाभावेशास्त्रम्** अस्माक**मस्ति,** ततोऽत्राप्यसिद्धम् अभावाख्यं प्रमाणमिति मन्यते । § 2880

ननु सर्वज्ञोक्ततया तत् प्रमाणम्, *तत्प्रमाणतया च [सर्वज्ञ]सद्भाव इत्यन्योऽन्यसमाश्रय इति चेत्; अत्राह--**न युक्त्या बाधितम्** प्रमाणेन य-

१ विशेष] षेषु
२ *] अतीन्द्रियज्ञेभ्यः एव ।
४ व] बाधक
६ ति] जगति
६ त] अतीन्द्रियज्ञाभाव ।
१० स] सर्वत्र सर्वज्ञो नास्ति इति प्रत्यक्षं जानतः स्वयं सर्वज्ञता ।
११ त] तत[[पराभ्युपगमादेव ।]]
१२ स्य] चार्वाकस्य ।
१२ हारः] लोकव्यवहारः ।
१२ *] अनुमानमपि ।
१३ रेण] व्याप्तिज्ञानं विना ।
१३ त] अतीन्द्रियज्ञानम् ।
१४ *] अतीन्द्रियज्ञानम्, न विद्यते निषेधो यस्य तत् अनिषेधम् अशक्यनिषेधमित्यर्थः ।
१४ नि] म् इ
१४ अभावः] सर्वज्ञाभावसाधकम् ।
१५ ते] जायते
१६ बोधार्थ] र्थं
१६ त्र] तत्रा
१८ पि] अतीन्द्रियधर्मादेरपि ।
१८ स] अभावः ।
१८ *] अभावसाधकः ।
१९ *] धर्मादौ ।
१९ सिद्धः] धर्मादौ ।
२० स्य] आगमस्य ।
२० भावे] तद्भावे
२० ज्ञाभावे] ज्ञसद्भावे
२२ या] शास्त्रम् ।
२२ *] शास्त्रप्रमाणतया ।
२३ बा] ह--युक्त्यबा

तुबाधितं शास्त्रं[त]दस्ति । न तदुक्तत्वेन तत्प्रमाणम् अपितु बाधारहित-त्वेमप्रत्यक्षादिवत् इति गम्यते । § 2881

ननु तत्र शास्त्रं युक्त्याबाधितम् असिद्धम्, अनुपलम्भस्य तद्बाधकस्य भावात् । एतदेव दर्शयन्नाह--**नास्ति** इत्यादि । § 2882

532/mkj

अत्र केचित् चोदयन्ति--सर्वज्ञस्य धर्मिणोऽसिद्धौ आश्रयासिद्धिः । *सिद्धौ; प्रतिषेधानुपपत्तिः तद्ग्राहकप्रमाणबाधनात्, असिद्धश्च हेतुः । न-हि सिद्धस्य अनुपलब्धिः; विप्रतिषेधात् । किमर्थमिदम् अनुमानमुपन्यस्तम् ? परमतानुवादमात्रम् इत्येके; न; परस्य तदभावा[त्], न भाव[ः]प्र-माणात् तदभावसाधनात् । न च प्रेक्षावता तन्मतम् असम्ब[द्ध]मनूद्यते इति; तत्रोच्यते--अभावप्रमाणमेवमुक्तं नानुमानम् । तथाहि--**नास्ति सर्वज्ञः** इत्यभावप्रमाणम् । तत्कुतो जायते ? इत्याह--**अनुपलब्धेः** प्रमाणपञ्च-काभावात् । क्षेवित्य--[किं वत् ? इत्य]त्राह--**खपुष्पवदिति** । यदि वा, अर्थापत्तिरियं पक्षधर्मत्वनिरपेक्षा । यदि वा, जैनमतापेक्षया परेणादअनुमान-मुक्तम् । *तस्य हि मतम्--अस्ति सर्वज्ञः सुनिर्णीताऽसंभवद्बाधकप्रमाणत्वात् सुखादिवत् इति । **अत्र** पूर्वपक्षे **इदमुच्यते यदि साधकप्रमाणनिवृत्तिः** स- /ms र्ववित्साधकस्य प्रमाणस्य निवृत्तिः **आत्मा वा तद्रहितः अनुपलब्धिः यथास्वं नैरात्म्यं प्रसज्येत** । कुतः ? इत्यत्राह--**सर्वात्म** इत्यादि । तदेव दर्शयन्नाह । **नहि असर्वदर्शी तथैव** यत्र **सर्वात्मविशेषा** व्यवस्थिताः **तान् साक्षात्क-र्तुमर्हति** । अनुमानेन प्रत्येति इति चेत्; अत्राह— **नतदेव**इत्यादि । यत एव स तान् साक्षात्कर्तुं नार्हति **तत एव अनुमानमशक्यम्,** भावप्रधानोऽयं निर्देशः असत्यत्रमिति । केषाम् ? इत्याह--**प्रत्यात्म** इत्यादि । कुतः ? इत्याह--**लिङ्ग** इत्यादि । § 2883

ननु परात्मनोयतोऽनुमानात् प्रतीयते ततः सामान्यविशेषात्मका एव, त-न्न युक्तम्--**अनुमानम्अशक्यत्वं प्रत्यात्मविशेषाणाम्** इति चेत्; अत्राह--**तद-विशेषेण** इत्यादि । **तद्** इत्ययं निपातः तस्माद् इत्यस्य अर्थे वर्त्तते । तस्माद् अनुमानात् **अनेकान्तात्मकवस्तुतत्त्वसाधनात्** । केन रूपेण ? इत्याह--**अविशेषेण** सामान्येन । [न]हि परात्मा नियते[न]विशेषेण संयुक्तोऽनुमानात् प्रतीयते, प्रत्यक्षानुमानयोरविशेषप्रसङ्गादनुमानमशक्यत्वं प्रत्यात्मविशेषाणाम् इति । § 2884

---

१ तु] णेन तु
१ त्वेन] शास्त्रम् ।
२ त्वेम] त्वेन
३ नु] सर्वज्ञे ।
३ युक्त्या] क्त्य
६ *] सर्वज्ञस्य ।
८ स्य] सर्वज्ञाभावात् ।
१३ रेणाद] परेणेदम्
१४ *] जैनस्य ।
१९ देव] तत एव
२० अनुमान] तु
२१ त्र] अशक्यत्व
२३ नो] त्मानो
२३ ते] यन्ते
२४ म्] तुम्
२८ नुमान] तु

स्यान्मतम्--त्याहारादिविशेषात् क्रोधादिविशेषोऽपि प्रतीयते, तन्नेदमुत्तरमिति; तत्राह--**कुतश्चिद्** इ[त्यादि] । **कुतश्चित्** व्यवहारादिविशेषात् **तत्प्रतिपत्तौ** प्रत्यात्मविशेषप्रतिपत्तौ सत्याम् **अप्रतिपन्नविशेषाविनाभाविनः** । एवमन्यते--व्यावहारादिविशेषात् क्रोधादिप्रतिपत्तिरपि अनुमान एव तदपि /ms क्रोधादिकम् अवान्तरसामान्येन विषयीकरोति न नियतविशेषेण । नहि क्रोधादेः प्रकृतिक्षणसूक्ष्मविशेषाः अनुमानमशक्यः * । ततस्तेषामनुपलब्धिरभावः प्रसक्त इति; तन्न; [अप्रतिपन्नविशेषं]विना[न] भवति इत्येवंशीलस्य **अप्रतिपन्नविशेषाविनाभाविनः प्रतिपन्नस्वभावस्यापि** क्रोधादिसामान्यस्य **तथैव अनात्मकत्वप्रसङ्गात्** । तथाहि--प्रतिक्षणक्षणसूक्ष्मविशेषापेक्षया सामान्यविशेषा आत्मनो भवतितदभावे तेऽपि तस्य न स्युः प्रतीयमाना अपि । न च तद्विविक्त आत्मा उपलभ्यत इति तदभावो भवन् नैरात्म्यम् [स्यात्] । 533/mkj तत्र को दोष इति चेत् ? अत्राह--**तत** इत्यादि । **ततो** नैरात्म्यात् कस्यचिद् उपलब्धेरभावानु***कस्यचिदुपलब्धिः इत्यु**पलम्भनिवृत्तिभावात् सर्वज्ञवत् **सर्वाभावः** । § 2885

अथ श्रुतात् प्रत्यात्मविशेषाः प्रतीयन्ते इत्यदोषः; तत्राह--**श्रुतस्यापि** इत्यादि । **श्रुतस्यापि** न केवलं प्रत्यक्षादे**रेवम्** उक्तवत् **प्रसङ्गात्** । कुतः ? इत्याह--**नहि** इत्यादि । तदपि कुतः ? इत्याह--**विशिष्टविषयत्वात् पुरुषार्थसिद्धेरिति** । अथ विषयीकरोति शास्त्रम् इति चेत्; अत्राह--**अन्यथा** इत्यादि । अनेननिरवशेषविषयीकरणप्रकारेण **अ नावधेयत्वमेव शास्त्रस्य** इति । § 2886

निगमयन्नाह--**तदियम्** इत्यादि । यत एवं **तत्** तस्मात् **इयम्** अ[न]न्तरवर्णिता **प्रतिपतृप्रमाणनिवृत्तिः प्रतिपत्तुः** मीमांसकस्य सम्बन्धिनी सर्वज्ञविषयप्रत्यक्षादि**प्रमाणनिवृत्तिः सर्वसम्बन्धिनी** सत्यपि **प्रतिप[त्तुम]शक्नोति** । /ms प्रतिपतृग्रहणं **न केवलं सर्वज्ञाभावं साधयति अपि तु** किन्तु **सर्ववस्तुव्यतिरेकं च** सर्वभाववस्तुनोऽभावं च साधयति स्वापमदमूर्च्छाद्यवस्थायां सर्वत्र तन्निवृत्तेर्भावात् । अन्यैः तदा सर्वस्य दर्शनं न र्वस्येति किं कृतमेतत् ? पुनस्तेनैव तस्य दर्शनम्; जन्मान्तरे तेनैव सर्वज्ञस्य दर्शने किं विभाव्येत ? यदि वा, परोक्षज्ञानैकान्तवादिनः सर्वत्र तन्निवृत्तिरिति । § 2887

यथा च शास्त्रात् प्रतीयमाने धर्मादौ न साधकप्रमाणनिवृत्तिः अनुपलब्धिः, तथा सर्वमपि इति दर्शयितुम् आत्मानं परेण पर्यनुयोजयन्नाह--**भावे**

१ त्या ] व्या[[व्याहारो वचनम् ।]]
२ व ] व्या
४ एव ] वं
४ व्याव ] व्या
४ एव ] नमेव
४ त ] अनुमानम् ।
६ कृति ] प्रति
६ * ] मातुं शक्याः
६ ब्धि ] ब्धे
९ क्ष ] क्षण इति द्विर्लिखितम् ।
१० ति ] न्ति
१३ * ] न्न
१९ अनेन ] अन्येन
१९ नाव ] अनव
२६ र्व ] न सर्व

सर्वज्ञस्य **तर्हि किं प्रमाणम्** इति ? तत्रोत्तरं **शास्त्रं ब्रूमः** इति । कुतः ? इत्यत्राह--**तदित्यादि** । **तस्य** सर्वज्ञस्य **सद्भावप्रतिपादनात्** *****चतुर्दश-गुणस्थानोपवर्णनात्** न केवलं लब्धिकथनाच्चेति । **कथमस्य** *तत्सद्भावप्र-तिपादकस्य शास्त्रस्य **प्रामाण्यमिति चेत्** ? इति परमतम्; अत्रोत्तरम्--**चोदनायाः तर्हि कथ**मिति धर्मादिप्रतिपादकम् वैदिकं वाक्यं चोदना, तस्याः कथं **प्रामाण्यम्** ? उभयोरप्रामाण्ये धर्मादेरपि लोप इति मन्यते । § 2888

*पर आह--**नित्यत्वात् तस्याः तदिति** । सूचिराहतत **एव** नित्यत्वादेव **प्रवचनस्य** गुणस्थानप्रतिपादकस्य आगमस्य **अस्तु** प्रामाण्यम् । **कथं प्र-वचनस्य** इति *परः; तस्योत्तरं **यथा** इत्यादि । पार्श्ववर्त्ती पृच्छति--**कथं तर्हि चोदनायाः नित्यत्वम्** इति ? श्रोत्रियः प्राह--**कर्तुर[स्मर]णादिति** । आचार्यः प्राह--**तत एव** इत्यादि । कर्तुरस्मरणादेव **परमागमस्य नित्यत्वम्** इति । **कर्त्तारः तीर्थकराः** परमागमस्य **स्मर्यन्तइति चेदि**ति परमताशङ्का; /ms
अत्रोत्तरम्--**वेदस्य** इत्यादि । § 2889

**ननु साक्षादयो वेदस्य कर्त्तारं स्मरन्ति** । तेषां च स्मरणमप्रमाणमिति चेत्; अत्राह--**क ण भ क्ष** इत्यादि । **पुनः इतरेषां** मीमांसकानां या **परमागमकर्तृविषया स्मृतिः** तस्याश्च **प्रामाण्ये न कश्चि[द्वि]शेषो** वेदपर-मागमयोरिति । § 2890

ननु वेदे परवादिनामेव तत्स्मरणं न वादिनाम् ततस्तदप्रमाणम् उपपन्ने प्रवचने तु उभयेषां तत्स्मरणमिति नाप्रमाणमिति चेत्; अत्राह--**तदेत-** 534/mkj
**द्** इत्यादि । **तत्** सर्वज्ञप्रतिपादकम् **एतद्** विचार्यमाणं **प्रवचनमपौरुषेयं** नित्यम् । यद्यपौरुषेयं तीर्थकराः तत्र किं कुर्वन्ति येन तत्कल्पनमिति चेत् ? अत्राह--**तीर्थकराः प्रवर्त्तयन्ति समुत्सन्तं** समुत्सन्तं **प्रवचनम्** व्यञ्जयन्ति **इति** जैनाः । कुत इति चेत् ? **सर्वज्ञागमयोः प्रबन्धनित्यत्वेन नित्यत्वोपग-मात्** । कथं तस्य तर्हि द्वादशाङ्गस्य समुच्छेदः ? वेदशास्त्रवदिति । तद्वदेता गतीयाचार्यैः स्मरणं न कारणम् इति सर्वं सुस्थम् । § 2891

एवं सति यल्लब्धं तदाह--**कुतो** न कुतश्चित् कारणात् **तत्रैव** व्यवस्थिते न्याये सत्या **न्योन्याश्रयणं स्यात्** यत इदं शोभेत-- § 2892

---

२ *] मिथ्यात्वसासादनादि अयोगिकेवल्यन्तानि ।
३ *] सर्वज्ञसद्भाव ।
७ *] मीमांसकः ।
७ स्याः] प्रामाण्यम् ।
७ सूचिराह] सूरिराह--
९ *] मीमांसकः ।
१४ यो] क ण भ क्षा द यो[[वैशेषिकबौद्धादयः ।]]
१८ वादिनामेव] कर्तृस्मरणम् ।
१८ वादिनाम्] मीमांसकानाम् ।
२१ राः] प्रवचने ।
२२ न्ति] उच्छिन्नम् ।
२२ न्तं] न्नं
२२ न्तं] न्नं
२४ स्य] जैनस्य ।
२५ ग] देव आरा
२५ तीयाचार्यैः] शिष्यभूताचार्यैः ।
२५ का] क
२६ त्रैव] वं
२७ न्यो] सति अन्योऽ

*नर्ते तदागमात् सिध्येत् न च तेन विनाऽऽगमः ।§ 2893

मी॰ श्लो॰ चोदना॰ श्लो॰ १४२ इति । § 2894

परमपि यल्लब्धं तदपि दर्शयन्नाह--**तन्न** इत्यादि । यत एव शास्त्रं प्रमाणमस्ति **तत्** तस्मा**न्नानुमानं** किञ्चिदपि **सर्व+अभावसाधनं** शास्त्रविषये तदप्रवृत्तेः इति भावः । तदुक्तं कैश्चित्-- § 2895

*अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भवात्ववचनं तेषां नानुमानेन बाध्यते ॥§ 2897

वाक्यप॰ १ । ३८ इति । § 2898

/ms अथ नासौ शास्त्रस्य विषय इति चेत्; अत्राह-- **प्रवचनं च** इत्यादि । **इत्येवं स्थितं** निश्चितमेतत् । § 2899

ननु मा भूदनुमानं तत्साधनशास्त्रान्तरं तु स्यात् समबलत्वादिति चेत्; अत्राह— **न वेद्याद्य** *भिप्रायः--न तावद् **अनेकान्तशासनं न जीवानां नानापरिणामप्रतिपादकम्** । ननु यदेव यद्विधातृ तदेव तस्य निषेध विरोधात् । अन्यच्चेत्; **न च** नैव **तत्प्रत्यनीकं** शास्त्रं **प्रमाणमस्ति** । कुतः ? इत्याह--**स्याद्वादेन[बाधितविषयत्वात्]** इत्यादि । निदर्शनमाह--***पि ट क त्र य वदिति** । § 2900

ननु पि ट क त्र यस्य कथं स्याद्वादेन बाधितविषयत्वं यावता स्याद्वाद एव तेन बाधितविषय द्वरेदत्राह--**स हि** इत्यादि । **स** पि ट क त्र ये प्रतिपाद्यमानः **हि** यस्माद् **एकान्तो न संभव[ति]** । कः ? इत्यादि --**निर्विषयम्** इत्यादि **वा इत्येवं** । कथं सान संभवति ? इत्याह--**राजपथीकृतमेतद्** इति । कृत प्रतिनिधानताम् अस्य अनेन दर्शयति । तथाहि--निर्विषयं यतः ततो मिथ्याज्ञानम् अनुमानयदि; कुतः किं सिध्येत् ? नहि निर्विषया[त्] ततः तत्त्वसिद्धिः द्विचन्द्रादिज्ञानवत् । § 2901
535/mkj

ननु मणिप्रभायां मणिज्ञानामिथ्याज्ञानमिथ्याज्ञानादपि तत्त्वप्रतिपत्तिः ततो व्यभिचार इति चेत्; न; तस्य साध्यान्तःपातित्वात् । यदि पुनः अनुमानम-

---

४ र्व+अ] सर्वज्ञाऽ
७ वात्व] भावान्
९ नासौ] सर्वज्ञः ।
११ त] सर्वज्ञाभावसाधनम् ।
११ न] नं
१२ *] न चेत्यादि । अयम
१३ म्] अपि तु प्रतिपादकमेव ।
१३ नु] न तु
१३ निषेध] धृ[[निषेधकम् ।]];
१५ *] सूत्र-विनय-अभिधर्माख्यं पिटकत्रयम् ।
१८ रेद] इति चेत्; अ
१९ इत्यादि] ह
२० सा] स
२१ तिनि] वि
२२ अनुमान] नं
२३ तः] अनुमानात् ।
२४ म] मणिप्रदीपप्रभयोः मणिबुद्ध्याऽभिधावतोः । मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥ --प्र॰ वा॰ २ । ५७ ।
२४ मिथ्या] मणिज्ञानात् मिथ्या

ध्यक्षं चेत्; तर्हि कल्पनापोढेन अभ्रान्तेन तेन भाव्यमिति न तेन व्यभिचारः । व्यवहारेण तत्तथा । यो हि मन्यते--य एव मणिर्दृष्टः स एव प्राप्त इति तं प्रति प्रत्यक्षं तद् इति चेत्; यस्तर्हि मीमांसकादिः स एवायम् इत्येकं प्रत्यभिज्ञानम् इन्द्रियजातविसंवादि मन्यते तं प्रति तदपि प्रत्यक्षमिति न /ms प्रमेयद्वैविध्यात् प्रमाणं द्विविधम्, अस्य प्रत्यक्षत्वेऽपि सामान्यविषयत्वात्, *अविकल्पैकान्तव्याघातश्च । कथं चैवंवादिनः प्रत्यक्षसिद्धंक्षणिकता येन **यद्यथावभासते** इत्यादि सूक्तं भवेत् । अस्य विचारतोऽप्रत्यक्षत्वे तत एव प्रकृतस्यापि प्रत्यक्षत्वं मा भूत् । § 2902

एतेन भाविनि प्राप्ये प्रत्यक्षत्वचिन्तितम् । किंच, यदि भाविनि प्रत्यक्षं प्रमाणम्; प्रतिबन्धद्वयव्याघत[ः] । भावि च कारणं निषिद्धम् । ततो निराकृतमेतत्-- § 2903

*अभिप्रायाविसंवादादपि भ्रान्तेः प्रमाणता ।
वातिरप्यन्यथा दृष्टा पक्षश्चायं कृतोत्तरः ॥ प्र० वा० २ । ५६
इति ।§ 2905

स्यान्मतम्--यदि भाविनि न प्रत्यक्षं प्रमाणं तर्हि प्रमाणमेव न भवेत् । यदि वर्त्तमाने स्यात् को दोषः ? न च वर्त्तमाने क्वचिद् व्यभिचारदर्शनात् सर्वत्र स युक्तः, स्वसंवेदनमात्रेऽपि तदनुषङ्गाद् इत्युक्तम् । § 2906

अपि च, यद्यनुमानमविसंवादं कथं निर्विषयम् ? अवस्तुसामान्यविषयत्वादिति चेत्; प्रत्यक्षमपि तथा स्यादिति [मणि]प्रभायां मणिज्ञानस्य अनुमानस्य अविसंवादः केन प्रतीयता * ? नहि प्राप्यमणिप्रत्यक्षं निरंशपरमाणुग्राहकम् इत्युक्तम् । ततो न किञ्चिदेतदिति । § 2907

ननु यदुक्तम्--**तीर्थकराः प्रवचनं प्रवर्तयन्तीति** इति; तत्सत्यमस्तु, केवलं **ते सर्वज्ञा न** भवन्ति ***वक्तृत्वादिभ्यो रथ्यापुरुषवदिति**; तदेव दर्शयन्नाह--**यदि पुनः** इत्यादि । तत्र दूषणमाह--**जै मि निरन्यथा** इत्यादि । /ms
§ 2908

ननु पुरुषान्तरे वक्तृत्वादौ सति सर्वज्ञत्वमुपलब्धम्, उपलभ्यते च तीर्थकरेऽपि वक्तृत्वादिकमिति तत्रापि तदस्तु, अन्यथा नु कृतकत्वादेः

---

३ द्] अनुमानम् ।
४ जात] जम
४ ते] तेनेन्द्रियार्थसम्बन्धात् प्रागूर्ध्वं वापि यत्स्मृतेः । विज्ञानं जायते सर्वं प्रत्यक्षमिति गम्यताम् ॥--मी० श्लो० ४ । २३६ ।
४ त] प्रत्यभिज्ञानमपि ।
५ अ] प्रत्यभिज्ञानस्य ।
६ *] प्रत्यक्षमविकल्पकमेवेति ।
६ सिद्धं] द्धा
७ अ] प्रत्यभिज्ञानस्य ।
७ स्य] विचाररूपत्वात् ।
९ त्व] त्वं
१३ वाति] गति
१८ त] प्रत्यक्षेऽपि हि अन्यद्दृश्यते प्राप्यते चान्यदिति ।
१९ *] प्रतीयेत
२२ *] वक्तृत्वात् पुरुषत्वात् हस्तपादादिमत्त्वात् इत्यादिभ्यः ।
२६ त्रापि] असर्वज्ञत्वमस्तु ।
२६ नु] न

अनित्यादिप्रतीः स्यादिति चेत्; अत्राह--**न हि** इत्यादि । तीर्थकरपुरुषान्तरयोः **किञ्चित्साधर्म्यात्** वक्तृत्वादिसाधर्म्यात् **सर्वम्** असर्वज्ञत्वादिकं **तथैव** वक्तृत्वादिप्रकारेण **इति प्रतिपत्तु न हि युक्तम्, अतिप्रसङ्गात्**--वक्ता मूर्खो दृष्ट इति सर्वोऽपि तथा स्यात् । यदि पुनः पण्डितोऽपि स कादावि दृश्यते; सर्वज्ञेऽपिद्रक्ष्यते इति समानम् । § 2909

536/mkj

निगमयन्नाह--**तदिमे** इत्यादि । यत एवं **तत्** तस्मात् **इमे** परेण उच्यमाना **वक्तृत्वादयोऽहेतवः** । कुतः ? इति [चेत्;] **अन्यथा** इत्यादि । [अन्यथानुपपत्तिरहितत्वात्] न तादात्म्यात्यादिरहितत्वात् इत्यनेन दर्शयति तस्यात्र भावादिति निरूपितम् । असर्वं र्वज्ञ ज्ञाता * सर्वदा तेषां दर्शनात्, कथं तद्रहितत्वमिति चेत् ? **विपक्षे बाधकाभावात्** । कृतकत्वादिवत् विरोधो बाधक इति चेत्; न; *तद्ग्राहकाभावात् । यदि हि संवेदनोत्कर्षे तदपकर्षः स्यात्, भवेद् विरोधगतिः, न चैवम् इति । अनुपलम्भस्तत्र बाधकः; तदाह--**सर्वज्ञ** इत्यादि । **[सर्वज्ञो नास्ति अनुपलम्भात्]** इत्येवं साध्येन हेतोः **व्याप्तिसाधने** अङ्गीक्रियमाणे । दूषणमाह--**स्वोपलब्धि** इत्यादि । सर्वैर्नोपलभ्यत इति चेत् अत्राह--**सर्वप्रामाण्य** इत्यादि । कुत एतत् ? इत्यत्राह--**सर्वज्ञानाम्** इत्यादि । § 2910

तदुपाभ सन्ति सर्वज्ञाः, तत्कथं ते स्वं परं वा सर्वज्ञमुपलव्यन्त इति

/ms चेत् ? अत्राह-- **सर्वज्ञाभावसन्देह** इत्यादि । § 2911

...5 सर्वज्ञभावसन्देहेऽनुपलम्भो न सिध्यति ।
ततः स्यात्सर्वहेतूनां तत्रान्योऽन्यसमाश्रयः ॥ ५ ॥§ 2913

नास्ति सर्वज्ञः इत्यत्र यथा अन्योऽन्याश्रयत्वं तथैव वक्तुः सर्वज्ञस्यानुपलब्धौ । एतेन रथ्यापुरुषादन्ये सर्वे पुरुषाः रागादिमन्तो वक्तृत्वादिभ्यस्तद्वदिति साकल्येन रागादिमत्त्वसाधनं प्रत्युक्तम् । तथा तत्साधने जे मि न्या देरपि साधनान्न वेदः प्रमाणमितरत् अन्यथेति । § 2914

---

१ तीः ] प्रतीतिः
३ त्तु ] त्तुं
४ था ] मूर्खः ।
४ स ] वक्ता ।
४ कादावि ] कदाचित्
५ ज्ञेऽपि ] ज्ञोऽपि
९ त ] तादात्म्यादेः ।
९ * ] असर्वज्ञो वक्ता
१० त ] अन्यथानुपपत्तिरहितत्वम् ।
१० क्षे ] सर्वज्ञे ।
११ * ] विरोधग्राहक ।
१२ त ] वक्तृत्वापकर्षः ।
१७ दुपाभ ] तदुपलम्भाभावान्न
१७ ते ] सर्वज्ञाः ।
१७ व्य ] भ
१८ ज्ञाभा ] ज्ञभा

**सर्वज्ञानां** यो **भावः** परेण इष्यते तत्र **सन्देहे अनुपलम्भः** सर्वानुपलब्धिर्न **सिध्यति** सर्वज्ञाना स्वपरोलम्भवान् । पुनरपि तेषां तदनुपलम्भेनाभावसाधने तदवस्थो दोषोऽनवस्था चक्रकमिविमन्वते । अथ मतम्--यः सर्वक्तुः भात्मानं पर[श्च] पश्यति इत्युच्यते; नासौ सर्वज्ञः पुरुषत्वादिभ्यो रथ्यापुरुषवदिति चेत्; उक्तमत्र--**अन्यथानुपपत्तिरहितत्वात् नैते हेतवः** इति । सर्वज्ञस्य पुरुषस्त्ववक्तृत्वानुपलब्धिः प्रकृतव्याप्तिरिति चेत्; पुनरपि तदेवावर्त्तते इति चक्रकम् । § 2915

ननु[न]विपक्षे[ऽ]भावसिद्ध्या पुरुषत्वादयः क्वचित् सर्वज्ञा वा भावं साधयन्ति किन्तु यद्व्यायो; ननु सर्वज्ञाभावसन्देहे तद्व्याप्तिरपि कथं सिध्यति ? तयैव तदसन्देह इति चेत्; अन्योऽन्यसंश्रयः । तथाहि--सिद्धानांतद्व्याप्तौ तदभावः सिध्यन्ति तत्सिद्धौ च सा सिध्यति । तदाह--**ततो**ऽनुपलम्भस्याऽसिद्धितः **स्यात् तत्र** सर्वज्ञाभावसाधने व्याप्तौ वा **सर्वहेतूनां** पुरुषत्वा[दीना]**मन्योऽन्यसमाश्रयः** । § 2916

कारिकां व्याख्यातुमाह--**नास्ति सर्वज्ञ** इत्यादि । सर्वज्ञाभावे सिद्धे सर्वाभावोपलम्भनं सिध्यति, तत्सिद्धौ च तदभावः सिध्यति इति **अन्योऽन्याश्रयत्वं यथा, तथैव वक्तुः सर्वज्ञस्यानुपलब्धौ** साध्यायाम् इतरेतराश्रयत्वम् 537/mkj । तथाहि--सर्वविदोऽभावे सिद्धे साकल्येन वक्तुः सर्वविदो[ऽ]दर्शनं ततः तदभावसिद्धिरिति । § 2917

एतदन्यत्रातिदिशन्नाह **एतेन** इत्यादि । **एतेन** प्रस्तूयमाण प्र- /ms स्तारुरा**गादिमत्त्वसाधनं प्रत्युक्तम्** । केन रूपेण तत्साधनम् ? इत्याह--**साकल्येन, रथ्यापुरुषाद् अन्ये सर्वे पुरुषाः रागादिमन्तः वक्तृत्वादिभ्यः तद्वदिति** । कथं प्रत्युक्तम् इति चेत् ? उच्यते--**तथा तत्साधने जै मि न्या दे रपि साधनांतवेदाः[प्र]माणमितरत् अन्यथा** । विवक्षितपुरुषस्यैव *तत्साधने जै मि निः अन्यो वा तद्विपरीत इति तेन हेतूनां व्यभिचारः । शेषमत्रापि समानम् । § 2918

एवं तावंति तत्त्वाचोदनावचनस्य[अ]प्रामाण्यव्यवस्थाप्य[अ]धुना--
§ 2919

---

२ ज्ञाना] ज्ञानां
२ वान्] म्भसंभवात्
३ स्थो] अनुपलम्भः स्वस्य सर्वस्यवा ? इत्यादि ।
३ ते] मिवावर्तते
४ भा] सर्वज्ञः स आ
६ स्व] त्व
६ ब्धिः] ब्धेः
८ भावं] ज्ञाभावं
९ द्व्यायो] तद्व्याप्त्या
१० सिद्धानां] द्व्यायां
११ सा] व्याप्तिः ।
१५ र्वाभावो] सर्वज्ञाभावो
१५ भावः] सर्वज्ञाभावः ।
१८ तः] सर्वविदभावसिद्धिः ।
२० स्तारु] मानप्रस्तावेन
२३ नांत] नान्न
२३ स्यैव] अर्हतः ।
२४ *] रागादिमत्त्वसाधने ।
२६ त्वा] एवं तावत् तत्त्वात्[[वचनत्वात् चोदनावचनमप्रमाणम् इतरवचनवत् ।]]
२६ प्रामाण्य] ण्यं

*तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम् ।
अदुष्टकारणारब्धप्रमाणं लोकसम्मतम् ॥ इति§ 2921

परकीयन्यायात् तदेव दर्शयन्नाह--**प्रमाणमक्षबुद्धेश्च** इत्यादि । § 2922

...6 प्रामाण्यमक्षबुद्धेश्चेद्यथाऽबाधाविनिश्चयात् ।
निर्णीतासंभवद्बाधः सर्वज्ञो नेति साहसम् ॥ ६ ॥§ 2924

चक्षुरादिज्ञानस्य अन्यस्य वा अबाधितविषयत्वेन स्वयं यदि प्रामाण्यं ततः तेन प्रवचनस्यापि युक्तम् । अतः अस्ति सर्वज्ञः सुनिश्चितासंभवद्बाधकप्रमाणत्वात् सुखादिनीलादिवत् । तत्र सुनिश्चितासंभवद्बाधकप्रमाणं सिद्धं शास्त्रप्रामाण्यात् § 2925

**अक्षबुद्धि**ग्रहणम् उपलक्षणमिति चोदनादिबुद्धिरपि गृह्यते, तस्याः **तथा** येन प्रकारेण प्रवृत्ता तेन एव धान***निश्चयात् प्रामाण्यं चेत्** यदि **निर्णीतासंभवद्बाधः** निर्णीतोऽसंभवत्वात् यस्य स तथोक्तः **सर्वज्ञेनेति साहसम्** इति भावः । § 2926

कारिकां व्याख्यातुमाह--**चक्षुरादिज्ञानस्य** इत्यादि । **अन्यस्य** चोदनाज्ञानस्य **वा स्वयम्** आत्मना **यदि प्रामाण्यम्** । केन ? **अवापितविषयत्वेन**
/ms **ततः तेन**[अ]बाधितविषयत्वे[न] **प्रवचनस्यापि** सर्वज्ञप्रतिपादिकागमस्यापि प्रामाण्यं **युक्तम्** । § 2927

प्रकृतं निरामयताह **अत** इत्यादि । **अतः** प्रवचनप्रामाण्याद् **अस्ति सर्वज्ञः** । कुतः ? इत्याह--**सुष्ठु निश्चितम् असंभवद्बाधकं** यस्य तत् तथोक्तं **प्रमाणं** शास्त्रं यस्य तस्य भावात् **तत्त्वात्** । निदर्शनमाह--**सुखादि** इत्यादि । बाह्येतरभेदेन दृष्टान्तद्वयोपदर्शनम् । तत्र यथा **सुखादिनीलादिषु**
538/mkj सुनिश्चितासंभवद्बाध[क]प्रमाणं प्रत्यक्षादि नैवं सर्वज्ञे, ततोऽसिद्धो हेतुरिति चेत्; अत्राह--**सुनिश्चितेत्यादि** । ***सुनिश्चितासंभवद्बाध[क]प्रमाणं तत्र सर्वज्ञे**

---

२ ब्ध] ब्धं
३ प] भाट्ट । उद्धृतोऽयम्--हेतुबि° टी° पृ° ३३ । प्र° परी° पृ° ६३ । त° श्लो° पृ° १७३ । प्रमेयक° पृ° ६११ । सन्मति° टी° पृ° ३१८ । नयोप° पृ° ३३ ।
३ माण] प्रामाण्य
३ बुद्धेश्च] श्चेत्
१० था] यथा
११ तेन] प्रवृत्त्या तेन
११ *] अबाधावि
१२ त्वात्] वद्बाधो
१२ ज्ञे] ज्ञो
१५ अवापि] अबाधि
१६ तिपादिका] पादका
१८ ताह] निगमयन्नाह--
२३ *] तुलना--तदस्ति सुनिश्चितासंभवद्बाधकत्वात् सुखादिवत्--लघी° स्व° १ । ४ । त° श्लो° पृ° १८५ । आप्तप° श्लो° १०९ । अष्टश° अष्टस° पृ° ४४ । प्र° मी° पृ° १४ । प्र° नि° पृ° २९ । षड्द° बृह° पृ° १४ ।

**सिद्धं** यत् परेणोक्तं **प्रत्युक्तम्** इत्यनुवर्त्तते । कुतः ? इत्यत्राह--**शास्त्रप्रामाण्यात्** उक्तनीत्या तत्प्रतिपादकागमप्रामाण्यात् । § 2928

अपरे **शास्त्राप्रामाण्यात्** इति पठन्ति, तेषाम् अनन्तरमेव तत्प्रामाण्य मेवत्प्रामाण्यं समर्थनं किं विस्मृतं येन एवं पठन्ति ? § 2929

संप्रति-- § 2930

*स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् ।
नहि स्वतोऽसती शक्तिं कर्तुमन्येन शक्यते ॥§ 2932

मी॰ श्लो॰ सू॰ २ श्लो॰ ४७ इति । § 2933

**अदुष्टकारणारब्धं प्रमाणं लोकसम्मतम्** इति च परकीयं मतद्वयमाश्रित्य तत्प्रवचनस्य [प्रा]माण्यं व्यवस्थापयन्नाह--**सर्वज्ञेऽस्ति** इत्यादि । § 2934

...7 सर्वज्ञेऽस्तीति विज्ञानं प्रमाणं स्वत एव तत् ।
दोषवत्कारणाभावात् बाधकासंभवादपि ॥ ७ ॥§ 2936

सर्वज्ञे अस्तीति विज्ञानं नहि [न स्वतः प्रमाणम् ।]न च तत् दोषवत्कारणं तत्प्रतिपादकस्यापि शास्त्रस्य अपौरुषेयत्वात् बाधकप्रमाणाभावः सिद्ध एव । स्वोपलम्भ...। कस्यचिदनुपलम्भमन्तरेण व्यतिरेकासिद्धेरभावप्रमाणवैफल्यापत्तेः । साकल्येन स्वयं लिङ्गेन्द्रियादिनिरपेक्षस्य भावप्रतिपत्तेः सर्वज्ञाभावप्रतिपत्तेर्विरोधात् । § 2937

**सर्वज्ञेऽस्ति** इत्य प्रवचनाद् **यद्विज्ञानं** सर्वज्ञगोचरमुपजायते **तत् प्रमाणं स्वत एव** नान्यतः कारणात् । हेत्वन्तरमाह--**दोषवत्कारणाभावात्** । **अपि** शब्दो भिन्नप्रक्रमः, अस्यानन्तरं द्रष्टव्यः । सोऽपि कुतः ? इत्याह--**बाधकस्यासंभवादिति** । § 2938

कारिकां विवृण्वन्नाह--**सर्वज्ञेऽस्ति इति विज्ञानम्** इत्यादि । कुत /ms एतत् ? इत्यत्राह--**नहि** इत्यादि । ननु तस्य औत्सर्गिकं यत् स्वतःप्रामाण्यं तद्दोषवत्कारणजन्यत्वे[ना-] पोह्यते इति चेत्; अत्राह--**न च** इत्यादि । **न च** नैव **तत्** प्रकृतं विज्ञानं **दोषवत्कारणं** दोषवत्कारणं यस्येति । कुतः

---

३ अ] व्याख्याकाराः ।
३ त्प्रामाण्य] मेवत्प्रामाण्यं इति व्यर्थमत्र द्विर्लिखितम् ।
४ नं] आगमप्रामाण्यसमर्थनम् ।
७ क्तिं] क्तिः
९ प] मीमांसकीयम् ।
१९ इत्य] इति
१९ नाद्] शास्त्रात् ।
२१ अ] दोषवत्कारणाभावात् इत्यस्यानन्तरम् ।
२२ वादिति] वादपि

? इत्याह--**तद्** इत्यादि । [तत्प्रतिपादकस्यापि] सर्वज्ञप्रतिपादकस्यापि न केवयवैदिकस्य **शास्त्रस्य अपौरुषेयत्वात्** दोषाश्रयपुरुषरहितत्वात् । § 2939

ननु वारमानं तद्दोषवत्कारणम्, यथा[शुक्ले]शङ्खे पीतज्ञानम्, बाध्यमानं च सर्वज्ञेऽस्तीति[विज्ञानमिति] चेत्; अत्राह--**बाधकप्रमाणाभावः सिद्ध एव** । अनेन हेतोरसिद्धतामाह । अनुपलम्भो बाधक इति चेत्; अत्राह-539/mkj -**स्वोपलम्भ** इत्यादि । प्रमाणान्तरं बाधकमिति चेत्; अत्राह--**कस्यचिदनुपलम्भमन्तरेण** कस्यचिदपि सर्वज्ञस्य अन्यस्य वा अनुपलम्भमन्तरेण **व्यतिरेकाऽसिद्धेः** अभावसिद्धेः ***अभावप्रमाणवैफल्यापत्तेः** । § 2940

माभूदनुपलम्भात् तदभावसिद्धिः प्रत्यक्षात्तु स्यात् । अभावप्रमाणवैफल्यमिति चेत्; तदिष्यत एव, प्रत्यक्षाविशेषत्वात्तस्य इति परः । तं प्रत्याह--**साकल्येन** इत्यादि । प्रत्यक्षतः तदभावसाधने द्वैतं भवति क्वविशाकल्येन वा ? प्रथमपक्षेभिमतत्वान्न दूषयितुमाशङ्कितः सर्वभावसत्त्वस्य सप्रतिपक्षत्वात् । द्वितीयेऽपि पक्षे द्वेतसेद्वैत सेन्द्रियाद्, अन्यतो वा ? अत्रापि प्रथमपक्षः श्रोत्रियस्य अनभिमतः सन्निहितमात्रे चक्षुरादिव्यापारोपगमनात् नासंकिंतः /ms । केवलंद्वैतद्वये त्यपक्षद्वयमवशिष्यते । तत्र **साकल्येन** अनवयवेन **स्वयम्** आत्मना **लिङ्गेन्द्रियादिनिरपेक्षस्य** मीमांसकादे[ः] **भावप्रतिपत्तेः सर्वज्ञाभावप्रतिपत्तेः विरोधात्** तत्प्रतिपत्तेः इति भावः । तथाहि--साकल्येन स्वयं तदभावप्रतिपत्तिश्चेत् कस्यचित्; स एव सर्वज्ञ इति तत्प्रतिपत्तिः । सा चेत् न; स सर्वज्ञ इति न तत्प्रतिपत्तिरिति । यदि वा, तथा तत्प्रतिपत्तेः सकाशाद् विरोधात् **सम्प्रयोग** मी० सू० १ । १ । ४इत्यादेः बाधकप्रमाणाभावः सिद्ध एव इति । एवं तावत् परप्रसिद्ध्या धर्मादिवत् सर्वज्ञस्य आगमात् सत्तां प्रसाध्यता तत्र **प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।** मी० श्लो० अभाव० श्लो० १ *इत्यादि निरस्तम् । § 2941

अधुना अनुमानात् तां प्रसाध्य तन्निराकुर्वन्नाह--**ज्ञानस्य** इत्यादि । § 2942

---

२ य] वलं
३ मानं] यद् बाध्यमानं
८ अभाव] वा
८ *] अन्यथा ।
१० स्य] अभावप्रमाणस्य ।
११ द्वैतं] द्वौ विकल्पौ ।
११ विशा] क्वचित्, सा
१२ क्षे] क्षोऽ
१२ त्वात्] प्रतिप(?क्षस)पेक्षत्वात् असत्त्वसापेक्षसत्त्ववत् ।
१३ सेद्वैत] द्वैतम्--
१४ ना] सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना--मी० श्लो० सू० ४ श्लो० ८४ ।
१४ नासंकिं] नाशङ्कि
१५ त्य] अन्त्य
१८ त] सर्वज्ञाभाव ।
१८ त्तिः] सर्वज्ञप्रतिपत्तिः ।
१८ सा] साकल्येन सर्वज्ञाभावप्रतिपत्तिः यदि न ।
१९ त] सर्वज्ञाभावप्रतिपत्तिः ।
२० इ] सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां यद् बुद्धिजन्म तत्प्रत्यक्षम्--मी० सू० ।
२२ ता] प्रसाधयता
२३ *] वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता इति शेषः ।
२४ अनुमानात्] सर्वज्ञसत्ताम् ।
२४ साध्य] प्रमाणपञ्चकमिध्यादि अभावप्रमाणग्रन्थम् ।

...8 ज्ञानस्यातिशयात् सिध्येद्विभुत्वं परिमाणवत् ।
वैशद्यं क्वचित् दोषमलहानेस्तिमिराक्षवत् ॥ ८
‖§ 2944

यथा...दोषा [वरणयोः क्षयात् वैशद्यम् मलहानेस्तिमिर...] § 2945

**ज्ञानस्य विभुत्वं** सकलज्ञेयसाक्षात्करणलक्षणं **सिध्येत्** । **क्व** ? **क्वचित्** मलविपक्षभावनापर्यन्तवति पुरुष । कुतः ? इत्याह--**अतिशयाद्** वृद्धे[ः]ज्ञानस्येति । कस्य वा ? इत्याह--**परिणामवद्** इति । एतेन तत्र सुगतादेरपि विभुत्वं व्याख्यातम् । § 2946

ननु तस्य भवतु विभुत्वम्, न च सकलव्याप्तिज्ञानस्य वा[ऽ]विशस्य सकलस्य वा स्यादिति चेत्; अत्राह--**वैशद्यम्** इत्यादि । **ज्ञानस्यअतिशयात्** इति चानुवर्तते । तयोरतिशयात् । अत्र निदर्शननिः **तिमिराक्षस्येव** तद्वत् । § 2947

540/mkj

कारिकाव्याख्यातुमाह--**यथा** इत्यादि । सुगमम् । कुतोऽस्य वैम्यम् इति चेत् ? अत्रकि**दोष** इत्यादि । निदर्शनमत्राह--**निस्तिमिर** इत्यादि । § 2948

स्यान्मतम्--**दोषावरणयोःक्षयात्** । इत्रा+एपिनात्यन्तं क्षयोऽदर्शनात् क्वचित्तस्य इति चेत्; अत्राह--**माणिक्यादे**रित्यादि । § 2949 /ms

...9 माणिक्यादेर्मलस्यापि व्यावृत्तिरतिशयवती ।
आत्यन्तिकी भवत्येव तथा कस्यचिदात्मनः ॥ ९
‖§ 2951

न ह्यत्रातिशयाद्धेतोः क्वचिद् व्यभिचारः इति । चैतन्याभावोऽस्त्येव, अज्ञानाद् ...आशास्त्रविदः § 2952

**माणिक्यादेः** आदिशब्दा[त्सु]वर्णादेः **अतिशयवती** वृद्धिमती **मलस्य** किट्टिकालिकादेः **व्यावृत्तिः आत्यन्तिकी भवत्येव कस्यचित्** मलप्रतिपक्षोपयोगप्रकर्षवतो यथा **तथा आत्मनोऽपि** सा तथाविधा भवत्येव इति । § 2953

---

१ सिध्येद्विभुत्वं ] तुलना--एतद्धि वर्धमानं यत्र निरतिशयं स सर्वज्ञः । अस्ति काष्ठाप्राप्तिः सर्थज्ञबीजस्य सातिशयत्वात् परिमाणवदिति, यत्र काष्ठाप्राप्तिर्ज्ञानस्य स सर्वज्ञः ।--योगभा° १ । २५ । प्र° मी° पृ° १२ ।
५ पुरुष ] षे
६ वा ] वा इवार्थः ।
६ रिणाम ] परिमाण
१० निः ] नं **मलहानेः**
१२ कारिका ] कां
१२ म् ] **वैशद्यम्**
१३ कि ] अत्राह--
१३ निस्ति ] मलहानेस्ति
१५ इत्रा+एपि ] इत्यत्रापि
२३ तो ] शोधकोपायप्रयत्नप्रकर्षशीलस्य ।
२३ थाविधा ] आत्यन्तिकी ।

ननु बुद्धिव्यावृत्तिरपि अतिशयव+एववतीदृश्यते इति सापि क्वचिद् आत्यन्तिकी स्यात्, इतरथा हेतोर्व्यभिचार इति चेत्; अत्राह--**न ह्य-त्र**इत्यादि । **न[हि]**खलु **अत्र** आत्मनि**[अति]शयादिति[हेतोर्व्यभिचारः]**ततो यथा अचेतनस्य कर्मणः आत्मन्यभावः तथा आत्मनोऽपि क्वचित् अचेत-नोभाव इति साध्यान्तःपातित्वान्न व्यभिचारः इति । एतदेव दर्शयन्नाह— **क्वचिद्** इत्यादि । लोष्टादिरूपे पुद्गलादाव**चैतन्याभावोऽस्त्येव** । कुतः ? इत्याह--**अज्ञान** इत्यादि । आ कुतः ? इत्याह--**आशास्त्वविद** इति ।
§ 2954

ननु जैनस्य न निदर्शनमात्रतो हेतुर्गमकः अपि तु विपक्षे सद्भावबाध-कबलात्, न च विभुत्वाभावे ज्ञानातिशयबाधकम् इति चेत्; अत्राह--**ज्ञानम्** इत्यादि । § 2955

...10 ज्ञानं निरुपमं नो चेत् वेद सर्वगतं स्वतः ।
सर्वज्ञविकलान् लोकान् कुतो वेदानकृत्रिमान् ॥
१० ॥§ 2957

कृतमेतत्--उत्पाद...। अतो ज्ञानं द्रव्यं स्वभावं व्याप्नोत्येव । स्व-विषये विपर्ययः परतः तिमिरादेः । प्रतिपक्षे सति रागाद्यपकर्षदर्शनात्, तत्प्रयोगातिशयवशात् दोषावरणविमुक्तेः कैवल्यसिद्धिः स्वभावोपलब्धिरेव न पुनः स्वभावातिक्रान्तिः । तन्न लङ्घनादिदृष्टान्तोऽपि ज्ञानस्वभावातिश-यकाष्ठावाप्तिमुपरुणद्धि वैषम्यात् । § 2958

**ज्ञानं नो चे[त्]**नास्ति यदि कांभूतम् ? इत्याह--**निरुपमं** मलोत्तरम् अतीन्द्रियं **विशदम**बाधम् । पुनरपि किंभूतम् ? इत्याह--**सर्वगतं** सर्वविष-यपरिच्छेदनसमर्थम्, **स्वतः** स्वमहात्मा नेन्द्रियाद्यपेक्षातः **कुतः** प्रमाणाद् **वेद** वेत्ति मीमांसको लौकायतिको वा **लोकान्** जगन्तिकिंभूतान् ? इत्याह-- **सर्वज्ञविक लानीति** । यदि वा **लोकान्** पुरुषान् **सर्वज्ञविकलान्** इति द्रष्टव्यम् ? **वेदानकृत्रिमान**नादिनिधनान् **कुतो वेद** ? नहि तथाविधज्ञान-मन्तरेण तद्वेद[न]संभवः इन्द्रियज्ञानस्य तत्रासामर्थ्यात्, अनुमानाभावात् ।
/ms 541/mkj
§ 2959

ननु इदमस्ति--विवादगोचरौ [दे]शकालौ सर्वज्ञविकक्तोतत्राद सन्नदेश-कालवदिति चेत्; न; उक्तमत्र--अन्यथानुपपत्तिरहितत्वादहेतव इति, अन्य-

---

१ ती] शयवती
५ नो] नेऽ
६ लादाव] दौ
९ न] उदाहरणमात्रात् ।
११ कां] किं
११ म्] मलातीतम् निर्मलमित्यर्थः ।
२१ हात्मा] स्वमाहात्म्यात्
२३ लानीति] निति
२७ नु] अतीतोऽपि कालः सर्वज्ञशून्यः कालत्वात् नीन्तनकालवत् ॥--मी° श्लो° ता° पृ° ७५ ।
२७ क्तो] लौ
२७ त्राद] [[देशत्वात् कालत्वाद्वा ।]]तत्त्वात् आ

था कंचिद्देशं *कालं वा पण्डितपुरुषरहितं स्वमातृविवाहर(?हित)स्योपलंभस्यसर्वे तथा किन्न साधयेतु ? पर्यायेण नरान्तरेण वा स्य दर्शनं[न]सर्वज्ञस्येति किंकृतमेतत् ? आगमस्य तदभावे अप्रमाणत्वात्, *विद्यादिविषयत्वाच्च । उपमानन्तु भूतंदेशकालंनरसाक्षात्करणमन्तरेण दूरोत्सारितमेव, सर्वोपमानोपमेये तदयोगात् । अर्थापत्तिः पुनः सर्वज्ञभावमन्तरेण कस्यचिदनुपजायमानस्य अर्थस्य अभावात् अयुक्त वा । § 2960

एतेन वेदानादित्वमपि चिन्तितम् । नहि तत्रानुमानम्; लिङ्गाभावात् । कर्तुरस्मरणादयः कृतोत्तराः । आगमात्रकृत्रिमत्वसिद्धिरिति चेत्; कुतः तस्य प्रामाण्यम् ? *तत एव इति चेत्; अन्योऽन्यसंश्रयः--सिद्धे तदकृत्रिमत्वे ततः प्रामाण्यम्, अतश्च तत्सिद्धिरिति । न चापरं वाक्यं तथाविधमस्ति येन तत्सादृश्याद् वेदस्य तत्सिद्धि[ः]स्यात् । नापि तदन्तरेण किञ्चित् *प्रतिपन्नमनुपपन्नमस्तियेन अर्थापत्त्या[अ]कृत्रिमत्वप्रतिपत्तिः स्यात् । केव- /ms
ले प्रत्यक्षमवशिष्यते । तच्चेद् अनाद्यनन्तकालविकरणेऽसमर्थं चेत्; तत्ततः कुतः तत्प्रतिपत्ति[रिति] ? § 2961

**ज्ञानं निरुपमं सर्वगतमस्ति** इत्येतद् व्याख्यातुमाह--**कृतमेतद्** इत्यादि । **कृतं** निश्चित**मेतत्** । किम् ? इत्याह--**उत्पाद** इत्यादि । निगमयन्नाह--**अत** इत्यादि । **अतो** न्यायात् **ज्ञानं** कर्तृ **व्याप्नोति एव** विषयीकरोत्येव । किम् ? **द्रव्यम्** । किंभूतम् ? इत्याह--**स्वभाव** इत्यादि । *सर्वस्याविशेषात् तत्तद् व्याप्नुयादिति चेत्; अत्राह--**स्वविषय**लोकालोकरूपे **तद्विपर्ययः** तस्य ज्ञानस्य अप्रवृत्ति-अवैशद्य-मिथ्यालक्षणो **विपर्ययः** जायते इत्यध्याहारः । कुतः ? इत्याह--**परतः** कर्मणः । **तिमिरादेः** इत्यादि अत्र निदर्शन । कुतः तत्परिक्षयलक्षणा सिद्धिः ? इत्याह--**प्रतिपक्ष** इत्यादि । दोषावरणयोः **प्रतिपक्षः** सम्यग्दर्शनादिः **तस्मिन् सति रागाद्यपकर्षदर्शनात्** *अदृष्टपूर्वार्थदर्शनाद् उपनिबन्धादेः अनन्यकर्तृकस्य प्रवर्तनात् । न चावरणविगमाभावे स्वविषयोन्मुखता ज्ञानस्य, तिमिरोपहतलोचनस्य तथा[ऽ]दर्शनात् । ***तस्य प्रयोगः** समग्रता तस्या**तिस+एवसात् दोषो** रागादिः व्याख्यातः प्र मा ण 542/mkj

१ *] शं
२ स्य] रहितं वोपलभ्य
२ र्वे] [[पारसीकदेशान् स्वमातुविवाहशून्यान्, कालांश्च पण्डितरहितान् ।]]सर्वान्
२ येतु] त्
२ र्यायेण] क्रमशः, कालान्तरे कश्चिदपण्डितोऽपि पण्डितो भवति ।
३ स्य] सर्वज्ञाभावे ।
३ *] वेदागमस्य कार्येऽर्थे प्रामाण्यात् न तु स्वरूपे ।
३ विद्या] ध्या
४ भूतं] त
४ कालं] ल
५ ज्ञ] ज्ञा
६ वा] त्कैव
८ मात्र] मात्तद
९ *] अकृत्रिमत्वादेव ।
१२ *] प्रमाणसिद्धं वस्तु ।
१३ ले] लं
१३ च्चेद्] दं
१८ *] सर्वात्मनां स्वभावसद्भावात् ।
१९ य] ये
२१ न] नम्
२३ *] सर्वथा नूतनपदार्थदर्शनात् ।
२५ *] प्रतिपक्षस्य सम्यग्दर्शनादेः ।
२६ सात्] तियवशात्

सं ग्र ह भा ष्ये, **आवरणं** ज्ञानादिप्रच्छाद[कं]कर्म **तयोः वियुक्तेः**सकाशात् **केवल्यसिद्धिः** । किंभूता ? इत्याह--**स्वभावोपलब्धिरेव** । § 2962

/ms स्यान्मत[म् अ]सर्वज्ञस्य सर्वज्ञत्वकल्पने स्वभावातिक्रमो भवेदिति; तत्राह— **न पुनः** नैव **स्वभावस्य** किञ्चिज्ज्ञत्वस्य **अतिक्रान्तिः** *तत्कल्पने जीवस्य तत्स्वभावात् [अभावः स्यात्] । § 2963

तत्रैवम् आत्मस्वभावे सर्वज्ञत्वे सिद्धे सति सिद्धं फलं दर्शयन्नाह--**तन्न** इत्यादि । यत एवं ज्ञानस्यातिशयाद् विभुत्वम् आत्मस्वभावं मलक्षयसाध्यत्वादपुनयत्नसाध्यं **तत्तस्मानुलङ्घनादिदृष्टान्तोद्यादि**शब्देन उदकतापपरिग्रहः, **ज्ञानस्तभावातिशयकाष्ठाव्याप्तिम् उपरुणद्धि** निराकरोति, दृष्टान्तेन तया**वैषम्यात्** । § 2964

स किं कारणं स्वभावोपलब्धिरेव सिद्धिर्न पुनः अविद्यमानधर्मा वा तमिति चेत्; अत्राह--**नहि** इत्यादि । § 2965

न हि तत्कर्तुमशक्यत्वादक्षलिङ्गादिभिः [स्वयम्] ।
स्वविषयं व्याप्नुयाज्ज्ञानं नान्यथा... ...॥ ११ ॥
न किञ्चित्प्रतिपद्येत विप्रकर्षादयं कथम् ॥ [१/२]
॥§ 2968

[हि]यतः **तस्या[ा]कर्तुमशक्यत्वात् अक्षलिङ्गादिभिः आदि**शब्दाद् आगमाभ्यासधर्मादिपरिग्रहः, **स्वविषयं** सहेदासद्वर्ग्गं लक्षणम् **व्याप्नुयात् ज्ञानं नान्यथा** न-स्वतो दोषावरणापाये इति स्यात् । नहि आकाशादीनां बुद्ध्यादिसमवायिकारणत्वशक्तिरहितं *स्वतः अन्यतः तत्सहितं क्रियते, पदार्थस्वभावव्यवस्थाभावापत्तेः । अथ आत्मनः सकलविषयग्रहणस्वभावज्ञानजनिका शक्तिः आत्मभूता[न]अन्येन क्रियते; आत्मनोऽपि क्रियाप्रसङ्गात्, ज्ञानं तु क्रियते इति चेत्; उच्यते--*परया शक्त्या सभूतया स ज्ञानं भिन्नम् उपजनयति, तयैव अर्थस्य ग्राहकोऽस्तु किं भिन्नकल्पनया ? अथ

---

१ वियुक्तेः ] विमुक्तेः
४ *] स्वभावातिक्रान्तिकल्पने ।
५ भावात्] तत्स्वभावत्वात् ।
६ त्रे] दे
८ य] र्य
८ नु] न्न
८ नादिदृष्टान्तोद्या] न्तोऽपि, आ
९ स्त] स्व
१० या]
तस्या[[ज्ञानस्वभावातिशयकाष्ठावाप्तेः ।]]
११ किं] तत् किं
१२ मिति] ?
१७ ग्रं] [[सद्वर्गः द्रव्यगुणकर्मरूपः सत्तासामान्यसम्बन्धवान्, असद्वर्गश्च सामान्यविशेषसमवायात्मकः सत्तासम्बन्धरहितः स्वतःसन् इत्यर्थः ।]]सदसद्वर्ग
१९ *] तत्त्वं
२२ *] द्वितीयया ।
२२ स] स्वभाव
२२ स] आत्मा ।
२३ ति] चेत् ।
२३ किं] भिन्नज्ञान ।

भिन्नज्ञानमन्तरेण तद्ग्रहणं नास्ति; भिन्नशक्तिमन्तरेण तज्जननं मा भूत् । तथेति चेत्; युक्तम् अत्र शक्तेरेवज्ञानाभाव * सैव तत्समयकारिणम्इत्य- /ms कारक आत्मेति तदवस्तुत्वम् । समवायनिषेधा[त्]न सा तत्र समवेता । *सतोऽपि तस्याऽविशेषाद् आकाशादेरपि सा न किम् ? यदि पुनः सम्बन्धस्याविशेषेऽपि सम्बन्धिनोर्विशेष इष्यते; स कुतो मतः ? स्वयोगता शक्तिः उन्यते,[त]स्या अपि ततो भेदे अनवस्था । अभेदे; आद्यापि तथैवास्तु किं तद्भेदकल्पनया इति स एव दोषः । § 2969

किंच, शक्तेस्ततो भेदे नित्यत्वे व्यापित्वे च, अन्यथा न सर्वत्र सर्वदा ज्ञानोदयः, इति न युक्तम्--**सर्वगत आत्मा सव[त्र]उपलभ्यमानगुणत्वात्** 543/mkj इति । यदि पुनः अन्यत्र अन्यदा *सा केनचित् क्रियते; कथं तद्रहितेन तत्करणम् ? अन्यथा गगनादावपि तत् स्यात् । अयोग्यत्वान्नेति चेत्; किं पुनः आत्मनि तद्योग्यमस्ति ? भिन्नं तथा चेदनवस्थापरा ततो नित्यव्यापिनी च सा इति किम् आत्मना ? तत एव तत्कार्यसिद्धेः । सैव आत्मा इति चेत्; अनुबद्धः प्रसङ्गाज्ज्ञानोत्पाद-तदर्थग्रहणं तयैवाऽस्तु इति । यदि पुनः भिन्नं ज्ञानत्वग्रहणम्; तर्हि भिन्ना शक्तिः [न] तज्जननमिति, शक्तेरपि अपरा शक्तिः इत्यनवस्था चक्रकं शक्त्यन्तरस्य नित्यत्वसर्वगतत्वे । तन्न आत्मनो भिन्ना शक्तिः । § 2970

ननु यदि सैवार्थस्य ग्राहिका, तर्हि तस्याः सर्वस्य सर्वत्र सर्वदाऽविशेषात् सर्वोऽपि सर्वदर्शी स्यादिति चेत्; न; तज्ज्ञानस्यापि ततः सर्वत्र सर्वदा सर्वस्योत्पत्तिप्रसङ्गादिति परपक्षेऽपि स एव दोषः । सहकारवैकल्यान्नेति /ms चेत्; यथा तर्हि तद्वैकल्यात् ज्ञानं न जनयति; तथा आवरणवैकल्यादर्थं न गृह्णाति । *तस्य आवरणेन किं क्रियते ? तद्वैकल्येन किं क्रियते ? न किञ्चिदिति चेत्; आवरणेनापि न किञ्चित् । अर्थग्राहिका कुतो नेति चेत्; ज्ञानवत् जनिका कुतो नेति समानम् । अथ तस्या ईदृशः स्वभावो यतस्तद्वैकल्यान्न जनयति अपि तु सहकारिसाकल्याज्जनयति; तर्हि ईदृशोऽपि स्वभावोऽस्तु येन आवरणसद्भावे न प्रकाशयति अर्थम् अपि तु तद्वैकल्ये, भावशक्तेः अचिन्त्यत्वात् इति । तत्त्वावरणेनान चेत् तत्स्वरूपखण्डनकिं तेन

१ रेण] अर्थग्रहणम् ।
२ *] ज्ञानभावः[[ज्ञानात्मकत्वपरिणतिः ।]]
२ सैव] शक्तिः ।
२ म्] तत्समवायिकारणम्
४ *] समवायस्य ।
४ स्याऽविशेषाद्] समानत्वात् ।
६ ता] योग्यता
६ उन्य] च्य
१० *] योग्यताशक्तिः ।
१० हितेन] शक्तिरहितेन ।
१२ म] ग्यताऽ
१२ भिन्नं] अस्ति भिन्ना;
१२ रा] द्वितीया ।
१४ ङ्गा] ङ्गः--
१४ णं] शक्त्यैव ।
१५ त्व] ज्ञानं न
२० कार] रि
२१ र्हि] सहकारिवैकल्यात् ।
२१ ण] णा
२२ *] आत्मनः ।
२२ ल्येन] सहकारिवैकल्येन ।
२४ अथ] शक्तेः ।
२७ त्त्वा] तदा
२७ णेना] णेन
२७ न] नम्;

? तच्चेत्; सौगतमतमिति चेत्; सहकारिणा न चेत्तस्याः किञ्चित् क्रियते; नान्यथास एव दोषः । यथा तत्सान्निध्येन करोति, तथा आवरणसान्निध्ये न ज्ञानस्वभावातिशयकाष्ठाप्सु परोव प्रकारेण **अन्यथा कथमयं प्रतिपद्येत** । किम् ? इत्याह--**न कश्चित्** इ । सुगतम् । अत्र हेतुमाह—**विप्रकर्षादि**वति स्वभावादिव्यवधानात् । § 2971

अनन्तरार्थस्य **दशहस्तान्तरं न्योस्तीत्योस्ति व्योम्नि यो नामोत्प्लुत्य गच्छति** । तत्त्वसं° पृ° ८२६ पूर्वपक्षे इत्यादिकं प्रकारान्तरेण निराकर्तुं **यदि नाम** इत्यधिकां **दशहस्तान्तरम्** इत्यादिकां कारिकामाह-- § 2972

...12 यदि नाम
दशहस्तान्तरं व्याम्नो नोत्प्लवेरन् भवादृशः ।
योजनानां सहस्रं किन्नोत्प्लवेत पक्षिराडिति ॥ १२
॥§ 2975

वीर्यान्तरायक्षयातिशयवशात् लङ्घनादिशक्तेरतिशयप्रतिपत्तेः आगरुडादनिवारणात् सातिशयपुरुषोपपत्तिः । § 2976
१544/mkj

**दशहस्तान्तरं व्योम्नो नोप्लवेरंभवादृशाः यदि नाम, योजनानां सहस्रं** /ms **किन्नोत्प्लवेत यत्किराुदुत्पप्लवेतैव** । जात्यन्तरत्वम् अन्यत्राऽनिवारित, युक्तं व्य मनुष्य इति स पश्येत मधुना नरैः वालिसिरिति वैनतेयस्यादर्शनात् योजनसहस्रोत्प्लवनम् असिद्धमिति चेत्; न; भेरुण्डादीनाम् इतरपक्षपेक्षया सातिशयोत्प्लवनदर्शनात् वैनतेये तदनिवार्यम् इत्येवमुक्तत्वात् । § 2977

ननु च भेरुण्डस्य तदुत्प्लवनं जातिमात्रभावित्वात् सहजम्, पुरुषस्य तु ज्ञानातिशयो लङ्घनवदभ्यासजः इ[ति]तद्वन्नियतो युक्त इति चेत्; अत्राह--**वीर्यान्तराय** इत्यादि । **वीर्यं** सामर्थ्यं तस्य **अन्तरायः** सतोऽप्यावारंभःकर्मविशेषः तस्य **क्षयातिशयो** विश्लेषविवृद्धिः तस्य वसा ***लङ्घनादिशक्तेरतिश-**

१. कुमारिलमतम् । श्लोकोऽयं कुमारिलोक्तमिति कृत्वा तत्त्वसंग्रहे उद्धृतः । न योजनशतं गन्तुं शक्तोऽभ्यासशतैरपि इत्युत्तरार्धम् ।

१ म] अनित्यत्वापत्तिरिति ।
२ था] नापेक्षा[[सहकारिणोऽपेक्षा न स्यात् ।]] इति
२ था] सहकारिसान्निध्येन ।
३ रोव] काष्ठापि, अपरेण
४ इ] किञ्चित् इत्यादि
४ म्] सुगमम्
५ ति] दिति
६ स्य] र्थं
१४ वेरं] रन्
१५ प्र] पक्षिराट् ? उपप्लवे
१५ जा] गरुडः पक्षिजातीयः, इतरस्तु मनुष्यजातीय इति भिन्नजातीयत्वम् ।
१५ त्राऽनिवारित] तम्
१६ वालिसिरिति] ?
१७ क्ष] पक्ष्य
२१ तोऽप्यावारंभः] प्यनारम्भः
२२ *] वशात्

यप्रतिपत्तेः । आकूतइत्याह--**आगरुडादनिवारणात्** कारणात् **सातिशयस्य पुरुषस्य उपपत्तिः** सातिशयोपपत्तिः । एवं मन्यते--[न] गरुडस्य सहजं लङ्घनम्, अपि तु तद्विघातिकर्मक्षयजम्, तथा प्रकृतमपि स्यादिति । कर्मादि *दमवगम्यते ? आत्मनि वीर्यं सदेव केनचिद् आहृतं तत्क्षयाद् व्यज्यते, न पुनः जात्यादेः असदेव भवतीति चेत्; आत्मविशेषगुणत्वा[त्]ज्ञानवदिति । § 2978

ननु यदुक्तम्--**दोषावरणविमुक्तेः कैवल्यसिद्धिः** इति; ततदोषविमुक्ते[ः] सर्वज्ञेऽपि वक्तुर्यसंभवात् क्वचित्, तत्प्रतिज्ञायाः वचनलिङ्गजरा[गा]द्यनुमानेन बाधनात् । *वचनं हि रागादिमत्कार्यमिति चेत्; अत्राह--**वचो रागादिमत्कार्यम्** [४२६ क] इति । § 2979

...13 वचो रागादिमत्कार्यं सर्वं चेच्चोदना कथम् ।
प्रमाणं नित्यता तासां वक्तारः किं करिष्यते ॥ १३
॥§ 2981

सर्वो वक्ता तत्त्वादेव रागादिमान् तत एव अविशेषेण यद्यप्रमाणम्; कथं वेदस्य प्रामाण्यम् ? वाक्यानां[नित्यत्वे]ताल्वादिव्यापारवैफल्यम् अन्यथा अभिव्यक्तिः क्रियते न वाक्यमिति किंकृतमेतत् ? न च वैदिकवाक्यानि तत्त्वाविशेषेऽपि वक्तृदोषैर्नोपलिप्येरन् यतः प्रवचनमितरस्मात् विशेषयेत्, नान्यथा । न च वाक्यम् [इच्छाकार्यम्]सुप्तादौ अन्यथापि दर्शनात् । बुद्धि[करणपाटवहेतुकं वाक्यम्] तच्च ज्ञानपाटवं स्वकार्यं परस्मात् विशेषयेत् । न तन्नित्यवाक्यं तत्ततः, व्याख्याविप्रतिपत्त्यभावप्रसङ्गात् । वाक्यान्तराणां चैतन्यनान्तरीयकत्वं न वेदवाक्यानामिति स्वभावातिक्रमो माभूत् । तत्...।
§ 2982

अत्रेदं विचार्यते--सर्वं वचनं रागादिमत्कार्यम्, अथ किञ्चित् ? किञ्चिच्चेत्; यदा *दृष्टकर्तृकं तत्तथा कुतोऽवगम्यते ? अनदृष्टकर्तृकसाम्या[त्]चेत्; कुतः साम्यम् ? वर्णादेः इति चेत्; सोऽयं वर्णादिः सर्वत्र 545/mkj
समानः तथा प्रत्यभिज्ञाना[न्न]वा किञ्चिद् इत्ययुक्तम्--**असदर्थाभिधानाद्** इति चेत्; असदर्थविषयं तर्हि वचनं रागादिमत्कार्यं [मिति] तत्कर्तुरेव

---

१ आकूत] आ कुतः ?
४ *] कस्मादि
५ देव] वीर्यमुत्पद्यते ।
७ त] तत्र
८ क्तुर्य] वक्तरि अ
८ तिज्ञायाः] दोषविमुक्तिप्रतिज्ञायाः ।
९ *] अयं च वक्तृत्वाख्यो हेतुः यस्य ज्ञेयप्रमेयत्ववस्तुसत्त्वादिलक्षणाःइत्यत्र आदिपदेन आक्षिप्त एवेति ।--तत्त्वसं० प० पृ० ८८१ ।
१८ बुद्धि] ततश्चैतन्यकरणपाटवयोरेव साधकतमत्वमिति ॥--अष्टस० पृ० ७३ ।
२३ *] यद
२३ था] रागादिमत्कार्यमिति ।
२३ अन] अन्य
२५ मानः] वर्णत्वेन ।

रागादिमत्त्वं नान्यस्य इति सिद्धसाधनम् । यदि पुनः **सर्वं वचो** वचनं सर्वतत्त्वादे * **रागादिमत्कार्यं चेद्** यदि **चोदना** वेदवचांसि **कथं प्रमाणम्** *तत एव तद्वत् *तत्कार्यत्वात् । § 2983

ननु सर्वकर्तृकं सर्वतत्कार्यम् उच्यते, चोदना पुनरकर्तृका नित्यत्वेन इति चेत्; अत्राह--**नित्यता** इत्यादि । **तासां** चोदनानां सम्बन्धिनी **नित्यता** तासामेव **कर्त्तार *किं करिष्यते ?** ते च तस्याः प्रमाणाभावेन निश्चेतुमश [क्यत्वा]त् । न हि *सा सत्यपि प्रत्यक्षेण निश्चीयते, तन्निश्चेतुः सर्व[ज्ञ]तापत्तेः । तदुक्तमत्रैव--**ज्ञानं निरुपमम्** इत्यादि । केवलं कर्तुः[अ]स्मरणानसाध्यते; तदपि जीर्णकूपादिना व्यभिचारीत्यभ्वायतन्ननिरस्यति । यदि वा, व्यभिचारिणी प्रवचनादौ भावा[त्] इत्युक्तम् । यद्वा, अन्यथा विचार्यते--कूटस्थनित्यता, परिणामनित्यता वा हेतुः स्यात् ? प्रथमपक्षोऽयुक्तः; प्रतिषिद्धत्वात् । द्वितीयोऽपि सुवर्णादौ तस्यामपि सुवर्णादौकारादिसाफल्यात् । § 2984

कारिका ख्यातुमाह--**सर्वो वक्तव्येत्यादि** । **[सर्वो]**निरवशेषो **वक्ता *तत्त्वादे[व]रागादिमान्** *वचनं सर्वलिङ्गम् इति लिङ्गपरिणामेन सम्बन्धः । **तत** /ms एव वक्तो *रागादिमत्त्वादेव**अप्रमाणमविशेषेण यदि कथं वेदस्य प्रामाण्यम् ?** वेदस्य कर्त्ता नास्तीति चेत्; अत्राह--**वाक्यानाम्** इत्यादि । **ताल्वादिव्यापारवैफल्यम्, अन्यथा व्यक्तिर**यती **क्रियते न वाक्यम् इति किं कृतमेतत् ?** निरूपितं चैतत् । § 2985

ननु वैदिकाः शब्दाः स्वत एव अर्थमभिदधति न पुरुषात्; *ततः कृत्रिमत्वेन अप्रामाण्यं तेषामिति चेत्; अत्राह--**न च** इत्यादि । [न च] नैव **वैदिकवाक्यानि वक्तृदोषौ तापलिप्येरन्**[किन्तु]उपलिप्येरन्नेत्वा**विशेषे**ऽपि पुरुषपूर्वकत्वाविशेषेऽपि । न केवलं पूर्वोक्तविधिना [यतः] नित्यत्वविशेष वचनस्य सर्वज्ञत्वंप्रवचम् **इतरस्माद्** वेदादविशेषेयत् प्रमाणत्वेन भिन्नं ततो व्यवस्थापयेत् नान्यथा नप्रकाराण । § 2986

---

२ *] सर्वज्ञादेः
३ *] वचनत्वादेव ।
३ *] रागादिमत्कार्यत्वात् ।
४ र्व] र्वं
६ *] वक्तारः
७ *] नित्यता ।
८ त्रैव] प्रस्तावे ।
९ णान] त्
९ पि] कर्तुरस्मरणम् ।
९ न्न] रीत्यभिधाय तत्
१० भिचारिणी] नित्यता ।
१२ र्णादौ] परिणामनित्यतायामपि ।
१२ र्णादौका] सुवर्णका
१२ ल्यात्] कटककुण्डलादिपर्यायोत्पादने ।
१४ ख्या] कां व्याख्या
१४ व्ये] वक्ते
१४ *] वक्तृत्वादेव ।
१५ *] वचनशब्दः ।
१६ *] वक्तुः
१८ ती] रभिव्यक्तिः
२० *] यदि पुरुषात् अर्थमभिदधेयुः तदा ।
२२ ताप] दोषैर्नोप
२२ न्नेत्वा] रन्नेव, **तत्त्वा**ऽ
२३ विशेष] षो
२४ म्] सर्वज्ञोक्तं **प्रवचनम्**,
२४ त्] वेदात् **विशेषयेत्**
२५ काराण] नान्येन प्रकारेण

ननु चोक्तम्--**रागादिमत्कार्यं वचः सर्वम्** इच्छाया रागादिविशेषत्वादिति चेत्; **न च वाक्यम्** इत्यादि । कुतः ? इत्याह--**सुप्तादौ** आदिशब्देन अन्यत्रगतचित्तादौ **अन्यथापि** *समनन्तरेच्छाहितप्रयत्नाभावेऽपि दशनाद्वाक्स्येति किं तत्कारणम् ? इत्याह--**बुद्धि** इत्यादि । सुप्तादौ बुद्धिव्यवस्थापनात् न व्यभिचारः । अथ सर्वस्य तत्पूर्वकत्वा विशेषे कथमन्योऽन्यं समयानां 546/mkj भेद इति चेत्; अत्राह--**न च ज्ञानपाटवं** जीवादिज्ञानपाटवं **स्वकार्यं** प्रवचन**परस्मात्** सुगतादिवचनात् **विशेषयेत्** । दृश्यते हि तरज्ञातिवचसां सत्येतरतया भेदः । तत्पाटवं नित्यं वाक्यं परस्माद् विशेषयेत् स्वकार्यम् इति चेत्; अत्राह--**तन्नित्यवाक्यं तत्ततो [न]विशेषयेत्** । कुतः ? इत्याह- /ms -**व्याख्याविप्रतिपत्तेरभावप्रसङ्गात्** । एवं मन्यते--यदि नित्यत्वं स्वयं स्वार्थप्रतिपादयेत्, युक्तमेतत्, न चैवम् । तद्विप्रतिपत्त्यभावप्रधानतो वा निर्देशः, न नित्यत्वं वाक्यं परस्माद् विशेषयेत् । कुतः ? इत्याह--**व्याख्यानता** इत्यादि । तत्र यदुक्तम् वाक्यं बुद्धिपूर्वकमेव इति नियमः स्यात् इति; तन्न सुभाषितम् । वैदिकवाक्यस्य अन्यथा भावादिति चेत्; अत्राह--**चैतन्य** इत्यादि । **चैतन्यनान्तरीयकत्वं** बुद्धिपूर्वकत्वं **वाक्यं नराणाम्** प्रवचनादिवाक्यानां कथं साक्यकल्पितानवयवत्वेनान **वेदवाक्यानां** तन्नान्तरीयकत्वम् **इत्येवं** यः परेण **स्वभावातिक्रमः** कल्पितः सर्वज्ञवीतरागवादिनं प्रति स्वभावातिक्रमं दोषं वदतापि **स मा भूत्** । कुतः ? इत्याह--**तत्ते***त्यादि । **तत्** सुप्तादौ इच्छावचारि बुद्धिपूर्वकं **कृत्वंश्रुतेः** वेदस्य **पौरुषेयत्वं** सावयवत्वे च यतः तत्साधने निःकलत्वात् । § 2987

ननु वाक्यत्वं स्यात् न च श्रुतेः पौरुषेयत्वं साधयिष्यति, विपक्षव्यावृत्तेः सन्देहादहेतु[रित्याह--] **पुरुषातिशयः सिद्धः** इत्यादि । § 2988

...14 पुरुषातिशयः सिद्धस्तथैवेत्यनुमीयते ।
सर्वज्ञाभावसंवित्तेस्त्वन्यथानुपपत्तितः ॥ १४ ॥§ 2990

---

३ *] अव्यवहितपूर्वकालीनेच्छाप्रेरितयत्नाभावेऽपि ।
३ नाद्वाक्स्येति] दर्शनात्वाक्यस्य इति
५ भिचारः] बुद्धिकरणपाटवाभावेऽपि वचनोत्पत्तिलक्षणः ।
५ स्य] बुद्धिकरणपाटवपूर्वकत्वेऽपि ।
५ स] शास्त्राणाम् ।
६ च] तच्च
७ न] नं
७ ज्ञाति] तत्त्वेतरज्ञानि
१० स्वार्थ] र्थं
१२ ता] व्याख्याविप्रतिपत्त्य
१५ राणाम्] वाक्यान्तराणाम्
१६ त्वेनान] शक्यकल्पितम् अवयवत्वेन[[भागशः ।]] न
१६ त] चैतन्यनान्तरीयकत्वम् ।
१८ तापि] मीमांसकेन ।
१८ *] तत् श्रुतेः इ
१९ इच्छाव] इच्छाऽव्यभि
१९ कृत्वं] वक्तृत्वं
१९ च] साधयत्येव
२० त्वात्] ?

नित्यं वेदं ब्रुवतामपि सर्वज्ञो वीतदोषः सिद्धः । कुतः ? सकल...यथासमयं... कर्तुरस्मरणात् वेदनास्तिक्यवचनाद्योः नित्यत्वाविशेषात् । न च सर्वत्र...। कथं [सर्वज्ञोऽसर्वज्ञैः ज्ञायते] यतः प्रवृत्तिकामस्तत्प्रवचनं प्रतिपद्येत । तदन्यत्रापि समानम् । § 2991

**तथैव** इति श्रवणात् यथैव **इत्यनुमीयते** यत्तदोर्नित्यसम्बन्धात् । ततोऽयमर्थः— यथैव चान्यत्वाविशेषेऽपि आगमस्य वेदस्य नित्यता न परस्य, वक्तृत्वाद्यविशेषेऽपि पुरुषस्यातिशयः सर्वज्ञवीतरागादिलक्षणः सिद्धः /ms तथैव, अन्यथा तन्नित्यतापिमाभूदविशेषात् । नाविशेषेवेदे नित्यतानिबन्धनस्य प्रामाण्यस्य भा[वात्] पुरुषे त्वतिशयनिबन्धनस्य विपर्ययादिति चेत्; न; अस्यतदतिशयनिबन्धनत्वेन प्रतिपादयिष्यमाणत्वात् अत्रैव । कर्त्रभावः तन्नित्यत्वनिबन्धनम् इत्यपि तादृगेव । नहि सकलदेशकालकलापव्यापी 547/mkj व्यामीश तदतिशयमन्तरेण प्रत्येतुं शक्यः । तमन्तरेणात् प्रतीयते इत्यनुक्तसमम् । यतः प्रा[ण]भृन्मात्रदर्शनेन यदि पदार्थसत्तामात्रं व्याप्यते तद्दर्शनं च स्मरणेन, युक्तमेतत् स्यात्, न चैवमिति । § 2992

स्यान्मतम्--सर्वज्ञस्याभावात् न स वेदस्य कर्त्ता, तस्यधेयतोग्रन्थप्रबन्धस्य परोक्षेऽर्थे प्रमाणभूतस्य करणाऽसामर्थ्यात् सिद्धा तन्नित्यता, नैवं तदतिशयः, एवंविधापायाभावादिति; अत्राह--**सर्वज्ञभावसंवित्तेस्त्वान्यथानुपपत्तितः पुरुषातिशयः सिद्धः** इति घनायमृदु सर्वज्ञस्याभावानु स वेदस्य कर्ता इति, साकल्येन तदभावे निश्चिते सति, शङ्का[ऽ]निवृत्तिरन्यथा तन्निश्चयोऽपि सर्वज्ञाद् इति भावः । § 2993

कारिकां व्याख्यातुमाह--**नित्यम्** इत्यादि । **नित्यं वेदं ब्रुवतामपि** न केवलमन्येषाम् **सर्वज्ञो वीतदोषः सिद्धो** वाक्यत्ववत् वक्तृत्वादेरपि सदोषत्वात् इति । युक्त्यन्तरं दर्शयितुं **कुतः** इति पृच्छति । तदाह--**सकले**त्यादि । अनेन **सर्वज्ञ[ः]सिद्ध** इति दर्शयति, **यथा समयम्** इत्यादिना **वीतदोष** /ms इति च नित्यत्वादेव वेदो[न]नास्तिक्यवचनादिकम् अनित्यम् अविशेषत इति चेत्; अत्राह--**कर्तुरस्मरणाद्** इत्यादि । **वेदनास्तिक्यवचनाद्यो[ः] नित्य-**

---

६ त्वा] वचनत्वाऽ
८ त] वेदनित्यतापि ।
८ नाविशेषे] षः
९ स्य] प्रामाण्यान्यथानुपत्तेः नित्यो वेद इति ।
१० अस्य] आगमस्य
११ त] वेदनित्यत्व ।
१२ व्यामीश] कलापव्यापी सः[[कर्त्रभावः ।]]
१२ त] पुरुषातिशयमन्तरेण ।
१२ रेणात्] ण तत्
१५ स] सर्वज्ञः ।
१५ तो] अन्यस्य च इयतो
१६ त] वेदनित्यता ।
१७ विधा] धो
१७ ज्ञ] ज्ञा
१७ संवित्तेस्त्वा] स्त्व
१८ मृदु] घटनात् । यत्तु
१८ स्याभावानु] वान्न
१९ त] सर्वज्ञाभावे ।
१९ ति] स्यादिति ।
१९ था] तदभावो यदि न निश्चितस्तदा ।
१९ त] साकल्येन सर्वज्ञाभावनिश्चयोऽपि ।
२५ त्वादेव] वेदः प्रमाणम् ।

त्वाऽविशेषात् । यदि वा, नित्यत्वाद् वेदः प्रमाणम् नान्यो विपर्ययात्; तत्र हेतोः व्यभिचारं दर्शयन्नाह--**नव** इत्यादि । अनेन वेदवत् मातृविवाहादेरप्रमाणस्यापि नित्यत्वं दर्शयति । प्रमाणं सोऽपि चेत्; वेदार्थवद् अनुष्ठेयत्वम् । कर्त्ता तस्य स्मर्यत इति चेत्; अत्राह--**सर्वत्र** इत्यादि । § 2994

ननु भवतु सर्वज्ञः, सत्त्यसर्वज्ञोनतज्ज्ञानज्ञेयविज्ञानरहितानेवागन्तुं न शक्यते । तदुक्तम्-- § 2995

*स[र्व]ज्ञोऽयमिति ह्येतत्तत्कालेऽपि बुभुत्सुभिः ।
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ॥§ 2997

मी° श्लो° चोदना° श्लो° १३४ § 2998

सर्वज्ञेन ज्ञायते; तन्मतेन सर्वज्ञप्रसङ्गात् । एतदप्युक्तम्-- § 2999

*कल्पनीयाश्च सर्वज्ञा भवेयुः बहवस्तव ।
य एव स्यादसर्वज्ञः स सर्वज्ञं न बुध्यते ॥§ 3001

मी° श्लो° चोदना° श्लो° १३४ इति । § 3002

एतदेवाह--**कथम्** इत्यादि । मा ज्ञायता किं तेन ज्ञातेनेति चेत्; अत्राह--**यत** इत्यादि । **यतो** यस्मावृद्धि ज्ञानात् **प्रवृत्तिकामः तत्प्रवचनं** सर्वज्ञप्रवचनं **प्रतिपद्येत** । तदुक्तम् **सर्वज्ञो येन न ज्ञातः** मी° श्लो° चोदना° श्लो° १३६इत्यादि । इति चेत्; अत्राह--**तद्** इत्यादि । **तत्** परकीयचोद्यम् **अन्यत्रापि** परमतेऽपि **समानम्** । § 3003

548/mkj

एतदेव दर्शयन्नाह--**सर्वात्मज्ञान** इत्यादि । § 3004

सर्वात्मज्ञानविज्ञेयाज्ञेयतत्त्वं विवेचयन् ।
नो चेद्भवेत्कथं तस्य सर्वज्ञाभावविस्त्वियम् ॥ १५ ॥
तज्ज्ञेयज्ञानवैकल्यात् यदि वुध्येत न स्वयम् ।
[१/२] ।§ 3007

नहि...पुरुषविशेषस्यापि वक्तृत्वादिसामान्यादसर्वज्ञत्वसाधनेऽपि समानमेतत्, विपक्षेऽभावासिद्धेः § 3008

२ व] नच
५ ज्ञोन] स तु असर्वज्ञेन
५ हितानेवा] रहितेनाव
१४ ता] तां
१५ स्मावृद्धि] स्मात्तद्धि

१७ इ] सर्वज्ञोऽनवबुद्धश्च येनैव स्यान्न तं प्रति । तद्वाक्यानां प्रमाणत्वं मूलाज्ञानेऽन्यवाक्यवत् ॥--मी° श्लो° ।

**सर्वे** स्थावरप्रभृतयः सकलजगद्वासिन **आत्मानो** जीवाः तेषां च यानि[ज्ञानानि] यच्च **विज्ञेयं** परिच्छेद्यम् **अज्ञेयं** अपरिच्छेद्यं **तत्त्व तद्विवेचयन्** /ms प्रत्यक्षेण जानन्, अन्यस्य तत्राव्यापारादिति निरूपयिष्यते मीमां[सकः] सर्वज्ञः स्यात् । यथैव हि सर्वज्ञस्य ज्ञानं तद्विज्ञेयतृत्वम् वा जातना सर्वज्ञोऽयम् इति ज्ञातुं न शक्यते, तज्ज्ञातेव सोऽपि सर्वज्ञः, तथा सर्वात्मना तज्ज्ञानानांविज्ञेयोयाज्ञेवं तत्त्वस्य वा[अ]साक्षात्करणे एतेनामनुजानाति प्रवृत्तिम् अन्यत्रते त्यजातेत् कथं साकल्येन सर्वज्ञाभाववित् ? जानन् स एव सर्वज्ञः इति । तथा च **धर्मे चोदनैव प्रमाणम्नान्यत् किञ्चन इन्द्रियादिकम्** शाबरभा° १ । १ । २ इति भाष्यं स्तवते । सर्वज्ञत्वेन आत्मानं यदि स्वयमेव जानाति अन्योऽपि तथैव स्वं तथा जानाति इति तद्विषयानुपलब्धिसिद्धौ । अतः कः ? सर्वज्ञसद्भावश्लाघा अनेन ज्ञायते [इति] स एव दोषः । तथा सति **कल्पनीयाश्च सर्वज्ञाः** मी° श्लो° चोदना° श्लो° १३५ इत्यादि परपक्षेऽपि समानम् । § 3009

किंच, तस्य ज्ञानं क्वचित् कदाविद्यादि परिसमाप्तम्; तावन्मात्रत्वम् आत्मनां ज्ञानानां चेति प्राप्तमिति कथम् अनाद्यनन्तता तेषामिति क इदानीं चेदस्य अनाद्यनन्ततां प्रतीयात् ? ततः परं तत्पाठको वा ? यतः सत्त्वं संभाव्येत ? अथ तत्परिसमाप्तावपि न तेषां तावन्मात्रता; तर्हि तेनापरिच्छिन्नस्वरूपाणामपि भावत्, न वा कालस्य किञ्चिज्ज्ञतासिद्धिः । यदि पुनर्न क्वचित् तत्परिसमाप्तमिष्यते; न तर्हि बहुकल्पसहस्रैरपि **सर्वात्मज्ञानविज्ञेयाज्ञे[य]तत्त्वविवेचनम्** य एव तेन अज्ञातः तत्रैव सर्वज्ञत्वाशङ्का नात् निवर्त्तते । § 3010

549/mkj यस्यात्मकं यथाभावमसौ प्रत्येति तेनाऽयमदोषः; अन्योऽपि सर्वज्ञः /ms तथैव प्रत्येति इति तत्रास्यदोषा स्याद्भावात् । मयुक्तम् एवमन्यदपि परस्य

२ अज्ञेयं] अज्ञेयम्
२ त्त्व] त्त्वं
३ अ] प्रमाणस्य ।
४ म्] यतत्त्वं
४ ना] वाऽजानता[[पुरुषेण ।]]
५ ज्ञातेव] तज्ज्ञाने च
५ ना] नां
६ विज्ञेयोयाज्ञेवं] विज्ञेयाज्ञेय
६ एतेनाम] एतेष्व
७ जातेत्] अन्यत्र नेत्यजानन्
८ ध] चोदनालक्षणोऽर्थोः धर्मः--मी° सू° १ । १ । २ । चौदनैव प्रमाणश्चेत्येतद् धर्मेऽवधारितम्--मी° श्लो° चो° सू° श्लो° ४ ।
८ ना] चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थमवगमयितुमलं नान्यत् किञ्चनेन्द्रियादिकम् --शाबरभा° १ । १ । २ ।
८ ते] प्लवते
११ ब्धिसिद्धौ] लब्धिरसिद्धा
११ श्लाघा] व एव
१४ त] सर्वज्ञस्य ।
१४ दाविद्यादि] कदाचिद् यदि
१६ स्य] वेदस्य
१६ वा] अवशिष्येत इति सम्बन्धः ।
१७ स] वेदस्य ।
१७ पि] सर्वज्ञज्ञानपरिसमाप्तावपि ।
१७ तेषां] आत्मनां ज्ञानानां वा ।
१७ ता] अपि तु तेनाज्ञातानामपि सद्भावात् ।
१८ स्य] कालत्वादिति हेतोः वर्तमानकालवत् इति यः सर्वज्ञताऽभावः साध्यते स न इति भावः ।
२१ नात्] न
२२ कं] स्यान्मतम्
२२ ज्ञः] ज्ञं
२३ म्] दोषस्योद्भावनमयुक्तम् ।

दुश्चेष्टितां चिन्त्यम् । ननु स्यादयं दोषो यद्यसौ सर्वात्मज्ञानविज्ञेयाज्ञेयतत्त्वं विवेचयेत्, यावता नैवमिति चेत्; अत्राह--**नो चेत्** न यदि धयेत् * **स्वयम्** आत्मनैव **सर्वज्ञाभाववित् कथं** नैव । निरूपितमेतत् । सर्वज्ञभावावेदने च **धर्मे चोदनैव प्रमाणम्** इत्यन्ययोगव्यवच्छेदेन चोदनाप्रामाण्यसाधनमसारम् । § 3011

किंच, तदभावसन्देहे वेदेऽकर्तृत्वं सन्दिग्धं कथं प्रामाण्यं साधयेत् यतः प्रवृत्तिकामोऽपौरुषेयाद् वचनात् ततः प्रवर्त्तेत ? सर्वज्ञस्य अस्मदाद्यदृश्य[स्य]तत्कर्तुः सद्भावाशङ्काऽनिवृत्तेः । अस्मरणमपि तदभावं न साधयति; स्मरणं हि अनुभवकार्यं न प्रमेयकार्यम्, अविशेषेण सर्वस्य ततः तत्प्रसङ्गात् । [न]तदभावात् प्रमेयाभावात् प्रमेयाभावः; अन्यथा धूनाभावात् सर्वाभावः स्यात् । किन्तु यदि स्यात् तत्कारणस्य अनुभवस्य स्यात् । न च अस्मदाद्यनुभवः सर्वप्रमेयकार्यः येन तदभावे विवक्षितप्रमेयाभावः स्यात् । ततो वेदस्य[अ]कर्तृत्वमिच्छता *तदभावो ज्ञातव्य इति न प्रकृतदोषपरिहारः । § 3012

अथ तदविवेचयन्नेव तदभावं वेति तत्राह--**यदि** इत्यादि । **तस्य** सर्वज्ञेयस्य * **ज्ञानं** तस्य **ज्ञेयं** तत्र **ज्ञानं** तेन **वैकल्यात्** सुतरां सर्वात्मनामसर्वज्ञत्वम् **स्वयं न बुध्येत** असर्वज्ञ इति । क्रम इत्यत्राह--**नहि** इत्यादि । गतार्थमेतत् । स्यादयं दोषो यदि सर्वात्मनामसर्वज्ञत्वम् अध्यक्षेण प्रतीयेत, न चैवम् अनुमानेन तत्प्रतीतेरिति चेत्; अत्राह--**पुरुष** इत्यादि /ms
। **पुरुषस्यविशेषस्यपि** सुगतादे**रसर्वज्ञत्वसाधनेऽपि** न केवलं प्रकृतसाधने । कुतः ? इत्याह--**वक्तृत्वादि** इत्यादि । सुगतरथ्यापुरु+एस्यो यद् **वक्तृत्वादिसामान्यम् तस्मात्** । तत्र किम् ? इत्याह--**समानमेतद्** अनुमानमिति । *सर्वात्मज्ञानविज्ञेयाज्ञेयावेदने **सर्वज्ञोविपक्षे** वक्तृत्वाद्य**भावासिद्धेः** । शेषमत्र चर्चिते चारुचक्षुषा स्वयमेवोपेण । § 3013

१ दुश्चेष्टितां] तं
२ *] भवेत्
३ ज्ञ] ज्ञा
४ च्छेदेन] वेदान्यस्मिन्-सर्वज्ञे योगस्य-प्रामाण्यसम्बन्धस्य यः व्यवच्छेदोऽभावः तेन रूपेण ।
६ त] सर्वज्ञाभावे संशये सति ।
६ र्तृत्वं] कर्त्रभावोऽपि ।
६ येत्] वेदस्य ।
८ र्तुः] वेदकर्तुः ।
८ त] कर्त्रभावम् ।
९ स्य] जैनादिकस्यापि ।
१० भावात्] स्मरणाभावात् ।
१० मेयाभावात्] प्रमेयाभावात् इति द्विर्लिखितम् व्यर्थम् ।
१० था] अकार्यादपि यदि अकारणस्य अभावः स्यात्तदा ।
१० धूना] धूमा
११ स्यात्] यदि स्मरणाभावादभावः स्यात् ।
११ स्य] स्मरणकारणस्य ।
१२ भावे] अनुभवाभावे ।
१३ *] सर्वज्ञाभावः ।
१५ न्नेव] सर्वज्ञाभावम् ।
१५ वेति] वेत्ति;
१६ *] सर्वज्ञस्य
१७ म] कुतः ?
२० वि] रुषवि
२० स्य] स्या
२१ थ्यापुरु+एस्यो] रुषयोः
२३ *] असवर्ज्ञत्वे साध्ये ।
२३ ज्ञो] ज्ञे
२४ चिते] चर्चितम्
२४ मेवोपेण] मेवोह्यम्

एवपरस्य सर्वज्ञताप्रतिपादने यत् फलं प्राप्तं तद्दर्शयन्नाह--**नर** इत्यादि। § 3014

...16 नरः शरीरी वक्ता वाऽसकलज्ञं जगद्विदन् ।
सर्वज्ञः स्यात्ततो नास्ति सर्वज्ञाभावसाधनम् ॥ १६ ॥ § 3016

सत्यपि पुरुषत्वादिसामान्ये यथा केचिदेव सर्वज्ञशून्यं जगत् तद्रागादिमत्त्वं वा विदन्ति नेतरे तथैव यदि केचन सर्वज्ञाः स्युः किन्नोपपद्येत यतः सर्वज्ञो नैव स्यात् ? § 3017

550/mkj

**नर**[ः]पुरुषः **शरीरी वक्ता वा सकलज्ञासकलज्ञ किंविज्ञत्वाजगद्विद**-तु * **सर्वज्ञः स्यात् ततो नास्ति सर्वज्ञाभावसाधनम्**, तत्साधनस्य तेन व्यभिचाराद् इति भावः । § 3018

कारिकां विवृण्वन्नाह--**सत्यपि** इत्यादि । **सत्यपि** न केवलम् असति **पुरुषत्वादिसामान्ये यथा केचिदेव सर्वज्ञशून्यं जगत्** जै मि न्या द यो **विदन्ति**, कस्यसुगतादे **रागादिमत्त्वं** वा परोक्षस्य विदन्ति **नेतरे** रथ्यापुरुषाः **तथैव यदि सर्वज्ञःकेचन स्युः किन्नोप[प]द्येत यतो**ऽनुपपत्तेः **सर्वज्ञ नैव** न क्वचित् **स्यात्** । § 3019

ननु स्यादयं दोषो यदि प्रत्यक्षेण जगत् तथा विदन्ति केचित्, किन्तु अनुमानेन । तथाहि--सर्वात्मज्ञानातिप्रत्यक्षाभिमतानि विवादगोचरतां गतानि, इन्द्रियार्थसन्निकर्षजानि नियतविषयाणि ता, तत्त्वात्, अत्रेदानीत-/ms द्यक्षज्ञानत्वं । तथा विषया विवादविषयाः प्रतिनियतार्थेन्द्रियाध्यक्षविषयाः, तत्त्वात्, विवक्षितविषयवत् । तद्युक्तम् § 3020

*यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम् ।
दृष्टं संप्रति लोकस्य तथा कालान्तरेऽप्यभूत् ॥ § 3022

मी° श्लो° चोदना° श्लो° ११३ § 3023

---

१ एव] एवं
९ *] वा असकलज्ञम्, किंचिज्ज्ञं जगद्विदन्
१३ स्य] तस्य
१४ ज्ञः] ज्ञाः
१४ ज्ञ] ज्ञः
१६ केचित्] जैमिन्यादयः ।
१७ ज्ञानाति] नानि
१८ ता] वा
१८ त्त्वात्] प्रत्यक्षत्वात् ।
१९ त्वं] दानीन्तनप्रत्यक्षज्ञानवत्
२० त्त्वात्] विषयत्वात् ।
२० त्] घटादिवत् ।
२० म्] तदप्युक्तम्--

इति चेत्; न; सत्यस्वप्नेन अस्य व्यभिचारात्। **तद्धि सत्यस्वप्नज्ञानम् इन्द्रियासंसृष्टं व्यवहितं चार्थमवैति** इति प्र मा ण सं ग्र हे निरूपितम्। § 3024

तर्हि बाधकवत् साधकस्यापि सर्वज्ञोभावात् संशय इति चेत्; एतदेवाह— **साधक** इत्यादिना। § 3025

...17 साधकबाधकाभावात् सर्वज्ञे संशयः क्वचित्।
बाधकासंभवात् सिद्धं साधकस्यैव संभवात् ॥ १७ ॥§ 3027

केन तद्द्वयस्याभावनिर्णयः ? तत्र बाधकाभावनिर्णयात्। तत एव प्रत्यक्षस्यापि प्रामाण्यम्। यथादर्शनं तत्त्वप्रतिपत्तौ अतिप्रसङ्गात्। तन्न साकल्येन बाधकप्रमाणव्यावृत्तेरन्यत् साधकं नाम, यतस्तस्य साधकबाधकप्रमाणाभावात् सर्वज्ञत्वं संशीतिमवतरेत्। साधकबाधकयोरन्योऽन्यं विधिप्रतिषेधलक्षणत्वात्। § 3028

अत्र दूषणमाह--**बाधकासंभवादि**[त्यादि]। **क्वचित्** पुरुषविशेषे सर्वज्ञत्वं सिद्धं कुतः ? इत्याह--**बाधकाऽसंभवात्**। अनेनैतत् कथयति--बाधकाभावः परमार्थसत्त्वेन व्याप्तः, सुखादिस्वसंवदेने तथादर्शनात्, परमार्थतत्त्वाभावे च ग्राह्यमरीचिकादिनिराद्याकारोबाधकाभावनिवृत्तेः। यन्निवृत्त्या यन्नियमेन निवर्त्तते तत्तेन व्याप्तम्, यथा ज्ञानत्वं स्वसंवदेनेन, निवर्तते च 551/mkj
तत्सत्त्वनिवृत्तौ तदभाव इति। § 3029

स्यान्मतम्--*तत्सत्त्वाभावेऽपि स्वप्नादिदृष्टघटादौ तदभावा[त्]न तेन *तद्व्याप्तिरिति; तत्तत्स्वसंवेदनग्राह्याकारयोरविशेषप्रसङ्गात् तदाकारनिवेदनात्। ततः स्वप्नादिग्राह्याकारस्य असत्त्वमिच्छता त[द्]बाधकसद्भावोऽभ्युपगन्तव्यः। § 3030

अपरे मन्यन्ते--प्रागभावादौ तत्रासंबंधरहिते तत्सत्त्वाभावेऽपि बाधकप्रमाणाभावः इति नानयोः व्याप्यव्यापकभाव इति; तन्न; भावाद् भि-

---

२ हे] स्वयं प्रभुरलङ्घनार्हः स्वार्थालोकपरिस्फुटमवभासते सत्यस्वप्नवत्।--प्रमाणसं॰ पृ॰ ९९।
४ ज्ञोभा] सर्वज्ञेऽभा-
५ इत्यादिना] साधकबाधकप्रमाणाभावात् सर्वज्ञे संशयोऽस्तु इत्ययुक्तम्...--अष्टस॰ पृ॰ ४९।
१४ सिद्ध] द्धम्।
१६ त] स
१६ रीचिकादिनिराद्याकारो] बाह्यमरीचिकादिनीराद्याकारे
१८ च] परमार्थसत्त्वनिवृत्तौ।
१८ निवृत्तौ] बाधकाभावः।
१९ *] परमार्थसत्त्वाभावेऽपि।
१९ टादौ] बाधकाभावात्।
१९ तेन] परमार्थसत्त्वेन।
१९ *] बाधकाभावव्याप्तिः।
२० त्] तन्न
२३ त्रासंबंध] सत्तासम्बन्ध
२३ त] परमार्थसत्त्वाभावेऽपि।
२४ योः] बाधकाभावपरमार्थसत्त्वयोः।

न्ने[ऽ]भावे बाधकसतस्य *दर्शितत्वात्, सत्तासम्बन्ध वा । ततो य[त]एव /ms बाधकासंभवाद् भावनिश्चयः तत एव तत्रशब्देहम्ववदतः मूढमतय इति ।
§ 3031

ननु न तत एकेन तत्स्वरूपात् केवलात् क्वचित् संशीतिरिष्यते, अपि तु साधकाभावसहितात् । साधकप्रमाणात्मको हि बाधकाभावो भावं गमयति । न च सर्वज्ञे सोऽस्तीति चेत्; अत्राह--**सावकस्यैवंसंभवात् इति** व्यतिरेचको नियतोऽयं **सिद्धम्** इत्यस्याऽनन्तरं द्रष्टव्यः । **साधकस्य संभवात् क्वचित्** सर्वज्ञत्वं **सिद्धेसच** तत्संभवो दर्शितो नेह पुनरुपदर्श्यते । यदि च आत्मनः सकलपदार्थसाक्षात्कारी कस्यचिद् *अवस्थाविशेषः समस्तीति श्रौती बाधकरहिता प्रतीतिः तत्साधकं प्रमाणमिति । § 3032

यत्पुनरुक्तं ध र्म की र्ति ना--**साधकबाधकप्रमाणाभावात्तर्हि सन्देहोऽस्तु** *इति; तत्राह--**केन प्रमाणेन तद्वयस्य** साधकबाधकप्रमाणद्वयस्य **अभावनिर्णयः** न केनचिद् इति निवेदितमेतत् । एवं मन्यते--सर्वज्ञे हेतोः सन्देहसाधनम्, हेतुना[च] सिद्धेन भवितव्यम्, अन्यथा ततः तत्साधनायोगात्, सन्दिग्धासिद्धावचनप्रसङ्गादिति । § 3033

ननु मा भूत् तद्वयाभावनिर्णयः, सन्देहो भवद्विति चे[त्;] तत एव तत्र सन्देहः स्यात् न तद्वयाभावात् इ[ति । अस्तु] तत एव सन्देह इचिंति चेत्; अत्राह— **बाधक** इत्यादिना । **[त]त्र** शब्दः क्रमवाची, तन्न तत्सन्देहात्[त]त्र सन्देह इति भावः । तथापि तत एव तत्र सन्देहं चेत्; अत्राह--**तत एव** इत्यादि । **बाधकाभावनिर्णयादेव** । कुतः ? इत्याह-- /ms **प्रत्यक्षस्यापि,** न केवलम् आगमस्य **तत एव प्रामाण्यं** य[तः] इति ।
§ 3034

---

१ *] संभवस्य
१ वा] न्धे च
२ तः] सन्देहं वदन्तः
४ त] बाधकाभावात् ।
४ एकेन] केवलेन ।
६ स्यैवं] साधकस्यैव
७ को] व्यावर्तकः ।
७ तोऽयं] निपातोऽयं[[एवकारः ।]]
८ च] सिद्धमेव
९ च] वा
९ *] कश्चिद्
१२ *] तुलना—
साधकबाधकप्रमाणाभावमात्रं चात्र सन्देहेन लक्ष्यते ।--प्र° वार्तिकाल° ४ । ९१ । सेयं साधकबाधकप्रमाणानुपपत्तौ सत्यां समानधर्मोपलब्धिः विनश्यदवस्था विशेषस्मृत्या सहाविनश्यदवस्थय एकस्मिन् क्षणे सती संशयज्ञानस्य हेतुरिति सिद्धम् ।--न्यायवा° ता° टी° पृ° २४७ । न्यायकुसु° स्त° २ पृ° ८ । साधकबाधकप्रमाणयोर्निर्णयात् भावाभावयोरविप्रतिपत्तिः अनिर्णयादारेका स्यात् ।--अष्टश° अष्टस°, पृ° ४९ । लघी° स्ववृ° पृ° २ । प्रमाणनय° १ । ११ । प्रमेयरत्नमा° ३ । २९ । प्र° मी° पृ° ५ ।
१४ था] हेतोः ।
१४ तः] सर्वज्ञसन्देहसाधनायोगात् ।
१५ न्दिग्धासिद्धा] द्ध
१६ भूत्] साधकबाधकाभावद्वय ।
१६ द्वि] त्वि
१६ त] साधकबाधकाभावसन्देहात् ।
१६ एव] सर्वज्ञे ।
१७ इचिंति] इति
१९ न्देहं] हः

स्यान्मतम्--प्रतिभासात् तत्प्रमाण्यं न त[तः] इति; तत्राह--**यथादर्शनम्** इत्यादि । **तत्त्वप्रतिपत्तौ** प्रामाण्यप्रतिपत्तावङ्गीक्रियमाणायाम् **अतिप्रसङ्गात्** 552/mkj सकलज्ञानप्रमाणताप्रसङ्गात्, स्व वेतद्वास्यमपि निरारेकभवेत् । § 3035

प्रकृतमुपसंहरन्नाह--**तन्न** इत्यादि । यत एवं **तत्** तस्मात् **न साकल्येन बाधकप्रमाणव्यावृत्तेः** सकाशात् **अन्यत् साधकं** प्रमाणं **नाम** किन्तु सैव साधिका इति, **यतोऽन्यस्य** साधकस्य भावात् **तस्य** सर्वज्ञत्वस्य **[साधक]बाधकप्रमाणाभावात् सर्वज्ञत्वं संशीतिमवतरेत्** । एतदपि कुतः ? इत्याह--**साधक** इत्यादि । **साधकबाधकयोः अन्योऽन्यं** परस्परं यौ **विधिप्रतिषेधौ** तावेव **लक्षणं** ययोः तयोर्भावात् **तत्त्वात्** । तथाहि--बाधकप्रतिषेध एव साधकविधिः, *तत्प्रतिषेध एव सबाधकविधिः, तथा बाध[क]विधिरेव साधकप्रतिषेधः तद्विधिरेव बाधकप्रतिषेध इति । अन्यथा जीवच्छरीरे नैरात्म्यनिषेधः सात्मको न स्यात्, कृतकत्वादेर्वा हेतोः असति विपक्षे अभावाभावो भावात्मको न भवेत् ध र्म की र्तेः इति । तन्न बाधकनिवृत्तिश्च स्यात् न च सर्वज्ञसद्भावः प्रतिबन्धाभावात् इति; सन्दिग्धविपक्षव्यावृत्तेः शेषवत् साधनम् । § 3036

एतदेव दर्शयन्नाह--**कथम्** इत्यादि । § 3037

...18 कथं बाधकनिवृत्तिः सा सती सर्वविदोऽत्यये ।
जगत्सकलज्ञवैकल्ये तद्भावे हेतुरेव वा ॥ १८
॥§ 3039

सती बाधकनिवृत्तिः सर्ववित्सत्तां साधयेत् नात्र संशयः । न वै कस्यचिदप्यभावे बाधकप्रमाणमेव न स्यात् किन्तु तदभावे साधकप्रमाणं च न । तदियमेव निश्चिता सर्वज्ञसद्भावं कुतो न साधयति, साधकव्यावृत्तेरसंभवात् । प्रमेयान्तरस्यापि सत्त्वमबाधितविज्ञानज्ञेयत्वादेव । तदस्ति सर्वज्ञेऽपि । साधकबाधकप्रमाणाभावे संशयोऽपि मा भूत् नैरात्म्यवत् । सुप्तम्...। इत्यलं प्रसङ्गेन । § 3040

**जगतः सकलज्ञवैकल्ये** साध्यविपर्ययरूपे **सतितद्बाधकनिवृत्तिः** संभवन्ती **तत्सद्भावेहेतु[ः]** सर्वज्ञसद्भावहेतुः **कथमिति** ? तत्रोत्तरम्--**[बाधक]निवृत्तिः** इत्यादि । *व्यतिरे[च]कोनियतो **सती** तस्य अनन्तरं द्रष्टव्यः । /ms

१ न] बाधकभावनिर्णयात् ।
३ पि] स्वसंवेदनवत् बाह्यमपि
३ निरारेक] कं
६ स्य] स्या
१० *] साधकप्रतिषेध एव ।
१० स] च
११ तिषेधः] साधकविधिरेव ।
२५ ति] सती
२६ द्भावे] तद्भावे
२७ *] व्यावर्तक इत्यर्थः ।
२७ तो] [[एवकारः ।]]निपातः
२७ स्य] इत्यस्य

**बाधकस्य** या **निवृत्तिः** सा **सत्येव**। कस्मिन् सति ? इत्याह--**सर्वविदोऽत्यये** सर्वज्ञाभावे, तन्निवृत्तेः तत्सद्भावेन व्याप्तत्वात् । § 3041

ननु कथं तत्सद्भावाऽसिद्धौ तेन तद्व्याप्तिः ? तन्निवृत्तेः तत्सिद्धिरिति चेत्; अन्योऽन्यसंश्रयः । तथाहि--तन्निवृत्तेः तद्व्याप्तिसिद्धौ ततः तत्सद्भावः सिध्यति, पुनः तेन तद्व्याप्तिः इति; तन्न; शब्दानित्यत्वेन कृतकत्वादेर्व्याप्तिसाधनेऽप्यस्य समानत्वात् । अथात्र न धर्मिणि व्याप्तिसिद्धिः इष्यते, अपि तु सपक्षे
553/mkj घटादौ; तर्हि त सर्वज्ञो धर्मिणि तन्निध्यत्वसद्भातेन व्याधिः *साध्यते किन्तु सपक्षे सुखादौ । *तत्र[न] *तत्सत्त्वमिति चेत्; यदोपितशब्दाऽनित्यत्वम् । *अत्र अनित्यत्वसामान्येन; अन्यत्र सत्त्वसामान्येन व्याप्तिरिति समानम् । एवमर्थं चोक्तम्--**प्रत्यक्षस्यापि** इत्यादि । § 3042

नन्वेवं बहिर्व्याप्तिरुपसितास्यात् । तवएतावता हेतोगमत्वम्; *तत्पुत्रत्वादेरपि गमकत्वप्रसङ्गात्, अन्तर्व्याप्तिः तस्य गमकत्वोपगमात्, *सा च धर्मिणि गृह्यते । न चैतन्न निवृत्ते र स्ताति चेत्; अत्राह--**सती** इत्यादि । सर्वदे दि धर्मिणि **बाधकस्य निवृत्तिः सर्वविदः सत्तां साधयेत् नात्र** साध्ये **संशयः** कार्यः इत्यध्याहारः । अन्यथा चक्षुरादिविषयेऽपि सत्तासन्देहः स्यात् । बाधकनिवृत्तेः अन्यस्य तल्लक्षणस्याभावा[त्, अ]दर्शनमात्रस्य व्यभिचारात् । § 3043

ननु इदमनुमानम् तदन्तरबाधितविषयकथं साध्यसाधकमिति ? त-
/ms थाहि--नास्ति सर्वज्ञा सुनिश्चितासंभवत्साधकप्रमाण त्वांतरान **वै** इत्यादि । **कस्यविदर्प्य** हतोऽन्यस्य वा सर्वज्ञस्य **अभावे** अङ्गीक्रियमाणे **बाधकप्रमाणमेव न स्यात्** उक्तविधिना सर्वज्ञस्य इति **किन्तु** अपि तु **तस्याभावे** साध्ये **साधकप्रमाणं च न स्यात्** साधकप्रमाणाभावः स्यादिति । **न वै** नैव सर्वज्ञाभावे साधकप्रमाणाभावस्य निश्चेतुमशक्तेः, तस्य तदन्तरस्य वा तत्साधकप्रमाणस्य भावात् । तदभावान्नेति चेत्; कुतः तदभावः ? अन्यत

---

२ न्निवृत्तेः] बाधकनिवृत्तेः ।
२ द्भावेन] सर्वज्ञसद्भावेन ।
३ थं] सर्वज्ञसद्भावासिद्धौ ।
३ तेन] बाधकनिवृत्तेः व्याप्तिः ।
४ द्व्याप्तिसिद्धौ] बाधकनिवृत्तेः ।
४ तः] सर्वज्ञसद्भावः ।
७ *] तर्हि न सर्वज्ञे धर्मिणि [[बाधकनिवृत्तेः ।]]तन्निवृत्तेस्तत्सद्भावेन[[सर्वज्ञसद्भावेन ।]] व्याप्तिः
८ *] सुखादौ ।
८ *] सर्वज्ञसत्त्वम् ।
८ दोपित] घटादावपि न
९ *] शब्दानित्यत्वे साध्ये ।
९ सामान्येन] व्याप्तिरिति चेत्; ।
११ सिता] रुपदर्शिता
११ व] न च
११ ता] सपक्षे बहिर्व्याप्तिमात्रेण ।
११ म] हेतोर्गमक
११ *] गर्भस्थो मैत्रतनयः श्यामो भविष्यति मैत्रतनयत्वात् इत्यादेः ।
१२ व्याप्तिः] हेतोः ।
१२ *] अन्तर्व्याप्तिः ।
१३ स्ता] न चैतत् तन्निवृत्तेरस्ति इ
१४ दि] सर्वविदि
१६ स्य] सत्तालक्षणस्य ।
१८ म्] अनुमानान्तर ।
१८ य] यं
१९ ज्ञा] सर्वज्ञः
१९ रा] णत्वात् । तदाह--
२० ह] **कस्यचिदपि** अर्ह
२४ कुतः] सर्वज्ञाभावः ।

इति चेत्; अस्य वैफल्यम् । अत इति चेत्; अन्योऽन्यसंश्रयः--सिद्धे तदभावे साकल्येंतदसाधक प्रमाणं न स्यादिति स्यात्भवेच तदभावसिद्धिरिति यत्किञ्चिदेतत् । § 3044

उपसंहरन्नाह--**तत्** तस्माद् **इयं** बाधकप्रमाणव्यावृत्तिरेव नान्यत् । किं कृता ? इत्याह— **निश्चिता** सती । किं करोति ? इत्याह--**सर्वज्ञ** इत्यादि । साधकव्यावृत्तिः तदभावं कुतो न साधयति ? इत्याह--**साधकव्यावृत्तेरसंभवात्** सर्वज्ञाभावे तन्निर्णया[संभवा]द् इति भावः । विपक्षे बाधकं दर्शयन्नाह--**प्रमेयान्तरस्यापि** सुखादिरूपस्य न केवलम् अशेषवित्प्रमेयस्य **भत्त्वं** परपार्श्वतत्त्वम् **अबाधितविज्ञानज्ञेयत्वादेव,** *दर्शितमात्रस्य व्यभिचारित्वात् । अर्थक्रियाकारणादिति चेत्; न; तदप्रतिभासने ततः तदिति स्वपायोगात् । प्रतिभासनेऽपि उक्तम् । अबाधितप्रतिभासात् तद्व्यवस्था; अन्यत्र समाना । ऐतेन अर्थक्रियातः तदिति निरस्तम्, अनवस्था च तत्रापि तदन्तरापेक्षणात् । सत्तासम्बन्धात् इत्येके; मरीचिकातोये शक्रतो न ? बाधनादिति चेत्; पतितोऽसिमदुपदिष्टो धर्मन्य च मर्थं **चैव**कारकरणम् । § 3045 /ms

554/mkj

स्यान्मतम्--अबाधितविज्ञानज्ञेयत्वम् अशेषविदि असिद्धम्; इत्यत्राह--तदबाधितज्ञानज्ञेयत्वम् **अस्ति सर्वज्ञेऽपि,** गतार्थमेतत् । तन्न सूक्त **साधकबाध[क]प्रमाणाभावात्तत्र संशयः** इति । § 3046

दूषणान्तरमात्रव दर्शयन्नाहे--**साधन** इत्यादि । **साधकप्रमाणं** सर्वज्ञविषयं ज्ञानम् **बाधकं प्रमाणं** तदभावविषयं तत् **तदभावे** तद्विषयज्ञानरहितत्वे अङ्गीक्रियमाणे **संशयोऽपि मा भूत्** । नहि धर्मिमात्रस्याप्यग्रहणे स युक्तः । निदर्शनमाह--**नैरात्म्यवत्** *पश्चत्वे इव तद्वत् । § 3047

ननु सर्वज्ञानम् आत्माधीनं पश्चत्वे तदभावात् कथं तदिति चेत् ? अत्राह--**सुप्त** इत्यादि । पूर्वं सौगतं परं मीमांसकं प्रति । एतेन धर्म्यसिद्धिर्निरस्ता । परमप्यत्र वक्तव्यमस्ति इति दर्शयन्नाह--**इत्यलं प्रसङ्गेन** इति । § 3048

ननु सत्यपि सर्वज्ञे कथम् अर्हन्नेव सर्वज्ञो नेतरः ? तदुक्तं सुक्तम् । § 3049

---

२ सा] त्येन तत्सा
२ वे] साधकप्रमाणाभावे
९ म्] **सत्त्वं** परमार्थत्वम्
९ *] दर्शितं दर्शनविषयीभूतम् एतावन्मात्रेण प्रमाणत्वं नेति भावः ।
१० पा] निश्चयाऽ
१३ न्धात्] सत्त्वम् ।
१३ तो] तत्कुतो
१४ र्थं] ष्टे धर्मे इत्येवमर्थं
१६ सूक्त] क्तम्--
१८ मात्र] मत्रे
१८ न] धक
१९ यं] ज्ञानम् ।
२० स] संशयः ।
२१ *] शून्यत्ववत् इत्यर्थः कदाचित् स्यात् मृतवत् इत्यर्थः ।
२२ आत्माधीनं] शून्यत्वे ।
२३ तं] प्रति ।
२३ रं] द्वितीयम् ।
२६ म्] सुक्तम् इति निरर्थकं पुनर्लिखितम् ।

*सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा ।
तावुभौ यदि सर्वज्ञौ मतभेदः कथं तयोः ॥§ 3051

तत्त्वसं° श्लो° ३१४९ पूर्वपक्षे इति । § 3052

एतदेव दर्शयन्नाह--**सत्यपि** इत्यादि । § 3053

...19 सत्यपि स्वानुभूतस्य तत्त्वमेकान्तवादिनः ।
अलक्षयन्तः कल्प्येरन् सर्वज्ञाः किं परीक्षकैः ॥ १९ ॥§ 3055

तत्रोत्तरमाह--**एकान्तवादिन** इत्यादि । सुगतादयः **तत्त्वं** स्वरूपमलक्ष-**यन्तो**ऽनिश्चितवन्तः । कस्य ? **स्वात्र** वस्तुनः सुखादिनीलादेः अनेकान्तात्मनोऽनुभूतस्य **एकान्तरूपतया** लक्षणात् **कल्पेरन्सर्वज्ञः किं परीक्षकैः ?** नैव । § 3056

स्यान्मतम्--परचेतोवृत्तीनां दुरन्वयत्वात् कथमवगम्यते तदलक्षयन्तः
/ms इति ? अन्यथाभिधाना दूरनलिंवांद्विप्रन्तति प्रायाः । § 3057

तत्रापि-- § 3058

...20 सर्वस्यैव सतः सिद्धा स्थित्युत्पत्तिव्ययात्मनः ।
क्वचित् कथञ्चिदुद्भूता वृत्तिरन्यतमात्मनः ॥ २० ॥§ 3060

उत्पत्तिरात्मलाभः, स्थितिः [सत्त्वम्], नाशः पुनः स्वभावप्रच्यवनम् च, एतत् परस्परैकार्थात्मकं कथम् ? अपरिणामिनोऽपि तावत् क्षणिकस्य कलान्तरस्थायिनो वाऽर्थस्य यो यदात्मा यथाभूतः स तं सदैव लभते । न च त्र्यात्मव्यतिरेकेण उत्पत्तिः स्थितिर्विपत्तिर्वायुज्येत, द्रव्यान्तरव्यावृत्तिलक्षणत्वात् स्वस्वभावस्थितेः । परिणामिनश्चार्थस्य सतः पूर्वस्वभावप्रच्युतिरेव पुनः
555/mkj स्वभावान्तरप्राप्तिः । परिणामिकारणस्य स्वकार्या त्मविवर्तं प्रत्यन्यानपेक्षणात् । पूर्वस्य वैकल्यम् उत्तरस्य वैकल्यम् । सतो द्रव्यस्य दृश्यं मध्यरूपं कथञ्चित्सदेव, अन्यथा...सर्वथा...। स्वसन्तानपतितमुत्तरपरिणाममप्राप्नुवतः परोपकारासंभवात् । सकल...। परस्परप्रवर्तननिवर्तनाभ्यामन्वयव्यतिरेकलक्षणत्वादन्योऽन्यं द्रव्याणाम् । तदन्ते क्षयदर्शनात् पूर्वमपि क्षयमिच्छन् मध्ये

---

८ स्वात्र ] स्वानुभूतस्य
९ न् ] कल्प्येरन्
९ ज्ञः ] ज्ञाः
१२ ति ] द् विप्रलभन्ति

स्थितिदर्शनात् पूर्वापरकोट्योरपि स्वभावस्थितिं निश्चेतुमर्हति अविशेषात् । दृश्यादृश्याद्यात्मकमेकम् प्रत्यक्षपरोक्षवत् उद्भूतरूपस्पर्शादिपुद्गलवत् । प्रत्यक्षस्वभावस्यैव कथञ्चिदनुमेयतोपपत्तेश्च । नहि तद्विरुद्धम्; संवित्तेरपि अभावप्रसङ्गात् । तन्मिथ्यैकान्ताभिनिवेशवन्तः...किंच उत्तरत्र निषेत्स्यमानत्वात् । § 3061

नतु अनेकान्तात्मकत्ववत् एकस्य प्रतिक्षणं स्थित्युत्पत्तिव्ययात्मकत्वम्, न च मन्या *दीनातथोत्पत्तिव्ययौ, चरमध्यक्षणानां च स्थितिः प्रतीयते इति चेत्; अत्राह--**सर्वस्यैव** इत्यादि । **सर्वस्यैव** न नियतस्य चेतनेतरवर्गस्य **सतो** विद्यमानस्य, हेतुपदमेतत् । किंभूतस्य ? इत्याह--**स्थित्वि**त्यादि । तस्य किम् ? इत्याह--**सिद्धा** निश्चिता । का ? इत्याह--**वृत्तिः** । किंभूता ? **उद्भूता** । किं सर्वत्र सर्वथा ? **न** इत्याह, **क्वचित् कथञ्चिद्** इति स्थित्युत्पत्तिव्ययानां मध्ये **अन्यतमात्मनः** अन्यतमस्वभावस्य मन्य दो *स्थित्यात्मनः संसारिजीवादौ त्रयात्मनः । § 3062

कारिकां व्याख्यातुं पूर्वपक्षयन्नाह--**उत्पत्तिः** इत्यादि । **उत्पत्तिः** प्रादुर्भावः । का ? इत्याह--**आत्मलाभः** आत्मनः स्वरूपस्य[लाभः], प्रागसतो न कारणसमवायः सत्तासमवायो वा इति भावः । तथाहि--पूर्वं स्वतः सतश्चेत् समवायः उत्पत्तिः; आत्मादिविभुत्वादीनां च स्यात् । असतश्चेत्; शशविषाणादीनां भवेत् । पूर्ववत् पश्चादपि तेषामसत्त्वात् नेति चेत्; किमिदं तदसत्त्वम् ? तत्सम्बन्धाभावश्चेत्; सोऽपि कुतः ? अभावाच्चेत्; अन्योऽन्यसंश्रयः— तथाहि--सिद्धे तदभावे तत्सम्बन्धत्वाभावः, तस्माच्च तदभाव इति । कारणाभावात् तदभावे इदमे[व] वक्तव्यम् । तद्यथा कुतः तत्कारणाभावः ? अत्यन्ताभावरूपत्वात् । तदीप कुतः ? कारणाभावात्; अन्योऽन्यसंश्रयः । कथं व प्रध्वंसाभावो विद्यमानः ? यतो मुद्गरादिसाफल्यम् । नहि /ms
तस्य[स]मवायि-असमवायिकारणमिष्यते । निमित्तकारणमस्ति इति चेत्; इतरत्र कुतः ? अदर्शनादिति चेत्; तत एव बुद्धिशब्दादीनाम् अत्यन्तभिन्नम् आत्माकाशादि समवायिकारणं न स्यात् । नहि तदुपलभ्यते यथोपवर्ण्यते परेण । निराधारता स्यात् चेत्; अस्तु, को दोषः ? निरूपता इति चेत्; न; प्रध्वंसेन व्यभिचारात् । गुणत्वाभावश्चेत्; किमिदं गुणत्वं नाम

---

६ तु] ननु
७ *] मण्या
७ दीना] नां
७ त] प्रतिक्षणम् ।
७ ध्य] मान्त्य
९ स्थित्वि] त्यि
१२ *] मण्यादौ
१८ पि] शशविषाणादीनाम् ।
२१ त] शशविषाणादीनामभावे ।
२२ णाभावात्] इति चेत्; ।
२३ यः] कारणाभावे अत्यन्ताभावरूपता सिद्ध्यति, तस्याश्च कारणाभाव इति ।
२३ व] च
२५ त्र] इ[[समवायिकारणम् असमवायिकारणं च कुतो न ? ।]]तरन् नेति
२५ त] अदर्शनादेव ।
२७ ता] शब्दादीनाम् ।
२७ नि] नी

? स्वरूपमेव इति नोत्तरम्; प्रध्वंसेतिपि प्रसङ्गात् । एतेनागुणत्वचिन्तितम् । द्रव्याश्रितत्वम् इति चेत्; तदपि कुतः ? गुणत्वादिति तु भाषितम्, अन्योऽन्यसंश्रयात्--गुणत्वे तदाश्रितत्वं ततो गुणत्वमिति । § 3063
556/mkj

यत्पुनरेतत्--**बुद्ध्यादिः गुणः निषिध्यमानद्रव्यकर्मभावत्वे सति सत्तासम्बन्धित्वाद् रूपादिवत्** इति; तदपि न सुन्दरम्; प्रध्वंसेन व्यभिचारात् । न व्यभिचारः; तस्य [सत्ता]सम्बन्धित्वाभावादिति चेत्; न; तस्य सत्तासम्बन्धोऽपि[भवतु]दोषाभावात् । कथमन्यथा प्रध्वंसः सन् इति प्रत्ययः ? औपचारिक इति चेत्; कुत एतत् ? तत्सम्बन्धाभावास्यापि कुतः ? तत्प्रत्ययस्य औपचारिक[त्वाच्चे]त्; अन्योऽन्यसंश्रयः । अथ प्रध्वंसे सत्प्रत्यय उपचरितो द्रव्यादिविषय+उपचरितो द्रव्यादिविषयत्वे सति तत्प्रत्ययत्वा[त्] सामान्यादिवदिति; *तद्विषयत्वं कुतः ? तत्प्रत्ययोपचारात्; पुनः अन्योऽन्यसंश्रयः । अथ न प्रध्वंसो द्रव्यादीनामन्यतेमोन्याश्रियत्वेताप्रतीतेचत एव /ms बुद्ध्यादिरपिन स्यादिति तदेव आवर्तते इति चक्रकप्रसङ्गः । § 3064

स्यान्मतम्--प्रध्वंसातासम्बन्धे अभावत्वं हीयते इति; तस्योत्पादे अर्थक्रियाकारित्वे वा कुतो न हीयते ? ततो यथा तदविशेषेऽपि तन्न हीयते तथा तत्सम्बन्धाविशेषेऽपि इति सर्वं सुस्थम् । § 3065

किञ्चित्तत्सम्बन्धाभेदेऽपि यदि द्रव्यादीनां भावाभावभेदः; [अभावोऽपि]भिन्न [ः] स्यात्, अवान्तरसामान्यस्य अभावेष्वपि निषेद्धुमशक्यत्वात् । अन्यथतत्रभावप्रत्ययाभिधानानुगमो दुर्लभो भवेत् । तन्न बुद्ध्यादीनां गुणत्वं प्रध्वंसवदिति न समवायिकारणसिद्धिः । § 3066

अथ बुद्ध्यादेः का[दा]चित्कत्वं समवायिकारणं गमयति; तदपि प्रध्वंसेन व्यभिचारि । भावत्वे सति *इत्यपि न सुन्दरतरम्; प्रध्वंसवत् भावस्यापि कस्यचित् तथोत्पन्यविरोधात्, चित्रत्वाद् भावस्वभावानाम् । अथ बुद्ध्यादेः समवायिकारणाभावे कुत उत्पत्तिः ? प्रध्वंसवत् निमित्तकारणात् किन्न स्यात् ? इतरथा प्रध्वंसस्यापि न स्यात् । निर्हेतु प्रध्वंसभावे न कार-

---

१ ध्वंसेतिपि] सेऽपि
१ एतेना] न
१ त्व] त्वं
२ भा] दुर्भा
३ त] द्रव्याश्रितत्वम् ।
५ इति] तुलना--गुणः शब्दो द्रव्यकर्मान्यत्वे सति सत्तासम्बन्धित्वात् रूपादिवत् ।--प्रश॰ व्यो॰ पृ॰ ६४९ ।
८ न्धाभावास्या] भावाच्चेत्; तद्
९ यः] सन्निति प्रत्ययस्यौपचारिकत्वे तत्सम्बन्धाभावः, तस्मिंश्च तत्प्रत्ययस्यौपचारिकत्वमिति ।
१० द्र] द्रव्यादिविषय उपचरितो इति पुनर्लिखितं व्यर्थम् ।
११ *] सत्प्रत्ययस्य द्रव्यादिविषयत्वम् ।
११ चारात्] चेत्; ।
१२ तीतेच] न्यतमः, अन्याश्रितत्वेनाप्रतीतेः । अ
१४ ध्वंसाता] ध्वंसे सत्ता
१४ इति] चेत्; ।
१७ किञ्चित्] किञ्च
१९ त्र] अन्यथा तत्र अ
२२ *] भावत्वे सति कादाचित्कत्वात् इति ।
२३ चित्] समवायिकारणाभावेऽपि ।
२३ न्य] त्त्य

णाभावप्रयुक्त [ः कार्याभाव] इति चेत्; सौविकृते अभावत्वादितचेत्; उक्तमत्र । अपि च, घटादीनां कारणं सत्तासम्बन्धो वा अस्ति इति कुतः ? स्वरूपेण सत्त्वे तदपि वेतिते चेत् स्वत्वमायातम् । उभयमपि नेति चेत्; पदार्थान्तरं तथाविधं किन्न स्यादृतःपदार्थसंख्यानियमो व्यवतिष्ठेत । अदर्शनादिति चेत्; अन्यत्र समानम् । तस्माद् **आत्मलाभ उत्पत्तिः** इति । § 3067

स्थितिमाह **स्थि[ति]**रित्यादिना । **पुनः** इत्यादिना सं *__स्वभावशब्देन__ /ms
भावा[द्]भिन्नं स्वात्संप्रतिषेधति **प्रच्यवनम्** इत्यनेन सतः तिरोभावम्, निरूपितं चैतत् । **एतत्** उत्पत्त्यादित्रयं **परस्परस्य** अन्योऽन्यस्य **एकार्थ आत्मा** स्वभावो यस्य तत्तथोक्तम् । **कथम्**इत्येतत् कारिकाव्याख्यानेन परिह- 557/mkj
रन्नाह--**अपरिणामिनोऽपि** इत्यादि । **अपरिणामिनोऽपि** इत्यादि । **अपरिणामिनोऽपि** न केवलं परिणामिनः, **तावत्** शब्दः भावनायाम् । कस्य ? इत्याह--**अर्थस्य** । किंभूतस्य ? **क्षणिकस्य कालन्तरस्थायिनो वा** नित्यस्य इत्यर्थः । तस्य किम् ? इत्याह--**यौयस्य** क्षणिकस्य नित्यस्य **आत्मा** स्वभावो **यथाभूतः** क्षणिको नित्यो वा **सो**ऽर्थसमात्मानं **सदेव लभते** कदाचिन्नेति नायं विभागः अन्यथा सर्वत्र सर्वदा क्षणिकम् आत्मादिकं वा नित्यं तस्या । तथा त्तयात्मकोऽप्यर्थः **तं सदेव लभते** इति भावः । § 3068

स्यादेतदेवम् यात्मकोऽर्थः स्यात् करणवसेत्कदाचित् प्राप्तेः इति चेत्; अत्राह--**नचेत्यात्म्यं** *त्र्यात्मकत्वं तस्य **व्यतिरेको**ऽभावः तेन **उत्पत्तिः** नहि । उत्पत्तिस्वभावरहितं खरविषाणादि कारणाभावादनुत्पत्तिमत् न घटादिर्विपर्ययादिति चेत्; उक्तमत्र । § 3069

किं च, सदधिकारणम् अनुत्पित्सुस्वभावं नोत्पादयति, अन्यथा अविनश्वर विनाशयेत् । न कस्यचिदुत्पत्तिरिति चेत्; उक्तमत्र चक्रादिवैफल्यम् इति । तथा तद्व्यतिरेकेण **न स्थितिः** । न खलु स्थितिस्वभावगर्हितं कुतचित् स्थाव न मर्हति । नहि कर्म दत्तफलमृईश्वरेणापि स्थापयितुं शक्यधि /ms
**कार्यविरोधि** वैशे॰ १ । १ । १४*इत्यस्य विरोधात् । अथ ईश्वरस्य

१ ते] सोऽपि कुतः ?
१ त्वादित] ति
३ त्व] तथेति स्वरूपसत्त्व
४ स्यादृतः] त् ? यतः
७ *] नाशं
८ स्वात्सं] नाशं
८ म्] प्रतिषेधति ।
१४ यौ] यो
१५ स] र्थः त
१७ स्या] न स्यात्
१७ या] तदा
१८ यात्म] यदात्म
१८ सेत्] कारणवशात्
१९ *] न च इत्यादि । [[त्र्यात्मनो भावः त्र्यात्म्यम्, अत्पादादित्रयात्मकत्वमित्यर्थः ।]]त्र्यात्म्यं
२० टादिर्विप] कारणसद्भावात् ।
२२ धि] सदपि
२२ था] स्वभावरहितम् ।
२३ र] रं
२४ था] त्र्यात्मकत्वव्यतिरेकेण ।
२४ र्हितं] रहितम् इत्यर्थः ।
२५ न] कुतश्चित् स्थापन
२५ हि] अदृष्टं धर्माधर्मादि ।
२५ धि] शक्यमिति
२६ *] कार्यविरोधि कर्म--कर्म स्वकार्येण फलेन विरुध्यते विनाश्यते इत्यर्थः ।

तत्स्थापनशक्तिः नास्ति; *अन्यत्र कथम् ? अन्यथा उभयरूपता ईशस्य । यथा वा[ऽ]शक्तो न स्थापकः तथा स्थितिशक्तिरहितो न कुतश्चित् तिष्ठति इति समानम् । एतेन स्थापने तद्वास्थापि निरस्ता । § 3070

ननु न स्थितिस्वभावताप्रयुक्ता स्थितिः, तस्यामपि विनोश्रुत्ययप्रणिधाने घटादेर्विनाशदर्शनादिति चेत्; न; तस्य विनश्वरस्वभावत्वात् । सर्वदा कुतो न नाश+ए *ति चेत् ? क एवमाह--ने तीति ? केवलं तिरोधाना[द]नुपलक्षणं सुवर्णे उष्णस्पर्शवत् । कारणभेदात् कदाचित्की श[क्ति]स्तु विनाशइति स्थितिस्वभाव एव तिष्ठति । § 3071

तथा तद्यतिरेकेण **विपती र्व्य** विनाशो **वा न युज्येत** । नहि तत्स्वभावरहितस्य सामान्यधर्मपक्षस्यचित् कुतश्चित् विनाशः । न विनाश इति चेत्; कपालादौ घटादिदर्शनप्रसङ्गः । तिरोधानान्नेति चेत्; तदस्थास्य *तदयोगाव । एतदेव दर्शयन्नाह--**द्रव्य** इत्यादि । स्वेद्रव्यादिन्योनेद्रव्यादुपः **तदन्तराणि**
558/mkj तेभ्यो **व्यावृत्तिः लक्षणं** यस्य तस्य भावात् **तत्त्वात्** वस्तुनः इत्यध्याहारः । एतदपि कुतः ? इत्याह--**स्वे**त्यादि । **स्वेन स्वभावेन स्थितेः** सर्वभावानाम्, अन्यथा सर्वात्मकम् अनाद्यनन्तं च सर्व स्यात् इति भावः । तदुक्तम्-- § 3072

*सदेव सर्वं को नेच्छेत् स्वरूपादिचतुष्टयात् ।
असदेव विपर्यासात् न चेन्न व्यवतिष्ठते ॥ § 3074

आप्तमी॰ श्लो॰ १५ इति । § 3075

/ms ननु सस्वभावस्थितिःक्षणिकेष्वेव भावेषु । तथा चोक्तम्--**सर्वे भावाः स्वभावेन** प्र॰ वा॰ ३ । ३९ इत्यादि; इति चेत्; अत्राह--**परिणामिन** इत्यादि । षु इत्यवधारणे **परिणामिन** एव **अर्थस्य** त स्थिते **सदेवंलभते** इति । कुत एतद् इति चेत् ? अत्राह--**सतो** विद्यमानस्य **पूर्वस्वभावप्रच्युतिरेव**

१ *] तन्वाद्युत्पादने ।
१ था] शक्तरूपता ।
३ द्वा] तद्यव
४ य] विनाशप्रत्यय
४ धाने] सन्निधाने ।
५ स्य] घटादेः ।
६ *] नाशमे
६ तीति] न एति इति
७ णं] तेजोद्रव्यात्मके सुवर्णे उष्णस्पर्शानुद्भवो यथा ।
७ विनाश] शेऽपि
९ र्व्य] विपत्तिर्वा
१० स्य] धर्मवत् कस्य
११ पालादौ] घटविनाशानन्तरसमुद्भूतखर्परादौ ।
११ स्थास्य] तदवस्थस्य
११ *] तिरोधानायोगात् ।
११ योगाव] त्
१२ व्यादुपः] स्वद्रव्यादिभ्योऽन्ये द्रव्यादयः
१५ था] इतरेतराभावाभावे सर्वात्मकम्, प्रागभावाभावे--उत्पत्त्यभावे अनादि, प्रध्वंसाभावाभावे अनन्तं स्यादिति भावः ।
१५ र्व] र्वं
२० न] बौद्धः ।
२० स] स्व
२२ षु] च
२२ स्थिते] तत्स्थितेः
२२ दैवं] व

सौगतेन इष्यमाणा **पुनः** पश्चात् **स्वभावान्तरप्राप्तिः** । यदि वा, तत्प्राप्तिरेव तत्प्रच्युतिः न पुनरन्यः प्रध्वंसः । तत्र यदा उत्तरकार्यमनन्तरं भवति तदा भवतु एतत्, यदा काले न भवति वा तदा कथमिति चेत् ? अत्राह--**परिणामि** इत्यादि । **परिणामिकारणस्य** उपादानकारणस्य **स्वका[र्या]त्मनो** यो **विवर्त्तः** तं **प्रत्य[न्या]नपेक्षणा[त्]** तत्प्रच्युतिरेकतत्प्राप्तिः । § 3076

स्यान्मतम्--न तत्प्राप्तिरेव तत्प्रच्युतिः किन्तु भिन्नो[ऽ]भाव इति चेत्; अत्राह--**पूर्वस्य वैकल्यम्** अभावः **उत्तरस्य कैवल्यम्** पूर्वाकाररहितता परस्य न तस्थःप्रध्वंसः । तददा * काले न भवति वा तदा कथमिति चेत् ? अत्राह--**परिणामी**त्यादि । **परिणामिकारणस्य** उपादानकारणस्य **स्वकात्मनो** यो **विवर्तः** तं **प्रत्य[न्या]नपेक्षणात्** तत्प्रतीति * । तर्हि पूर्वापराकारविनाशोत्पादमात्रं स्थितिः इति प्रसक्तमिति चेत्; अत्राह— **न च** इत्यादि । § 3077

निगमयन्नाह--**तदुत्पाद** इत्यादि । तद् युक्तं तदात्मकगतानानवस्था परोदिता । अथ मतं यत्र निरन्तरं सपत्रयं लभ्यते[त]त्र स्थितिप्रतिपत्तिरस्तु, यत्र मध्यरूपमेव तत्र कथमिति चेत् ? अत्राह--**सत** इत्यादि । **सतो** /ms
**द्रव्यस्य दृश्यं** यत् **मध्यरूपं तत्** पूर्वापरकोट्योरनुपलभ्यम् **सदेव कथञ्चित्** न सर्वात्मना । कुतः ? इत्याह--**अन्यथा** तदसत्त्वप्रकारेण । शेषं स्वगमं । कुतः ? इत्यत्राह--**सर्वथा** इत्यादि । § 3078

यदि मतम्--पूर्वं तत् सदश्रुतिः कारणोत्पत्तिविरोधात्, पश्चात् कुतः ? [इत्याह] **स्वम्** इत्यादि । **स्वसन्तानपतिवम्उत्तरपरिणामं** नुपाप्रेक्षण *__प्राप्नुवतः सत[ः]परोपका[रासंभवा]द्__ विजातीयकार्यकारणासंभवात् । तथा [ऽ]दर्शनात्; *रसाद् रूपानुमानाभावप्रसङ्गात् । मा भूत् तत्राप्युपकारः; इत्यत्राह--**सकल** इत्यादि । कुद इदमवगम्यते तत्परिणाममप्राप्नुवतः तदुपकारासंभवः ? इत्याह--**परस्पर** इत्यादि । **परस्परम्** अन्योन्यं **प्रव-** 559/mkj
**र्त्तनं** समर्थरूपेण उत्पादनं प्रवृत्तिः असमर्थरूपेण **निवर्त्तनं** निवृत्तिः ताभ्याम् **अन्वयः** अनुग्रामो**व्यतिरेको** व्यावृत्तिः तावेव **लक्षणं** यस्य तस्य भावात् **तत्त्वात्** । कस्य ? इत्याह--**अन्योऽन्य** इत्यादि । केषाम् ? इत्याह--**द्रव्याणाम्** इति । तथा अन्यदा दर्शनादिति भावः । § 3079

---

१ त] स्वाभावान्तरप्राप्तिरेव ।
२ त] पूर्वस्वभावप्रच्युतिः ।
५ च्युतिरेक] रेव
८ स्थः] तत्स्थः[[तस्मिन् तिष्ठतीति तत्स्थः, पूर्वावस्थाभावी ।]]
८ *] तद् यदा
९ का] र्या
१० *] तत्प्रच्युतिरिति
१३ ता] कम्, अतो
१४ प] रूप
१५ मेव] उपलभ्यते ।
१७ मं] सुगमम्
१९ श्रुतिः] सदस्तु, असतः
१९ का] कारणादुत्पत्तिविरोधात् खरविषाणवत् ।
१९ कुतः] सत् ।
२० म्] स्वसन्तान
२० म्] पतितम्
२१ *] उपादेयक्षणम
२१ णा] करणा
२२ *] अन्यथा ।
२३ कुद] कुत
२६ अनुग्रामो] अनुगमः

एवं सति यत् सिद्धं तद् दर्शयन्नाह--**तद्** इत्यादि । यत एवमनन्तरं संवृत्तं [तत् त]स्मात् **अन्ते** विसदृशकार्योत्पादकाले कार्यानुत्पादसमये वा **क्षयदर्शनात्** द्रव्याणां पव्येपि क्षयंतिष्ठि कृत् सौगतो **मध्ये स्थितिदर्शनात् पूर्वापरकोट्योः अधि स्वभावस्थितिं निश्चेतुमर्हति** । अथ अत्र प्रमाणबाधनम् तत्पूर्वत्र ; इत्याह— **अविशेषादिति** । मध्ये व्यवस्थितिदर्शनमुक्तमिति नेहोच्यते । § 3080

/ms ननु दृश्यादृश्यस्वभावयोर्भेदात्  कथमेकं दृश्येतररूममिति चेत् ? अत्राह— **दृश्य** इत्यादि । **आदि**शब्देन चलितेतरादिरूपपरिग्रहः । अत्र निदर्शनमाह--**प्रत्यक्ष** इत्यादि । निरूपितमेतत्--**वित्तेर्विषयनिर्भासविवेकानुपलम्भतः** सिद्धिवि° १ । २० इत्यादिना । § 3081

वैशेषिकादिकं प्रति निदर्शनमाह--**उद्भूत** इत्यादि । **[उद्भूतानुद्भूतौ]रूपस्पर्शौ आदी** येषां गन्धादीनां ते तथोक्तात, **द्भू*** **तानुद्भूतारूपस्पर्शादयो** यस्य युगलोत्रान्यपदार्थः,* तस्येव तद्वदिति । तथाहि--पृथिव्यां रूपादयः सर्वेऽपि सामान्येन उद्भूता दृश्याः, विशेषापेक्षया तु उभयथा विभत्तिअप्सु गन्धोऽनुद्भूतो नेतरे, तेजसि गन्धरसौ, वायौ स्पर्श एव उद्भूतः । § 3082

अथ जलादौ गन्धादयः सत्ताति कुतः प्रतीतिरिति चेत् ? स्पर्शवत्त्वात् पृथि[वी]वत् । अन्यत्र नजातीये उद्भूतिः स्यादिति चेत्; न; पृथिव्यां तद्भावाद् अदोषात् । कथं तस्याः तज्ज्ञातीयत्वम् ? कथं हेमजातीयत्वम् ? हेमजातीयत्वम् अग्नेः तेजोद्रव्यत्वात्; पुद्गलत्वात् इति समानम् । कथं तत्र ? होत्रि  कथं तेजस्त्वम् ? नहि अपरं तत्र त्सामाहाति विवादाभावप्राप्तेः । उपदेशसहायादिन्द्रियात् तत्प्रतिपत्तिः पुद्गलत्वेऽपि समान । भासुररूपदर्शनात्र तत्रानुमीयते; अनुमीयतां यदि अस्य अव्यभिचारः स्यात् । न चैवम्, पीतत्वागन्धनिर्नलमसृणपाषाणमर्दिते वस्त्रे तद्दर्शनात् । तथा स्पर्शदर्शनात् पुद्गलत्वमनुमीयता[म]विशेषात् । इतश्च पुद्गलद्रव्यविशेषा भूम्यादयः /ms परिणामपरिग्रहदर्शनात्, जलादेः मुक्ताफलादिभावादिव  मर्थं च **पुद्गलवत्** इत्युक्तम् । § 3083

---

३ कृत्] **पूर्वमपि क्षयमिच्छन्**
४ अधि] अपि
४ अ] स्थितिपक्षे ।
५ त्र] न पूर्वत्र
१२ *] क्ताः, **उद्भू**
१२ तानुद्भूता] त
१३ लोत्रा] **पुद्गलस्य,** अत्रा
१३ *] बहुव्रीहिसमास इत्यर्थः ।
१४ त्ति] भवन्ति
१५ रे] रूपरसस्पर्शाः ।
१५ सौ] अनुद्भूतौ ।
१६ त्ता] सन्तः इ
१७ ज्ञा] तज्जा
१९ त्वात्] इति चेत्; ।
२० होत्रि] हेम्नि
२० त्सामाहाति] तत्साधकमस्ति
२१ मान] ना
२२ नात्र] नात् तत्[[तेजस्त्वम् ।]]
२२ त] सुवर्णे ।
२२ अस्य] भासुररूपादेः ।
२३ ल] पीतत्वस्य निर्मल
२५ लादिभावादिव] भावात् । एव

गुणिनागुणानां[च]भेदात् न तद्दृश्येतरत्वा स्याद्दृश्यते इति चेत्; न; अस्य पक्षस्य निषेधात् । भेदेऽपि प्रतिभासमानगुणसम्बन्धिनैवदृश्या नेतिरेति स एव प्रसङ्गः । *तस्या अपि दृश्यत्वे सकलगुणग्रहः, *तदभावे तत्सम्बन्धिताऽग्रहणात्, अन्यथा दृश्य मानगुणग्रहणेऽपि तत्सम्बन्धिताप्रतीतिः [न 560/mkj स्यात्] । स्यापिकिन्नेवि चेत्; कथं तस्य ? सम्बन्धाच्चेत्; अन्या तत्सम्बन्धिता पुनरपि अन्या पुनरपि अन्या इत्यनवस्था । ततो **दृश्येतरात्मकम् एकं युक्तम्** । § 3084

तत्रैव युक्तं तत्रैव युक्त्यन्तरमाह--**प्रत्यक्ष** इत्यादि । **प्रत्यक्षः स्वभावो** यस्य शब्दादेः तस्यैव, नान्यस्य धर्मिणोऽसिद्धेः **अनुमेयतोपपत्तेश्च दृश्यादृश्यादि** इत्यादिना सम्बन्धः । § 3085

ननु तत्स्वभावस्य किमनुमेयवयेनिवेदत्राह--**कथञ्चित्** शब्दादिरूपेण न क्षणक्षयादिरूपेण तत्स्वभावस्य तदनुमानवैफल्यापत्तेः । अनिश्चितनिश्चया[ऽभावा]न्नेति चेत्; स एव दोषः--उभयरूपता इति । समारोपव्यवच्छेदोऽपि विहितोत्तर[ः] । § 3086

ननु दृश्यस्वभावकाले अन्यस्यादर्शने कथं तयोरेकत्वम् श्रुतो त्पन्नपदार्थान्तरवदिति चेत् ? अत्राह--**नहि** इत्यादि । कुतः ? इत्यत्राह--**संवित्ति** इत्यादि । न केवलं बहिन्न शब्दाधिरपि तु [संवित्तेरपि]ज्ञानमात्रस्यापि **अभावप्रसङ्गात्** । *क्षणिकत्वोत्तरकार्यजनकत्वाप्रतिभाससर्वाप्रतिभासनात्, सर्वस्य विभ्रममात्रे समवेसान किञ्चित् क्वचित् शक्तम् । एवदृश्य[त्वादृश्यत्व]विरुद्धधर्माध्यासेनअसत्त्वाद् अन्यस्याप्रतिभासेनासत्त्वात् नैकस्य दृश्येत- /ms ररूपतेति चेत्; अत्राह--**तन्मिथ्यैकान्त** इत्यादि । **तत्** संवित्तिमात्रमपि **मिथ्येति** पेर्यम्**एकान्ताभिनिवेशः** तत्त्वतःस्वग तादयो गृह्यन्ते । शेषं सुगमम् । **किंच** इत्यादिना दोषान्तरमाह--**तत्रोत्तरं नुसुगतस्य निषेत्स्यमानत्वात्** । § 3087

**वैशेषिकादिनिराकुर्वन्नाह--ससंप्रयोग[ज]त्वेन** इत्यादि । § 3088

---

१ गुणिना] नां
१ स्या] त्वात्मकत्वं
२ स्य] गुणगुणिनोर्भेदैकान्तस्य ।
२ न्धिनैव] तैव
२ नेतिरेति] नेतरेति
३ *] इतरगुणसम्बन्धितायाः ।
३ *] गुणग्रहणाभावे ।
५ स्यापिकिन्नेवि] सा[[गुणसम्बन्धितापि ।]]पि अन्येवेति
८ त] तत्रैव युक्तं इति व्यर्थं पुनर्लिखितम् ।
११ येनिवेद] यत्वेनेति चेत्; अ
१२ स्य] अन्यथा क्षणक्षयानुमानवैयर्थ्यं स्यादिति भावः ।
१५ श्रुतो] [[विनष्ट ।]]च्युतो
१६ संवित्ति] त्तेः
१७ ब्दाधि] बहिःशब्दादे
१८ *] क्षणिकत्वं च उत्तरकार्यजनकत्वं च तयोरप्रतिभासे ।
१८ तिभास] से
१९ वेसान] समावेशात् न
१९ एव] एवं
२२ म्] योऽयम्
२२ तः] तद्वन्तः
२२ ग] सुग
२३ नु] उत्तरत्र
२५ वैशेषिकादि] दिं
२५ सं] सत्सं

...21 सत्सम्प्रयोगजत्वेन विरुद्धा सकलज्ञता ।
प्रागसकलज्ञस्य कुतः पश्चान्नित्यस्य साऽन्यतः ॥
२१ ॥§ 3090

आत्मेन्द्रियमनोऽर्थसन्निकर्षात् कथं निरवशेषज्ञानम् ? सत्यपि तपःप्रभावे इन्द्रियाणां सम्प्रयोगानतिक्रमात् नियतविषयत्वात् । अणोर्मनसोऽदृष्टवशात् बहिरर्थसन्निकर्षवैशद्यकल्पनायाम् युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गं न भवेत् । § 3091

ननु नित्यमपि तस्य ज्ञानमस्ति, तेन किं सा[ऽ]विरुद्धा येन तदत्र दूषयितुं नाशङ्क्यते ? नो चेत्; तर्त्तर्हि तदाशङ्कनीयम् । अथ ईश्वरनिराकरणे तन्निरस्तमिति नाशङ्क्यते; तर्हि क्षणिकनिरंशवस्तुनिषेधेन अन्यस्यापि निषेधा[त्त]दपि नाशङ्कनीयम् । प्रपञ्चार्थमिति चेत्; नित्यमपि तथैव इति चेत्; न; तदभावात् । सतो हि भावस्य धर्मचिन्ता नासतः । तदभावः 561/mkj कथमिति चेत् ? प्रमाणाभावात् । न तत्र प्रत्यक्षम्; अतीन्द्रिये तदवृत्तेः । नानुमानम्; लिङ्गाभावात् । न ज्ञानत्वं लिङ्गम्; अस्मदादिज्ञानेन व्यभिचारात् । § 3092

एतेन विभुद्रव्यविशेषगुणत्वे सति विभुत्ववत् इति निरस्तम् । सर्वविषयत्वे सति इति चेत्; न; इतरयोगिज्ञानेन । सर्वदा तद्विषयत्वे सति इ[ति] चेत्; यदि तस्यैव तदेव साध्यं तदेव हेतुविशेषणम् इत्यसारं परस्यानित्यत्वम् । न चात्र निदर्शनम् । § 3093

स्यान्मतम्--ईश्वरज्ञानं नित्यं[सत्त्वे]सति धर्मादिकारणाजन्यत्वात् [त]द् विभुत्ववत् इति । न चेश्वरस्य धर्मादिरस्ति; तत्कारणाभावात् । न च /ms परधर्मादिः तद्विज्ञानम्; आत्मगुणानाम् आत्मान्तरगुणाकारणत्वादिति । किं पुनः ईश्वरज्ञानं न किंचित् करोति ? तथा चेत्; कुतोऽशेषकार्यजन्म ? महेश्वराच्चेत्; न । बुद्धिनिरपेक्षस्य पुंसः कार्यव्यापारे अचेतनकर्मणोऽविशेषः । सत्यपि बुद्धिः अनुपयोगिनी । अथ पदार्थग्रहणे[न]तज्जन्मनि; सर्वस्यापि बुद्धेः तत्रैव व्यापारो न कार्यजन्मनि, इति इदं बुद्धिपूर्वम्, इदमथाकार्यम् इति व्यवहारविलोपः । अथ *तत्सहितेन पुंसा कृतम् इति उपचारेण बुद्धिकृतम् इत्युच्यते; *तयापि तत्करणे को विरोधः ? § 3094

५ नायाम्] युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ।--न्यायसू॰ १ । १ । १६ ।
७ स्य] ईश्वरस्य, वैशेषिकस्य वा ।
७ किं] सकलज्ञता ।
८ चेत्] विरुद्धा चेत् ।
९ स्तुनिषेधेन] सुगतज्ञानस्यापि ।
११ भावात्] नित्यज्ञानाऽभावात् ।
१२ म्] प्रमाणम् ।
१२ अतीन्द्रिये] नित्यज्ञाने ।
१६ योगिज्ञानेन] व्यभिचारात् ।
१७ स्या] स्य
२१ च] आत्मान्तर ।
२३ णोऽविशेषः] विशेषाभावः ।
२४ नि] कार्योत्पादे व्यापारः ।
२५ त्रैव] पदार्थग्रहणे एव ।
२५ था] मन्यथा
२६ *] बुद्धि(?सहितेन) ।
२७ *] बुद्ध्यैव ।

किं च, यदि नान्यात्मगुणः अन्यात्मगुणनिमित्तं कथं मन्त्रिणध्यानाद् अन्ययोषितः तं प्रति प्रत्योअन्यमन्त्रोऽपिआत्मन एव तद्यतुत्वमिति चेत्; न; धर्मादेः सर्वत्रानुपयोगापत्तेः, आत्मन एव उपयोगात् । अथ मन्त्रिणो ध्यानं चित्तविकारकारणम्; ईश्वरज्ञानमपि तथैव स्यात् । भवतु को दोष इति चेत्; तद्वद् अन्यधर्मादिः तत्कारणम् इति कारणाभावोऽसिद्धः । तन्नानुमानमत्र । § 3095

ननु यथा भवदीये मते सर्वज्ञः तेन तदन्तरेण वा ज्ञायते, तथा मदीये तदेव ज्ञानम् आत्मनित्यत्यत्वमवैति तदन्तरे स्वोत् चेत्; न; एकत्वसंवेदनतापत्तेः, ईश्वरकल्पनमनर्थकम्, तावतैव तत्प्रयोजनसिद्धेः । *यथा ज्ञानत्वाऽविशेषेऽपि तदेव नित्यं तथा गुणत्वाविशेषेऽपि तदेव अनाश्रयम् इति । *अन्यत्र अनित्यामित्यत्वा *दर्शनद्वयम् । एकत्र उक्तो दोषेअन्यत्र[सत्]सम्प्रयोगजत्वेन इत्यादिकः । तन्न नित्यं ज्ञानम् इत्यवशिष्यते । /ms
§ 3096

तत्र **सता** अर्थेन **सम्प्रयोगः** सन्निकर्षः इन्द्रि **तज्जत्वे न** ज्ञानस्य **विरुद्धा सकलज्ञाता** कु मा रि लो क्ताऽशेषदोषापरिहारात् इति भावः । दूषणान्तरमाह--**नित्यस्य** आत्मनः **सर्वज्ञता कुतः** कारणात् ? न कुतश्चित्, नित्यत्वविरोधात् । स्वभाविकी सा  इति चेत्; अत्राह--**कुतः** प्रमाणात् 562/mkj
अवगम्यते इत्यध्याहारः । आत्मस्वभावस्य उत्कर्षवतः तथा दर्शनात् । § 3097

ननु कारणेन भिन्नज्ञान[म]शेषविषयं जन्यते, तत्सम्बन्धात् तस्य सा इति चेत्; अत्राह--**असकलज्ञस्य** तस्य **प्राक्**, **पश्चाज्ज्ञाने** उत्पन्ने ***सा** कुतः ? नहि स्वयम् अर्थग्रहणाभिमुख्यरहितस्य **अन्यतः** तद् युक्तम् । § 3098

कारिकां विवरीतुमाह--**स्वस्व**इत्यादि । **आत्मा** च **इन्द्रियं** च **मनश्**च **अर्थश्**च तेषां **सन्निकर्षात्** संयोगादिरूपात् **कथं निरवशेषज्ञानम्** इतरयावत् । तपःप्रभावात्, निरवशेषविषयं ततोऽपि ज्ञानमिति चेत्; अत्राह--**तपःप्रभाव** इत्यादि । **तपसः प्रभावः** सामर्थ्याविशेषः **तस्मिन् सत्यपि**

१ न्त्रिण ] णो
२ त्यो ] प्रत्याकर्षणम् ?
२ न्त्रोऽपि ] मन्त्रेऽपि
२ द्य ] तद्धे
५ र्मादिः ] ईश्वरज्ञानोत्पत्तिकारणम् ।
६ त्र ] प्रमाणम् ।
७ तेन ] स्वेन ।
७ रेण ] सर्वरिण ।
८ स्वोत् ] [[ईश्वरज्ञानान्तराभावात् ।]]तदन्तराभावादिति
९ तैव ] ज्ञानमात्रेणैव ।
९ *] ननु निराश्रयं ज्ञानं कथं स्याशङ्कायामाह ।
१० देव ] ईश्वरज्ञानमेव ।
११ *] ज्ञानसामान्ये ।
११ त्वा ] अनित्यत्वनित्यत्व
११ *] द्वै विकल्पौ इत्यर्थः ।
११ दोषे ] षः
१७ सा ] स ।
२० भिन्न ] न्नं
२० न्धात् ] नित्यस्यात्मनः ।
२० स्य ] सर्वज्ञता ।
२१ *] सर्वज्ञता ।
२३ स्व ] आत्म
२५ र ] इति
२६ र्थ्या ] र्थ्य

न केवल[म]सति[**इन्द्रियाणां]सम्प्रयोगानतिक्रमाद्** विज्ञानस्य । नहि तत्र सति ज्ञानं प्रयोगनिरपेक्षम्; परमतसिद्धेः । यदि च **इन्द्रियाणाम् तत्प्रयोगानतिक्रमात्** इति व्याख्येयम् । न खलु तस्मिन् सति इन्द्रियाणि सत्सम्बन्धमर्थं[न]गृह्णन्ति; तैरेव सन्निकर्षसाधकहेतूनां व्यभिचारप्रसङ्गात् /ms । अथ अस्मदादिचक्षुः सम्बन्धमर्थमवेति तत्प्रभावरहितत्वेसति इन्द्रियत्वात् स्पर्शनवत्[इति चेत्;] न; तद्रहितत्वसिद्धे[ः], *जन्मान्तरे तदनिषेधात् । यस्य यावती मात्राविशेषणमत्त्वात् हेतोरगमकत्वात् अतिप्रसङ्गात् । अथ तत्प्रभावाद् इन्द्रियाणि तथाविधानि ज्ञायन्ते यातिसर्वविषयैः अतिसंपद्यते; तत्राह--**नियत** इत्यादि । नहि स्पर्शनादिकं तत्प्रभावतः शरीरं विहासप्रतिविषयं भ्रमति, तेन सह भ्रमणे तस्य सर्वगतत्वम् । चक्षूरश्मीनां सर्वत्र गमनेऽपि रूपस्यैव सर्वस्य ग्रहणं स्यात् न रसादेः । तेनैव *तस्यापि[ग्रहणे] इतरेन्द्रियवैफल्यम् । तदाह--**नियत** इत्यादि । मानसं योगिनो[ऽशे]षगोचरमध्य न चक्षुरादिजमिति चेत्; अत्राह--**मनस** इत्यादि । **मनसः अणो[ः]**सका[शा]द् **बहिरर्थसन्नि[कर्षे]वैशद्यकल्पनायां** कुतः ? इत्याह--**[अ]दृष्टवशाद्** धर्मादिसहा[या]त्; केवलस्य तत्संवित्तिवैशद्यकारणसामर्थ्याद् अतीतादीतन्मानससंवित्तिवदेवचनम् । § 3099

ननु स्वप्नादिप्रत्ययानां मनस एव वैशद्यमिति चेत्; अन्येषामपि स्यात् तदविशेषात् । अपि च, तत एव योगिनोऽशेषार्थज्ञानवैशद्ये सर्वस्य सात्तस्य सम्ब[न्ध]सम्बन्धस्यभेदात् । न चैवम्, अतोऽदृष्टमेष्टव्यम् । तस्याम्[किम् ?]इत्यत्राह--**युगपज्ज्ञान** इत्यादि । सर्वेन्द्रियविषयसन्निधानेऽपि या **युगपज्ज्ञानानामनुत्पत्तिः** सा **मनसो लिङ्गम् न भवेत्** । तद्वैशद्यवत् *तदनुत्पत्तेरपि अदृष्टत ए[व भा]वादिति भावः । § 3100

एतदेव **दर्शयन्नाह--[तद् इत्यादि]** § 3101
563/mkj

२ ज्ञानं] सन्निकर्पनिरपेक्षम् ।
२ च] वा,
४ न्ध] द्ध
५ न्ध] द्ध
५ वे] वै
६ त्व] त्वाऽ
६ *] जन्मान्तरीयतपसः संभावना वर्तते इति भावः ।
८ अथ] तपःप्रभावात् ।
८ याति] जायन्ते येन
८ अति] गतिः
९ विहास] विहाय
११ तेनैव] चक्षुषैव ।
११ *] रसादेरपि ।
१३ ध्य] चरमध्यक्ष
१५ ण] णाऽ
१६ अतीतादी] दौ
१६ दे] वदिति
१८ सात्त] स्यात्, त
१९ स्य] आत्मना मनः संयुक्तम्, तेन च सर्वेऽर्थाः इति परम्परासम्बन्धस्य ।
१९ स्य] चाऽ
१९ भेदात्] भेदाभावात् ।
२१ त्] अशेषार्थवैशद्यवत् ।
२१ *] युगपज्ज्ञानानुत्पत्तेरपि ।

...22 तद्वैचित्र्याच्च केषाञ्चित् स्याद्युगपत्संविदन्यथा ।
स्मृतीनां युगपदुत्पत्तिः सत्यपीत्थं प्रसज्यते ॥ २२
॥§ 3103

...23 तदात्मसन्निकर्षस्य चाणोस्तेनानपेक्षिणा ।
प्रदेशतद्वद्व्यतिरेकात् स्यादवस्तुत्वमित्यतः ॥ २३
॥§ 3105

...24 तद्व्यतिरेकवतः कोऽर्थः षट्पदार्थप्रवादिनः ।
तेषामन्येन मनसा वा संयोगः कुतो यतः ॥ २४
॥§ 3107

...25 द्रव्यातिरेकाद्विभागश्च स्मृतिः स्यात्कदाचित् ।
न चात्मत्वं समवेतं प्रदेशेषु तदात्मनः ॥ २५ ॥§ 3109

...26 भेदप्रसङ्गात्प्रत्यात्मं सन्निकर्षान्नाप्यनात्मनः ।
प्रदेशतद्वतोर्भेदे नार्हन्त्यात्मनि सुखादयः ॥ २६
॥§ 3111

आत्ममनोऽक्षार्थसन्निकर्षाद्बहिरर्थज्ञानोत्पत्तौ युगपज्ज्ञानोत्पत्तिः किन्न भवेत् ? मनसामेकत्वे एकैव बुद्धिः स्यात् । प्रत्येकमेकैकात्मसम्बन्धस्य नियमायोगात् । यदि तदर्थ...तस्य तादृशस्य क्रमशः क्वचित् ज्ञानसम्बन्धात् सर्वज्ञत्वम्; किं पुनरसर्वज्ञस्वभावमजहतः इदम् ? प्राक् तज्ज्ञानस्वभावसम्बन्धविकलस्य तत्समवायिकारणत्वमसंभाव्यम् असमवायिकारणत्वं च ।
§ 3112

**तद्** इत्यनेन तद्वैशद्यकारणम् अदृष्टं परामृश्यते, तस्य **वैचित्र्यात्** कारणात् बहिरन्तश्च **केषाञ्चिद्** ईश्वरप्रभृतीनां **युगपत् संवित् स्यात्**, तपःप्रभाव- /ms
विकलानाम् **अन्यथा** क्रमेण **इत्थं** व्यवतिष्ठते । § 3113

ननु अनुमानगम्यस्य एवमभावायोगात्, इतरथा सर्वत्र कार्ये दृष्टस्यापि कारणस्य वैफल्यं भवेत्, अत एव तन्निष्पत्तेरिति चेत्; न; तल्लिङ्गस्य क्वचित् तेन प्रतिबन्धादृष्टेः, अदृष्टस्ये वाषवस्य माभ्युपगमनीयत्वात् । अत एव लिङ्गं न भवेत्; इत्याह--... ...। दूषणान्तरमाह--**सत्यपि** इत्यादि ।

२१ अ] अदृष्टादेव ।
२२ मा] स्यैवावश्यम्

न केवलमसति किन्त्व **सत्यपि** मनसि **स्मृतीनां युगपदुत्पत्तिः प्रसज्येत ।**
§ 3114

कुत एतत् ? इत्यत्राह--**तदात्म** इत्यादि । **तच्च** मन **आत्मा** पुरुषः तयोः **सन्निकर्षस्य** अपेक्षेकाचितोत्पत्तेः । केन ? इत्याह **[ते]न** इत्यादि । यदि वा, **तदात्मसन्निकर्षस्य च** युगपदुत्पत्तिः स्यादिति च व्याख्येयम् । कुतः ? इत्याह--**[ते] नानपेक्षित्वेन** इत्यादि । कस्य ? इत्याह--**अणोः** इत्यादि । स्मृतीनामयौगपद्ये अङ्गीक्रियमाणे किम् ? इहाह--*प्रदेश[इत्यादि ।]
§ 3115

ननु चक्षुरादिबुद्धीनामपि तत एव परेण यौगपद्यं नेष्यते, ततः सामान्येन संवित्तीनाम् इति वक्तव्यम् । न च स्मृतिशब्दः सामान्यवाची तद्विशेषवाचित्वात्, तन्न युक्तम् **स्मृतीनाम्** इत्येतदिति चेत्; चक्षुरादिधियां
564/mkj कदाचिद् यौगपद्यमपि स्यात्, तथा प्रतिभास नानुमाम * सविकल्पानां विपर्ययात् । अस्त वा, तिष्ठतोद्भावचनमिति **प्रदेशतद्वतोः** संस्कृतप्रदेशात्मनो[ः]**व्यतिरेकात्** परस्परं भेदोव्यतिरेके अन्यतरदित्येयदेव *स्यादित्येवं वचनम्, तत्प्रदेशानाम् **अवस्तुत्वस्यात्** । कुतः ? इत्याह— **षड्दार्थ** इत्यादि । ततोऽन्यस्य पदार्थस्य अनभ्युपगमात् परेण इति भावः । § 3116

तद्व्यतिरिक्ता अपि ते सत्यइत्येके; तन्न **कोऽर्थ** इत्यादि । द्रव्यगुणकर्माणि अर्थाः **द्रव्यगुणकर्मसु अर्थः** वैशे° सू° ८ । २ । ३ इति वचनात् । **तेभ्यो व्यतिरेकवतः** पदार्थस्य सत्तायाः समवाय समवायासंभवात् **त्रिपदार्थसत्करी सत्ता** इत्यभिधानात् । सामान्याविपत्ते सन्त इति चेत्; अत्राह— **[द्र]व्येत्यादि** । **तेषाम्** आत्मप्रदेशानां **मनस्यन्येन वा** शरीरादिना वा **संयोगः** अन्यत[र]कर्मकः संयोगजाया **कुतः ? नैव** । विभागश्च कुतः ? तस्य संयोगपूर्वतत्त्व तदभावेऽभावात् । § 3117

कुतो न स्यात् ? इत्याह--**द्रव्यातिरेकात्** द्रव्याद् भेदात् **तेषाम्** इति, द्रव्यस्य च तदन्तरेण[कुतः] संयोगादिःगुणः ? **यतः** संयोगात् । कुतश्चिद्

१ किन्त्व ] किन्तु
१ ज्येत ] ज्यते
४ अपेक्षेका ] **अपेक्षिणा**
४ चितो ] त्तो
६ पेक्षित्वेन ] क्षिणा
७ * ] इत्याह--
११ त ] संवित्तिविशेष ।
१२ * ] नात् न तु
१३ अस्त ] अस्तु
१३ मिति ] ?
१४ भेदो ] भेदात् अ
१४ व्य ] अभेदे ।
१४ * ] त्येक एव
१५ स्तुत्व ] त्वं
१६ रेण ] वैशेषिकेण ।
१७ त ] षड्दार्थभिन्ना अपि ।
१७ त्य ] सन्ति
१७ न्न ] तत्राह--
१९ तः ] भिन्नस्य ।
१९ स ] समवाय इति व्यर्थम् ।
२० इ ] तुलना--सदिति यतो द्रव्यगुणकर्मसु सा सत्ता ।--वैशे° सू° १ । २ । ३८ ।
२० न्त ] न्यादिरूपापत्तेः सन्तः
२१ देशानां ] **सा** अ
२२ कः ] जः
२२ जाया ] जो वा
२३ त्त्व ] र्वकत्वात्
२३ त ] संयोगाभावे ।

अदृष्टादेः सहकारिणः द्रव्यानतिरेकः *तेषामिति चेत्; अत्राह--**तवे***त्यादिना । तात्पर्यमिदमत्र--आत्मनो व्यतिरिच्यमानाः तत्प्रदेशाः यदि द्रव्यम्, यथा घटाद् व्यतिरिच्यमाना कपालादयः; तदात्मद्रव्यम्, तदन्तरं वा स्युः ? तत्र आद्ये पक्षे आत्मत्वसमवायाद् आत्मद्रव्यं ते प्रथमात्मवत्; तच्चायुंयुक्तिविरोधात् । तदाह--**न च नैव आत्म[त्व]**मवान्तरं सामान्यं प्रदेशेषु **समवेतम्** । § 3118

कुतः ? इत्याह--**प्रत्यात्मम्** आत्मानम् आत्मानं प्रति **प्रत्यात्मम् आत्मनं भेदप्रसङ्गाद्** बहुत्वप्राप्तिः । एवं मन्यते--एकत्रात्मनि तद्बहुत्वे अवयवारच्चत्वादिप्रसङ्गः । किञ्च, तेषाम् असर्वगतत्वे आत्मसर्वगतत्वैकान्तप्रतिज्ञाहानिः /ms
। तेषां च मनसा संयोगे अदृष्टसमवायोऽपि तेषामेव तत्संयोगजन्यत्वात्, * तस्य संयोगजन्यत्वात् तस्य संयोगजः **अदृष्टः आत्ममनःसंयोगजः** इत्यभिधानात् । न च अन्यसंयोगजः अन्यं समवेति सत्त्वान्तरेऽपि तत्प्रसङ्गात् । अदृष्ट फलं च तेष्वेवास्तु **कर्तृ फलदायी** इति वचनात् । तेषां च लोकान्तरगमने क्रियावत्त्वम्, अवामने संसारभेदविलोपः । ताप्यन्यस्यादृष्टाद् अन्यस्य संसारः; अतिप्रसङ्गात् । *द्वितीयपक्षे देशान्तरद्रव्यैः तत्संयोगविरहात् कथं तददृष्टेन तदाकर्षणम् इत्यविचि चिन्त्यम् । प्रदेशमनःसंयोगः परमाणुसंयोगवत् सदोष इति न असर्वगतत्व सर्वगतत्वे प्रथमवत् प्रसंघातवस्था च । 565/mkj
तत्परिकल्पनवैफल्यं वा, प्रथमात्मतात् कार्यनिष्पत्तेः पुनरपि स एव दोषः । पुनरपि तत्परिहाराय तत्प्रदेशकल्पने तदेव आवर्त्तत इति चक्रकम् इति न किञ्चिदेतत् । द्वितीयपक्षे दोषं दर्शयन्नाह--**नाप्यनात्मन** इत्यादि । पक्षान्तरसूवापि **अनात्मनं** * प्रदेशसरूपस्य द्रव्यान्तरस्य मनसा यः **सन्निकर्षः तस्मात् न सुखादयः** स्मृतयो भवितुमर्हन्ति । कुतः ? इत्यत्राह--**आत्मन्यादि** । दूषणान्तरमाह— **प्रदेशतद्वतोः** इत्यादि । सुगमम् । § 3119

पुनरपि **महात्म्य** इत्यादि । **आत्मा** मनसा युज्यते, **मनः अक्षेनइन्द्रियोताक्षम् अर्थेन**(?') इति य **आत्ममनोऽक्षार्थसन्निकर्षः** /ms

---

१ तिरेकः] अभेदः ।
१ *] प्रदेशानाम् ।
१ *] न चइ
४ ते] प्रदेशाः ।
५ च्चायुं] युक्तम्;
८ नं] नो
८ नि] प्रदेशबहुत्वे ।
९ च] ब्ध
९ तेषाम्] प्रदेशानाम् ।
११ *] एतदन्तर्गतः पाठो व्यर्थः ।
११ इ] आत्ममनसोः संयोगाद्धर्मोत्पत्तिरिति--प्रश० भा० पृ० ६३८ ।
१२ वेति] वैति
१३ च] आत्मप्रदेशेषु ।
१३ इ] कर्तुः प्रियहितमोक्षहेतुः--प्रश० भा० पृ० ६३७ ।
१४ ने] अगमने
१४ ता] ना
१५ *] तदन्तरमितिपक्षे ।
१६ विचि] इत्यपि
१७ त्व] त्वम् ।
१७ स्था] प्रसङ्गात् अनवस्था
१८ ता] का
२१ सूवापि] सूचने अपि शब्दः
२१ *] नः
२१ स] स्व
२३ न्यादि] आत्म इत्यादि
२४ पि] पुनरपि दूषणमाह--आत्म
२५ न] अक्षेण
२५ इन्द्रियोता] येण अ

संयोगादिसम्बन्धः **तस्माद् बहिरर्थज्ञानोत्पत्तौ** सत्यां **युगपज्ज्ञानोत्पत्तिः किन्न भवेत् ?** § 3120

नन्वेकत्वा[न्म]नसो न तेन सर्वेन्द्रियाणां तैरर्थानां युगपत् सम्बन्ध इति चेत्; अत्राह— **मनसाम्** इत्यादि । **एकत्वे** मनसो **युगपद् एकैव बुद्धिः स्यात्** । न चैवमस्ति, अनभ्युपगमात् । तयेवआत्मान्तरेषु ज्ञानानुदयप्रसङ्गात् । तत एव तदुदये एकत्रापि युगपदेकज्ञानोदयोऽनिवार्यः, अनेकत्रोत्पादाय इतिति नैकत्र इति किंकृतो विभागः ? § 3121

स्योदतत् बहुत्वेऽपि एकेनैव मसाऽतौकः संयुज्यते; इत्यत्राह--**प्रत्येकम्** इत्यादि । एकम् एकं मनः **प्रत्येकैकस्य आत्मनो** यः **सम्बन्धः** तस्य **नियमेन** अवश्यंभावेन **अयोगात्** आत्मनां व्यापित्वविरोधात् इति भावः । कष्णदृष्टस्य घटनानियामकल्पना; उक्तंदोषदुष्टत्वात् । अथ अतदेशस्य आत्मनः प्रदेशदोषयोजना कीदृशी ? इत्यत्राह--**यदि** इत्यादि । कुतः ? इत्यत्राह--**तदर्थ** इत्यादि । **तस्य** आत्मनः । दूषणान्तरमाह--**तादृश** इत्यादि । **तादृशस्य** कूट[स्थ]स्य **क्रमशः** क्रमेण पुनः पुनः इति **क्वचित्** कस्यांचिद् अवस्थायाम् **ज्ञानसम्बन्धात् सर्वज्ञत्वम् असंभव्यम्** इति वक्ष्यमाणेन सम्बन्धः । तर्हि तस्य सम्बन्धेऽपि विषयग्रहणोन्मुखता पूर्ववत् । § 3122

युक्त्यन्तरमाह--**किं पुनः** इत्यादि । **पुनः** इति पूर्वदूषणदस्यानिश्चयसूचकः
/ms । **असर्वज्ञस्वभावमजहतः किं सर्वज्ञत्वम् ?** इदम् दमत्त्वेवं पर्यत्र *त्सम्बन्धात् पूर्वविषयानभिमुखस्वभावो गगनादिवत् असाद्यते * तदभिमुखस्वभावः ? प्रथमपक्षे पूर्वं वाक्यं द्वितीयेऽपि सकलविषयाभिमुखः, कतिपयपदार्थाभिमुखो वा अस्य स्वभावः ? तत्र आद्ये विकल्पे जन्मिमात्रस्य सकलकुत्वाम् इति । द्वितीये द्वितीयमिति । § 3123

**नत्व** चोत्तरज्ञानं सति समवायिकारणत्वमेवास्य विषयाभिमुखं * नापरम्, सहकारिविशेषात् कदाचित् कीदृक्षज्ञानं प्रति तस्य तद् इति चेत् ?

---

३ तेन] मनसा ।
३ र्वेन्द्रियाणां] इन्द्रियैः ।
५ येव] तथैव
६ त] आत्मान्तरे ज्ञानोदये ।
६ देक] दनेक
७ इतिति] यतति
८ साऽतौकः] मनसा आत्मैकः
११ नानियाम] क[[कठिना इत्यर्थः ।]]ष्टा अदृष्टस्य घटनात् नियम
११ उक्तं] क्त
११ दे] अ[[प्रदेशरहितस्य ।]]प्रदे
१५ असंभ] भा
१६ र्हि] न हि
१६ स्य] आत्मनः कूटस्थस्य ।
१६ स] ज्ञानसम्बन्धेऽपि ।
१६ त्] नित्यत्वात् पूर्वावस्थावत् ।
१७ य] णादस्य निस्नय
१८ *] इदममत्वा एवं पर्यनुयोगः त[[ज्ञानसम्बन्धात् ।]]
१९ *] अस्त्येव, उत
१९ भावः] उत्पद्यते इति शेषः ।
२० वाक्यं] पूर्ववत् वाच्यम्[[न हि तत्सम्बन्धेऽपि विषयग्रहणोन्मुखता पूर्ववत् इति दूषणं वक्तव्यम् ।]] ।
२१ ल्पे] प्राणिमात्रस्य ।
२२ कुत्वाम्] सकलज्ञत्वम्
२२ मिति] सर्वज्ञत्वमसंभाव्यमिति ।
२३ ति] ननु च उत्तरज्ञानं प्रति
२३ *] मुख्यं
२४ द्] समवायिकारणत्वम् ।

अत्राह— **प्राग्** इत्यादि । **प्रागिव***स्थितज्ञानोत्पत्तेः पूर्वं न ज्ञान ***स्वभावसम्बन्धःविकस्य** तज्ज्ञानमेव स्वभावः स एव सम्बन्धः तेन विकल्पस्यअचेतनस्य इत्यर्थः, **तत्समवयिकारणत्वं ज्ञानसमवायिहेतुत्वम् असंभाव्यम्** । तथाहि न्मज्ञानस्वभावं *सम्बन्धविकल तज्ज्ञानसमवायिकारणम् यथा पृथिव्यादि, तथा च परस्य आत्मा तद्विकलः, इतरथा पृयिव्यादिरपि तत्कारणं भवेत् । § 3124 566/mkj

ननु कार्यस्य पृथिव्यादेः तत्कारणत्वे प्रत्यभिज्ञाविलोपः, शरीरादेरनित्यत्वादिति चेत्; परमाणूनां स्यात् । तेषामदर्शनात् नेति चेत्; किं पुनः परपरिकल्पितात्मनादर्शनमस्ति ? तथा चेत्; परमाणूनामस्तु । ज्ञानस्य गुणत्वाद् आधारमात्रं सिध्ये तु चात्मा परमाणवो वा इति न निश्चयः । *तेषां तत्कारणत्वे तद्रूपादिवद् बुद्धेः अस्मदादिभिरग्रहणमिति चेत्; आत्मनोऽपि तत्कारणत्वे तद्विभुत्ववत् तदग्रहणं किन्न स्यात् ? अत्र गुणवैचित्र्यं न परत्रे[ति] न विभागहेतुः । § 3125 /ms

अथ परमाणुनां बुद्धिगुणत्वे व्यापित्वं व्योमवत् स्यात् । तथाहि--परमाणवो विभवः नित्यत्वे सति अस्मदादिप्रत्यक्षगुणाधारत्वाद् व्योमवत् इति चेत्; न; घटादिना व्यभिचारात् । ऐकान्तिकनित्यत्वस्य सर्वत्र निषेधात् । ततो यथा तत्सम्बन्धविकलत्वात् न परमाणवः तत्समवायिकारणं तथा आत्मापि मा भूत् । असमवायिकारणत्वं स्यादिति चेत्; अत्राह— **असमवायिकारणत्वं च इति** सर्वमसंभाव्यम् । § 3126

ननु किमिदम् असमवायिकारणम् ? समवायिकारणाद् अन्यदिति चेत्; निमित्तकारणमपि ततोऽन्यद् भवति, तथा च चक्षुरा[दिवत् त]द्विकलमपि *तत्कारणम् इति निषेधानुपपत्तिः । अथ स्वकारणसमवायि च उत्तरशब्दस्य पूर्वशब्दः, स्वकारणकारणसमवायि यथा पटः, कारणकारणसमवयिवापि वा यथा ज्ञानस्य आत्ममनःसंयोगः, असमवायिकारणमुच्यते; तदयुक्तम्; आत्मनः क्व चित् कायेतदनभ्युपगमात् । अभ्युपगमाश्च पूष्यन्त

१ *] प्राग् अव
१ *] तज्ज्ञान
२ स्य] न्धविकलस्य
२ स्य] लस्य
४ न्म] यत्
४ *] भाव
४ त] लं न तत्
७ का] अनित्यस्वभावस्य ।
७ त] ज्ञानसमवायिकारणत्वे ।
९ ना] त्मनः
१० त्वाद्] हेतोः ।
१० चा] त्, त[[आधारमात्रम् ।]]चा
११ *] पृथिव्यादिपरमाणूनाम् ।
१२ त] ज्ञानकारणत्वे ।
१३ हेतुः] विद्यते इति शेषः ।
१७ त] ज्ञानसम्बन्ध ।
२१ त] समवायिकारणाद्भिन्नम् ।
२२ पि] ज्ञानस्वभावसम्बन्धविकलमपि ।
२२ *] ज्ञानसमवायिकारणम् ।
२२ वायि] उत्तरशब्दस्य कारणम् आकाशः तत्र समवायि ।
२३ वायि] पटरूपस्य कारणं पटः, तस्य कारणं तन्तवः, तेषु समवायि समवायसम्बन्धेन वर्तमानं तन्तुरूपम् ।
२३ टः] पटरूपं प्रति तन्तुरूपम्
२४ वा] समवायि[[ज्ञानस्य एकं कारणम् आत्मा, अपरश्च कारणं मनः, उभयत्र समवायसम्बन्धेन वर्तमानः आत्ममनःसंयोग इति ।]] वा
२५ काये] कार्ये
२५ पू] माच्च इ

इति चेत्; उच्यते--स्मरणज्ञानोत्पत्तौ संस्कारस्य, तस्य *तदुत्पत्तौ ज्ञानस्य **ज्ञानजो ज्ञानहेतुश्च संस्कारः** *इति वचनात् असमवायिकारणत्वमिष्यते परेण, स्वकारणसमवेतत्वस्य भावात्; तदपि तद्विकलस्य असंभाव्यम् । यथैव हि चेतनस्य चातनमुपादानम्, तथा तत्समवेतं चेतनं युक्तम् । § 3127

567/mkj

भवतु आत्मनः प्रदेशाः, ते चततः कथञ्चिद्भिन्ना इति चेत्; अत्राह--**यदि पुनः** इत्यादि । § 3128

यदि पुनः § 3129

...27 प्रदेशतद्वदैक्यं चेत् प्रतिपत्ताऽयं न लक्षयेत् ।
स्याद्द्रव्यपर्यययोस्तत्त्वं जयेद् धार्ष्ट्येन सौगतान् ॥
२७ ॥§ 3131

आत्मादीनां प्रदेशतद्वतोः भेदेऽपि स्वभावत एव कथञ्चित्तादात्म्यं सम्बन्धान्तराभावात् । गुणगुणिनोः सहभूतयोः जातितद्वतोश्च न कथञ्चित्तादात्म्यमिति स्वमनीषिकया तत्त्वमिदन्तया प्रतिष्ठापयितुकामः वैयात्येन कुतर्कविभ्रमात् स्वार्थाकारयोः तादात्म्यपरिणामं प्रतिक्षिपतः शौद्धोदनिशिष्यकान् विजयते । नहि प्रदेशतद्वतां घटपटवत् स्वातन्त्र्यं समवायासंभवादन्यत्र तादात्म्यात् । § 3132

/ms प्रदेश-आत्मनोः कथञ्चित्तादात्म्येऽपि अत्र तचन्नेति चेत्; अत्राह— तद्वदेस *तद्वदैक्यं चेद् इत्यादि । **प्रदेशतद्वतोः ऐक्यं** प्रपत्तप्रतिपन्वः * प्रतिपन्नवानयं नैयायिको **न** लक्षयेचित् * **स्यात्** कथञ्चिद् **द्रव्यपर्यायायोः[तत्त्वम्]** एकतानात्वमेव लक्षयेद् इत्यर्थः । **जयेद्धार्ष्ट्येन सौगतान्** द्रव्यपर्याययोः ऐक्यम् अलक्षयतः । § 3133

कारिकां विवृण्वन्नाह--**आत्मादीनाम्** आदिशब्देन गमनादिर्गृह्यते, **प्रदेशतद्वतोः भेदेऽपि कथंचित्तादात्म्यं स्वभावत एव** । कुतः ? इत्याह--**सम्बन्धा** इत्यादि । तादात्म्यसम्बन्धादन्यस्य सम्बन्धस्य **अभावात्** । न तावत्तयोः संयोगः; मनःसंयोगवत् प्रसङ्गात् । न चैवम् आत्मादीनाम् तेषु तेयास्युः,

१ स्य] तस्य इति व्यर्थम् ।
१ *] संस्कारोत्पत्तौ ।
२ *] तुलना--ज्ञानजो... प्र° वार्तिकाल°
३ । ५२७ ।
३ स्य] स्मरणस्य कारणम् आत्मा तत्र समवेतः संस्कारः इति ।
३ स्य] ज्ञानस्वभावविकलस्य आत्मनः ।
४ न] नाऽचेतन
५ च] न
१६ न्नेति] अन्यत्वं नेति
१७ *] प्रदेश
१७ *] प्रतिपत्ता
१८ *] लक्षयेत चेत्
१८ र्या] र्य
१९ तानात्व] तानत्व
२१ म] गग
२३ योः] प्रदेशतद्वतोः ।
२४ तेया] ते वा प्रदेशाः

इतरथा घटादयोऽपि संयोगाऽविशेषात् । घटादीनामपि स्वप्रदेशैः संयोग एव स्यात् । अयुतसिद्धत्वमन्यद्वा प्रकृतेऽपि समानम् । नापि समवायः; तेषां तदारब्धत्वप्रसङ्गात्, तथा च घटादिवदनित्यत्वम्, स्वारम्भकावयवसन्निवेशविशिष्टत्वेन ईश्वरस्याप्यन्येश्वरपूर्वकत्वम् । तत एव संयुक्तसमवायादयो दूरोत्सारिता एव । **न गुणगुणिनोः कथञ्चित्तादात्म्यम्,** अपि तु भेद एव । किंभूतयोः ? इत्याह--**सह** इत्यादि । पुनरपि कयोः ? इत्याह--**जातीत्यादि** । चेति समुच्चये । **इत्येवं स्वमनीषिकया तत्त्वम् इदन्तया** भेदैकान्तरूपतया च नानेकान्तक्षणिकादिरूपतया **प्रतिष्ठापयितुकामः शौद्धोदनिशिष्यकान् च वैयात्येन विजयते** । किंकुर्वतः ? इत्याह--**तादात्म्यपरिणामं** प्रत्यक्षं **प्रतिक्षिपतः कुतर्कविभ्रमात्** । कथं तं प्रतिक्षिपतः ? इत्याह--**स्वार्थाकार** इत्यादि । प्रपञ्चेन चर्चितमेतत् । प्रदेशतद्वतोरपि तादात्म्यं नेति चेत्; अत्राह--**नहि प्रदेशतद्वतां घटपटवत् स्वातन्त्र्य** *भवेद् इति भावः । समवायादेर्भावात् नैवं चेत्; अत्राह--**समवाय** इत्यादि । किं सर्वथा तदसंभवः ?, इत्याह--**अन्यत्र** इत्यादि । **तादात्म्याद्** अन्यस्मिन् सम्बन्धत्वे इष्यमाणे तदसंभवः, तादात्म्ये तु संभव एव । § 3134 /ms

568/mkj

एतदेव दर्शयन्नाह--**संयोग** इत्यादि । § 3135

...28 संयोगसमवायाभ्यामन्यत्र विभुद्रव्यवत् ।
स्वतः स्वभावतादात्म्यादृते न व्यवतिष्ठते ॥ २८ ॥ § 3137

सर्वत्र तथापरिणामं मुक्त्वा नापरः संयोगः समवायो वा सम्बन्धः परिकल्प्यः । तदभावे सर्वगतानां स्वप्रदेशवृत्तेरप्रतिबन्धात् । तद्भेदैकान्ते समवायवृत्तेः...समवायस्य विशेषणिभावोऽत्र सम्बन्धश्चेत्; सर्वत्र अयमेवास्तु । नवै तत्... § 3138

**स्वतः स्वभावतादात्म्याद् ऋते** विना **अन्यत्र** अन्येषु परस्परं भिन्नेषु **कुतः सम्बन्धो व्यवतिष्ठेत** ? दृष्टान्तमाह--**विभुद्रव्यवद्** इति । संयोगातेर्व्यवतिष्ठेत इति [चे]त्; अत्राह--**संयोगसमवायाभ्यां न व्यवतिष्ठते** इति । § 3139

कारिकार्थ[मा]ह--**सर्वत्र** इत्यादि । **न्यथापरिणामम्** अविनिर्भागपरिणतिं **मुक्त्वा नापरः** पुरुषदण्डयोः **सम्बन्धः परिकल्प्यः** । कोऽसौ ? इत्याह--

---

१ योऽपि] आत्मादीनाम् स्युः ।
३ तेषां] प्रदेशानाम् ।
४ म्] स्यादिति ।
१२ *] न्त्र्यं
१३ नैवं] न स्वातन्त्र्यम् ।
१३ त] समवायासंभवः ।
२४ तिष्ठेत] ष्ठते
२४ संयोगाते] दि
२६ था] तथा

**संयोगः**, किन्तु तथा परिकल्प्यः । यदि पुनर्द्वयोः कथञ्चित्तादात्म्येन वर्तमानः संयोगः स्यात्, तस्य पुरुषदण्डाववयवौ स च अवयवी इति प्रसक्तम् कपालघटवदिति तथा च एकाकर्षणात् नियमेन सर्वाकर्षणम् । आत्मशरीरयोरपि अन्योऽवयवी, न चैवम् इति । तथा गुण्यादीनां **तथा परिणामं** तादात्म्यपरिणाम**मुक्त्वा नापरः सम्बन्धः परिकल्प** । कः ? इत्याह **समवाय** इति । कुतः ? इत्यात्राह--**तदभावे** तथा परिणामाभावे **सर्वगतानाम्** आत्मादीनाम् **स्वप्रदेशेषु वृत्तेरप्रतिबन्धभावात्** सम्बन्धाभावात् तथापरिणामः /ms परिकल्पः । कस्मिन् ? इत्याह--**तद्देशैकान्ते** तत्प्रदेशतद्वतोः नानात्वैकान्त इति । समवायः प्रतिबन्ध इति चेत्; अत्राह--**समवायवृत्तेः** इत्यादि । समवायस्य स्वत एव वृत्तिः इति चेत्; अत्राह--**समवायस्य** इत्यादि ।
§ 3140

असम्बन्धः समवाय इत्येके; तेषां गुणो गुणी समवाय इहेति प्रत्ययजननात् तत्सम्बन्ध उच्यते; नासकस्ये पदार्थान्तरवत् तज्जननविरोधात् । शक्तश्चेत्; तर्हि शक्तियोगात्तथा[यथा] शुक्लगुणयोगात् शुक्लः । शक्तेश्च ततो भेदे सम्बन्धासिद्धिः । पुनः समवायकल्पने नैवनेवस्था **विशेषणीभावात्रसम्बन्धश्च सर्व च *यमेवास्तु** किं समवायेन ? नहि गुणादयो द्रव्यस्य न विशेषणम् । गुणानुरक्तप्रतीति[ः] एव स्यात् न इहप्रतीतिः इति चेत्; कथं समवाये शक्तिः इति प्रतीतिः ? सोऽयं विशेषणिभावः इह इहेतिप्रत्ययहेतुः नान्यत्र[सत्य]मीश्वरविलसितम् ! तत्सम्बन्धेति तदन्तरकल्पने अन्याऽनवस्था । विशेषणीभावोऽपि भावस्य किं कुर्वाणः स्यात् ? अकिञ्चित्करस्य वस्तुत्वाऽयोगात् । किञ्चित्करत्वे सर्वं तदवस्थम् । शक्तिः ततोऽभिन्नेति चेत्; 569/mkj तथा गुणादयोऽपि तद्वतो न व्यतिरिच्यन्ते । घटस्य रूपादयः इति न स्यादिति चेत्; तद्वतः शक्तिः इति कथम् ? गुणगुणिनोरभेदे एकग्रहणे सर्वग्रणमिति चेत्; किं पुनर्द्रव्यादिग्रहणे सन्निग्रहणम् ? तथा चेत्; मन्त्रादौ /ms संशयादिः कुतः ? इति यत्किञ्चिदेतत् । परमतम् आशङ्कते **नवै** इत्यादि । **तच्छब्देन** आत्मानिपरिग्रहः । § 3141

२ स] संयोगः ।
४ वी] स्यात्, तयोः संयोगात्मकः ।
५ रिणाम] मं
५ ल्प] प्यः
७ भावात्] न्धात्
८ ल्पः] प्यः
९ प्र] सम्बन्धः ।
१२ अ] अन्यः सम्बन्धो न विद्यतेऽस्येति असम्बन्धः ।
१३ स्ये] न; अशक्तस्य
१४ त] समवायात् ।
१५ स्था] ल्पने अनवस्था ।
१५ णीभावात्र] वोऽत्र
१६ श्च] श्चेत्
१६ *] सर्वत्राऽ
१७ एव] वं
१८ इह] समवाये ।
१९ त्र] द्रव्यादौ ।
१९ न्धेति] न्धेऽपि
१९ त] सम्बन्धान्तरकल्पने ।
२१ त] समवायात् ।
२२ त] गुण्यादेः ।
२४ न्नि] शक्ति
२४ म्] अस्ति ? ।
२६ आत्मानि] दि

तत्र दूषणमाह--**निरंश** इत्यादि । § 3142

...29 निरंशात्माणुसंयोगात् स्मृतिर्नित्यं प्रसज्यते ।
परमाणुवदिष्टं चेत् स्मृतिषट्कं सहेक्ष्यताम् ॥ २९

‖§ 3144

आत्ममनसोः निरंशत्वैकान्ते सन्निकर्षासंभवात् अकादाचित्कत्वात्मविभुत्वव-द्यावदद्रव्यभावित्वात् कथं तत्प्रभवगुणविशेषस्य अन्यानपेक्षिणः कादाचित्कत्वं यतः कदाचित् स्मृतिः । अदृष्टकारणत्वे मनोऽहेतुकं स्यात् । सत्यपि अणौ मनसि आत्मनः स्मृतीनां षण्णां सप्तानां वा सहैवोत्पत्तिः स्यात् परमाणुवत्...। तदेतत् तदागमपाठितं करणमात्मान्तरं द्रव्यान्तरं सदपि विचार्यमाणं अन्तर्बहिश्चाकिञ्चित्करम् । § 3145

**अणु**रिति मनसोऽभिधान **निरंशौ** ये **आत्माणू** तयोः **संयोगाद्** हेतेः **स्मृतिः नित्यं** सदा, उपलक्षणमेतदिति सर्वत्र च **प्रसज्यते** । न खलु समर्थस्य कारणस्य सर्वत्र सर्वदा भावे कार्यकादाचित्कत्वम्; अतत्त्वार्थत्वप्रसङ्गात् । § 3146

ननु संयोगस्य द्रव्ये सर्वत्राऽवृत्तेः नायं दोषः, नहि परमाणूनां संयोगाः तावद्व्याप्य वर्त्तते । तदाह--**परमाणुवद् इष्टं चेत्** इति । यथा परमाणुषु संयोगो वर्त्तमानो न सर्वदा तदात्मनि वर्त्तते अयावद्द्रव्यभावित्वादस्य तथा आत्ममनसोरप्यत**दिष्टं चेत्**; अत्रोत्तरमाह--**स्मृतिषट्कं सह** युगपद् **ईक्ष्यताम्** । § 3147

एवं मन्यते--आत्मनो व्यापिनो मध्ये वर्त्तमानस्य अणुमनसोऽयावद्द्रव्यभाविनोऽवश्यं घटसंयोगाः आत्मन[ः], स्वात्मना तस्य षड्भिः दिग्भिः सम्बन्धात्, तथा च तयोः तदेव सावयवत्वम्, अन्यथा कुतोऽस्य प्रदेशवृत्तित्वमिति ? अथ यथा जैनस्य परमाणूनां नैरन्तर्येण अवस्थानं संयोगः तथा ममापि आत्ममनसोः इति; युक्तमेतत्, किन्तु न संयोगो गुणः सर्वगतत्वं मनोदेशपरिहारा[त्] । भवन्तु तस्य युगपत् षट्संयोगाः, तेभ्यस्तु स्मृतिः एकैव वज्ञा * तन्तुभ्य एकपटवत् तत्संयोगेभ्यो वा इति चेत्; न; अन्यथाऽभिप्रायात् । तथाहि— यथा एकत्वेऽपि मनसः ततः सहात्मनि समवेताः संयोगाः ष्ट् तथा स्मृतियोऽपीति न तदेकत्वं स्मृत्येकत्वनिबन्धनमिति /ms
। § 3148

१० सोऽभिधान] नम्
१० हेतेः] हेतोः
१४ संयोगाः] गः
१६ स्य] संयोगस्य ।
१७ प्य] रप्ये
२० ट] षट्
२४ त्वं] तः
२५ *] तज्ज्ञा[[भवति ।]]
२७ स्मृति] त
२७ त्वं] त्व

कारिकां विवृण्वन्नाह--**आत्म** इत्यादि । **आत्ममनसोः निरंशत्वैकान्ते** अङ्गीक्रियमाणे **सन्निकर्षस्य** आत्ममनसोः संयोगस्य तयोरन्यस्य सम्बन्धस्य **असंभवात् अकादाचित्त्वात्मविभुत्ववद्यावद्द्रव्यभावित्वात्** कारणात् **कथं तस्य तत्प्रभवगुणविशेषस्य तस्मात्** सन्निकर्षात् **प्रभव** उत्पत्तिः यस्य स चासौ 570/mkj **गुणविशेषश्च** बुद्ध्यादिः **तस्य** । न[नु]तदपेक्षस्य सहकारिणः कादाचित्कत्वात् **कादाचित्त्वम्** इति चेत्; अत्राह--**अन्यान्यपेक्षिण** इति । चर्चितमेतत् । **यतः** तत्कादाचि[त्क]त्वात् **स्मृतिः कदाचित्** स्यात् इत्यध्याहारः । ततो यदुक्तम्— **सुखादिस्वप्नादिज्ञानानि इन्द्रियजनितानि, तत्त्वात्, चक्षुरादिजनितरूपादिज्ञानवत्, यत् तद् इन्द्रियं तत् मनः** इति; तन्निरस्तम् । ततः तद्भावे कदाचित्कत्वमयुक्तमिति मन्यते । अदृष्टस्य कादाचित्कत्वमभ्युपगम्य तस्यवि तत्कारणत्वे दोषं दर्शयन्नाह--**अदृष्ट** इत्यादि । **अहेतुकम्** अविद्यमानलिङ्गं **मनः स्यात्** । § 3149

ननु चक्षुरादिज्ञानम् अदृष्टादुपजायत इति; तत एव तन्निष्पत्तेश्चक्षुरादिकम् अनर्थकं भवे[त् ।] तत्प्रतीतेर्नेति चेत्; मनोऽपि तत एव नाऽनर्थकम् अनन्तरानुमाना[त्] तत्प्रतीतेः इति चेत्; न; स्वसंवेदनव्यभिचारात्, तस्य च साधनात् । अधुना मनोऽभ्युपगम्य दूषणमाह--**सत्यपि** इत्यादि । **सत्यपि** न केवलमसति **अणौ** सूक्ष्मे **मनसि** प्रदेशवत्त्वे सत्वत्य /ms **प्यात्मनः स्मृतीनां षण्णां सप्तानां** वा...म ग्यनाप्यात्मनः **सम्बन्धा[त्]सहैवोत्पत्तिः स्यात्** । कुतः ? इत्यत्राह--**परमाणुवदि**[त्यादि] § 3150

स्यान्मत त्वमतेऽपि मनोऽस्ति, तदप्येवमहेतुकं स्यात् । आगमगम्यत्वान्नैवं चेत्; मदीयं तथास्तु । तत्प्रयोजनस्य अदृष्टतः सिद्धेर्नैवं चेत्; त्वदीयेऽपि समानम् । उभयकल्पनम् उभयत्रेति; अत्राह--**तदेतदात्म्य** इत्यादि । **तदागमयतितमेतद् विचार्यमाणम्** अतोऽ[किञ्चित्करम्] किञ्चिदपि कर्त्तुं न समर्थ । किंभूतम् ? **सदपि** आगमपाठमात्रेण विद्य[मानमपि । ननु अन्यार्थक्रियाकरणात्तद]**किञ्चित्करं** कथं सप[स्या]दिति चेत् ? त[द]न्यस्यकार्यकरणेऽपि सुखादिवेदनादौ विकलेन्द्रियादिवद् अनुपयोगाद् एवमभिधानात् । पुनरपि किंभूतम् ? **करणमिति** । केन रूपेण तत्तत् ?

५ पेक्ष] क्ष्य
७ त] सहकारि ।
९ इति] तुलना--सुखादयो वा करणपरिच्छेद्याः ग्राह्यत्वाद् रूपादिवत् ।--प्रश० व्यो० पृ० ४२५ । सुखादिप्रतीतिरिन्द्रियजा अपरोक्षप्रतीतित्वात् ।...स्मृतिः इन्द्रियजा ज्ञानत्वात् ।--प्रश० क० पृ० ९० ।
१० द्भावे] मनसः सकाशात् उत्पादे ।
१० क] का
११ वि] तस्यापि
१३ त] अदृष्टादेव ।
१३ त] रूपादिज्ञानोत्पत्तेः ।
१७ त्य] त्त्वेऽसत्य
१८ प्या] वा मनसोऽप्या
२० त] तं
२० म] त्वन्म[[जैनमतेऽपि ।]]
२२ दात्म्य] दागम[[तदेतदागम इति वक्ष्यमाणायाः वृत्तेः प्रतीकम् ।]]
२३ ति] मपठि
२४ र्थ] र्थम्
२६ स्य] स्व
२६ ए] अकिञ्चित्करम् इति ।

इत्याह--**आत्म** इत्यादि । तदर्थान्त[र]त्वेन । पुनरपि किंभूतम् ? इत्याह--**द्रव्यान्तरम्,** प्रतीयमानात् चक्षुरादिद्रव्याद[न्यद् द्रव्यं द्रव्या]**न्तरम्** इति । क्व अकिंचित्करम् ? इत्याह--**अन्तर्बहिश्च** । **अन्तः** सुखादिस्ववेदने, नहि सुखादिस्वम्वेदन न शेषमिन्द्रियत्रन न नस्के अन्यथा विभागोपगमात् **बहिस्त** * घटादौ । तत्र कस्यविज्ञानस्य चक्षुरादेरपरस्यानुभवादे रपरस्य अनुभवादेर्भावात् । सिक्षायदिग्रहणाग्रहणे संस्कारदृढत्वेतरकृते, मनुष्यस्य व्याकरणप्रक्रियाग्रहणेतरवत् । तद्दृढतरत्वेतरे आवरणक्षयोपशमविशेषात् । **सत्यपि** इत्यनेन आगमगम्यत्वम्, **अकिंचित्करम्** इत्यनेन तदसाधार ण-कार्याऽभावाद् अननुमेयत्वं दर्शयतिस्म । § 3151

ननु *आत्मप्रदेशावरणक्षयोपशमरूपस्य भावेन्द्रियस्य द्रव्यकरणापेक्षत्वात् [तत्] सिद्धिरिति चेत्; कु तस्य तदापेक्षा ? रूपादौ इति चेत्; त- /ms, 571/mkj
त्र चक्षुरादिलिङ्गादेर्भावा[त्] सिद्धसाधनम् । तत्र ततोऽप्यन्यस्य साधने; साङ्ख्यमतवद् अनवस्था । § 3152

किंच, सर्वस्य तत्कृपे वे समस्य प्रमेये प्रवृत्तावधि ज्ञानं पराश्रयम् इति प्रत्यक्षत स्यात् । कु ? भाविनि सुखादाविति चेत्; न; उक्तमत्र [अ]मनस्कसुखादिना व्यभिचारादिति । § 3153

किं च, एवं वादिनः सर्वमध्य[क्ष]म् इन्द्रियजं तत्त्वात् कुतो न सिध्यति ? अन्यथानुपपत्तिवैकल्यात्; इतरत्र समानमिति स्थीयतामविवादेन । § 3154

भवतु वा परपक्षिकल्पितं मनः ततो ज्ञानं वा, तथापि यौगमते न सर्वज्ञानं वा तथापि यौगमते न सर्वज्ञः इति दर्शयन्नाह--**स्वत** इत्यादि । § 3155

...30 स्वतोऽसत्यः पुनः संवित्प्रकाशासंभवाद्यतः ।

---

४ स्के] स्वसंवेदने शेषमिन्द्रियम्, अमनस्के
४ मात्] ?
५ *] बहिश्च
५ स्य] स्वविज्ञानस्य
५ प] रपरस्यानुभवादे इति द्विर्लिखितम् ।
६ दि] शिक्षालापादि
१० तु] ननु
१० *] आत्मप्रदेशेषु यः अवारणक्षयोपशमः तद्रूपस्य ।
११ कु] क्व
११ स्य] भावेन्द्रियस्य ।
११ त] द्रव्येन्द्रियापेक्षा ।
११ दा] द
१३ द्] तेन एकादशेन्द्रियस्वीकारात् ।
१४ स्य] तत्क्षयोपशमस्य
१४ धि] वपि
१५ त] क्षं न
१५ कु] क्व
१७ त्त्वात्] अध्यक्षत्वात् ।
१८ ल्यात्] इति चेत्; ।
२० क्षि] परि
२० न] न सर्वज्ञानं वा तथापि यौगमते इति द्विर्लिखितम् ।

अत्यन्तमात्मनि परतः अनवस्थानतः कुतः ॥ ३०

॥§ 3157

सत्यपि सर्वार्थसन्निकर्षे असर्वज्ञत्वं सदसदात्मकत्वात् वस्तुनः । यतोऽयं योगनिर्मितेन्द्रियशरीरः ऋद्धौ सर्वान् अनेकधा पश्येदनुस्मरेद्वा । § 3158

**स्वतः** स्वरूपेण **अत्यन्तम्** एकान्तेन **आत्मनि** स्वरूपे**ऽसत्या**तत्राव्या[प्रियमा]णायाः **संविदो** ज्ञानस्य **प्रकाशासंभवात्** तस्याः प्रतिभा[साभा]वात् कुतः पुनः सर्वज्ञत्वम् स्वबुद्धेरप्यग्रहणात् । तन्न युक्तम्--**सदसद्वर्गः कस्यचिद् एकज्ञानालम्बनमेकत्वात् पंचाद्गुणवत्** । इति; तत्संविदा व्यभिचारात् । ज्ञानान्तरात् तस्याः प्रकाशः; इत्यत्राह--**परतः** अन्यतो ज्ञानात् तस्याः **प्रकाशासंभवात्** इति सम्बन्धः, **अनवस्थानेतोर्थ**मात्रस्यापि ग्रहणाभावात् । § 3159

**यद्** यस्मात् [सन्निकर्ष]सत्वादयं परीक्षमाण आत्मा **सर्वान्** अर्थान् **पश्येत्** । किंभूतः ? इत्याह--**योग** इत्यादि । कस्मिन् सति ? इत्याह--**सिद्धा**वित्यादि । कथं किंच ? इत्याह--**अनेकवा** इत्यादि । तथा **अनुस्मरेद् वा**
/ms । **यतः** इति वा आक्षेपे नैव[अनुस्मरेत्] । § 3160

अथ संविद आत्मनि सत्वेऽपि सन्निकर्षवादिनः प्रकारान्तरेण सर्वज्ञत्वाभाव दर्शयन्नाह--**सत्यपि** इत्यादि । संभवनायाम् **अपि** शब्दः । **योगनिर्मितेन्द्रियशरीर**स्यापि योगिनः मनसः चक्षुरादेर्वा अर्थैः सन्निकर्षस्य भावतो[ऽ]भावादृद्धिप्रादुर्भावात् पूर्वम् उत्पद्य विनष्टैः सद्धिव्युपरमात्, *ऊर्ध्वं उत्पत्स्यमानैः सन्निकर्षाभावात् । तथापि उच्यते— **सत्यपि** सर्वतः **सर्वार्थैः सन्निकर्षे** अस्य **अयम्** इत्यनेन जातविभक्तिपरिणामेन सम्बन्धात् । किम् ? **असर्वज्ञत्वम्** । कुतः ? इत्यत्राह--**सदात्मकत्वा सदात्मकत्वात्** सदात्म[कत्वादसदात्म]कत्वाच्च । कस्य ? **वस्तु[नः]इति** । द्रव्यादीनां[नां
572/mkj सदात्मकत्वम् अ]सदात्मकत्वं प्रागभावादीनामिति । अपरापेक्षया इदमुच्यते । अयमभिप्रायः--येषामर्थानामिन्द्रियसन्निकर्षः सदात्मनाम् तेषां तेन ग्रहणमस्तु, असदात्मनानुमानास्तीति कथं तेन ग्रहणम् ? घटादिप्रागभावादिः[न]इन्द्रियेण संयुक्तः अद्रव्यत्वात् । नापि तत्र समवेतः; तत्त्वस्तत्प्रत्ययप्रसङ्गात् । अत एव सम्बन्धसम्बन्धोऽपि दुर्घटः । § 3161

---

५ त्या] त्यः
७ त्वात्] नम् अनेकत्वात्
७ त्] पञ्चाङ्गुलवत्
८ काशः] स्यात् ।
९ स्थानेतो] स्थानतोऽ
११ त्वा] सत्वा
१२ सिद्धा] ऋद्धा
१३ वा] धा
१६ त्वाभाव] वं
१७ भा] परमार्थतः ।
१८ भावादृद्धि] वात् । ऋद्धि
१८ द्धि] त[[सन्निकर्षस्य नष्टत्वात् ।]]द्
१८ *] आगामिकाले । ऋद्धिप्रादुर्भावानन्तरम् ।
२१ दा] सदसदा
२५ नानुमा] नां तु सत्ता
२६ त्वात्] द्रव्यद्रव्ययोः संयोगात् ।
२६ स्त] तत्त्वतस्त
२७ न्धोऽपि] संयुक्तसमवायः समवेतसमवायादिको वा, विशेषणविशेष्यभावो वा, न संभाव्यः, सम्बद्धयोरेव तद्भावात् ।

स्यान्मतम्--इन्द्रियेण घटादिक सन्निकृष्टं तेन च प्रागभावादिः, ततो रूपादिवद् अस्य ग्रहणमिति; तदस व्यतः अभावस्य अद्रव्यत्वात् न तेन घटस्य संयोगः । न च समवायः; अभावकाले तदभावात् । अत एव नान्योऽपि सम्बन्धः । § 3162

अथ मतम्--घटसंयुक्तेन्द्रियस्य घटभावेन संयुक्तविशेषणीभावसम्बन्धः, रूपाद्यभावेन संयुक्तसमवेतसमवेतविशेषणीभावसम्बन्धः, रूपाद्यभावेन संयुक्तसमवेतसमवेतसमवेतविशेषणीभावः, एवं कर्मादावपि वक्तव्यमिति; /ms तदप्यसत्; सुसमयाव्याघातात् । यदहि घटस्य प्रा[गभावप्र]ध्वंसाभावाभ्या साक्षात् सम्बन्धः सैव * अनित्यता इति । **उभयानव्यधिसत्ताऽनित्यता** न्यायवा० पृ० २८४ इति किमनेन ? § 3163

किंच, विशेषणीभावसम्बन्धाप्रतिपत्तौ इदमस्य विशेषणम् इति कुतः प्रतिपत्तिः ? न हि संयोगाप्रतिपत्तौ इदमप्यस्य संयोगि इति संवित्तिर्युक्ता । § 3164

ननु यथा समवायाग्रहणेपा णेऽपि इ दमत्र समवेतम् इति प्रतीतिः, तथा अत्रापीति चेत्; न; साध्यसमत्वात् निदर्शनस्य । समवेतम् इति हि समवायापेक्षिणी प्रतीतिः, यथा संयुक्तः इति संयोगातप गापेक्षिणी । न च तदप्रतीतौ सा युक्ता, अन्यथा शुक्लताऽप्रतीतौ शुक्ल इति संवित्तिः स्यात् । न चैवम् इति । प्रतीयते सोऽपीति चेत्; *तस्य इन्द्रियेण कः सम्बन्धः ? विशेषणीभाव इति चेत्; अनवस्था । अपि च, इन्द्रियघटसंयोगकाले न प्रागभावः प्रध्वंसो वा,[त]त् कथम् इन्द्रियस्य तेन पारम्पर्यसम्बन्धः । न हि असता सतः सम्बन्धः खरविषाणेनेव । प्राक्पश्चात्तस्थोर्भाव इति चेत्; तदा न घटः नापि इन्द्रियसंयोगः । न च अभावोऽप्रतिपन्नो विशेषणम्, दण्डवत् । प्रतिपन्नश्चेत्; न तावेन् सह घटेन, *तत्काले तदभावात् । नापि

१ टादिक ] कं
१ भावादिः ] सम्बद्धः ।
२ व्य ] सत्; य
२ तेन ] अभावेन ।
३ त ] घटस्यासद्भावात् ।
५ ट ] टा
६ वेत ] एकः समवेत शब्दोऽधिकः । इन्द्रियसंयुक्ते घटे रूपं समवेतं तद्विशेषणमभावः ।
६ रूपा ] पत्व
७ स ] एकः समवेत शब्दोऽधिकः । इन्द्रियसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वं समवेतं तद्विशेषणमभावः ।
८ सु ] स्व
८ या ] य
८ द ] यो
८ ध्वंसाभावाभ्या ] भ्यां
९ * ] स एव
९ धि ] न्तव्यवधि
१० इति ] तुलना--यस्योभयान्तव्यवधिसत्तासम्बन्धवाचिनी । अनित्यताश्रुतिः = यस्य नैयायिकादेः उभयस्य प्राक् पश्चाद् भावस्य अन्तस्य व्यवधायकः सत्तासम्बन्धः तद्वाचिनी अनित्यताश्रुतिरिष्टा--प्र० वा० मनोरथ० २ । १११ । या उभयान्तपरिच्छिन्नवस्तुसत्ता सा अनित्यता--न्यायवा० ।
१७ त ] संयोगसमवायाप्रतीतौ ।
१७ सा ] संयुक्त इति समवेत इति वा प्रतीतिः ।
१८ * ] संयोगस्य समवायस्य वा ।
२१ स्थोर्भाव ] श्चात्स्थो[[प्राक्पश्चाच्च तिष्ठतीति प्राक्पश्चात्स्थः ।]]ऽभावः
२३ तावेन् ] तावत्
२३ * ] घटकाले ।
२३ त्काले ] अभावस्य असद्भावात् ।

केवलः; तद्ग्रहणोपायाभावात् । अत एव स्मर्यमाणोऽप्यसौ न विशेषणम् ।
§ 3165

573/mkj

परः प्राह--इन्द्रियसंयुक्ते घटे सत्ता समवेता तद्विशेषणं प्रागभावादिः, /ms ततः संयुक्तसमवेतविशेषणीभाव इति; तदप्यसारम्; नित्यायाः तस्याः तद्विशेषणायोगात् आत्मादिवत् । § 3166

किंच, प्रागभावो घटकाले विनश्यति तदा तस्यापि प्रध्वंसोऽस्ति, तथा प्रध्वंसस्य प्रागसतो भावे प्रागभावः, न च तत्रेयं ग्रहणप्रद्विया; सत्तासमवायाऽभावादभावस्य । न च तस्यानित्यताव्यपदेशः; उभयान्तव्यवधिसत्तासम्बन्धाभावात् । नास्तीति चेत्; पदादौ कः समाश्वासः ? उपचारात् स तत्रेति चेत्; अन्यत्रापि ततः स्यादविशेषात् । विशेषणीभावो परतो व्यमानोऽवधानात् तस्यापि तेन कः सम्बन्धो येन ग्रहणं भवेत् ? विशेषणीभाव इति चेत्; किं पुनरसाधनेकः तथा चेत्; समवायोऽपि स्यात् । समवेतबुद्धेरभेदान्नैवं चेत्; तन्निबन्धनापि बुद्धिर्न भिद्यत इति समानम् । तन्न असदात्मना इन्द्रियसन्निकर्ष इति न तस्य ग्रहणम् इति[न]सर्वज्ञत्वं सन्निकर्षवादिनः इति स्थितम् । § 3167

तथापि सर्वज्ञत्वोपगमे नैयायिकवत् सौगतस्यापि किञ्चित् स्वाभ्युपेतं तस्यतीति दर्शयन्नाह--**प्रत्यक्षम्** इत्यादि । § 3168

...31 प्रत्यक्षं सर्वविषयं भिन्नकालमनागतम् ।
वेत्ति चेदर्थसारूप्यात् प्रामाण्यं संविदां न वै ॥ ३१
॥§ 3170

कुतश्चिदर्थादुत्पन्नं ज्ञानं यदि तदतिक्रान्तावेव योग्यतया प्रत्यक्षम्; अनागतेऽपि किन्न स्यात् ? तत्सारूप्यातिशयसंभवात् तदुत्पत्तेश्च तत्प्रत्यक्षत्वकल्पनायामतिप्रसङ्गात् । यस्य दर्शनयोः...अलम् असद्ग्रहकल्पनया अतिप्रसङ्गात् । यथैव हि कारणाभावलक्षणे भवतः स्वतन्त्रस्य कार्यत्वमत्यन्तमयुक्तं तथैव स्वकार्यकारणस्वलक्षणसंवेदनं च । यदि कुतश्चित् संवित्तेः परिच्छेदसामर्थ्यम्; प्रमेयकाले एव स्यात् । दृश्यदर्शनयोरुपकार्योपकारभावस्य सर्वदा भावात् । तदेतद् द्रव्यं स्वत एव यथा परिणामलक्षणं

१ सौ] अभावः ।
४ स्याः] सत्तायाः ।
६ त] प्रागभावस्यापि ।
७ द्विया] प्रक्रिया
८ उ] प्रागभावप्रध्वंसाभावमध्यवर्तिन्याः सत्तायाः सम्बन्धाऽभावादित्यर्थः । अर्थात् यः उत्पद्यते विनश्यति च स एवानित्यः ।
९ दादौ] पटादौ
११ धानात्] भावोऽपरतः सम्बध्यमानश्चेत्
१२ नेकः] सौ[[विशेषणीभावः ।]] अनेकः ?
१३ भेदा] भेदाऽभावात् ।
१३ त] विशेषणीभावनिबन्धनापि ।
१७ स्य] नश्य

तथैव जीवात्मकमेतत् स्वत एव ज्ञानस्वभावकं प्रत्येयम् । कारकज्ञापकशक्तेः स्वतः सद्भाविन्या एव परतः परिणामात्मोपकार्यविशेषप्रतिलम्भोपपत्तेः । तन्न कश्चिदज्ञानात्मा ज्ञानसम्बन्धात् ज्ञाता नाम घटादिवत् । स्वत एव सकलग्रहणप्रकाशोऽपि । तदयमात्मैव स्वतः संविदात्मा सुखादिरूपेण, दोषावरणविमुक्तः स्वलक्षणमनन्तज्ञानादि केवलं प्रतिपद्येत । § 3171

**प्रत्यक्षं** तत् **सर्वविषयम्,** किंभूतम् ? **अनागतं** भावि, उपलक्षणमेतत् तेन भूतमपि गृह्यते । तत् किं करोति ? इत्याह--**भिन्नकालार्था*** **वेत्ति चेद्** यदि भूतं भाविनो भावि भूतानिशेषानिति **प्रामाण्यं संविदानवे** नैव **अर्थसारूप्यात्** किन्तु अन्यतः कुतश्चिद् अतिशयाद् भवेत् । नहि भाविनो योगिनोऽपि ज्ञानं जायते, यतः तदाकारं स्यात्, अन्यथा सर्वभाविभाव- 574/mkj कार्यकाल एव तेन भवितव्यमिति न ज्ञायेत नात्र कार्यकाले, कस्य काले /ms तेन भवितव्यम् इति । तथा अनादिसकलार्थकार्यकालेऽपि भवति इदम् । एवं वक्तव्यम् तथा एकस्माद् भिन्नकालं कार्यद्वयम् **नाक्रमात् क्रमिणो भावाः** प्र० वा० १ । ४५ इत्यादिविरोधात् । अथ योगिनः सकलं वर्तमानमेव, न तस्य किञ्चित् कारणं न च कार्यं नापि तज्ज्ञाने स्वाकारसमर्पकम् इति; प्रशमकार्यकारणे च तज्ज्ञाने सकलं तथैव भवेत् । अथ न ज्ञानम् अतत्कार्यम् अतदाकारं ग्राहकम्; सकलं तथास्तु, **यस्य यावती मात्रा** इति न सर्वाविशेषः । एतत् सौगतं प्रति । तथा संविदा तत् तस्माद् अर्थात् जन्म न वै । नहि विवक्षितज्ञानं प्रति सर्वे भाविनो भूता वा अर्थाः कारणम् । कार्यकाले सन्निहितस्यैव योगेःकार[ण]त्वोपगमात्, इतरथा अर्थदेशे असन्निहितं तत्र चक्षुर्ज्ञानमुपजनयेत् । अदृष्टो वा अग्न्यादिदेशे[असिन्निहितः] तस्य ऊर्ध्वजलमिति नात्मसर्वगत्वम् । एतद् उभयं प्रति । § 3172

कारिकार्थमाह--**कुतश्चिद्** इत्यादिना । **कुतश्चिद्** अनन्तरादतीताद् भाविनो वा विज्ञानसमानकालाद्वा **अर्थात् उत्पन्नं ज्ञानं यदि प्रत्यक्षम्** अर्थसाक्षात्कारि । कस्मिन् सति ? इत्याह--**तदतिक्रान्तावे[व]**तस्य अर्थादुत्पन्नार्थस्य अतिक्रान्तिः अतिक्रमः तस्यामेव **योग्यतया** तत्त्व[स्य]प्रमेय **तत्प्रत्यक्षं** तदुत्पन्नत्वादिति भावः । **अनागतेऽपि** अपिशब्दाद् वर्त्तमानेऽपि **किन्न स्यात् ? प्रत्यक्षम्** इत्यनुवर्तते, तत्र च उक्तो दोषः । विपक्षे बाधां दर्शय- /ms न्नाह--**तद्** इत्यादि । तेन प्रमेयेण **सारूप्यातिशयो** यः तस्य **संभवात् ततः** प्रमेयादुत्पत्तेश्च तं **प्रत्यत्वकल्पनायाम् अतिप्रसङ्गात्** । तत्र सारूप्यातिशयात्तत्कल्पनायाम् अतिप्रसङ्गं दर्शयन्नाह--**यस्य दर्शनयोः** इत्यादि । सुगमम् । § 3173

---

७ *] कालम् अर्थ
८ भूतानिशे] निःशे
८ संविदा] दां
९ भा] अर्थात् ।
१६ श] थ
१६ का] क
१८ संविदा] दां
२० योगेः] योगैः
२२ स्य] अग्नेः ।
२२ ल] ज्वलननिमित्त
२६ त्र] यस्य प्र
३० त्य] तत्प्रत्यक्ष

अत्रैव दूषणान्तरं दर्शयन्नाह--**अलम्** इत्यादि । तात्पर्यमत्र--यदा ग्राह्य-तहे[तु]त्वमेव तदाकारक्षमम् उच्यते तदा अमुत एव ग्राह्यता इत्युक्तं स्याद् **अलं** पर्याप्तं **असतो ग्रहकल्पनया** । कुतः ? इत्याह--**अतिप्रसङ्गात्** । तत उत्पत्तेश्च तत्कल्पनायाम् अतिप्रसङ्गं दर्शयन्नाह--**यथैव हि** इत्यादि । येनैव हि प्रकारेण **कारणाभावलक्षणे** भावलक्षणे **भवतः** जायमानस्य । किंभूत-स्य भवतः ? **स्वतन्त्रस्य कार्यत्वम् अत्यन्तमयुक्तम्** । एतच्च नैयायिकेनापि उक्तं सौगतं प्रति । **तथैव स्वस्य** स्वस्य **कार्यस्य** यत् **कारणस्वलक्षण**ज्ञान-कालेऽविद्यमानं तस्य **संवेदनं च** अन्यन्तमयुक्तम् । एवं मन्यते--यथा सौगतस्य[य]दि नष्टं कारणं न कार्यजन्मनि व्याप्रियते कार्यं वा न तस्य इति व्यपदिश्यते, तथा संवेदनकाले अविद्यमानं न तद्ग्राह्यशक्तिसमन्वित-म्, संवेदनं वा ग्रहणसामर्थ्यसहितम्, अन्यथा हेतुफलभावो भिन्नकालयोः ग्राह्यग्राहकवद् भवेदविशेषात् । अथवा, संवेदनस्य **कारणं स्वलक्षणं** तस्य
/ms **संवेदनमत्यन्तमयुक्तम्** कार्यविशेषत्वादस्य । कारणात्यये च जायमानं न
575/mkj तस्य इति व्यपदिश्यते विरतवत् । तर्हि यथा कारणं कार्यकाले स-देव तदुत्पादयति तथा संवेदनं प्रमेयसमये सदेव तद् गृह्णाति, तत्फलत्वाद् इति नैयायिकः; तत्राह--**यदि कुतश्चित्** सम्बन्धात् तदुत्पत्तिलक्षणात् **संवित्तेः परिच्छेदसामर्थ्यम्;** अत्र दूषणम्--**प्रत्येवंकज्ञानकाल एव** वस्तुनि **स्यात् प-रिच्छेदसामर्थ्यम्** न अतीते न भाविनि इति कथं कस्यचित् सर्वज्ञत्वमिति भावः । अतीतानागतं वा ज्ञानस्य कारणम् इति तत्रैव तत्सामर्थ्यम् इति । नहि अतीताऽनागतसादृश्यमपि दर्शनस्य मिथ्याबुद्ध्यवसायादन्यतः परस्य नि मन्यते । § 3174

संप्रति **दर्शनस्य** न सम्बन्ध उपकाराभावादिति चेत्; अत्राह--**उपकार्योपकारकभावस्य दृश्यदर्शनयोः सर्वदा** कालत्रयेऽपि **भावात्** मिथ्याविकल्पबुद्धेः सकाशाद् इति । § 3175

ननु **ग्राह्यं न तस्य ग्रहणं न तेन** इत्यादिवचनात् स्वरूपेवेदनमेव स-र्वज्ञत्वम् न सर्ववेदनम् इत्यपरः; तत्राह--**तदेतद् द्रव्यम्** इत्यादि । **तत्** तस्माद् उक्तान्न्यायात् **एतत्** प्रतीयमानं **द्रव्यं स्वत एव**[न]भिन्नपरिणामाद् **यथा परिणामलक्षणं** परिणामो लक्षणं यस्य इति **तथैव जीवात्मकं** भेनंतत्* **स्वत एव** नान्यतो **ज्ञानस्वभावकं** स्वपरग्रहणपर्यायात्मकम् **प्रत्येयं** चित्रैक-
/ms रूपस्य स्वपरग्रहणस्वभावाविरोधात् । चक्षुरादि व्यापार[रेणैव स्वयं त]स्य

२ दाकार] कारार्पण
२ उ] भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः । हेतुत्वमेव युक्तिज्ञास्तदाकारार्पणक्षमम् ॥--प्र° वा° ।
४ त] तत्प्रत्यक्षत्वकल्पनायाम् ।
५ भा] भावलक्षणे इति व्यर्थम् ।
७ ण] णं
१४ त] चिरतरातीत
१५ त] कार्यम् ।
१५ द्] प्रमेयम् ।
१७ त्येवंक] प्रमेय
२१ नि] इति
२५ इ] द्रष्टव्यम्--पृ° ४१९ ।
२५ रूपे] प
२८ *] एतत्

तत्स्वभावकुत्वे स्यादिति चेत्; अत्राह--**कारक** इत्यादि । **कारकं** कर्त्रादि, जानातीति **ज्ञापक** आत्मा **तयोः शक्तेः स्वतः सद्भाविन्या एव परतः** चक्षुरादेरपि **परिणामात्मोपकार्यविशेषप्रतिलम्भोपपत्तेः** । § 3176

ननु च ज्ञातृविचारे किमर्थम् अप्रस्तुतस्य कारकस्य ग्रहणमिति चेद-हन्तार्थम् । यथैव कारकस्य शक्तिः स्वतः सती शालिबीजादेः, परतोऽपि परिणामात्मोपकार्यविशेषप्रतिलम्भः तथा ज्ञातुरपि । नहि किश्यादिना यव-वीजस्य शाल्यङ्कुरजातिका शक्तिः आधीयते । § 3177

निगमयन्नाह--**तन्न** इत्यादि । य [त एवं]तत्तस्मात् **क्वचिद्** आत्मा अन्यो वा **अज्ञानात्मा** ज्ञानस्वभावरहितो **ज्ञानसम्बन्धात् न ज्ञाता नाम घटादिवद्** इति । § 3178

ननु घटादेः तत्सम्बन्धोऽपि नास्ति तत्कथं निदर्शनमिति चेत्; न; स-मवायस्य व्यापकस्य सर्वत्राविशेषा[त्] निषेधाच्च । स्वत एव ज्ञानस्वभावत्वे सर्वस्य सर्वदर्शित्वमिति चेत्; अत्राह— **स्वत एव** इत्यादि । तदन्ययेर्थान्त-रसम्बन्धा व्यापप्रबोधश्च **सकलग्रहणप्रकाशोऽपि** । यत एवं तत् तस्माद् **अयं** स्वसंवेदनाध्यक्ष **आत्मैव स्वतः संविदात्मा** नादात्मसंविदोर्भेद इत्यर्थः । स च किंभूतः ? इत्याह--**सुखादिरूपेण** इत्यादि । **दोषावरणविमुक्तो** दोषावरणवैकल्यात् **स्वलक्षणं** स्वस्वरूपम् **अनन्तज्ञानादि केवलम्** असहायं **प्रतिपद्येत** यतः स्वभावविभुत्वम् इति । § 3179

भवन्तु तर्हि आत्मनः स्वभावभूताः प्रदेशाः; इत्यत्राह--**यथा** इत्यादि । /ms

§ 3180

576/mkj

...32 यथात्मा सम्बध्येतानन्तप्रदेशैः स्वतः ।
तथार्थोऽनन्तपर्यायैः तन्नार्थाः समवायिनः ॥ ३२
॥§ 3182

कथञ्चित्... § 3183

**यथा अनन्तप्रदेशैः सम्बध्येत** विस्तरात्मादिस्वतः न समवायादिवशात् **तथा अर्थः** प्रमेयो घटादिः **अनन्तपर्यायैः** तत्तन्मानार्थाः **समवायिनः** सम-वायवन्तः । § 3184

कारिकां व्याख्यातुमाह--**कथञ्चिद्** इत्यादि । सर्वं[सुगमम्] । § 3185

---

१ त] ज्ञानस्वभावकत्वम् ।
१ कुत्वे] ववत्त्वं
५ ह] चेत् ? दृष्टा
६ किश्या] कृष्या
७ जातिका] जनिका
११ त] ज्ञानसमवायोऽपि ।
१४ श्च] तदन्यया अर्थान्तरसम्बन्धिन्या वा स्वापप्रबोधश्चेत् आत्मनः
१५ नादा] न तु आ
२४ रात्मादि] ?
२५ टादिः] तत्तस्मात्

आत्मप्रदेशाभावे पुनरपि दोषमाह--**तद्** इत्यादि । § 3186

...33 तत्प्रदेशोपचारेऽपि युगपज्ज्ञानसम्भवः ।
दूराच्छब्दश्रुतिरस्ति यथैवैकान्तवादिनाम् ॥ ३३
॥§ 3188

परमार्थतः प्रदेशनानात्वाभावे आकाशस्य प्रत्येकं रूपादिज्ञानं प्रसज्येत । आकाशस्य कर्ण...कथं स्युः । कार्यव्यतिरेकोपलक्षणाच्च कारणभेदस्य । न हि अग्निरारोपितोऽपि दहति, मुख्यार्थाभावप्रसङ्गात् । कुतश्चित् प्रदेशनियमाभ्युपगमे तद्भेदोऽवश्यम्भावी । विप्रकृष्टदेशानामपि शब्दानां श्रुतिः स्यात् संयुक्तसमवेतत्वस्य ग्रहणकारणस्य भावात् आत्माकाशयोः सर्वगतत्वात् मनसश्च सक्रियत्वात् । अदृष्टनियमे मनः अतिरिच्यताम् । § 3189

**तस्य** आत्मनः **प्रदेशोपचारेऽपि** वस्तुतोऽप्रदेशस्य उपचरित[प्र]देशोपगमेऽपि **युगपज्ज्ञानसंभवः** । दूषणान्तरमाह--**दूरात् शब्दश्रुतिरस्ति एकान्तवादिनां** नैयायिकानाम् । § 3190

कारिकार्थं दर्शयन्नाह--**परमार्थतः** अनुपचारतः **प्रदेशनानात्वाभावे** ऽ्वाकामस्य *__प्रत्येकं रूपादिज्ञानं प्रसज्येत__ । यदेव हि चक्षुरादीनामन्यतमेन मनः संयुज्यते तदेव आकाशेन, ततः संयुक्तसमवायाद् रूपादिग्रहणकाले गगनसमवेतसर्वशब्दग्रहणमिति । यदि पुनः आकाशेन संयोगेऽपि न श्रोत्रेण इत्युच्यते; अत्राह--**आकाशस्य** इत्यादि । **कर्णे** आदि परमतम् आशङ्कते दूषयितुम् । अत्र दूषणं **कथम्** इत्यादि । **स्युरे**व । कुतः ? इत्याह--**कार्य** इत्यादि । **कार्यं** शब्दः तज्ज्ञानं च आकाशस्य, तस्य **व्यतिरेकः** सर्वत्राभावः तेन **उपलक्षणाच्च कारणभेदस्य**[ग]गनप्रदेशनानात्वस्य । उपचारितः तस्य प्रदेशभेदः ततः श्रुतिभेदः इति चेत्; अत्राह--**नहि अग्निरि**त्यादि, कुतो न **दहत्येव** ? इत्यत्राह--**[आरोपितोऽ]पी**त्यादि । माणवकाद् अन्यस्मिन्नपि
/ms जलादौ न दहति अयमिति यन्मुखोस्यः तस्य **अभावप्रसङ्गात्** । उपचारस्य सर्वत्र कर्तुं[शक्यत्वात्] सम्बन्धाद् उष्णस्पर्शाभावस्य च अविशेषादिति भावः । § 3191

577/mkj

सन्तु तत्त्वतः तत्प्रदेशा इति चेत्; अत्राह--**कुतश्चित्** तदविनाभाविकार्यात् **प्रदेशनियमाभ्युपगमे** कर्णशष्कुल्यवरुद्धः अन्यः तद्विपरीतः अन्यः प्रदेशः इति

१० स्य ] प्रदेशरहितस्य ।
१४ * ] आकाशस्य
१६ श्रोत्रेण ] संयोगः ।
१७ आदि ] त्यादि
२० चारितः ] चारतः
२३ ञ्मुखोस्यः ] यन्मुख्योऽर्थः
२४ ञ्धाद् ] यतोऽग्निरपि स्वतः उष्णस्पर्शरहितः, उष्णसम्बन्धादेव उष्णो भवति इत्यर्थः ।

नियमस्य अङ्गीकरणे **तस्य** आकाशस्य **भेदावश्यंभावी** । तथा च एकत्वं गगनस्य दुर्लभम्, आत्मप्रदेशवत् प्रसङ्गश्च चिन्त्यः । निष्प्रदेशत्वे तस्य पुनरपि दूषणमाह--**विप्रकृष्ट** इत्यादि । यत्र न[भ]सि समवेताः सर्वशब्दाः तत्र संयुक्तं मनः ततः **संयुक्तसमवेतत्वस्य ग्रहणकारणस्य भावात्** तं च वरणमिति तर्हि आसन्नेऽपि एतदेव श्रवणकारणम् । स्यान्मतम्--मनःसंयुक्तात्मप्रदेशसंप्राप्तः शब्दो मनसा गृह्यते, *विभुद्रव्यविशेषगुणत्वे सति अस्मदाद्युपलभ्यमानत्वात्, सुखादिवत्, ततोऽयमदोष इति; तत्राह--**आत्माकाशयोः सर्वगतत्वात् मनसश्च[स]क्रियत्वात् विप्रकृष्टदेशानामपि शब्दानां श्रुतिः स्यादिति** । § 3192

एवं मन्यते--क्रियावत् मनः शब्दोऽक्रियः, ततः शब्ददेशं प्राप्य तत् प्रकाशकं चक्षूरश्मिवत् । एवं च दूरादिप्रतीतिः सौगतकल्पिता न विरुध्यते । वीचीतरङ्गन्यायेन अक्रियस्य शब्दस्य आगमनप्रयासपरिहारश्च । अध्वदूरदेशानां श्रवणे कथं निकटा प्रतीतिः ? कथं सखोप्रदेशे चन्द्रमसः प्रतीतिः ? इन्द्रियस्याऽऽशुवृत्तेः; अत्रापि मनसः शब्दग्रहणे तथैव आशुवृत्तिः । /ms अथ मनः शरीरं विहाय नान्यत्र याति; कथं चक्षुर्याति ? गमनादर्शनम् उभयत्र । § 3193

स्यान्मतम्--चक्षुः अर्थदेशं गत्वा तं प्रकाशयति तैजसत्वात् प्रदीपवत्; मनोऽपि इन्द्रियत्वात् नयनवत् इति समानम् । अथ ये श्रूयन्ते शब्दाः तद्देशे तद्गमनम् नान्यत्र देशे; केन कृतमेतत् ? अदृष्टेन इति चेत्; अत्राह--**अदृष्ट** इत्यादि । **अदृष्टेन नियमे मनः अतिरिच्यताम्** अदृष्टत एव तदर्थसिद्धेः त[द]नर्थकमिति ययुक्तं परेण गन्धैकस्य ग्रन्थे, **एकस्य सर्वैः [मूर्ति]मद्भिः युगपत् संयोगः सर्वगतत्वम्, आत्मार*** इति; तं निरसत्वे अनुपपन्नम् इति । § 3194

यदत्राह--**प्रदेशा** इत्यादि । § 3195

...34 प्रदेशाः सन्तु मा वा सम्बध्येद् युगपद्विभुः ।
अनन्तैरपि पर्यायैः तथात्माप्यसकृत्स्वतः ॥ ३४

||§ 3197

विभोरात्मनः अन्यस्य वा यावद्भिः परस्परव्यावृत्तैर्मूर्तिमद्भिः संयोगाः तावन्तस्ते परस्परव्यावृत्तात्मानः संयोगिनः तावतः स्वभावभेदान् अन्यथानुपपत्त्या साधयन्ति । ते पुनः प्रदेशव्यापदेशभाजो भवन्तु मा वा, भाव-

१ भेदा ] दोऽ
२ त ] आकाशस्य ।
४ मिति ] तत्श्रवणमिति
६ *] विभुद्रव्यम् शब्दे आकाशः ।
११ अध्व ] अथ
१२ खो ] शाखा
१९ ताम् ] त्यज्यताम् इत्यर्थः ।
२० युक्तं ] यदुक्तं
२१ *] त्मादेः
२१ त्वे ] तन्निरंशत्वे
२३ द ] तद् दूषय

स्तादात्म्यात्तैः स्वत एव सम्बध्येत । एतेन...पर्याय...। संयोगभेदाभावे तदन्यतमविभागे सर्वेषां सह विभागप्रसङ्गात् । तथा च कस्यचिच्चलने सर्वकार्यद्रव्यं सकृदेव चलेत् सर्वत्र संयोगैकत्वोपपत्तेः । तथा विभुद्रव्यवत् परमाणोः स्वत एवानन्तपर्यायसिद्धिः । § 3198

**प्रदेशा** भागाः **सन्तु मा** वभूवन् प्रदेशा गगनादेः तथापि **सम्बध्येत्** 578/mkj **विभुः** सर्वगतः पदार्थात्मा **युगपत्** सर्वमूर्तैः इतीपेक्षम् । ततः किं जातम् ? इत्याह--**अनन्तैः पर्यायैः आत्म**सम्बाध्येत***स्वत** आत्मने **असकृत्** क्रमशोऽपि **तथा** ।(?]) § 3199

कारिकां विवृणोति--**विभोः** सर्वगतस्य **आत्मनोऽन्यस्य वा** गगनादेः **यावद्भिः** सह **संयोगाः** । कैः ? इत्याह--**मूर्तिमद्भिः** असर्वगतद्रव्यपरिमाणं मूर्तिः, तद्वद्भिः । किंभूतैः ? इत्याह--**परस्यादि*** । किंभूतास्ते ? इत्याह--**परस्परव्यावृत्तात्मानः ते** संयोगाः **तावन्त एव संयोगिन** आत्मादेः **तावतः** /ms **स्वभावभेदान् साधयन्त्येव** । केन हेतुना ? इत्याह--**अन्यथानुपपत्त्या** [अन्यथा] अन्येन तावतां स्वभावभेदानामभावप्रकारेण तेषां याऽ**नुपपत्तिः** तया । तेदि येन स्वभावेन नभोऽभिसम्बद्ध्यते एकेन परमाणुना, तेनैव सर्वद्रव्यैः; तत्परमाणुसंयुक्तस्वभावे सर्वस्य प्रवेश[प्र]सङ्गा[त्] । न वैवमिति । **ते** स्वभावभेदाः, **पुनरे**तद् वितर्के **प्रदेशव्यपदेशभाजो भवन्तु मा वा** भूवन्, **भावो** गगनादिः **तैः** स्वभावभेदैः **स्वत एव** संयोगादिद्वि न पेक्ष्य एव **सम्बध्येत** । कुतः ? इत्यत्राह--**तादात्म्या**दिति । § 3200

नन्वेकः परमाणुः षड्भिः संयुज्यते, न च तस्य तावन्तः स्वभावभेदाः ततो व्यभिचार इति चेत्; अत्राह--**एतेन** इत्यादि । कुतः ? इत्यत्राह--**पर्याय** इत्यादि । तदनुपपत्त्यो किं स्यादिति चेत्; अत्राह--**संयोगभेदाभावे** सर्वावयवानां संयोगैकत्वे तदन्य **तदन्यतमविभागे तेषां** कार्यद्रव्यारम्भकपरमाणूनाम**न्यतमस्य** परमाणोः **विभागे** संयोगाभावे सति **सह** युगपत् **सर्वेषाम**णूनां **विभागप्रसङ्गात्** । तथा किं स्यात् ? इत्यत्राह--**तथा च** सर्वेषां विभागप्रकारेण पक्षवित् पटादौ **कस्यचित्** परमाणो तंबने* **सर्वकार्यद्रव्यं सकृदेव चलेत्** नास्यतु । कुतः ? इत्यत्राह--**सर्वत्र** इत्यादि । सर्वपरमाणुषु **संयोगैकत्वोपपत्तेः** कारणात् **कस्यचित्** परमाणोः **चलने सर्वकार्यद्रव्यं सकृदेव चलेत्** । § 3201

---

५ व] वा
६ दार्थात्मा] पदार्थ आत्माकाशादिः
६ म्] इतीदमत्रापेक्ष्यम्
७ *] आत्मा संबध्येत
७ ने] आत्मना
११ *] परस्परेत्यादि
१५ तेदि] तथाहि--
१६ वैव] चैव
१८ पेक्ष्य] दिनिरपेक्ष
२० ड्भिः] पूर्वादिदिग्वर्तिभिः परमाणुभिः ।
२२ त्यो] त्त्या
२३ त] तदन्य इति निरर्थकं पुनर्लिखितम् ।
२६ वित्] पक्षिवत्
२६ *] णोश्चलने
२७ तु] नास्थात्
२८ संयोगे] गै

आह् परः--क्रियातो विभागः, तत एकस्मिन् परमाणौ क्रियायां तत्रैव स युक्तो नान्यत्र । नहि देवदत्ता[द्] दण्डस्य विभागो सर्वतः सर्वस्य /ms भवितुमर्हति तत्कथमुच्यते— **तदन्यत[म]विभागेमेहसर्वेषां विभागप्रसङ्गात्** इति ? तन्न; संयोगविनाशस्य विभागत्वात्, संयोगस्यधकत्वे तस्याप्येकत्वात् । न हि एकस्य घटस्य बहवः प्रध्वंसाः । अथ विभागात् संयोगविनाशो न पुनः स एव स इति चेत्; न; तथाऽप्रतीतेः । नवै खलु संयोगप्रतीतिरस्ति, यतः सः सन् तस्य विनाशकस्यात् । [तथा]प्रतीतिसद्भावे यासकृदेव संयुक्तं विभक्तोपुरुदंडादिति प्रतीतिः स्यात् । न चैवम्, विरोधात् । नहि यदैव दण्डी तदेकदण्डी पुरुषो भवति । अथ संयोगस्य विनश्यदवस्थायाः विभागः तेनायमदोषः; *तदवस्था संयोग एव चेत्; स एव दोषः । 579/mkj अन्या चेत्; यदि तत्कालभाविनी; युगपत् त्रयप्रतीतिः--संयोगः, तदवस्था, विभागश्च इति । अथ तदुत्तरकालभाविनी; तदा न तर्हि संयोगः । तथा चेत्; न नहि विभागात् संयोगनाशः । पूर्वं तस्य नाशात् तदंतश्चेत्; अन्योऽन्यसंश्रयः--संयोगनाशाद् विभागतः तन्नाश इति । § 3202

पर आह--विनाशसककारणसमग्रता विनश्यदवस्थेति; तत्काले संयोगस्य भावे स एव दोषः--संयोगविभागयोः सहप्रतीतिरिति, विभागस्यैव तद्विनाशककारणत्वात् । अथ विभागजेन विनाशेन तिरस्कारात् न तत्काले तत्प्रतीतिः; तदसत्; ताभ्यामुत्तरकालभावी विनाशः कथं पूर्वसंयोगतिरस्कारकारी । नहि रात्रादविद्यमानोदिवाकरप्रतानः तदाकारानिक- /ms रतिरस्कारकारी । § 3203

स्यान्मतम्--विभागसंयोगस्यवनाशयोराशुवृत्तेरेककालताध्यवसायः, ततो विभाग कालेऽपि अध्यारोपेण तद्विनाशस्य भावात् तेन तत्तिरस्कारः; तदपि न सुन्दरम्; यतः अध्यारोपितस्य अर्थक्रियासामर्थ्यनिषेधात् । § 3204

किं च, भावपक्षस्य बलीयस्त्वात् भावेन सता संयोगेन विनाशस्य तिरस्कारो युक्तः, इतरथा ज्ञानज्ञानव्यवाये विच्छिन्ना व्यवाये विच्छिन्ना ज्ञानव्यवाये विच्छिन्ना वंशादिस्वरधारा प्रतिपत्तिर्न स्यात् । § 3205

---

२ स] विभागः ।
२ विभागो] गे
३ ह] भागे सह
४ त्वे] स्यैकत्वे
४ त] तद्विनाशरूपस्य विभागस्य ।
५ विनाशो] भवति ।
६ स] संयोगनाशः ।
६ स] विभागः ।
६ तीति] संयोगविनाशात् पृथक् विभागप्रतीति
७ सः] विभागः ।
७ स्य] संयोगस्य ।
७ क] कः
७ या] च
८ क्तो] संयुक्तविभक्तौ
८ पुरुदंडादिति] पुरुषदण्डाविति
९ ण्डी] तदैवाऽदण्डी
१० विभागः] जायते ।
१० *] संयोगस्य विनश्यदवस्था ।
१३ हि] न तर्हि
१३ दंत] तत
१४ तः] गः, ततः
१५ क] शक
१८ त] विभागकाले ।
१८ त] संयोगप्रतीतिः ।
१९ रात्राद] व
१९ दाकारा] तारा
२१ व] गवि
२२ त] संयोगतिरस्कारः ।
२६ वाये] इति ।

अपि च, कोऽयं तेन तस्य तिरस्कारः ? विनाशकरणं चेत्; तर्हि[न]विभागात् संयोगविनाशः, ततः संयोगस्य[अ]भावतो विनाशो न विभागादिति प्राप्तम् । अथ सातस्थगतं तदपि; दृश्यसास्वरूपाखण्डने युक्तम् । तन्न संयोगकालविभागः । पुनः स्यादिति चेत्; तद्विनाशसमये स्यादिति न विभागप्रयुक्तः तद्विनाशः, सहभावात् । कुतस्तर्हि विनाशः ? कुतो विभागः ? क्रियत इति चेत्; अत एव विनाशः, तथादर्शनात् । न च तद्विनाशास्तत्कालेऽपि विभागः प्रतीतिभाक् । ततः स्थितम्--संयोगविनाशो विभागः, तस्य चैकत्वे विभागैकत्वम् इति । एवमनैकान्तिकत्वे परिहृते यत्प्राप्त दर्शयन्नाह— **तथेत्यादि** । **तथा** तेन प्रकारेण सति तत्परिहारे **विभुद्रव्यवत् परमाणोः अनन्तपर्यायसिद्धिः स्वत एव** । § 3206

/ms निगमनमाह--**तत** इत्यादि । § 3207

ततः § 3208

...35 क्रमेणानुभवत्तत्त्वं चेतनाचेतनात्मकम् ।
चैतन्यं संसारेतरव्यवस्थाप्रत्यनीकतः ॥ ३५ ॥§ 3210

...36 नान्यदेव ततो ज्ञानं सामान्यात्तदात्मनः ।
स्वतस्तादात्म्यपरिणामात् सम्बन्धादनवस्थितेः ॥ ३६ ॥§ 3212

१580/mkj

**क्रमेण तत्त्वमेकत्वम् अनुभवत्** द्रव्यं भवति इत्याध्याहारः । किंभूतम् ? इत्याह--**चेतने**त्याह । कीच द्रव्यं **चेतनात्मकम[चेतनात्मक]**न्यदिति । कुतः चेतनात्मकमिति चेत् ? अत्राह--**चैतन्यमि**त्यादि । कथं **संसारेतरव्यवस्था** इति चेत् ? अत्राह--**प्रत्यनीक** इत्यादि । यत एवं **ततो नान्यदेव ज्ञानम्** आत्मनः । कुतः ? इत्याह--**सामान्ये**त्यादि । सोऽपि कुतः ? इत्याह **तादात्म्यपरिणामात्** । एतदपि कुतः ? इत्याह--[सम्बन्धादनव-

१. तद्विनाशकाले तत्काले वा ।

१ तेन] विनाशेन ।
२ स्य] विनाशात् ।
३ तं] अथ त[[तस्मिन् तिष्ठतीति तत्स्थम् ।]]तत्स्थं तत्
३ पि] उच्यते उपचारात् ।
३ सा] स्य
४ काल] ले
६ त] क्रियातः
७ त] एतत् उच्यमानम् ।
७ द्विनाशास्त] श-त
८ त्प्राप्त] प्तं तत्
१८ त्याह] त्यादि
१८ कीच] जीव

स्थितेः] सम्बन्धान्तरकल्पनायामनवस्था[ऽ]निवृत्तेः । कुतस्तन्निवृत्तिरित्याह—**स्वत** इत्यादि । तादात्म्यसम्बन्धादेव नान्यतः । § 3213

प्रकृतमुपसंहरन्नाह--**तदयम्** इत्यादि । § 3214

तदयं चेतनो ज्ञाता संवेदनात्मा प्रतिक्षणम् ।
तत्प्रतिबन्धविश्लेषे सर्वज्ञः सर्वार्थदृक् ॥ ३७ ॥
अन्यथाऽप्राप्यकारित्वात् कुतो व्याप्तिग्रहो यतः ॥
[१/२] ॥§ 3217

यत एवं **तत्** तस्माद्यं प्रत्यक्षवेद्यः । किं घटादिः ? नेत्याह--**चेतनः** । चेतनासम्बन्धात् स इति चेत्; अत्राह--**संवेदनमेव आत्मा** स्वभावो यस्य स **संवेदनात्मा** । [अ]भावमात्रात्मक इति चेत्; नेत्याह--**ज्ञाता** स्वं परं च जनातीत्यर्थः । स किम् ? इत्याह— **सर्वज्ञः** । कस्मिन् सति ? इत्याह--**[तत्]प्रतिबन्धविश्लेषे** । कुतः ? इत्याह--**सर्वार्थ** इत्यादि । कदाचित् सर्वज्ञः पुनरितरः स्यादिति चेत्; नेत्याह--**प्रतिक्षणं** पुनः प्रतिबन्धकारणाभावादिति भावः । सन्निहितमेव जानाति नेतरतन्नेदमिति चेत्; अत्राह— **अप्राप्य-कारित्वाद्ये***तनस्येति । **कुतोऽन्यथा व्याप्तिग्रहः ? यतो**ऽनुमानं वेदार्थपरिज्ञानं वा ? § 3218

विपक्षे बाधकं दर्शयन्नाह--**सर्वज्ञ** इत्यादि । § 3219

...38 सर्वज्ञः करणपर्यायव्यवधानातिवर्तिधीः ।
परिक्षीणदोषावरणो नो चेत् भासयते हि कः ॥ ३८
॥§ 3221

तन्नापरतः कस्यचित् सर्वज्ञत्वं सत्...इति सुभाषितम् । § 3222

**करणानि** इन्द्रियाणि, **पर्यायः** परिपादिःक्रम इति यावत्, **व्यवधानं** देशादिना विरोधानम्, त्यतिवर्त्तति इत्येवं शीला **धीर्यस्य** स तथोक्तः **स-**

१ रि] त्तिः ? इ
७ यं] दयं
८ स] चेतनः ।
९ क] प्रतिभासमात्रत्वात् शून्यः स्यादिति शङ्काकर्तुरभिप्रायः ।
१३ मिति] नेतरदिति
१४ *] चे
१८ चेत्] तुलना— यदाह अकलङ्कः--यदि सूक्ष्मे व्यवहिते वा वस्तुनि बुद्धिरत्यन्तपरोक्षे न स्यात् कथं तर्हि ज्योतिर्ज्ञानाविसंवादः ? ज्योतिर्ज्ञानमपि हि सर्वज्ञप्रवर्तिमेव, एतस्मादविसंवादिनो ज्योतिर्ज्ञानात् सर्वज्ञसिद्धिः । तदुक्तम्—
धीरत्यन्तपरोक्षेऽर्थे न चेत्पुंसां कुतः पुनः ।
ज्योतिर्ज्ञानाविसंवादः श्रुताचेत्साधनान्तरम् ॥
इति ।--धर्मो॰ प्र॰ पृ॰ २४६ ।
२० रिपादिः] टिः
२१ दिना] आदिशब्देन काल-स्वभावपरिग्रहः ।
२१ वि] ति
२१ त्य] तान्य
२१ ति] ते

/ms **र्वज्ञः** । कुतः ? इत्याह-- **परिक्षीणदोषावरणभास्नयतोनो चेत्** इत्थम्भूतः सर्वज्ञेन यदि, **कः** सर्वज्ञः ? न कश्चित् । § 3223
581/mkj

कारिकातात्पर्यं दर्शयन्नाह--**तन्न** इत्यादि । यत एवं **तत्** तस्मात् **नापरतः** भिन्नज्ञानात् चक्षुरादेर्वा **कस्यचिद्** ईश्वरादेः **सर्वज्ञत्वम्** । कुतः ? इत्यत्राह--**सत्** इत्यादि । **इत्येवं सुभाषितं** मम इत्याध्याहारः । § 3224

एवं योगसौगतसायने अशेषज्ञां निराकृत्य साङ्ख्यमते तन्निराकर्तुकामः तन्मतमुपन्यस्यव्यवकारेत्यादि-- § 3225

...39 अहङ्कारमनोबुद्धिचैतन्यादिविभागतः ।
उपयोगमात्मनोऽज्ञस्य साङ्ख्याः संचक्षतेऽचितः ॥
३९ ॥§ 3227

चैतन्यवृत्तिमचेतनस्य स्वार्थमिन्द्रियाणि आलोचयन्ति मनः सङ्कल्पयति अहङ्कारोऽभिमन्यते बुद्धिरध्यवस्यति इति विनियोजयन्तः कापिलाः केवलं...। बुद्ध्यध्यवसितमेवार्थं पुरुषश्चेतयते इत्येकान्ते न कश्चित् सर्वदर्शी स्यात् चक्षुरादिनिवृत्तेर्बुद्धेर्दर्शनात् । यदि पुनः स्यात् तथैव पुरुषस्य बुद्धिरिति अध्यवस्यत्येव तत्र किमालोचनादिभेदकल्पनया ? अवग्रहादिज्ञानविशेषाभिधानबहुत्वात् परिसङ्ख्या विरुध्येत तदुपयोगविशेषाणां मतिश्रुतादिविषयत्वात् । § 3228

**अहङ्कारादीनां** कृतद्वन्द्वंजां **विभागेन** सह तासः तेन ततः, **आत्मनो** जीवस्य **उपयोगं** व्यापारविशेषं आलोचन-मनन-सङ्कल्पनाऽध्यवसायलक्षणसं**ज्ञस्य** अचेतनस्य । किं कुतः स न ? इत्याह--**अपितः** चितः पुरुषादन्यस्य इत्यर्थः । **साङ्ख्याः संचक्षते** कथयन्ति । तथा च तेषां राद्धान्ते **इन्द्रियाण्यर्थमालोचयन्ति, अहङ्कारोऽभिमन्यते, मनः संकल्पयति, बुद्धिरध्यवस्यति, पुरुषश्चेतयते** । इति । § 3229

अनेन चेतनात्मधर्मान् आलोचनादीन् अचेतने प्रधाने अध्यारोपयन्तः कापिला मूढमतयः इति दर्शयति । नहि अन्यधर्ममन्यत्र जानन् स्वस्थः, इतरथा हेम्नो पीततां शुक्ले शङ्खे पश्यन् स्वस्थो भवेत् । कथं ते तद्धर्मा

---

१ तो ] णो भासयते
२ ज्ञे ] ज्ञो
६ ने ] शासने
६ ज्ञां ] ज्ञानं
७ का ] न्यस्यति, अहङ्का
१७ न्द्वंजां ] द्वन्द्वानाम्
१७ तासः ] त[[तत्पुरुषसमासः इत्यर्थः ।]]सः
१९ सं ] णम् अ
१९ अपितः ] अचितः
२० राद्धान्ते ] सिद्धान्ते । द्रष्टव्यम्--पृ० ९९ टि० ४ ।
२५ हेम्नो ] म्नः
२५ द्ध ] आत्मधर्माः ।

इति चेत् ? कथं घटस्य रूपादयः ? तथा दर्शनात्; अन्यत्र समानम्--*चेतनाकपलितानाम् आलोचनादीनां प्रतीतेः, ज्ञानदर्शनोपलक्षणत्वादात्मनः । अथ तेषु चेतना समारोपिता प्रतिभांति न मुख्यतः; क्व पुनरियं मुख्यतः ? पुरुषे इति चेत्; न; तत्रैवोप[च]रिताऽस्तु अन्यत मुख्या । तदालोच- /ms नादिव्यतिरिक्ततत: पुरुष प्रतीतिभाक्, यस्य चेतना स्यात् । अथ परमार्थतः पुरुषस्यैव सा बाधवर्जनात्, न तेषां विपर्ययात्; किं पुनस्तेषां स्वतन्त्ये बाधकम् ? चेतनायाः परिणामित्वापत्तिः इति चेत्; किं पुनः साङ्ख्यस्य परिणामित्वमसिद्धम् ? तथेति चेत्; प्रधानमपरिणामीति न युक्तम्--*प्रकृष्ट **प्रकृतेर्महान्** साङ्ख्यका० २२ इत्यादि । प्रकृतिः परिणामिनी, न चेतना इति किं कृतो विभागः ? § 3230
582/mkj

स्यान्मतम्--प्रकृतेः परिणामित्वेऽपि न पुंसस्तत् गोत्रत्वात् भावस्वभावानाम्, अन्यथा दहनवत् जलमपि वाहकं स्यादिति । स्यादेतदेवं यदि प्रधानपरिहारेण पुंस्ये[व] अविकारिरूपं कुतश्चित् प्रतिपन्नं स्यात्, जलपरिहारेण पावकस्य उष्णरूपवत् । न चैवमिति । आगमात् प्रतिपन्नम्, यदाह--**न प्रकृतिर्न विकृतिः पुरुषः** साङ्ख्यका० २३ इति तन्नेदमुत्तरम्; अन्यत्र समत्वात् । § 3231

किंच, तस्तथाविधं पुरुषं कः प्रत्येति ? प्रधानमिति चेत्; कथमचेतनम् ? अन्यथा बुद्ध्यध्यवसितमर्थं चेतयमानोऽपि पुरुषः अचेतनः स्यात् । पुरुष इति चेत्; आगमेन क्रियमाणा तस्य स्वप्रतिपत्तिः यदि कादाचित्का; तदेव तत्परिणामित्वमि वेदागमवैफल्यम् । अभिव्यक्तिरपि नित्यस्य निरस्तेति यत्किञ्चिदेतत् । § 3232

कारिकां व्याख्यातुमाह--**चैतन्यवृत्तिम्** इत्यादि । **चैतन्यस्य वृत्तिम्** आलोचनादिपरिणतिम्, **अचेतनस्य** प्रधानस्य **विनियोजयन्तः** तत्सम्ब- /ms न्धिनीं कुर्वन्तः **कपिलाः** । केन प्रकारेण ? इत्यत्राह--**स्वार्थम्** इत्यादि । ते किं कुर्वन्ति ? इत्याह--**केवलम्** इत्यादि । दूषणान्तरमत्रैव दर्शयन्नाह--**बुद्ध्यध्यवसितम्** इत्यादि । बुद्ध्यध्यवसितमनुकृतंनष्वितं * निश्चयस्यापि

१ नात्] इति चेत् ।
२ *] चेतनाव्याप्तानाम् ।
२ प] कव
३ तिभांति] भाति
३ मु] चेतना ।
४ त] पुरुष एव ।
४ अ] आलोचनादौ ।
४ त] त्र तु
४ दा] न हि आ
५ तः] क्तः
५ पुरुष] षः
६ सा] चेतना ।
६ तेषां] आलोचनादीनाम् ।
६ न्ये] चैतन्ये
८ *] प्रकृष्ट इति व्यर्थम् ।
११ गोत्र] चित्र
१२ वा] दा
१५ प्र] कारणम् ।
१५ कृतिर्न] कार्यम् ।
१७ स्त] वः[[युष्माकं मते ।]] त
१७ म्] प्रत्येति इति सम्बन्धः ।
२० वे] मिति । न चे
२४ क] का
२४ पिलाः] सांख्याः ।
२६ *] नुकृतनिश्चयम्
२६ स्यापि] धि

गमरूपत्वाद् **एव**कारेण बाह्यस्य व्यवच्छेद स हा **अर्थम्** अर्थाकारं **पुरुष-श्चेतय[ते] इत्येवं यद्येकान्तो**ऽवश्यंभावः[तस्मिन्] **न कश्चित्** कपिलोऽन्यो वा **सर्वदर्शी स्यात्**। कुतः ? इत्यत्राह--**चक्षुरादिदितिवृत्तेः** चक्षुरादीनां व्यावृत्तेः। कुतः ? इत्यत्राह--**दर्शनाद् बुद्धेः पुरुषे**ण साक्षात्करणात् । § 3233

स्वरि रेवं मन्यते--यदि बुद्धिं पुरुषो न पश्यति; कथं तदयवसि तमर्थं पश्येत् ? नहि दर्पणाऽदृष्टौ तद्गतमुखविश्वदृष्टिरस्ति । § 3234

किंच, बुद्धेस्तेनाऽदर्शने कुतस्तस्याः सिद्धिः, अर्थाध्यवसायसिद्धिर्वा ? पुरुषादिति चेत्; स तां न पश्यति, *तत एव तत्सिद्धिः इति व्याहतम् अतिप्रसङ्गात् । स्वत इति चेत्; सौगतमतानुप्रवेशः, अर्थाकारस्य स्वसंवेद-नस्य सौगतेनोपगमात् । अथ करणमन्तरेण अर्थग्रहाऽसिद्धेः *तत्सिद्धिः; न; चक्षुरादेरेव तथा सिद्धः ततोऽप्यन्यकल्पनायामनवस्था--ततोऽप्यपरस्य कल्पनातु । पश्यतीति चेत्; यदालोचनादिप्रक्रमेण अर्थवम त्त युक्तम्; तत्र अपरचक्षुरादिविरहानवस्थाप्राप्तारन्यथेति चेत्; अर्थमपि तत्रैव पश्यतीति सूक्तम्--**बुद्ध्यध्यवसितम्** इत्यादि ! ततः सूक्तम् **चक्षुरादिनिवृत्तेर्दर्शनात्** इति । § 3235

/ms अपरे पठन्ति **चक्षुरादिवृत्तेर्दर्शनात्** इति । तत्रासमर्थः--चक्षुरादिवृत्त्या दर्शनाद् अर्थस्य तस्या एव तेन सम्बन्धात्, पुरुषस्तु बुद्धिप्रतिबिम्बमेव पश्यति नार्थसुगतवदिति । § 3236

583/mkj

परमतमाशङ्कते--**यदि पुनः** इत्यादि । **यदि** इति पराभिप्रायस्य **पुनः** इति पक्षान्तरस्य द्योतने यथा **कश्चित् सर्वदर्शी स्यात् तथैव** तेनैव आलोचनाद्य-न्तरमन्तरेण प्रत्यक्षताप्रकारेण **पुरुषयस्यबुद्धिः स्यात्** इति गतेन सम्बन्धः । **अध्यवस्यत्येव** निश्चिनोति तथैव बुद्धिः अर्थम् इति सर्वमपेक्षम् । **एव**कारेण कस्यचिदप्यर्थस्य अनध्यवसायो नास्तीति दर्शयति । § 3237

एतद् दूषयन्नाह--**किं तत्र** इत्यादि । **तत्र** [त]स्मिन्ननन्तरोक्ते परमते **किम् आलोचनादिभेदकल्पनया ? स्वार्थमिन्द्रियाण्यालोच्यन्य** इत्यादिना **किम्** ? यथैव पुरुषः तद्भेदकल्पनामन्तरेण बुद्धिं पश्यति, बुद्धिर्वा[अर्थम्]

१ हा] दमाह
३ क्षुरादिति] दिनि
५ रि] सू[[आचार्यः ।]]रि
५ सि] तदध्यवसि
७ स्याः] बुद्धेः ।
८ स] पुरुषः ।
८ तां] बुद्धिम् ।
८ *] पुरुषादेव ।
१० *] करणभूतायाः बुद्धेः सिद्धिः ।
११ सिद्धः] [[अर्थग्रहणसिद्धेः ।]]तत्सिद्धेः
१२ नातु] नात्
१२ दा] यदि आ
१२ त्त] वत्; तद
१३ स्थाप्राप्तार] प्राप्तेः । अ
१३ त्रैव] तथैव[[चक्षुरादिकमन्तरेण ।]]
१६ रे] व्याख्याकाराः ।
१६ त्रास] तत्राय
१७ स्या] चक्षुरादिवृत्तेरेव ।
१७ तेन] अर्थेन ।
१८ नार्थ] र्थम्
२१ स्य] षस्य
२२ म्] क्ष्यम्
२५ न्य] लोचयन्ति
२६ त] आलोचनादिभेदमन्तरेण ।

इन्द्रियाणि तदालोचनाति मनः तत्संकल्पनम्, अहङ्कारं तदभिमा[नम्] तदपरेन्द्रियादिकल्पनामन्तरेण [अ]ध्यवस्यति, अन्यथा अनवस्था। ततो न कश्चित् सर्वदर्शी स्यात्, तथा सोऽर्थं पश्येत् इति भावः। § 3238

अधुना चैतन्यान्नान्या बुद्धिः इति दर्शयितुं तदीयहेतोर्व्यभिचारविषयं दर्शयन्नाह— **अवग्रहादिज्ञान** इत्यादि। तात्पर्यमिदमत्र-तथा चैतन्यं बुद्धिः इत्यभिधानभेदमादा[य, तथा अ]**वग्रहादिज्ञानविशेषाधातबुहुत्वात्** कारणात् **परिसंख्या** बुद्धिश्चैतन्यमिति परिगणनं **विरुध्येत** तत्त्वबहुत्वं स्यादिति। § 3239 /ms

स्यान्मतम्--तदभिधानबहुत्वं जैनस्य स्वेच्छाकल्पितमिति; परमपि साङ्ख्यस्येति समानम्। लोकप्रसिद्धिरुभयत्र। स्यादेतत्, अवग्रहादिज्ञानविशेषा बुद्धेरेव भेदाः ततस्तदभिधानबहुत्वं बुद्धेरेव पर्यायशब्दबहुत्वमिति; तत्राह--**सति** इत्यादि। तस्य आत्मनः उपयोगविशेषाः **तदुपयोगविशेषाः** तेषां **मतिः** अवग्रहाद्यात्मिका **श्रुतं** शाब्दं ज्ञानम् **आदि**— परिग्रहः ते **विषयो** येषां तेषां भावात् तत्त्वात् **परिसङ्ख्या विरुध्येत**। एवं मन्यते--यथा अवग्रहादेर्बुद्धावन्तर्भावः तथा तस्या आत्मनीति। § 3240

भवतु बुद्धिचैतन्ययोरभेदः। तत्र को दोष इति चेत्? अत्राह--**नास्ति ज्ञत्व**मित्यादि। § 3241

...40 नास्ति ज्ञत्वं प्रधानस्य चेतनाऽपरिणामिनः।
पुरुषस्य न वै कश्चित् सर्वज्ञोऽनुभयात्मकः॥ ४०
॥§ 3243

यथैव हि शरीरयोगात् शरीरी प्राणयोगात् प्राणीति व्यपदेशश्चेतनस्य तथा अर्थान्तरेण अहङ्कारादिना योगाद् अहङ्कारी बोद्धेति यदि व्यपदिश्येत; दृष्टिश्च पृथक् प्राप्नोति। ततोऽयुक्तम् घटादेरिव अचेतनस्य आलोचनादिकम्। तन्न...अन्यथा। सतोऽपि अज्ञत्वाबुद्धिमत्त्वाभ्यां न स युक्तः। कः सर्वज्ञः? § 3244

[अयं]भावः--**चेतना** परिणामात्मिका बुद्धिर्न **प्रधानस्य पुरुषस्य वाऽपरिणामिनः** इति। **ज्ञत्वं नास्ति प्रधानस्य** अचेतनस्य। **न च** नैव इष्यते। साङ्ख्येन पुंसा ज्ञत्वं परिणामित्वक्रयाकपिलमास्ते को **न कश्चित् सर्वज्ञोऽनुभयात्मकः** प्रधानपुरुषस्वरूपाद् भिन्नस्वाभ्यान्यस्यानभ्युपगमात्। अथवा, तत्र 584/mkj
**क** आत्मा सर्वज्ञः स्यात् तदुरूपस्वभावाद् भिन्नस्वभावः। § 3245

---

१ ति] नानि
५ था] यथा
६ विशेषाधात] षाभिधान
८ त]
अवग्रहादिज्ञानविशेषाभिधाननानात्वम्।
११ ति] मति
१२ म्] पदेन स्मृत्यादि
२६ मास्ते] क्रियाकवलितमास्ते
२७ स्वाभ्या] स्वभावस्या
२८ दुरूप] तदुभय

कारिकार्थं दर्शयन्नाह--**यथैव हि** इत्यादि । **यथैव हि स्पष्टं शरीरयोगाद्धेतोः** जीवः **शरीरी प्राणयोगात् प्राणी इत्येवं व्यपदेशः चेतनस्य** जैनमते अर्थान्तरमात्मनोऽनाच्छरीरादि, तद्योगादेव, न स्वतः, **तथाऽर्थान्तरेण अहङ्कारादिना योगाद् अहङ्कारी बोद्धा इत्येवं यदि व्यपदिश्येत** साङ्ख्यः चेतनः /ms इत्यनुवर्त्तते । एवदूषयन्नाह--**दृष्टिश्चे**त्यादि । **दृष्टिरपि** चैतन्यमपि न केवलम् अहङ्कारादि **पृथक्** भिन्नं पुरुषात् **प्राप्नोति** । नैयायिकस्य न गाङ्ख्यस्य मनत्यादिति भावः । न चैवम्, अतो दृष्टिवद् अहङ्कारादिकं ततोऽभिन्नमभ्युपेयम् । यत एवं **ततोऽयुक्तम्** । कस्य ? इत्याह— **अचेतनस्य** इत्यादि । किम् ? इत्याह--**आलोचने**त्यादि । कस्येव ? इत्याह--**घटादेरिव** । प्रकृतमुपसंहरन्नाह--**तन्न** इत्यादि । विपक्षे बाधकमाह--**अन्यथा** इत्यादि । पुरुषस्य स स्यादिति चेत्; अत्राह--**सतोऽपि** । साङ्ख्यं पुरयोप्रमाणकत्वादसन्नेव । तथाप्युच्यते— **सतोऽपि** पुरुषस्य **न संयुक्तः** कुतः ? इत्याह--**अज्ञत्वाऽबुद्धिमत्त्वाभ्याम्** । अन्यः **सर्वज्ञ** इति चेत्; अत्राह--**क** इत्यादि । पूर्ववद् व्याख्याद्वयम् । § 3246

साप्रतं पुरुषसाधकं परस्य प्रमाणं दूषयन्नाह--**चेतनाचेतनमि**त्यादि ।
§ 3247

...41 चेतनाचेतनं सर्वं चेतनं वाऽनुमीयते ।
परार्थं सङ्घातत्वात् कर्तृत्वं चक्षुरादिवत् ॥ ४१
॥§ 3249

परार्थाः [चक्षुरादयः सङ्घातत्वात् शयनाद्यङ्गवत्] इति चेतनसङ्घातेन चेतनाचेतनसङ्घातेन अपरार्थेनानैकान्तिकत्वादहेतुः । न हि चक्षुरादीनां सङ्घातत्वमन्यदेव । तत्समवस्थानमितरत्रापि विशेषाभावात् व्यामोहाभावात् ।
§ 3250

**चेतनं सर्वं चेतनाचेतनं** वा **सर्वम्** इति धर्मिद्वयम् न पुनः अचेतनं सर्वम् इति वक्तव्यम्, परिप्रति सिद्धसाध्यतापत्तेः, तेनं तथाभ्युपगमात् । **परार्थं** परप्रयोजन**मनुमीयते** अकापिलेन । कुतो हेतोः ? इत्याह--**सङ्घातत्वाच्चक्षुरादि[वदि]**ति । चेतनस्य सर्वस्य **कर्तृत्वम्,** अन्यथा चक्षुरादेरवि तन्न स्यात् । नहि तस्यापि परोपकरणादन्यत् । तथा च **अकर्त्ता निर्गुणः** इत्यादि

३ नोऽनाच्छ ] त्मनस्तच्छ
३ द्योगादेव ] व्यपदेशः ।
५ एव ] एतद्
७ स्य ] -ति साङ्ख्यस्य न नैयायिकस्य तेन
७ त्या ] मनना
७ त ] पुरुषात् ।
११ यो ] साङ्ख्यपुरुषस्य अ
१२ संयुक्तः ] स युक्तः
१५ प ] साङ्ख्यस्य ।
२४ रि ] परं
२५ अकापिलेन ] कापिलेन
२६ म् ] अनुमीयते ।
२६ त ] कर्तृत्वम् ।
२७ इ ] द्रष्टव्यम्--पृ० २९९ टि० ६ ।

विरुध्यते । अथ नानुमीयते, तर्हि तेनैव पुरुषसाधनस्य व्यभिचारः इति भाः । पक्षीकरणान्न तेनम् व्यभिचार इत्य दि चेतनवर्गात् चेतनाचेतनवर्गाद्वा /ms सोऽन्यः स्याद् यदर्थं तन्निमित्तं सकलं जगद् भवेदि[ति] । तन्न कश्चित् साध्यानवस्थितेः तत्राप्यपरापरसाधनात् । § 3251

कारिकां व्याख्यातुं परप्रयोगमाह--**परार्था** एताद्यन्त दूषयन्नाह--**चेतने** त्यादि । **चेतनसङ्घातेन** पुरुषसङ्घातेन **चेतनाचेतनसङ्घातेन** प्रकृतिपुरुषस- 585/mkj ङ्घातेन **अपरार्थेन अनेकत्वादहेतुः** सङ्घातत्वादिति धर्मः । § 3252

ननु यथं यादृशं सङ्घातत्वं चक्षुरादीनां न तादृशं विपक्षे, ततो न व्यभिचार इति चेत्; अत्राह--**नहीत्यादि** । [हि] यस्मान्न **चक्षुरादीनामपि** न केवलं प्रकृतस्य **सङ्घातत्वमन्यदेव** अन्यत्र समवस्थानात् अविनिर्भागवर्तनादपि तु तदेव । भो तु तथापि न तद्विपक्ष इति चेत्; अत्राह-- **तत्समवस्थानमितरत्रापि** प्रकृतविपक्षेऽप्यस्ति । न चक्षुरादीनां सङ्घातत्वम् एकत्वम्, न न [चेतनानां] चेतनाचेतनानां वा ततो[ऽ]विशेष इति चेत्; अत्राह--**विशेषाभावादिति** । **भेदानां परिमाणात्** इत्यादिना साङ्ख्यका° १५ एकपरिमाणस्य रूपादेभात् भेदस्य च सर्वत्र साधयितुं [श]क्यत्वात् इति भावः । § 3253

यत्पुनरुक्तम्--**शयनाद्यङ्गवदिति** । तत्रेदं विचार्यते--कस्तत्र परः यदर्थं तत् ? शरीरमिति चेत्; न; तद्भोक्तृत्वापपत्तेः । अत एव न बुद्धिरपि । पुरुष इति चेत्; कः तत्तदर्थं च प्रत्येति ? प्रधानमि[ति] नोत्तरम्; उक्तत्वात् । स एव स्वपरप्रकाशरूपत्वात्तस्येति चेत्; चक्षुरादावपि स्वार्थमिन्द्रियादि स एव अवगच्छतीति किमर्थं तत्रानुमानम् ? व्यामोहव्यवच्छेदार्थ *; शयनादौ /ms तदर्थं तद[त]स्तत्राह--**व्यामोहभावात्** । तथेति चे[त्;] निदर्शनान्तरासत्तिः अ[न]वस्थाकारिणी । चक्षुराद्यदा करणम् अन्योन्यमप्रयमावकति * । § 3254

किंच, स्वपरप्रकाशकत्वं पुंसः परिणामाविरोधि, सदेकस्वभावे तदयोगात् । § 3255

ननु रश्वेतरग्रहणवत् कस्यचित् कारणापि यदि तस्योपयोग[ः] किं विरुध्येत ? न किं[चित्], केवलमकर्तृत्वं न स्यात् । § 3256

---

१ भाः] भावः
२ म्] तेन
२ दि] पि
५ प] परार्थाः चक्षुरादयः सङ्घातत्वात् शयनासनाद्यङ्गवत् इति ।
५ न्त] इत्यादि । तद्
७ त्वा] कान्तिकत्वा
८ थं] यथं इति व्यर्थम् ।
११ तु] भवतु
१३ न] येन
१४ इ] समन्वयात् शक्तितः प्रवृत्तेश्च । कारणकार्यविभागादविभागाद्वैश्वरूपस्या ॥ इति शेषः ।
१५ रूपादेभात्] रूपादेरभावात्
१९ स] पुरुष एव ।
२१ *] र्थं
२२ र्थं] तदस्ति, यदर्थं
२२ व्यामोह] हा
२२ रास] प
२३ म्] ?
२३ *] अन्योऽन्याश्रयमाकर्षति
२५ त] स्वपरप्रकाशकत्वायोगात् ।
२७ श्वे] ननु स्वे
२७ णापि] कारणेऽपि

अपि च, आत्मग्रहणे यस्यआलोचनादिकमपेक्षेत; अनवस्थानम् । अन्यथा विषये स किं[तदपेक्ष]ते ? ताथात्मानं तत्प्रत्येति, तदर्थश्चयनादिकं न प्रतीयते, उभयप्रतिपत्तिनान्तरीयकत्व तत्परीतेहितिदृश्चांतेसर्वमसिद्धम् । § 3257

एतेन धर्म्याद्यसिद्धिरपि वित्तिता । तन्न कपिलमते कश्चिदशेषवित्, नापि मुक्त इति । § 3258

[तदेवाह--दृश्य-]**दर्शनयो**रित्यादि । § 3259

...42 दृश्यदर्शनयोर्मुक्तिर्नित्यव्यापकयोः कथम् ।
यतस्तापाद् विमुच्येत तदर्थं पुरुषो यतेत ॥ ४२

॥§ 3261

न प्रधानस्यापि परिणामातिक्रमः, चैतन्यस्य वा, अन्यथा अदृश्यस्वभावं प्रधानस्य प्राप्नोति । दृश्य...तथा...। एतेन पुरुषकैवल्यार्था प्रकृतिप्र-
586/mkj वृत्तिरिति प्रतिविहितम्, प्रागपि प्रकृतिनिवृत्तेः पुरुषकैवल्यसिद्धेः । अत एव न कश्चित् ताप[विमुक्तये यतेत] नहि...। दोषदर्शनतदपघाततद्धेतुप्रयत्नस्वभावैकपुरुषाभावे क्षणिकत्ववत् हेयोपादेयेषु कुतः प्रवृत्तिरिति ? तन्न... ... § 3262

**दृश्यं** प्रधानं **दर्शन**रूपः पुरुषः **तयो[र्मु]क्तिः कथम्** ? किंभूतयोः ? इत्याह— **अनित्ये**त्यादि । **यतो** यभ्यां वक्त **तापा**त्तापत्रयाद् **विमुच्ये[त] तदर्थं वा** तापविमोक्षार्थं वा **यतेत** । कः ? **पुरुषः** । **यत** इति [वा आ]क्षेपे, नैव विमुच्येत **मतेन** वा । § 3263

कारिकार्थमाह--**प्रधाने**त्यादिना । ननु प्रधानं परिणामि न नित्यम्; इत्याह--**न प्रधानस्ये**त्याप्यभ्युपगमसूचको **वि**शब्दः, भावतस्तत्परिणामाभावः, सर्वत्र आविर्भावतिरोभावोपगमात् । स एव परिणामाश्च सोऽपि स्यादतःकरणसंयोगापाये तस्याभिव्यक्तेरुपगमात् । माभूत्तस्य **तद**-

---

१ स्य] यदि
२ ताथा] तथा
२ त्येति] अन्यथा ।
२ र्थ] र्थं
३ ते] येत
३ रीतेहितिदृश्चांते] कत्वात्तत्प्रतीतेरिति दृष्टान्ते
५ वित्तिता] चिन्तिता
८ दृ] तदुक्तमन्यत्र
--दृश्यदर्शकयोः...यतस्तापाद्विमुच्येत तदर्थं च तपश्चरेत् ॥--न्यायवि० वि० प्र० पृ० २३२ ।
१२ वृत्तिरिति] पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥--सांख्यका० २१ ।
१७ अनित्ये] नित्ये
१७ क्त] यस्मात्
१९ तेन] यतेत
२१ त्याप्य] त्यादि । अ
२१ वि] ऽपि
२१ भा] परमार्थतः ।
२२ रिणामाश्च] मश्चेत्;
२३ तः] द् अन्तः
२३ त] परिणामातिक्रमः ।

**तिक्रमः** पुंसो दर्शनशक्त्यतिक्रमः स्यादिति चेत्; अत्राह--**चैतन्यस्य वा** /ms इत्यादि । कुतः ? इत्यत्राह--**अन्यथे**त्यादि । दृश्यस्वभावं जहाति प्रधान-मिति चेत्; अत्राह--**अदृश्यस्वभावम्** इत्यादि । **प्रधानस्य प्राप्नोति** स्यात् । दर्शनभाव एव कुतः ? इत्यत्राह--**दृश्ये**त्यादि । तत्र यदि सर्वथा दृश्यस्व-भावतत्तज्ज *हाति, स्यादयं दोषः, अन्यथा अभयरूपेरहितस्य वन्ध्यास्तनत्वं यावता मुक्तात्मानं प्रति तत्स्वभावपरित्यागोऽपि परं प्रति विपर्ययः, इतथा कपिलेन सह सकलं जगन्मुक्तिभाग् भवेदिति चेत्; तदसत्; यतः यत्र तदा तद्दृश्यरूपता, तत्र तदा सर्वेषां पुंसां दर्शनस्वभावानां भावानां भावात् । नहि समानदर्शनदृश्यानां समानदेशानां घटादीनामयं विभागो दृष्टः । अथ यथा प्रकृते[ः] दृश्यस्वभावस्य परित्यागः,* तथा पुंसो दर्शनस्वभावस्येति चेत्; अत्राह--**तथे**त्यादि । § 3264

दूषणमेतदन्यत्र अतिदिशन्नाहे ते+उत्पाद्य**तेन दृश्यदर्शनयोः मुक्तिः नित्य-व्यापकयोः कथम्** इत्यादिना, **पुरुषकैवल्यार्था** पुरुषस्य कैवल्यं मुक्तिः तद-र्था, **प्रकृतेः प्रवृत्तिः** इत्येतत् **प्रतिबिद्धिंतं** निरस्त्र । न ह्युभयो[ः]व्यापिनित्यत्वे कस्यचित् प्रवृत्तिर्युक्ता । नहि गरानं *तथाविधं क्वचित् प्रवर्त्तते निवर्त्तते वा कुतश्चित्, व्यापिताहानेः । § 3265

किं च, का तस्याः *तदर्था प्रवृत्तिः ? तेन संयोगस्य करणम्; न; तस्य सर्वदा भावात्, कृतस्य कारणाभावात् । तत्संयोगश्च आत्मनः संयोगेन सदृशः एवेन दर्शितं चितं मथ कादाचित्कातत्प्रवृत्तिरिष्यते; तत्राह--**प्रागपि** /ms पूर्वमपि तत्प्रवृत्तेः **प्रकृति[नि]वृत्तेः पुरुषकैवल्यासिद्धेः** प्रतिविहितम् । नहि 587/mkj मुक्तस्य संसारो नाम, अतिप्रसङ्गात् । § 3266

दोषान्तरमाह--**अत एव** पूर्वं कैवल्यसिद्धेरेव । किम् ? इत्याह--**न क-श्चित्** इत्यादि । कुतः ? इत्याह--**तापे**त्यादि । एतदेव भावयन्नाह--**नही**त्यादि । सुगसं । पुरुषस्तर्हि य[ते]त इति चेत्; अत्राह--**दोषदर्शन** इत्यादि । **दोषाणां** रागादीनां च **दर्शनं तेषां** दोषाणा**मपघातो** विनाश[ः]**तद्धेतुश्च**

३ प्राप्नोति] इति ।
५ *] वतां त[[प्रधानम् ।]]त् ज
५ अ] यदि सर्वथा जह्यात् ।
५ रूपे] रूप
५ त्वं] नन्धयव[[वन्ध्यापुत्रवदभावः ।]]दसत्त्वं
६ ति] दृश्यस्वभाव ।
६ रित्यागोऽपि] गेऽपि
६ प] संसार्यात्मानं प्रति ।
६ इ] यदि संसार्यात्मानं प्रत्यपि दृश्यस्वभावतापरित्यागः ।
७ था] इतरथा
८ भावानां] मुक्तात्मनामपि प्रति ।
१० *] संसारिणं प्रति ।
१० था] मुक्तस्य ।
१२ ते+उत्पाद्य] न्नाह--**एतेन** इत्यादि । ए
१४ तिबिद्धिं] विहि
१४ स्त्र] रस्तम्
१४ यो] प्रकृतिपुरुषयोः ।
१५ रानं] गगनं
१५ *] व्यापि नित्यं च ।
१७ स्याः] प्रकृतेः ।
१७ *] पुरुषविमोक्षार्था ।
१९ थ] एतेन दर्शितं चित्तम् । अथ
२० ल्यासिद्धेः] ल्यसिद्धेः
२२ पूर्व] र्वं
२४ सं] गमम्

सम्यग्दर्शनादिः **प्रयतश्चते** एव **स्वभावो** यास्यस्वेवासावेकपु**रुषश्च** **तदभावे** **क्षणिकत्ववत्** **कुतः** **प्रवृत्तिः** । **क्व** ? इत्याह— **हेयोपादेयेष्विति** । § 3267

निगमनमाह--**तन्नेत्यादि** । § 3268

स्वरूपपात्रवेदी सर्वज्ञ इत्येके । तत्राह--[सर्वज्ञ इत्यादि] § 3269

...43 सर्वज्ञः सकलार्थ...अशेषदोषावृतिच्छेदतः,
स्यात् करण... ... ...पुनरत्ययात् ।
ईहानन्तरभाविनां[तु वचसां]... ... ...गतिः,
विज्ञेयान्यविलक्षणा च महतां ज्योतिर्गणानामिव ॥
४३ ॥§ 3273

**सर्वज्ञः** **स्याद्** भवेत् । किंभूतः ? इत्याह--**सकलेत्यादि** । स्वरूपमात्रवेदनस्य सर्वत्राविशेषात् न तावता[अ]शेषज्ञ इति भावः । स्वभावतः स भवेदिति चेत्; अत्राह--**अशेषदोषावृतिच्छेदानिति** * । कया ? इत्याह--**करणेत्यादि** । क्वादे स्यादिति चेत्; अत्राह--**अपुनतृतयादिति** * ननु यद्यसौ वति विवक्षावान्त वेदिति न[स]कलदोषविच्छेदः । अथ न; किं तेनाऽनुपकारिणा इदिचेत्राह--**ईहानन्तरभाविनामित्यादि** । स्वापादावन्यथा भावादिति भावः । ननु वक्ता सर्वोऽपि रथ्योपुरुषवत् सदोष इति चेत्;
/ms अत्राह--**विज्ञेयेत्यादि** । **महताम्** अशेषविदां **गतिः** **अन्यविलक्षणा** प्राक्तनपुरुषविलक्षणा ज्ञातव्या **ज्योतिर्गणनामिव** ॥ छ ॥ § 3274

इति र वि भ द्र पादोपजीव्य न न्त वी र्य विरचितायां सि द्धि वि नि श्च यटी का यां सर्वज्ञसिद्धिरष्टमः प्रस्तावः ॥ छ ॥ § 3275

# नवमः प्रस्तावः : ९ शब्दसिद्धिः

588/mkj

ननु यदीहानन्तरभाविता वाग्वृत्तिर्व्यभिचरति; वाचः तर्हि का वार्त्ता इत्यत्राह--**संसर्गादित्यादि** । § 3276

---

१ श्च ] त्वश्च
१ वेक ] यस्य स चासौ एक
१० स ] मिथ्याज्ञानेऽपि ।
११ * ] दतः इति
१२ क्वादे ] ?
१२ * ] ?
१३ ति ] वाग्
१३ क्षावान्त ] वान् भ
१४ इदिचे ] इति चेत् ? अ
१४ था ] विवक्षाभावेऽपि ।
१५ थ्यो ] रथ्या
१७ ण ] णा
१ दीहा ] विवक्षाप्रभवताम् ।

...1 संसर्गात् परमाणवः परिणता भावाः श्रुतेः गोचराः,
तद्भेदः प्रतिलब्धवर्णपदवाक्यात्माऽभिलापः स्वतः ।
सिद्धार्थो यमुपेत्य वक्ति किमयमाहेत्येसङ्कीर्तितः,
स्वार्थेऽक्षादिव भेदकाङ्क्षणमना सामान्यवेदी जनः ॥
१ ॥§ 3280

निःश्रेयसाधिगतेः... § 3281

**श्रुतेः** श्रवणेन्द्रियस्य **गोचरा** विषया **भावाः** शब्दा न सर्वे घटादयः । शब्दाः ते मा भूवन् तत्परिणामाः स्युः । तदुक्तम्-- § 3282

*अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ वाक्यप० १ ।
१§ 3284

इति चेत्; न; तेषां तदात्मकत्वेन प्रतीति[प्र]सङ्गात् गृहात्मकत्वेन घटादिप्रतीतिवत् । नहि मृदः न परिणामा घटादयोऽतदात्मकाः प्रतीयन्ते किन्तु तदात्मकाः । इतरथा नालिकेरद्वीपायातस्य दहन[वत्त]दभिधानाप्रतीतिः स्यादिति सर्वत्र सङ्केतानर्थक्यम् । § 3285

अथ मतम्--यथा भवतः शब्दे रूपादयो नहिव्यक्ताः सन्ति तथा ममापि शब्दो घटादौ इति; तदसारम्; यतः तत्र तेषामनभिव्यक्तानामनुमानतो व्यक्तिदर्शनादिति प्रतिपादयिष्यते अनन्तरकारिकया । न च तथा घटादौ शब्दास्तित्वे अनुमानाद्य सङ्केतात्तत्र तत्प्रतीतेः, पूर्वमपि स तत्रेति मतिः; सापि न युक्ता; *ततोऽपि तत्र *तदप्रतीतेः । वक्तरि शब्दस्य, भूमावषंस्य प्रतीतेः । नापि देशभेदेन प्रतीयमानयोः परिणामिभावः, सहचरघटपटयोरपि तत्प्रसङ्गात् । भ्रान्तेस्तत्प्रतिभासो द्विचन्द्रवत् जलेतरचन्द्रवद्वा इति चेत्; तर्हि स्वप्नादिवत् शब्दघटप्रतिभासोऽपि भ्रान्त इति कः कस्य परिणामः ? बाधकाभावोऽन्यत्रापि । § 3286

---

७ ते] ते घटादयः, शब्दाः शब्दस्वरूपाः ।
७ रिणामाः] शब्दब्रह्मपर्यायाः ।
१० त] शब्दात्मकत्वेन ।
१० गृहात्म] मृदात्म
११ न] न इति निरर्थकमत्र ।
१२ काः] मृदात्मकाः ।
१२ इ] यदि शब्दात्मकाः स्युर्घटादयः ।
१२ द] यथा नालिकेरद्वीपायातस्य दहनं न प्रतीयते तद्वत् अभिधानस्य प्रतीतिः न स्यात् इति व्यतिरेक्युदाहरणमिदम् ।
१४ हि] योऽनभि
१५ त] शब्दे ।
१७ अनुमानाद्य] नमस्ति । अथ
१७ स] शब्दः ।
१८ *] सङ्केततोऽपि ।
१८ त्र] अर्थे ।
१८ *] शब्दाप्रतीतेः ।
१८ षं] मौ अर्थ
१९ योः] शब्दार्थयोः ।
२१ त्] शब्दात्मकस्य घटस्य प्रतिभासोऽपि ।

तत्त्व तयोर्देशभेदे कथं घट[पट]वत् सामानाधिकरण्यम् ? अस्ति 589/mkj च, गौरयमिति [प्रतीतेः इति] चेत्; एवं सति स्थूलोऽहम् इति प्रतीतेः नात्मा शरीराद्भिन्नः स्यात्, कुन्तेभ्यो वा पुरुषाः कुन्ताः प्रविशन्ति इति प्रतीतेः । सहचरणाद् अत्राऽभेदोपचारश्चेत्; अन्यत्र बाधकाभावादिति समानम् । /ms हेतुफलयोस्तत्त्वादेव परस्परमभेदोपचारो भवति चक्षुषा पश्यति, अन्नं वै प्राणाः इति, किमङ्ग पुनः वाच्यवाचकयोः न भवति ? § 3287

किं च, भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नधिकरणे प्रवृत्तिः सामानाधिकरण्याद्यार्थं गोशब्दयोरस्तीति तयोरेव ऐक्यं युक्तं न गोशब्दार्थयोः तदभावात् । न हि तयोरेकत्वार्थे प्रवृत्तिः, तदपरस्याऽभावात् । एकविभक्तिकत्वं तदिति चेत्; घटपटयोः स्यात् घटपटा इति प्रतीतेः । तादात्म्यं तदिति चेत्; तदसिद्धं तयोः, तदेव च साध्यं साधनं च । तस्मादभेदोपचारेण अयं तत्र शब्द[ः] प्रवर्त्तते--अयं मांसपिण्डो गोसंज्ञः, तथा भेदेन च अस्य मांसपिण्डस्य गौरिति संज्ञा । § 3288

अपरेषां तु परिहारः--गौः शब्दो यस्य स गोशब्दः इत्यस्य पदसमुदायस्य लुप्तोऽन्तरावयवस्य प्रयोगः गौः इति, यथा भीमसेन इति; तेषां स न युक्तः । सर्वत्र संज्ञाशब्देषु तथा कल्पनेन भीमसेनः इत्याद्यपि न स्यात् अपि तु भीमसेनशब्दः इत्यादि स्यात् । न चैवम्, तथा शाब्दिकानां व्यवहारादर्शनात् । केवलानां पदार्थानां संज्ञिषु योजनप्रतीतेः, अन्यथा गौः शब्दो यस्य इत्यन्यपदार्थोऽपि न स्यात्, पृथक् पृथक् केवलयोः सिद्धयोरेव तद्दर्शनात् चित्रगुः इत्यादिवत् । तन्न शब्दात्मका घटादय इति स्थितम् । § 3289

भवतुश्रुतेः गोचरा भावाः शब्दाः, ते तु नित्याः स्युरिति मीमांसकाः; तत्राह— **परिणता** इति । श्रुत्यगोचररूपपरिहारेण तद्गोचराकारेण गताः

१ त्त्व ] ननु
३ पुरुषाः ] न भिन्नाः स्युः ।
४ त्र ] शब्दे ।
८ ण्याद्यार्थं ] ण्यम्, तद्य[[शब्दसामानाधिकरण्यम् ।]] अयं[[अयं शब्द-गोशब्दयोः ।]]
८ त ] शब्दयोरेव ।
८ योः ] गोशब्दगवार्थयोः ।
९ त्वार्थे ] त्रार्थे
१० टा ] घटः पटः
११ च ] स्यात् ।
१५ लुप्तो ] प्ता
१५ स्य ] शब्दाख्यस्य ।
१५ सेन ] भीमसेनः शब्दः संज्ञा यस्य स भीमसेन इत्यत्र शब्द इति शब्दः लुप्यते तथा गौः इत्यत्रापि गौः शब्दो यस्य इति शब्दशब्दस्य लोपो द्रष्टव्यः ।
१८ संज्ञिषु ] संज्ञावाचकेषु शब्देषु ।
२० योरेव ] अन्यपदार्थप्रधानबहुव्रीहिदर्शनात् ।
२२ तु ] न्तु
२२ काः ] नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् । नित्यः शब्दो भवितुमर्हति । कुतः दर्शनस्य परार्थत्वात् । दर्शनमुच्चारणं तत्परार्थं परमर्थं प्रत्याययितुम् । उच्चरितमात्रे हि विनष्टे शब्दे न चान्योऽन्यान् अर्थं प्रत्याययितुं शक्नुयात्, अतो न परार्थमुच्चार्येत । अथ न विनष्टस्ततो बहुश उपलब्धत्वात् अर्थावगम इति युक्तम् ।--जैमिनिसू॰, शाबरभा॰ १ । १ । ८ । शास्त्रदी॰ पृ॰ ५४०, ५५९, ५६८ । नयवि॰ पृ॰ २४२ । मी॰ श्लो॰ शब्दनि॰ । भाट्टचि॰ पृ॰ २६ । तन्त्ररह॰ पृ॰ २६ । बृह॰ १ । १ । १८ ।

परिणता निरुच्यन्ते अन्यथा पूर्ववत् पश्चादपि कुतस्तेषां श्रवणम् ? त- /ms दगोचरस्वभावत्वे ताल्वादिव्यापारात् पूर्वमपि चा श्रवणम् । तद्गोचरस्वभाव-त्वे सेन्द्रियस्य प्रणिहितमनसः पूर्वम[पि]श्रवणम् । व्यञ्जकाभावादिति चेत्; आस्तां तावदेतत्, अन्यत्र विचारणात्, अत्रापि लेशतो विचारयिष्यमाणत्वात् **तदिमे परमाणवः** इत्यादिना । § 3290

[ग]गनगुणाः शब्दाः इत्यपरे । तत्राह--**परमाणवः** इति । रूपरसगन्ध-स्पर्शवन्तोऽतिसूक्ष्माः पुद्गलाः **परमाणवः** ते श्रुतिगोचरत्वेन परिणताः शब्दाः । § 3291

590/mkj

ननु परमाणु-गगनयोः अत्यन्तपरोक्षत्वाऽविशेषे कथं गगनपरिहारेण प-रमाणुकारणः शब्दं सिध्यतीति चेत्; उत्तरमत्र--**नचाकारणगुणाः** इत्यादि भ-विष्यति । माभूदाकाशं तत्कारणम्, तथापि परमाणवः तत्कारणम् इति कुतः सिध्यति ? न तावत् प्रत्यक्षतः तेन तदग्रहणात् । तेन गृहीतेषु प्रत्यक्षत इदं भवति--अस्मादिदं जातम्, अग्नेर्धूमवदिति । नाप्यनुमानतः; तल्लिङ्गाभावात् । अथ पटवत् स्थूलस्य शब्दस्य ततोऽल्पपरिमाणेन उपादानेन भाव्यमिति तत्सिद्धिरिष्यते; साऽपि न युक्ता; स्थूलादपि मृत्पिण्डात् तथाविधघटोत्प-त्तिदर्शनात् । कदाचित् स्थूलादपि सूक्ष्मसंभवविरोधः, जीर्णहेमसूतकवत् । § 3292

स्यान्मतम्--यथा यत्र यद्दृश्यते तथा तत्र तद् भवति, यत्र स्थूलं दृश्यते तत्र तत्, यत्रेतरः तत्र इतरदुपादानम् । न च शब्दस्य द्वयोरन्यतरदुपादान-मीक्ष्यते । न चाऽनुपादानं कार्यमिति अदृश्यकारणसिद्ध्या तत्सिद्धिः; न; /ms अदृश्यस्यापि स्थूलत्वाऽविरोधात्, तदुत्तरपरिणाम[रूपत्वेऽपि] तत एव अल्पं कारणमिष्यते । तस्य तत्त्वेऽल्पे यावत् परमाणुरिति; न; स्थूलादपि त-त्प्रतिपादनात् । निरंशपरमाण्वस्थाप्राप्तौ तु किञ्चिद् भावस्य जंवितीति *न प्रमाणमस्ति । § 3293

किंच, सहतकारा भ्यामेव शब्दोदयदर्शनात् तदुपादानः स इति युक्तम् । § 3294

स्यादेतत्--उपादानोपमर्दनेवो पादेयसिद्धिरिति शब्दोत्पाद[क]करादर्शनं घटोत्पात्रोमृत्पिण्डादृष्टिवदिति; तदपि न सारम्; चन्द्रकान्तेन व्यभिचारा[त्] चन्द्रकरसंयोगात्तस्य जलपरिणामेऽपि तावत् एव दर्शनात् । § 3295

---

२ चा] पूर्वमिव पश्चादपि अ

३ सः] ताल्वादिव्यापारात्पूर्वमपि ।

६ रे] शब्दोऽम्बरगुणः श्रोत्रग्राह्यः ।--प्रश० भा० पृ० १४४ । आकाशश्च शब्दवानिति, स एव श्रोत्रं तद्गुणश्च शब्दः ।--प्रक० प० न्यायशु० ।

१० ब्दं] ब्दः

१५ त] स्थूल ।

१६ व] वाऽ

१६ त्] सुवर्णात् पारदाच्च भस्म सूक्ष्मं भवति ।

२३ *] भवतीति

२५ कारा] [[परस्परसंघट्टितहस्ताभ्याम् ।]]संहतकरा

२७ नेवो] नेन उ

२८ त्रो] त्पत्तौ

२९ त्] त

अन्ये पुनरेतद् इत्थं परिहरन्ति--न तत्संयोगा तु न्द्रकान्तच्युतिः अपि तु विधकरा द्रवन्तीति; तेषां प्रतिक्षणं कर्पूरादिद्रव्यं स्वलपरिमाणात् न्यूनपरिमाणं स्यात् । सर्वदिक्षु तद्रूपादिगमनात् तत्राऽपरप्रवेशो अन्यत्रापि स एवाऽस्तु । तन्न परमाणवः शब्दाः । § 3296

यदि वा, वायवीयाः ते; तथाहि--नाभिप्रदेशाद् ऊर्ध्वमाक्रामन् वायुः कण्ठादिभिरभिहतः शब्दः इति । § 3297

अत्र प्रतिविधीयते । यत्तावदुक्तम्--नाप्यनुमानतस्तत्प्रतिपत्तिः लिङ्गाभावादिति; तन्न; चेतनाऽचेतनयोः परिमाणा[प]कर्षस्याऽतिशयाः क्वचिद् व्यवस्थितात् सा तत्त्वा[त्] तदुत्कर्षस्य अतिशयवत् । यत्र अचेतने स व्यवस्थितात्मा स नः परमाणुरिति । न च तस्याऽदर्शनादभावः; अनुमेये
/ms तदयोगाद् अतिप्रसङ्गात् । न च साध्यविकलता निदर्शनस्य; प्रसाधनात् सर्वज्ञस्य । भवन्तु परमाणवः, ते तत्तत्कारणमिति कुतः ? किं तर्हि शब्दस्य उपादानकारणं मूर्त्तस्य ? न चानुपादानं कार्यम्; अतिप्रसङ्गात्
591/mkj । दण्डभेर्यादिकमिति चेत्; किं सहकारिकारणम् ? तदभावे च कार्यं न दृष्टमिष्टं वा कस्यचित् । अदृष्टं सहकारिकारणं नोपादानमिति किंकृतो विभागः ? § 3298

किंच, ताल्वादीनां तदुपादानत्वे तदुपमर्दः तद्भावे, उपादेयाकारगमनलक्षणत्वाद् उपादानस्य । अथ तद्भागाः केचन अदृश्याः तद्रूपतया परिणमन्ते, अपरे च तथाविधास्तत्र प्रविशन्ति, ततो न त्ततापितस्यशब्दानां सर्वदिक्कं विसर्प[णमि]ति मतिः; सिद्धं तर्हि नः समीहितम् तद्भागानामेव परमाणुपदेशात् । कथमेवं[य]वा यदि नाम[अ]दृष्टबीजाः शाल्यङ्कुरः क्तिं त्यादि उपादानो न स्यात् ? अन्यत्र बीजादर्शनादिति चेत्; पूर्वमदृष्टस्थूलकारणस्य तद्विपरीतहेतुपूर्वकत्वाऽदर्शनात् अन्यत्र समानम् । § 3299

योऽपि मन्यन्ते--वायवीयः शब्दः इति; सोऽनुकूलमाचरति, पुद्गलपर्यायाऽनतिक्रमात्, वायोस्तत्परिणामत्वात् । निर्वाते च भूमिगृहादौ करताडनात् कुतः शब्दः ? स्तिमितात्ततः इति चेत्; एतदप्यनुकूलमेव ।

१ तु] गात् च
२ रा] विधुकरा[[चन्द्रकिरणानि ।]]
२ ल] न तत्
३ वेशो] शे
५ ते] शब्दाः । इति शिक्षाकारा मीमांसकाः ।
९ सा] स्थिताः
९ त] अतिशयत्वात् ।
९ स] अपकर्षातिशयः ।
११ त] अदर्शनमात्राद् अभावायोगात् ।
१२ स] ज्ञानोत्कर्षातिशयवतः ।
१५ अ] अप्रत्यक्षीभूतम् ।
१८ त] ताल्वादिभागाः ।
१९ त] अदृश्याः ।
१९ स्य] ?
२१ दे] णुव्यपदे
२२ उ] रे किं स्यात् येन स तदु
२४ यो] तथा च शिक्षाकाराः आहुः वायुरापद्यते शब्दतामिति--शाबरभा० १ । १ । २२ ।
२४ न्ते] ते
२६ तः] वायोः ।

जातिमूकस्य च प्रमाण वायसद्भावेऽपि न शब्दः । तद्विशेषकल्पनायां चरंपरमाणुकल्पनमस्तु दृष्टकल्पनाऽविशेषात् इति । § 3300

प्रत्येकं परिणताः प्रायेण स्युः इति चेत्; अत्राह--**संसर्गा**दिति । सन्तु ध्वनयः परस्परसंसृष्टपरमाणुपरिणामविशेषाः, वर्णादिस्फोटः तद्व्यङ्ग्यो नित्यो /ms
व्यापकोऽमूर्त्तः स्यादिति चेत्; अत्राह--**तद्भेद** इत्यादि । **तेषां** श्रुतिगोचरत्वेन परिणतानामणूनां **भेदो** विशेषः । किंभूतः ? इत्याह--[प्रतिलब्ध इत्यादि] **प्रतिलब्धो वर्णपदवाक्यात्मा** येन स तथोक्तः । एवं मन्यते न श्रवणेन्द्रियग्राह्याकारादिव्यतिरेकेण ध्वनिः तद्ग्राह्यो वा वर्णस्फोटः प्रतीतिभाक् । एवं पदवाक्ययोर्वाच्यम् । § 3301

ननु न श्रोत्रेन्द्रियाध्यक्षगम्योऽसौ अपि तु अर्थप्रतिपत्त्यन्यथानुपपत्त्या अर्थापत्तिगम्यः इति चेत्; अत्राह--**अभिलाप** इति । अभिलप्यते अनेन **इत्यभिलापः** वाचकः, **तद्भेदो** वर्णाद्यात्मा, तत एव अर्थप्रतीतिदर्शनात् । तथापि अन्यतः तत्कल्पने अनवस्था, ततोऽप्यन्यतः कल्पनासंभवात् । § 3302

अथ एकपदार्थः बहुभिरयुगपद्भाविभिरस्थिरैर्घकारटकारविसर्जनीयैः प्रतियादयितुमसद्य इत्येवेत भाव्यमिति; तदपि न सूक्तम्; यतस्तदपि 592/mkj
एकमनभिव्यक्तं चेदत्र प्रतीतिहेतुः; सर्वदा स्यात् इति घकाराद्युच्चारणमनर्थकम् । अभिव्यक्तं चेत्; यन्येन स; एवं दोषः घकारादिवैफल्यमिति । घकारादिभिरिति चेत्; तर्हि यया प्रत्यासत्त्या कंप्रकां प्रकाशयन्ति वाच-

---

१ जा] जन्मजातमूकस्य ।
१ वाय] प्राणवायु
२ रं] वरं
८ स्फोटः] नानेकावयवं वाक्यं पदं वा स्फोटवादिनाम् । निरस्तभेदं पदतत्त्वमेतत्...--स्फोटसि॰ श्लो॰ २९-३६ । स्फोटभा॰ पृ॰ १ । स्फोट॰ न्या॰ पृ॰ १ । तत्त्वतस्तु वाक्यमेवाखण्डमयूराण्डकललवदविभागं भिन्नार्थप्रतीतिहेतुभूतं स्फोटाख्यमभ्युपगन्तव्यम् ।--स्फोटप्र॰ । इत्यनवयवः प्रत्यस्तमितवर्णपदविभागो वाक्यस्फोट एव श्रेयान् ।--स्फोटत॰ । स्फोटच॰ । वर्णातिरक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः स्फोट इति तद्विदो वदन्ति । अत एव स्फुट्यते व्यज्यते वर्णैरिति स्फोटो वर्णाभिव्यङ्ग्यः स्फुटति स्फुटीभवत्यस्मादर्थ इति स्फोटोऽर्थप्रत्यायकः इति स्फोटशब्दार्थमुभयथा निराहुः ।--सर्वद॰ पृ॰ ३०० । वैयाकरणभू॰ पृ॰ २९४ । परमलघु॰ पृ॰ २ ।
१० म्योऽसौ] स्फोटः । प्रत्येकमप्रत्यायकत्वात् साहित्याभावात् नियतक्रमभववर्तिनामयौगपद्येन संभूयकारित्वानुपपत्तेः नानावक्तृप्रयुक्तेभ्यश्च प्रत्ययादर्शनात् क्रमविपर्यये योगपद्ये च । तस्माद् वर्णव्यतिरेकी वर्णेभ्योऽसंभवन्नर्थप्रत्ययः स्वनिमित्तमुपकल्पयति ।--स्फोटसि॰ पृ॰ २८ ।
१६ इत्येवेत] मशक्य इति एकेन[[स्फोटेन ।]]
१६ मिति] वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात् । आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनात्पत्त्यभावात् । अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुभावात् । एकस्मृत्युपारूढानां वाचकत्वे सरो रस इत्यादौ अर्थप्रतिपत्त्यविशेषप्रसङ्गात्, तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचकः ।--पा॰ महाभा॰ प्र॰ पृ॰ १६ । स्फोट॰ न्या॰ पृ॰ २ । सर्वद॰ पृ॰ २९९ ।
१८ न्येन] अभिव्यक्तं भवति तथा ।
१९ कां] एकं[[स्फोटम् ।]]

कम्, तया अर्थम् इति किमपरेण ? न च नित्यस्य कस्यचिद्वस्तुत्वमिति निरूपयिष्यतेऽनन्तरम् । § 3303

किंच, एवं परम्परापरिश्रमश्च घकारादिभ्यो वाचकस्याभिव्यक्तिः, ततोऽर्थप्रतिपत्तिः *तेभ्योऽर्थगतौ न स्यात् । अनेकप्रतीतिप्रसङ्गश्च--पूर्वं व्य- /ms ञ्जकस्य पुनर्व्यङ्ग्यस्य पुनरर्थस्य । न चैवं व्यवहारः, तथापि तत्कल्पने धूमादेरन्यः प्रतीयते ततोऽग्निरिति स्यात् । एवं प्रत्यक्षेऽपि वाच्यम् । ततः **तद्भेदोऽभिलापः स्वतः** । तदाह--**स्वतः** अव्यवधानेन । § 3304

ननु तद्भेदेन किञ्चिदभिलप्यते ? न तावत् सामान्यम्; तदभावात्, प्रयोजनाभावाच्च । नहि सामान्यं वाददोहादावुपयुज्यते, विशेषाणामेव तत्रोपयोगात् लक्षितलक्षणया प्रवृत्तिः इति न युक्तम्; तयासामान्यप्रतीतौ स एव प्रसङ्गः । विशेषगतौ, सात्तद्भवतिरस्तु, न चैवम्, अक्षसंहतेर्वैफल्यप्रसङ्गात् । ततः तद्भेदोऽनर्थक इति चेत्; अत्राह--**सिद्धार्थ मति** * । सिद्धोऽर्थो यस्य स तथोक्तः **तद्भेदः** । तथाहि--यथा चक्षुरादिव्यापारात् अथप्रतिपत्तिः प्रवृत्तिः प्राप्तिश्च, तथा शब्दादपि इति, निरूपयिष्यते शेषमत्रैव । § 3305

अथ मतम्--प्रतिबन्धाऽभावात् कथमसौ अभिलापः ? तथाहि--न शब्दार्थयोः देशभेदात् तादात्म्यरूपः प्रतिबन्धः । अर्थाभावेऽपि भावात् न तदुत्पत्तिः । न च तदन्तरमस्ति इति; तत्राह--**स्वतः सिद्धार्थ** इति । **स्वतः** स्वयोग्यतातः **सिद्धार्थो** नान्यतः । कुतः ? इत्यत्राह— **यमुपेत्य** इत्यादि । **यं** तद्भेद**मुपेत्य** श्रवणविषयतां नीत्वा **वक्ति** ब्रूते । कः ? इत्याह—जनकभूता **असङ्कीर्त्तितः** सङ्केतरहितः । पुनरपि किंभूतः ? **सामान्यवेदी यमुपेत्य** इत्येतदत्राप्यपेक्ष्यम्, शब्दं श्रुत्वा तद्वेदी इत्यर्थः । सामान्याभावात् /ms नैवचेत्; न; वस्तुषुसमानपरिणामव्यवस्थापनात् । किं वक्ति ? इत्याह । **किमयमाह** इति । **अयं** वक्ता **किमाह** इत्येवम् । यदि प्रथमं शब्दश्रवणात् सामान्यं तेन विदितं किमर्थमेवं ब्रूते ? नहि नीले स्वरूपेण ज्ञाते किमेतत् इति तद्रूपे प्रश्नो युक्तः इति चेत्; अत्राह--**भेद** इत्यादि । तस्य सामान्यस्य **भेदो**ऽवान्तरविशेषः तस्य **काङ्क्षणम्** ग्रहीतुमीहा तत्र **मनो** यस्य इति । § 3306

593/mkj

ननु सामान्यवेदने भेदवेदनम्, अन्यथा सामान्यस्यापि कुतोऽतादात्म्येन, उभयात्मकं तत्त्वमिति, न तत्र काङ्क्षणम् । तादात्म्योऽपि प्रथमं

---

३ वा] स्फोटस्य ।
४ *] घकारादिभ्यः ।
५ स्य] ध्वनेः ।
५ स्य] स्फोटस्य ।
६ न्यः] कश्चित् अग्निस्फोटः ।
९ वाद] ह
१० या] शब्देन लक्षितं सामान्यम्, तेन लक्ष्यते विशेष इति क्षितलक्षणा ।
१० या] तथा
११ ङ्गः] प्रयोजनाभावादिरूपः ।
११ स्तु] सा तैरस्तु
१२ *] इति
१३ अथ] र्थ
१५ अभिलापः] वाचकः ।
१७ च] सम्बन्धान्तरम् ।
२० भूता] जनः । किम्भूतः ?
२२ नैव] वं
२९ कुतोऽतादात्म्येन] वेदनमित्ति ।
२९ त्र] विशेषे ।

सामान्यस्यैव कुत इव शब्दात् स्यात् इति चेत्; अत्राह--**अक्षादिव** । क्व ? **स्वार्थे** रूपादौ । यथैव हि दूरे अक्षात् मनुष्यत्वादिसामान्यप्रतीतिः, पुनः तद्भिदाकाङ्क्षणम्, पुनरपि देशनैकट्यादिसामग्रीवशात् तद्भेदावायः । तदुक्तमत्रैव **समदृष्टेर्विशेषेहा** सिद्धिवि° २ । ९ इत्यादिना । तथा शब्दातु प्रथमं सामान्यप्रतीतिः पुनः तद्भेदाकाङ्क्षणम् ततोऽपि सङ्केतसामग्रीतो भेदनिश्चयौ नैतावता शब्दः स्वतोऽशक्तः; अक्षेऽपि प्रसङ्गात् । यथा च शब्दात् स्वार्थसन्देहः तथा अक्षादपि । कारणस्य रूपवत् सामर्थ्यप्रतिपत्तावपि तत्र सन्देहदर्शनात् । अथ तत्र ज्ञानान्तरं सन्देहरूपम्, अन्यत्रापि तदेव । नहि घटाभिधानादेव चटो नास्तीति वा सन्देहो जायमानो जनेन विभाव्यते, ततोऽप्रवृत्तिप्रसङ्गात् । अथ शब्दादर्थप्रतीता वत् सुतोपि कुतः सन्देहः ? स्वसंवेदनात् दानादिचेतसां स्वर्गप्रापणसामर्थ्यप्रतीतौ ततोऽपि /ms स कुतः । अथ तद्भावाभावयोः तत्प्रतीते[ः] साधारणत्वात् स इति मतिरि तत्र समानम् । तथा सति कथं शब्दोऽर्थविषयः इति अनेन निरस्तम् । निर्विकल्पिका तत्प्रतीतिस्ततोऽयमदोषः; चेतनत्वादपि स्यात् । *तत्र निर्णयोत्पत्तेर्नेति चेत्; *यस्य रूपसुखादौ निर्णयरूपं मानसमध्यक्षं तस्य तत्सामर्थ्येऽपि दुर्लभः संशयः । इतरथा शब्दार्थेऽपि स तथा न भवेत् । *यस्यापि मानसो[ऽ] विकल्पो[ऽ]निश्चयः, तेन तस्य स्वलक्षणग्रहणात्, अविकल्पेन गृहीतस्य अगृहीतकल्पत्वात् *तथा । यथा शब्दावस्तुविषयः सन्देहहेतुत्वात्, तथा प्रत्यक्षमपि परस्य । ततोऽक्षात् सामान्यग्रहणात् विशेषाकाङ्क्षणे विशेषाऽवायकारणाभावे यथा संशीतिः तथा शब्दादपि इति स्थितम् । § 3307

स्यादेतत्--भाषान्तरे संकीर्त्तित एव शब्दात् सामान्यं प्रतिपद्यते[न] अकृतसङ्केतात्, ततः सङ्केत एव पारम्पर्येण तद्धेतुरिति; तर्हि इन्द्रियादपि पूर्वं प्रतिपन्नसामान्य एव— ततः पुनः सामान्यं प्रत्येति इति । तदेवेन्द्रियमन्यदापि तद्ग्रहणकारणम् । अत्यत्वमन्यत्रापि इति यत्किञ्चिदेतत् । § 3308

नमु निःप्रयोजनशब्दस्वरूपपरीक्षणेन किम् ? लोकत एक तत्स्वरूपसिद्धेः; इत्यत्राह--**निःश्रेयसाधिगतेः इत्यादि** । § 3309

१ इव] एव
१ ब्दात्] वेदनम् ।
३ द्भिदा] भित् भिदा भेद इति यावत् ।
५ ब्दातु] त्
६ यौ] यो
८ ज्ञा] सामर्थ्यज्ञापकं ज्ञानम् ।
९ त] शब्दान्तरं यत् सन्देहं करोति ।
९ टो] घटोऽस्ति
१० सुतोपि] तीतौ तत एव
१२ स] सन्देहः ।
१३ त्र] तिः; इतरत्र
१३ इति] मतम् ।
१४ दोषः] सन्देहाभावलक्षणो न दोषः ।
१४ पि] त्वादावपि
१४ *] चेतनत्वादौ ।
१५ *] मीमांसकस्य ।
१७ *] बौद्धस्य ।
१८ *] सन्देहाभावः स्यात् ।
१८ ब्दा] ब्दोऽ
१९ पि] बौद्धस्य ।
२२ संकीर्त्तित] सङ्केतितत[[सङ्केतितात् इत्यर्थः ।]]
२४ एव] पुरुषः ।
२५ अत्य] अन्य
२६ मु] ननु
२६ एक] एव

/ms किमाह इति चेत् ? अत्राह--**शब्द** इत्यादि । § 3310

...2 *शब्दः पुद्गलपर्यायः स्कन्धः छायातपादिवत् ।
बुद्धिकार्यो विशेषात्माभिलापः स्वार्थगोचरे ॥ २ ॥§ 3312

594/mkj

अणवः पुद्गलपरिणामविशेषात् भेदसंसर्गप्रतीतेः । कथम् ? कथं च न स्यात् ? सर्वथा निरंशानां दिग्भागभेदेन प्रत्येकं षडंशतापत्तेः कथं संसर्गः ? किं पुनरसंसर्गिण एव पृथक् स्युः ? कथं तेषां व्यवधानम् प्रकृतविकल्पानतिवृत्तेः ? स्वकार्यकारणक्षणाभ्यां स्वत एव नैरन्तर्यमनुभवतः कालप्रचयभेदोपलक्षणात् न वै क्षणवत् कस्यचित् कैश्चिन्नैरन्तर्येऽपि सांशत्वम्, व्यवधानाभावस्यैव तत्संयोगात्मकत्वात् । अन्यथा कार्यकारणव्यवस्थैव मा भूत् । वस्तुस्वभावतः तद्व्यवस्थायां कुतः संयोगप्रबन्धः ? तत्संयुक्तानामविशेषप्रसङ्गात् । स्वत एव प्रदेशमात्रस्य व्यवधायकतोपपत्तेः; अनंशस्यापि स्वभावभेदात् ग्राह्या[द्याकारसंवेदनवत्] तदिमे... ...नहि...प्रतिषिद्धं च । तथापरिणामस्यैव तद्गुणत्वसंभवात् । कथञ्च अत्यन्तपरोक्षस्य गुणः प्रत्यक्षः ? परिमण्डलानां तादात्म्यपरिणामोपपत्तेः । वायोरपि [प्रत्यक्षत्वात्] असमानम् । तदिमे चैतन्यविशेष [कार्याः] वर्ण[पदादिरूपाः] कथञ्चित् अर्थसंसर्गयोग्यतां प्रतिपद्य व्यवहारपदवीमुपनीयन्ते नान्यथा शब्दान्तरवत् । § 3313

**शब्दः** श्रवणेन्द्रियगोचरो भावः । सत्तापि स्यादिति चेत्; किं पुनः सा ततो भिन्ना येन एवं न स्यात् ? तथा चेत्; असन् शब्दः । तत्सम्बन्धात् सन् इति चेत्; उक्तमत्र । तस्य ततोऽभेदे स एव सद्भवेत् इति चेत्; अत्राप्युक्तम् । कथञ्चित् तत्समानपरिणामस्य अन्यत्रापि भावात् । एतेन गुणत्व चिन्तितम् । न च गुणः शब्दः । स किम् ? इत्याह--**पुद्गलपर्यायः**

२ *] तथा चाहुर कलङ्कदेवाः--शब्दः पुद्गलपर्यायः स्कन्धः छायातपादिवत् ।--त० श्लो० पृ० ४२४ ।
२० सा] सत्ता ।
२१ त] शब्दात् ।
२२ त्र] समवायस्य सर्वत्राविशेषात् इत्यादि ।
२२ द्भ] सन् भ
२४ त्व] त्वं

। रूपादिमन्तः पुनः **पुद्गलाः**, तेषां **पर्यायो** विकारः, न तत्पर्यायाः पुद्गलाः इतरथा शब्दानुगतस्य चक्षुरादिना घटादेर्ग्रहणं भवेत्, सद्रूपानुगतस्य इव । § 3314

ननु यदि परमाणुरूपपुद्गलपर्यायः; तद्गतश्यामत्वादिवत् तर्हि तस्य अस्मदादीन्द्रियेण अग्रहणं स्यादिति चेत्; अत्राह--**स्कन्ध** इति । **स्कन्धः** अवयविद्रव्यम् । *स्कन्धः शब्दः मूर्त्तत्वे अस्मदादिप्रत्यक्षत्वे सति सावयवत्वात् पटादिवत् । सः मूर्त्तः स्पर्शवत्त्वात् तद्वत् । स्पर्शवत्त्वं चास्य मृदुखरादिप्रत्ययग्राह्यत्वात्तद्वदेव । न चैतदसिद्धम्; सर्वलोकप्रसिद्धेः । तथाहि--वीणादिशब्दात् जयघण्टादिशब्दं खरं निगदन्ति जनाः । तथापि तदसिद्धौ न किञ्चत् सिद्धं स्यात् । कर्णाभिघातदृष्टेश्च तत्सिद्धिः । § 3315

595/mkj

अपर आह--तीव्रत्वमन्दत्वजातिसम्बन्धात् तत्प्रत्ययविषयत्वंतेति; सर्वत्र तथा प्रसङ्गेन स्पर्शाभावप्रसङ्गात् । § 3316

शब्दसहचरितस्य वायोः तद्विषयता इत्येके; तेषामपि वाद्यसहचरितस्य अन्यस्य तद्विषयता इत्येवमनवस्था । § 3317 /ms

स्यान्मतम्--असर्वगतद्रव्यपरिमाणं मूर्त्तिः न स्पर्शवत्त्वम्, अन्यथा मनसोऽमूर्त्तत्वं स्यात् तदभावादिति; तन्न; शब्देऽप्यस्य भावा[त्] स्पर्शव-

---

१ त] शब्दस्य पर्यायाः पुद्गलाः ।
२ इ] शब्दब्रह्मवादिवत् पुद्गलस्य शब्दपर्यायत्वे ।
४ स्य] शब्दस्य ।
६ *] तुलना--सद्दो खंदप्पभवो खंदो परमाणुसंघसंघादो । पुट्ठेसु तेसु जायदि सद्दो उप्पादगो णि+अदो ॥--पञ्चास्ति° गा° ७९ । पुद्गलस्कन्धस्यैकद्रव्यस्य शब्दाश्रयत्वोपपपत्तेः सिद्धसाधनत्वात् ।--त° श्लो° पृ° ४२२ । न्यायकुमु° पृ° २४२ । सन्मति° टी° पृ° ६७० । पौद्गलिकः शब्दः अस्मदादिप्रत्यक्षत्वे अचेतनत्वे च सति क्रियावत्त्वात् बाणादिवत् ।--प्रमेयक° पृ° ५६३ ।
७ सः] तुलना--द्रव्यं शब्दः स्पर्शाल्पत्वमहत्त्वपरिमाणसंख्यासंयोगगुणाश्रयत्वात् ।--प्रमेयक° पृ° ५५० । न्यायकुमु° पृ° २४३ ।
७ चास्य] शब्दस्य । तुलना--कर्णशष्कुल्यां कटकटायमानस्य प्रायशः प्रतिघातहेतोर्भवनाद्युपघातिनः शब्दस्य प्रसिद्धिरस्पर्शत्वकल्पनामस्तं गमयति ।--अष्टश° अष्टस° पृ° १०७ । स्पर्शवान् शब्दः स्वसम्बद्धार्थान्तराभिघातहेतुत्वात् मुद्गरादिवत् । सुप्रतीतो हि कंसपात्र्यादिध्वानाभिसम्बन्धेन श्रोत्राद्यभिघातः ।--प्रमेयक° पृ° ५५० । न्यायकुमु° पृ° २४३ ।
१० दृष्टेश्च] स्पर्शवत्त्व सिद्धिः ।
११ आह] अनित्यः शब्दः तीव्रमन्दविषयत्वात् सुखदुःखवदिति ।--न्यायवा° पृ° २९० ।
११ त्वंते] यते
१३ ता] तीव्रादिप्रत्ययविषयता ।
तुलना--नादवृद्धिः परा । १७ । यच्चैवं बहुभिर्भेरीमाध्नद्भिः गोशब्दमुच्चारयद्भिः महान् शब्द उपलभ्यते, तेन प्रतिपुरुषं शब्दावयवप्रचय इति गम्यते; नैवम्; निरवयवो हि शब्दः अवयवभेदानवगमात् । निरवयवत्वाच्च महत्त्वानुपपत्तिः । अतो न वर्धते ।...तेन नादस्यैषा वृद्धिः न शब्दस्येति ।--जैमिनिसू° शाबरभा° १ । १ । १७ ।
१३ वाद्य] वाय्व
१३ स्य] शब्दस्य ।
१४ स्य] कस्यचित् अदृष्टस्य ।
१५ मूर्त्तिः] असर्वगतद्रव्यपरिमाणं मूर्तिरिति हि पदार्थविदः ।--तत्त्वबि° पृ° १५८ ।

त्वा[त्]द्रव्यत्वमसर्वगतत्वं केचास्यवार्यते ? परिमाणं दीर्घादिप्रतीतिविषयत्वात् सुप्रसिद्धमेव । § 3318

किंच, तल्लक्षणम् अतिप्रसङ्गि; तस्य आत्मन्यपि भावात् सर्वगतत्व-निषेधात्तत्र । ततः सिद्धम् मूर्त्तत्वम् । अस्मदादिप्रत्यक्षत्वम् अविप्रतिपत्तिविषयम् । § 3319

नापि साव[यव]त्वात् इत्यसिद्धम्; सावयवो ध्वनिः अल्पमहत्त्वग्रहण-ग्राह्यत्वात् स्तम्भादिवत् । अथ व्यङ्ग्ये व्यञ्जकधर्मारोपात् तद्ग्रहणग्राह्यता न स्वतः, मुखस्येव दर्पणादौ इति चेत्; स्यादेतदेवम्--यदि एकरूपः सर्वदा शब्दः कुतश्चित् स्यात् । न च दृष्टान्तमात्रात् साध्यं सिध्यति, अतिप्रसङ्गात् । अतः **स्कन्धः शब्दः** । § 3320

नन्वेवं लोष्टादिनेव शरीरावयवादिघातैःतेन, तद्वत्तस्य नियतदेशगमनम्, एकत्र कर्णप्रविष्टस्य तदन्तराऽगमनम्, वायुनाभिहतस्य लोकान्तप्रसर्पणम्, इन्द्रियान्तरेण च दर्शनम् इति चेत्; अत्राह--**छाया** इत्यादि । **आदि**शब्देन अन्धकारादिपरिग्रहः, तेन तुल्यं वर्त्तते इति तद्वत् इति । यथा अत्र न ते दोषाः तथा शब्देऽपि इति दृष्टान्तार्थः । नहि अन्धकारस्य स्कन्धेऽपि स्पर्शादिना ग्रहणम् । § 3321

अपौरुषेयः शब्दो गकारादिः इत्येके । तत्राह--**बुद्धि** इत्यादि । **बुद्धेः कार्यं** तदन्वयव्यतिरेकानुविधानात् । न हि यद् यस्य अन्वयव्यतिरेकाव-नुविधत्ते ४६४ तद् अन्यहेतुकमहेतुकं वा युक्तमतिप्रसङ्गात् । तदभिव्यक्तिः तावनुविधत्ते इति चेत्; न; अनवस्थाप्रसङ्गात्, तत्रान्यस्य तदनुविधानक-

596/mkj ल्पनात् । कृतप्रतिक्रियश्चायं पक्षः अन्यत्र । **स** एव **विशेषैर्वर्णादिभेद आत्मा** यस्य स तथोक्तः । अनेन तद्व्यतिरिक्तः स्फोटात्मा निरस्तः । कुतः ? इत्याह--**अभिलापः** स एव यतोऽभिलप्यतेऽनेन इति । क्व ? इत्याह--**स्वार्थगोचरे** सामान्यविशेषात्मके वस्तुनि व्यञ्जनपर्याये वा । § 3322

शब्दः पुद्गलपर्यायः इत्यत्र साध्यसूरेर्मनसि मूर्त्तित्वात् इति हेतुर्वर्त्तते । निदर्शनमुक्तमेव । तस्य परमाणुभिर्व्यभिचारः, न हि ते मूर्त्तित्वेऽपि तत्पर्यायाः

---

१ केचास्य] त्वं च केनास्य

३ त] मूर्तत्वलक्षणम् ।

७ त] अल्पत्वमहत्त्वग्रहण ।

८ इ] न च स्थूलत्वसूक्ष्मत्वे लक्ष्येते शब्दवृत्तिनी । बुद्धितीव्रत्वमन्दत्वे महत्त्वाल्पत्वकल्पना । सा च पट्वी भवत्येव महातेजःप्रकाशिते । मन्दप्रकाशिते मन्दा घटादावपि सर्वदा । एवं दीर्घादयः सर्वे ध्वनिधर्मा इति स्थितम् ।--मी॰ श्लो॰, शब्दनि॰ पृ॰ ७८५ ।

११ वादिघातैः] घातः

११ तेन] शब्देन ।

११ स्य] शब्दस्य ।

१२ र्ण] र्णे

१२ स्य] कर्णान्तर ।

१३ म्] स्यात् ।

१३ इति] तुलना--पुद्गलस्वभावत्वे दर्शनविस्तारविक्षेपप्रतिघातकर्णपूरणैकश्रोत्रप्रवेशाद्युपालम्भो गन्धपरमाणुकृतप्रतिविधानतयोपेक्षामर्हति ।--अष्टश॰, अष्टस॰ पृ॰ १०८ ।

१४ अत्र] छायायाः पुद्गलरूपत्वेऽपि ।

१७ इत्येके] मीमांसकाः ।

२१ श्चायं] शब्दाभिव्यक्तिवादपक्षः ।

२१ विशेषे] षो

२२ त] तद्विशेषात्मा ।

२५ साध्य] ध्ये

२६ ते] परमाणवः ।

ततः परस्य सूक्ष्मस्य तस्य अभावादिति । तं परिहरन्नाह--**अणवः** इत्यादि । कुतः ? इत्यत्राह--**[पुद्गल]परिणामविशेषात्** । **पुद्गलस्य परिणामो**ऽन्यथाभावः, स एव **विशेषः** स्थूलैकस्य सूक्ष्मनानारूपभेदः, सूक्ष्मनानारूपस्य वा स्थूलैकरूपभेदश्च तस्मात् । तदपि कुतः ? इत्याह--**भेद** इत्यादि । **भेदो** नानात्वम् **संसर्गः** एकत्वपरिणामः तयोः **प्रतीतेः** । एतदुक्तं भवति--यथा अनेकस्मात् अल्पपरिमाणात् संसृष्टाद् एकमहत्त्वोपेतं जायमानं प्रागस[त्] दृष्टमिति तत्कार्यम्, तथा एकस्मात् महत्त्वोपेतात् तद्विपरीतं प्रागसत् कपालादि दृष्टम् तत्कार्यमस्तु अविशेषात् । अथ कपालादीनां प्रागपि भावात् न तत्कार्यता; साङ्ख्यदर्शनमायातम्, घटादेरपि तथा भावप्रसङ्गात् । अदर्शनान्नैवं चेत्; तदन्यत्र समानम् । तन्तवः पटे दृश्यन्ते इति चेत्; न; /ms
तदा पटस्यैवभावात्, अन्यथा सौगतशासनम् । ततोऽन्य इति चेत्; न; अस्य पक्षस्य निषेधात् । § 3323

किंच, यदि घटकाले ततो भिन्नानि कपालानि सन्ति, तेषां तेन सह उत्पत्तेर्न समवायिकारणत्वम् अन्योऽन्यमिव । तेषां प्रागपि भावान्नेति चेत्; तथा घटस्यापि प्रागभावोऽस्तु । प्रमाणबाधकमुभयत्र । अनुमानात् तत्साधनान्न तद्बाधनम्; पटोऽपि महाकारणपूर्वकः घटवत्किन्नेष्यते ? तत्र स्थूलस्य अत्र सूक्ष्मस्यादर्शनम् । तन्तूनां वैयर्थ्यं स्यादिति चेत्; अत्र मृत्पिण्डस्य इति समानम् । § 3324

ननु मृत्पिण्डस्य घटकारणत्वे तत्र स्थितस्य घटस्य उपलब्धिः तन्तुस्थितपटवत् इति चेत्; न; कार्याकारणपरिणतस्य उपादानत्वोपगमात् । तन्तवोऽपि पटीभवन्ति । ततो यथा बहूनां संसर्गादिकं तथा तस्य विश्लेषादनेकमिति कथन्न परमाणवः तत्पर्यायाः ? § 3325

अत्राह सौगतः--**कथमित्यादि** ? तमाचार्यः पृच्छति--**कं च न स्यात्** इति । स उत्तरमाह--**सर्वथा** इत्यादि । अन्य न कथञ्चित् सम्बन्धस्य प्रकारेण **निरंशानां** परमाणूनां **दिग्भागभेदेन प्रत्येकं षडंशतापत्तेः कथं संसर्गः ?** परिहारोऽत्र--**किं पुनः असंसर्गिण एव** इत्यभिप्रायः । एवं संसर्गं दूषयताऽपि तेन बहिरर्थमभ्युपगच्छता बहीरूपादिपरमाणवोऽभ्युपगता एव--
§ 3326

१ स्य] पुद्गलस्याभावात् यस्य ते पर्यायाः स्युः ।
६ एक] कं
७ त] अनेकमल्पपरिमाणोपेतश्च ।
९ ता] इति चेत्; ।
११ स्यैव] वाऽ
११ था] थाऽसौ[[वादी ।]] गतः
१२ अस्य] अवयवावयविभेदपक्षस्य ।
१५ प्राग] ग्
१५ मु] नम् उ
१६ त] पटे ।
१७ अत्र] घटे ।
२० त्] स्यात् ।
२० ण] कारेण
२१ र्गादिकं] जायते ।
२३ कं] कथं
२४ न] अन्येन
२५ त्तेः] षट्केन युगपद्योगात् परमाणोः षडंशता । षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः ॥--विज्ञ° विंशिका पृ° ७ । चतुःशत° पृ° ४८ । तत्त्वसं° पृ° २०३ ।

597/mkj

*अर्थान्तराभिसम्बन्धाज्जायन्ते येऽणवोऽपरे ।
उक्तास्ते सञ्चिताः ते हि निमित्तं ज्ञानजन्मनः ॥
अणूनां स विशेषत्वानान्तरेणपरानणून् ।§ 3329

/ms प्र० वा० २ । १९५-९६ इत्यभिधानात् । § 3330

**ते चासंसर्गिणः** संसर्गरहिता एव । **किं पुनर्नैव पृथक् ? पृथकावस्थिताः**— तद्रहिताः, सञ्चितास्तु संसर्गिणः; अन्यथा स्तम्भादौ अधो मध्योर्ध्वतिर्यग्भागादिषु अविच्छिन्ना प्रतिपत्तिरिति नैयायिकं प्रति एतद् दूषणमसङ्गतम्--**अविच्छिन्ना न भासेत ततस्तत्संवित्तिः क्रमग्रहे** । प्र० वा० २ । २५६ इति तत्संवित्तिः । § 3331

ननु च रूपादिग्रहणे सहैव सुखादिग्रहणमुपलभ्यते इति चेत्; स्तम्भादौ भागप्रतिपत्तिरविच्छिन्ना तथैव उपलभ्यते इति समानम् । § 3332

अपरः प्राह--नाविच्छेदप्रतिभासनात्तेषाम् अविच्छेद[स्य]सिद्धिः, तदभावेऽपि दूरस्थितविरलकेशादौ तत्प्रतिभासनादिति; तस्यापि तेषां[तथा]प्रतिभासने यदवभासते अविच्छिन्नं रूपं न तत्तेषाम्, यन्नावभासते विच्छिन्नं तत्तेषामिति प्राप्तम् । तथा च संवेदने प्रतिभासमानं स्ववेदनं तद्रूपं न भवेत् । तदभावे तदभाव इति चेत्; कुत एतत् ? तद्रूपत्वात्तस्य इति चेत्; तदपि कुतः ? तथावभासनात्; अन्यत्र समानम्, अबाधनं च । न चैकत्र तदभावेऽपि तत्प्रतिभासदर्शनात् सर्वत्र तथा कल्पनम्; अतिप्रसङ्गात् । परमाणवो नावभासन्ते इति चेत्; कुतो ग्राह्याः ? ज्ञानकारणत्वात्; चक्षुरादौ प्रसङ्गः । स्वाकारसमर्पणात्; ज्ञानात्मनि तदाकारोऽन्योऽन्यविच्छिन्नः, तस्यैव समर्पणमिति स एव दोषः । *नीलतादिमात्रसमर्पणे; सांशता इति न पूर्वपक्षाद्विशेषः । § 3333

/ms किंच, तेषामप्रतिभासने किं कल्पनेन ? नीलादिज्ञानं तु अन्यत एव रूपादिरूपाद्ग्राह्यतः स्यात् । ते स्वयमविच्छेदविकलाः अविच्छिन्नं ज्ञानं जनयन्ति नान्यद् अरूपादिस्वभावं रूपाद्याकारं ज्ञानमिति किं कृतमेतत् ? तस्मात् परमाणूनामभ्युपगमे तत्प्रतिभासोऽभ्युपगन्तव्यः । स च अविच्छिन्न इति तेऽपि तथेति साधूक्तम्--**किंपुनरसंसर्गिण एव** इति । § 3334

---

३ त्वा] षश्च
३ रेण] णाऽ
६ नैव] **पृथग्** व्य
७ एत] बौद्धेनोक्तम् ।
८ त्संवि] त्संवि
१२ त] अविच्छेदाभावेऽपि ।
१३ केशादौ] यथा विरलदेशस्था अपि केशमशकमक्षिकादयः एकघनाकारं प्रत्ययमुपजनयन्ति ।--प्र० वार्तिकाल० पृ० ९४ ।
१३ स्यापि] परमाणूनाम् ।
१६ भाव] संवेदनाभावः ।
१९ त्वात्] इति चेत्; ।
२० णात्] इति चेत्; ।
२१ *] यद्यपि नीलता जडता च स्तः, तथापि केवलं नीलताया ज्ञाने समर्पणम् ।
२४ ते] परमाणवः ।

दूषणान्तरमभिधातुं पूर्वपक्षमुत्थापयति--**स्युरिति** भवेयुः **असंसर्गिणः** इत्यत्र वर्त्तते । उत्तरम्--**कथम्** इत्यादि । **तेषां** सञ्चितपरमाणूनां **व्यवधानं** विजातीयावस्थानमन्तराले तस्याऽभावात् । एतदपि कुतः ? इत्याह--**प्रकृत** इत्यादि । **प्रकृतो विकल्पो** व्यवधायकव्यवधीयमानयोः संसर्गोऽसंसर्गो वा तस्याऽ**नतिवृत्तिः** *एकत्र प्रतिज्ञाहानिः, *अन्यत्र अनवस्था--पुनरपि अपरापर व्यवधानकल्पनात् । यदि वा, **प्रकृतो विकल्पः** सर्वथा अन्यथा इति तस्या**नतिवृत्तेः** व्यवधानेऽपि । भवतु तेषां व्यवधानाभावः, ननु प्रसङ्गः षडंशतापत्तेरिति चेत्; अत्राह--**न वै कस्यचित्** इत्यादि । **[न वै] कस्यचित्** 598/mkj
मध्यवर्तिनः परमाणाः **केश्चिद्** दिग्भागव्यवस्थितैः परमाणुभिः **नैरन्तर्येऽपि सांशत्वम्** । कुतः ? इत्याह--**व्यवधानाभावस्यैव तत्संयोगात्मकत्वात्** । तच्छब्देन परमाणुपरामर्शः । एतदपि कुतः ? इत्याह--**पारिमण्डल्यम्** इत्यादि । § 3335

ननु सर्वस्याभावस्य अगुणात्मकत्वात् संयोगस्य च गुणात्मकत्वात् /ms
कथमुच्यते **व्यवधानाभावस्यैव संयोगात्मकत्वात्** इति चेत्; न; अव्यवहिताङ्गुलिद्वयव्यतिरेकेण तदप्रतीतेः, व्यवधानाभावे एव संयोग इत्यभिधानप्रवर्त्तनात् । § 3336

किंच, अवयवेभ्योऽवयविन इव संयोगिभ्योऽस्याऽभेदे एकाकर्षणे पादाद्याकर्षणवत् । एवं सति अवयविनो वैयर्थ्यम्, तत्प्रयोजनस्य अत एव सिद्धे रिति चेत्; अयमपरोऽस्य दोषोऽस्तु । तस्यापि प्रतिभासनात् नैवं चेत्; न; घटाद्यवयवेष्वभिन्नपदार्थद्वय[प्र]तिभासविरहात् । एको हि अवयवरूपाद्यात्मकः प्रतीयते, स संयोगः अवयवी वा भवतु । संयोगस्य अवयवित्वे अनेकमस्राणिसमूहोऽवयवी भवेत् इति, निरन्तरब्राह्मणचाण्डालसमूहो वा इति चेत्; अयमपि तस्यैव दोषोऽस्तु येन तेभ्योऽभिन्न एकः संयोग इष्यते नाऽस्माकं तेषां व्यवधानाभावं संयोगमिच्छताम् । तन्न एतेभ्योऽभिन्नः स इति चेत्; उक्तमत्र समवायनिषेधात्, सम्बन्धाऽसिद्धिरिति । § 3337

तेभ्य उत्पत्तेः स तेषामिति चेत्; अत्रेदं विचार्यते--निरन्तराः सन्तः ते तं जनयन्ति, अन्यथा वा ? प्रथमपक्षे अवयविनमेव ते जनयन्तु किं संयोगजननेन परम्परापरिश्रमकारणात् । तथा दृष्टेरदोषश्चेत्; स्याददोषः यदि तथादर्शनं न भवेत्, न चैवम्, नहि ते पूर्वं संयोगं पुनः अवयविनं

---

३ म] याव्यवधानम् अ
५ तिवृत्तिः] त्तेः
५ *] संसर्गस्वीकारे ।
५ *] असंसर्गपक्षे ।
९ माणाः] णोः
१३ अ] गुणरहितत्वात् ।
१५ त] संयोगस्याप्रतीतेः ।
१७ संयोगिभ्योऽस्या] संयोगस्य ।
१७ ए] एकाङ्गुल्याकर्षणे ।
१८ त्] णं स्यात्
१९ त] अवयवविनोऽपि ।
२२ स्राणि] मणि
२७ न्तः] परमाणवः ।
२८ तं] संयोगम् ।
३० न] न इति निरर्थकम् ।

जनयन्तः प्रतीयन्ते । आशुवृत्तेस्तथाप्रतीतिरिति चेत्; युगपद् द्वयप्रतीतौ इदमुत्तरं स्यात्, न चास्ति, अन्यथा संयोगमपि परं तमुत्पाद्य जनयन्तीति /ms प्राप्तम् । द्वितीयेऽपि दूरस्थिताः तमुपजनयन्तु तत्रापि तन्निमित्तक्रियाभावात् । तत[ः]स्थितम्--**व्यवधानस्यैव** इत्यादि । § 3338

अपरे आहुः--नास्माभिः ज्ञानस्य अन्यस्य वा परमाणवः कारणमिष्यन्ते स्वयं तन्निषेधात्, तन्नियुक्तम्--**किं पुनः** इत्यादि; तत्राह--**क्षणवदि**त्यादि । **क्षणवत्** इति सामान्येन वचनेऽपि ज्ञानक्षण [ए]व इह गृह्यते, तस्यैव परेण परमार्थेनाभ्युपगमात् क्षणस्य इव तद्वत्, **न वै कस्यचित् कैश्चित् नैरन्तर्येऽपि सांशत्वम्** । किं कुर्वतः क्षणस्य ? इत्याह--**अनुभवतः** । किम् ? इत्याह--**नैरन्तर्यम्** । केन ? इत्याह--**स्वकार्यकारणक्षणाभ्याम्** । **स्व**शब्देन दृष्टान्तीकृतो मध्यक्षणो गृह्यते, तस्य कार्यक्षण उत्तर उपादेयक्षणः कारणक्षणः उपादानक्षणः, ताभ्याम् । कुतः तदनुभवतः ? इत्याह--**स्वत एव** न संयोगादेः इत्यर्थः । एतदपि कुतः ? इत्यत्राह--**काल** इत्यादि । **कालप्र-** 599/mkj **चयभेदः** ज्ञानसन्ताननानात्वम् तस्य **उपलक्षणात्** । अस्यानभ्युपगमे दूषणमाह--**अन्यथा** इत्यादि । नैरन्तर्याभावप्रकारेण **अन्यथा कार्यकारणव्यवस्था** उपादानोपादेययोः सङ्करादिपरिहारेण स्थितिरेव **मा भूत्** । § 3339

भवेन्मतम्--जाग्रत्प्रबोधज्ञानवत् वस्तुस्वभावत एव अन्यत्रापि नैरन्तर्याभावेऽपि तद्व्यवस्था इति; अत्रोक्तमुत्तरम् । तदन्तरं वक्तुमाह--**वस्तुस्वभावतः** इत्यादि । **वस्तु** कार्यकारणे तयोः **स्वभावो** योग्यता **ततः त-** /ms **द्व्यवस्थायां** कार्यकारण व्यवस्थायाम् । **कुतः** कारणात् **संयोगप्रबन्धः** । किमेकदेशेन सर्वात्मना वा संयोगः ? इत्याह--**तत्संयुक्ता[ः]**स्वपरमाणवः **तेषां** पराभ्युपगमादेवमुक्तम्, परमाणवोऽपि क्षणवस्तुस्वभावत एव संसर्गरहिताः स्थूलमेकं परिणाम विभ्रति इति मन्यते । सर्वेषां तत्प्रसङ्ग इति चेत्; क्षणानामपि समानम् । शक्यं हि वक्तुम्--भिन्नकालं यावत् प्रबोधस्य जाग्रद्विज्ञानं कारणं तावत् अतीतजन्मान्तरज्ञानं कुतो न भवति ? अन्यत्; उभयत्र समानम् । तन्तवस्तर्हि पृथगवस्थिताः कुतो न पटकारणम् इति चेत् ? जाग्रद्विज्ञानवत् कस्मान्न अग्निः धूमस्य कालव्यवहितः कारणम् ? तथा[ऽ]दर्शनम् अन्यत्राप्युत्तरम् । एतदेवाह--**अविशेषप्रसङ्गात्** तद्व्यवस्थायाः स्वपरपक्षयोरिति । § 3340

इदमपरं व्याख्यानम्--यद्यपि ततः क्वचिद् व्यवधानेऽपि तद्व्यवस्था, तथापि **तत्संयुक्तानां** तेन मध्यक्षणेन संयुक्तानाम् अव्यवधानेन व्यवस्थितानां पूर्वापरक्षणानां धारावाहिनां **कुतः संयोगःप्रबन्धः ?** संयोगेन व्यवधानाभावे प्रबन्धः प्रवाहः कुतो न स्यात् ? इत्याह— **अविशेषप्रसङ्गात्** अविशेषेण प्रसङ्गाद्दोषात् देशप्रचयवत् कालप्रचयेऽपि दोषादित्यर्थः । § 3341

६ न्नि ] तन्न
१६ रादि ] आदिपदेन व्यतिकरः ।
१८ स्था ] कार्यकारणव्यवस्था ।
१८ त ] परिहारान्तरम् ।
२३ रिणाम ] मं
२५ त् ] अन्यत्वमित्यस्मिन्नर्थेअन्यत् इति ।
३२ संयोगः ] ग

अथवा, यदुक्तं परेण--**किं स्यात् सा चित्रतैकस्याम्** प्र॰ वा॰ २ । २१० इत्यादि; तत्राह--**कुतः** इत्यादि । **तेन** विवक्षितनीलज्ञानपरमाणूनां **संयुक्तानाम**पि न निर्भागवृत्तिभाजाम् अन्येषां नीलज्ञानपरमाणूनां **कुतःसंयोगे**नाविनिर्भागेन **प्रबन्धः प्रकृ**ष्टो विच्छेदरहितो **बन्धः** सहवर्त्तनं कुतो /ms न स्यात् ? इत्याह--**अविशेष** इत्यादि । § 3342

स्यान्मतम् सौगतमते न क्वापि केनचित् किञ्चित्संयुक्तम्; इत्यत्राह--**स्वतः** इत्याद्यभिप्रायः--नैरन्तर्याभावे सान्तरत्वं प्रसक्तम्, तच्च व्यवधायके सति नान्यथा, तस्य **स्वत एव** अन्यनिरपेक्षस्य **प्रदेशमात्रस्य** निरंशस्य **व्यवधायकताया उपपत्तेः नवै कस्यचित् केश्चिन्नैरन्तर्येऽपि सांशत्वमिति** उपपत्तेः इति । अनेन तदनभ्युपगमे अनवस्था स्यादिति दर्शयति । § 3343

मा भूत् कार्यकारणव्यवस्था तथापि न दोषः, प्रतिभासाद्वैतवादिना तदभ्युपगमादितिचेत्; अत्राह--**अनं संख्यादि** इत्यादि । न केवलं सांशस्य अपि तु **अनंशस्यापि स्वभावभेदात् नवै** इत्यादि सङ्गतिः । निदर्शनमत्र **ग्राह्य** इत्यादि । § 3344

निगमनमाह--**तदिमे** इत्यादि । कुतः ? इत्याह--**नहि** इत्यादि । तदपि कुतः ? इत्यत्राह--**प्रतिषिद्धं च** इत्यादि । § 3345

वैशेषिकः प्राह--गुणः शब्दः निषिध्यमानद्रव्य कर्मत्वे सति सत्तासम्बन्धित्वात् रूपादिवत् । गुणत्वादेव द्रव्याश्रितत्वम् । तदाधारो द्रव्यं विभु 600/mkj नित्यत्वे सति अस्मदादिप्रत्यक्षगुणत्वात् आत्मवत् । यश्च तथाविधः तदाधारः तदाकाशमिति चेत्; अत्राह--**तथा** शब्दप्रकारेण **परिणामो** यस्य **तस्यैव तद्गुणत्वस्य** शब्दगुणत्वस्य **संभवात्** । न चैवम् आकाशं नित्यत्वेनोपगतं रूपादिरूपम्; [रूप] परिणामस्यैव [पप्रतौ अक्षरचतुष्टयं त्रुटितम् /ms अतिघृष्टं च परेणापि इत्येव पठितुं शक्यते ।रेणापि] रूपादिगुणत्वोपवर्णनात् । § 3346

दूषणान्तरमाह--**कथं च** इत्यादि । **कथं च न** । कथञ्चिद् **अत्यन्तपरोक्षस्य** [गगनस्य] **गुणः** शब्दः **प्रत्यक्षः** अस्मदादीन्द्रियग्राह्यः ? तथाहि--योऽत्यन्तपरोक्षगुणः नासौ अस्मदादि प्रत्यक्षः यथा परमाणुरूपादिः, अत्यन्तपरोक्षगुणश्च परस्य शब्द इति । § 3347

ननु च अत्यन्तपरोक्षगुणत्वं स्यात् प्रत्यक्षश्च इति सन्दिग्धविपक्षव्यावृत्तिको हेतुः इति चेत्; अत्राह--**परिमण्डलानां** परमाणूनां स शब्द

---

२ इ] द्रष्टव्यम्--पृ॰ ६० टि॰ १० ।
३ न] मवि
७ इत्याद्य] दि । अयम
१२ संख्यादि] शस्यापि
१७ प्राह] शब्दः क्वचिदाश्रितः गुणत्वात्...--प्रश॰ व्यो॰ पृ॰ ३२२ । न द्रव्यकर्मजातीयः शब्दः श्रोत्रग्रहणयोग्यत्वात् शब्दत्वादिवत् । गुणः शब्दः द्रव्यकर्मान्यत्वे सति सत्तासम्बन्धित्वात् रूपादिवत् ।--प्रश॰ व्यो॰ पृ॰ ६४९ ।
१८ त] शब्दाधारः ।
२७ थाहि] तुलना--अमूर्तगुणस्य आत्मगुणवद् इन्द्रियविषयत्वादर्शनात् ।--त॰ वा॰ पृ॰ ६९ । त॰ श्लो॰ पृ॰ ४२१ । पञ्चास्ति॰ टी॰ पृ॰ १८५ । आकाशगुणत्वे च अस्मदादिप्रत्यक्षतानुपपत्तिः ।--न्यायकुमु॰ पृ॰ २४७ ।

आत्मा स्वभावभूतो गुणो येषां तेषां भावः **तादात्म्यं** स एव **परिणामः** तस्य **उपपत्तेः** । यथा [अ]दृश्यस्याकाशस्य तथा विधानां परमाणूनां न स्यादिति भावः । अथ तस्य परमाणुगुणत्वे तद्रूपादिवदप्रत्यक्षता स्यादिति चेत्; आकाशगुणत्वेऽपि तद्विभुत्ववत् सा भवेदिति समानम् । अत्र गुण-वैचित्र्यसंभवे अन्यत्र कोऽपरितोषः ? तन्न युक्तम् परमाणु[गुण]त्वे शब्दस्य तद्रूपादिवत् अप्रत्यक्षत्वप्रसङ्गः इति । § 3348

यत्पुनरुक्तम्--शब्दाधारो द्रव्यं विभु नित्यत्वे सति अस्मदादिप्रत्यक्षगुण-त्वात् आत्मवत् तदनेन निरस्तम्; परमाणूनामपि विभुत्वप्राप्तेः । न चात्मनि तत् इत्युक्तम् । § 3349

अथ अत्यन्तपरोक्षगुणस्य परोक्षत्वम्; वायुगुणस्य स्पर्शविशेषस्य समानं तदिति चेत्; अत्राह--**असमानम्** । कुतः ? इत्याह--**वायोरपि** इत्यादि । स्पर्शात्मना इति । अनेन स्पर्शविशेषस्वभावतां वायोः दर्शयति अन्यथा [न] /ms गुणगुणिभावः । कथं च वायुः प्रत्यक्षः ? अक्षेणाऽसन्निकर्षात्; स्पर्शेऽपि भवेत्, तस्य तत्सन्निकर्षद्वारेण तेन सन्निकर्षात् संयुक्तसमवायोपगमात् । अथ वायोः तेन सम्बन्धोऽस्ति, स तु तत्र ज्ञानं नोपजनयति; येन इन्द्रियं साक्षात्सम्बद्धं तत्र न ज्ञानं संपादयति येन तद्द्वारेण तत्सम्पादयति, तदिद-मायातम्--*यस्य भोजनं खण्डशराव इव । स्पर्शे उत्पादयद् दृष्टं तेन तत्र उत्पादयति, नान्यत्र विपर्ययात् । कुत एतत् ? स्पर्शप्रतीतिः इति चेत्; किं पुनः इयं प्रतीतिर्नास्ति--मृदुः खरः अन्यथा वा वायुः मे लगति इति ? भ्रान्तेरियमिति चेत्; कुत एतत् ? अप्रत्यक्षेऽपि तस्मिन् प्रत्यक्षत्वारोपात् । तदपि कुतः ? तत्प्रतीतेः विभ्रमात्; अन्योऽन्यसंश्रयः--सिद्धे तद्विभ्रमे तदप्रत्यक्षत्वम्, अतः तद्विभ्रम इति । § 3350

601/mkj

स्यान्मतम्, स्पर्शमात्रे वायोरारोपात् स लगति इति प्रतीतिः न तद्ग्र-हणात् इति; तर्हि रूपे घटारोपात् घटं पश्यामि इति वित्तिः न तद्दर्शनात् इति सौगतमतम् । रूपोपाधिर्घटः प्रतीयते न स्पर्शोपाधिर्वायुः इति कुतोऽयं विभागः ? अथ द्वीन्द्रियग्राह्यं द्रव्यं प्रत्यक्षम्, न च वायुस्तथा; चन्द्रार्कादीनां प्रत्यक्षत्वं न स्यात् । पार्श्ववर्तिना तेषाम् इन्द्रियद्वयेन ग्रहणाददोषश्चेत्;

२ वि] तद्वि
३ त] शब्दस्य ।
४ सा] अप्रत्यक्षता ।
७ म्] तुलना--यद्याकाशं व्यापकं न भवति तदा सर्वत्र शब्दोत्पत्तिर्न स्यात्, समवायिकारणाभावे कार्योत्पत्त्यभावात् । दिवि भुव्यन्तरिक्षे चोपजाताः शब्दा एकार्थसमवेताः शब्दत्वात् श्रूयमाणाद्यशब्दवत् । श्रूयमाणाद्यशब्दयोश्च एकार्थसमवायः कार्यकारणभावेन प्रत्येतव्यः ।--प्रश० कन्द० पृ० ६२ ।
१४ त] स्पर्शस्य ।
१४ त] वायुसन्निकर्ष ।
१४ तेन] इन्द्रियेण ।
१६ द्वारेण] सम्बद्धम् ।
१७ *] अयमर्थः--यस्य भोजनं कृतं तस्य शरावः भाण्डः खण्डितः ।
१८ तीतिः] तेः
२३ त] वायुग्रहणात् ।
२६ अथ] चक्षुःस्पर्शनेति ।
२६ था] इति चेत्; ।
२७ र्तिना] तदधिष्ठायकदेवेन ।

वायोरपि विशिष्टपुरुषेण तद्द्वयेन ग्रहणाददोषोऽस्तु । किमत्र प्रमाणम् ? अन्यत्र किम् इति समानम् । *तस्य रूपादेरभावान्न विशिष्टेनापि तथा ग्रहणमिति चेत्; चन्द्रादौ स्पर्शादिरस्ति इति कुतः ? रूपवत्त्वात्; प्रकृते स्पर्शवत्त्वात् इत्यभ्युपगमात् । शेषं चिन्तितमत्र । § 3351 /ms

यदि चायमेकान्तः द्वीन्द्रियग्राह्यमेव प्रत्यक्षम्; आत्मा प्रत्यक्षो न स्यान्मतम एव तद्ग्रहणे व्यापारो नान्येन्द्रियस्य । किं च, § 3352

एकैकस्य नचेच्छक्तिः इन्द्रियस्येह तद्ग्रहे ।
तद्द्वयस्यास्तु सा कस्मात् येनैवमभिधीयते ॥§ 3354

तन्न किञ्चिदेतत् । § 3355

अथवा, गगनवत् परमाणवोऽपि अत्यन्तपरोक्षा इति तत्परिणामोऽपि शब्दः प्रत्यक्षो न स्यादिति समानमिति चेत्; अत्राह--**परिमण्डलानाम्** इत्यादि । **तादात्म्यपरिणामोपपत्तेः** प्रत्यक्षत्वपरिणामोपपत्तेर**समानं** दूषणमिति । वायुना व्यभिचार इति चेत्; अत्राह--**वायोरपि** इत्यादि । § 3356

उपसंहारमाह--**तदिमे** इत्यादिना । यत एवं **तत्** तस्मात् **इमे** शब्दाः । किंभूताः ? इत्याह--**चैतन्ये**त्यादि । **चैतन्य**ग्रहणेन अपौरुषेयशब्दव्युदासः, **विशेष**पदेन मिथ्याज्ञानप्रसृतध्वनिपरिहारः । किंभूताः पुनरपि ? इत्याह--**वर्ण** इत्यादि । ते किं क्रियन्ते ? इत्याह--**व्यवहारपदवीमुपनीयन्ते** । किं कृत्वा ? इत्याह--**कथञ्चिद्** इत्यादि । केनचित् उपपत्तिप्रकारेण **प्रतिपद्य** ज्ञात्वा । काम् ? इत्याह--[अर्थ इत्यादि] **अर्थे** घटादौ **संसर्गः** सम्बन्धो यस्याः शब्दानां **योग्यतायाः** ताम् । ननु नार्थे शब्दानां योग्यतयापि सम्बन्धः, तथापि पुरुषप्रकारेण ते व्यवहारपदवीमुपनीयन्ते इति चेत्; अत्राह--**नान्यथा** इति । तदेव दर्शयन्नाह--**कथञ्चित्** इत्यादि । निदर्शनमाह--**शब्दान्तरवत्** इति । अवर्णाद्यात्मकसमुद्रघोषादिवदिति । § 3357 /ms

ननु योग्यता कार्यदर्शनादनुमीयते, न च शब्दानामर्थप्रतीतिरूपं कार्यमस्ति, तेभ्यः अस्पष्टसाधारणाकारस्यैव प्रतीतिन्निरासार्थ न्वस्ति तेषामिन्द्रियेऽन्यथा प्रतिभासनात् । भिन्नावभासिनोस्त्व ज्ञानयोः नैकविषयता रूपादिज्ञानेष्वपि तत्प्रसङ्गात् । अथ योग्यतातः तत्कार्यव्यवस्था; अन्योऽन्यसंश्रयः--योग्यतायाः तद्व्यवस्था, अतश्च योग्यतासिद्धिरिति चेत्; अत्राह--**वाग्** इत्यादि । § 3358

602/mkj

१ पुरुषेण] योगिना ।
२ *] वायोः ।
२ था] द्वीन्द्रियेण ।
३ प्र] वायौ रूपादिः ।
५ मेकान्तः] चक्षुस्पर्शनेन्द्रियाभ्याम् ।
५ मेव] द्रव्यम् ।
६ म] स्यात्, मनस
२५ तीति] स्तेत
२५ स्ति] ?
२६ भासिनोस्त्व] श्च
२८ तायाः] तत्कार्यव्यवस्था ।

...3 **वागक्षसंविदेकार्थगोचरत्वेऽपि युज्यते ।**
**प्रतिभासभिदा दूरासन्नैकार्थोपलम्भवत् ॥ ३ ॥**§ 3360

सामग्रीभेदात् प्रतिभासभेदेऽपि नार्थभेदैकान्तः प्रत्यासन्ने[तरज्ञानवत्] । कथमन्यथा अभ्रान्तज्ञानेन वस्तु पश्यन्नयं शुक्तिकाया विशिष्टमेव रूपं न पश्यति ? समानरूपासंभवात् । तत्संभवे प्रत्यासन्नेन रूपद्वयोपलम्भप्रसङ्गात् । तदयमासन्नवत् तदसाधारणं रूपं पश्यन्नपि न निश्चिनोति निश्चयप्रत्ययवैकल्यादिति उच्यमानं न जाघटीति । न हि प्रत्यासन्नेतरविज्ञानयोः स्पष्टास्पष्टप्रतिभासविशेषमन्तरेण निश्चयप्रत्ययसाकल्यवैकल्यसंभवः । कथं च तयोः दूरेतरत्वादिसामग्रीभेदात् दर्शनस्वभावभेदो न स्यात् ? यतः प्रत्यासन्नवत् दूरस्थः स्पष्टमेव पश्येत् ? तन्न... § 3361

**वाचाम्** **अक्षाणां** स्वकार्यभूताः **संविदः** तासाम् **एकार्थगोचरत्वेऽपि योज्यते** । का ? इत्याह--**प्रतिभासभिदा** स्पष्टेतरप्रतिभासभेदः, निदर्शनमाह--**दूर** इत्यादि । **दूरासन्नौ यौ** पुरुषौ तयोः **एकः** साधारणो योऽर्थः वृक्षादिः तस्य **उपलम्भ**योरिव **तद्वत्** । यथा दूरस्य तत्रैवार्थोऽस्पष्ट उपलम्भः आसन्नस्य इतरः तथा क्षणस्य अस्पष्टैकत्रार्थे संविदिति न दोषः । § 3362

कारिकां व्याख्यातुमाह--**सामग्री** इत्यादि । शब्दाऽक्षादि**सामग्र्याः भेदात्** नानात्वाद्धेः * **प्रतिभासभेदेऽपि नार्थभेदैकान्तः** । निदर्शनमत्र **प्रत्यासन्न** इत्यादि । § 3363

ननु दूरस्थस्य अविशदं ज्ञानम् अनर्थविषयमेव, तदवभासिनो घनाऽविशदाकारस्य अर्थेऽभावात् । भावे वा आसन्नस्यापि तत्प्रतीतिप्रसङ्गः । विशदेतररूपद्वयसद्भावे उभयत्र उभयप्रतीतिः, न चैवम् । तन्नाविशदार्थगोचरमविसंवादः, प्रमाणान्तरात् तथा चोक्तम् । **ममेवप्रतिभासो न स संस्थानवर्जितः** । प्र॰ वार्तिकाल॰ २ । १ इत्यादि । वस्तुविषयं /ms तु शुक्तिकादिज्ञानं दूरेऽपि विशदमेव, तत्र रजतादिप्रतीतिः अन्या मानसी भ्रान्तिः तत्कथमुक्तम् **सामग्री**त्यादि इति चेत् ? अत्राह--**कथमन्यथा** इत्यादि । **अन्यथा** सामग्रीभेदाद् बुद्धिप्रतिभासभेदे अर्थभेदैकान्तेप्रकारेण दूरस्थः **पश्यन् अभ्रान्तज्ञानेन** अविकल्पेन **वस्तु** प्रतिपद्यमानोऽयं **जनः** ।
§ 3364

तेन दूरस्थस्यापि शुक्तिकादिज्ञानं परस्य प्रत्यक्षम्, ततः परं रजतादिभ्रान्तिः मानसी, अन्यथा तद्भ्रान्तेः न किञ्चिदुदाहरणम् इति मतं दर्शयति--**शुक्तिकायाः**, उपलक्षणमेतत् तेन मरीचिकाचक्ररज्ज्वादेः इत्यपि गृह्यते, **विशिष्टमेव** सर्वतो व्यावृत्तमेव **रूपं** स्वभावं **न पश्यति** कथमिति सम्बन्धः

---

१२ यो] यु
१४ त्रैवार्थो] र्थे
१७ *] त्वाद्धेतोः
२० स्यापि] घनैकाकारप्रतीति ।
२२ रात्] ?
२२ मेव] ममैवं
२६ भेदैकान्ते] न्त

पश्यत्येवे[त्य]र्थः । तथा च आसन्नवद् दूरेऽपि रजतादिभ्रान्तिः । नहि नीले अन्यतो व्यावृत्ते दृश्यमाने साऽस्ति इति भावः । § 3365

स्यान्मतम्--यथा दूरेऽपि विरलकेशेषु परस्परविवेकाप्रतिभा[से]सर्वसाधारणी कृष्णता प्रतिभाति; तथा शुक्तिकायाः विशिष्टरूपादर्शनेऽपि शुक्तिकारजतसाधारणं चैकविद्य मात्रं पश्यति इति; तत्राह--**समानरूपासंभवादिति** । **समानस्य** शुक्तिकारजतसदृशस्य **रूपस्य** स्वभावस्य सौगतमतेऽ**संभवात्** । तथा च दूरे केशप्रतीतिवत् शुक्तिकायामपि समानरूपप्रतीतिर्मानसी भ्रान्तिः स्यादिति मन्यते । तत्र तद्रूपभावे दूषणमाह--**तत्संभवे** समानरूपसंभवे **प्रत्यासन्नेन** नरेण **रूपद्वयोपलम्भप्रसङ्गात्** तद्रूपासंभवादिति । पश्यत्येव तर्हि तस्या विशिष्टमेव रूपम् अन्यथा अनेकान्तः स्यादिति चेत्; अत्राह--**तदयम्** इत्यादि । **सोऽयं द्रस्थः तदसाधारणं** तस्याः शुक्तिकाया विशिष्टं **रूपम् आसन्नवत्** आसन्न इव तद्वत् **पश्यन्नपि न निश्चिनोति** तद्रूपम् । कुतः ? इत्याह--**निश्चय** इत्यादि । **[निश्चयप्रत्ययवैकल्यात्]*इति** एवं परेणोच्यमानं **न जाघटीति** । कुतः ? इत्याह--**नहि** इत्यादि । **हि**र्यस्मात् **न प्रत्यासन्नेतरविज्ञान[योः]स्पष्टास्पष्टप्रतिभासविशेषमन्तरेण** प्रत्यासन्नस्य विज्ञानस्य स्पष्टप्रतिभासभेदम् इतरस्य दूरस्य विज्ञानस्य अस्पष्टप्रतिभासभेदं विनाशमानप्रतिभास इत्यर्थः । **निश्चयस्य प्रत्ययो** हेतुः तस्य **साकल्यवैकल्यसंभवः** । अनुभवो हि तत्प्रत्ययः, स च द्वयोरपि समानः, नैकत्र तस्य साकल्यम् अपरत्र वैकल्यम् इति भावः । दर्शनपाटवादिकमपि तत्कारणम्, तद् दूरस्थे नास्तीति चेत्; अत्रेदं चिन्त्यते--किमिदं तत्र दर्शनस्य पाटवम् ? प्रवृत्त्यभाव इति चेत्; कुतः तस्य शुक्तिकायां मानसो रजतविपर्ययः ? यत इदं स्यात्-- § 3366

603/mkj /ms

> *नो चेद् भ्रान्तिनिमित्तेन संयु[यो]ज्येत गुणान्तरम् ।
> शुक्तौ वा रजताकारः रूपसाधर्म्यदर्शनात् ॥ प्र° वा° ३ । ४३ इति ।§ 3368

दर्शनाभावः रूपसाधर्म्यदर्शनं च इति विरुद्धम् । अथ सतोऽपि निश्चयजननासामर्थ्या[त्] तदिष्यते शुक्लतामात्रेऽपि ततो निश्चयो न भवेदिति न तत्र दर्शनव्यवहारः । तत्र सामर्थ्यम् अन्यत्र विपर्ययश्चेत्; न निरंशे तदप्ययोगात् । एकत्र सामर्थ्यमन्यत्र विपर्ययश्चेत्; न; नित्यानिषेधप्रसङ्गात् । § 3369 /ms

किंच, स्वग्रहणशक्तिरेव परग्रहणशक्तिः इति न बहिरर्थग्रहणनिषेधोऽपि । यदि पुनः अवैशद्यम् अपाटवम्; तर्हि इदमायातम्--इतरविज्ञानाऽस्पष्ट-

२ सा] भ्रान्तिः ।
५ विद्य] चाकचिक्य
१० त] शुक्तिकायाः ।
१४ *] अत्र पाठस्त्रुटितः प्रतीयते ।
१७ मान] विना समान
२८ योगात्] रूपद्वयाभावात् ।

प्रतिभासविशेषे सति निश्चयप्रत्ययवैकल्यसंभवः इति, स्वभ्यासादिमतोऽपि दूरस्थस्य तन्निश्चयः इति न तद्वैकल्यं तत्र तदभावहेतुः । अथ अदूरत्वमपि निश्चयप्रत्ययः, ततो दूरस्थस्य तत्प्रत्ययवैकल्यसंभव इति चेत्; अत्राह— **कथं च** इत्या द्यभिप्रायः--यथा प्रत्यासन्नेतरयोः शुक्तिरूपानुभवाऽविशेषेऽपि निकटत्वाऽनिकटत्वप्रत्ययभेदा[त्]निश्चयानिश्चयौ, तथा अर्थाविशेषेऽपि **तयोः दूरेतरत्वादिसामग्रीभेदाद् दर्शनस्य स्वभावभेदः** विशदेतररूपविशेषः **कथन्न स्यात् ?** स्यादेव, **यतो** दर्शनस्वभावभेदाभावात् **प्रत्यासन्नवत् दूरस्थ[ः]स्पष्टमेव पश्येत् । यतः** इति वा आक्षेपे नैव पश्येत् । यदि च, यथा आसन्नः तथा दूरस्थोऽपि शुक्तौ विशिष्टं स्पष्टमेव रूपं पश्येत्; तर्हि दूरस्थितविरलकेशानामपि तथाविधमेव रूपं पश्यति, निश्चयप्रत्ययवैकल्यात् न निश्चिनोति
604/mkj इति स्यात् । तथा च **अणवो दूरविरलकेशवत् घनैकाभासमतिहेतवः** प्र° वार्तिकाल° २ । ९२ इति प्र ज्ञा क र स्य वचनं प्लवते । ध र्म
/ms की र्तेः **चन्द्रद्वयज्ञानम् इन्द्रियजम्** इति । शक्यं हि वक्तुम्--प्रथममेकं तदर्शनं तदनन्तरं तद्द्वयविकल्प इति । कथमस्य वैशद्यमिति चेत् ? कथं स्थूलैकघटादिविकल्प[स्य ?] । § 3370

ननु च उक्तमत्र **मनसोर्युगपद्वृत्तेः** प्र° वा° २ । १३३इत्यादि । सत्यमुक्तम्— तत्तु अन्यत्राप्युत्तरम् । अक्षभावाभावानुविधानं कथम् ? इत्यपि न चोद्यम्; अस्य तद्विकल्पेऽपि समत्वात् । न च तत्र तन्नास्ति; लोकस्य तथैव व्यवहारात् तदुक्तम्--**अक्षज्ञानमनेकान्तमसिद्धेरपराकृतेः** । प्रमाणसं° १ । ४ इति । § 3371

अक्षजदर्शनान्तरभावित्वात्तत्र तद्विभ्रमः इति चेत्; तथा चोक्तम्-- § 3372

**प्रत्यक्षासन्नवृत्तित्वात् कदाचिद् भ्रान्तिकारणम्** इति; तदपि तादृगेव । § 3373

यत्पुनरेतत्--*अन्यत्र **दृष्टस्मृतिमपेक्षेत** प्र° वा° २ । २९८ इति; तदप्येतेन निरस्तम्; नहि तद्विकल्पः तामपेक्षते क्वचित्तद्दर्शनाऽनभ्युपगमात् । तद्वासनातः तद्विकल्पः इति चेत्; न; सर्वस्य सर्वदा तस्य भावात् । व्यवहिता सा; तद्द्वयविकल्पेऽपि । कामाद्युपप्लववत् बहिरर्थाभावः स्यादिति चेत्; अत एव संवेदनस्यापि स्थूलैकाकारवत् न द्विचन्द्राकारस्य विकल्पगोचरत्वेऽपि सन्तानान्तरे वाचकैः समर्पणम् । यदि पुनः तथापि तैमिरिकः चन्द्रादेः[वि]शिष्टं रूपं न पश्यति; दूरस्थः शुक्तिकादेरपि तन्न पश्यति । तथाप्यस्य वस्तुविषयत्वशब्दस्याप्य त्वेतदेव दर्शयन्नाह--**तन्न** इत्यादि । § 3374

---

४ द्य] दि । अयम
५ यौ] भवतः ।
५ योः] प्रत्यासन्नेतरयोः ।
१२ इति] यथा विरलदेशस्थिता अपि केशमशकमक्षिकादयः एकघनाकारं प्रत्ययमुपजनयन्ति...--प्र° वार्तिकाल° ।
१३ इति] प्लवते इति सम्बन्धः ।
नीलद्विचन्द्रादिधियां हेतुरक्षाण्यपीत्ययम् ।--प्र° वा° २ । २९४ ।
१४ त] मेकेन्दु
१७ अ] इन्द्रियान्वयव्यतिरेकानुविधानम् ।
२४ *] अन्यसन्ताने ।
३१ त्व] त्वे
३१ त्वे] प्यस्तु । ए

ननु सामान्यं शाब्दे ज्ञाने प्रतिभाति । तच्चवस्तुनो भिन्नेतद्रूपमस्ति विरोधात्, ततो निर्विषयं तदिति चेत्; अत्राह--**शब्द** इत्यादि । । § 3375 /ms

...4 शब्दसंसर्गयोग्येतरनिर्भासैकविकल्पवत् ।
स्याद्भेदो बहिरर्थस्य ततस्तत्त्वं द्वयात्मकम् ॥ ४
॥§ 3377

यथैव हि...ततः परमार्थसन् शब्दबुद्धौ प्रतिभासेत । यदि पुनरयं स्थिरस्थूलाकारः असन्नेव कथं प्रत्यक्षः कथं वा स्वार्थक्रियाकारी यतो लोकव्यवहारः ? तथा विकल्पस्वलक्षणस्य तदतदात्मकत्वमनिष्टमप्युपपद्येत । तथा च बहिरर्थस्य कस्यचित् अक्षशब्दज्ञानविषयत्वं कथन्नाङ्गीक्रियते यतः शब्दानां विकल्पानां च मिथ्यैकान्तताऽवसीयते । न चैतद् युक्तम्, कस्यचित्सम्यक्त्वमन्तरेण तन्मिथ्यैकान्तप्रतिपत्तेरयोगात् । तत्तत्त्वविकल्पसंभवे कथं सर्वविकल्पमिथ्यात्वम् ? तथाऽविकल्पसंवित्तेः निर्णयविरोधात् । § 3378

**शब्दस्य** तेन वा **संसर्गः** सम्बन्धः तस्मै **योग्यः इतरो**ऽयोग्यः तौ आकारौ **निर्भासौ** तयोरे**कः** साधारणो **विकल्पः** । ननु सोऽपि असाधारणरूपमग्नोऽविकल्प एवेति चेत्; आस्तां तावदेतत् । तस्येव **तद्वत्** । **स्याद् भेदो** 605/mkj **बहिरर्थस्य ततः तत्त्वं द्वयात्मकम्** सामान्यविशेषात्मकम् । § 3379

कारिकां व्याख्यातुमाह--**यथैव हि** इत्यादि । निगमनमाह--**तत** इत्यादि । यत एवं **ततः परमार्थसन्** न संवृतिसन् **शब्दबुद्धौ प्रतिभासेत** । § 3380

ननु विकल्पस्वलक्षणस्य अभिलापसंसर्गयोग्यत्वेनाभिमत आकारः ततो न व्यतिरिच्यते इति स्वलक्षणमेव, तन्न दृष्टान्तसिद्धिरिति चेत्; अत्राह--**यदि पुनः** इत्यादि । **अयं** परिदृश्यमानः **स्थिरस्थूलाकारः** शब्दवाच्यो **यदि पुनः असन्नेव** अविद्यमान एव विकल्पबुद्धि निरंशासेतियावत् **कथं प्रत्यक्षः** स्वसंवेदनाध्यक्षग्राह्यः ? येन प्र ज्ञा क र गु प्त स्य इदं व[च]नं शोभेत--**प्रमेयद्वैविध्यं प्रमाद्वैविध्यसाधनं प्रत्यक्षतः प्रतीयते** *इति । रहयसऽछ सविषाणमध्यक्षगोचरः; तथा च स्वलक्षणमेकमेव प्रमेव प्रमेयम्, तत्र प्रत्यक्षमेव प्रमाणं न द्वितीयप्रमाणावकाश इति भावः । § 3381

स्यान्मतम्--स एव तदाकारो विशेषेषु समारोपितः सामान्यम्, ततोऽयमदोषः इति; तत्राह--**कथं च** इत्यादि । शब्दवृत्तिः अनुमानप्र-

---

१ च्च] न च
१ भिन्ने] न्नं
२२ निरंशासेति] निरंशेति
२४ *] विषयद्वैविध्यं प्रत्यक्षत एव सिद्धम्--प्र॰ वार्तिकाल॰ ३ । २ ।
२५ स] नहि असत् शश
२५ मेव] प्रमेव इति व्यर्थम् ।
२८ च] वा

वृत्ति[श्च]**स्वार्थक्रिया तत्कारी** विकल्पबुद्धेरयमाकारोऽसन्नेव कथम् ? **वा** /ms इति दूषणसमुच्चये, **यतः** तत्का **लोकस्य व्यवहारः** प्रवृत्त्यादिरूपः । § 3382

इदमत्र तात्पर्यम्--आकारोऽयं विशेषेषु किं तेनैव विकल्पेन आरोप्यते, विकल्पान्तरेण वा ? येनोच्यते प्र ज्ञा क रे ण--**स एवाकारोऽस्पष्टः ततोऽव्यतिरिच्यमानतनुः स्वलक्षणमपि भिन्ने खण्डादौ चारोप्यमाणः सामान्यम्** इति । तत्राद्ये पक्षे सिद्धा विकल्पस्य अभिलापसंसर्गयोग्यता, * अन्यत्र आरोप्यरूपस्य भ्रान्तस्यापि स्वीकारात् । न चैवं परस्य मतम् । एतेन द्वितीयोऽपि विकल्पश्चिन्तितः; तथाहि--द्वितीयोऽपि विकल्पः प्रथमविकल्पस्य आकारमन्यत्र आरोपय रि[यति]स्वस्य नेति तस्यापि भ्रान्ते[त]ररूपापरित्यागः । अथ तस्यापि तत्र तदारोपः स्वाकारत्वात् स्वलक्षणम्; अत्रापि स एव दोषः **असन्नेव कथं स्वा--** इत्यादिकः । पुनरपि विकल्पान्तरेण तस्य तत्र तदारोपे अनवस्था, पुनरपि तदन्तरकल्पनात् । § 3383

किं च, आद्य एव अन्यत्र स्वाकारमारोपयतु किं द्वितीयेन ? तत्र सत्यपि एकत्र विभ्रमेतरत्वानिवृत्तेः । भवतु आद्य एव तथा विकल्पः तथापि न भवतोऽभिमतसिद्धिः, आरोपिताकारस्य असत्त्वात्, ततोऽनेकान्तेऽपि तथा स्यात् परमार्थाकारानेकान्तोपगमादिति चेत्; अत्राह--**स्वलक्षणस्य** इत्यादि । **विकल्पस्वलक्षणस्य तदतदात्मकत्वम्** आरोपितेतराकारात्मकत्वं **तथा** तेन
606/mkj अनन्तरोक्तप्रकारेण **उप[प]द्येत** । किं भूतम् ? इत्याह--**अनिष्टमपि** सौग
/ms तस्य अनभिमतम् । नहि निरंशैकान्तवादिनोभ्रान्तोऽपि द्वितीयोंऽशः सुखाय । **अपिशब्दः तथा** इत्यस्यानन्तरं द्रष्टव्यः । **तथा च** तदनिष्टानुषङ्गप्रकारेण च **बहिरर्थस्य** घटादेः **कस्यचित्** जैनोपगतस्य नापरस्य **अक्षशब्दज्ञानविषयत्वं कथं नाङ्गीक्रियते ?** एकत्र भ्रान्तेतराकारद्वयाविरोधे अभ्रान्तसाधारणेतराकारद्वयाविरोधोऽपि दुर्निवार इति भावः । **यतो** मंगीकरणात् **शब्दानां विकल्पानां च मिथ्यैकान्तता अवसीयते** । विकल्पाकारस्य शब्दसंसर्गयोगस्यसत्त्वमभ्युपगम्य इदमुक्तम् । § 3384

अधुना तत्रास्तीति दर्शयन्नाह--**न चैतद् युक्तम्** इत्यादि । **न च** नापि **एतद्** विकल्पस्वलक्षणस्य तदात्मकत्वम् आरोपिताकारात्मकत्वं **युक्तम्** उपपन्नम् । कुतः ? इत्याह— **कस्यचित्** इत्यादि । **कस्यचिद्** विकल्पस्य **सम्यक्त्वं** यथार्थत्वमन्तरेण **तेषां** विकल्पानां यो **मिथ्यात्वैकान्तः** तस्य **प्रतिपत्तेरयोगात्** । अस्त्येव स विकल्पः सम्यक्, यतः तदेकान्तप्रतीतिरिति चेत्; अत्राह--**तत्तत्त्व** इत्यादि । **स** तन्मिथ्यात्वैकान्तः **तत्त्वं** परमार्थो यस्य

---

२ त्का ] तत्करणात्[[अर्थक्रियाकरणात् ।]]
५ इति ] रूपादय एवाविशेषेण सामान्यमनुमानगोचरम् । व्यक्त्यन्तरापरित्यागे हि व्यक्तय एव सामान्यमुच्यन्ते ।--प्र॰ वार्तिकाल॰ पृ॰ १९२ ।
६ *] ?
९ स्यापि ] द्वयरूपतापत्तिरित्यर्थः ।
१० दारोपः ] ?
१२ पि ] विकल्पान्तर ।
२३ मंगी ] यदङ्गी
२५ स्य ] स्य
२६ त्रा ] तन्ना

**विकल्पस्य** तस्य **संभवे कथं सर्वविकल्पमिथ्यात्वम् ?** विवादगोचरापन्ना विकल्पा मिथ्या *तत्त्वात् ईश्वरादिविकल्पवत् अतोऽनुमानात् तत्प्रतीतिः । *तच्च अतत्त्वविषयमपि प्रमाणम् अविसंवादात्, *सोऽपि पारम्पर्येण वस्तुनः उत्पत्तेः । तथा चोक्तम्-- § 3385

*मणिप्रदीपप्रभयोर्मणिबुद्ध्याऽभिधावतोः ।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥§ 3387

प्र° वा° २ । ५७ § 3388

तत्कथमुच्यते **तत्संभव** इति ? तदप्यसत्यम्; यतः अनुमानस्य /ms
अतत्त्वविषयत्वे ततः तत्त्वाऽसिद्धेः, अन्यथा प्रधानादिविकल्पादपि तत्प्रसङ्गात् । *अस्य वस्तुन्यप्रतिबन्धात् नेति चेत्; मरीचिकाजलज्ञानादपि तत्त्वसिद्धेः तदपि प्रमाणं भवेत्, तस्यापि पारम्पर्येण तत्र प्रतिबन्धात् । तथाहि--मरीचिकाभ्यः तद्दर्शनम्, अतो जलविकल्पः इति । **नो चेत्** प्र° वा° ३ । ४३ *इत्यादि वचनादस्तु प्रमाणमिति चेत्; प्रमाणान्तरं स्यात् । न प्रत्यक्षम्; विकल्पत्वात् । नाप्यनुमानम्; अलिङ्गजत्वात् । इतरथा **अनुमानानुमानिकम्** प्र° समु° १ । ८ इत्यनेन पर्याप्तमिति **भ्रान्तिसंवृतिसंज्ञा *नम्** प्र° समु° १ । ८ *इत्यनर्थकम् । जलस्यासतो ग्रहणतु प्रमाणमनुमानम्, तस्मात् सात्मनोग्रहणात् । लोक एवं न मन्यते; यो मन्यते तं प्रमाणे ति किं स्यादप्रमाणम् ? इतरथा शुक्लशङ्खादौ पीतादिज्ञानं विसंवादधियं प्रति प्रमाणं स्यादिति तत्रानुमानोत्थापनमयुक्तमिति चेत्; उच्यते--**व्याख्यातारः** 607/mkj
**खल्वेवं विवेचयन्ति** प्र° वा° स्ववृ° १ । ७२ *इति वचनात् तेषां तत् प्रमाणं न स्यात् । § 3389

अथ ते विवेचयन्तोऽपि गत्यन्तराभावात् दृश्यविकल्प्ययोरेकीकरणात् प्रवर्त्तते; तर्हि दूरस्थोऽविशदप्रतिभासाद् विवेचनचतुरधीरपि प्रवर्त्तते इति

---

२ *] विकल्पत्वात् ।
३ *] अनुमानम् ।
३ च्च] सामान्यविषयमपि ।
३ *] अविसंवादोऽपि ।
८ व] तत्तत्त्वसंभवे
९ था] साङ्ख्याभिमत ।
९ पि] तत्त्वसिद्धिप्रसङ्गात् ।
१० *] प्रधानादिविकल्पस्य ।
११ र्येण] वस्तुनि ।
१३ *] नो चेद्भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम् । शुक्तौ वा रजताकारः रूपसाधर्म्यदर्शनात् ।--प्र° वा° ।
१५ *] सञ्ज्ञा
१६ *] भ्रान्तिसंवृतिसञ्ज्ञानमनुमानानुमानिकम् । स्मार्ताभिलापिकं चेति प्रत्यक्षाभं सतैमिरम् ।--प्र° समु° । भ्रान्तिज्ञानं मृगतृष्णिकायां जलावसायि, संवृतिसतो द्रव्यादेर्ज्ञानम्, अनुमानं लिङ्गज्ञानम्, आनुमानिकं लिङ्गिज्ञानम्, स्मार्तं स्मृतिः, आभिलापिकं चेति विकल्पप्रभेद आचार्यदिग्नागेन उक्तः ।(?")--प्र° वा° मनोरथ° २ । २८८ ।
१६ ण] णं
१७ नो] स्वात्मनो
१७ ति] णमिति
२० *] व्याख्यातार एवं विवेचयन्ति न व्यवहर्तारः, ते तु स्वालम्बनमेव अर्थक्रियायोग्यं मन्यमाना दृश्यविकल्प्यार्थावेकीकृत्य प्रवर्तन्ते ।--प्र° वा° स्ववृ° १ । ७२ ।
२३ ते] न्ते

तदवस्थम् अनुमानोत्थापनमनर्थकम् । प्रवर्त्ततां को विरोध इति चेत् ? अनुमानवत् प्रमाणम् । अस्तु इति चेत्; किं नाम ? प्रत्यक्षमिति चेत्; अनुमानमपि स्यात् । अवैशद्यान्नेति चेत्; अत्रसमानम् । लिङ्गजत्वान्नेति /ms चेत्; एवं तर्हि कारणभेदात् मानभेदो न प्रमेयभेदात् । तथा सति अक्षजन्मनो मानसादि प्रमाणान्तरं स्यादिति न प्रमाणसङ्ख्यानियमः । § 3390

स्यान्मतम्--स्वलक्षणगोचरत्वात्तदपि प्रत्यक्षम्, दूरस्थानुमानज्ञानयोः साधारणाविशदविषयत्वादेकप्रमाणत्वमस्तु । अथ व्याख्यातॄणां नानुमानं प्रमाणम्; कुतः ते स्वयं तत्त्वमवबुद्ध्यन्ते परं वा प्रबोधयन्ति, येन ध र्म की र्त्ति प्र ज्ञा क र गु प्ता द यो व्याख्यातारः स्युः ? § 3391

अथ मतम्--परप्रसिद्धानुमाने न तेषां वृत्तिरिति चेत्; न ते चार्वाकेभ्यो विशिष्यन्ते । तन्न युक्तम्--**प्रमाणेतरसामान्यस्थितेः** इत्यादि । स्वयं चानुमानमनिच्छन्तो **निरालम्बनाः सर्वे प्रत्ययाः इति कोऽर्थः ? स्वरूपालम्बनाः** प्र० वार्त्तिकाल० पृ० ३६५ इति कथं ब्रूयुः तत्र प्रत्यक्षावृत्तेः इत्युक्तम् । अद्वैतं च निराकृतम् । अथ अनुमानमर्थविषयमिति तेषामपि प्रमाणं न मरीचिकातोयज्ञानम्; आगतास्तेऽपि तर्हि मदीयं पन्थानमिति साधूक्तम्— **सवविकल्पमिथ्यात्व**मिति । § 3392

अपरः प्राह--व्यवहारेण अनुमानं प्रमाणमिष्टम् **प्रामाण्यं व्यवहारेण** प्र० वा० १ । ५ इति वचनात् । व्यवहारत्यागे तत्त्यागो भाण्डत्यागे शुक्लात्यागवत्, तत्त्वं पुनरविकल्पाध्यक्षात् सिद्ध्यति; इत्यत्राह--**अविकल्पसंवृत्तेः** इत्यादि । कुतः ? इत्यत्राह— **तथा** तेन मिथ्या सर्वे विकल्पा इति प्रकारेण **निर्णयविरोधात् अविकल्पसंवित्तेः** इति । तथाहि-- § 3393

विकल्पानुकृतेस्तस्य अविकल्पकता कुतः ।
/ms तेषां तया न निर्णीतिः तादृूप्यत्ययमिच्छताम् ॥§ 3395

सारूप्यमन्यथा वित्तौ निराधारं व्रजेदधः ।
स्वरूपेतरसंवित्तौ नाविकल्पकताप्यतः ॥§ 3397

तन्मिथ्यात्वस्य निर्णीतौ तया तस्या भवेत्कथम् ।
अविकल्पकता नाम क्षणभङ्गे यतोऽनुमा ॥§ 3399

नसं निर्णयज्ञानं प्रत्यक्षं कैश्चिदीक्ष्यते ।

---

३ अत्र] अन्यत्र
४ मा] प्रमाणभेदः ।
५ नो] निर्विकल्पात् ।
१० वृ] प्रबोधनव्यवहारः ।
११ इ] अन्यधियो गतेः ।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ।
इति शेषः ।
१९ शुक्ला] दुग्ध
२० संवृत्तेः] संवित्तेः
२८ सं] नन्व

निरस्ता ग्रन्थतोऽस्मात्ते समदोषानुषङ्गतः ॥§ 3401
608/mkj

यदि वा, **तथा** सर्वं विकल्पज्ञानं मिथ्या इत्यनेन प्रकारेण **अविकल्पसंवित्तेः** सकाशात् **निर्णयविरोधात्** । विचारितमेतत् **अभेदात् सदृशस्मृत्या** सिद्धिवि० १ । ६ इत्यादिना । § 3402

ननु तस्य दर्शने न कश्चिद् विकल्पो नाम, स्वरूपमात्रवेदने तदयोगादिति चेत्; उक्तमत्र— **स्थूलैकाकारप्रतिभासा**दिति । तथाप्यविकल्पकत्वे विकल्पे नामान्तरम् । अथायमाकारो न ज्ञाने नाप्यर्थे, वनादिवद्विचार्यमाणस्यायोगात्, केवलमविद्याबलादाभातीति; तत्राह--**स्वग्राह्याकारं विकल्पमित्यादि** । § 3403

...5 स्वग्राह्याकारवैकल्यं संवित् संवृण्वती स्वतः ।
भेदेऽप्यभेदग्रहणात् स्वभावानपि स्वार्थयोः ॥ ५
॥§ 3405

चित्तस्वलक्षणं कथञ्चित् प्रतिभासनं स्वार्थयोः प्रतिभासेत ग्राह्या[द्याकारत्वात्] यतः, ततो न युक्तम् अनंश[विषयं]प्रत्यक्षादि, विकल्पकं निर्विषयम् इति । § 3406

**ग्राह्याकारस्य** स्थूलाकारस्य **वैकल्यम्** अभावः तच्च ज्ञानस्य स्वरूपमेव । **स्वं** च तद् **ग्राह्याकारवैकल्यं** च इति तत् । **संवद्** बुद्धिः **संवृण्वती स्वत** आत्मनैव सदपि स्वयं विषयतामनयन्ती, इतरथा न स्थूलाकारावभासः स्यात् । नहि नीलविविक्तयाते वद्यमाने नीलस्य विभ्रमतोऽपि प्रतिभासः । अथ तदाकाराद्भिन्नमात्मानमसौ वेत्ति **नीलादिशरीरव्यतिरेकेण संवेदनस्यान्यस्याप्रतिभासनात्** इत्यस्य विरोधात् । § 3407

किंच, अयमाकारः संवेदना[त्]चेद्भिन्नः; कथमाभाति ? स्वतश्चेत्; /ms
संवेदनान्तरम्, तत्र चोक्तो दोषः--विरुद्धधर्माध्यासैकवस्तुसिद्धिरिति, **मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽप्यदोषः** प्र० वार्तिकाल० ३ । २११ इत्यस्य विरोधश्च । संवेदनत्वेऽप्यसत्त्वमिति चेत्; न; **अज्ञातार्थप्रकाशः इति परमार्थलक्षणम्** प्र० वार्तिकाल० १ । ५ इत्यस्य विरोधात् । विभ्रमाचेत्; न विभ्रमसिद्धिः । पुनरपि संवेदनाद्भेदे अनवस्था । अविद्यावभासे एकस्य विभ्रमेतररूपता । अथ विकल्पेन आरोप्यते स तत्राकारः; न; स्पष्टताप्रसङ्गात् । § 3408

---

७ म] कृतं स्यात् ।
९ ल्प] कारवैकल्य
१६ संव] संवि
१८ द्य] क्ते पीते वेद्य
२० इत्य] नीलादिसुखादिकमन्तरेणापरस्य

ज्ञानाकारस्यानुपलक्षणात् । पृ० ३४५
सुखादिनीलादिव्यतिरिक्तमपरमिह जगति संवेदनं नास्तीति सुखादिवत् स्वसंवेदनं नीलादिकमपीति युक्त एव निर्णयः ।--प्र० वार्तिकाल० पृ० ४५४ ।

किंच, संवेदनात्तस्य भेदेनावभासे साकारभ्रान्तिर्न स्यात् । नहि नीलाद्भेदेन पीते प्रतिभासमाने तत्र नीलाकारेण साकारत्वभ्रमः कस्यचित् । अथ अभेदाध्यारोपादभेदभ्रमः; स कुतो मतः ? उत्तरविकल्पात्; संहृताशेषविफल्पदशायां न स्यात्, अभ्यासात् प्रवर्त्तमानस्य च । तत एव संवेदनाच्चेत्; न[नु] च तेन तत्र तदव्यापारोऽभेदग्रहणान्नापरः । एवमिति चेत्; तर्हि **भेदेऽपि अभेदग्रहणात्** तत्संवृण्वती इति सूक्तं भवत्वेवन्वेवमिति चेत्; अत्राह--**स्वभाव** इत्यादि । **स्वभावान्** क्षणिकत्वादीनपि संवृणोति । कयोः ? इत्याह--**स्वार्थयोः** इति । § 3409

कारिकां विवृण्वन्नाह--**चित्तस्वलक्षणम्** इत्यादि । चेतसो निरंशत्वप्रतिपादनार्थं **स्वलक्षण** ग्रहणम्, परस्य तत्रैव स्वलक्षणत्वोपगमात्, **कथञ्चित् प्रतिभासेत** न सर्वथा । किं कारणम् ? इत्याह--**स्वार्थयोः** इत्यादि । किं कुर्वाणम् ? इत्याह--**कथञ्चित्** सच्चेतनादिप्रकारेण न धर्मान्तरे[ण]**प्रतिभासमानम्** । एतदपि कुतः ? इत्याह--**ग्राह्य** इत्यादि । **यत** इति **यत** एवं **ततो न युक्तम्** । किम् ? इत्याह--**प्रत्यक्षादि** । कुतः ? इत्याह--**अनंश** इत्यादि । **विकल्पकं निर्विषयम्** इति । तदविकल्पकवदन्यस्यापि[अ]साधारणगोचरत्वादिति मन्यते । § 3410

609/mkj /ms

प्रत्यक्षस्य असाधारणविषयत्वसाधिकां परकीयां युक्तिमपनुदन्नाह--**प्रत्यक्षम्** इत्यादि । § 3411

...6 प्रत्यक्षं स्वार्थशक्तेः स्वार्थाकारानुकारि चेत् ।
सविकल्पमनस्कारशक्तेः स्यात् सविकल्पकम् ॥ ६ ॥§ 3413

ततश्चैकत्वप्रसङ्गात् कस्यचित् केनचित् क्रमाक्रमनैरन्तर्यविप्रकर्षादिव्यवस्थैव न स्यात् । § 3414

**प्रत्यक्षं** कल्पनापोढमभ्रान्तं ज्ञानम् । किंभूतं तत् ? इत्याह--**स्वार्थो** रूपादिपरमाणवः **तदनुकारि चेत्** यदि **स्यात्** । कुतः ? इत्यत्राह--**स्वार्थस्य शक्तेः** सामर्थ्यात् । अत्र दूषणमाह--**सविकल्पमनस्कारशक्तेः** सामर्थ्यात् **स्यात् सविकल्पकं प्रत्यक्षम्** इत्यनुवर्त्तते । तथाहि--सौगतप्रत्यक्षम् अनुमानसविकल्पकमुपादाय उपजायते, तथा कामशोकाद्युपप्लवः, एतदुभयोरपि नालत्वात् कुतस्तयोः अन्योऽन्यतो व्यावृत्तिः येन व्यपदेशभेदः

---

४ शायां] निर्विकल्पावस्थायाम् ।
४ च] न स्यात् इति सम्बन्धः ।
५ व्यापारो] तदध्यारोपो
६ न्वेव] भवतु, एव
२४ द] तदाकारा
२७ अ] श्रुतमयी चिन्तामयी च भावने अनुमानरूपे, तत्प्रकर्षपरिप्राप्तौ सुगतज्ञानं भवति ।
२८ नाल] तुल्य
२८ भेदः] सुगतज्ञानं प्रमाणम्, कामाद्युपप्लवः तदाभासमिति ।

स्यात् । अथ ज्ञानस्य अर्थाज्ञातत्वेन, अर्थस्य ततो जडत्वेन; कुत एतत् ? एकैकस्वभावस्यान्यासदृशस्यापि अन्यत्राभावादुच्यते; तयोः सदृशेतरतांप्रसङ्गः । अपि च, येन स्वभावेन तयोः अकार्यकारणेभ्यो व्यावृत्तिः तेन चेत् परस्परमकारणता[तयोरैक्यम्] । § 3415

तदेतेन अनुपादानोपादेयव्यावृत्तिरपि चिन्तिता । येन च स्वभावेन घट- /ms व्यपदेशभाजः परमाणवः मेरुपरमाणुभ्यो व्यतिरिच्यन्ते, तेन चेदन्योऽन्यम्; समूहाभावः । सुगतज्ञानं स्वोपादानानुमानक्षणात् येन रूपेण व्यावर्त्तते तेन यदि स्वोपादेयोत्तरक्षणात्; तस्योपादेयत्वमेव न उपादानत्वम् । एतदेव दर्शयन्नाह--**ततश्च** तस्माच्च **एकत्वप्रसङ्गात् कस्यचित्** कारणक्षणस्य कार्यक्षणस्य वा **केनचित्** कार्यक्षणेन[कारणक्षणेन]वा यः **क्रमः** कस्यचिद् रसादेः केनचिद् रूपादिना यश्च **अक्रमः** कस्यचिज्जाग्रद्विज्ञानस्य केनचित् पूर्वज्ञानेन **नैरन्तर्य**प्रत्यासत्तिः स्वापव्यवहितप्रबोधित**विप्रकर्षः, आदि**शब्देन जडतेतरत्वादिपरिग्रहः । यदि वा, घटे कस्यचित् परमाणोः केनचित् परमाणुना **नैरन्तर्यं** प्रत्यासत्ति[ः] द्रव्यान्तरपरमाणुना **विप्रकर्षादिः** तेषां **व्यवस्थैव न स्यात्** । एतेन द्वितीयोऽपि पक्षः चिन्तितः । तथाहि--चित्रज्ञानं येन स्वभावेन केवलनीलज्ञानाद् व्यावृत्तं पीतेन तेन चेत् तथा विज्ञानान्तरेभ्यः पीतमेव स्यात्  इति कुतः चित्रं नाम ? पूर्वमत्र यथासंभवं योज्यम् । 610/mkj विज्ञानपरमाणुसमुच्चयदर्शने अर्थपरमाणुसमुच्चयवद् वक्तव्यम् । § 3416

ननु यदुक्तम्--**तत्र दृष्टस्य भावस्य दृष्ट एवाऽखिलो गुणः** प्र० वा० ३ । ४४ इति; तदसारम्; दृष्टस्य अदृष्टस्वरूपायोगात् अतिप्रसङ्गात् तस्येति सम्बन्धाभावात् शशविषाणवत् ।  न हि दृष्टस्य घटस्य अदृश्यं शशविषाण- /ms मिति भ[व]ति व्यपदेशः । पश्चात्तत्रैव प्रतीयमाने[ने]ति चेत्; न; अत्र प्रमाणाभावात् इति; अत्राह--**दृश्यादृश्यात्मभेदेऽपि** इत्यादि । § 3417

...7 दृश्यादृश्यात्मभेदेऽपि तादात्म्यं रसादिषु ।
स्वसंविद्ग्राह्यनिर्भासविवेकादिवदञ्जसा ॥ ७ ॥§ 3419

एकद्रव्य...स्वसंवेदनवत् । § 3420

उपलभ्यानुपलभ्यस्वभावनानात्वेऽपि **तादात्म्यम्** एकत्वं स्यात् । क्व ? इत्याह— **रसादिषु** । निदर्शनमाहात्र--**स्वे**त्यादि । **स्वश्चासौ संविद्ग्राह्यनिर्भासविवेकश्च** स **आदि**र्यस्य चित्रज्ञाननीलाद्याकाराणां ते तथोक्ताः तेष्विव **तद्वत्** । **अञ्जसा** परमार्थेन । § 3421

---

१ अर्थाज्ञा] अर्थाज्ञा
१ त्वेन] अस्ति प्रतिभासभेदः ।
२ तां] ता
६ म्] व्यतिरेकस्तर्थि ।
८ मेव] स्यात् किन्तु ।
१२ र्य] र्यं
१२ बोधित] प्रबोधेन

कारिकार्थमाह--**एकद्रव्य** इत्यादिना । अत्र निदर्शनम्--**स्वसंवेदन** इत्यादि । § 3422

लब्धं फलं दर्शयन्नाह--[तत एव इत्यादि] § 3423

...8 तत एवोपाधितद्वद्भेदाभेदानुषङ्गिणः ।
अनवस्थादिदोषाः स्युस्तदनेकान्तहेतवः ॥ ८ ॥§ 3425

यच्चेदम्--उपाधितद्वतोर्भेदैकान्ते सम्बन्धो न सिध्येत् । तदुपकारेऽपि तदेकोपाधिद्वारेण सर्वोपाध्युपकाराङ्गैकात्मनो धर्मिणो ग्रहणे प्रमाणान्तरावृत्तिः । तदुपकारिकशक्तीनां परस्परतो भेदकल्पनायामनवस्था । माभूदनवस्थेति तदभेदकल्पनायां कुत एतत् समस्तमनेकान्तसाधनम् उपाधि...तदेकोपाधिविशिष्टस्य धर्मिणः प्रतिपत्तावपि प्रमाणान्तरम्, तदन्यविशिष्टस्य तस्याप्रतिपत्तेः । व्यवसायात्मकस्य [प्रवर्तकत्वात्] । यदर्थसामर्थ्योत्पन्नं तदाकारमेवानुकरोति प्रत्यक्षं तदनन्तरवत्; नायमेकान्तः चित्स्वभावाभावप्रसङ्गात् । तदनेकान्ते सामग्रीभेदात् सविकल्पादिरूपता । § 3426

**तत एव** तेषां तादात्म्यादेव । किम् ? इत्याह--**उपाधि** इत्यादि । **उपाधयः** विशेषणानि **तद्वन्तो** विशेष्याः तेषाम् **अन्योऽन्यम्** एकान्तेन यौ **भेदाभेदौ तदनुषङ्गिणो** ये **अनवस्थादिदोषाः** आदिशब्देन विरोधादिपरिग्रहः, **स्युः** भवेयुः । किंभूताः ? इत्याह— **तदनेकान्तहेतवः** । § 3427

कारिकां विवृण्वन्नाह--**यच्चेदम्** इत्यादि । पूर्वपक्षसमुच्चये चशब्दः । **यत्**
611/mkj *परं परेणोक्तम् **उपाधितद्वतोर्भेदैकान्ते** अङ्गीक्रियमाणे **सम्बन्धो न सिध्येत्** । समवायादेरन्यस्य सम्बन्धस्य निषेधात् । § 3428

नन्वेवम् अग्निधूमयोरपि स न सिध्येत्; इत्यत्राह--**यद्यनुपकारः** इति । तयोर्यद्युपकाराभावः तदा न सिध्येत्, उपकारे तु सिध्येदेव । उपकारोऽस्ति
/ms चेत्; अत्राह--**तदुपकारेऽपि** इत्यादि । तयोः परस्परम् एकस्मादेकस्यचोपकारेऽपि **प्रमाणान्तरावृत्तिः** । कस्मिन् सति ? आह--**धर्मिणो ग्रहणे सति** । केन ? इत्याह--**तदेकोपाधिद्वारेण, तस्य** धर्मिणो व **एक उपाधिः** विशेषणं **तद्द्वारेण** । किंभूतस्य तस्य ? इत्याह--**सर्वोपाध्युपकाराङ्गैकात्मनः** । **सर्वस्य उपाधेः** य **उपकारः** तस्य **अङ्गं** निमित्तम् **एकोऽभिन्नः आत्मा** स्वभावो यस्य तस्य इति । एवं मन्यते परः--एकोपाधिद्वारेण सकलोपाध्युपकारश-

१९ *] अन्यत् ।

१९ म्] तुलना--योऽपि मन्यते उपाधयः परस्परमाश्रयाच्च भिन्ना एव, तन्निबन्धनाः श्रुतयोऽपि तदाधारे तत्रैव वर्तन्ते, तदयमप्रसङ्ग इति; तस्यापि नानोपाधीनामुपकाराङ्गशक्तिभ्योऽभिन्नात्मनः सर्वात्मना ग्रहे कृते उपकार्यस्य को भेदः स्यादनिश्चितः । [[स्ववृत्तिः]] तयोरात्मनि सम्बन्धादेकज्ञाने द्वयग्रहः ।
धर्मोपकारशक्तीनां भेदे तास्तस्य किं यदि ।
नोपकारस्ततस्तासां तथा स्यादनवस्थितिः ॥
एकोपकारके ग्राह्ये नोपकारास्ततोऽपरे ।
दृष्टे यस्मिन्नदृष्टास्ते तद्ग्रहे सकलग्रहः
॥--प्रमाणवा° स्ववृ° पृ° १३२--३८ ।

त्त्यात्मा तद्वान् प्रतीयमानः सकलोपाधी+आहयति, तदग्रहे तदग्रहात् इति कुतः प्रमाणान्तरवृत्तिरिति । अथ तदुपकारशक्तयो भिन्नाः तेनायमदोषः; तत्राह--**तदुपकार** इत्यादि । **तेषामुपाधीनाम् उपकारिकाः** ताश्च ताः **शक्तयश्च** तासाम् **भेदकल्पनायाम्** । कुतः ? इत्याह— **परस्परत** इत्यादि । तथाहि--शक्तिशक्तिमतोर्भेदैकान्ते सम्बन्धो न सिध्येत् यद्यनुपकारः । तदुपकारेऽपि पूर्ववद्वक्तव्यम् । पुनरपि तद्भेदकल्पनायां स एव दोषः **इत्यनवस्था** स्यात् । § 3429

सांख्यस्य मतमाशङ्कते परो दूषयितुम् **मा भूत्** इत्यादि । **माभूदनवस्था इति** हेतोः **तयोः** उपाधितद्वतोर**भेदकल्पनायां** सांख्येन क्रियमाणायाम् ? किम् ? इत्याह--**कुत** इत्यादि । स्वयमेतन्निराकुर्वन्नाह--**एतत्** परेणोच्यमानं **समस्तं** निरवशेषम् **अनेकान्तसाधनम्** । कुतः ? इत्याह— **उपाधि** इत्यादि । ततः किं जातम् ? इत्याह--**तदेकोपाधि** इत्यादि । तत् तस्मात् **तयोः** कथञ्चित्तादात्म्यात् **एकोपाधिविशिष्टस्य धर्मिणः प्रतिपत्तावपि** /ms
**प्रमाणान्तरं** प्रवर्तते इत्यध्याहारः । कुतः ? इत्याह--**तद्** इत्यादि । **तस्मात्** उक्तादुपाधि न्येरोपाविना **विशिष्टस्य तस्याऽप्रतिपत्तेरिति** । § 3430

स्यान्मतम्--प्रतिपन्नस्य अप्रतिपन्नं रूपम् इति कुतोऽवगम्यते ? इत्यत्राह--**व्यवसायात्मकस्य** इत्यादि । **व्यवसायात्मकस्य** सामान्यविशेषात्मकवस्तुविषयस्य [प्रवर्तकत्वात्] न प्रतिपरमाणुनिष्ठाजंभ्रान्तमविकल्पकम् इन्द्रियज्ञानं चाभ्यासे प्रवर्त्तकं केषाञ्चित् । § 3431

एतेन सुखादिसंवेदनं व्याख्यातम् । तदपि अभ्यासजंपरस्य । अभ्यासश्च नाऽविकल्पकस्य; चक्षुरादिज्ञानं च चिरप्रवृत्तिकेवलविकल्पसन्तानान्तरभावि । नहि तस्याविकल्पकारणं पूर्वं सन्निहितमस्ति । चिरविनष्टं उपादानं च* निरस्तम् । तेषां च सविकल्पकत्वे तत्सन्ता निनां तदेव । एतेन मान- 612/mkj
समपि चिन्तितम् । तदपि स[वि]कल्पाध्यक्षात् तादृशमेव । यदि पुनः तन्मनस्काराच्चिद्रूपानुकरणमेव नाभिलापसंसर्गयोग्यानुकरणं तथा दृष्टेः, भावशक्तेरचिन्त्यत्वात्; तत एव तर्हि परमाणुभ्यो नीलाद्याकारानुकारितेव न परस्परविवेकानुकारितेति प्राप्तम्, तथा च परमाणूनां सावयवत्वम्, प्रत्यक्षं च सामान्यगोचरम् अनेकसाधारणाकारानुकरणात् । अथ तत्रासौ आकारो नास्ति, कथमभाति ? असन्नेवेति चेत्; भ्रान्तमध्यक्षम् । तथेति चेत्; /ms
लक्षणे अभ्रान्तग्रहणमनर्थकं विषयाभावात् । व्यवहारार्थं तदिति चेत्; न; अनुमशब्दज्ञानगोचरस्यापि स्वलक्षणत्वमिति **प्रमेयद्वैविध्यात् प्रमाणं द्विविधम्**

---

१ लोपाधी+आह] धीर्ग्राह
८ प] बौद्धः ।
१५ न्येरोपाविना] धेरन्येन उपाधिनाऽ
१८ माणुनिष्ठाजं] निष्ठम
१९ केषाञ्चित्] प्रज्ञाकरादीनाम् ।
२१ वृत्ति] त्त
२३ *] इति ।
२३ देव] सविकल्पत्वमेव ।
२४ क्षात्] जायते इति ।
२४ मेव] सविकल्पकमेव ।
२४ त] विकल्पात्मकात् ।
२७ विवेकानुकारितेति] रितेति
२९ भा] कथमवभा
३० णे] प्रत्यक्षलक्षणे ।
३१ अनुम] मान

इत्यसारम्, विचार्यमाणस्याऽयोगात् । नेति चेत्; अत एव चक्षुरादिगोचरस्यापि न स्यात् । व्यवहारादिति चेत्; प्रकृतं न परिहृतम् । अथ अनुमानादिविषयो न स्वलक्षणम्, तस्य इन्द्रिये अन्यथा प्रतिभासनात्; स्थूलाकारोऽपि न स्वलक्षणं योगिज्ञाने अन्यथा प्रतिभासनात् । अन्यथा कुतः परमाणुसिद्धिः येनोच्यते--**दूरविरलकेशवत् परमाणवः स्थूलप्रतिभास-हेतवः** इति ? अनुमानात्तत्सिद्धिरिति चेत्; असेः कोशस्य तीक्ष्णता--यद् योगिनाऽप्रतिपन्नम् अनुमानं प्रत्येति । § 3432

किंच, इतरवद् योगिनो भ्रान्तत्वं सविकल्पकत्वं च, तदाकारो योगिन[ः]स्वलक्षणं मा भूत् अन्यस्य भविष्यतीति चेत्; अभिलापसंसर्गयोग्याकारोऽपि व्याख्यातॄणां मा भूत् व्यवहारिणां भविष्यति । अनर्थक्रियाकारित्वान्नेति चेत्; तदाकारः किमर्थ[क्रिया]कारी ? तथा चेत्; परमाणुकल्पनामनर्थकम् । व्यवहारिणां स तत्कारीति चेत्; अभिलाप्याकारोऽपि । नहि ते शब्दाऽक्षज्ञानगोचरयोः भेदं मन्यन्ते । व्याख्यातारो मन्यन्ते इति चेत्; तदनुसरणे शून्यतैव शरणम् । *तत्र—

न विकल्पो नाम्यविकल्प इति[प्रवदन्ति]कोविदः ।
कोविदो अधीता येनाऽद्वैतादि[वि]कल्पना ॥
कोविदः स्यात् निषेधात्तन्निराशङ्को विदोऽत्यये ।§ 3436

ततः सिद्धं व्यवहारतःशब्दाक्षज्ञानयोः सामान्यविषयत्वम् । § 3437

विर्विकल्पकसिद्धौ परकीयां युक्तिं दर्शयन्नाह--**यदर्थ** इत्यादि । **प्रत्यक्षं यस्यार्थस्य सामर्थ्येन उत्पन्नं तस्याकारमेव** न जात्यादेर**नुकरोति** । निदर्शनमत्र, **तस्य** प्रत्यक्षजनकस्य अर्थस्य **अनन्तरम्** उपादेयोऽर्थस्वलक्षणमिव **तद्व**दिति । दूषणमत्र--**नायमेकान्त** इति । कुतः ? इत्याह--**चित्स्वभावाभाव-प्रसङ्गात्** प्रत्यक्षस्य । तथाहि--यथा तत् तथा तत्तस्य नीलतां तथा जडताम-
613/mkj नुकरोति द्वितीयार्थक्षणवत् [जडत्वापत्तिः] । अन्यथा विषयसांशत्वम् इदं निराकुर्यात् **शब्दादर्थप्रतीतौ अक्षसंहतेर्वैफल्यम्** इति । ननु पित्रोराकार-

१ इ] मानं द्विविधं मेयद्वैविध्यात्--प्र॰ वा॰ २ । १ ।
६ इति] यथैव केशा दवीयसि देशेऽसंसक्ता अपि घनसन्निवेशावभासिनः, परमाणवोऽपि तथेति न विरोधः ।--प्र॰ वार्तिकाल पृ॰ २९६ ।
१२ नाम] नम
१२ त] अर्थक्रियाकारी ।
१३ ते] व्यवहारिणः ।
१४ *] शून्यतायाम् ।
१५ नाम्य] नाप्य
१६ अ] दोऽ
२३ त्] तत् तथा इति निरर्थकमत्र ।
२३ था] प्रत्यक्षम् ।
२३ स्य] स्वलक्षणार्थस्य ।
२४ रोति] चेत् ।
२४ त्] जडमेव स्यात् ।
२४ म्] आपाद्यमानं कर्तृ ।
२४ इदं] उच्यमानम् ।
२५ इति] तुलना--न तद् वस्तु अभिधेयत्वात् साफल्यादक्षसंहतेः ।--प्र॰ वा॰ २ । ११ । यदि समस्ताः सामान्यज्ञानेन प्रतीयन्ते तदा शब्दादुत्पद्यते यत्सामान्यज्ञानं तेन सकलव्यक्तिस्वरूपप्रतिपत्तेरक्षसंहतेर्वैफल्यप्रसङ्गः ।--प्र॰ वार्तिकाल॰ प॰ १९२ ।

मनुकुर्वदपि अपत्यं न सर्वथा यथानुकरोति तथा इदमर्थस्य इति चेत्; अत्राह— **तदेकान्त** इत्यादि । **तस्य** अर्थस्य **अनेकान्ते** अङ्गीक्रियमाणे । किम् ? इत्याह--**सविकल्प** इत्यादि । [अयम्] अभिप्रायः--अनेकान्तेऽपि तत उत्पत्तेः तदाकारानुकरणेऽयं दोषो नान्यथा इति, **सविकल्पे** त्याद्यनेन व्याख्यातम् । § 3438

स्यान्मतम्--यथा[तत्]अर्थस्य नीलत्वमनुकरोति न जडत्वं तथा तन्मनस्कारात् चिद्रूपतामात्रं नाभिलाप्यमाकारम्; इत्यत्राह--**सामग्रीभेदात्** इत्यादि । तात्पर्यमिदमत्र--यथा कुतश्चित् प्रत्यासत्तेः प्रत्यक्षम् अर्थस्य नीलतामात्रमनुकरोति नाचेतनां तथा शाब्दं ज्ञानं तन्मात्रं तस्य गृह्णाति न वैशद्यमिति । ततो यदुक्तम्--**यदि विशदोऽन्यथा वाऽर्थः तथैव उभयत्रापि प्रतिभासेत;** तन्निरस्तम्; अन्यत्र दोषात् । § 3439 /ms

यथा अर्थस्य चेतनाद् व्यावृत्तिरन्या अन्या वानीलव्यावृत्तिः नीलस्य, अन्यथा नीलानुकरणे जडतानुकरणमवश्यंभावि, तथा एकस्य यतो व्यावृत्तिः तद्रूपापेक्षया परमार्थभूतास्तावत्यो वावृत्तयः प्राप्नुवन्तीति दर्शयन्नाह--**एकस्य** इत्यादि । § 3440

...9 एकस्य सर्वतोऽन्यस्मात् व्यावृत्त्याऽनन्तरूपता ।
तन्न दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः ॥ ९
॥§ 3442

कस्यचित्...नहि कश्चिदेकस्माद् व्यावृत्तः तदेकत्वप्रसङ्गात् । अविकल्पप्रत्यक्षस्य अन्यस्य च एकदा प्रवृत्तौ कुतः पुनः प्रवृत्तिः, तस्य तद्ग्राह्यस्य चार्थस्य व्यवसायोपपत्तेः । अत एव अक्षशब्दज्ञानानां कथञ्चित् परमार्थैकविषयत्वम् प्रत्यक्ष... § 3443

**एकस्य** भावस्य **अनन्तररूपता** । कया ? इत्याह--**व्यावृत्त्या,** जात्यपेक्षया एकवचनम् व्यावृत्तिभिः इत्यर्थः । कुतस्तया ? इत्याह--**सर्वतः** साजा[तीयाद् विजातीया]च्च **अन्यस्मात्** परस्मात् । ततः किं जातम् ? इत्याह--**तन्न** इत्यादि । यत एव **तत्** तस्मात् **दृष्टस्य[भावस्य]** उपलक्षणमेतत् अनुमितस्य शब्दप्रतिपादितस्य च **न दृष्ट एव** इदमप्युपलक्षणम् अनुमित एव **अखिलो गुणः** जडतावद् अन्यस्यापि अदृष्टस्य विरोधात् । § 3444

---

२ दे] तदने
६ त] सविकल्पचित्तात् ।
७ तामात्रं] अनुकुर्यात् प्रत्यक्षम् ।
१२ वा] चाऽ
१४ यः] व्यावृत्तयः
२२ रूप] नन्तरूप
२५ त] अत्रायं पूर्वपक्षः--तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः ।--प्र० वा० ३ । ४४ ।

कारिकां व्याख्यातुमाह--**कस्यचित्** इत्यादि । तदनभ्युपगमे दूषणमाह--**नहि एकस्मात्** इत्यादि । येन स्वभावेन कश्चिद् एकस्माद् व्यावर्त्तते तेन परस्मादपि इति सौत्रान्तिकस्य । योगाचारस्य दर्शनम् अन्यस्यात्रातविकारात् । तत्र प्रथमपक्षे **हिर्यस्मात् न कश्चिद्** भाव **एकस्मात्** चेतनाभिमतात् 614/mkj **व्यावृत्तः** । कुतः ? इत्याह--**तदेकत्वप्रसङ्गात्** । तच्छब्देन येभ्यो व्यावृत्तः ते गृह्यन्ते, तेषा**मेकत्वं** समानरूपता तस्य **प्रसङ्गात्** । तथाहि--यथा ज्ञानाज्जड-/ms तामादाय व्यावृत्त इति मज्ञाने जडता तथा अन्यतोऽपि इति, ततः तस्यापि जडता न स्यात्, एकत्रैव सा भवेत् । अथ जडता यथा एकत्र[त]था अन्यत्रापि इति मतिः; हनर्हि यथैकस्मात् व्यावृत्तः[तथाऽन्यस्मादपि ।] § 3445

किंच, नीलज्ञानार्थयोः यैवाऽतन्नीलात् स्वभावभूता व्यावृत्तिः सैव चेत् परस्परम्; तदा [अ]नीलाद् व्यावर्त्तमानस्य ज्ञानस्य ततो यथा नीलव्यपदेशः तथा बहिरर्थादपि व्यावर्त्तमानस्य स एव स्या[त्] न व्यपदेशान्तरं तन्निमित्ताभावात् । अथ तयोरनीलान्नीलतया व्यावृत्तिः न तया ज्ञानस्य नीलार्थात्; *कुत**विकल्पप्रत्यक्षस्य अन्यस्य च** अनुमानादेः **प्रवृत्तौ** सत्याम् **एकदा पुनः** पश्चात् **प्रवृत्तेःतत्रैव व्यवसायात्मकस्य** इति घटनात् । कुतः ? इत्याह--**तस्य** इत्यादि । **तस्य** प्रत्यक्षस्य अन्यस्य वा **तद्ग्राह्यस्य चार्थस्य व्यवसायोपपत्तेः** । पुनरित्येतदत्रापि द्रष्टव्यम् । उपपत्तेः इत्यनेन एतद्दर्शयति--यथैकचित्रज्ञानं स्वनिर्भासेषु युगपदावर्त्तते तथा क्रमेणापीति, **[अ]त एव** अनन्तरन्यायाद् **अक्षशब्दज्ञानानां कथंचित् परमार्थैकविषयत्वं सिद्धम्** इत्याध्याहारः । कुतः ? इत्याह--**प्रत्यक्ष** इत्यादि । § 3446

तदेव दर्शयन्नाह--**प्रत्यक्षस्ये**[त्या]दि । § 3447

...10 प्रत्यक्षस्य पूर्वापरकोट्योः शब्दादेस्तथा ।
स्वहेतुफलसन्तानो यथा स्वापप्रबोधयोः ॥ १० ॥ § 3449

मध्यरूपं पूर्वापरकाट्योरपि कथञ्चित् उपलभ्यं स्वभावविरुद्धानुपलब्धेः । न हि दृश्यात्मकमेव एकं स्तम्भाद्यवयवरूपमुत्प्रेक्षामहे, संवित्तिमात्रस्याप्यभावप्रसङ्गात् । तदेकान्ते यतोऽर्थक्रियानुपपत्तिः विरुद्धकार्योपलब्धिरेव । तदेतत् द्रव्यंदृश्यादृश्यान् सहभूतान् स्वान् स्वभावानसङ्करेण स्वयं स्वव्याप-

---

४ विकारात्] अन्यस्मात्
७ म] न
९ र्हि] न तर्हि
१२ स्य] नीलज्ञानस्य ।
१२ तो] अनीलव्यावृत्तेः ।
१३ स] नीलज्ञानव्यपदेश एव स्यात् ।
१५ *] तदा ।
१५ कुत] कुतः अ
१६ वृत्तेः] त्तिः

कतया लक्षयेत् स्वलक्षणमाश्रित्य मिथ्यासन्तानव्यवस्थापनात् । स्वापप्रबोधादिषु तदतिप्रसङ्गोपालम्भेन कुतः सन्तानैकत्वं प्रतिपद्येत ? § 3450

**[प्र]त्यक्षस्य** मध्यावस्थायाम् अक्षज्ञानस्य वैशद्यस्य**शब्दादेः तथा** परोक्षता । क्षेत्याह --**पूर्वापरकोट्योरि**ति । दृष्टान्तमाह--**स्वहेतुफलसन्तानो यथा** स्वहेतुफले उपादानोपादेयक्षणे, तयोः सन्तानो येन यथा प्रतीत्यादिप्रकारेण /ms प्रत्यक्षः सन् परोक्षः तथा प्रकृतमपि । क्व स तथाभूतः ? इत्याह--**स्वापप्रबोधयोरि**ति । स्वापेऽयं हि परोक्षः प्रबोधे प्रत्यक्षो भवति, पुनः तत्र प्रत्यक्षः स्वापे परोक्ष इति । § 3451

कारिकां व्याख्यातुमाह--**उपलभ्य[म्]**इत्यादि । **उपलभ्यं मध्यरूपं पूर्वापरकोट्योरपि** न केवलं मध्य एवाऽस्तु । तर्हि पूर्वमेव परमेव वा स्यादिति चेत्; अत्राह--**कथञ्चिदि**ति । कुतः ? इत्याह--**स्वभाव** इत्यादि । **स्वभाव** इत्यनेन एकान्तस्वरूपं परामृश्यते तस्य **विरुद्धो** नित्याद्ये 615/mkj कान्तः तस्य **अनुपलब्धिः** सुविवेचितमेतदसकृत् । **नहि** इत्यादिना एतदेव दर्शयति । **हि** यस्मात् **दृश्यात्मकमेव एकं स्तम्भाद्यवयविरूपं** व्यवस्थित**मुत्प्रेक्षामहे** युगपत् क्रमेण च कथञ्चिददृश्यताविरोधात् । एतदपि कुतः ? इत्याह--**संवित्ती**त्यादि । **संवित्तिरेवतन्मात्रं तस्यापि** न केवलं बहिरर्थस्यैवा**भावप्रसङ्गात्** । तदपि कुतः ? इत्यत्राह--**तदेकान्त** इत्यादि । **तदेकान्ते** संविदोऽन्यस्य वा दृश्यात्मकैकस्वभावैकान्ते **अर्थक्रियानुपपत्तिः यतोऽर्थस्य** उत्तरकार्यस्य **क्रिया तदनुपपत्तिरिति** विचारितमेतत् । § 3452

ननु संवित्तिमात्रदर्शने तदनुपपत्तिरिष्यते । **अशक्तं सर्वम्** प्र० वा० २ । ४ इति वचनात्, न च [तअर्थक्रियानुपपत्तेः ।]दनुपपत्तेः संवेदनमात्रस्य प्रतीयमानस्याप्यभाव इति चेत्; अत्राह— **विरुद्ध** इत्यादि /ms । तदेकान्त**विरुद्धो**ऽनेकान्तः तस्य **कार्यं** पूर्वस्य उत्तरपरिणामलक्षणं तस्य **उपलब्धिरेव** नानुपलब्धिः । संवित्तिमात्रमभ्युपगच्छतापि चित्रमेकमभ्युपगन्तव्यम्, तच्च तदविरुद्धमिति मन्यते । § 3453

निगमनमाह--**तदि**त्यादि । यत एवं **तत्तस्मादेतत्** प्रतीयमानं **जीवादि द्रव्यं लक्षयेत्** चिह्नयेत् । कया ? इत्याह--**स्वव्यापकतया** स्वेन रूपेण न समवायेन या व्यापकता तया इति । कान् ? इत्याह--**स्वान् स्वभावान् स्वयं** नेश्वरेण । किंभूतान् ? इत्याह--**सह** इत्यादि । पुनरपि किंभूतान् ? इत्याह--**दृश्ये**त्यादि । केन ? इत्याह--**असङ्कर** इत्यादि । कुतः ? इत्याह--**स्वलक्षणं** न द्रव्यमाश्रित्य **मिथ्यासन्तानव्यवस्थापनात्** सौगतेनेति । तदनभ्युपगमे दोषमाह--**कुत** इत्यादि । **कुतः** कारणात् प्रमाणाद्वा **सन्तानैकत्वं प्रतिपद्यत** सौगतः ? न कुतश्चित् । केन ? इत्याह--**नदितिप्रसङ्गोपालम्भेन**-

३ स्य] द्यं
४ क्षेत्याह] क्व ? इत्याह
७ त] प्रबोधे ।
१३ ब्धिः] ब्धेः
३३ त] द्येत
३३ दिति] तदति

-तस्य द्रव्यस्य **अतिप्रसङ्गोपालम्भो सर्वस्योभयरूपत्वे** इत्यादिकः प्र° वा° ३ । १८१ तेन इति । क्व ? इत्याह **स्वापप्रबोधादिष्विति** । § 3454

तु स्वापे यत एव चैतन्यं नोपलभ्यते तत एव नास्ति, तत्कथं तन्निदर्शनेन एकस्य दृश्येतरतासाधनमिति चेत् ? अत्राह--**परोक्ष** इत्यादि । § 3455

...11 परोक्षक्षणिकानन्ताणुवर्णपरिमण्डलः ।
स्यात्प्रत्यक्षस्थिरैकात्मस्थूलोऽर्थः स्फुटदर्शनात् ॥
११ ॥§ 3457

न हि...परिस्फुटम्, तदतिक्रमे दृश्यादृश्यव्यवस्थानुपपत्तेः । सुदूरमपि गत्वा दृश्यादृश्यात्मैकरूपस्य चित्तस्य इतरस्य वा प्रतिक्षेपे अभावात् किं केन प्रमीयेत । § 3458

अर्थः **स्यात्** भवेत् । किंभूतः स्यात् ? इत्याह--**परोक्षम्**इन्द्रियग्राह्यं **क्षणिकानाम् अनन्तानामणूनां वर्णपरिमण्डलं** यस्य स तथोक्तः । पुनरपि
/ms किंभूतः ? इत्याह— **प्रत्यक्षात्**थ...[प्रत्यक्षश्चासौ] **स्थिरः** कालान्तरस्थायी **एकः** साधारण **आत्मा** स्वभावो यस्य स चासौ **स्थूलश्च** । कुतः ? इत्याह-
616/mkj -**स्फुटदर्शनात्** । स्थिरैकात्मनः स्थूल स्यार्थस्य विशददर्शने प्रतिभासनात् नाविशदकल्प इत्यर्थः । ततो यद्यदर्शनात् स्वापचैतन्याभावः; तत एव अर्थस्य क्षणिकानन्ताणुवर्णपरिमण्डलाभाव इति सौत्रान्तिकः, सर्वदा स्वापाक्रान्तः अन्यथा हेतोरनेक व्यभिचार इति भावः । अथ तत्परिमण्डलस्यैव प्रत्यक्षता; स्वापचैतन्यस्यस्वास्तु ** । स्वापाभावः स्यादिति चेत्; कोऽयं स्वापो नाम ? चैतन्यरहिता मिद्धदशा इति चेत्; कथमदृश्यस्य चैतन्यस्य तदा[ऽ]भावः ? अदृश्यानुपलब्धेर्गमकत्वापपत्तेः । व्यवहारजनात्; स हि स्वप्नदर्शनविरहिणीं तां दशां मन्यते इति चेत्; स एत तर्हि तत्परिमण्डलदर्शनविकलां सकलां सकलकालकलापकलितां तां मन्यते इति समानम् । कथमन्यथा विवादः यतः तदर्थं शास्त्रप्रणयनम् ? § 3459

स्यान्मतम्--न व्यवहारिणोऽनभ्युपगमात् परमाणुदर्शनाभाव इति स्वापे चैतन्याभावोऽपि मा भूत् **लक्षणयुक्ते बाधासंभवे तल्लक्षणमेव दूषितं स्यात्** प्र° वार्तिकाल° पृ° २२६ इति । व्यवहारीमया दूषितः स्यादिति चेत्;

१ इ] तद्विशेषानिराकृतेः । चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ॥ इति शेषः ।
३ तु] ननु
११ इन्द्रिय] याऽ
१८ नेक] नेन
१९ *] स्याप्यस्तु
१९ *] तथा सति ।
२१ हार] रि
२२ एत] एव
२७ हारी] रो

क्रियापीति समः समाधिः। यथा च तव तद्रूपनेपि न दोषः परमाणुसिद्धिर-निवारणात् तथा ममाप्यात्मसिद्धिः अबाधनात्। अथ तद्दूषणे ममापि तत्, अहमपि यतो व्यवहारी; तवापि तदिति समानम्, बहिः परमाणुषु त्वमपि /ms व्यवहारी **प्रामाण्यं व्यवहारेण** प्र॰ वा॰ १। ५ इति वचनात्। अथ प्रथमं व्यवहारी परमाणून्यस्य दर्शनोत्तरकालभाविन्या त् विकल्पबुद्ध्या स्थिरैकात्म-स्थूलाव्यवसायो मिथ्या इति चेत्; न; उक्तमत्र--**स्फुटदर्शनादि**ति। § 3460

किं च, स्वापेऽपि स चैतन्यं पश्यति स्ववेदनदर्शनात्, तत्र तन्निश्चयविर-हात् पुनः जायमाना मिथ्याविकल्पबुद्धिः तदभावं व्यवस्यति। संहृतविकल्प-दशायां ज्ञानहेतुत्वात्ते दृश्याः; प्रबोधहेतुत्वात् स्वापचित्तं दृश्यम्। कथमन्यस्य दृश्यत्वमन्यस्य इति चेत्? परमाणुषु कथम्? तदाकारता च नेष्यते, प-रेणाप्यनेकाकारप्रतिभासोपगमात्। यदि सद्भावेऽपि सर्वत्र नीलज्ञानाभावात् परमाणवोऽनुमीयेते; मृतशरीरे अन्त्यचित्तसद्भावेऽपि प्रबोधादर्शनात् सुप्तस्य प्रबोधाऽदर्शनात् स्वापे चैतन्यमनुमीयताम्। जाग्रच्चित्तात्तत्प्रबोध इति चेत्; स्थूलात्तत्प्रतिभास इति न परमाणुसिद्धिः। § 3461

अथ केशेषु तदाकाररहितेष्वपि तत्प्रत्ययदर्शनान्न तत्सिद्धिः; परमाण्व-भावेऽपि कामलिककेशादिप्रत्ययदर्शनात् तदवस्थो दोषः। ज्ञानवदर्थेऽपि स्थूलाकाराऽविरोधात्। तथापि परमाणव एव तत्कारणं कल्पन्ते त्वया मया स्वापचित्तप्रबोधकारणं कल्प्यते। § 3462

ननु चित्तं चेत्; कथमदृश्यम्? अदृश्यं चेत्; कथं चित्तमिति चेत्? उच्यते-- परमाणवश्चेदालम्बनकार्यं कथम् अतदाकारज्ञानहेतवः? त- /ms था चेत्; कथमालम्ब[न]कारणम्? अन्यथा नीलज्ञानस्य पीतं स्यात्। अथ न तेन तदालम्बनकारणम्; अन्यदेव तद्वक्तव्यम्, तस्याप्यणुरूपत्वे 617/mkj अन्यद्वाच्यमित्यनवस्था। नीलतामात्रेण स्वाकारज्ञानहेतव इत्यदोष[श्चे]त्; कथञ्चित् प्रत्यक्षतेति आत्मनोऽपि स्वापेऽप्रत्यक्षस्यापि प्रबोधे प्रत्यक्षतेति सर्वं सुस्थम्। § 3463

अपरः प्राह--स्वापेऽपि प्रत्यक्षं चित्तमिति चेत्; सोऽप्यनेन निरस्तः; तत्परिमण्डलप्रत्यक्षत्वप्रसङ्गात्। विज्ञानवादिनो न यं दोष इति चेत्; न; त-स्यापि स्थिरैकात्मस्थूलज्ञानसम्भवे यथाप्रतिभासं तत्त्वसिद्धिः। किंनु दृश्येत-

---

१ ने] तद्दूषणेऽ
१ माणुसिद्धि] द्धे
२ त] दूषणम्।
३ हारी] इति चेत्।
३ त्व] बौद्धः।
५ स्य] णून् पश्यति
५ त्] तु
६ स्थूलाव्य] लाध्य
९ हेतुत्वात्ते] परमाणवः।
९ दृश्याः] इति चेत्।
९ म्] अस्तु।
१२ वोऽनुमीयेते] यन्ते
१३ नात्] प्रबोधादर्शनात् इति व्यर्थमत्र पुनर्लिखितम्।
१७ ल्प] प्य
२० कार्यं] कारणम्
२१ पीतं] आलम्बनं स्यात् इति योजनीयम्।
२२ तेन] ते
२२ तेन] परमाणवः।
२७ यं] नायं
२८ किंनु] किं च,

रता एकस्याविरोधिनीति प्रतिपादितम् । तदसंभवो सौत्रान्तिका[द]विशेषः । § 3464

कारिकायाः विवरणमाह--**नहि** इत्यादिना । [कथं] तर्हि तत्र प्रतिभासते ? इत्याह— **परिस्फुट**मित्यादि । क्रियाविशेषणमेतत्, प्रतिभासत इति वचनपरिणामेन सम्बन्धः । * **तदतिक्रम** इत्यादि । **तस्य** यथोक्ताकारप्रतिभासस्य **अतिक्रमे दृश्ये** घटादिः, **अदृश्य** ईश्वरादिः तयोः **व्यवस्थायाः अनुपपत्तेः** । § 3465

ननु दृश्यव्यवस्थानुपपत्तिरिति वक्तव्यम् ततोऽन्यस्य अदृश्यस्याऽभावात्, न पुनः अदृश्यव्यवस्थानुपपत्तिः इति ततोऽन्यस्य सर्वस्या[स्य] दृश्यव्यव-
/ms स्थानुपपत्तिः अन्यस्य तत्परिमण्डलस्य प्रतिभासोपगमे तद्वदाकाशकुशेशयादेरपि तदुपगमापत्तेः अदृश्यव्यवस्थानुपपत्तिरिति । माभू[त् दृश्याऽ]दृश्यव्यवस्था, सकलशून्यतोपगमादिति चेत्; अत्राह--**सुदूरमपि** इत्यादि । **सुदूरं** सकलशून्यत्वम् अशेषसौगतमतान्ते व्यवस्थानात्, तद**पि** गंधाम केवलमदूरं सौत्रान्तिकादिमतिं **किम्** शून्यतादिकं **केन** प्रत्यक्षादिना **प्रमीयेत** ? न केनचित् । कुतः ? इत्याह--**अभाव** इत्यादि । कस्मिन् सति ? इत्याह--**प्रतिक्षेपे** । कस्य ? **चित्तेतरस्य वा** वचनस्य । यदि वा, **इतरस्य वा** बाह्यस्य च । किंभूतस्य ? **दृश्यादृश्यात्मैकरूपस्य** । § 3466

ननु चित्तस्य यथास्थिताशेषार्थग्रहणस्वभावत्वात् कथमदृश्यात्मना अन्यसम्बन्ध तदेकत्वे अन्यतरदेव । तथापि स्वरूपनानात्वे अन्यत्यत्राऽकिंचित्करमिति तदवस्थचित्तस्य स्वपरयोः सर्वात्मना ग्रहणमिति चेत्; अत्राह--
§ 3467

...12 तदेतच्चित्तमन्यद्वा बन्धं प्रति परस्परम् ।
एकत्वेऽपि लक्षणतो हेमादिश्यामिकादिवत् ॥ १२ ॥ § 3469

नानात्वमजहज्जातिं तथापरिणामलक्षणाम् ।
अनुरुणद्ध्येव तद्बुद्धौ वस्तुनोऽप्रतिभासनात् ॥ १३ ॥

१ त] स्थिरैकात्मस्थूलज्ञानासंभवे ।
१ वो] वे
५ न्धः] अत्र किञ्चित् त्रुटितमिति भाति ।
५ *] ?
६ दृश्ये] श्यो
१३ गंधाम] **गत्वा** न
१४ तिं] मतं
१६ चित्ते] त्तस्ये
१९ न्ध] न्धः ?
१९ त्य] अन्यत्वम् अन्य
२० स्थ] स्थं

## वर्णाकृतिपरिमाणादिधर्मैः विकलात्मनः ॥ [१/२]

‖§ 3472

व्यपोहस्य भेदात्मकत्वे...समारोप...निर्विकल्प...विकल्पोत्पादात् । तन्नाक्षविज्ञानस्य सदेकान्तविषयत्वम्, प्रत्यक्षस्य अतीतविषयत्वाभ्युपगमात् । शब्दोत्थापितविकल्पस्यापि स्वसंवेदनप्रत्यक्षत्वात् । कथम्... § 3473

618/mkj

**तदेतच्चित्तमन्यथा***चेतनं कर्म वस्तु **परस्परमन्योऽन्यं बन्धं** संयोगविशेषं **प्रति** एकत्वेऽपि **लक्षणतो** लक्षणेन **नात्व हेमादिश्यामिकादिवत् अजह[द]**परित्यजत् **तथा** तेन दृश्यादृश्यात्मैकरूपपरेण **परिणामलक्षणामेव** नान्यथा **जातिम्** आत्मलाभम् **अनुरुणद्धि** स्वीकरोति । कुतः ? इत्याह--**वर्ण** इत्यादि । **तद्बुद्धौ** चित्तेतरग्राहिकायां बुद्धौ **अप्रतिभासना[त्]** चित्तेतरवस्तु[नः] किं स तस्य इत्याह--**वर्णः** नीलादिः **आकृतिः** वर्तुलत्वादिः **परिमाणम्** इयत् तोन्यादिभूतानि येषां अनुगतेचेतधर्माणां ते तथोक्ताः तैः **विकलात्मनः** । /ms

§ 3474

ननु नार्थः शब्दगोचरः अपि त व्यापोहत्वाब्दविज्ञानस्य असदेकान्तविषयत्वमिति चेत्; अत्राह--**व्यपोहस्य** इत्यादि । व्यपोहनं **व्यपोहः** अनभिमतव्यावृत्तिः तस्या **तदा** ***त्मकत्वे** स्वलक्षणात्मकत्वे अङ्गीक्रियमाणे **किं केन प्रमीयेत** इति सम्बन्धः । § 3475

ननु शब्देन लिङ्गेन वा समारोपे व्यवच्छिन्ने तेन स्वलक्षणं प्रमीयत इति चेत्; अत्राह— **समारोप** इत्यादि । तदपि कुतः ? इत्याह--**निर्विकल्प** इत्यादि । कुतः ? इत्याह--**विकल्पोत्पादा**दिति । **तन्न** इत्याद्युपसंहरन्नाह--**अक्षविज्ञानस्य सदेकान्तविषयत्वं न** । कुतः ? इत्याह— **प्रत्यक्षस्य** इत्यादि । **प्रत्यक्षस्य** अक्षविज्ञानस्य **अतीतविषयत्वाभ्युपगमात्,** उपलक्षणमेतत् तेना+अगतविषयत्वाभ्युपगमादिति च गृह्यते, ततो व्यवहारे शब्दविज्ञानस्यापि असदेकान्तविषयत्वमिति भावः । **शब्दोत्थापितविकल्पस्यापि** न केवलम् अध्यक्षस्य **स्वसंवेदनप्रत्यक्षत्वात्** । अतिप्रायोयथा अर्थव्यापारः तथा आत्मव्यापारोऽपि, तद्विककल्पस्य शब्देनान्यथा तदतज्जन्यरूपतया स एको भवेत् । अथ स्वसंवेदनरूपता पूर्वज्ञानात्; कुत एतत् ? यस्मिन् सति भावाचेत्; शब्देऽपि सति समानम् । तदभावेऽभावादिति चेत्; इदमपि समानम् । नहि शब्दविकल्पाः तदभावे स्वरूपं लभन्ते,[अशब्दाकार्यत्वप्रसङ्गात् ।]तत्कार्यताप्रसङ्गात् **विकल्पाः शब्दयोनयः** *इति प्लवते । अथ

---

५ *] मन्यद्वा अ
५ क] पुद्गलात्मकं ज्ञानावरणादि कर्म ।
६ ल] चेतनत्वाऽचेतनत्वरूपेण ।
६ नात्व] नानात्वम्
१० स्य] किम्भूतस्य ?
११ तोन्या] इयत्ता तानि आ
११ तेचेत] गतचेतनाचेतन
१३ त्वा] तु व्यपोहगोचरत्वाच्छ
१५ *] तस्य भेदा
२२ त] तेन अनागत
२४ अतिप्रायो] अयमभिप्रायो
२७ त] पूर्वज्ञानाभावे ।
२८ म] शब्दे समानम् ।
२८ त] शब्दाभावे ।
२९ *] द्रष्टव्यम्--पृ० ३११ टि० ८ ।

/ms स्वसंवेदनरूपता शब्दाभावेऽपि प्रत्यक्षेऽस्तीति न तज्जन्या; तर्हि विकल्परूपतापि सङ्केतभाविनि शब्दे तदभाव इति सापि तज्जन्या न भवेत् । अन्या सा इति चेत्; अन्यत्रापि समः समाधिः । उभयं तत इति चेत्; उभयमसत्यं न वा किञ्चित् । न चैवमिति मन्यते । § 3476

स्यान्मतम्--अध्यक्षस्य अतीतात् भाविनो वा उत्पत्तेः स्वरूपेण तादात्म्यात् तद्विषयता, न शब्दस्य अर्थविषयता विपर्ययादिति चेत्; एतदेवाह--**कथमित्यादि** । § 3477

परिहारमाह--**यथार्थेत्यादि** । § 3478
619/mkj

...13 यथार्थविभ्रमैकान्तो न सिध्येद् विभ्रमात्स्वयम् ।
तथार्थाप्रतिबन्धत्वात् सर्वमुक्तं मृषेत्यपि ॥ १३
‖§ 3480

बहिरर्थप्रतिक्षेपे सर्वज्ञानानां विभ्रमैकान्तः । विभ्रमैकान्तात् यथा विभ्रमो न सिध्यति तथैव साकल्येन शब्दानामर्थानभिधानम् अर्थाप्रतिबन्धात् । सत्यपि बहिरर्थे विकल्पानां विभ्रमैकान्ते तद्विभ्रमैकान्तासिद्धेः निर्विकल्पस्य[अनिर्णयात्मकत्वात्]तद्विवक्षाविषयैकान्ते कुतः सत्यमिथ्याव्यवस्था यतो जयपराजयव्यवस्था कल्प्यते ? § 3481

अयमभिप्रायः--यदि अर्थाप्रतिबन्धान्निर्विषया एव शब्दाः तन्निर्विषयताप्रतिपादनाय न शब्दप्रयोगः श्रेयानिति । तथाहि--**यथा** येन प्रकारेण **अर्थविभ्रमैकान्तः** स्तम्भादिज्ञानमशेषं भ्रान्तम् इत्येकान्तः । यदि वा, **अर्थे विभ्रमैकान्तो** विकल्पानामभिप्रेतो **न सिध्येत्** । कुतः ? इत्याह--**विभ्रमात्** । नहि विभ्रमाद् विभ्रमसिद्धिः । अथ सिचत् **स्वयं** बौद्धस्य **तथा** तेन प्रकारेण **सर्वं** निरवशेष**मुक्तं** वचनम्, उच्यते स्म उक्तम् इति व्युत्पत्तेः, **मृषा** मिथ्या **इत्यपि** सिध्येत् । कुतः ? इह**अर्थाप्रतिबन्धत्वादिति** । अत्रोऽर्थ सर्वशब्दमिथ्यात्वं पराभ्युपगतं गृह्यते तत्रा**ऽप्रतिबन्धत्वात्** तन्मिथ्यात्वप्रतिपादकं शब्दानां तथा च सर्वे मृषा शब्दाः इत्यपि न भाषणीयम् तदर्थानभिधानात् । तथापि भाषणे असाधनाङ्गवचनं वक्तुः निग्रहस्थानम् । § 3482

/ms स्यान्मतम्--व्यवहारी न मन्यते सर्वशब्दमृषात्वम्, अतः तैमिरिकवदपरतैमिरिकेण स मिथ्याशब्देन प्रतिबोध्यत इति; तदसारम्; यतः घटमानय इत्यादौ भवतु काचिद् गतिः वस्तु वाचामगोचर इत्यभिधाने तु साकल्येन

१ त] शब्दजन्या ।
२ इति] वेऽस्तीति
२० त्] अथ असिधत्
२२ इह] इत्यत्राह--
२२ अत्रो] अत्र अर्थः
२३ त] शब्दमिथ्यात्व ।
२८ र] रम्

यद्यसौ तथा प्रतिपद्यते, न तत्त्वं प्रतिपादितः स्यात् । नहि शब्दात् सर्वशब्द-मिथ्यात्वं प्रतिपद्यमानः तत्प्रतिपद्यते, न तत्त्वं प्रतिपादितः यात् । नहि शब्दात् सर्वशब्दमिथ्यात्वं प्रतिपद्यमानः तत्प्रतिपद्यते नाम विरोधात् । तथाहि--यदि ततः तत्प्रतिपद्यते; न सर्वशब्दमृषात्वम् । [न]प्रतिपद्यते चेत्; न; त-तः तत्प्रतिपत्तुमर्हति । नहि शब्दस्य अन्यस्य वा मृषात्वं जानन्नेव कश्चित् तदस्तदवैति । यतोऽवैति तत्तस्य तन्नावैति इति चेत्; कुत एतत् ? ततस्त-त्परिज्ञानात्; पटादिशब्दात् पटादिकमवैतीति तस्यापि तन्न प्रत्येतीति समाना । नहि व्यवहारी सर्वप्रत्ययानां मिथ्यैकान्तं *मिथ्याप्रत्ययात् तथाऽवगताद-वगच्छति । एवमर्थंच **अर्थविभ्रमैकान्तो न सिध्येत् विभ्रमात्** इत्युच्यते, अगत्या तत एतत्प्रतीयताम् । प्रत्यक्षादिति चेत्; आस्तां तावदेतत् । अथ अर्थविषया न शब्दाः तत्राऽप्रतिबन्धात् हेत्वाभासवत इदमवगम्यते ? तदप्र-तिबन्धोऽपि कुतः ? प्रत्यक्षादिति चेत्; न न्न क्त म्, आस्तां तावदेतदिति । तदभावेऽपि प्रवृत्तेरिति चेत्; उक्तमत्रोत्तरं पूर्वम्--अक्षज्ञानस्यापि तदभावे प्रवृत्तेः । अन्यत्वम्; उभयत्रापि । मिथ्याविकल्पयोनित्वाचे[त्]; तदुक्तम्--
§ 3483

620/mkj

*विकल्पयोनयः शब्दाः विकल्पाः शब्दयोनयः । /ms
*तेषामन्योन्यसम्बन्धानार्थान् शब्दाः स्पृशन्त्यमी ॥ इति; § 3485

ननु सर्वविकल्पानां मिथ्यात्वैकान्ते इदमपि दुरवसेयम् । अत एव उच्यते--अर्थे विभ्रमैकान्तो विकल्पानान्न सिध्येद् विभ्रमात् इति । § 3486

किंच, सर्वशब्दमृषात्वप्रतिबद्धः, अन्यथा वा तत्प्रतिपादकः शब्दो भवेत् ? आद्ये विकल्पे सिद्धं नः समीहितम्, तद्वदन्यस्यापि स्वार्थप्रतिबन्धसंभवात् । द्वितीये तदप्रयोगः । नहि जानन्नेव सौगतः साध्याप्रतिबद्धं वस्तु, तेन व्य-वहारमुपरचयति; प्रेक्षाकारिताहानेः । अगत्या तेनापि रचयति इति चेत्; किम् इदानीमध्यक्षस्य अन्यस्य वा तदुत्पादिकल्पनया ? स्वयमप्रतिबद्धाद्

---

१ था] वाचामगोचरम् इति सर्वशब्दमृषात्वं वा ।
६ स्त] ततः त
७ रिज्ञानात्] इति चेत् ।
७ माना] नम्
८ *] कान्तत्वं
११ त] त्; कुत
१२ क्त] त्; तन्नोक्त
१३ त] अर्थाभावेऽपि ।
१४ अ] अर्थाभावे प्रवृत्तिमज्ञानमन्यत्, अन्यच्च तत्सद्भावे प्रवृत्तिकारि ।
१७ *] तेषामन्योन्यसम्बन्धे न्यायमं० पृ० १५८ । तेषामत्यन्तसम्बन्धो नयचक्रवृ० पृ० २४३ । कार्यकारणता तेषां नार्थान् शब्दाः स्पृशन्त्यपि--न्यायावता० टी० पृ० ४४ । रत्नाकराव० पृ० ९ । स्या० मं० पृ० १७५ । तेषामन्योन्यसम्बन्धः--न्यायकुमु० पृ० ५३७ । स्या० र० पृ० ७०१ ।
१७ न्धा] न्धो
२० कः] सर्वं मृषा इत्याकारकः ।
२२ योगः] शब्दप्रयोगो न कर्त्तव्य इति ।
२३ तेनापि] वस्त्वप्रतिबद्धेनापि शब्देन ।
२४ त] अर्थादुत्पाद ।
२४ दुत्पादि] त्पाद
२४ द्धाद्] शब्दात् ।

व्यवहारं कुर्वन्नन्यस्मै तत एव तं कुर्वाणाय कुप्यतीति कथं स्वस्थः ? *तद्विवक्षायां तत्प्रतिबन्ध इति चेत्; अत्रोत्तरम्--**सदसद्वस्तुभेदेन** इत्यादि भविष्यति । तत एवाह--**अर्थाप्रतिबद्धत्वात्** इत्यादि । § 3487

कारिकां व्याख्यातुमाह--**बहिरर्थप्रतिक्षेप** इत्यादि । **बहिरर्थस्य प्रतिक्षेपे** क्रियमाणे निराचारेण योगाचारेण । किम् ? इत्याह--**सर्वज्ञानानां विभ्रमैकान्ते** बहिरर्थवत् स्वरूपस्यापि प्रतिक्षेपप्रसङ्गात्, *स्वरूपवत् अर्थस्यापि प्रतिभासनात् । चिन्तितमेतत् । ततः किम् ? इत्याह--**विभ्रमैकान्ताद्यथा विभ्रमो न सिध्यति तथैव साकल्येन शब्दानाम् अर्थानभिधानं न सिध्यति** /ms । कुतः ? इत्याह--**अर्थाप्रतिबन्धात्** साकल्येन शब्दानामिति । यथा वा सौत्रान्तिकस्य **सत्यपि बहिरर्थे विकल्पानां विभ्रमैकान्ते तद्विभ्रमैकान्तासिद्धिः** तच्छब्देन विकल्पानां परामर्शः, तवैवेत्याद्यत्रापि पूर्ववत् । अविकल्पात्तत्सिद्धिरिति चेत्; अत्राह--**निर्विकल्पस्य** इत्यादि । § 3488

ननु सर्वे शब्दा निर्विषयाः इत्यस्यां विवक्षायां प्रतिबन्धोऽस्ति मदीयस्य शब्दस्य, ततोऽयमदोष इति चेत्; अत्राह--**तद्विवक्ते**त्यादि । निर्विषयाः *सर्विषयाः सर्वे शब्दा इति वाञ्छा **तद्विवक्षा विषयो** यस्य तस्य भावः तत्ता **तदेकान्ते कुतः सत्यमिथ्या** सर्वे शब्दा वहिरहिता इति वचनं **सत्यम्**, तत्सहिता इति च **मिथ्या** तयोः **व्यवस्था कुतः यतो जयपराजयव्यवस्था कल्पते** ? विवक्षाव्यभिचारः; उभयत्रापि । अर्थाप्रतिपादनं च । § 3489
621/mkj

स्यान्मतम्--मदीया विवक्षा परम्परया अर्थप्रतिबद्धा नेतरा, ततः तद्व्यवस्था इति; तदपि मदीयमतानुकूलम्; बहिरर्थेऽपि तथा प्रतिबन्धसद्भावात् । § 3490

अत्रैव दूषणान्तरं दर्शयन्नाह--**सदसद्वस्तु** इत्यादि । § 3491

...14 सदसद्वस्तुभेदेन विवक्षायामनादरात् ।
तद्वस्तु चिन्त्यते यत्र प्रतिबद्धः फलोदयः ॥ १४
॥§ 3493

शब्दार्थविवक्षामनादृत्य सर्वोऽर्थक्रियार्थी तत्समर्थमेव शब्दार्थं परीक्षेत तत्रैव... ततः व्यवहारं शास्त्रं च कुर्वाणः तदर्थप्रतिपादनायैव कर्तुमर्हति

१ स्मै] चार्वाकाय ।
१ त] अप्रतिबद्धात् शब्दात् हेतोर्वा ।
१ एव] व्यवहारम् ।
२ *] शब्दविवक्षायाम् ।
६ *] अन्यथा ।
७ नात्] तत्सत्त्वं स्यादिति भावः ।
११ वैवे] **तथैव** इ
१४ क्ते] क्षे
१५ *] सर्विषयाः इति व्यर्थमत्र पुनर्लिखितमिव ।
१६ हि] बहिरर्थ
१८ ते] कल्प्यते
१८ च] उभयत्रापि ।

नान्यथा । न चायमेकान्तः सर्वत्र अर्थप्रतिबन्धादेव बुद्धीनां प्रामाण्यम् । क्वचित् रूपमात्रप्रतिभासनात् वर्णरसादिप्रतिबन्धाविशेषेऽपि...तज्जन्मसारूप्ययोरवस्तुत्वात् सर्वथा तदनुपपत्तेः स एव प्रतिबन्धोऽस्तु अन्यत्र विकल्पघटनात् । यद्ययं निर्बन्धः नाकारणं विषयः प्रत्ययस्येति; कथमनुमानज्ञानं क्वचित् प्रमाणम् ? कथं च न ? संविदितप्रतिबन्धविशेषस्य प्रत्यक्षसिद्धत्वात् । तदन्यत्र प्रतिबन्धासिद्धेः कथं प्रमाणम् ? सामान्येन; किं पुनरन्यापोहः ? तदनुमानकल्पनायामनवस्थानात् । न प्रमाणमन्तरेण तत्प्रतिपत्तिः; अन्यत्रापि प्रमाणकल्पनानर्थक्यात् । सादृश्यलक्षणजातिमन्तरेण कथं पावकादिकमन्यव्यावृत्तमेकत्वेन प्रतीयात् ? विवक्षितज्ञानपदार्थस्य अन्यव्यावृत्तेः सर्वत्राविशेषात् । § 3494

**तद् वस्तु चिन्त्यते** परीक्ष्यते **यत्र** वस्तुनि **प्रतिव+इ** आयत्तः **फलोदयः** फलात्मलाभः शब्दाविषयत्वेनि त्यध्याहारः । कथं चिन्त्यते ? इत्याह— **सच्चा[ऽसच्च] सदसत्** भावाऽभावावित्यर्थः, **सच्च तद्वस्तुभेदश्च** सः **तेन** । कस्य शब्दस्य बहिरर्थोऽस्ति, कस्य नास्ति इत्यनेन रूपेण विवक्षा कस्मान्न चिन्त्यते ? इत्याह--**विवक्षायामनादरा[त्]** । नहि तस्यां जलाहरणादिफलं प्रतिबद्धम्, अन्यथा न बहिः कश्चित् प्रवर्त्तेत । सर्वस्य वा फलंसम्बन्धः सर्वत्र विवक्षाभावा[त्] । विवक्षा चेच्छब्दार्थः; तत्रैव प्रवृत्तिः स्यात् न /ms
वहिरर्थे । न हि शब्दादन्यप्रतिपत्तौ अन्यत्र प्रवृत्तिः, इतरथा गोशब्दाद् अश्वे प्रवृत्तिः । अथ विवक्षा अर्थप्रतिबद्धा, ततः तत्प्रतिपत्त्या तत्र प्रवृत्तिः; नन्वेवं मीमांसकस्य प्रति परसामान्यस्य विशेषे वृत्तिरविरुद्धा स्यात् । § 3495

स्यादेतत्, विवक्षितस्यार्थस्य स्वलक्षणे समारोपाद् भ्रान्त्या तत्र वृत्तिरिति; तन्न सारम्; यतः सर्वस्य सर्वत्रारोपात् प्रवृत्तिप्रसङ्गात् । § 3496

अथ मतम्--गोविवक्षारूढस्य स्वदावेवारोपः सादृश्यात्, नान्यत्र विपर्ययात्; सिद्धं तर्हि विवक्षाविकल्पस्य बहिरर्थगोचरत्वम् । नहि प्रत्यक्षस्यापि सादृश्यादपरं तत् । सर्वथा सादृश्यं सर्वत्र दुर्लभम् । § 3497

ननु नियतवृत्तयो भ्रान्तयः ततः काचित् क्वचिदिति न सर्वत्र प्रवृत्तिरिति चेत्; कुत एतत् ? य एव हि पारम्पर्येण तद्विकल्पवासनाप्रबोधकाः त- 622/mkj
त्रैव तद्विकल्पस्य दर्शनात्, कथमेवमानवन्ता र्थप्रतिबद्धजन्मानो विकल्पाः, यतस्तद्योनयः शब्दाः तथा न स्युः ? भवन्तु तत्परिवद्धा ननु तद्विषया इति

---

४ ना] नाकारणं विषयः--प्र° वा° मनोरथ° २ । २५७ ।
११ तिव+इ] तिबद्धः
१२ त्वेनि] शब्दविषयत्वेन इ
१३ च्च] सदसच्च
१५ त] विवक्षायाम् ।
१६ लं] ल
१९ वृत्तिः] स्यादिति ।
१९ त्त्या] अर्थप्रतिपत्त्या ।
१९ त] अर्थे ।
२० ति] प्रतीत
२३ दा] खण्डादा
२३ त्र] अश्वादौ ।
२५ त्] बहिरर्थगोचरत्वम् ।
२८ न्ता] कथमेवम् अनुमानवत् ना
२९ यः] विकल्पाज्जायमानाः ।
२९ त] अर्थप्रतिबद्धाः ।
२९ द्धा] तत्प्रतिबद्धाः
२९ नु] नतु
२९ या] अर्थविषयाः ।

चेत्; प्रत्यक्षस्य तद्विषयता न भवेत् । सारूप्यादिति चेत्; कुतः तस्य तत् ? तस्मादुत्पत्तेरिति चेत्; अविकल्पादुत्पत्तिर्विकल्पस्यापि स्यादित्युक्तम् ।

§ 3498

किंत्वपारम्पर्येण स्वलक्षणादुत्पत्तेः तदव्यवसायी चेद् विकल्पः; चक्षुराद्य- /ms व्यवसायी स्यात् । अयोग्यत्वान्नेति चेत्; स्वलक्षणे योग्यत्वं कुतः ? त- दनुभवादुत्पत्तेः; तस्यानुभव इति कुतः ? [ततस्वलक्षणात् ।]उत्पत्तेश्चेत्; चक्षुरादेः स्यात् । अतद्रूपत्वान्न इत्यपि नोत्तरम्; स्वलक्षणेऽप्यस्य समान- त्वात् । तत[ः] स्थितम्--शब्दाद्विवक्षाप्रतीतौ अर्थे प्रवृत्तिर्न स्यात् इति ।

§ 3499

कारिकार्थमाह--**शब्दार्थ** इत्यादिना । **शब्दस्य अर्थः** स विद्यमानोऽस- त्वा[द]विद्यमानो वा इति **तद्विवक्षाम्** अर्थवाञ्छाम् **अनावृत्यसर्वः** । कः ? **अर्थक्रियार्थी** जलाद्याहरणार्थी **तत्समर्थ**[मेव अर्थ]क्रियायोग्यमेव **शब्दार्थं परीक्षेत** । कुतः ? इत्याह--**तत्रैव** इत्यादि । यत एवं तत एवं **ततः [व्यवहारं] शास्त्रं च कुर्वाणः** सुगतोऽन्यो वा तदनायैव * अर्थक्रियासमर्थप्रतिपादनायैव **कर्त्तुमर्हति नान्यथा** नान्येन विवक्षाप्रतिपादनप्रकारेण, तत्प्रतिपादनेऽपि प्र- योजनाभावादिति । कथं पुनः अर्थाऽप्रतिबद्धजन्मनः शब्दाद् अर्थप्रतिपत्तिः इति ? अत्रैव पुनरपि दूषणमाह--**नवेत्यादि न च नैवायमेकान्तः** । कोऽसौ ? इत्याह--**सर्वत्र मेयबुद्धीनां प्रामाण्यम् अर्थप्रतिबन्धादेव** इति । कुतः ? इत्याह--**इन्द्रिय** इत्यादि । युक्त्यन्तरमत्रैव दर्शयन्नाह--**क्वचित्** इत्यादि । /ms, **क्वचित्** चक्षुर्विज्ञाने **रूपमात्रप्रतिभासनात्, मात्र**शब्देन रूपविशेषस्य क्षण- /ms नाशादेरप्रतिभासनात्, **वर्णरसादिप्रतिबन्धाविशेषेप्या** ... ... ...सत्त्वविशेषात् नापि व्यतिरिकानुविधानेन; संशयादिज्ञानस्य अर्थाभावेऽपि भावात्, अपि चक्षुरादिषु समर्थेषु सत्स्वपि अर्थाभावे ज्ञानाभावः । तदनुविधानं तच्च न तेनैव ज्ञानेन प्रतीयते; तदा तदभावात्, अन्यथा तद्विरोधः । अन्येन प्रतीयत इति चेत्; उभयदशावलम्बिना तेन भवितव्यम्, इतरथा तेन तद्ग्रहणायोगात् । तस्यापि स्वदकार्यता, अन्येन तदनुविधानग्रहण इत्य- नवस्था । ततः स्थितम्--**तज्जनो वस्तुत्वात् सर्वथा [तद]नुपपत्तेः स एव**

---

१ त] अर्थविषयता ।
१ त] सारूप्यम् ।
२ त्ति] त्ते
४ किंत्व] किं च,
४ व्य] तदध्य
५ व्य] द्यध्य
५ स्यात्] चक्षुरादेरपि परम्परया तदुत्पत्तिदर्शनात् ।
६ त्तेः] इति चेत्; ।
११ अनावृत्य] दृत्य
१३ त] तत एवम् इति निरर्थकमत्र ।
१४ *] तदर्थप्रतिपादनायैव
१७ त्यादि] न च इत्यादि
१८ मेय] प्रमेये
२२ विशेषात्] ?
२२ विशेषात्] अत्र आदर्शप्रतौ ४८६ ख तमे पृष्ठे पङ्क्तिद्वयं रिक्तमलिखितम्, ४८७ क तमः पृष्ठश्च संपूर्णो रिक्त; ४८७ ख पृष्ठे च पङ्क्तिरेका रिक्ता वर्तते ।
२३ च्च] नं च
२६ द] स्वार्थ
२७ नो] तज्जन्मसारूप्ययोर

**प्रतिबन्धोऽस्तु** । तथा सारूप्यस्य सर्वेण सर्वात्मना[न] कथञ्चित् प्रकारेण **अनुपपत्तेः** ज्ञानजडत्वानेकान्तप्रसङ्गात्, स एव अस्तु इति । यदि वा, **सर्वेण** प्रत्यक्षानुमानप्रकारेण **तदनुपपत्तेः** इति ग्राह्यम् । तथाहि--ज्ञानार्थयोः 623/mkj द्वयोरपि दर्शने इदमनेन समानमिति भवति निश्चयो यमलकवत् । न च परस्यार्थद[र्शनमस्ति अ]न्यत्रोपचारात् । सोऽपि न युक्तः, यतः पूर्व द्वयो[ः]दर्शने, पुनरन्यतरदर्शना[त्] तत्सदृशान्यदर्शनाध्यारोपस्य तत्त्वा[त्] चैत्रमैत्रदर्शनाध्यारोपवत् । द्वयोर्दर्शने वा तदाकारेण चेतसा; तदवस्थो दोषोऽनवस्था । भ्रा[न्त्या] तदाकारेण वेदने सिद्धं नः समीहितम् । § 3500

प्रत्यक्षं च सदात्मान नीलाद्याकारवर्जितम् ।
वेत्ति तस्मान्न सारूप्यं सिद्धं ज्ञानार्थयोः क्वचित् ॥§ 3502

घटादिकमहं वेद्मि देशभिन्नं परिस्फुटम् । /ms
इति लोके यतो दृष्टो व्यवहारो ह्यविगानतः ॥§ 3504

अहंप्रत्ययतो नान्या संवित्तिर्वीक्ष्यते मतम् ।
सारूप्यं सौगतैर्यस्या मानत्राणसमन्वितम् ॥§ 3506

प्रत्यक्षबाधनात् सिध्येत् सारूप्यं नानुमानतः ।
प्रत्यक्षबाधितः पक्षो नान्यतः सिद्धिमृच्छति ॥§ 3508

द्वयोरेकेन दृष्टिश्च दृष्टत्वान्न विरुध्यते ।
सममन्यच्च तेन स्यादेकस्मात् कार्यमन्यथा ॥§ 3510

वासना कारणं वित्तेः चिन्तनीया मनीषिभिः ।
बहिरर्थग्रहे दोषैः सापि योज्या समस्तवैः ॥§ 3512

यस्याप्यहेतुकं ज्ञानं चित्तमेकमनाविलम् ।
तस्यापि चार्थसंवित्तिरविरुद्धेति साधितम् ॥§ 3514

निरंशानेकविज्ञानवादः पूर्वं कृतोत्तरः ।
एकानेकविकल्पादिशून्यं हि सर्वथा ततः ॥§ 3516

सारूप्यस्य सर्वथानुपपत्तेः स एव प्रतिबन्धोऽस्तु किं सर्वथा तज्जन्मसारूप्ययोरवस्तुत्वम् ? न; इत्याह--**अन्यत्र विकल्पघटनात्** विकल्पे[घ-

१ था] **सर्वथा** तस्य
५ प] योगाचारस्य ।
५ पूर्व] र्वं
६ स्य] पः स्यात्
९ दात्मान] नं
१२ तः] अविवादतः ।
२० वैः] ?

ट]नात् अन्यस्मिन् परमार्थपक्षोवस्तुत्वं तद्घटनात्तु वस्तुत्वमेव इत्यर्थः ।
§ 3517

ननु **प्रामाण्यं व्यवहारेण** प्र० वा० १ । ५ इत्यभिधानात् सौगतेन[न] संवृत्या तया त एव दोषाय इति चेत्; न; अन्यथाभिप्रायात् । तथाहि-- तज्जन्मसारूप्यवत् विकल्पघटना[त्] निराकारमेव ज्ञान बस्तु तथैव लोके व्यवहारादिति । § 3518

पुनरपि तत्रैव दूषणान्तरमाह--**यद्ययं निबन्धः** इत्यादि । [न] प्रत्ययस्य **ज्ञानाकारणम्** अपि तु कारणमेव **विषयः इति; कथम्** न **अनुमानज्ञानं**
/ms **क्वचित्** पावकादौ साध्ये **प्रमाणम्** ? परःपृच्छति--**कथंच न** इति ? तस्योत्तरमाह--**संविदित** इत्यादि । **संविदितः** प्रत्यक्षेण प्रतिपन्नः **प्रतिबन्धविशेषः**
624/mkj तदुत्पादिलक्षणो यस्य महानससम्बधिनोऽग्न्यादेः **तस्य प्रत्यक्षसिद्धत्वात्,** न तत्र तत् प्रमाणमिति । अन्यत्र प्रमाणमिति चेत्; अत्राह--**तदन्यत्र** इत्यादि । **तस्मादन्यत्र** प्रत्यक्षादन्यत्र परोक्षे **प्रमाणं कथम् ?** कुतः ? इत्याह--**प्रतिबन्धासिद्धेः** अन्यत्र इति । § 3519

स्यान्मतम्--धूमसामान्यम् अग्निसामान्येन व्याप्तमेकदा प्रतिपन्नं सर्वदा प्रतिपन्नमेव इति चेत्; तदाह--**सामान्येन** इत्यादि । परं पृच्छति **किं पुनः** इत्यादिना । पर आह--**अन्यापोहः सामान्य**[म् इत्यादि । अन्य]**स्माद्** विजातीया**दपोहः** व्यावृत्तिः, अन्यस्य वा अपोहः, अन्यो वा अपोह्यतेऽस्मिन् विकल्पाकारे इति । विकल्पान्तरवदपोहविषयत्वेन प्रत्यक्षस्य विकल्पकत्वप्राप्तेः इति मन्यते । अथ अनुमानात् तत्प्रतीतिरिष्यते; तत्राह--**तदनुमान** इत्यादि । **तस्य** व्याप्यव्यापकापोहसामान्यस्य **अनुमानकल्पनायां** सत्याम् **अनवस्थानात् कथमनुमानज्ञानं क्वचित् प्रमाणमिति** ? तथाहि--सामान्यम् अनुमानात् प्रतीयते । तदपि लिङ्गादुदयवत्, तत्रापि सामान्येन प्रतिबन्धवेदनम्, तत्रापि तदेव वक्तव्यं यावन्न क्वचिदवस्थानमिति । § 3520

स्यान्मतम्--प्रमाणमन्तरेण तत्प्रतीयते इति; तत्राह--**प्रमाणमन्तरेण न तस्य** अपोहस्य **प्रतिपत्तिः तत्प्रतिपत्तिः** । कुतः ? इत्याह--**अन्यत्रापि**
/ms इत्यादि । **अन्यत्रापि** प्रत्यक्षानुमेयाभिमतेऽपि **प्रमाणकल्पनाऽनर्थक्यात्** प्रकृतसामान्यवद् अन्यस्यापि तदन्तरेण प्रतीतेः । व्यवहारेण तस्य सार्थकत्वे प्रतिबन्धज्ञानं तथास्तु । योगिप्रत्यक्षं तदस्तीति चेत्; उक्तमत्र सर्वस्मात् स्वविषयात् तदनुत्पत्तेः इत्यत्तेः इतरथा तत एव साध्यसिद्धेः किमनुमानेन ? तत्रापि सामान्येन प्रतिबन्धग्रहणे सविकल्पं तत् इति । दूषणान्तरमाह--**सादृश्य** इत्यादि । सदृशपरिणाम**लक्षणंजातिं सामान्यमन्तरेण कथम्**

---

१ क्षो] क्षे
४ संवृत्या] कल्पनया ।
५ स्तु] मस्तु
७ न्धः] निर्बन्धः
८ ज्ञाना] नस्य अ
११ दुत्पा] त्पत्त्या
१२ त] अनुमानम् ।
२३ त] अनुमानमपि ।
२३ प्र] अविनाभावसम्बन्ध ।
२८ त] प्रमाणमन्तरेण ।
३० इ] इत्यत्तेः इति निरर्थकमत्र ।
३० त] योगिप्रत्यक्षादेव ।
३२ णं] णां

**अन्यव्यावृत्तम्** अन्यस्मात् विजातीयादपसृतं **पावकादिकम् एकत्वेन** अभेदेन **प्रतीयात् ?** न कथञ्चित् । स्वयं हि सादृश्याद् व्यावर्त्तते नान्ये सदृशपरिणामलक्षणजातिसद्भावे च किमन्यापोहसामान्येन इति भावः । कुतः न कथञ्चित् प्रतीयात् ? इत्याह--**विवक्षित** इत्यादि । **विवक्षितं ज्ञानम्** अशेषं स एव **पदार्थः** पदाभिधेयः तस्य **अन्यस्मादज्ञा**नात् पटात् **व्यावृत्तिः** तस्याः **सर्वत्र** घटादाव**विशेषात्** । तथा च अज्ञानात् पटाद् व्यावर्त्तमानं यथा ज्ञानं ज्ञानपदाभिधेयं तथा घटादिकमपि स्यात् । अथ स्वयं ज्ञानमेव ततो व्यावर्त्तमानं तद्व्यपदेशभागुच्यते; तर्हि साध्वेतत्--**सदृश** इत्यादि । § 3521

ननु न परमार्थतः सादृश्यमप्येवं सामान्यमस्ति, केवलमेकप्रत्यवमर्शज्ञानहेतुत्वात् धियामभेदः, तदभेदाद् व्यक्तीनामभेद इति । तदुक्तम्-- /ms

*एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी ।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता ॥ प्र० वा० ४ । १०८
इति ; § 3524

तत्राह--**सादृश्येन** इत्यादि । § 3525

...15 साादृश्येन विनार्थानां प्रत्यभिज्ञाबलात् किल ।
प्रतिपत्ता तदतद्धेतूनर्थान् विभजते स्वयम् ॥ १५
॥ § 3527

625/mkj

तदेकप्रत्यवमर्शस्य... § 3528

**सादृश्येन** सदृशपरिणामेन **विना** तदन्तरेण । केषाम् ? **अर्थानां** पावकादीनाम् **प्रत्यभिज्ञाबलात् प्रतिपत्ता** सौगतोऽन्यो वा **अर्थान् विभजते** विभागेन व्यवस्थापयति । किंभूतान् ? **तदतद्धेतून्** [तद्धेतून्] उदकाद्याहरणहेतून् घटान् अतद्धेतून् पटादीन् **स्वयम्** आत्मना **किल** इति अरुचौ, सादृश्याभावे प्रत्यभिज्ञानस्यापि दुर्लभत्वात् । नहि लूनपुनर्जातकेशादावपि तदस्ति, अन्यथा तृणदर्शनादपि त एव केशा इति स्यात् इति मन्यते । § 3529

कारिकां व्याख्यातुमाह--**तदेकप्रत्यवमर्शस्य** इत्यादि । **तेषां** खण्डादीनाम् **एकप्रत्यवमर्शस्य** । शेषं गतार्थम् । § 3530

अत्र दूषणमाह--**विषय** इत्यादि । § 3531

---

७ स्यात्] घटपदाभिधेयं स्यात् ।
२२ त] सादृश्यं विना प्रत्यभिज्ञानमस्ति ।

...16 विषयविषयिव्यवस्थैवं सर्वत्रोत्सन्नैव किल ।
वर्णादिप्रत्यभिज्ञानकृतेर्वर्णादिसंविदः ॥ १६ ॥§ 3533

...किंचन व्यवस्थापयेत् यावता तत्संविद्धेतुत्वात् वर्णादिमत्त्वं सादृश्यवत् । ततः किं कस्य कारणं कार्यं वा यतोऽयं व्यवहारः प्रवर्तते । न वर्णादेः प्रत्यक्षाद् व्यवस्था; सदृशात्मनः प्रत्यक्षत्वात् । न प्रतीतेः प्रमेयव्यवस्था; एवं हि वर्णादिव्यवस्थापि मा भूत् । तदेको हि स्थवीयानाकारः समक्षसन्निवेशी परिस्फुटमवभासते । तदप्रत्यक्षत्वे न कोऽपि प्रत्यक्षार्थः । § 3534

**विषयो** रूपादिः **विषयि** तद्विज्ञानम् **तयोर्व्यवस्थैवसर्वत्र** बहिरन्तश्च **उत्सन्नैव** स्यात् **किल**शब्दः अनेन व्याख्यातः । कुतः ? इत्याह--**वर्णादि** इत्यादि । **वर्णः** शुक्लादिः रूप**मादि**र्यस्य रसादेः तस्य **प्रत्यभिज्ञानं** मानसो विकल्पविशेषः तस्य **कृतेः** कारणात् **वर्णादिसंविदः** रूपादिसंवित्तयः वर्णादिसंविदांहेतुः वर्णादिःस्यात् न ततो वर्णादिः स्यात् । अथ मतम्--वर्णाद्यभावे खरविषाणवत् न तत्संविदः, तदभावे न तत्प्रत्यभिज्ञानमिति; समानमेतदन्यत्रापि । § 3535

कारिकां विवृण्वन्नाह--**किंच ते***त्यादि । कुतो न व्यवस्थापयेत् ? इत्याह--**यावता** इत्यादि । वर्णा[दि]प्रत्यभिज्ञाताद्वर्णादिसंविदो व्यवस्थाप्य- /ms न्ते **तत्संविदां** वर्णादिधियां **हेतुत्वा[त्]**मानानां **वर्णादिमत्त्वं** न स्वभावतः **सादृश्यवत्** इति निदर्शनम् । ततः तस्मात् भ[भा]वानां तत्त्वाव्यवस्थाभावात् **किं** चेतनमचेतनं वा **कस्य** तथाविधस्य **कारणं कार्यं वा** न किञ्चित् कस्यचित् इत्यर्थः । **यतोऽयं** कस्यचित् कार्यकारणभावात् **व्यवहारः प्रवर्त्तते** । परमतमाशङ्कते दूषयितुं **वर्णादेः** इत्यादि । तात्पर्यम्--**वर्णादेः प्रत्यक्षाद् व्यवस्था,** न प्रत्यभिज्ञानात् । अत्र दूषणम्--**न** इत्यादि । **न** इति परपक्षनिषेधे । कुतः ? इत्याह— **सदृशात्मनो** वर्णादेः **प्रत्यक्षत्वात्** । तथाहि--समयरहितस्य अन्यत्र गतचित्तस्य वा क्वचित् खण्डमुण्डादिदर्शिनः एते समानाः 626/mkj इति प्रतीतिः, अस्या अपलापे सकलाप्रतीतिविलोपरः * । परः प्राह--**न प्रतीतेः प्रमेयवस्था** इतरथा मरीचिकायां जलव्यवस्था तत्प्रतीतेः स्यादिति; सोऽनेन निरस्तः; **एवं हि वर्णादिव्यवस्थापि मा भूत्** । शक्यं हि वक्तुं न तत्प्रतीते[ः] तद्व्यवस्था मरीचिकाजलवदिते । बाधकाभावं नैवं चेत्; सादृश्यप्रतीतेः किं बाधकप्रत्यक्षमिति चेत्; किं पुनः तद् आत्मानं बाधते

८ स्थैव ] वं
१२ र्णादिः ] देः
१४ * ] चन इ
१५ भिज्ञाताद् ] नाद्
१७ त्वा ] त्व
२० र्णादिः ] देः
२२ स ] सङ्केतरहितस्य ।
२४ अ ] सदृशप्रतीतेः ।
२४ ला ] ल
२४ * ] लोपः
२७ स्था ] वर्णादिव्यवस्था ।
२७ दिते ] दिति
२७ नैवं ] भावान्नैवं
२८ क ] कम् ?
२८ द् ] प्रत्यक्षम् ।

? सादृश्यमात्र इति चेत्; भेदमात्र इति समानम् । प्रतीतेः; इतरत्रापि सास्ति । § 3536

किंच, तदात्मनि बाधितेतररूपद्वयं प्रतिपद्यमानमेव अन्यत्र सदृशेतर-स्वभावद्वयं न सहत इति महती प्रेक्षाकारिता ! किंच तेन तत्र बाधनम् ? अग्रहणमिति चेत्; तदसिद्धं वर्णादिमात्रेऽपि प्रसङ्गात् । तदग्रहणे प्र-त्यक्षाभावः; अन्यत्रापि । अतस्मिंस्तद्ग्रहज्ञापनमनेन चिन्तिर्व वर्णादिवद् /ms
अन्यत्रापि न तथाप्रतीतिः । तन्न प्रत्यक्षं बाधकम् । अत एव नाऽनुमान-मपि; तदभावे [ऽ]भावात् । व्यक्तिव्यतिरेकेण तददर्शनं बाधकमिति चेत्; किं पुनः वर्णादेः तद्व्यतिरेकेण दर्शनमस्ति ? स एव व्यक्तिरिति चेत्; सादृश्यमप्यस्तु । नहि नैयायिकेनेव जैनेन तद भिन्नं सामान्यमिष्यते । व्यक्तय एव स्युः इति चेत्; भवन्तु का नो हानिः ? केवलं परस्परं सदृशात्मान इति । निरंशपरमाणुदर्शनात् न तासां सदृशेत[र]रूपतां युक्ता इति चेत्; अत्राह--**तदेको हि** इत्यादि । **तस्य** वर्णादेः **एकः** साधारणः **हि**र्भावनायाम् । कः ? इत्याह--**आकारः** । किंभूतः ? **स्थवीयान्** । पुन-रपि किंभूतः ? **समक्षसन्निवेशी** । कथं किम् ? इत्याह--**परिस्फुटं** यथा भवति तथा **अवभासते** इति । अस्यानभ्युपगमे दूषणमाह--**तदप्रत्यक्षत्वे** तस्य आकारस्याऽप्रत्यक्षत्वे तको न कश्चित् **प्रत्यक्षार्थः** । विचारितमेतत् अनेकधा, न पुनरुच्यते । एवं मन्यते--यदि अयमाकारः बहुषु परमार्थसन् खण्डादिषु सदृशपरिणामोऽपि स्यादिति । § 3537

प्र ज्ञा क र गु प्तस्त्वाह--**न तदाकारदर्शनाद् बहिः तथा वस्तुसिद्धिः दूरविरलकेशादौ तदाकारप्रतिभासेन व्यभिचारात्** इति; स प्रष्टव्यो भवति--किं बहिरर्थमाश्रित्य एवमुच्यते, उत ज्ञानमात्रम्, विभ्रममात्रम्, शून्यतामात्रं वा ? प्रथमपक्षे बहिर्वर्णादिव्यवस्थापि मा भूत् शुक्ले शङ्खे पीतप्रतिभासनेन व्यभिचारात् । न सुबर्णादौ पीतभासावऽ तत्प्रतिभासात्; मधुरे क्षीरे पित्त- /ms
ज्वरिणः कटुकप्रतिभासेन अनेकान्तात् । *निम्बादौ कटुकता तत्प्रतिभासात् । एवं सर्वत्र योज्यमिति साध्वी सारूप्यव्यवस्था ! बाधकाभावोऽन्यत्रापि । द्वितीयविकल्पे बहिरिव ज्ञानेऽपि स कथम् आकार इति चिन्त्यम् ? नास्तीति चेत्; किं पुनः नीलादेरन्यद्विज्ञानम् ? तथा चेत्; नीलादिः किम् ? न किञ्चिदिति चेत्; विज्ञानमपि तथास्तु । प्रतीत्यपलापे परंसर्वालापः । एवं हि सुतरां क्लेशविच्छेदः । भ्रान्त इति चेत्; तेन तर्हि व्यभिचारात् न प्रतिभासात् कस्यचित् स्वसंवेदनसिद्धिः । नीलादिरेव ज्ञानमिति चेत्;

१ तीतेः] इति चेत् ।
३ मेव] न एव
६ चिन्तिर्व] चिन्तितम्
८ त] प्रत्यक्षाभावे ।
८ भा] अनुमानस्याप्यनुत्पत्तेः ।
१० द] त[[व्यक्तिभिन्नम् ।]]द्-
१२ ता] व्यक्तीनाम् ।
१२ तां] ता
१७ को] न कोऽपि
२४ भासावऽ] पीतावभासः
२५ *] न इत्यत्रापि योज्यम् ।
२९ रं] वरं

कथं तत्र तदाकारः पारमार्थिकः ? अन्यथा अर्थेऽपि स्यात् । अथ दूर- 627/mkj विरलकेशेषु व्यभिचारात् न तत्र  स तथा; तत एव ज्ञानेऽपि न स्यात् । अथ ज्ञानपक्षे तत्केशानामभावात् न तैर्व्यभिचारचोदना; परपक्षे तैरसद्भिः सा कथं क्रियते ? पराभ्युपगमादिति चेत्; भवदभ्युपगमाद् विज्ञानवद् अर्थेऽपि स आकारः परेण किन्न साध्यते ? सन्देहः स्यादिति चेत्; तर्हि--किं ज्ञानवदर्थेऽपि स सन् उत तत्केशवदसन् इति ? तदेतदसत्; यतः ज्ञानेऽपि सन्देहानिवृत्तेः । तद्यथा स्तम्भाद्यर्थवत् ज्ञाने सन् अयमाकारः अहोस्विन्न[ख]केशादिव[द]सन्निति । भवेदयम् अर्थवादिनः सन्देहो व्यभिचारविषयतेनाङ्गीकरणे धूममविपर्ययादिति चेत्; न; सारमेतत्; यतः यथैव पराभ्युपगतव्यभिचारविषयमादाय परस्य सन्देह उत्पद्यते, तथा /ms आत्मन्यपि उत्पादनीयः, एवं हि मध्यस्थाता स्यात् ।  परो वा यदा एवं वदति--बहिरिव ज्ञानेऽपि तत एव व्यभिचारात् नायमाकारः सत्यः; तदा किं त्वया वक्तव्यः--तदभ्युपगमादेव स व्यभिचारः स चाभ्युपगमो न प्रमाणम् इति चेत्; न; अप्रमाणात् संसित्प्रत्यादनायोगात् । अथं परो यथाकथंचिद्वक्तव्य इति, तत एव संशयगर्त्तपाती क्रियते; तर्हि बौद्धोऽपि परेण यथा कथंचिद्वक्तव्य इति व्यभिचारविषयमनादृत्य विज्ञानवदर्थेऽपि तदाकारसत्यता साध्यते । अभ्युपगतपरित्यागो दोष इति चेत्; न; यत्परित्यागेऽपि बहुतरं सिद्ध्यति स्वपक्षे परपक्षक्षयकारी तत्परित्यागेऽप्यदोषात् । तदुक्तम्-- § 3538

*त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ तदिति ।§ 3540

अथ ज्ञानेऽपि न स परमार्थतः; तर्हि तेन व्यभिचारात् वर्णादिरपि तत्र तथास्तु । तन्न द्वितीयोऽपि पक्षः श्रेयान् । इदानीं तृतीयो विचार्यते--येन विभ्रमोविगम्यते तत्प्रतिभासस्य विभ्रमेण व्यभिचारान्न सत्यता । मा भूत् इति चेत्; उक्तमत्र— विभ्रमासिद्धेरिति । § 3541

चतुर्थः पञ्चतां नीतः पक्षः पूर्वं यथाविधि ।
प्रमाणबाधनात् सत्ततस्माद्भावा यथोदिताः ॥§ 3543

२ स] तदाकारः ।
२ था] पारमार्थिकः ।
४ सा] व्यभिचारचोदना ।
९ य] ये
९ वि] मषिवि
११ स्था] स्थ
१३ त्व] बौद्धेन ।
१४ त्या] संवित्प्रतिपाद
१४ अथं] अथ
२४ मोवि] मोऽधि
२४ मेण] सस्याविभ्रमे तेनैव
२६ च] शून्यतामात्रमिति पक्षः ।
२६ प] पञ्चतां नाशतां प्राप्तः ।
२७ त] सत्यं त

ननु यया प्रत्यासत्त्या किंचित् सादृश्यं केचन भावाः स्वीकुर्वन्ति तया स्वयमतदात्मकाः तथावभासिष्यन्त इति चेत्; अत्राह--**स्वीकुर्वन्ति** इत्यादि । § 3544

...17 स्वीकुर्वन्ति गुणानर्था यया शक्त्याऽगुणा न किम् ।
तया तत्संविदः कुर्युर्भिन्नाश्चेदेकसंविदः ॥ १७
॥§ 3546

यथा तत्सामान्यमेकं व्यक्तय उपकुर्वन्ति न पुनरेकबुद्धिमिति न युज्येत तथैकं घटादितत्त्वमात्मनि स्पर्शादीन् बिभर्ति न पुनः स्पर्शाद्याकारंप्रत्ययानेव करोतीति न घटां प्राश्वति, ततो निराकारोऽर्थः स्यात् । § 3547
628/mkj

**स्वीकुर्वन्ति गुणान्** रूपादिज्ञानादीन् **अर्थाः** घटादयः **यया शक्त्या** /ms **अगुणा** गुणरहिताः **न किं तया** शक्त्या **तत्संविदो** गुणसंविदः **कुर्युः भिन्नः** परस्परविलक्षणाः अर्थाश्चेत् यदे **कसंविदः** एका संविद् येषामिति । § 3548

कारिकां व्याख्यातुमाह--**तत्सामान्यम्** इत्यादि । **तत्सामान्यं** सादृश्य-सामान्यम् **एकं** सकलबाहुलेयादिव्यक्तिसाधारण**मुपकुर्वन्ति** आत्मनि धार-यन्ति व्यञ्जयन्ति वा । काः ? **व्यक्तयः** खण्डादिविशेषाः । **न पुनरेषांबुद्धिं** गौर्गौः इति प्रत्ययं **कुर्वन्ति** व्यक्तय **इत्येवं यथा** येन तद्बुद्धिकरणप्रकारेण **न युज्येत** किन्तु तदेकबुद्धिमेव कुर्वन्ती[ति]युज्येत[त]त्रैव सामर्थ्यदर्शनात्, **तथा** एकमखण्डं **घटादितत्त्वम् आत्मनि** स्वस्वरूपे **स्पर्शादीन्** गुणान् **बिभ-र्त्ति न पुनः स्पर्शाद्याकारप्रत्ययानेव करोति इत्येवं न घटां प्राश्वति** अपि तु अतद्गुणमपि तत्प्रत्ययान् करोतीति घटां प्राश्वति । **ततो**ऽनन्तरन्यायात् **निराकारोऽर्थः स्यात्** । § 3549

एवं हि निराकारमर्थं प्रतिपाद्याधु तान्तः प्रतिपादयन्नाह— **जीव** इत्यादि । § 3550

...18 जीवः सुखादिपर्यायानेति शक्त्या यया तया ।
शक्तिमानिव लक्ष्येत चित्रबुद्धिः यथा स्वयम् ॥ १८
॥§ 3552

---

५ संविदः ] उद्धृतोऽयम्--न्यायवि० वि० प्र० पृ० ४०८ ।
१० भिन्नः ] भिन्नाः
११ दे ] यदि ए
१४ रेषां ] रेक
२१ हि ] एवं बहिः
२१ तान्तः ] द्य अधुना अन्तः

यया...ततो भेदैकान्ते क्व दर्शनप्रत्यभिज्ञानादयः कथञ्चिद् व्यवहारपदवीमवतरेयुः ? § 3553

**जीवः** आत्मा **सुखादिपर्यायान्** एति गच्छति **शक्त्या** योग्यतया **यया तया** शक्त्या **शक्तम वा निव लक्ष्येत** अनुभवोत्तरविकल्पबुद्ध्या व्यवसीयेत नानुभवेन गृह्यत । परप्रसिद्धनिदर्शनमाह--**चित्राहेत्यादि** । चित्रमेवकादौ ग्राह्यादौ वा **बुद्धिः स्वयम**चित्रापि **यथा** *चित्रापि यथा चित्रानेव लक्ष्यते । § 3554

/ms कारिकाविवरणमाह--**यया** इत्यादि । ततः किं जातम् ? इत्याह--**ततः** तस्मात् न्यायात् **क्व** बहिरन्तर्वा न क्वचिद् **दर्शनप्रत्यभिज्ञानादयः कथञ्चिद् व्यवहारपदवमेव** ***तरेयुः** क्वभेयुः । क्व ? **भेदैकान्ते** इति । § 3555

भेदैकान्ते एकप्रत्यवमर्शमभ्युपगम्य दूषणमुक्तम्, इदानीं य एव नास्तीति दर्शयन्नाह--**अर्था** इत्यादि । § 3556

...19 अर्थाः प्रत्यवमर्शस्याहेतवोऽविषयीकृताः ।
ततस्तत्प्रतिबन्धस्य अविनाभावो न लैङ्गिकम् ॥ १९ ॥ § 3558

नहि प्रत्यभिज्ञानं स्वयमविषयीकृतान् प्रत्यवमृशति, प्रमेयाधिक्याच्च प्रमाणान्तरत्वप्रसङ्गात् । ततस्तत्र प्रतिबन्धाऽसिद्धौ साकल्येन व्याप्त्यसिद्धेश्च कुतोऽनुमानम् ? § 3559
629/mkj

**अर्थाः** परपरिकल्पितक्षणिकपरमाणुरूपा घटादयः **प्रत्यवमर्शस्यास्याहेतवः** अकारणम् । किंभूताः ? इत्याह--**अविषयीकृताः** अदृष्टा इति यावत् । **ततः** तदहेतुत्वात् **तत्प्रतिबन्धस्य** तेषां लिङ्गलिङ्गिभूतार्थानाम् **अविनाभाव[ः]** स्यात् **न लैङ्गिकम**नुमानं स्यात् । § 3560

**नहि** इत्यादिना कारिकार्थमाह--न खलु **स्वयं** प्रत्यभिज्ञात्रा **अविषयीकृता** ननुभूता नर्थातु प्रत्यभि **प्रत्यभिज्ञानं प्रत्यवमृशति** तथाविधे विषये तदुदयाभावात्, अन्यथा सर्वत्र तदुदयः स्यादिति मन्यते । अथाविषयीकृतानपि प्रत्यवमृशति इति; तत्राह--**प्रमेय** इत्यादि । प्रत्यक्षानुमानाभ्याम् अविकल्पलिङ्गजाभ्याम् अन्यत् **प्रमाणं तदन्तरं** तद्भावः तत्त्वं तस्य प्र-

---

४ वा] शक्तिमा
५ त] ह्येत
५ चित्राहे] त्रे
५ मेव] मेच
६ *] चित्रापि यथा द्विर्लिखितम् ।
६ चित्रानेव] चित्रेव
१० *] दवीमव
१० भेयुः] भवेयुः
११ य] स[[एकप्रत्यवमर्श एव ।]]
२२ प्र] प्रत्यभिज्ञानकर्त्रा ।
२३ भि] न् अननुभूतार्थान्
२३ त] अननुभूते ।

**सङ्गात्** प्रत्यभिज्ञानस्य इति । **नहि** इत्यादिना सम्बन्धः । कुतः ? इत्यत्राह--**प्रमेयाधिवाक्याच्च** इति । प्रत्यक्षानुमानाविषयीकृतप्रमेयप्रवर्त्तनात् **प्रमेयाधिक्यात्** इत्युक्तम् । **च** शब्दात्मविकल्पालिङ्गजत्वात् इति । § 3561

लब्धं फलं दर्शयन्नाह--**ततः** स्वयमविषयीकृतस्य प्रत्यभिज्ञानेनाऽपराम-र्शात् **तत्र** निरंशे तत्त्वे **प्रतिबन्धासिद्धौ** लिङ्गस्याविनाभावाऽनिश्चये **कुतो** /ms **लिङ्गादनुमानम् ?** न कुतश्चित् । भवतु वा सन्निहिते प्रत्यक्षतः विषयीकृते प्रत्यभिज्ञानेन प्रत्यवमर्शः, तथापि साकल्येन तदभावान्नानुमानमिति दर्शय-न्नाह--**साकल्येन** इत्यादि । च शब्दोऽत्र द्रष्टव्यः । सामस्त्येन **व्याप्त्यसिद्धेश्च कुतोऽनुमानम् ?** § 3562

इन्द्रियजात् प्रत्यक्षात् तथा व्याप्तिसिद्धिः इत्येके । योगिप्रत्यक्षात् इत्य-परे । मानसात् इत्यन्ये । अनुमानात् इति केचन । व्यापकानुपलब्धेः इत्यर्थः । तत्राह--**प्रत्यक्षात्** इत्यादि । § 3563

...20 प्रत्यक्षात् क्वचिद् व्याप्तिरनुमानेनानवस्थितिः ।
व्यापकानुपलम्भश्च व्याप्त्यसिद्धौ न सिध्यति ॥ २० ॥§ 3565

यावान्...इत्यविचारितेन नामात्मना प्रतिबन्धं व्यवस्थापयतीति सुव्यव-स्थितः प्रतिबन्धः ! तदनुमानकल्पनायाम् [अनवस्था]क्षणिकत्वेन[व्याप्त्य- 630/mkj सिद्धौ व्यापकानुपलम्भश्च न सिध्यति ।] § 3566

ननु विचारितमेतत्--**भूता भव्या भवन्तो वा सर्वे भावाः** सिद्धिवि° ३ । ८ इत्यादिना तत्किमर्थं पुनरुच्यते इति चेत् ? तत्र साक्षादनुमाननिरूपेण

२ मेयाधिवाक्या] धिक्या
२ मेय] ये
३ ब्दात्म] त् स
१० क्षात्] सामान्यलक्षणाप्रत्यासत्त्या अलौकिकप्रत्यक्षेण ।
१० इत्येके] नैयायिकाः । लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षम् ।--न्यायवा° पृ° ४४ । भूयोदर्शनगम्या च व्याप्तिः सामान्यधर्मयोः । ज्ञायते भेदहानेन क्वचिच्चापि विशेषयोः ।--मी° श्लो° अनु° श्लो° १२ । भूयोदर्शनबलादग्निधूमयोर्देशादिव्यभिचारेऽपि अव्यभिचारग्रहणम् ।--प्रश° व्यो° पृ° ५७० । तस्मादभिजातमणिभेदतत्त्ववत् भूयोदर्शनजनितसंस्कारसहितमिन्द्रियमेव धूमादीनां वह्न्यादिभिः स्वाभाविकसम्बन्धग्राहीति युक्तमुत्पश्यामः ।--न्यायवा° ता° पृ° १६७ । ता° प° पृ° ६९७ । प्रश° किरण° पृ° २९५ । प्रश° कन्द° पृ° २०९ । तत्त्वचि° अनु° पृ° २१० ।
११ रे] तुलना--अन्ये तु व्याप्तिग्रहणकाले प्रतिपत्तुर्योगिन इवाशेषविषयं परिज्ञानमस्तीति ब्रुवते । अन्यथा हि सर्वो धूमोऽग्निं विना न भवतीति व्याप्तिस्मरणं न स्यात् ।--प्रश° व्यो° पृ° ५७० ।
११ न्ये] तस्य ग्रहणं प्रत्यक्षानुपलम्भसहायात् मानसात् प्रत्यक्षात् । धूममग्निसहचरितमिन्द्रियेणोपलभ्य अनग्नेश्च जलादेर्व्यावर्तमानमनुपलम्भेन ज्ञात्वा मनसा निश्चिनोति धूमोऽग्निं न व्यभिचरतीति ।--न्यायकलि° पृ° ३ । न्यायम° पृ° १२१, १२३ ।
१९ निरूपेण] पणे

तदुक्तम्, अत्र तु शब्दस्य प्रतिबन्धाभावे अगमकत्वे लिङ्गस्यापि तत् स्यादिति प्रदर्शनार्थम् इत्यदोषः । **क्वचिद्** बहिरन्तर्वा कार्यस्वभावे वा **प्रत्यक्षान्** कुतश्चनापि **व्याप्तिर्न सिध्यति** न तद्विषयतां गच्छति । अनुमानात् सिध्यतीति चेत्; अत्राह--**अनुमाने**वं गीक्रियमाणे अनवस्थितिः सत्त्वस्य **व्यापकम्** अर्थक्रियाकारित्वं तस्य नित्येऽ**नुपलम्भः** सत्त्वस्य क्षणिकत्वेन व्याप्तिं साधयतीति चेत्; अत्राह--**व्यापकानुपलम्भश्च न सिध्यति** सत्त्वव्यापकस्य अर्थक्रियाकारित्वस्य अनुपलम्भोऽपि अक्षणिके साकल्येन न सिध्यति । नहि अर्थक्रियाविकलमक्षणिकं सर्वं द्रष्टुं शक्यं येन तत्र तदभावे स- /ms त्त्वाभावः स्यात् वृक्षाभावे शिंशपाभाववत् । अथा क्षणिकत्वाभावात् तत्र अर्थक्रियाकारित्वानुपलम्भः; कुतः ? तदभावेऽदर्शनादिति चेत्; मीमांसकस्यापि दर्शननिवृत्तिः सर्वज्ञसत्तां नि[वर्तयेत् इति] साधूक्तम्--सुगतो न सर्वज्ञः वक्तृत्वादिभ्यो रथ्यापुरुषवदिति । अथ अक्षणिके सर्वादर्शनं न सर्वज्ञः *, तत्र स्वयं सर्वज्ञान्तरेण दर्शनसंभवात् । प्रकृते सर्वादर्शनं कुतः सिद्धम् ? तद्दृष्टः कस्यचिज्जगति भवतोऽदर्शनात् । मीमांसकेनापि सर्वदृष्ठः तत्र कस्यचि[द]दर्शनात् इति समानम् । तस्य सर्वज्ञता स्यादिति चेत्; भवतोऽपि । भवतु इति चेत्; परस्यापि । *वेदाप्रामाण्यं स्यादिति चेत्; भवतोऽनुमानस्य । नहि सर्वज्ञस्य अनुमानेन किंचित् । परार्थं तदिति चेत्; परस्यापि इच्छामात्रेण अशेषज्ञत्वात् । § 3567

ननु यदि कश्चिदक्षणिकदर्शी स्यात्, स यदि इन्द्रियज्ञानेन; तन्न शक्यम्; तस्य वर्त्तमानमात्रविषयत्वात् । अथ अनुमानेन; तन्न; *तदभावेऽभावात् । न च प्रमाणान्तरादिति चेत्; कथमिदवगतम्--सर्वमक्षज्ञानं वर्तमानविषयमेव ? § 3568

स्यान्मतम्--अखिलमिन्द्रियज्ञानं वर्त्तमानविषयं तत्त्वात् अस्मदादित नहि सुगतो न सर्वज्ञो वीतरागो वा पुरुषत्वादिभ्यो रथ्यापुरुषवत् इत्यपि स्यात् । अथ पुरुषत्वाद्यविशेषेऽपि कश्चित् सर्वज्ञः कल्प्यते; इन्द्रियज्ञानमपि यदि किश्चिदेव त्रिकालानुयायिनमेकमर्थं पश्येत् को विरोधः, यतोऽक्षणिके सर्वादर्शनं सिध्ये[त् ?] तन्न अदर्शनात् क्षणिकाभावः । केवलम् अर्थ- /ms क्रियावैकल्यमवशिष्यते । तदप्यदर्शयन्नसिद्धत्युक्तन्यायात् । § 3569

१ त] अगमकत्वम् ।
२ क्षान्] त्
४ वं] नेन अङ्
५ क्रियाकारित्वं] त्वं
९ अथा] अथ
९ त्र] अक्षणिके ।
११ म्] मीमांसकेन ।
१३ *] ज्ञे
१३ प्र] अक्षणिके ।
१४ दृष्टः] त[[सर्वादर्शनसाक्षात्कर्तुः ।]]द्रष्टुः
१४ दृष्ठः] द्रष्टुः
१५ त] यदि मीमांसकः सर्वज्ञद्रष्टा स्यात् तदा ।
१६ *] मीमांसकः यदि सर्वज्ञं स्वीकुर्यात् तदा ।
१७ स्य] वैयर्थ्यं स्यात् ।
१७ किंचित्] प्रयोजनम् ।
२० स्य] इन्द्रियज्ञानस्य ।
२० *] प्रत्यक्षाभावे ।
२४ हि] दिज्ञानवत् इति; तर्हि
२८ सिद्ध] र्शनान्न सिद्ध्य

यदि मतम्--क्षणिकत्वेन अर्थक्रिया व्याप्ता, *तच्च विरोधादक्षणिकाद् व्यावर्त्तमानं तामानं तामादाय व्यावर्त्तते, सा च त त्वमिति; तत्राह-- 631/mkj **व्याप्त्यसिद्धौ न सिध्यति** क्षणिकत्वेन अर्थक्रियायाः या **व्याप्तिः** तस्याः **असिद्धौ** उक्तनीत्या **न सिध्यति** । § 3570

**कारिकार्थमाह--यावान्** इत्यादिना । § 3571

अत्राह परः--प्रत्यक्षात् न परमार्थतः कस्यचित् केनचित् सौगतेन व्याप्तिसिद्धिरिष्यते, अपि तु[संवृतेः], संवृतिश्च विचारानुपपत्तिः इति; तत्राह--**अविचारित** इत्यादि । **अविचारितेन** विचाराऽसहिष्णुना **आत्मना** स्वभावेन संवृतिकल्पितेन इत्यर्थः, **नात्मे***त्यरुचौ **प्रतिबन्धं** लिङ्गलिङ्गिनोरविनाभावं **व्यवस्थापयति** सौगत **इति** एवं **सुव्यवस्थितः प्रतिबन्ध** इत्युपहासः । तथा शब्दार्थयोरपि स्यादिति भावः । अनुमानात्तत्सिद्धिरिति चेत्; अत्राह--**तदनुमानकल्पनायाम्** इत्यर्थः । व्यापकानुपलब्धेस्तत्सिद्धिरिति चेत्; अत्राह—**क्षणिकत्वेन** इत्यादि । ततः स्थितम्--साकल्येन प्रतिबन्धसिद्धिमन्तरेण यदि लिङ्गं नमकं शब्दोऽपि स्यादिति । § 3572

अत्रैव युक्त्यन्तरमाह--**समनन्तरमि**त्यादि । § 3573

...21 समनन्तरमज्ञेयं स्वरूपार्पणकारणम् ।
प्रतिबन्धान्तरं शंसेत् प्रत्यर्थनियतं धियाम् ॥ २१
‖§ 3575

तादात्म्यतदुत्पत्तिसम्बन्धेऽपि समनन्तरप्रत्ययस्य अविषयीकरणात् कारण...यत्र यदेव यदर्थ[नियतं]तदेव तमर्थं विषयीकरोतीति युक्तः प्रतिबन्धः । स शब्दज्ञानज्ञेययोरपि पारमार्थिकः प्रतिषेद्धुमशक्यत्वात् § 3576

ननु चायमर्थः **न चायमेकान्तः सर्वत्र अर्थप्रतिबन्धादेव बुद्धीनां प्रामाण्यम्** इत्यनेन उक्तः, किं पुनरुच्यते ? तदुपसंहारार्थम् इत्येके । न त्रान्यथा व्याख्यानात् । **समनन्तरमि**ति न उपादानज्ञानमुच्यते उक्तत्वात्, अपि तु **समं** नीलाकारज्ञानसदृशं नीलम् **अनन्तरं** सन्निहितं पूर्वं किंभूतम् ? /ms इत्याह--**स्वरूपार्पणकारणम् स्वरूपार्पणेन कारणं** समानन्तरमकारणमपि त्यस्योपादानम् । तथाहि--देवदत्तनीलज्ञानस्य पूर्वानन्तरक्षणभावि सर्वनील-

१ *] क्षणिकत्वम् ।
२ ता] तामानं इति व्यर्थमत्र द्विर्लिखितम् ।
२ सा] अर्थक्रिया ।
२ त] स
६ रः] बौद्धः ।
९ *] नाम इ
९ रुचौ] चौ
२२ नेन] वाक्येन ।
२२ इत्येके] व्याख्याकाराः ।
२२ त्रा] तन्न; अ
२३ मिति] पदेन ।
२४ पूर्वं] तपूर्वम्
२६ त्य] त

समनन्तरं च । तत्किम् ? इत्याह--**अज्ञेयं** प्रत्यक्षस्याऽपरिच्छेद्यम् अदृश्यं वर्त्तमानं च ज्ञेयम् इत्यर्थः । तथाहि— अहमहमिकया स्वसंवेदने ज्ञानमघटाकारमपि घटग्राहकं प्रतीयते । ततो यदुक्तम्--**न नीलादिमुख्यादिव्यतिरेकेण तद् ग्राहकं प्रतीयते** इति; तत् प्रत्यक्षप्रतीतिबाधितमिति । तत्किं कुर्यात् ? इत्याह--**प्रतिबन्धान्तरं** सामर्थ्यलक्षणं **धियां शंसेत्** अर्थमर्थं प्रति[प्रत्यर्थं तत्र नियतं]**प्रत्यर्थनियतं** । यथैव हि विसदृशादपि गोमयादेरेव सांलूकाद्येव जायमानं तस्यैव आत्मनि सामर्थ्यं सूचयति न सर्वस्य । नहि 632/mkj एवं तत्र वक्तुं शक्यम्— सर्वं विजातीयं तत्कारणमतु न वा किञ्चित् इति, प्रतीतिबाधनात्, तथा विसदृशात् समानकालात् नियतादेव ज्ञानात् नियतो घटादिः प्रतीयमानः तस्यैव आत्मग्रहणे शक्तिं संशति * । यतो यदुक्तम्--**नियतकार्यदर्शनात् योग्यतानुमीयते कारणस्य, न योग्यतायाः तत्कार्यम् अतीन्द्रियत्वात्तस्याः । परस्परतोऽनुमाने अन्योऽन्यसंश्रयः** । इति; तदनेन निरस्तम्; नियतवर्त्तमानार्थग्रहणादेव प्रतिबन्धान्तरानुमानात् । § 3577

एतेन इदमपि चिन्तितम्--**संविन्मात्रस्य सर्वत्राविशेषात् सर्वस्य सर्वदर्शित्वम्** इति; नियतार्थदर्शनप्रतीत्या बाधनात् । ननु अर्थदर्शनं नीलादिवद् /ms र्थधर्मश्चेत्; कथमर्थस्य संभवेत् ? § 3578

एतेन अनुभयधर्मता चिन्तिता इति चेत्; उच्यते--कार्यकरणं नीलादिकार्यधर्मश्चेत्; सर्वोऽपि कस्यचित् कार्यस्य हेतुः । यथैव हि तस्य नीलत्वं नैकं प्रत्येव अपि तु सर्वं प्रति, तथा जन्यत्वमपि येन यन्यते तं प्रत्येव तत्; तदितरत्र समानम् । कारणधर्मश्चेत्; अर्थदर्शनवत् प्रसङ्गः । § 3579

एतेन उभयधर्मता[निर]स्ता; अनुभयधर्मता तन्मत व्याख्यात कारिणी । अथ क्वचिदपि हेतुफलभावो नेष्यते; किमिष्यते ? स्वसंवेदनमात्रमिति चेत्; एतदपि तादृगेव । तथाहि— नीलज्ञानलत्वं यथा सर्वाणि ज्ञानान्युद्दिश्य तवास्य संवेदनमपि इति सपीति सर्वैः तत्संविदितं भवेत्; विशेषकल्पनमर्थेऽपि समानम् । अथ अन्यज्ञानं नेष्यते; किं तर्हि स्यात् ? एकव्यक्तिप्रतिभासाद्वैतम् इति चेत्; अत्राह--मितीव घटादेरपि प्रतिभासे तदयोगात् । घटज्ञानयोः सहप्रतिभासे स्वरूपसंवेदनमात्रनियतता इति चेत्; पररूपसंवेदननियतता कुतो न भवति, कल्पनायाः निरंकुशत्वात् ? यदि च सहप्रतिभासादेकरूपता; तथा प्रतिभासमानयोः निम्बाम्रयोः कटुकता मधुरता

---

१ रं] सर्वं नीलं सममनन्तरं
३ नीलादिमुख्यादि] दिसुखादि
४ इति] यथा च न सुखादिव्यतिरेकेणापरं विज्ञानं तथा नीलादिव्यतिरेकेणापि ।--प्र॰ वार्तिकाल॰ पृ॰ ४०९ ।
७ सां] शा
१० *] शंसति
११ म्] अनुमीयते ।
१९ य] ज
२२ व्याख्यात] व्याघात
२४ त्वं] नत्वं
२५ वा] तथा
२५ इति] सपीति इति व्यर्थमत्र ।
२७ मितीव] मितिः संवेदनम् सा इव संवेदनवत् इत्यर्थः ।

वा स्यात् । अथ न सहप्रतिभासात् समानता किन्तु तथा प्रतिभासात्; न तर्हि घटज्ञानयोः संवेदनैकरूपता, ग्राह्यग्राहकतयावभासनात् इत्यलमतिप्रसङ्गेन । ततः स्थितम्--**प्र[ति]बन्धान्तरं शंसेत् प्रत्यर्थनियतंधियाम्** इति /ms
। § 3580

कारिकां विवृण्वन्नाह--ते **तदुत्पत्ति**त्यादि ।--* **तादात्म्यं च तदुत्पत्तिश्च** ते तादात्म्यतदुत्पत्ती, ते एव **सम्बन्धः** तस्मिन्नङ्गीक्रियमाणेऽपि **समस्य** सदृशस्य **अनन्तरस्य** अव्यवहितस्य **प्रत्ययस्य** कारणस्य **अविषयीकरणाद्** असदृशस्य वर्त्तमानस्य विषयीकरणात् इत्यर्थः । ततः किम् ? इत्याह--**कारण** इत्यादि । तदेव दर्शयन्नाह--**यत्र** इत्यादि । **यत्र** प्रमेये **यदेव** मतिज्ञानम् अवग्रहादिसंवेदनं श्रुतज्ञानं वा । किंभूतं तत् ? इत्याह--**यदर्थ** इत्यादि । **तदेव** ज्ञानं **तमर्थं विषयीकरोति इति युक्तः प्रतिबन्धः** । **स** प्रतिबन्धः **शब्दज्ञानज्ञेययोरपि शब्दस्य** यज्**ज्ञानं** यच्च तस्य[ज्ञेयं] प्रमेयं तयोरपि **पारमार्थिकः** । कुतः ? इत्याह--**प्रतिषेद्धुमशक्यत्वात्** । § 3581

अस्य हेतोरसिद्धतां पादत्रयेण उद्भाव्य चतुर्थपादेन परिहरन्नाह--**अफलत्वात्** इत्यादि । § 3582
633/mkj

...22 अफलत्वादशक्तेश्च न सङ्केत्येरन् स्वलक्षणे ।
वाचोऽसङ्केतितं वाहुरित्यनेकान्तसाधनम् ॥ २२
॥§ 3584

नहि [शब्दाः असङ्केतितं प्रतिपादयन्ति] सङ्केतं च कुर्वन् प्रतिपित्सुर्वा ततः प्रतिपत्तुमिच्छन् अर्थक्रियामेव समुद्दिश्य कर्तुं प्रतिपत्तुं वाऽर्हति । न च स्वलक्षणमेव सङ्केतितम् [व्यवहारकालमन्वेति] पुनः असङ्केतितशब्दार्थप्रतिपत्त्ययोगात् । न चायं स्वलक्षणे शक्यः कर्तुम् अविषयीकृतयोः विषयीकृतयोश्च भिन्नेन्द्रियग्राह्ययोरसंभवात् । मनोविकल्पमन्तरेण अस्येदमिति घटनाऽयोगात् । मनोविकल्पेन च...तन्न...। सामान्येऽपि सुतरां न सङ्केतः तस्य दृष्टावप्रतिभासनात् सतोऽप्यर्थक्रियाऽसामर्थ्यात् । तदपोहविषयः सङ्केतः । तद्विषयं शब्दज्ञानं विभ्रमवशात् दृश्यविकल्प्यावेकीकृत्य पुरुषं व्यवहारे नियुङ्क्ते । अस्यापि सङ्केतितातत्कार्यकारणव्यपो हैकरूपस्य पुरुषार्थक्रियाकारिणः कथमभावैकान्तत्वम् ? खपुष्पादेः...तत्कृतामर्थक्रियामुपजीवति न पुनस्तद्भावतत्त्वमिति तथागतप्रज्ञो देवानां प्रियः । संविदः समानेतरपरिणाममन्तरेण प्रवर्तमानासंभवात् न हेतुफलभावनियमः । तत्संभवे बहिरपि किन्न स्यात् ? § 3585

५ *] ह--तादात्म्य इत्यादि

**वाचः शब्दा न सङ्केत्येरन्** । क्व ? **स्वलक्षणे** । कुतः ? इत्याह--**अफलत्वात्** सङ्केतकरणस्य[फलाभावात्] । तथाहि--सङ्केतविषयस्य प्रत्यक्षविषयत्वात् न तत्र सङ्केतोपयोगः । अन्यत्र तदभावात् । इतश्च न तत्र ते सङ्केत्येरन्; इत्याह--**अशक्तेश्च** इति । **च** शब्दो हेतुसमुच्चये । तद्यथा, नाप्रतिपन्नयोः शब्दार्थस्वलक्षणयोः सङ्केतः; अतिप्रसङ्गात् । नापि प्रतिपन्नयोः इन्द्रियज्ञानेन; तस्य इदमस्य वाच्यमिदं वाचकम् इति परामर्शायोगात् । नापि विकल्पेन अवस्तुविषयेन । तन्न ते तत्र सङ्केत्येरन् । असङ्केतितमर्थं /ms शब्दाः कथयन्ति इति चेत्; अत्राह— **असङ्केतितं वाहुः न,** परोपदेशवैफल्यापत्तेः । § 3586

इदमपरं व्याख्यानम्--चशब्दमन्तरेणापि हेतुसमुच्चयगतेः । **च शब्दो** भिन्नप्रक्रमः **स्वलक्षणे** इत्यस्याऽनन्तरं द्रष्टव्यः उक्तसमुच्चये । ततोऽयमर्थः--न केवलं **स्वलक्षणे** अपि तु सामान्येऽपि **शब्दा न सङ्केत्येरन्** । कुतः ? इत्याह--**अफलत्वात्** तत्र वाचाम् । नहि शब्दप्रतिपादितमपि सामान्यं वाहाद्यर्थक्रियाकारि, विशेषकल्पनावैफल्यापत्तेः । हेत्वन्तरमाह—**अ[श]क्तेरिति** तत्र सङ्केतस्य कर्तुमशक्यत्वात् अप्रमाणविषयत्वात् । अथ शब्दात् सामान्यं ततोऽपि विशेषः प्रतीयते इति मतिः; तत्राह--**असङ्केतितं वाहुः न** । अस्यायमर्थः--न विद्यते सङ्केतितं सामान्यं यस्मिन् स्वलक्षणे **तदसङ्केतितं** न च वाचः कथयन्ते । नहि यद्वारेण विशेषे प्रवृत्तिः तत्र सामान्यमस्ति । तत्र उत्तरमाह--**इत्**येवं परेण उच्यमानम् **अनेकान्तसाधनम्** । § 3587

नहि इत्यादिना कारिकार्थमाह--**[न हि शब्दाः असङ्केतितं प्रतिपादयन्ति]** 634/mkj सङ्केतितं प्रतिपादयन्ति इति चेत्; अत्राह--**सङ्केतं च कुर्वन्** सङ्केतकारी **प्रतिपित्सुर्वा ततः** सङ्केतं प्रतिपत्तुमिच्छन्ताप्रतिपाद्यः **अर्थक्रियामेव समुद्दिश्य कर्तुं प्रतिपत्तुं वा अर्हति,** अन्यथा अप्रेक्षाकारितापत्तेः । द्वयोरपि तथेति चेत्; अत्राह--**स्वलक्षणमेव** इत्यादि । तत्रैव सङ्केत इति चेत्; अत्राह--**न च** इत्यादि । कुतः ? इत्यत्राह--**सङ्केतेति** इत्यादि । व्यवहारकालक्षणस्य [असङ्केतितत्वात् । तस्य] असङ्केतितस्य प्रतिपत्तिरिति चेत्; /ms अत्राह--**पुनरित्यादि** । सङ्केतात् पश्चात् **असङ्केतितशब्दार्थप्रतिपत्त्ययोगात्** अन्यथा गोशब्दाद् अश्वप्रतीतिः स्यात् । अनेन **अफलत्वात्** इति व्याख्यातम् । § 3588

द्वितीयं हेतुं व्याख्यातुमाह--**न चायम्** इत्यादि । कुतः ? इत्यत्राह--**अविषयीकृतयोः** शब्दार्थयोरसंभवात् सङ्केतस्येति । विषयीकृतयोः स्यादिति चेत्; अत्राह--**विषयीकृतयोश्च** विषयीकृतयोरपि **असंभवादिति** । किंभूतयोः

३ अ] प्रत्यक्षाविषये ।
३ त] सङ्केताभावात् ।
६ त] इन्द्रियज्ञानस्य ।
१३ त्र] सामान्ये ।
१६ तिः] मीसांसकस्य ।
१८ न्ते] न्ति
२३ त्ता] न् नाऽ
२३ तिपाद्यः] प्रतिपत्तुमयोग्यः ।
२४ द्व] प्रतिपाद्यप्रतिपादकयोः ।
२६ ङ्केतेति] सङ्केतिते

? इत्याह--**भिन्नेन्द्रियग्राह्ययोः** भिन्नेन्द्रियग्राह्यत्वात् इति । श्रवणेन्द्रियज्ञानस्य शब्दमात्रे चक्षुरादिज्ञानस्य रूपादिमात्रे पर्यवसानात् । नान्योन्यविषयीकरणे च अस्येदम् इति घटनायोगात् सन्तानान्तरवत् । कुतस्तर्हि सङ्केतः ? इत्याह— **मनोविकल्पमन्तरेण घटनायोगात्, अस्येदम् इति** सम्बन्धस्य करणासंभवात्, मनोविकल्पादेव तद्योगात् इत्यर्थः । तत एव भवतु इति चेत्; अत्राह--**मनोविकल्पे च** इत्यादि । **न चायं** सङ्केतः **स्वलक्षणे शक्यः कर्तुमिति** । उपसंहरन्नाह--**तन्न** इत्यादि । § 3589

द्वितीयमर्थं कथयन्नाह--**सामान्येऽपि** न केवलं स्वलक्षणे वस्तुनि **सुतरां न सङ्केतः** । कुतः ? इत्याह--**तस्य** सामान्यस्य **दृष्टौ** इन्द्रियज्ञानेऽ**प्रतिभासनात्** । अनेन अशक्तं **सतोऽपि** विद्यमानस्यापि **तस्य अर्थक्रियाऽसामर्थ्यात् सामान्येऽपि न सङ्केत** इति । यत एवं **तत्तस्मात् अपोहविषयः सङ्केतः** । तत्रापि शब्दात् कथं स्वलक्षणे प्रवृत्तिः इति चेत्; अत्राह--**तद्विषयम्** इत्यादि । **सो**ऽपोहः **विषयो** यस्य शब्दज्ञानस्य तत्तथोक्तम् । तत्पक्षी *करोति ? इत्याह--**पुरुषं व्यवहारेषु नियुङ्क्ते** इति । किं कृत्वा ? इत्याह--**दृश्य** /ms
इत्यादि । **दृश्यं** स्वलक्षणं **विकल्पः**शब्दज्ञानाकारः तौ **एकीकृत्य** । कुतः ? इत्याह--**विभ्रमवशात्** इति । अस्योत्तरमाह--**अस्य** इत्यादि । **अस्यापि** व्यपोहस्यापि **कथम् अभावैकान्तत्वम्** नीरूपतैकान्तत्वम् । किंभूतस्य ? **पुरुषार्थकारिणः** । पुनरपि किंभूतस्य ? इत्याह--**सङ्केतिते**त्यादि । **न तत्** विवक्षितं **कार्यकारणं** येषां विजातीयाभिमतानां ते **अतत्कार्यकारणाः** तेभ्यः तेषां चा **व्यपोहः, सङ्केतितानाम् अतत्कार्यकारणव्यपोहः** खण्डादीनां स **एकं रूपं** यस्य तस्य इति । तथापि अभावैकान्तत्वे दूषणमाह--**खपुष्पादेः** इत्यादि । § 3590

सौगतमुपहसन्नाह--**तत्कृताम्** इत्यादि । **तत्कृतां** व्यपोहकृताम् **अर्थक्रियामुपजीवति न पुनः तद्भावतत्त्वं** तस्य व्यपोह[स्य]भावरूपमुपजीवति । कोऽसौ ? इत्याह--**तथागतप्रज्ञः** तथागते सुगते प्रज्ञा यस्य स तथोक्तः **देवानांप्रियः** । यदि वा, **तथा** तेन प्रकारेण **गता** ध्वस्ता **प्रज्ञा** यस्य 635/mkj
इति ग्राह्यम्, अत एव **देवानां प्रियः** । भावास्तर्हि कुतोऽस्य भावतत्त्वमुपजीवति इति चेत् ? अत्राह--**संविद** इत्यादि । **संविदो** ज्ञानस्य नीलतया अर्थेन सह यः न **समानो** यश्च जडेतररूपतया **इतरः** असमानः **परिणामः** त**मन्तरेण तथा** प्रत्यक्षादिप्रकारेण दृश्यप्राप्ययोरेकत्वाध्यवसायप्रकारेण वा **प्रवर्तमानासंभवात्** व्यवहारिणः इत्यध्याहारः । **प्रवर्तमान** संसार, पूर्व-

---

३ णे] अन्योन्याविषयीकरणे इत्यर्थः ।
५ त] मनोविज्ञानादेव ।
६ ल्पे] ल्पेन
१० क्तं] **अशक्तेरि**ति व्याख्यातम्
१२ त] अपोहविषयत्वेऽपि ।
१३ *] तत् क्व किं
१५ ल्पः] प्यः
२० चा] वा
२७ भावा] भवाँ
२९ न] नइति निरर्थकम् ।
२९ ज] ज्ञानं न जडम्, अर्थस्तु जड इति ।
३१ मान] नः
३१ संसार] रः

/ms पावकादिवासनात उत्तरोत्तरपावकादिप्र[ति]भासप्रवृत्तिः तस्याऽ**संभवात्** । किमन्तरेण ? इत्याह--**समान** इत्यादि । तथाहि--पूर्वोत्तरपावकज्ञानयोः उपादानोपादेयभूतयोः भासुरतया **समान** उपादानोपादेययोग्यतया **इतरः परिणामः** तयापि समानपरणामो विज्ञानवादेऽपि न हेतुफलभावनियमः । निरस्तमद्वैतम् । संविदो भवत्तत्परिणामो नार्थस्य इति चेत्; अत्राह--**तत्संभवे** समानपरिणामसंभवे **संविदः** इत्यनुवर्त्तते **बहिरपि किन्न स्यात्** तत्परिणामः ? § 3591

यदुक्तं परेण--**न चायं सङ्केतः स्वलक्षणे शक्यः कर्तुम्** इति; तत्र दूषणं दर्शयन्नाह--**अशक्यसमयमित्याह** । § 3592

...23 अशक्यसमयं रूपं यथार्थानामनन्यभाक् ।
अशक्यदर्शनं रूपं तथार्थानामनन्यभाक् ॥ २३
॥§ 3594

यथा अर्थरूपं तथैव द्रष्टुमशक्यं कारणस्यापि दृष्टेरविषयत्वात् कालभेदात् तत्समानाकारदर्शनात् । तद्विषयीकरणव्यवस्थायां साकल्येन तत्सामान्यं विषयः स्यात् । न चेयं दृष्टिः स्वकारणस्यैव रूपमनुकरोति, क्वचित् स्वयमुपादानरूपमनुकरोत्यपि, स्वकारणोपादानस्य च । कथञ्चित् सादृश्यस्य अन्यत्राप्यनिवारणात्, सर्वथानुकरणासंभवात् । साक्षात्तदुत्पत्तेरभावादतत्प्रतिभासित्वमयुक्तम्; स्वप्नादावभ्रान्तत्वापत्तेः । § 3595

**अशक्यः समयः** सङ्केतो यस्मिन् तत्तथोक्तम् । किम् ? **रूपं** स्वभावः । केषाम् ? इत्याह--**अर्थानाम् यथा** येन अनन्तरोक्तप्रकारेण । किंभूतम् ? **अनन्यभाग्** असाधारणम् **अशक्यदर्शनं रूपं** क्षणिकपरमाणुलक्षणम् **तथा अर्थानाम[न]न्यभाक्** इति विचारितमेवत् । § 3596

का[रि]कां विवृण्वन्नाह--**यथार्थरूपम्** इत्यादि । **तथैव द्रष्टुमशक्यमिति** । कुतः ? इत्याह--**दृ[ष्टे]रित्यादि** । कारणेस्य विषयता स्यादिति चेत्; अत्राह--**कारणस्यापि दृष्टेरविषयत्वात्** । कुतः ? इत्याह--**कालभेदात्** दृष्टिकालपरिहारेण अर्थकालो व्यवस्थितः । एवमन्यत्रापि योज्यम् । न च परस्य कालभेदे ग्राह्यग्राहकभावः । तदाकारानुकरणात् तत्तस्यग्राहकमिति चेत्; अत्राह--**सत्समान** इत्यादि । **तेनार्थेन समानो य आकारः** ज्ञानस्य तस्य
636/mkj **दर्शनात् तद्विषयीकरणव्यवस्थायाम्,** तदित्यर्थः परामृश्यते । **साकल्येन**

५ त्त] तु त
८ इति] शब्दाः सङ्केतितं प्राहुर्व्यवहाराय स स्मृतः । तदा स्वलक्षणे नास्ति सङ्केतस्तेन तत्र न ॥--प्र° वा° ३ । ९१ ।
९ त्याह] त्यादि
२१ मेव] त
२३ णे] ण
२६ त] ज्ञानम् ।
२६ स्य] अर्थस्य ।
२७ स] त
२८ त] तदिति शब्देन ।

बहिरन्तश्च **तत्सामान्यं** सदृशपरिणामसामान्य **विषयः स्यात्** दृष्टिः इति सम्बन्धः । ज्ञानज्ञेयवदन्यत्रापि तत्सामान्यस्य निषेद्धुमशक्यत्वादिति भावः । अनेन कारिकायाः पाश्चात्यो भागो विवृतो न पूर्वः सुगमत्वात् । § 3597 /ms

यच्चान्यदुक्तम्--**मनोविकल्पमन्तरेण योजनासंभवात् मज्ञोविकले च वस्तुप्रतिभासप्रत्यस्तमयात्** इति; तत्राह--**न चायम्** इत्यादि । **च** शब्दः अपिशब्दार्थः भिन्नप्रक्रमः **दृष्टिः** इत्यस्यानन्तरं द्रष्टव्यः । तयोऽयमर्थः--**दृष्टिरपि न** केवलं मनोविकल्पः **इयं** परेण अभ्युपगम्यमाना अविक[ल्पिका] न **स्वकारणस्यैव** कारणशब्दात् सामान्यवाचिनोऽपि प्रक्रमाद् आलम्बनकारणस्य परिग्रहः । स्वशब्दाद् अव्यवहितकारणस्व **रूपं** स्वभाव**मनुकरोति** । कुतः ? इत्यत्राह--**क्वचिद्** इत्यादि । **क्वचित्** सितादिशङ्खादौ **स्वयम्** आत्मना न पारम्पर्येण **उपादानस्य** समनन्तरकारणस्य **रूपमनुकरोति अपि** न केवलं नानुकरोति, तत्र हि उत्तरोत्तरं पीतज्ञानं पूर्वपूर्वपीतज्ञानस्य आकारमनुकरोति नार्थस्य तदा[का]राभावात् । अयमभिप्रायः--मनोविकल्पस्य[क्व]चिदर्थाभावेऽपि प्रवृत्तिदर्शनात् तत्र सर्वत्र यदि वस्तुप्रतिभासप्रत्यस्तमयः, दृष्टिरिपि कस्याश्चित् अर्थाकारानुकरणाभावात् सर्ववस्तुप्रतिभासप्रत्यस्तमय इति तथा **स्वकारणोपादानस्य च रूपमनुकरोति** अपि । /ms अत्रापि **क्वचित्** इत्यनुवर्त्तते । **क्वचिद्** शीघ्रभ्रमदलाभादौ दृष्टेः **स्वकारणम्** अनन्तरक्षणम्* अनन्तरे क्षणः, तस्य च यत् साक्षात् पारम्पर्येण **उपादानं** तयोः द्वन्द्वैकवद्भावः, तस्य **च रूपमनुकरोत्यपि** । स्वकारणस्यैव रूपानुकृतौ एकचक्रा[का]रा प्रतीतिर्न स्यात् सर्वदा प्रसङ्गात् । कथं भिन्नकालरूपानुकृतिरिति चेत् ? कथं भिन्नदेशरूपानुकृतिः ? यतो दूरविरलकेशेषु घनैकप्रतीतिः स्यात् । अथ यावतोऽलातक्षणाः तावत्य एव क्रमभाविन्यो दृष्टयः कल्प्यन्ते; सन्तानान्तरवत् चक्रबुद्धिर्न स्यात् । मानसी सा इति चेत्; न; स्पष्टत्वात् द्विचन्द्रदर्शनवत् । ततः **स्वकारणोपादानस्य च रूपमनुकरोत्यपि** । § 3598

स्यान्मतम्--भासुरतामात्रानुकृतिरेव तत्र, नाशेषरूपानुकृतिः, न चैक त्राह--**कथञ्चित्** इत्यादि । **कथञ्चित्** भास्वरतामात्रेण न इतराकारेण **यत्सादृश्यं** सारूप्यं तस्य **अन्यत्रापि** प्रत्यक्षाभिमतेऽपि ज्ञाने **अनिवारणात्** इति । निरूपितमेतत् । कुत एतत् ? इत्यत्राह--**सर्वथा** इत्यादि

---

१ सामान्य] न्यं
१ दृष्टिः] दृष्टेः
२ त] सदृशपरिणामसामान्यस्य ।
४ ज्ञो] मनो
५ म्] चेयम्
८ माद्] प्रकरणात् ।
९ स्व] स्य[[परिग्रहः इति सम्बन्धः तस्य ।]]
१४ त] मनोज्ञाने ।
१५ दृष्टिरि] दृष्टेर
१७ लाभा] दलाता
१८ *] अनन्तरक्षणम् इति व्यर्थमत्र ।
१८ रे] रः
२२ तो] न्तो
२३ न्ते] तदा ।
२७ चैक] न वा एकत्वाद्याकारानुकृतिरिति चेत्; अ

। नीलाकारेणैव कारेणैकत्वाद्याकारेऽप्यनुकरणम् **सर्वथानुकरणम्** तस्य स्वकारणं प्रत्य**संभवात्** । कार्यकारणयोरविशेषाप्रसङ्गादिति । § 3599

ननु यत एव साक्षद्यतेज्ञानं तस्यैव रूपमनुकरोति नापरस्य इति 637/mkj, /ms कदाचित् निराकृतोऽपि परो ब्रूयात्; तत्राह--**साक्षात्** इत्यादि । अव्यवधानेन **तस्मात्** स्वकारणोपादा नात् **उत्पत्तेरभावात्** **अतत्प्रतिभासित्वं** तदुपादानाप्रतिभासित्व**मयुक्तम्** । कुतः ? इत्याह--**स्व आद**वित्यादि । अत्र **आदि**शब्देन कामशोकाद्युपप्लवपरिग्रहः । नहि तत्र साक्षादर्थो ज्ञानकारणम्, **अभ्रान्तत्वापत्तेः** । नापि तदाकारं ज्ञानम्; चिरकालव्यवहितादपि तदाकारा[ज्]ज्ञानात् तत्रार्थप्रतिभासप्रतीतेः । तदे[व] तदुपादानमिति चेत्; एवं कालव्यवहितोऽर्थोपि तज्ज्ञानकारणम् इति न स्वप्नादिज्ञानस्य वासनामात्रभावित्वम् । तिमिरादिज्ञानं च कथमेवंवादिनो निर्विषयता; तत्रापि व्यवहितस्यार्थस्य कारणत्वोपपत्तेः । अव्यवहितार्थाभावात् निर्विषयत्वे; अनन्तरोपादानाभावाद् अनुपादानं किन्न स्यात् ? § 3600

स्यादेतत्--लाक्षारसावसेकोपकृतकुसुमाहितशक्तिकात् कार्पाससन्तानाद् अन्तरालविजातीयनीलपत्रादिसंभवेऽपि यथा फले रक्तता, तथा नीलादिज्ञानाहितशक्तिकात् चित्तसन्तानत् विजातीयाऽन्तरालविज्ञानभावेऽपि स्वप्ने नीलादिज्ञानमिति; तत्रापि यदि सजातीयाज्ञानाहितवासनं भिन्नजातीयम् उपादानकारणम्; न तर्हि साक्षात्कारणस्यैव आकारमनुकरोति व्यवहितस्याप्यनुकरणात् । § 3601

परमतमाशङ्कते **भ्रान्तेः** इत्यादि । § 3602

...24 भ्रान्तेरदोषः स्वप्नादौ अन्यत्राप्यात्मनः कथम् ।
संवित्तेश्चेदभ्रान्तिः अविशेषात्सतोऽसतः ॥ २४
॥§ 3604

तदतद्ग्रहणलक्षणत्वात् कथं च न दोष एव तल्लक्षणव्यभिचारेऽपि इति चित्रमेतत् । § 3605

स्वप्नादौ **भ्रान्तेः** कारणाद**दोषः** अर्थप्रतिभासाभावप्रसङ्गः इति यो दोषः तस्याभावः; साक्षादकारणस्यापि आकारानुकरणादिति चेत्; अत्रोत्तरमाह--**कथम्** इत्यादि । /ms **अन्यत्रापि** जाग्रज्ज्ञानेऽपि सौगतस्य **अभ्रान्तिः** कथम् ? कुतः ? इत्याह--**आत्मान** इत्यादि । **आत्मनः** स्वरूपस्य । किंभूतस्य ? **सतः**

---

१ कारेणैक] नीलाकारेणैव एक
२ विशेषा] ष
३ ते] साक्षादुत्पद्यते
४ प] बौद्धः ।
६ आद] स्वप्नादा
७ त्र] स्वप्नादौ ।
८ म्] तत्र कारणम् ।
१० त] स्वप्नादिज्ञान ।
११ तिमिरादिज्ञानं] नस्य
१७ जातीया] य
२८ आत्मान] त्मन

विद्यमानस्य । कस्य ? **संवित्तेः** अर्थस्य घटादेः **असतः** प्रतिपत्तेर**विशेषात्** । उभयत्रापि प्रतिभासाभेदात् कथमन्यत्र भ्रान्तिरिति ? § 3606

उपसंहारमाह--**तद** इत्यादि । यस्मादेवं **तत्** तस्मात् **अतद्ग्रहणलक्षणत्वात्** न तद्त *स्य **ग्रहणं** तदेव **लक्षणं** यस्य तस्य भावात् तत्वात्, अन्यस्य **कथंचन दोष एव** । कस्मिन् सति ? आह--**लक्षणाव्यभिचारेऽपि** तदुत्पत्तिसारूप्ये बहिरर्थदर्शनलक्षणं तद्यभिचारेऽपि **इति चित्रमेतत्** । अनेन सौत्रान्तिकस्य सर्वत्र विभ्रमेतररूपतां दर्शने दर्शयति । § 3607

यस्मात् यत् साक्षादुपाक्षाय ते तस्येव द्रूयमनुकरोति इत्यत्र पुनरपि दूषणमाह--**तद्रूपानुकृतौ** इत्यादि । § 3608

...25 तद्रूपानुकृतौ हेतुः तत्साक्षाज्जन्मतैव न ।
परिणामाविनाभावात् गर्भपित्रादिरूपवत् ॥ २५
॥§ 3610

न वै गर्भः साक्षात्तदुत्पत्तिरपि पितृरूपमनुकरोति । साक्षादनुत्पत्तेः, तथापरिणाम एव तदाकारानुकारित्वलक्षणं पितामहाद्याकारानुकारित्वोपप- 638/mkj
त्तेः । तथा च प्रत्यक्षवत् स्मृतिप्रत्यभिज्ञानतर्कादेरतीतार्थानुकरणात् वस्तुनि सङ्केतो न पुनर्व्यावृत्तौ नीरूपत्वात् खपुष्पवत् । वस्तुतत्परिणामस्यैव वस्तुनि भावात्, अविरोधात् । अर्थक्रिया[करणाच्च] तत्रैव सङ्केतः फलवान् व्यवहारकालेऽपि तद्भावान्नान्यत्र । अन्यथा प्रत्यक्षानुमानयोरपि निरर्थकत्वम् । नहि तयोरकारणं विषयः, कारणं व्यवहारकाले न संभवत्येव अक्षणिकतापत्तेः । विकल्पकल्पितात् दृश्यप्राप्यैकत्वादवस्तुनः अर्थक्रियासिद्धौ स्वलक्षणदर्शनं क्वोपयुज्येत ? तत्कारणत्वेऽपि... § 3611

**तस्य** विवक्षितस्य **रूपं** तस्या**नुकृतौ** क्रियमाणायां **हेतुः** कारणम् **तस्माद्** विवक्षितात् **साक्षाद्** ध्यनेन **जन्म** यस्य तस्य भावः **तत्ता सैव न** । कुतः ? इत्याह— **परिणामाविनाभावा[त्]** तद्रूपानुकृतौ इति । निदर्शनमाह--**गर्भ** इत्यादि । § 3612

कारिकार्थमाह--**पितृरूपम्** इत्यादिना । अनेन व्यवहितकारणरूपानुकरणं कार्यस्य दर्शयति । नहि पितुः साक्षादपत्यं भवति शुक्रादेस्तथा ततो भावात् । तस्यापि तद्रूपानुकृतिरिति चेत्; अत्राह--**साक्षात्** इत्यादि । **नवै गर्भः** शुक्रश्रोणितसंपातः **पितृरूपमनुकरोति** । किंभूतः ? इत्याह-- **साक्षात्तदुत्पत्तिरपि** साक्षात् तस्मादप्युत्पत्तिर्यस्य इति । § 3613 /ms

---

१ स्य] स्याः
२ त्र] स्वप्नादौ ।
४ *] तद् अतत् त
५ णा] ण
८ ते] दुत्पद्यते
८ द्रूय] तस्यैव तद्रूप
२२ नेन] अव्यवधानेन

द्वितीयं निदर्शनं व्याख्यातुमाह--**साक्षादनुत्पत्तेः** इत्यादि । विवृत-मेत्तमेतत् । * । यदि साक्षात् तज्जन्म नाकाराधानकारणं किं त-र्हि स्यात् ? इत्यत्राह--**तथा** तेन व्यवहितेऽपि कार्ये तदाकारसमर्पणप्र-कारेण **परिणाम एव तदाकारानुकारित्वलक्षणं** विवक्षितवस्त्वाकारित्वज्ञापकम् । **पितामहाद्याकारानुकारित्वस्य उपपत्तेर्दर्शना[त्]** । भवत्वेवं तथापि प्रकृतं किं सिद्धम् ? इत्याह--**तथा च** इत्यादि । तेन हि तकारणाकारानुकरण-प्रकारेण च **प्रत्यक्षस्य** च तद्वत् **स्मृतिप्रत्यभिज्ञानतर्कादिरतीतार्थानुकरणात्** कारणाद् **वस्तुनिसङ्केतो न पुनर्व्यावृत्तौ** । कुतः ? इत्याह--***नीरूपत्वात्** व्यावृत्तेरिति **खपुष्पवत्** इति सूक्तम्--**तस्य यपोहवस्तुषु भावात्*** तत्कथं नीरूपत्वमिति चेत् ? अत्राह— **वस्तु** इत्यादि । **वस्तु च तत्परिणाम-श्च** सः सादृश्यरूपः **तस्यैव वस्तुनि** खण्डादौ **भावात्** न एकान्तवादिक-ल्पितस्यापोहादेः इत्येवकारार्थः । एतदपि कुतः ? इत्याह--**अविरोधात्** प्रमाणबाधाभावात् । साधनान्तरमाह--**अर्थक्रिया** इत्यादि । **तत्रैव** सदृशप-रिणाम एव **सङ्केतः फलवान् व्यहारकालेऽपि** तस्य **भावात् नान्यत्र** फलवान् विपर्ययादिति भावः । यच्चान्यदुक्तम्—

> *शब्दाः सङ्केतितं प्राहुः व्यवहाराय स स्मृतः ।
> तदा स्वलक्षणं नास्ति सङ्केतस्तत्र तेन [न] ॥ प्र० वा० ३ ।
> ९१ [इ]ति ।§ 3616

तत्राह--**अन्यथा** इत्यादि । अन्येन वस्तुनि सङ्केताभावप्रकारेण **अन्य-**
/ms **था प्रत्यक्षानुमानयोरपि** न केवलं शब्दस्यैव **निरर्थकत्वं** निष्फलत्वम् ।
639/mkj एतदेवाह--**न हिर्यस्मात् तयोः** प्रत्यक्षा नुमानयोः **अकारणं विषयः** किन्तु कारणमेव, परापेक्षया इदमुक्तम् । भवत्वेवमिति चेत्; अत्राह--**कारणं व्यव-हारकाले न संभवत्येव अक्षणिकतापत्तेः** । तथाहि--पूर्वकालभावि कारणम् पूर्व सौगतानाम् । न च तत्र योगिनापि प्रवर्तितुं शक्यम् । नापि वर्त्तमाने; तस्य अकारणत्वेन तदविषयत्वात् । तथापि प्रवृत्तौ न प्रमाणात् प्रवृत्तः स्यात् । न च तस्य देशभिन्नस्य तदेवप्राप्तिः । नहि यदेव धूमादग्निः अनुमीयते, तदैव प्राप्यते । अप्रवृत्तिः इति चेत्; तदकारणं नास्ति सङ्केतितवत् । त-त्सदृशे भाविनि प्रवृत्तौ तत्रापि प्रवृत्तिर्यथा देवदत्तसदृशे यज्ञदत्ते इति; तर्हि

२ *] तमेतत्
६ का] तत्का
७ च] स्यैव
८ *] निःस्वभावत्वात् ।
९ य] व्य
९ पोह] ह्य
९ *] तुलना--तस्य वस्तुषु भावादि साकारस्यैव साधनम्--न्यायवि० १ । १४८ ।
१७ णं] णे
२१ प] बौद्धापेक्षया । नाऽहेतुर्विषयः--प्र० वार्तिकाल० ३ । ४०६ । अहेतुश्च विषयः कथम्--प्र० वा० । नाकारणं विषयः--प्र० वा० मनोरथ० २ । २५७ ।
२३ पूर्व] पूर्व इति निरर्थकम् ।
२३ त] पूर्वकालभाविनि ।
२४ त] ज्ञानाविषयत्वात् ।
२५ देव] तदैव

सङ्केतितसदृशे प्र[वृ]त्तिरस्तु । भ्रान्तिरुपचारो वा स्यादिति चेत्; प्रत्यक्षादौ तथैव भाविनि । भ्रान्त्यैव तत्प्रमाणमिति चेत्; शब्दोऽप्यस्तु, तथा च कुतः प्रमाणद्वयम् ? अथ सङ्केतव्यवहारकालार्थयोः भिन्नसन्तानत्वात् न; एकान्तेन सन्तानभेदाभावात्; एकस्मिन्नपि देवदत्तसन्ताने सङ्केतव्यवहारयोर्दर्शनात् । § 3617

किंच, प्राप्य-प्रत्यक्षादिकारणयोः एकसन्तानतानिश्चयः कुतः ? सादृश्यादिति चेत्; न; व्यभिचारात् यमलकेन । हेतुफलभावाधिकात् इति चेत्; न; सुगतेतरज्ञानेन[व्यभिचारात्] । *पूर्वस्य च रसत्वे चान्यस्य तत्सदृशस्य कुतश्चित् सन्निधानाशङ्कायां दुरवबोधमेतत् । नहि कार्यमेव अनन्तरं सदृशं वा; सर्वस्यापि तथाविधस्य कार्यत्वप्रसङ्गात् । ततः सूक्तम्— **कारणं व्यवहारकाले न संभवत्येव** इति । § 3618 /ms

भावि तयोः कारणम् तन्वकाल एव संभवाप्य परः परः; शब्दस्यापि यदि व्यवहारकालोऽर्थः कारणं को दोषः ? चिरभावी कथं कारणमिति चेत्; कथं मरणादिः तथाविधः अरिष्टादेः येन अतः तदनुमानं कार्यलिङ्गज ? नरकादिदेशव्यवहितं कथं देशान्तरे शब्दकारणमिति चेत्; उक्तमत्र कथं भवतोऽपि स्वप्नान्तिकशरीरं देशान्तरे सुप्तशरीरात् ? सुप्तादेर्वा देशान्तरनीतस्य पूर्वचित्तात् प्रबोध इति । § 3619

ननु यद्यर्थात् कुतश्चित् शब्दस्य जन्म; तदाभावे स न भवेत्, भवति च अन्यथापीति चेत्; उच्यते--यदि प्राप्या[त्]दृश्यस्य जलाभासस्य जन्म, कथं मरीचिकाचक्रे ? नहि तत्र स्नानादिकं प्राप्यमस्ति । भ्रान्तः स इति चेत्; अन्यत्र समानम् । अर्थभावाभावयोः एकः शब्दः; कुत एतत् ? 640/mkj
प्रतिज्ञानात्; अत एव प्राप्यार्थक्रियाभावाभावयोः जलप्रतिभास एकः स्यात् । व्यवहारी तथा न मन्यते इत्युभयत्र समानम् । तन्न किंचिदेतस्य । § 3620

---

१ भ्रा] सदृशे प्रवृत्तौ ।
२ भाविनि] प्रवृत्तौ भ्रान्तता स्यात् ।
२ त] प्रत्यक्षम् ।
३ न] शब्दः प्रमाणम् ।
६ प्रा] प्रत्यक्षादिना यदेव दृष्टं स्वकारणभूतं वस्तु यच्च तेन प्राप्यम् प्रवृत्तौ सत्याम्, तयोरेकसन्तानतानिश्चयः वृत्तः इत्यभिप्रायः ।
७ भावाधिकात्] कार्यकारणभावे सति सादृश्यात् इत्यर्थः । हेतुफलभावः इत्यधिकं विशेषणं सादृश्यात् इति हेतौ देयमिति भावः ।
८ ज्ञानेन] यदा सुगतः इतरजनज्ञानं जानाति तदा सुगतज्ञानेन इतरजनज्ञानस्य विषयतया कार्यकारणभावोऽस्ति, सादृश्यमपि ज्ञानरूपतया विद्यते एव, अतः तयोरेकसन्तानत्वं स्यादिति भावः ।
८ *] पूर्वं रसोऽपि सन् तस्माज्जायमानः कदाचित् अन्यः स्यात् अथवा सन्तानान्तरवर्ती सदृशो रसः स्यादिति शङ्का न निवर्तते ।
१२ न्व] तद् भावि
१२ रः] वतीत्य
१२ रः] भाविकारणवादी प्रज्ञाकरः ।
१४ थाविधः] चिरभावी ।
१४ येन] अरिष्टादेः ।
१४ ज] ङ्गजं स्यात्
१७ स्य] पुरुषस्य ।
१७ चित्तात्] जाग्रचित्तात् ।
१८ दा] तद
१८ भावे] अर्थाभावे ।
१९ च] अर्थाभावेऽपि ।
१९ दि] भाविनः ।
१९ स्य] विपरीतज्ञानस्य ।
२० क्रे] जलज्ञानं स्यात् ।
२१ ब्दः] एक एव शब्दः कथं प्रयुज्यते ?
२३ स्य] तत्

ननु दृश्यप्राप्ययोरेक व्यवसायत्दृश्य व्यवहारकालेऽप्यस्ति इति चेत्; अत्राह--**विकल्प** इत्यादि । **विकल्पेन कल्पितं दृश्यप्राप्ययोरेकत्वं** तस्मात् **विकल्पकल्पिता[त्]** । किंभूतात् ? **अवस्तुनः अर्थक्रियासिद्धौ** अङ्गीक्रियमाणायां **स्वलक्षणदर्शनं क्व उपयुज्येत** ? न क्वचित्, विकल्पादेव सर्वदा /ms प्रवृत्तिसद्भावात् सोऽयं दृश्यप्राप्ययोरेकत्वाव्यवसायेन प्रत्यक्षभाविनि प्रमाणमिच्छन् अभ्यासेऽविकल्पकमेव इच्छतीति कथं स्वस्थः ? § 3621

किंच, दृश्ये प्राप्यस्य कुतश्चित् सर्वथा आरोपे, तावन्मात्रमेव इति कथं तथापि प्रवृत्तिर्यतोऽस्य व्यवहारः सुघटः स्यात् ? प्राप्ये दृश्यस्य प्राप्यवदस्यापि परोक्षता इति स एव प्रवृत्त्यभावः । नहि परोक्षे समारोपितमन्यथा भवति । कथञ्चिद्वादोऽनिष्टः परस्य । अथ विकल्पकारणत्वाद[वि]कल्पः प्रमाणम्; तत्राह--**तत्कारणत्वेऽपि** इत्यादि । **न चेयं दृष्टिः स्वकारणस्यैव रूपमनुकरोति** इत्यनुत्र । § 3622

पुनरपि युक्त्यन्तरमाह--**ज्ञानं नीलेन** इत्यादि । § 3623

...26 ज्ञानं नीलेन सारूप्यं स्वस्य रूपस्य दर्शयेत् ।
नो चेन्नीलान्तराणां वा सर्वथाऽयमसद्ग्रहः ॥ २६
॥§ 3625

वर्णाद्यात्मकोऽवबोधोऽयं स्वार्थेन स्वस्य अत्यन्तसारूप्यं स्वीकरोति न तत्कारणादीनामपि नीलान्तराणामिति कथं सम्भाव्यम् ? यतः अनन्यभागसाधारणोऽर्थात्मा प्रत्यक्षविषयः स्यात् । संविदां तदाकारानुकारित्वात् । § 3626

**वा** इत्यवधारणे **नीले(?न)** इत्यस्यानन्तरं द्रष्टव्यः । **नीलेनैव** साक्षात् कारणेनैव **ज्ञानं सारूप्यं स्वस्य रूपस्य** स्वभावस्य **दर्शयेत् सर्वथा** नीलत्वमात्रेणेव क्षणक्षयादिनापि **नो** न **चेत्** यदि **नीलान्तराणं**रूपस्य नीलेन सारूप्यं स्वस्य वा दर्शयेत् **अयं परस्यासंग्रहः**विरूपाभिनिवेशः । § 3627

कारिकार्थमाह--**अयं** स्वसंवेदनविषयो वाऽ**वबोधो** बाह्य घटादिज्ञानं सौत्रान्तिकस्य, **वर्णाद्यात्मिकः** बाह्यरूपादिप्रतिबिम्बः **स्वार्थेन स्वस्य** साक्षात्

१५ ] Correction : ; ] (sic !)

१ व्य ] कत्वाध्य
१ त् ] यात्
१ दृश्य ] श्यः
५ क्ष ] क्षं
७ ता ] दृश्यमात्रमेव ।
८ त ] प्राप्तुं योग्यस्याभावात् ।
८ स्य ] सर्वथा आरोपे सति ।
९ स्यापि ] दृश्यस्यापि ।
९ था ] प्रत्यक्षम् ।
११ म् ] इति चेत्; ।
१२ नुत्र ] नुवर्तते
२२ राणं ] णां
२३ हः ] सद्ग्रहः
२५ द्यात्मि ] द्यात्म
२५ तिबिम्बः ] योगाचारस्य ।

कारणेन **अर्थेन** नीलादिविशेषेण **स्वस्य आत्मनः अत्यन्त[सा]रूप्यं** सर्वाकारसादृश्यं **स्वीकरोति न नीलान्तराणां स्वस्य सारूप्यं स्वीकरोति ।** किंभूतानाम् ? **तत्कारणादीनामपि** इति । तच्छब्देन ज्ञानस्य स्वार्थो नीलादिविशेषः परामृश्यते । **तस्य कारणमादिर्येषां** तत्सन्तानपातिनां सर्वेषामन्येषां /ms वा तानि **तेषामपि इति कथं संभाव्यम् ?** न कथंचित् । **यतः** संभावनात् **अनन्यभाग् असाधारणोऽर्थात्मा प्रत्यक्षविषयः** स्यात् इत्यध्याहारः । एवं मन्यते--नहि ज्ञानं स्वार्थस्यापि दायाद् इव धनम् आकारं गृह्णाति 641/mkj इत्युच्यते । सदृशं च तत् सर्वनीलार्थैः इति । यदि स्वार्थेनैव सारूप्यम्; तर्हि चित्रो मित्रानुकारीति लोके व्यपदेशो न स्यादिति । § 3628

ननु स्वार्थस्यैव रूपं स्वीकुर्वदुपलभ्यते ज्ञानम् [न] नीलान्तराणाम् तेन एवमुच्यते इति चेत्; अत्राह--**तदाकार** इत्यादि । **तेषां** नीलान्तराणाम् **आकारानुकारित्वात् संविदाम् ।** § 3629

भवत्वेवम्, ततः किम् ? इत्याह--**प्रत्यक्षम्** इत्यादि । § 3630

...27 प्रत्यक्षं सदसद्रूपसामान्यार्थं तथा स्मृतिः ।
प्रत्यभिज्ञा वितर्कश्च सङ्केतस्तत्र नासति ॥ २७ ॥§ 3632

सदसदात्मनि प्रत्यक्षमन्यत्र स्मरणादिकं प्रमाणं तद्व्यवहारान्यथानुपपत्तेः । शब्दार्थविकल्पयोः तद्विषयत्वात् । तत्र समयः कर्तुं शक्यः फलवानपि तादृशस्त्रिकालविषयत्वात् । अन्यथा अर्थक्रियानुपपत्तेः कथं कुतश्चित् व्यवहारप्रवर्तनं यतः तत्प्रामाण्यम्, अर्थक्रिया[ऽभावे तदभावात्] । § 3633

**प्रत्यक्षं** चक्षुरादिज्ञानम् । तत् किंभूतम् ? इत्याह--**सद्** इत्यादि । **सच्च** विज्ञानं तस्य स्वयमुपलभ्यमानत्वात्--**उपलम्भः सत्ता** प्र° वार्तिकाल° ३ । ५४ इति, **असच्च** तत् स्वकारणकारणादिकम्, अस्य साक्षादप्रतीतेः **सदसती** तयो **रूपं** स्वभावो न व्यावृत्तिमात्रं ततो भिन्नं वा, तत्स्वामान्यं च सदृशपरिणामलक्षण**मर्थो** यस्य तत्तथोक्तम् । यथा अर्थेऽदृष्टेऽपि तत्सदृशज्ञानदर्शनदर्शनात् न नीलादिता दृष्टा इत्युच्यते, तथा शावलेयादावदृष्टेऽपि तत्सदृशखण्डदर्शनात् तत्सदृशपरिणामसामान्यं दृष्टमुच्यतामिति भावः । तवा च यदुक्तम् अ र्च टा दि ना-- **एकव्यक्तिदर्शनकाले अन्यासामदर्शनात्कथं** /ms **तदाधारं सामान्यं प्रत्यक्षतः प्रतीयते ?** इति; तदनेन निरस्तम् । भवतु प्रत्यक्षं तदर्थम्, ततः किम् ? इत्याह--**तथा** तेन प्रकारेण **स्मृतिः** सदसद्रूपसामान्यार्थेति, तथा **प्रत्यभिज्ञा** तदर्था, **वितर्कश्च** तदर्थः **सङ्केतः तत्र** तस्मिन् याये सति **नासति** अपोहे अपि तु वस्तुनि । § 3634

---

७ दा] उत्तराधिकारी ।
२३ त्स्वामान्यं] तत्सामान्यं
२५ न] न इति निरर्थकमत्र ।
२७ च] तथा च
३१ याये] न्याये

कारिकां विवृण्वन्नाह--**सदसदात्मनि** भावाभावात्मके वस्तुनि **प्रत्यक्षम् अन्यत्र स्मरणादिकं प्रमाणम्** । कुतः ? इत्याह--**तद्व्यवहार** इत्यादि । प्रमाणव्यवहारस्य **अन्यथानुपपत्ते**रिति निवेदितमेतत् । § 3635

ननु भवतु तत्रप्रत्यक्षम् अन्यत्वप्रमाणम्, ननुशब्दः तज्ञो वा विकल्पः तत्र प्रमाणम्, अन्यविषयत्वादिति चेत्; अत्राह--**शब्द** इत्यादि । **शब्दस्त्वार्थविकल्प[श्च]** न ईश्वरादिविकल्पः, तयोश्च **तद्विषयत्वात्** सदसदात्मकवस्तुगोचरत्वात् । तथा चोक्तम्-- § 3636

*सदसद्वस्तुवोगेषा तदेवेत्यनुशासती ।
न सत्या स्यान्मृषावाक्यैः कथं तत्त्वार्थदेशना ? ॥§ 3638

आप्तमी° श्लो° ११० इति । § 3639
642/mkj

ततः किं जातम् ? इत्याह--**समयः** सङ्केतः **तत्र** सदसदात्मनि वस्तुनि **शक्यः कर्तुं** न केवलं शक्य एव कर्तुम् अपि तु **फलवानपि** । कुतः ? इत्याह--**तादृशः** सदसदात्मनोऽर्थस्य **त्रिकालविषयत्वात्** । एतदपि कुतः ? इत्याह--**अन्यथा** इत्याद । अन्येन अर्थस्य त्रिकालविषयत्वाभावप्रकारेण **अर्थस्य** उत्तरकार्यस्य अनुभवस्य वा **क्रिया** करणं तस्याः **अनुपपत्तेः** इति । तस्याः किम् ? इत्याह--**कथम्** इत्यादि । **कुतश्चित्** प्रत्यक्षात् अनुमानाद्वा
/ms **व्यवहा[र]प्रवर्त्त[नं]यत** एकान्तवादिनः **कथं तत्प्रामाण्यं** प्रत्यक्षादिमानत्वम् । ननु यदि नाम तदनुपपत्तिः प्रामाण्यस्य किमायातम् येन तन्न स्यात् ? इत्याह--**अर्थक्रिया** इत्यादि । § 3640

एवं शब्दानां वस्तुनि सङ्केतं तत्र च तत्साफल्यं प्रतिपाद्य अधुना यदुक्तम्--**विवक्षाप्रतिबन्धजन्मानः शब्दाः तामेव सूचयेयुः** इति; तद्दूषयन्नाह--**वाक्यानाम्** इत्यादि । § 3641

...28 वाक्यानामविशेषेण वक्त्रभिप्रेतवाचिनाम् ।
सत्यानृतव्यवस्था स्यात्तत्त्वमिथ्यादर्शनात् ॥ २८
॥§ 3643

४ त्र] सदासदात्मकवस्तुनि ।
४ त्व] अन्यद्वा
४ नु] नतु
४ ज्ञो] शब्दजः ।
५ अ] सामान्य ।
५ स्त्वा] ब्दश्चाऽ
८ स्तु] तदतद्वस्तु
१४ इत्याद] दि
१८ त] अर्थक्रियानुपपत्तिः ।
२१ न्ध] बद्ध
२१ इति] तुलना--वक्तृव्यापापारविषयो योऽर्थो बुद्धौ प्रकाशते । प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम् ।--प्र° वा° १ । ४ ।

वाक्येषु वक्त्रभिप्रायसूचनेषु अविशेषेण तत्त्वविषयत्वमन्तरेण सत्यानृतव्यवस्था नोपपद्यते प्रत्यक्षवत् । संवृतेः मिथ्यैकान्तात्मकत्वात् तद्विकल्पात् कुतः तत्त्वप्रतिलम्भो यतो वादी विजयी स्यात् । बहिरन्तश्च प्रतिक्षणं परस्परात्मकं स्वलक्षणमनुभवतोऽपि तिमिरादिप्रत्यक्षस्य ज्ञानावरणकर्मण उदयोदीरणाभ्यामन्यत्र कुतः निरन्वयैकान्ते विपर्ययप्रतिपत्तिः ? § 3644

पदस्य अर्थव्यभिचाराद् व्यवहारानुपयोगाद् वाक्यानां विपर्ययात् इति **वाक्यानाम्** इत्युक्तम् । तेषां किंभूतानाम् ? इत्याह--**वक्त्रभिप्रेतवाचिनाम्** विवक्षितवाचिनाम् इत्यर्थः । केन ? इत्याह--**अविशेषेण** साकल्येन यथा हरिहरहिरण्यगर्भवाक्यानां तद्वाचित्वम्; तत्राह— **सत्यानृतव्यवस्था** सुगतवाक्यानां **सत्यव्यवस्था** क ण च रा दिवाक्यानाम् **अनृतव्यवस्था** या सा **स्यात् न** । पूर्वकारिकातो **न** इत्यनुवर्त्तते । क्व ****भिप्रेतवाचिनामि**त्येतद्विशेषणं हेतुश्च अविशेषेण तद्वा[चित्वा]दिति । एवं मन्यते--तद्वाचित्वात् यदि सुगतवाक्यानां सत्यव्यवस्था अन्येषामपि स्यात् । नहि तान्यपि वक्त्रभिप्रेतादन्यत्र वर्त्तन्ते । अथ तेषां तत्त्वप्रतिपादनाभावादनृतव्यवस्था; अत एव सुगतवाक्यानामपि इयमेवास्तु । नैवम्, अर्व प्रतिबन्धेतरकृतंविशेषसद्भावात् । तथाहि--अर्थेभ्यः सुगतज्ञानं ततो वाञ्छा तस्याश्च वाक्यानि, नैवमन्यत्र । ततोऽपि तद्व्यवस्था अनुमान तदा भवदुक्तम् **मणिप्रदीपप्रभयोः** प्र॰ वा॰ २ । ५७ इत्यादि इति चेत्; उक्तमत्र अनुमानवत्तेषां प्रमाणान्तरत्वमिति  तन्न तद्व्यवस्था स्यादिति । कुतः स्यात् ? इत्यत्राह--**तत्त्वमिथ्यार्थदर्शनादिति** । **तत्त्वार्थस्य मिथ्यार्थस्य दर्शनात्** प्रतिपादनात्, दृशेर्णिजन्तस्य अयं प्रयोगः । § 3645 /ms, 643/mkj

कारिकार्थं कथयितुमाह--**वाक्य** इत्यादि । **वाक्येषु सत्यानृतव्यवस्था नोपपद्यते** । किं सर्वेषु ? न, इत्याह--**वक्त्रभिप्रायसूचनेषु** । तेष्वपि केषुचित् सा भव[ती]ति चेत्; अत्राह— **अविशेषेण** इति । किमन्तरेण नोपपद्यते ? इत्याह--**तत्त्व** इत्यादि । अत्र दृष्टान्तमाह--**प्रत्यक्ष** इत्यादि । न परमार्थतः तत्र तद्व्यवस्था अपि तु संवृतेः, अतः परमार्थतः तत्र तदभावसाधनं सिद्धसाधनमिति चेत्; अत्राह--**संवृतेः** इत्यादि । सत्यानृतव्यवस्थाऽभावेऽपि तद्व्यवस्थाविकल्पः **संवृतिः** तस्याः **मिथ्यैकान्तात्मकत्वात्** मिथ्यारूप एकान्तः मिथ्यैकान्तः तदात्मकत्वात् कारणात् **तद्विकल्पात्** शब्दविकल्पात् **कुतो** न कुतश्चित् **तत्त्वस्य** कृतकत्वादिसाधनस्य अन्यस्य वा **प्रतिलम्भो यतः** कृत-

---

६ यात्] अर्थव्यभिचाराभावात् ।
११ *] वक्त्र
१२ त] अभिप्रायवाचित्वात् ।
१३ पि] कणादादिवाक्यानामपि ।
१५ इ] अनृतव्यवस्थैव ।
१५ अर्व] अ[[सुगतवाक्यं परम्परया अर्थप्रतिबद्धं नेतरवाक्यमिति ।]]र्थ
१५ कृतं] त
१६ ज्ञानं] उत्पद्यते ।
१७ अनुमान] नं
१७ म्] भवेत्, तदुक्तम्--
१८ इ] मणिबुद्ध्याभिधावतोः । मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥ इति शेषः ।
२१ अ] दर्शनात् इति ।

कत्वादिवचनात् **वादी विजयी स्यात्** । नहि तद्विकल्पसंवृत्या तत्त्वविषयो व्यवस्थाप्यमानः तत्प्रतिलम्भहेतुः, अतिप्रसङ्गात् । § 3646

स्यादेतत्--द्विचन्द्रदर्शितैमिरिकद्वयवत् सर्वत्र तद्व्यवस्था इति चेत्; अत्राह--**तिमिर** इत्यादि । **स्वलक्षणमनुभवतोऽपि** न केवलमन्यस्य **विपर्ययविप्रतिपत्तिः** विपरीतार्थगृहीतिः । किंभूतम् ? इत्याह--**परस्पर** इत्यादि
/ms । भेदाभेदात्मकमित्यर्थः । क्व ? इत्याह--**बहिरन्तश्च प्रतिक्षणमनुभवन्तः** कस्य ? इत्याह--**प्रत्यक्षस्य** । किंभूतस्य ? इत्याह— **तिमिर** इत्यादि । व्याख्यातमेतत् । § 3647

सा तस्य कुतः ? इत्यत्राह--**कुतोऽन्यत्र** इत्यादि । **स्वयमुदयोवीरणाभ्यां कुतोऽन्यत्र** अपि तु ताभ्यामेव तस्य [त]त्प्रतिपत्तिः इति । कस्य ताभ्याम् ? इत्याह--**कर्मणः** । किंभूतस्य ? इत्याह--**ज्ञान**[इत्यादि । कस्मिन् ?]इत्याह **निरन्वयैकान्त** इत्याद्यभिप्राय— द्विचन्द्रदर्शतैमिरिकद्वयस्य भ्रान्त्या शब्दव्यवहारदर्शनात् सर्वत्र तत्कल्पनाया प्रत्यक्षस्यापि व्यावर्णितरूपस्य मिथ्यादृष्टेः क्वचिद् विपर्ययप्रतिपत्तिदर्शनात् सर्वत्रानाश्वासः स्यादिति । § 3648

ननु भवतु प्रत्यक्षस्य कर्मसंश्लिष्टस्य ताभ्यां तत्प्रतिपत्तिः शब्दस्तत्त तद्विपरीतस्य सा कुतः ? इत्याह--**उदयोदीरणाभ्याम्** इत्यादि । § 3649

...29 उदयोदीरणाभ्यां च तदावारककर्मणाम् ।
मिथ्यार्थदर्शनज्ञानान्मिथ्यार्थत्वं गिरां स्मृतम् ॥ २९
॥§ 3651

क्षायोपशमिकस्यापि भावस्य घातिकर्मोदयोदीरणाभावे तत्त्वप्रतिपत्तिः, न केवलं तज्जन्म [सारूप्याभ्याम्] तदनेन कुतश्चित्तत्त्वं व्यवस्थापयितुकामेन स्वाभिप्रेतमात्रं निरस्ततत्त्वं संसूचयितुमयुक्तम् पक्षान्तरानतिशायनात् । स्वयमभिमतस्य सत्यानृतस्य अनृतानृतात् न कश्चिद्विशेषं पश्यामः वक्त्रभिप्रायमात्रे तद्व्यापारोपगमात् । § 3652

**गिरां** शब्दानां **मिथ्यार्थत्वं स्मृतं** पूर्वाचार्यैरनुज्ञातम् । कुतः ? इत्याह-
644/mkj -**मिथ्यार्थ दर्शनज्ञानादिति** । तदपि कुतः ? इत्याह--**उदयोदीरणाभ्याम्** । केषाम् ? इत्याह--**तद्** इत्यादि । [तदि]त्यनेन शब्दनिमित्ते दर्शनज्ञाने गृह्येते **[तदावारककर्मणाम्]** । § 3653

---

५ विप्र ] यप्र
६ न्तः ] तः
९ सा ] विपरीतार्थगृहीतिः ।
९ योवी ] दी
१२ इत्याद्य ] दि । अयम
१२ भिप्राय ] यः
१२ र्श ] र्शि
१३ नाया ] यां
१५ ता ] उदयोदीरणाभ्याम् ।
१५ त ] विपर्ययप्रतिपत्तिः ।
१५ त्त ] शब्दस्य तु

कारिकां विवृण्वन्नाह--**क्षायोपशमिकस्यापि** इत्यादि । **भावस्य** ज्ञानस्य । किंभूतस्य ? [क्षायोपशमिकस्यापि] क्षयोपशमप्रयोजनस्यापि । तस्य किम् ? इत्याह--**तत्त्वप्रतिपत्तिः** । कस्मिन् सति ? इत्याह--**घाति** इत्यादि । **घातिकर्मोदयोदीरणाभावे** सति इत्यर्थः । तदुत्पत्तिसारूप्याभ्यां स्यादिति चेत्; अत्राह--**न केवलं तज्जन्म** इत्यादि । प्रकृतं निगमयन्नाह— **तदनेन** इत्यादि । यत एवं **तत्** तस्मात् **अनेन** सौगतेन **तत्त्वं** चतुरार्यसत्यादिलक्षणं त्रिरूपं हेतुलक्षणं वा वस्तु **कुतश्चित्** सुगतसम्बन्धिनोऽन्यसम्बन्धिनो वा वाक्याद् **व्यवस्थापयितुकामेन स्वाभिप्रेतमात्रम्,** किंभूतम् ? **निरस्ततत्त्वं संसूचयितुमयुक्तम्** वाक्यात् इति घटना । अन्यथा गां प्रतिपादयितुकामेन अश्वोऽपि सूचयितुं युक्तः स्यात् । अप्रकृतत्वमुभयत्र । गत्यन्तरस्याभावात् तत्सूचनमिति चेत्; न; तद्भावप्रतिपादनात् । § 3654

किंच, साधु कर्तुमशक्तिमता साधुना किमसाधु कर्त्तव्यम् ? तत्र उपेक्षेव तस्य न्यायो *ति भावः । कुत एतत् ? इत्याह--**पक्षान्तर** इत्यादि । सौगतपक्षात् नित्यादिपक्षः **तदन्तरं** तस्माद**नतिशायनात्** स्वपक्षस्य, तत्सूचनस्याविशेषात् इति । § 3655

ननु सौगतपक्षे वाक्यस्य क्षणक्षयविज्ञानविभ्रमशून्यैकान्ते यद्यपि विसंवादः तथापि न रूपादौ, वक्त्रभिप्रायद्वारेण ततः तत्प्रतीतेः, पक्षान्तरे तु सर्वत्र विसंवादः तत्कथमुच्यते **पक्षान्तरानतिशायनात्** इति चेत्; अत्राह--**सत्यानृतस्य** इत्यादि । **सत्यं** च तद् रूपादौ **अनृतं च** क्षणिकत्वाद्येकान्ते **सत्यानृतं** शास्त्रं **तस्य** । किंभूतस्य ? **स्वयं** बौद्धेन **अभिमतस्य** अङ्गीकृतस्य **अनृतात्** सतोऽप्यर्थस्याप्रतिपादनं तत्प्रतिपादनाभिप्रायेण सौगतैः प्रयुज्यमानं वचनमनृतं **तस्माद**पि अत्यन्तासतोऽक्षणिकत्वाकान्तस्य प्रतिपादनाभिप्रायेण प्रयुज्यमानहमृत**मनृतानृततस्मात् कंचि[द्विशेषं न पश्यामः]** त- /ms
त्त्वज्ञानात् इत्यर्थः । न च परस्य तदस्ति, **वक्त्रभिप्रायमात्रे तद्व्यापारोपगमात्,** सतोऽपि रूपादेः बहिः शब्देनाप्रतिपादने असदविशेषात् इति भावः । § 3656

कथं तत्त्वे असम्बन्धाच्छब्दात् तत्त्वज्ञानं भवत्पक्षेऽपीति चेत् ? अत्राह--**वाच्यवाचकसम्बन्ध** इत्यादि । § 3657

...30 वाच्यवाचकसम्बन्धः स्वतः शङ्काऽन्यथा कथम् ?
असङ्केतितानन्तवाच्यभेदेऽपि गिरां श्रुतौ ॥ ३० ॥§ 3659

१३ स्य] साधोः ।
१३ *] न्याय्ये
१४ त] वक्त्रभिप्रायमात्रसूचनस्य समानत्वात् ।
२२ त्वा] द्ये
२३ मृत] नम् अनृत
२३ नृतानृत] तं
२६ अ] असम्बद्धात् । न विद्यते सम्बन्धो यस्येति ।
२६ भ] जैनपक्षे ।

वाच्यवाचकयोः स्वतः सम्बन्धः कथञ्चित् सिद्धः परिणामविशेषात् चक्षुरूपवदिति । कथमन्यथा किमयमाहेति वाच्यविशेषशङ्का उपपद्येत अप्रतिपन्नरूपदर्शिनः तद्विशेषवत् । कथम् ? § 3660

645/mkj

**वाच्यो** घटादिः **वाचको** घटादिशब्दः तयोः **सम्बन्धो**ऽविनाभावः । **स्वतः** स्वमाहात्म्यात् । न सङ्केतमात्रादेव इत्यर्थः । **कथमन्यथा** अन्येन स्वतः सम्बन्धाभावप्रकारेण **शङ्का** संशीतिः । कदा ? इत्याह--**गिरां** शब्दानां **श्रुतौ** समीचीनश्रवणेऽपि न केवलमश्रवणे । क्व ? इत्याह--**असङ्केतितानन्तवाच्यभेदे** । अनेन तद्भेदे न सामान्ये शङ्केति दर्शयति । § 3661

कारिकां विवृणोति--**वाच्यवाचकयोः** घटतच्छब्दयोः **स्वतः सम्बन्धः** । स्वतः संभवंति *त्यः स्यात् । **औत्पत्तिकस्तु शब्दार्थसम्बन्धः** मी° सू° १ । १ । ५स्वाभाविक इत्यर्थः । तथा च मीमांसकपक्षः, तदुक्तम्--**नित्याः शब्दार्थसम्बन्धाः** वाक्य प° २ । २३ इत्यादि; अत्राह--**परिणामविशेषादि** वायवाचकयोः यः **परिणामविशेषः** तदभावे उभयोरभाव इति **तस्मात्, कथञ्चित्** देशनादिनियतत्वेन **सिद्धो** निष्पन्नो निश्चितो वा **सम्बन्ध** इति । निदर्शनमाह--**चक्षुरूपवदिति** । चक्षुरूपयोरिव तद्वत् । उपलक्षणमेतत्, श्रोत्रादिशब्दादीनां परिणामविशेषस्तत्सम्बन्धादेव चक्षुरेव रूपमेव प्रकाशयति

/ms न घ्राणादिकं रसादिकं वा । § 3662

स्यान्मतम्--चक्षुषो रूपेण सन्तानवृत्त्याऽतिशयः कश्चिदापादितोऽस्ति, न तत्तदेव प्रकाशयति, नैवम् अर्थेन शब्दस्य, तत्कथं दृष्टान्तदार्ष्टान्तिकयोः साम्यमिति; तदसत्; यतः चक्षुषा रूपस्य किमिदं प्रकाशनम् ? तत्र ज्ञानजनकत्वं चेत्; स्वसमानकालभाविनि रूपक्षणे तज्ज्ञानं जनयति, कथमन्यथा तज्जनने रूपलक्षणःतत्सहकारी यतो ज्ञानेन गृह्येत, अकारणस्याविषयत्वात् ? न च समानसमयेन तत्क्षणेन चक्षुषोऽतिशयः क्रियते । तत्कारणं * हि तज्जननात्[नाऽ]परम् । एकलक्षणयोश्च हेतुफलभावः सन्ताननाशकृत् । तन्न चक्षुःसहकारिणा रूपेण[कश्चिदतिशय]स्तथापि तत्प्रकाशयति तत् । अथ तदुपादानेन तदुपकारः क्रियमाणः तेन कृत इत्युच्यते सन्तानापेक्षया; तदपि न सुन्दरम्; एवं हि रसादिनापि कृतः इति स्यात् । यथैव

१० स्व] मीमांसकः प्राह ।
१० *] संभवन् नि
१० श] शब्दस्यार्थेन सम्बन्धः--मी° सू° ।
१२ इ] तत्राम्नाता महर्षिभिः । सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः ॥ इति शेषः ।
१३ वाय] दिति । वाच्य
१४ नादि] देशादि
१५ क्षु] चक्षू
१५ क्षु] चक्षू
१९ स्य] कश्चिदतिशय आपाद्यते ।
२२ णः] रूपक्षणः
२३ त] रूपक्षणेन ।
२३ *] त[[अतिशयकरणम् ।]]त्करणं
२४ ण] ए[[समानसमयवर्तिनोः कार्यकारणभावे न सन्तानः स्यात्, सर्वेषामेकक्षणे एव उत्पद्य अनन्तरं नाशात् ।]]कक्षण
२६ दु] वर्तमानरूपक्षणस्य उपादानेन पूर्वरूपक्षणेन ।
२६ त] चक्षुषः क्रियमाणः उपकारः ।
२६ तेन] वर्तमानरूपेण ।

हि तद् रूपग्राहकरूपजनकं तथा तत्समानकालरसादेरपि । कथमन्यथा तयोः एकसामग्र्यधीनता । नोपादानत्वेन इति चेत्; न; उपादानेतरभावस्य भेदैकान्ते[अ]प्रमाणत्वादिति प्रतिपादितम्, अन्वयव्यतिरेकानुकरणस्य सर्वत्राविशेषात् । भवतु रसादेरपि तदुपकार इति चेत्; न; तस्यापि तेन प्रकाशनप्रसङ्गात् । अयोग्यत्वान्नेति चेत्; तर्हि योग्यतैव प्रकाशननिबन्धनमस्तु किं तदुपकारकल्पनया ? § 3663

किंच, पूर्वापररूपमेत्कणाममे वैकसन्तानत्वेऽपि नीलतामिव जडतामपि तेषां तत्प्रकाशयेत्, *तस्याः अपि [तदुपकारकत्वात्] अन्यथा अंशेन जन्यजनकभावः । न चैवम् । ततो योग्यतैवास्तु इति साधूक्तम् **चक्षुरू[पादिवदिअत्र प्रतिः त्रुटिता ।]**ति । § 3664 646/mkj

तदनभ्युपगमे दोषमाह--**कथ**मित्यादि । **कथम् अन्यथा** अन्येन स्वतः सम्बन्धाभावप्रकारेण **उपपद्येत** घटेत । का ? इत्याह--**वाच्यविशेषशङ्का** । किंभूता ? इत्याह--**किमयमाह** इति । कुतः ? इत्याह--**अप्रतिपन्न** इति । निदर्शनमत्राह--**रूपदर्शिनः** पुरुषस्य **तद्विशेषवत्** रूपविशेष इव । § 3665

परमतमाशङ्कते निरा[कर्तुं]**कथम्** इत्यादि । तत्रोत्तरमाह--**यथा** इत्यादि । § 3666

...31 यथा प्रत्यक्षभेदाः स्युः समयापेक्षनिर्णयाः ।
तथा शब्दार्थभेदाः स्युः सङ्केतापेक्षनिर्णयाः ॥ ३१ ॥§ 3668

प्रत्यक्षेण विषयीकृतेषु स्वपररूपादिविशेषेषु यथा कृतसङ्केतनिश्चयपाटवाः स्वानुभूतविशेषान् विवेचयन्ति न तथेतरे । न चैतावता इतरे अनुपलब्धा एव, सत्यपि सङ्केते तथाऽप्रतिपत्तिप्रसङ्गात् । तथा शब्दार्थोपलम्भिनः समयस्तद्विशेषनिर्णयहेतुः । कथं पुनः स्वाभाविकः सम्बन्धः सङ्केतादन्यथा क्रियेत ? न हि भावस्वभावाः पुरुषेच्छया परावर्त्यन्ते निःस्वभावताप्राप्तेः ? वचनं तु दाराः षण्णगरीत्यादौ यथा वाचकत्वेन वक्तृभिर्नियम्यते तत्तथैवानपेक्षितबाह्यार्थं परावर्त्यम् । नैतदेवम्, परमार्थतः तत्सम्बन्धव्यपदेशयोः सङ्करव्यतिकरप्रसङ्गात् । § 3669

प्रत्यक्षप्रमितोऽर्थः **प्रत्यक्षः** तस्य **भेदाः** अवान्तरविशेषाः **यथा** येन तथा योग्य[ताप्र]कारेण अन्येन वा **स्युः** भवेयुः । किंभूताः ? इत्याह--**समयापेक्षनिर्णयाः** समयापेक्षः निर्णयो येषामिति, सङ्केतग्रहणमुपलक्षणं तेन

---

१ हि ] पूर्वरूपम् ।
२ था ] रूपरसयोः ।
४ तेन ] चक्षुषा ।
७ मे ] रूपक्षणानामे
८ तेषां ] चक्षुः ।
८ * ] जडतायाः ।
१० क्षु ] क्षू

दर्शनपाटवादेरपि ग्रहणम् । **तथा शब्दार्थभेदाः स्युः सङ्केतापेक्षनिर्णयाः ।**
§ 3670

एवं मन्यते--यथा अनुभवः स्वार्थभेदनिश्चये स्वतो योग्योऽपि, न हि तस्य तद्योग्यता निश्चयेन क्रियते अन्योऽन्याश्रयदोष, न स्वसत्तामात्रेण निश्चयं तत्र जनयति क्षणभङ्गादौ प्रसङ्गात्, अपि तु सहकारिकारणं सङ्केतादिकमपेक्ष्यत तथा शब्दोऽपि स्वतो योग्यत एव स्वार्थविशेषे सङ्केतमपेक्ष्य निर्णयं जनयति । तथादृष्टेरुभयत्र समत्वादिति । § 3671

कारिकां विवृण्वन्नाह--**प्रत्यक्षेण** इत्यादि । [प्रत्यक्षेण] चक्षुरादिदर्शनेन
/ms **विषयीकृतेषु** । केषु ? **स्वपररूपादिविशेषेषु स्वं** च प्रत्यक्षं **परश्च** बहिर्घटादिः तयोर्यथासंभवं ये **रूपादिविशेषाः** तेषु **यथा कृतसङ्केतनिश्चयपाटवाः** **कृतश्चासौ सङ्केतश्च** तेन **निश्चयपाटवं** येषां ते तथोक्ताः **यथा स्वानुभूतविशेषान् विवेचयन्ति** व्यवस्यन्ति **न तथा इतरे** [अ]कृतसङ्केतपाटवः * तथा न ताव यं ति  **न चैतावता तैरितरे** विशेषाः **अनुपलब्धा एव** अपि तु उपलब्धाः । कुतः ? इत्याह--**सत्यपि सङ्केते तथाऽप्रतिपत्तिप्रसङ्गात्** । **तथा शब्दार्थोपलम्भिनः समयः** सङ्केतः **तद्विशेषनिर्णयहेतुः** शब्दार्थभेदनिश्चयकारणम् । § 3672

परः प्राह--**कथम्** इत्यादि । **कथं पुनः स्वाभाविकः** वाच्यवाचकयोरात्म-
647/mkj भूतः योग्यता  लक्षणः **सम्बन्धः सङ्केतादन्यथा** अर्थान्तरप्रतिपादनप्रकारेण **क्रियेत** । अयमभिप्रायः परस्य— शब्दस्य वित्  सर्वत्र वार्थे स सम्बन्धः, प्रतिनियते वा ? प्रथमपक्षे युगपत् ततः सकलार्थप्रतीतिः स्यात् । इतरत्र विपरीतसमयाद् अर्थान्तरे प्रवृत्तिर्न स्यात् । अथ सङ्केतान्तराद् अर्थान्तरप्रतिपादनयोग्यता अस्य इति चेत्; अत्राह--**नहि** इत्यादि । **हिर्यस्मात् न भावानां** शब्दादीनामर्थानां **[स्वअत्र प्रतिस्त्रुटिता ।]भावाः [अत्र प्रतिस्त्रुटिता ।पुरुषे]च्छया परावर्त्यन्ते** अन्यथा अन्यथा च जायन्ते । कुतः ? इत्याह--**निःस्वभावता**[अत्र प्रतिस्त्रुटिता ।प्राप्तेस्तद्वा]विनामिति । शब्दस्वभावोऽपि तर्हि सङ्केतानु * परावर्त्तत इति चेत्; अत्राह--**वचनं** न्वि[अत्र प्रतिस्त्रुटिता ।त्वित्यादि । दाराः षण्णगरीत्यादौ] **यथा वाचकत्वेन**
/ms **वक्तृभिर्नियम्यते तद्वचनम्  तथैवानपेक्षितबाह्यार्थं पराव** [अत्र प्रतिस्त्रुटिता ।र्त्यमिति जातपरिणा]मेन सम्बन्धः । ***दाराः षण्णगरी** इत्यादि अत्रोदाहरणम् । एतद् दूषयन्नाह--**नैतदेवम्** इत्यादि । **एतत्** परक[अत्र प्रतिस्त्रुटिता ।ल्पितं भाषितं] **परमार्थतो नैवम्** । कुतः ? इत्याह--**तत्स्वम्बन्ध** * त्यादि

४ दोष] षात्
५ त] क्षते
६ त] योग्यत्वादेव ।
१२ *] वाः
१३ ति] तान् व्यवस्यन्ति
१९ वित्] चेत्
२६ *] तान्न
२६ त] वर्त्यते
२९ *] तुलना--यद् यथा वाचकत्वेन वक्तृभिर्विनियम्यते । अनपेक्षितबाह्यार्थं तत्तथा वाचकं वचः ॥ दाराः षण्णगरीत्यादौ...--प्र० वा० ३ । ६५, ६६ ।
३१ *] तत्सम्बन्धे

। **तयोः** वाच्यवाचकयोः **सम्बन्धश्च व्यपदे**[शअत्र प्रतिस्त्रुटिता ।श्च अस्येदं] वाचकं वाच्यं चेति प्रतिपादनं तयोः **सङ्करः** सर्वेषामयोगव्यवच्छेदादीनामेव व  गमनं **व्यतिकरः** परस्परविषयगमनम् तयोः **प्रसङ्गात्** । § 3673

तत्प्रसङ्गोऽस्त्येव इति चेत्; अत्राह--**विशेषण** इत्यादि । § 3674

...32 विशेषणविशेष्याभ्यामुक्तौ च क्रियया सह ।
अयोगं योगमपरैरत्यन्तायोगं न चान्यथा ॥ ३२
॥§ 3676

...33 व्यवच्छिनत्ति धर्मस्य निपातो व्यतिरेचकः ।
सामर्थ्याच्चाप्रयोगेऽर्थो गम्यः स्यादेवकारयोः ॥ ३३
॥§ 3678

न वै पुरुषेच्छया चित्रो धनुर्धर एव, पार्थ एव धनुर्धरः; नीलं सरोजं भवत्येवेति अयोगव्यवच्छेदादिस्वभावस्थितवाक्येषु अन्यथात्वं संभाव्यते, तथाप्रतिपत्तिप्रसङ्गात् । तत एव एवकारप्रयोगविकलेष्वपि वाक्येषु सामर्थ्यात् भवत्येव अयोगव्यवच्छेदादिप्रतिपत्तिः, न विवक्षया तत्प्रतिपत्तिः, तद्ग्रहणत्वात् । तथैव स्यात्कारप्रयोगविकलेष्वपि वाक्येषु स्वरूपादिप्रतिपत्तिः । § 3679

**विशेषणं** नीलत्वादि **विशेष्यम्** उत्पलत्वादि **ताभ्याम्, क्रिया** भवत्यादिका **तया च सहोक्तौ** द्रयोगे सति **अयोगं योगमपरैरत्यन्तायोगं व्यवच्छिनत्ति** । कस्य ? इत्याह--**धर्मस्य** । कः ? इत्याह--**निपातः** । किं सर्वः ? न, इत्याह--**व्यतिरेचकः** एवकार इत्यर्थः । तथा[हि]--विशेषणेन सहोक्तौ 648/mkj
अयोगं विशेषेण अन्ययो गं क्रियया वा अत्यन्तायोगम् एवकारो धर्मस्य [व्य]वच्छिनत्तीति । पुरुषेच्छातो न स्वस्वभावत इति चेत्; अत्राह--**न च** नैव **अन्यथा** उक्तापिछातः *तं तस्य सव्यवच्छिनत्ति तथाऽदर्शनात् । नहि चित्रो धनुर्धर एव इत्युक्ते इच्छातोऽपि परयोगस्य व्यवच्छेदः प्रतीतिविषः

३ व] मेकत्र
४ इत्यादि] तुलना--अयोगं योगमपरैरत्यन्तायोगमेव च । व्यवच्छिनत्ति धर्मस्य निपातो व्यतिरेचकः ॥ विशेषणविशेष्याभ्यां क्रियया च सहोदितः । विवक्षातोऽप्रयोगेऽपि सर्वोऽर्थोऽयं प्रतीयते ॥ व्यवच्छेदफलं वाक्यं यतश्चैत्रो धनुर्धरः । पार्थो धनुर्धरो नीलं सरोजमिति वा यथा ॥--प्र॰ वा॰ ४ । १९०--९२ ।
१५ द्र] प्र
१८ होक्तौ] असम्बन्धं व्यवच्छिनत्ति ।
१८ विशेषेण] ष्येण
१८ गं] अन्येन सह सम्बन्धं व्यवच्छिनत्ति ।
१८ अ] अत्यन्तसम्बन्धाभावं व्यवच्छिनत्ति, तत्र सम्बन्धमेव द्योतयति ।
२० उक्तापिछातः] क्तोऽपीच्छातः
२० *] अयोगादिकम् ।
२० त] विशेषणादेः ।
२० स] एवकारो निपातः ।
२१ प] अन्यसम्बन्धस्य ।
२१ प्र] चैत्राद् भिन्नस्य मैत्रस्यापि धर्नुधरत्वाविरोधात् ।
२१ तीतिविषः] षयः

इतरथा यथाविन्यासमेव च इष्टार्थप्रतीतेः भिन्नप्रक्रमयोजनं सर्वत्र अयुक्तं भवेत् । स्यादेतत्— अनादिरयं सङ्केतो विशेषणादिना सह प्रयुज्यमान /ms एवकारोऽयोगादिव्यवच्छेदकृदिति, ततः तथा प्रतीतिः न शब्दस्वभाव्यात् अन्यथा सङ्केते हि तथैव तं व्यवच्छिनत्ति, न वादौ प्रसायस्ति इति; तदयुक्तम्; यतः तथा सङ्केतयतोऽपि लोकस्यानिवृत्तेः । न खलु पक्षस्यैव धर्मो हेतुः इति वाक्याद् अयोगव्यवच्छेदं प्रतिपद्यस्व इत्युक्तोऽपि लोकः तथा प्रतिपद्यते इति । § 3680

अत्रैव युक्त्यन्तरमाह--**सामर्थ्याच्च** इत्यादि । **च** शब्दः अपिशब्दार्थः भिन्नप्रक्रमः । ततोऽयमर्थः--**अप्रयोगेऽपि** अनुच्चारणेऽपि । कयोः ? **स्यादेवकरयोः** । किम् ? इत्याह--**गम्यः** । कः ? इत्याह--**अर्थः** । कुतः ? इत्यत्राह--**सामर्थ्यात्** । एतदुक्तं भवति--यदि इच्छात एव तदर्थः प्रतीयते, तदा तदप्रयोगे तदिच्छास्तीति कुतो निश्चयः ? अथ च तदर्थः सामर्थ्यात् प्रतीयते इति । § 3681

[कारि]काया युगलं विवृण्वन्नाह--**चित्रो धनुर्धर एव** इत्यादि । **चित्रो** विशेषः तस्य **धनुर्धर** इति विशेषणम् अस्मात् पर **एवकारः**, पोऽर्थोजनौ विशेष्यः अस्माच्च परः **एव** स तद्विशेषणं **धनुर्धर** इति, **नीलं सरोजम्** इति विशिष्टं कर्तृ निर्दिष्टं तत्क्रिया **भवति** इति, अस्याः पर **एवकार इ**त्येवं यथा स्तम् **अयोगाव्यवच्छेदादिना स्वभावेन स्थितानि** यानि **वाक्यानि** तेषु **नवै** नैव **पुरुषेच्छया अन्यथात्वं** विपरीतत्वं **संभाव्यते** । कुतः ? इत्याह--**तथा** इत्यादि । **तथा** तेन पुरुषेच्छया अन्यथात्वप्रकारेण **प्रतिपत्तिप्रसङ्गात्** अयोगव्यवच्छेदादिसंवित्तिप्राप्तेः । अथवा **तथा** सौगताभिमतप्रकारेण /ms **प्रतिपत्तिप्रसङ्गात्(?')** इति ग्राह्यम् । विशेषणादिसहि स तान्न तो गर्दभादिप्रतीतिप्रसङ्गादिति । § 3682

अधुना **सामर्थ्याच्च** इत्यादि व्याख्यातुमाह--**तत एव** इत्यादि । **तत एव** पुरुषेच्छया अन्यथा संभावनाभावादेव **सामर्थ्याद् भवति अयोगव्यवच्छेदादिप्रतिपत्तिः** । क्व ? इत्याह— **वाक्येषु** । किंभूतेषु ? इत्याह--**एवकारतत्प्रयोगविकलेष्वपि** । विवक्षया तत्प्रतिपत्तिरिति चेत्; अत्राह--न **विवक्षया तत्प्रतिपत्तिरिति** । तथाहि--**पक्षधर्मस्तदंशेन व्याप्तः** । प्र०वा० ३ । १ इत्यादि वाक्ये अन्यथा विवक्षायामपि नान्यथात्वं संभाव्यते प्रमाणबाधनात्, प्रत्यक्षाभासवत् । § 3683

649/mkj

ननु यदि एवकारप्रयोगविकलानि वाक्यानि कानिचित् सन्ति, कुतः तेषु इदमवगम्यते— अयमर्थः अत्र एवकारस्य इति ? नहि शशशृङ्गस्य

३ तः] सङ्केतात् ।
४ स्ति] न चात्र दोषोऽस्ति
१२ दा] एवकाराद्यप्रयोगे ।
१५ विशेषः] ष्यः
१६ नौ] पार्थः अर्जुनः
१६ स] एवकारः
१८ म्] स्वम्
१८ अयोगा] ग
२२ तान्न] सहितात्त

अयमर्थ इति शक्यमवसातुम् । अदर्शनमुभयत्र, इति चेत्; अत्राह--**तद्ग्रहणत्वादिति** । **तेन** सामर्थ्यलभ्येन अर्थेन **ग्रहणम्** उपादानं यस्य एवकारस्य तस्य भा[वा]**त्तत्वात्** । यथैव हि धूमः प्रतीयमानः स्वकारणमग्निं [त]दविनाभावाद्गमयति तथा अर्थोऽपि कुतश्चित् प्रतीयमानः स्ववाचकमव्यभिचारं । तद्यथा, **नधुखे[ऽ]गे** जैनेन्द्र॰ १ । १ । १८ इत्यनेन वोः एवैयोः प्रतिषेध उच्यमानः तयोः विकारि[विकारव] द्भावं सूचयति तदभावे तयोरभावात् प्रतिषेधानुपपत्तिः । ततो ज्ञायते न वोः सर्वस्य खे इति, सोऽपि ज्ञायमानः श्रुतार्थापत्त्या एकदेशशब्दं गमयतीति, लोकेऽपि स्थूलबहलो देवदत्तो दिवा न भुङ्क्ते इति वाक्यं रात्रौ भुङ्क्ते इति गमयति । एतत् स्यात्कारेऽपि /ms अतिदिशन्नाह--**तथैव** इत्यादि । तेन सामर्थ्यप्रकारेण **स्यात्कारविकलेष्वपि वाक्येषु** । किम् ? इत्याह--**स्वरूपादि** इत्यादि । § 3684

प्रमाणविरोधं दर्शयन्नाह--**चैत्रस्याद्य** * § 3685

...34 चैत्रस्यायोगे व्यवच्छिन्ने योगः प्रतिपादितो भवेत् ।
सर्वथा चैत्रता सिध्येन्न च स्याद्वादविद्विषाम् ॥ ३४ ॥§ 3687

चैत्रो धनुर्धर एव इति...तदयुक्तम्--पक्षधर्म एव इत्ययोगव्यवच्छेन विशेषणम् । यदि पुनः अन्ययोगव्यवच्छेदेन पक्षधर्मं विशेषयेत् पक्षस्यैव धर्मो हेतुरिति; तद्विशेषणापेक्षस्य हेतोरसाधारणता अन्यत्राप्यवृत्तेः इत्ययुक्तम्, कथम् ? § 3688

*भिप्रायः--**चैत्रस्य** धनुषा **अयोगे व्यवच्छिन्ने योगः प्रतिपादितो भवेत्** इतरथा चैत्रो धनुर्धर एव इति प्रयोगानुपपत्तिः । स च सर्वथा, कथंचिद्वा स्यात् ? आद्ये पक्षे **चैत्रस्य** धनुषा **[अ]योगे व्यवच्छिन्ने** सति **न चैत्रता सिध्येत्** धनुर्भावः सिध्येत् । केषाम् ? इत्याह--**स्याद्वादविद्विषाम्** एकान्तवादिनाम् इत्यर्थः । **सर्वथा** तस्य तेन योगे गर्दभीक्षीरतापत्तिः तयोः अन्यथा एकान्त इति भावः । § 3689

कारिकां व्याख्यातुमाह--**चैत्रो धनुर्धर एव इति** इत्यादि । निगदेन विवृतमेतत् । ततः किं जातम् ? इत्याह--**तदयुक्तम्** इत्यादि । **तत्** तस्मादुक्तन्यायात् **अयुक्तम्** अनुपपन्नम् । किम् ? इत्याह--**पक्षधर्म एव**

४ भिचारं] यथा स्यात्तथा गमयति इति सम्बन्धः ।
५ न] धु इति धातोः संज्ञा ।
५ वोः] धोः
५ एवै] एबेप
७ वोः] धोः
१२ *] स्य इत्यादि ।
१९ *] अयम
२० स] प्रयोगः ।
२५ देन] स्वशब्देन ।

**इति अयोगव्यवच्छेदेन विशेषणम्,** पक्ष-धर्मयोरेकत्वापत्त्या गुडयोरसतापत्तेः **पुनः** अयोगव्यवच्छेदव्यवस्थापरेण अन्यत्र दूषणमुक्तम्, त[द्] दूषयितुं प्रकटयन्नाह--**यवि पुनः** इत्यादि । [पुनरिति] पक्षान्तरद्योतने **अन्ययोगव्यवच्छेदेन** अन्यो विपक्षः तेन अयोगः पक्षधर्मस्य तस्य व्यवच्छेदो निरासः तेन **विशेषयेत् पक्षधर्मं पक्षस्यैव धर्मो हेतुरिति** कश्चिद् व्याख्याता **पक्षधर्मस्तदंशेन** हेतुबि॰ पृ॰ ५२ इत्यादेः । तत्र दूषणमाह की र्त्ति **[तद्विशेषणापेक्षस्यान्यत्राननुवृत्तेरसाधारणतेति चेत्; न; अयोगव्यवच्छेदेन विशेषणात्** ।--**हेतुबि॰ पृ॰ ५२ ।स्तद्विशेष]**णेत्यादि । **स** च पक्षो **विशेषणं** च
650/mkj /ms तत्, तस्मिन्नपेक्षा यस्य, तद[पेक्षा तद्विशेषणे, तद्विशेषणाअत्र प्रतिस्त्रुटिता ।]**पेक्षः** तस्य । कस्य ? **हेतोः** लिङ्गस्य । किम् ? इत्याह--**असाधारणता** । कुतः ? इत्याह[अअत्र प्रतिस्त्रुटिता ।न्यत्रापि विप]क्षेऽ**प्यवृत्तेः** । अत्र सूरिः दूषणमाह--**इत्येवं** परेणोच्यमानम् **अयुक्तम्** इत्यनुवर्त्तते । **क**[अत्र प्रतिस्त्रुटिता ।थम् इ]ति प्रश्ने, केन प्रकारेण [अ]युक्तम् इति ? § 3690

अस्योत्तरमाह--**अन्ययोगव्यवच्छेदात्** इत्या[दिअत्र प्रतिस्त्रुटिता । ।]

§ 3691

...35 अन्ययोगव्यवच्छेदात् सपक्ष एव सन्निति ।
सोऽपि चेत् पक्षधर्मः स्यात् एवकारस्य किं फलम्
॥ ३५ ॥§ 3693

सजातीये सन्नेव हेतुरित्ययोगव्यवच्छेदे शब्दानित्यत्वे प्रयत्नानन्तरीयकत्वादेरहेतुत्वप्रसङ्गभयात् सजातीय एव सन् इति अन्ययोगव्यवच्छेदेनैव विशेषयेत्, तथैव विशेषितोऽपि तद्धर्मः सन् एकान्तमतिक्रम्य यदि वस्तुस्वभावेन पक्षधर्मः स्यात् तर्हि पक्षे एव सन्निति विशेषितोऽपि सजातीये वर्तेत स्वरसतः अनेकान्तावलम्बनात् । न च...तदन्तर्व्याप्तिः अन्ययोग... § 3694

[अअत्र प्रतिस्त्रुटिता ।न्य]योगव्यवच्छेदेन हेतुना संविद्यमानः **सपक्ष एव** नान्यत्र तद्विरुद्धे **हेतुरिति** [सअत्र प्रतिस्त्रुटिता ।म्बन्धः]**स** इत्थंभूतोऽ**पि चेद्** यदि **पक्षधर्मः स्यात्** इतरथा चाक्षुषत्वादिवद् अपक्षधर्मः स्यात्, तदपेक्ष एव सन् सपक्षे किन्न स्यात् ? स्यादेव । विशेष्येण सह **एवकारस्य** उच्चारणे **किं फलम्** इति चेत् ? अथ तत्तुल्य एव सन् इत्यत्र किं फलम् ? अतुल्ययोगव्यवच्छेदइति चेत्; अन्यत्रापि स एवास्तु । तुल्ययोगव्यवच्छेदः कस्मान्नेति चेत् ? पक्षयोगव्यवच्छेदो भवतोऽप्यस्तु, विपक्षवत् पक्षोऽपि

१ अ] हेतुबि॰ पृ॰ ५२ ।
२ त्तेः] गुणिगुणयोरसत्त्वापत्तेः
२ त्र] अन्ययोगव्यवच्छेदे ।
३ वि] दि
६ माह] धर्मकीर्तिः ।
२३ सं] सन्
२८ च्छेद्य] द

अन्य एव । एतत् परे परिहरन्ति इत्थम्— **अनुमेयेत् कथतत्तुल्ये सद्भावः** इत्यत्र अनुमेये प्रथमं हेतोः सद्भावमभिधाय तत्तुल्य एव इत्युच्यमानम् उक्तनिषेधकं न भवति, यथा **द्वौ पुत्रौ जनयांबभूव नरं नारायणमेव च** इति नारायणमेव इति श्रुतिः नरमुक्तं न निषेधति, अनुक्तनिषेधपरत्वात् । अत्रापि इदमेवोत्तरम्--**अन्ययोगव्यवच्छेदात्** इत्यादि । एवमर्थं च स तु *सपक्ष एव इत्यभिप्राय । पक्ष एव सन् इत्युक्ते यथा परेण **पक्षधर्मः** /ms इत्युक्त्वा **तदंशेन** इत्युक्तम् । § 3695

कारिकार्थं प्रकटयितुं **सन् सजातीय एव** इत्यवधारणे पराभिप्रायं द्योतयन्नाह— **सजातीये सन्नेव** इत्यादि । **सजातीये सन्नेव** नाऽसन् मनागपि **हेतुः इत्येवम् अयोगव्यवच्छेदे** अङ्गीक्रियमाणे **शब्दानित्यत्वे** साध्ये **प्रयत्नानन्तरीयकत्वादेः** आदि शब्दादन्यस्यापि तत्प्रकारस्य सपक्षैकदेशवृत्तेः **अहेतुत्वप्रसङ्गभयात् अन्ययोगव्यवच्छेदेनैव विशेषयेज्जनः सजातीय एव सन्** इति । § 3696

651/mkj

एतद् दूषयितुं सूत्रार्थमाह--**तथैव** इत्यादिना । **तथैव** अन्ययोगव्यवच्छेदप्रकारेणैव **विशेषितोऽपि** तद्धर्मः सन् **एकान्तमतिक्रम्य** विशेष्येण सहोदितो निपातो व्यतिरेचकः अन्ययोगव्यवच्छेदनियममपहाय । केन ? इत्याह--**वस्तुस्वभावेन** शब्दमाहात्म्येन **यदि पक्षधर्मः स्यात् । तर्हि पक्षे एव सन्निति विशेषितोऽपि सजातीये वर्त्तेत** । कुतः ? इत्याह--**स्वरसतः** स्वभावेन **अनेकान्तावलम्बनात्** । अन्ययोगव्यवच्छेदेऽपि अनुक्तस्यैव व्यवच्छेदो नेतरस्य इति योऽयम् **अनेकान्तः तस्याश्रयणात्** कारणात् पक्ष एव सन् इत्युक्तेऽपि सपक्षे वृत्त्यनिषेधः । दृश्यते हि पूर्वोक्तस्यैव एकस्मिन् वाक्ये पश्चादप्युक्तस्याऽनिषेधः, तद्यथा । § 3697

**जिन एव परा भक्तिः सर्वज्ञे नरसेविधं । सिसासने तस्य सर्वदा ॥**
§ 3698

अस्याप्रमाणत्वे प्रकृते कः समाश्वास इति न किञ्चिदेतत् । § 3699

यत्पुनरुक्तम्--असाधारणता स्यात् इति; सोऽपिन दोष इति दर्शयन्नाह--**न च** इत्यादि । कुतः ? इत्याह--**तदन्तर्व्याप्तेः** इत्यादि । विचारितमेतत् । /ms तत्र पक्ष एव सन् इत्युक्तेऽपि असाधारणता नाम दोषः, अय तुं स्यादिति दर्शयन्नाह--**अन्ययोग** इत्यादि । § 3700

---

१ थ] येऽथ
२ इ] यदेतदाचार्येण--अनुमेयेऽथ तत्तुल्ये सद्भावो नास्तिताऽसति ।
निश्चित...--हेतुबि॰ टी॰ पृ॰ २२२ ।
४ इ] नरं च नारायणमेव चादौ स्वतः सुतौ द्वौ जनयांबभूतव--हेतुबि॰ टीकालो॰ पृ॰ २४७ ।
६ *] सन्
६ भिप्राय] यः
७ इत्युक्त्वा] पक्षधर्मस्तदंशेन व्याप्तो हेतुः--हेतुबि॰ पृ॰ ५२ ।
८ प] तत्र हेतुलक्षणमेव तत्र यः सन् सजातीये इत्यादिकं युक्तं वक्तुम्--प्र॰ वा॰ मनोरथ॰ ४ । १८९ ।
२३ सेविधं] विते
२३ ने] ?
२६ सोऽपि] सापि

यच्चान्यदुक्तम्--**क्रियया सहोदितोऽत्यन्तायोगमेव च व्यवच्छिनत्ति निपातो व्यतिरे[च]कः** । प्र° वा° ४ । १९० इति; तत्र दूषणमाह--**प्राप्तम्** इत्यादि । § 3701

...36 प्राप्तं नीलं सरोजैकरूपं व्यक्तमिदं जगत् ।
नित्यं समन्ताद्भवत्येव चेन्नीलं सरोजमिति ॥ ३६ ॥ § 3703

नीलं सरोजं भवत्येवेत्यत्यन्तायोगव्यवच्छेदैकान्ते स्वकालादिनियमाक्रान्तं सर्वं नीलमयं सरोजात्मकं शाश्वतं जगत् स्यात् । ततो नीलं सरोजमित्येव न स्यात् व्याघातादिति । कथमन्यथा अनेन पक्षस्य धर्मो भवत्येव इति नाश्रियेत ? यतोऽयोगव्यवच्छेदेनैव विशेषयेत् ? तन्न...न च स्याद्वादे काचिदनवस्थितिः, स्वयमभिमतवस्तुतत्त्वप्रत्यायनात् । § 3704

**नीलं सरोजं भवत्येव इति चेत्** यदि तर्हि **समन्तात् नित्यं** सर्वदा **नीलं सरोजैकरूपं व्यक्तं** यथा भवति तथा **इदं जगत् प्राप्तम्** । [अयम्] अभिप्रायः--सर्वथा, कथंचिद्वा नीलं सरोजं भवत्येव ? प्रथमपक्षे अयं दोषः । अन्यत्र अनेकान्त इति । § 3705

कारिकाविवरणमाह--**नीलम्** इत्यादि । **नीलं सरोजं भवत्येवे**[ति एव]**मत्यन्तायोगव्यवच्छेदैकान्ते** अङ्गीक्रियमाणे । किम् ? इत्याह--**स्व** इत्यादि । **काल आदिर्यस्य** द्रव्यादेः स तथोक्तः **पुन**[ः]**स्व**शब्दोनास्य कर्मधारयः तेन **नियमः** तेन, स च **अतिक्रान्तो** येन तत्तथोक्तम्, **सर्वं नीलमयं जगत् स्यात्** । किं नीलमयमेव स्यात् ? न, इत्याह--**सरोजात्मकं** जगत् स्यात् । **शाश्वतं** नित्यं स्वकालनियमातिक्रमात् । ततः को दोषः ? इत्याह--**तत** इत्यादि । तस्मात् अनन्तरैकान्तात् **नीलं सरोजम् इत्येव** 652/mkj **न स्यात्** । कुतः ? इत्याह--**व्याघातादिति** । यदिति यदि नीलमयं[न] सरोजात्मकम्, अथ तदात्मकं[न]नीलात्मकम् इत्यनयोः अन्योनविरोधात् । § 3706

स्यान्मतम्--नीलं सरोजं भवत्येव इति वचनेऽपि नायं दोषः य- /ms थाभावस्वभावम् अभिधानप्रवृत्तेरिति चेत्; अत्राह--**कथमित्यादि** । **अनेन**, अस्य दोषस्य अभावप्रकारेण **अन्यथा पक्षस्य धर्मो हेतु**[ः]**भवत्येव** इति **कथं नाश्रियेत यतोऽनाश्रयणात् अयोगव्यवच्छेदेनैव विशेषयेत्** । प्रकृतं निगमयन्नाह--**तन्न** इत्यादि । § 3707

---

१४ अ] कथंचिदिति पक्षे ।
१७ ब्दो] ब्दे
२२ दिति] यदिति व्यर्थमत्र ।
२३ त] सरोजात्मकम् ।
२३ अन्योन] ऽन्य
२६ अनेन] बौद्धेन ।

ननु स्याद्वादेऽपि तथैव दोषः; इत्याह--**न च** इत्यादि । **[नच]**नैव **स्याद्वादे काचिद् अनवस्थितिः** भावानामवस्थितेरभावः । कुतः ? इत्याह--**स्वयं** जैनस्य **अभिमतं यद्वस्तुतत्त्वं** तस्यैव **प्रत्यायनात्** । § 3708

पुनरपि वक्त्रभिप्रेतमर्थं शब्दाः सूचयन्तीत्येकान्ते दूषणमाह--**एवकार** इत्यादि । § 3709

...37 एवकारः स्वतः स्वार्थे स्वक्रममनुवर्तयन् ।
वक्त्रभिप्रायमित्यत्र यथा श्रूयेत तथा परः ॥ ३७
॥§ 3711

ध्वनयो वक्त्रभिप्रायमेव सूचयन्ति इत्येकान्ते यथा एवकारः भिन्नप्रक्रमः चकारो वेति यदा स्वार्थप्रतिपादने कथञ्चित् शक्तिस्वाभाव्यं न भवेत् स्वेच्छया क्रमं न लङ्घेत् । योगरूढेषु दाराः षण्णगरीत्यादिष्वपि भेदप्रतिपत्तौ शब्दशक्तिरेवानुगन्तव्या । विचारितं चैतत् स्वाभाविकत्वादभिधानस्य एकशेषानारम्भः इत्यत्र भगवद्भिः पू ज्य पा दैः शब्दानुशासनदक्षैः । पदावधिकः समयः स्वार्थप्रतिपादने पुरुषाभिप्रायाधीनश्चेत्; न; तावन्मात्रेण व्यवहाराभावात् । पदान्तरसन्निधाने स्वत एव विशिष्टार्थप्रतिपादने कथं वाचकस्य स्वत एव शक्तिः प्रत्याख्यायेत ? एकपदस्य नानार्थप्रतिपादनसंभवे सर्वथा नियमासंभवात् एकान्तो न सिध्यति इत्यलं प्रसङ्गेन § 3712

**एवकारः स्वार्थे** अयोगव्यवच्छेदादौ **श्रूयेत स्वतो** बौद्धेन । किं कुर्वन् ? इत्याह— **अनुवर्त्तयन्** अनुवर्त्तमानं प्रयुञ्जानः भिक्षादिवद् अचेतनस्यापि हेतुकर्तृत्वम् । किम् ? इत्याह--**स्वक्रमम्** स्वस्य आत्मनः क्रमम् । तंकिमनुवर्त्तयन् ? इत्याह--**वक्त्रभिप्राय**मिति । क्व ? इत्याह--**अत्र** विवक्षा शब्दार्थ इत्येकान्ते । तदन्यत्र अतिदिशन्नाह--यथा एवकारः **तथा परो**ऽन्यस्तादिः **आदि**शब्दः निपातराशिग्रहणार्थः **श्रूयेत अनुवर्त्तयन् स्वक्रमं वक्त्रभिप्रायम्** । न चैवम्, व्यवधानेन प्रयोगेऽपि यावद्विशेषणादिना ना[भि]संबध्यते, तावत् ततः तदर्थाऽप्रतिपत्तेः इति भावः । § 3713

कारिकाविवरणमाह--**ध्वनयो वक्त्रभिप्रायमेव नार्थं सूचयन्ति इत्येकान्ते** सति **यथा** येन प्रकारेण **एवकारः भिन्नप्रक्रमः, भिन्नः** विशेषणादिव्यतिक्रमेण **प्रक्रमः** प्रयोगपरिपाटिर्यस्य स तथोक्तः, तस्यैव * **चकारो** यत्तदोर्नित्यसम्बन्धात् [तथैवेति] गम्यते । न केवलं चकारः किन्तु **वा इति** । इति शब्दः प्रकारवाची वा, [एवं] प्रकारोऽन्योऽपि शब्दः । तत् किं कुर्यात् /ms, 653/mkj
? इत्याह--**क्रमं** स्वविन्यासस्थितिं **न लङ्घयेत्** पुरुषकारणे अन्यत्र उद्दिष्टो

१२ इ] जैनेन्द्र० १ । १ । १०० ।
१९ तं] तं इति व्यर्थम् ।
२१ स्तादिः] न्यः स्यादादिः
२७ *] तथैव
२९ ब्दः] ज्ञातव्यः ।

विशेषणादिना न सम्बन्धमर्हेत् यथान्यासमवेतमर्थं गमयेदित्यर्थः । कदा ? इत्याह— **यदि** ***यदा शक्तिस्वाभाव्यं कथंचित्** केनचित् प्रकारेण निगदितेन **स्वार्थप्रतिपादनेन भवेत्** । केन कृत्वा ? इत्याह--**अस्तेच्छया** पुरुषेच्छानुवर्त्तनेन, शब्दशक्तिस्वाभाव्ये तु तं लङ्घयेत् अन्यत्र निर्देशेऽपि विशेषणादिसम्बन्धमन्तरेण तदर्थाप्रतिपत्तेरिति । कथं तर्हि तत्स्वाभाव्ये एकस्मिन् कामिनीकाये दाराः बहुवचनम् ? तस्य बहुत्वे नियतत्वात् । षण्णां नगराणां समूहे षण्णगरी इत्येकवचनम् ? अस्य एकत्र नियमात्, षण्णगरव्यतिरेकेण तत्समूहाभावात् । दृश्यते च तद्वचनम्, ततो मन्यामहे विवक्षार्थाऽशब्दा इति; तत्राह— **योग** इत्यादि । **[योगरूढेषु]दारा[ः]षण्णगरी इत्यादिष्वपि** ध्वनिषु न केवलं पूर्वेषु **भेदप्रतिपत्तौ** बहुत्वैकप्रतिपत्तौ **शब्दशक्तिरेव अनुगन्तव्या** न विवक्षामात्रम्, अन्यथा तत एकवचनादिप्रसङ्गात् । **विचारितं चैतत्-- स्वाभाविकत्वादभिधानस्य एकशेषानारम्भः** जैनेन्द्र० १ । १ । १०००**इत्यत्र भगवद्भिः पू ज्य पा दैः शब्दानुशासनदक्षैः** इति ।
§ 3714

पुनरपि परमतमाशङ्कते दूषयितुं **पदावधिक** इत्यादि । **पदमवधिर्यस्य** स तथोक्तः । कः ? इत्याह--**समयः** शब्दागमः । स किम् ? इत्याह-
/ms -**पुरुष** इत्यादि । **पुत्रुषस्य** वक्तुः **अभिप्रायः** समिच्छा **तदधीनः** तदायत्तः **स्वार्थप्रतिपादने** इति **चेत्**; अत्राह--**न** इत्यादि । यदुक्तं परेण **तन्न** । कुतः ? इत्याह--**तावन्मात्रेण** पदमात्रेण **व्यवहाराभावात्** शब्दस्य प्रवृत्तिरूपस्य निवृत्ति[रूपस्य वा] व्यवहारस्याऽयोगात् । न खलु घट इति वचनमात्रेण तद्भावः । § 3715

स्यान्मतम्--पदान्तरेण अभिसम्बन्धाद् विशिष्टार्थप्रतिपत्तिः, ततो व्यवहार इति; तत्राह— **पदान्तर** इत्यादि । विवक्षितपदाद् अन्यत् पदं तदन्तरम् तस्य **सन्निधाने** सति **स्वत एव** आत्मनैव पुरुषकृतसङ्केतमन्तरेण **विशिष्टार्थप्रतिपादने** अङ्गीक्रियमाणे । न हि सर्वा वाक्यार्थप्रतिपत्तिः सङ्केतमपेक्षते असकृत् पूर्ववाक्यादपि केषांचित् सुधियाम् अर्थप्रतीतिदर्शनात् **कथं स्वत एव शक्तिः बाधकस्य प्रत्याख्यायेत ?** एवमभ्युपगम्य पदावधिकस्य समयस्य पुरुषाभिप्रायाधीनत्वमिदं दूषणमुक्तम् । § 3716

अधुना तत्रापि तदधीनत्वं नास्तीति दर्शयन्नाह--**नानार्थ** इत्यादि । **नानार्थस्य** अनेकार्थस्यौकभ्यपदस्य **प्रतिपादनसंभवे,** यथा **अग्निहोत्रं जुहुयात् स्वर्गकामः** मैत्रा० ६ । ३६ प्रत्यत्र वाक्ये अग्न्यादिपदस्य वक्त्रभिप्राय-

---

१ वे] थान्यासमेव
२ *] यदेत्यादि
३ या] स्वेच्छया
६ ब] इति ।
६ त] दाराशब्दस्य ।
८ म्] एकवचनं बहुवचनं च ।
९ ब्दा] र्थाः शब्दाः
११ त] विवक्षातः ।
२७ बाध] वाच
२९ त] समये ।
२९ त] पुरुषेच्छाधीनत्वम् ।
३० भ्य] स्यैकस्य
३० नं] न
३१ त्र] इत्यत्र

मेव शब्दाः सूचयन्तीति **नियमासंभवात् सर्वथा अयं** परकीय **एकान्तो न सिध्यति** । तथाहि--यदि वक्त्रभिप्रायमेव शब्दाः सूचयन्ति; तर्हि वक्तुः मीमांसकस्य अग्निः स्वेत्यभिप्रायाभावात् कथं कीर्त्तेः ततः स्वार्थ प्रतिपत्तिर्येन उच्यते-- § 3717

654/mkj

*[तेन] अग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ ।
खादेत् श्वमांसमित्येष नार्थः इत्यत्र का प्रमा ॥§ 3719 /ms

प्र॰ वा॰ ३ । ३१८ इति । § 3720

[तअत्र प्रतिः घृष्टा ।स्य] व्याख्यातैव वक्ता इत्युच्यते; न; व्याख्यातृकथितार्था[द]धिकस्यापि सयुक्तिके श्रोतरि प्रमेयस्य प्रतिभासनात् । पघतृक मुपसंहरन्नाह--**इत्येवमर्थ** पर्याप्तं **प्रसङ्गेन** वचनपरम्परया । § 3721

अथ मतम्--न परमाणुव्यतिरेकेण वर्णाः पदानि वाक्यानि च सन्ति अत्रसंवृतेः, तत्कथमुक्तम् **तद्भिदः प्रतिलब्धवर्णपदवाक्यात्मा** सिद्धिवि॰ ४ । १ इति ? तत्राह--**पदमित्यादि** । § 3722

...38 पदमभिन्नं भिन्नैः स्वैः आकारैरवभासते ।
सदसद्भिर्यथा ज्ञानमात्मनीति प्रचक्षते ॥ ३८
‖§ 3724

यथादर्शनं ज्ञानतत्त्वव्यवस्थायामनेकान्तप्रसङ्गात् तत्त्वमेकरूपं कथञ्चिददृष्टपूर्वमास्थेयम् । तथा च व्यलीकमात्रानिर्भासमक्षरं वितथवर्णनिर्भासं पदमदृष्टपदार्थं वाक्यमप्यप्रतिषिद्धम् अक्रमप्रतिपत्तेः । दृष्टहानिरदृष्टकल्पनेति चेत्; संवित्तावपि समानः प्रसङ्गः । तद्भेदाभेदात्मकत्वे अन्यत्र कः प्रद्वेषः ? § 3725

तात्पर्यमत्र--सौगतस्य चित्रैकज्ञानोपगमे जैनस्य वर्णादि[ः]सिद्धः । तदनभ्युपगमे निरंशतत्त्वोपगमाद् वैयाकरणस्य इति न तथागतस्य पतस्यपक्षपाताद् विमोक्षः इति । **पदम्** इत्युपलक्षणम् वर्णवाक्ययोः, ततो वर्णः पदं वाक्यं **चावभासते** । कैः सह ? इत्याह--**आकारैः** भेदैः । किंभूतैः ? **स्वैः** आत्मीयैः । कथंचित् तदात्मभूतैः, अन्यथा सत्त्वासिद्धेः, समवायादिसम्बन्ध-

३ स्वेत्य] अ[[अग्निं हन्तीति अग्निहः श्वा तस्य उत्रं मांसम् अग्निहोत्रमिति ।]]ग्निहः श्वा इत्य
३ कीर्त्तेः] धर्मकीर्तेः ।
३ स्वार्थ] [[श्वा इत्यर्थस्य ।]]श्वार्थ
१० तृक] [[प्रकरणम् ।]]प्रघट्टक
१० र्थ] म् अलं
१२ अत्र] अन्यत्र
१२ द्भिदः] तद्भेदः
२२ स्य] स्फोटवादिनो मतसिद्धिः ।
२२ स्य] पर

निषेधात् । पुनरपि किंभूतैः ? इत्याह--**भिन्नैः** परस्परविलक्षणैः । किंभूतं तत् ? इत्याह— **अभिन्नं** स्वावयवसाधारणम्, अथवा निरंशम् । पुनरपि किंभूतैः ? इत्याह--**सदासद्भि**रिति जैनमतापेक्षया **सद्भिः** विद्यमानैः वैयाकरणविशेषदर्शनापेक्षया **असद्भिः** । अत्र निदर्शनमाह--**यथा इत्यादि** । **यथा** येन प्रकारेण **ज्ञानम्** आकारैः तथाविधैः**अवभासते इत्येवं** केचित् **प्रचक्षते** जैनाः वैयाकरणाश्च । § 3726

ननु क्व तद[व]भासते ? स्वात्मनि इति चेत्; विज्ञानम् । अन्यस्मिन् /ms प्रत्यक्षे चेत्; न; तन्निषेधात्, सतोऽपि तस्य वर्त्तमानमात्रपर्यवसानाच्च । नानुमानेऽपि; प्रत्यक्षाभावे तदभावात् इति चेत्; **आत्मनि** अनेकात्मनि स्वपरसंवेदनपरिणामात्मनि तदवभासते इति ब्रूमः । तदुक्तं न्या य वि नि श्च ये--**आत्मनाऽनेकरूपेण** न्यायवि० १ । ८ इत्यादि । पूर्वपूर्ववर्णश्रवणाहित- 655/mkj संस्कारस्य अन्त्यवर्णश्रवणात् पूर्ववर्णस्मरणे सति मानसं प्रत्यक्षमुपजायते, तत्रावभासते इत्येके । तदसत्यम्; निरंशैकस्वभावे तत्र क्रमभाविवर्णादिप्रतिभासायोगात् । शेषं चिन्तितमत्र । § 3727

कारिकां विवृण्वन्नाह--**[यथा]दर्शन**मित्यादि । दर्शनानतिक्रमेण **यथादर्शनं ज्ञानतत्त्वव्यवस्थायां** क्रियमाणायाम् **अनेकान्तप्रसङ्गात्** अनेकान्तात्मकवर्णादिप्रसङ्गात् कारणात् **तत्त्वं** ज्ञानं वस्तु, किंभूतम् ? **एकरूपम्** निरंश**मास्थेयम्** । पुनरपि किंभूतम् ? इत्याह--**कथंचित्** प्रत्यक्षादिप्रकारेण स्वसंवेदनाद्वैतादिप्रकारेण वा[ऽ]**दृष्टपूर्वम्,** न हि निरंशं ज्ञानं पुरुषवत् द्रष्टुं शक्यम् । इष्यत एव तथाविधं ज्ञानतत्त्वमिति चेत्; अत्राह--**तथा** च तेन च तथाविधज्ञानाभ्युमगमप्रकारेण **अक्षरम् अप्रतिषिद्धम्** इति गत्वा सम्बन्धः करणीयः । किंभूतम् ? इत्याह— **व्यलीकमात्रानिर्भासं** व्यलीकोऽसत्यो मात्राणां ह्रस्वादीनां निर्भासो यस्मिन्निति । न केवलम् अक्षरम् अपि तु **पदमप्यप्रतिषिद्धम्** । किंभूतम् ? इत्याह--**वितथवर्णनिर्भासं** तथा **वाक्यमपि अप्रतिषिद्धम्** । किंभूतम् ? इत्याह--**दृष्टपरमार्थम्** असत्यपदप्रतिभासम् /ms । कुत एतत् सर्वम् ? इत्याह--**अक्रमप्रतिपत्तेः** इत्यादि । § 3728

परमाशङ्कते दूषयितुं **दृष्टहानिः** इत्यादि । **दृष्टस्य** मात्रादिभेदस्य **हानिः अदृष्टस्य** निरंशाक्षरादेः **कल्पना इति** चेत्; अत्राह--**संवित्तावपि** न केवलम् अक्षरादौ **समान[ः]प्रसङ्गो** दोषः । न समानः तत्र चित्रैकरूपत्वोपगमात् **चित्रप्रतिभासाप्येकैव बुद्धिः** प्र० वार्तिकाल० ३ । २२० इत्यादि वचनादिति चेत्; अत्राह--**तद्** इत्यादि । **तस्याः** संवित्तेः **भेदाभेदात्मकत्वे अन्यत्र** वर्णादौ **कः प्रद्वेषः** भेदाभेदात्मकत्वस्य यत्तत्र तन्न भवेत् ? § 3729

---

३ दा] सद

७ म] विज्ञानवादः स्यात्, अथवा विज्ञानरूपतापत्तिः ।

८ स्य] प्रत्यक्षस्य ।

९ भावात्] अनुमानोत्पत्त्यभावात् ।

११ पू] नादेनाहितबीजायामन्त्येन ध्वनिना सह । आवृत्तिपरिपाकायां बुद्धौ शब्दोऽवभासते ॥--वाक्यप० १ । ८५ । न्यायकुमु० टि० पृ० ७४९ ।

१३ इत्येके] स्फोटवादिनः ।

२५ म] अदृष्टपदार्थम्

३२ त्र] अक्षरादौ ।

३२ त] भेदामेदात्मकत्वम् ।

नानु नादृष्टपूर्वं ज्ञानतत्त्वमिष्यते येनायं दोषः, अपि तु दृष्टम्, स्व-संवेदनात्मकस्य परोक्षत्वविरोधात् । तत्पुनरभिन्नमिव अवभासते । तदुक्तम्--
§ 3730

**अविभागोऽपि बुद्ध्यात्माप्र**° वा° २ । ३५४ इत्यादि, § 3731
**मन्त्राद्युपप्लुताक्षाणाम्**प्र° वा° २ । ३५५ इत्यादि च । § 3732
तत्राह--**अभिन्नम्** इत्यादि । § 3733

...39 अभिन्नमन्यथा ज्ञानमात्मानमवभासयेत् ।
नाक्रमं सक्रमं कुर्यात्तज्ज्ञानं पदमविद्यया ॥ ३९
॥§ 3735

यदि पुनः ज्ञानपरमाणवः सर्वथा भिन्नाः; कुतस्तत्त्वमन्यथा प्रतिभासेर-न् ? वेद्याकारः पुनः वेदकाद्याकारविलक्षण एव संवित्स्वभावमतिवर्तेत अर्थान्तरवत् । वेदकाकारः तद्व्यतिरेकेणासंवेद्यः कथं चेतनः यतः तस्य स्वसंवित्तिः स्यात् ? तन्न तदभेदैकान्ते विभ्रमवशादन्यथावभासः, बहिरपि विभ्रमवशात् निःकलस्यैव पदादेरन्यथावभासः कल्पेत । § 3736

**अभिन्नम**विभागं **ज्ञानं** यत् सौगतेष्टम् **अन्यथा** ग्राह्यग्राहकसंवित्तेर्भेद-वन्तमिव **आत्मानं स्वस्वरूपमवभासयेत्** । कया ? **अविद्यया** । तत्किं 656/mkj
कुर्यात् ? इत्याह— **नाक्रममित्यादि** । **अक्रमं** कमरहितं **सक्रमं** क्रमवदिव **कुर्यात्** गृह्णीयात् करोतेः क्रियासामान्यवाचित्वात् । किम् ? **न** कुर्यादेव **तज्ज्ञानम्** ? किम् ? **पदम्,** उपलक्षणमेतत् वर्णादेः । कया ? **अविद्यया** इति । § 3737

स्यान्मतम्--न ज्ञानमन्यथा आत्मानमवभासते, चतप्रतिसदा द्वय-स्यावभासनात् । केवलं विकल्पबुद्धिः ग्राह्यग्राहकसंवित्तिभेदकलुषितमिव थदव्य वस्यति । [त]त एव केनचिदुक्तम्--**ग्राह्यग्राहकसंवित्तिभेदवानिव ल-क्ष्यते** प्र° वा° २ । ३५४ न गृह्यते इति; तत्राह--**यदि पुनः** इत्यादि । [यदि] चेत् **पुनः** इति वितर्के । **ज्ञानपरमाणवः** । किंभूताः ? इत्याह-- **सर्वथा भि-** /ms
**न्नाः** परस्परव्यावृत्ततनवः **तत्त्वम्** इत्यव्यारोन्यथा बंधस्य नि[ं]कलत्वासिद्धेः । ततः किम् ? इत्याह--**कुतः** कारणात् न कुतश्चित्, **कथंचिदेकत्वेन** उप-लक्षणमेतत् तेन स्थूलत्वेन दीर्घत्वेन सावयवत्वेन **प्रतिभासेरन्** । नहि यद्रूपं यन्न भवति तद्रूपेण स्वग्राहिणि ज्ञाने तत् प्रतिभाति, इतरथा चक्षुषि रूपं च रसात्मना प्रतिभासेत । नास्ति च तत्परमाणुषु प्रत्येकं समुदितेषु वा तदेक-

१ नानु] ननु
२० दा] तत्प्रतिभासा
२२ व्य] त[[प्रतिभासाद्वैतम् ।]]दध्य
२२ एव] धर्मकीर्तिना ।
२३ इति] इत्युक्तमपि तु
लक्ष्यते--आभाति इत्युक्तम् ।
२५ व्यारो] त्यध्याहारोऽ
२५ बंध] स्कन्ध

त्वादिकमिति, प्रतिभा सन्ते च, संहृताशेषविकल्पदशायामपि स्थूलस्यैकस्य दर्शनात् । तदुक्तं धर्म की र्त्ति ना पि-- § 3738

*सरूपयन्ति किं ज्ञानं स्थूलाभासं च तेऽणवः ।§ 3739

प्र॰ वा॰ २ । ३२१ इति । § 3740

स्यान्मतम्--नाभात्येष आकारः, स तु ग्राह्याकारोऽसन्नेव **मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽप्यदोषः** प्र॰ वार्तिकाल॰ ३ । २११ इति वचनादिति चेत्; अत्राह— **वेद्याकार** इत्यादि । **वेद्याकारः** ग्राह्याकारः स्थूलैकरूपः **यदि** इत्यनुवर्तते **पुनः वेदकाद्याकारविलक्षण एव, वेदकः** येनासौ वेद्याकारो गृह्यते, तदभावे तदप्रतीतिः । स्वतः प्रतीतिरिति चेत्; प्राप्तं ज्ञानत्वम् इति चित्रैकतत्त्वसिद्धिः । न चैतत् परस्य पथ्यम्, ततो ज्ञानादन्य एवासौ । **स आदिर्यस्य**, संवेदनाकारस्याप्यभावे तदसिद्धिः । नहि क्रियारहितं कर्म अस्ति, तदेवाकारः तस्माद् **विलक्षण एव** भिन्न एव **संवित्स्वभाव** ज्ञानस्वरूपं स्वसंवेदनलक्षण**मतिवर्त्तेत** अतिक्रामेत्, वेद्याकारोऽचेतनः स्यात् इत्यर्थः । तथा च **यदवभासते तज्ज्ञानं यथा सुखादि** इत्यस्य अनेन
/ms व्यभिचारः । § 3741

अनेन **नान्योऽनुभाव्यो बुद्ध्यास्ति** प्र॰ वा॰ २ । ३२७ इत्यादि निरस्तम् । § 3742

अत्र निदर्शनमाह--**अर्थान्तरवत्** इति । नीलार्थाद् अन्योऽर्थः तदन्तरम् पीत्यादि  तदिव तद्वत् इति । यथा पीतं नीलस्वभावमतिवर्त्तते तथा वेद्याकारोऽपि संवित्स्वभावमिति । यदि वा, **संवित्** कर्त्री **स्वभावं** नीलबोधरूपतायाद्यात्मानं
657/mkj **विषयज्ञानं** *****तज्ज्ञानविशेषाच्च द्विरूपता** । प्र॰ समु॰ १ । १२ इति वचनात् **अतिवर्त्तेत** निराकारा स्यात् इत्यर्थः । वेदकाकारे दूषणमाह--**वेदकाकारः** । किंभूतः ? **असंवेद्यः** । कथम् ? इत्याह--**तद्व्यतिरेकेण** ग्राह्याकारव्यतिरेकेण कथंचित् प्रत्यक्षादिप्रकारेण । नहि नीलादिव्यतिरेकेण निरंशं ज्ञानमनुभूयते । **कथं चेतनो[ऽय]**मतदाकारो **यतः** चेतनत्वात् **स्वसंवित्तिः** तस्य **स्यात्** । निगमनमाह--**तन्न** इत्यादि । § 3743

ननु न वेद्याकारः संवेदनादन्यः, किन्तु परमार्थतोऽतद्वत्यपि तद्वतीव प्रतिभातीति चेत्; अत्राह--**तदभेदैकान्ते विभ्रमवशादन्यथावभासः** संशतयेव

---

४ इति] ते परस्परं भिन्ना अणवः तज्ज्ञानं स्थूलाभासं स्थूलाकारं केन रूपेण सरूपयन्ति ? यदणुस्वरूपमस्थूलमस्ति न तत् ज्ञानारूढम् । यच्च ज्ञानारूढं स्थौल्यं नाणुषु तदस्ति ।--प्र॰ वा॰ मनोरथ॰ ।
१२ भाव] वं
१९ पीत्यादि] पीतादि
२१ ताया] तया
२१ *] न
२२ इ] विषयज्ञानतज्ज्ञानभेदाद् बुद्धेर्द्विरूपता । स्मृतेरप्युत्तरे काले न ह्यसावविभावितः ॥--प्र॰ समु॰ ।
२७ पि] वेद्याकारशून्यापि संवित्तिः संवेदने ।
२७ त] वेद्याकारसहितेव ।

प्रतिभासनम् । अत्रोत्तरं **बहिरपि** न केवलम् अन्तः, **विभ्रमवशादन्यथाऽव-भासः कल्पेत** । कस्य ? **पदादेः** । किंभूतस्य ? **निःकलस्यैव** । § 3744

ननु वर्णदिस्फोटस्य तदवयवा व्यञ्जका इष्यन्ते, तेषां चाविद्यतिक्रिया व्यापारः । नहि मरीचिकाजलेक्वांति दर्थक्रियां विधातुमलमिति चेत्; अत्राह— **मिथ्याकारैः** इत्यादि । § 3745

...40 मिथ्याकारैर्यथा ज्ञानमेकं जातुचित्तथा ।
*द्वैध्यं मिथ्याक्रमैः वाक्यं व्यज्यते व्यञ्जकैः पदैः ॥ ४० ॥§ 3747

नानानिर्भासैरेकं ज्ञानं यदि वितथैरर्थैरपि व्यज्येत; वितथक्रमैः पदैः वाक्यं व्यङ्ग्यं किन्न भवेत् विशेषाभावात् § 3748

**मिथ्या** असत्यैराकारैः अंशैः **यथा** येन तद्द्वारेण प्रतिपत्तिप्रकारेण **ज्ञानम्** एकमद्वयं **द्वैध्यं त्यद्यत जातुचित्** कदाचित् **तथा मिथ्याक्रमैः** मिथ्या क्रमो येषां तैः इति । **वाक्यम्** उपलक्षणमेतत्, तेन वर्णः पदं **व्यज्यते** । किं /ms
कैः ? इत्याह--**व्यञ्जकैः** वर्णपदवाक्यावयवैः इति । § 3749

कारिकाविवरणमाह--**नाना** इत्यादि । **नानाभिर्भासैः** वेद्याद्याकारैः एकं निरंशं **वितथैरर्थैरपि यदि व्यज्येत ज्ञानं वितथक्रमैः पदवाक्यं व्यङ्ग्यं किन्न भवेत्** ? भवेदेव । कुतः ? इत्याह--**विशेषेत्यादि** । § 3750

ननु नित्यो व्यापी च स्फोटः परैरिष्यते । न च तथाविधस्य वेदनमिति चेत्; अत्राह— **न ज्ञाये[ते]त्यादि** । § 3751

...41 न ज्ञायेत नोत्पद्येत न नश्यत्येकमञ्जसा ।
धीवर्णपदवाक्यादि तद्वित्तिवितथात्मना ॥ ४१ ॥§ 3753

658/mkj

प्रत्यक्षानुपलम्भसाधने कार्यकारणभावे न किञ्चित् कस्यचित् कार्यम्, निष्कलसाक्षात्कृतेरसंभवात् । तत एव न नश्येत् उपलब्धिमत्त्वात् § 3754

---

१ ति] चाभिव्यक्ति
२ ले] लं
२ द] काश्चिद्
५ *] द्विधा भावः द्वैध्यम् ।
९ त] व्यज्यते
१० र्णः] र्णैः
१२ नानाभि] नि
१३ दं] पदैः

१५ प] नानेकावयवं वाक्यं पदं वा स्फोटवादिनाम् । निरस्तभेदं पदतत्त्वमेतत्...--स्फोटसि॰ श्लो॰ २९, ३६ । वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायकः नित्यः शब्दः स्फोट इति तद्विदो वदन्ति ...--सर्वद॰ पृ॰ ३०० । द्रष्टव्यम्--न्यायकुमु॰ पृ॰ ७४५ टि॰ ९ ।

**न ज्ञायेत** न गृह्येत **नोत्पद्येत न नश्यत्येकमञ्जसा** परमार्थेन । किं तत् ? इत्याह--**धीवर्णपदवाक्यादि** आदिशब्देन शब्दब्रह्मादिपरिग्रहः । केन हेतुना ? इत्याह— **तद्वित्तेरि***त्यादि । **तस्य** ज्ञानत्व-जन्म-नाशस्य **वित्तिः** तद्वित्तिः तस्या **वितथो** य **आत्मा** स्वभावः **तेन** । एतदुक्तं भवति--यदि ज्ञानमज्ञातमपि स्वरूपमात्रपर्यवसितं क्षणिकम् अहेतुफलभूतम् अनंशं चोच्यते; र्हि वर्णादिकमदृष्टमपि नित्यव्यापितया इष्यताम् । अस्यानुपलम्भेन असत्त्वं ज्ञानेऽपि समानमिति । § 3755

कारिकां विवृण्वन्नाह--**प्रत्यक्ष** इत्यादि । **कार्यकारणभावे** अङ्गीक्रियमाणे । किंभूते ? इत्याह--**प्रत्यक्षानुपलम्भसाधने** । किं जातम् ? इत्याह--**न** इत्यादि । **किंचित्** जाग्रद्विज्ञानं स्वापादिविज्ञानं वा **कस्यचित्** चक्षुरादेः वासनादेर्वा **कार्यं** न तथा **किंचित्** सुबन्तमिदमन्यद्वा पदं वाक्यं वा **कस्यचित्** ताल्वादेः गगनस्य वायोः शब्दस्य वा न कार्यम् । कुतः ? इत्याह— /ms **निष्कल** इत्यादि । [निष्कलस्य] ज्ञानादेः निरंशस्य या **साक्षात्कृतिः** तस्याः **असंभवात्** । मा भूत् तत्कार्यं तत्, तथापि अनित्यं स्यादिति चेत्; अत्राह--**तत एव** तदसंभवादेव **न नश्येत्** । एतदपि कुतो इत्याह--**उपलब्धि** इत्यादि । ततः संन्नित्यमेव तदिति भावः । § 3756

ननु ज्ञानस्य निष्कलस्य साक्षात्कृतेरसंभवेऽपि विभ्रमाकारैरनुमानादिति चेत्; अत्राह— **ज्ञानतत्त्वस्य** इत्यादि । § 3757

...42 ज्ञानतत्त्वस्य निर्भासैस्तादात्म्यं नास्ति सर्वथा ।
तथा भ्रान्तेस्तदुत्पत्तिर्यत्तैस्तदनुमीयते ॥ ४२ ॥§ 3759

ज्ञानतत्त्वं निरंशं न प्रत्यक्षम्, यदङ्गीकृत्य स्फोटमुपालभेरन्, सर्वविकल्पातीतं निरंशं तत्त्वं यदि सांशमिव लक्ष्यते न प्रत्यक्षेण गृह्यते; तदितरत्रापि समानम् । अनादिनिधनं सादिनिधनवत् अक्रमं क्रमवदिव प्रतिभासते इति तत्त्वस्य कुतश्चित् स्वभावतः सिद्धौ सत्यां स्यात्, अन्यथा सर्वत्रानाश्वासप्रसङ्गात्, सर्वथा [विभ्रमस्य असिद्धेः] § 3760

**ज्ञानतत्त्वस्य** निरंशस्य **निर्भासैः** ग्राह्याद्याकारैः **नास्ति तादात्म्यं सर्वथा भ्रान्तेः** हेतुपदमेतत् वितथत्वादिति । नहि अभ्रान्तस्य भ्रान्तेन तादात्म्यं विरोधात् । **तथा** नास्ति **तदुत्पत्तिः तस्य** तैः **यद्** यस्मात् तादात्म्यात् **तदनुमीयते तै**राकारैरिति । § 3761

**ज्ञानतत्त्व**मिततत्त्व**मित्यादिना** कारिकार्थमाह--**[ज्ञानतत्त्वम्]** किंभूतम् ? इत्याह— [अत्र पाठस्त्रुटित आभाति ।निरंशं] यद् विज्ञानतत्त्वम् **अङ्गीकृत्य**

---

१ *] तद्वित्ति इ
४ र्हि] तर्हि
९ द्वा] मिङ्गम् ।
१३ कुतो] तः ?
१४ संन्नि] सन्नि
१५ स्य] अविभागस्य ।
२८ मित] मिततत्त्व इति व्यर्थमत्र ।

आश्रित्य **स्फोटम् उपालभेरन्** सौगताः शब्दब्रह्म वा, **तन्न प्रत्यक्षम्** इति । § 3762

१659/mkj

यत्पुनरुक्तम्--भेदवानिव लक्ष्यते न गृह्यते इति; तत्राह--**सर्वान्** सत्त्वादीन् **विकल्पा[न् अ]तीतं तत्त्वं** ज्ञानस्वरूपं **यदि निरंशं** वेद्यंसविकलं सत् **सांशमिव** सभेदमिव **लक्ष्येत** विकल्पेन व्यवसीयेत **न प्रत्यक्षेण गृह्यते; तद्** अनन्तरोक्तम् **इतर त्रापि** पदादावपि **समानम्** । शक्यं हि वक्तुम्--अविकल्पबोधेन पदादि अक्रमं प्रतीयते, तदुत्तरकालभाविन्या तु विकल्पबुद्ध्या सक्रममिव व्यवसीयते । ननु सकलं ज्ञानं स्वरूप एव मग्नं कथं पदादौ भिन्ने प्रवृत्तिमत् ? स्वरूपे मग्नमिति कुतः ? इतरथा, ज्ञानं तत्र भवे । लक्षणान्तराभावात् इति चेत्; अत एव पदरूपेऽपि मग्नमित्यप्यस्तु । तथाऽदर्शनान्नेति चेत्; इतरत्र समानम् । तथा कल्पनमुभयत्रापि । § 3763 /ms

भवतु तर्हि वा पदवाक्यादि जन्मादिरहितम् इति चेत्; अत्राह--**अनादि** इत्यादि । न विद्यते आदिनिधने जन्मविनाशौ यस्य तद**नादिनिबंध**स्यादि **निधनवदक्रमं** हेतुफलक्रमरहितं **क्रमादिव** हेतुफलक्रमवदिव **प्रतिभासत इति** एवं **तत्त्वस्य** ज्ञानादिस्वरूपस्य **कुतश्चित्** प्रत्यक्षात् अनुमानात् अन्यतो वा **स्वभावतः** स्वभावेन **सिद्धो** निर्णीतौ **सत्यामेवं** स्यात्, **अन्यथा** स्वभावतः तत्सिद्ध्यभावप्रकारेण **सर्वत्र** सुखादावपि **अनाश्वासप्रसङ्गात्** । तथाहि--(?१)न सुखादिकं नाम किंचन, केवलं सुखादिकमिव न प्रतिभासते, प्रतिभासत इव इत्यपि स्यात् । ननु नास्त्येव सुखादिनीलादिव्यतिरेकेण परस्य प्रतिभासनम्, सुखादिनीलादेश्च विचार्यमाणस्यायोगात्, प्रतिभासनेऽपि भ्रान्तता इति चेत्; अत्राह--**सर्वथा** इत्यादि । निरूपितमेतत् । § 3764

अत्राह प्र ज्ञा क रः--**प्रतिभास[मा]नस्य विभ्रमायोगात् प्रतिभासाद्वैतमस्तु** इति; तत्राह--**ध्वनिभ्यः** इत्यादि । § 3765

...43 **ध्वनिभ्यो वाचकं भिन्नं श्रद्धेयं विदुर्बुधाः ।**

१. प्रत्यक्षानुपलम्भसाधनः कार्यकारणभावः ।--हेतुबि० पृ० ५४ ।

३ म्] पृ० ६५६ प० ८ ।
४ वेद्यंस] वेद्यावंश
५ क्ष्येत] क्ष्यते
५ सीयेत] यते
९ इ] यदि स्वरूपमग्नं न स्यात्तदा ज्ञानमेव न स्यात् ।
१० वे] तन्न भवेत्
१० अ] लक्षणान्तराभावादेव ।
१३ वा] वर्ण
१५ स्यादि] निधनम् तत् सादि
१५ मादिव] क्रमवदिव
१७ वा] प्रमाणात् ।
१७ सिद्धो] द्धौ
१७ त्यामेवं] व
१९ न] व तत्
२० न] प्रतिभासाद्वैतवादी प्राह ।

ज्ञानतत्त्वं विनिर्भासाद् व्यतिरिक्तं तथाऽन्यथा ॥ ४३

‖§ 3767

यथादर्शनमिति परीक्षानिमित्तं न भवति, प्रमाणागोचरं । तन्न… § 3768

**ध्वनिभ्यः** पदादिव्यञ्जकेभ्यो **वाचकं** स्फोटाख्यं**भिन्न**मर्थान्तरभूतं **श्रद्धेयं**श्रद्धागम्यम् न प्रमाणगम्यं स्यात् । **अन्यथा तथा ज्ञानतत्त्वं** श्रद्धेयं **विदुर्बुधाः** । किंभूतम् ? इत्याह— **विनिर्भास** इत्यादि । विधाविचित्रो वा सुखादिनीलादिनिर्भासः तस्माद् **व्यतिरिक्तमिति** । अत्रायमभिप्रायः--प्रतिभासाद्वैतं स्तम्भादिस्वभावम्, अन्यद्वा स्यात् ? प्रथमपक्षे आह--**यथादर्शनम्** प्र° वा° /ms २ । ३५७ *इत्यादि **परीक्षायाः निमित्तं न भवति,** जीवादितत्त्वाप्रतिकूलं हि तत् इति । द्वितीये दोषमाह--**प्रमाणागोचरम्** इत्यादि । तन्न युक्तम्--**अज्ञातार्थप्रकाशो वा इति पारमार्थिकं प्रमाणलक्षणम्** प्र° वार्तिकाल° पृ° ३० इति । § 3769

660/mkj

उपसंहारमाह--**तन्न** इत्यादि । § 3770

सांप्रतं सौगतस्य अनवस्थितचेष्टितं प्रकटयन्नाह--**बहिरर्थोऽस्ति** इत्यादि । § 3771

…44 बहिरर्थोऽस्त्यनाकारा बुद्धिश्चाप्यनाकृतिः ।
असंभाव्याननुमेयेत्याकुलं किमतः परम् ॥ ४४

‖§ 3773

बहिरन्तर्ज्ञेययोः विधिप्रतिषेधैकान्तसंवृतिवादान् परस्परविलक्षणानवलम्ब्य किमप्याकुलं कथयन् कथं स्वस्थात्मा नाम यतोऽयं परीक्षकसमयमवतरति ? § 3774

**बहिरर्थोऽस्ति अर्थाकारा वुद्धिश्चास्ति** इति सौत्रान्तिकाः । नास्ति बहिरर्थः **अर्थाकारा** नीलाद्याकारा, तत्रैव लोकस्य अर्थ इति व्यवहारात् एवमभिधानम् **बुद्धिरस्तीति** योगाचाराः । बहिरपिबुद्धावपि परमाण्वाकारपरिहारेण व्यवस्थितस्य स्थूलस्य नीलाकारस्य असंभवात् **अनाकृतिः** न विद्यते आकृतिः नीलाद्याकारो यस्याः सा अनाकृतिः बुद्धिरस्ति इत्यन्यः तद्विशेषः । नीलादिपरिहारेण प्रत्यक्षे तदप्रतिभासनाद् ब्रह्मवदिति, सद्भाव्याभ्रान्तान्यर्थानुपपपत्त्याऽनुमेया[ऽ]नाकृतिर्बुद्धिः मीमांसकबुद्धेरिव ।

---

५ विधा] विविधो
८ *] यथादर्शनमेवेयं मानमेयफलस्थितिः । क्रियतेऽविद्यमानापि ग्राह्यग्राहकसंविदाम् ॥--प्र° वा° ।
२१ नीलाद्याकारा] बुद्धिरेव ।
२२ ए] अर्थाकारा इति कथनम् ।
२२ पि] रिव
२५ न्यः] माध्यमिकः ।
२५ द्विशेषः] योगाचारविशेषः ।
२६ र्था] न्तार्थान्यथा

अर्थदृष्टतया तस्यापि क्वचिद् भ्रान्त्या सहदर्शनाभावात् न ततस्तदनुमानम् इत्**यसंभाव्याऽननुमेयेत्येवमा कुल** मनवस्थितत्वं **किमतः परम्** ? अपि तु इदमेव आकुलत्वम् । § 3775

अथवा दृष्टापलापित्वेन सौगतस्य चौयन्दर्शयन्नाह--**बहिरस्ति** इत्यादि । **बहिरर्थो** विचेतनो घटादि**रस्ति**प्रमाणवलाबलं वा विद्यते, तथापि नास्ति बहिरर्थः । **बुद्धिरनाकृतिरस्ति** तथापि अर्थाकारा संभाव्या अहमहमिकया स्वसंवेदनाध्यक्षनिश्चेबा तथाप्यसंभाव्या सुखादिनीलादि व्यतिरेकेण अध्य- /ms वसेयेत्**येवमाकुलम्** असम्बद्धं वचनम् **किमतः परम्** इदमेव प्रमाण- वादिताभिधानात् । § 3776

कारिकाविवरणमाह--**बहिरन्तर्ज्ञेय** इत्यादि । **बहिर्ज्ञेयं** घटादि **अन्तर्ज्ञेयं** बुद्धिसुखादि **तयोः** पूर्वं **विधिश्च** पुनः **प्रतिषेधश्च** **तावेकान्तौ** च **संवृतिवादश्च** तान् । किंभूतान् ? **परस्परविलक्षणान्** अन्योऽन्यपरिहारस्थितस्वभावान् । किम् ? **अवलम्ब्य** आश्रित्य **आकुल**मनवस्थितम् **किमपि** रूपादि स्कन्ध- जातं दुःखादिजातं वा **कथयन्** **कथं** **स्वस्थात्मा** **नाम** **यतः** स्वस्थात्मत्वादयं सौगतः **परीक्षकसमयमवतरति** । द्वितीये तु व्याख्याने **बहिरन्तर्ज्ञेययोः** यो **विधिः** स्वरूपादिचतुष्टयेन, यश्च **प्रतिषेधो** विपर्ययेण **भावेनैकान्तौ** प्रधानधर्मो *तयोः **संवृतिवादान्** कल्पनाशिल्पितधर्मभेदवचनविशेषाविति ग्राह्यम् । शेषं पूर्ववत् । § 3777

तर्हि सर्वस्य वस्तुनो विचार्यमाणस्यादयोगात् सकलशून्यतैव भवत्विति चेत्; अत्राह--**एतत्** **वस्तुबलागतम्** इत्यादि । § 3778
661/mkj

...45 एतद्वस्तुबलागतं जगदिदं शून्यं यदाप्तोऽब्रवीत्,
यस्माद्वस्तु विचार्यमाणमखिलं नावस्थितं चेतरत् ।
लोकेऽयमवधेयवाक्किल महाकष्टं प्रविष्टः कलिः,
एकान्तग्रहरक्तरक्तपटवाचालविप्रलब्धाकुलः ॥ ४५
॥§ 3782

**यदाप्तः** सुगतो**ऽब्रवीत्** तदेतद् **वस्तुबलागतम्** अर्थसामर्थ्येनागतम् । किं तत् ? इत्याह--**जगदिदं** **शून्यम्** इति । कुतः ? इत्याह--**यस्मात्**

४ न्द] चौर्यं द
५ वा] बलावलम्बी
७ निश्चेबा] या
९ वादिताभिधानात्] भिघातात्
१३ रूपादि] आदिपदेन वेदनासंज्ञासंस्कारविज्ञानस्कन्धपरिग्रहः ।
१४ दुःखादि] आदिपदेन समुदयनिरोधमार्गलक्षणार्यसत्यपरिग्रहः ।
१६ भावेनै] तावेव ए
१७ *] र्मौ
१७ विशेषाविति] षानिति
१९ यो] स्याऽयो

इत्यादि । **यस्मात्** कारणात् **वस्तु** च **इतरजातं** * **विचार्यमाणम् अखिलं** निरवशेषं **नावस्थितम्** । **च** इत्यवधारणे **इति** एवमयं ध र्म की र्त्तिः **लोकेऽस्मिन्न** अववेयवाक् आदेयवचनः **किल महाकष्टं प्रविष्टः कलिः** । किंभूतोऽसौ ? इत्याह--**एकान्तग्रहेन** * **रक्ताः** त एव **रक्तपटाश्च वाचालाश्च** /ms तैः पूर्वं **विप्रलम्भः** वञ्चितः पश्चादा**कुलः** प्रमाणप्रमेयविकलवचनादिति । § 3783

इति र वि भ द्र पादोपजीवि-अ न न्त वी र्य विरचितायां सि द्धि वि नि श्च य टी का यां शब्दसिद्धिर्नवमः प्रस्तावः । § 3784

# दशमः प्रस्तावः : १० अर्थनयसिद्धिः

662/mkj

प्रमाणसिद्धिविधानानन्तरं नयसिद्धिं विधित्सुः तदादौ तदर्थसंग्रहवृत्तमाह--**ज्ञातॄणाम्** इत्यादि । § 3785

...1 ज्ञातॄणामभिसन्धयः खलु नयास्ते द्रव्यपर्यायतः,
द्वेधा द्रव्यमनन्तपर्ययपदं भेदात्मकाः पर्ययाः ।
तच्छुद्धिभिदया नया बहुविधाः सप्तादितोऽर्थाश्रयाः,
चत्वारोऽत्र च नैगमप्रभृतयः शेषास्त्रयं शब्दतः ॥ १
॥§ 3789

प्रमाणेन प्रत्यक्षादिना स्वार्थं जानन्ति **ज्ञातारः** तेषाम् **अभिसन्धयः** प्रमाणप्रमितार्थैकदेशावसायकल्पाः **खलु** स्फुटं **नयाः** । नयसामान्यलक्षणमेतत् । तद्भेदमाह--**ते** नया **द्वेधा** द्वाभ्यां प्रकाराभ्यां व्यवतिष्ठत इत्यध्याहारः । कुतः ? इत्याह--**द्रव्य** इत्यादि । **द्रव्यतो** द्रव्यमाश्रित्य **पर्यायतः** पर्यायाणोनाश्रित्य द्रव्यार्थिकपर्यायार्थिकनया इत्यर्थः । द्रव्यस्वरूपमाह--**द्रव्यम् अनन्तपर्ययपदम्** अनन्ताः पर्यवसानरहिताः प[र्य]याः पर्यायाः परिणामा इत्यर्थः तेषां पदं स्थानम् । उपलक्षणमेतत्--तेन अनादिपर्ययपदम् इत्यपि ग्राह्यम्, अनेन नित्यैकरूपं द्रव्यमपास्तम् । निरूपितं चेतत् । तत् पर्यायाणां पदम् इत्यनेन तेषां स्वातन्त्र्यं निषेधति । तद्व[द्]द्रव्यस्य किं पदम् ? द्रव्यान्तरम् इति चेत्; तस्यापि तदन्तरम् इत्यनवस्था । स्वतन्त्रं तदिति चेत्; पर्यायाः तथा

१ *] रच तत्
३ वाक्] न् अवधेयवाक्
४ *] हेण
५ म्भः] लब्धः
९ त] न्ते
१० र्यायाणोना] याना
१४ त] द्रव्यम् ।
१५ नेन] पर्यायाणाम् ।
१५ त] पर्यायवत् ।

सत्त विशेषहेतु  भावादिति चेत्; उक्तमत्र--चित्रैकज्ञाने नीलादिनिर्भासवत् परतन्त्राणां सदा तेषामवभासनात् तज्ज्ञानवदेव । न च तस्य अवश्यम् अपरस्थानान्वेषण न्यायोपपन्नम् । अनादिपर्ययपदम् इत्यनेन जीवादेर्द्रव्यस्य सादित्वं प्रत्याचष्टे । **अनन्तपर्ययपदम्** इत्यनेनापि प्रदीपादेः तत्त्वम्, /ms उभयत्रोक्तप्रमाणबाधनात् । § 3790

ननु यदा द्रव्यादयो भिन्नाः समवायेन च तत्र वर्तन्ते, तदापि तेषां तत्पदम्, तत्कुतोऽस्य व्युदास इति चेत् ? अत एव, द्रव्यपर्यायसमवायानाम् अन्योऽन्यं भेदैकान्ते किं कस्य पदम् इति न निश्चयहेतुरस्ति । पर्यायस्वरूपमाह--**भेदात्मकाः भेदः** परस्परव्यावृत्तिः **आत्मा** स्वरूपं येषां ते तथोक्ताः **पर्याया** इति परियन्ति भेदम् इति व्युत्पत्तेः । ननु पर्याया इति निपातनं बाधकमिति तदसिद्धिरिति चेत्; न; **पर्या[या]र्हर्णोत्पत्तौ वुन्** जैनेन्द्र॰ २ । ३ । ९२ इत्यत्र पर्याय इति निपातनात् । सिद्धावपि **न्यायपरिणायपर्यायः** जैनेन्द्र॰ २ । ३ । ३६ इति निपातनं क्रियमाणं ज्ञापकम् तदनित्यत्वस्य इति उभयसिद्धेरिति । पुनरपि त[द्]द्वैविध्यं दर्शयन्नाह--**तच्छुद्धि** इत्यादि । तेषां द्रव्य-पर्यायाणां स्तद्विश्च  द्रव्यस्य **शुद्धिः** पर्यायनिराकृतिः, पर्यायाणां शुद्धिः तेषां परस्परापेक्षा, तयोर्द्वन्द्वैकवद्भावेन नपुंस्त्वह्रस्वादेशः । तदेव तस्य वा **भेदतश्च** तया **द्वेधा** इति घटना । पूर्वंसुनयापेक्षम्, इदं तु सुनयदुर्नयापेक्षं द्वैविध्यम् इति विशेषः । पुनरपि तेषामवान्तरभेदं दर्शयन्नाह--**बहुविधाः** । अपि कियन्तः ? इत्याह--**सप्त** इति । **द्रव्यपर्यायतः** इति वा अत्रापि द्रष्टव्यम् । सप्तस्वपि अवान्तरभेदोऽस्ति इति दर्शयन्नाह--**आदित** इत्यादि । सप्तानां नयानाम् आदौ **आदितो** ये **चत्वारो नैगमप्रभृतयः अत्र** लोके ते **अर्थाश्रयाः** अर्थप्रधानाः **शेषाः** शब्दादयः । कियन्तः ? **त्रयं** स्ते किम् ? /ms इत्याह— **शब्दतः** शब्दमाश्रित्य प्रवर्तयन्त  इति । § 3791

एतदेव वृत्तं विवृण्वन्नाह--**ज्ञानम्** इत्यादि । § 3792

---

१ हेतु] सन्तु विशेषहेत्व
२ दा] पर्यायाणाम् ।
३ ण] णं
४ त] सान्तत्वं प्रत्याख्यातं भवति ।
५ उ] जीवादिद्रव्यस्य सादित्वे, प्रदीपादेः सान्तत्वे च ।
६ न] नैयायिकः प्राह ।
१० र्याया] पर्यया:
१५ द्विश्च] शुद्धिः **तच्छुद्धिः**
१५ र्याय] या
१७ श्च] **भिदा** भेदः
१७ ना] सम्बन्धः ।
१७ म्] द्वैविध्यमुक्तम् ।
२१ च] तुलना--अत्थपप्पवरं सद्दोवसज्जणं वत्थुमुज्जुसुत्तंता । सद्दप्पहाणमत्थोवसज्जणं सेसया विंति ॥--विशेषा॰ गा॰ २७५३ । लघी॰ श्लो॰ ७२ । त॰ वा॰ पृ॰ २६१ । नयवि॰ पृ॰ २६२ । प्रमाणनय॰ ७ । ४४, ४५ । जैनतर्कभा॰ पृ॰ २३ । नयप्र॰ पृ॰ १०४ ।
२२ स्ते] ते
२३ न्त] र्तन्ते

...2 ज्ञानं प्रमाणमित्याहुः नयो ज्ञातुर्मतं मतः ।
ताभ्यामधिगमोऽर्थानां द्रव्यपर्यायशालिनाम् ॥ २

‖§ 3794

ज्ञानमेव इत्यवधारणात् सन्निकर्षादेरसंविदितात्मनः व्युदासः । स्यात्कारमन्तरेणमत्यज्ञानादेः व्युदासे कथञ्चिदनभिमतात्मनापि व्युदस्येत । ज्ञानं प्रमाणमेवेत्युच्यमाने अनभिमतेनापि प्रसज्येत अकिञ्चित्करादेरतिचारणात् तदविसंवादनियमाभावात्, अनधिगतार्थाधिगमलक्षणत्वात् । नयस्य प्रमाणात्मकत्वे पृथग् वचनमनर्थकम्, अन्यथा कथं तेनाधिगमो नाम यतः प्रमाणनयैरधिगमः प्रतिपाद्येत, तन्न; ततस्तत्त्वाधिगमोपपत्तेः तत्परीक्षालक्षणत्वान्नयस्य । द्रव्यार्थिकपर्यायार्थिकद्वयविचारे सति परमार्थप्रतिपत्त्यविरोधात् । § 3795

**ज्ञानम्** इति वचनात् ज्ञानमेव इति द्रष्टव्यम्, एवमन्यत्रापि, अन्यथा तद्वचनमनर्थकम्, **प्रमाणम्** इत्यस्य तं तं । नयमाह--एतन्मूलत्वात् **नयो ज्ञातुः** प्रमाणवतो **मतम्** अभिप्रायः **मतः** । किमर्थं प्रमाणनयनिरूपणमिति चेत् ? अत्राह--**ताभ्यां** प्रमाणनयाभ्याम् **अधिगमो** निर्णयः **प्रमाणनयैरधिगमः** त० सू० १ । ६ इति वचनात् । केषां किंभूतानाम् ? इत्याह--**अर्थानाम्** इत्यादि । § 3796

664/mkj

कारिकाविवरणं **ज्ञानमेव** इत्यादि । **ज्ञानमेव** प्रमाणम् **इत्यवधारणात् सन्निकर्षादेः** । किंभूतस्य ? **असंविदात्मनः** मत्यज्ञानादेः **व्युदासो** निरासः प्रमाणत्वेन । § 3797

ननु भवता अत्रानुगमानुसारिणा ज्ञानपदेन मत्यज्ञानादिकं निराक्रियते, सौगतादिना अभ्रान्तादिपदेन ततः तस्माद् भवतः को विशेष इति चेत् ? अत्राह--**कार** मित्यादि । **स्यात्कारमन्तरेण मत्यज्ञानादेः कथंचित्** केनापि तच्छेदकविशेषेणप्रकारेण व्युदासे इत्यनेन कात् सम्बन्धः । अत्र दूषणम्--**अभिमतात्मनापि** सौगतादिभिः येनात्मना स्वसंवेदनादिस्वभावेन मत्यज्ञानादेः प्रामाण्यमभिमतम् तेनापि न केवलं द्विचन्द्रादिरूपेण **व्युदस्येत** मत्यज्ञानादिरिति । विचारितं चैतत् । न चैवम्, अतः सर्वत्र स्यात्कारोऽपेक्षा इति भावः । § 3798

---

१ ज्ञा] तुलना--णाणं होदि पमाणं ण+ओ वि णादुस्स हिदयभावत्थो । णिक्खेवो वि उवा+ओ जुत्ती+ए अत्थपडिगहणं ॥--ति० प० गा० ८३ । ज्ञानं प्रमाणमात्मादेरुपायो न्यास इष्यते । नयो ज्ञातुरभिप्रायः युक्तितोऽर्थपरिग्रहः ॥--लघी० श्लो० ५२ । प्रमाणसं० पृ० १२७ । उद्धृतोऽयम्--ध० टी० संत० पृ० १६ ।
१२ तं] मतम्[[इत्यनेन सम्बन्धः ।]]
१२ ए] प्रमाणमूलत्वात् ।
१६ इत्यादि] अत्र किम्भूतानाम् इति प्रश्नस्य उत्तरेण द्रव्यपर्यायशालिनाम् इति भवितव्यम् ।
२० अत्रानुग] त्राग
२२ कार] स्यात्कार
२३ त] तद्व्यवच्छेदक ।
२३ विशेषेण] षण
२३ का] कात् इति व्यर्थमत्र ।
२६ स्यात्कारोऽपेक्षा] क्ष्य

ननु ज्ञाने[प्रामाण्यं]नियतमुपदर्शितं ज्ञानं त्वनियतम् अप्रामाण्यमपि गच्छेत्; तन्न युक्तम् **मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम्** । **तत्प्रमाणे** त० सू० १ । ९, १० इति, इति चेत्; अत्राह--**ज्ञानं प्रमाणमेव** इत्युभयावधारणमत्र इति भावः । एकान्तवादिनोऽप्येवं स्यादिति चेत्; अत्राह--**अनभिमत** इत्यादि । **स्यात्कारमन्तरेण** इत्यनुवर्त्तते । यतोऽयमर्थः--स्यात्कारमन्तरेण ज्ञानं प्रमाणमेव **इत्युच्यमाने** येनात्मना तत्प्रमाण**मनभिमतं** परस्य **तेनापि प्रसज्येत** प्रमाणमिति । कुतः ? इत्यत्राह--**अकिञ्चित्करादेः** इत्यादि । स्वापादौ बोधोऽ**किञ्चित्करः** प्रवृत्त्यनङ्गत्वात् । मत्र तदभावे प्रबोधोऽनुपादानः स्यात् । जाग्रच्चित्तोपादान इति चेत्; समानसमयसुप्तपित्रादि विधोपादानः कुतो नस्यात् ? भिन्नकालत्वात्; इतरत्र समानम् । भिन्नसन्तानत्वात्; अन्यत्रैकः सन्तान इति कुतः ? उपादानोपादेयभावात्; अन्योऽन्यसंश्रयः; तथाहि--विवक्षितजाग्रच्चित्तप्रबोधयोः एकसन्तानत्वे सिद्धे सति उपादानोपादेयभावः, तत्र सति एकसन्तानत्वमिति । तत एव पितापुत्रजाग्रच्चित्तप्रबोधयोः एकः सन्तानोऽस्तु । तदभावान्नेति चेत्; स कुतो मतः ? भिन्नसन्तानत्वात्; अयमपरोऽन्योऽन्यसंश्रयः--तदभावे भिन्नसन्तानत्वम्, अतश्च तदभावः । अथ भिन्नशरीरवर्त्तित्वात् न जनकजाग्रच्चित्तं जन्यप्रबोधोपादानकारणम्; तर्हि सुप्तशरीरचित्तात् स्वप्रान्तिकशरीरचित्तं तस्माच्च सुप्तदेहे चित्तम् स्वापशरीरप्रबोधचित्तं वाऽचेतनोपादानं स्यात् । कथं वा ऐहिकदेहचित्तात् परलोकदेहचित्तम् ? § 3799

किंच, देवदत्तजाग्रत्सुप्तप्रबुद्धशरीरैकत्वं भेदैकान्ते [कथम्भवति । ?] उपादानोपादेयभावात्; अत एव अन्यत्राप्यस्तु । यदि पुनः भिन्नदेशयोः जनकापत्यशरीरयोः न उपादानोपादेयभावः; सुप्तस्वप्रान्तिकदेहयोर्न स्यात् । अन्यत्र सुप्तस्य अन्यत्र प्रबोधश्च, चित्तयो[ः] भिन्नदेशयोरपि उपादानोपादेयभावो न शरीरयोः इति चिन्त्यमेतत् । § 3800 /ms

स्यान्मतम्--पितृशरीरे तदवस्थ एव ततः कथम् उपादेयमपत्यशरीरं जायत इति; कथं सुप्तशरीरे तदुच्छ्वासादौ वा तदवस्थे स्वप्रान्तिकशरीरोच्छ्वासादिकम् ? तन्न किञ्चिदेतत् । § 3801

665/mkj

अथ मतम्--विवक्षितजाग्रच्चित्तानुकारित्वदर्शनात् प्रबोधस्य तदेतदुपादानम् । तथाहि— रुष्टस्य सुप्तस्य मूर्च्छितस्य वा तदनुरूप एव प्रबोधो लक्ष्यते, पुनः शस्त्रादिग्रहणादिना इति; तन्न; नियमाभावात् । कदाचित् प्रसन्नस्य व्यामोहवतो वा [प्रबो]धस्य दर्शनात् । कदाचित् कथं[चित्] तदनुकारित्वम् अन्यत्रापि । तथाहि--गर्भे शुक्रशोणितसंपातानन्तरं कुतश्चिन्

/ms

१ निय] निश्चितं प्रामाण्यम् ।
८ त्र] अ[[स्वापादौ ।]]त्र
९ विधो] दिचित्तो
१० त्वात्] इति चेत्; ।
१० त्वात्] उपादानोपादेयाभावात् ।
११ न्तान] उपादानोपादेयभावः ।
११ भावात्] इति चेत्; ।
१४ त] उपादानोपादेयाभावात् ।
२६ इति] चेत्; ।
२७ म्] जायते ।

मृते पितरि कालान्तरादौ पुनरपत्यं जायमानं चेतसापि तदनुकारि प्रतीयते । अपि च, यदि दीर्घकालव्यवहितमपि उपादानकारणम्; ज्ञानस्य आलम्बनकारणं तथाविधं किन्न स्यात् ? भवतु को दोष इति चेत्; भ्रान्त्यभावः, तैमिरिके अन्यदेशादेः केशोण्डुकादेः प्रतिभासनात् । व्यवहारी नैवं मन्यते इति चेत्; व्यवहिता[त्] जाग्रच्चित्ता[त्]प्रबोधमप्यसौन मन्यत /ms इति समानम् । न हि सुप्तस्य व्यवहारी मृतव्यवहार ना च चशति किन्तु विशिष्टाकारदर्शनात् चैतन्यमनुमिनोति । स्वयमनुपलक्षितं तत्तत्र कथमस्तीति चेत् ? मानसमध्यक्षं तथाविधं कथमस्ति ? यथा तत् आगमे पठ्यते तथा स्वापादिचेतनापि । नचानयोरवस्थयोः विशेषः । सोक्ष्यं सोपगत् *मनुपलक्षितम् अस्ति इति वदति न परोपगतमिति स्वेच्छाचारी । § 3802

ननु नीलमिदं पीतमिदमिति निर्णयात्मकं मानसं प्रत्यक्षं लक्षितमेवास्ते इत्यपरः; उक्तमत्र— इन्द्रियव्यापारदशायां तत्कल्पनेइन्द्रियजमेव तत् इत्यस्यैव नामान्तरकरणम् । न च अन्या रूपाद्यवभासिनी दशाऽस्ति, यत्कल्पना स्यात् । सत्यस्वप्रदशा इति चेत्; तत्र तर्हि पूर्वं पश्चात् चाक्षु[ष]व्यापाराप्रतीतेः **इन्द्रियज्ञानेन जनितम्** न्यायबि° १ । ६ इति व्याहन्यते । § 3803

कथमेवं योगिप्रत्यक्षं तत्प्रत्यक्षं न स्यात् ? अथ अभ्यासदशायां मानसं तदिष्यते; तत्रेदं चिन्त्यते--प्राप्यभाविविषयम्, वर्त्तमानविषयं वा ? प्रथमपक्षे तदेव तत्र प्रमाणं नेन्द्रियजमिति अप्रामाण्यमस्य विकल्पवत् । इतरत्र मानसस्याप्रामाण्यम् अप्रवर्त्तकत्वात् । अपि[च,] वर्तमाने अक्षाणां व्यापारः तत्र मानसम्, भाविनि न तद्व्यापारः तत्र इन्द्रियजम् इति व्याघातो महानिति । § 3804

स्यान्मतम्--इन्द्रियव्यापारावस्थायां प्रत्यक्षद्वयं मानसम् इन्द्रियजं च सदा प्रवर्त्तते इति; तर्हि नैयायिकस्येव सौगतस्यापि अस्य सर्वदा द्विःप्रतिभासं[भवेत्] रूपादीनाम् । अथ मनुषे यदुत अनिर्णयात्मना मान- /ms सेसि तिरस्कारादिन्द्रियज्ञानमविकल्पमनुपलक्षितमास्ते तथा स्वापादिसंवेदनं तथाविधं मिद्धदितिरस्कृतमस्तु इति साधूक्तम्--स्वापादिबोधः इति । स आदिर्यस्य संशयविपर्यासकरस्य स तथोक्तः तस्यातिचारणात् विज्ञानाभिमतात्म[ना]पि प्रसज्येत इति । § 3805

भवतु तस्यापि प्रामाण्यमिति चेत्; अत्राह--**तद्** इत्यादि । **तस्य** [अ]किञ्चित्करादेः **अविसंवादस्य नियमेन** अवश्यंभावेन **असंभवात्** । अथ-

३ त] दीर्घकालव्यवहितम् ।
५ सौ] व्यवहारी ।
७ ति] रमारचयति
७ त] सुप्ते ।
७ त्र] स्वयमनुपलक्षितम् ।
८ त] स्वयमनुपलक्षितम् ।
८ त्] मानसमध्यक्षम् ।
१० *] स्वोपगत
१५ इति] स्वविषयानन्तरविषयसहकारिणा इन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं तन्मनोविज्ञानम् ।--न्यायबि° ।
१७ त] मानसप्रत्यक्षम् ।
२१ म्] स्वीक्रियते ।
२१ न] चाक्षुषव्यापारः ।
२६ सेसि] सेन

वा **तस्मिन् अविसंवादकस्ययो नियमः तस्याऽसंभवात्** । स्यात्कारमन्तरेण अनभिमतात्मनापप्रसज्येत इति । भवतु * तदसंभवः, तथापि तस्य 666/mkj प्रामाण्यम् अज्ञातार्थप्रकाशनादिति चेत्; अत्राह--**अनधिगत** इत्यादि । ततः सूक्तम् **ज्ञानं प्रमाणमिति** । § 3806

**नयो[ज्ञातु]र्मतं मतः** इति न व्याचष्टे सुगमत्वात् । केवलं तत्र चोद्यं परिहर्तुं कुर्वन्नाह--**नयस्य** इत्यादि । **नयस्य प्रमाणात्मकत्वे पृथक् वचन[मन]र्थकम्,** ज्ञानं प्रमाणम् इत्येतावदेव वक्तव्यम् तथा च परैकवाक्यता । तस्य तदात्मकत्वं नास्ति, ततः पृथग्वचनमिति चेत्; अत्राह--**अन्यथा** प्रमाणात्मकत्वाभावप्रकारेण **कथं तेन नयेनाधिगमो नाम** स्वार्थव्यवसायो नाम **यतस्तेन** अधिगमा[त्] [प्रमा]**णनयैरधिगमः*** तत्त्वार्थसू० १ । ६ **प्रतिपाद्येत** त त्त्वा र्थ सू त्र कृ ता । नहि अप्रमाणेन कस्यचिदधिगमः, प्रमाणपरीक्षानर्थक्यप्राप्तेः इति भावः । तत्रोत्तरम्--**न** इत्यादि । यदुक्तं परेण **तन्न;** कुतः ? इत्याह--**ततो** नयात् **तत्त्वस्य** जीवादेः **अधिगमोपपत्तेः** । एतदपि कुतः ? इत्याह--**तत्परीक्षालक्षणत्वात्** तस्य जीवादेः परीक्षा /ms विचारः सैव लक्षणं स्वरूपं यस्य तस्य भावात् तत्त्वात् **नयस्य** इति, ततः तदधिगमोपपत्तिः । कुत इति चेत् ? अत्राह--**द्रव्य** इत्यादि । **द्रव्यार्थिकपर्यायार्थिकयोः** नययोः **द्वयेन** द्वयस्य वा **विचारे** सति **परमार्थप्रतिपत्तेः** परमार्थस्य परमार्था वा प्रतिपत्तिः तस्याः **अविरोधात्** । सुविचारितं तत्त्वं सुस्थिततरं भवतीति परीक्षकन्यायः । § 3807

ननु यदि ततः तदधिगतिः; तर्हि प्रमाण[अत्र प्रतिः घृष्टा ।त्वापत्ति]स्तस्य तल्लक्षणत्वात् । तथा च अन्यचोद्यपरिहारो नान्यस्य इति चेत्; अत्राह--**स्यात् प्रमाणात्मकत्वेऽपि** इत्यादि । § 3808

...3 स्यात्प्रमाणात्मकत्वेऽपि प्रमाणप्रभवो नयः ।
विचारो निर्णयोपायः परीक्षेत्यवगम्यताम् ॥ ३
‖§ 3810

स्वयं साक्षात्कृतेऽपि विवाददर्शनात् पुनः ऊहापोहाभिप्रायमन्तरेण न तत्र तत्त्वाभिप्रायाभिनिवेशः यतः सर्वत्र तदनुष्ठानम् । प्रत्यक्षोपलम्भस्य परीक्षेतरयोरविशेषात्, तावताऽर्थसिद्धौ न कस्यचित्तत्त्वज्ञानं स्यात् । कुतः पुनस्तत्त्वज्ञानमन्यद्वेति चेत्; सुनयदुर्णयाभ्याम् । समानेऽपि साक्षात्करणे अभिप्रायभेदात् तत्त्वेतराभिनिवेशोपपत्तेः तन्निष्ठत्वात् परीक्षायाः § 3811

---

१ स्य] दस्य
२ नाप] पि
२ *] चैतन्यम् ।
४ ज्ञानं] नमेव
८ त] नयस्य ।
८ त] प्रमाणात्मकत्वम् ।
१० *] इति ।
२० त] नयात् ।
२१ स्य] नाद्यस्य

**स्यात्** भवेत् प्रमाणभावः **प्रमाणात्** अनेकान्तग्रहणरूपात् **प्रभव** उत्पादो यस्य स तथोक्तः ततो भिन्न इत्यर्थः, हेतुफलयोः कथंचिद्भेदात् । कोऽसौ ? इत्याह--**नय इति** । प्रमाणगृहीतैकदेशाव्यवसायाभिप्रायः । कस्मिन् सत्यपि ? इत्याह--**प्रमात्मकत्वेऽपि** । नयस्य तदात्मकत्वं कुतः ? इत्याह--**निर्णयोपायो नयो** गतः । सोऽपि कुतः ? इत्याह--**विवागे**यतः । ननु प्रत्यक्षादेरपि सविकल्पकवादिनो विचारो भवति, ततोऽस्य को विशेष इति चेत् ? अत्राह--**परीक्षति परीक्षा** इति नित्यः क्षणिको वा भावः अनेन प्रकारेणेति या **परीक्षा** सा नये**इत्येवमवगम्यताम्** । § 3812

667/mkj

स्यान्मतम्--प्रमाणपरिच्छिन्नार्थैकदेशे नयः, तस्य च प्रमाणत एव सिद्धेः, नहि समुदायाः तदेकदेशसिद्धिमन्तरेण सिध्यन्ति । वृक्षः प्रचलन् सहावयवैः /ms प्रचलति, ततः किं तत्र नयेन इति ? तत्राह--**स्वयम्** इत्यादि । **स्वयं** प्रतिपत्रा **साक्षात्कृतेऽपि** उपलक्षण [मेतअत्र प्रतिस्त्रुटिता ।त्, तेनाऽ]भिहितेऽपि अनुमितेऽपि **विवाददर्शनाद्** वस्तुनि **पुनः** पश्चात् **ऊहापोहाभिप्रायमन्तरेण नु[तत्रअत्र प्रतिस्त्रुटिता । त]त्त्वाभिप्राय[याभि]निवेशः** तत्त्वरुचिर्यतः **तदनुष्ठानं सर्वत्र** बहिरन्तश्च इति । तदभिप्रायमन्तरेणाऽ[पिअत्र प्रतिस्त्रुटिता । तत्त्वेऽ]तिप्रसङ्गात्, अभिमतवदनभिमतेऽपि तदभिनिवेशप्रसङ्गात् । प्रत्यक्षमेव अतिप्रसङ्गं निवारयतीति चेत्; अत्राह--**प्रत्यक्षोपलम्भस्य** प्रत्यक्षेण दर्शनस्य **परीक्षेतरयोरविशेषात्** कारणात् **ताव[ता]**तदुपलम्भमात्रेत्यै**वार्थसिद्धौ** अङ्गीक्रियमाणायां **तत्त्वज्ञानं न कस्यचित्** परीक्षकस्य इतरस्य वा **स्यात्** इतरस्मात् परीक्षको न भिद्येतेति परीक्षाऽनर्थिका भवेत् इति यावत् । परः पृच्छति--**कुतः** कारणात् **पुनः तत्त्वज्ञानमन्यद्वाऽ**तत्त्वज्ञानं वा इत्येवं **चेत् ?** अत्रोत्तरमाह--**सुनयदुर्णयाभ्याम्** इति । **सुनयेन** तत्त्वज्ञानं **दुर्णयेन** अतत्त्वज्ञानम् । सौगतादिवदेतदिति चेत्; अत्राह--**समानेऽपि** जैनैकान्तवादिनोः **साक्षात्करणे अभिप्रायभेदात्** अभिप्रायस्य ज्ञावभिसत्त्वेः अर्थानुसारित्वेतरत्वकृतविशेषात् **तत्त्वेतराभिनिवेशोपपत्तेः** । तदपि कुतः ? इत्याह--**तन्निष्ठत्वात्** नयस्वरूपत्वात् **परीक्षायाः** । § 3813

तद्भेदं सुनयदुर्णयत्वं च दर्शयन्नाह--**तत्र** इत्यादि । § 3814

...4 तत्र मूलनयौ द्रव्यपर्यायार्थगोचरौ ।
मिथ्यात्वं निरपेक्षत्वे सम्यक्त्वं तद्विपर्यये ॥ ४ ॥§ 3816

३ देशाव्य ] शाध्य
५ तः ] यतः
५ विवागे ] विचारो
८ ये ] नय
९ यः ] प्रवर्तते ।
१४ नु ] न
१८ मात्रेत्यै ] त्रेणै
२४ त्वेः ] ज्ञात्रभिरुचेः

परीक्षा भेदाभेदप्रतिष्ठा द्रव्यपर्यायविषयद्वैविध्यात् नयद्वैविध्यमाह । तत्र अन्योऽन्याविनाभावप्रतिपत्तिः प्रमाणम् । इतरथा न प्रमाणपरीक्षा । सत्येव असत्त्वप्रतिपत्तेर्दुर्णयता । § 3817

तत्र नयसामान्यलक्षणे, **मूलनयौ** नैगमादिप्रकृतिभूतनयौ **द्रव्यपर्यायार्थौ** द्रव्यं पर्यायश्च अर्थो **गोचरो** ययोः तौ तथोक्तौ--द्रव्यार्थोद्रव्यार्थिकः प- /ms
र्यायार्थि पर्यायार्थिक इत्यर्थः । **मिथ्यात्वं तयोः निरपेक्षत्वे** परस्परापेक्षाभावो **सम्यक्त्वं तद्विपर्यये** निरपेक्षत्वविषये सापेक्षत्वविषये सापेक्षत्व इत्यर्थः । तथा चोक्तम्-- § 3818

१668/mkj

*य एव नित्यक्षणिकादयो नयाः मिथोऽनपेक्षाः स्वपरप्रणाशिनः ।
त एव तत्त्वं विमलस्य ते मुनेः परस्परेक्षाः स्वपरोपकारिणः ॥ § 3820

बृहत्स्व॰ श्लो॰ ६१ § 3821

कारिकां विवृण्वन्नाह--**परीक्षा** इत्यादि । **परीक्ष**सामान्यनयस्वरूपम् इत्यर्थः । केषामिति किं विषया सा ? इत्याह--**भेदाभेदप्रतिष्ठा [भेदो]भेदयोः** विशेषसामान्ययोः **प्रतिष्ठा** स्थितिर्यस्याः, **द्रव्यपर्यायविषयद्वैविध्यात् नयद्वैविध्यमाह । सम्यक्त्वम्** इत्यादि व्याचष्टे । **तत्र** तस्मिन् नयस्वरूपतद्भेदे सति **अन्योऽन्यं** परस्परं द्रव्ययर्यौ **रविनाभावस्य प्रतिपत्तिर्**यस्यां परीक्षायां सा **अन्योऽन्या[विना]भावप्रतिपत्तिः** । सा किम् ? इत्याह--**प्रमाणं** मुनय इति यावत् । **मिथ्यात्व** मित्याद्य यदि सति तेरथा **त्वमि**त्यादि व्याचष्टे--**इतरथा** अन्योऽन्याविनाभावप्रतिपत्तिप्रकारेण **इतरथा न प्रमाणपरीक्षा** इति । कुतः ? इत्याह--*[**सत्येव** इत्याह--]**सत्येव** इत्यादि । **सत्येव** विद्यमान एव पर्यायार्थिकस्य[द्रव्ये]द्रव्यार्थिकस्य पर्याये **असत्त्वप्रतिपत्तेः** न प्रमाण-

१. तुलना--निरपेक्षा नया मिथ्या सापेक्षा वस्तुतेऽर्थकृत् ।--आप्तमी॰ श्लो॰ १०८ । तम्हा सव्वे वि णया मिच्छादिट्ठी सपक्खपडिबद्धा । अण्णोण्णणिस्सि+आ उण हवंति सम्मत्तसब्भावा ॥--सन्मति॰ १ । २१ ।

२ म्]
तुलना--धर्मान्तरादानोपेक्षाहानिलक्षणत्वात् प्रमाणनयदुर्णयानां प्रकारान्तरासंभवाच्च । प्रमाणात् तदतत्स्वभावप्रतिपत्तेः नयात् तत्प्रतिपत्तेः दुर्णयात्तदन्यनिराकृतेश्च ।--अष्टश॰, अष्टस॰ पृ॰ २७९ । लघी॰ श्लो॰ ३० । सदेव सत्स्यात् सदिति त्रिधार्थो मीयेत दुर्नीतिनयप्रमाणैः ।--अन्ययोगव्य॰ श्लो॰ ८ ।
६ र्यायार्थि] यार्थः
६ रापेक्षाभावो] वे
७ ये] निरपेक्षत्वविपर्यये
१२ रीक्ष] क्षा
१६ र्यौ] पर्यययो
१७ य] सुनय
१९ अन्योऽन्याविनाभाव] नाभावाभाव
२० *] सत्येव इत्याह इति पुनर्लिखितमत्र व्यर्थम् ।

म् । **अत एव** अस्मादेव कारणात् **दुर्णयता** । सत्येव असत्त्वप्रतिपत्तिं दर्शयन्नाह--**द्रव्यार्थिकस्य** इत्यादि । § 3822

...5 द्रव्यार्थिकस्य पर्यायाः सन्त्येवात्राविवक्षिताः ।
पर्यायार्थिकस्यापि सद् द्रव्यं परमार्थतः ॥ ५
॥§ 3824

[द्रव्यार्थिकस्य द्रव्यवि]षयप्रधानाभिप्रायस्य **पर्यायाः** स्थासशिविकादिभेदाः **सत्येव** *अत्र विद्यन्त एव, *तदभावे द्रव्यस्याप्यभावः इत्युक्तम् । ततो दुर्णयता । नयप्रमाणयोरविशेषः स्यादिति चेत्; अत्राह--**अविवक्षिता** गु-
/ms णीभूतास्ते तस्य सन्ति, प्रमाणे तूभयं प्रधानमिति विभागः । तत्किम् ? इत्याह--**सद्** विद्यमानं **परमार्थतः** । कस्य ? इत्याह--**पर्यायार्थिकस्य** प-र्या[य]प्रधानाभिप्रायस्य । **अपिः** अभिप्रायसमुच्चये । अत्राप्यविवक्षितमिति द्रष्टव्यम् । तदाभा[तदभावे पर्यायस्यापि]विलोपः । § 3825

कारिकायाः सुगमत्वाद् व्याख्यानं न कृतम् । § 3826

यदि द्रव्यार्थिकस्य पर्यायाः सन्ति पर्यायार्थिकस्य द्रव्यम्, कथं स-त्प्रतिक्षेप इति चेत् ? अत्राह--**संविदाम्** इत्यादि । § 3827

...6 संविदामाकारभेदेषु विभ्रमप्रतिभासिषु ।
विसंवादोपलब्धिर्वा प्रसिद्धवितथात्मसु ॥ ६ ॥§ 3829

अविशेषेण गुणपर्यायेषु मिथ्यात्वप्रतिपत्त्या द्रव्यार्थावधारणं क्वचित् केषु-चित् वा प्रत्यभिज्ञाविसंवादात् सर्वेण तद्विसंवादात् पर्यायावधारणं च दुर्णयः तत्त्वप्रतिक्षेपात् । § 3830

**संविदां** ज्ञानानां **विसंवादोपलब्धिः** । क्व ? इत्याह--**आकारभेदेषु** ग्राह-कसंवेदनाकारविशेषेषु, **संविदामिति** सम्बन्धः । नहि एकस्य अनेकं रूपं
669/mkj परमार्थसत् युक्तम्, विरोधात् । एतत् शुद्धविज्ञानवादिमतापेक्षया उक्तम् । बाह्यार्थनयापेक्षया आह--**विभ्रम** इत्यादि । विभ्राम्यतीति **विभ्रमः** पाचादिल-क्षणोऽत **प्रतिभासो** येषां मन्त्राद्युपप्लुतोपलब्धमृच्छकलादीनां तेषु । **वा** इति समुच्चये । किंभूतेषु ? **प्रसिद्धवितथात्मसु** । **प्रसिद्धः** परीक्षकेतरलोक-विख्यातो **वितथोऽसत्यः आत्मा** येषां तेषु इति । § 3831

---

६ *] सन्त्येव
६ *] पर्यायाभावे ।
१३ म्] अस्ति ।
१४ त्प्र] तत्प्र
२३ पा] का
२४ णोऽत] णोऽन्तः

तदुपलब्धिः किम् ? इत्याह--**अविशेषेण** इत्यादि । **अविशेषेण** साकल्येन **मिथ्यात्वप्रतिपत्तिः** । क्व ? इत्याह--**गुणपर्यायेषु** । तथाहि--अन्तः संवित्सुखादिभेदः बहिश्च घटपटादिभेदः मिथ्या भिन्नप्रतिभासवेद्यत्वात् ग्राह्याद्याकारद्विचन्द्रादिभेदवदिति । तया[कि]म् ? इत्याह--[तया]मिथ्यात्व-प्रतिपत्त्या **द्रव्यार्थावधारणं** द्रव्यमेव अर्थः तस्य अवधारणम्--तदेव अस्तीति । § 3832

एवम्मन्यते--यथा ग्राह्याद्याकारभ्रमेऽपि न स्वसंवेदनभ्रमः स्व-प्रादिभ्रान्तावपि न जाग्रद्भ्रान्तिः तथा सकलभेदविभ्रमेऽपि न सत्तामात्रभ्रान्तिः । ततो यदुक्तं प्र ज्ञा क रे ण— **प्रतिभासनेऽपि सुखादिनीलादेः वितथत्वे द्रव्ये कः समाश्वासः** ? इति; तन्निरस्तम्; **क्वचिद्** बहिरन्तर्वा **केषुचित्** वा अर्थान्तरेषु लूनपुनर्जातनखादिषु **प्रत्यभिज्ञाविसंवादात् सर्वेण** देशान्त-रादिप्रकारेण **तद्विसंवादात् पर्यायावधारणं च** । किम् ? इत्याह--**दुर्णयः** । पूर्वो द्रव्यार्थिकनयाभासः परः पर्यायार्थिकनयाभास इति भावः । कुतः ? इत्याह--**तत्त्वस्य** जीवादेः **प्रतिक्षे** पान्निरासात् । § 3833 /ms

द्रव्यार्थावधारणं दर्शयन्नाह--[शुद्धेत्यादि] । § 3834

...7 शुद्धद्रव्यार्थिकस्यास्ति सन्मात्रं परमार्थतः ।
नाकारभेदो न रूपादिः न क्रमो न सुखादयः ॥ ७ ॥§ 3836

न खलु विज्ञानं सद्भावं व्यभिचरति विशेषेषु व्यभिचारात् । सन्मात्रस्य तद्विशेषाविनाभावात् । न चैवं भेदाव्यभिचारि ज्ञानमस्ति इति शुद्धद्रव्य-प्ररूपणात् । पर्याय[निराकरणात् दुर्णयः] यथा आरामं तस्य पश्यन्ति न तं पश्यति कश्चन बृहदा० ४ । ३ । १४ इति तदाश्रयं दर्शनान्तरम् । शुद्धपर्यायनयः पुनः यदि स्वभावभेदेऽपि भावैकत्वं न क्वचित् कथञ्चिन्नानात्वं सर्वथा अद्वैतप्रसङ्गात् इति सर्वथा द्रव्यप्रतिक्षेपे पर्याय प्ररूपणक्रमोऽयं दुर्णयः । सर्वथा अनयोरतादात्म्यनैगममाश्रित्य दर्शनान्तरम् अविवक्षित-तादात्म्यलक्षत्वात् नैगमस्य । § 3837
670/mkj

**शुद्धं** पर्यायमलकलङ्कविकलं **द्रव्यमेव अर्थोऽस्यास्तीति शुद्धद्रव्यार्थिकः तस्यास्ति** । किम् ? इत्याह--**सन्मात्रं परमार्थतो** न संवृत्या, **नाकार-**

---

२५ स्य] तुलना--अन्योऽन्यगुणभूतैक-भेदाभेदप्ररूपणात् । नैगमोऽर्थान्तरत्वोक्तौ नैगमाभास इष्यते ॥ --लघी० श्लो० ३९ । तत्र संकल्पमात्रस्य ग्राहको नैगमो नयः । यद्वा नैकं गमो योऽत्र स सतां नैगमो मतः ॥ धर्मयोः धर्मिणोर्वापि विवक्षा धर्मधर्मिणोः ।--त० श्लो० पृ० २६९ । नयवि० श्लो० ३३-३७ । सन्मति० टी० पृ० ३१० । नयचक्र० गा० ३३ । तत्त्वार्थसा० पृ० १०७ । प्रमाणनय० ७ । ७ । स्या० म० पृ० ३११ । जैनतर्कभा० पृ० २१ ।

**भेदो**ऽस्ति न ग्राह्यादिविशेषः स्थूलादिविशेषो वा **न रूपादिः न क्रमो** हेतुफलभावो **न सुखादयः परमार्थतः**, अपि तु संवृत्या इति । § 3838

कारिकां विवृण्वन्नाह--**न खलु विज्ञानं सद्भावं सत्त्वं व्यभिचरति** । कुतः ? इत्याह— **विशेषेषु** इत्यादि । सत्त्वव्यभिचारे दूषणमाह--**सन्मात्र** इत्यादि । तर्हि विज्ञानं विशेषमपि न व्यभिचरति इति चेत्; अत्राह--**न चैवम्** इत्यादि । **एवं सन्मात्र[स्य] तद्विशेषावि[नाभावात्] भेदाव्यभिचारि** ना ***ज्ञानमस्ति** तत्र व्यभिचारप्रतिपादनात् इत्येवं **शुद्धद्रव्यप्ररूपणात्** । कुतः /ms दुर्णयः इति घटना । कुतः ? इत्याह--**पर्याय** इत्यादि । निदर्शनमाह--**यथेत्यागम** ***माटोपं** **तस्य** सत्तामात्रद्रव्यस्य **पश्यन्ति** जनाः **न** तं सद्भावं **कश्चन पश्यतीति तदाश्रयं** [स]न्मात्राश्रय**दर्शनान्तरम्** । § 3839

पर्यायार्थिकदुर्णयाभिप्रायं दर्शयन्नाह--**शुद्धपर्यायनयः पुनः** इत्यादि । **स्वभावभेदेऽपि** स्वरूपनानात्वेऽपि **यदि भावैकत्वं न क्वचित्** पटादौ **कथंचिद्** देशादिभेदप्रकारेण **नानात्वम्**, कुतः ? इत्याह--**सर्वथा** सर्वेण घटादिप्रकारेण **अद्वैतप्रसङ्गात्** । लब्धं फलं दर्शयन्नाह--**सर्वथा** इत्यादि । **इति एवं पर्यायप्ररूपणक्रमोऽयं दुर्णयः** । कस्मिन् सति ? इत्याह--**द्रव्यप्रतिक्षेपे सति** । § 3840

नैगमाभासं दर्शयन्नाह--**सर्वथा** इत्यादि । सर्वेण देशादिप्रकारेण **अनयोः** द्रव्यपर्याययोः **अतादात्म्यात्** नैगमः तमाश्रित्य **दर्शनान्तरं** वैशेषिकमतम् । कुतः ? इत्याह--**[अ]विवक्षित** इत्यादि । द्रव्यपर्याययोर**विवक्षितं** सदपि नार्पितं यत् **तादात्म्यं** तल्**लक्षणत्वात् नैगमनयस्य** । § 3841

तद्दर्शनान्तरस्वरूपं दर्शयन्नाह--**सामान्य** इत्यादि । § 3842

…8 सामान्यसमवायानामात्मादीनां च नित्यता ।
तत एव तत्संख्यादेर्नित्यत्वं शेषमन्यथा ॥ ८ ॥ § 3844

द्रव्यार्थिकनयमाश्रित्य द्रव्यस्य तत्संख्यादेः सामान्यसमवायानां च नित्यत्वं शेषाणामनित्यत्वं च केचिन्निगच्छन्ति कार्यद्रव्यकर्मगुणविशेषाणामनित्यत्वाभ्युपगमात् । न तत् सामान्यं वस्त्वन्तरमेव युक्तम्, संविदां विषयसारूप्यमिव । न हि वस्त्वन्तरभेदा भावाः तद्वन्तः नाम स्युः । कथमुपकार्योपकारकभावमन्तरेण तद्वत्त्वमतिप्रसङ्गात् । अपरिणामिनस्तावद् वस्तुत्वपेव न संभाव्यम् । न तादृशस्य क्वचिद् वृत्तिः क्वचिदवृत्तिः वा । सदादिप्रत्ययकर्तृत्वमकर्तृत्वं च क्वचित् कदाचित् कथंचिन्न संभाव्यम् । इति दुर्णयः । सत्तावत्

२ यः] सन्तीति सन्बन्धः ।
७ *] न
७ त्र] भेदेषु ।
९ *] यथेत्यादि । आराम
१० तीति] आरामं तस्य पश्यन्ति न तत् पश्यति कश्चन ।--बृहदा० ४ । ३ । १४ ।
१० य] यं

जात्यन्तराणां सर्वगतत्वे वृत्तिप्रत्ययसङ्करः । स्वविषयसर्वगतत्वे निष्क्रियस्य प्राक् तत्रासतां अर्थोत्पित्सुदेशप्राप्तिर्न स्यात् । § 3845
१671/mkj

**सामान्यानि** च **समवायश्च तेषाम् आत्मादीनाम्** वा * **आदि**शब्दात् अत्मव्यतिरिक्तसकलमूलद्रव्यपरिग्रहः । किम् ? इत्याह--**नित्यता** सदकारणत्वात् इति मन्यते । **[तं]त एव** नित्यद्रव्येषु वर्त्तमानस्य **संख्यादेः नित्यत्वं** संख्यादिनित्यत्वम् । अत्र आदिशब्देन परिणामादि परिग्रहः । एतेन नित्यव्यापिद्रव्यवृत्तयोऽन्त्यविशेषा व्याख्याताः । **शेषं** कथिता**दन्यथा** अनित्यम् इति । § 3846

कारिकां व्याख्यातुमाह--**द्रव्यार्थिकनयम्** इत्यादि । नित्यत्वे भावानां /ms द्रव्यार्थिकस्यैव व्यापारो न नैगमस्य अन्यथाभूतत्वात् अतो **द्रव्यार्थिकनयमाश्रित्य** इत्युच्यते । **द्रव्यस्य** आत्मादेः **तत्संख्यादेः सामान्यसमवायानां च नित्यत्वम् शेषाणाम् अनित्यत्वं च, च** इत्यवधारणे सामान्यादिषु **केचन** नैयायिकादयो **निगच्छन्ति** प्रतिपद्यन्ते । कुतः शेषाणा ने हा ह **कार्यद्रव्य** इत्यादि । **कार्यद्रव्यम्** प्रागसत् सत्तासमवायिकारण समवायि या द्रव्यम्, **कर्म** उत्क्षेपणादि **गुणविशेषाः** कार्यद्रव्यगताः सर्वे रूपादयः नित्यद्रव्यगताः संख्यादिभ्योऽन्ये बुद्ध्यादिरक्तादयः **तेषाम् अनित्यत्वाभ्युपगमात्** । किं सामान्यम् ? इत्याह--**तत्र** इत्यादि । तेषु सामान्यादिषु मध्ये समानानां सदृशानां भावः **सामान्यम्** तद् विशेषेभ्यो भिन्नमेव इति यौगाः । तत्राह--**न तत्** सामान्यं **वस्त्वन्तरमेव** व्यक्तिभ्यो भिन्नमेव **युक्तं** कथञ्चिद्भिन्नं तु युक्तम् इति **एव**कारेण दर्शयति एकत्र प्रमाणाभावाद् अन्यत्र विपर्ययात् । कथं तत्तर्हि इति सौगतः; तत्राह--**संविदाम्** इत्यादि । **संविदां** ज्ञानाना**मिव विषयसारूप्यं** यथा ज्ञानानां विषयेण सारूप्यं तथा सामान्यमिति विचारित[म]सकृत । कुतो न तद् वस्त्वन्तरमेव इति चेत् ? अत्राह--**नहि** इत्यादि । **[हि]** यस्मात् **न वस्त्वन्तरेण भेदाः** परस्परविलक्षणा **भावाः** समाना इतरथा चन्द्रमसैकेन सर्वेऽपि उडुविशेषाः समाना इति [न] तेषु तारोपति प्रत्ययः । § 3847

स्यान्मतम्--न तेषु विधुर्वर्तते, सामान्यं तु स्वपि शेषवृत्ति, ततोऽयमदोष इति; तत्राह--**तद्वन्तः** सामान्यवन्तो **भेदा नाम स्युः** । यथा अव्यवन्नगरं /ms तद्वन्त एव इति चेत्; अत्राह--**कथं च** इत्यादि । केन च प्रकारेण न

१. आटोपो विस्तारः तम् ।

३ *] च
४ स] सत्वे सति कारणरहितत्वात् इति ।
६ रिणामादि] परिमाणादि
७ विशेषा] विशेषा अपि नित्या इति ।
१३ शेषाणा] णां
१३ ह] न ? इत्याह--
१४ ण] णं
२० ए] सर्वथा भेदे ।
२० अ] कथञ्चिद्भेदे ।
२६ ति] तारा इति
२७ तेषु] तारागणेषु ।
२७ पि] स्वपि
२९ रं] ?

केनचिद् **उपकार्योपकारकभावमन्तरेण** वस्त्वन्तरेण **तद्वत्त्वम् अतिप्रसङ्गात्** विन्ध्यस्य साध्येन तद्वत्ता स्यादि[त्य]तिप्रसङ्गः । § 3848

ननु भवन्मते--रूपतद्विज्ञानयोः उपकार्योपकारकभावमन्तरेणापि भवति तद्वत्ता रूपस्य ज्ञानम् । अथ तत्र अयमेव तद्भावो यो ग्राह्यग्राहकभावः; जातिव्यक्त्योरपि प्रकाश्यप्रकाशकभाव एव तद्भावोऽस्तु । न हि योग्यतात्र राजदण्डवारिता । जात्या वा व्यक्तीनामुपकारः--तत्र विशिष्टबुद्धिजननमिति चेत्; अत्राह--**अपरिणामिनो** नित्यैकरूपस्य सामान्यादेः **तावद्वस्तुत्वमेव** सत्त्वमेव **न संभाव्यं** प्रमाणाभावात् । नहि खण्डादिभ्यो भिन्नस्य नित्यस्य 672/mkj निरंशस्य अमूर्त्तस्य सामान्यस्य प्रतीतिरस्ति यतः तस्य ता व्यञ्जिकाः स्युः, सदृशात्मनां तासां स्वबुद्धौ प्रतिभासनात् । नापि सामान्यं तथाविधं तासु प्रत्ययविशेषमुपजनयदुपलब्धयेन तावता दुपक मुच्यते, परिणामिनो भावस्य स्वयं चक्षुरादिप्रत्यये प्रथानात् । § 3849

अथ मतं रोपकार्योपकारकभावाद् भेदानां तद्वत्तमपि तु सामान्यस्य तत्र समवायादिति; तत्राह--**तादृशस्य** इत्यादि । **तादृशस्य** असंभावितवस्तुत्वस्य **क्वचित्** शावलेयादौ **वृत्तिः** समवायः सम्बन्धः **क्वचित्** कर्कादाव**वृत्तिः** **न** संभाव्या इति सम्बन्धः । यदि हि तादृशं तदुपलब्धं भवेत् तदा तत् /ms क्वचिद्वर्त्तते न वा इति कल्पनमर्हति, नान्यथा वन्ध्यासुतवत् । अनेन तत्र तत्समवायसाधनं निरस्तम् । यदा हि तद्वर्त्तमानं तत्रोपलब्धं भवति तदा इह जातिर्वर्त्तते इति प्रत्ययात् तद्युक्तं न वा । एवं कदाचित् पिण्डोत्पत्तिसमये वृत्तिः तद्विनाशसमये अवृत्तिः न संभाव्या । न परिणाममन्तरेण सम्बन्धेतररूपद्वयम् एकस्य । § 3850

ननु पिण्ड एव उत्पद्यते विनश्यति वा न सामान्यं समवायो वा, न वाऽन्यस्य उत्पत्त्यादेरन्य[त्] तद्वत्; अतिप्रसङ्गात् । अतो यथा कर्तृत्वाकर्तृत्वभावेऽपि न तद्भेदः तथा वृत्त्यवृत्तिभावेऽपि इति चेत्; न सदेतत्; यतः पूर्वरूपापरित्यागे इदमिह वर्त्तते न वर्त्तते चेति ततः प्रत्ययायोगात्, सर्वदा वा तत्प्रत्ययप्रसवः, नित्यस्य अपेक्षायोगात् । कथंचिन सर्वात्मना वृत्तिरवृत्तिर्न संभाव्या । § 3851

नन्वेकस्य सदादिप्रत्ययकर्तृत्वाकर्तृत्ववत् वृत्त्यवृत्ती स्यातामिति चेत्; अत्राह— **सदादि** इत्यादि । **सदादिर्यस्य** द्रव्यगुणादेः तस्य **प्रत्ययः** तस्य **कर्तृत्वं [अकर्तृत्वं]** च **क्वचित् कदाचित् कथंचिन्न संभाव्यम्** इत्येवं **दुर्णयः** । § 3852

---

२ साध्येन] सह्येन
४ द्भावो] उपकार्योपकारकभावः ।
४ भावः] इति चेत् ।
९ ता] व्यक्तयः ।
१० त] नित्यम् ।
११ ब्ध] ब्धं
११ क] तावता तदुपकारक
१३ रो] नो
१३ त्त] त्व
१९ वा] वक्तुं शक्येत ।
२३ त्] अन्यो भावः तद्वान् भवितुमर्हति ।
२६ थंचिन] कथंचन

किंच, सामान्यं सर्वगतम्, स्वव्यक्तिसर्वगतं वा भवेत् ? प्रथमपक्षे दूषणमाह--**सत्तावत्** महासामान्यवत् **जात्यन्तराण्यं**गोत्वादीनां **सर्वगतत्वे** अङ्गीक्रियमाणे **वृत्तिप्रत्ययसङ्करः** । यथा गोत्वस्य खण्डादौ वृत्तिः सयवायथाददित्वादेरिति वृत्तिसंकरः, तत एव तत्र गोप्रत्ययवत् दव्यादि[प्र]त्ययोऽपि स्यादिति प्रत्ययसङ्करः । द्वितीयपक्षे **स्वविषय** इत्यादि । **स्वविषयसर्वगतत्वे** स्वगोचरे व्यक्तिव्यापित्वे क्रियावत्त्वमन्तरेण **निष्क्रियस्य** इत्यर्थः । **अर्थो** द्रव्यादिः **उपित्सुर्यस्मिन् देशे** स तथोक्तः, कामचारेण विशेषणविशेष्यभावः /ms इति उत्पित्सुपदस्य विशेष्यत्वं स चासौ देशश्च **तत्प्रप्तिःप्रागुत्पत्तेः पूर्वं तत्र देशेऽसतां** जात्यन्तराणां **न स्यात्** । तदुक्तं स म न्त भ द्र स्वा मि भिः-- § 3853

*सामान्यं समवायश्च एकत्र समवाप्तितः ।
अन्तरेणाश्रयं न स्यात् नाशोत्पादिषु को विधिः ॥§ 3855

आप्तमी० श्लो० ६५ इति । § 3856

अतश्च न तद् वस्त्वन्तरमेव युक्तमिति दर्शयन्नाह--**सत्स्वभावोपलब्धौ** इत्यादि । § 3857

673/mkj

...9 सत्स्वभावोपलब्धौ किं सत्तया समवायिनाम् ?
असतां सत्ताभिसम्बन्धे नाभावः कस्यचित् क्वचित्
॥ ९ ॥§ 3859

स्वतः सतो [न सत्तासमवायः] सामान्यसमवायवदिति । यदि पुनः [स्यात्] स्वपक्षघाती कथमनुन्मत्तः ? कश्च द्रव्यादीनां स्वतः परतो वा सद्भावे विशेषः यतः सत्तासम्बन्धेन अर्थो विशेष्येत । यदि पुनः तयोः नित्यत्वात्; उत्सन्नेदानीमभाववार्ता । तन्नेयं परकीया वाचोयुक्तिः । सत्तावत् सामान्यान्तरेषु अयं समानश्चर्चः तन्न...परस्पर... § 3860

**सत्स्वभावः** स्वरूपं येषां ते **सत्स्वभावाः** घटादयः, अनेन सत्तातद्वतोर्व्यतिरेकं प्रत्याचष्टे, **तेषामुपलब्धौ** दर्शने सति, अनेनापि **खण्डादौ गौर्गौरिति ज्ञानं भिन्नविशेषणनिमित्तं स्वयम् अन्यथाभूते अन्यथा ज्ञानत्वात् पुरुषे दण्डीति ज्ञानवत्** इति हेतोः व्यभिचारं दर्शयति । सन्तो घटादयः इति ज्ञानस्य भिन्नविशेषणमन्तरेणापि भावात् । तत्रापि भिन्नसत्ता दिप्यत इति

---

२ राण्यं] राणां
४ दित्वादेरिति] समवायात् तथा दधित्वादेरिति
४ त्र] खण्डादौ ।
८ प्तिः] तत्प्राप्तिः
२४ ष्टे] निराकरोति ।
२७ त] दिश्यत

चेत्; अत्राह--**किं न किंचित् सत्तया** भिन्नसत्तासम्बन्धेन इत्यर्थः । केषाम् ? इत्याह--**समवायिनाम्** द्रव्यगुणकर्मणाम् । ननु स्वतः सतां तत्सम्बन्धे स्यादयं दोषो नाऽसतामिति चेत्; अत्राह--**असतां च सत्तयाऽभिसम्बन्धे** अङ्गीक्रियमाणे **नाभावः कस्यचित्** शशविषाणादेः **क्वचिद्** देशादौ भवेत् इत्युपस्कारः । § 3861

कारिकां व्याख्यातुमाह--**स्वतः सत** इत्यादि । परप्रसिद्धं निदर्शनमत्र **सामान्यसमवाय**वदिति । अन्त्यविशेषण ग्रहणं कुतो नेति चेत् ? /ms केषाम्अत्यन्तपरोक्षत्वेन परैरभ्युपगमात् । अनुमानाभासस्यापि तत्रासंभवादनिदर्शनात् । अथ योगिनां व्यापकद्रव्येषु भेदबुद्धिर्यन्निमित्ता तेऽन्त्या विशेषाः; न; तेषु स्वयमेव तद्बुद्धिभावात्, अन्यथा तत्रापि तेषां तद्बुद्धिरपरतत्पूर्विका इत्यनवस्था । § 3862

ननु सामान्यादयो न स्वतः, नापि [प]रतः सत्तासामान्ये तदन्तराभावात् तत्कथं ते निदर्शनमिति चेत् ? अत्राह--**यदि पुनः** इत्यादि । सुगममुत्तरमत्र **स्वपक्षघाती** वैशेषिकादिः **कथमनुन्मत्तः** उन्मत्त एव । सामान्यादेरभावप्रतिपादनेन सर्वाभावाभ्युपगमात् । § 3863

पुनरपि परस्य दुश्चेष्टितं चिन्तयन्नाह--**कश्च** इत्यादि । चेदि दूषणसमुच्चये **कः** न **कश्चिद्विशेषः** । क्व ? **सद्भावे द्रव्यादीनां** सत्त्वे । कुतः ? इत्याह--**स्वतः परतो वा स्यात् यतो** विशेषात् **सत्तासम्बन्धेन अर्थो** द्रव्यादिः **विशिष्येत** । तथाहि--गुणदोषदर्शनाभ्यां क्वचित् पक्षपातेतरौ सतां युक्तौ, नान्यथा । न च स्वतः सद्भावे अर्थस्य दोषम् लेशस्यापि दर्शनम् । तथाऽदर्शनमेव तद्दर्शनमिति चेत्; किं पुनः स्वतोऽसतां शशशृङ्गादीनां दर्शनमस्ति ? विरोधात् । § 3864

674/mkj

स्यान्मतम्--अर्थस्य स्वतःसद्भावे अपरसामान्याभावः सत्तादिवत् स्यादिति; न; उक्तमत्र--चित्रत्वाद्भावानाम् । कस्यचित् स्वतः सतोऽपरजातिः न शब्दस्य तथाऽदर्शनात् गुणादियोगवत् । ननु न सर्वस्य स्वतोऽसतो दर्शनमिष्यते किन्तु सत्तासम्बन्धिन इति चेत्; अत्राह— **यदि पुनः** इत्यादि । **तयोः** सत्तासमवाययोः **नित्यत्वात्** । उपलक्षणमेतत् व्यापित्वा[त्इत्यपि गृह्यते /ms ।] च **उत्सन्ना** नष्टा **इदानीमभाववार्त्ता** खरविषाणादीनामपि सत्त्वापत्तेः, यत एवं **तन्नेयं परकीया वाचोयुक्ति**रुपपद्यते इत्युपसंहारः । एतदन्यत्रातिदिशन्नाह--**सत्तावत्** इत्यादि । सत्तायामिव **सामान्यान्तरेषु** द्रव्यत्वादिषु **अयम्**

२ त] सत्तासम्बन्धे ।
७ ग्र] षग्र
८ केषाम्] तेषाम्
८ प] वैशेषिकैः ।
८ त] अन्त्यविशेषेषु ।
९ नात्] निदर्शनरूपेण अकथनात् ।
१० त] विशेषेष्वपि ।
१० तेषां] योगिनाम् ।
११ प] अपरविशेषपूर्विका ।
१२ त] सामान्यमन्तराभावात् ।
१६ चेदि] **च** इति
२० लेश] दोषलेश
२० त] दोषलेशदर्शनम् ।

अनन्तरः **समानश्चर्चः** परीक्षा । तथाहि--जीवादीनां द्रव्यादिस्वभावोपलब्धौ किं द्रव्यत्वादिना भिन्नेन ? स्वयमद्रव्यादीनां द्रव्यत्वाद्यदिसम्बन्धे नाद्रव्यादिः कश्चित् स्यात् । शेषमत्रापि समानम् । **तन्न** इत्याद्युपसंहारः । कुतः ? इत्याह--**परस्पर** इत्यादि । § 3865

सांप्रतं सांख्य नैगमाभासं दर्शयन्नाह--**द्रव्यं शुद्धम्** इत्यादि । § 3866

...10 द्रव्यं शुद्धमशुद्धं च संश्रित्यान्योऽस्ति नैगमः ।
चित्प्रधानप्रपञ्चेन यथा लक्ष्येत दुर्णयः ॥ १० ॥§ 3868

चिच्छक्तेरात्मनोऽदर्शितविषयवतो नानात्वमेकत्वं च ममाश्रित्य प्रधानं कार्यकारणभावमासाद्य महदादिक्रमेण विवर्तमानमात्मानं तदर्थं समर्पयति इति नैगमो दुर्णयः, प्रधानपुरुषयोः परिणामस्वभावव्यवस्थापनात् । तदेकपुरुषमनेकपुरुषं च अनीश्वरेतरभेदात् भिद्यते । प्रधानस्य पुरुषार्थिप्रवृत्तिसंभवेन अनीश्वरभेदः तत्प्रवृत्तेरसंभवेन सेश्वरभेदः; अपरिणामिनश्चैतन्यस्य वस्तुत्वं प्रत्युक्तम् सामान्यादिना । कादाचित्कम् कुतः...। हर्षविषादाद्यनेकाकारविवर्तज्ञानवृत्तेः प्रकृतेरपरां चैतन्यवृत्तिं कः प्रेक्षावान् प्रतिजानीते ? अनुपयोगात् । प्रकृतदर्शितविषयवतः पुरुषस्य अविकारित्वविशेषतो दुरन्वयम् । पुरुषस्य भोक्तृस्वभावनित्यत्वे प्रकृतेः भोग्यात्मनो नित्यत्वे सति तत्प्रवृत्तिनिवृत्ती इति दुरन्वयम् । प्रकृतेः परिणामे वा चिच्छक्तेरपि विवर्तः तद्दर्शितविषयत्वात् । अचेतनभेदानां सुखदुःखमेहात्मकप्रधानमित्यभिधानात्मा जातिः प्रकृतिरेव, न पुनः सर्वपुरुषाणां संवेदनजातिः सामान्यमिति दुरन्वयमेतत् । तन्न... § 3869

**द्रव्यं** पुरुषरूपम्, किंभूतम् ? **शुद्धम्** सुखादिभेदरहितम् **अशुद्धं** च महदादिपर्यायपरिकरितं द्रव्यं प्रधानलक्षणं **संश्रित्य अन्यो** नैयायिको नैगमात् भिन्नोऽस्ति **नैगमः** **चित्पुरुषः** । **प्रधानं** *मूलप्रकृतिः तयोः **प्रपञ्चेन** । कथमस्ति इह ? **यथा** येन प्रमाणानुपपन्नत्वप्रकारेण **लक्ष्येत** निश्चीयेत **दुर्णयः** तथास्ति । § 3870

कारिकार्थं कथयन्नाह--**चिच्छक्तिः** इत्यादि । **प्रधानं** कर्तृ **समर्पयति** । कस्य ? इत्याह--**आत्मनः** पुरुषस्य । किंभूतस्य ? इत्याह--**चिच्छक्तेः** चित् चेतना **शक्तिः** स्वभावो यस्य तस्य **चिच्छक्तेः** **चैतन्यं पुरुषस्य स्वरूपम्** 675/mkj योगभा० १ । ९ इति वचनात् । किं कृत्वा ? इत्याह--**समाश्रित्य** अवलम्ब्य । किम् ? इत्याह--**नानात्वम् पुरुषबहुत्वं सिद्धम्** सांख्यका०

२ दि] त्वादि
२२ प्र] प्रकृतिः प्रधानं बहुधानकम् इत्यादिना व्यपदिश्यमानमित्यर्थः ।
२२ नैयायिको] क
२३ *] आद्यकारणम् ।
२६ क्तिः] चिच्छक्तेः

१८इत्यादिवचनात् त्रिदण्डिमतत् । **एकत्वं च** आत्मनः इत्युभयत्र सम्बध्यते । एकदण्डिदर्शनमिदम्-- § 3871

*एकमेकं हि भूतात्मा भूते व्यवस्थितः ।
एक-वानेक वाचैव दृश्यते जलचन्द्रवत् ॥§ 3873

ब्र॰ बि॰ ११ § 3874

/ms इति वचनात् । पुनरपि किंभूतस्य तस्य ? इत्याह--**अदर्शित** इत्यादि । इन्द्रियवृत्तिदर्शितविषयवतः साक्षाद्विषयादर्शित इत्यर्थः । किं समर्पयति ? इत्याह--**आत्मानं** स्वस्वरूपम् । किं कृत्वा ? इत्याह--**आसाद्य** लब्ध्वा । किम् ? **कार्यकारणभावम्,** अनेन हेतुफलैक्यमाह । तदेव दर्शयन्नाह--**विवर्त्तमानमिति** । केन **क्रमेण ?** इत्याह--**महानित्यादि** । **प्रकृतेर्महान्** सांख्यका॰ २२इत्यादि । किमर्थम् ? इत्याह--**तदर्थम्** आत्मोपभोग्यार्थम् **इत्येवं दुर्णयः** । किन्नाम ? इत्याह--**नैगमः** इति । कुतः ? इत्याह--**प्रधानपुरुषयोः** इत्यादि । प्रधानस्य [पुरुषस्य च] **परिणामस्वभावस्य व्यवस्थापनात्** । पुनरपि किंभूतम् प्रधानम् ? इत्याह--**तदित्यादि** । **तत्** प्रधानम् **एकपुरुषम्** एकपुरुषभोग्यम् **अनेकपुरुषम्** अनेकपुरुषभोग्यम् इत्यर्थः । **च** इति समुच्चये । पुनरपि प्रधानभेदं कथयन्नाह--**अनीश्वरेतरभेदाद् भिद्यते** इति **तत्** इत्यनुवर्त्तते । **तत्** प्रधानं **भिद्यते** । कुतः ? **अनीश्वरभेदात्** न विद्यते ईश्वरः प्रवर्त्तको यस्य **वत्सविवृद्धिनिमित्तं ते चेतनं यथा क्षीरम्** इत्यादि वचनात्, तस्यविशेषात् । इतरभेदात् शश्वदविशेषात् **अज्ञो जन्तुरनीशोऽयम्** महा॰ वनपर्व ३० । २८ इत्याद्यभिधानात् । अज्ञोऽचेतनो जन्तुः प्रकृतिरेव इह उच्यते । कुतः सः भेदः ? इत्याह--**प्रधानस्य** इत्यादि । **प्रधानस्य** विचेतनस्य **पुरुषार्थिप्रवृत्तेः संभवेन** स्वतः इत्यध्याहारो[ऽनी]**श्वरभेदः तत्प्रवृत्तेरसंभवेन सेश्वरभेदः** । कुतः स दुर्णयः इत्यध्याहारः ? **[अ]परिणामिन** इत्यादि । परिणामविकलस्य **चैतन्यस्य** पुरुषस्य **वस्तुत्वं प्रत्युक्तम्** अपाकृतम् । केन
/ms ? इत्याह--**सामान्यादिना** जात्यादिदूषणेन । न केवलमेतदेव प्रत्युक्तम् अपि तु परमपि इत्याह--**कादाचित्कम्** इति हेतोः । न हि अपरिणामिन एकदा विषयानुभवनम्, अन्यदा तद्विपर्ययो युक्त इति विचारितम् । ततः किं जातम् ? इत्याह--**कुतः** इत्यादि । **स्पष्टम्** । § 3875

---

१ त्] म्
३ हि] एक एव हि
४ वा] धा
४ वा] धा
६ इ] एक एव हि भूतात्मा...एकधा बहुधा चैव...--त्रि॰ ता॰ ५ । १२ ।
७ र्शित] र्शिन
११ इत्यादि] ततोऽहङ्कारः तस्माद्गणश्च पोडशकः । तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥ इति शेषः ।
१८ इ] वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥--सांख्यका॰ ५७ ।
२० इ] आत्मनः सुखदुः खयोः । ईश्वरप्रेरितो गच्छेत् श्वभ्रं वा स्वर्गमेव वा । इति शेषः ।
२७ त] विषयानुभवरहितत्वम् ।

अधुना चैतन्यस्य सतोऽपि वैफल्यं दर्शयन्नाह--**हर्ष** इत्यादि । **प्रकृतेः** सकाशाद**पराम्** अन्यां **चैतन्यवृत्तिं** विषयानुभवलक्षणां **कः प्रेक्षावान्** प्रमाणिकः **प्रतिजानीते** । किंभूतायाः प्रकृतेः ? इत्याह--**हर्षविषादाद्यनेकाकारो विवर्त्तः** परिणामो यस्य तत्तथोक्तम् तच्च तज्**ज्ञानं** च तदेव **वृत्तिः** वर्त्त- 676/mkj नं यस्याः तस्या इति । कुतो न प्रतिजानीते ? इत्याह--**अनुपयोगात्** चैतन्यशक्तेः क्वचिद् व्यापाराभावात्, तत्प्रयोजनस्य प्रकृत्या करणात् । **विशेषतः** इत्यादिना पुनरपि तत्र दोषं योजयन्नाह--विशेषेण **विशेषतः** । अनेन पूर्वदोषादस्य अतिशयमाह--**प्रकृत्या दर्शितो** दर्शनगोचरतां नीतो यो **विषयः तद्वतः** तदनुभवतः **पुरुषस्य अविकारित्वं दुरन्वयम्** अप्रमाणम्, एवं मन्यते--सरसि अपरापरतारानिकुरुम्बस्येव पुंसि प्रकृतिदर्शिताऽपरापरविषयंप्रतिभासनमेव तस्याविकारित्वमिति युक्तं यदि तत्र प्रमाणं प्रवर्त्तेत, वचनमात्रकात्तदसिद्धिरिति । § 3876

परमपि तत्र दुरन्वयं कथयन्नाह--**तो कृत्स्नभावनित्यत्वे दर्शनरूपनित्यत्वे पुरुषस्य प्रकृतेर्भोग्यात्मनो** दृश्यभावस्य **नित्यत्वे** सति **तस्याः प्रवृत्तिः** संसारदशायां **निवृत्ति[ः] निर्वाणे इति दुरन्वयमेतत्,** सर्वदा दर्शनमदर्शनं वा /ms स्यादिति भावः । दूषणान्तरमाह--**प्रकृतेः** इत्यादि । **प्रकृतेः परिणामे वा** भोग्यस्वभावपरिहारेण अभोग्यस्वभावविकारे वा **चिच्छक्तेरपि** पुरुषस्यापि **विवर्त्तः** भोक्तृस्वभावपरिहारेण अभोक्तृस्वभावपरिणामः । कुतः ? इत्याह--**तद्** इत्यादि । **तया** प्रकृत्या **दर्शितो विषयः** स यस्यास्ति तस्य **भावात्** तत्त्वात् । एतदुक्तं भवति--यथा यदा पुरुषेण युज्येत प्रकृति[ः] तदैव तस्या भोग्यता नान्यदा, तथा यदा प्रकृत्या पुंसो विषयः प्रदर्श्यते तदैव तस्य भोक्तृता, विशेषाभावादिति । § 3877

एवं पुरुषं निराकृत्य अधुना प्रकृतिं निराकुर्वन्नाह--**सुख** इत्यादि । **जातिः प्रकृतिरेव,** किंभूता ? **सुखदुःखमोहात्मकप्रधानम् इत्यभिधानात्मा** । केषाम् ? इत्याह--**अचेतनभेदानाम् न पुनः संवेदनजातिः सर्वपुरुषाणां सामान्यमिति दुरन्वयमेतत्** । एतेन प्रधानसाधनानां भेदानां परिमाणादिहेतूनां व्यभिचारमाह । **तन्न** इत्यादि उपसंहारः । § 3878

परमपि नैगमाभासं दर्शयन्नाह--**तथा** इत्यादि । § 3879

तथा, § 3880

---

२ प्र] प्रा
११ यं] य
१२ सिद्धि] द्धे
१३ कृत्स्न] भोक्तृस्व
२० स्या] प्रकृतेः ।
२१ स्य] पुरुषस्य ।

२७ रिमाणादिहेतूनां] भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च । कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥--सांख्यका॰ १५ ।

...11 सत्ता द्रव्यत्वगोत्वादिसामान्यव्यपदेशभाक् ।
समवायिविशेषैः स्यादेकसामान्यवादिनाम् ॥ ११
॥§ 3882

विना...व्यापित्वे...भावस्यैव सामान्यविशेषभावोपपत्तेः समवायिविशेषात्; सत्तासमवायिनोर्भेदैकान्ते अयमपि परः नैगमो दुर्णयः । § 3883

तमेव दर्शयन्नाह--**सत्ता** इत्यादि । **सत्ता स्याद्** भवेत् । किंभूता ? **द्रव्यत्वेगोत्वादिसामान्यस्यपदेसभागिति** । कैः ? इत्याह--**समवायिविशेषैः** । सत्तायाः समवायो येषामस्ति द्रव्यादिखण्डादीनां ते समवायिनः, तेषां ते वा विशेषाः तैरिति । तदुक्तम्-- § 3884
677/mkj

तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा यामाहुः त्वतलादयः ॥ वाक्यप॰ ३ । ३४ इति ।§ 3886

/ms नन्‌ु यत्रअवान्तरेगोत्वादिजातयः समवेता[ः] तत्रैव सत्ता, तस्मादेकार्थसमवायात् सा तद्व्यपदेशभागिति चेत्; अत्राह--**विना** इत्यादि । § 3887

नन्‌ु यौगपक्षोपक्षिप्तमत्र दूषणं कुतो नेति चेत् ? अत्राह--**व्यापित्वे** इत्यादि । विचारितमनन्तरमिति । दोषानुषङ्ग एव न भवति **एकसामान्यवादिनां** सत्ताजातिवादिनाम् । कुतः ? इत्याह--**भावस्यैव** सत्ताया एव **सामान्यविशेषभावोपपत्तेः** द्रव्यत्वगोत्वादिसामान्यभेदोपपत्तेः । कुतः ? इत्याह--**समवायिविशेषात्** सोणादिव्यपदेशभाक्त वा प्रकृतापि इति **सत्तासमवायिनोर्भेदैकान्ते** अयमपि दुर्णयः । पूर्वविधिना अत एव उक्तम् **तथा** तेन प्रकारेण **परोऽन्यो नैगमो दुर्णय** इति । § 3888

संप्रति सौगतेन नैगमस्य सर्वस्य दुर्णयत्वं चिन्तितं दूषयन्नाह--**सत्ताम्** इत्यादि । § 3889

...12 सत्तां बिभ्रते यस्माज्ज्ञानशब्दकृतः इति ।
व्यक्तयः सन्तु तस्मादर्थाकारे विदां समम् ॥ १२
॥§ 3891

---

६ त्वे ] त्व
६ देस ] न्यव्यपदेश
११ रे ] र
१२ सा ] सत्ता ।
१८ सोणादि ] गोत्वादि
१८ वा ] भाक्तया

येन...इति यत् चोद्यं तत् संविदां विषयाकारप्रतिपत्तावपि सामानम् ।
§ 3892

यद् **यस्माद्** योग्यताविशेषात् **व्यक्तयो** विशेषाः **बिभ्रते** धारयन्ति । किम् ? **सत्तां** जात्यन्तरं वा गोत्वादिकं **त[स्मात्]** योग्यताविशेषात् **ज्ञान-शब्दकृतो**ऽनुगतज्ञानाभिधानप्रवृत्तिहेतवः सत्त * **व्यक्तयः इत्येवं** चोद्यम् **अर्थाकारे** रूपादिलक्षणे ग्राह्ये **विदां** बुद्धीनां **समम्** । तथाहि--यतः पटादयोऽर्थाः रूपादीन् बिभ्रते तत एव स्वयमतदात्मानो रूपादिबुद्धिहेतवो भविष्यन्तीति किं रूपादिकल्पनया ? इति निराकारार्थसिद्धिः । अथ रूपाद्यात्मकोऽर्थः प्रतीयते; सामान्यात्मकोऽपि प्रतीयते इति समानम् ।
§ 3893

कारिकार्थमुपदिशन्नाह--**येन** इत्यादि । सुगमम् । **इति** एवं यच्चाद्यं **न संविदां विषयाकारप्रतिपत्तावपि समानम्** अन्यत्रापि असकृदुक्तमेतत् । /ms
तथाहि— संविदो यतः स्वसंवेद यतः स्वसंवेदनात्मतां स्वीकुर्वन्ति तत एव अतदात्मिका सुथावभासन्त इत्यपि स्यात् । § 3894

तदेव नैगमं तदाभासं च प्रतिपाद्य संग्रहनयं प्रतिपादयन्नाह--**आयासाद्वा** इत्यादि । § 3895

...13 आयासाद्वा यतो भेदानभेदः स्वीकरोत्ययम् ।
स एव भेदसंव्यवहारान् केवलो न करोति किम्
॥ १३ ॥§ 3897

न हि अभिन्नतत्त्वस्य...स्वप्नादौ दर्शनात् । भेदवादिनोऽपि निरंशमवर्णाद्यात्मकं तज्ज्ञानं रूपादिकं स्थूलत्वाद्यनेकधर्माभिन्नं सांशमिव तद्व्यवहारं प्रथयत्येव तत्त्वदर्शनस्य सर्वथानुपपत्तेः । प्रमाणेतरनिमित्तभूतौ संवाद- 678/mkj
विसंवादावपि तत्र अविशेषतः स्याताम् । तत् सर्वविकल्पातीतं सन्मात्रं तत्त्वमिति संग्रहनयः । संवित्तेरेव बहिरिव प्रतिभासनात्, तत्पुनरदृष्टपर-

---

५ *] सन्तु
७ दात्मानो] रूपादिरहिताः ।
१२ न] यच्चोद्यं तत्
१३ तः] यतः स्वसंवेद इति पुनर्लिखितमाभाति ।
१४ सु] काः त
१५ देव] वं
२३ यः]
तुलना--स्वजात्यविरोधेनैकध्यमुपनीय पर्यायानाक्रान्तभेदान् अविशेषेण समस्तग्रहणात् संग्रहः ।--स० सि० १ । ३३ । त० वा० १ । ३३ । तत्त्वार्थाधि० भा० १ । ३६ । शुद्धं द्रव्यमभिप्रैति संग्रहस्तदभेदतः । भेदानां नासदात्मैकोऽप्यस्ति भेदो विरोधतः ॥--लघी० श्लो० ३२ । धवलाटी० सत्प्ररू० । त० श्लो० पृ० ७० । नयवि० श्लो० ६७ । सन्मति० टी० पृ० २७२ । नयचक्र० गा० ३४ । तत्त्वार्थसा० पृ० १०७ । प्र० नय० ७ । १३ । स्या० मं० पृ० ३११ । जैनतर्कभा० पृ० २२ । संगहिय पिंडियत्थं संग्रहवयणं समासओ बिंति ।--अनु० द्वा० ४ । आ० नि० गा० ७५६ । विशेषा० गा० २६९९ ।

मार्थमेव मिथ्या...। तत्र स्वपरसन्तानक्षणक्षयविकल्पव्यवस्थेयं अविद्यात्मनः आभासेत बहिरर्थावभासवदिति । तदर्थासंभवेऽपि विप्लवान्तरवत् । पारम्पर्येणापि चेतनान्तरसंभवनियमः कुशकाशावलम्बनम् व्यापारादिभावात्तन्नियमः ।...प्रतिषिद्धार्थप्रतिप्रसवप्रसङ्गात् बहिरन्तर्भेदात् । § 3898

**आयासाद्यन्ताद्यतो वा** इति पक्षान्तरद्योतकः, **भेदान्** चेतनेतरविशेषान् **अभेदः** सत्तामात्रं **स्वीकरोति** अय * **भेदसंव्यवहारान् किं न करोति सोऽभेदः केवलः** सकलभेदविकलः । § 3899

ननु यदि अभेदः; भेदव्यवहारः ततः कथम् ? अन्यथा नीलात् पीतव्यवहारः स्यात् इति चेत्; अत्राह--**नहि अभिन्नतत्त्वस्य** इत्यादि । कुतः ? इत्यत्राह--**स्वप्नादौ दर्शनात्** । अत्र **आदि**शब्देन द्विचन्द्रादिपरिग्रहः । स्वप्ने हि कृशोऽपि स्थूलतया, अन्यकालादिः अन्यकालादितया, देवदत्त एकोऽपि अनेकतया, जागरणे चन्द्रः तथा सुत्ति कानेकतया प्रतिभातीति भावः । परस्यापि एतदस्तीति दर्शयन्नाह--**भेदवादिनोऽपि** न केवलमभेदवादिनः तज्ज्ञानं भेदवादिज्ञानम्; किंभूतम् ? **निरंशम्,** पुनरपि किंभूतम् ? **अवर्णाद्यात्मकं** रूपरसादिरहितम्, **रूपादिकं स्थूलत्वाद्यनेकधर्माभिन्नं** न च निरंशे तद्युक्तम् । किं करोति ? इत्याह--**तद्व्यवहारं** भेदव्यवहारं **प्रथयत्येव** । किंभूतम् ? **सांशमिव** वर्णादिनिर्भासमिव, [च] शब्दोऽत्रापि योज्यः । § 3900

ननु यथा भेदः प्रतिभाति नैवमभेदः, ततोऽस्त्यनयोः विशेष इति चेत्; अत्राह--**तत्त्व** इत्यादि । **तत्त्वस्य** निरंशात्मनो **यद्दर्शनं** तस्य **सर्वथा** सर्वेण
/ms प्रत्यक्षादिप्रकारेण स्वतः परतः इति वा प्रकारेण **अनुपपत्तेः** । कल्पनया तदुपपत्तिः, उभयत्रापि । § 3901

स्यान्मतम्--त ज्ञानं निरंशमवर्णाद्यात्मकं तथैव [व्यव]हारं प्रथयति इति; तत्राह--**तत्त्व** इत्यादि । व्याख्यानम् तदेव । यदि वा, यदि ज्ञानं सांशमेव वर्णादिनिर्भासं व्यवहारं प्रथयति तथैव तदिति **तत्त्व[म्]** इत्यादि सौगतस्य यत्तस्य **दर्शनस्य सर्वथानुपपत्तेर्वा भेदवादिनोऽपि** इत्यादिना सम्बन्धः । § 3902

ननु यदि अभेदः तर्हि जाग्रद्दशायामविसंवादोयः प्रमाणव्यवस्थानिमित्तंस्वप्ने यश्च विसंवादोऽप्रमाणव्यवस्थाकारणं तौ कथं स्याताम् ?
679/mkj भेदे तस्या तामिति चेत्; अत्राह--**संवाद्** इत्यादि । **संवादासंवादौ** । किंभूतौ ? **प्रमाणेतरनिमित्तभूतौ** यथासंख्येन प्रमाणाप्रमाणहेतुभूतौ **तत्र** तयोः भेदाभेदयोः **स्याताम्** । कुतः ? इत्याह--**अविशेषतः** वासंनादार्ढ्याऽदार्ढ्यभेदतः । यत एवं **तत्** तस्मात् **सर्वविकल्पातीतं तत्त्वम्** । किं तत् ?

५ तो] --सात् यत्नतःयतो
६ *] अयं
११ का] अर्धरात्रे मध्याह्नस्वप्रदर्शनं भवति ।
१२ काने] शुक्तिका अने
१४ ज्ञानं] तज्ज्ञानं
१८ योः] भेदाभेदयोः ।
२२ ज्ञानं] तज्ज्ञानं
२८ णं] अविसंवाद-विसंवादौ ।
२९ स्या] न स्या
३२ वासंनादार्ढ्याऽदार्ढ्य] र्ढ्या

इत्याह--**सन्मात्रम् इत्येवं संग्रहनयः** । अत्र यदुक्तं सौगतेन दूषणम् **कथं बहिरन्तः प्रतिभासभेदे सन्मात्रं तत्त्वम् ? तद्विभ्रमे सन्मात्रे कः समाश्वासः** इति; तदेग तस्यापि समानमिति दर्शयन्नाह--**संवित्तेरेव** इत्यादि । भेदवादिनो बौद्धस्य विज्ञप्तिमात्रं बुद्धिमात्रं तत्त्वं यथा संग्रहवादिनः सन्मात्रम् । § 3903

ननु तस्य बहिरन्तर्वा भेदोऽप्यस्ति इति चेत्; अत्राह--**संवित्तेरेव** नान्यस्य **बहिरिव प्रतिभासनात्** ततो यथा अस्याऽबाह्यमपि बाह्यतया चकास्ति तथा परस्य अभिन्नं भिन्नतया इति मन्यते । § 3904 /ms

स्यान्मतम्--यथा विज्ञप्तिमात्रं दृश्य न तथा अन्यदिति चेत्; अत्राह--**तद्** विज्ञाप्तिमात्रं **पुनः अदृष्टपरमार्थमेव** । नहि निरंशं भ्रष्टं शक्यम्, अन्यत्रापि प्रसङ्गात् । तत्किम् ? इत्याह--**मिथ्या** इत्यादि । ततो यथा भेदव्यवहारस्य मिथ्यात्वेऽपि न संवित्तेसत् तथा अन्यत्रापि इति भावः । § 3905

ननु विज्ञप्तिमात्रे स्वपरसन्तानभेदः क्षणक्षयादिभेदश्च पारमार्थिक इति चेत्; अत्राह--**तत्र** इत्यादि । **तत्र** विज्ञप्तिमात्रे **स्वपरसन्तानाश्च क्षणक्षयश्च** ते एव तेषां वा **विकल्पा** भेदाः, यदि वा, मानसाः प्रत्ययाः, तेषां **व्यवस्थेयंमाभासेत** । कुतः ? इत्याह--**[अ]विद्यात्मनः** [अ]विद्यास्वभावात् कुतश्चिद् विकल्पवासनातः, तत्र परस्य प्रमाणाभावात् । अत्र निदर्शनमाह—**बहिरर्थावभासवदिति** । निदर्शनसमर्थनमाह--**तदर्थासंभवेऽपि** इत्यादि । जाग्रद्व्यापारादि**विप्लवात्** स्वप्नादितद्विप्लव सुदतरी तत्रेव तद्वदिति । § 3906

ननु जाग्रद्दशायां साक्षाद् व्यापारादिनिर्भासः, परचेतसः शरीरान्तरे स्वप्ने परम्प[र]येत्यव्यभिचार इति चेत्; अत्राह--**पारम्पर्येणापि** इत्यादि । **चेतनान्तरसंभवेनियमः** सन्तानान्तरचेतनेयोः सकाशात् **संभवस्य** उत्पादस्य **नियमः कुशकाशावलम्बनम्** । कस्यास्तनियमः ? इत्याह--**व्यापार** इत्यादि । केन प्रकारेण सः ? इत्याह--न केवलं जागरणे साक्षात्तस्याः तन्नियमः, तदवलम्बनस्वशरीरेऽपि निरंशबुद्धिव्यापारयोरन्वयग्रहणाभावात् सकलव्याप्तेरसिद्धेः प्रमाणविरहात्, स्वापादौ चैतन्याभावेऽपि व्यापारादिभावात्, शालूकादि शालूकादिभ्यो दृष्टावपि पुनर्गोमयादेः दर्शनात् संभाव्यव्यभिचारित्वात्, व्यापारप्रतिभासस्य सर्वत्रार्थप्रतिभासवद् भ्रान्तत्वात्, अपि तु **पारम्पर्येणापि** जागरणे साक्षात् चेतनान्तरः तस्यास्तन्नियमः स्वप्ने पारम्पर्येण बुद्धेरेव तद्बुद्धिसंभवात्, तद्विभ्रमस्तदवलम्बते उक्तदोषेण अनुमानाप्रवृत्तेः, शरीरप्रभृतेः सर्वस्य भ्रान्तत्वाच्च । कुतः ? इत्याह--**प्रतिषिद्धार्थ** इत्यादि /ms

---

३ देग ] तदेतत्
३ स्यापि ] बौद्धस्यापि ।
८ स्य ] अभेदवादिनः ।
९ दृश्य ] श्यं
१० ष्टं ] द्रष्टुं
१२ त् ] त्तेः त[[मिथ्यात्वम् ।]]त्
१६ स्थेयं ] य
१९ री ] वस्तदन्तरम्
२२ वे ] व
२२ नेयोः ] तनायाः
२३ नि ] कस्मात्तन्नि
२७ शा ] शालूकः वृश्चिकः ।
२७ लूकादि ] देः

। **प्रतिषिद्धः** सौगतेन निराकृतो योऽर्थः अचेतनो घटादिः तस्य **प्रतिप्रसवः** प्रत्युज्जीवनं तस्य **प्रसङ्गात्** । एतदपि कुतः ? इत्याह--**बहिरन्तभेदाद्** बाह्येतरभेदसिद्धिरिति भावः । तथाहि— स्ववपुषि बुद्धिव्यापारयोः परमार्थतो यदि कुतश्चित् हेतुफलभावः प्रतीयते; व्यक्तं ग्राह्यग्राहकभावः समापतति । § 3907

680/mkj

एतेन व्याप्तिग्रहणमपि चिन्तितम् । वासनातः सकलं ज्ञानम् इत्यत्रापि न्यायोऽयं योज्यः । § 3908

ननु अर्थः प्रतिभासात् सिध्यति, स च स्वप्ने तदभावेऽपि भवन्ननैकान्तिक इति चेत्; न; व्यापारादिरपि तथैव स्यादिति दोषात्, तत्रास्य पारम्पर्येण परचेतसः सभावो नार्थप्रतिभासस्य इति किंकृतमेतत् ? § 3909

अपरे मन्यन्ते--तत्रापि स्वप्नान्तिकशरीरस्य परमार्थतोऽभ्युपगमात् साक्षात् परचेतस एव स इति; तेषां तत्र स्तम्भादिप्रतिभासोऽपि सत्य इति **कल्पनापोढमभ्रान्तं प्रत्यक्षम्** न्यायवि० १ । ४ इति अभ्रान्तग्रहणमनर्थकं निवर्त्त्याभावात्, तच्छरीरवत् द्विचन्द्रादेरपि सत्यताप्राप्तेः । व्यवहारेण अभ्रान्तग्रहणमिति चेत्; न; तेनैव तच्छरीरस्यापि सत्यत्वोपगमात्, व्यवहारेण परलोक साधनात्, इतरथा कुतः प्रतिभासाद्वैतम् ? **निरालम्बनाः सर्वे प्रत्ययाः प्रत्ययत्वात्** प्र० वार्तिकाल० पृ० ३६१ इत्यत्र वा किं वा निदर्शनम् ? स्वरूपालम्बनत्वेऽपि अनेकान्तार्थप्रति स्य बद्धस्य प्रतिप्रसवप्रसङ्गः, शरीरादेः सांशत्वेन प्रतिभासनात् । ततो न किंचिदेतत् । § 3910

/ms

अन्येषां दर्शनम्--न सन्तानः सन्तानान्तरं वा अन्यत्र संवृतेः इति तदभावसाधनं सिद्धसाधनमिति, तेषामप्युत्तरमुक्तम् नेह पुनरुच्यते, चित्रज्ञाने नीलादीनाम् अन्योऽन्याननुगमे सन्तानान्तरसिद्धिः । परस्परादर्शनेऽपि सद्भावे इतरथा सकलशून्यता, तदनुगमे अनेकान्तसिद्धिरिति । तन्न परस्य स्वरसन्तानादिभेदसिद्धिः । § 3911

क्वचिद् **बहिर[रन्त]भेदात्** इति पाठेत्र बाह्येतरयोरविशेषादित्यर्थः । § 3912

स्यान्मतम्--प्रागभावादिचतुष्टयप्रतीतेः कथं सन्मात्रं तत्त्वमिति ? तत्राह--**विज्ञेयम्** इत्यादि । § 3913

...14 विज्ञेयं विद्यमानार्थवुद्ध्याऽभावचतुष्टयम् ।
कथञ्चिन्नान्यथा न्यायाद् बुद्धिः सन्मात्रगोचरा ॥ १४ ॥ § 3915

८ स ] प्रतिभासः ।
८ द ] अर्थाभावेऽपि ।
१० भावो ] सद्भावो
११ अ ] प्रज्ञाकरगुप्तादयः ।
१४ त ] स्वप्नान्तिकशरीरवत् ।
१८ द्ध ] प्रतिबद्ध
२० त ] सन्तानान्तराभावसाधनम् ।
२४ र ] स्वपर
२५ पाठेत्र ] पाठे तु

नहि अभावचतुष्टयज्ञानं सर्वथा निर्विषयं युक्तम्, अर्थान्तरालम्बनोपगमात् । सः परमाणुपर्यन्तज्ञानस्वरूपपरीक्षासमये स्वरूपमवलम्बेत नार्थभेदम् । तदभावे संविद्व्यपदेशानुपपत्तेः । तन्न भावव्यतिरिक्तो विशेषः क्वचित् कथञ्चित् प्रमेयतां प्रतिपद्येत । § 3916

**विज्ञेयं** परिच्छेद्यकेम् **अभावचतुष्टयं** प्रागभावाद्यभावचतुष्टयम् । कया ? **विद्यमानार्थबुद्ध्या** भावज्ञानेन । **कथंचित्** केनापि तदुत्पत्तियोग्यताप्रकारेण 681/mkj **नान्यथा** बुद्ध्या विज्ञेयत्वाभा[व]प्रकारेण **वुद्धिः** अभावचतुष्टये इति सम्बन्धः । प्रत्ययादिवेदनतो **न्यायात् सन्मात्रगोचरी** बुद्धिरिति । § 3917

कारिकार्थं विवृणोति । **नहि अभावचतुष्टयज्ञानं सर्वथा निर्विषयं** विषयरहितं तुच्छाभावगोचरमेव नहि **युक्तम्** । ननु यद्यभावविषयं कथं निर्विषयमुच्यते इति चेत्; न; सौगतापेक्षयैवमभिधानात् । /ms स हि अभावं नेच्छति । कुतो न निर्विषयमिति चेत्; अत्रा[ह--अ]**र्थान्तर** इत्यादि । विवक्षिताद**र्थाद्** अन्योऽर्थः **तदन्तरम् तद् अवलम्बनं** यस्य तस्य **उपगमात्** सौगतेन । § 3918

न्ववेनमपि परस्परविविक्तभावावलम्बनात् कथं सन्मात्रगोचरा बुद्धिरिति चेदतदत्त **स** इत्यादि । तदभावचतुष्टयज्ञानमात्र[म]त्र **सः परमाणुपर्यन्तज्ञानस्वरूपपरीक्षासमये स्वरूपमवलम्बेत नार्थभेदम्** । कुतः ? इत्याह--**तदभावे** स्वरूपावलम्बनाभावे **संविद्व्यपदेशानुपपत्तेः** । अर्थग्रहणात् ज्ञानस्य तद्व्यपदेशो न स्वरूपावलम्बनादिति चेत्; ननु अर्थग्रहणं बुद्धिः इति केनावगम्यते ? तयैव बुद्ध्या इति चेत्; न; स्वरूपग्रहणप्रसङ्गात्, तदग्रहे ममार्थग्रहणम् इति प्रतिपत्त्ययोगात् । बुध्यात्तयाइति चेत्; सापि स्वरूपसंवेदनविकला बुद्धिः इति कथमवगम्यते ? आद्यज्ञानार्थग्रहणात्; तदपि कुत इति तदवस्थं चोद्यम् अनवस्था च । § 3919

नन्वर्थो यतो दृश्यते तज्ज्ञानमिति चेत्; सत्यम्; दृश्यते, नाऽस्वसंवेदनज्ञानात्; इतरथा परज्ञानादपि दृश्येत इत्युक्तम् । एतेन मीमांसकोऽपि कृतोत्तरः । भवतु स्वरूपावलम्बनं ज्ञानम्, तत् स्वरूपमन्यते व्यावृत्तमवलम्ब्यत इति चेत्; अत्राह--**तन्न** इत्यादि । **तत्** तस्मात् स्वरूपमवलम्बेत इति न्यायात् **न भावव्यतिरिक्तो** ज्ञानसत्ताभिन्नो न **विशेषो** भेदः **क्वचिद्** विज्ञाने अन्यत्र वा **कथंचिदे**कानेकादिरूपेण **प्रमेयतां प्रतिपद्येत** । नहि स्वरूपमग्नं ज्ञानम् अन्यदविषयीकुर्वाणं ततः कस्यचिद्भेदम् अन्यद्वा प्रतिपद्यत /ms इति । § 3920

स्यादेतत्--यदि ज्ञानं स्वरूपमेव लंबि , तदेव प्रतिभासाद्वैतमायातम्, तच्च सौगतस्य नानिष्टम्, अभ्युपगमात् । अथ तथा सत्ताद्वैतम्; तन्न;

५ केम्] द्यं । किम् ?
८ री] रा
१३ मात्] भावान्तरस्वभावत्वादभावस्य ।
१५ पि] नन्वेवमपि
१६ त्त] चेदत्राह
२१ या] था
२६ ते] तो
३० त] अविषयीकृतार्थात् ।
३२ लंबि] व अवलम्बि

अप्रत्ययात्, चित्रप्रतिभासात् । अस्य मिथ्यात्वे ततो भेदे न सत्ताद्वैतमिति चेत्; अत्राह--**मिथ्यैकान्त** इत्यादि । § 3921

...15 मिथ्यैकान्तविविधनिर्भासप्रतिभासैक्यतत्त्वयोः ।
आत्मनोऽत्यन्तभेदोऽयं समः क्षणिकसंविदः ॥ १५ ॥ § 3923

यथा परमात्मनः सद्रूपस्य तत्त्वम् अदृश्यात्मनः सकलविकल्पात् सर्वथा व्यतिरिच्येत अदृष्टं यतः खरविपाणवदिति तथा क्षणिकसंविदोऽपि तत्त्वं ततस्तथा व्यतिच्येत, यथातत्त्वं स्वयमेव संवेदनात् । मिथ्या ग्राह्यग्राहिकायाः भेदात्मनाऽनुभवात् । § 3924

**अन्तम्** अवसानम् अतिक्रान्तोऽन्तः स चासौ **भेदश्च** विशेषः निरव682/mkj सानो विशेषोऽयं परेण उच्यमानः सन्मात्रपक्षे **समः** सदृशः । कस्य ? **आत्मनः** स्वस्य । कस्याः ? इत्याह--**क्षणिकसंविदः** सौगतसम्बन्धिबुद्धेः । कयोः सतोः ? इत्याह--**मिथ्या** इत्यादि । **मिथ्यात्वम् एकान्तो** यस्य स तथोक्तः स चासौ **विविधः** स्थूलत्वदीर्घत्ववर्तुलत्वादिना चित्रो **निर्भासश्च** घटादिप्रतिभासः तेन विद्यते **प्रतिभासो** दर्शनं ययोः **ऐक्यतत्त्वयोः** निरंशत्वस्वसंवेदनस्वरूपयोः सतोः **आत्मनः क्षणिकसंविदः** । एतदुक्तं भवति— यथा मिथ्याचेतनेतरनिर्भासतिरस्कृतत्वात् न सत्तामात्रस्य नित्यत्वादि स्वरूपं वाऽवभासते, तथा स्थूलत्वादिचित्रप्रतिभासेन प्रतिहतप्रसरत्वा न संविदात्मनोरैक्यतत्त्वयोः प्रतिभासनमिति । § 3925

**यथा** इत्यादिना कारिकार्थमाह--**यथातत्त्वं** स्वरूपम् । कस्य ? **द्रव्यस्य** । किं[भू]तस्य ? **सद्रूपस्य** सत्तात्मकस्य । पुनरपि किंभूतस्य ? **परमात्मनः** परमः सर्वाधिक आत्मा रूपं यस्य तस्य इति । तत्तत्त्वं किं स्यात् ? इत्याह--**व्यतिरिच्येत** स्वयं भिद्येत । कुतः ? इत्याह--**सकलविकल्पात्** /ms निखिलचेतनेतरभेदात् । किंभूतात् ? इत्याह--**अदृश्यात्मनः** । कथम् ? इत्याह--**सर्वथा** सर्वेण वस्तुगतधर्मकलापप्रकारेण । कुतः ? इत्याह--**अदृष्टं** यत **यतः खरविषाणवदिति तथा क्षणिकसंविदोऽपि तत्त्वं ततः तथा व्यतिरिच्येत** । कुतः ? इत्याह— **यथातत्त्वम्** [इत्यादि] । **यथा[तत्त्वं]स्वयमेव संवेदनात्** क्षणिकसंविदः । एतदपि कुतः ? इत्याह--**मिथ्या** इत्यादि । **मिथ्या ग्राह्यग्राहकौ** यस्याः **नान्योऽनुभाव्यो बुद्ध्यास्ति** प्र° वा° २ ।

१ अ] अप्रतीतेरित्यर्थः ।
१ अ] चित्रप्रतिभासस्य ।
१ तो] चित्रज्ञानात् ।
१ स] यस्मात् चित्रज्ञानाद् व्यावर्तते यच्च व्यावर्तते तदपेक्षया द्वैतं स्यात् ।
९ अतिक्रान्तोऽन्तः] ऽत्यन्तः
१७ न] न्न
२५ य] यत इति व्यर्थमत्र ।

३२७इत्यादि वचनात्, तस्या **भेदात्मना** नानास्वभावेन **अनुभवात्** । अनेन विरुद्धोपलब्धिं दर्शयति । § 3926

ननु सत्ता व्यापिनी नित्यैका न्नेष्यते, न च तत्र प्रमाणमिति क्षणभङ्गे निरूपितम् । संवित्तिः पुनः क्षणिका अनेका, तत्र प्रमाणमस्ति इति चेत्; अत्राह--**नहि** इत्यादि । § 3927

...16 न हि तत्त्वोपलम्भानवस्थापयति कल्पना ।
मिथ्या दोषान् निराकृत्य स्वस्मादवर्णात्मिका ॥ १६ ॥§ 3929

स्वप्नादौ विभ्रमे वा अवर्णात्मिकैव संवित्तिः वर्णाद्यात्मना निरंशैव सांशेव अवभासते । नैतावता स्वयमदृश्यात्मैव यतो दृश्यात् सर्वथा भिद्येत इति समाधिः परमात्मनः द्रव्यमात्रेऽपि समः । § 3930

क्षणिकसन्तानभेद**कल्पना** । अनेन नित्यैवत्वव्यापित्ववद् अन्यत्रापि कल्पनातो नान्या गतिरिति दर्शयति । किंभूता सा ? इत्याह--**मिथ्या** असत्या, नित्यत्वेऽ**वस्थापयति न** खलु । कान् ? इत्याह--**तत्त्वोपलम्भ** इत्यादि । तान् किं कृत्वा इत्याह--**स्वस्माद्** आत्मनः सकाशात् **निराकृत्य तद्दोषान्** इति, समानत्वात् उभयत्र तद्दोषाणाम् इति भावः । ननु सत्तावन्नादृश्या संवित्तिः, तस्या एव अन्यथा प्रतिभासनात्, मरुष्विवाल्पस्य महत्त्वेन इति चेत्; अत्राह--**अवर्णात्मिका** । गतार्थमेतत् । § 3931
683/mkj

कारिकासूत्रं व्याचष्टे **स्वप्नादौ** इत्यादिना । **[स्वप्नादौ] विभ्रमे वा अवर्णात्मिकैव** स्थूलार्थाकाररहितैव **संवित्तिः वर्णाद्यात्मना यथा** विप्लव- /ms सामर्थ्यप्रकारेण **अवभासते** तथा **निरंशैव** अविभागैव **सांशेव अवभासते नैतावता स्वयमदृश्यात्मैव** अदृश्य आत्मा स्वरूपं यस्या इति, तस्या एव तथावभासनादिति । **यतो** यस्माददृश्यात्मकत्वात् **दृश्यात्** ग्राह्यादिविप्लवात् **सर्वथा** सर्वेण स्वभावेन **भिद्येत इत्येवमुच्यमानः समाधिः समः** । क्व ? इत्याह--**द्रव्यमात्रेऽपि** । कुतः ? इत्याह--**परमात्मन** इत्यादि । § 3932

संग्रहनयेन सौगतं दूषयित्वा संग्रहाभासमधुना व्यवहारनयेन अपहस्तयन्नाह--**भेद** इत्यादि । § 3933

---

३ न्ने] चे
११ नित्यैव] क
११ अ] क्षणिकपक्षेऽपि ।
१६ म] यथा मरूभूमिषु दूरे अल्पोऽपि महान् दृश्यते ।
१९ र्णात्मिकेव] कैव
२५ हाभास] तुलना--संग्रहः सर्वभेदैक्यमभिप्रैति सदात्मना । ब्रह्मवादस्तदाभासः स्वार्थभेदनिराकृतेः ॥— लघी० श्लो० ३८ । त० श्लो० पृ० २७० । नयवि० श्लो० ६८ । न्यायावता० टी० पृ० ८५ । प्र० नय० ७ । १५-२१ । जैनतर्कभा० पृ० २४ ।

...17 भेदाः कर्मफलादीनामिह लोके परत्र वा ।
भेदे सति प्रवर्तेत नाभेदे सः प्रवर्तते ॥ १७ ॥§ 3935

लोकद्वैतं... § 3936

**भेदे सति** । केषाम् ? **कर्मफलादीनाम्** **आदिशब्देन** कर्मसाधनादिपरिग्रहः । किं स्यात् ? इत्याह--**प्रवर्त्तेत** । क्व ? इत्याह--**इहलोकोऽच** * **कर्म**शब्देन क्रिया गृह्यते फलवच[ने]नौदनादिकम् । **परत्र वा** अत्रापि **कर्म** शुभाशुभमदृष्टं **फलं** स्वर्गादिकम् । अभेदेऽपि **सः प्रवर्त्तते** इति चेत्; अत्राह--**नाभेद** इत्यादि । § 3937

**लोकद्वैतम्** इत्यादिना कारिकार्थमाह । सर्वं सुगमम् । § 3938

यदुक्तम्--**नहि अभिन्नतत्त्वस्य भेदप्रतिभासव्यवहारो विप्रतिषिद्धः स्वप्नादौ दर्शनात्** इति दूषयन्नाह--**मिथ्यात्वम्** इत्यादि । § 3939

...18 मिथ्यात्वं संविदां वीक्ष्य क्वचित् सर्वत्र तद्विदः ।
त्यजेत् संग्रहवादः सन्मात्रं स्वाभिमतं तथा ॥ १८ ॥§ 3941

प्रमाणतः सन्मात्रप्रतिपत्तेः प्रमाणसन्मात्रभेदसिद्धेः स्वाभिमतं त्यजेत् । प्रमाणादृते तद्व्यवस्थितेरभावादतिप्रसङ्गात् । आस्तां तावत् द्रव्यमात्रं पर्यायमात्रमिव । सम्यङ्मिथ्यात्ववेदकमन्तरेण क्वचित् कस्यचित् कथञ्चित्तदसिद्धेः । कुतः...तत्त्वमिदन्तया अन्यथा वा व्यवस्थापयितुकामेन तत्त्वज्ञानं प्रमाणमन्वेष्यम्, अनुपायोपेयासिद्धेः । § 3942

**संविदां** भेदज्ञानानाम् **मिथ्यात्वम्** असत्यत्वं **वीक्ष्य क्वचित्** स्वप्नादौ **सर्वत्र** जाग्रद्दशायामपि या तद्वित् मिथ्यात्वं संवित् तस्याः **तद्विदः** सकाशात् **त्यजेत् संग्रहवादो स्वाभिमत सन्मात्रम्** । यथैव हि क्वचिद् भेदविभ्रमदर्शनात् सर्वत्र
684/mkj /ms तद्भ्रमः, **तथा** अविशेषेण विशेषविभ्रमदर्शनात् सन्मात्रभ्रमोऽपि स्यादिति मन्यते । नहि तद् विशेषादन्यदेव उपलभ्यते, यतोऽयं भेदः स्यात् । § 3943

ननु द्विबाहु चन्द्रत्वादिकं भिन्नमुपलभ्यते, तथापि तदेव सत् न द्वित्वम्, तथा अत्रापि स्यादिति चेत्; तदसत्; भेदेऽपि तथा सत्येतरव्यवस्थापत्तेः । अपि च, प्रमाणात्, अन्यतो वा सन्मात्रं प्रतीयेत ? प्रथमपक्षे--धाते

६ *] लोके अत्र
९ लोक] तुलना--कर्मद्वैतं फलद्वैतं लोकद्वैतं च नो भवेत् । विद्याविद्याद्वयं न स्याद् बन्धमोक्षद्वयं तथा ॥--आप्तमी° श्लो° २५ ।
२० मिथ्यात्वं] मिथ्या
२१ त] तं
२२ दु] द्
२३ त] सन्मात्रम् ।
२४ द्विबाहु] द्वित्वात्
२४ त] चन्द्रत्वमेव ।

प्रमाणात्, प्रमाणमन्तरेण न तद्व्यवस्थितिः, अपि तु **प्रमाणतः सन्मात्रप्रतिपत्तेः स्वाभिमतं त्यजेत्, प्रमाणसन्मात्रभेदसिद्धेः** । स्यादेवं यदि भिन्नात् प्रमाणान्न ज्ञायेत, यावता आत्मनि तदेव प्रमाणं नासं प्रत्ययाद् भेदसिद्धेः । द्वितीयेऽपि पक्षे एतदेव वाच्यम् **प्रमाणादृते** तदन्तरेण **तद्व्यवस्थितः** * सन्मात्रस्थितेर**भावादितिप्रसङ्गात्** । § 3944

ननु यथा विभ्रमवादिनः प्रमाणमन्तरेण स्वाभिमतं सिध्यति तथा ममापि इति चेत्; अत्राह--**आस्तां तावत्** इत्यादि । **आस्तां** तिष्ठन्तु **तावत्** । किं ? **द्रव्यमात्रम्** । किमिव ? **पर्यायमात्रमिव** । सन्मात्रवादिनः सिद्धमिदं निदर्शनम् । किन्तु **मिथ्यैकान्त एव न सिध्येत्** । किमन्तरेण ? इत्याह--**सम्यङ्मिथ्यात्ववेदकमन्तरेण क्वचिद्** बहिरन्तर्वा स्वप्रादौ अन्यत्र वा **कस्यचित्** प्रत्यक्षस्य अन्यस्य वा **कथंचित्** अभिमतप्रकारेण सम्यक्त्वम् अन्यथापि विपर्यय इति प्रकारेण **तदसिद्धेः** । फलं दर्शयन्नाह--**कुतः** इत्यादि । अनेन साध्यसमत्ता निदर्शनस्य दर्शयति । यदि वा, शून्यता अनेन निरस्ता । न मया परबलेन तत्त्वं व्यवस्थाप्यते अपि तु स्वबलेन इति चेत्; /ms अत्राह--**तत्त्वम्** इत्यादि । **तत्त्वं** भावस्वरूप**मिदंतया** सन्मात्रतया **अन्यथा वा व्यवस्थापयितुकामेन** संग्रहवादिना **तत्त्वज्ञानं** तच्च **प्रमाणमन्वेष्य** । कुतः ? इत्याह--**अनुपायोपेयासिद्धेः** । § 3945

तत्त्वम् इदन्तया नेदन्तया वा अवाच्यमिति चेत्; अत्राह--**प्राकृतात्** इत्यादि । § 3946

...19 प्राकृताद् भिद्यते विद्वान् सम्यग्ज्ञानावलम्बनात् ।
तदभावेऽप्यवाच्यत्वे व्यक्तं निद्रायितं जगत् ॥ १९ ‖§ 3948

सदसद्व्यवहारनिबन्धनं सम्यग्ज्ञानम् । तदन्वयेकान्ते कः प्राकृतबुद्धिः बोद्धा वा क्वचित् किञ्चिदाश्रित्य न तिष्ठेत् प्रतिष्ठेत अपसरेद्वा हितान्वेषी । कथञ्चित् तत्त्वमिथ्यात्वव्यवस्थापनम् अनेकान्त...मिथ्यैकान्त...अपेक्ष्यं तत्रैव प्रवर्तयति § 3949

**प्राकृतः** अतत्त्वज्ञः नित्यत्वादिधर्मैः वस्तुवाच्यताभिनिविष्टः तस्माद् **भिद्यते** विशिष्टो भवति । कः ? **विद्वान्** तत्त्वज्ञः सर्वथा [अ]वाच्यतत्त्वप्रतिपत्ता । कुतः ततो भिद्यते ? इत्याह--**सम्यग्ज्ञानावलम्बनात्,** अवाच्यतत्त्वगोचरम् अबाधितप्रसरं समीचीनं ज्ञानं सम्यग्ज्ञानं तस्यावलम्बनात् स्वीकारात् । यदा

---

१ धाते ] ?
२ प्र ] ज्ञापक-ज्ञेयरूपेण भेदः स्यात् ।
३ माणान्न ] णात् तत्[[सन्मात्रम् ।]]
३ नासं ] ?
४ * ] तेः
५ भावादिति ] द् अति
१३ त्ता ] तां
१६ न्वेष्य ] ष्यम्

685/mkj हि श्वगग्राहिकया तत्तत्वं कुतश्चित् प्रति पद्यते, तदा स ततोऽन्यथा सर्वेऽपि प्राकृता इति न [अ]वाच्यतत्त्वावतारः । तथापि तदवतारे दोषमाह--**तद-भावेऽपि** सम्यग्ज्ञानावलम्बनाभावेऽपि **अवाच्यत्वे** तत्त्वस्य अभ्युपगम्यमाने **व्यक्तं** यथा भवति तथा **निद्रायितः** निद्राक्रान्तः पुरुषो निद्रितमिवाचरति स्म । किं तत् ? इत्याह--**जगद्** अवाच्यतत्त्ववादिलोकः । एवं मन्यते--यथा निद्राकान्तः अदृष्टतत्त्वोऽपि किंचिदसम्बद्धं प्रलपति तथाऽयमपि इति ।
§ 3950

कारिकां स्पष्टयन्नाह--**सदसद्व्यवहार** इत्यादि । सदसदद्वैतम् एकत्वादिधर्मैरवाच्यम् **असत्** नीलादिभेदजातं तयो**र्व्यवहारस्य** व्यवस्थायाः **निबन्धनं**, किम् ? **सभ्यग्ज्ञानं तदन्वयैकान्ते, कः प्राकृतबुद्धिः** अतत्त्वबुद्धिः न कश्चित् । सम्यग्ज्ञानेन बाध्य न बुद्धिः... द्धिरित्युच्यते, तदभावे न किंचिद्बाध्यते
/ms केनचित् **कः बोद्धा वा** तत्त्वज्ञो बोद्धा सोऽपि तदभावे...*ति हेतोः **क्वचित्** सम्मात्रादवावाञ्ये**किंचिदा**गमादिक**माश्रित्य न तिष्ठेत्** स्थितिं न कुर्यात् भर्तृ ह रिः **न प्रतिष्ठेत न वाऽपसरेद्वा** कुतश्चित् भेदवर्गात् । **क्वचित्** इति कुतश्चि[दि]ति जातविभक्तिपरिणामः सम्बध्यते । किंभूतः ? **हितान्वेषी** स्वर्गापवर्गमार्गान्वेषणशीलः । § 3951

सम्यग्ज्ञानावलम्बने परस्यानिष्टमापततीति दर्शयन्नाह--**कथंचित्** इत्यादि । केनापि प्रत्यक्षादिप्रकारेण **तत्त्वमिथ्यात्वव्यवस्थापनं** कर्तृ पेक्षा कारणं **प्रवर्त्तयति** । किंभूतं तत् ? इत्याह--**अनेकान्त** इत्यादि । क्व ? इत्याह--**तत्रैव** अनेकान्तसिद्धावेव । के ने ह **मिथ्यैकान्त** इत्यादि । § 3952

प्रकृतोपसंहारकारिकामाह--**सन्तान** इत्यादिकाम् । § 3953

...20 सन्तानसमुदायादिर्नैकान्ताभेदभेदयोः ।
ततश्च व्यवहारो न संग्रहे ऋजुसूत्रवत् ॥ २० ॥§ 3955

प्रभवः तदन्यथा च...इति व्यवहारनयः § 3956

**चशब्द** इवार्थो भिन्नक्रमः **ऋजुसूत्र** इत्यस्यानन्तरं द्रष्टव्यः । ततोऽयमर्थः--**ततः** तद्धर्मात् उक्तात् न्यायात् **संग्रहे व्यवहारो** न स्यात् **ऋजुसूत्र**

१ ग] श्रृङ्ग
१ या] प्रतिनियतव्यक्तिरूपेण ।
८ म्] **सद्** अद्वैतं
११ बुद्धिः] अत्र प्रतिर्धृष्टा ।
१२ *] अत्र प्रतिर्धृष्टा ।
१३ वावाञ्ये] त्रावाच्ये
१८ पेक्षा] **अपेक्ष्यं**
२० ह] केन ? इत्याह
२४ यः] तुलना--लौकिकसमः उपचारप्रायो विस्तृतार्थो व्यवहारः । आह च--लोकोपचारनियतं व्यवहारं विस्तृतं विद्यात् ।--तत्त्वार्थाधि° भा° १ । ३५ । संग्रहनयाक्षिप्तानामर्थानां विधिपूर्वकमवहरणं व्यवहारः ।--स° सि° १ । ३३ । व्यवहाराविसंवादी नयः स्याद् दुर्नयोऽन्यथा । बहिरर्थोऽस्ति विज्ञप्तिमात्रं शून्यमितीदृशः ॥--लघी° श्लो° ४२ ।

[ ]क इव कुतः ? इत्याह--**सन्तानः** हेतुफलभावविशेषः **समुदायः** स्कन्धः **आदिशब्देन** अन्योऽपि जगन्निवासी गृह्यते, स न, क्व ? **एकान्ताभेदभेदयोः** यतः इति निरूपितमेतदसकृत् । § 3957

कारिकाविवरणमाह--**प्रभव इत्यादि तदन्यथा** तदन्यथा सोऽन्यथा च कार्यव्यतिरेक साधनश्च शेषं सुगमम् । **इत्येवं व्यवहारनयः** । § 3958 686/mkj

व्य[व]हारम् ऋत्रुसूत्रो दर्शयन्नाह--**तत्र** इत्यादि । § 3959

...21 तत्र भेदे यथा नृणां सन्तानैक्यं तथा नयन् ।
ऋजुसूत्रनयोऽभेदे असर्व[विषयत्वतः] ॥ २१

॥§ 3961

कल्पनाशिल्पिघटितत्वाद् व्यवहारो मिथ्यैव । तद्वशादेकत्वव्यवस्थापनमयुक्तं सूर्यवंशादिवत् । स्मृतिप्रत्यवमर्शकर्मफलसम्बन्धादयः क्वचित् स्युः हेतुफलभावविशेषात् इह नियतवृत्तयः स्मृत्यादयः न पुनरैक्यात्, विप्रतिषेधात् । न चानेकतत्वस्य दर्शनादेरकत्वे क्वचिदनेकत्वं युक्तम् । विकल्पशब्दव्यवहाराणां भेददर्शनात् । § 3962

**तत्र** व्यवहारनये दूषणम् इत्यध्याहारः । किम् ? इत्याह--**सन्तानैक्यं** सन्तत्यभेदः, केषाम् ? **नृणाम्** पुरुषाणाम् । उपलक्षणमेतत् तेन अचेतनानामपि । कस्मिन् सति ? इत्याह--**भेदे** नानात्वे । कथम् ? इत्याह--**यथा** येन कल्पनारोपितप्रकारेण **अभेदे** संग्रह इत्यर्थः । **तथा नयन्** वस्तु गमयन् **ऋत्रुसूत्रनयो** भवति इत्यध्याहारः । तदैक्यं भावतः कुतो न इति चेत्; अत्राह--**असर्व** इत्यादि । § 3963 /ms

कारिकां विवृण्वन्नाह--**कल्पना** इत्यादि । **व्यवहारो मिथ्यैव** । कुतः ? इत्याह--**कल्पनाशिल्पिघटितत्वात्** व्यवहारस्य इति । ततः किं जातम्

१ इव ] त्रवत्, तदिव
४ त ] तदन्यथा इति द्विर्लिखितम् ।
६ ऋ ] ऋजुसूत्रस्य पर्यायः प्रधानं चित्रसंविदः । चेतनाणुसमूहत्वात् स्याद् भेदानुपलक्षणम् ॥ --लघी॰ श्लो॰ ४३ । पच्चुप्पन्नग्गाही उज्जुसु+ओ णयविही मुणेयव्वो ।--अनु॰ द्वा॰ ४ । सतां साम्प्रता नामभिधानपरिज्ञानमृजुसूत्रः ।--तत्त्वार्थाधि॰ भा॰ १ । ३५ । (?")ऋजुं प्रगुणं सूत्रयति तन्त्रयत इति ऋजुसूत्रः । --स॰ सि॰ १ । ३३ । सूत्रपातवद् ऋजुत्वात् ऋजुसूत्रः ।--त॰ वा॰ १ । ३३ । ऋजु प्रगुणं सूत्रयति नयत इति ऋजुसूत्रः । सूत्रपातवद् ऋजुसूत्र इति ।--नयच॰ वृ॰ पृ॰ लि॰ पृ॰ ५४ ख॰ । धवलाटी॰ सत्प्ररू॰ । ऋजुसूत्रं क्षणध्वंसि वस्तुसत् सूत्रयेदृजु । प्राधान्येन गुणीभावाद् द्रव्यस्यानर्पणात् सतः ॥ --त॰ श्लो॰ पृ॰ २७१ । नयवि॰ श्लो॰ ७७ । सन्मति टी॰ पृ॰ ३११ । नयचक्र॰ गा॰ ३८ । तत्त्वार्थसा॰ पृ॰ १०७ । प्र॰ नय॰ ७ । २८ । स्या॰ मं॰ पृ॰ ३१२ । जैनतर्कभा॰ पृ॰ २२ ।
६ र्श ] दूष
९ मिथ्यैव ] तुलना--पूर्वापरास्त्रिकालविषयानतिशय्य वर्तमानकालविषयानादत्ते । अतीतानागतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात् । --स॰ सि॰, त॰ वा॰ १ । ३३ ।

? इत्याह--**तद्वयसा इ** व्यवहारवशाद् **एकत्वव्यवस्थापनमयुक्तम्** । अत्र निदर्शनमाह--**सूर्यवंशादिवत्** सूर्यवंशादेरिव । § 3964

तु प्रमातरि पूर्वापरप्रत्यययोर्यद्येकत्वं न स्यात् सत्त्वान्तरवत् स्मृत्याद-यो न स्युः इति चेत्; अत्राह--**स्मृति** इत्यादि । **स्मृतिश्च** स इति ज्ञानं **प्रत्यवमर्शश्च** प्रत्यभिज्ञानं **कर्म च** क्रिया अदृष्टं वा **फलं** वोद नादि स्वर्गादि च, तयोः **सम्बन्धश्च** ते **आदयो** येषाम् ऊहादीनाम् ते तथोक्ताः **क्वचिद्** एकस्मिन् सन्ताने **स्युः** भवेयुः । कुतः ? इत्याह--**हेतुफलभावविशेषात्** हेतुः अनुभवः फलं स्मरणम् तयोर्भावः तस्य विशेषात् अतिशयात् । किम् ? **इह नियतवृत्तयः स्मृत्यादयः** । तथाहि--स्वसन्तानगतोऽनुभवः तद्गतस्मरणजनन-स[मर्थ] एव तदेव जनयति नान्यो विपर्ययात्, इतरथा आत्मवादिनोऽप्ययं
687/mkj समानो दोषः । अन्यस्य अनुभवः अन्यस्य स्मरणं कुतो[न] जनयति ? असामर्थ्यात्; अन्यत्र समानम् । एकत्वाभावात्; स्वपरयोः एकत्वमपि कुतो न ? तद्धेतोः तथा सामर्थ्यात्; आनुगत प्रसङ्गः । तथादर्शनात्; किं पुनः
/ms परानुभवतोऽन्यस्मरणमुपलभ्यते ? § 3965

[एते] न प्रत्यवमर्शादयो व्याख्याताः । § 3966

ननु यावत्तद्विशेषान्नियतवृत्तयः ते तावदैक्यात् कुतो न भवन्ति ? त-त्राह--**न पुनरैक्यात्** । **सुः** । कुतः ? इत्याह--**विप्रतिषेधात्** कि शेषेण निषेधात् ऐक्यस्य । यदि वा, विरोधात् । तथाहि--यदि दर्शनस्मरणादयो ऽनर्थान्तरभूताः; नैक्यम् । तच्चेत्; न ते इति । अथ अनेकान्तेऽयमदोषः; तत्राह--**नच** इत्यादि । **नच** नैव **अनेकसत्त्वस्य** परस्परभिन्नतत्त्वस्य **दर्श-नादेर व त्वे** अङ्गीक्रियमाणे **क्वचित्** पादादौ **अनेकत्वं युक्तम्** सर्वस्य ऐक्यं स्यात् इत्यर्थः । इतश्च तन्न युक्तम्; इत्याह--**एकत्वानेकत्वयोः विप्रतिषेधात्** विरोधात् कथमेकं तत्त्वम् [अनेकम् ?] अनेकं वा एकमिति ? अतश्च न तत्तथा; इत्याह--**विकल्पे**त्यादि । एतदुक्तं भवति--एकत्र अनित्यत्वाद्य-नेकधर्म**विकल्पशब्दव्यवहाराणां भेददर्शनात्** तत्र भेदसिद्धिः प्रार्थ्यते, तेषां च वस्तुतत्त्वे नियमानुपपत्तिः । तन्न युक्तम् **संज्ञासंख्याविशेषाच्च** आप्तमी° श्लो° ७२ इत्यादि । वस्तुस्वभावानन्वयाच्च तत्तथा न संगतमिति । § 3967

ननु भेदैकान्ते कथमुपादानोपादेयभावः यतः तथा स्मृत्यादय इति चेत् ? अत्राह— **स्वभावानन्वये** इत्यादि । § 3968

---

१ इ] तद्वशात्
३ तु] ननु
३ स] प्राण्यन्तरवत् ।
५ वोद] च ओद
१२ र्थ्यात्] इति चेत्; ।
१२ त्वाभावात्] इति चेत्; ।
१३ र्थ्यात्] इति चेत्; ।
१३ त] अनुगतः
१३ नात्] इति चेत्; ।
१७ सुः] स्युः
१७ कि] वि
१९ र्था] योऽर्था
१९ त] ऐक्यं चेत् ।
१९ ते] दर्शनस्मरणादयः पृथक् ।
२१ त्वे] रेकत्वे
२१ पादादौ] पादपादौ
२७ इ] द्रव्यपर्याययोरैक्यं तयोरव्यतिरेकतः । संज्ञासंख्याविशेषाच्च तन्नानात्वं न सर्वथा ॥--आप्तमी° ।

...22 स्वाभावानन्वयेऽन्यत्र स्याद्धेतुफलयोर्यथा ।
कार्यकारणभावो वा ततस्तत्त्वं निरन्वयम् ॥ २२
‖§ 3970

नावश्यं [कारणानि कार्यवन्ति भवन्ति] अतिप्रसङ्गात् । सादृश्यविशेषात् तद्विशेषे क्वचिदन्वयप्रतिपत्तिः मायागोलकवत् । यमलकयोरकार्यकारणत्वेऽपि सादृश्यं तद्विशेषप्रतिपत्तेः । तद्... § 3971

**अन्यत्र** सहकारिकारणे स्वापादौ वा वल्लीदाह-देशान्तरपर्णकोथयोर्वा **कार्यकारणभावो यथा** येन योग्यताप्रकारेण **स्वभावानन्वये** कार्यकारणोरूपा[णयोरुपादानोपादेया] ननुगमे सति **स्याद्** भवेद् विवादविषये **हेतुफलयोः** उपादानोपादेययोः तद्वत्तद्भावः, **ततः तत्त्वं निरन्वयम्** । § 3972 /ms

कारिकार्थमुपदिशन्नाह--**नावश्यम्** इत्यादि । कुतः ? इत्याह--**अतिप्रसङ्गात्** कुलालघटयोः स्वापप्रबोधयोः प्राप्तेः । § 3973

स्यान्मतम् पूर्वापरक्षणयोः निरन्तरोपलभ्यमानयोः उपादानोपादेयभूतयोः अन्वयोऽपि प्रतीयते इति; तत्राह--**तद्विशेषे** हेतुफलभेदे उपादानोपादेयभूते **क्वचिन्निरन्तरोपलभ्यमाने अन्वयप्रतिपत्तिः** एकत्वसंवित्तिः । कुतः ? इत्याह--**सादृश्यविशेषात् मायागोलकवत्** । तदुक्तम्— **सदृशापर** इत्यादि । अथ तद्विशेष एव हेतुफलयोस्तादात्म्यम्; तत्राह--**सादृश्यम्** इत्यादि । कुतः ? इत्याह--**अकार्यकारणत्वेऽपि यमलकयोः तद्विशेषस्य** सादृश्यविशेषस्य **प्रतिपत्तेः** । भ्रान्तः स तत्र इति चेत्; अत्राह--**तद्** इत्यादि । एवं ऋजुसूत्रदुर्णयो दर्शितः । § 3974

कथमयं दुर्णय इति चेत् ? अत्राह--**प्रत्यक्षेतरयोरैक्यम्** इत्यादि । § 3975

...23 प्रत्यक्षेतरयोरैक्यं प्रतिपन्नं विरुणद्धि चेत् ।
अनेकान्तं कुतः को वा विजयेतर्जुसूत्रकम् ॥ २३
‖§ 3977

यदि एकान्तविरोधात् न संविदः प्रत्यक्षादिभिरेकत्वं प्रतिपद्येत; किं केन प्रतिपद्येत तद्व्यतिरेकेण स्वरुचिविरचितनिरंशतत्त्वस्यानुपलब्धेः गत्यन्तराभावादिति । § 3978

---

१५ इ] सदृशापरापरोत्पत्तिविप्रलब्धो वा लूनपुनर्जातनखादिवत्--प्र॰ वार्तिकाल॰ पृ॰ १४४ ।
१९ यो] निराकरोति यद् द्रव्यं बहिरन्तश्च सर्वदा । स तदाभोऽभिमन्तव्यः प्रतीतेरपलापतः ॥--त॰ श्लो॰ पृ॰ २७१ । श्लो॰ ७८ । न्यायावता॰ टी॰ पृ॰ ८८ । प्र॰ नय॰ ७ । ३०, ३१ । जैनतर्कभा॰ पृ॰ २४ ।

**प्रत्यक्षः** प्रत्यक्षज्ञानपरिच्छेद्यः चन्द्रत्वादिः, **इतरः** तदपरिच्छेद्यः विभ्रमे एकत्वादिः । अथवा तत्रैव **प्रत्यक्ष** कल्पनापोढमभ्रान्तं ज्ञानस्य रूपं वा वल्यादिना **इतरत्** तदाभासं द्वित्वादिना । यदि वा, **प्रत्यक्षं** विकल्पबुद्धेः स्वरूपम् **इतरद्** अप्रत्यक्षम् अर्थेऽनभिलाप्यं रूपं तयो**रैक्यं प्रतिपन्न**मभ्युपगतं **चेत्** यदि सौगतेन, कुतः **अनेकान्तं** सौगतदर्शन **विरुणद्धि** व्याहन्ति विरुणद्ध्येव तदन्यत्रापि तथाऽनेकान्तानिवारणात् । अथ तदप्रतिपन्नम्; तत्राह--**को वा** इत्यादि । **न** इत्यनुवर्त्तते । ततोऽयमर्थः— **को वा न** /ms **विजयेत** अपि किन्तु सर्वोऽपि विजयेत **ऋजुसूत्रकम्** । अदृष्टमेकान्तं कल्पयतः सर्वैः बाधनसंभवात्, तस्य वा सर्वैः कल्पनसंभवादिति भावः ।
§ 3979

इतरस्य सुगमत्वात्, **को वा** इत्यादि विवृण्वन्नाह--**संविद** इत्यादि । **संविदो** ज्ञानस्य **प्रत्यक्षादिभिरेकत्वं** संवित्प्रत्यक्षविकल्पविकल्पविभ्रमैकत्वं **तद्यदि** सौगतो **न प्रतिपद्येत** नाभ्युपगच्छेत । अत्र हेतुमाह--**एकान्तविरोधादिति** । तत्र दूषणमाह--**किं** क्षणक्षयादि **केन** प्रत्यक्षादिना न केनचित् **प्रतिपद्येत** । कुतः ? इत्याह--**तद्व्यतिरेकेण** इत्यादि । संवित्प्रत्यक्षाद्यैवव्यतिरेकेण **स्वरुचिविरचितस्य निरंशतत्त्वस्यानुपलब्धेः** । न जैनोपगता शेपि निरंशात् संविद्रूपात् किंचित् प्रतिपद्यते अपि तु अन्यतः इति चेत्; अत्राह— **गत्यन्तराभावादिति** । § 3980

ननु सौत्रान्तिकानयापेक्षया भवतु ज्ञानं निर्दिष्टप्रकारं न ज्ञानवादिनयापेक्षया, तत्र हि **स्वरूपस्य स्वतो गतिः** प्र० वा० १ । ५ इति चेत्; अत्राह--**अन्यथा** इत्यादि । § 3981

689/mkj

...24 अन्यथा संविदस्तत्त्वं प्रतिभासोऽन्यथेत्यपि ।
सुखोत्पाद...मतं प्राप्नोति संग्रहः ॥ २४ ॥§ 3983

संविदस्तत्त्वं निरंशमभिन्नं कुतश्चित् भिन्नप्रतिभासमिवेति कल्पनायां संग्रहेऽपि तथैव किन्न कल्प्येत, यतः क्षणक्षयादिसाधनमायास [मात्रफलम्] अवलम्बेत । § 3984

अ[यम]भिप्रायः--नीलादेः अन्यनीलादिरेव वा, संविद्रूपं स्यात् ? प्रथमपक्षे **अन्यथा** अन्येन निरंशप्रकारेण **संविदः तत्त्वं** स्वरूपं **प्रतिभासः** संविदः

---

२ त्रैव ] द्विचन्द्रज्ञाने ।
२ क्ष ] क्षं
३ ल्यादिना ] वर्तुलत्वादिना
५ न ] नं
१५ द्यैव ] द्येकत्व
१७ शेपि ] त सांशेऽपि
१९ सौत्रान्तिका ] क
१९ न ] मतापेक्षया ।
१९ ज्ञा ] योगाचार ।

**अन्यथा** ग्राह्यादिभेदप्रकारेण । एवं मन्यते--यदा नीलादेरन्य तत्त्वं तदा नीलादिभेदप्रतिभासः । तद्विप्लव एव इति चेत्; अत्राह--**इत्यपि** इत्यादि । एवमपि **मतं संग्रहः प्राप्नोति** संग्रहाक्रान्तं भवेत् इत्यर्थः । कुतः ? इत्याह--**सुखोत्पाद** इत्यादि । § 3985

**तत्त्वम्** इत्यादिना कारिकार्थमाह--**तत्त्वमभिन्नं निरंशं संविदः कुतश्चिद्** /ms
आन्तरविभ्रमकारणवशात् **भिन्नप्रतिभासमिव इत्येवं कल्पनायां संग्रहेऽपि** न केवलं ऋजुसूत्रे **तथैव किन्न कल्प्येत** । विवृतमेतत् । **यतोऽकल्पनात् क्षणक्षयादिसाधनमवलम्बेत** । किंभूतम् ? इत्याह--**आयास** इत्यादि । § 3986

ननु संग्रहे नित्यं तत्त्वम्, इतरत्रानित्यं हेतुफलात्मकमिति तयोर्भेद इति तत्साधनमिति चेत्; अत्राह--**अप्राप्त** इत्यादि । § 3987

...25 अप्राप्तकार्यकालस्य कारणत्वमनिश्चितम् ।
सर्वथा सर्वदाऽदृष्टं श्रद्धेयमतिबह्विदम् ॥ २५ ॥ § 3989

कार्यक्षणम् ।...यथा कार्योत्पत्तिक्षणसमये कारणात्मलाभोऽकिञ्चित्करः तथा तत्कृतोपकारानपेक्षस्य समनन्तरसंभवश्च । यतो नैरन्तर्यविशेषमेव प्रभवमाचक्षीत । न च पौर्वापर्यमेव उपकारः । तादृशामुपादानेतरव्यवस्था कीदृशी ? तदर्थक्रियायाः नित्यत्वे क्षणिकत्वे चासंभवे कथमकार्यकारणं सर्वं न स्यात्, यद्यनेकान्तसिद्धिर्न भवेत् । § 3990

**अप्राप्तः कार्यकालो** येन निरंशेन, पूर्वमेव सर्वथा नाशात् तस्य **कारणत्वमनिश्चितम्** । तदनुभवपथप्रथोऽपि न भवति तत्कथं कारणत्वनिश्चय इति भावः । एतदेवाह--**सर्वथा** क्षणक्षयादिरूपेणैव सच्चेतनादिरूपेणापि **सर्वदा** विकल्पावस्थायामिव संहृतविकल्पेऽपि, यदि वा स्वाप इव जागरणेऽपि **अदृष्टं श्रद्धेयम् अतिबह्विदं** संविदस्तत्त्वम् । § 3991

कारिकाविवरणं **कार्यक्षणम्** इत्यादि । सर्वं सुगमम् । § 3992

ननु न पूर्वमुत्पद्य विनष्टं कारणम् अपि तु समनन्तरमिति चेत्; अत्राह--**कार्य** इत्यादि । **कार्योत्पत्तेः क्षणसमये कारणात्मलाभो यथा** येन तदुपत्त्यकारणप्रकारेण, नहि सहसंभविनोरेकमन्यस्य जनकम्, द्वयोरपि अन्योऽन्यं जनकत्वे अन्योऽन्याश्रयदोषात्, **न किंचित्करः तथा समनन्तरसंभवश्च** अकिंचित्करः । तथाहि--पूर्वं समनन्तरं यावदुत्तरस्य कारणम्;
तावदुत्तरं तथाविधं पूर्वस्य कुतो न भवति ? अविनाभावस्य उभयापेक्षयापि 690/mkj
समानत्वात् । तथा सति अन्योऽन्यसंश्रयः तदवस्थः । § 3993

---

१ त ] त्त
२१ यादिरूपेणैव ] णेव
२२ स्थायामिव ] निर्विकल्पावस्थायामपि ।

/ms स्यान्मतम्--यथा सहभाविनोरितरेण नान्यस्य उपकारः तथा समनन्तरयोरपि, तथाप्येकमन्यस्य कारणं नियमेन तदनन्तरभावादिति; तत्राह--**तत्कृतोपकारानपेक्षस्य** इत्यादि । अन्यथा सर्वं सर्वस्मात् नियमेन अनन्तरं स्यात् । **यतो** यस्मात् तन्नियमश्रद्धानात् **नैरन्तर्यविशेषमेव प्रभवं** हेतुफलभाव**माचक्षीत** सौगतः । अत्रैव दोषान्तरमाह--**न च** इत्यादि । **च** इति दूषणसमुच्चये । **न पौर्वापर्यमेव उपकारः** सर्वेषामपि पूर्वापरीभूतानां स भवेत् इति भावः । **तादृशाम्** अनन्तरवरवर्णितस्वभावानाम् **उपादानेतरव्यवस्था** नाम **कीदृशी ?** § 3994

ननु न किंचित् कस्यचित् कारणम् **अशक्तं सर्वम्** प्र० वा० २ । ४ इत्यादि वचनादिति चेत्; अत्राह--**तदर्थ** इत्यादि । **सा** चासौ **यदेवार्थक्रिया[कारि]तदेव परमार्थसत्** इति वचनात् सौगताभ्युपगता**र्थक्रिया च तस्याः नित्यत्वे क्षणिकत्वे च असंभवे** अङ्गीक्रियमाणे **कथमकार्यकारणं सर्वं न स्याद्** भवेत् । तथा च ब्रह्मवदनित्यपक्षेऽपि सर्वहेत्वादिव्यवहारापहार इति भावः । § 3995

ननु खात्पतिता रत्नवृष्टिः प्रतिभासाद्वैतवादिनः, तेनाभ्युपगमादिति चेत्; अत्राह--**यदि अनेकान्तसिद्धिर्न भवेत्** स्याद् अकार्यकारणं सर्वमिति सम्बन्धः । यावता नीलादिस्वभावामपि संविदं वदतोऽनेकान्तसिद्धिः हेतुफलभावाविरोधिनी भवेत् इत्युक्तम् । § 3996

नन्वनेकान्ते विरोधादिदोषात् कथं तत्सिद्धिः ? इत्यत्राह--**विरोधात्** इत्यादि । § 3997 /ms

...26 विरोधाद्विभ्यतस्तस्य तव कथन्न विरुध्यते ।
शून्यता बहिरन्तश्च मानमेयनिराकृतेः ॥ २६ ॥ § 3999

बहिरन्तरनुभवविषयं प्रत्यक्षगोचरमनेकान्तत्वं विरोधशङ्कया परिहरतस्ते क्षणक्षयैकान्तोपलम्भावलम्बनं वहिरर्थनिराकरणं गण्डूपदभयादजगरमुखप्रवेशमनुसरति । § 4000

उपलक्षणमेतत्, तेन वैयधिकरण्यसंशयानवस्थाऽभावदोषपरिग्रहः । **तस्य** अनेकान्तस्य सम्बन्धी यो **विरोधः** तस्माद् **बिभ्यतः तव** सौगतस्य **कथं न विरुध्यते** । का ? **शून्यता** । क्व ? **बहिरन्तश्च** । कुतः ? **मानमेयनिराकृतेः** इति । एवं मन्यते--अनेकान्तस्य विरोधादिनान्यस्यानुदलंभेनात् सकलशून्यता मानत्राणरहिता सुतरां विरोधमास्तिघ्नुते इति । § 4001

७ स] उपकारः ।
११ इ] अर्थक्रियासमर्थं यत्तदत्र परमार्थसत् । अन्यत् संवृतिसत्प्रोक्तं ते स्वसामान्यलक्षणे ॥--प्र० वा० २ । ३ ।
१३ ब्र] नित्यब्रह्मवत् ।
२९ लंभेनात्] नुपलम्भनात्

**बहिरन्तरनुभवविषयम्** इत्यादि कारिकाविवरणम् । **अनेकान्तत्वं प्रत्यक्षगोचरं विरोधं** *शङ्कया कृत्वा **परिहरतः** त्यजतः ते सौगतस्य [क्षण]क्षयैकान्तोपलम्भावलम्बनं तदेकान्तदर्शनस्वीकरणं कर्तुं **गण्डूपदभयात्** मूकसर्पोऽजगरः तस्य **मुखप्रवेशमनुसरति** । तदनेकान्त परित्यागे एक- 691/mkj परमाणुमात्रं तत्त्वं भवेत् इत्युक्तम्, तस्य वानुपलम्भनमिति किमाश्रयं तदेकान्तोपलम्भनम् । परमपि तत्प्रवेशमनुसरति इत्याह--**बहिरर्थनिराकरणम्** इत्यादि । सुविवेचितमेतत् । § 4002

ननु नयदुर्णयचिन्तेयम् आगम एव सिद्धा, तत्किमनया परमार्थविचार इति चेत् ? अत्राह--**सापेक्षा** इत्यादि । § 4003

...27 सापेक्षा नया सिद्धाः दुर्णया अपि लोकतः ।
स्याद्वादिनां व्यवहारात् कुक्कुटग्रामवासितम् ॥ २७ ॥ § 4005

लोकव्यवहार...कुक्कुटेन ग्रामवासितमिति संग्रहाभिप्रायः । नवे ग्रामवासितम् अपि तु तत्पाटके गृहे वृक्षे शाखायां मुखादौ वा व्यवहारदर्शनात् । नयाः सामान्याद्यर्पणात् अन्यथा दुर्णयाः । § 4006

भिन्नप्रक्रमः **अपिशब्दः लोकत** इत्यस्यानन्तरं द्रष्टव्यः । ततोऽयमर्थः **स्याद्वादिनां** जैनानां लोकात् लोकतोऽपि न केवलम् आगमत एव **सिद्धा** निश्चयमुपागताः । के ? इत्याह— **नयाः** । किंभूताः ? इत्याह--**सापेक्षाः** नयान्तरगोचरानिषेद्धारः । दुर्णयाश्च ततोऽपि सिद्धाः, इत्याह--**दुर्णया** लोकतोऽपि **सिद्धा** इति । किंभूताः ? **निरपेक्षाः** परविषयनिषेद्धारः । तां /ms दुर्णयत्वेद त्यो § 4007

[ननु] एकान्तवादिनः कुतः लोकतः सिद्धाः ? इत्याह--**लोकव्यवहार** इत्यादि । निदर्शनमत्राह--**कुक्कुटेन ग्रामे** गृहविशेषविशिष्टदेशे **वासितम्** इति **संग्रहाभिप्रायः** सामान्यमात्रस्यार्पणात् । **नवे** नैव **ग्रामे** सर्वत्र **वासितम् अपि तु तत्पाटके** ग्रामैकदेशे इति नैगमसिद्धिः प्रधानेतरभावेन उभयार्पणात् । व्यवहारं दर्शयन्नाह--**गृह** इत्यादि । अत्रापि न चैतत् पाटके अपि **तु गृहे वृक्षे शाखायां वासितम्** इति योज्यम् । ऋजुसूत्रमाह--**सुख** इत्यादि । **आदिशब्देन** ताल्वादिपरिग्रहः **व्यवहारदर्शनात् नयाः** । कथम् ? इत्याह--**सामान्य** इत्यादि । दुर्णयानाह--**अन्यथा** इत्यादिना । § 4008

कृतार्थस्मरणार्थं **भेदा** इत्यादि प्रस्तावान्ते वृत्तमाह-- § 4009

---

२ *] ध
१८ न] नयान्तरविषयगौणकारकाः ।
२० त्यो] ते दुर्णयाः ।
२६ सुख] मुख[[मुखे एव वासितं शब्द इति भवति इति ऋजुसूत्राभिप्रायः ।]]

...28 भेदाभेदात्मनिष्ठेष्वपि मतिविषयेषु स्युर्नया लक्ष्यमाणाः,
लोके सापेक्षवृत्त्या जिनपतिसमये चार्थमात्रावलम्बे ।
विज्ञेया दुर्णयाश्च कुमतिर्भूताः कौविदैः कोविदानाम्,
अन्यथा इदंतया... ...को नु विदधीत मानम् ॥ २८ ॥§ 4013

**भेदाभेदौ** व्याख्यातलक्षणौ तावेवा**त्मानौ** वस्तुनः स्वभावौ, नैकान्तेन भिन्नौ, **तन्निष्ठेषु** तत्परेष्व[पी]स्यस्यानन्तरे पठितव्यः । किंभूतेषु ? इत्याह--**मतिविषयेष्वपि** श्रुतविषयेष्वपिशब्दात् । तेषु किम् ? इत्याह--**नयाः स्युः** ज्ञात्रभिसन्धयो भवेयुः । किंभूताः ? **लक्ष्यमाणाः** । क्व ? इत्याह--**लोके**
692/mkj **जिनपतिसमये च** जिनागमे च । कथं लक्ष्यमाणाः ? इत्याह--**सापेक्ष-**
/ms **वृत्त्या** । किंभूते ? इत्याह--**अर्थमात्रालंबार्थमात्रम्** उपलक्षणमेतत्, तेन पर्यायमात्रग्रहणम्, तदवलम्बान केवलं नयो **दुर्णयाश्च** स्युः । किंभूताः ? इत्याह--**कमति** इत्यादि । पूर्वेण विषयः अनेन हेतुः निर्दिष्टः । **नयाः दुर्ण-याश्च विज्ञेयाः कोविदानां कोविदैः** पण्डितैः इत्यर्थः । तत्प्रयोजनमाह--**मान** इत्यादि । **अन्यथा** नयाभावप्रकारेण **को नु विदधीत** न कश्चित् । कथम् ? इत्याह--**इदन्तया** । कम् ? इत्याह--**मान** इत्यादि ॥ छ ॥ § 4014

इति र वि भ द्र पादोपजीवि-अ न न्त वी र्य विरचितायां सि द्धि वि नि श्च य टी का याम् अर्थनयसिद्धिः दशमः प्रस्तावः । § 4015

# एकादशमः प्रस्तावः : ११ शब्दनयसिद्धिः

693/mkj

शेषास्तु य शब्दनया इत्युक्तम्, तत्र **शेषा** व्याख्यातुं तन्निबन्धनभूतं शब्दं निरूपयन्नाह--**प्रोक्त** इत्यादि । § 4016

...1 प्रोक्ते व्याकरणे पुराऽक्षरपदान्युद्दिश्य तत्राक्षरम्,
द्रव्यात्माणुमयं भतोऽनुपवनं गत्यापि मूर्तं यतः ।

१० मात्रालंबा ] मात्रावलम्बे अ
११ म्बान ] लम्बे न
११ यो ] नया
१२ ति ] कुमति
१ शेषास्तुय ] षाः त्रयः
१ म ] पृ० ६६२ ।

जन्मानन्तविवर्तिनः समुदयः तेषां पदं कृत्रिमम्,
नित्यं जन्मपरिग्रहादसदनुत्पत्त्या लभेत जातताम् ॥
१ ॥§ 4020

नित्यस्य सर्वथैव [सतः उत्पत्त्ययोगात्] तदभावैकान्ताविशेषे अक्षरादेः कारणमस्ति नेतरस्येति किंकृतमेतत् ? खरशृङ्गस्य पुनः यथा अनुत्पत्तेरसत्त्वम्, असत्त्वाच्चानुत्पत्तिरित्यन्योऽन्यसंश्रयदूषणं तथा अकारणत्वादनुत्पत्तिः अनुत्पत्तेरकारणत्वमिति समानम् । स्वस्माद्भावस्य जन्म व्याहतम् आत्मनि क्रियाविरोधादिति चेत्; कथमसति पूर्वमुत्पद्य कार्यकालं गत्वा तत्करणे क्षणिकत्वम् ? यदि मायासुतः पूर्वं संसारी कथं पुनः तत्त्वाभ्यासाद् बुद्धो जातः ? कथञ्चित् सन्नेव सुगतत्वं प्राप्नोतीति समञ्जसम् । नापि मायासुतादन्यो बुद्धः संभाव्यते यतः परस्मादेव जन्म स्यात्, तत्त्वाभ्यासतत्फलयोः भिन्नाधिकरणत्वप्रसङ्गात् । सन्तानापेक्षया एकत्वेऽपि वस्त्वपेक्षया नानात्वं पितापुत्रयोरप्यस्ति । तत्र सन्ताननानात्वं नेतरत्रेति नापरं कारणमुत्प्रेक्षामहे अन्यत्र द्रव्यभेदात् । कथं पुनः...? उक्तमत्र... § 4021

प्रथमम् उक्तम् **प्रोक्तं** तस्मिन् । कस्मिन् ? इत्याह--**व्याकरणे** साधुशनेःलक्षणसमुदायरूपे । ननु नेदानीं तत् केनचित् प्रथममुक्तम्, न हि कश्चिदाचष्टे पूर्वमेकान्तेन असद् व्याकरणतत्त्वमिदं मया इदानीं प्रादुर्भावितमिति चे[त्; अ]त्राह--**पुरा** इति । भगवतः प्रथमतीर्थकरस्य पुरुदेवनाम्नः काले । एवं हि श्रूयते--पुरा पुरुदेवो भरतादीन् पाठयितुं पञ्चशताध्यायपरिमाणं स्व य म्भू ना म कं व्याकरणं चकार इति । § 4022

ननु तस्यापि अन्यतः तदध्ययनम् अस्मदादिवदिति चेत्; भर[भा र]ता दि वत् करणे को विरोधः ? वेदाङ्गत्वविरोध इति चेत्; न; वेदस्यापि कृत्रिमत्वप्रतिपादनात् । न च तदङ्गत्वमस्य सिद्धम् । अथ कैश्चित् तदङ्गत्वेन केनचित् तिरितरोद्भवद् ; वेदस्यापि कृतत्वप्राप्तेः । नहि देवदस्यापि कृत्व प्राप्तेः । नहि देवदत्तस्या गम दर्शनेन स मर्दितः स्यात्, अतिप्रसङ्गश्चैवम् । सर्वस्यापि व्राह्मणकृतस्य नास्तिकादिशास्त्रस्य तदङ्गताप्राप्तेः, तथा च[त]दर्थानुष्ठानम् । अथ ब्राह्मणोऽसौ न भवति; कुत एतत् ? अप्रमाणार्थाभिधानात्; शब्दसाधुत्वे किं प्रमाणं येन तदनुवादकरणात् पा णि निः ब्राह्मणः स्यात् । शस्त्र मिति चेत्; अन्यत्र समानम्, अन्यस्यापि वेदाङ्गत्वप्रतिपादनात् । धर्महेतुतत्साधुत्वकथनात् स ब्राह्मण इति चेत्; न; अत्रापि प्रमाणाभावात् । अथ वैदिकशब्दानुशासनात् ब्राह्मणोऽसौ; अन्योऽपि वैदिकमात्रिकविवाहाद्यर्थानुशासनाद् ब्राह्मणोऽस्तु । वेदे सोऽर्थो

/ms, 694/mkj

१५ नेः] शब्दानुशासन
१५ त्] व्याकरणम् ।
१८ भ] स्वपुत्रान् ।
२० त] भगवतः ।
२० भ] महाभारत ।
२३ द्] [[तित्तिरोपनिषद्वत् ।]]तित्तिरोद्भववद्[[इति चेत्; ।]]
२३ न] नहि देवदस्यापि कृत्वग्राप्तेःइतिद्विर्लिखितम् ।
२४ म] स्याङ्गा
२८ श] शा

नास्तीति चेत्; न; तच्छास्त्रस्य वेदाङ्गत्वात् । पुरुषकृतस्य कथं तदिति चेत्; न तर्हि पा णि ने स्तदङ्गता । पाणि नि ना तत्स्मृतमिति चेत्; प्रकृतेऽपि समानमेतत् । § 4023

किंच, जै ने न्द्रं पू ज्य पा दे न तीर्थङ्करादधीतं पुनर्विस्मृतं स्मृतमिति किन्नेष्यते ? § 4024

स्यान्मतम्--पा णि नि मतानुसरणं तत्र श्रूयते, दृश्यते च; तत्रापि परमतानुसरणं श्रूयते दृश्यते च इति समानं परस्यापि परानुसरणम् । यथा च इदानीम् अन्यमतानुसरणात् केषांचिद् व्याकरणं तथा द्विजानामपि पुरा परमतानुसरणात् तत्करणे को विरोधः ? तन्न अतो व्याकरणस्य तदङ्गता । § 4025

अथ वेदार्थप्रत्यायना[त्] तदङ्गता; न; तत्र शब्दाः केवलं व्युत्पाद्यन्ते, /ms तत्र ते व्युत्पादिताः तदर्थवद् अन्यमपि सङ्केतात् कथयन्ति । यथा च क्वचित् सामान्यलक्षणापरिगृहीता वैदिकाः शब्दा व्युत्पाद्यन्ते तथा अन्यत्र अन्य इति समानम् । यदि मतम्--वेदोक्तशब्दाश्रयणात् तदिति तत्तदङ्गमिति; तदास्तां तावत् । तन्न तदनादि इतरशास्त्रवत् । § 4026

किं कृत्वा प्रोक्तम् ? इत्याह--**उद्दिश्य** अवलम्ब्य । कानि ? **अक्षरपदानि अवीकोयन्नि**जैनेन्द्र॰ ४ । ३ । ६५ इत्यादावक्षराणि **सुम्मिङन्तं पदम्** जैनेन्द्र॰ १ । २ । १०३ इत्यादौ पदानि **ननु धुयोगे** ** जैनेन्द्र॰ २ । ४ । १ इत्यादौ वाक्यान्यपि उद्दिश्य तत्प्रोक्तम् तत्कथमिह तदग्र[ह]णमिति चेत् ? न; तदुपलक्षणत्वाद् अस्य । द्वयोज पादानमनर्थकम् एकेन उपलक्षणादिति चेत्; न; मीमांसकं प्रति दृष्टान्तार्थत्वात् पदोपादानस्य । तथाहि--यथा (?')गौः इत्यत्र न गकारादिव्यतिरेकेण पदम्, **अथ गौः इत्यत्र कः शब्दः ? गकारौकारविसर्जनीयाः इति भगवानुपवर्षः ।** शाबरभा॰ १ । १ । ५ इति वचनात्, तथा नाक्षरं तदवयवव्यतिरेकेण । सावयव चाक्षरं यद्वक्ष्यति **अणुमयम्** इति तन्मयस्य घटादिवत् सावयवत्वात् । तथापि अक्षरभाववत् तदभावोऽपि इति तत्र किम् ? इत्याह--**तत्र** इत्यादि । अनेन शब्दनिरूपणे स्वातन्त्र्यमात्मनो निराकरोति । **तत्र** व्याकरणे, तेषु वा मध्ये इत्येके, **अक्षरं** वर्णजात्यपेक्षम् एकवचनम् । किम् ? इत्याह--**द्रव्यात्म** द्रव्यस्वभावम् । पुनरपि किंभूत इत्याह--**अणुमयम्** भाषापरमाणुविकाररूपम् । § 4027

ननु परमाणुविकारस्य घटादिवद् द्रव्यात्मकत्वाव्यभिचारात् किं द्रव्यात्मपदेन इति चेत्; न; एकान्ताभावात् । तद्विकारो हि कश्चिद् गुणः श्याम-

४ पू] देवनन्दिना आचार्येण ।
६ च] इति चेत्; ।
११ ता] वेदाङ्गता ।
१२ त] व्याकरणे ।
१३ णा] ण
१७ दानि] अचीको यण्
१८ *] धुयोगे त्या
२० द्व] अक्षरपदयोः ।
२० योज] योरु
२५ व] वं
२५ त] अणुमयस्य ।
२८ इत्येके] व्याख्याकाराः ।
२९ किंभूत] तम् ?
३२ त] परमाणुविकारः ।

त्वरक्तत्वादिवत्, अपरः कर्म गमनादिवत्,  अन्यो द्रव्यं कुम्भादिवत्, तत 695/mkj
इतरव्यवच्छेदेनास्य प्रतिपादनार्थं द्रव्यात्मग्रहणम् । तदपि किमर्थमिति /ms
चेत् ? उच्यते--**गुणः शब्दः निषिध्यमानद्रव्य[कर्म]भावत्वे सति सत्तासम्ब-न्धित्वात् रूपादिवत्** इत्यत्र असिद्धताप्रतिपादनार्थं हेतोः तत् । तथाहि--**शब्दे** निषिध्यमानकर्मभावत्वे सत्यपि द्रव्यत्वनिषेधाभावात्, प्रमाणबाधनात् । किं तत् प्रमाणमिति चेत् ? कथ्यते--द्रव्यमक्षरं क्रियावत्त्वात् लोष्टवत् । क्रियावतो हि परेणापि द्रव्यत्वमिष्यते--**क्रियावद्गुणवत्समवायिकारणं द्रव्यम्** वैशे॰ सू॰ १ । १ । १५इत्यभिधानात् । न च क्रियावत्त्वं तत्राऽसिद्धम्; अक्षरं क्रियावत् क्रमेण देशाद्देशान्तरप्राप्तिमत्त्वात् वाणवत् । परेणापि तथा वक्तृमुखदेशात् श्रोतृश्रवणदेशप्राप्तस्य ग्रहणोपगमात् **चक्षुःश्रोत्रमनसाम् अप्राप्तकारित्वम्** इति वचनात् । § 4028

उत्पत्तिदेश एव गृह्यते इत्येके; तेषाम् अनुवातप्रतिवाताभ्यां तद्ग्रहणाग्रहणे न स्याताम् स्तम्भवत् । नहि स्तम्भः स्वदेशस्थो गृह्यमाणः अनुवाते गृह्यते न प्रतिवात इति दृष्टम् । अथ प्रतिवातेन प्रतिघातः श्रोत्रस्य विधीयते; ननु प्राप्तः सः प्रतिघातकारी नान्यथा, अतिप्रसङ्गात् । ततः शब्ददेशाद् यदा श्रोतृदेशं याति वायुः तदा शब्दग्रहणं भवेत् । तस्य तेन प्रतिघातान्नेति चेत्; न; अन्यत्र तथा[ऽ]दर्शनात् । एततस्यात्, प्रतिवायुना श्रवणप्रतिकूलदेशोपनीतो नोपलभ्यते तूलादिवदिति योग्यतावदितिविरहात् प्रतिवचने अग्रहणो योग्यत्वात्, अन्यथा समे अनुकूले वा मरुति ग्रहणं न स्यात् । सैव सामग्रीति  चेत्; निर्वाते न ग्रहो भवेत् । अत्रापि सैव सामग्रीति चेत्; /ms
स्या[द्य]दि वाताभावः पदार्थान्तरं भवेत् । शब्दरूपमेव इति चेत्; तत् प्रतिकूलेऽपि अनिले अविकलम् । तेन तस्य ग्राह्यता शक्तिः प्रतिहता इत्यपि नोत्तरम्; तत्रस्थस्यैव तच्छक्तिः प्रतिहता, उत देशान्तरं नीत इति [न] निश्चयहेतुरस्ति । वयं तु ब्रूमः देशान्तरं नीतः तत्रस्थैः श्रवणात् । नच क्षणिकवादिनो गन्धादिवद् भिन्नदेशोत्पत्तिः शब्दे विरुध्यते । तथापि न श्रोत्रप्रदेशं प्रति तदुत्पत्तिरिति चेत्; तद्भावेऽपि न किंचिद् विरुध्यते । दूरे शब्दः इति प्रतीतिर्विरुध्यते इति चेत्; तत्र [तन्न;] गन्धेऽपि तत्प्रतितिभावात् । ततोऽक्षर क्रियावदेव । आह--**अनुपवनं गत्यापीति** पवनेन सह अनुप-

४ इ] अनुमाने ।
६ क] बौद्धः प्राह ।
११ इ] अप्राप्तान्यक्षिमनःश्रोत्राणि--अभि॰ को॰ १ । ४३ । चक्षुःश्रोत्रमनोऽप्राप्तविषयमुपात्तानुपात्तमहाहेतुः शब्द इति सिद्धान्तात् ।--तत्त्वसं॰ प॰ पृ॰ ६०३ । उद्धृतमिदम्--न्यायकुमु॰ पृ॰ ८३ । सन्मति॰ टी॰ पृ॰ ५४५ । स्या॰ रत्ना॰ पृ॰ ३३३ ।
१२ इत्येके] बौद्धाः ।
१५ सः] प्रतिवातः ।
१७ त] त्तु
१८ दिति] ग्यसामग्री
१९ णो] प्रतिवाते अग्रहणम् अ
२३ उत] अथवा ।
२४ नीतः] इति ।
२४ त] देशान्तरस्थैः ।
२६ त] शब्दोत्पत्तिः ।
२८ र] रं

वनं शब्दस्य या गतिः तया तद्द्रव्यात्मा **अपि**शब्दः उक्तहेतुसमुच्चये, तेन स्पर्शसंख्यावत्त्वेन इत्यादि ग्राह्यम् । § 4029

ननु गन्धस्य अनुवचनं गतिरस्ति तथापि न द्रव्यम् अतो व्यभिचार इति; न; पक्षीकरणात् । गन्धवद् द्रव्यम् अनुपवनं गतिमत् न गन्धः, 696/mkj तथापि उपचारेण सोऽपि तद्वान् व्यपदिश्यते यथा तथा अक्षरमिति चेत्; किं पुनः गन्धाधारस्य द्रव्यस्येव शब्दाधारस्य गतिरस्ति येनैवम् ? नो चेत्; कथम् उपचारकल्पना ? अथ वायुगतेः अक्षरे अध्यारोपात् तद्वत्; तथा गमनमपि भवेत् । § 4030

स्यान्मतम्, गगने तदध्यारोपनिमित्तं नास्ति; किं पुनरक्षरे अस्ति ? तत्साहचर्य्यमिति चेत्; न; निष्क्रियस्य तस्य कीदृश्यं वायुना साहचर्यम् ? न हि घोटकारूढराजवत् वाय्वारूढस्य देशान्तरे प्राप्तिरस्ति । भावे वा /ms शब्दे संयोगवृत्तिः । § 4031

अथ मतम्, यं देशमुपसर्पति वायुः तत्र देशे समवायिकारणाद् आकाशाद् असमवायिकारणात् पूर्वशब्दाद् विनस्यत्तावतोऽपरापरशब्द-भावात् साहचर्यमिति; पांश्वादिवत् तस्यैव गतिपरिणामे को दोषः ? क्षणिक-त्वान्न तत्परिणामः कुतः क्षणिकत्वमुच्यते ? क्षणिकः शब्दः अस्मदादिप्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणत्वात् सुखादिवत् इति चेत्; न; वक्ष्यमाणगुणोत्तर-त्वात् । यद्वक्ष्यति **नित्यं जन्मपरिग्रहात्** इति । चर्चितं चैतदस्माभिः द्रव्य-सिद्धिप्रकरणे । ततः स्थितम्--**अक्षरं द्रव्यात्मा अनुपवनं गत्यापि** लोष्टवदिति । § 4032

स्यान्मतम्--द्रव्यात्मत्वेऽपि नानुपवनं गतिः, सर्वगताऽमूर्तत्वात् आकाश-वदिति चेत्; अत्राह--**अणुमयम्** इति । **अणवो** भाषापरमाणवः तद्विकारः तन्मयम् ततोऽसिद्धो हेतुः सर्वगतामूर्त्तत्वात् इति । नहि तद्विकारस्य तत्त्वम्; विरोधात् । तन्मयं कुत इति चेत् ? आह--**मूर्त्तं** रूपरसगन्धस्पर्शवन्मूर्त्तं पूर्वाचार्यैरभ्युपगतं यतः । तथाहि--अक्षरमणुमयं मूर्त्तत्वात् पटादिवत् । मूर्त्तत्वं च **शब्दः पुद्गलपर्यायः** सिद्धिवि° ७ । २ इत्यत्रावसरे प्रतिपादित-म् नेह पुनरुच्यते । यदि वा, द्रव्यस्वभावमपि मीमांसककल्पितं न स्यात्; इत्यत्राह--**अणुमयं** । तदपि कुतः ? इत्याह--**मूर्तं यतः** । एतदपि केन ? इत्याह— **अनुपवनं गत्यापि मतं** न केवलं शरीरावयवविशेष-

---

२ तेन] स्पर्शवत्त्वात्, संख्यावत्त्वात्, संयोगवत्त्वात् इत्यादि ग्राह्यम् ।
३ नं] अनुपवनं
५ चारेण] गन्धोऽपि ।
७ त्] अक्षरं गतिमत् भाति ।
८ भ] वायुगत्यध्यारोपात् क्रियावत् भवेत् ।
११ स्य] शब्दस्य ।
१२ वृत्तिः] संयोगसम्बन्धस्वीकारे सुतरां द्रव्यत्वोपपत्तिः ।
१४ त्ताव] विनश्यतस्ताव-
१५ मिति] इति चेत्; ।
१५ स्यैव] शब्दस्यैव ।
१६ रिणामः] इति चेत्; ।
१७ गुणो] माणो
२३ म्] विकारार्थे मयट् ।
२४ मूर्त्तं] र्त्तं
२७ न] तत्

स्पष्टादिनैव इति **अपिशब्दः** तथाहि--अनुपवनं गत्या तस्य तृणादिवत्तेन संयोगविशेषोऽनुमीयते तदभावे तदभावात् । ततश्च स्पर्शविशेषः, तस्माच्च /ms रूपादिः इति । § 4033

परः प्राह--ताल्वादिसंयोगविभागजाः शब्दाभिव्यक्तिहेतवः पवनेन वायवः प्रेर्यन्ते, तैस्तु यथावस्थितमक्षरं व्यज्यते, अतोऽनुपवनं गतिरस्य असिद्धा इति; तन्न; नित्यस्य व्यक्तिनिषेधात् । भवतु अक्षरं तन्मयम्, तदभिव्यङ्ग्यं पदं नित्य मूर्त्तत्वं स्यादिति चेत्; अत्राह--**पदसमुदयः तेषामक्षराणां** तद्व्यतिरेकेण तदनुपलब्धेः इति भावः । ततः किम् ? इत्याह--**मतम्** अभ्युपगतम् **कृत्रिमं** कृतकपदम् । नहि कृतकसमुदायोऽन्यथा; अतिप्रसङ्गात् । क्षणिकत्वात्तस्य, नानुपचारादिति वैशेषिकादिः; तं प्रत्याह--**नित्यम्** 697/mkj इत्यादि । **नित्यं** ध्रुवम् कथंचिदक्षरम् । कुतः ? इत्याह--**जन्मपरिग्रहात्** । ननु विरुद्धोऽयं हेतुः; प्रागसतः पुनरात्मपरिग्रहलक्षणत्वात् जन्मनः, नित्ये च कालत्रया[नुया]यिनि तन्न संभवति इति चेत्; अत्राह--**असदनुत्पत्त** इत्यादि । [न] सतो विद्यमानस्य आत्मलाभः । कया ? इत्याह--**असतः** खरविषाणसमानस्य **अनुत्पत्त्या** । तस्य कुतश्चिदात्मलाभो विरुद्ध्यते इति चेत्; अत्राह--**जन्म** इत्यादि । **जन्मन्येव अनन्तविवर्त्ताः** परिणामाः तद्वतः, एकान्तेन सतः आत्मलाभविरुद्धो न परिणामिन इति भावः । सप्रपञ्चं तन्नित्यत्वं साधयन्नाह--**नित्यम्** इत्यादि । परिणामनित्यम क्षरम् । कुतः ? **उत्पत्तेः** । विरुद्धो हेतुः इति चेत्; अत्राह--**लभेत** इत्यादि । कुत एतदपि ? इत्याह--**जात** इत्यादि । सुगमम् । § 4034

विरुद्धतां परिहरन् कारिकार्थमाह--**नित्यस्य** इत्यादिना । सर्वथा असत उत्पत्तौ को दोष इति चेत् ? अत्राह--**सर्वथैव** इत्यादि । स्यान्मतम्, /ms अक्षराकाशादिकं कारणमस्ति तेन उत्पद्यते, न तु खरशृङ्गादि विपर्ययादिति चेत्; अत्राह--**तदभावैकान्तोविशेष** इत्यादि । **तयोः** अक्षरादिखरविषाणयोः **अभावैकान्ताविशेषे** सति **अक्षरादेः कारणमस्ति न इतरस्य** खरशृङ्गस्य इत्येवं **किंकृतमेतत्** । § 4035

ननु खरशृङ्गमकारणम् अनुत्पत्तेः नाक्षरादिः विपर्ययादिति चेत्; अत्राह--**पुनः** इत्यादि । [अयम्]अभिप्रायः, खरविषाणामकारणम् इति साध्यम्, अनुत्पत्तेरिति हेतुः, तेन च सिद्धेन भाव्यमिति, तस्य कुतः सिद्धिः ? असत्त्वादिति चेत्; उच्यते--**पुनः** इति वितर्के, **खरशृङ्गस्य यथानुत्पत्तेः** सकाशादसत्त्वं सिद्ध्यति **असत्त्वाच्च अनुत्पत्तिः इति एवमन्योऽन्यसंश्रयदूषणं**

---

१ स्प] स्पृ
१ ब्दः] अपिशब्दार्थः ।
६ रं] अणुमयम् ।
७ त्वं] त्यममूर्त्तं
७ द] पदं
९ था] नित्यः ।
१० चारादिति] किन्तु उपचारादेव इति ।
१३ त्त] त्त्या
१७ लाभ] भो
२३ रा] रस्य आ
२४ भावैकान्तो] न्ताऽ

**तथा** तेन प्रकारस्य **अकारणत्वादनुत्पत्तिः अनुत्पत्तेरकारणत्वम् इत्येवं समानम्** अन्योऽन्यसंश्रयदा । § 4036

परो ब्रूयात् न असत्त्वात् तदनुत्पत्तिः साध्यते यतोऽयं दोषः, अपि तु कारणाभावादिति, तदा इदं वक्तव्यम् इत्यभिप्रायः । तदेवमनुत्पत्तेरसिद्धेः अकारविशेषणमनुत्पत्तिः इत्यसमञ्जसम् । § 4037

ननु सर्वगमिदं चोद्यम् । तथाहि--जीवः पुद्गलादुपादानकारणात् कुतो न भवति ? तस्य तदकारणत्वादिति चेत्; एतदपि कुतः ? ततोऽनुत्पत्तेः इति चेत्; सापि कुतः ? तदाकारणत्वात्; पूर्ववदन्योऽन्यसंश्रयः । तत्र तस्य असत्त्वादनुत्पत्तिः इति चेत्; असत्त्वं कुतः ? अनुत्पत्तेश्चेत्; स एव /ms प्रसङ्गः । एवं सर्वत्र कत्तव्यम् । अथ जीवस्य दृश्यसतः पुद्गलोपादेयतया अदर्शनात् तत्रासत्त्वम् अतश्च ततस्तदनुपपत्तिः अस्यास्तत्तदकारणम् इत्यन्योऽन्यसंश्रयाभावः, एवमन्यत्रापि तदभावः स्यादिति चेत्; सत्यं स्यात्, किन्तु प्रतीतिरनुसृता स्यात्, न विचारमात्रम् । तथा सति मृत्पिण्डात् घटादिकं तत्र मृद्द्रव्यादिरूपेण सदेवं जायते तथाप्रतीतेः, न खरविषाणं विपर्ययात् । यद्वक्ष्यति--**बहिरन्तश्च** सिद्धिवि° ११ । ३ इत्यादि । परमत- 698/mkj माशङ्कते **स्वस्मादि**[त्यादि] **भावस्य** कार्यपदार्थस्य **जन्म** उत्पत्तिः **व्याहतम्** । कुतः ? इत्याह--**स्वस्माद्** आत्मनः सकाशात्, **आत्मनि क्रियाविरोधात् इत्येवं चेत्**; एतद् दूषयन्नाह--**कथम्** इत्यादि । सति कारणे तस्य जन्म इत्यदोष इति चेत्; अत्राह--**असतीत्याद्य**[यम]भिप्रायः--**पूर्वमुत्पद्य** कार्य **कार्यकालंगत्वा तत्करणे क्षणिकत्वम् ?** कार्येण सह कारणोत्पत्तौ सन्तानोच्छेदः इति विरोधः । § 4038

पुनरपि **यदि** इत्यादिना पराभिप्रायमाशङ्कते, **कथम्** इत्यादि अत्र दूषणम् । **मायासुतः** माया नाम सुगतस्य जननी तस्याः पुत्रः **पूर्वं संसारी पुनः** पश्चात् **तत्त्वाभ्यासाद् बुद्धो** विधूतकल्पनाजालपर्यायस्वभावो **जातः** । एतदपि नेष्यते इति चेत्; अत्राह--**कथंचित्** सचेतनादिरूपेण **सन्नेव सुगतत्वम्** अपुनरावृत्त्यादिधर्मकत्वं **प्राप्नोति इति समञ्जसम्** वन्ध्यासुतवत् । § 4039

ननु न मायासुतः सुगतो भवति **गन्ता नास्ति शिवाय चास्ति गमनम्** इति वचनात्, अपि तु तदपादानादन्य एव सुगतो भवतीति चेत्; अत्राह-- **नापि** इत्यादि । **मायासुतात्** कारणभूता[दन्यः] **बुद्धो** जातः **संभाव्यते नापि** /ms यतः संभावनात् **परस्मादेव** वस्त्वन्तरादेव **जन्म स्याद्** बुद्धस्य । कुतो न संभाव्य इति चेत् ? **तत्त्वाभ्यासतत्फलयोः भिन्नाधिकरणत्वप्रसङ्गात्** । § 4040

१ स्य] रेण
२ दा] यापादनम्
५ अकार] गादि
८ त्वात्] इति चेत् ।
१० म्] वक्तव्यम्
११ अस्यास्त] जीवो न पुद्गलकारणकः ।
१४ देवं] सदेव
१९ का] कार्य इति व्यर्थमत्र ।
२९ द] तदु

परस्य मतमाशङ्कते--**सन्तान** इत्यादि । मायासुत-सुगतत्वयोः**सन्तानापेक्षया एकत्वेऽपि वस्त्वपेक्षया** मायासुतसुगतस्वलक्षणापेक्षया **नात्व**मिति चेत्; अत्राह--**पिता** इत्यादि । हेतुफललक्षणप्रबन्धः सन्तानः **पितापुत्रयोरप्यस्तीति** भावः । § 4041

स्यान्मतम्--हेतुफललक्षणप्रबन्धविशेषः स तयोर्नास्ति इति भिन्नसन्तानत्वमिति चेत्; अत्राह--**तत्र** इत्यादि । तयोः पितापुत्रयोः **सन्ताननानात्वं नेतरत्र** इतरयोः मायासुतसुगतयोर्न सन्ताननानात्वं तत्र तदेकत्वम् इत्यर्थः, इत्येवं **मते नापरं कारणमुत्प्रेक्षामहे** । कुतो नापरम् ? इत्याह--**द्रव्य** इत्यादि । यत्र **द्रव्यभेदस्तु** । [यत्र द्रव्यभेदः] तत्र सन्तानस्य नानात्वं यत्र तदभेदः तत्र एकत्वम्, अन्यथा हेतुफलभावविशेषोऽपि दुर्लभ इति निरूपितम् । § 4042

पुनरपि परमतमाशङ्कते--**कथं पुनः** इत्यादि; तत्रोत्तरम्--**उक्तमत्र** इत्यादि । § 4043

तदेव दर्शयन्नाह--**स्थूल** इत्यादि । § 4044

...2 स्थूलमेकं सकृत्तत्त्वं बाह्यं जायेत घटादि चेत् ।
क्रमेणान्तर्विद्विर्तेत वेद्यवेदकलक्षणम् ॥ २ ॥§ 4046

एकस्य... § 4047

**बाह्यं घटादि तत्त्वं चेत्** यदि । किंभूतम् ? इत्याह--**स्थूल** इत्यादि । **विद्वेद्यवेदकलक्षणं चान्तः** तत्त्वमिति गम्यते, **सकृ**देकदा **जायेत** तर्हि **क्रमेण एकं तत्त्वं विवर्त्तेत** इत्युक्तम् । § 4048
699/mkj

कारिकाविवरणम्--**एकस्य** इत्यादि । अनेकधा विवृतार्थमिति नेह विव्रियते । § 4049

ननु सर्वस्य विचारतोऽयोगात् कस्य कुतोऽनेकान्तसाधनमिति चेत् ? अत्राह--**बहिरन्तः** इत्यादि । § 4050

...3 बहिरन्तश्च परीक्षायामेकान्तेष्वनवस्थितिः ।
साक्षात्कृतमनेकान्ततत्त्वं सम्प्रतिपादयेत् ॥ ३ ॥§ 4052

यथैव हि एकान्तवादिनः अणूनामप्रतिभासनान्न चक्षुरादिविषयहेतुत्वमिति न किञ्चित् प्रत्यक्षव्यपदेशभाक् । परमाणुषु स्थूलैकाकाराभावात्,

२ ना] नाना
५ त] पितापुत्रयोः ।
९ त्र] अन्यत्र
९ स्तु] भेदात्

तद्व्यतिरिक्तस्य च कस्यचिदभावात् । कस्यचित्परस्याभावात् कस्य वा स्वसंवेदनम् ? यथाप्रतिभासमसम्भवात् । अप्रामाणिक...तथैव स्वयमभिमतंव्यवस्थापयन् एकान्तमवलम्ब्य पुनरपि विचारभङ्गुरत्वं पुनरपि सत्तां निवर्तयन् न केवलं स्वामेव वृत्तिं स्ववाचा विडम्बयति अपितु अनेकान्ततत्त्वं समर्थयति । § 4053

/ms **एकान्तेषु** सकलशून्यतादिनियमप्रवादेषु । क्व ? इत्याह--**बहिरन्तरि**[ति] तेषु किम् ? इत्याह--**अनवस्थितिः । बहिरन्त**स्तत्त्वस्य पूर्वकारिकोपात्तं **तत्त्व**पदं जातविभक्तिपरिणाममिह सम्बध्यते । कस्यां सत्याम् ? इत्याह--**परीक्षायां** विचारे सति इत्यर्थः । सा किं कुर्यात् ? इत्याह--**संप्रतिपादयेत्** । किम् ? **अनेकान्ततत्त्वम्** । किंभूतम् ? इत्याह— **साक्षात्कृतमि**ति । *कैम्पर्यमत्र सकलस्य एकान्तस्य अनवस्थानात् न तदवलम्बनेन क्वचिद् विधिप्रतिषेधव्यवहारः । सांप्रतम् अनेकान्ततत्त्वावभासनमवशिष्यते । तच्चेत् मिथ्या; निरालम्बा विधिप्रतिषेधव्यवस्था । ततः परमार्थदर्श[नम]नेकान्ततत्त्वं विधिप्रतिपेधव्यवहारान्यथानुपपत्तेः इति । § 4054

**यथैव हि** इत्यादिना कारिकां विवृणोति--**यथै**वेति गम्यते यत्तदोः नित्यसम्बन्धात् । ततोऽयमर्थः--**यथैव हि किम् ? न किंचित् प्रत्यक्षव्यपदेशभाग् एकान्तवादिनः** । कुतः ? इत्याह--**चक्षुरादिविषयहेतुत्वमणूनां यतः** । कुतः ? इत्याह--**अप्रतिभासना**त्तेषामिति । यद्वक्ष्यति--**न चैकरूपेनानेकार्थानुकरणंविरुद्धम्** सिद्धिवि॰ ११ । २१ इत्यादि । § 4055

स्यान्मतम्--परमाणुद्यात्मभूतः कश्चिदेकः स्थूल उपकारोऽस्ति स तद्व्यपदेशभाक् स्यादिति चेत्; अत्राह--**परमाणुषु स्थू लस्यैकस्य आकारस्याऽसंभवात्** । किंभूतेषु ? **संचितेष्वपि** न केवल पृथगवस्थितेषु घटादिवत् परमाणुत्वविरोधात् किं प्रत्यक्षस्य व्यपदेशभागिति । § 4056

अथ मतम्--तेभ्यो भिन्न[ः] क्रियागुणवान् दृश्य आकारः तद्व्यपदेश-
/ms भागिति चेत्; अत्राह--**तद्व्यतिरिक्तस्य च** परमाणुभ्यो भिन्नस्य च **कस्यचिदवयव्यादेरभावात् किं प्रत्यक्षव्यपदेशभाक् ?** विचारितश्चायं परो नेह विचार्यते । अत एव **स्वरूपस्य च स्वतो गतिः** प्र॰ वा॰ १ । ५ इति
700/mkj चेत्; अत्राह--**कस्यचिद्** इत्यादि । परमाणु[षु] स्थूलैका कारव्यतिरेकेण **परस्य अभावात् कस्य** वा **स्वसंवेदनम् ?** न कस्यचित् । स्वसंवेदनधर्मस्य धर्मिनिष्ठत्वात्, अन्यथा खरविषाणं स्वसंवेदनं भवेत् । § 4057

ननु नीलादि यथावभासते तत्तथैव स्वसंवेदनम्, **यद् यथैव अवभासते तत्तथैव परमार्थसत्** इत्यादेः **यदवभासते तज्ज्ञानम्** इत्यादेश्च वचनादिति

८ जात] पष्ठी ।
११ *] तात्पर्यमित्यर्थः ।
१३ द] परमार्थदर्शनविषयीकृतम् ।
१५ य] त
१८ रूपेना] पेण अ
२० माणुद्या] णुष्वा
२२ ल] लं
२६ रो] पक्षो
३० स्व] स्वसंवेदनविषयम् ।
३२ इत्यादेश्च] श्च

चेत्; अत्राह— **यथाप्रतिभासम्** इत्यादि । प्रतिभासानुसारेण **यथाप्रतिमास-मसंभवात्** तत्त्वस्य किन्तु तद्व्यपदेशभाक् कस्य वा स्वसंवेदनम्? तदसंभवश्च विचारायोगात् । सकलशून्यता स्यादिति चेत्; अत्राह--**अप्रामाणिक** इत्यादि । **तथैव स्वयम्** आत्मना **अभिमतम्** एकान्ततत्त्वम् **व्यवस्थापयन्** न केवलं **स्वामेव वृत्तिं** चरितं **स्ववाचा विडम्बय** चेत् सावयति अपि तु **समर्थय-ति अनेकान्ततत्त्वं** तदन्तरेण प्रतिभासाद्वैतादेरप्यसंभवात् । किंकुर्वन् स्ववृत्ति वाचा विडम्बयति? इत्याह--**एकान्त** इत्यादि । प्रथमं क्षणिकत्वाद्येकान्त**म-वलम्ब्य पुनरपि विचारचंचुरवलम्ब्य** पुनरपि विचारतकान्तदर्शनात् **सत्तां** विद्यमानतं **निवर्त्तयन्** अभ्युपगतत्वं दूषयन्नित्यर्थः । § 4058

एकान्तदर्शनमाश्रितं तर्हि व्यवस्थापयति इति चेत्; अत्राह--**भाव** इत्यादि । § 4059

...4 भावो येनात्मना सिद्धः कथञ्चित्तेन जायते ।
ज्ञानं येनात्मना सिद्धं यथा तेनावभासते ॥ ४ ॥§ 4061

द्रव्यस्य सदादिरूपेण भाव्यम्, येन प्रत्युत्पादं भिद्येत । पर्यायः अक्ष-रादिव्यपदेशभाक् सदसदात्मकत्वात्तस्य । भेदैकान्तदर्शनेऽपि तदनिराकृतेः । यथा चित्रमेकं ज्ञानं बोधाकारेण सर्वत्राविशिष्टं तं स्वभावं बिभर्त्ति येन प्रतिविषयं भिद्येत इति तथा प्रकृतमपि । न चायमाकारः विरुद्धध-र्माध्यासभयात् परमार्थतोऽङ्गीक्रियते । तदनेकान्तात्मकत्वे परिणामाविरोधात् । भेद...सर्वथा तत्त्वप्रतीतिनान्तरीयकत्वादतत्त्वप्रतिभासज्ञानस्य । यथा... § 4062

**भावो** जीवादिः **येनात्मना** सच्चेतनादिस्वभावेन **सिद्धः** सर्वदा लब्धात्म- /ms
लाभः, **तेन जायते** उत्पत्ति[मान् भवति] उपलक्षणमेतत्, तेन विनश्य-ति[तिष्ठति] च । किं सर्वथा[सर्वा]त्मना? न, इत्याह--**कथंचित्** इति । एतदुक्तं भवति--भाव एव उद्यति विनश्यति तिष्ठति नान्ये पर्याया इति । अत्र निदर्शनमाह--**ज्ञानम्** इत्यादि । **ज्ञानं** स्वसंवेदनं **येनात्म-ना** सच्चेतनादिस्वभावेन सर्वत्र साधारणेन **सिद्धं** ज्ञानं निष्पन्नं वा **यथा तेनावभासते** प्रति[भासते] कथंचित् इति सम्बन्धः । तथाहि--सौत्रान्तिक-मते न तत् क्षणक्षपाव भासते; तदनुमानवैयर्थ्यापत्तेः । नापि स्वकार-

२ किन्तु] किन्नु
५ ति] यति कुत्सापयति
६ त] अनेकान्तमन्तरेण ।
८ चंचुर] चारभङ्गुरत्वम्
८ त] राने
२४ ति] उदेति
२६ ज्ञानं] ज्ञातं
२८ पाव] क्षय्यव

णात्; अर्थस्य नीलाकारेणैव जडाकारेणापि; जडतापत्तेः । नच चित्रज्ञानं बोधा[का]रेणैव, नीलाकारेणापि पीताद्याकारे प्रति[भासने] चित्रता-
701/mkj ताहानेः । सुगतज्ञानम् आत्मानं यथास्वम् अतीतपूर्वक्षणोपादेयं पश्यति नैवं तथाविधोत्तरक्षणोपादेयम्; विभ्रमप्राप्तेः हेतुफलभावानवस्थितेर्वा इति । योगाचारदर्शने तत् ग्राह्याकारविवेकम् आत्मनो न पश्यति भ्रान्त्यभावप्रसङ्गात् । भ्रान्तैकान्तेऽपि न विभ्रमम् । अत एव सर्वविकल्पातीततत्त्वे तदतीतत्वम्, स्थूलादिदर्शनादिति । § 4063

कारिकां विवृण्वन्नाह--**द्रव्यस्य** इत्यादि । **द्रव्यस्य** जीवादेः **सदादिरूपेण** स्वरूपादिचतुष्टयेन **यत्सत्त्वं तदादिर्**यस्य पररूपादिचतुष्टयेन असत्त्वादेः तत्तथोक्तम् । तच्च **तद्रूपं च** तेन **भावम्** अन्यथा तदव्यवस्थितिः इति दे वा ग मा द वगन्तव्यम् । **येन** तद्रूपेण **प्रत्युत्पादं भिद्येत** नाना भवेत् द्रव्यम् ।
/ms अक्षरादिरेव द्रव्यं प्रत्युत्पादं भिद्यते । तदुक्तम्-- § 4064

*अनादिनिधनं शब्दब्रह्मतत्त्वं यदक्षरम् ।
विवर्त्तते अर्थभावेन प्रक्रिया जगतो यतः ॥ वाक्यप॰ १ ।
१§ 4066

इति चेत्; अत्राह--**अक्षरादिव्यपदेशभाक्** । किम् ? इत्याह--**पर्यायः** पुद्गलादिद्रव्यविकारो न मूलद्रव्यमित्यर्थः । कुतः ? इत्याह--**सदसदात्मकत्वात्** उपलभ्यमानः पर्यायः सन्, तद्विपरीतः पूर्वोऽपरश्च असन् तौ आत्मानौ यस्य तस्य भावात् तत्त्वात् **तस्य** द्रव्यस्य इति । न च अक्षरादि तथाविधम् । यदि वा, यदुक्तम्--**द्रव्यस्य सदादिरूपेण भाव्यम्** इति; कुत एतत् ? इत्याह--**सदे**त्यादि । § 4067

ननु द्रव्यादेकान्तेन उत्पादादयो भिन्नाः; तत्कथं प्रत्युत्पादं तद्भिद्येत ? नहि अन्यस्य भेदे अन्यद्भिद्यते इति चेत्; अत्राह--**भेदैकान्तदर्शनेऽपि** इत्यादि । द्रव्यपर्याययोः भेद एव **भेदैकान्तः** तस्य **दर्शने** मते **अपिशब्दः** भावनायां तद्दर्शनस्य पूर्वं निरासात् । किम् ? इत्याह--**तद्** इत्याह * । **तत्** प्रत्युत्पादं द्रव्यभेदस्वभावस्य **अनिराकृतेः** कारणात् **येन प्रत्युत्पादं भिद्येत** इति सम्बन्धः, द्रव्यस्य स्वभावभेदमन्तरेण भिन्नोत्पादाद्ययोगात् इति प्रत्ययादि[ति] । ततो यदुक्तम्--**शब्दाधारो द्रव्यं विभु द्रव्यत्वे सति अस्मदादिप्रत्यक्षविशेषगुणत्वात् आत्मवत्** इति; तन्निरस्तम्; साध्य-

---

१ नीलाकारेणैव] णेव
१ डाकारेणापि] ज्ञाने आकाराधायकत्वे सति ।
१ ज] ज्ञानस्य ।
२ रेणैव] प्रतिभासत ।
४ स्थितेर्वा] प्राप्तेः ।
६ म्] स्वयमेव पश्यति ।
७ त] सर्वविकल्पातीतत्वं स्वयमेव न पश्यति ।
१० म्] भाव्यम्
१० त] द्रव्याव्यवस्थितिः ।
११ द] आप्तमीमांसाग्रन्थात् ।
१७ पू] अतीतो भविष्यंश्च ।
२५ *] त्यादि

दृष्टान्तयोः नित्यत्वैकान्तसिद्धेः । निषिद्धं चात्मनि विभुत्वम् । विभुनोऽप्रत्यक्षस्य गगनस्य अन्यस्य वा गुणश्चेत् शब्दः; न अस्मदादिप्रत्यक्ष इत्युक्तम् । तन्न किंचिदेतत् । § 4068

कथमेकमनेकाकारमिति चेत् ? अत्राह--**यथा** इत्यादि । **ज्ञानं चित्र-** /ms **पेकं** संवेदनं **बोधाकारेण** सर्वत्र नीलादौ बाह्येऽ**विशिष्टं तं स्वभावं बिभर्त्ति येन प्रतिविषयं भिद्येत इति** एवं यथा **तथा प्रकृतमपि** इति । एतत् सौत्रान्तिकं प्रति उक्तम् । योगाचारं प्रत्याह **नच** इत्यादि । **न चाय-माकारः** स्थूलाकारः **अस्य** ज्ञानस्य **परमार्थतोऽङ्गीक्रियते** सौगतेन एकत्र **विरुद्धधर्माध्यासभयात्** । एवं मन्यते--यदि अयमस्य भ्रान्त आकारः एक-स्य विभ्रमेतरात्मता न भवति विषयविवेकादर्शना[द्] दृश्येतररूपता इति नीलाद्याकारैश्चित्रमेकं तदि ष्यते इति चेत्; अत्राह--**तद्** इत्यादि । **त-** 702/mkj **स्य** ज्ञानस्य **अनेकान्तात्मकत्वे** अङ्गीक्रियमाणे **परिणामाविरोधात्** । **द्रव्यस्य** इत्यादि सम्बन्धः । भ्रान्तमनेकान्तात्मकत्वमिति चेत्; अत्राह--**भेद** इत्यादि । कुतः ? इत्याह--**सर्वथा** इत्यादि । **तत्त्वप्रतीतिनान्तरीयकत्वादतत्त्वप्रतिभास-ज्ञानस्य** इति । तथापि तदुपपत्तौ दूषणमाह--**यथा** इत्यादि । सुगमम् । § 4069

एवमक्षरमभिधाय पदमभिधातुकामः प्राह--**वर्णम्** इत्यादि । § 4070

...5 वर्णमेकमनेकं वा पदं शंसन्ति नान्यत् ।
ध्वनिव्यङ्ग्यं नित्यं वा प्रत्येकमदर्शनात् ॥ ५ ॥§ 4072

द्योतकत्वेऽपि पदत्वात् ततोऽर्थः प्रतीयते । न च नित्यत्वैकान्ते वाचकं ध्वनिव्यङ्ग्यम् । अनभिव्यक्तमात्मानं विहाय आत्मान्तरमासादयतोऽनित्य-ताप्रसङ्गात् । व्यक्तेन च तादात्म्यं हि परिणामलक्षणम् । § 4073

**वर्णमेकमसहायमनेकं वा वर्णं पदं शंसन्ति** पूर्वाचार्याः तदेव पदं वा एकम् अर्थप्रतिपादकं संति । ततः किं जातम् ? इत्याह--**न** इत्यादि । उक्तपदात् **अन्यत्** पदं नास्ति । किंभूतम् ? इत्याह--**ध्वनिव्यङ्ग्यम्** अकारादिप्रकारादिप्रकाश्यम् । पुनरपि किं भूतम् ? इत्याह--**नित्यइत्यादि** । घटाद्यर्थप्रतिपत्त्यन्यथानुपपत्त्या तत्पाततत्परि कल्पनम्, *सा चोन्तपद एव उपयुक्तशक्तिका इति न ततः तत्परिकल्पना इति भावः । § 4074

ननु यद्येकोऽपि वर्णः पदं किमर्थमुक्तम्--**पदसमुच्चयः तेषाम्** सिद्धिवि० /ms ११ । १ इति चेत्; अत्राह--**वर्ण** इत्यादि । कुतः ? इत्यत्राह--**प्रत्येकम्**

---

१ त्वैकान्त ] न्ताऽ
१४ तीतिना ] अविनाभावित्वात् ।
२४ संति ] शंसन्ति
२६ नित्य ] त्यम्
२७ रि ] त्या तत्परि
२७ म् ] नित्यत्वपरिकल्पनम् ।
२७ * ] घटाद्यर्थप्रतिपत्त्यन्यथानुपपत्तिः ।
२७ चोन्त ] चान्त्य
२९ द ] दं
२९ मुच्च ] द

इत्यादि । **[अ]दर्शनात्** इत्यनेन एतद्दर्शयति प्रति प्रतिपत्तुः कृतसङ्केतेर-कारादिश्रवणाद् वासुदेवादिप्रतिपत्तिरुपलभ्यते, सा अकारादेः, अन्यतो वा संभवन्ती भवेत् ? प्रथमपक्षे सिद्धं वर्णानां वाचकत्वमिति स्फोटोऽनर्थ-कः । अकारादिरेव स्फोट इति चेत्; न; तस्य अणुमयत्वप्रतिपादनात् स्फोटोऽमूर्त्तो नित्यश्च स्यात् । § 4075

किं च, सोऽभिव्यक्तः, अन्यथा वा तत्प्रतीतिहेतुः ? आद्ये मते कुतः तस्याऽभिव्यक्तिः ? श्रोत्रादेरिति चेत्; तर्हि घट इत्यत्रापि तत एव तद-भिव्यक्तेर्घकारादिकमनर्थकम् । घकारादेः इति चेत्; **इः कामदेवः** इत्यत्र परस्य ध्वनेः व्यञ्जकस्याभावादनभिव्यक्तिः । अत्र ताल्वादिप्रेरिता वायवो व्य-ञ्जका नान्यत्र इति किंकृतो विभागः ? अथ अन्यत्र घकारादेर्व्यञ्जकस्य भावात् न ते तद्व्यञ्जकाः; किं तत्र वायवो न विद्यन्ते ? सन्ति तथापि ते घकारादीनां व्यञ्जकाः, घादयश्च स्फोटस्य इति चेत्; तदितरत्र समान-म् । शक्यं हि वक्तुम्— वायोः अकाराभिव्यक्तिः, ततः स्फोटस्य इति । तथाऽदर्शनमुभयत्र हेतुः इति सर्वदा ततः तत्प्रतीतिः स्यादविशेषात् ।
703/mkj तन्नप्रथमः पक्षः श्रेयान् परस्य । द्वितीयः स्यादिति चेत्; न; अकारादेरेव प्रतीतिभावात् । तथापि अन्यतः तत्कल्पने; धूमोऽपि पावककृतो[न]भवेत्
/ms । अपि च, अकारादिरनर्थकः क्वचिदनुपयोगात् तदभिव्यक्ता[वु]पयोग इति चेत्; न; ततः तद्वदर्थाभिव्यक्तिप्रसङ्गात् । नहि एकस्मिन्नकारे प्र-त्येकःसमुदायविचारावतार इति । § 4076

ननु विसर्जनीयादिर्वाचको दृश्यते न केवलः तथा च वैयाकरणम-तम्--**न केवला प्रकृतिः प्रयोक्तव्या न च केवलः [प्रत्य]यः** इति; ततः समुदायस्यैव पदत्वात् कथमुक्तम्--**वर्णसमुदायः पदमिति प्रातिप्रायिकमेतत्** इति । अथ सम्बोधनादौ विभक्तिलोपापेक्षया इदमुच्यते; न; लोपेऽपि पदत्वं प्रत्युपयोगात् । § 4077

स्यान्मतम्, **स्वादावधे** जैनेन्द्र० १ । २ । १०६इत्यनेन पूर्वस्य पदत्वे केवलोऽकारादिः पदमिति; तन्न सारम्; यतः वाचकस्य पदत्वात्, वाचकं च सविभक्तिकम्, पूर्वस्य तु प्रयोजनविशेषापेक्षया पदत्वं पारिभाषिकम् इति । § 4078

अत्र प्रतिविधीयते--**नसुम्मिङ्कं पदम्** जैनेन्द्र० १ । २ । १०३ इति पारिभाषिकपदमिति पारिभाषिकपदमिह गृह्यते, अपि तु पद्यते गम्य-

१ प्र] प्रति इति निरर्थकमत्र ।
१ तुः] गृहीतसङ्केतस्य ।
२ का] अकारो वासुदेवः इति कोशानुसारेण ।
१० अथ] घटः इत्यत्र ।
१८ कारे] प्रत्येकं व्यञ्जयन्ति समुदिता वा इति ।
२१ इति] तुलना--उभयनियमोऽयं प्रकृतिपर एव प्रत्ययः प्रयोक्तव्यः प्रत्ययपरैव च प्रकृतिः ।--पात० महा० ३ । १ । २ ।
न केवला...--लघुशब्देन्दु० ३ । १ । २ ।
२२ म्] यदाह अकलङ्कः सिद्धिविनिश्चये--वर्णसमुदायः पदमिति प्रायिकमेतत्, प्रत्येकमकारादेः कादाचित्कत्वदर्शनात् ।--स्या० रत्ना० पृ० ६४१ ।
२२ प्राति] अभि
३० मिति] पारिभाषिकपदमिति पुनर्लिखितमत्र ।

ते येनार्थः तत्पदम्, अर्थश्च अविभक्तिकादपि शब्दात् अन्वयव्यतिरेकाभ्यां गम्यते, इतरथा वित्तत्सुत्पत्तेः प्राक् अर्थवत्त्वापरिज्ञानात् न प्रातिपदिकसंज्ञाविधानम् इत्यनर्थकमिति न सूक्तम् **अर्थतद्धातुप्रज्ञायः प्रातिपदिकम्** पाणिनि॰ १ । २ । ४५ इति । तस्मात् केवलादपि अर्थः प्रतीयते । § 4079

नन्वेवं नियतोपसर्गाणाम् पदत्वं[न]स्यात्, नहि तैः कश्चिदर्थोऽपूर्वो गम्यते प्रकृत्यर्थाद्योतकत्वादिति चेत्; अत्राह--**द्योतकत्वेऽपि** इत्यादि । न केवलं वाचकत्वे **अपि तु द्योतकत्वे पदत्वात्ततोऽप्यर्थः प्रतीयते** अन्यथा /ms तत्प्रयोगानर्थक्यम् । एतेन अन्यानुकरणशब्दाः व्याख्याताः । यदि पद्यते येनार्थः तत्पदम्; स्फोट एव स्यात्, तेन हि अकारादिव्यंजेन अर्थः गम्यते इति चेत्; अत्राह--**न च** नैव **वाचकं** युक्त *न्यायेन । किम् ? इत्याह--**ध्वनिव्यंग्य** ध्वनिभिः अकारादिभिः प्रकास्थां * ध्वनिभ्य एव अर्थप्रतीतिदर्शनात् इत्युक्तम् । दूषणान्तरमाह--**नित्यत्वैकान्त** इत्यादि । तदपि कुतः ? इत्याह--**अनभिव्यक्तम्** अदृश्यत्मानं स्वभावं **विहाय आत्मान्तरं** दृश्यस्वभाव**मासादयतो**ऽनित्यताप्रसङ्गात् । एतदपि कुतः ? इत्याह--**तादात्म्यं व्यक्तेन च** आत्मत्वं हि**र्यस्मात् परिणामलक्षणम्** । § 4080

अथ ध्वनिभिः तस्य न किंचिदसतीयते च प नीयते वा तत्त्व थ *मनित्यत्वम्, अत्राह--**नयायोपजनेत्यादि** । § 4081

704/mkj

## अनपायोपजनमविकारमविशेषतः ॥ [१/२] ॥§ 4082

तादृशां नियमेन नित्यत्वे निष्कलत्वे अभिव्यक्तौ घटादेस्तथाभावः किन्न कल्प्येत अविशेषात् । ध्वनिभ्योऽर्थाः...न च...ततो न सत् कूटस्थं नाम तद्बुद्धेरसञ्चारप्रसङ्गात् । ननु क्षणिकत्वेऽपि तद्बुद्ध्यसंचारदोषः तदभावाविशेषात् अनन्तरक्षणवत् अन्यदापि प्रसङ्गात् । सत्यम्, एवमेतत् । § 4083

**आपायो** विनाश उपजननम् **उपजनः** जन्म, न विद्येते अपायोपजनौ यस्य स तथोक्तः । स ***विकारो** यस्य तदपि तथोक्तम् **अविकारम्** इत्यर्थः । तत्प्रतिध्वनीनाम् अकिञ्चित्करत्वात् कथं व्यञ्जकत्वं तेषामिति ? किं च तस्य तैर्यौगपद्येनाभिव्यक्तौ घेन एकेन सर्वात्मनाभिव्यक्तत्वात् टकारादीनां

---

२ त्तेः ] विभक्त्युत्पत्तेः
३ ज्ञायः ] अर्थवद् धातुरप्रत्ययः
५ तोप ] निपातोप
९ म् ] इति चेत्; ।
९ अकारादिव्यंजेन ] व्यङ्ग्येन
१० * ] उक्त
११ निव्यंग्य ] व्यङ्ग्यं
११ * ] प्रकाश्यम्
१३ अदृश्य ] श्यम् आ
१६ प ] दसज्ञन्यते सद्याप
१७ * ] त[[उपजननम् अपायश्च अनित्यत्वमित्यर्थः ।]]त्व
१७ या ] अनपा
२४ * ] न
२६ घेन ] घटः इत्यत्र आद्येन घकारेण ।

वैयर्थ्यम्, प्रकाशितप्रकाशनदोषात् । क्रमेण इति चेत्; अत्राह--**अविशेषत** इत्यादि । स्पष्टम् । § 4084

अत्रैव दोषान्तरमाह--**तादृशाम्** इत्यादि । **तादृशां** ध्वनिव्यापारात् पूर्वम् एकान्तेनानुपलभ्यमानानां तद्व्यापारे च उपलभ्यमानानां **नियमेन नित्यत्वे निष्कलत्वे** निरंशत्वे अङ्गीक्रियमाणे **तादृशां** स्फोटादीनाम**भिव्यक्तौ च** /ms चाङ्गीक्रियमाणायां **घटादेः तथा** नित्यत्वनिष्कलत्वाभिव्यङ्ग्यत्वप्रकारेण **भावः** सत्ता **किन्न कल्पेत ?** कुतः ? इत्याह— **अविशेषात्** अतिशयाभावात् । घटादिरपि नित्यो निरवयवश्चक्रादिभिरभिव्यज्यते न क्रियते इत्यपि स्यात् । दीपादिवैयर्थ्यमिति चेत्; न; एकत्र प्रकाशकद्वयाविरोधात् रूपे चक्षुरालोकवत् । सदा चक्रादिसहितस्यैव दीपादेः तत्प्रकाशनं चेत्; न; कदाचित् निरालोकस्य चक्षुष एव प्रकाशकत्वदर्शनात् । अथ घटादेः प्रदीपारेरिव व्यञ्जकः; चक्रादिः किं भविष्यति, अकिञ्चित्करस्य अपेक्षणीयत्वायोगात् ? कारक इति चेत्; कुत एतत् ? प्रागसतः तत आत्मलाभात् घटादेरिति चेत्; प्रागसतः इति कुतः ? दृश्यस्यादर्शनादिति चेत्; स्फोटस्य ध्वनिव्यापारात् प्राक् किं दर्शनमस्ति ? तथा चेत्; तद्व्यापारवैफल्यम् । नो चेत्; कुतः सत्त्वम् ? पुनरुपलम्भात्, इतरथा खरविषाणवत् तदयोगादिति चेत्; तदेतत् घटादौ समानम् । ष्यास्यात्मकत्वे ध्वनिभ्योऽपि न दर्शनमिति साध्वी तेषां व्यञ्जकत्वकल्पना । पूर्वं तदात्मकत्वं न पश्चात्; इतरत्र समानम् । § 4085

स्यान्मतम्--ध्वनीनां कारकत्वे व्यञ्जकं किं तस्य ? तैलादेः कारकत्वे दीपादेर्व्यञ्जकान्तरं मृग्यम् इत्यलं प्रसङ्गेन । § 4086

स्यान्मतम्--घटादेः सावयवस्य प्रतीतेः तथाभावो निष्कलभावः कल्प्येत, स्फोटस्यापि क्रमशोऽभिव्यज्यमानस्य सावयवत्वप्रतीतिः तदवस्था । भ्रान्तिः इत्यपि नोत्तरम्; अन्यत्र प्रसङ्गात् । निष्कलरूपादर्शनमुभयत्र । /ms ततः स्थितम्--**अविशेषादिति** चक्रादेरनन्त[रं] घटादेरुपलम्भात् । भवतु 705/mkj तस्य ततोऽभिव्यक्तिः न ध्वनिभ्यः स्फोटस्य विपर्ययादिति दर्शयन्नाह--**ध्वनिभ्योऽर्था**...[५४८ क, ख ५४९ क, ख इति द्वे पत्रे अलिखिते एव वर्तेते] ...कर्षमन्तरेण प्रत्ययहेतुः स्यात् तन्न गोत्वं भिन्नं विनियतं सिद्ध्यति । राजपुरुषवत् स्यादिति चेत्; न; तत्रोपकारभावात् । अन्यत्रापि तथाकल्पनायां **सूक्तम् न च** इत्यादि । § 4087

ननु यदुक्तं केनचित् किंचिद्[क्रियमाणं]वक्ष्यमानं वा तत्कृतोपकारमपेक्षते नाम इति; तदयुक्तम्; ज्ञानस्यैव तेन तत्र ज[न]नात् । इदमत्र

---

७ ल्पे ] ल्प्ये
११ स्य ] आलोकरहितस्य नक्तंचरचक्षुषः ।
११ दीपारेरिव ] पादिरेव
१५ त ] ध्वनिव्यापार ।
१७ ष्यास्या ] अदृश्या
१८ दात्म ] अदृश्यात्मकत्वम् ।
१८ श्चात् ] इति चेत्; ।
२० स्य ] शब्दस्य ।
२२ त ] अभिव्यङ्ग्यत्वभावः ।
२२ निष्क ] निरवयवत्वम् ।
३१ मानं ] व्यज्यमानं

चिन्त्यते--सामान्यं स्वविज्ञानजनन योग्यम्, अन्यथा वा ? योग्यं चेत्; व्यक्त्यभावेऽपि जनयेत् । शेषं च चिन्तितमत्र । § 4088

प्रकृतं निगमयन्नाह--**ततो न सद्** विद्यमानं **कूटस्थ नाम** । कुतः ? इत्यत्राह— **तद्बुद्धेरसंचारप्रसङ्गात्** । कूटस्थस्य बुद्धेः **तद्बुद्धेः** संचरणं देशकालान्तरगमनं **संचारः** न संचारोऽसंचारः तस्य प्रसङ्गात् । तथाहि--यदा एकस्मिन् क्षणे देशे वा तस्य सत्त्वम्; ततः कालान्तरादितत्सम्बन्धस्य एकान्तेन अभेदे तावन्मात्रं तदिति द्वितीयादिक्षणानां तच्छून्यत्वमिति न तत्र तद्बुद्ध्यवतारो निर्विषयत्वभयात् । भेदे वा क्षणिकत्वम् । यदि वा, येन स्वभावेन क्वचिद् देशादौ स्वज्ञानं जनयति तत् तेनैव, अन्यत्र अन्यदा तज्जनने सर्वतत्कार्यस्यैकदा एकत्र प्रसव इति न कालादैर्ध्यादिप्रतीतिः । नन्वेवम्--प्रज्ञा क रि णै व भवतापि क्षणिकत्वं कक्षीकृतं स्यात्, त च्च नक्षमृते अत्यक्षादात्मानं क्षणमात्रमपि भेदेन व्यवस्थापयितुम्; इत्याह--**ननु** इत्यादि । न केवलं कूटस्थे किन्तु **क्षणिकत्वेऽपि समानः** तस्य क्षणिकत्वस्य बुद्धिः तस्याः असंचारः स एव दोषः **तद्बुद्ध्यसंचारदोषः** । कुतः ? इत्यत्राह— **तदभावाविशेषादिति** । तयोः कूटस्थक्षणिकत्वयोः अभावस्य अविशेषात् । /ms यथैव हि कूटस्थस्य पूर्वापरसत्त्वयोर्मध्यसत्त्वाभेदभावः, तथाहि निरंशक्षणिकपरमाणुसंवेदनस्य पुरुषाद्यसंवेदनादभेदादभावः । कल्पनया उभयसत्त्वम् । यदि वा, क्षणिकेतरपक्षयोः बुद्धिसंचारभावात् । यथैव हि कूटस्थे समर्थे एकत्र क्षणे सकलबुद्ध्युत्पादः तथा क्षणिकेऽपि तत्काल एव बुद्धिभावात् सन्तानसंचरणाभावः । द्वितीयक्षणे तत्कार्यमिति चेत्; अत्राह--**अनन्तरक्षणवत्** इत्यादि । कारणक्षणाद् द्वितीयः क्षणः अनन्तरक्षणः तत्र इव तद्वत् **अन्यदापि** कालान्तरेऽपि **प्रसङ्गात्** कार्यस्य पारतन्त्र्याभावात् । अन्यत्रापि प्रसङ्गोऽस्त्येव जाग्रद्दर्शनात् प्रबोधभावादिति चेत्; न; तदनन्तरं तन्निश्चयानुदयप्रसङ्गेन क्षणक्षयादिवत् तद्व्यवहारोच्छेद इत्युक्तमिति । अत्रोत्तरमाह--**सत्यम्** इत्यादि । यदुक्तं कूटस्थवत् क्षणिकत्वेऽपि बुद्ध्यसंचार इति **सत्यमेव**मुक्तप्रकारेणे***तत्,** उभयात्मकतत्त्वोपगमादिति भावः । § 4089

तत्रापि उभयदोषप्रसङ्गः । नहि चौरसमुदायोऽ[चौर]इष्ट इति चेत्; अत्राह--**स्याद्धेतुफलतादात्म्ये** इत्यादि । § 4090

...6 स्याद्धेतुफलतादात्म्ये महत्स्थूलाणुतत्त्ववत् ।
उभयैकान्तादिदोषा न वेद्यवेदकज्ञानवत् ॥ ६
॥§ 4092

३ स्थ] स्थं
६ स्य] कूटस्थस्य ।
७ त्र] द्वितीयादिक्षणे ।
११ व] क रे णे व
१२ क्षा] तच्च न क्षमते अध्यक्षा
१८ बुद्धिसंचार] रा
२५ *] णे

706/mkj

कथञ्चिन्नित्यत्वेऽपि पूर्वापरयोः...यथा नित्यत्वे क्षणक्षये वा परमाणूनां पारिमण्डल्यमजहतामेव स्थूलत्वे स्थूलाकारेणापि नानुपलम्भप्रसङ्गः पारिमण्डल्यवत् । यथा वा ज्ञानस्य संवेदनवत् नीलाद्याकारस्य नाविशेषप्रसङ्गः कथञ्चित्तादात्म्यात्, तथा सर्वस्य स्यात्, हेतुफलयोस्तादात्म्येनैवोपलब्धेः इति
§ 4093

**स्यात्** कथंचित् **हेतुफलयोः** उपादानोपादेययोः **तादात्म्ये** सति न **उभयैकान्तदोषः आदि**शब्देन विरोधादिपरिग्रहः । वैशेषिकप्रसिद्धनिदर्शनमाह--**महत्स्थूलाणुतत्त्ववत्** इति । **स्थूलं** च तदवयव्यपेक्षया **अणु च** अवयवापेक्षया /ms तदेव च **तत्त्वं महच्च** तत् **स्थूलाणु** तत्रेव तद्वदिति । यथा अवयवावयविनोः कथंचित्तादात्म्ये स न दोषः, तथा अन्यत्रापि । चिन्तितमेतत् । बौद्धप्रसिद्ध[निदर्शन]माह--**वेद्य इत्यादि** । § 4094

कारिकाविवरणमाह--**कथंचिद्** इत्यादि । **यथा** इत्यादिना दृष्टान्तद्वयं व्याचष्टे । *क्षणक्षयेति **नित्यत्वे क्षणक्षये वा परमाणूनां पारिमण्डल्यं** निरंशवर्तुलत्वम**जहतामेव** [त]त्परित्यागे अभागोऽवयवी सकलावरणादिदोषभाग् भवेत् । **स्थूलत्वे** स्थूलपरिणात्मकत्वेऽपि **नानुपलम्भप्रसङ्गः** । केन ? **स्थूलाकारेणापि** । केनेव ? इत्याह--**पारिमण्डल्येनेव तद्वदि**ति स्थूलाकारवद्वा तेषां न पारिमण्डल्योपलब्धिः । निदर्शनान्तरमाह--**यथा चा ज्ञानस्य** चित्रबोधस्य यो **नीलादिराकारः** तस्य **नाविशेषप्रसङ्गः** । कस्य वा ? इत्याह— **संवेदनवत्** संवेद[न]स्येव । एतदुक्तं भवति--यथा ज्ञानस्य स्वनीलाद्याकारे संवेदनमविशिष्टं नैव *नीलादिःचित्रर्वाभावप्रसङ्गादिति । संवित्तेर्वा नीलवदचेतनत्वम् । यथा वा न तात्पर्य संवित्ति[ः]नीलेन नीलाकारतया समानापि न जडतया समा इति । कुतः ? इत्यत्राह--**कथंचित्तादात्म्यात्** । कथंचिदिति, संवित्तेर्वा कथंचित्तादात्मना कीलसदृशात्मकत्वात् । § 4095

ननु यदि नाम दृष्टान्तत्वेनोपात्ते वस्तुनि कथंचिदभेदः तथोपलब्धेः **पूर्वापरयोः** किमायातम्, येनोच्यते **कथंचिन्नित्यत्वेऽपि** इति चेत्; अत्राह--**स्यात्** कथंचित् **हेतुफलय्रोः यत्ता[दा]त्म्यं तेनैव उपलब्धेः सर्वस्य** इति । तत्र /ms वहिस्तत्त्वम् अन्तस्तत्त्वं वा अविकल्पे निरंशक्षणिकतया चकास्ति । § 4096

*विपरीतप्रतिभासस्तु मिथ्याविकल्प इति चेत्; अत्राह--**नित्यक्षणिकतत्त्वार्थ** इत्यादि । § 4097

११ सिद्ध] उदाहरणमाह ।
१३ *] क्षणक्षयेति पुनर्लिखितं भाति ।
१७ चा] वा
१८ वा] वा इवार्थे ।
२० *] वं
२० नीलादिः] देः
२० र्वा] चित्रत्वा
२१ र्य] तादूप्य
२३ थंचित्ता] त्त
२३ कील] नील
२६ त्र] तन्न
२८ *] कथञ्चिन्नित्यानित्यतया ।

...7 नित्यक्षणिकतत्त्वार्थमिथ्यैकान्तविकल्पयोः ।
अविकल्पाप्रसिद्धिः स्यादनियोगग्रहोऽनयोः ॥ ७
॥§ 4099

यथैव...दृष्टे प्रमाणान्तरवृत्तेः । असमारोपित...न...समारोपव्यवच्छेदस्यैव व्यवसायात्मकत्वात् इत्युक्तप्रायम् । स्वसंवित्तेः स्वतः व्यवसायोपपत्तेश्च, अन्यथा अन वस्थानादप्रतिपत्तिः परतः...तस्मात् तत्त्वतः इष्टानिष्टग्रहत्याग- 707/mkj योः नियोगतः अनुपपत्तेः प्रेक्षावान् कुतः प्रवर्तेत ? § 4100

क्वचित् परिच्छेद्ये कर्मणि नियोजनमिति नियोगि नित्यं क्षणिकं वा विषयीकुर्विति, न विद्यते नियोगोऽस्य इति **अनियोगः** स चासौ **ग्रहश्च** निर्विषयग्रह इत्यर्थः । कयोः ? इत्याह--**अनयोः** नित्यक्षणिकतत्त्वार्थयोः **स्याद्** भवेत् । कयोः सतोः ? इत्याह--**नित्य** इत्यादि । *नित्यादि **नित्यक्षणिकतत्त्वे** सर्वोपायो स्तौ च तौ **मिथ्यैकान्तविकल्पौ** च तयोः सतोः इति । निर्विकल्पे सति स नियोगग्रहोऽनयोरि[ति] चेत्; अत्राह--**अविकल्पाप्रसिद्धिः** अविकल्पस्य अविकल्पेन च **अप्रसिद्धिः** अनयोरिति व्याख्याने । अत्र विवरणम्--**यथैव** इत्यादि भविष्यति । § 4101

इदमपरं व्याख्यानम्--**नित्यक्षणिकतत्त्वार्थमिथ्यैकान्तविकल्पयोरनयोगग्रहः** । कुतः ? इत्याह--**अविकल्पेनाप्रसिद्धिः स्यादनयोः यतः**, तदुक्तमत्र पूर्वम् **अङ्गीकृतात्मसंवित्तेः** सिद्धिवि० १ । १८ इत्यादि । विवरणम् अत्रापि **अन्यथाऽनवस्थानात्** इत्यादि । तथा इदमपरं **तद्विकल्पयोरनियोगग्रहः** क्षणिकविकल्पस्य प्रमाणत्वेन स्वीकारो नेतरस्य इति यो नियोगो नियमः तस्य अभावो यस्मिन् तथोक्तो ग्रहः द्वयोर्ग्रहणमग्रहणं वा इत्यर्थः । अथ क्षणिकविकल्पस्य वस्तुनि प्रतिबन्धात् तस्याविकल्पेन प्रतिपत्तेः तस्यैव ग्रह इति चेत्; अत्राह--**अविकल्पप्रसिद्धेः अविकल्पेन** तत्त्व**स्यासिद्धिः** । वृत्ति /ms चेत्; अत्राह--**[अ]विकल्प** इत्यादि । § 4102

कारिकार्थमुपदिशन्नाह--**यथैव** इत्यादि । कृत इत्याह--**दृष्टे** प्रत्यक्षेण प्रतिपात्र *क्षणिकत्वादौ **प्रमाणान्तरस्य** अनुमानस्य **वृत्तेः** इतरथा तन्न वर्त्तेत । § 4103

स्यान्मतम्--यत्र समारोपो नास्ति तस्य निश्चयमन्तरेणापि सिद्धिः, तदाह--**असमारोपित** इत्यादि । अत्रोत्तरमाह--**न** इत्यादि । परेण यदुक्तं **तन्न** । कुतः ? इत्याह--**समारोप** इत्यादि । **समारोपस्य व्यवच्छेदो** यस्मिन् ज्ञाने **तस्यैव व्यवसायात्मकत्वात् इत्युक्तप्रायम्** प्रथमप्रस्तावे । एतेन

---

७ नियोगि ] गः
१० *] नित्यादि इति पुनर्लिखितम् ।
११ र्वोपायो ] तत्त्वे एवार्थो ययो
१५ न ] नि
१८ रं ] व्याख्यानम् ।
२१ न्धात् ] सम्बन्धात् ।
२२ ल्प ] ल्पाऽ
२२ सिद्धेः ] द्धिः
२२ वृत्ति ] कुत इति
२४ कृत ] कुतः ?
२५ *] पन्ने

अभ्यासदशापि चिन्तिता तस्यामपि सांशस्यैव प्रवेदनादि [ति]; तत्र इत्याह--**स्वसंवित्तेः** इत्यादि । व्यवसायस्य या आत्मवित्तिः तस्याः **स्वतः** आत्मनैव **व्यवसायोपपत्तेश्च** तत्र **अन्यथा** स्वतो व्यवसायाभावप्रकारेण **अनवस्थानाद-प्रतिपत्तिः** व्यवसायस्वरूपनिश्चायकस्यापि निश्चयस्य अन्यतो निश्चयात् । अत्र निदर्शनमाह--**परत** इत्यादि । उपसंहरन्नाह--**तस्मात्** इत्यादि । सुगमम् ? ततः किं जातम् ? इत्याह--**तत्त्वत** इत्यादि । परमार्थतः तच्चेष्टमिष्टं **तयोः ग्रहत्यागयोः नियोगतः स्वयमनुपपत्तेः प्रेक्षावान् कुतो** नित्यविकल्पाद् अन्यतो वा **प्रवर्त्तेत** तद्यदि अनेकान्तप्रतिपत्तिरिति । ततः स्थितम्--**अक्षरं नित्यमर्थप्रतिपादकं** चेति । § 4104

नित्यमपि व्यापि स्यादिति मीमांसकः; तत्राह--**नित्यत्वेऽपि** इत्यादि ।
§ 4105

708/mkj

...8 नित्यत्वेऽपि शब्दानां सर्वेषां स्यात्सकृच्छ्रुतिः ।
समाक्षग्रहयोग्यत्वात् व्यापिनां समवस्थितेः ॥ ८
॥§ 4107

तत्कृतमुपकारमात्मसात्कुर्वतः तद्देशवृत्तिनियमभावात् । कूटस्थस्य नियमेन तद्देशवृत्तिर्न संभवत्येव । सर्वगतत्वेऽपि विवक्षितैकशब्दश्रुतिर्न स्यात् । नहि समानदेशानां समानाक्षविषयाणामेतत् न्याय्यम् । प्रत्येकं व्यञ्जक-नियमे कलकलश्रुतेरनुपपत्तेः । व्यक्ताव्यक्तस्वभावप्राप्तिपरिहारमन्तरेण कुतो व्यक्तिः ? तत्त्यागोपादानाभ्यामृते कुतः तिरोधानाम् ? § 4108

/ms **नित्यत्वे** कूटस्थत्वेऽपि **शब्दानामक्षराणां** न केवलं कदाचित्कश्रवणं न संभवति श्रवणैकस्वभावानां सर्वदा श्रवणं संभवति इत्यर्थः । अथ यदा ज्ञानं तदा श्रवणम्, अन्यदा विपर्ययः; न ज्ञानं कुतः तेभ्यः सर्वदा स्यात् ? नित्यस्यापेक्षणं च निरस्तम् । § 4109

---

१ त्र] तन्न;
६ ष्टं] इष्टं च अनिष्टं च
८ अ] क्षणिकविकल्पाद्वा ।
१६ देशानां] तुलना--सर्वशब्दानां युगपद्ग्रहणप्रसङ्गात् । श्रोत्रं तावत् समानेन्द्रियग्राह्यसमानदेशसमानधर्मापन्नार्थानां ग्रहण्मय प्रतिनियतसंस्कारकसंस्कार्यं न भवति इन्द्रियत्वात् चक्षुर्वत् । शब्दा वा प्रतिनियतसंस्कारकसंस्कार्या न भवन्ति समानेन्द्रियग्राह्यसमानधर्मापन्नत्वे सति युगपदिन्द्रियसम्बद्धत्वात् घटादिवत् । --न्यायसा० पृ० ३० । प्रश० व्यो० पृ० ६४८ । न्यायवा० पृ० २८८ । समानकरणानां तादृशामभिव्यक्तिनियमायोगात् सर्वत्र सर्वदा सर्वेषां संकुला श्रुतिः स्यात् ।--अष्टश० अष्टस० पृ० १०५ । न्यायकुमु० पृ० ७०८ । प्रमेयक० पृ० ४२३ । सन्मति० टी० पृ० ३६ । स्या० रत्ना० पृ० ६८३ । प्रमेयरत्नमा० ३ । १०० । शास्त्रवा० टी० पृ० ३७८ ।
१९ क] का

स्यान्मतम्--आवरणसद्भावे अश्रवणं तदभावे श्रवणम्; उपपन्नमेतत्--यस्यावरणेन तेषां तज्जननसामर्थ्यमपसार्येत । समर्थं तु व्यवहितमपि स्वकार्यं जनयति यथासंभूतचक्षुः तिमिरव्यवहितं रूपस्य । ततो न केवलं कादाचित्कश्रवणं न संभवति विवक्षितैकश्रुतिनियमश्च न संभवति **सकृत् सर्वेषां श्रुतिः स्यात्** इत्यर्थः । अथ सर्वत्र सर्वदा सर्वेषां सन्निधानेऽपि यस्य यत्र व्यञ्जकसन्निधिः तत्र तस्य श्रवणमिति; तत्राह--**समाक्ष** इत्यादि । इष्टस्य अकारस्य अन्यस्य वा ताल्वादिप्रेरितात् ध्वनेरभिव्यक्तिः प्रकाशनं नेतरस्य इति योऽयं तद्व्यक्तिनियमः स न । कुतः ? इत्याह--**समाक्षग्रहयोग्यत्वात्** एकेन्द्रियग्राह्यत्वात् । § 4110

ननु एकेन्द्रियग्रहयोग्या अपि देशादिभिन्ना घटादयो नैकप्रदीपव्यङ्ग्या इति चेत्; अत्राह--**व्यापिनां** तेषां **समवस्थितेः** एकदेशे स्थितेः अतः तन्नियमाभावात् **सर्वेषामक्षराणां सकृच्छ्रुतिः** । न खलु समानदेशेषु समानेन्द्रियग्रहणयोग्येषु व्यक्तिनियमो दृष्टः येन अन्यत्रापि कल्प्यते । § 4111

ननु घटादौ दृष्टो धर्मो नान्यत्र योजनमर्हति, अन्यथा रथ्यापुरुषे उपलब्धो धर्मः पुरुष स्वयमभिमते योजनमर्हेत् । अथ पुरुषातिशयोऽप्यस्ति; व्यञ्जकातिशयोऽपि तथास्तु । § 4112 /ms

स्यान्मतम्--अनुपदेशाऽलिङ्गाऽव्यभिचारिनष्टमुष्ट्याद्युपदेशान्यथानुपपत्तेः तत्कल्पनमिति; तर्हि व्यापिनां समाक्षग्रहयोग्यानां कादाचित्काऽश्रवणान्यथानुपपत्त्या प्रतिनियतावरणम्, तथा विधश्रवणान्यथानुपपत्तेः प्रतिनियतव्यञ्जकानां 709/mkj वा इति कल्पनमस्तु अविशेषादिति; न; प्रतिनियतावरणनिषेधात्, तत्स्वरूपाखण्डनात् । अथ इन्द्रियस्य तद्ग्रहणयोग्यता तेन प्रतिहन्यते; सापि न साध्वी कल्पना; विषयस्य दर्शनजननयोग्यस्य भावे दर्शनस्य अवश्यम्भावात् । सहकारिणः प्रतिहतप्रसरत्वान्नेति चेत्; न; नित्यस्य तदपेक्षायोगात् । आत्मनः सा तेन प्रतिहन्यत इत्यपि मिथ्या; नित्यत्वात्तस्य । कार्योत्पत्तिप्रतिबन्धः क्रियते चेत्; न; समर्थे कारणे तस्याऽवश्यंभावात्, इतरथा कारणं जनयति तच्च प्रतिबध्नातीति काचपच्यं भावाना । तस्माद् व्यवधायकमेव आवरणं व्यापिनाम् । तदपि कथमिति चेत् ? अयमपरोऽस्य दोषोऽस्तु, केवलं वयमभ्युपगमवादिनः । तच्च व्यवधायकमेकमपि समानदेशानां समानेन्द्रियग्राह्याणां समानमिति केनचित्तदपसारणे सर्वेषां युगपद्ग्रहणम्, क+उपटापसारणे तथापिच घटानामिव । § 4113

२ तेषां] शब्दानाम् ।
३ था] नक्तंचरचक्षुः ।
१५ ध] असर्वज्ञत्वलक्षणः ।
१५ पुरुष] षे
१७ त] पुरुपातिशयस्य कल्पनमिति ।
तुलना--अनुपदेशालिङ्गानन्वयव्यतिरेकपूर्वकाविसंवादिनष्टमुष्टिचिन्तालाभालाभसुखदुःखग्रहोपरागाद्युपदेशकरणान्यथानुपपत्तेः ।--बृहत्सर्वज्ञ॰ पृ॰ १३० ।
१९ विध] प्रतिनियत ।
२१ त] शब्दग्रहणयोग्यता ।
२१ तेन] आवरणेन ।
२४ सा] योग्यता ।
२६ भावाना] नाम्
३० क+उ] क[[कटश्च पटश्च आवरणभूतौ तयोः ।]]ट
३० थापिच] त[[समानदेशसमानेन्द्रियग्राह्य ।]]थाविध

*येऽपि मन्यन्ते--आत्मा मनसा युज्यते तदपि नभसा श्रवणेन्द्रियेण, /ms तत्पुनरर्थेन शब्देन । अत्र इन्द्रियार्थयोः समवायः  सम्बन्ध इति; तेऽपि एतेन निर्वर्त्तितोत्तराः; तेषामपि सकृत् सर्वेषां शब्दानां श्रुतिः स्या[त्] व्याप्येकान्ततः श्रोत्रम्, तत्र समवेताः सर्वे शब्दा इति संयुक्तसमवायः मनसा विवक्षितवत् सम्बन्धोऽविशिष्ट इति । विशिष्टादृष्ट[स्य] नियामकत्वे; मानो[मनोऽ]तिरिच्यत इत्युक्तमत्रैव सर्वज्ञसिद्धौ । किंच, समवायोऽप्येवं न ग्रहणकारणम् । अदृष्टवशाद् गगनसमवेतस्य कर्णशष्कुलीश्रोत्रेणाविरोधात् ग्रहणस्य, घटसमवेतरूपस्येव चक्षुषा । शब्दस्य आकाशगुणत्वं च निषिद्धम् । तन्न युक्तम्--***शब्दः स्वसमानजातीयविशेषगुणवता इन्द्रियेण गृह्यते बाह्यैकेन्द्रियग्राह्यत्वात् रूपादिवत्** । § 4114

स्यान्मतम्--अनेकत्वात् नभसो नायं दोष इति; तथाहि--देवदत्तकर्णशष्कुलीपरिकरपरिरुद्धमत्र  नभोऽन्यदत्तः तत्र समवेतस्य नान्येन ग्रहणम् । तत्रेदं चिन्त्यते--किं तस्य कारणमिति ? तदेव नभः इति चेदंसमवायिकारणं वाच्यम् ? न च तदन्तरेण परस्य गुणभावः । भेरीदण्डसंयोग इति चेत्; न; तत्र तदभावात्, स्वकारणसमवायि वा समवायि कारण ध्वनेः । व्युपरते च तत्संयोगे पुनः तच्छ्रवणं न स्यात् । क्षणिकत्वात् ध्वनेः न तस्य तत्; **शब्दान्न शब्दनिष्पत्तिः** वैशे० सू० २ । २ । ३१ इति व्याहन्यते । अथ पूर्वः शब्दोऽसमवायिकारणम् स नभोऽन्तरसमवेतो ततत्कारणम्, अन्यथा कपालरूपादयः पटरूपादीनां तत्कारणं स्युः । § 4115

710/mkj, /ms यदि पुनरेतन्मतम्--पूर्वशब्दाकाशैः तदाकाशजन्यते, ततः स्वकारणसमवायि वा[ऽ] समवायिकारणं न विरुध्येते । तानि तस्य समवायिकारणं चेत्; प्रथमशब्दाकाशमारूढानामेव परेषामुत्पत्तिरिति नाकाशवृद्धिः, सति कारणे कार्योत्पत्तौ सन्तानावृद्धिवत् । अन्यत्वे तदवस्थो दोषः । एवं च तन्नित्यत्वव्यापित्वविलोपात् आकाशदर्वणंयोगस्य । अथ शब्दः अन्तःकरणप्रत्यासन्नो गृह्यते विभुद्रव्यविशेषगुणत्वात् सुखादिवत्; अत्रापि नभसोऽनेकत्वे

---

१ *] नैयायिकाः ।
१ त] मनः
२ इ] श्रवणशब्दयोः गुणिगुणभूतयोः ।
६ त] युगपज्ज्ञानानुत्पत्तिरपि विशिष्टादृष्टादेव स्यादिति मनःकल्पना व्यर्था स्यादिति भावः
६ वायोऽप्येवं] व्यापित्वात् ।
९ *] तुलना--यस्य बाह्यैकेन्द्रियग्राह्यविशेषगुणग्राहकं यदिन्द्रियं तत्तद्गुणकंयथा रूपग्राहकं चक्षू रूपाधिकरणम्, श्रोत्रं च तथाभूतस्य शब्दस्य ग्राहकं तस्मात्तदपि शब्दगुणकम् ।--प्रश० कन्द० पृ० ६३
१२ त्र] मन्यत्
१२ त्तः] न्यच्च यज्ञदत्तस्य
१३ चेदं] चेत्; अ
१५ त्र] शब्दाभावात् ।
१५ ण] स्वसमवायिकारणसमवेतत्वात्
१६ च] भेरीदण्डसंयोगे ।
१७ ब्दान्न] च्च
१७ इति] संयोगाद्विभागात् शब्दाच्च शब्दनिष्पत्तिः ।--वैशे० सू० ।
१८ स] आकाशान्तर ।
१८ त] न
१९ रूपादीनां] असमवायिकारण ।
२० दाकाश] शं
२१ विरुध्येते] ध्यते
२४ त] आकाशनित्यत्वव्यापित्वलोपात् ।
२४ द] निराकरणमित्यर्थः ।
२४ णं] द्रव्यं न

पूर्ववद् दोषः । एकत्वे; गगनमनसोरनंशयोः [संयो]गे सर्वेषां शब्दानां तत्प्रत्यासत्तिः समाना इति स्थितमिदम्--**सर्वेषां सकृच्छ्रुतिरिति** । § 4116

कारिकां विवृण्वन्नाह--**तत्कृत**मित्यादि । अ[यम]भिप्रायः--व्यञ्जकेन व्यङ्ग्याभिमतस्य कश्चिदतिशयः क्रियते, न वा ? प्रथमपक्षे **तत्कृतं** व्यञ्जक[कृत]म् **उपकारं** ग्राह्यतालक्षणमितिशय**मात्मसात्कुर्वतः** स्वभावभूतमवलम्बमानस्य **तद्देशवृत्ति[नि]यमाभावात्** व्यञ्जकदेशवर्त्तननियमात् । श्रवणेन्द्रियग्राह्यस्वभावः पदार्थः शब्दः, स यत्रैव श्रूयते तत्रैवास्ति, व्यञ्जकदेशे च श्रूयते । न खलु घटोऽन्यत्र दृश्यमानः अन्यत्राप्यस्ति, सर्वगतत्वप्रसङ्गादिति भावः । तन्नियमात् किम् ? इत्याह--**कूटस्थस्य** नित्याभिमता क्षस्य **नियमे** तदेश *__वृत्तिरेव__[त]तः किम् ? इत्याह--**न संभवति** सर्वगतत्वम् इत्यध्याहारः । अनेन **व्यापिनाम्** इति निरस्तम् । § 4117

सर्वगतत्वमभ्युपगम्य दूषणं दर्शयन्नाह--**सर्वगतत्वेऽपि** इत्यादि । संभावनायाम् **अपि**शब्दः । **सर्वगतत्वे सत्यपि** शब्दानां **विवक्षितैकशब्दश्रुतिर्न स्यात्,** सर्वेषां स्यादित्यर्थः, श्रवणग्रहणयोग्यत्वात् । § 4118 /ms

ननु नियतव्यञ्जककृता नियतश्रुतिः, इत्यत्राह--**नहि** इत्यादि । **न हि**र्यस्मात् **समानदेशानां समानाक्षविषयाणामेतत्** नियतव्यञ्जकत्वम् **नाप्यं**प्रमाणोपपन्नं क्वचित् तथा[ऽ]दर्शनात् व्यवधायकतदपसारणयोः सर्वत्र साधारणत्वात् । व्यञ्जकनियममभ्युपगम्य दूषयन्नाह--**प्रत्येकम्** इत्यादि । एकमेकं वर्णं प्रति **प्रत्येकम् व्यञ्जकनियमे** अकारस्य व्यञ्जको नापरस्य इति नियोगे अङ्गीक्रियमाणे **कलकलश्रुतेरनुपपत्तेः** कारणात् **एतन्न्याय्यम् नहि** । तथा हि--आवरणविगमकारिणि व्यञ्जके तन्नियमो न संभवति इत्युक्तम् । व्यङ्ग्यातिशया वापि ने तु संभवति किन्तु तस्यानित्यत्वम्, श्रोत्रातिशयाधाय्यकिञ्चित्करम् इत्युक्तम् । केवलं तद्बुद्धिजनकं व्यञ्जकमवशिष्यते, तस्य व्यक्तिरपि बुद्धिरेव । तत्रैकत्वेन बुद्धिः कस्यचित् केनचिदुत्पादिता यदा भवति, तदा सतोऽप्यन्यान् न गृह्णीयात् । विवक्षितैः व्यञ्जकैः सह संभूय सैका जन्यत इति चेत्; न सदेतत्; यतः व्यञ्जकानियमप्रसङ्गात्, अन्यव्यञ्जकैरपि अन्यबुद्धिजननात् । नवांशेनतज्जननं युक्तम्, एकान्तहानेः । तद्वद्वर्णेष्वपि सावयवत्वप्रसङ्गात् तथाप्रतीतेः । तन्न कलकलश्रुतिः । एको वर्णः कलकल इति चेत्; न; वर्णभेदप्रतीतेः । § 4119

711/mkj

---

३ व्य] ध्वनिना ।
४ व्य] शब्दस्य ।
५ मिति] णमति
६ मा] म
९ क्ष] तार्थ
१० *] मेन तद्देश
१६ स] समानेन्द्रियगोचराणाम् ।
१६ क] व्यङ्ग्य
१६ नाप्यं] न्याय्यम्
१७ व्य] आवरण ।
२१ मो] नियतव्यञ्जकव्यङ्ग्यत्वम् ।
२२ ने] शयो व्यापिनि
२५ सैका] बुद्धिः ।
२७ वांशेन] न चांशेन

अथ व्यञ्जकेन तस्य न किंचित् क्रियते तथापि ततो व्यक्तिः; तत्राह--**व्यक्त** इत्यादि । व्यञ्जकव्यापारदशायां **व्यक्तश्च** तद्व्यापारा[त्]पूर्वम**व्यक्तस्त्व** *तौ /ms **स्वभावौ** च योतः **प्राप्तिश्च परिहारश्च** याथासंख्येन **तावन्तरेण कुतो व्यक्तिः** ? अधुना व्यक्तस्य तिरोधानं दूषयन्नाह--**तत्** इत्यादि । तयोः व्यक्ताव्यक्तस्वभावयोः याथासंख्येन **त्यागश्चोपादानं च ताभ्यामृते कुतः तिरोधानम्** इत्युक्तप्रायम् । § 4120

नास्ति सर्वगतत्वमिति चेत्; अत्राह--**सत्याच** इत्यादि । किम् ? इत्याह— **व्यञ्जक** इत्यादि । § 4121

सत्यां च § 4122

...9 व्यञ्जकव्यापृतौ न स्याद् व्यङ्ग्यस्य नियमाद्गतिः ।
नावश्यंभावनियमः श्रुतेरुच्चारणात्ततः ॥ ९ ॥§ 4124

शब्दानामव्यापित्वे सत्यपि व्यञ्जकव्यापारे व्यक्तिरवश्यम्भाविनी न भवेत् जातिसम्बन्धवत् । न हि व्यक्तिजन्मदेशे प्राक् असत्या जात्या सम्बन्धो युज्यते । § 4125

**व्यञ्जकस्य** ताल्वादेः तज्जनितवायोर्वा **व्यापृतौ न स्याद् व्यङ्ग्यस्य** शब्दस्य **नियमाद्गतिः** । नहि प्रदीपव्यापारे नियमेन घटगतिः । ततः किम् ? इत्याह--**नावश्यंभावनियमः श्रुतेः** शब्दस्य **उच्चारणात्** ताल्वादिव्यापारा**त्ततः** । § 4126

कारिकां विवृण्वन्नाह--**शब्दानामव्यापित्वे** अङ्गीक्रियमाणे **सत्यपि** विद्यमानेऽपि **व्यञ्जकव्यापारे व्यक्तिरवश्यंभाविनी न भवेत्** । निदर्शनमाह--**जातिसम्बन्धवत्** । **जात्या** व्यक्तेः **सम्बन्धः** तस्येव **तद्वत्** । व्यक्तिगतजातिमपेक्ष्य इदमुक्तम् । एतदेव समर्थयते--**नहि** इत्यादिना । **नहि प्राक्** व्यक्त्युत्पत्तेः पूर्वम् **असत्या जात्या** । क्व ? इत्याह--**व्यक्तिजन्मदेशे सम्बन्धो युज्यत** इति । § 4127

सौगतेन उच्यमानमिदं मीमांसकदूषणं तस्यपि लगतीति दर्शयन्नाह--**सन्निवेरित्यादि** । § 4128

...10 सन्निधेरेकाक्षसम्बन्धे एकदाऽशेषतः श्रुतिः ।
न बहिरन्तरभिप्रेतानंशक्षणिकसंविदः ॥ १० ॥§ 4130

---

२ *] श्च
७ त्या] त्यां
१६ ट] घट उपलभ्यते ।
२६ न्निवे] धे

क्षणिकपरमाणुषु मोहोद्रेकात् तद्विपरीतस्वभावोपलब्धौ न तत्त्वोलब्धिः । तथा अन्तस्तत्त्वे समानम् । वेद्य...इत्यभ्युपेत्य सौगतः प्रतिपत्तुः यथासन्निधानं सकलोपलम्भाशक्तेः कथञ्चित् कस्यचित् श्रुतिरिति ब्रुवाणं मीमांसकं कथं प्रतिक्षिपेत् ? विषयविषयिणोः अविसंवादनियमस्य अनेकान्ताकर्षणात् तदन्यथानुपपत्तेः, असंभवात् । स्वेष्टार्थाविसंवादे लक्षणं न प्रमाणं स्वाकारज्ञानहेतुता । नहि...परम्परयापि स्वलक्षणानि हेतवो न भवन्त्येव क्षणिकत्वे...अतः सर्वथा न संभवत्यर्थस्य अविसंवादलक्षणम् । तत एव 712/mkj ज्ञानस्यापि तदाकारस्य, तद्विषयतायाः सौगतैरनभ्युपगमात् तत्प्रतिभासविरोधाच्च कथमव्याप्तिः ? उपादानोपादेयसंविदोः । विज्ञान... § 4131

**एकदा** एकस्मिन् क्षणे **श्रुतिः** श्रवणं संभवेत् इत्युपस्कारः । कथम् ? इत्याह— **अशेषतः** अशेषरूपेण, सदादिनेव क्षणक्षयादिनापि इत्यर्थः । केषाम् ? **शब्दानाम्** इत्यनुवर्त्तते । कुतः ? इत्याह--**सन्निधेः** शब्दत्वादिरिव सन्निधानात् क्षणक्षयादेरपि । कस्मिन् सति ? इत्याह--**एकाक्षसम्बन्धे** एकेन अक्षेण सम्बन्धे सति येनाक्षेण सदादेः तेन क्षणक्षयादेरपि । एवं मन्यते--यदि /ms समानदेशानां समानेन्द्रियग्राह्याणां नियमेन युगपच्छ्रुतिः तर्हि सदादिक्षणक्षयादेः युगपच्छ्रवणं भवेद् एकाधारैकेन्द्रियग्राह्यत्वात्, तथा च व्यञ्जकान्तरवत् प्रमाणान्तरमनर्थकमिति भावः । अशेषतः श्रुतिरस्त्येव--**एकस्यार्थस्वभावस्य** प्र॰ वा॰ ३ । ५२ इत्यादि वचनात्, इति चेत्; अत्राह--**न इत्याद्यते** न केवलम् [अन्त]रभिप्रेतानंशक्षणिकसंविदो न **बहिरप्यभिप्रेतानंशक्षणिकसंविदो न** तथाप्रतीतिः इति भावः । चर्चितमेतत् । § 4132

कारिकां व्याख्यातुमाह--**क्षणिकपरमाणुषु** इत्यादि । **क्षणिकेषु परमाणुषु न तत्त्वस्य** निरंशक्षणिकस्वभावस्य **उपलब्धिः** । कस्मिन् सति ? इत्याह--**तद्विपरीत** इत्यादि । क्षणिकपरमाणुप्रत्यनीक**स्वभावोपलब्धौ** सत्यां । कुतः ? **मोहोद्रेकात्** अज्ञानमाहात्म्यात् । अनेन **बहिरभिप्रेतानंशक्षणिकसंविदः** इति व्याख्यातम् । **तथा अन्तस्तत्त्वे समानं** न तत्त्वोपलब्धिः इत्येतत्सदृशम् । कस्मिन् सति ? इत्याह--**वेद्य** इत्यादि । अनेन **नान्तरभिप्रेतानंशक्षणिकसंविदः** इति व्याख्यातम् । इत्येवम् **अभ्युपेत्य** अभ्युपगम्य **सौगतः कथं प्रतिक्षिपेत्** निराकुर्यात् ? किं कुर्वन्तम् ? इत्याह--**प्रतिपत्तुः** इत्यादि । **प्रतिपत्तुः** पुरुषस्य **यथा[सन्निधानं]** सन्निधानानतिक्रमेण **सकलस्य** शब्दराशेः **उपलम्भाशक्तेः कथंचित्** केनापि नियतदेशादिप्रकारेण **कस्यचिद्** अकारस्य अन्यस्य वा शब्दात्मनः **श्रुतिरित्येवं ब्रुवाणं** मीमांसकम् । यथा बहिःपरमाणूनां नीलतामात्रस्य अन्तःसंवेदनस्य सच्चेतनादेरुपलम्भेऽपि सन्निहित- /ms स्यापि न क्षणक्षयादेरुपलम्भः तथा अकारोपलम्भे सन्निहितस्यापीत[र]स्य न श्रुतिः प्रतिपत्तिः तथाशक्तेः इति भावः । § 4133

---

१० णं] णं

१२ त्वादि] दे

१६ णं] पद् ग्रहणं

१८ इ] प्रत्यक्षस्य सतः स्वयं । कोऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते ।--प्र॰ वा॰ ।

१८ ते] त्यादि ।

३३ स्य] चकारादेः ।

ननु नान्तर्बहिर्वा परमार्थतो निरंशक्षणिकपरमाणुरूपं तत्त्वं येनायं दोषः स्यात् अपि तु यथाऽविसंवादनियममिति चेत्; अत्राह--**विषय** इत्यादि । **विषयो** घटादिः **विषयि** ज्ञानं तयोः योऽ**विसंवादनियमः** तस्य **अनेकान्ताकर्षणात्** तेन तदाकर्षणादिति द्रष्टव्यम् । कुतः ? इत्याह--**तस्य** तन्नियमस्य **अन्यथा** तदाकर्षणाभावप्रकारेण **अनुपपत्तेः** । § 4134

ननु यदुक्तम्--**न बहिरभिप्रेतानंशक्षणिकसंविदः** इति, **नियमस्य अनेकान्ताकर्षणात्**(?') इति च; तन्न युक्तम्; परमाणुभ्योऽनंशक्षणिकाकारसंविदो[ऽ]भावा[त्] । तन्नियमोऽपि तत्रैव इति चेत्; अत्राह-- 713/mkj **असंभवात्** इत्यादि । **स्वस्य** सौगतस्य **इष्टो**ऽर्थः क्षणिकनिरंशपरमाणुलक्षणः तस्याऽ**विसंवादे** संप्रतिपत्तौ क्रियमाणायां **लक्षणं न प्रमाणम् सारूप्यमस्य प्रमाणम्** न्यायबि° १ । २० इति वचनात् । किम् ? इत्याह--**स्वाकारज्ञानंहेतुता** स्वस्य अर्थस्य आकार इव आकारो यस्य ज्ञानस्य हेतोः भावः तत्ता । अत्र हेतुत्रयमाह--**असंभवात्** इत्यादि । प्रथमं दर्शयति--**नहि** इत्यादिना । अनेन स्वलक्षणानां प्रत्यक्षग्राह्यत्वंनिषेधतिस्म । तर्हि स्वलक्षणेभ्यः कार्यं किंचिल्लिङ्गभूतं ततः तदाकारं ज्ञानम् अतः परम्परया तानि स्वाकारज्ञानहेतव इति; तत्राह--**परम्परयापि** उक्तया न केवलं साक्षात् **हेतवो** /ms **न भवन्ति एव स्वलक्षणानि** । कुतः ? इत्याह--**क्षणिकत्वे** इत्यादि । विवेचितमसकृत् । अनेन अनुमेयत्वम् । **अतो**ऽस्मान्न्यायात् **सर्वथा** प्रत्यक्षानुमानप्रकारेण **न संभवत्यर्थस्य** परपरिकल्पितवस्तुनोऽ**विसंवादात्क्षणमव्यभिचारि** प्रमाणम् । माभूत् बहिः स्वलक्षणानामविसंवाहलक्षयं सौगतैः तन्निषेधात्, ज्ञानस्य तु स्यादिति चेत्; अत्राह--**तत** इत्यादि । **तत एव** स्थूलैकान्वयिनः साक्षाद्दर्शनादेव **ज्ञानस्यापि** न केवलं बहिःस्वलक्षणानाम् । किंभूतस्य ? **तदाकारस्य** स्वलक्षणाकारस्य **सर्वथा न संभवति तल्लक्षणमिति** पदघटना । **यद्यथावभासते तत्तथैव परमार्थसद्व्यवहारावतारि** इत्यादि वचनात् स्थूलैकान्वयिविषयमेव ज्ञानमस्तु इति चेत्; अत्राह--**तद्** इत्यादि । **तद्** इत्यनेन स्थूलैकान्वयी परामृश्यते **स विषयो** यस्य ज्ञानस्य [तस्य]भावः **तत्ता तस्याः सौगतैरनभ्युपगमात्** क्षणभङ्गादिभङ्गभयात् । हेत्वन्तरमाह--**तत्प्रति[भा]सविरोधाच्च** इति । **तस्य** स्थूलैकान्वयिनः **प्रतिभासः** तदाकारता ज्ञानस्य तस्य **विरोधात्** । उपलक्षणमेतत् वैयधिकरण्यदः । **च** इति हेतुसमुच्चये । § 4135

द्वितीयं हेतुं व्याख्यातुं परेण आत्मानं पयुति **कथमव्याप्तिः** इति; उत्तरमाह--**उपादानोपादेयसंविदोः** इत्यादि । सर्वं गतार्थम् । अव्याप्तिं व्याख्यातुं प्रश्नयति— **कथमव्याप्तिः** इति ? तत्रोत्तरं **विज्ञान** इत्यादि तादृगेव । § 4136

११ इ ] अर्थसारूप्यमस्य प्रमाणम्--न्यायबि° ।
१२ ज्ञानं ] न
१८ त्व ] निषेधतिस्म इति सम्बन्धः ।
१९ विसंवादात् ] दल
२० यं ] वादलक्षणं
२१ त ] बहिरर्थनिषेधात् ।
२९ दः ] ण्यादेः
३१ युति ] प्रश्नयति
३३ तादृगेव ] गतार्थम् ।

भवतु वा सदादिनेव क्ष[ण]यादिनापि भावस्य ग्रहणं तथापि सौगतस्य मीमांसको दुर्जय इति दर्शयन्नाह--**भिन्नस्य** इत्यादि । § 4137

…11 भिन्नस्य सर्वतोऽन्यस्मात् भेदं तद्व्यवसाययेत् ।
प्रत्यक्षं सर्वतः तद्वत् नियमः स्याद् गिरां श्रुतेः ॥
११ ॥§ 4139

स्वलक्षणस्य स्वभाव[विलक्षणस्य] दर्शनं तत्स्वभावविशेषसन्निधानाविशेषेऽपि [क्वचित्] यदि साक्षाद् व्यवसायं जनयति, गिरां…बुद्धिः अखण्डं स्वं परं वा खण्डयन्ती कथं नियमात् सन्निहितसकलार्थग्राहिणी नाम, न वै विकल्पबुद्धिः [अपरमार्थविषया] प्रोक्तम्… § 4140

**भिन्नस्य** व्यावृत्तस्य व्यावृत न तयो……रस्मात् । किं भूतात् ? **सर्वतः** /ms, 714/mkj सजातीयेतररूपात् संबन्धि यत् **प्रत्यक्षं तद्व्यवसायये** निश्वासंय येत् । किम् ? **भेदं** व्यावृत्तिम् न सर्वतः विजातीयात्तं व्यवसाययेन्न सजातीयपूर्वोक्त-रक्षणाभ्यां क्षणिकत्वानुमानवैफल्यापत्तेः यद्वत् **तद्वदिति** श्रवणादेवं गम्यते **तद्वन्नियमः स्यात् गिरां श्रुतेः** । § 4141

कारिक विवृण्वन्नाह--**स्वभाव** इत्यादि । **स्वलक्षणस्य** । तस्य विशेषणमाह— **स्वभाव** इत्यादि । तस्य किम् ? इत्याह--**दर्शनम्** । तत् कथं कुर्वन् किं करोति ? इत्याह— **साक्षाद्** अव्यवधानेन **व्यवसायं** निश्चयं **जनयत्**सतत सर्वव्यावृत्तिप्रसङ्गात् । कस्मिन् सत्यपि ? इत्याह--**तत्स्वभाव** इत्यादि । **सः** स्वानुभूते व्यवसायजनकः **स्वभावविशेषो** यस्य, अन्यथा नीलादा वसायो न भवेद् असक्तस्याजनकत्वात्, तज्जनकेतरभेदात् तद्भेदो वा, तत्तथोक्तं दर्शनं तस्य **सन्निधानस्याऽविशेषेऽपि यदि** । परिहारमाह--**गिराम्** इत्यादि । दर्शनपाटवाद्यभावस्य उभयत्र समानत्वात् । अथ नीलादिवत् क्षणक्षयादौ व्यवसायजनकः तद्विशेषः तस्य नास्ति; तत्राह--**अखण्डम्** इत्यादि । **अखण्डमद्वयं स्वम्** आत्मानं **बुद्धिः खण्डयन्ती** स्वविषये अध्यवसायजननसमर्थेतररूपतया सांशं कुर्वन्ती । ननु नीलादौ तज्जनन[सामर्थ्यमेव क्षणक्षयादौ ।अन्यत्राऽ]सामर्थ्यम्, अतोऽयमदोष इति चेत्; नित्यस्यापि एकदा सामर्थ्यमन्यदा असामर्थ्यं स्यात्, ततो यथा नित्यं स्वकार्यं युगपत् सर्वदात्मानं भिन्नत्ति तथा बुद्धिरपि इति स्थितम् **परं** /ms

९ यो] प्रतौ रिक्तभेतत् स्थलम् ।
९ स्मात्] ?
१० निश्वासंय] साययेत् निश्चाय
११ न] तत्
१४ कारिक] कां
१७ त्] यति
१७ त] ?
१९ व] दौ व्यव
१९ क्त] अशक्त
२२ त] स्वभावविशेषः ।
२५ म्] अस्ति ।
२७ त्ति] भिनत्ति

**वा[ऽ]खण्डं खण्डं खण्डयन्ती** । तथाहि--नीले निश्चयं जनयति न क्षणक्षये, ततो गृहीतेतरयोरिव निश्चितेतरयोरपि भेदः । **कथं नियमात्** नियमेन **सन्निहितसकलार्थग्राहिणी नाम** । यथाहि दर्शनं स्वविषयत्वाऽविशेषेऽपि सन्निहितयोरपि *नीलक्षणिकत्वयोरपि नीलक्षणिकत्वयोर्विभागेन निश्चयं जनयति तथा श्रोत्रं स्वविषयेषु राकारादिषु इति भावः । § 4142

ननु स्यादेवं यदि दर्शनवद् अर्थविषया विकल्पबुद्धिः स्यात्, यावता निर्विषयता तत्कथं तद्भेदादर्थभेद इति ? तदाह--**न वै विकल्पबुद्धिः** इत्यादिना । तत्र परिहारं पठति **प्रोक्तम्** इत्यादिक § 4143

दर्शनं नीलवत् क्षणक्षये प्रवृत्तमपि सहकारिवैफल्यादविशेषेण[न] निश्चय[मुत्पादय]ति इत्यत्र दर्शने पुनरपि दूषणं दर्शयन्नाह--**साकल्येन** इत्यादि । § 4144

...12 साकल्येन गृहीतेऽपि शब्दराशौ सकृद्धिया ।
शब्दः प्रतीयते नान्यो यद्यवसायेऽस्ति प्रत्ययः ॥
१२ ॥§ 4146

सर्वतः... § 4147

**साकल्येन** सामस्त्येन **गृहीतेऽपि शब्दराशौ** अकारिहकारपर्यन्तवर्णसमूहे **सकृद्धिया** श्रवणज्ञानेन, यस्य शब्दस्य व्यवसायो **यद्यवसायः** तस्मिन्
715/mkj कर्त्तव्ये **अस्ति प्रत्ययः** सहकारिकारणं विद्यते **शशब्दः प्रतीयते नान्य** इति । § 4148

कारिकार्थं दर्शयन्नाह--**सर्वत** इत्यादि । सुगमम् । § 4149

दर्शनस्य विभागेन विकल्प[ज]नकत्वमभ्युपगम्य इदमुक्तम्, इदानीं तदेव नास्तीति दर्शयन्नाह--**यथा** इत्यादि । § 4150

...13 यथार्थोऽनुभवं साक्षात् स्वापेक्षं कर्तुमर्हति ।
तथार्थानुभवः साक्षादनन्यव्यवसायकृत् ॥ १३
॥§ 4152

---

१ ख] खण्डम् इति द्विर्लिखितम् ।
४ *] नीलक्षणिकत्वयोरपि इति द्विर्लिखितम् ।
५ रा] ग
८ इत्यादिक] कम् ।
९ कारिवैफ] क
१० ने] मते ।
१५ अकारि] कारादि
१६ कृद्धिया] सकृत् धिया
१७ श] ?
२१ त] विकल्पजनकत्वमेव ।

यथा रूपस्वलक्षणं साक्षादुपनिपत्य विज्ञानं जनयत् आत्मनान्तरीयक-माकारं पुरस्कर्तुं नायुक्तं तथा तद्दर्शनं व्यवसायं तेन विशेषः व्यवसीयेत। दृष्टेः स्वभावभूतविशेषव्यवसायाभावे कुतः सजातीयस्मृतिः क्षणक्षयादिवत् ? § 4153

**यथा**[येन]योग्यताप्रकारेण **अर्थो** रूपादिः **अनुभवं** दर्शनं **साक्षाद्** अव्य-वधानेन **कर्तुमर्हति** । किंभूतम् ? इत्याह--**स्वापेक्षं स्व**शब्देन **अर्थः** परामृश्य-ते तस्मिन् **अपेक्षा** तदनुभवनाकाङ्क्षा यस्य तत्तथोक्तम् स्वाकारम् इत्यर्थः /ms । **तथा** तेन प्रकारेण **अर्थानुभवः साक्षाद[न]न्यव्यवसायकृत्** न विद्यते अन्य[त्] स्वरूपान्तरं यस्य तत् अ[न]न्यत् स्वलक्षणमिति यावत्, तस्य व्यवसायः तत्कृत । चर्चितमेतत्--**अभेदात् सदृशस्मृत्याम्** सिद्धिवि° १ । ६ इत्यादिना । § 4154

कारिकार्थं दर्शयन्नाह--**रूपस्वलक्षणम्** इत्यादि । **रूप**ग्रहणमुपलक्ष-णं रसादेः तदेव **स्वलक्षणं साक्षादुपनिपत्य** उपढौक्य **विज्ञानं** स्वानुभवं **जनयतायथा** येन वस्तुस्वभावप्रकारेण **नायुक्तमेव[म्] आत्मनान्तरीयक-म्** आत्मानमविद्यमान**माकारं पुरस्कर्तुम् तथा तद्दर्शनं** स्वलक्षणानुभवः साक्षादुपनिपत्य **व्यवसायं** नात्मानन्तरीयकमाकारं पुरस्कर्तु मायुक्तम्, **तेन** कारणेन **विशेषः** स्वलक्षणं **व्यवसीयेत** । § 4155

अधुना प्रकारान्तरेण दर्शनस्य व्यवसायहेतुत्वं निराकुर्वन्नाह--**दृष्ट***भिप्रायः--स्वयं व्यवसायात्मिका दृष्टिः, अन्यथा वा स्यात् ? तत्राद्यप-क्षे; किमपरेण व्यवसाये[न] ? द्वितीये; **दृष्टेः स्वभावभूतो विशेषव्यवसायः** तस्या**भावे** अविकल्पकत्वे, **कुतः सजातीयस्मृतिः** ? नैव । अत्र निदर्श-नमाह--**क्षण** इत्यादि । तदुक्तम्--**व्यवसायात्मनो दृष्टेः** सिद्धिवि° १ । ४ इत्यादि । अस्ति च परस्य तत्स्मृतिः, ततस्तदन्यथानुपपत्तेः व्यवसायात्मिका दृष्टिरिति । § 4156

अधुना श्रोत्रियवत् स्फोटवाद्यपि परस्य दुर्जय इति दर्शयन्नाह--**व्यव-स्थायाम्** इत्यादि । § 4157

...14 व्यवस्थायां कुतस्तत्त्वं स्याद्विकल्पाविकल्पयोः ।
यतः स्वलक्षणं शब्दः स्फोटो नेति व्यवस्थितिः ॥
१४ ॥§ 4159

---

१० त्कृत] त्
१४ ता] यत्
१५ म] त्मनि
१६ मा] र्तुं ना
१९ *] ष्टेरित्यादि । अयम
२३ त्तेः] स्मृत्यन्यथानुपपत्तेः ।
२५ त्] मीमांसकवत् ।
२५ प] बौद्धस्य ।

स्वलक्षणविषयमविकल्पकं ज्ञानं न तावत् सर्वथा स्वार्थसाधनम्, अध्य- 716/mkj वसायात्म त्वात् सिद्धेः । कुतोऽन्यथा अनुभूते अनुमानम् अनुमितवत् । सामान्यविषयं भावतो निर्विषयत्वं तस्य अभावात्मकत्वात् । तदभावं विषयीकरोति विकल्पकमिति न परिच्छिनत्तीति अकिञ्चित्करो विकल्पः कुतः साधनम् यतः तत्त्वसिद्धिः समयान्तरवत् ? तदयं किंप्रमाणः परमुपालभेत अशब्दरूपम्...? § 4160

/ms तत्त्वमिदं नेदमिति स्थितिः **व्यवस्था तस्याम्,** अविकरणभूतायां **स्याद्** भवेत् **तत्त्वं** वस्तुस्वरूपं **कुतो विकल्पाविकल्पयोर्**मध्ये विकल्पादविकल्पाद्वा न कुतश्चित् द्वयोरपि तदध्यवसायकत्वादिति भावः । **यतः** तयोः कुतश्चित्तत्र तद्भावात् **स्वलक्षणं शब्दः स्फोटः** शब्दो **नेति व्यवस्थितिः** द्वयोरप्यदृष्टकल्पना[ऽ]विशेषात् । § 4161

कारिकां विवृण्वन्नाह--**स्वलक्षणविषयम्** इत्यादि । जातिविषयव्यवच्छेदार्थं **स्वलक्षणविषय**ग्रहणम् । **[अ]विकल्पकं** । किम् ? **ज्ञानम् स्वार्थसाधनं न तावत् सर्वथा** नीलादिप्रकारेण चक्षणक्षयादिनापि । कुतः ? इत्याह--**अध्यवसायात्मत्वात्** । ततोऽपि प्रतीतिमात्ररूपा सिद्धिः स्यादिति चेत्; अत्राह--**सिद्धेः** इत्यादि । **कुतोऽन्यथा** [त]स्याः तल्लक्षणत्वाभावप्रकारेण **अनुभूते** अविकल्पकगृहीते **अनुमानं** क्षणक्षयादौ प्रमाणं स्यात् । दृष्टान्तमाह— अनुमिते इव **अनुमितवत्** इति । समारोपव्यवच्छेदकरणा[त्] तत्प्रमाणतापि चिन्तिता । तन्न अविकल्पात्तत्त्वसिद्धिः । विकल्पात् स्यादिति चेत्; अत्राह--**विकल्पज्ञानम्** इत्यनुवर्त्तते **सामान्यविषयं** । ततः किम् ? इत्याह--**भावतो निर्विषयत्वं** [वि]कल्पकस्य इति । कुतः ? इत्याह--**तस्य** इत्यादि । **तस्य** सामान्यस्य **अभावात्मकत्वाद्** अन्यतेव्यावृत्त्यात्मकत्वात् । भवत्वभावः सामान्यम्, ततः किम् ? इत्याह--**तदभावम्** इत्यादि । **तद**भांवेविजातीयव्यावृत्तिं **विषयीकरोति विकल्पकमित्येवं न परिच्छिनत्ति इति** /ms प्राप्तम् ततो**ऽकिञ्चित्करो विकल्पः कुतः साधनं** प्रमाणं **यतः** साधनत्वात् **तत्त्वसिद्धि[ः]** विकल्पात् इति **समयान्तेरेइव** तद्वदिति निदर्शनम् । § 4162

प्रकृतमुपसंहरन्नाह--**तदयम्** इत्यादि । यत एवं **तस्मादयं** सौगतः **किंप्रमाण[ः] परं** प्रतिवादिनम् **उपालभेत** । केन रूपेण ? इत्याह--**अशब्दरूपम्** इत्यादि । § 4163

एवं परमते सौगतदोषपरिहारं विधाय इदानीं जैनमते यदुक्तं तेन--रूपादिमत्पुद्गलविकारस्य ध्वनेः शब्दरूपस्य केनचिद् ग्रहणे तदव्यतिरेकिणो रूपादेः तेनैव ग्रहणात् **तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः** प्र॰

७ अवि ] अधि
९ त ] तन्निश्चायकत्वादिति भावः ।
९ क ] यात्म
१२ जा ] सामान्यविषय ।
१४ च ] णेव
१६ स्याः ] सिद्धेः ।
२२ ते ] तो
२४ भांवे ] वं
२६ यान्तेरे ] न्तरे
३० तेन ] बौद्धेन ।
३१ स्य ] श्रोत्रेन्द्रियेण ।

वा० ३ । ४४ इति वचनात् अन्यत्रापि शेषेन्द्रियवैफल्यमिति । तत्परिहरन्नाह--**अशब्दादिव्यवच्छिन्नम्** । § 4164

...15 अशब्दादिव्यवच्छिन्नं प्रत्यक्षमेकमेव तत् ।
गन्धवद् व्यवसीयेत कथञ्चित् केनचित् क्वचित् ॥
१५ ॥§ 4166

स्वलक्षणमेकं सन्निहितं प्रत्यक्षम्, तस्य यावन्ति पररूपाणि तावत्यो व्यावृत्तयः, तत्र काचित् केनचित् प्रतीयते ततो न प्रतिज्ञार्थैकदेशासिद्धो हेतुः, अप्रतीत...नाम... अतोऽन्यापोहः तेषां विषय इति, तथा स्वलक्षणं शब्दाद्यात्मकम्, तत्र श्रोत्रादिसामग्रीं पुरस्कृत्य अनुभवात् अशब्दव्यवच्छेदः केवलं प्रतीयते, । तन्न पुद्गलस्वलक्षणस्यैकत्वेऽपि शेषेन्द्रियाणां कैमर्थक्यं स्यात् । प्रत्यक्षतः शब्दादिस्वलक्षणभेदप्रतीतेः असमानम्; तन्न; स्वलक्षणस्य अव्यवसेयत्वात् । निर्जितान्यसमारोपमनसः स्वार्थानुभवस्य व्यवसायात्मकतोपपत्तेः निश्चयारोपमनसोर्बाध्यबाधकभावः अन्यथा नोपपद्येत । दृष्टेः खण्डशः पाटवादिसंभवे अनेकान्तप्रसङ्गात् तथा अर्थोपलब्धिः, किन्न प्रतिपद्येत ? यतः अनुपात्तस्पर्शाद्यात्मनः शब्दपुद्गलस्य श्रुतिर्न स्यात् । तन्नायं विकल्पानामेव अपराधः यतः दृष्टस्य अर्थस्य अखिलो गुणः दृष्ट एवेत्येकान्तः शोभेत । § 4167 717/mkj

**अशब्दः** शब्दाभावः न पुनः शब्दादन्यः रूपादीनामपि ततोऽन्यथा **द** * **शब्दव्यवच्छिन्नम्** इति वक्तव्यं स्यात्, स **आदि** र्येषां रूपादीनां तेभ्यः स्वयं व्यवच्छिद्यते स्म **तद्व्यवच्छिन्नं** शब्दरूपरसस्पर्शगन्धात्माम् इत्यर्थः । घटादिवदेकं न स्यादिति चेत्; आह--**एकमेव** विरुद्धधर्माध्यासस्य एकान्तेन अभेदत्त्कात् इति भावः । **तत् प्रत्यक्षं** विशदवेदनवेद्यं यथा भवति तथा **व्यवसीयेत** निश्चीयेत । अनेन प्रत्यक्षव्यवसाययोरेकत्वमाह--**कथंचिदश**ब्दव्यवच्छिन्नप्रकारेण नारूपादिव्यवच्छिन्नेन **केनचित्** श्रोत्रेण न चक्षुरादिना । अत्र **गन्धद्रव्यं** निदर्शनम् । **क्वचित्** न सर्वत्र देशे । अनेन तस्य व्यापित्वं निषेधति । § 4168

सोपपत्तिकं कारिकार्थं दर्शयति **यथा** इत्यादिना । **यथा** सौगतस्य /ms
**स्वलक्षणमेकं** प्रत्येकं **प्रत्यक्षम्** । किंभूतम् ? इत्याह--**सन्नि[हि]तेत्यादि** । **तस्य** स्वलक्षणस्य ***यावन्ति पररूपाणि तावत्यो व्यावृत्तयः तत्र** तासु

---

१ अ] जैनमतेऽपि ।
१७ न्यः] कश्चित् पदार्थः ।
१८ *] अ
१९ न्धात्माम्] त्मकम्
२१ त्त्कात्] भेदकत्वाभावात् ।
२८ *] अत्रायं पूर्वपक्षः--तस्मादेकस्य भावस्य यावन्ति पररूपाणि तावत्यस्तदपेक्षया तदसंभाविकार्यकारणस्तस्य तद्भेदात् यावत्यश्च व्यावृत्तयः तावत्यः श्रुतयोऽतत्कार्यकारणपरिहारेण व्यवहारार्थः ।--प्र० वा० स्ववृ० १ । ४४ ।

व्यावृत्तिषु मध्ये **काचिद**शब्दादिव्यावृत्तिः **केनचित्** शब्दादिविकल्पेन शब्देन शब्द[ब्दा]द्यभिधाने चाकरणभूतेन **प्रतीयते** । नहि शब्द इति विकल्पेन अभिधानेन वा नित्यव्यावृत्तिः प्रतीयते **ततः** तस्मान्न्यायात् **न प्रतिज्ञार्थैक-देशासिद्धो हेतुः** सत्त्वादिः । कुतः ? इत्याह--**अप्रतीते**त्यादि । केषाम् ? इत्याह--**नाम** इत्यादि । **अतः** अस्मात् करणात् **अन्यापोहः तेषाम-**भिधानविकल्पान्तराणां **विषय इति तथा** तेन प्रकारेण **स्वलक्षणं** शब्दरूप-म् । किंभूतम् ? इत्याह--**शब्दाद्यात्मकम्** इति यावत् । **तत्र स्वलक्षणे श्रोत्रादिसामग्रीं पुरस्कृत्यो**त्पत्त्रा**दनुभवात्** प्रत्यक्षात् **अशब्दव्यवच्छेदः केवलं प्रतीयेत** नाऽस्पर्शादिव्यवच्छेदः । विकल्पवदनुभवस्यापि व्यवच्छेदविषयत्वात् इति मन्यते । यत एवं **तत्**तस्मात् **न शेषेन्द्रियाणाम् कैमर्थक्यं** वैयर्थ्यं **स्यात्** तेषामप्रतीतप्रत्यायनार्थत्वात् । कस्मिन् सत्यपि ? इत्याह--**पुद्गलस्वलक्षण-स्यैकत्वेऽपि** इति । § 4169

718/mkj

ननु चक्षुषा रूपं प्रतीयते रसनेन रसः, एवं शेषेन्द्रियेष्वपि वाच्यम्, न च तत्र अपरमाभाति, न च इन्द्रियान्तरमस्ति यत्र वस्त्वन्तरप्रतिभासः, ततो न रूपादिभ्यः किम[पि]परं पुद्गलस्वलक्षणमेकम्, तदाह--**प्रत्यक्षत** इत्यादि /ms । **प्रत्यक्षात्** श्रोत्रादिज्ञानाद् उक्तविधिना **शब्दादिस्वलक्षणभेदप्रतीतेः** कार-णाद**समानं** यथा विकल्पेन अन्यतो व्यवच्छेदः प्रतीयते तथा प्रत्यक्षेणापि इति असदृशमिति चेत्; उत्तरमाह--**न** इत्यादि । यदुक्तं परेण **तन्न** । कुतः ? **स्वलक्षणस्य** रूपादिपरमाणुलक्षणस्य **अव्यवसेयत्वाद्** अनिश्चेयत्वात् । एवं मन्यते यथा चक्षुषा केव[लं] रूपं प्रतीयते नान्यात्मकं नाप्यन्या वा न प्रमाणान्तरापेक्षणमस्ति । स्वार्थानुभवादेव अन्यसमारोपव्यवच्छेदेन तत्त्वसिद्धिरिति चेत्; अत्राह--**स्वार्थानुभवस्य** स्वपरदर्शनस्य **व्यवसायात्मक-तोपपत्तेः** तदपपत्तेः **तदपेक्षणादिति** । किंभूतस्य ? इत्याह— **निर्जितान्य-समारोपमनाश्च** । भविष्यति तदनुभवो न च व्यवसायात्मक इति चेत्; अत्राह--**निश्चय** इत्यादि । **निश्चयश्च आरोपमनश्च तयोः बाध्यबाधकभावः** परेण इष्टः **अन्यथा** तदनुभवस्य व्यवसायात्मकताभावप्रकारेण **नोपपद्येत** न घटेत अविकल्पान्यसमारोपमनसोरपि बाध्यबाधकभावोपगमात्, तथा च अनुभवगन्धादेव नष्टव्यं समारोपेण इति, न समारोपवार्त्तापि न भवेत् । § 4170

ननु नीलादौ अन्यसमारोपमनसो नानुभावाद् व्यवच्छेदः, अपि [तु] सादृश्यदर्शनस्य तत्करणस्याभावात् स्वयमेवानुत्पाद इति चेत्; न,

२ चा] धानेन
८ त्राद] त्पादिताद
९ व्य] अन्यापोह ।
१० शेषेन्द्रियाणाम्] किमर्थस्य भावः कैमर्थक्यम् कस्मै प्रयोजनाय इति भावः ।
२१ वा] न्यथा
२३ त] तदपपत्तेः इति पुनर्लिखितमिव भाति ।
२४ नाश्च] मनसः
२६ इष्टः] निश्चयारोपमनसोर्बाध्यबाधकभावतः ।— प्र॰ वा॰ ३ । ४८ ।
२८ न] न इति निरर्थकमत्र ।
३१ त्क] तत्का

प्रधानादिसमारोपस्य सदृशदर्शनाभावेऽपि भावात् । अनाद्यन्तर्वासना तत्र कारणमिति चेत्; न; अवान्तरवासनातोऽपि समारोपदर्शनात् श्रोत्रिय-त्रियजोहिद्रस्येव अशुचौ शुचित्वस्य । भवत्वेवम्, को दोष इति चेत् ? नीलादौ तथा अनीलादिसमारोपः स्यात् । तन्निश्चयान्नेति चेत्; इदमत्र चिन्त्यते--किम् अनुभवात्, उत उत्तरविकल्पाद्वा ? आद्यविकल्पोः अनुकूलमाचरसि स्वार्थानुभवस्य इत्याद्यनिवारणा[त्] । द्वितीये अन्तराले समारोपप्रवेशे निश्चयो दुर्लभः । अथ अनुभवो हठान्निश्चयमुपजनयति; अनीलवासना अनीलसमारोपम् इति काचपच्यम् । § 4171

किंच, क्षणिकनिश्चयमपि स तथोपजनयेत् । असामर्थ्यान्नेति चेत्; नीलादावपि तदस्तु । तत्र सामर्थ्यं नान्यत्रेविकल्पनायां **दृष्टेः** सांशत्वे मेकान्तं प्रतिवहति । तदाह--दृष्टेः **खण्डशः** नीलादौ न क्षणक्षयादौ **पाटवं** निश्चयोपजन[न]सामर्थ्य**मादिर्यस्य** अभ्यासादेः तस्य **संभवे अनेकान्तप्रसङ्गात्** कारणात् **तथा** तेन खण्डश इति प्रकारेण **अर्थोपलब्धिः** अर्थदृष्टिः **किन्न प्रतिपद्येत** स्वीक्रियेत तो*अस्वीकारात् **शब्दपुद्गलस्य श्रुतिर्न स्यात्** । किंभूतस्य ? **अनुपात्तस्पर्शाद्यात्मनः** अनुपात्तः सन्नपि अगृहीतः स्पर्शाद्यात्मा यस्य इति । § 4172

719/mkj

प्रकृतोपसंहारमाह--**तन्न** इत्यादिना । यत एवं **तत्तस्मादयं** खण्डशः प्रतिपत्तिलक्षणः **अपराधो** दोषो **न विकल्पानामेव** किन्तु दृष्टेरपि इति भावः । **यतः** तेषामेवापराधात् ***दृष्टस्य अर्थस्य अखिलो गुणोदृष्ट एव इत्येकान्तः शोभेत** । § 4173

ननु शब्दरूपादीनां पुद्गलद्रव्यधर्मत्वाऽविशेषेऽपि **शब्दस्यैव** ग्रहणं न रूपादीनाम् इति कुतोऽयं विभागः ? तथा, सहोपलम्भनियमाभावेऽपि /ms
च तादात्म्यमिति कुतः ? इति चेत्; अत्राह--**द्रव्याणाम्** इत्यादि । § 4174

...16 द्रव्याणामुपलम्भश्च स्वीयैरुद्भूतवृत्तिभिः ।
न गुणैस्तेजोद्रव्यादेर्यथानुद्भूतवृत्तिभिः ॥ १६ ॥§ 4176

नहि शब्दादीनामेकसामग्र्यधीनानामविनिर्भागवृत्तिभाजां सहोपलम्भ-नियमाभावेऽपि परस्परमतादात्म्यैकान्तः परमाणुस्थूलाकारवत् । तदन्यतरापाये अर्थस्यानुपपत्तेः । व्यतिरेकैकान्ते पृथक्सिद्धिप्रसङ्गात्, सम्ब-

---

१ प्र] सांख्याभिमतप्रधानादिविकल्पस्य ।
३ जोहिद्र] त्रियोन्मत्त
५ ल्पोः] ल्पे
८ म्] हठाज्जनयेदिति ।
९ स] अनुभवः ।
१० त्रेवि] ति
१० मे] त्वमने
१४ *] यतः
१८ दृ] निर्विकल्पकस्यापि ।
१९ *] तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः ।--प्र० वा० ३ । ४४ ।

न्धासिद्धेः । अभेदैकान्ते सहोपलम्भनियमात् व्यर्थमिन्द्रियनानात्वम् । कथञ्चित्तादात्म्येऽपि रूपादेः सन्निहितस्य तत्कारणान्तरसाकल्येऽपि सहानुपलम्भः उद्भूतगुणत्वात् । तद्यथा तजोद्रव्यस्य क्वचित् कदाचित् उद्भूतस्पर्शस्योपलम्भेऽपि न रूपोपलब्धिः तदनुद्भूतवृत्तेः, आलोकस्य रूपोपलब्धौ स्पर्शानुपलक्षणम् । क्वचिदुभयोपलब्धिः उद्भूतवृत्तेरेव यथा अग्निरिति । पार्थिवादीनां गन्धाद्युपलब्धावपि अयं क्रमः लक्ष्यते । तथा पुद्गलस्य रसाद्यात्मनोऽपि शब्दात्मनोपलब्धिः तदुद्भूतिनियमात् । विचित्रा हि परिणामवृत्तिः । स्वसंवित्तेरपि... अन्यतो व्यावृत्त्या प्रतिभासनात् । सकृत्... § 4177

**द्रव्याणाम् उपलम्भो दर्शनं गुणैः** सह न केवलानाम् । किंभूतैः ? इत्याह— **स्वीयैः** आत्मीयैः न द्रव्यान्तरगतैः । अनेन मुक्तिदशायां विशेषगुणरहितस्य आत्मनोऽनुपलम्भं दर्शयति । पुनरपि किंभूतैः ? इत्याह-- **उद्भूतवृत्तिभिः उद्भूता** पुरुषमात्रस्य ज्ञानग्रहणयोग्या **वृत्तिः** परिणामो येषां तैः इति । **च** शब्दो भिन्नप्रक्रमः, अस्यानन्तरं द्रष्टव्यः । नानुद्भूतवृत्तिभिः; अत आह--**नानुद्भूतवृत्तिभिः** । अत्र निदर्शनमाह--**यथा** इत्यादि । **तेजोद्रव्यादेः** आदिशब्देन गन्धद्रव्यादिपरिग्रहः स्तोतादिभिः उद्भूतगुणैरुपलम्भ इति उद्भूतवृत्तिःनानुद्भूतवृत्तिभिः इति, अनेन सहोपलम्भनियमात् इत्यस्य व्यभिचारमाह । § 4178

**नहि** इत्यादिना एतदेव दर्शयति--**शब्दा आदिर्येषां** रूपादीनां तेषाम् । किंभूतानाम् ? **एकसाग्र्यधीना[ना]म् अविनिर्भागवृत्तिभाजासहोपलम्भनियमाभावेऽपि परस्परमतादात्म्यैकान्तो** भेदैकान्तो **नहि** । केषामिव ? इत्याह--**परमाणुस्थूलाकारवत्** । परमाणवश्च स्थूलाकारश्च तेषामिव तद्वद् इति । स्थूलाकारोपलम्भेऽपि न तदारम्भकपरमाणूपलम्भः तथापि न तद्भेदैकान्तः । अनेन शब्दपुद्गलस्य शब्दरूपादीनां भेदैकान्तसाधने सहोपलम्भनियमाभावस्य व्यभिचारं दर्शयति । परमाणूनामुपलम्भद भाव इत्येकेस्थूलाकारस्य इत्यपरे तत्कथं तैर्व्यभिचारो हेतोः इति; तत्राह--**तदन्यतरापाय** इत्यादि । तयोः परमाणुस्थूलाकारयोः अन्यतरः, तस्यापाये **अर्थस्य** घटादेर**नुपपत्तेः** तद्वत् न तेषामतादात्म्यैकान्तः । तथाहि--स्थूलाकारापाये परमाणव एव, तेषामनुपलम्भेन असत्त्वम्, परमाणूपाये स्थूलाकारमात्रमनवयवः, तथा सति एकदेशचलनादिप्रसङ्गः । दृश्याः भंगाः सन्ति नान्य इति चेत्; तर्हि प्रागसतां मेघादीनां कुतः प्रादुर्भावः ? अहेतुक इति चेत्; सर्वः तथा स्यादिति हेतुफलभावविलोपः । निषिद्धोऽद्वैतादिवादः । सूक्ष्मपार्थिवादिभागेभ्यः इति चेत्; अनुकूलमाचरसि, परमाण्वनिषेधात् ।

720/mkj

/ms

१० अनेन] वैशेषिकाभिमतस्य ।
११ नोऽनु] उपलम्भाविषयत्वम् ।
१५ स्तोता] श्रोत्रा
१६ वृत्तिः] वृत्तिभिः
१९ वृत्तिभाजा] जां
२४ द] म्भाभावाद्
२५ इत्येके] चार्वाकाः ।
२५ स्य] अभाव इति बौद्धाः ।
२८ माणू] ण्व
२९ वः] अवयवशून्यः निरंश इति यावत् ।
२९ भंगाः] भागाः

स्त्वयं वा[ऽ]दृश्यपरमाणुभ्यो दृश्यपरमाणूत्पादमभ्युपगम्य ते तः स्थूलोत्पादं कथं नेच्छेत् ? । § 4179

स्यान्मतम्, अस्तु सूक्ष्मं कार्यकाले कारणविलयात्; उक्तमत्र अहेतुकत्वप्रसङ्गादिति । ततः सूक्तम्--**परमाणुस्थूलाकारवदिति** । § 4180

ननु परमाणुभ्यः स्थूलमन्यदेव, कारणात् कार्यस्य अन्यत्वात्, अतः तेषामपि पक्षीकरणात् न तैर्व्यभिचार इति चेत्; अत्राह--**व्यतिरेकैकान्ते** भेदैकान्ते **पृथक्सिद्धिप्रसङ्गात्** अन्यत्र लौकिके देशे अवयवानाम् अन्यत्र अवयविनः सिद्धिः उपलब्धिः पितापुत्रवत्, तस्याः प्रसङ्गात् । कुतः ? इत्याह--**सम्बन्धासिद्धेः** समवायिनिषेधात् । तन्न नैयायिकपक्षो युक्तः । § 4181

सांख्यपक्षः स्यादिति चेत्; अत्राह--**अभेदैकान्ते** परमाणुस्थूलाकारयोः (?')एकत्वैकारयोः, एकत्वैकान्ते **सहोपलम्भनियमात्** कारणात् **व्यर्थम्** /ms **इन्द्रियनानात्वम्** । एवं मन  परमाणूपलम्भः, तत्कथं तदभेदैकान्तः ? तथापि तदुपलम्भकल्पने चक्षुषा रूपोपलम्भे रसादीनामुपलम्भ इति व्यर्थमिन्द्रियनानात्वमिति । कथंचित्पक्षे कुतोऽयं न दोष इति चेत् ? अत्राह--**कथंचित्तादात्म्येऽपि** न केवलं विपर्यये **रूपादेः** अपिशब्दः अत्रापि द्रष्टव्यः, न केवलं परमाणुतदाकारयोः, **सन्निहितस्य सहानुपलम्भः** । कस्मिन् सत्यपि ? इत्याह— **तत्करणान्तरसाकल्येऽपि तत्कारणं** रूपज्ञानकारणं चक्षुः तद**न्तरं** रसनादिः तस्य **साकल्येऽपि** । कुतः ? इत्याह--**उद्भूतगुण** इत्यादि । ततः स्थितम्--**परमाणुस्थूलाकारवत्** इति । यदि वा, शब्दादीनां सहोपलम्भनियमाभावे परस्परम् एकसामग्र्यधीनानाम् माभूतादतादात्म्यैकान्तः शब्दोपलम्भे रूपाद्यनुपलम्भात्, अभावैकान्तस्तु भवेदिति चेत्; अत्राह--**परमाणुस्थूलाकारवदिति** । स्थूलाकारोपलम्भे परमाणुवत् शब्दोपलम्भे रूपाद्यनुपलम्भेऽपि नाभावः इत्यध्याहारः । कुतः ? इत्याह--**तदन्यतरापाये** सदा सावन्यतरश्च शब्दो रूपादि भ्रान्तस्योपाये **अर्थस्य** चेतनस्ये[तरस्य] **वानुपपत्तेः** । तथाहि--प्रतीयमानस्य शब्दस्य अभावे घटादौ कः समाश्वासः ? अनुमीयमानस्य तस्य तत्र रूपादेरभावे स्थूले परमाणुषु  नाश्वासः । तदुक्तम् 721/mkj
**अनुपवनं गत्यापि मूर्त्त मतम्** सिद्धिवि° ११ । १ इति  । § 4182 /ms

भवन्तु शब्दे रूपादयोऽपि तत्र भिन्ना इति चेत्; अत्राह--**व्यतिरेकैकान्त** इत्यादि । अव्यतिरेकैकान्ते दोषमाह--**अभेदैकान्त** इत्यादि । शेषं पूर्ववत् । उदाहरणं दर्शयति **तद्यथा** इत्यादिना । **तेजोद्रव्यस्य क्वचिद**वातान्धकारपूरितापवरकादौ **काचिद्** भैष्मरात्रिसमये **उद्भूतस्पर्शस्य** उद्भूतः स्पर्शो यस्य तस्य **उपलम्भेऽपि न रूपोपलब्धिः** । कुतः ? इत्याह--**तदनुद्भूतवृत्तेः** तस्य

---

१ तः ] तेभ्यः
९ वायि ] य
११ योः ] एकत्वैकारयोः इति व्यर्थमत्र पुनर्लिखितम् ।
१२ न ] एवं न
२० माभूताद ] माभूद
२४ दा ] स चाऽ
२४ स्योपाये ] श्च तस्यापाये
३० वा ] वायुशून्य ।
३१ का ] कदा
३१ ये ] भीषणरात्रिकाले ।

रूपस्य याऽनुद्भूतवृत्तिः तस्या इति । तथा, **आलोकस्य** प्रदीपाद्यालोकस्य **रूपोपलब्धौ स्पर्शानुपलक्षणम्** । **क्वचिदुभयोपलब्धिः** स्पर्शरूपोपलब्धिः । कुतः ? इत्याह--**उद्भूतवृत्तेरेव यथा अग्नि**रिति । § 4183

ननु यथा उभयोपलब्धिः उद्भूतवृत्तेरुपदर्शिता तथा उभयानुपलब्धिः विपर्ययात् कस्मान्न दर्शिता ? विषयाभावादिति चेत्; न; नायनरश्मिरूपस्य विषयस्य भावात् । नैतदस्ति, यतः सर्वविशेषगुणानुद्भूता व एवं भावस्य अनुद्भूतसकलगुणस्य घटादेः सर्वत्र भाव इति सांख्यदर्शनम् । नायनरश्मिषु अनुमानात्, अन्यत्र विपर्ययात् असमानमिति चेत्; न; तन्निषेधात् इत्यभिप्रायः तथावदतः । § 4184

ननु पृथिव्यां क्वचित् सन्नपि गन्धो नोपलभ्यते यथा घटे, एवं रूपादयोऽपि वक्तव्याः । तथा सर्वत्र अप्सु गन्धः, तेजसि गन्धरसौ, वायौ रूपरसगन्धाः, तत्र का वार्त्ता इति ? जलादौ गन्धाद्यभाव इत्येके । तत्राह--**पार्थिव** इत्यादि । प्रत्येकम् **आदि**शब्दः सम्बध्यते **पार्थिवादिः गन्धादि**रिति
/ms । ततोऽयमर्थः--पृथिव्येव **पार्थिवम् आदिर्येषाम्** अबादीनां तेषां **गन्धादयः** तेषा**मुपलब्धावपि** न केवलमनुपलब्धौ **क्रमोऽयम**नन्तरोक्तो **लक्ष्यते** । तथाहि--पृथिव्याः गन्धादयो योगिनां प्रत्यक्षा एव उद्भूतत्वात्, अस्मादृशाम् उभयथा उद्भूतानुद्भूतवृत्तित्वात् । न च यदानुद्भूतिः तदा तदभावः; चरमक्षणनिषेधात्, रसात् रूपाद्यनुमानाभावप्रसङ्गाच्च । जलादौ योगिनामेव गन्धाद्युपलब्धिः, अस्मादृशां विपर्ययः अनुद्भूतत्वात् । अस्मादृशः प्रति पार्थिवगन्धादिग्रहणं परं प्रति दृष्टान्तार्थम् । यथा सतामपि पार्थिवगन्धादीनाम् अनुद्भूतिः तथा अबादीनामपि । तत्र सद्भावे किं प्रमाणमिति चेत् ? स्पर्शवत्त्वं ब्रूमः । § 4185

एवं दृष्टान्तं व्याख्याय दार्ष्टान्तिके योजयति **तथा** इत्यादिना । **तथा पुद्गलस्य** प्रकृतस्य **रसाद्यात्मनोऽपि** शब्दात्मनोऽपि **शब्दात्मनोपलब्धिः** । कुतः ? इत्याह--**तद्** इत्यादि । **तस्य** शब्दात्मन **उद्भूतिनियमात्** । § 4186

ननु पृथिव्यामिव जलादौ गन्धादिसद्भावे क्वचित्तज्जातीये तदभिव्यक्तिः, हेमसजातीये पावके उष्णताव्यक्तिवत्, न चैवम्, इति चेत्; अत्राह--
722/mkj **विचित्रा हि** इत्यादि । **विचित्रा** नानारूपा **हि**र्यस्मात् **वृत्तिः** वर्त्तनं **परिणामानाम्** । तथाहि--क्वचित् तत्र तज्जातीये च गुणाभिव्यक्तिः, यथा सर्वत्रात्मनि ज्ञानाभिव्यक्तिः । क्वचित् तत्रानभिव्यक्तिः तज्जातीये व्यक्तिः उक्तवत् । क्वचित् तत्र तज्जातीये वा किं व्यक्ति परमतेऽपि आत्मादिविभुत्ववत् ।

---

५ यात्] अनुद्भूतवृत्तेः ।
६ व] तौ च
८ अनुमानात्] अनुद्भूतरूपस्पर्शसिद्धिः ।
१२ न्धाः] नोपलभ्यन्ते ।
१८ निषेधात्] रूपादिप्रवाहस्वीकारात् ।
१८ र] यदि अनुद्भूतिकाले अभावस्तदा ।
२६ त] गन्धाद्यभिव्यक्तिः स्यात् ।
३० ज्ञाना] ज्ञाना
३० उ] शब्दे यथा रूपाद्यनभिव्यक्तिः पुद्गलजातीये घटादौ तदभिव्यक्तिरिति ।
३१ क्ति] वाऽनभिव्यक्तिः

आश्रयादर्शनात्तददर्शनमिति चेत्; न; शब्दाग्रहणप्रसङ्गात् । यस्य च पुद्गलविकारा[ः]पृथिव्यादयः तस्य जलादिशशभीयेपार्थिवविकारे गन्धाद्यभिव्यक्तिः सुलभैव इति सर्वं सुस्थम् । सौगतं प्रति तत्प्रसिद्धं निदर्शनमाह--**स्वसंवित्तेरपि** इत्यादि । चर्चि[तं]तदत्रैव । कुतः तदसंभवः ? इत्यत्राह--**तस्याः** स्वसंवित्तेः **अन्यतो** ग्राह्याद्याकाराद् या **[व्या]वृत्तिः** तया **प्रतिभासनात्** । सिद्धं फलं दर्शयन्नाह--**सकृत्** इत्यादि । सुगमम् । § 4187 /ms

यत एव परिणामसिद्धिः अत एव सि[द्धम्; इ]त्याह--**सामान्यस्य** इत्यादि । § 4188

...17 सामान्यस्याभिलाप्यत्वादेः स्वलक्षणविपर्ययात् ।
यदुक्तं तत्प्रतिव्यूढम् अनेकान्तात्मसाधनैः ॥ १७ ॥ § 4190

यत्पुनः...न हि सदृशपरिणामसामान्यं प्रतिषेद्धुं शक्यम् । अतदात्मनः स्वलक्षणस्य स्वाकारज्ञानार्थक्रियायामनुपयोगात् । न हि संवित्तौ...परस्पर...। तदेतत् सामान्यमवस्तु अभिधेयत्वात् अर्थक्रियाऽसमर्थत्वादित्यादि तत्साधनं परिणामसाधनेन प्रत्युक्तम् । सदृश...स्थूलस्य...असंभावितैकात्मनः संविदः कथञ्चित् प्रत्यक्षत्वात् । क्षणिकपरिमण्डलादिस्वलक्षणस्य चाक्षुषत्वे रसाद्यात्मनापि चाक्षुषत्वं स्यात् । शेषेन्द्रियसामर्थ्यं प्रमाणान्तरवत् पारम्पर्येण समारोपव्यवच्छेदार्थं न विरुध्येत, तन्निर्णयविशेषोपपत्तेः § 4191

**अभिलाप्यत्वम् आदिर्यस्य** वस्तुनः तत्त्वाभासवाच्यत्वादेः स तथोक्तः तस्मात् । हेत्वन्तरमाह--**स्वलक्षणविपर्ययात् स्वलक्षणम्** अर्थक्रियाकारित्वं **[तद्विपर्ययः]** तस्माच्च **सामान्यस्य** यदवस्तुत्वं परेण **उक्तम् तत्प्रतिव्यूढम्** निरस्तम् । कैः ? इत्याह--**अनेकान्तात्मसाधनैः** । § 4192

कारिकार्थमाह--**नहि** इत्यादिना । भवत्सदृशपरिणाम एव सामान्यं तदपि परसमानमिति चेत्; अत्राह--**यत्पुनः** इत्यादि । **नहि प्रतिषेद्धुं शक्यम्** दर्शनभ्रान्ततापत्तेः । स्वलक्षणमेव प्रत्यक्षमिति चेत्; अत्राह--**अतदात्मनः** समानपरिणामस्वभावरहितस्य **स्वलक्षणस्य स्वाकारज्ञानं** स्वलक्षणाकारज्ञानं तदेव **अर्थक्रिया तस्या ननु प्रयोगात्** । कुतः ? इत्याह--**नहि संवित्तौ** इत्यादि । सुगममम् । एतपि कुतः ? इत्याह— **परस्पर** इत्यादि । परपक्षमुपन्यस्यति दूषयितुं **तदेतत् सामान्यम्** इत्यादि । **तदेतत्** सदृशपरिणामलक्षणं **सामान्यम्** अवस्तु । कुतः ? इत्याह--**अभिधेयत्वात्** इत्यादि । अनेन **अभिलाप्यादेः** इति व्याख्यातम् । **स्वलक्षणविपर्ययात्** इति क-

---

१ द] आत्मादिविभुत्वादेः ।
१ ज्ञात्] तदाश्रयस्य आकाशस्य अप्रत्यक्षत्वात् ।
२ भीये] सजातीये
२२ त्] तु
२६ प्र] तस्याम् अनुप

723/mkj थयन्नाह--**अर्थक्रियाऽसमर्थ त्वा**दित्यादिकं परकीयं भाषितं **परिणामसाध-**
/ms **नेनप्रत्युक्तम्** निरस्तं **तत्साधनम्** । कुत इति चेत् ? अत्राह--**सदृश** इत्यादि । तदपि कुतः ? इत्याह--**स्थूलस्य** इत्यादि । कथंचिदुपलब्धिं साधयन्नाहा-[ह-] **संभावितैकात्मनोऽपि** संभावित एकः अखण्ड आत्मा स्वभावो यस्याः[तस्या] अपि । कस्याः ? इत्याह--**संविदः** संवित्तेः । **कथंचित्** चेतनादिरूपेण[न क्षण]क्षयादिना**प्रत्यक्षत्वात्** । क्षणक्षयादिनापि प्रत्यक्षत्वे दूषणमाह--**क्षणिक** इत्यादि । **क्षणिकः परिमण्डलो** निरंशत्वलक्षण **आदि**शब्दात् स्वर्गप्रापणादिर्यस्य तत्तथोक्तं तच्च तत्**स्वलक्षणं** च इति, तस्य **चाक्षुषत्वे,** उपलक्षणमेतत् सर्वाध्यक्षसंवित्तीनाम्, * **रसाद्यात्मनापि चाक्षुषत्वं** उपलक्षणमेतत् सर्वाध्यक्षसंवित्तीनाम्, **रसाद्यात्मनापि चाक्षुषत्वं स्यात्** । तथा[ऽ]प्रतीतिः, उभयत्र समानाः । शेषेन्द्रियवैफल्यं स्यादिति चेत्; अत्राह--**शेषेन्द्रियसामर्थ्यं प्रमाणान्तरस्य** अनुमानस्येव तद्वत्, **समारोपव्यवच्छेदार्थम्** अनुमानसामर्थ्यं न विरुध्यते तथा चक्षुषा रूपवता रसादिके गृहीतेऽपि **न विरुध्येत** । यथा प्रत्यक्षेण नीलवत् क्षणिकत्वे प्रतिपन्नेऽपि तत्समारोपव्यवच्छेदार्थम् अनुमानसामर्थ्यं न विरुध्यते तथा चक्षुषा रूपवत् रसादिके गृहीतेऽपि तत्समारोपव्यवच्छेदार्थं शेषेन्द्रियसामर्थ्यं न विरुध्यते । कथम् ? इत्याह--**पारम्पर्येण** शेषेन्द्रियेभ्यो रसादिज्ञानं ततो विकल्पः तस्मात् समारोपव्यवच्छेदः । नहि शेषेन्द्रियमन्तरेण तज्ज्ञानं तदन्तरेण तद्विकल्पः । तदाह--**तन्निर्णय** इत्यादि । **तस्मात्** शेषेन्द्रियातज्ज्ञानाद्वा **निर्णयविशेषस्य उपपत्तेः** । § 4193

अधुना अभिधेयत्वादीनां परसाधनानामनैकान्तिकत्वं दर्शयन्नाह--**स्वल-**
/ms **क्षणे** इत्यादि । § 4194

...18 स्वलक्षणेऽभिधेयत्वाद्यस्ति तेनाप्यसाधनम् ।
सामान्याभावतत्त्वादेः तदभावं तु साधयेत् ॥ १८ ॥ § 4196

चक्षुर्बुद्धेरतदाभासत्वेऽपि यदि स्वलक्षणं विषयः; शब्दबुद्धेः किन्न स्यात् ? स्पष्टेतर...तन्न...तथा च प्रत्यक्षव्यक्तेः स्वलक्षणानां तत्त्वान्यत्वाभ्यामवाच्यत्वम् । तदहेतुत्वे साधारणत्वात्सामान्यस्यावस्तुत्वे स्थूलस्य...एतेन...अर्थक्रियाम्...सङ्केत... § 4197

**स्वलक्षणे अभिधेयत्वादि** आदिशब्दाद् वस्तुनः तत्त्वा[न्यत्वा]भ्यामवाच्यत्वादिपरिग्रहः, **अस्ति** विद्यते **तेनापि** न केवलम[न]न्तरन्यायेन **असाधनम**भिधेयत्वा[द्य]लिङ्गम् । कस्य ? इत्याह--**सामान्य** इत्यादि । **सामान्याभाव-**

६ यादिना] अन्यथा क्षणक्षयानुमानवैयर्थ्यं स्यात् ।
९ *] एतदन्तर्गतः पाठो द्विर्लिखितः ।
१९ शेषेन्द्रियात] यात् तज्

**तत्त्वम् आदिर्**यस्य अवयव्याद्यभावस्य, तस्य व्यभिचारादिति मन्यते । तस्यापि पक्षीकरणाददोष इति चेत्; अत्राह— **तु** शब्दः शिर[ः]कम्पे । **तदभावं** स्वलक्षणाभावं किं **तु साधये[त्]** तत्साधने सर्वव्यवहारविलोप इति भावः । § 4198

कारिकायायाव्याख्यातुमाह--**चक्षुर्बुद्धेः** इत्यादि । **अतदाभासत्वे**ऽपि अस्वलक्षणाभासत्वेऽपि **यदि स्वलक्षणं विषयः** शब्दद्धेः * **किं न स्यात्** भवेदेव स्वलक्षणं विषयः । तन्न युक्तम्--**शब्देनाव्यापृताक्षस्य** इत्यादि 724/mkj
। स्वलक्षणे शाब्देन्द्रियज्ञानयोः न प्रतिभासभेदोऽस्ति, तथापि अभ्युपगम्य उच्यते **स्पष्टेतर** इत्यादि । § 4199

प्रकृतमुपसंहरन्नाह--**तन्न** इत्यादि । परमपि परकीयहेतुं तथाविधं दर्शयन्नाह--**तथा च** इत्यादि । [तथा च ते]नैव च प्रकारेण प्रत्यक्षेण विषयीकृता स्थूलाकारा व्यक्तिर्विशेषः **प्रत्यक्षव्यक्तिः** तस्याः सकाशात् **तत्त्वान्यत्वाभ्यामवाच्यत्वम्** । केषाम् ? इत्याह--**स्वलक्षणानाम्** । **तदहेतत्वे** इत्यादिना हेत्वन्तरं पुनरपि दूषयन्नाह--**साधारणत्वात् सामान्यस्य अवस्तुत्वे** अङ्गीक्रियमाणे । किम् ? इत्याह--**स्थूलस्य** इत्यादि । अस्य अन्यत्रातिदेशं कुर्वन्नाह--**ए ते ते** *त्यादि । लिङ्गान्तरं दूषयति **अर्थक्रियाम्** इत्यादिना । पुनरपि लिङ्गान्तरं निराचष्टे— **सङ्केत** इत्यादिना । § 4200 /ms

एतदपि कुतः ? इत्याह--**स्वलक्षणम्** इत्यादि । § 4201

...19 स्वलक्षणमनिश्चेयमसन्निश्चितमित्यपि ।
मिथ्यार्थनिश्चयैकान्तात् किल तत्त्वं प्रपद्यते ॥ १९ ॥ § 4203

स्वलक्षणविषयं...व्यवस्थापयेत् । कथञ्च एतदुभयं तत्त्वं परमार्थतः असदर्थज्ञानाविशिष्टप्रत्ययग्राह्यत्वात् ? नन्वयम् असदर्थज्ञानस्वलक्षणेषु भवन् कथं सामान्याभावं साधयेत् ? साधयन् वा कथं स्वलक्षणाभावं न साधयेत् ? उभयत्र...अयमपरोऽस्य दोषोऽस्तु न पुनः स्वलक्षणेष्वस्तीत्येतावता प्रकृतं साधयेत् व्यभिचारात् । § 4204

**स्वलक्षणं** परपरिकल्पितपरमाणुलक्षणम् **अनिश्चयम**विकल्पपरिच्छेद्यम् इति **असद**विद्यमानं **निश्चितमित्यपि मिथ्यार्थनिश्चयैकान्तात् किल तत्त्वं प्रपद्यते** सौगतः । § 4205

---

५ कारिकायाया] कां
६ *] शब्दबुद्धेः
७ इ] यच्छास्त्रम्--शब्देनाव्यापृताख्यस्य बुद्धावप्रतिभासनात् । अर्थस्य दृष्टाविवेति--अपोहसि°पृ° ६ । उद्धृतोऽयम्--शब्देनाव्यापृताक्षस्य...अर्थस्य दृष्टाविव तदनिर्देशस्य वेदकम् ॥--सन्मति°टी° पृ° ५२५ ।
१३ हेत] तु
१६ *] एतेन इ
२६ य] अनिश्चेय

कारिकां विवृण्वन्नाह--**स्वलक्षणविषयम्** इत्यादि **व्यवस्थापयेत्** इति पर्यन्तं सुगमम् । **कथं च ?** न कथंचिद् एतत् स्वलक्षणविषयमविकल्पकम् असत्सामान्यविषयं विकल्पज्ञानम् इत्युभयं तत्त्वं **परमार्थः** तः इत्याह--**असदार्थ** इत्यादि दृष्टान्तः । नन्वेतन्निदर्शनमसिद्धम्, सामान्यस्याप्यभावे यस्मात् असदर्थज्ञानाविशिष्टाप्रत्ययग्राह्यत्वादित्ययं हेतुः, स च स्वलक्षणे सत्यप्यस्ति, तदभावे न किञ्चित् स्यात्; तदाह--**अनन्वयम्** इत्यादि । **अयम्** अनन्तरोक्तो हेतुः **असदर्थज्ञानस्वलक्षणेषु** असन्नर्थो यस्य तत्तथोक्तं ज्ञानं येषु तानि तथोक्तानि स्वलक्षणानि तेषु **भवनु कथं सामान्याभावं साधयेत् ? साधयन् वा** सामान्याभावं **कथं** तत्**स्वलक्षणाभावं न साधयेत्** । कुतः ? इत्यथाह--**उभयत्र** इत्यादि इति नैयायिकादिः; अत्र उत्तरमाह--**अय-**
725/mkj **मपरोऽस्य** सौगतस्य नानेकान्तवादिनः **दोषोऽस्तु न पुनः स्वलक्षणेष्वस्ति इत्येतावता प्रकृतं** सौगतं **साधयेत्** । कुतः ? इत्याह--**अव्यभिचारात्** जैनस्य उभयभावं साधयतीति भावः । § 4206

न च जैनप्रसिद्धस्य सामान्यस्य असदर्थज्ञानाविशिष्टप्रत्ययग्राह्यत्वम्;
/ms इत्याह--**स्थूल** इत्यादि । । § 4207

...20 स्थूलस्यैकस्य ज्ञानस्य मिथ्या तत्त्वव्यवस्थितिः ।
कथं मिथ्याविकल्पैः स्यात् स्वांशमात्रावलम्बिभिः ॥
२० ॥§ 4209

इन्द्रियार्थविकल्पबुद्धिः परमार्थतः स्थूलैक[तत्त्वम्] इन्द्रियार्थसन्निकर्षमाश्रित्य, बहिरर्थग्राहित्वात् स्वयं ग्राह्याद्याकारां स्वसंवित्तिं वा व्यवस्थापयन्ती कथं भ्रान्तिर्नाम ? सामान्यस्य च... § 4210

**स्थूलस्यैकस्य** घटादितत्त्वस्य **ज्ञानं** तया **मिथ्यातत्त्वव्यवस्थितिः । कथं मिथ्याविकल्पैः स्यात्** । किंभूतैः ? इत्याह--**स्वांश** इत्यादि । निर्विकल्पनिषेधात् न तैः स्यादिति । § 4211

कारिकां विवृण्वन्नाह--**इन्द्रियार्थ** इत्यादि । **विकल्पबुद्धिः** सामान्यबुद्धिः **कथं भ्रान्तिर्नाम** ? किं कुर्वती ? इत्याह--**व्यवस्थापयन्ती परमार्थतः** । किम् ? इत्याह--**स्थूलैक[तत्त्वम्]** इत्यादि । कुतः ? इत्याह--**इन्द्रियार्थसन्निकर्षमाश्रित्य** बहिरर्थापेक्षया इदमुक्तम् । अन्तरङ्गापेक्षया आह--**स्वसंवित्तिम्** आत्मसंवेदनं साध्य **व्यवस्थापयन्ती कथं भ्रान्तिर्नाम** ? किंभूताम् ? इत्याह-

३ तः ] र्थतः;
४ दा ] द
४ इत्यादि ] ?
५ ज्ञानाविशिष्टा ] ष्ट
६ म् ] नन्वयम्
८ नु ] न्
१० इ ] समानत्वात् इति सम्बन्धः ।
२१ या ] स्य
२२ इ ] स्वांशमात्रावलम्बिभिः इति भावः ।
२८ साध्य ] ध्यं

**-ग्राह्य** इत्यादि । न तत्त्वतः तथा स्वसंवित्तिः, केवलं भ्रान्त्या तथावभासते, तदुक्तम्--**अविभागोऽपि बुद्ध्यात्मा** प्र॰ वा॰ २ । ३५४ इत्यादि । **बहिरर्थग्राहित्वात्** कारणात् । किम् ? इत्याह--**स्वयम्** इत्यादि । परत्र विपर्ययं दर्शयन्नाह--**सामान्यस्य च** इत्यादि । § 4212

तदेव दर्शयन्नाह--**प्रत्यक्षम्** इत्यादि । § 4213

...21 प्रत्यक्षं मतं न स्यात् कथं सामान्यगोचरम् ।
अर्थाकारं समं पश्यत् कार्यकारणस्वार्थयोः ॥ २१ ॥§ 4215

विषयविषयिणोः सदसत्सारूप्यैकानुभवलक्षण...तत्प्रत्यक्षबुद्धेः तत्सारूप्यव्यतिरेकेण यदि अर्थदर्शनं चेत्; तेन तद्व्यवधानात् सन्निकर्षादिवत् साधकतमतैव मा भूत् । तत्पुनः सारूप्यं संवित्तेरेवानुभूतं रूपं नार्थस्येति कुतः अर्थोपलब्धिरन्यत्रोपचारात् । न चैतत् कार्यकारणभाव एव स्यात् यतः तत्रैव तद्भावात् समकालभाविनो भविष्यतो वा दर्शनं न भवेत् । न चैवं यमलकवदविसंवादो न स्यात् । तदेतत् ज्ञानं त्रिकालविषयसारूप्यं कुतः कारणस्यैव विनियम्येत यतः विकल्पज्ञानवत् सामान्यगोचरं न स्यात् । न चैकरूपेण अनेकार्थानुकरणं विरुद्धम्, संचितालम्बनतोपगमात् पञ्चविज्ञानकायानाम् । कायग्रहणात् प्रत्येकं संचितालम्बनत्वमेव इति चेत्; 726/mkj
न; स्थूलैकप्रतिभासाविरोधात्, सन्तानान्तरवत् § 4216

**प्रत्यक्षं सामान्यगोचरं कथं मतम्** अभ्युपगतं सौगतस्य **न स्याद्** भवेदेव । किं कुर्वत् ? इत्याह--**पश्यत्** किम् ? इत्याह--**अर्थाकारं समं** सदृशम् । कयोः ? **स्वार्थयोः** । किंभूतयोः ? इत्याह--**कार्यकारणयोः** यथासंख्येन । § 4217

कारिकां विवृण्वन्नाह--**[विषय]विषयिणोः** इत्यादि । **सदसत्सारूप्यैकानुभवलक्षण-** पर्यन्तं गतार्थमसकृत् । अस्यानभ्युपगमे दूषणमाह--**तत्प्रत्यक्षबुद्धिः** इत्यादि । **तस्य** स्वलक्षणस्य या **प्रत्यक्षबुद्धिः** तस्याः **तत्सारूप्यव्यतिरेकेण यदि अर्थदर्शनं** निराकारेण ज्ञानेन योग्यताबलाच्चेद् अर्थसाक्षात्करणं **तेन** तद्बलेन **तद्व्यवधानात् सन्निकर्षादिवत् साधकतम-** /ms
**तैव मा भूत्,** ततः किं सारूप्यकल्पनया ? सारूप्यमेव साधकतममिति चेत्; अत्राह--**तत्पुनः** सारूप्यं ज्ञानार्थयोः सादृश्यं **संचित्तोरेव रूपं** स्वभावः

१ इ] ग्राह्यग्राहकाद्याकाराम् ।
१ त] ग्राह्याद्याकारा ।
२ इ] विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते । इति शेषः ।
१९ तु] त्
२४ बुद्धिः] द्धेः
२६ द्य] तद्य
२८ संचित्तोरेव] संवित्तेरेव

**अनुभूतम्** । एवकारफलं दर्शयति--**नार्थस्य** तद्रूपमनुभूतमिति । कुतः ? इत्याह--**कुतः** इत्यादि । **कुतः** प्रमाणात् परस्य **अर्थोपलब्धिः** न कुतश्चित् **अन्यत्रोपचारात्** । तत एव तदुपलब्धिर्यथा चैत्रमित्रयोः चैत्रदर्शनाचैत्र[सदृशे मित्रे] दर्शनोपचारः । § 4218

एतदुक्तं भवति--उभयदर्शनात् सारूप्यप्रतिपत्तिर्यथा चैत्रमित्रयोः, न च परस्य अर्थदृष्टिः तत्कथं तद्गतसारूप्यप्रतीतिः उपचारात् ? इति त्वभ्युपगम्य उक्तम्, न भावतः । नहि अदृष्टमित्रस्य दर्शनमुपचारतः चैत्रे भवति । तदुपलब्धिः उपाचारादेव तु इति चेत्; अत्राह--**न चैतत्** सारूप्यं **कार्यकारणभाव एव स्यात्** अपि तु तदभावेऽपि यमलकयोरिव स्यादिति भावः, **यतः तत्रैव तद्भावात् समकालभाविनोऽर्थस्य भविष्यतो वा दर्शनं न भवेद्** भवेदेव । तथा च प्र ज्ञा क र स्य कुतो भाविन्येव वर्त्तनात् प्रत्यक्षं प्रमाणं स्यात् ? § 4219

ननु अकारणेन सारूप्ये अविसंवादो न स्यादिति चेत्; अत्राह--**न चैवम् अविसंवादो न स्यात्** भवेदेव **यमलकवत्** । § 4220

प्रकृतमुपसंहरन्नाह--**तद्** इत्यादि । यत एवं **तत्**तस्माद् **एतन्नी**लाद्याकारं **ज्ञानं त्रिकालविषयसारूप्यं** त्रयः कालो विषयो यस्य सारूप्यस्य त-
/ms द्विभूत्सम्भव **कुतः कारणस्यैव विनियम्येत यतो** विनियमाद् **विकल्पज्ञानवत् सामान्यगोचरं न स्यात्** भवेदेव । कथमेकस्य त्रिकालगोचरार्थानुकरणमविरुद्धमिति चेत् ? अत्राह--**न चैकरूपेण** एकस्वभावेन ज्ञानेन **अनेकार्थानुकरणं विरुद्धम्** । कुतः ? इत्याह--**संचितालम्बनतोपगमात्** । **संचिता[ः]** सन्निवेशविशेषविशिष्टाः परमाणव **आलम्बनं** येषां तेषां भावः **तत्ता** तस्या **उपगमात्** । केषाम् ? इत्याह--**पञ्चविज्ञानकायानाम्** च-
727/mkj क्षुरादिज्ञानसमूहानाम् **संचिता लम्बनाः पञ्च विज्ञानकायाः** इति राद्धान्तात् । एवं मन्यते--यथैकज्ञानम् समानकालमनेकमर्थमनुकरोति तथा भिन्नकालमपि इति निराकृतमेतत्--**वर्त्तमानमात्रवृत्तिः अक्षाणाम्** इति । § 4221

ननु ज्ञानसमूहः संचितालम्बनः, प्रत्येकं तु ज्ञानम् एकैकपरमाणुनिष्ठम् । तदाह--**कायग्रहणात्** इत्यादि । समूहाभिधानात् **प्रत्येकं संचितालम्बनत्वमय** ज्ञानानाम् इत्येव **चेद्**; अत्रोत्तरमाह--**न** इत्यादि । **न** इति

६ स्य] योगाचारस्य ।
७ तः] परमार्थतः ।
७ स्य] मित्रम् अजानतः पुरुषस्य ।
९ य] सहजातयोः ।
११ भा] ततो भाव्यर्थविषयं प्रमाणान्तरगोचरम् । प्रमाणमध्यारोपेण व्यवहारावबोधकृत् ॥--प्र॰ वार्तिकाल॰ पृ॰ ५ ।
१३ णेन] अकारणभूतेन अर्थेन ।
१७ व] तत्तथोक्तम्
२३ इ] द्रष्टव्यम्--पृ॰ २५ टि॰ १० ।
२५ इति] तुलना--योग्यदेशस्थितेऽक्षाणां वृत्तिर्नातीतभाविनि । तदाश्रितं च विज्ञानं न कालान्तरभाविनि ॥--प्र॰ वार्तिकाल॰ पृ॰ २४६ ।
२९ य] मेव
२९ इत्येव] वं

परपक्षप्रतिक्षेपे । कुतः ? इत्याह--**स्थूलैकप्रतिभासविरोधात्** । निदर्शनमाह--**सन्तानान्तरवदिति** । शेषमत्र चिन्तितम् । § 4222

सारूप्यवशादर्थग्रहणे दूषणान्तरमाह--**एकार्थ** इत्यादि । § 4223

…22 एकार्थसन्निकृष्टाक्षदृष्ट्यन्योऽन्यवीक्षणम् ।
अन्योऽन्याकारसंवित्त्वान्नो चेन्नैकार्थवीक्षणम् ॥ २२ ॥§ 4225

सहैकार्थोपनिबद्धदृष्टीनां यथार्थानुकरणं तथा अन्योऽन्यानुकरणमवश्यम्भावि, ततोऽर्थोपलब्धिरिव अन्योऽन्योपलब्धिः विषयरूपतैव [यतो ग्रहणकारणम्] । नाकारणं [विषय इति चेत्;] न तर्हि अर्थसारूप्यम्, सत्यपि तस्मिन् प्रामाण्यव्यभिचारात्, आलम्बनाभिमतात् कारणाच्च संवित्तिर्नवै विशेषान्तरं प्रतिलभते अन्यत्र तदाकारानुकरणात् । तत्पुनः नीलतयेव जडात्मनापि सुतरां सारूप्यम् । तज्जन्मसारूप्यलक्षणं व्यभिचरति समानार्थदर्शननानैकसन्तानेषु संभवात् । तदध्यवसायहेतुत्वं च । क्वचित्… § 4226

एकस्मिन् नर्त्तकीलक्षणे **अर्थे सन्निकृष्टानि** संसृष्टानि **अक्षाणि** यासां [दृष्टीनां] दर्शनानां तासाम् **अन्योऽन्यवीक्षणं** । कुतः ? इत्याह--**अन्योऽन्याकारसंवित्त्वात्** परस्परसदृशत्वात् **नो चेत्** न यदि परस्परवीक्षणं 728/mkj तासां **नैकार्थवीक्षणम्** एकस्यार्थस्य ग्रहणं न भवेत्, तत्रापि सारूप्यमेव /ms ग्रहणकारणं तत्तु अव्यभिचारीति भावः । § 4227

---

१ भास] सा
११ त] अत्रायं पूर्वपक्षः--तस्माच्चक्षुश्च रूपं च प्रतीत्योदेति नेत्रधीः । ३ । १९० भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः । हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम् ॥ कार्यं ह्यनेकहेतुत्वेऽप्यनुकुर्वदुदेति यत् । तत्तेनाप्यत्र तद्रूपं गृहीतमिति चोच्यते ॥ ३ । २४७-४८ अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपतां । तस्मात् प्रमेयाधिगतेः साधनं मेयरूपता ॥ --प्र० वा० ३ । ३०५ ।
१२ वात्] न तज्जन्म न ताद्रूप्यं न तद्व्यवसितिः सह । प्रत्येकं वा भजन्तीह प्रामाण्यं प्रति हेतुतान् ॥--लघी० श्लो० ५८ । तत्सारूप्यतदुत्पत्ती यदि संवेद्यलक्षणम् । संवेद्यं स्यात् समानार्थं विज्ञानं समनन्तरम् ॥--प्र० वा० ३ । ३२४ ।
१२ त] पूर्वपक्षः--अविकल्पमपि प्रत्यक्षं विकल्पोत्पत्तिशक्तिमत् । निःशेषव्यवहाराङ्गं तद्द्वारेण भवत्यतः ॥--तत्त्वसं श्लो० १३०६ ।
१२ च] न केवलं विपयबलात् दृष्टेरुत्पत्तिः अपि तु चक्षुरादिशक्तेश्च । विषयाकारानुकरणाद् दर्शनस्य तत्र विषयः प्रतिभासते न पुनः करणम् तदाकारानुकरणादिति चेत्तर्हि तदर्थवत् करणमनुकर्तुमर्हति न चार्थं विशेषाभावात् । दर्शनस्य तज्जन्मरूपाविशेषेऽपि तदध्यवसायनियमाद् बहिरर्थविषयत्वमित्यसारम्; वर्णादाविव उपादानेऽप्यध्यवसायप्रसङ्गात् । --अष्टश०, अष्टस० पृ० १८८ । प्रमेयक० पृ० १०८ । सम्मति० टी० पृ० ५१० । ताद्रूप्यस्य समानार्थैः तदुत्पत्तेः इन्द्रियादिभिः तद्द्वयस्य समानार्थसमनन्तरप्रत्ययैः, तत्त्रितयस्य शुक्ले शङ्खे पीताकारज्ञानेन व्यभिचारात् ।--प्रमेयरत्नमा० २ । ९ । प्र० मी० २० । प्र० नय० ४ । ४७ । रत्नाकराव० ४ । ४७ ।
१६ त] एकार्थे ।
१७ त] सारूप्यम् ।

कारिकां विवृण्वन्नाह--**सह एकार्थोपनिबद्धदृष्टीनाम्** इत्यादि । **सह** युगपद् **एकस्मिन्नर्थे उपनिबद्धाः दृष्टयो** येषां तेषां पुरुषाणां **यथार्थानुकरणं तथा अन्योऽन्यानुकरणमवश्यंभावि ततोऽर्थोपलब्धिरिव अन्योऽन्योपलब्धिः** । कुतः ? इत्याह--**विषयरूपतैव** इत्यादि । § 4228

परमतमाशङ्कते--**नाकारणम्** इत्यादि । अत्र दूषणमाह--**न तर्हि अर्थसारूप्यम्** इत्यादि । कुतः ? इत्याह--**सत्यपि तस्मिन्** अर्थसारूप्ये **प्रामाण्यव्यभिचारात्** उक्तयायेन । § 4229

ननु सारूप्यमात्रे तद्व्यभिचारः, कारणाच्च तद्विशेषोऽव्यभिचारी जायत इति चेत्; अत्राह--**कारणाच्च** हेतोरपि । किंभूतात् ? **आलम्बनाभिमतात्** अनेन समनन्तरादिनिरासः **संवित्तिर्न वै नैव विशेषान्तरं प्रतिलभते अन्यत्र तदाकारानुकरणात्** कारणा[नु]करणमेव विशेषं लभत इत्यर्थः । भवत्वेवमिति चेत्; अत्राह--**तत्पुनः** इत्यादि । **नीलतयेव दात्मनापि सारूप्यम् इति स्वतराम्** इत्यनेन दर्शयति । जन्मादिकमपि व्यभिचारयन्नाह--**त[ज्ज]न्मे**त्यादि । कुतः ? इत्याह--**समानार्थ** इत्यादि । **समानः सदृशोऽर्थो** येषां **दर्शनानां** तानि तथोक्तानि दर्शनानि तेषां **नानैकसन्तानाः** तेषु **संभवात्** समानार्थदर्शनानां सन्तानेषु संभवात् तज्जन्मसारूप्ययोः । तथाहि--पितृशरीरात् जायमानमपत्यशरीरं यथा कदाचित्तदाकारं तथा तच्चेतसोऽपत्यचित्तं /ms कदाचित्तदाकारमुपलभ्यते, जन्यजनकयोः प्रायेण समानत्यागादिचित्तव्यवहारप्रसिद्धेः । न चापत्यचित्तं जनकचेतसि प्रमाणम्, इतरथा प्रकृतपुरुषस्य परचित्तप्रत्यक्षता इति व्याहतमेतत्--**शरीरप्रत्यक्षत्वेऽपि न बुद्धिः प्रत्यक्षा, बुद्धिविकल्पे संशयात्** इत्यादि । तथा, समानार्थदर्शनैकसन्तानेषु भिन्ना तेषु संभवात्तयोः । तथाहि--[नीलात् नीलज्ञानं तस्माच्चापरापराणि] नीलज्ञानानि जायन्ते तद्रूपाणि, न च तानि तत्र प्रमाणम्, वहिस्ततोऽप्रवृत्तिप्रसङ्गात् । § 4230

स्यान्मतम्--तेभ्यो जन्मैव न तद्रूपता; अर्थापि *सा न भवेत् । दृश्यते नीलतया इति चेत्; बोधरूपतया बोधादपि इति समानम् । *तावन्मात्रेण भवतु न नीलतया इति चेत्; न; अंशेन जन्यजनकभावप्रसङ्गात् । तथा, पूर्वज्ञानम् उत्तरस्य बोधरूपतया जनकं न नीलरूपतया तथा उत्तरं तथैव

५ इ] विषय इति चेत् । द्रष्टव्यम्--पृ° १८८ टि° ७ ।
७ या] उक्तन्या
८ त] सारूप्यविशेषः ।
१० रादिनिरासः] आदिपदेन सहकार्यधिपतिप्रत्ययौ ग्राह्यौ ।
१२ दा] जडा
१३ राम्] सुतराम्
१३ ज] तज्ज
१४ त्यादि] तज्जन्मसारूप्यलक्षणं व्यभिचरतीति ।
१७ त] पितृचेतसः ।
१८ त्या] समानदानादिप्रवृत्तिदर्शनात् ।
२२ तेषु] भिन्नेषु
२२ योः] जन्मसारूप्ययोः ।
२३ त्र] पूर्वनीलज्ञाने ।
२५ तेभ्यो] पूर्वनीलज्ञानेभ्यः जन्मैव उत्तरनीलज्ञानानां न तद्रूपता ।
२५ अर्थापि] अर्थेऽपि
२५ *] तद्रूपता ।
२६ *] बोधरूपतामात्रेण ।

जन्यथा यथा बोधात् तद्रूपता तथा नीलादपि स्यात् । अर्थस्य वैयर्थ्यमिति चेत्; सार्थकत्वेऽपि पूर्वदोषानतिवृत्तिः । यदि वा, नैकस्य नानाकारानुकरणं विरुद्धम् इत्युक्तम्; कथमन्यथा सर्वदर्शिज्ञानम् अशेषनीलाकारानुकारि 729/mkj भवतो भवेत् ? यदि मतम्, आद्यं नीलज्ञानं पूर्वनीलज्ञानमन्तरेण जातं तन्न तस्य नीलता पूर्वज्ञाननीलताकृता, तथा अन्यत्रापि इति; तन्न सारम्; यतः यथासंभवं हेतुफलभावात् । ततः स्थितम्--**तज्जन्मसारूप्यलक्षणं व्यभिचरतीति** । तदव्यवसायसहितं न तथा इति चेत्; अत्राह--**तदध्यवसायहेतुत्वं च** तस्य अर्थाकारज्ञानस्य व्यवसायकारणत्वं च व्यभिचरति । कुतः ? इत्याह--**क्वचिद्** इत्यादि । § 4231

नन्वेवंबहिरर्थस्य अग्रहणमेव प्रकारान्तरासंभवादिति पायसे घृतप्लवः /ms सौगतजनस्य इति चेत्; अत्राह--**प्रत्यर्थनियता** इत्यादि । § 4232

...23 प्रत्यर्थनियता बुद्धिः प्रत्यर्थविषया सती ।
तज्जन्म[सारूप्यतदध्यवसायेषु सत्स्वपि] ॥ २३

॥§ 4234

तथा च समानेऽपि अर्थग्रहणे अकारणं चार्थं विषयीकुर्वतो न कश्चिद् व्याघातः । संवादस्य...प्रत्यक्षस्यापि व्यतीतस्य अप्रतिभासनात् । अनागतार्थस्य संप्रत्यभावेऽपि विषयतोपपत्तेः अविसंवादः व्यवहारात् । अक्षशब्दज्ञानयोः स्वार्थप्रतिपत्तिं प्रति नान्तरमुत्प्रेक्षामहे । प्रतिभासभेदस्य वस्तुभेदकत्वाभावात् । § 4235

**प्रत्यर्थनियता बुद्धिः** । किंभूता ? इत्याह--**प्रत्यर्थ** इत्यादि । केषु सत्स्वपि ? इत्याह--**तज्जन्म** इत्यादि । § 4236

कारिकार्थं दर्शयति--**समानेऽपि** इत्यादिना । **तथा च** तेन प्रकारेण **अर्थग्रहणे** सति अर्थग्रहणे**ऽकारणं च अर्थं विषयीकुर्वतः** संवेदनस्य **न कश्चित्** प्रत्यक्षादिबाधलक्षणो **व्याघातः** । संवादो न स्यादिति चेत्; अत्राह--**संवादस्य** इत्यादि । प्रतिपादितमेतत् । तथापि स्वकारण एवाऽविसंवाद इति चेत्; अत्राह--**प्रत्यक्षस्यापि** इत्यादि । **व्यतीतस्य** ज्ञानात्मनि **अप्रतिभासनात्** सारूप्यनिषेधात् भाविकारणनिराकरणादिति भावः । § 4237

ननु भविष्यदर्थविषया बुद्धिर्निर्विषया, तत्काले तदर्थस्यासंभवेन तत्राप्रतिभासनात्, तदस्याः कथमविसंवाद इति चेत् ? अत्राह--**अनागतस्य** इत्यादि । **अनागतस्य अर्थस्य** मरणादेः **संप्रति** अरिष्टादिकाले **अभावेऽपि**

१ था] जन्यं स्यादिति
१ पि] नीलतापि
७ व्य] त[[अनुकूलविकल्पोत्पादः तदध्यवसायः ।]]दध्य
७ था] व्यभिचारतीति ।
९ इ] शुक्ले शङ्खे पीतकारज्ञानादुत्पन्नेन समनन्तरज्ञानेन व्यभिचारीति ।
२७ त] भविष्यदर्थस्य ।

**विषयतोपपत्तेः** अरिष्टलिङ्गजनितबुद्धिगोचरतोपपत्तेः **अविसंवादः** । कुतः ? इत्याह--**व्यवहार** इत्यादि । § 4238

ननु भावी चेत् मरणादिः कथं प्राक्प्रतिभासगोचरः ? प्रागनुत्पन्नः /ms भावी इत्युच्यते, अनुत्पन्नश्च खरविषाणवत् न तद्गोचरः, इतरथा न भावी, वर्त्तमानघटादिवत्, ततो भविष्यदर्थबुद्धिर्निर्विषया इति चेत्; अत्राह--**अक्ष** इत्यादि । **अक्षशब्दयोः** कार्यभूते वस्तुज्ञाने, **शब्दज्ञानग्रहणम्** उपलक्षणम् तेन अनागतविषयम् अविशदं सर्वं विज्ञानं गृह्यते । तयोः **स्वार्थप्रतिपत्तिं प्रति नान्तरं** भेदमु**त्प्रेक्षामहे** । एवं मन्यते--यथा भविष्यदर्थः तद्बुद्धिकाले 730/mkj नास्ति, तथा प्रत्यक्षार्थः तद्देशे नास्ति । नहि प्रत्यक्षपरिच्छेद्याः अर्थाः सर्वे तदाधारे आत्मनि व्यवस्थिताः । अतद्देशाः परिच्छिद्यन्ते नातत्काला इति किंकृतो विभागः ? भाविनोऽपि स्वकालसत्ताऽनिषेधः, अन्यथा वर्त्तमानो भवेत् । सोऽपि किंचिदपेक्ष्य भावीति । ननु किमुच्यते--नान्तरमुच्यते—**नान्तरमुत्प्रेक्षामहे** इति ? यावता विशदेतरताकृतं तदस्ति इति चेत्; अत्राह--**प्रतिभासभेद** इत्यादि । § 4239

स्यान्मतम्--शब्दज्ञानस्य नाविशदत्वात् निर्विषयत्वमुच्यते, किन्तु तद्ग्राह्यसामान्यस्य अवस्तुत्वात्, तदप्यसदर्थप्रत्ययत्वादिति; तत्राह--**स्वकारण** इत्यादि । § 4240

...24 स्वकारणस्वलक्षणस्याप्यन्तर्बहिर्विकल्प्यवत् ।
परमार्थाविसंवादि न प्रत्यक्षं न लैङ्गिकम् ॥ २४
॥§ 4242

प्रमाणाविसंवादकत्वं यथातत्त्वं युक्तम्, प्रतिपत्त्रभिप्रायाणामप्रतिष्ठानात् । तदनुकरणे स्वमतव्याघातात् । धर्म...तत्त्वतः । परम्परया; नचानर्थविषयैर्विकल्पैः तत्त्वव्यवस्थापनम् । केषांचिन्मिथ्यात्वेऽपि कथञ्चित् केनचित् तत्त्वव्यवसाय इत्यपि मिथ्या विकल्पात् कुतस्तत्त्वप्रतिपत्तिः ? यतः स्वलक्षणव्यवस्थाऽविसंवादः । तन्न...विप्रतिपत्तेः । नापि विकल्पकम्, परमार्थतः अतद्विषयत्वात् । तत एवाविकल्पज्ञानं न व्याख्यात्रभिप्रायेणापि अविसंवादकम् । बहिः यथा... § 4243

**स्वकारणं** त**त्स्वलक्षणं** च इति त**स्यापि विकल्पवत्** सामान्यवत् असदर्थप्रत्ययविषयत्वमवगन्तव्यम् । तदाह--**परमार्थ** इत्यादिना । **परमार्थः** क्षणिकनिरंशपरमाणुरूपः **तदविसंवादि न प्रत्यक्षम्** उक्तन्यायात्, अत एव **न लैङ्गिकम्** । कुतः ? इत्याह--**अन्तर्बहिः** इत्यादि । § 4244

१२ ना] नान्तरमुच्यते इति पुनर्लिखितम् ।
१३ त] अन्तरम् ।
१४ इ] प्रतिभासभेदस्य वस्तुभेदकत्वाभावात् ।
२७ ल्प] ल्प्य

कारिकार्थमाह--**प्रमाण** इत्यादिना । **तदविसंवादकत्वं [यथातत्त्वं]** तत्त्वानतिक्रमेण **युक्तम्** उपपन्नम् । प्रतिपत्त्रभिप्रायादिति चेत्; अत्राह--**प्रतिपत्त्रभिप्रायाणामप्रतिष्ठानात्** तथा *__तत्त्वं युक्तमिति__ **तदनुकरण** प्रतिपत्र- /ms भिप्रायानुकरणेन **स्वमतव्याघातात्** । तदाह--**धर्म** इत्यादिना । अस्तु यथातत्त्वं तदिति चेत्; अत्राह--**तत्त्वत** इत्यादि । § 4245

नन्वविकल्पाद् विकल्पवासनाप्रबोधः, ततो विकल्पः तस्मात् तत्त्वव्यवस्था इति, अतो विकल्पात् सेति चेत्; अत्राह--**परम्परया** इत्यादि । भवतु तत् तेषामेव इति चेत्; अत्राह— **न चानर्थविषयैर्विकल्पैः तत्त्वव्यवस्थापनम्** । तेभ्योऽपि परम्परया वस्तुप्रतिबद्धेभ्यस्तद्व्यवस्थापनमिति चेत्; अत्राह--**मिथ्यात्वेऽपि** इत्यादि । **मिथ्यात्वेऽपि केषांचित्** विकल्पानां **तत्त्वव्यवसायः कथंचित् केनचित्** परम्पराप्रतिबन्धप्रकारेण **इत्यपि** एवमपि **मिथ्या, विकल्पात् कुतः तत्त्वप्रतिपत्तिः यतो** यस्याः तत्त्वप्रतिपत्तेः अनुमानभ्रान्तेः सकाशात् **स्वलक्षणव्यवस्थाऽविसंवादः** । **यतः** इति चाक्षेपे, नैव स्यात् । एवं मन्यते--विकल्पस्य कस्य चित् परम्परया अर्थप्रतिबन्धो न तावदविकल्पात्; 731/mkj तेन विकल्पाविषयीकरणात्, ततः तत्त्वात् सिद्धेश्च क्षणक्षयादिवत् । नापि विकल्पा[त्] निर्विषया[त्]; तस्यापि तदन्तरात् प्रतिबन्धसाधने अनवस्था । अथ एकेन विकल्पेन अन्यस्य तेन प्रतिबन्धः साध्यते; अन्योऽन्यसंश्रयः । एतेन विकल्पात्मवेदनात् तत्सिद्धिर्निरस्ता; तेन अर्थापरिच्छेदादविकल्पदोषाच्च इति । § 4246

प्रकृतं निगमयन्नाह--**तन्न** इत्यादि । कुतः ? इत्याह--**विप्रतिपत्तेः** विकल्प इति सम्बन्धः । यदि वा, विकल्पापेक्षया विपरीता विरुद्धा वा प्रतिपत्तिः तस्या इति । **विकल्पकं** स्वलक्षणतत्त्वाविसंवादि स्यादिति चेत्; अत्राह--**नापि** इत्यादि । कुतः ? इत्याह--**अतद्विषयत्वात्** स्वलक्षणतत्त्वाविषयत्वात् /ms विकल्पकस्य **परमार्थतः**, कल्पनया केवलं परं स्यात् व्याख्यात्रभिप्रायवशादविकल्पकं तदविसंवादि इति चेत्; अत्राह--**तत एव** विकल्पस्य अतद्विषयत्वादेव । यदि वा, विकल्पे विप्रतिपत्तेरेव अविकल्पप्रतिपत्तेरेव **अविकल्पज्ञानं व्याख्यात्रभिप्रायेणापि नाविसंवादकम्** । कुतः ? इत्याह--**बहिः** इत्यादि । तदपि कुतः ? इत्याह--**यथा** इत्यादि । § 4247

एतदेव समर्थयमानः प्राह--**प्रत्यक्षमित्यादि** । § 4248

...25 प्रत्यक्षं निश्चयापेक्षं न प्रमाणं स्वलक्षणे ।

३ *] यथा
३ ण] णे
१४ ल्पात्] ज्ञायते ।
१५ तः] अविकल्पात् ।
१५ सिद्धे] तत्त्वासिद्धे
१६ त] विकल्पान्तरात् ।
१८ तेन] स्वसंवेदन ।
१८ वि] निर्विकल्पपक्षोपक्षिप्तदोषानुषङ्गात् ।

## सन्निधानेतराभ्याञ्च प्रतिभासभिदा धियः ॥ २५

||§ 4250

प्रत्यक्षं सर्वतो व्यावृत्तं वस्तु गृह्णदपि अनीलादिसमारोपं व्यवच्छिनत्ति, सामान्य...तन्नैतत् प्रत्यक्षं न चानुमेयम् । न च...कार्यकारणयोः विषय-विषयिणोः विनष्टेतरयोः प्रतिभासाविशेषात् । नापि विज्ञप्तिमात्रे एतल्लक्षणम्, स्वप्नादौ तल्लक्षणाभावप्रसङ्गात् । सत्यपि स्वप्नादौ कथं तदा चित्तचैत्तानां प्रत्यक्षत्वम् ? कथं च न स्यात् ? निरंशतत्त्वस्य स्पष्टप्रतिभासाभावात् तद्व्यवच्छेदानिर्णयाच्च यतः **सर्वे** प्र॰ वा॰ ३ । ३९ इत्यादि भवेत् । § 4251

**प्रत्यक्षं स्वलक्षणे न प्रमाणं** किन्तु सामान्ये । कुतः ? इत्याह--**निश्चयापेक्षं** यतो निश्चये स्वसामान्ये, इतरथा क्षणिकत्वानुमानमनर्थकमेव । तदपेक्षमपि स्वलक्षणे प्रमाणम्; तर्हि तदपेक्षा योगः । तन्निरपेक्षमेव प्रमाणमिति चेत्; अत्राह--**सन्निवे** इत्यादि । स्वलक्षणस्य यत् **सन्निधानं** यच्च **इतरद**सन्निधानं ताभ्यां **धियः** प्रत्यक्षबुद्धेः **प्रतिभासभिदा च** न तदाकारासान इत्यर्थः । § 4252

कारिकां विवृण्वन्नाह--**सर्वतः** सजातीयाद् विजातीयाद् **व्यावृत्तमपसृतं वस्तु गृह्णदपि प्रत्यक्षम् अनीलादिसमारोपं व्यवच्छिनत्ति** यत्रांशे निश्चयं जनयति इत्यर्थः । यदि तत्रैव प्रमाणं किं स्यात् ? इत्याह--**सामान्य** इत्यादि । यत एवं **तत्** तस्मात् **नैतत्** स्वलक्षणं **प्रत्यक्षं न चानुमेयम्** प्रत्यक्षाभावे अनुमानाभावात् । स्वानुभूते सर्वत्र प्रमाणमिति चेत्; अत्राह--**नच** इत्यादि । व्याख्यातम् । एतदपि कुतः ? इत्याह--**कार्य** इत्यादि । **कार्यं** ज्ञानं
732/mkj **कारणमर्थः** तयोः । किंभूतयोः ? **विषयविषयिणोः** विषयोऽर्थः विषयि ज्ञानं
/ms तयोः **विनष्टेतरयोः प्रतिभासाविशेषात्** । सर्वदा स्थूलप्रतिभासादित्यर्थः । तर्हि बहिः स्वलक्षणस्याविचार्यमाणस्य अयोगात्, अन्तः स्वलक्षणमस्तु इति चेत्; अत्राह--**नापि** इत्यादि । विज्ञप्तिरेव नार्थः **विज्ञप्तिमात्रं** तस्मिन्नपि न केवलं बहिः, **एतल्लक्षणम्** एतस्य परपरिकल्पितस्वलक्षणस्य लक्षणं दर्शनं नापि । नहि ज्ञानपरमाणवः प्रतिभान्ति पुरुषवत् । सुखादिनीलादितत्त्वस्य परेण प्रतिभास इष्यते । अभ्युपगमे वा नीलादिप्रतिभासः किमसत्य इति चेत्; अन्यत्र कः समाश्वासः ? कुतश्च तदसत्यता ? ग्राह्यत्वेनावभासनात्; तैमिरिकोपलब्धकेशादिवदिति चेत्; अत्राह— **स्वप्नादा**वित्यादि । **स्वप्न आदि**र्यस्य काचकामलादिविभ्रमस्य स तथोक्तः तत्र **तल्लक्षणाभावप्रसङ्गाद्** विज्ञप्तिदर्शनाभावप्रसङ्गात् **नापि तन्मात्रेऽपि तल्लक्षणमिति** । अयमभिप्रायः— यथा विभ्रमे बहिरर्थाभावः, प्रतिभासेऽपि तथा स्वसंवेदनाभावोऽपि । तत्र परसन्तानस्य असतोऽपि प्रतिभासनात् तत्र सत्त्वे, अन्यत्र कः प्रद्वेषः इति

१० पेक्षा ] क्ष्य
१० योगः ] योगः सन्निकर्षः योग एव योगः । अथवा, यौगाभिमतः सन्निकर्षः प्रमाणं स्यादिति ।
११ न्निवे ] धान
१३ दाकारासान ] कारज्ञान
२२ स्या ] स्य
२७ श्च ] नीलादिप्रतिभासस्य असत्यता ।

विचारितम् । तर्हि प्रतिभासाविशेषात् बाध्यबाधकभावविरहात् जाग्रद्दशावत स्वप्नादावप्यर्थोऽस्ति इति चेत्; अत्राह--**सद्यपि** *विद्यमानेऽपि बाह्यार्थे **स्वप्नादौ कथं तदा** स्वप्नादिकाले **चित्तचैत्तानां प्रत्यक्षत्वं** प्रत्यक्षग्राह्यत्वम् ? **कथं च न स्यात्** ? इति परः पृच्छति । तं प्रत्युत्तरं **स्पष्टप्रतिभासाभावात् निरंशतत्त्वस्य** इति । हेत्वन्तरमाह--**तद्** इत्यादि । **तस्य** विपरीतारोपस्य **व्यवच्छेदो**ऽभावः तस्या**निर्णयाच्च यतः** स्पष्टप्रतिभासात् तन्निर्णया [च] **सर्वे** /ms प्र० वा० ३ । ३९ *इत्यादि भवेत् । ततः सर्वदा निरंशज्ञानतत्त्वस्याप्रतिभासनाद् बहिरर्थस्य विपरीतस्य प्रतिभासनात् तावन्मात्रं सौगतस्य तत्त्वं प्रसक्तमिति भावः । § 4253

**यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता** इत्यत्र पुनरपि दूषणं दर्शयन्नाह—**षण्णां धियामित्यादि** । § 4254

...26 षण्णां धियां सकृद्भावे विवेकानुपलक्षणात् ।
सकृद्भावः प्रसज्येत सविकल्पमनोधियाम् ॥ २६ ॥ § 4256

शब्दादिष्वभिमतेषु युगपत्सन्निहितेषु तद्विज्ञानानां क्रमोत्पत्तौ प्रत्येकं पशुभिर्व्यवधानात् प्रत्येकं विच्छेदः प्रतीयेत । भावपक्षस्य [बलीयस्त्वादिति चेत्] स एव रसः...ततः...इति कल्पनायाम् तदन्यव्यवच्छेदव्यवसायात्मनां सविकल्पमनोऽक्षज्ञानानाम् तदविच्छेदप्रतीतौ सहभावः प्रसज्येत । तत्रैव हि विच्छेदानुपलक्षणं युक्तम् तदविशेषात् स्पष्टनिर्भासेऽपि ततः तदन्यव्यवच्छेदव्यवसायात्मनां च सहभावः प्रसज्येत । § 4257

तात्पर्यमिदमत्र यथाऽनन्तरः परस्य अभ्युपगमः तथा शब्दादिषु युगपत् सन्निहितेषु तथा षड्बुद्धयो जायन्त इति । तत्र **षण्णां** । कासां ? **धियाम्** रूपरसगन्धस्पर्शशब्दविकल्पज्ञानानां **भावे** । कदा ? **सकृत्** सह । कुतः तद्भावः ? इत्याह--**विवेकानुपलक्षणात्** विवेकस्य कर्कटीभक्षणादौ धिया 733/mkj कालविच्छेदस्य अनिश्चात् । एतद् दूषयन्नाह--**सकृद्भावः प्रसज्येत** । केषाम् ? **सविकल्पमनोधियाम्** । समर्थकारणबहुत्वाद् युगपत्कार्यबहुत्वमनिवार्यम्, तथा च **अश्वं विकल्पयतोऽपि गोदर्शनात्** इत्यादि विरुध्यते । § 4258

षण्णां धियां सकृद्भावे परकीयां युक्तिं दर्शयन्नाह--**शब्दादिषु** इत्यादि । शब्दः आदिर्येषां रूपादीनां तेषु । किंभूतेषु ? **अभिमतेषु** युगपत् सन्निहितेषु सत्सु **तद्विज्ञानानां** शब्दादिधियां **क्रमोत्पत्तौ** अङ्गीक्रियमाणायां **प्रत्येकम्**

---

२ त] त्
२ *] सत्यपि
७ *] सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थितेः । स्वभावपरभावाभ्यां यस्मात् व्याव‍ृत्तिभागिनः ॥--प्र० वा० ।
१० येदेनां] विकल्पबुद्धिम् ।
१० त्रैवास्य] निर्विकल्पस्य ।

एकमेकं प्रति **विच्छेदः प्रतीयेत** युगपच्छब्दादिप्रतीतिर्न स्यात् । कुतः ? इत्याह--**प्रत्येकं पञ्चभिर्व्यवधानात्** । § 4259

नैयायिकमतमाशङ्कते सौगतः **भावपक्षस्य** इत्यादि । तत्र दूषणमाह--**स एव रस** इत्यादि । **तत** इत्याद्युपसं[हारः] । § 4260

संप्रत्याचार्यः कारिकां विवृण्वन्नाह--**इति** इत्यादि । **इति** एवं **कल्पनायां** /ms **सहभावः प्रसज्येत** । केषाम् ? इत्याह--**सविकल्प** इत्यादि । **सविकल्पमनश्च अक्षज्ञानानि च** तेषाम् । पुनरपि केषाम् ? इत्याह--**तदन्यव्यवच्छेद** इत्यादि । [अन्यस्य]अन्यतो वा व्यवच्छेदः, तेषां तज्ज्ञानानाम् अन्यव्यवच्छेदः **तदन्यव्यवच्छेदः** तस्य **व्यवसायो** निर्णय **आत्मा** एवभावो यासां तासां च संविदाम् इति पदघटना, मनोविकल्पानाम् इत्यर्थः । कस्मिन् सति ? इत्याह— **तदविच्छेदप्रतीतौ** तेषां सविकल्पमनोऽक्षज्ञानानामविच्छेदप्रतीतिर्या तस्यां सत्याम् । नहि तदन्यव्यवच्छेदव्यवसायात्मसंविदामभावे तदविच्छेदप्रतीतिः । किं ताभिः कर्त्तव्यम् तज्ज्ञानैरेव तत्प्रतीतिसद्भावादिति चेत्; अत्राह--**तत्रैव हि** इत्यादि । **तत्रैव** तास्वेव व्यवसायात्मकसंवित्तिषु सतीपु हिर्यस्माद् **विच्छेदस्य** अन्यतो व्यावृत्तेरनुपलक्षणं **युक्तम्** न पुनरविकल्पज्ञानेषु सत्सु । कुतः ? इत्याह--**तद्** इत्यादि । **तेषां** न विकल्पज्ञानानां स्वापादिना**ऽविशेषात्** । § 4261

ननु[यतः]स्पष्टनिर्भासाऽन्यविकल्पज्ञानानि इति, [त]त एव तदुपलक्षणमिति चेत्; अत्राह— **स्पष्टनिर्भासेऽपि** इत्यादि । ततः **तदन्यवच्छेदव्यवसायात्मनां च सहभावः प्रसज्येत** इति । § 4262

स्यान्मतम्--षण्णां धियाम् अनन्तरमेकं सविकल्पमनोज्ञानं तदव्यवसायि जायते, ततोऽयमदोष इति; तन्न; अनेकान्तप्रसङ्गादिति प्रतिपादितम् । § 4263

एतदेव दर्शयन्नाह--**स्पष्टस्य** इत्यादि । § 4264

...27 स्पष्टस्यालातचक्रादेर्विभ्रमस्यापि वीक्षणात् ।
स्वलक्षणोपलब्धीनां नैकक्षणिकदर्शनम् ॥ २७
||§ 4266

प्रतिक्षणं निरंशक्षणिकपरमाणुषु प्रत्यक्षेषु परस्परासम्प्लवे कुतश्चक्रभ्रान्तिः ? सा च भवन्ती कथमनेकान्तसिद्धिर्न भवेत् तदुपलम्भानुपलम्भयोर्विरोधात् । § 4267

भिन्नप्रक्रमः **अपिशब्दः**, ततो न केवलम् अन्तरेकविकल्पविभ्रमस्य /ms अपि तु **स्पष्टस्यापि अलातचक्रादेः विभ्रमस्य वीक्षणात्** अनेकान्तसिद्धिः इत्युपस्कारः । § 4268

---

९ एव] स्व
१३ त] सविकल्पमनोऽक्षज्ञानैरेव ।
२१ व्य] तदध्य

734/mkj

ननु प्रतिपरमाणु प्रतिक्षणं संविदां भेदात् नैकंचित्रम् अलातचक्रज्ञानमिति चेत्; अत्राह— **स्वलक्षणोपलब्धीनाम्** इत्यादि । **नैकक्षणिकपरमाणुदर्शनं** विभ्रमः अति[प्रसङ्गात्] । § 4269

**प्रतिक्षणम्** इत्यादिना[कारि]कार्थमाह--क्षणं क्षणं प्रति **प्रतिक्षणम्** । केषु ? **निरंशक्षणिकपरमाणुषु** प्रत्येकम् एकं परमाणुं प्रति **प्रत्यक्षेषु** दर्शनेषु **परस्परासंप्लवे** एव चित्रज्ञानाभावे **कुतः चक्रभ्रान्तिः** न एकैकानुदर्शनं चक्षुदर्शनं नाम इति भावः । **सा च** चक्रभ्रान्ति**र्भवन्ती** जायमाना **कथम् अनेकान्तसिद्धिः** अनेकान्तप्रतीतिर्न **भवेत्** ? भवेदेव । अथ अपरदेशोपसर्पिणाम् अलातक्षणानाम् अन्योऽन्यविवेकानुपलम्भेऽपि सर्वसाधारणभासुरतामात्रदर्शनात् चक्रभ्रान्तिरिति; तत्राह--**तदुपलम्भ** इत्यादि । तेषाम् अलातस्वलक्षणानां भासुरतामात्रेण य **उपलम्भः** यश्च परस्परविवेक[रू]पेण **अनुपलम्भः** तयोः **विरोधात्** एकस्य दृश्येतरताप्राप्तेः अनेकान्तसिद्धिरिति । § 4270

न केवलम् अनन्तरविधिना अनेकान्तसाधनम्, अपि तु तदन्तरेणापि इति दर्शयन्नाह— **प्रत्यक्षात्** इत्यादि । § 4271

...28 प्रत्यक्षाच्चानुमेयादेः अन्येऽर्था मदगोचराः ।
इत्यागमाविसंवादि ज्ञानं स्याद्वादशंसनम् ॥ २८
॥§ 4273

परिगणितप्रमाणवृत्तिनिवृत्त्योः अर्थतत्त्वासिद्धिः अनेकान्तमपेक्षते । प्रत्यक्षं तत्र... § 4274

**प्रत्यक्षा[त्]** प्रत्यक्षप्रमितादर्थात् **स्याद्वादस्य** स्यादस्ति इत्यादि शासनस्य **शंसनं** । तदनंतरदनुकूलत्वात्तस्य । तथा **अनुमेयादेश्च** अनुमानगम्यम् **अनुमेयं** प्रतिक्षणपरिणामादिकम् **आदिर्यस्य** चित्तादिगोचरस्य स तथोक्तः तस्माच्च **स्याद्वादशंसनम्** । **अन्ये** प्रत्यक्षानुमेयादिबहिर्भूता **अर्थाः** । किं भूताः ? **मदगोचराः** अस्मादृशां दर्शनाविषयाः केवलं योगिगम्याः सन्ति वेद्यन्त /ms
**इति** एवम् **आगमाद्** यद् **अविसंवादिज्ञानं** धर्मादिविषयं तदपि तच्छंसनमिति । किं बहुना उक्तेन, उन्मि[षि]तमपि अनेकान्तमन्तरेण नास्तीति । § 4275

कारिकां व्याख्यातुमाह--**परिगणित** इत्यादि । सौगतादिभिः यानि **परिगणितानि प्रमाणानि तेषां या वृत्तिः** विधिसाधनाय प्रवृत्तिः या च कुतश्चित्

६ एव] एक
६ एकैका] एकैकस्य आरस्य चक्रभागस्य ।
६ नु] काकार
६ क्षु] चक्र
९ ण] ण
२० नु] तदनु
२३ वेद्य] सन्ति विद्य
२५ उ] चक्षुष उन्मीलनमपि ।

निषेध्यान्निवृत्तिः तयोः **अर्थस्य** चेतनेतररूपस्य **तत्त्वं** विधिप्रतिषेधात्मकत्वं तस्य **सिद्धिः अनेकान्तमपेक्षते** प्रत्यक्षं *वृत्तेः अर्थतत्त्वसिद्धिः । तदपेक्षां कथयन्नाह--**प्रत्यक्षम्** इत्यादि । कुतः ? इत्याह— **तत्र** इत्यादि । **तत्र** प्रत्यक्षे इत्यर्थः । § 4276

**तथाहि** इत्यादिना तदेव दर्शयति । § 4277

तथाहि— § 4278

...29 अविकल्पमसत्कल्पमज्ञेयं स्वलक्षणम् ।
अवाच्यं केवलं नेति तथा च प्रतिपादितम् ॥ २९
॥§ 4280

735/mkj

चित्तानां स्वरूपस्य कथन्न स्वतः सिद्धिः ? अव्यवसायात्मकत्वात्, तादृशां परतश्च न । न च नित्यस्य कादाचित्कदर्शनं युक्तम्, तद्दर्शनस्य परिणामाविनाभावात् । नापि...तद्विषयं प्रत्यक्षमव्यवसायात्मकमिति परकल्पनमनुभवविरुद्धम्; तद्भ्रान्तिविरोधात् । सर्वत्र...विरोध...तदात्मकं तत्त्वम् एकान्त... § 4281

**अविकल्पं प्रत्यक्षम्** इत्यनुवर्त्तते । तत्किंभूतम् ? इत्याह--**असत्कल्पम्** अस्ति इति कल्पनारहितमेतद् अर्थभेदाभेदैकान्तार्थग्राहकं विकल्पकम् । ततः किम् ? इत्याह--**स्वलक्षणमज्ञेयम्** । केवलमवाच्यं तत् इति चेत्; अत्राह--**अवाच्यं केवलम् इति** एवं नेत्येव युक्तम्, न केवलमत्रैव उक्तम् अपि तु अन्यत्रापि इति दर्शयन्नाह--**तथा च [प्रतिपादितम्]** । § 4282

किं **प्रतिपादितम्** ? इत्यत्राह--**स्वरूपस्य** इत्यादि । **स्वरूपस्य** आत्मनः **स्वतः सिद्धिः चित्तानां** निरंशसंवेदनानां **न कथं** न । कुतः ? इत्यत्राह--**अव्यवसायात्मकः [कत्वात्]** तेषां व्यवसायस्वभावस्याभावात् । परतः स्यादिति चेत्; अत्राह--**परतश्च** ज्ञानान्तरा न पि *तथा न, **तादृशां** निरंशानां
/ms प्रतिभासाभावादिति भावः । भेदैकान्तस्यापि प्रतिभासो नास्तीति दर्शयन्नाह--**न च** इत्यादि । नैव **नित्यस्य** आत्मादेः **कादाचित्कदर्शनं युक्तम्** । कुतः ? इत्याह--**तद्** इत्यादि । **तस्य दर्शनस्य परिणामाविनाभावात्** । परिणामः तस्य स्यादिति चेत्; अत्राह--**नापि** इत्यादि । § 4283

ननु विचारयतोऽपि तदेकान्तविषयं निर्णयाध्यक्षं न निवर्त्तत इति चेत्; अत्राह--**तद्** इत्यादि । स तदेकान्तो विषयो यस्य **तत्तद्विषयम्** । किम् ? **प्रत्यक्षम्** । किंभूतम् ? इत्याह— **अव्यवसायात्मकम् इति** एव पर-

२ *] क्ष
१६ त्] स्वलक्षणम् ।
१७ यु] वमु
२२ *] रादपि
२९ एव] वं

**कल्पनमनुभवविरुद्धम्,** अनेकान्तस्य अनुभवे प्रतिभासनात् । भ्रान्तिरियमिति चेत्; अत्राह--**तद्** इत्यादि । तस्य अनेकान्तप्रतिभासस्य **भ्रान्तिविरोधात्** । अर्थैकान्तवद् अनेकान्तस्यापि अप्रतिभासनात् समानं चोद्यमिति चेत्; अत्राह--**सर्वत्र** इत्यादि । भवतु तत्प्रतिपत्तिः, तथापि विरोधान्न युक्तमिति चेत्; अत्राह--**विरोध** इत्यादि । ततः किम् ? इत्याह--**तदात्मकम्** अनेकान्तात्मकं **तत्त्वम्** । कुतः ? इत्याह--**एकान्त** इत्यादि । § 4284

तत्त्वमवाच्यमिति चेत्; अत्राह--**कथंचिद्** इत्यादि । § 4285

...30 कथञ्चिदिष्टं तत्त्वस्यावाच्यत्वं न सर्वथा ।
विज्ञप्तिमात्रे का कस्योक्तिश्चार्थक्रियास्थितिः ॥ ३० ॥§ 4287

आस्तां तावत्... § 4288

**कथंचित्** सकृत् अस्तित्वादितिधर्मप्रतिपादनप्रकारेण **अवाच्यं तत्त्वस्य इष्टम्** । सर्वथाऽवाच्यमिति चेत्; अत्राह--**सर्वथा** इत्यादि । वाच्यं तर्हि तत्त्वमिति चेत्; अत्राह--**विज्ञप्तिमात्रे** इत्यादि । निरंशज्ञानमात्रे नैरात्म्ये **च का कस्य** पदा र्थस्य **उक्तिः** ? सर्वस्यास्य विचार्यमाणस्यायोगात् इति 736/mkj
भावः । दूषणान्तरमाह--**का अर्थक्रिया** इत्यादि । सर्वत्र तदेकान्ते **का** न काचिद**र्थक्रियायाः** कारकज्ञापक[रूपायाः] **स्थितिः** । § 4289

कारिकां व्याचष्टे--**आस्तां तावत्** इत्यादिना । सर्वं सुगमम् । § 4290 /ms

एवं शब्दस्वरूपं निरूप्य अधुना तदाश्रितनयात् दर्शयितुम् अन्त्यवृत्तमाह--**भेदैः** इत्यादि । § 4291

...31 भेदैः शब्दार्थभेदं नयन् स वाच्यः कारकादिस्वभावैः,

---

४ त] अनेकान्तप्रतिपत्तिः ।
११ अस्तित्वादिति] त्वादि
११ अवाच्यं] च्यत्वं
२० श] इच्छ+इ विसेसियतरं पच्चुप्पण्णो ण+ओ सद्दो ।--अनु॰ ४ द्वा॰ । आ॰ नि॰ गा॰ ७५७ । विशेषा॰ गा॰ २७१८ । लिङ्गसंख्यासाधनादिव्यभिचारनिवृत्तिपरः शब्दः ।--स॰ सि॰ १ । ३३ । कालकारकलिङ्गानां भेदाच्छब्दोऽर्थभेदकृत् । अभिरूढस्तु पर्यायैरित्थम्भूतः क्रियाश्रयः ॥--लघी॰ श्लो॰ ४४ । शब्दपृष्ठतोऽर्थग्रहणप्रवणः शब्दनयः, लिङ्गसंख्याकालकारकपुरुषोपग्रहव्यभिचारनिवृत्तिपरत्वात् ।(?")--धवलाटी॰ सत्प्ररू॰ । त॰ श्लो॰ पृ॰ २७२ । नयवि॰ श्लो॰ ८४ । न्यायकुमु॰ पृ॰ ६३९ । प्रमेयक॰ पृ॰ ६७८ । सन्मति॰ टी॰ पृ॰ ३१२ । नयचक्रगा॰ ४० । तत्त्वार्थसा॰ पृ॰ १०७ । प्र॰ नय॰ ७ । ३२, ३३ । स्या॰ म॰ पृ॰ ३१३ । जैनतर्कभा॰ पृ॰ २२ ।

अभिरूढोऽस्तु नयोऽभिरूढिविषयः पर्यायशब्दार्थभित्
।
इत्थम्भूतनयः क्रियार्थवचनः स्यात्कारमुद्राङ्कितः ।
तत्प्रमितोंऽशः कथंचन पृथगिति संविदुः तत्त्वदर्शिनः
॥ ३१ ॥§ 4295

**भेदैः** विशेषैः **शब्दस्य अर्थः** व्यञ्जनपर्यायः तस्य **भेदं** नानात्वं **नयन्** तत्प्रतिपत्तत् प्रायत् **वाच्यः** कथनीयः । किंभूतैः भेदैः ? इत्याह--**कारक** इत्यादि । अभिरूढं दर्शन्नाह--**अभिरूढिविषयोऽभिरूढनयः** इत्यर्थः । किंभूतः ? इत्याह--**पर्याय** इत्यादि । **पर्यायैः शब्दार्थभित्** । इत्थंभूतं क-
737/mkj थ[य]न्नाह--**इ[त्थम्]भूत[ः]वाच्यः** । किंभूतः ? इत्याह--**क्रियार्थवचनः** एतेषां क्रमेण उदाहरणानि न य प्र वे श क प्र क र णा दवगन्तव्यानि । को वयः को वाऽन्यः ? इत्याह--**स्यात्कार** इत्यादि । परो दुर्णय इति गम्यते । **तत्प्रमितः** तेन सम्यङ्नयेन प्रमितः **अर्थांशः कथंचन** न सर्वात्मना स्वारारात् **पृथक् इत्येवं तत्त्वदर्शिनः** तीर्थकरादयः **संविदुः** । § 4296

---

१ अ] वत्थू+ओ संकमणं हो+इ अवत्थून+ए समभिरूढे ।--अनु० ४ द्वा० । आ० नि० गा० ७५८ । विशेषा० गा० २७२७ । सत्स्वर्थेष्वसंक्रमः समभिरूढः--तत्त्वार्थाधि० भा० १ । ३५ । नानार्थसमभिरोहणात् समभिरूढः ।--स० सि० १ । ३३ । अथवा यो यत्राभिरूढः स तत्र समेत्य आभिमुख्येनारोहणात् समभिरूढः ।--त० वा० १ । ३३ । समभिरूढः एवं मत्त्वैकीभावेन आभिमुख्ये एक एव रूपादिरर्थ एवेति या ज्ञाना [[?]] समभिरूढः ।--नयचक्रवृ० प० ४८३ ख । पर्यायशब्दभेदेन भिन्नार्थस्याधिरोहणात् । नयः समभिरूढः स्यात् पूर्ववच्चास्य निश्चयः ॥--त० श्लो० पृ० २७३ । नयवि० श्लो० ९२ । प्रमेयक० पृ० ६८० । सन्मति० टी० ३१३ । नयच० गा० ४१ । तत्त्वार्थसा० पृ० १०७ । प्र० नय० ७ । ३६ । स्या० म० पृ० ३१४ । जैनतर्कभा० पृ० २२ ।
२ इ] वंजण अत्थ तदुभयं एवंभू+ओ विसेसे+इ--अनु० ४ द्वार । आ० नि० गा० ७५८ । विशेषा० गा० २७४३ । व्यञ्जनार्थयोरेवम्भूतः ।--तत्त्वार्थाधि० भा० १ । ३३ । योनात्मना भूतः तेनैवाध्यवसाययति इत्येवम्भूतः अथवा येनात्मना येन ज्ञानेन भूतः परिणतः तेनैव अध्यवसाययति ।--स० सि० १ । ३५ । धवलाटी० सत्प्र० पृ० ९० । जयध० पृ० २९ । तत्क्रियापरिणामोऽर्थः तथैवेति विनिश्चयात् । एवम्भूतेन नीयेत क्रियान्तरपराङ्मुखः ॥--त० श्लो० पृ० २७४ । नयवि० श्लो० ९४ । प्रमेयक० पृ० ६८० । सन्मति० टी० पृ० ३१४ । नयचक्र० गा० ४३ । तत्त्वार्थसा० पृ० १०७ । प्र० नय० ७ । ४० । स्या० म० पृ० ३१५ । जैनतर्कभा० पृ० २३ ।
३ र्शिनः] ?
५ त्] पत्तिं प्रापयन्
६ इ] कारकादिस्वभावैः ।
९ न] लघीयस्त्रयान्तर्गतनयप्रवेशकप्रकरणात् ।
१० यः] नयः
१० इ] मुद्राङ्कितः इति शेषः ।
१२ स्वारा] स्वाधा

इति सि द्धि वि नि श्च य टीकायाम न न्त वी र्य विरचितायां शब्दनयसिद्धिः एकादशमः प्रस्तावः ॥ छ ॥ § 4297

# द्वादशमः प्रस्तावः : १२ निक्षेपसिद्धिः

738/mkj

नयानन्तरं तत्फलत्वान्निक्षेपान् दर्शयितुं मुखवृत्तमाह--**निक्षेपोऽनन्तकल्प** इत्यादि । § 4298

...1 *निक्षेपोऽनन्तकल्पश्चतुरवरविधः प्रस्तुतव्याक्रियार्थः,
तत्त्वार्थज्ञानहेतुर्द्वयनयविषयः संशयच्छेदकारी ।
शब्दार्थप्रत्ययाङ्कं विरचयति यतस्तद्यथाशक्ति भेदम्,
वाच्यानां वाचकेषु श्रुतविषयविकल्पोपलब्धेस्ततः सः
॥ १ ॥ § 4302

धर्मिणि क्वचिद् धर्माणां नयाधिगतानां निक्षेपणं योजनम् अध्यारोपणं **निक्षेपः** । स कतिविधः ? इत्याह--**अनन्तकल्पः** अनन्तभेदः तद्विषयानन्त्यात्; कथमन्यत्र चतुर्विधो निक्षेप उक्तः ? इत्याह--**चतुरवरविधः** चत्वारो नाम-स्थापनाद्रव्यभावलक्षणैः अवर वान्तररूपा विधा भेदो यस्य स तथोक्तः । सः किंप्रयोजनः ? इत्याह--**प्रस्तुतव्याक्रियार्थः** । प्रस्तावगतं वस्तु **प्रस्तुतं** तस्य /ms

३ *] विस्तरेण लक्षणतो विधानतश्चाधिगमार्थं न्यासो निक्षेपः ।--तत्त्वार्थाधि० भा० १ । ५ । णिच्छ+ए णिण्ण+ए खिवदि त्ति णिक्खेवो ।--धवला टी० सत्प्ररू० ।
३ व्याक्रियार्थः] सः किमर्थः ? अप्रकृतनिराकरणाय प्रकृतनिरूपणाय च ।--स० सि० १ । ५ । लघी० स्ववृ० श्लो० ७६ । अथ किमिति निक्षेपः क्रियते इति चेत्; उच्यते— त्रिविधाः श्रोतारः अव्युत्पन्नः अवगताशेषविवक्षितपदार्थः एकदेशतोऽवगतविवक्षितपदार्थ इति । तत्र प्रथमोऽव्युत्पन्नाध्यवस्यतीति विवक्षितपदस्यार्थम् । द्वितीयः संशेते कोऽर्थोऽस्य पदस्याधिकृत इति, प्रकृतार्थादन्यमर्थमादाय विपर्यस्यति वा । द्वितीयवत्तृतीयोऽपि संशेते विपर्यस्यति वा । तत्र यद्यव्युत्पन्नः पर्यायार्थिको भवेन्निक्षेपः; अव्युत्पन्नव्युत्पादनमुखेन अप्रकृतनिराकरणाय । अथ द्रव्यार्थिकः; तद्द्वारेण प्रकृतनिरूपणाय अशेषनिक्षेपा उच्यन्ते व्यतिरेकधर्मनिर्णयमन्तरेण विधिनिर्णयानुपपत्तेः । द्वितीयतृतीययोः संशयविनाशायाशेषनिक्षेपकथनम् । तयोरेव विपर्यस्यतोः प्रकृतार्थावधारणार्थं निक्षेपः क्रियते । उक्तं हि— अवगयणिवारणट्ठं पयदस्स परूवणाणिमित्तं च । संसयविणासणट्ठं तच्चत्थवधारणट्ठं च ॥--धवला टी० सत्प्ररू० पृ० ३० ।
८ ल्पः] जत्थ य जं जाणेज्जा निक्खेवं निक्खिवे निरवसेसं । जत्थ वि अ न जाणेज्जा च+उक्कगं निक्खिवे तत्थ ॥--अनु० सू० ८ ।
९ त्र] तत्त्वार्थसूत्रादौ ।
९ उक्तः] नामस्थापनाद्रव्यभावतस्तन्न्यासः ।— त० सू० १ । ४ ।
१० र] रा अ

विशेषेण अनिष्टनिवृत्त्यादिलक्षणेन **आ** समन्तात् **करणं** व्युत्पादनं **व्याक्रिया** तस्मै तदर्थः । कुतः ? इत्याह--**तत्त्वार्थज्ञानहेतुः** यतः तत्त्वार्था जीवादयः तेषां ज्ञानं तस्य हेतुः कारणम् । नहि शब्दादिनिक्षेपमन्तरेण शब्दादिभ्योऽर्थप्रतीतिः । स किं कारणः ? इत्याह--**द्वयनयविषयः** नन्यत्रभावः--द्वयोपलक्षितान्न-या[त्] द्रव्यार्थिकपर्यायार्थिकरूपादिन्यतो न भवति किन्तु तत एव इति तद्विषय इत्युच्यते । न केवलं त[त्त्वार्थ]ज्ञानहेतुरेव, अपि तु**संशयच्छेद-कारी** विपर्ययादिव्यवेच्छेदोपलक्षणमेतत् । पूर्वेण तत्त्वार्थज्ञानहेतुता अनेन
739/mkj समारोपव्यवच्छेदहेतुता उक्ता इति विभागः । त[ज्]**ज्ञानहेतुः** कुतः ? इत्याह--**शब्दार्थप्रत्ययाङ्गम्** इति **शब्दान्** कारणाद् **अर्थस्य** घटादेर्ग्राहकः यः **प्रत्ययः** तस्**याङ्गं** निमित्तम् । एतदपि कुतः ? इत्याह--**विरचयति यतः** । कम् ? **भेदम्** । कथम् ? **यथाशक्ति** । केषाम् ? **वाच्यानाम्** अभिधेयानाम् । क्व ? **वाचकेषु** । यत एवं **ततः** प्रतिपत्तुः पुरुषस्य **श्रुतविषयविकल्पोपपब्धेः** उपयोगं निक्षेप इति । § 4303

अस्यानिबन्धनस्थानादर्थानादाय व्युत्पादयन्नाह--**न्यास** इत्यादि । § 4304

...2 न्यासः समासतो नामस्थापनाद्रव्यभावतः ।
व्यासतोऽङ्गप्रविष्टाङ्गबहिःश्रुतविकल्पकः ॥ २ ॥§ 4306

यस्य कस्यचित् अनिर्दिष्टविशेषस्य निमित्तान्तरानपेक्षं संज्ञाकर्म नाम । *व्यस्तसमस्तैकानेकजीवाजीवविषयतोपपत्तेः । *निमित्तान्तरं पुनः जातिः द्र-व्यं गुणः क्रिया । *स्थापना सद्भावासद्भावभेदेन । तत्र...। किमनयेति सौग-तः, सोऽयं घोटकारूढोऽपि विस्मृतघोटको जातः । अतोऽन्या असद्भाव-

४ त्र] अयमत्र
५ रूपादि] द
९ नु] त्
१४ अस्यानि] अस्मान्नि[[निबन्धनस्थानं मूलसूत्रमिति यावत् ।]]
१७ नाम] नाम संज्ञाकर्म इत्यनर्थान्तरम्--तत्त्वार्थाधि॰ भा॰ १ । ५ । अतद्गुणे वस्तुनि संव्यवहारार्थं पुरुषकारान्नियुज्यमानं संज्ञाकर्म नाम ।--स॰ सि॰ १ । ५ । त॰ वा॰, त॰ श्लो॰ १ । ५ । विशेषा॰ गा॰ ६५ । जैनतर्कभा॰ पृ॰ २५ । बृहत्कल्पभा॰ गा॰ ११ ।
१८ *] तुलना— किञ्चिद्धि प्रतीतमेकजीवनाम यथा डित्थ इति, किञ्चिदनेकजीवनाम यथा यूथ इति, किञ्चिदेकाजीवनाम यथा घट इति, किञ्चिदनेकाजीवनाम यथा प्रासाद इति, किञ्चिदेकजीव-एकाजीवनाम यथा प्रतीहार इति, किञ्चिदेकजीवानेकाजीवनाम यथा काहार इति, किञ्चिदेकाजीव-अनेकजीवनाम यथा मन्दुरेति, किञ्चिदनेकजीवाजीवनाम यथा नगरमिति प्रतिविपयमवान्तरभेदाद् बहुधा भिद्यते संव्यवहाराय नाम लोके ।--त॰ श्लो॰ पृ॰ ९८ ।
१८ *] तुलना--नाम्नो वक्तुरभिप्रायो निमित्तं कथितं समम् । तस्मादन्यत्तु जात्यादि निमित्तान्तरमिष्यते ॥--त॰ श्लो॰ पृ॰ ९९ ।
१९ *] यः काष्ठपुस्तचित्रकर्माक्षनिक्षेपादिषु स्थाप्यते जीव इति स्थापनाजीवः । देवताप्रतिकृतिवद् इन्द्रो रुद्रः स्कन्द विष्णुरिति ।--तत्त्वार्थाधि॰ भा॰ १ । ५ । काष्ठपुस्तचित्रकर्माक्षनिक्षेपादिषु सोऽयमिति स्थाप्यमाना स्थापना ।--स॰ सि॰ १ । ५

स्थापना । विवक्षितासाम्प्रतिकपर्यायविशेषस्थितिर्द्रव्यनिक्षेपः । आगम...। तथैवोपयोगपरिणामलक्षणो भावनिक्षेप इति । स व्यासतोऽनन्तविकल्पः तद्भेद...चेतनेतर...सकल... § 4307

**न्यासो** निक्षेपः **समासतः** संक्षेपेण **नामस्थापनाद्रव्यभावतः** एतानाश्रित्य भवति इति **व्यासतो** विस्तारतः **अङ्गप्रविष्ट-अङ्गबहिःश्रुतविकल्पकः** । आ 740/mkj चा रा दी नि **अङ्गानि** तेषु **प्रविष्टं** तदन्तर्भूतम् । यच्छ्रुतम् **अङ्गेभ्यो बहिः श्रुतं** तस्य **विकल्पा** भेदा यस्य स तथोक्तः । § 4308

कारिकां व्याचष्टे--**यस्य** इत्यादिना । **यस्य कस्यचित्** चेतनस्य इत- /ms रस्य वा **अनिर्दिष्टविशेषस्य संज्ञाकर्म** । किम् ? **नाम** । किंभूतम् ? इत्याह--**निमित्तान्तरानपेक्षम्** यस्य तत्कर्म क्रियते तत्तस्य निमित्तं त-तोऽन्यज्ज्ञात्यादिकं तदन्तरम्, तस्मिन् अनपेक्षा यस्य तत्तथोक्तम् । तस्य नाम्नो भेदं दर्शयन्नाह--**व्यस्त** इत्यादि । अश्व चो दाहार्य नाम इति सम्बन्धः । कुतः ? इत्याह--**व्यस्तश्च समस्तश्च एकश्च अनेकश्च** ते एव **जीवाः** ते **विषयो** यस्य तत्तथोक्तम् तस्य भावः तत्ता तस्याः **उपपत्तेः** । तथा [व्य]स्त-जीवविषयतोपपत्तेः, अयं मांसपिण्डो देवदत्तः अयं देवदत्त इत्यादिवत् । समस्तजीवविषयतोपपत्तेः, एते सर्वे गर्गादय इत्यादिवत् । एकजीवविष-यतोपपत्तेः, नाभेयः पुरुदेव इत्यादिवत् । अनेकजीवविषयतोपपत्तेः अयं डित्थः अयं डवित्थः अयं जिनदत्त इति चत्वारो जीवभेदाः । तथा व्य-स्ताऽजीवविषयतोपपत्तेः **सजैनेन्द्र**° १ । ३ । २ **नुत्य** जैनेन्द्र° ४ । ४ । ४ **क्वच** जैनेन्द्र° ५ । २ । १४२इत्यादि । समस्ताजीवविषयतोपपत्तेः **भूवादयो धुः** जैनेन्द्र° १ । २ । १ इत्यादिवत् । एकाजीवविषयतोपपत्तेः आकाशं कालो धर्मः अधर्म इत्यादिवत् । अनेकाजीवविषयतोपपत्तेः **तौ सत्** जैनेन्द्र° २ । २ । १०५ इतिवत् । एतेऽपि चत्वारो विकल्पाः । किं

। जं पुण तयत्थसुण्णं तयब्भिपा+एण तारिसागारं । कीर+इ व णिरागारं इत्तरमियरं व सा ठवणा ॥--विशेषा° गा° २६ । सब्भावमसब्भावे ठवणा पुण इदंकेदुमा+ईया । इत्तरमणित्तरा या ठवणा णामं तु आवकहं ॥--बृहत्क° भा° गा° १३ । सद्भावस्थापनया नियमः, असद्भावेन वाऽतद्रूपेति स्थूणेन्द्रवत् ।--नयचक्रवृ° लि° पृ° ३८१ । जैनतर्कभा° पृ° २५ । आहिदणामगस्स अण्णस्स सोयमिदि ट्ठवणं ठवणा णाम । सा दुविहा सब्धावासब्भावट्ठवणा चेदि । तत्थ आगारवंत+ए वत्थुम्मि सब्भावट्ठवणा तव्विवरीया असब्भावट्ठवणा ।--धवलाटी° सत्प्ररू° । त° श्लो° पृ° १११ ।

१ निक्षेपः] अनागतपरिणामविशेषं प्रति गृहीताभिमुख्यं द्रव्यम्, अतद्भवं वा ।--त° वा° १ । ५ । त° श्लो° पृ° १११ । बृहत्क° भा° १४ । विशेषा° गा° २८ । जैनतर्कभा° पृ° २५ । आ° नि° मलय° पृ° ६ ।

२ भा] वर्तमानतत्पर्यायोपलक्षितं द्रव्यं भावः ।--स° सि°, त° वा° १ । ५ । त° श्लो° पृ° ११३ । बृहत्क° भा° गा° १५ । आ° नि° मलय° पृ° ९ ।

१० त] नाम क्रियते ।

११ ज्ञा] त् जा

११ त] निमित्तान्तरम् ।

१२ चो] अतश्चचो

१२ दाहार्य] र्यं

१३ जीवाः] जीवाजीवाः

१४ यो] या

१९ स] सः

१९ नुत्य] नु वा

२० च] क्वचि

२३ ल्पाः] अजीवस्य ।

पुनः निमित्तान्तरं यदनपेक्षं तदुच्यते ? इत्याह--**निमित्तान्तरं पुनः** इत्यादि । गौः इत्येवमादौ **जातिः** । दण्डी इत्येवमादौ **द्रव्यम्** । शुक्लः पटः इत्यादौ **गुणः** । पाचकः इत्यादौ **क्रिया** । जत्यादिद्वारेण अन्यत्र शब्दवृत्तेः । § 4309

/ms ननु जात्यादौ वर्त्तमानः शब्दो यदि निमित्तान्तरमपेक्षते; अनवस्था । श्च * तत्र वर्त्तते; अन्यत्रापि तथैव वर्त्ततां किमन्यनिमित्तवृत्तिकल्पनया इति चेत्; न; उभयथापि शाब्दव्यवहारस्य दर्शनात् । एवं चोदयतापि प्र ज्ञा क रे ण प्रत्यक्षज्ञानग्राह्यतापेक्षया बहिरर्थे प्रत्यक्षव्यपदेशः क्रियते, नान्यथा अतिप्रसङ्गात् । अत एव अक्षाश्रितत्वोपलक्षितवैशद्यापेक्षया ज्ञानेषु प्रत्यक्षव्यपदेशः **तदंशः** हेतुबि० पृ० ५३ ।इत्यत्र धर्मे अंशशब्दः न किंचिद-पेक्ष्य क्रियते । यदि च, **शब्दा सङ्केतितं प्राहुः** प्र० वा० ३ । ९१ स च सङ्केतो व्यवहारिजनायत्तः, व्यवहारिण एव जानन्ति किं तत्र भवतः प्र-यासेन ? तदनुसारिणा केवलं भवता भाव्यं [व्य]वहारे अत्यक्षादिचिन्तापि दूरोत्सारिता स्यात् यदि भवदनुसारिणो व्यवहारिणः, ते च शाब्द उभयथा दृश्यन्ते इति यत्किंचिदेतत् । § 4310

स्यादेतत् जात्यादिद्वारेण विशेषे शब्दनिक्षेपः किन्नामा स्यात् ? स्थाप-नानामा इति, अन्यशब्दस्य अन्यत्रारोपाद् अर्हच्छब्दस्य असद्भावस्थापनावत् । अत एव नामानन्तरं स्थापनानिर्देशः । § 4311

741/mkj

नामानन्तरं स्थापनाभेदमाह--**स्थापना** इत्यादिना । कुतः ? इत्याह--**सद्भाव** इत्यादि । **सद्भावस्थापना** व्याचष्टे **तत्र** इत्यादिना । किमनया प्रयोजनम् अन्य यात्तितया इति सौगतः; सोऽयं **घोटकारूढोऽपि विस्मृत-घोटको जातः** । स्वयं बहिरर्थसदृशे ज्ञाने *तद्व्यवहारप्रवर्त्तनात् । असद्भाव-स्थापनामाह--**अतोऽन्या** इत्यादिना । विकल्पाकारे अर्थसदृशे अर्थव्यवहारं प्रवर्त्तयन् यदि मामनर्थिकां ब्रूयात् तथैव परिहर्त्तव्यः । § 4312

/ms द्रव्यनिक्षेपमाह--**द्रव्य** इत्यादिना । कः ? इत्याह-- **विवक्षितश्चासौ असाम्प्रतिको**ऽनागतः **पर्यायविशेषश्च** तत्र **स्थितिर्यस्य** स तथोक्तः । § 4313

दृश्ये प्राप्यसमारोपं कुर्वन् प्रत्यक्षमानता ।
निमित्तं द्रव्यनिक्षेपं कः क्षेप्तुं क्षमते जनः ॥§ 4315

तद्भेदमाह--**आगम** इत्यादिना । § 4316

भावनिक्षेपमाह--**तथोपयोग** इत्यादिना । **तथैव** विवक्षितप्रकारेणैव **उप-योगो** व्यापारः **परिणामो लक्षणं** यस्य स तथोक्तः **आगमनो+आगमप्रभेदः**

---

२ जातिः] गोत्वजातिः ।
२ म्] दण्डद्रव्यम् ।
३ क्रिया] पचनक्रिया ।
५ *] स्वतः
९ इ] तदंशो ही तद्धर्म एव ।--हेतुबि० ।
१२ अत्य] अध्य
१९ ना] नां
२० यात्ति] थाप्ति
२१ *] अर्थव्यवहार ।
२३ दि] स्थापनाम् ।
२६ न्] प्रत्यक्षप्रमाणता ।

इति अनुवर्त्तते **भावनिक्षेप** इति । किं चत्वार एव भेदा निक्षेपस्य ? न, इत्यादि**स** निक्षेपो **व्यासतोऽनन्तविकल्पः** प्रतिपत्तव्यः । कुतः ? इत्याह--**तद्भेद** इत्यादि यतः । एतदपि कुतः ? इत्याह--**चेतनेतर** इत्यादि । पुनरपि कुतः ? इत्याह--**सकल** इत्यादि । § 4317

एतदेव अनन्तरं दर्शयन्नाह--**भाव** इत्यादि । § 4318

...3 भावः पर्यायार्थिकस्य शेषा द्रव्यार्थिकास्त्रयः ।
प्रस्तुतव्याक्रियार्थः क्रियन्ते[तत्त्वदर्शिभिः] ॥ ३
॥§ 4320

पर्यायमात्रं,...तथा द्रव्यार्थिकस्य प्रत्येतव्यः नाम...सर्वथा शुद्धस्य अशुद्धस्य च द्रव्यस्यैवोपलब्धिः । § 4321

**भावः** भावनिक्षेपः **[पर्यायार्थिकस्य] शेषा** निक्षेपाः **द्रव्यार्थिक क्रियन्ते** । [कति ?] इत्याह--**त्रयः** । कुतस्तेऽभ्युपगम्यते ? इत्याह--**प्रस्तुत** इत्यादि । § 4322

कारिकां विवृण्वन्नाह--**पर्यायमात्रम्** इत्यादि । राजपथीकृतमेतदनेकधा । **तथा** तेन प्रकारेण **द्रव्यार्थिकस्य प्रत्येतव्ये**निक्षेपः । कुतः ? इत्याह--**नाम** इत्यादि । नहि पर्यायमात्रे तत्संभवः । न खलु द्रव्यमस्ति, अनुपलब्धेः खरविषाणवत्, तत्कथं तद्वान् नयः, यस्य नामादिनिक्षेपः स्यादिति चेत्; अत्राह--**सर्वथा** इत्यादि । सर्वेण प्रत्यक्षानुमानप्रकारेण बहिरन्तःप्रकारेण भ्रान्तेतरप्रत्ययाकारणे**द्रव्यस्यैव** उपलब्धिः । किंभूतस्य ? इत्याह— **शुद्धस्य** निर्विशेषणस्य **अशुद्धस्य** सविशेषण[स्य] । § 4323 /ms

तदुपलब्धिं दर्शयन्नाह--**अविकल्प** इत्यादि । § 4324
742/mkj

...4 अविकल्प्य स्वमन्यस्मात् सत्तामात्रमचेतनात् ।
पश्यन् विजानाति द्रव्यादि मतिभेदैर्विकल्पयन् ॥ ४
॥§ 4326

---

२ इत्यादि] त्याह--
६ भा] नामं ठवणा दवि+ए त्ति एस दव्वट्ठियस्स निक्खेवो । भावो उ पज्जवट्ठि+अस्स परूवणा एस परमत्थो ॥--सन्मति° १ । ६ ।
१० व्यार्थिक] काः
११ ते] न्ते
१४ व्ये] व्यः
१६ थं] द्रव्यार्थिकः ।
१८ णे] कारेण
२० ल्प] ल्प्य

स्वस्मात्...स्वप्नादौ विशेषविप्लवेऽपि सन्मात्रे विप्लवमपश्यतां शुद्धद्रव्यग्रहः । ज्ञाने अर्थवति सकृत् स्वार्थस्वभावप्रकाशनभ्रान्तिरपि स्यात् । भ्रान्तिज्ञानं पुनः...तन्न तथा अवग्रहादिभिः विकल्पयन् अवश्यं स्वपरस्वभावविवेकी । तन्न...सर्वथा । § 4327

**अविकल्पा***विच्छिद्य । किम् ? इत्याह--**स्वम्** आत्मानम् । कुतः ? इत्याह--**अन्यस्मात्** । किंभूतात् ? इत्याह--**अचेतन** इत्यादि, सस्मान्मद् **अविकल्पे** * ति च द्रष्टव्यम् । **सत्तामात्रं पश्यन्** दर्शनेन विषयीकुर्वन् **आत्मा शुद्धस्य** इति दर्शितम् । तथाहि--यस्य विशेषस्य यद्ग्रहणं तत् तत्सामान्यग्रहणपूर्वकं यथा स्थाणुपुरुषत्वविशेषावायद्व[य]ग्रहणं तदूर्ध्वतासामान्यग्रहणपूर्वकम्, सामान्यविशेषग्रहणं च अवग्रहज्ञानम्, ततः तदपि तत्सामान्यग्रहणपूर्वकम् । न च सत्तातोऽपरं सामान्यम्, यतोऽनवस्था स्यात् । नापि तद्ग्रहणं विशेषग्रहणम्; यतो हेतोर्व्यभिचारः । सः पश्यन् किं करोति ? [इति] आह--**विजानाति द्रव्यादि** विशिष्टं द्रव्यं जानाति । कैः ? इत्याह--**मतिभेदैरेव** *ग्रहादिभिः । किं कुर्वन् ? **विकल्पयन्** व्यवस्यन् । अनेन **अशुद्धस्य** इति कथितम् । § 4328

**स्वस्मादि**[त्या] दि ना कारिकार्थमाह । ननु विषस्याग्रहणे कथं द्रव्यस्य ग्रहणं तयोर्भेदप्रसङ्गादिति चेत्; अत्राह--**विप्लवेऽपि** इत्यादि । **स्वप्नादौ** आदिशब्देन तैमिरिकादिदशापरिग्रहः, तत्र, यो **विशेषेषु** स्वशरीरादिकृस्टत्वादिभेदेषु **विप्लवः** अन्यथाग्रहः तस्मिन्नपि, न केवलमविप्लवे साति सिद्धः । कः ? इत्याह--**शुद्धद्रव्यग्रहः** । केषाम् ? इत्याह--**विप्लवमपश्यताम्** । क्षेत्याह--**सन्मात्रे** इति । एतदुक्तं भवति--यथा स्थौल्यादिग्रहणविप्लवे स्वशरीरादिकाद्यग्रहणे षुतणत् तथा विशेषाग्रहणेऽपि सन्मात्रग्रहणमिति । § 4329

/ms ननु स्वप्नादौ यद्यर्थग्रहणं कथं विप्लवसंभवः यतः तन्निरासार्थं प्रमाणलक्षणप्रणयनमिति चेत् ? अत्राह--**ज्ञाने** । किंभूते ? **अर्थवति** । **सकृ**देकहेलया । **स्वार्थयोः स्वार्थस्य** वा **स्वभावाः** कार्श्यादयः **तेषा प्रकाशनं** तस्य **भ्रान्तिरपि** न केवलम् अभ्रान्तिः **स्यात्** । तथाहि--अरिष्टे बाहुस्थौल्यदर्शिनः तत्कार्श्यमपश्यन्तोऽपि बाहुं पश्यन्ति, तददर्शने वा नारिष्टदर्शनं विपरीतदर्शनाभावात्, मदीयोऽयं बाहुः अविसंवादश्च न स्यादिति । शेषं चिन्तितमत्र । § 4330

भवत्वेवं[त]तः किम् ? इत्याह--**भ्रान्तिज्ञानम्** इत्यादि । स्वप्नेत्यादिविप्लवज्ञानं **पुनः** । शेषं पूर्वं व्याख्यातम् । उपसंहरन्नाह--**तन्न** इत्यादि । **तथा** तेन भ्रान्तिज्ञानप्रकारेण **अवग्रहादिभिः विकल्पयन् वा** अवस्यन् **नावश्यं स्व-**

५ *] प्य अ
७ द्] तस्मात्, यत्
७ *] प्य इ
१४ *] रव
१६ स्या] विशेषस्या
१७ त] विशेप-द्रव्ययोः ।
१९ रीरादिकृस्ट] कृश
२० साति] सति
२१ क्षे] क्व ? इ
२२ रीरादिकाद्य] र्श्याऽ
२२ त्] ?

**परस्वभावविवेकी** । **तन्न** इत्यादि अत्रोपसंहारः । कुतः ? इत्याह--**सर्वथा** इत्यादि । § 4331

743/mkj

पश्यन् स्वलक्षणमेव पश्यतीति चेत्; अत्राह--**स्वतश्च** इत्यादि । § 4332

...5 स्वतश्च कार्यतोऽर्थानां संवित्तिः सम्प्रतीयते ।
द्रव्यात्मनां वाऽशुद्धानां शुद्धानां न चान्यथा ॥ ५
॥§ 4334

न हि...प्रत्येयम् । बहिरन्तश्च...कथम् ? § 4335

**स्वतः** स्वरूपेण **कार्यतः** फलरूपेण **च अर्थानां संवित्तिः** संवेदनं सम्बन्धि **संप्रतीयते** । किंभूतानाम् ? इत्याह--**द्रव्यात्मनाम्** द्रव्यस्वभावानाम् । पुनरपि किंभूतानाम् ? **अशुद्धानां शुद्धानां वा नच** नैव **अन्यथा** अन्यथात्मनां संवित्तिः **संप्रतीयते** । अनेन स्वभावकार्योपलब्धि दर्शयति । § 4336

**नहि** इत्यादिना **न चान्यथा** इति व्याचष्टे, **प्रत्येयम्** इति पर्यन्तेन । शेषं विवृण्वन्नाह--**बहिरन्तश्च** इत्यादि । § 4337

**कथमिति** प्रश्ने; **अवीक्ष्य** इत्यादि उत्तरम् । § 4338

...6 अवीक्ष्य पारिमण्डल्यं स्थूलाकृतीक्षणात् ।
तथा क्षणक्षयं वार्थं वीक्षेरन् द्रव्यतत्त्वतः ॥ ६
॥§ 4340

पुद्गलानां पारिमण्डल्यादिभेदान् पश्यन्त एव तत्सामान्यमेकं स्थूलं स्वभावं प्रतिक्षणं पश्यन्ति । प्रत्यक्षबुद्धौ [तथा प्रतिभासनात्] तदतिक्रमे तथा तत्क्षणक्षयादिविशेषमदृष्ट्वैव उभयत्र द्रव्यतत्त्वं पश्यन्त्येव अविशेषात् । § 4341

**अवीक्ष्य** । किम् ? **पारिमण्डल्यं** रूपम् । कुतः ? इत्याहा--**स्थूलाकृतीक्षणात्** कारणात् **तथा क्षणक्षयं वा**[ऽ]वीक्ष्य तत एव किं /ms
वीक्षेरन् ? इत्याह— **अर्थं वीक्षेरन्** । केन ? इत्याह--**द्रव्यतत्त्वतो** द्रव्यरूपेण । § 4342

कारिकां विवृण्वन्नाह--**पुद्गलानाम्** इत्यादि । **पुद्गलानां** परमाणुरूपाणां **पारिमण्डल्यादिभेदान् पश्यन्त एव** जनाः । किं कुर्वन्ति ? **पश्यन्ति** । किम् ? इत्याह--**तद्**इत्यादि । तेषां पुद्गलानां **सामान्यमेकं स्थूलं स्वभावे** । कदा

९ अ] विपरीतस्वरूपाणाम् ।
१० ब्धि] ब्धिं
१९ इत्याहा] ह
२० त] स्थूलाकृतीक्षणादेव ।
२५ भावे] वम्

? इत्याह--**प्रतिक्षणम्** । कुतः ? इत्याह--**प्रत्यक्षबुद्धौ** इत्यादि । तदपि कुतः ? इत्याह--**तदतिक्रम** इत्यादि । **तस्य** तथाप्रतिभासस्य **अतिक्रम** इत्यर्थः । **तथा** तेन प्रकारेण **तेषां क्षणक्षयादिविशेषमदृष्टैव द्रव्यतत्त्वं पश्यन्त्येव** । क्व ? इत्याह--**उभयत्र** बहिरन्तश्च । कुतः ? **अविशेषात्** । § 4343

स्यान्मतम्, तत्सामान्यैकस्थूलस्वभावस्य घनादितद् बहिरन्तश्च भ्रान्तत्वेनायोगात्, अतोऽन्यदेवाद्वयं ज्ञानतत्त्वमिति; तत्राह--**विज्ञानम्** इत्यादि । § 4344

...7 विज्ञानं ग्राह्यनिर्भासवैकल्यात्मानमात्मनः ।
संविदत्स्वं कथञ्चिच्चेदात्मानं द्रव्यसाधनम् ॥ ७
॥§ 4346

744/mkj

ज्ञानं ग्राह्याकारविविक्तमात्मस्वभावमननुभवत् सत्ताद्याकरमात्मनोऽनुभवत् पर्यायैकान्तकल्पनामस्तंगमयेत् क्षणक्षयादि[प्रतिभासाभावात्] । तत एव स्वभावनैरात्म्यं प्रतिपद्यमानः स्वामेव वृत्तिं स्ववाचा विडम्बयति आप्तागमविलोपात् । प्रमाणमन्तरेण तदभावप्रतिपत्तौ भावप्रतिपत्तिरेव किन्न स्यादिति यत्किञ्चिदेतत्, प्रस्तुतेतरकथनात् । § 4347

**विज्ञानं द्रव्यसाधनम्** । किंकुर्वत् ? इत्याह--**संविदत्** । किम् ? इत्याह— **ग्राह्यनिर्भासवैकल्यात्मानं** ग्राह्यो निर्भासो ग्राह्याकारः तस्य वैकल्यम् अभावः तदेव आत्मा स्वभावः तम् । कस्य ? इत्याह--**आत्मनः** । पुनरपि किंकुर्वत् ? इत्याह--**कथंचित्** सचेतनादिप्रकारेण **स्वम् आत्मानं संविदत्** । एवं मन्यते--तत्सामान्यैकस्थूलस्वभावो बहिरिव ज्ञानस्यापि यदि नास्ति, ज्ञानं तर्हि ततः तत्त्वतो भिन्नम्, तद्भेदं च आत्मनो यदि जानाति; तदेव न तद्भ्रान्तिः । नहि नीलज्ञानं पीताद्भिन्नम् आत्मानं प्रतिपद्यमानं तत्र भ्रान्तम् । अथ तत्स्वभावं पश्यति, स्वं च ततो भिन्नं ततोऽयमदोषः; निराकारदर्शनम्, **नान्योऽनुभाव्यो बुद्ध्यास्ति** प्र० वा० २ । ३२७ इत्यादि
/ms विरोधश्च । असत इव सतोऽपि भिन्नस्य वेदनसंभवाद् बहिरर्थसिद्धिः । तत्र च विभ्रमे; तत्र विभागप्रसाधनात् । अथ ततो विवेकमात्मनो नावैति; अनेकान्तसिद्धिरिति । § 4348

कारिकार्थमुपदिशति **ज्ञानम्** इत्यादिना । **ज्ञानम्** आत्मनः स्वभावम् । किंभूतम् ? **ग्राह्याकारविविक्तम् अननुभवत् सत्यताद्याकारमात्मनोऽनुभ-**

१ इ] तथा प्रतिभासनात् इति ।
३ दृष्टैव] ष्टैव
५ द्] व[[यथा दूरविरलतरुषु एकं वनमिति प्रत्ययो भ्रान्त्या भवति, यथा वा एकं घनं सघनमिति वा प्रत्ययः ।]]नादिवत्
२१ आ] स्वस्वरूपम् ।
२५ नावैति] इति चेत् ।
२८ ता] सत्ता

वत् । किं कुर्यात् ? इत्याह--**पर्यायैकान्त** इत्यादि । इतश्च **तत्कल्पनामस्तु गमयेत्;** इत्याह--**क्षणक्षयादि** । इत्यादि । तर्हि ग्राह्याकारविविक्तंस्वभावमिव सत्ताद्याकारमपि आत्मनो नानुभवति इति शून्यवादी; तत्राह--**तत एव** इत्यादि । **तत एव** अनन्तरन्यायात् **स्वभावनैरात्म्यं** सकलशून्यत्वं **प्रतिपद्यमानः** सौगतः **स्वामेव वृत्तिं** स्वचेष्टितं शून्यताद्यभ्युपगमलक्षणं **स्ववाचा विडम्बयति** वित्सारयति, तत्प्रतिपादकवचनाभ्युपगमे तदयोगात् । § 4349

न्यायान्तरं ज्ञातुं परः पृच्छति । **कथमितं ?** तं प्रत्युत्तरमाह--**आप्तागम** इत्यादि । तद्विलोपः तत्त्वत इष्यते, संवृत्या तदभ्युपगमादिति चेत्; अत्राह--**प्रमाणमन्तरेण तदभावप्रतिपत्तौ** तेषाम् आप्तादीनाम् अभावसंवित्तौ अङ्गीक्रियमाणायां **भावप्रतिपत्तिरेव** आत्मादीनां **किन्न स्यात्** भवेदेव**[इति] यत्किञ्चिदेतत्** न किंचिदेतत् परमतम् । कुतः ? इत्याह— **प्रस्तुतेरत** इत्यादि । § 4350

(?[)एतदन्यत्रातिदिशन्नाह--**शब्द इत्यादि** । § 4351

...8 शब्दनिर्णययोरन्यापोहैकान्तसमाश्रयः ।
प्रतिपन्नः सौगतेन प्रतिव्यूढोऽनया दिशा ॥ ८ ॥§ 4353

745/mkj

न हि...पुनः...एतदपि तादृगेव । शब्दो निर्णयो वा तत्त्वाप्रत्यायनात् किं कुर्वाणोऽन्यापोहं करोति ? प्रतिपत्रभिप्रायानुसरणेऽपि यथा अन्यापोहोऽर्थः, तथैव स्वार्थप्रत्यायनमविशेषात् । अन्यथा-- § 4354

**शब्द**निर्ण[य]योः सम्बन्धी यः । कः ? इत्याह--**अन्यापोहैकान्तसमाश्रयः** । किंभूतः ? **प्रतिपन्नः सौगतेन** अङ्गीकृतः । स किम् ? इत्याह--**प्रतिव्यूढो** निरस्तः । केन ? इत्याह--**अनया दिशा स्वामेव वृत्तिंस्ववाचा** इत्यादिना मार्गेण । § 4355 /ms

कारिकार्थं स्पष्टयति **नहि** इत्यादिना । गतार्थमेतत् । सविकल्पं तत्साधयतीति चेत्; अत्राह--**पुररित्यादोतदपि तादृगेव** । § 4356

ननु यद्यपि निर्विषयो विकल्पः, तथापि अन्यापोहकरणात् व्यवहारोपयोगी इति चेत्; अत्राह--**किं कुर्वाण** इत्यादि । **किं कुर्वाणः** न किंचित्कुर्वन्

---

२ ग] स्तङ्ग
२ इ] प्रतिभासाभावात् ।
२ विविक्तं] क्त
६ त] शकलशून्यताऽयोगात्, वचनस्य सद्भावस्वीकारात् ।
७ मितं] ति
८ त] आप्तागमविलोपः ।
११ त] प्रस्तुतेतर
१२ इ] कथनात् इति ।
२१ इ] पृ॰ ७४४ ।
२४ पुर] पुन
२४ रित्यादो] दि । ए

**शब्दो निर्णयो वा अन्यापोहं करोति** इत्युच्यते । एवं मन्यते--यदि सः तत्त्वं विषयीकरोति; तदैत भूत्वमन्यतोऽस्मात् चाक्याद्यावृत्तमिति प्रतिपद्यमानः अन्यापोहं करोति इत्युच्यते अन्यथा वचनमात्रकमिति । तदाह--**तत्त्वाप्रत्यायनादिति** । § 4357

ननु परमार्थतोऽन्यापोहकरोऽप्यसौ न भवति, केवलं प्रतिपत्रभिप्रायवशादेवमुच्यते इति चेत्; अत्राह--**प्रतिपत्रभिप्राय** इत्यादि । शब्दादे[र्व]स्तुनो नित्यादिव्यावृत्तिरेव अनित्यादिशब्दनिर्णयाभ्यां क्रियते, न वस्तु विधिरूपतया विषयीक्रियते इति यः **प्रतिपत्तृणामभिप्रायः** तस्या**नुसरणेऽपि यथा अन्यापोहः** शब्दनिर्णययोर**र्थः तथैव स्वार्थप्रत्यायनं** तदभिप्रायस्य तत्राप्य**विशेषात्** । युक्तिवाधनमुभयत्र । § 4358

तदनङ्गीकरणदूषणमाह--**अन्यथा** इत्यादि । एवं मन्यते--अन्यापोहः पर्युदासरूपः, प्रसज्यरूपो वा स्यात् ? प्रथमपक्षे तयोर्वस्तुविषयत्वम् । अन्यत्र; **अन्यथा** इत्यादि दूषणमिति । § 4359

तदाह--**निर्विकल्पात्** इत्यादिना । § 4360

...9 निर्विकल्पात् कुतः सिद्धिः ? सिद्धिश्चेन्निर्णयात्मिका ।
सविकल्पात् कुतः सिद्धिः ? तत्त्वं चेन्नास्य गोचरः ॥
९ ॥§ 4362

जीवे अजीवे वा पर्यायतत्त्वं निक्षिपन् सौगतो न प्रत्यक्षतो निक्षेप्तुमर्हति, तद् [अनिर्णयात्मकत्वात्] समारोप[व्यवच्छेदकत्वाभावात्] अन्यथा [अतिप्रसङ्गात्] नापि विकल्पतः; तद्भावाविपयत्वात् विपक्षाविशेषाच्च । स्वलक्षणदर्शने प्रभवविकल्पस्यापि सर्वथा मिथ्यात्वात् कुत एव भावनिक्षेपः ? तदुपेक्षिततत्त्वार्थैः यथाविकल्पप्रतिभासनं निक्षेपकरणे द्रव्यनिक्षेपोऽपि किन्न स्यात् ? § 4363

746/mkj

/ms **निर्विकल्पात्** प्रत्यक्षात् **कुतो** नैव **सिद्धिः** तत्त्वप्रतिपत्तिः **सिद्धिश्चेद्** यदि **निर्णयात्मिका सविकल्पात् कुतः सिद्धिः तत्त्वं चेत्** तस्य**सविकल्पस्य गोचर** इति स्वापाविशेषप्रसङ्गः । § 4364

१ सः] शब्दो निर्णयो वा ।
२ मिति] तदा एतत्तत्त्वमन्यतः अन्यस्माद् वाक्याद् व्यावृत्तमिति
६ श] शब्दोऽनित्यः इत्यत्र ।
८ भिप्रायः] तेनान्यापोहविषयाः प्रोक्ताः सामान्यगोचराः । शब्दाश्च बुद्धयश्चैव वस्तुन्येषामसंभवात् ॥--अन्यापोहविषया आचार्येण प्रोक्ताः । अपोहः शब्दलिङ्गाभ्यां प्रतिपाद्यते इति ब्रुवता ।--प्र० वा०, मनोरथ० ३ । १३३ ।
११ ण] णे
१२ त] शब्दनिर्णययोः ।
१२ अ] प्रसज्यपक्षे ।
२४ स्य] नास्य

कारिकां विवृण्वन्नाह--**पर्यायतत्त्वम्** इत्यादि । **जीवे अजीवे वा पर्यायतत्त्वं निक्षिपन्** योजयन् **सौगतः न प्रत्यक्षतो निक्षेप्तुं योजयितुमर्हति** । कुतः ? इत्याह--**तद्** इत्यादि । **तद्** इत्यनेन प्रत्यक्षमविकल्पकं प्रत्यवमृशति । तदपि कुतः ? इत्याह--**समारोप** *इत्यादि । तदनभ्युपगमे दूषणमाह--**अन्यथा** *इत्यादि । **विकल्पतो** निक्षेप्तुमर्हति इति चेत्; अत्राह— **नापि** इत्यादि । कुतः ? इत्याह--**तद्भावाविषयत्वात्** पर्यायसत्ताऽगोचरत्वाद् विकल्पस्य । हेत्वन्तरमाह--**विपक्ष** इत्यादि । **विपक्षो** द्रव्यतत्त्वं तत्र **अविशेषाच्च** तस्य । अथ अनुमानविकल्पाद् वस्तुप्रतिबन्धेन प्रमाणम्, तन्निक्षेप्तुमर्हतीत्युच्यते; तत्राह--**[स्व]लक्षणदर्शन** इत्यादि । **स्वलक्षण**मात्रतत्त्वमिति **यद्दर्शनं** मतं तस्मिन् **स्वलक्षणदर्शने** अङ्गीक्रियमाणे **प्रभवविकल्पस्यापि** हेतुफलनिर्णयस्यापि न केवलं तादात्म्यनिर्णयस्य **सर्वथा मिथ्यात्वात् कुत एव भावनिक्षेपः** ? हेतुफलभावोऽपि विकल्पसाध्येनाविकल्पसाध्य इति मन्यते । § 4365

स्यान्मतम्--भवतु प्रभवविकल्पः सर्वथा मिथ्या, तथापि तत एव व्यवहारंभङ्गभयात् हेतुफलभावं प्रतिपाद्य अनुमानानुमेयव्यवहारं प्रतियन्ति सौगताः ततोऽनुमानविकल्पात् तन्निक्षेप इति; तत्राह--**तदुपेक्षित** इत्यादि । स क्षणस्थायी निरंशः **उपेक्षितो**ऽवज्ञातः **तत्त्वार्थो** यैः सौगतैः तैः **यथाविकल्पप्रतिभासनं** विकल्पप्रतिभासनानतिक्रमेण **निक्षेपकरणे द्रव्यनिक्षेपोऽपि किन्न स्यात्** ? तत्रापि कल्पनया हेतुफलभावस्य अनुमानादिव्यवहारनिमित्तस्य भावादिति भावः । § 4366 /ms

ननु परमार्थतो निरंशं प्रतिभासाद्वैततत्त्वम् अन्यत् सर्वं मिथ्या विकल्पबुद्धेरुपप्लवमात्रम्, तद्वशात् पर्यायतत्त्वनिक्षेप इति चेत्; अत्राह--**मिथ्या** इत्यादि । § 4367

...10 मिथ्याविकल्पनिक्षेपे संग्रहः संश्रितो वरम् ।
सन्तानान्तरमुत्सृज्य क्षणभङ्गमनन्वयम् ॥ १०
॥§ 4369

सर्वमेकात्मकं तत्त्वं केवलमविद्या आत्मनि विनिर्भासभेदादसतां जन्म दर्शयतीति एतावता सर्वं सुस्थितम् । नहि...भेदलक्षणं । स्वयं...न चापरम् । तदशक्यः...नहि व्यापारव्याहारादिनिर्भासज्ञानं स्वोपादानप्रकृतेर्भवितुमर्हति इति किं कारणान्तरकल्पनया ? मिथ्यैकान्त... § 4370

---

३ इ] अनिर्णयात्मकत्वात् ।
४ *] व्यवच्छेदकत्वाभावात् ।
५ *] अतिप्रसङ्गात् ।
५ इ] विकल्पतः ।
८ ल्पाद्] ल्पो
८ व] परम्परया ।
१२ साध्यै] ध्यो
१४ हारं] र
१८ त] द्रव्यनिक्षेपेऽपि ।
२१ शात्] अद्वैततत्त्वस्वीकारात् ।

**मिथ्याविकल्पेन निक्षेपे** पर्यायतत्त्वयोजने अभ्युपगम्यमाने **संग्रहसंसृतो *वरम्** । किं कृत्वा ? इत्याह--**क्षणभङ्गमुत्सृज्य** त्यक्त्वा । किंभूतम् ? 747/mkj **अनन्वयं** दृष्टान्तरहितम् । अथवा, द्रव्यानश्यति रहित **सन्तानान्तरं** च **उत्सृज्य** । § 4371

कारिकां व्याचष्टे **सर्वम्** इत्यादिना । नीलादिसुखादिनान **सर्वम् एकात्मकम्** एकस्वभावं तत्त्वं परमार्थरूपम् । कथं चित्रप्रतिभास इति चेत् ? अत्राह--**केवलम्** इत्यादि । **अविद्या क्वंर्त्तीदर्शयति** । किम् ? इत्याह--**जन्म्** इत्यादि । किंभूता[ना]म् ? **असताम्** । क्व ? इत्याह--**आत्मनि** । कुतः ? इत्याह--**निर्भासभेदात्त**द्भेदमाश्रित्य इत्येवम् **एतावता सर्वं सुस्थितम्** । स्यादेतत्, प्रतिभासभेदात् विरुद्धधर्माध्यासाच्च नानात्वमेव युक्तमिति कथं सर्वमेकात्मकमिति चेत् ? अत्राह--**नहि** इत्यादि **भेदलक्षण**पर्यन्तं सुगमम् । कुतः ? इत्याह **स्वयम्** इत्यादि । ततोऽन्यद्भेदलक्षणमिति चेत्; अत्राह--**न चापरम्** इत्यादि । प्रकृतं निगमयन्नाह— **तदशक्य** इत्यादि । § 4372

ननु माभूदन्वयः, तथापि अन्यथानुपपत्त्या सत्त्वादिकं क्षणभङ्गं साधयति /ms इति चेत्; अत्राह--**नहि** इत्यादि । सुगमम् । कथं सन्तानान्तरव्यसनं वादिनः प्रेक्षाकारितां व्याहन्ति इति चेत् ? अत्राह--**व्यापार** इत्यादि । **[व्यापारव्याहारादि] निर्भासज्ञानं स्वोपादानंप्रकृते**रविद्याप्रकृतेः **भवितुमर्हति इति** एवं हेतोर्वा **किं कारणान्तरस्य** सन्तानान्तरलक्षणस्य **कल्पनया ?** कुतः ? इत्याह--**मिथ्यैकान्त** इत्यादि । तत्सिद्धेः सन्तानान्तरसिद्धिरिति । § 4373

एवं संग्रहमयान् कुर्व[त]स्तन्निक्षेपमाह--**विद्या** इत्यादिना । § 4374

…11 विद्याविद्याविनिर्भासात् नित्यानित्यत्वसंभवात् ।
स्वार्थस्वरूपयोः सिद्धिः द्वयरूपेति नैगमः ॥ ११
॥§ 4376

साकल्येन नित्यक्षणिकैकान्तयोः ग्राह्यग्राहकबहिरन्तर्मुखप्रतिभास इति व्यवस्था । तत्र स्वसंविन्मात्रं नित्यं तावतः सर्वत्राविशेषात् । शेषं कादाचित्कम् । एतदुक्तं च-- § 4377

२ *] संग्रहः संश्रितो
३ हित] द्रव्यान्वयविरहितं
५ नीलादिसुखादिनान] ज्ञानं
७ क्वंर्त्तीं] कत्री
११ इत्यादि] नहि इति प्रारभ्य ।
१५ स] हेतुः ।
१८ दानं] न
२२ यान्] हनयात्

*अभिन्नः संविदात्मार्थः भाति भेदीव सः पुनः ।
प्रतिभासादिभेदे स्वापप्रबोधादौ न भिद्यते ॥ इति ।§ 4379

बोधाकारेण सर्वत्राविशेषोऽविप्रतिपत्तेः । तदभावे मिद्धादेरनुपपत्तेः अवस्थाचतुष्टयाभावस्तदवस्थ एव । तथा तदागन्तुभिः सुखादिनीलादिनिर्भासैः भेदिनीमिव वृत्तिमनुभघति । § 4380

**विद्या** तत्त्वज्ञानम् **अविद्या** विप्लवज्ञानं तयो**र्विनिर्भासात्** प्रतीतेः **नित्यानित्यत्वसंभवो** य एकत्र **तस्मात् स्वार्थस्वरूपयोः** स्वस्वरूपस्य अर्थस्वरूपस्य च **सिद्धिः** निष्पत्तिः निर्णीतिर्वा **द्वयरूपा** नित्यानित्यत्वस्वभावा **इत्येवं नैगमः** । § 4381

**साकल्येन** इत्यादिना कारिकां व्याचष्टे--**साकल्येन** अनवयवेन **नित्यक्षणिकैकान्तयोः** नित्यैकान्ते क्षणिकैकान्ते च अयं **ग्राह्याकारो** नीलादि- 748/mkj
स्थूलाद्याकारः अयं **ग्राहकाकारः** अयं **बहिर्मुखप्रतिभासः अयमन्तर्मुखप्रतिभासः** इत्येवं **व्यवस्था** स्थितिः । किं कृत्वा ? इत्याह— **तत्र** इत्यादि । **तत्र** तस्मित्तरन्याये सति **स्वसंविन्मात्रम्** स्वशब्देन परसंविदं निराचष्टे **नित्यं** कालान्तरस्थायि । कुतः ? इह **तावतः** स्वसंविन्मात्रस्य **सर्वत्र** स्वसन्तानसुखादौ **अविशेषात्** । **शेषं** सुखादि । किंभूतम् ? **कादाचित्कम्** अनित्यमेव । अन्य[त्रा]प्येतदुक्तमिति दर्शयन्नाह--**एतदुक्तं च** इत्यादि । कथमुक्तमिति चेत् ? उच्यते— **अभिन्नो**ऽखण्डः । कः ? इत्याह-- **संविदात्मा** स एवार्थः संवित्स्वभावो जीव इत्यर्थः । किमभिन्न एव ? न, इत्याह-- **भेदाव भाति** मनाक् भेदी प्रतिभातीत्यर्थः । कुतः ? इत्याह- /ms
-**प्रतिभासादिभेदेन** आदिशब्दात् प्रयोजनादिभेदो गृह्यते । कुतो[ऽ]भिन्नम् ? * इत्याह--**स** इत्यादि । [सःप्रतौ चतुरक्षरमितं स्थानं रिक्तमस्ति । संविदा]त्मार्थः **[पुनः] स्वापप्रबोधादौ** आदिशब्देन जन्ममरणादिपरिग्रहः, **न भिद्यते** सन्तानान्तरं नाना न भवति इति । एतदेव व्याचष्टे— **बोधाकारेण** चेतनारूपेण **सर्वत्र** स्वसुखादा**वविशेषो**[ऽ]भेदो ज्ञानस्य । कुतः ? इत्याह— **अविप्रतिपत्तेः** इत्यादि । तदपि कुतः ? इत्याह--**स्वाप** इत्यादि । ननु स्वापे ज्ञानं नास्त्येव इति चेत्; अत्राह--**तदभाव** [इप्रतौ अष्टाक्षरमितं स्थानं रिक्तं वर्तते ।त्यादि । तदभावे] ज्ञानस्य असति **मिद्धादेः अनुपपत्तेः** इति । **मिद्धो** निद्रा **आदिर्यस्य** मूर्च्छादिः तस्या**नुपपत्तेः** मरणोपपत्तेः **अवस्थाचतुष्टयाभावः तदवस्था एव** । पुनस्तत्रैव ज्ञानोदयात् नायं प्रसङ्ग इति चेत्; न; अहेतुकोदयायोगात् । जाग्रज्ज्ञानहेतुकत्वं निरस्तम्, चिरविनष्टस्य

७ अर्थं] अर्थ
१४ र] स्मिन् अनन्तर
१५ ष्टे] निराकरोति ।
१५ इह] एतत् ?
२० भेदा] दी
२२ *] न्नः ?
२४ रं] र वत्
३० स्थाच] जाग्रत्स्वप्नसुषुप्तिमरणलक्षणावस्थाचतुष्टय ।
३० स्था] स्थ
३० त्रैव] आत्मनि ।
३१ त्वं] प्रबोधज्ञानस्य ।
३१ स्य] जाग्रज्ज्ञानस्य ।

अकारणत्वात्, इतरथा अन्त्यचित्तं पुनः तत्रैव शरीरे चित्रकारणमिति न मरणं नाम इति । अथावेधकर्मवशात् देहान्तरे तदारम्भकमिष्यते; न; तद्व्यतिरेकेण कर्मणोऽभावात् । तदेव विशिष्टं कर्म इति चेत्; न; विशिष्टस्य * खरविषाणोवमस्य का विशिष्टता नाम ? स्वकाले सर्वस्यापि सत्त्वमिति न स्वप्नादिदर्शनम् अनर्थकहेतुकं स्यात् । तथाव्यवहाराभावात् स्यादिति चेत्; इतरत्र समानम् । तन्न स्वप्नादौ ज्ञानाभावः । § 4382

ननु कोऽयं मिद्धादिर्नाम ? ज्ञानाभावश्चेत्; स्वापाभावः । तदभाव-श्चेत्; विरुद्धो हेतुः इति चेत्; अनुपलक्षितज्ञानभावः इति प्रतिपादितम् । /ms तदस्तित्वं सुखेनाहं सुप्तः इति पुनर्विकल्पोदयात् **पुनर्विकल्पयन् किंचित्** प्र° वा° २ । १२५ इत्यादिवत् । तदनित्यातां दर्शयन्नाह--**तथा** इत्यादि । तेन स्वापप्रबोधादौ चैतन्यानतिशयप्रकारेण । तदित्यादि क्वचित् पाठः । तच्चैतन्यम् इत्यर्थः । **[आ]गन्तुभिः** कादाचित्कैः **सुखादिनीलादिनिर्भासैः** सुखादिभिः नीलादिनिर्भासैः तदनुभवे **भेदिनीमिव वृत्तिमनुभवति** ज्ञानमिति । § 4383

749/mkj

ततः किं सिद्धम् इत्याह--**यथा** इत्यादि । § 4384

...12 यथा चैतन्यभेदोऽयं भवेदागन्तुकैस्तथा ।
जातिभेदस्ततस्तत्त्वं पृथक् च नित्यात्मकम् ॥ १२ ॥ § 4386

चित्रसंविदः संभाव्यनिरंशस्वभावस्य सर्वथानुपलब्धौ निरुपाख्यतेव स्यात् अनवस्थाप्रसङ्गात् । न च तस्याः प्रतिपत्तिः प्रमाणाभावात् । तदेतेन सम्बन्धपरीक्षा प्रतिव्यूढा । कथं हि सम्बन्धाभावे बहिरन्तर्मुखादिप्रतिभासनियमः क्वचित् प्रतीयेत ? नहि...कुतः ग्राह्याद्याकारणां स्वभावभेदः तदेकत्वहानेः इति नामस्थापनाद्रव्यभेदात् निक्षेपस्तत्रैव । § 4387

**यथा चैतन्यस्य भेदोऽयं** नानात्वमिदं **भवेत्** । कैः ? इत्याह--**आगन्तुकैः** अनन्तरोक्तैः **तथा जातिभेदः** सत्ता[न]नानात्वं **ततः तत्त्वं** नित्यात्मकम् । संकरः स्यादिति चेत्; अत्राह--**पृथक्** परस्परं भिन्नं **च** अनेन **सर्वस्योभयरूपत्वे** प्र° वा° ३ । १८१ *इत्यादि निरस्तम् । § 4388

१ चित्र] चित्त
२ अथा] आवेधः संस्कारः ।
४ *] विनष्टस्य
४ म] पम
९ त] स्वापादौ ज्ञानसत्त्वम् ।
१० इ] किंचिदासीन्मे कल्पनेदृशी । यथा विकल्पावस्थाया ऊर्ध्वं पुनर्विकल्पयन् पुमान् आसीत् मे कल्पनेदृशीति वेत्ति ।(?')--प्र° वा° मनोरथ° ।
१० त] सिद्धमिति ।
२६ *] तद्विशेषनिराकृतेः । चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ॥ इति शेषः ।

कारिकां विवृण्वन्नाह--**चित्र** इत्यादि । ननु चित्रता एकस्याः संविदोऽपि नेष्यते **किं स्यात् सा चित्रतैकस्याम्** प्र॰ वा॰ २ । २१० *इत्यादि वचनात्, केवलं सा निरंशापि सांशेव भाति इति चेत्; अत्राह--**संभाव्य** इत्यादि । **संभाव्यः** संविदो यः **निरंशः स्वभावः तस्य सर्वथा** प्रत्यक्षानुमानप्रकारेण **अनुपलब्धौ** सत्य[म]नुपलब्धस्वभावस्य सभेदस्य तथा विरोधप्रकारेण संभावनायाम् **निरुपाख्यतैव** नैरात्म्यमेव **स्यात्** । कुतः ? इत्याह--**अनवस्थाप्रसङ्गात्** । क्वचित्तत्त्वे अवस्थितेरभावानुषङ्गात् **मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽप्यदोषः** प्र॰ वार्तिकाल॰ ३ । २११ इति वचनात् इष्यते एव तदिति चेत्; अत्राह--**न च** इत्यादि । नैव **तस्याः** निरुपाख्यतायाः **प्रतिपत्तिः** । कुतः ? इत्याह--**प्रमाणाभावात्** । स्वसंवेदनाध्यक्षं तत्र प्रमाणमित्येके । विवत्तदेकम् इत्यपरे । तथा च किं जातम् ? इत्याह— /ms **तदेतेन** इत्यादि । **तेन एतेन** संविद एकस्याः चित्रतापादनेन च **सं ब न्ध प री क्षा** सम्बन्धनिराक्रिया **ध र्म की र्ति** सम्बन्धिनी **प्रतिव्यूढा** । कुतः ? इत्याह--**कथं** हिर्यस्मात् **सम्बन्धाभावे बहिरन्तर्मुखादिप्रतिभासनियमो** ग्राह्यग्राहकसंवेदनाकाराणां नियमः नियतज्ञानायत्तता **क्वचित् प्रतीयेत ?** तादात्म्यान्नियम इति चेत्; अत्राह--**नहि** इत्यादि । **कुतः स्वभावभेदो ग्राह्याद्याकाराणाम्** । तथापि तादात्म्यैकान्ते दूषणमाह--**तदेकत्व** इत्यादि । **तत्त**स्मात् **एकत्वहानेः** कारणात् **इत्येवं निक्षेपः** । कुतः ? इत्याह--**तत्रैव** निगमनिक्षेप एव **नामस्थापनाद्रव्यभेदात्** । § 4389

व्यवहारनयनिक्षेपं दर्शयन्नाह-- § 4390
१750/mkj

...13 स्याच्चेतनादिनिक्षेपे व्यवहारैर्विना जगत् ।
सर्वथार्थक्रियाऽयोगो नित्यत्वे च क्षणक्षये ॥ १३
॥§ 4392

क्षणिकाक्षणिकयोः अन्योऽन्यापेक्षायां [व्यवहारः प्रवर्तते ।][1] § 4393

**स्याद्** भवेद् **व्यवहारैः विना जगत्** । कस्मिन् ? इत्याह--**नित्यत्वे क्षणक्षये च चेतनादिनिक्षेपे** क्रियमाणे । कुतः ? इत्याह--**सर्वथा** क्रमयौगपद्यप्रकारेण **अर्थक्रियाऽयोगो** नित्यत्वे क्षणक्षये च इति सम्बन्धः ।
§ 4394

---

१. व्यवहारः प्रवर्तते इति सम्बन्धः ।

---

२ *] न स्यात्तस्यां मतावपि । यदीदं स्वयमर्थेभ्यो रोचते तत्र के वयम् ॥ इति शेषः ।
११ म्] ?

१३ क्षा] एतन्नामकं प्रकरणं धर्मकीर्तिकृतम् । इयं प्रमेयकमलमार्तण्डे पृ७ ५०९ संपूर्णा समुद्धृता ।

कारिकार्थमुपदर्शयन्नाह--**क्षणिक** इत्यादि । कस्याम् ? इत्याह--**परस्पर** इत्यादि । **क्षणिकाक्षणिकयोः अन्योऽन्यापेक्षायां** सत्याम् । § 4395

कथं तर्हि व्यवहारनिक्षेपः प्रवर्त्तते ? इत्याह--**जीवादि** इत्यादि । § 4396

...14 जीवादिभेदमाश्रित्य तत्पर्यायांश्च निक्षिपन् ।
प्रसिद्धं हि व्यवहारस्य मिथ्यात्वं भेदसंश्रितम् ॥ १४ ॥ § 4398

द्रव्यपर्याययोर्भेदैकान्तमवलम्ब्यापि द्रव्यस्य पर्यायात्मता अङ्गीकर्त्तव्या । अन्यथा अभावाविशेषात् । तथा च किं पृथक् पर्यायकल्पनया ? तावता यतो व्यवहारसिद्धिः इति व्यवहारनयस्तथैव विनिक्षिपेत् । § 4399

**जीव आदिर्यस्य** पुद्गलादेः स तथोक्तः तस्य **भेदं** नानात्वम् **आश्रित्य तत्पर्यायांश्च** जीवादिपर्यायांश्च आश्रित्य **निक्षिपन्** जीवादीन्यपायेषु पर्यायान् /ms जीवादौ योजयन् **व्यवहारः प्रवर्त्तते** इत्युपस्कारः । कुतः ? इत्याह--**प्रसिद्धंहि** यस्मात् **मिथ्यात्वं व्यवहारस्य भेदसंश्रितं** द्रव्यपर्यायनानात्वाश्रितम् । § 4400

कारिकार्थं कथयति **द्रव्यादिना** । **द्रव्यपर्याययोः भेदैकान्तमवलम्ब्यापि** वैशेषिकादिभिः **द्रव्यस्य** आत्मादेः **पर्यात्मता** अपरापरकार्योत्पादकापरसामर्थ्यपरिणामात्मता **अङ्गीकर्त्तव्या** । कुतः ? इत्याह--**अन्यथा** इत्यादि । **अन्यथा** तदनङ्गीकरणप्रकारेण **अभावाविशेषात्** शशविषाणाद्यविशेषात् द्रव्यस्य सा अङ्गीकर्त्तव्या इति । तदङ्गीकरणमस्तु इति चेत्; अत्राह--**तथा च** तदङ्गीकरणप्रकारेण च **किं पृथक् पर्यायकल्पनया** ? कुतः ? इत्याह— **तावता** तत्सामर्थ्यपरिणाममात्रेण **व्यवहारसिद्धिर्यतः इति** एवं **व्यवहारनयः** । **तथैव** तनैव प्रकारेण **विनिक्षेपे** द्रव्यपर्यायान् इत्यध्याहारः । § 4401

शब्दादिनयानां निक्षेपं दर्शयन्नाह--**काल** इत्यादि । व्याख्यातार्थमेतत् । § 4402

751/mkj

---

१० पा] न् पर्या
१४ ति] व्येत्या
२१ विनिक्षेपे] विनिक्षिपेत्
२२ काल] तुलना--कालकारकलिङ्गानां भेदाच्छब्दोऽर्थभेदकृत् । अभिरूढस्तु पर्यायैरित्थम्भूतः क्रियाश्रयः ॥ ४४ ॥ कालभेदात् तावदभूत् भवति भविष्यति इति, कारकभेदात् करोति क्रियते इत्यादि, लिङ्गभेदात् देवदत्तो देवदत्ता इति, तथा पर्यायभेदात् इन्द्रः शक्रः पुरन्दर इति तथैतौ शब्दसमभिरूढौ । क्रियाश्रय एवम्भूतः, कुर्वत एव कारकत्वम् ।--लघी॰ स्ववृ॰ श्लो॰ ४४ ।

...15 काल... ... ...।
... ... ...॥ १५ ॥§ 4404

न केवलम् । लिङ्गभेदाद् वस्तुस्वभावभेदे धिषणा...न केवलं लिङ्ग...यथा इन्द्रः । इत्थम्भूतस्य...तदेवम्...

**न केवलम्** इत्यादिना कारिकार्थमाह । **लिङ्गभेदाद् वस्तुस्वभावभेदे** उदाहरणमाह— **धिषणा** इत्यादि । § 4405

समभिरूढं दर्शयति । **न केवलं लिङ्ग** इत्यादिना । **यथा इन्द्रः** इत्यादि निदर्शनम् अत्रैव । **इत्थम्भूतस्य** इत्यादिना । शास्त्रार्थमुपसंहरन्नाह--**तदेवम्** इत्यादि । § 4406

शास्त्रान्ते मङ्गलमाह--**जीयात्** इत्यादि । § 4407

...16 जीयात्... ... ...
... ... ...
... ... ...
... ... ...॥ १६ ॥§ 4411

इति सि द्धि वि नि श्च य टी का याम् अ न न्त वी र्य विरचितायां निक्षेपसिद्धिः द्वादशमः प्रस्तावः समाप्तमिति ॥ छ ॥ § 4412

[स मा प्तो ऽ यं ग्र न्थः] § 4413

६ इत्यादि ] उदाहरणम् ।
१४ मिति ] प्त इति

752/mkj

# दातुः लेखकस्य च प्रशस्तिः

/ms ...1 श्रौतोज्जृम्भितबोधनिष्ठुर नखैः मिथ्येभकुम्भस्थलम्,
ध्वस्तं येन तुकोद्भवोद्भवमृगो दृष्टिस्त्वनैस्त्रासितः ।
यश्चानुव्रतभूरिबन्धुरसटाटोपैरलं भ्राजितः,
राजत्येष कवीन्द्रसंस्तुतगुणः श्री शा न्ति कण्ठीरवः ॥ १
॥§ 4417

...2 पात्रेष्वेव करोति दत्तिमतुलां सत्यं विवेकाद्यदि,
स्वान्ताकल्पितगोचरां बहुतरां छायेद्धकल्पद्रुमः ।
हित्वानेककुपात्रदत्तिमहितां स्वैरं स्वयं सर्वथा,
प्राप्नोत्येव तदोपमां जननुतां श्री शा न्ति भव्यात्मनः ॥ २
॥§ 4421

...3 यो गोत्रोन्नतबन्धुकैरववने संपूर्णचन्द्रायते,
स्वस्वान्तमशुद्धिशीतलकराक्रान्तौ कृतात्मा वरः ।
यस्य प्रोर्जितभूरिकीर्त्तिजलधौ डिण्डीरपिण्डायते ।
मध्यीभूतमिदं जगत्त्रयमसौ शा न्ति गुणी भ्राजताम् ॥ ३
॥§ 4425

...4 तेनाणुव्रतधारिणा गुणभृता भव्यात्मना शा न्ति ना,
भाष्यं सि द्धि वि नि श्च यस्य विशदं संलेखयित्वा परम् ।
निर्वाणोन्नतमारकूटशिखरं सोपानमारोहताम् ।
संदत्तं गणि ना ग दे व यमिने स्याद्वादविद्याविदे ॥ ४ ॥§ 4429

मंगलमही श्री । संवत् १६६२ वर्षे लिखितं विष्णुदासेनं
|§ 4430

...1 श्री+आर्यरक्षितगुरोः प्रसृते विशाले गच्छे लसन्मुनिकुले
विधिपक्षनाम्नि ।
सूरीश्वरा गुणनिधानसुनामधेया आसन् विशुद्धयशो जगति
प्रसिद्धाः ॥ १ ॥§ 4432

३ श्वानु] णु
१० म] न्ते च वि
१२ गुणी] न्तिर्गुणी
१७ विष्णुदासेनं] न
१९ शो] शसो

तत्पट्टरेकतरणिः तरणिर्भवाब्धौ श्री ध र्म मू र्तिरिति सूरिवरो
विभाति ।
सौभाग्यभाग्यसुखसद्गुणरत्नरत्नगोत्रः पवित्रचरितो महितो
विनेयैः ॥ २ ॥[§ 4434]

(Edtext outside numbered paragraph)

...1 ...श्रेयसे ज्ञानभाण्डागारलिखिते सिद्धिविनिश्चयटीका
वाच्यमाना चानन्दतु ।
नामडागोत्रजो... ... ...र्गिराः ।
साधुः श्री ध न रा जा ह्वो ग्रन्थमेनमलीलिखत् ॥ १ ॥[§ 4437]

# The TEI Header